CC0. In Public Domain, Digitizagtion by eGangotri

294
PV825
V.9
3427
आम्नाय-ग्रन्थालय,
वाराणसी-5

श्रीराधाकृष्णाभ्यां नमः

श्रीमद्भागवत-भक्तमनोरञ्जनी

(श्रीभगवत्प्रसादाचार्यविरचिता)

प्रथमतः चतुर्थस्कन्धपर्यन्ता

नवमं फलम्

सम्पादकः

श्रीदलसुखरामात्मजः कृष्णशङ्करः शास्त्री

'अभिनवः शुकः' वेदान्ताचार्यः साहित्यतीर्थः श्रीभागवतसुधानिधिः

P.LS
S
294
1825 gs
V9

ई० सन् १९६८] [वि० सं० २०२५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

32/27
आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

श्रीकृष्णः शरणं मम

श्रीराधाकृष्णाभ्यां नमः

श्रीभगवत्प्रसादाचार्यविरचिता

श्रीमद्भागवत-भक्तमनोरञ्जनी

प्रथमतः चतुर्थस्कन्धपर्यन्ता

सम्पादकः

श्रीदलसुखरामात्मजः कृष्णशङ्करः शास्त्री

'अभिनवः शुकः' वेदान्ताचार्यः साहित्यतीर्थः श्रीभागवतसुधानिधिः

ई० सन् १९६८]   [वि० सं० २०२५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशकाः

कृष्णशङ्करः शास्त्री
जशवन्तराय वहोरा
पंडित देवेन्द्र विजय
वसंतलाल मशरूवाला

कृष्णराज ठाकरसी
चतुर्भुजदास सेठ
नवनीतलाल सेठ
रवीन्द्रभाई सेठ

वी० के० विड़ला
गिरिधारीलाल मेहता
महेन्द्रभाई शाह
इन्द्रकान्त सेठ

सदस्याः—श्रीभागवतविद्यापीठः। "दिव्यगिरिः" सोला अहमदावाद

2864
PU 825 9ʃ
V.1

(सर्वेऽधिकाराः प्रकाशकाधीनाः)

प्राप्तिस्थानानि

श्रीमणिलाल गान्धी	खारीपोल रोड नडियाद, गुजरात
श्रीभाईदास मगनलाल	गिरिकुंज ह्युझीसरोड बम्बई–७
श्रीहंसराज द्वारकादास	२२ वालकेश्वर बम्बई–६
श्रीशान्तिलालजी शाह	श्रीमाली सोसायटी : नवरंगपुरा अहमदाबाद–९
श्रीप्राणलाल आचार्य	श्रीगुर्जर छात्र सहायक समिति, कर्णघंटा वाराणसी

कार्यालयः—शेठ श्री चतुर्भुजदास चिमनलाल : श्रीभागवतविद्यापीठ, पूर्णिमा, अहमदाबाद—६

मुद्रकः—नरेन्द्रकुमार प्राणलाल आचार्य, आचार्य मुद्रणालय, कर्णघण्टा, वाराणसी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय,
भारतनिधि, करौंदी
वाराणसी-5

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रगट ब्रह्मस्वरूप स्वामी श्रीज्ञानजीवनदासजी योगिजी महाराजना श्रीचरणोमां

योगीश्वराय विमलाय सुरोत्तमाय
सत्सङ्गिवृन्दमुखपद्मदिवाकराय ।
चारुप्रसन्नहसिताम्बुविवर्षकाय
श्रीज्ञानजीवनपदाय नमोऽमलाय ॥ १ ॥

दृष्टिर्यस्य शिशोरिवातिसरला वाणी पुनर्निश्छला
भावोऽगाधतलः परात्मनि परा भक्तिः सदा निर्मला ।
निष्ठा चाविकला सतां पथि तथा कीर्तिः शुभानाविला
शीलः संयमिनां वरः स विदितो योगी गुणैरुज्ज्वलः ॥ २ ॥

योऽसावमान्यपि ददाति परस्य मानम्
तापं सहिष्णुरपि हन्ति जनस्य तापम् ।
लोकान्नमन्नपि समुन्नमयन् स लोकान्
स्वीयैर्गुणैरचकितश्चकितान् करोति ॥ ३ ॥

वाणी दिव्यसुधाभरा मधुसमा सञ्जीवनी संश्रितौ
दृष्टावस्ति सुदिव्यता हरिजनान् द्रष्टुं च दिव्यं समान् ।
स्नेहो मातृसमः प्रियश्च हृदये हास्यं मुखे राजते
तं श्रीज्ञानजियोगिनं गुरुवरं भावेन वन्दे सदा ॥ ४ ॥

केषाञ्चन चत्वारि पद्यानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



પ્રગટ ગુરુહરિ શ્રીયોગીજી મહારાજ

श्री **"योगिजि"** दिति समाख्यया विख्यातानां प्रकटब्रह्मस्वरूप श्री **ज्ञानजीवनदासजित्** स्वामिवर्याणां करसरोजेषु सानुरागं समुपायनीक्रियते विसर्गलीलावधि सम्मुद्रितं भक्तमनोरञ्जनीरञ्जितं सुमनसं सुमनसा श्री भागवतविद्यापीठेन ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi.

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीमद्भागवतमुखव्याख्यानं प्रारभ्यते ॥

श्रीरामचन्द्रश्रीकृष्णश्रीसहजानन्दस्वामि-चरणकमलेभ्यो नमो नमः

श्रीमद्भक्तरञ्जनीप्रस्तावनाकृत्स्वगुर्वधीतश्रीमद्भागवतं सर्वं गूढार्थकमिति द्योतयन्, श्रीबादरायणिना श्रीमद्भागवतारम्भे समादिसमकाल-समधिगतभूतवर्त्तमानभाविभगवदवतारध्यानात्मकमङ्गलमाचरितं तदेवाहं टिप्पणीप्रारम्भे प्रकाशं करोमि, जन्माद्यस्येत्यादिना ॥

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

अथ भूतपूर्वस्य श्रीरामावतारस्य पद्ये पदानि । जन्म आद्यस्य यतः अन्वयात् इतरतः चार्थेष्वभिज्ञः स्वराट् तेने अब्रह्महृदा यः आ आदिकवया ई अमुहि अन्ति यत् सूः अयः ते अजः वारिमृदा आम् यथा अविनिमयः यत्र त्रिसर्गः मृषा धाम्ना स्वेन सत् आनिरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

यः स्वराट् सूर्यः । स्कन्दपुराणान्तर्गतसूर्यसहस्रनामसु भणितत्वात् । स्वयं राजते इति स्वराट् । यद्वा स्वेन वपुषा राजयते दीपयते लोकानिति स्वराट् तस्येति शेषः । अन्वयात् । अन्वयात्, इति प्रथमान्तम्, अन्वयं वंशमतति प्राप्नोतीत्यन्वयात् वंशोत्पन्नः । 'अत सातत्यगमने' इति धातोः क्विप् । अजः । अजनामकः प्रसिद्धो नृपः । यतः । यस्य दशरथस्य । सूः जनकः, अभूत्, 'षूङ् प्रसवे' सूते वा सूयते इति सूः । ततो दशरथात्, आद्यस्य रामस्य जन्माभूत् । किंविशिष्टो यः । इतरतः । इतरेष्वितीतरतः, गृहादन्यत्र वनादिस्थलेषु । चार्थेष्वभिज्ञः 'हली कूर्मेश्वरो लक्ष्मीश्चकारः संस्मृतो बुधैः' इति मातृकाकोशः । ततः । चा लक्ष्मीरूपा सीता तस्यै तत्प्राप्तये अर्थाः कारणानि, कौशिकमुनिना सह गमनं ताडकादिराक्षसवधेन यज्ञसंरक्षणं हरधनुर्भङ्गेन सीतापरिणयनं, तथा इषवो बाणाः, लक्षणया संतुष्टकौशिकर्षिप्राप्तबाणविद्यामन्त्राः । चार्थाश्च इषवश्चेति द्वन्द्वः तेषु अभिज्ञो महानिपुणः । 'अर्थो विषयार्थनयोर्धनकारणवस्तुषु' इति मेदिनी । यद्वा । इतरतः, । इता प्राप्ता रता रमणी सीता येन सः इतरतः । यद्वा । इता गता, अर्थात् रावणेन हृता रता सीता यस्य सः । गत्यर्थास्ते प्राप्त्यर्थाः । यद्वा, इतं त्यक्तं रतं स्त्रीसंभोगो येन सः । वनवासे ब्रह्मचर्यस्य पालनादित्यर्थः । यद्वा । रस्य रामस्य ता लक्ष्मीः, रता सीतेत्यर्थः । 'ता सा मा कमलेन्दिरा' इति हैमः । यद्वा । रस्य रामस्य ता नारी सीतेत्यर्थः । 'तः सुवेषोऽथ ता नारी' इति सौभरिकृतमातृकानाममाला । यद्वा । रात् पृथ्वीसकाशात् तनुते गृह्णाति मनुष्याकृतिमिति रता । 'रश्च रामेऽनिले वह्नौ भूमावपि धनेऽपि च' इत्येकाक्षरः । यद्वा । अजः स्वराट् अजनामा चक्रवर्ती राजा, शेषं पूर्ववत् । अन्वयादितरतः इत्येकं पदम् । 'अनु लक्षणवीप्सेत्थंभूतभागेषु संनिधौ । सादृश्यायामहीनेषु पश्चादर्थसहार्थयोः' इत्यनेकार्थहैमः । ततश्च अनु सह एति वनेष्वपीति अन्वया सीता, अन्वयायै सीतां समधिगन्तुम् आदिं सृष्ट्यारम्भे आदिजातत्वादादिः, जलम् । 'अपोऽस्राक्षीच्छुचिः शुचाः' इति अत्रैवोक्तत्वात् । समुद्रं तरति तारयतीति वा अन्वयादितरतः । प्रथमार्थे तसिल् । कुतः समुद्रतरणप्रयास इत्यपेक्षायामाह । अब्रह्महृदा रावणेन, आदिकवया ई, सीता अमुहि मोहं प्रापिता संज्ञाविधेरनित्यत्वान्न गुणः । न विद्यते ब्रह्म ब्रह्मचर्यं, यस्मिन् तत् । अब्रह्म परस्त्रीसंगमोत्सुकं, हृत् हृदयं यस्य सोऽब्रह्महृत् तेन रावणेनेत्यर्थः । 'ई विषादेऽनुकम्पायां लक्ष्म्याम्' इति मेदिनी । 'ईशब्दो द्रव्यपर्यायेऽव्ययं वृद्धैः प्रदर्शितम्' इत्येकाक्षरनाममाला । 'आ प्रथमम् आदीयते गृह्यते इत्यादिः' इति व्याख्यासुधा । आदिश्चासौ कश्च आदिकः आदिब्रह्म, प्रकरणवशात् रामः, तं पतित्वेन वयते प्राप्नोतीत्यादिकवया सीतारूपा । 'वय गतौ पचाद्यच्' । ई लक्ष्मीः, अमुहीति 'च्चिण् भावकर्मणोः' इति च्चिण् । 'राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि' इति वचनात्, रामं प्राप्ता लक्ष्मीः सीतेत्यर्थः । 'को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे । कामग्रन्थौ चक्रिणि च पतत्रौ पार्थिवे तथा । मयूरेऽग्नौ न पुंसि स्यात्सुखशीर्षजलेषु कम्' इति मेदिनी । 'स्वान्तं हृन्मानसं मनः' इत्यमरः । रावणो भिक्षुवेषेणागत्य सीतां जहारेत्यर्थः । ततो वारिमृदा, रलयोरभेदात् वालिमृदा येन रामेण, वालिं मृद्नाति नाशयतीति वालिमृद् तेन । यः सुग्रीवभार्यापहारिणं रावणमित्रं वालिनामानं जघानेत्यर्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'अथ क्षोदे मृद्नाति मृदयति च क्षुनत्ति दलयति पिनष्टि चूर्णयति' इति क्रियाकलापे। 'मृद क्षोदे' इति धातोः क्विप्। यत् यस्मिन् रावणे, अन्ति, अयः, आ तेने। अन्तो नाशोऽस्त्यस्मादिति अन्ति। यद्वा। अन्तं करोतीति अन्तयति अन्तयतीत्येवंशीलम् अन्ति। बाहुलकादिप्रत्ययः। नाशकारकम्, अयो लोहमयं शस्त्रम् आ तेने विस्तारितम्। अप्रतिहतास्त्रेण रामो रावणं हतवानित्यर्थः। आमिति निश्चयेऽव्ययम्। 'आं स्यादवधृतिस्मृत्योः' इति हैमः। 'आ ज्ञाने निश्चये स्मृत्याम्' इति मेदिनी। यत्र येषु वनादिस्थानेषु, ते प्रसिद्धाः, खरदूषणकुम्भकर्णादयः, अविनिमयः दैत्याः। विगता निमिर्मेषोन्मेषणं येषां ते विनिमयः अनिमिषाः देवाः न विनिमयोऽविनिमयः, अदेवा दैत्या इत्यर्थः। यथा येन प्रकारेण मृषा मिथ्या, नष्टा इति यावत्। भवेयुस्तथा त्रिसर्गोऽभूत्। त्रयाणां सीतारामलक्ष्मणानां, सर्गः लीलासृष्टिः, अभवत्। यथा क्रूरदैत्यराक्षसानां मूलतो निकन्दनं भवेत्तथा तेषां चरित्राण्यभूवन्नित्यर्थः। तथा च। आनिरस्तकु स्वेनसत् कं, धाम्ना उपलक्षितं यस्याभूत् तं सत्यं परं धीमहि। 'आङ् मर्यादाऽभिविध्योः'। आ चतुर्दशवर्षमर्यादापर्यन्तं निरस्ता त्यक्ता कुः पृथ्वी येन तत् आनिरस्तकुः। मर्यादासमाप्त्यनन्तरं पृथ्वीराज्यसुखं गृहीतामति भावः। 'निरस्तः प्रेषितशरे संत्यक्ते त्वरितोदिते। निष्ठ्यूते प्रतिहते च' इति मेदिनी। 'क्ष्मा धरित्री क्षितिश्च कुः' इति धनंजयः। स्वा, स्वकीया योषित् सीतेत्यर्थः। स्वः, भगवान् विष्णुर्लक्ष्मण इत्यर्थः। स्वः भक्तः हनुमानित्यर्थः। स्वः लङ्काराज्यप्राप्त्या भासुरो विभीषण इत्यर्थः। ते स्वाः, इत्येकशेषः। स्वानां इनः सूर्य इव प्रकाशभ्रं सत् मान्यं शस्तं वा। 'सन् साधौ धीरशस्तयोः मान्ये। सत्ये विद्यमाने, इति मेदिनी। कं ब्रह्मसुखम्। धाम्ना मनुष्याकृतिरूपेण रामशरीरेण उपलक्षितम् अभूत्। यद्वा। धाम्ना स्वराजधानीगृहोपलक्षणेन अभूत्। उपलक्षणे तृतीया। 'स्वो निजो भगवान् विष्णुर्भक्तो भासुर इत्यपि। स्वा स्वकीया च योषिच्च गौरी शक्तिः परेश्वरी। स्वं गृहं धनमायुष्यं पुण्यं पाप्मा गतिः सुखम्' इति। 'इनः पत्यौ नृपार्कयोः' इति च मेदिनी। दुष्करस्वपितृप्रतिज्ञानिर्वहणक्षमरावणादिमहाराक्षसक्षयकरस्वकीयभक्तजनसहागतरामस्य राज्यप्राप्त्युत्सवमहानन्दनिमग्नमशेषमभूदिति भावः। तं सत्यं, रावणकृतातिप्रयत्नेनापि स्वपातिव्रत्यभङ्गाभावात् सती सीता तया सहितः अः वैकुण्ठनाथो हरिस्तं परं परमात्मानं श्रीरामचन्द्रं धीमहि ध्यायेमेत्यर्थः। हेति प्रसिद्धौ॥ १॥

अथ वर्त्तमानकालिकश्रीकृष्णपक्षे पदानि

जन्म आत् यस्य यतः अनु अयात् इतरतः च अर्थेषु अभिज्ञः स्वराट् तेने ब्रह्म हृदा यः आ आदिकवये मुह्यन्ति यत्सूरयः। तेजोवारिमृदां यथा विनिमयः यत्र त्रिसर्गः अमृषा धाम्ना स्वेन सदानिरस्तकुहकं सत्यं परं धीमहि॥ १॥

यस्य। ईकारेण लक्ष्म्या सहितः अः वासुदेवः यः तस्य यस्य श्रीकृष्णस्य। 'ई विषादेऽनुकम्पायां लक्ष्म्यां पुनरनव्ययम्' इति मेदिनी। 'अकारो वासुदेवः स्यात्' इत्येकाक्षरः। आत्। प्रजापतिरूपाद्वसुदेवात्, यतः यस्यां देवक्याम्। यद्वा। यतः देवीरूपायां देवक्यां जन्म प्रादुर्भावोऽभूत्। 'अः कृष्णः शंकरो ब्रह्मा शक्रः सोमोऽनिलोऽनलः। सूर्यः प्राणो जनः कालो वसन्तः प्रणतः सुखी' इति सौभरिकृतमातृकानाममालायाम्। 'यः पुञ्जोऽसुर्देवी सूनुः' इत्यपि सैव नाममाला। यो भगवान् जन्मसमये लक्ष्मीसहितचतुर्भुजवैकुण्ठनाथरूपेण मातापित्रोः पूर्वजन्मस्मृतये दर्शनं ददावित्यर्थः। तथा च अर्थेषु भक्तरक्षणदैत्यदारणादिप्रयोजनेषु। ज्ञः निपुणः। 'अर्थो विषयार्थनयोर्धनकारणवस्तुषु। अभिधेये च शब्दानां निवृत्तौ च प्रयोजने' तथा। 'ज्ञो ब्रह्मबुधविद्वत्सु' इत्युभयत्रापि मेदिनी। अत एव इतरेष्वितीतरतः। गोकुलवृन्दावनादिस्थानेषु च, अभि भयरहितं यथा स्यात्तथा अन्वयात्, नातिदूरेऽतिष्ठदित्यर्थः। यद्वा। अयात् अगच्छत्। चकारात् लक्ष्मीरपि अनु सहैव अगच्छत्। 'हली कूर्मेश्वरो लक्ष्मीर्विमलाह्वादिगस्तथा। चित्रधारी चञ्चलश्च चकारः संस्मृतो बुधैः' इति मातृकानाममाला। 'अनु लक्षणवीप्सेत्थं भूतभागेषु संनिधौ। सादृश्यायामहीनेषु पश्चादर्थसहार्थयोः' इत्यनेकार्थहैमः। 'जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि' इत्युक्तत्वा लक्ष्म्या सहावस्थानं युक्तमेवेत्यर्थः। पुनः स्वराट्। स्वाः गोप्यः स्वे गोपाः तैः स्वैः स्वकीयैः राजते इति स्वराट्। एकशेषः समासः। 'स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रियाम्' इति मेदिनी। पुनः यः श्रीकृष्णः। आदिकवये ब्रह्मणे विस्मापयितुम्। हृदा मनःसंकल्पेन ब्रह्म सर्वं ब्रह्ममयम् आ तेने, समन्ताद्विस्तारयामास। वत्सगोपवेणुवेत्रादिसर्वस्वरूपः स्वयमेव श्रीकृष्णो बभावित्यर्थः। यत् यस्यां मायायां सूरयः बलभद्रादयोपि मुह्यन्ति। तथा च। तेजोवारिमृदां यथा यथावत् विनिमयः परस्परधर्मावभासरूपः भवति। तेजसश्चन्द्रादेर्विनिमयो निस्तेजोवस्तुभिः सहधर्मपरिवर्त्तः। तच्छ्रीमुखादिरुचा चन्द्रादेर्निस्तेजस्त्वविधानात्। निकटस्थनिस्तेजोवस्तूनां स्वभासा तेजस्वितापादनात्। तथा वारि कठिनं भवति वेणुवाद्येन, कठिनं मृत्पाषाणादिश्च द्रवति। पुनः यत्र श्रीकृष्णे त्रिसर्गः त्रिषु गोकुलमथुराद्वारकास्थानेषु सर्गः लीलासृष्टिः, अमृषा सत्यरूपास्ति। 'सर्गस्तु निश्चयाध्यायमोहोत्साहात्मसृष्टिषु' इति मेदिनी। पुनः स्वेन धाम्ना स्वजन्मनैवेत्यर्थः। 'धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः' इति हैमः। सदानिरस्तकुहकम्। सदा निरन्तरं बालभावादारभ्य स्वधामगमनपर्यन्तमित्यर्थः। निरस्ताः नाशिताः कुहकाः मायाविनो दैत्या येन सः सदानिरस्तकुहकस्तम्। 'कुह विस्मारणे' 'कुह विस्मापने' चेतिधातोः कुहयन्ते इति कुहकाः। संज्ञार्थे क्वुन्। प्रबल-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दत्यनाशनेनैव भूभारोद्धरणे स्वायुःसमाप्तिरित्यतः। 'अन्योऽपि धर्मरक्षायै देहः संध्रियते मया। विरामायाऽस्य धर्मस्य काले प्रभवतः क्वचित्' इति श्रीकृष्णोक्तमनुसंधेयमत्रेति भावः। एतादृशम्। सत्यं सत्यात्मकम्। सत्यव्रतं 'सत्यपरम्' इति श्लोकोक्तं परं परमात्मानं श्रीकृष्णं धीमहि ध्यायेम ॥ २ ॥

अथ भाविकालिकश्रीस्वामिनारायणपक्षे पदानि

जन्म आद्यस्य यतः अन्वयात् इतरतः च अर्थेषु अभिज्ञः स्वराट् तेने अब्रह्महृत् आयः आदिकवये मुह्यन्ति यत् सूरयः। तेजः अवारि मृदां यथा विनिमयः यत्र त्रिसर्गः मृषा धाम्ना स्वेन सदानिरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

यतः अक्षरातीतपुरुषोत्तमात्। आद्यस्य। आदौ भव आद्यस्तस्य महापुरुषस्य जन्म भवति। यः अर्थेषु भक्तरक्षणदैत्यदारणादिप्रयोजनेषु अभिज्ञः प्रवीणः। अत एव इतरतश्च इतरेष्वपि मनुष्याद्भिन्नेषु मत्स्यकच्छपवराहादिजलजन्तुष्वपि अन्वयात् अन्वगच्छत्। सार्वविभक्तिकस्तसिल्, इत्यनेन सप्तम्यर्थे तसिल्। मत्स्याद्याकृतितत्तद्योग्यचेष्टाश्चानुसृतवानित्यर्थः। भक्तपारवश्यप्रकाशकान् तरतमभावान्वयसामर्थ्यसूचकानवतारानदधादिति भावः। 'इतरोऽन्यत्र पामरे' इति मेदिनी। 'प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः' इत्यमरः। 'अनुर्हीने सहार्थे च पश्चात्सादृश्ययोरपि' इति मेदिनी। ननु कथं लोकोत्त्यऽसमञ्जसमत्स्याद्यवतारनाम्यं दर्शयामासेत्यत्राह। स्वराट्। नास्ति राट् राजा स्वामी यस्य स अराट् सुतरामराट् स्वराट्। स्वस्य कोपि नियन्ता नास्ति स्वयं तु सर्वेषां जीवेश्वराणां नियामक इत्यर्थः। सर्वज्ञत्वसर्वनियन्तृत्वादिसकलैश्वर्यसंपूर्णो दिव्याकृतिरक्षराधीशो भक्तिधर्मपारवश्यान्मनुष्याकृतिर्बभूवेति तच्चरित्रद्वारा सूचयन्नाह। येन अब्रह्महृत् आयः तेने। येन श्रीस्वामिनारायणेन, न ब्रह्म अब्रह्म, ब्रह्मचर्याऽभावो मैथुनं तत् हरतीति आश्रितानामपकर्षतीति अब्रह्महृत्। त्यागिगृहस्थानां यथायोग्यब्रह्मचर्यपालनप्रतिपादक इत्यर्थः। हरतीत्यस्याऽपकर्षतीत्यस्मिन्नर्थे प्रमाणं यथा। 'मुकुलयति मुद्रयत्यपि संकोचयति च निमीलयत्यपि च। मीलाकृतौ हठहृतौ त्वपकर्षत्याच्छिनत्तिहरतीति' इति विद्यानन्दकृते क्रियाकलापग्रन्थे। आयः। आसमन्तात् अय्यते प्राप्यते अक्षरं धामाऽनेनेत्यायः पन्थाः, तेने विस्तारितः। 'अय गतौ' पचाद्यच्। यद्वा। एति गच्छति ब्रह्मधामाऽनेनेति। 'इण् गतौ' 'पुंसि संज्ञायाम्—' इति घञ्। यद्वा। अयनमेव आयः। 'अयनं निलये मार्गे दक्षिणोदग्गतौ रवेः' इति रत्नमाला। यद्वा। 'अयः शुभावहो विधिः' इत्यमरः। अयस्यायं आयः शुभविधिमार्गः भागवतधर्ममार्गं इति यावत्। श्रीकृष्णेनोद्धवं प्रति सत्सङ्गमूलको भागवतधर्मः प्रोक्तः स च रामानन्दस्वामिरूपेणोत्पन्नेनोद्धवेनायमेव मार्गः औद्धवीयसंप्रदायेति नाम्ना स्थापितः तं श्रीहरिर्विस्तारयामासेति हेतोः 'तनु विस्तारे' इति धातोः प्रयोगं तात्पर्यमवसेयम्। किमर्थमयं पन्थाः विस्तारं प्रापित इत्याकाङ्क्षायामाह। आदिकवये अक्षरधाम प्रापयितुम्। आदिम् अक्षरातीतपुरुषोत्तमं कवते वा कवयति तन्माहात्म्यं वर्णयति स्तौतीत्यादिकविः अक्षरपुरुषस्तस्मै। अक्षरब्रह्मणो रूपद्वयं पुरुषरूपं धामरूपं चेत्यस्मिन् संप्रदाये प्रसिद्धम्। 'आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते' इति श्रुतेः। कविरित्यत्र कुशब्दे इति धातोरौणादिक इप्रत्ययः। कवते स्तौतीत्यत्र 'स्तवने नौति प्रशंसति श्लाघते च वर्णयति। ईट्टे कवयति कवते विकत्थते चाभिनन्दति च' इति क्रियाकलापग्रन्थोक्तोऽर्थो बोध्यः। कवये इत्यत्र। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इत्यनेन तुमोऽप्रयुक्तस्य कर्मणि चतुर्थी। ब्रह्मचर्यं विना ब्रह्मादयोऽप्यपरधाम न प्राप्नुवन्ति तद्भिन्नानि तु प्राप्नुवन्तीत्याशयेनाह। यत् यस्मिन् ब्रह्मचर्यमार्गे सूरयो ब्रह्मादिज्ञानिपुरुषाः मुह्यन्ति। अत एव तेने इत्यनेन संबन्धः। अयं भावः। ब्रह्मचर्यस्य व्यवस्थया स्थापनेन सुगमत्वात्सामान्यजीवैरपि यद्व्रतनियमप्रतापैश्वर्यादक्षरधाम प्राप्यतेऽनायासेनेति तद्वृत्तान्तावबोधकेतिहासाः सांप्रदायिकग्रन्थेभ्योऽवसेया इति। अत्र ब्रह्मशब्दस्य ब्रह्मचर्यरूपोऽर्थः। 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः' इति वार्तिकेन सत्या भामेतिवदुत्तरपदलोपः। यद्वा। नामैकदेशेन नाममात्रस्य ग्रहणम् 'ब्रह्मचर्यं बृहत्तपः' इति। 'वेदे भूरिप्रयोगाच्च गुणयोगाच्च। शार्ङ्गिणि। तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने' इत्युक्तेः। बृंहति बृंहयति तस्मादुच्यते ब्रह्म। बृहन्तोऽस्मिन्गुणाः। बृहत्वाद्बृंहणत्वाच्च ब्रह्मेति परिपठ्यते' ब्रह्म परिवृढं सर्वत्र' इत्यादिना च 'ब्रह्मशब्दो निरुक्तः। 'ब्रह्म तत्त्वं तपो वेदाः ब्रह्मा विप्रः प्रजापतिः' इति कोशाच्च ब्रह्मचर्यार्थं इति। पुनः कीदृशः उद्धवाध्वप्रवर्त्तकश्रीसहजानन्दस्वामी, येन मृदां तेजः अवारि। मृदन्ति पीडयन्ति साधूनिति मृदस्तेषाम्। 'मृद क्षोदे' इति धातोः क्विप्। असुरांशेनोत्पन्ननृपगुर्वाचार्योऽमात्यादिव्यपदेशभाजां तेजः प्रतापः बलं वा। 'तेजो बले प्रतापेऽग्नौ' इति रत्नमाला। अवारि निवारितम्। 'वृञ् आवरणे' वा 'वृक् आवरणे इत्याद्यन्तगणपठितयोर्धात्वोर्लुङि 'चिण भावकर्मणोः' इति कर्मणि चिण्। पुनश्च। यत्र त्रिसर्गः तथा मृषा यथा विनिमयः। यत्र यस्मिन् प्रकटपरमात्ममनुष्यस्वरूपे, त्रयाणां भूतेन्द्रियदेवतानां सर्गः सृष्टिः तथा मृषा यथा येन प्रकारेण विनिमयः अन्यस्मिन्नन्यावभासरूपः, मिथ्या भवति। तदेव भगवन्मनुष्यरूपं प्रेमप्रयुक्तमाहात्म्यज्ञानातिशयवद्भक्तानां दिव्यरूपत्वेनाऽवभासमानत्वादिति भावः। 'सर्गस्त्यागस्वभावयोः। उत्साहे निश्चयेऽध्याये मोहानुमतिसृष्टिषु' इति हैमः। यद्वा। यत्र पूर्वोक्ते आयशब्दवाच्ये औद्धवीयसम्प्रदाये त्रिसर्गः त्रयाणां धर्मार्थमोक्षाणां पुरुषार्थानामब्रह्महृदिति विशेषणात् कामस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तु सुतरां त्यागः। पूर्वं प्राप्तोऽत एव पुरुषार्थत्रयाणां सृष्टिः अमृषा सत्याऽस्ति। तत्र दृष्टान्तः। यथा अविनियमोऽन्यस्मिन्नन्याव-भासराहित्यं सत्यः तथा त्रयाणाम् आत्मानात्मपरमात्मनाम्। वा। नियमनिश्चयपक्षाणां वा। आत्मनिष्ठत्वपातिव्रत्यदासत्वानामङ्ग-त्रयाणाम्। वा। वैराग्यात्मनिष्ठामाहात्म्ययुक्तभक्तीनां सृष्टिः अमृषा सत्या साक्षात् प्रतिभाषते तादृशमुद्धवसंप्रदायं ततानेत्यर्थः। पुनश्च। धाम्ना प्रभावेण स्वजन्मना वा। 'धाम जन्म प्रभास्थानप्रभावसुखसद्मसु' इति रत्नमाला। स्वेन सदानिरस्तकुहकम्। स्वं स्वामिनारायण एव इनः स्वामी येषां ते स्वेनाः अनन्याश्रयाः। प्रत्यक्षपुरुषोत्तमोपासका इत्यर्थः। ते च ते सन्तः सत्पुरुषा-स्तेषामा समन्तान्निरस्तं निर्मूलीकृतं कुहकं मायाकपटं मायिकभावमात्रं वा येन सः तम्। यद्वा। निरस्ता कुहका माया येन तम्। 'इन्द्रजालं च माया वै कुहका चापि भीषणा' इति वचनात्। 'स्वोऽस्त्री धने पुमान् ज्ञातौ त्रिष्वात्मीये स्वमात्मनि' इति रत्नमाला। 'इन पत्यौ नृपार्के च' इति विश्वः। 'निरस्तः प्रेषितशरे संत्यक्ते त्वरितोदिते। निष्ठ्यूते प्रतिहते च' इति मेदिनी। देहत्रयगुणत्रयाऽ-वस्थात्रयादिमायिकभावभिन्नशुद्धसत्तात्मकब्रह्मरूपस्वात्मनि प्रकटपरमात्मस्वरूपसाक्षात्सदादर्शनानन्दमग्नाः सर्वसङ्गिनो मया कर्त्तव्या इति हरिवाक्यहार्दत्वादिति भावः। एतादृशम्। सत्यं परं तं धीमहि। सत्यं सत्यात्मकं स्वचरणं पाति रक्षतीति सत्यंपो धर्मदेवः। प्रथमस्कन्धोक्तपारीक्षताख्याने पृथ्वीधर्मसंवादे द्रष्टव्यम्। निलिम्पा देवाः, मिलिन्दाश्चमराः विशम्पा राजान इतिवदलाक्षणिकोऽपि मुमागमो बोध्य इति दिक्। यद्वा। सत्यमित्यव्ययम्। 'तथ्याङ्गीकारयोः सत्यम्' इति हैमाव्ययकोशः। सत्यं स्वीकृतं पातीति सत्यंपः। 'गापोष्टक्' इति सूत्रेण 'पा रक्षणे' इति धातोष्टक्। सत्यंपात् धर्मदेवात् राति आदत्ते मनुष्याकृतिमिति सत्यंपरस्तम्। रा दाने आदाने च' इति धातोः 'आतोऽनुपसर्गे' इति कः। तं धर्मात्मजं श्रीसहजानंदस्वामिनं धीमहि ध्यायेम। यद्वा। यो वै स धर्मः सत्यं वै तत् इति बृहदारण्यकश्रुतेः। सत्यमिति शब्देन धर्मदेवः। ब्रह्मामृतं पिबेत् इति श्रुत्युक्तं ब्रह्मानन्दरसं पिबति या सा पाः भक्तिः। सत्यं च पाश्च तयोः समाहारस्तस्मात् धर्मभक्तिसकाशात् राति आदत्ते मनुष्याकृतिमिति सत्यंपरः। पकारः पवने प्रोक्तः पश्च पाने च पातरि' इत्येकाक्षरी नाममाला। यद्वा। अमित्यव्ययम्। अं परमात्मानं पाति रक्षतीति अंपः धर्मदेवः। अं-'अङ्कुरो व्योमरूपश्च प्रद्युम्नश्चन्द्रसंज्ञकः। अनुस्वारस्तथा बिन्दुरंकारश्च शिरोऽव्ययः' इति मातृकाकोशः। 'अं भवेत्परमं ब्रह्म अः स्याच्चैव महेश्वरः' इत्येकाक्षरी नाममाला, सतः धर्मस्य स्त्री सती 'सन् साधौ धीरशस्तयोः मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियाम्' इति मेदिनी। सती धर्मस्त्री भक्त्यपरपर्याया मूर्त्तिः अंपः धर्मदेवस्तयोः पुत्रः सत्यंपरः। श्रीसहजानन्दस्वामी, तं धीमहीति योजनीयम्॥ १॥

अथ रामकृष्णयोः पक्षे प्रसिद्धार्थत्वात्तृतीयस्य श्रीसहजानन्दस्वामिनः पक्षेऽनयोः श्लोकयोर्व्याख्यां केवलमत्रस्थानपूर्त्यर्थं प्रदर्शयामि। पूर्वश्लोके श्रीसहजानन्दस्वामिविस्तारितः उद्धवसंप्रदायाख्यः स च कीदृश इत्याकाङ्क्षायामाह॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वाऽऽस्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुद्ध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ २॥

धर्म इति। अत्र पूर्वश्लोकोक्ते उद्धवसंप्रदायमार्गे धर्मः धरति साक्षाद्धीश्वरमिति धर्मः, वा ध्रियते जनैर्मोक्षायेति धर्मः। 'धृञ् धारणे' अस्मात् अर्त्तिस्तु सु' इत्यादिना मन्। इति व्याख्यासुधायाम्। 'धर्मोऽस्त्री पुण्य आचरे स्वभावोपमयोः क्रतौ। अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे' इति मेदिनी। स च कीदृशः। प्रोज्झितकैतवः, उज्झ उत्सर्गे उज्झनं उज्झः त्यागः प्रकृष्ट उज्झः प्रोज्झः महात्यागः स संजातो येषामिति प्रोज्झिताः अष्टविधस्त्रीद्रव्यपररसास्वादादिमहात्यागिनः। जातार्थे ताद्धित इतच् प्रत्ययः। ते एव केतुश्चिह्नं तदेव कैतवम्। 'केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि' इति मेदिनी। प्रोज्झिताः महात्यागिपुरुषा एव कैतवं लक्ष्म यस्य स तथोक्तः पुनः कीदृशः सः। अत्र परमः न विद्यते त्रपा लौकिकी लज्जा अहो एते स्वामिनारायणीया इत्याद्युपहासोक्तौ लज्जा येषां ते इत्यऽत्रपाः ते एव रमन्ते यस्मिन्नित्यत्रपरमः। पुनश्च अत्र श्रीनारायणमुनिप्रवर्त्तितमार्गे आस्तवम् आ समन्तात् स्तवः स्तुतिर्यस्य तत्तथोक्तं वसति सदैकरूपेणेति वस्तु मानुष्याकारेऽपि स्वाऽखण्डितदिव्याकारप्रदर्शनात् सहजानन्दनामधेयं परमब्रह्मात्मकं कर्त्तु निर्मत्सराणां सतां वा एव वेद्यं वर्त्तते। मत्सररहितैः सत्पुरुषैरेव ज्ञातुं योग्यं भवतीत्यर्थः। अस्मिन्संप्रदायेऽपि निर्विकल्पकात्युत्तमनिश्चयस्यैव प्राधान्यादिति भावः। तद्वस्तु कीदृशं मोक्षदम्। पुनश्च कीदृशं तापत्रयोन्मूलनम्। तापानां संतापरूपजीवकर्मणां त्रयं संचितप्रारब्धक्रियमाणाख्यं त्रिकं तस्य उन्मूलनं नाशनं यस्मात्तत्तथोक्तम्। तथा च। महामुनिकृते महामुनिना श्रीसहजानन्दस्वामिना कृते विस्तारिते श्रीमद्भागवते प्रशस्ता श्रीरस्ति एषामिति श्रीमन्तः अनार्द्रकुङ्कुमचन्द्रकात्मकलक्ष्मीचिह्नोपलक्षिताः भागवताः प्रत्यक्षभगवद्भक्ताः सत्सङ्गिनो यस्मिन् तस्मिन्। अत्र अस्मिन् सत्सङ्गोपलक्षितसंप्रदाये कृतिभिः सत्सङ्गिभिः ईश्वरः साक्षात् श्रीकृष्णः, सद्यः हृदि अवरुद्ध्यते सामान्यजीवैरपि अल्पसाधनेन प्रत्यक्षपरमेश्वरः शीघ्रं हृदि स्थापयितुं शक्यते इत्यर्थः। परैः अन्यसंप्रदायस्थपुरुषैरित्यर्थः। किं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किमिति वितर्के कुत्सायां वितर्के च निषेधप्रश्नयोरपि' इति मेदिनी । ईश्वरः हृदि अवरुद्ध्यते इत्यर्थः । तेषां विषयपुष्टिप्रवाहगतत्वादिति भावः । शुश्रूषुभिः सेवाङ्गवद्भिः तत्क्षणादेव ईश्वरः हृदि अवरुध्यते । शुश्रूषां सेवां कुर्वन्तीति शुश्रूषन्ति शुश्रूषन्तीत्येवंशीलाः शुश्रूषवस्तैस्तथोक्तैः । 'वरिवस्या तु शुश्रूषा परिचर्याप्युपासना इत्यमरः । शरीरमुखसंत्यागेन [illegible] सिद्धास्तत्तु हरिवाक्यसुधासिन्धुप्रमुखसांप्रदायिकग्रन्थप्रामाण्येनावसेयम् ॥ २ ॥

आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

ननु किमर्थमस्यारम्भ इत्याकाङ्क्षायामाह

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् । पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

निगमेति । निगमकल्पतरोः निगमे अध्वनि प्रथमश्लोकोक्तमोक्षमार्गात्मकोद्धवसंप्रदाये इत्यर्थः । 'निगमाः पूर्वणिग्वेदनिश्चयाध्ववणिक्पथाः' इति हैमः । कल्पतरुः हरिलीलाकल्पतरुनामा श्रीरघुवीराचार्यकृतो ग्रन्थस्तस्य फलम् अमृतफलवत्तत्साररूपमित्यर्थः । शुकमुखात् शुकानन्दस्वामिमुखात् गलितं निर्गतं तेन तद्ग्रन्थस्य टीकया स्फुटार्थविवरणविधानादित्यर्थः । अत एव अमृतद्रवसंयुतम् अमृतमयो द्रवो रसोऽमृतद्रवस्तेन संयुतम् । फलपानविधानस्याशक्यत्वात्तद्द्रवरूपविवरणरसविधानादिति भावः । रसमालयं रसो भक्तिरसः मा लक्ष्मीश्च तयोः आलयं स्थानरूपं पारलौकिकैहलौकिकसुखसाधनरूपमित्यर्थः । भुवि भागवतं भगानि ऐश्वर्याणि सन्त्येषामिति भगवन्तः भगवतामिदं भागवतं भगवतो भगवद्भक्तानां च चरित्रात्मकं शास्त्रं प्रकटभागवतमित्यर्थः । तस्य तु शिवभागवतवत्समासः । तत् हे भावुकाः भक्ताः अहो रसिका सन्तः पिबत । भवनशीलं भावुकं 'भू प्राप्तौ' चुरादिः । 'लष पतः पद इत्युकञ् इति व्याख्यासुधायाम् । भावुकं क्षेमम् अस्त्येषामिति भावुकाः ' अर्श आद्यच्' । यद्वा भव एव भावः भवो भद्राप्तिसत्तयोः' इत्यजयः । यद्वा भावोऽभिप्रायः प्रशस्तो भावोऽस्त्येषामिति । 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु । क्रियालीलापदार्थेषु विभूतिबन्धुवस्तुषु' इति मेदिनी । भावुकाः हे भव्यपुरुषाः अहो इति रसः आश्चर्यकारकोऽयं रसः इति मनसि अस्त्येषामिति अहो रसिकाः श्रद्धामाहात्म्ययुक्ताः सन्तः यूयं मुहुः पिबत देवानामिदं भागवतामृतपानं दुर्लभमिति भुविपदेन द्योतितम् । अत एवेदं प्रकटभागवतं पुनः पुनः सादरं शृणुतेति भावः ॥ ३ ॥

इति श्रीधर्मधुरंधरधर्मात्मजप्रत्यक्षपुरुषोत्तमस्य प्रपौत्रेण श्रीविहारिलालाचार्येण विरचितटिप्पणीप्रारम्भे श्रीमद्भागवतमुखमाख्यानं समाप्तम् ॥

आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय, भरतनिधि, करौंदी वाराणसी-5

प्रस्तावना

ॐ श्रीस्वामिनारायणाय नमोनमः

अथ समस्तवैकुण्ठमहावैकुण्ठादिभगवद्धाममूर्द्धमुकुटमणिरमणीयतमे निगमागमाद्युक्तब्रह्मब्रह्मपुर-ब्रह्मधामाऽमृतधामाऽनन्ताऽक्षराऽक्षरधाम-परपद-परमव्योम-चिदाकाशेत्यादिनानानामधेयाभिधेये श्रीगोलोकमध्यस्थाक्षरधामनि । अनन्तकोटिब्रह्माण्डमहाराजाधिराजतया सदा विराजमानः। सच्चिदानन्द-घनघनरस-घनाघन-सुन्दरश्यामरूपोऽपि रूपातिशयकान्तकान्तिकलापेन शुद्धशान्तातिश्वेतायमानसदासाकारदिव्यभव्यस्वरूपः। नित्यनिरवद्यनिरन्तरनिरवधिकातिशयसौष्ठवसौगन्ध्यसौन्दर्यसौकुमार्यसौशील्यकौशल्यवात्सल्यलावण्यकारुण्यादिकल्याणकार्यगण्यगुणगणगरीयान् अपारकोट्यहिमभानुहिमभानुचित्रभानुप्रभाप्रकर्षपरास्कन्दकप्रत्यङ्गतेजःसमूहभासुरमूर्त्तिः। असंख्यब्रह्माण्डाधीशाधीशैः प्रतिक्षणप्रतीक्ष्यमाणक्षणप्रेक्षणामृतप्रोक्षणः। श्रीकृष्ण-कृष्ण-पुराणपुरुष-पुरुषोत्तम-नारायण-श्रीमन्नारायण-वासुदेव-परमात्म-परमपुरुषेश्वर-परमेश्वर-ब्रह्म-परब्रह्मविष्णु-महाविष्णु भगवदादिपर्यायः। क्षराक्षरातीतक्षराक्षरात्म-सर्वज्ञ-सर्वकर्तृ-सर्वनियन्तृ-सर्वाधार-सर्वव्यापक-सर्वकारणकारण-निर्गुण-स्वप्रकाश-स्वतन्त्र-सर्वेश्वरेश्वरः। ब्रह्मरूपकोटिकोटिमुक्तोपासितः। अनन्तकोटिब्रह्माण्डोत्पत्तिस्थितिलयलीलः। प्रकृतिपुरुषकालप्रधानपुरुषमहत्तत्त्वादिस्वशक्तिप्रेरकः। सदा किशोरमूर्त्तिः। कोटिकोटिकंदर्पदर्पहरदिव्याङ्गः। अनर्घ्यदिव्यांशुकाभरणभूषः। धृतामूल्यरत्नमयमकराकृतिकुण्डलः मूर्द्धधृतमहारत्नखचितमुकुटस्थदिव्यकुसुमशेखरविराजमानमुखारविन्दमधुरमन्दहासः। शारदीयशतपत्रपद्मनेत्रः स सकरुणकटाक्षवीक्षानन्दितमहामुक्तसमूहः। महासुगन्धिचन्दनचर्चिताङ्गः। अतिमधुरस्वरवेणुनादानन्दितराधालक्ष्मीप्रभृतिस्वभक्तप्रगीयमानविजयः। मूर्तिमत्सुदर्शनाद्यायुधनन्दसुनन्दश्रीदामादिपार्षदाणिमादिसिद्धिधर्मज्ञानवैराग्याद्यैश्वर्यैर्निषेवितः। मूर्तिमद्वेदैः संस्तुतः। धृत-वासुदेवादिचतुर्व्यूह केशवादिचतुर्विंशतिमूर्त्ति वराहाद्यवतारः। श्रीकृष्णो जयतितराम्।

स एव सकलैश्वर्यसंपूर्णः। पृथिव्यामैकान्तिकधर्मप्रवर्त्तनायैकान्तिकभक्तधर्मभक्तिमरीच्यादिमुनिसंरक्षणतत्सुखप्रदानानन्तजीवोद्धरणाधर्मध्वंसनादिकार्याणि विधातुं कोशलदेशे छुप्पयोग्रामे सामवेदीयसावर्णिगोत्रतिलकसरवज्ञातीयब्राह्मणपण्डितावटङ्कहरिप्रसादात्तत्पत्नीप्रेमवत्यां नगाग्निवस्विन्दुमिते १८३७ विक्रमसंवत्सरे मधुमासशुक्लनवमीरात्र्यां दशघटिकाव्यतीतायां प्रादुर्बभूव। तत्र चात्यद्भुतबाललीलाकृन्नीलकण्ठहरिकृष्णघनश्यामनामा श्रीहरिर्मातापित्रोर्दिव्यगतिं गतयोः सतोः स्वस्य च मासत्रयाधिकैकादशवर्षाणि व्यतीतानि विज्ञाय देवताप्रार्थितस्तीर्थयात्रामिषेणानन्तजीवानुद्धर्त्तुकामो वर्णिवेषं दधन्निर्मोहो निजनिकेतनान्निर्जगाम। प्रभूततीर्थस्थानानि पावयन्नधर्मसर्गोन्मूलनेन विजयं विदधत्। सोऽचिन्त्यशक्तिरीश्वरः षट्पञ्चाशदधिकाष्टादशे वैक्रमवर्षे नभोनीलपक्षषष्ठ्यां सौराष्ट्रदेशे, श्रीमद्भागवते भगवतोपदिष्टभागवतधर्मोपलक्षितोद्धवसंप्रदायस्थापकानामुद्धवावताररूपरामानन्दस्वामिचरणानां लोजग्रामस्थमन्दिरमाससाद। ततश्च पिप्पलग्रामे श्रीरामानन्दस्वामिगुरोर्भागवतीं दीक्षां जग्राह। गुरुणा च सहजानन्दस्वामी नारायणमुनिरिति नामद्वयेन सर्वत्र विख्यातिं नीतः स नीलकण्ठमहामुनिः। स च रामानन्दमुनिर्निजधर्मधुरं तस्मिन्निधाय दिव्यगतिं जगाम। ततः श्रीसहजानन्दस्वामी स्वाद्भुतप्रतापप्रकर्षं प्रद्योतयन् भिन्नभिन्नमतावलम्बिलोकसमूहेभ्यस्तत्तदिष्टदेवरूपेण स्वदर्शनं ददानो योगिदुःसाध्यसमाधिं सद्यः कारयंस्तत्र ब्रह्मपुरगोलोकवैकुण्ठादिस्वधामानि दर्शयन्नैकान्तिकधर्मं संस्थापयामास। तथा सर्वथा स्त्रीद्रव्यविरक्तांस्त्यागिजनांश्च चकार। अपिच यच्छिष्याः शतानन्दमुक्तानन्दादयः प्रौढप्रचण्डप्रतापिपण्डिताः प्रबभूवुः। यत्प्रभावात्ते सत्सङ्गिजीवनप्रभृतिप्रभूतग्रन्थांस्तथा व्याससूत्रभगवद्गीताशाण्डिल्यसूत्रादीनां भाष्याणि च चक्रुः। स च श्रीहरिर्दुर्गपत्तनीयसकुटुम्बाभयराजप्रेमपारवश्यात्तत्र स्वीयानानन्दयंश्चिरं तस्थौ। तथा भूरिकालभोजितासंख्यब्राह्मणः स धार्मिकः भूर्यन्नसत्राणि, प्राज्यदक्षिणान्महायज्ञान्, प्रांशुशिखराणि महामन्दिराणि च कारयामास। तेषु मन्दिरेषु च सप्रभावाः सपरिवाराः स्वप्रतिमाः स्थापयामास। ततश्च स्वसंप्रदायसंरक्षणायोत्तरदक्षिणदिग्विभागेन स्वकीयधर्मधुरं विभज्य स्वज्येष्ठावरजभ्रातृपुत्रयोः श्रीमदयोध्याप्रसादरघुवीराभिधयोर्विन्यस्य स्वावतारप्रयोजनं सर्वं समाप्य च रसवसुसिन्धुरशशिमितविक्रमवर्षे १८८६ शुक्लश्वेतदशम्यां दुर्गपुरेऽन्तर्धानलीलां विस्तारयामास। ततः श्रीरघुवीराचार्यैः स्वसंप्रदायपुष्ट्यै बहवो ग्रन्था बह्व्यष्टीकाश्च चक्रिरे। ततस्तैः श्वभ्रातृपुत्रभगवत्प्रसादाभिधेषु स्वाचार्यपदवीं समर्प्य कथितम्। तद्यथा। यच्छ्रीहरिणाष्टौ सच्छास्त्राणि मानितानि, तन्मध्ये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकटभगवन्महिमानमैकान्तिकधर्मं च सम्यक् ज्ञातुं श्रीमद्भागवतपुराणं मुख्यतया प्रतिपादितम् , प्रतिवर्षं तत्कथाश्रवणाज्ञापि शिक्षापत्र्यां कृताऽस्ति, यद्यपि तद्भागवते प्रचुरटीकाः सन्ति तथापि भगवतः केचित्केवलनिराकारत्वं तथा कलौ बुद्धकल्कीतरावताराभावत्वं तथा परिमितावतारत्वमित्याद्यनेकधा स्वकल्पितं बोधयन्तीति हेतोर्विशिष्टाद्वैतमतोद्भवीयसंप्रदायानुसारिणी, भगवतो गोलोकमध्यस्थाक्षरधाम्नि सदा दिव्यसाकाररूपत्वेन विराजमानत्वं तथा स्वैश्वर्यब्रह्मतेजसा सर्वत्र व्यापकत्वं तथाऽधर्मवृद्ध्या यदा यदा हि धर्मग्लानिस्तदा तदैकान्तिकधर्मसंस्थापनाय तत्प्रतिबन्धकासुरसंहरणाय च भगवदवतारं स्फुटतया प्रकाशयन्ती, तथा द्वापरान्ते वसुदेवाद्देवक्यामाविर्भूतस्य तस्यैव भगवतो भूर्यसुरसंहरणे महान्कालो व्यतीतस्तस्मात्स्वज्येष्ठभ्रात्रे बलभद्रदेवाय स्वमुखेनैव यत्प्रोक्तं ('अन्योऽपि धर्मरक्षार्थे देहः संध्रियते मया') इत्यादि तत्सत्यप्रतिज्ञां साक्षाद्दर्शयन्ती, अर्थादन्यावतारशब्देन स्वामिनारायणावतार एवेति प्रकाशिकाऽत एव रञ्जयित्री श्रीमद्भागवतटीका त्वयैव विधेयेति । तदनन्तरं कृतकृत्यैः श्रीरघुवीराचार्यैर्वृत्तालये तिरोबभूव । ततस्तताज्ञापालकश्रीभगवत्प्रसादाचार्यैर्भक्तरञ्जनीत्यन्वर्थनाम्नी टीका विहिता । स्वसंप्रदायपुष्ट्ये बहवो ग्रन्था बह्व्यष्टीकाश्च चक्रिरे । ततस्तैर्विनीताय मह्यं (विहारिलालनामधेयाय) स्वाचार्यपदवीं दत्त्वान्तर्दधे । ततः श्रीहरिप्रेरणया कतिचित्संस्कृतप्राकृतग्रन्थाष्टीकाश्च प्रमादपरिहारेण मया विहितास्तेनाऽनवरताविद्याभ्यासश्रमसहं मां विज्ञाय वृद्धैर्विद्वद्भिः सद्भिर्भक्तरञ्जन्याः संशोधनपूर्वकं मुद्रणेन तत्प्रसिद्धिं प्रापयितुं प्रोत्साहितः, श्रीभगवद्गीतोक्तैरासुरीसंपज्जीवैः स्ववाक्जालेषु बद्धा दैवीसंपज्जीवा यस्या युक्तियुक्तोक्तिभिः मुक्ता भवेयुरित्याद्युपकारपरंपरां विचिन्त्य, क्वचित्क्वचित्काठिन्यस्थलेषु सुखबोधाय विशेषबोधाय च बुद्धिप्रेरकश्रीहरिप्रेरितो यथामति टिप्पणानि लिखित्वा सटीकमिदं मुद्रापयित्वा प्रसिद्धिं प्रापितवान् । तेन श्रीसहजानन्दस्वामिचरणास्तदाश्रितास्तथा गुणगृध्नवः पण्डिताः प्रमृष्टदोषं पठन्तश्च प्रसन्नाः सन्त्विति ।

स्वामिनारायणस्येयं प्रपौत्रेण विनिर्मिता । विहारिलालाचार्येण सापि स्ताद्भक्तरञ्जनी ॥ १ ॥

स्वीये धाम्नि सदाऽक्षरे परतरे संसेविताङ्घ्रिद्वयो भक्तैर्ब्रह्मशरीरिभिर्य उरुधा वेदान्तवेद्यः प्रभुः ।
नैकाण्डोद्भवपालनादिकरपुंमायानियन्ता स्वराट् कारुण्याम्बुनिधिर्नमामि तमहं श्रीस्वामिनारायणम् ॥ १ ॥

जनानामाप्तानां स्वमिह शरणं स्थापनतया हरेरैकान्तिक्यां जगति ननु भक्तौ वृषभुवः ।
हरिर्यस्मिन् प्रीतः स भृशमभवत्तं शुभगुणं नमाम्याचार्येन्दुं मम हि रघुवीरं गुरुमहम् ॥ २ ॥

चक्रे नित्यं कथां यः प्रकटभगवतः संनिधाने मनोज्ञां यस्मै प्रादात्प्रसन्नो निजधृतवसनादीन्यसौ पूर्णकामः ।
जेता यः पण्डितानां जगति विवदतां देवताचार्यवक्ता नित्यानन्दं मुनीन्द्रं तमनुदिनमहं नौमि भक्तिप्रधानम् ॥ ३ ॥

योगाभ्यासं नितान्तं कलितमुनिगमादिश्रुतार्थं कृतार्थं प्रीत्यै श्रीधर्मसूनोर्विदधतमनिशं स्वामिनारायणस्य ।
गोपालानन्दसंज्ञं मुनिवरमनघं रक्षितैकान्तधर्मं वन्दे नित्यं शरण्यं प्रतिहतजनताज्ञानसंज्ञान्धकारम् ॥ ४ ॥

महाध्यानाभ्यासं विदधतमजस्रं भगवतः पवित्रे संप्राप्तं स्थितिमतिवरैकान्तिकवृषे ।
सदानन्दं सारं परमहरिवार्त्ताव्यसनिनं गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रथमः स्कन्धः

अथ प्रथमोऽध्यायः

श्रीस्वामिनारायणाय नमः । धर्मकुलेष्टदेवाय मारुतये नमः । श्रीसिद्धिबुद्धियुतवीतघ्नविनाशकाय गणेशाय नमः ।

प्रणमामि सर्वनिगमागमोदितप्रथितप्रतापमहमीश्वरेश्वरम् ।
भगवत्प्रसाद उत मानुषाकृतिं हरिमार्य आत्मपरभावसंयुतम् ॥ १ ॥

श्रीधर्मदेवतनयं सततं वसानं श्वेताम्बराणि निजभक्तजनप्रसक्त्यै ।
रक्तादिकान्यपि च तानि विभूषणानि श्रेष्ठोत्सवेष्वपि दधानमहं नमामि ॥ २ ॥

श्रीमद्ब्रह्मपुराधिपः श्रुतिशतोद्गीतप्रभावः परो मायायाः प्रकटः सदा श्रितजनैः स्वान्ते समीक्ष्यः स यः ।
नैकाण्डाश्रितजीवजातहितकृत्संकल्प ईशेश मे स्वामी त्वं हृदये विधत्स्व वसतिं पौत्रस्य ते धर्मजः ॥ ३ ॥
व्यासार्यैः प्रकटीकृतं बुधजनैर्व्याख्यातृभिर्व्याकृतं श्रीमद्भागवतं पुराणमखिलं श्रीकृष्णलीलापरम् ।
द्वैताद्वैतमतानुगैरपि यथाबुद्धिप्रवादान्वितैः स्वीकृत्यान्वयमत्र भक्तजनसंतोषाय न व्याकृतम् ॥ ४ ॥

ततः साकारश्रीहरिपरमभक्त्युत्सुकतरैर्विशिष्टाद्वैताख्योत्तमशुभमतस्थापनपरैः ।
विबुद्धश्रीकृष्णाशयजनविबोधोद्धवपथप्रवर्यैराचार्यैर्निजजनगणान् यत्प्रकथितम् ॥ ५ ॥
शुभं चैतन्मार्गं रुचिरमनुसृत्यातिसुखदं पुराणं चैवैतन्मुनिजनवरप्रेरितमतिः ।
मुदाहं व्याकुर्वेऽन्वयमुखतया श्रीहरिसतां मुदे तद्भक्तानां जगति सुखबोधाय सुधियाम् ॥ ६ ॥

टीकाः सन्ति यदप्यमुष्य सुधियां बोधाय नानाविधा नैकार्थाः प्रतिशब्दमेव विगुणब्रह्मप्रतिष्ठापिकाः ।
विद्वत्तागमका विदां च सगुणब्रह्मप्रवादैर्युता, नैकाऽऽस्वन्वयबोधिकाऽस्ति तत एषाप्यस्तु तद्बुद्धये ॥ ७ ॥
स्वामिनारायणं नत्वा धर्मपुत्रं मुनीश्वरम् । स्वभक्तानन्दकृन्मूर्तिं स्वान्ते ध्यायामि सिद्धये ॥ ८ ॥
हरेः सतां च संप्रीत्यै टीका तेषां प्रसादतः । सान्वयार्थेन संयुक्ता क्रियते भक्तरञ्जनी ॥ ९ ॥
रघुवीरार्यगोपालानन्दाभ्यां हृदि नोदितः । नित्यानन्दशुकानन्दशतानन्दादिभिस्तथा ॥ १० ॥
श्रीहरेर्मनसा पूजाविधानावसरे त्विमाम् । प्रोत्साहितो दत्तवरस्तेषां कुर्वे प्रसत्तये ॥ ११ ॥
निर्मत्सराणां हरिभक्तिभाजामेषा भवेत्प्रीतिकरा सदैव । समत्सराणां तु ततोऽन्यथैव न तेन हानिर्मम कापि चित्ते ॥ १२ ॥

अथात्रभवान् सत्यवत्यां पराशरादीश्वरांशेनेहावतीर्णः कृष्णद्वैपायनो भगवान् परेण ब्रह्मणा नारायणेन कृतेऽस्मिन्ब्रह्मादिस्तम्बपर्यन्ते देवमनुष्यस्त्रीपुरुषपशुपक्ष्यादिरूपे वर्णाश्रमादिभेदभिन्ने जगति तद्दत्तकरणकलेवरान् स्वस्वकर्मानुगुणकर्मप्रवृत्त्या जन्मजरामरणादिनानादुःखार्दितान् जनान्, ब्रह्मादिपरंपरासमधिगतधर्माधर्मादिसंप्रदर्शकान् वेदानपि दृष्ट्वा संजातकरुणस्तदुद्दिधीर्षया मातृपितृसहस्रेभ्योऽप्यतिवत्सलतोपेतं भागद्वयात्मकं वेदं व्याचिख्यासुस्तावत्स्वशिष्येण जैमिनिना तत्पूर्वभागं व्याख्याप्य तदुत्तरभागं च स्वयमेव शारीरकनयैर्व्याख्याय प्रायशस्तत्पूर्वभागोपबृंहणं पञ्चमवेदताप्रसिद्धं श्रीमहाभारतं निर्माय प्राधान्येन वेदान्तार्थोपबृंहणात्मकमष्टादशसाहस्रसंहितारूपं श्रीमद्भागवतं चिकीर्षुस्तावत्स्वेष्टदेवताध्यानात्मकं मङ्गलमाचरत्याद्यश्लोकेन । जन्मादीति ।

॥ श्रीगणेशाय नमः ॥

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

अर्थेषु प्रकृतिपुरुषतत्कार्यभूतेषु देवमनुष्यादिषु । अन्वयात् । एतदीयस्थूलसूक्ष्मभावेऽप्येष्वनुवृत्तिं प्राप्य सर्वदा वर्त्तमानादित्यर्थः । इतरतश्च । प्रकृतिपुरुषाभ्यां विलक्षणत्वेन सकार्यतन्नियन्तृतया पृथगेवावस्थितादित्यर्थः । निमित्तोपादान-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारणतया वर्त्तमानादिति भावः। यतः परमेश्वरात् अस्य विश्वस्य जन्मादि। जन्मस्थितिलया इत्यर्थः। जायते एवंभूत इति शेषः। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्म' इतिश्रुतेः। जन्मादीति तद्गुणसंविज्ञानो बहुव्रीहिः। अभिज्ञः। अभितः सर्वदा सर्वत्र सर्वं जानातीत्यभिज्ञः। 'यो वेत्ति युगपत्सर्वम्' इत्यादिश्रुतेः। स्वराट्। स्वेनैव राजते सर्वं विषयीकरोतीति स्वराट्। अनेन सर्वज्ञत्वादिकं यस्य स्वरूपानुबन्ध्येवेत्युक्तम्। यः परमेश्वरः। आदिश्चासौ कविश्च तस्मै। वेदप्रवर्त्तकत्वेनादिकविरूपाय ब्रह्मणे इत्यर्थः। हृदा स्वमनःसंकल्पेन। ब्रह्म वेदम्। 'ब्रह्म तत्त्वं तपो वेदः' इत्यभिधानात्। तेने प्रकाशितवान् ददाविति यावत्। येन ब्रह्मणे वेदो विश्राणितस्तथाभूत इत्यर्थः। ननु ब्रह्मणे भगवतो वेदाख्यशास्त्रप्रदानस्य किं प्रयोजनमित्याकाङ्क्षायां तद्दर्शयति। मुह्यन्तीति। यदित्यव्ययम्। यं प्रतीति तदर्थः। सूरयो ज्ञानवन्त उपासकाः। मुह्यन्ति। भगवतोऽपरिच्छेद्यमहिमत्वात्तद्वैभवबोधे व्याकुलीभवन्तीत्यर्थः। अपरिच्छिन्नपरमात्मवैभवानुसंधानं हि वेदाख्यशास्त्रैकसमधिगम्यं तत्प्रवर्त्तनाभावेऽपरिच्छेद्यभगवत्स्वरूपगुणविभूत्याद्यवगमो न स्यात्तदा तदलब्ध्या सूरयोऽतीव मुह्येयुरत एषां मोहो मा भूदित्ये-तदर्थं ब्रह्मणे ब्रह्मप्रदानं युक्तमेवेति भावः। यद्वा। यद्यस्मात्। आत्मस्वरूपज्ञाने इति शेषः। सूरयः मुह्यन्ति। तत्तस्मात्। आदि-कवये ब्रह्म तेने इति योजना। ब्रह्मा वेदाद्यथार्थतया मत्स्वरूपज्ञानं प्राप्य स्वप्रजाभ्यः सूरिभ्यस्तद्बोधयिष्यति ततस्ते मत्स्वरूपा-वबोधे निर्मोहा भवितार इत्येतदर्थं ब्रह्मणे भगवत्कृतं वेदप्रदानमिति भावः। किंच। यथा यथायथम्। तेजोवारिमृदां विनिमयः परस्परं मिश्रीकरणम्। यत इति शेषः। अयं भावः। त्रिवृत्करणं तावदण्डसृष्ट्यर्थं तच्च परब्रह्मकृतं न चतुर्मुखकृतम्। 'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन्प्रजाः स्रष्टुमसमागत्य कृत्स्नशः। समेत्यान्योन्यसंयोगं परस्परसमा-श्रयाः। महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते' इत्यादिभिर्वैष्णवादिवचनैस्तस्यावगमात्। अण्डसृष्ट्यनन्तरं चतुर्मुखोत्पत्तिः। 'तदण्डमभवद्धैमं' 'तस्मिन् जज्ञे स्वयं ब्रह्मा' इति च स्मरणात्। एवं चाण्डोत्पत्तेः प्राक्तनं त्रिवृत्करणं परमात्मकर्तृकमेवेति। अस्य नामरूपादेर्व्याकरणस्याप्युपलक्षणत्वात्तदपि परमात्मकर्तृकमेवेति तस्यैव जगत्कारणत्वं न तु जीवप्रधानादेरपीति। यत्र परमात्मनि। त्रिसर्गः सत्त्वादिगुणत्रयकृतः प्रपञ्चः मृषा नास्तीत्यर्थः। 'सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। स शुद्धः सर्वशुद्धेभ्यः' इत्यादिस्मृतेः। ननु कथमेवंभूततास्येति चेन्निरस्तकुहकत्वादित्याह। स्वेनेति। स्वेनात्मीयेनैव। धाम्ना प्रभावेण। 'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः। सदा सर्वकालम्। निरस्तकुहकम्। स्वसंबन्धमात्रेण स्वगुणप्रापकत्वं हि मायाकुहकं तद्वर्जितमित्यर्थः। एतच्च 'जयजय जह्यजामजितदोषगृभीवगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः' इत्यनेन प्रतिपादितमस्तीति भावः। सत्यं कालत्रयेप्यबाधितस्वरूपम्। तम्। परं परमात्मानम्। धीमहि धियां कुर्यास्मेत्यर्थः। नन्वत्र जन्माद्यस्य यत इत्यनेन जगज्जन्मादीन्प्रति परमेश्वरस्योपादाननिमित्तरूपोभयविधकारणत्वमभिहितं तदेकस्य कथं संभवेत्। लोके मृत्कुलालयोर्भिन्नयोरेवोपादानत्वनिमित्तत्वदर्शनादिति चेत्कुलालस्यासर्वशक्तेर्घटादिषु मृत्कार्येष्वनन्वयान्नोपादानत्वम्। अचेतनाया मृदस्तु व्यतिरेकाभावान्न निमित्तत्वम्। परमेश्वरस्य तु प्रत्यक्षादिप्रमाणान्तरानवगतस्य केवलवेदान्तैकसमधिगम्यस्य चिदचिद्विलक्षणस्योभयविधकारणत्वोपयुक्तसार्वज्ञसर्वशक्तियुक्तस्यान्वयव्यतिरेकयोर्वेदान्तेभ्योऽवगतत्वादुभयविधकारणत्वोपपत्ति-रिति। अत्रोक्तविशेषणविशिष्टस्य भगवतो ध्यातुः स्वस्मादुत्कृष्टत्वावगमात्स्वस्य च ततोऽपकृष्टत्वावगमाच्च बोध्यस्य प्रह्वीभावस्या-वगमान्नमस्कारात्मकं मङ्गलमपि कृतं भवतीति बोध्यम्। 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्यभियुक्तोक्तिपालनाय 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि' इति भाष्यकारोक्तेश्च ॥ १ ॥ अथास्य विषयप्रयोजनसंबन्धाधिकारिरूपमनु-बन्धचतुष्टयं दर्शयति।

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥

धर्म इति। महामुनिकृते महामुनिना श्रीबादरायणेन विहिते। अत्रास्मिन्। श्रीमद्भागवते। निर्मत्सराणां परोत्कर्षासहनं मत्सरस्तद्वर्जितानाम्। सतां सत्पुरुषाणाम्। परमः परैर्भगवदैकान्तिकोपासकैर्मीयते प्रमाणीक्रियते इति परमः। धर्मः। प्रोज्झित-कैतवः कपटवर्जितः वर्णितोऽस्तीति शेषः। अत्र कितवस्य भावः कैतवं 'कैतवं नाम लोके मनस्यन्यदभिसंधायान्याभिधानम्' तद्व-त्रापि निगमप्रतिपादितां कालादेः परमार्थामसमर्थतां मनसि निधाय परमेश्वरासमर्थताप्रतिपादनं कैतवं तद्वर्जित इत्यर्थः। अत्र श्रीमद्भागवते। सतामित्येतत्काकाक्षिन्यायेनात्रापि संबध्यते। सतां वेद्यं सद्भिर्ज्ञातव्यम्। वसत्येकरूपेणेति वस्तु तदेव वास्तवम्। कालत्रयेऽप्यपरिणामीत्यर्थः। शिवदं कल्याणाख्यमहामङ्गलप्रदम्। अत एव। तापानाम् आध्यात्मिकादित्रिविधसंतापानाम्, उन्मूलनं मूलान्निवर्त्तकम्। वस्तु परमात्मस्वरूपम् प्रोक्तमस्तीति शेषः। धर्मो द्विविधः साध्यरूपः सिद्धरूपश्च। तत्र 'ते वदन्ति महा-त्मानं कृष्णं धर्मं सनातनम्' इति भारते सिद्धधर्मरूपः कृष्णोऽभिहितोऽस्ति। साध्यधर्मरूपस्तु तदाराधनात्मिका भक्तिः तत्र सतामित्यन्तेन साध्यधर्म उक्तः। वेद्यमित्यादितापत्रयोन्मूलनमित्यन्तेन सिद्धरूपो धर्मः कृष्णः उक्तः। अत्रास्मिन् श्रीमद्भागवते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुते सतीति शेषः। कृतिभिः कृतकृत्यैः। शुश्रूषुभिः श्रवणकर्तृजनैः। तत्क्षणात् श्रवणसमकालमेव। ईश्वरः परमेश्वरः श्रीकृष्णः। हृदि मनसि। अवरुध्यते। साक्षात्समीक्ष्यते। अपरैरेतद्भिन्नैः शास्त्रैः। श्रुतैः सद्भिरिति शेषः किं वा। अवरुध्यते नैवावरुध्यते इति काकुः। एवमत्र श्रोतृप्रवर्त्तनायास्य काण्डत्रयविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यं दर्शितम्। तद्यथा निर्मत्सरसदधिकार्युक्त्या प्रोज्झितकैतवोक्त्या च धर्मस्यापि परमधर्मता कर्मकाण्डविषयशास्त्रेभ्योऽस्य महत्ता चाभिहिता। वेद्यं वास्तवमित्यादिना प्रयोजनोक्तिपूर्वं ज्ञानकाण्डविषयशास्त्रेभ्योऽपि श्रैष्ठ्यमस्योक्तम्। हृद्यवरुध्यते इत्यनेनोपासनाकाण्डविषयशास्त्रेभ्योऽस्य श्रैष्ठ्यं दर्शितम्। 'कृष्णद्वैपायनं व्यासं विद्धि नारायणात्मकम्' इति वचनान्महामुनिकृते इत्यनेन कर्त्तृताऽपि श्रैष्ठ्यमस्योक्तम्। कृतिभिरित्यनेनैतच्छ्रवणेच्छानन्तजन्मजसुकृतैर्विना नोपपद्यत इत्यभिहितम्। प्रधानस्वरूपप्रतिपादनस्य विषयत्वात्स चात्र वस्तुशब्देनाभिहित एव। संबन्धस्तु प्रतिपाद्यप्रतिपादकरूपः। किंचात्र केचिद्वदन्ति। एकेनात्रशब्देनार्थसिद्धौ तत्त्रितयोपादानस्य व्यर्थत्वमिति तच्छङ्कापनोदाय प्रथमस्यात्रपदस्य योजनं त्वित्थम्। न विद्यते त्रपा लौकिकी लज्जा येषां तेऽत्रपा दिगम्बराः शुकसनकादय आत्मारामास्तान् रमयति प्रीणातीति धर्मविशेषणम्। अन्यदत्रपदमस्मिन्नित्यर्थावगमकम्। तृतीयमवधारणार्थकम्। 'अत्राधारेऽवधारणे' इति गोवर्द्धनोक्तेः ॥ २ ॥ एवमस्यानुबन्धचतुष्टये कथितेऽपि प्रामाण्यनिश्चयं विना श्रवणेच्छा नोत्पद्यते तदेतस्य वेदमूलत्वं वदन् जनानभिमुखयति। निगमेति।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

हे रसिका रसज्ञाः तत्रापि। हे भावुकाः सकलरसात्मकभगवत्संशीलनपराः। भागवतं श्रीमद्भागवतनामायं संदर्भः। निगमो वेद एव कल्पतरुः कल्पद्रुमस्तस्य। रसं केवलरसवत्। फलं फलरूपम्। कुतः। अमृतं मोक्षस्तदेव द्रवः सारांशस्तेन संयुतम्। शुकमुखात्। व्याससूनोः शुकस्य मुखं प्राप्येत्यर्थः। भुवि गलितम्। अस्तीति शेषः। अहो एतदाश्चर्यम्। अनेनैतदाप्तेरलभ्यलाभताभिहिता। अतः आलयं लयो मोक्षः। अभिविधावाङ्। मोक्षं प्राप्यापीत्यर्थः। मुहुः। तत् फलमिति शेषः। पिबत श्रवणद्वाराऽऽस्वादयत। नहीदं स्वर्गादिसुखवन्मुक्तानामुपेक्ष्यमस्ति किंतु सेव्यमेवास्तीति भावः। अत्र निगमस्य कल्पतरुत्वनिरूपणं धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधनद्वारा धर्मादिफलजनकत्वात्। भागवतस्य तत्फलत्वनिरूपणं तु निगमसारांशरूपत्वात्। खादतेत्यनुक्त्वा पिबतेति यदुक्तं तत्त्वत्राम्रादिफलेष्विवानुपादेयत्वग्बीजाद्यभावद्योतनाय। रसमित्यस्य रसवत्त्वं तु 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति मतुपो लुगवगन्तव्यस्तेन च 'रसो वै सः' 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतेर्भगवदनुभवानंदवत्त्वं बोध्यम्। किंचात्रास्य निगमतरुफलत्वमभिहितं स्कान्दोत्तरखण्डे एतल्लक्षणाभिधाने। 'ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसंमितः' इत्यत्रास्य स्कन्धवत्त्वं चोक्तं तच्च वृक्षत्वं विना न संभवेदतः कथमेकस्य फलत्वं वृक्षत्वं चेत्याशङ्कायाम् 'आत्मा वै पुत्रनामासि स जीव शरदां शतम्' 'आत्मा वै पुत्र उत्पन्न इति वेदानुशासनम्' इति श्रुतिस्मृत्योः पितृपुत्रयोरेकत्वेनाभिधानात्फलवृक्षयोश्च तथात्वादुभयथोक्तौ न बाधः, एतदभिप्रायमेव 'श्रीमद्भागवताभिधः सुरतरुः' इति श्रीधरस्वामिचरणवचनं च। यद्वा। अत्र यदि रसवत्फलमित्युच्यते तदा त्वगष्ठ्यादिहेयांशप्रसक्तिः रसं फलमिति सामानाधिकरण्यं क्रियते तदा रसस्य फलत्वासंभवः प्रसज्जेतेत्युभयथा बाधेऽमृतद्रवसंयुतं निगमकल्पतरोः फलं भागवतं शुकमुखाद्भुवि गलितं तस्य रसमालयं पिबतेत्यन्वयः कार्यः। तस्येति शेषश्च। एवं सति न बाधः स्यात् ॥ ३ ॥

अथैवं प्रदर्शितानुबन्धचतुष्टयप्रामाण्यस्त्रैकालज्ञो भगवान् बादरायणस्तावदुपोद्घातरूपेऽस्मिन् प्रथमस्कन्धे प्रथमप्रष्टुः परीक्षितः प्रतिवक्तुः शुकस्य चैकत्र समावेशं शुकस्य समागमं परीक्षितः प्रश्नाद्यागहेतुं प्रायोपवेशं तन्निमित्तं विप्रशापं च विवक्षुः प्रायोपवेशात्प्राक्तनं जन्मावधिकं पारीक्षितं वृत्तान्तं ततः प्राक्तनं तत्पित्रादिवृत्तान्तं तथैतत्प्रबन्धकर्तुः स्वस्यैतन्निर्माणनिमित्तदर्शनसमागतदेवर्षेश्च संवादं तदाज्ञयैतत्प्रबन्धनिर्माणं च शौनकसूतमुखेन विवक्षुः शौनकप्रश्नप्रकारं वक्तुमुपोद्घातमाह।

नैमिश इति। अनिमिषो विष्णुस्तस्य क्षेत्रं तस्मिन्। 'क्षेत्रेऽस्मिन् वैष्णवे वयम्' इत्यग्रेऽत्रैवोक्तेः। नैमिशे। ब्रह्मणा विसृष्टस्य मनोमयस्य चक्रस्य नेमिः शीर्यते कुण्ठीभवति यत्र तन्निमिशं तदेव नैमिशं तस्मिन्। शौनक आदिर्येषां ते ऋषयो मुनयः। स्वर्गायो हरिः स एव लोको भक्तनिवासस्थानं तस्मै। तत्प्राप्तये इत्यर्थः। यद्वा। स्वर्गो निरतिशयानन्दस्तस्यायो लाभो यस्मिन् स चासौ लोकः परमपदं तस्मै। तत्प्राप्तये इत्यर्थः। सहस्रं समा अनुष्ठानकालो यस्य तत्। सत्रं ऋत्विज एव यत्र यजमानास्तत्सत्रम्। आसतानुष्ठितवन्तः। नैमिशार्थे प्रमाणं तु 'एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते। यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः। इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयम्। प्रणिपत्य महादेवं विससर्ज पितामहः' इत्यादिवायवीयवाक्यम् ॥ ४ ॥ त इति। तु इति भिन्नोपक्रमे। ते ये सत्रयागे दीक्षां प्राप्य स्थितास्ते इत्यर्थः। मुनयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शौनकाद्या ऋषयः। एकदा कदाचित्। प्रातः प्रातःकाले हुता एव पुनर्हुता अग्नयो यैस्ते तथाभूताः सन्तः। अनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितम्। अर्हार्थनिष्ठान्तं हुतशब्दं मत्वा हुतेन होमार्हद्रव्येण पयःसर्पिरादिना हुता अग्नय आहवनीयादयो यैरित्यन्ये। आसीनं सुखेन मुनिदर्शितपीठे उपविष्टम्। सत्कृतं तद्योग्यसत्कारैः पूजितम्। सूतं स्वाश्रमं प्रत्यागतं रोमहर्षणसुतमुग्रश्रवसम्। इदं स्वबुद्धिस्थं वक्ष्यमाणम्। आदरादादरपूर्वकं पप्रच्छुः॥ ५॥ प्रशंसितः प्रवक्ता सूतो नः प्रश्नोत्तरं संतुष्य करिष्यतीति हृदि कृत्वा प्रष्टव्यार्थं पृष्ठतो विधाय तं प्रशंसन्तः। तत्रापि तावद्युष्मत्प्रश्नोत्तरं वक्तुं नाहं समर्थं इत्याशङ्कां निराकुर्वन्तः शौनकादयः सूतस्य सर्वशास्त्रज्ञानातिशयमाहुस्त्रिभिः। त्वयेति। हे अनघ शास्त्रार्थज्ञाननिमित्तकर्मरूपपापरहित। त्वया इतिहासेन महाभारताख्यनिबन्धेन सहितानि सेतिहासानि पुराणानि ब्राह्मादीनि। चकारान्नारदादीन्युपपुराणानि। यानि धर्मशास्त्राणि मानवादीनि। उतापि अधीतानि यथावत्पठितानि। आख्यातानि श्रावितानि च। खलु निश्चितं न प्रशंसामात्रम्॥६॥ कियन्ति तानि पुराणधर्मशास्त्राणीत्यत आह। यानीति। वेदं विदन्तीति तेषाम्। स्वरूपतोऽनुष्ठानपर्यन्तमर्थतश्च निगमाभिज्ञानमित्यर्थः। श्रेष्ठस्तन्मध्येऽत्युत्कृष्ट इत्यर्थः। भगवान् भगशब्दवाच्यैश्वर्यसंपन्नः। बादरायणः श्रीव्यासः। परं परमात्मतत्त्वम् अवरं प्रकृतिपुरुषतत्त्वं च तद्विदः। तत्त्वत्रययाथार्थ्याभिज्ञाः। अन्ये। मुनयः पराशराद्यः ऋषयश्च। यानि। पुराणानि धर्मशास्त्राणि चेत्यर्थः। विदुर्जानन्ति। हे सूत। तान्यपि। अधीतान्याख्यातानि चेति पूर्वेणान्वयः। वेदविदां श्रेष्ठो बादरायणोऽन्ये च मुनयो यानि विदुरित्यनेन स्मृतीतिहासपुराणानां वेदमूलत्वात्प्रामाण्यं च प्रदर्शितम्॥ ७॥ ननु दुष्कुलोत्पन्नतयाऽनधिकृतशारीरकोऽहमितिहासपुराणाध्ययनजातप्रतीतिमान् कथं भवत्प्रश्नोत्तरं वक्तुं प्रभुरितीमामाशङ्कां वारयन्त आहुः वेत्थेति। हे सौम्य साधो। तेषां बादरायणादीनामनुग्रहः परमानुकम्पा तस्मात्। सदनुग्रहादिति पाठेऽप्ययमेवार्थः। तत् सर्वम्। इतिहासपुराणादिकं तत्प्रतिपाद्यं वस्तु चेत्येवं सर्वमित्यर्थः। त्वं तत्त्वतो यथार्थतया। वेत्थ जानासि। अनधिगतशारीरकोऽपि त्वं तदनुग्रहात्तद्वस्तु यथावद्वेत्सि न त्वापातत इति भावः। सतां तेषामनुग्रहादपि कथं शारीरकाध्ययननिर्णेतव्यं वस्तुतत्त्वमहं विद्यामित्यत्राहुः। ब्रूयुरिति। स्निग्धस्य स्वाऽत्यनुरक्तस्य त्वादृशस्य शिष्यस्य। भवद्विधशिष्यं प्रतीत्यर्थः। गुरवः। गुह्यं रहस्यत्वाद्गोप्यमपि ब्रूयुः। उतेति शारीरकमुखेनानुक्त्वापि केवलमुपदिशेयुरिति भावः॥ ८॥

एवं तस्य स्वप्रश्नोत्तरदानसमर्थत्वमाविष्कृत्य प्रष्टव्यं पृच्छन्ति। तत्रेति। हे आयुष्मन्। प्रशस्तायुरुपेत सूत। भवता तत्र तत्र तेषु तेषु पुराणादिषु। यत् पुंसां जनानाम्। एकान्ततः नियमेन निरतिशयं वा श्रेयः। अव्यभिचारिश्रेयःसाधनमित्यर्थः। अञ्जसा ऋजुमार्गेण यद्वा तत्त्वतः। निश्चितं निर्णीतम्। भवेदिति शेषः। तच्छ्रेयःसाधनं नोऽस्मभ्यं शंसितुम् अर्हसि। प्रस्तोतुं योग्यो भवसीत्यर्थः। को वा श्रेयःसाधनभूतो धर्म इति प्रश्नार्थः॥ ९॥ अथ त्रिवर्गसाधनानामश्रोतव्यतां सूचयन्तः सन्तस्तन्निष्ठानां दौर्भाग्यं श्रोतव्यानां बहुत्वं च वदन्तः सर्वशास्त्रार्थसारभूतं मुक्तिसाधनमेव पृच्छन्ति सार्द्धद्वाभ्याम्। प्रायेणेति। हे साधो सभ्य। अस्मिन् कलौ युगे जना मानवाः। प्रायेण बहुधा। अल्पायुषोऽनियतशतवर्षायुषः। अनेन कृतादियुगेष्विव यथेष्टं भोगानन्तरं मुमुक्षोदयासंभव उक्तः। मन्दा मन्दप्रकृतयः कर्मकरणशक्तिशून्याः। अलसा इति वा। अनेन श्रेयःसाधनसंपादनासामर्थ्यं सूचितम्। तत्रापि सुतरां मन्दा अल्पा मतयो येषां ते। अनेन झटिति श्रेयस्तत्साधनानवगमः सूचितः। उपद्रुताः तापत्रयत्रिवर्गतृष्णाभ्यां कुष्ठभगन्दरादिव्याधिभिर्वोपद्रववन्तः। अनेन श्रेयःसाधनोद्योगस्यानेकान्तरायविहतत्वं सूचितम्। अत एव मन्दभाग्या अल्पपुण्यभागिनः दुर्भगा इत्यर्थः। हि निश्चितमेव। प्रायेणेति अल्पायुरादिभिः प्रत्येकं योजनीयम्॥ १०॥ भूरीणीति। [तैः] विभागशः। स्वस्वापेक्षितधर्मादिसाधनभेदेनेत्यर्थः। श्रोतव्यानि धर्मादिविषयशास्त्राणि। भूरीणि सन्तीति शेषः। तान्यपि भूरीणि कर्माण्यनुष्ठेयानि येषु तानि। एकैकस्मिन्ननेकेतिकर्तव्यताकलापवत्त्वेनायासबहुलानि सन्ति। अतः। यत एवमत इत्यर्थः। हे साधो। अत्र एषु श्रोतव्येषु मध्ये यत् सारम्। अनिष्टनिवर्त्तकमिष्टप्रापकं च साररूपं साधनमित्यर्थः। तत् मनीषया सात्त्विक्या सूक्ष्मया धिया। समुद्धृत्य दध्नो घृतमिवोद्धृतिं विधाय। श्रद्दधानानां नोऽस्माकं ब्रूहि। येन त्वदभिहितसारश्रवणेन आत्मा चित्तं सुप्रसीदति। रागादिभिरकलुषः स्यात्। तत्सारं ब्रूहीत्यन्वयः। एवं तत्रेत्यादिभिः सार्द्धैस्त्रिभिः श्लोकैः। सर्वशास्त्रसारमैकान्तिकं श्रेयो ब्रूहीति प्रथमः प्रश्नो बोध्यः॥११॥ एवं मुक्तिसाधनं पृष्ट्वाऽथ तदनुग्राहकेषु प्रधानतमं विष्णोः श्रवणमतस्तच्चिकीर्षवो मुनयः सत्परित्राणार्थावतीर्णस्याऽतिपरिचितश्रीकृष्णावतारचरितं पृच्छन्ति सूतेति पञ्चभिः। हे सूत ते तव भद्रम्। कल्याणमस्त्वित्यर्थः। सात्वतां सत् श्रीकृष्णाख्यं ब्रह्मोपास्यमेषामस्तीति सत्वन्तस्त एव सात्वताः। प्रज्ञादित्वात्स्वार्थेऽण् तस्यादर्शनं छान्दसम्। तेषां भक्तानाम्। पतिः पालयिता। भगवान् श्रीकृष्णः। वसुदेवस्य। अत्रापादानार्थे संबन्धसामान्यविवक्षया षष्ठी। देवक्याम्। वसुदेवात्तद्भार्यायां देवक्यामित्यर्थः। यस्य चिकीर्षया यत्कर्म कर्त्तुमिच्छया। जातोऽवतीर्णः। तत्सर्वं त्वं जानासि। अङ्ग हे सूत। तच्छ्रीकृष्णचरित्रं शुश्रूषमाणानां श्रोतुमिच्छूनां नोऽस्माकं अनुवर्णितुम् अर्हसि। अर्हसीत्यनेन सदनुगृहीतस्त्वं कार्त्स्न्येन तच्चरित्रवेदी वक्तुं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रभुरसीति सूचितम् ॥ १२ ॥ महोपकर्तृत्वात्तदवतारचरितमवश्यं शुश्रूषितव्यमित्यभिप्रायेण तदवतारं विशिंषन्ति । यस्येति । यस्य भगवतः । अवतारः श्रीकृष्णरूपः प्रादुर्भावः । भूतानां शरीरिणां विभवाय इष्टोदयाय क्षेमाय तत्पालनाय च । भवतीति शेषः । भक्तानामित्यनुक्त्वा भूतानामिति वदतामयमभिप्रायः । शत्रूणामपि दमनपूर्वकमपवर्गदायित्वेन महोपकर्ता तर्हि किमु वक्तव्यं तदवतारा भूतानां योगक्षेमार्थं इति । अथ तन्नामैवानिष्टपरिहारेष्टप्रापणक्षममित्यभिप्रायेणाहुः । घोरां गर्भजन्मजरामरणादिरूपाम् । संसृतिम् । आपन्नः प्राप्तः पुमान् शत्रुरपि । विवशः पारवश्येनापीत्यर्थः । यस्य श्रीकृष्णस्य । यच्छब्दानां 'को वा भगवतस्तस्य' इत्युत्तरेणान्वयः । नाम गृणन्नुच्चरन् । देहावसाने इति शेषः । ततः संसृतेः । सद्यस्तत्क्षणमेव । विमुच्येत मुक्तो भवेत । कथं पारवश्येनापि उच्चारणमात्रेणापि शत्रुरपि मुच्यते इत्यत्रोच्चारणं विशिषन्ति । यद्बिभेति स्वयं भव इति । यन्नामोच्चारणं प्रति भवः संसारः स्वयं बिभेति । पाठान्तरेऽपि जन्ममरणादिभयहेतुत्वाद्भव एव भयशब्देन विवक्षितः । देहावसानिकभगवन्नामोच्चारणस्याव्यवधानेन मुक्तिसाधनत्वमितरकालीनस्य तु कर्मज्ञानयोगादियुतभक्तियोगानुग्राहकत्वेन चेति भक्तिद्वारा विवेकः । एतच्च षष्ठस्कन्धेऽजामिलोपाख्याने प्रपञ्चयिष्यते ॥ १३ ॥

आस्तां तावदेव भगवदवतारमाहात्म्यं तदीयानां जनानां माहात्म्यमेव वाङ्मनसागोचरमित्यभिप्रायेणाहुः । यत्पादेति । हे सूत । यस्य भगवतः पादौ संश्रयन्ते प्राप्यतया समाश्रयन्तीति यत्पादसंश्रयाः । प्रशमायनाः शमदमादिगुणानामाश्रयाः । मुनयस्तत्पादारविन्दमननशीलाः साधवः । उपस्पृष्टाः प्राणिभिः पादयोः कृतस्पर्शाः सन्निधिमात्रेण सेविता वा सन्तः । सद्यस्तत्क्षणमेव । पुनन्ति । स्वपादस्पर्शकर्तॄन् पवित्रीकुर्वन्ति । स्वर्धुन्यापः, एकदा संप्राप्ततत्पादस्पर्शानि गङ्गाजलानि तु अनुसेवया स्नानपानादिरूपया चिरकालकृतसेवया पुनन्ति ॥ १४ ॥ उक्तैरन्यैश्च गुणैरात्मशुद्धिमिच्छद्भिः विशेषतस्तच्चरितमवश्यं श्रोतव्यमित्यभिप्रायेणाहुः । को वेति । श्लोक्यते प्रशंस्यते इति श्लोकः । पुण्यः श्रृण्वतां वदतां च पुण्यावहः श्लोकः यशो यस्य सः, ईड्यं स्तुत्यं कर्म चरित्रं यस्य, स चासौ स च तस्य । तस्य भगवतः कृष्णस्य । कलिमलापहं कलिप्रयुक्तपापहन्तृ । यशः कीर्त्तिम् । शुद्धिकामोऽन्तःकरणनिर्मलतां कामयमानः । को वा पुरुषः । न श्रृणुयात् । अपि तु सर्वोऽपि श्रृणुयादेवेत्यर्थः । एवं सूत जानासीत्यादिभिः पञ्चभिः श्लोकैर्भक्तपालको भगवान् वसुदेवभार्यायां देवक्यां किमर्थमवतारं धृतवान्, अन्यत्र वा कस्मादवतारान् गृह्णातीति द्वितीयः सर्वावतारसाधारणः प्रश्नः कृतो बोध्यः ॥ १५ ॥ तस्येति । कला ब्रह्मादिमूर्तीः । लीलया दधतः । तस्य भगवतः । सूरिभिर्नारदादिभिः । परिगीतानि अनुवर्णितानि । उदाराणि महान्ति कर्माणि विश्वसृष्ट्यादीनि चरितानि सन्ति, तानि श्रद्दधानानां श्रवणे श्रद्धावताम् । नोऽस्माकं ब्रूहि । लीलयेत्यनेनावताराणामकर्ममूलत्वमिति सूचितम् । कला दधत इत्यनेन श्रीकृष्णस्यावतारित्वप्रतीत्या पूर्णावतारत्वं सूचितम् । अनेन श्लोकेन भगवान् लीलया ब्रह्मादिमूर्त्तीर्धृत्वा यानि महान्ति विश्वसृष्ट्यादीनि कर्माणि करोति तानि नो ब्रूहीति तृतीयः प्रश्नः कृतो बोध्यः ॥ १६ ॥

अथ भगवतो मत्स्याद्यवतारांस्तच्चरित्राणि च शुश्रूषवः पृच्छन्ति । अथेति । हे धीमन् आत्मनः स्वस्य माया आश्चर्यशक्तियोगस्तया संकल्परूपज्ञानेन वा । 'माया वयुनज्ञानम्' इति नैघण्टुकाः । "मायया सततं वेत्ति प्राणिनां च शुभाशुभम्' इत्यत्रार्थेऽभियुक्तप्रयोगश्च । आत्ममायया स्वेच्छया वा 'आत्ममाया तदिच्छा स्यात्' इति शब्दमहोदध्युक्तेश्च । स्वैरं यथा तथा लीलाश्चेष्टाः प्रलयजलविहारादिकाः । विदधतः कुर्वतः । ईश्वरस्य सर्वनियन्तुः । हरेः आश्रितदुरितहरस्य भगवतः । शुभाः श्रृण्वतां च शुभावहाः । अवतारकथा मत्स्याद्यवताराणां सचरित्राः कथाः । अथ कार्त्स्न्येन । आख्याहि कथय । आत्ममायया स्वैरं लीला विदधत इत्यनेन देवमनुष्यादिनानाजातीयावतारचेष्टानामात्मीयसंकल्पमूलत्वमकर्मवश्यत्वप्रयुक्तत्वं च सूचितम् । अनेन भगवान् विश्वपालनार्थं तत्तदवसरे मत्स्याद्यवतारान् गृह्णाति तैर्या लीलाश्च करोतीति तद्ब्रूहीति चतुर्थः प्रश्नः ॥ १७ ॥ बहुशः श्रुतहरिकथानां वः किमित्ययमुत्कण्ठाविशेष इत्यत आहुः । वयमिति । यदुत्तमश्लोकचरितं श्रृण्वतामपि रसज्ञानां रसविवेकविदुषाम् । पदे पदे क्षणे क्षणे । पुनः पुनर्वा स्वादु स्वादु अतिरुचिजनकं भवति । पूर्वश्रवणापेक्षयोत्तरोत्तरश्रवणेऽतीव रुचिकरमेव भवतीति श्रुतमपि पुनः पुनर्नवं नवमेव भवतीति भावः । यस्मात्पदे पदे स्वादु तस्मात् । उद्गच्छति तमो यस्मात्स उत्तमः श्लोको यशो यस्य यस्य विक्रमस्तस्मिन् । तु वयं न वितृप्यामः । अन्येषां तृप्तिरत्र स्याच्चेदस्तु नास्माकं त्वत्रालंबुद्धिरित्येतस्मिन्नर्थे तु शब्दः । अयं भावः । त्रेधा ह्यलंबुद्धिर्जायते । उदरादिभरणेन रसाज्ञानेन स्वादुविशेषाभावाद्वा । तत्र श्रृण्वतामित्यनेन श्रोत्रस्याकाशत्वादभरणमुक्तं रसज्ञानामित्यनेन चाज्ञानतः पशुवत्तृप्तिर्निराकृता । पदे पदे स्वाद्वित्यनेन इक्षुभक्षणवद्रसान्तराभावेन तृप्तिनिराकरणं कृतमिति ॥ १८ ॥

संप्रति श्रीकृष्णावतारचरितश्रवणे एव न उत्कण्ठाविशेष इत्यभिप्रायेणाहुः । कृतवानिति । कपटमानवः केवलच्छद्मनैव मनुष्यवत्प्रतीयमानः । एवमपि भगवान् पूर्णषाड्गुण्यः । तथापि गूढस्तत्त्वतोऽयमीश्वर एवेति न कैर्निर्णीतः । तथापि केशवः ब्रह्मविष्णुशिवनियन्ता कृष्णः । रामेण बलेन सह अतिमर्त्त्यानि मर्त्यवीर्यमतिक्रम्य विद्यमानानि । मनुष्यैः कर्त्तुमशक्यानीति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यावत्। वीर्याणि चेष्टितानि कृतवान्। किलेति प्रसिद्धान्येव। तान्यस्माकं ब्रूहीति संबन्धः। मानुषाणि हि कर्माणि सकृच्छ्रुतानि नातीव पुनः पुनः शुश्रूषां जनयेयुः। भगवद्वीर्याण्यतिमानुषत्वाद्विलक्षणविषयत्वादेवावृत्त्या श्रुतान्यपि स्वविषयां शुश्रूषां तूत्तरोत्तराधिकां विलक्षणां पुनः पुनरुत्पादयन्त्यतस्तत्र नस्तृप्त्यभावात्तान्येव श्रावयेति भावः। अनेन श्लोकेन रामेण सह केशवो गोवर्द्धनोद्धरणादीनि मनुष्येष्वसंभावितानि यानि कर्माणि कृतवांस्तानि ब्रूहीति पञ्चमः प्रश्नः। अस्योत्तरमष्टमेऽध्याये कुन्तीस्तुतौ वक्ष्यते ॥ १९ ॥ ननु भगवद्वीर्याणि बहूनि अतो महता कालेन श्रोतव्यानि, भवतां तु नित्यं तपश्चरतां कुतस्तच्छ्रवणावसर इत्यत्राहुः। कलिमिति। हे सूत कलिं तपोविघ्नकरं कलियुगम्। आगतं मनुष्येषु कृतप्रवेशमित्यर्थः। आज्ञामालक्ष्य भगवत्कथां विनान्योपायेन कलिं जेतुमशक्ताः। वयं मुनय इत्यर्थः। हरेः कलिकृतदोषहरस्य भगवतः कथायां निमित्तभूतायाम्। कथाश्रवणार्थमित्यर्थः। सक्षणा सावसरा लब्धावसरा इति यावत्। सन्तः। अस्मिन् वैष्णवे क्षेत्रे विष्णुसान्निध्यवति अस्मिन्नैमिशारण्ये दीर्घसत्त्रेण सहस्रवत्सरपर्यन्तेन ब्रह्मसत्त्रेण। अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया। तेन दीर्घसत्त्रार्थमित्यर्थो बोध्यः। आसीना उपविष्टाः। भवाम इति शेषः ॥ २० ॥ त्वमिति। किंच। पुंसां सत्त्वहरं तपआदिसारहरम्। सत्त्वगुणहरं वा, अत एव दुस्तरम् उपायान्तरैस्तत्तुं जेतुमशक्यम्। कलिं निस्तितीर्षतां नितरां तत्तुं मिच्छतां नोऽस्माकं, अर्णवं सागर निस्तितीर्षतां जनानां कर्णधारः यूपकाग्रस्थायिनाविकः पुरुषः इव। हे सूत त्वं धात्रा दैवेनेश्वरेण वा संदर्शितः। उपायत्वेनेति शेषः। दैववशादिदं संपन्नमिति भावः ॥ २१ ॥ पुनः प्रश्नान्तरं कुर्वन्ति ब्रूहीति। ब्रह्मणि ब्राह्मणकुले साधुर्ब्रह्मण्यस्तस्मिन्। ब्राह्मणहितकारिणीत्यर्थः। धर्मवर्मणि धर्मस्य कवचवत्पालके योगेश्वरे भक्तियोगाराध्येऽणिमाद्यष्टैश्वर्यवति वा। कृष्णे सच्चिदानन्दघनमूर्तौ श्रीकृष्णे। अधुना स्वामात्मीयां काष्ठां स्वकीयं लोकम्। उपगते गतवति सति। धर्मः भक्तिज्ञानवैराग्योपेतो वर्णाश्रमसदाचाररूपो वृषः। कं पुरुषं शरणं गतः। रक्षितारं कं संप्राप्त इत्यर्थः। तं ब्रूहि अनेनोक्तविशेषणविशिष्टे भगवति स्वधाम्नि गते सति धर्मः कं शरणं संप्राप्त इति षष्ठः प्रश्नः। केचित्तु पुंसामेकान्तत इति श्रेयःसाधनविषयः प्रश्नः ॥ १ ॥ 'ब्रूहि नः श्रद्दधानानां येनात्मा सुप्रसीदति' इत्यत्र 'ब्रूहि भद्राय भूतानां येनात्माशु प्रसीदति' इति पाठान्तरं प्रकल्प्य ब्रूहि भद्रायेति प्रत्यगात्मविषयः प्रश्नः ॥ २ ॥ 'अर्हस्यङ्गानुवर्णितुम्' इति कृष्णावतारविषयः प्रश्नः ॥ ३ ॥ 'ब्रूहि नः श्रद्दधानानाम्' इति यशोविषयः प्रश्नः ॥ ४ ॥ अथाख्याहीत्यवतारान्तरविषयः प्रश्नः ॥ ५ ॥ 'ब्रूहि योगेश्वर' इति धर्मविषयः प्रश्नः एवं षट्प्रश्ना इत्याहुः ॥ २२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसुनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धस्य प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः

व्यास उवाच

इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः। प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥

षट् प्रश्नाः प्रथमेऽध्याये कृता ये मुनिभिः शुभाः। सूतस्त्रयाणां तेष्वाह द्वितीये तूत्तरं स्फुटम् ॥ १ ॥

एवं मुनिसंपृष्टनिःश्रेयससाधनः तदनुग्रहतः संमतप्राधान्यतमः श्रीकृष्णचरित्रः सूतः शौनकादीनां प्रश्नानभिनन्दयंस्तेषामुत्तराणि कुर्वन्नाहेति मनसि निधायाह बादरायणिः। इतीति। इतीत्थम्। विप्राणां शौनकादीनाम्। संप्रश्नैः समीचीनानुयोगैः संहृष्टः प्रसन्नतां प्राप्तः। रौमहर्षणिः रोमहर्षणस्यापत्यं सूतः। तेषां विप्राणां वचः प्रश्नात्मकं वचनं प्रतिपूज्याभिनन्द्य। प्रवक्तुं व्याख्यातुम् उपचक्रमे आरेभे। विप्राणामित्यनेन सापेक्षस्यापि संप्रश्नशब्दस्य गमकत्वादार्षत्वाद्वा समासः। तेषां विप्राणां वचः प्रतिपूज्येति वान्वयः ॥ १ ॥ मुनिकृतप्रश्नोत्तरद्वारेदं पुराणं शुश्रावयिषुरन्यैरप्येवं कार्यमिति सूचयितुमेतत्पुराणप्रथमप्रवर्त्तकमहोपकर्तृ बादरायणिरूपगुरुनमस्कारात्मकं मङ्गलमाचरति यं प्रव्रजन्तमिति द्वाभ्याम्। प्रव्रजन्तं सर्वपरित्यागरूपमाश्रममाश्रयन्तम्। अनुपेतमुपेतरहितमसहायमित्यर्थः। अपेतं कृत्यं यस्य तं कर्त्तव्यांशरहितम्। यं श्रीशुकम्। विरहकातरः पुत्रवियोगदीनः। द्वैपायनो व्यासः। हे पुत्र इति आजुहाव हे पुत्र तिष्ठेत्याकारयामासेत्यर्थः। तदा तन्मयतया शुकात्मतया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तरवो वृक्षाः। अभिनेदुः प्रत्युत्तरमुक्तवन्तः। पितुः स्नेहपरिहाराय यो वृक्षरूपेणोत्तरं दातुमदित्सद्यदा तदा वृक्षाः शुकात्मतया प्रतिदध्वनुरित्यर्थः। सर्वभूतानां हृत् हृदयमयते योगबलेन गच्छतीति सर्वभूतहृदयस्तम्। मुनिं स्वात्मपरमात्ममननशीलम्। तं श्रीशुकम्। आनतोऽस्मि नमस्कृतवानस्मि। तरवोऽभिनेदुः। अयमर्थो महाभारतीयशान्तिपर्वगतमोक्षधर्मीयशताधिकषट्पञ्चाशत्सप्तपञ्चाशत्तमादुत्तरभागगताध्यायतोऽवगन्तव्यः। यद्यप्यत्र पुत्रेत्यस्य दूराद्ध्वानविषयवाक्यत्वात् 'दूराद्धूते च' इति प्लुतत्वे सति 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे सति संधिर्दुर्लभस्तथापि 'गुरोरनृत'—इत्यत्र प्राचामिति योगं विभज्य 'सर्वस्य प्लुतस्य वैकल्पिकत्वाभ्युपगमात्' 'अप्रीतप्रेषणे परस्य च' इति सूत्रे 'सर्वः प्लुतः साहसमनिच्छता विभाषा कर्त्तव्यः' इति माहाभाष्यकारोक्तेश्च प्लुताभावपक्षे संधिः सुलभ एवेति बोध्यं विशेषो मनोरमातो बोध्यः॥ २॥ तत्कृपालुतां दर्शयन् भक्त्युद्रेकात्पुनरपि तमेव प्रणमति। य इति। यः शुकः। स्वान् स्वपरसंशीलिनो जनाननुभावयति स्वप्रतिपाद्यसाक्षाच्छ्रीकृष्णसंदर्शनानुभवयुक्तान्करोतीति स्वानुभावं तत्। अखिलाश्च ताः श्रुतयश्च तासां सारं तत्त्वरूपम्। एकं सर्वपुराणप्रधानम्। आत्मनीत्यध्यात्मं तत्र दीपम्। आत्मपरमात्मयाथात्म्यप्रकाशने दीपतुल्यमित्यर्थः। गुह्यं पुराणं पुराणगुह्यं 'विशेषणं विशेष्येण बहुलम्' इति बहुलग्रहणाद्विशेष्यस्यापि पुराणशब्दस्य पूर्वनिपातः। श्रीमद्भागवतं नामैतत्पुराणमित्यर्थः। मुनीनां मुक्तभावं प्राप्तानां जनानाम्। अन्धं तमः। संसाराख्यं गाढध्वान्तमित्यर्थः। अतितितीर्षतामतिशयेन तर्त्तुमिच्छतां मुमुक्षुजनानामित्यर्थः। संसारिणां पामरापरपर्यायाणां विषयिजनानां चेत्यर्थः। करुणया त्रीनुद्दिश्य संजातपरमकारुण्येनेत्यर्थः। आह एतत्पुराणं कथयामासेत्यर्थः। गुरुं मदीयानन्यदेशिकम्। व्याससूनुं तं श्रीशुकम् उपयामि शरणं व्रजामि॥ ३॥ एवं श्रावयितृभिरादौ महोपकर्त्तुर्बादरायणेर्नमस्कारात्मकं मङ्गलमनुष्ठितव्यमिति सूचितम्। सांप्रतं न केवलं बादरायणिरेव नमस्कार्यः किंतु प्रवक्तुमुपचक्रमे इत्यत्र प्रवचनस्योपक्रमो नाम गुरुदेवादिनमस्कार इत्यर्थप्राशस्त्यान्नारायणादयोऽन्येपि नमस्कार्याः इत्यभिप्रायेणाह। नारायणमिति। नरस्य वसुदेवस्यापत्यं नारायणः श्रीकृष्णस्तम्। नरेषु मनुष्येषूत्तमो वरो गौरवर्णत्वाच्छ्रेष्ठस्तम्। नरं बलभद्रं च। नरति प्रापयति स्वाश्रितपुरुषानुत्तमगतिमिति मुकुटोक्त्या व्याकरणस्य शक्तिग्राहकत्वेन 'नरो मर्त्येऽच्युतेऽर्जुने' इति अनेकार्थसंग्रहोक्त्याऽच्युतार्थनरशब्दस्य प्रसिद्धनारायणपदसंनिधिबलेन वा नरशब्दोऽत्र रामपरः। किं च 'वासस्तत्र प्रलम्बारेर्यत्रैवाघरिपोर्भवेत्' इति लघुभागवतामृतवाक्यतट्टीकायाम्। यत्र गोकुलादौ कृष्णस्य वासस्तत्रैव रामस्येति द्वयोर्नित्यसंयोगोक्तेश्चात्र नरशब्देन रामाभिधानं न दोषावहम्। प्रसिद्धार्थस्वीकारे विशालावस्थितं नरसहितनारायणमित्यर्थो बोध्यः। सरस्वतीं देवीम्। वागधिष्ठात्रीं देवतामित्यर्थः। व्यासमपान्तरतमांशं कृष्णद्वैपायनं च। नमस्कृत्यैव ततः जयं, यस्मिन्काले यो ग्रन्थो वाच्यते तमित्यर्थः। उदीरयेत्कथयेच्छ्रावयेदिति यावत्। स्वयं नारायणादीन्नमस्कुर्वन्ग्रन्थवाचनं प्रारीरभत्तथैव ग्रन्थप्रवक्तृभिः स्वेष्टदेवादीन्नमस्कृत्य ग्रन्थवाचनं कर्त्तव्यमिति विध्यर्थक्रियया ज्ञापितवानन्यथोदीरयेदित्येवाऽवक्ष्यदिति भावः। जयशब्दार्थ उक्तो भविष्योत्तरपुराणे। 'अष्टादशपुराणानि रामस्य चरितं तथा। विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत। कार्ष्णं च पञ्चमो वेदो यन्महाभारतं स्मृतम्। शैवाश्च धर्मा राजेन्द्र मानवोक्ता महीपते। जयेति नाम चैतेषां प्रवचन्ति मनीषिणः' इति॥ ४॥

तदेवं 'मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्। जपतां जुह्वतां नित्यं विनिपातो न विद्यते' इत्युक्तरीत्या कृतगुरुदेवतानमनमङ्गलः सूतस्तावत्प्रतिपूज्य वचस्तेषामित्युक्तेस्तत्प्रश्नमभिनन्दति। मुनय इति। हे मुनयः भवद्भिः अहं साधु यथा तथा पृष्टः। यतः लोकमङ्गलं भवत्कृतप्रश्नवचनं सर्वलोकमङ्गलकारीत्यर्थः। भवत्प्रश्नस्य सकललोकमङ्गलविषयत्वाद्भवत्प्रश्नवाक्यमतीव साध्विति भावः। कथमस्मत्प्रश्नस्य लोकमङ्गलविषयकत्वमित्यत्राह। यद्यतः कृष्णसंप्रश्नः कृतः। 'मङ्गलानां च मङ्गलम्' इत्युक्तरीत्या निरतिशयमङ्गलस्वरूपकृष्णविषयत्वात्प्रश्नस्य ततो लोकमङ्गलमहं पृष्ट इत्यर्थः। कृष्णसंप्रश्नस्य लोकमङ्गलविषयत्वमेवोपपादयति। येनेति। येन कृष्णेन तद्विषयकप्रश्नेन वा हेतुना आत्मा चित्तं सुप्रसीदति सुष्ठु प्रसन्नो भवति। प्रश्नोत्तराभ्यामनुसंहितः कृष्णश्चित्तगतं मालिन्यमपनयति चित्तप्रसादादेव लोकानां सर्वाणि मङ्गलानि सुलभान्येव भवन्तीति भावः॥ ५॥ तत्र यत्प्रथमं पृष्टं सर्वशास्त्रसारमैकान्तिकं श्रेयो ब्रूहीति तदुत्तरं वक्ति। स वै पुंसामिति। यतः अनभिसंहितफलाद्वर्णाश्रमानुगुणात्स्वनुष्ठिताद्यस्माद्धर्मात्। पुंसां अधोक्षजे परमेश्वरे अहैतुकी फलोपाधिरहिता अप्रतिहता अन्तरायानभिहता यया भक्त्या आत्मा सुप्रसीदति तथाभूता भक्तिः भवति। स एव धर्मः परः। धर्मो हि द्विप्रकारः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च। तत्र यः स्वर्गाद्यर्थं विहितः प्रवृत्तिलक्षणः सोऽपरः। यतस्तु धर्माच्छ्रवणादिरूपा भक्तिर्भवति स परो धर्मः। स एवैकान्तिकं श्रेयः। कृष्णे फलानुसंधानरहिता भक्तिरेवैकान्तिकं श्रेय इति प्रथमप्रश्नोत्तरम्॥ ६॥ ननु 'तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन, इत्यादिश्रुतिभ्यो धर्मस्य ज्ञानहेतुत्वं प्रसिद्धं तस्मात् कुतो भक्तिहेतुत्वमुच्यते इति चेत्सत्यम्। धर्माद्भक्तिः तद्द्वारा ज्ञानं जायते इत्याह। वासुदेव इति। वासुदेवे सर्वान्तरात्मनि वसुदेवपुत्रे भगवति श्रीकृष्णे प्रयोजितः भक्तियोगः आशु वैराग्यं जनयति।

२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहैतुकं यत् ज्ञानं तच्च जनयति। भक्तिधर्मयोः साहचर्यात्सत्ययोस्तयोर्विषयविरक्तिमन्तराऽसंभवाद्धर्मोद्भूतसविरक्तिभक्तिद्वारकमहैतुकं भगवत्साक्षात्कारात्मकं ज्ञानमुत्पद्यत इति भावः॥ ७॥ तदेवमुक्तविधभक्त्यनुग्राहकोऽनभिसंहितफलो वर्णाश्रमप्रयुक्तो धर्मः श्रेष्ठ इत्युक्तम्। अथास्य धर्मस्य भगवद्गुणश्रवणादिरुचिजननद्वारा भक्तियोगानुग्राहकत्वं वदन्नभिसंहितफलधर्मस्य श्रमफलत्वमाह धर्म इति। यः स्वनुष्ठितः सम्यक् कृतानुष्ठानोऽपि धर्मः पुंसां विष्वक्सेनकथासु भगवतः कथासु रतिं रुचिं यदि न उत्पादयेत् तर्हि स धर्मः केवलं श्रम एव। हि संसृतिसंप्रापणरूपानर्थावह एवेत्यर्थः। अयं भावः मोक्षार्थधर्मेऽपि यद्यपि श्रमत्वं प्रतीयतेऽथापि तज्जोत्कृष्टफललब्धेर्न त्रैवर्गिकधर्मवद्विफलश्रमत्वं यद्युच्यतेऽस्त्येव तत्रापि स्वर्गादिफलं क्षयिष्णुत्वादफलमेव। 'यद्यक्षय्यं ह चातुर्मास्ययाजिनः सुकृतं भवति' इति श्रुतिवचनमस्ति तथापि 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति प्रबलश्रुत्या तस्य क्षयिष्णुत्वप्रतिपादनेन निराकृतत्वात्तदकिंचिदेवेति यथोक्तमेव साधु इति॥ ८॥ एवं त्रिवर्गादौ वर्त्तमानस्य धर्मस्य भगवत्संबन्धेन परमधर्मतां प्रतिपाद्यार्थकामयोरपि निरतिशयपुरुषार्थरूपमोक्षसाधनभक्त्यनुग्राहकतया परमतामाह धर्मेति द्वाभ्याम्। तत्रान्यमतं तावद्धर्मस्यार्थः फलं तस्य कामः फलं तस्येन्द्रियप्रीतिः तत्प्रीतेश्च पुनरपि धर्मादिपरंपरेति तन्निराकरोति। आपवर्ग्यस्यापवर्गसाधनस्य। अनभिसंहितफलत्वे सति परंपरया निरतिशयपुरुषार्थरूपमोक्षसाधनीभविष्यत इत्यर्थः। धर्मस्य अर्थाय प्रयोजनाय फलत्वायेति यावत्। अर्थो धनं न उपकल्पते योग्यो न भवति। हि धर्मस्य फलमर्थप्राप्तिर्न भवत्येवेत्यर्थः। धर्मस्यार्थः फलमिति लौकिकवादो नादरणीय इति भावः। अथार्थस्य कामफलत्वं निरस्यति नार्थस्येति। धर्मैकान्तस्य धर्मैकप्रयोजनस्य अर्थस्य वित्तस्य लाभाय प्रयोजनाय कामः न स्मृतः। अर्थस्य प्रयोजनं कामो न भवतीत्यर्थः। अत्र कामशब्देन काम्यते इति काम इतिव्युत्पत्त्याऽन्नपानादिभोग्यवस्तूच्यते। हिरवधारणार्थे॥ ९॥ अथ कामस्येन्द्रियप्रीतिफलकत्वं निरस्यति। कामस्येति। यावताऽन्नपानादिना काम्यमानेन वस्तुना जीवेत प्राणान बिभृयात् तावतः कामस्यान्नादेर्भोग्यवस्तुनः लाभः फलम्। न इन्द्रियप्रीतिः। देहधारणमात्रमेवान्नपानादिकामफलं न त्विन्द्रियतर्पणमित्यर्थः। अथ जीवनस्य पुनर्धर्माद्यर्थत्वं निरस्यति। जीवस्य जीवनस्य प्रयोजनं तत्त्वजिज्ञासा तत्त्ववेदनेच्छा एव। इह लोके कर्मभिः यः साध्यो धर्मः स अर्थः प्रयोजनं न। एवं धर्मार्थकामानां क्रमेणार्थकामेन्द्रियतृप्त्यर्थत्वं निरस्य तेषां क्रमेणापवर्गधर्मदेहधारणमात्रस्य तत्त्वजिज्ञासार्थोक्तेरयं भावः। सति वित्ते तेनानभिसंहितफलं धर्मं संपाद्य तेन धर्मेणापवर्गसाधनभूतं भक्तियोगं कुर्वन् देहधारणमात्रं काममुपयुञ्ज्यात्। तेन देहं धृत्वा तेन देहेन भजनीयतत्त्वजिज्ञासा कार्येति॥ १०॥

जीवनस्य फलं तत्त्वजिज्ञासैवेत्युक्तं किं तत्तत्त्वं यज्जिज्ञासितव्यमित्यत आह। वदन्तीति। यत्तत्त्वं ज्ञानं ज्ञानस्वरूपं ज्ञानगुणकं च। अद्वयं स्वतुल्याभ्यधिकवस्त्वन्तररहितं यत् ब्रह्मेति परमात्मेति भगवानिति शब्द्यते। औपनिषदैर्हैरण्यगर्भैः सात्वतैश्च यथाक्रममभिधीयते। तत्त्वविदः तदेव तत्त्वं इति वदन्ति॥ ११॥ एवं परधर्माभिहितस्य त्रिवर्गस्यापि परंपरयाऽपवर्गसाधनत्वं तत्प्रसङ्गाद्भजनीयवस्तुस्वरूपं चोक्तम्। अथ भक्त्यात्मनि तत्समीक्षणमाह। तदिति। तत्तस्मात् भक्तियोगानुग्राहकधर्मस्यैव परत्वादित्यर्थः। श्रुतं वेदे कर्त्तव्यतया श्रवणविषयतां प्राप्तं यज्ञादिकर्म तेन गृहीतयानुगृहीतया। ज्ञानं च वैराग्यं च ताभ्यां युक्तया भक्त्या आत्मनि जीवात्मनि। अन्तरात्मतया स्थितमिति शेषः। आत्मानं भगवन्तम्। श्रद्दधाना उक्तार्थे सत्यत्वश्रद्धावन्तो मुनयः पश्यन्ति साक्षात्कुर्वन्ति॥ १२॥ श्रुतगृहीतयेत्यनेन वर्णाश्रमधर्मस्य भक्तियोगानुग्राहकत्वमुक्तं 'धर्मः स्वनुष्ठितः पुंसाम्' इत्यादिना धर्मस्य स्वनुष्ठानरूपो भक्तियोगानुग्राहकत्वप्रकार उक्तः। इदानीमन्यथापि तदनुग्रहप्रकारं वक्ति। अत इति। हे द्विजश्रेष्ठाः। अतः यतो भक्तेरेव साक्षान्मुक्तिसाधनत्वमतो हेतोरित्यर्थः। पुंभिः स्वनुष्ठितस्य सम्यक् कृतानुष्ठानस्य। वर्णाश्रमविभागशः अवस्थितस्येति शेषः। तत्तद्वर्णाश्रमानुगुण्येनावस्थितस्येत्यर्थः। धर्मस्य पञ्चमहायज्ञादिरूपस्य सदाचारस्येत्यर्थः। संसिद्धिः फलम्। हरितोषणं श्रीहरिप्रसन्नताजननमेव। अयं भावः। स्वनुष्ठिताद्धर्माद्भक्तियोगप्रतिबन्धकनिवृत्त्यनुकूलसंकल्पहेतुर्हरितोषः ततश्च भक्तियोगनिष्पत्तिप्रतिबन्धकपापक्षयस्ततो भक्तियोगनिष्पत्तिरिति॥ १३॥ एवं भक्तियोगप्रतिबन्धकनिरसनेन भगवद्गुणादिश्रवणरुचिजननद्वारेण च वर्णाश्रमधर्मस्य भक्तियोगोपकारकत्वं द्विधा संदर्शितम्। इदानीं तुल्यन्यायतया भगवद्गुणचरित्रश्रवणादीनामपि परमभक्तियोगोपकारकत्वं वक्तुं तेषाम् अवश्यकर्तव्यतां तावदाह तस्मादिति द्वाभ्याम्। तस्माद्धर्मस्य भक्तियोगानुग्राहकत्वादेव हेतोः। सात्वतां भक्तानां पतिः। भगवान् एकेनैकाग्रेण मनसा नित्यदा श्रोतव्यः कीर्तितव्यश्च। ध्येयः स्मर्तव्यः। पूज्यो यथालब्धोपचारैरर्चनीयश्च॥ १४॥

यदिति। यस्य भगवतोऽनुध्यानुध्यानं भक्तिः सैवासिः खड्गस्तेन युक्ताः सहिताः कोविदाः कुशलाः। कर्मैव ग्रन्थिरूद्रूपं निबन्धनं बन्धनं छिन्दन्ति। तस्य भगवतः कथारतिं कथायां प्रीतिं कः पुमान् न कुर्यात् सर्वोऽपि कुर्यादेवेत्यर्थः। यस्य भक्तिरनर्थावहसंसृतिनिरासहेतुस्तस्य महोपकर्त्तुर्भक्तियोगस्यानुग्राहकतावतीषु तत्कथासु सर्वोऽपि जनो रतिं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुर्यादेवेति भावः ॥ १५ ॥ ननु यद्भक्तिरनर्थावहसंसृतिनिरासहेतुरिति सत्यमेव तथापि हरिकथाश्रवणरूपायां तस्यां तद्भक्तौ रुचिर्नोत्पद्यते किं कुर्मस्तत्राह । शुश्रूषोरिति । हे विप्राः शुश्रूषोः श्रोतुमिच्छोः भगवत्प्रसन्नतार्थाचरितस्वधर्मनिरस्तशुश्रूषाप्रतिबन्धकस्येत्यर्थः । श्रद्दधानस्य श्रद्धायुक्तस्य पुंसः । महतां या सेवा तया पुण्यतीर्थानां गङ्गादीनां निषेवणाच्च वासुदेवकथारुचिः स्यात् । अस्यायं भावः । पुण्यतीर्थनिषेवणादिभिः निष्पापस्य महत्सेवा स्यात् तया च तद्धर्मश्रद्धा स्यात्ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥ १६ ॥ भगवत्कथाश्रवणादीनां परभक्तियोगोपकारप्रकारं दर्शयति । शृण्वतामिति द्वाभ्याम् । पुण्यं शृण्वतां कीर्त्तयतां च पुण्यावहं श्रवणं कीर्त्तनं यस्य सः कृष्णः स्वकथां शृण्वतां सतां साधूनां सुहृद्धितकारी भवतीति शेषः । अतः हृदि अन्तःस्थः । उक्तविधसद्धृदयावस्थितः सन्नित्यर्थः । अभद्राणि भक्तियोगोत्पत्तिप्रतिबन्धकानि दुरितानि विधुनोति निवर्त्तयति हि । यद्वा । हृदि यानि अभद्राणि कामवासनास्तान्यन्तःस्थः सन् धुनोतीति पदयोजना ॥ १७ ॥ नष्टप्रायेष्विति । नित्यं भागवतसेवया साधुजनसंसेवनेन । तत्सेवापूर्वकभगवद्गुणश्रवणेनेत्यर्थः । अभद्रेषु नष्टप्रायेषु सत्सु उत्तमश्लोके भगवति नैष्ठिकी दृढा भक्तिः भवति । नष्टप्रायेष्विति प्रायग्रहणेन भक्तियोगापनोद्यं उत्तरपूर्वाघरूपं प्रतिबन्धकं त्ववशिष्यत इति सूचितम् ॥ १८ ॥

तदेति । यदा हरावचला भक्तिस्तदा रजः तमः ये कामलोभादयः भावाश्च । यद्वा । रजस्तमसोर्भावा धर्माः कार्यभूता इति यावत् । ये कामलोभादयः ते सर्वे नश्यन्तीति शेषः । रजस्तमोभावेषु नष्टेषु सत्सु । चेतः एतै रजस्तमोभावैः । अनाविद्धं अविक्षिप्तमविमूढं च स्यात् । अत एव सत्वे रजस्तमोभ्यामनभिभूते सत्वगुणे स्थितं सत्त्वप्रधानं सत्स्थिरं सदिति यावत् । प्रसीदति उपशाम्यति । प्रसन्ने चेतसि नैष्ठिकी भक्तिराशु भवतीति भावः ॥ १९ ॥ एतदेवाह । एवमिति । एवमुक्तरीत्या प्रसन्नं मनो यस्य तस्य मुक्तसङ्गस्य विरक्तस्य पुंसः नैष्ठिकी भक्तिर्भवतीति शेषः । तस्माद्भगवद्भक्तियोगतः भगवत्तत्त्वविज्ञानं जायते । भगवत्स्वरूपगुणयाथात्म्यसाक्षात्कारात्मकं ज्ञानमुत्पद्यते इत्यर्थः ॥ २० ॥ एवं साक्षात्कारपर्यन्तभगवद्भक्तियोगसाध्यं फलमाह । भिद्यत इति । आत्मनि परमात्मनि ईश्वरे भगवति दृष्टे एव दृष्टमात्रे सत्येव । अस्य द्रष्टुः पुंसः कर्माणि सर्वाण्यपि भगवत्प्राप्तिप्रतिबन्धकान्युत्तरपूर्वाघरूपाणि कर्माणि क्षीयन्ते नश्यन्ति । अत एव सर्वसंशयास्तन्मूलाः सकला अपि संशयाः छिद्यन्ते नश्यन्ति । सर्वशब्देन अन्यथाज्ञानविपरीतज्ञानाज्ञानसंग्रहः । ततः हृदयग्रन्थिः तन्मूलको हृदयग्रन्थिवदनिर्मोच्योऽहंममाभिमानः भिद्यते । समूला संसृतिर्निवर्तते इत्यर्थः । तन्निवृत्तौ च ब्रह्मप्राप्तिस्तदनुभवश्चायत्नसिद्ध एवेति भावः ॥ २१ ॥ उक्तार्थस्यानुष्ठानं दर्शयति । अत इति । अतः यतो मोक्ष एव निरतिशयपुरुषार्थस्तत्साधनं तु भक्तिरेवातो हेतोरित्यर्थः । कवयः निरतिशयश्रेयस्तत्साधनाभिज्ञाः सुधियः पुरुषाः । परमया मुदा भगवति वासुदेवे नित्यम् आत्मप्रसादिनीं भक्तिं कुर्वन्ति वै आत्मप्रसादिनीं भक्तिं कुर्वन्तीत्यनेनारब्धभक्तियोगस्य चित्तप्रसादोऽपि शनैः शनैर्भक्तियोगादेव भवतीति सूचितम् ॥ २२ ॥

ननु सृष्ट्यादिकारणेषु ब्रह्मरुद्रादिदेवेषु सत्सु कथं वासुदेवभक्तिरेव मोक्षोपायत्वेनोच्यते इत्याशङ्क्याह । सत्वमित्यादिना यावदध्यायसमाप्ति । सत्वं, रजः, तमः, इत्येते प्रकृतेः गुणाः । न तु जीवस्य परस्य वेत्यर्थः । तैः सत्वादिभिः युक्तः परः पुरुषः परमपुरुषः । एकः सृष्टेः प्राक् नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतया एक एव सन्नित्यर्थः । अस्य स्थूलचिदचिदात्मकस्य जगतः । इह अस्मिन्भुवने स्थित्यादये स्थितिसृष्टिलयार्थम् । स्थितिप्राथम्यं भगवत्प्राथम्यविवक्षया । हरिविरञ्चिहरेतिसंज्ञाः । हर्यादिरूपाणि तद्वाचकानि नामानि चेत्यर्थः । धत्ते बिभर्त्ति । अयं भावः । सत्वात्मकविष्णौ सर्वजगत्पालनैश्वर्यं संप्रेर्य्य स्वयं प्राकृतसत्वगुणविधुरोऽपि तदन्तः प्रवेशाद्धरिसंज्ञां प्राप्नोति । रजआत्मकब्रह्मणि सर्वजगत्सर्गैश्वर्यं संप्रेर्य स्वयं प्राकृतरजःसंबन्धवर्जितोऽपि तदन्तः प्रवेशाद्विरिञ्चिसंज्ञां प्राप्नोति । तमआत्मकहरे, जगत्संहरणैश्वर्यं संप्रेर्य स्वयं प्राकृततमः संबन्धवर्जितोऽपि तदन्तः प्रवेशाद्धरसंज्ञां प्राप्नोति । गरुडासनहंसासनवृषासनसंज्ञाः धत्ते इति भावः । तत्र तेषु त्रिषु मध्ये सत्वं तनुर्यस्य तस्मात् सत्वशरीरकाद्विष्णोरेवेत्यर्थः । नृणां तं भजमानानां जनानाम् । श्रेयांसि ज्ञाननिष्पत्तिभवनिवृत्तिपरप्राप्तिरूपाणि कल्याणानि स्युः । खलु 'अग्निरवमो देवानां विष्णुः परमः,' । 'न विष्णोः परमो देवो विद्यते नृपसत्तम । राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान्' । 'विष्णुरात्मा भगवतो भवस्य' इत्यादिश्रुतिस्मृतिषु विष्णोरीश्वरत्वेनाभिधानाद्ब्रह्मरुद्रयोः क्व क्व जीवत्वेनाभिधानाद्विष्णोर्नारायणात्मकतया क्व क्वाभिधानादत्र सत्वतनोर्विष्णोरेव श्रेयांस्यभिहितानीति, एतदाशयः । हरिविरिञ्चिहरा इति वक्तव्ये सन्धिरार्षः । 'यस्याज्ञया जगत्सर्वं ब्रह्मा सृजति नित्यशः । हरिश्च पालको रुद्रो नाशकः स हि मोक्षदः' इति बृहन्नारदीयोक्तेः 'ब्रह्मणि ब्रह्मरूपः सन्' इत्यादिवामनपुराणोक्तेः 'ब्रह्मविष्णुशिवाद्यैश्च स्तुतम्' इति ब्रह्मवैवर्त्तोक्तेश्च वासुदेवस्य त्रिभ्यः पृथक्त्वेपि त्रिस्वरूपतयोक्तिस्तदात्मकत्वशरीरशरीरित्वविबोधनपरेत्यलमतिविस्तरेण ॥ २३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु सत्त्वादीनां त्रयाणामपि गुणानां प्रकृतिगुणत्वेन समानत्वेऽपि कथं सत्त्वं श्रेयोहेतुः कथमितरौ गुणौ तद्हेतू इत्याशङ्कायां दृष्टान्तेन गुणानां वैषम्यमुपपादयति । पार्थिवादिति । पार्थिवात् पृथिवीपरिणामरूपात् दारुणः काष्ठात् तावत् । धूमः उत्पद्यते । तस्माद्धूमात् । अनन्तरमिति शेषः । त्रयीमयो वेदोक्तकर्मप्रचुरः । अग्निः उत्पद्यते । यथा पार्थिवं दारु न प्रकाशकं न च स्वर्गप्राप्त्यर्हकर्मौपयिकं तदुत्पन्नो धूमोऽपि प्रवृत्तिस्वभाव ईश्वरकर्मप्रत्यासत्तिमान्सन्नपि न प्रकाशको न च स्वर्गसिद्धयौपयिकः । अग्निस्तु प्रकाशकः त्रयीप्रतिपाद्यत्रेतारूपेण स्वर्गप्रदश्च । एवं तमसः सकाशात्तु रजः । तस्मात् सत्त्वम् । यत्सत्त्वं तत् ब्रह्मदर्शनं ब्रह्मदर्शनसाधनम् । दृष्टान्तानुगुण्येन दार्ष्टान्तिकार्थस्त्वित्थम् । तमसि तु ब्रह्मदर्शनप्रत्यासत्तिरेव नास्ति लयात्मकत्वात् । रजसि तु सोपाधिकज्ञानहेतुत्वेन किं चिद्ब्रह्मदर्शनप्रत्यासत्तिस्फूर्त्तिमात्रं न तु सर्वथा विक्षेपकत्वात्, सत्त्वे तु साक्षाद्ब्रह्मदर्शनम् । अतस्तद्गुणोपाधीनामपि यथोत्तरं वैशिष्ट्यमितिभावः ॥ २४ ॥ यतः सत्त्वस्यैव ब्रह्मदर्शनसाधकत्वमत एव सत्त्वतनुं विष्णुमेव मुनयोऽभजन्नित्याह । भेजिरे इति । अथ तस्माद्धेतोः । अग्रे पूर्वकाले । मुनयः विशुद्धं रजस्तमोभ्यामननुविद्धम् । सत्त्वं सत्त्वशरीरकं तत्प्रवर्त्तकं च भगवन्तं अधोक्षजं विष्णुम् । भेजिरे उपासांचक्रिरे । एवं इह तान् मुनीन् अन्वनुसृत्य ये जनाः उपासते । तद्वत्सत्त्वतनुं भगवन्तं भजन्तीत्यर्थः । ते क्षेमाय कल्पन्ते मुक्ता भवन्तीत्यर्थः । रजस्तमःप्रधानौ ब्रह्मरुद्रौ भजन्तस्तु न क्षेमाय कल्पन्ते अपि त्वऽन्तवत्फलभाजो भवन्तीति भावः ॥ २५ ॥ ननु केचिद्ब्रह्मरुद्राद्युपासका अपि दृश्यन्ते सर्वेऽपि विष्णुमेव किं न भजन्ते इत्याशङ्कायाम् उपासकानां स्वस्वगुणानुसारेणोपास्यदेवताविषयकोपासनायां रुचिर्जायते इत्याह मुमुक्षव इति द्वाभ्याम् । मुमुक्षवः सत्त्वप्रधाना मुमुक्षुजनाः । अनसूयवोऽसूयावर्जिताः सन्तः । घोररूपान् क्रूराकृतीन् भूतपतीन् रुद्रादीन् तमःप्रधानान् हित्वा परित्यज्य । अथ शान्ताः शुद्धसत्त्वप्रवर्तकाः नारायणकला नारायणावतारान् भजन्ति । हि । अनसूयव इत्यनेन विष्णुभक्तानां देवतान्तरेषु तदुपासकेषु चासूयाराहित्यं साहजिकम् । देवतान्तरभक्तानां तु विष्णौ तत्परेषु चासूयावत्त्वमपि साहजिकमस्तीति सूचितम् ॥ २६ ॥

रज इति । रजश्च तमश्च प्रकृतिर्येषां ते रजस्तमःस्वभावा जनास्तु श्रीः संपच्च ऐश्वर्यमाधिपत्यं च प्रजाः पुत्रादयश्चता ईप्सन्त्याप्तुमिच्छन्ति तथाभूताः सन्तः । समशीलान् यत्स्यैतकस्य यच्छीलं सेव्यस्यापि तच्छीलमस्तीत्येव समस्वभावानित्यर्थः । पितृभूतप्रजेशादीन भजन्ति । वै निश्चितमेव । अनेन विष्णुभक्तानामनन्यप्रयोजनत्वादनन्तस्थिरफलप्राप्तिरन्यदेवभक्तानां त्वन्तवत्फलप्राप्तिश्चेति सूचितम् ॥ २७ ॥ अथ 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्यो' 'यो यो यां यां तनुं भक्त' इत्यादिश्रुतिस्मृत्युक्तरीत्या भागद्वयात्मकवेदवेद्यश्चतुर्मुखरुद्रविष्ण्वादिशरीरकस्तदन्तर्यामितया श्रियैश्वर्यादिफलप्रदश्च वासुदेव एवेत्यभिप्रायेणाह । वासुदेवपरा इति द्वाभ्याम् । वेदाः पूर्वोत्तरभागद्वयात्मका निगमाः । वासुदेवपराः । वासुदेवः परस्तात्पर्यभूमिर्येषां ते तथाभूताः । नन्वग्न्यादिदेवतोद्देश्यसकलयागदानहोमादिकर्मप्रतिपादकवेदपूर्वभागस्य कथं वासुदेवपरत्वमित्यत आह । मखा अग्न्यादिदेवतापूजात्मका यागादयः । वासुदेवः परः प्रधानतया आराध्यो येषां तथाभूताः । अन्तर्यामित्वादग्न्यादिशरीरकतया तद्रूपो वासुदेव एव मखैराराध्य इत्यर्थः । केवलमग्न्यादिदेवतानां पूज्यत्वाभिमानेन ये मखाननुतिष्ठन्ति तेषामपि तत्समीहितं फलं तैरविज्ञातोऽपि वासुदेवोऽग्न्याद्यन्तर्यामितयाराधितः प्रयच्छति तथापि तेषां तद्भक्तानां तन्मुख्यत्वाज्ञानाद्धारा तेभ्योऽन्तवत्फलं प्रयच्छतीति भावः । तथा चोक्तम् । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते' । इति एवम् । तुल्यन्यायतया वेदान्तेषु क्वचित्क्वचित्कालाग्निरुद्रोपनिषत्प्रतर्दनविद्यादिषु रुद्रेन्द्राद्युपासनात्मका योगा अपि रुद्रादिशरीरकवासुदेवविषया एवेत्याह । योगा रुद्रेन्द्राद्युपासनात्मकाः । वासुदेवपराः वासुदेवः परो विषयो येषां तथाभूताः । प्रायशो वेदान्तेषु विहिता योगा वासुदेवविषया एव श्रूयन्ते । क्वचिदापाततो रुद्रादिविषयत्वेन प्रतीयमाना अपि तत्तत्प्रकरणगतै रुद्रादिष्वसंभाव्यमानैर्लिङ्गैस्तच्छरीरकवासुदेवविषयत्वेनैव निश्चीयन्ते इति भावः । एवं निखिलनिगमवेद्यो वासुदेव एवेत्युक्तम् । अथ तत्पूर्वभागोपबृंहणकतन्मूलकस्मृत्यादिप्रतिपाद्यः स्मार्त्तक्रियाराध्यश्च स एवेत्याह । क्रियाः । स्मार्त्याः स्मृतिप्रोक्ता इत्यर्थः । वासुदेवपराः श्रौतीनां तु मखा इत्यनेनाभिहितत्वात् ॥ २८ ॥

अथ वेदान्तार्थोपबृंहणतया प्रवृत्तकपिलप्रणीतागमाद्युक्तप्रकृतिपुरुषविषयकज्ञानमपि प्रकृतिपुरुषशरीरकपरमात्मविषयमेवेत्याह वासुदेवपरमिति । ज्ञानं प्रकृतिपुरुषविषयकम् । वासुदेवपरं वासुदेवविषयकम् । विशेषणशब्दानां विशेष्यपर्यन्तत्वादिति भावः । तथा वेदान्तार्थोपबृंहणपरमन्वादिस्मृत्युक्तकृच्छ्रचान्द्रायणानाशनादितपश्च वासुदेवाराधनरूपमित्याह । तपः कृच्छ्रचान्द्रायणाद्याचरणम् । वासुदेवपरम् । किं बहुना सर्वो वैदिकः स्मार्तो धर्मश्च वासुदेवपर इत्याह । धर्मः श्रौतः स्मार्तश्च वृषः वासुदेवपरः । तत्प्राप्य गतयश्च वासुदेवाधीना इत्याह । गतिर्धर्मप्राप्या स्वर्गादिप्राप्तिरूपा वासुदेवपरा ॥ २९ ॥ ननु कथं वेदादीनां वासुदेवपरत्वं 'अग्निर्मूर्द्धा दिवः' 'इन्द्रो यातो वसितस्य राजा' इत्यादिश्रुतिष्वग्न्यानिपरत्वदर्शनादित्याशङ्कायां तदात्मानं स्वयमकुरुतेत्युक्तरीत्या सूक्ष्मचिदचिद्विशिष्टं स्वात्मानं जगद्रूपेण परिणमय्य तत्तद्रूपेण वासुदेवस्यैवावस्थानाद्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासुदेवात्मकवस्त्वभावाच्च तत्परत्वमित्याह । स एवेति द्वाभ्याम् । अग्रे सृष्टेः प्राक् स एव नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतयावस्थितो वासुदेव एवेत्यर्थः । भगवान्निरवधिकातिशयैश्वर्यवान् सन्नेव । गुणमय्या सत्वादिगुणप्रचुरया । सदसद्रूपया महदादिपृथिव्यन्तकार्यकारणरूपेण परिणतया । आत्ममाया स्वस्य मायात्मकया शक्त्या । विभुर्व्यापकः अन्तरात्मतयानुप्रविष्टः । च अथापि असौ अगुणः व्याप्यगुणैरसंस्पृष्टः सन्नेव इदं जगत् ससर्ज । अयं भावः । सृष्टेः प्राक् नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतयावस्थितो भगवान् गुणमयीमात्ममायां महदादिपृथिव्यन्तकार्यकारणरूपेण परिणमय्य तत्रान्तरात्मतया प्रविष्टोऽपि तद्गुणैरसंस्पृष्टः सन्नेवेदं जगत्ससर्जेति ॥ ३० ॥ एवं भगवतो जगत्कारणत्वमभिधाय ब्रह्मादिषु तत्प्रवेशनियमलक्षणां तल्लीलामाह । तयेति । तयोक्तप्रकारयात्ममायया । विलसितेषु रचितेषु । एषु परिदृश्यमानेषु । गुणेषु गुणकार्यभूतेषु ब्रह्मादिस्तम्बपर्यन्तेषु । विज्ञानेन तत्तत्क्षेत्रज्ञेन । विजृम्भितः भासमानः । क्वचित्तच्छरीरकतयोक्तः क्वचित्तदन्तरात्मतया च प्रोक्तः सन् तद्रूपेण प्रकाशमान इत्यर्थः । अन्तःप्रविष्टः तज्जीवद्वारा ब्रह्मादिशरीरेष्वनुप्रविष्टः सन् गुणवान् इव ब्रह्मादिजीवगतधर्मवानिव आभाति ॥ ३१ ॥ एतदेव दृष्टान्तेनोपपादयति । यथेति । यथा अवहितः स्वरूपस्वभावादिना दारुभ्यो व्यतिरिक्तोऽभिव्यक्तः । वह्निरग्निः स्वयोनिषु स्वाभिव्यक्तिस्थानेषु दारुषु काष्ठेषु एकः सन्नपि नानेवानेकधेव भाति ज्वलति । अग्नेरेकरूपत्वेऽपि तार्णपार्णशाखादिभेदवान् भातीत्यर्थः । च तथैव पुमान् विश्वात्मा जीवशरीरकः स्वरूपस्वभावादिना जीवेभ्यो भिन्नः परमात्मेत्यर्थः । एकः सन्नेव भूतेषु स्वाभिव्यक्तिस्थानेषु सजीवेषु देवादिषु नानेव देवमनुष्यादिभेदभिन्न इव भाति हि ॥ ३२ ॥ दुर्भगशरीरविशिष्टजीवेषु अन्तर्यामितया प्रविष्टस्याप्यस्य जीववद्दुःखभोगो न संभाव्यते इत्याह । असाविति । असौ परमात्मा । गुणमयैः सत्वादिगुणविकारैः । भूतसूक्ष्मेन्द्रियात्मभिः पञ्चमहाभूतपञ्चतन्मात्रादशेन्द्रियमनआदिभिः । भावैस्तत्त्वैः । स्वनिर्मितेषु स्वेन तत्तत्कर्मानुगुणं निर्माय संप्रापितकरणकलेवरवत्सु भूतेषु जीवेषु निर्विष्टः स्वयोगैश्वर्येणासंगतया तेषु कृतप्रवेशः सन्नपि तद्गुणान् जीवगतानन्दादिगुणान् भुङ्क्तेऽनुभवति । न तु तत्संबन्धात्तदनुभूतदोषनिमित्तदुःखादीन । तस्माद्दुर्भगशरीरवज्जीवस्थत्वेऽपि नास्य दुःखादिभोगः स्वतन्त्रत्वादिति भावः । एवं स एवेदं ससर्जाग्रे इत्यादिभिश्चतुर्भिः श्लोकैस्तस्य कर्माणीति श्लोकसंपृष्टं भगवान् लीलया ब्रह्मादिमूर्तीर्धृत्वा यानि महान्ति विश्वसृष्ट्यादीनि कर्माणि करोति तानि ब्रूहीत्यस्य तृतीयप्रश्नस्योत्तरं स्वयमगुण एव स्वमायया ब्रह्मादिरूपः सन् जगत्सृजतीति बोध्यम् ॥ ३३ ॥

सूत जानासीत्यादिसर्वावतारसाधारणप्रश्नात्मकद्वितीयप्रश्नोत्तरं कुर्वन् सर्वावतारधारणस्य साधारणं प्रयोजनं दर्शयति । भावयन्निति । लोकभावनो जगदुत्पादकः एष वासुदेवः सत्त्वेन गुणेन लोकान् भावयन् पालयन् लोकान् पालयितुमित्यर्थः । देवाश्च तिर्यञ्चश्च नराश्च ते आदयो येषां तेषु लीलावतारानुरतः । भवतीति शेषः । वै निश्चितमेव यस्मिन् यस्मिन्काले यो योऽवतारोऽनुकूलः स्यात्तत्र तत्र तं तमवतारं गृह्णातीति भावः ॥ ३४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः

सूत उवाच

जगृहे पौरुषं रूपं भगवान्महदादिभिः । सम्भूतं षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥

तृतीयेऽथात्र संप्राहोत्तरं प्रश्नद्वयस्य हि । पुरुषाद्यवताराणामुक्त्या तच्चरितैः सह ॥ १ ॥

'अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः' इति यदुक्तं तस्योत्तरत्वेनैवावताराननुक्रमिष्यन् प्रथमं पुरुषावतारमाह । जगृहे इति । भगवान्पूर्वाध्यायोक्तविधः परमेश्वरः । महदादिभिस्तत्त्वैः संभूतं सहितम् । षोडश कला यस्मिंस्तत् पञ्चभूतानि पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनश्चेति षोडशकलाः । पौरुषं पुंसाख्यम् । रूपं स्वरूपम् । लोकसिसृक्षया जनसृष्टिविधानेच्छया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आदौ जगृहे। आदिपुरुषे जगत्सर्गाद्यैश्वर्यं संप्रेर्यान्वयेनाविश्य तदात्मकतयादौ प्रतीतो बभूवेति भावः ॥ १ ॥ यस्येति। अम्भसि शयानस्य योगनिद्रां वितन्वतः। समाधिरूपां निद्रां विस्तारयत इत्यर्थः। यस्य पुरुषस्य नाभिह्रदाम्बुजान्नाभिस्थात्पद्मात् विश्वसृजां दक्षादिप्रजापतीनां पतिः ब्रह्मा चतुर्मुखः आसीत् ॥ २ ॥ यस्येति। यस्य पुरुषस्य अवयवसंस्थानैरवयवविभागैः। लोकविस्तरो देवमनुष्यादिलोकविस्तारः कल्पितः। एतच्छरीरीयचतुर्दशावयवैश्चतुर्दशलोककल्पना कृतास्तीति भावः। पुरुषस्य तद्वै तदेतत् रूपं विशुद्धं निर्दोषम्। ऊर्जितं सत्त्वम्। उद्रिक्तसत्त्वात्मकमित्यर्थः। अस्तीतिशेषः ॥ ३ ॥ पश्यन्तीति। सहस्रेण सहस्रसंख्याके पादोरुभुजाननेनाद्भुतम्। तथा सहस्रं सहस्रसंख्याकं मूर्द्धश्रवणाक्षिनासिकं यस्मिंस्तत्। सहस्रैः सहस्रसंख्याकैः मौलिभिः किरीटैः अम्बरैः कुण्डलैश्च उल्लसत। अदः रूपम् अदभ्रचक्षुषा अनल्पज्ञानेन मनसेत्यर्थः। पश्यन्ति योगिन इति शेषः। 'मनसा तु विशुद्धेन' दृश्यते त्वग्र्यया बुद्ध्या' इत्याद्युक्तरीत्या योगपरिशुद्धमनसा पश्यन्तीति भावः ॥ ४ ॥ एतदिति। एतदुक्तप्रकारम्। नाना, नानाविधाश्च तेऽवताराश्च तेषाम् बीजमुद्गमस्थानम्। निधानं निधीयतेऽस्मिन्निति व्युत्पत्त्या कार्यावसाने प्रवेशस्थानमित्यर्थः। निदानमिति पाठे मूलकारणम्। अव्ययमविनाशि। अपक्षयविकाररहितमित्यर्थः। यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन देवतिर्यङ्नरादयः सृज्यन्ते ॥ ५ ॥ तत्रादौ सनत्कुमारावतारमाह। स इति। देव आत्मक्रीडः सः परमपुरुषः एव प्रथमं कौमारं सर्गम् आस्थितः। सनकादिरूपेणावतीर्ण इत्यर्थः। अत एव ब्रह्मा ब्राह्मणः सन् अखण्डितमवकीर्णित्वादिदोषवर्जितत्वान्निर्विघ्नमित्यर्थः। दुश्चरमन्यैरेवमाचरितुमशक्यम्। ब्रह्मचर्यमूर्ध्वरेतस्कत्वम्। ऊर्ध्वरेतस्कत्वेनोपेतं भगवदुपासनमित्यर्थः। चचार चकार। प्रथमद्वितीयादयः शब्दा अत्र निर्देशमात्रापेक्षापरा न तु क्रमविवक्षापराः। अत्र सर्वत्रावतारः समासतस्तच्चरितं च वेद्यम् ॥ ६ ॥ वराहावतारमाह। द्वितीयं त्विति। अस्य जगतः भवायाभ्युदयाय रसातलगतां महीं पृथिवीम्। उद्धरिष्यन् यज्ञेशो भगवान् द्वितीयं तु सौकरं वाराहं वपुः उपादत्त वराहरूपेण प्रादुर्बभूव ॥ ७ ॥

नारदावतारमाह। तृतीयमिति। स परमपुरुषः तृतीयं ऋषिसर्गं तत्र च देवर्षित्वम् उपेत्य तृतीयेऽवतारे नारदसंज्ञं वपुः स्वीकृत्येत्यर्थः। सात्वतं तन्त्रं पञ्चरात्रशास्त्रमित्यर्थः। आचष्ट अवोचत्। प्रवर्त्तयामासेत्यर्थः। वै, तन्त्रं विशिनष्टि। यतस्तन्त्रात्। कर्मणां, निर्गतं कर्म येभ्यस्तानि निष्कर्माणि तेषां भावो नैष्कर्म्यं स्यात्। मोक्षसाधनत्वं भवेदित्यर्थः। अत्र कौमारार्षप्राजापत्यमानवादीनि सर्गविशेषनामानि ज्ञेयानि ॥ ८ ॥ नरनारायणावतारमाह। तुर्ये इति। तुर्ये चतुर्थे धर्मकलासर्गे धर्मात्पितुः कलाशब्दवाच्यतत्पत्नीतो देहप्राकट्यविधानरूपे चतुर्थेऽवतार इत्यर्थः। नारायणौ ऋषी भूत्वा आत्मोपशम इन्द्रियनिग्रहस्तेनोपेतम्। दुश्चरमाकल्पं निष्पाद्यत्वादितरैश्चरितुमशक्यं तपः अकरोत् ॥ ९ ॥ कपिलावतारमाह पञ्चम इति। पञ्चमः अवतारः कपिलो नाम। कपिलनाम्ना ख्यातः। सिद्धेशः आत्मयाथात्म्यानुसंधानयोगेन सिद्धानां स्वस्वरूपमापन्नानामीश इत्यर्थः। कालविप्लुतं प्रवर्त्तयितृरहितकालेन तिरोधानं प्राप्तमित्यर्थः। तत्त्वग्रामस्य प्रकृतिपुरुषमहदादिकलापस्य विनिर्णयो याथात्म्यनिश्चयो यस्मात्तथाभूतम्। सांख्यं सांख्यशास्त्रम्। आसुरये आसुरिर्नाम सिद्धेषु प्रधानस्तस्मै प्रोवाच ॥ १० ॥ दत्तात्रेयावतारमाह। षष्ठमिति। अत्रेः अपत्यत्वं प्रति वृतः। मम पुत्रो भवेति अत्रिणा वृत इत्यर्थः। अनसूययात्रेर्भार्यया प्राप्तः तस्याः पुत्रो दत्तात्रेयाख्यो भूत्वेत्यर्थः। अलर्कायैतन्नाम्ने नृपतये। प्रह्लादादिभ्यश्च। आदिशब्देन यदुहैहयादिग्रहणम्। आन्वीक्षिकीमध्यात्मविद्याम् ऊचिवान्। तं दत्तात्रेयं षष्ठमवतारं विद्यादिति संबन्धः ॥११॥ यज्ञावतारमाह तत इति। सप्तमेऽवतारे रुचेः प्रजापतेः आकूत्यां भार्यायामिति शेषः। यज्ञनामा, अभ्यजायत। स यज्ञनामा, याम आद्यो येषां तैः सुरगणैः सह स्वायंभुवसंबन्धिनं मन्वन्तरम्। अपात्पालयामास ॥ १२ ॥ ऋषभावतारमाह। अष्टम इति। उरुक्रमो भगवान्। अष्टमेऽवतारे तु नाभेराग्नीध्रपुत्रात् मेरुदेव्यां तदङ्गनायां जातः उत्कृष्टसकलगुणवत्तया ऋषभ इति संज्ञां दधानः प्रादुर्बभूवेत्यर्थः। किमर्थमित्याशङ्कायामाह। सर्वाश्रमनमस्कृतं सर्वैराश्रमिभिः पूजितम्। धीराणां योगीश्वराणाम्। वर्त्माऽनुष्ठेयं धर्ममार्गमित्यर्थः। दर्शयन् संदर्शयितुमित्यर्थः। जातः ॥ १३ ॥ पृथ्ववतारमाह। ऋषिभिरिति। ऋषिभिः हुंकारैर्वेनं हतवद्भिर्भृग्वादिमुनिभिः याचितो जगत्पालनार्थं कृतप्रार्थनः भगवान् नवमं पार्थिवं पृथुसंबन्धि वपुः भेजे। नवमे जन्मनि पृथुरूपेणावतीर्ण इत्यर्थः। हे विप्राः। स पृथुः इमां गोरूपं धृतवतीं धरित्रीमित्यर्थः। औषधीः दुग्ध अदुग्ध। अडागमाभाव आर्षः। गोरूपायाः पृथिव्याः सकाशादौषध्यात्मकं दुग्धं दुहोहेत्यर्थः। तेन पृथ्वीदोहनेन स प्रसिद्धः अयमवतारः उशत्तमः सर्वेषामिष्टतमः बभूव ॥ १४ ॥ मत्स्यावतारमाह रूपमिति। सः भगवान् चाक्षुषोदधिसंप्लवे चाक्षुषमन्वन्तरकालीने एकार्णवतान्तःप्रलये। मात्स्यं मत्स्यसंबन्धि रूपमाकृतिं वपुरिति यावत्। जगृहे अत्रानुक्तमपि दशममिति पदमनुषञ्जनीयम्। एतदवतारप्रयोजनमाह। नावीति। वैवस्वतं मनुं वैवस्वतमनुरूपेण जनिष्यमाणं सत्यव्रतं नृपम्। महीमय्यां पृथ्वीरूपायां नावि तरण्याम्। आरोप्यावस्थाप्य अपाद्ररक्ष ॥ १५ ॥

कूर्मावतारमाह। सुरासुराणामिति। एकादशेऽवतारे विभुः सर्वान्तरात्मा भगवान्। सुरासुराणाम् अमृतार्थम् उदधिं क्षीरसमुद्रं मथ्नतां सताम्। कमठरूपेण पृष्ठे मन्दराचलं दध्रे धृतवान् ॥१६॥ धन्वन्तर्यवतारं मोहिन्यवतारं चाह। धान्वन्तरमिति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सः द्वादशमं द्वादशं धान्वन्तरं रूपं दध्रे इति पूर्वश्लोकीयक्रियानुषङ्गः। तेन चामृतमानीतवानिति शेषः। त्रयोदशमे त्रयोदशेऽवतारे मोहिन्याख्यं त्रयोदशं रूपं भृत्वेत्यर्थः। मोहिन्या स्त्रिया। अन्यानसुरान् मोहयन्सन् सुरान्देवान् अपाययत। सुधामिति शेषः। द्वादशमादयः प्रयोगा आर्षाः। धन्वन्तरिरूपेणामृतमानीय मोहिनीरूपेणापाययदित्यर्थः॥ १७॥ नृसिंहावतारमाह। भगवान् नारसिंहं चतुर्दशं रूपं बिभ्रद्दधानः सन् ऊर्जितमतिबलिष्ठम्। दैत्येन्द्रं हिरण्यकशिपुं वक्षसि करजैर्नखैः। कटकृदासनकारकः एरकां निर्ग्रन्थितृणविशेषं यथा तथा ददार विदारयामास॥ १८॥ वामनावतारमाह। पञ्चदशमिति। त्रिविष्टपं त्रैलोक्यं प्रत्यादित्सुः बलेराच्छिद्येन्द्राय दातुकामः। बलिं पदत्रयं याचमानः। पदत्रयमितभूम्याजेन त्रिलोकीयाचनं कुर्वन् स भगवान् पञ्चदशं वामनकं वामनाख्यं वपुः कृत्वा धृत्वा बलेः अध्वरं यज्ञवाटम् अगाज्जगाम॥ १९॥ परशुरामावतारमाह। षोडशमे षोडशे अवतारे स भगवान् जमदग्निसुतः भूत्वा ब्रह्मद्रुहः ब्रह्मकुलद्रोहकर्तॄन् नृपान् पश्यन् कुपितः सन् नृपान् ब्रह्मद्रोहकर्तॄन् दृष्ट्वा कोपं प्राप्तः सन्नित्यर्थः। त्रिःसप्तकृत्वः एकविंशतिवारान् महीं भारतवर्षभूमिम्। निःक्षत्रां क्षत्रियजातिरहिताम् अकरोत्॥ २०॥ व्यासावतारमाह। तत इति। ततः सप्तदशेऽवतारे पराशरात् सत्यवत्यां जातः बादरायण इति प्रसिद्धो मुनिः। पुंसो वैदिकाधिकारवतो मनुजान्। अल्पमेधसः कृत्स्नवेदतदर्थावगमोपयुक्तबुद्धिशून्यान् दृष्ट्वा वेदतरोर्वेदात्मकद्रुमस्य शाखाः चक्रे। ऋग्यजुःसामादिभेदेन तदवान्तरभेदेन च विभक्तवानित्यर्थः॥ २१॥ रामावतारमाह। नरदेवत्वमिति। अतः परम् अष्टादशेऽवतारे इत्यर्थः। सुराणां कार्यं तस्य चिकीर्षा तया देवकार्यकरणेच्छया नरदेवत्वं राजभावम् आपन्नः प्राप्तः सन् श्रीरामरूपेणावतीर्णः सन्नित्यर्थः। समुद्रनिग्रह आदिर्येषां तानि वीर्याणि सेतुबन्धनपूर्वाणि वीरकर्माणि चक्रे कृतवान्॥ २२॥ रामकृष्णावतारमाह एकोनविंश इति। एकोनविंशे विंशतितमे च अवतारे भगवान् वृष्णिषु यादवेषु रामकृष्णौ इति जन्मनी प्राप्य भुवो धरायाः भरं भारम् अहरत्। एकोनविंशो रामः विंशतितमः कृष्णः एवं द्वाववताराविल्यर्थः। विंशतितमे इति वक्तव्ये तकारलोपश्छन्दोऽनुरोधेन॥ २३॥ बुद्धावतारमाह। तत इति। ततः कलौ युगे संप्रवृत्ते श्रीकृष्णतिरोधानानन्तरं द्विसहस्रवर्षातिक्रमतः सम्यक्कलेः प्रवृत्तौ जातायां सत्यामित्यर्थः। सुरद्विषामसुराणामाहन्तानामसुराणां वा संमोहाय संमोहनं विधातुं भगवान् कीकटेषु देशेषु गयाप्रदेशेषु तत्रापि धर्मारण्यग्रामे इति लघुभागवतामृते। नाम्ना बुद्धः इति प्रसिद्धः सन् अजनस्य सुतः भविष्यति। जिनसुत इति पाठे जिनेन सुतत्वेन वृतो भविष्यतीत्यर्थः। अयमेकविंशोऽवतारः॥ २४॥ कल्क्यवतारमाह। अथेति। अथानन्तरम्। असौ जगत्पतिः युगसंध्यायां युगयोः कलिकृतयुगयोः संधौ राजसु नृपतिषु दस्युप्रायेषु चौरप्रचुरेषु केवलाधर्मबहुलेषु सत्स्वित्यर्थः। तद्वधार्थं विष्णुयशसो विप्रात् जनिता। विष्णुयशसः पुत्ररूपेणावतरिष्यति इत्यर्थः। नाम्नाभिधया कल्किरिति प्रसेत्स्यति अयं द्वाविंशोऽवतारः॥ २५॥

हरेरवताराणामनन्तत्वादनन्तपुरुषायुषापि संख्यां विधातुं नास्माकं शक्तिरस्तीति तद्दिङ्मात्रमेवैतत्प्रदर्शितमित्यभिप्रायेणाह। अवतारा इति। हे द्विजाः। सत्त्वनिधेः शुद्धसत्त्वमूर्तेः ज्ञानबलैश्वर्यादिमहागुणनिधानस्य वा। हरेः अवताराः असंख्येयाः। पाठान्तरेऽप्ययमेवार्थः। हि तत्रोदाहरणमाह यथेति। यथा अविदासिनः उपक्षयशून्यात् अशोष्यादित्यर्थः। सरसः मानसादिमहासरोवरात्सकाशात् सहस्रशः कुल्याः क्षुद्रनद्यः स्युः संस्यन्दन्ते। तद्वत् इदमपि मन्दमतीनपेक्ष्योक्तं न योगिनः क्षुद्रनदीनां तैः संख्येयत्वेऽपि हरेरवताराः संख्यातुं न शक्यन्ते इत्यतो मन्दबुद्ध्यवतारार्थमिति ज्ञातव्यम्॥ २६॥ के ते इत्यत आह। ऋषय इति। ऋषयो मन्त्रद्रष्टारो वसिष्ठादयः मुनयः। मनवः स्वायम्भुवादयः। देवाः इन्द्रादयः। मनुपुत्राः प्रियव्रतादयः। महौजस इति प्रत्येकं योजनीयम्। तथा सप्रजापतयः दक्षादिभिः सहिताः प्रजापतयश्चेत्यर्थः। ते एते सर्वे हरेः एव कलाः स्मृताः। भगवदंशेन कलादिना च संभूता इत्यर्थः॥ २७॥ एत इति। एते च ऋषिप्रभृतयस्त्वित्यर्थः। पुंसः भगवतः अंशकलाः। केचिदंशाः केचित्कलाः केचिद्विभूतय इत्यर्थः। कृष्णस्तु स्वयं भगवान् षड्गुणसंपूर्ण एवेत्यर्थः। सर्वावतारसाधारणं प्रयोजनमुपसंहरति इन्द्रेति। इन्द्रारिभिरसुरादिभिर्व्याकुलमुपद्रुतं लोकं युगे युगे प्रतियुगम्। मृडयन्ति रक्षन्ति॥ २८॥ अवतारकीर्तनफलमाह। जन्मेति। यः कश्चित् नरः एतत् जन्मगुह्यमवताररहस्यं सायं प्रातः प्रयतः समाहितचित्तः भक्त्या गृणन्कीर्तयन्सन्। दुःखग्रामात् संसरणरूपदुःखसमूहात्। दुःखजातादिति पाठेऽप्ययमेवार्थः। विमुच्यते मुक्तो भवति। जन्मगुह्यमित्यनेन, न भगवज्जन्म जीवजन्मवत्कर्ममूलमपि तु स्वसंकल्पमूलमित्यभिप्रेतम्॥ २९॥ एवं भगवदवतारकीर्तनफलोक्त्यनन्तरं एवं जन्मानि कर्माणीत्यनेन श्लोकेनास्य संबन्धो युज्यतेऽतः प्रक्षिप्तमपि तदन्तःस्थं श्लोकपञ्चकं व्याख्यायते बालबोधाय। दुःखग्रामाद्विमुच्यते इति यदुक्तं तत्सत्यं परं तु 'बुद्धीन्द्रियमनः प्राणान् जनानामसृजत्प्रभुः' इत्युक्तेर्भगवता तत्तत्कर्मानुगुणं सृष्ट्वा दत्ते बुद्ध्यादिरूपे देहसंबन्धे विद्यमाने सत्यपि कथं तद्विमुक्तिरित्याशङ्क्य 'विद्याविद्ये ममतनू विद्ध्युद्धव शरीरिणाम्। बन्धमोक्षकरी आद्ये मायया मे विनिर्मिते' इति भगवदुक्तेर्भगवदायत्तानाद्यविद्ययानादिबन्धनवतो जीवस्य भगवदुपासनात्मकविद्यया तन्निवृत्तिरुपपद्यते इत्याशयेनाह। एतदिति पञ्चभिः। अरूपस्यादिव्यदृशाऽदर्शनीयाकारस्य चिदात्मनः ज्ञानरूपस्य जीवस्य आत्मनि स्वरूपे भगवतः मायागुणैः 'कर्तृभिः' महदादिभिः 'करणैः' एतत्स्थूलं रूपं शरीरं विरचितम्। स्थूलशरीराभिमानं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारयित्वा देवोऽहं मनुष्योऽहमित्यात्मनि तन्मननवान् जीवः कारितः इति भावः ॥ ३० ॥ यथा सदा दिव्यपुरुषाकृतिमति भगवत्स्वरूपे सत्यपि प्रयोजनार्थं विधृतमत्स्यकूर्माद्याकारेऽबुद्धिभिस्तथाकारवत्त्वमेवारोप्यते तद्वदनाद्यविद्योपहतात्मसंविदि सत्यपि ज्ञानस्वरूपे आत्मनि देवादिशरीरभावस्तत्स्वरूपानभिज्ञैरारोपितोऽस्तीत्याह । यथेति । यथा मेघौघो वाय्वाश्रितो जलद-समूहः, आकाशे अबुद्धिभिरज्ञैः आरोपितः । वा यथा पार्थिवः रेणुः तद्वत् धूसरत्वादीत्यर्थः । अनिले वायौ आरोपितः । एवं द्रष्टरि जीवे दृश्यत्वादिधर्मकं शरीरम् । अबुद्धिभिः आरोपितम् । भवतीति शेषः ॥ ३१ ॥ यथा स्थूलशरीरमात्मन्यारोपितमस्ति तथान्यत्सूक्ष्मशरीरमप्यारोपितमस्तीत्याह । अत इति । अतोऽस्मात्स्थूलाच्छरीरात् परमन्यत् अव्यूढा अपरिणताः परिणाममप्राप्ता ये गुणास्तैर्बृंहितम् । सत्वादिगुणस्थूलभाववर्जितमित्यर्थः । अत एव अव्यक्तं व्यक्तताभावात्सूक्ष्ममपि आरोपितमित्यनुषङ्गः । कथमेवंविधमेतदित्यत्राह । अदृष्टाश्रुतवस्तुत्वात् । यदाकारविशेषवद्वस्तु स्यात्तु अस्मदादिदृश्यं भवेत् इन्द्रादिवच्छ्रवणविषयं च स्यादिदं तु न तथा । तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह । सः जीवः । एवंभूतं यद्वस्तु स जीवशब्देन व्यवह्रियते इत्यर्थः । 'जीवो जीवेन निर्मुक्तो जीवो जीवं विहाय च' इत्यादौ सूक्ष्मशरीरापरपर्यायलिङ्गदेहे जीवशब्दप्रयोगात् । ननु स्थूलशरीरमेव भोगायतनत्वाज्जीवशरीरमस्तु किमेतत्प्रतिपादनेनेत्यत आह । यदस्मात्सूक्ष्माद्देहात् । पुनर्भवः पुनः पुनः शुभाशुभकर्मभोगाय जन्म जायते । 'उत्क्रान्तिगत्यागतीनां तेन विनाऽसंभवात्' इति न्यायादिति भावः ॥ ३२ ॥

तर्हि केनोपायेनास्यानादिप्रकृतिसङ्गमूलकपुनर्भवस्य निवृत्तिः, कीदृशं वा निवृत्तपुनर्भवं जीवरूपमित्यत्राह । यत्रेति द्वाभ्याम् । इमे सदसद्रूपे कार्यकारणात्मके स्थूलसूक्ष्मशरीरे आत्मनि जीवे अविद्यया अनाद्यज्ञानात्मकभगवदधीनया मायया कृते एते एवाहमिति मननं कारिते भवत इत्यर्थः । अतः ते द्वे शरीरे यत्र यदा स्वसंविदा स्वशरीरकपरमात्मसंविदा निजात्मनः परमात्म-शरीरकत्वस्य सम्यक् ज्ञानेनेत्यर्थः । प्रतिषिद्धे भवतः । परमात्मशरीरकस्वात्मज्ञानोपायेन प्रकृतिसङ्गमूलकपुनर्भवनिवृत्तिरित्यर्थः । तत्तदा इत्येवंविधं ब्रह्म बृहत्त्वगुणयोगाद्ब्रह्मशब्दवाच्यम् । दर्शनं ज्ञानात्मकम् । आत्मस्वरूपं जायते इति शेषः । अनेन निवृत्तपुनर्भवं जीवस्वरूपमुक्तम् । एवं परमात्मोपासनासंजातात्मसंविदेव पुनर्भवनिवृत्तिहेतुः सदसदात्मकप्रकृतिसङ्गवियुक्तं शुद्धं जीवस्वरूपं चेति सूचितम् । 'ब्रह्मभूयाय कल्पते' ब्रह्मणो हि प्रतिष्ठाहम्' इति मुक्तात्मनि अपि ब्रह्मशब्दप्रयोगः दृश्यते एवेति ॥ ३३ ॥ यदीति । यदि यदा वैशारदी महदादिकार्यमुखेन विपुला, एषा परमेश्वराधीना जीवगतानाद्यविद्यारूपा माया मतिस्तन्मूलाऽ-भिमतिश्च । इत्येवं देवी द्योतमाना सत्यपि उपरता निवृत्ता स्यात् । तदा सम्पन्ने परमात्मप्राप्त्याभिव्यक्ते स्वे स्वकीये महिम्नि गुणाष्टकाविर्भावार्हस्वमहत्तायामित्यर्थः । महीयते स्वकीयमहिमलब्ध्या हेतुना परमव्योमवासिभिर्बहुमतो भवति इति विदुः । मुक्तात्मस्वरूपयाथात्म्यविदः कथयन्तीत्यर्थः । अत्र मायोपरतिर्नाम तत्संबन्धविरहः । 'नित्या सततविक्रिया गौरनादवती अजा ध्रुवा' इत्यादिशब्दैरभिहितायाः प्रकृतेर्नित्यत्वावगमेन विनाशायोगात् । निरवशेषत्वेन प्रकृतिसंबन्धतत्कार्यसंबन्ध-विरहाविर्भूतगुणाष्टकयुक्तः परं ब्रह्मानुभवन् परमव्योमनिवासिभिर्बहुमतोऽवतिष्ठते इत्यर्थः ॥ ३४ ॥ तदेवं प्रसक्तानुप्रसक्ततया जीवस्वरूपं तदनादिबन्धनिवृत्त्युपायश्च कथितः । अथ प्रस्तुतस्य भगवज्जन्मनो जीवजन्मतो वैलक्षण्यमाह । एवमिति । अजनस्य जीववत्कर्माधीनजननरहितस्य अकर्तुः तद्वदेव पुण्यपापात्मककर्मकर्तृतारहितस्य । हृत्पतेः सर्वान्तरात्मनो भगवतः एवमुक्तविधानि जन्मानि कर्माणि च वेदगुह्यानि सन्त्यपि कवयो ज्ञानिनो मुनिजनाः वर्णयन्ति स्म हि ॥ ३५ ॥ भगवच्चे-ष्टितानां जीवचेष्टिततो वैजात्यं दर्शयति । स वा इति । अमोघा लीला यस्य सः सफलसकलचरित्रः । भूतेषु सजीवेषु देवमनुष्यादिप्राणिमात्रेषु अन्तर्हितोऽन्तर्यामितयावस्थितः । अथापि आत्मतन्त्रः स्वतन्त्रसर्वक्रियः । षड्गुणेशः ज्ञानशक्ति-बलैश्वर्यवीर्यतेजसां षण्णां गुणानामीशः । स उक्तविधो भगवान् । इदं विश्वं सृजति ब्रह्मद्वारा सृष्टिं विदधाति । अवति स्वात्मविष्णुद्वारा पालनं विदधाति । अत्ति शिवद्वारा तत्संहारं विदधाति च । अस्मिन् सृष्ट्यादिकर्मणि न सज्जते इतरवत्सक्तो न भवति । किंतु षाड्गुणिकं जिघ्रति । षडिन्द्रियसुखं दूरादेव गन्धवद्गृह्णाति । अथवा धातूनामन्तर्गतण्यर्थत्वाज्जीवांस्तज्जि-घ्रापयतीत्यर्थः । 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' इति श्रुतेः ॥ ३६ ॥ श्रीहरेरेवंविधतां नास्तिका न जानन्तीत्याह । नेति । मनोवचोभिः नामानि रूपाणि च संतन्वतः वचोभिः संकीर्त्तनयोग्यानि नामानि, मनोभिः संस्मरण-योग्यानि रूपाणि च सम्यग्विस्तारयतः । मनोवचोभिर्नामरूपात्मकं प्रपञ्चं सृजत इति वा । निपुणेन स्वकीयेन साहजिकेन निपुणत्वेन धातुः स्वाश्रितजनभद्रमिति शेषः । निजसतां भद्रं कुर्वत इत्यर्थः । अस्य हरेः ऊतिमभिप्रायं गतिं वा । कुमनीषः कुमतिः जन्तुजन्तुसदृशः कश्चित् कोऽपि संसारी जनः, अज्ञो नटचर्यानभिज्ञो जनः नटचर्याम् इव नटचारित्रमिवेत्यर्थः । न च अवैति । न वेत्त्येवेत्यर्थः ॥ ३७ ॥ तर्हि तां कीदृशो वेदेत्यत्राह । स इति । यो वेदादिसच्छास्त्रतदुक्तार्थसत्यताप्रमाणकारको जनः अमायया निष्कपटया संततया विश्वासपूर्वकं सांतत्येन कृतया । अनुवृत्त्या छन्दानुवृत्तिपूर्विकया सेवया । दुरन्तवीर्य-स्यापरिमितपराक्रमस्य । परस्य परमात्मशब्दवाच्यस्य धातुः सर्वपोषकस्य रथाङ्गपाणेः श्रीनारायणस्य पदवीं प्राप्तिमार्गरूपं तत्पादसरोजगन्धं भजेत । भ्रमरः कमलगन्धमिव तदेकासक्तितया तत्संसेवनपर एव स्यादित्यर्थः । स एवंविधो भक्तजनः वेद तत्पदवीं जानाति ॥ ३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नन्वेवंविधा भागवताः कीदृशाः स्युरिति तदभिप्रायमालक्ष्य भवादृशा एवेत्याशयवानाह। अथेति। अथ अतः इह संसारे हे मुनयः यूयं भगवन्तः पूज्याः धन्याः कृतार्थाश्च स्थ। यद्यस्मात्कारणात् अखिलानां लोकानां नाथस्तस्मिन् सर्वलोकैकस्वामिनि वासुदेवे वसुदेवपुत्रे श्रीकृष्णे सर्वात्मकं सर्वप्रकारकम्। आत्मभावं स्वामिभृत्यभावं कुर्वन्ति भवन्तो विदधति। यत्र यस्मिन्नुक्तविधे भगवत्यात्मभावे जाते सति भूयः पुनरपि उग्रः क्रूरः। उं रुद्रमपि ग्रसतीति उग्रः उत्कट इत्यर्थः। परिवर्त्तः संसारपरिवृत्तिः। न नैव जायते॥ ३९॥ हे सूतापूर्वमिवैतत्किमात्मकं शास्त्रं कथयसीत्यत्राह। इदमिति। हे मुनयः ब्रह्मसंमितं वेदतुल्यम्। यद्वा ब्रह्म 'तदिदं ब्रह्म वार्ष्णेयम्' इत्युक्तेः श्रीकृष्णाख्यपरब्रह्मस्वरूपं सं सम्यक् मीयते प्रमाणीक्रियतेऽनेन अस्माद्वेति। परब्रह्मश्रीकृष्णस्वरूपप्रमापकमित्यर्थः। उत्तमश्लोकस्य तस्य श्रीकृष्णस्यैव चरितं यस्मिंस्तथाभूतं भागवतं नाम इदं पुराणं भगवान् ऋषिः निखिलनिगमद्रष्टा व्यासः चकार॥ ४०॥ किमर्थमित्यत्राह। निःश्रेयसायेति। धन्यं सम्यक् ज्ञानजननद्वारा कृतार्थत्वावहम्। स्वस्त्ययनं मङ्गलास्पदम्। महच्छब्दतोऽर्थतश्चोत्कृष्टमहत्त्वावत् तत्पुराणेषु महत्ताप्राप्त्या प्रसिद्धं इदं मद्बुद्धिस्थं भागवतपुराणं लोकस्यैतच्छ्रवणादिकर्तुर्जनस्य निःश्रेयसाय मुक्त्यर्थं चकारेति पूर्वश्लोकोक्तक्रियया संबन्धः। आत्मवतां ज्ञानिनां वरं श्रेष्ठं सुतं शुकनामानं स्वतनयं ग्राहयामासाध्यापयामास च॥ ४१॥ ननु कुतो महैश्वर्यवन्तं सुतमेवैतदध्यापयामासेत्यत्र हेतुमाह सर्वेत्यर्द्धेन। वेदाश्चेतिहासाश्च वेदेतिहासाः सर्वे ये वेदेतिहासास्तेषां सारं सारं समुद्धृतम्। यतोऽत्र सर्ववेदेतिहाससारः समुद्धृत्य निवेशितस्तथाविधस्यैतस्यैतमृतेऽधिकार्यभावाच्छुकमेवैतदधिकारिण-मालक्ष्य तमेवेदं ग्राहितमिति भावः। ननु स एवेदं गृहीत्वा जोषमासीदन्यं वाधिकारिणमश्रावयत्तत्राह। स तु, स एवंविधः शुकोऽपि महाराजं परीक्षितं संश्रावयामास॥ ४२॥ एतदधिकारित्वोक्त्यै नृपं विशिनष्टयर्द्धेन। प्रायेति। गङ्गायां गङ्गातटे प्रायोपविष्टमनशनव्रतदीक्षितम्। परमाश्च ते ऋषयश्च तैः परीतं परिवेष्टितं संश्रावयामासेति पूर्वेण संबन्धः। ननु तस्यैत-च्छ्रवणमुक्तरीत्याऽस्तु त्वयैतत्कथं न्वधिगतं तत्राह। तत्रेति। हे विप्राः तत्र परीक्षितः सन्निधौ भूरितेजसः महाप्रतापवतः विप्रर्षेः शुकस्य कीर्त्तयतः सतः॥ ४३॥ अहमिति। तत्र निविष्टः अहं, चाहमपि तदनुग्रहात् शुकानुग्रहतः अध्यगममधि-गतवानस्मि। एतत्पुराणमिति शेषः। स तदनुग्रहाऽधिगतैतत्पुराणः अहं यथा अधीतम्। यद्वाऽधीतमिति भावे क्तः। तदा यथाधीतमध्ययनमनतिक्रम्य अध्ययनानुसारेणेत्यर्थः। यथामति च वो युष्मान् श्रावयिष्यामि। यथामतीत्यनेनास्य पुराणस्य दुरवबोधत्वं सूचितम्॥ ४४॥ 'धर्मः कं शरणं गतः' इति यः षष्ठः प्रश्नो मुनिभिः कृतस्तदुत्तरं वदति। कृष्ण इति। धर्मश्च ज्ञानं च ते आदी येषां विरक्तिभक्तिमाहात्म्यवेदनानां तैः सह कृष्णे स्वधाम गोलोकधाम उपगते प्राप्ते सति अधुना कलौ कलियुगे नष्टदृशां विनष्टविज्ञानदृशां पुंसाम् एषः पुराणार्कः सद्धर्मप्रकाशकश्रीभागवतपुराणरूप एष भानुः उदितः। वेदव्यासेनोदयं प्रापितः। यद्वा। उदित उदयं प्राप्तः। यथा रात्रौ नष्टदृष्टीनामर्कोदये सति दृष्टिः स्वविषयग्रहणसमर्था भवत्येवं रात्रिरूपे कलौ नष्टप्रज्ञानां पुनरेतत्पुराणार्कोदयेन प्रज्ञा प्रवर्तते इत्यर्थः॥ ४५॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे तृतीयोऽध्यायः॥ ३॥

अथ चतुर्थोऽध्यायः

व्यास उवाच

इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम्। वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत्॥ १॥

श्रीमद्भागवतारम्भहेतुत्वेन चतुर्थके। कथ्यतेऽपरितोषस्तु व्यासस्य तपआदिभिः॥ १॥

इत्थं लब्धावसरः शौनकः पृच्छतीत्याह व्यास उवाचेति। अस्मिन्पुराणे काप्यन्यत्र व्यास उवाचेति न विद्यतेऽतोऽत्र तन्न युक्तमिति केचिद्वदन्ति तन्मूलं मृग्यम्। कृत्स्नस्यैतत्प्रबन्धस्य व्यासोक्तिरूपत्वेऽपि परीक्षिच्छुकशौनकसूतप्रश्नोत्तररूपेणास्य प्रणीतत्वात्तत्र तत्र परीक्षिदादिप्रश्नोत्तरत्वज्ञापनाय 'राजोवाच' 'शुक उवाच' इत्यादीनां पाठे सत्यपि यत्र शौनकसूतप्रश्नोत्तर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकारानुकाररूपाः 'इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः। प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे' इत्यादयः श्लोका दृश्यन्ते तेषां व्यासोक्तित्वज्ञापनाय तदादौ 'व्यास उवाच' इत्यस्य पाठावश्यंभावात्क्वचित्तदभावेऽपि अर्थतस्तस्य विवक्षितत्वाच्छौनकादेर्नियतप्रश्नोत्तरादेरभावादेवामुक उवाचेति पाठायोगान्नैतद्घटते एव। इतीति दीर्घं दीर्घकालीनं प्रशस्तं सत्रमेषामस्तीति तेषां दीर्घसत्रिणां मुनीनां मध्ये वृद्धो ज्ञानवयोवृद्धः कुलपतिर्गणमुख्यः। देवदत्तस्य गुरुकुलमितिवत्समासः। बह्वृचः ऋग्वेदी शौनकः इति 'सोऽहं वः श्रावयिष्यामि' इत्येवं ब्रुवाणं सूतं संस्तूय प्रशंस्य अब्रवीत्। मुनीनां बहूनां मध्ये एकेन तत्रापि वृद्धेन तत्रापि कुलपतिना तत्रापि ऋग्वेदिनेति निर्णीतत्वात्तथाविधः शौनकः सूतमब्रवीदिति भावः॥ १॥ यत्प्रष्टव्यं तदेवाह सूत सूतेत्यादिभिर्द्वादशभिः श्लोकैः। हे सूत सूत। आदरात्संभ्रमाद्वा द्विरुक्तिः। हे महाभागभाग्यवन्। भाग्यमत्र निखिलतत्त्वज्ञानित्वरूपम्। हे वदतां वर, भागवतीं श्रीमद्भागवतपुराणप्रतिपाद्यां पुनातीति पुण्या तां कथां नोऽस्मभ्यं वद। भागवतं विशिनष्टि। यद्भागवतं भगवान् शुकः आह। परीक्षिते इति शेषः। यद्वा यद्यां कथां भगवान् शुकः आह। तां नो वदेत्यन्वयः॥ २॥ एवं सामान्यतः पृष्ट्वा विशेषतः पृच्छति। कस्मिन्निति इयं भागवती कथा कस्मिन् युगे प्रवृत्ता इत्येकः प्रश्नः। कस्मिन् स्थाने इत्यपरः प्रश्नः। केन हेतुना, महाभारतादिधर्मशास्त्राणि कृतवतः पुनरेतत्संहिताकरणे किं कारणमित्यर्थः। इति तृतीयः प्रश्नः। कृष्णः मुनिः कृष्णद्वैपायनर्षिः। कुतः कस्माद्धेतोः केन पुंसा वेत्यर्थः। संचोदितः संप्रेरितः। इमां संहितां भागवतरूपां कृतवान्। इति चतुर्थः प्रश्नः॥ ३॥ यदुक्तं 'स तु संश्रावयामास महाराजं परीक्षितम्' इति तदघटमानमिवाभिप्रेत्य तद्धेतुभूतैर्विशेषणैः शुकं विशिनष्टि तस्येत्यादिभिः पञ्चभिः। तस्य कृष्णस्य मुनेः पुत्रः शुकः महायोगी योगिश्रेष्ठः। श्रेष्ठत्वमाह। समदृक् सकलदेवमनुष्यादिशरीरजातं प्रधानपरिणामरूपत्वेन पराक्त्वेन च जीववर्गं ज्ञानैकाकारत्वेन सर्वत्रानुस्यूतं परमात्मानं सत्यज्ञानादिकल्याणगुणाकरत्वेन चेत्येवंरूपं समं पश्यतीति समदृक्। निर्विकल्पकः भेदानुसंधानरहितः। देहगतविकल्पानां देवमनुष्यत्वादीनामात्मनि नारोपयिता इत्यर्थः। यद्वा। अब्रह्मात्मकस्वतन्त्रवस्तुज्ञानरहित इति। एकान्ता अव्यभिचारित्वान्निश्चला मतिर्भगवति यस्य तथाभूतः। उद्गता निद्रा यस्माज्जागरूकः। 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी' इत्युक्तविधजागरयुक्त इत्यर्थः। गूढः स्वमाहात्म्यानाविष्कारशीलः। मूढोऽज्ञ इव ईयते प्रतीयते दृश्यते इत्यर्थः॥ ४॥ तस्य ज्ञानाधिक्यमेव व्यञ्जयितुं कंचिदितिहासमाह। दृष्ट्वेति। कदाचित्कचिद्देवस्त्रियो नग्ना जले विहरन्त्यः, पुरतो गच्छन्तं शुकमालोक्य वासांसि न परिदधुः। ततः पृष्ठत आयान्तं श्रीव्यासम् आलोक्य तु ह्रिया परिदधुः। तदिदं छिद्रमवलोक्य श्रीव्यासोऽपृच्छत्, शुकमवलोक्यापि वासांसि किं न परिधत्थेति तदा ता ऊचुः। तव तु स्त्रीपुरुषविवेकोऽस्ति त्वत्सुतस्य तु परमात्मैकनिष्ठमनसस्तद्व्यतिरिक्तज्ञानाभावेन स्त्रीपुंविभागो नास्ति अतस्तमवलोक्यापि लज्जारहिता न परिदधीम त्वां त्ववलोक्य परिदधीमेति सोऽयमत्रोच्यते। आत्मजम् अनु पश्चात् यान्तमागच्छन्तम्। अनग्नम् अपि ऋषिं व्यासं दृष्ट्वा। देव्यो देवस्त्रियः ह्रिया लज्जया परिदधुः। वासांसीति शेषः। सुतस्य नग्नस्य दर्शने न परिदधुः। तत् चित्रं वीक्ष्य मुनौ व्यासे पृच्छति सति देव्यः जगदुः। तव स्त्रीपुंभिदा स्त्रीपुरुषभेदः अस्ति। विविक्ते प्रकृतिपुरुषविलक्षणे परमात्मन्येव दृष्टिर्यस्य तस्य तव सुतस्य न तु नैवास्ति। तस्य तथाभूतत्वात्तद्दर्शनेनापि नास्माकं लज्जा बभूवेत्यर्थः॥ ५॥

कथमिति। सदैवैवंभूतः सः, कुरवश्च जाङ्गलाश्च तान् कुरुदेशान् जाङ्गलदेशांश्च प्रतीत्यर्थः। उन्मत्तमूकजडवत् क्वचिदुन्मत्तवत्क्वचिन्मूकवत्क्वचिज्जडवच्चेत्यर्थः। विचरन् गजसाह्वये गजेन सहित आह्वयो नाम यस्य तस्मिन्हस्तिनापुरे इत्यर्थः। संप्राप्तः आगतः सन् पौरैर्जनैः कथम् आलक्षितः। शुकोऽयमिति कथं ज्ञात इत्यर्थः॥ ६॥ किं च परीक्षितस्तद्दर्शनानन्तरकालीनस्तेन सह संवादः सुतरामसुलभ इत्याशयवानाह। कथं वेति। हे ताताऽनुकम्प्य सूत, पाण्डवेयस्य पाण्डुनृपकुलोत्पन्नस्य राजर्षेः परीक्षितः। मुनिना शुकेन सह संवादः कथं वा संबभूव। यत्र संवादे एषा भागवतग्रन्थरूपा सात्वती सातयति सुखयतीति सात्परमात्मा। सातेः सुखार्थात्सौत्राद्धातोर्हेतुमण्ण्यन्तात् वा सरूपविधिना 'अनुपसर्गाल्लिम्पविद' इत्यादिना शप्रत्ययाभावपक्षे क्विपि सादिति व्युत्पत्तेः। स प्रतिपाद्यतयाऽस्यामस्तीति सात्वती। मतुप्युगित्वात् ङीप्। श्रुतिः श्रुतितुल्या संहिता समभूत्॥ ७॥ एतद्व्याख्यानं बहुकालावस्थानापेक्षं तस्य त्वेकत्रावस्थानं दुर्लभमतः संवादस्यासंभावनां व्यञ्जयन्नाह। स इति। महाभागः महायोगी स शुकः तदाश्रमं गृहमेधिनामालयं तीर्थीकुर्वन् पवित्रीकर्तुमित्यर्थः। गृहमेधिनां गृहस्थाश्रमिणां गृहेषु गोदोहनमात्रं, यावता कालेन गौर्दुह्यते तावन्तं कालमित्यर्थः। अवेक्षते प्रतीक्षमाणस्तिष्ठति न त्वधिकमित्यर्थः। विरक्तत्वादिति भावः॥ ८॥ यस्मादेवंभूतोऽत्र वक्ता तत आश्चर्यं श्रोतुस्तु चरितमतीवाश्चर्यं प्रायोपवेशनं यतोऽतः कथयेत्याह। अभिमन्युसुतमिति। हे सूत अभिमन्युसुतं परीक्षितं भागवतोत्तमं महाभागवतं प्राहुः। अतः तस्य महाश्चर्यं श्रोतृणामत्याश्चर्यकारकं जन्म कर्माणि च नोऽस्माकं गृणीहि कथय॥ ९॥ तस्य वैराग्यहेतुं पृच्छति। स इति। पाण्डूनां पाण्डुवंशजानां मानवर्द्धनः प्राशस्त्यवृद्धिकरः। सम्राट् सार्वभौमः सः परीक्षित् कस्य वा हेतोः कस्मान्नु कारणात् अधिराट्श्रियमधिराज्यसंपदम् अनादृत्य तृणवत्कृत्वा गङ्गायां गङ्गायारूटे प्रायोपविष्टोऽनशनव्रतं कृत्वा निषण्णः अभूत्॥ १०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंविधश्रीसंत्यागे महत्कारणेन भवितव्यं तत्किमित्याशङ्कयाह। नमन्तीति। शत्रवो मण्डलपतयः आत्मनः शिवाय स्वकल्याणायेत्यर्थः। धनानि च आनीय यत्पादनिकेतनं यस्य परीक्षितः पादयोः स्थित्यर्हपीठाख्यस्थानं नमन्ति। अङ्ग हे सूत, धीरः स परीक्षित् युवा तरुणः सन्नपि असुभिः सह। दुस्त्यजां श्रियमधिराज्यलक्ष्मीम् उत्स्रष्टुं हातुं कथम् ऐषत्तैच्छत्। अहो आश्चर्यमेतत् ॥११॥ ननु भागवतं प्राहुरिति त्वयैवोक्तत्वाद्भागवतानां च देहतदनुबन्ध्यादिषु विरक्तिस्वभावत्वाच्च विरक्तस्य किं धनादिभिरिति चेत्तत्राह। शिवायेति। ये उत्तमश्लोकाः परमयनं येषां ते, जनाः लोकस्य शिवाय सुखाय भवाय समृद्धयै भूतये ऐश्वर्याय च जीवन्ति। आत्मार्थं स्वार्थं न। तस्मात् असौ परार्थैकजीवनो नृपः कुतः कस्मात्कारणात् निर्विद्य विरज्य पराश्रयं लोकैः स्वशिवायाश्रयणीयं कलेवरं देहं मुमोच। न हि परोपजीवनं स्वयं त्यक्तुमुचितमित्यर्थः ॥ १२ ॥ प्रश्नमुपसंहरति। तदिति। हे सूत इह प्रसङ्गे नोऽस्माभिः पृष्टः त्वं तत्। यद्यदस्माभिः संपृष्टं तदित्यर्थः। सर्वं समाचक्ष्व सम्यक् आख्याहि। यत् किंचन, यत्किंचनापृष्टमस्तीत्यर्थः। तदपि समाचक्ष्व। त्वां छान्दसात् अन्यत्र वेदवाक्यं विनेत्यर्थः। वाचामितिहासपुराणादिरूपाणां विषये स्नातं पारं गतं मन्ये। अत्रैवर्णिकत्वात्। वेदवाक्यव्यतिरिक्तेतिहासपुराणादिश्रावणे त्वामेवाधिकारिणं व्यासानुगृहीतरोमहर्षणसुतं मन्ये इत्यर्थः ॥ १३ ॥

एवमापृष्टः सूतः कस्मिन्युगे प्रवृत्तेयमित्यादिप्रश्नान् प्रति विवक्षुस्तावत्तदुपोद्घातरूपं जन्मप्रभृत्येतत्पुराणोद्योगावधिकं श्रीव्यासचरित्रं तदनुप्रयुक्तं श्रीनारदवृत्तान्तं चाह द्वापर इत्यादिना यावत् षष्ठाध्यायसमाप्ति। तत्र कस्मिन् युगे इति प्रश्नं परिहरति। द्वापर इति। तृतीये कृतयुगापेक्षया तृतीयके द्वापरे युगे समनुप्राप्ते सति तत्रापि युगपर्यये द्वापरयुगपर्यवसाने समनुप्राप्ते सति। हरेः कलयांशेन पराशरात् वासव्यामुपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्यां योगी नित्यज्ञानी नाम्ना व्यासः जातोऽवतीर्णः। द्वापरयुगपर्यवसाने भागवतप्रवृत्तिरिति भावः। ज्योतिः शास्त्रे युगशब्देन चतुर्णां बोधाच्चतुर्भिर्युगैरेकं युगं बोध्यं भवेत्तथा सति वैवस्वतमन्वन्तरीयाष्टाविंशतितमयुगस्य सङ्ग्रादिगणनया सत्यादियुगस्य पर्यये परिवर्त्ते जाते सति तृतीयद्वापरयुगान्तेऽसौ जात इति सिद्धम्। अष्टाविंशतितमद्वापरयुगावसानासन्नकाले एव सत्यवत्याः समकालीनभीष्मविचित्रवीर्यपाण्डुयुधिष्ठिरादीनां संभवस्तददूरे च श्रीकृष्णावतारसंभवश्च कुतः 'तथा भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे। अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः' इति निर्णयसिन्धौ कल्पतरौ ब्राह्मोक्तेः। इदमेव विष्णुपुराणमार्कण्डेयादिसंमतत्वाद्व्याख्यातमित्यप्रकृतोक्त्यालम् ॥ १४ ॥ अवतारप्रयोजनमाह। स इति। व्यासो भगवान् कदाचित् सरस्वत्या नद्याः शुचि पवित्रं जलम् उपस्पृश्य, जले स्नानाचमनसंध्यावन्दनादिकं कर्म निर्वृत्त्येत्यर्थः। पश्चात् रविमण्डले उदिते सति विविक्ते निर्जनदेशे एकोऽसहायः आसीनः बभूवेति शेषः। आसीतेति पाठे परेण संध्यभाव आर्षः। तदा आसीतोपविवेशेति तदर्थः। क्वचित्तु सरस्वत्यामित्यपि पाठो दृश्यते। विविक्त इत्यनेन चित्तैकाग्र्यार्थत्वं बोध्यम्। अनेनैव बदरिकाश्रमस्थानमपि सूचितम् ॥ १५ ॥

परेति। ऋषिर्निखिलनिगमद्रष्टा। परावरज्ञः प्रकृतिपुरुषेश्वररूपोत्कृष्टापकृष्टत्वयाथात्म्यदर्शी कालत्रयज्ञानी वा, स व्यासः। अव्यक्तं रंहो वेगो यस्य तेन दुर्निरीक्ष्यवेगेन कालेन हेतुना। भुवि भूलोके युगे युगे प्रतियुगं प्राप्तं धर्मव्यतिकरं धर्मव्यत्यासं युगधर्मसांकर्यमित्यर्थः। वीक्ष्य युगक्रमेण प्राप्तं धर्मस्य वृद्धिह्रासादिकं दृष्ट्वा एतदादिश्लोकेषु विशेष्यभूतानां द्वितीयान्तानां वीक्ष्येति तृतीयश्लोकगतेन क्रियापदेनान्वयः ॥ १६ ॥ भौतिकानामिति। तथा तत्कृतं धर्मव्यतिकरकृतं भौतिकानां भूतकार्याणां भावानां पदार्थानां भावानामित्यत्र भूतानामिति पाठे भौतिकानामाकाशादिभूतपरिणामरूपाणां देवादिशरीराणां भूतानां तत्संसृष्टानां जीवानां चेत्यर्थः। शक्तिह्रासं शक्तिक्षयं वीक्ष्य। तथा जनान् अश्रद्दधानान् श्रद्धामकुर्वाणान् स्वस्ववर्णाश्रमानुगुणधर्मानुष्ठानविषयकत्वरहितानित्यर्थः। निःसत्वान् दुर्बलान् दुर्मेधान् धारणाशक्तिशून्यान् श्रद्धायां सत्यामपि बलवर्जितान् सत्त्वे सत्यपि दुर्मेधांश्चेत्यर्थः। ह्रसितं संकुचितमायुर्येषां तान्। अनुष्ठानोपयुक्तज्ञानायुर्भ्यां रहितान् ॥ १७ ॥ दुर्भगानिति। अत एव दुर्भगान् भाग्यहीनान् वीक्ष्य मुनिः। परमात्मयाथात्म्यमननशीलः। अत एव अमोघदृक् अवितथसंकल्पः। दिव्येन चक्षुषा योगपरिशुद्धेन मनसेत्यर्थः। सर्वे ये वर्णाश्चाश्रमाश्च तेषाम्। वर्णवतामाश्रमवतां च जनानामित्यर्थः। यत् हितं तत् दध्यौ चिन्तितवान् ॥ १८ ॥ किं हितमपश्यदित्यत्राह। चातुर्होत्रमिति। चत्वारो होतारो होत्रध्वर्यूद्गातृब्रह्माणो यस्मिंस्तत्तथोक्तम्। दशहोत्रादिचातुर्होत्रपर्यन्तैर्मन्त्रैः प्राकाश्यं वा। कर्माग्निष्टोमादिकम्। प्रजानां वैदिककर्माधिकारवतीनां शुद्धं शुद्धिकरं वीक्ष्य यज्ञसंतत्यै अग्निष्टोमादियज्ञपरंपराप्रवर्त्तनाय एकमविभक्तं वेदं, चतुर्विधम् ऋगादिभेदेन चतुःप्रकारं व्यदधात्। आदिमध्यावसानेषु हरिस्मृत्या तत्पूज्यत्वेन क्रियमाणं कर्म प्रजानां ज्ञानद्वारा शुद्धिकरमपश्यदिति भावः। यद्वा प्रजानां श्रेयःसाधनं वैदिकं वेदपूर्वभागबोध्यं शुद्धं चातुर्होत्रं कर्म वीक्ष्य प्रजानामनुष्ठेयमालोच्य। यज्ञानां संतत्यै एकमेकरूपेण स्थितं वेदं चतुर्विधं व्यदधात् इति अन्वययोजना ॥ १९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चातुर्विध्येन विधानमेव दर्शयति । ऋगिति । ऋग्यजुःसामाथर्वाख्याः चत्वारः वेदाः उद्धृता मिश्रीभूतवेदराशेरुद्धृत्य संनिवेशविशेषेण योजिता इत्यर्थः । न तु कृताः । इतिहासपुराणं इतिहासश्च पुराणानि च तत्समाहारम् । तदर्थ ज्ञानाय कृतमिति शेषः । पञ्चमः वेदः उच्यते । वेदार्थविदकत्वात्पञ्चमवेदत्वेन भण्यते इत्यर्थः । इतिहासादीनां शब्दतो रचनं न त्वर्थ तत्तस्य नित्यत्वादिति ज्ञातव्यम् । इतिहासादीन्यप्युद्धृतानीत्यनुषङ्गः ॥ २० ॥ तत्रेति । तत्र तेषां वेदानां मध्ये पैलो मुनिः ऋग्वेदधरः । धारणपूर्वकं पैलः ऋग्वेदप्रवर्त्तकोऽभूदित्यर्थः । कविविद्वान् जैमिनिः जैमिनस्यापत्यं सामगः । अध्ययनपूर्वकम् ऋगाधाराणि सामानि शिष्येभ्यः संपाठयन् जगाविल्यर्थः । एकः प्रधानः वैशंपायनः एव यजुषाम्, उत यजुर्गणानामपि । निष्णातः पारगमः स्मृतः । अवान्तरभेदाभिप्रायेण यजुषामिति बहुवचनम् । एवकारेण सूर्यादन्यः प्रतिविध्यते न तु सूर्यः । तथा सति वक्ष्यमाणविरोधात् ॥ २१ ॥ अथर्वेति । अथर्वाङ्गिरसां निष्णातः । दारुणः दरुणमुनेरपत्यं सुमन्तुः मुनिः आसीत् । वारुणो मुनिरिति पाठे वरुणापत्यमित्यर्थः । दारुणवारुणेति संज्ञाभेदेऽपि स एक एव बोध्यः । अत्र ऋगादीनामयं विवेकः । नियताक्षरपादा ऋचः । अनियताक्षराणि यजूंषि । स्तोभान्वितानि सामानि । एतेभ्य उद्धृत्याथर्वणाङ्गिरसा च वृत्रवधानन्तरं शक्रस्तुतौ नियुक्ता मन्त्रा अथर्वाङ्गिरस इति । इतिहासपुराणानां मे मम पिता रोमहर्षणः निष्णातः पारगमः । आसीदिति संबन्धः ॥ २२ ॥ त इति । ततः ते एते ऋषयः पैलादयः स्वं स्वं वेदं शिष्यैः प्रशिष्यैः शिष्याणामपि शिष्यैः । तच्छिष्यैस्तेषामपि शिष्यैः शिष्यादिद्वारेत्यर्थः । अनेकधा व्यस्यन् व्यभाङ्क्षुः । ततः ते वेदाः शाखिनस्तत्तन्नामपूर्वकशाखावन्तः अभवन् । तत्र ऋग्वेदः एकविंशतिशाखाभेदं प्राप्तः । यजुर्वेदस्तु एकशतधा । सामवेदस्तु सहस्रधा । आथर्वणस्तु नवधेति विवेकः ॥ २३ ॥ किमर्थमेवमात्मना शिष्यादिमुखेन च व्यभाङ्क्षीदित्यपेक्षायां प्रयोजनं दर्शयन् व्यासनाम निर्वक्ति । त एवेति । दुर्मेधैरल्पप्रज्ञैः पुरुषैः ते एव वेदाः यथा धार्यन्ते एव तथा कृपणवत्सलः दीनजनस्निग्धः भगवान् व्यासः चकार । यतो वेदान्व्यभाङ्क्षीदतो व्यास इति प्रसिद्धो बभूवेति भावः ॥ २४ ॥ एवं भगवद्भक्तानां त्रैवर्णिकानां वैदिककर्मानुष्ठानेन शुद्धान्तःकरणानामधोक्षजोपासनाजनिततत्त्वयथार्थज्ञानेन मुक्तिः स्यात, इति स्थापितम् । तदनधिकारिणां स्त्रीशूद्रद्विजाधमानां हिताय तत्कृतं तदाह । स्त्रीति । स्त्रियश्च शूद्राश्च द्विजबन्धवश्च तेषाम् । त्रयी त्रयो वेदाः । श्रुतिगोचरः । गोचरशब्दो नियतपुल्लिङ्ग इति सुबोधिन्यां वल्लभाचार्याः । वेदाध्ययनयोग्यता नास्तीत्यर्थः । अत एव कर्मश्रेयसि वैदिककर्मसाध्ये श्रेयसि मूढानां पुरुषार्थचतुष्टयतत्साधनविषयकज्ञानविधुराणाम् । श्रेयः इह लोके एवं भवेत्, इति आलोचयतेति शेषः । मुनिना व्यासेन कृपया भारतम् आख्यानं कृतम् । स्त्रीशूद्रादिकृपया भगवता भारताख्यानस्य कृतत्वात्तेषामेव तत्राधिकारो भवतु नान्येषामित्यत्र शङ्का न कर्त्तव्या 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति वचनाद्ब्राह्मणादीनामपि वेदार्थपरिज्ञानाय भारताद्यभ्यासस्यावश्यकत्वेनोक्तत्वादुभयत्राधिकारो युज्यते । तेषां स्त्रीशूद्रादीनां तु गत्यन्तराभावात्तदुक्तानुष्ठानेन मुक्तिरिति भावः ॥ २५ ॥ केन हेतुना कृतः संचोदित इति प्रश्नं परिहरिष्यन्व्यासस्य वृत्तमाह । एवमित्यादिना । हे द्विजाः सदा भूतानां प्राणिनां श्रेयसि मुक्तिसाधने एवमुक्तप्रकारेण प्रवृत्तस्य अपि समुद्यतस्यापि व्यासस्य हृदयं सर्वात्मकेन सर्वप्रकारेण यदा न अतुष्यन्न जहर्ष ततस्तदा ॥ २६ ॥ नातीति । न अत्यतीव प्रसीदत् प्रसन्नं हृदयं यस्य तथाभूतः । शुचौ परिशुद्धे सरस्वत्या नद्याः तटे विविक्तस्थः निर्जने देशेऽवस्थितः । वितर्कयन्नसंतोषहेतुः को वेति विचारयन् धर्मविद्बादरायणः इदं स्वागतं वक्ष्यमाणं प्रोवाच ॥ २७ ॥

तदेवाह धृतव्रतेनेत्यादिभिश्चतुर्भिः । धृतं व्रतं छन्दोगुर्वग्निसेवोपयुक्तं तपो येन तेन । लौकिकाचारापेक्षया वेदव्रतधारणवता इत्यर्थः । मया छन्दांसि वेदाः गुरवोऽध्यापकाः अग्नयस्त्रेताग्नयः निर्व्यलीकेन निष्कपटभाववता चेतसेति शेषः । मानिताः सत्कृताः पूजिता इति यावत् । अनुशासनं छन्दआदीनामाज्ञा च गृहीतमुपात्तं हि । हिशब्देन विप्रादिभिर्वेदव्रतादिवैदिककर्मावश्यं कर्त्तव्यमिति दर्शितम् ॥ २८ ॥ भारतेति । किंच । भारतव्यपदेशेन महाभारतव्याजेन आम्नायार्थो वेदानामर्थश्च दर्शितः । हि भारतं विशिनष्टि । यत्र भारते स्त्रीशूद्रादिभिरपि धर्मादि दृश्यते विषयीक्रियते । स्वस्वापेक्षितश्रेयःसाधनभूतं स्वानुरूपं धर्माद्यवगम्यते इत्यर्थः । भारतकरणेन वेदार्थस्य सम्यक्प्रदर्शितत्वात्तत्र तु किंचिदप्यवशिष्टं न भवतीति भावः ॥ २९ ॥ अथापीति । अथापि भारतकृत्याम्नायार्थे सम्यक्प्रदर्शिते सत्यपि । बतेति खेदे । दैह्यो देहे भवः मे मम आत्मा जीवः विभुः प्रभुः परिपूर्ण एव सन्नपीत्यर्थः । आत्मना स्वेन रूपेण । असंपन्नस्तादात्म्यमप्राप्त इव ब्रह्मवर्चसी ब्रह्मवर्चसवानपि, ब्रह्मवर्चसं वेदश्रवणाध्यापनोत्कर्षजं तेजस्तत्संपन्नः सन्नपीत्यर्थः । असत्तमः तत्ता वर्जित इव च आभाति हि । ब्रह्मवर्चस्यसत्तम इत्येकपदपाठे ब्रह्मवर्चसे साधवा ब्रह्मवर्चस्यास्तेषु सत्तमोऽतिश्रेष्ठोऽपीत्यर्थः । ब्रह्मवर्चस्युशत्तम इति पाठे ब्रह्मवर्चसी अत एव उशत्तमः कमनीयतमोऽपीत्यर्थः ॥ ३० ॥ एवं वितर्क्य सूक्ष्मदर्शित्वादसंतोषहेतुमुत्प्रेक्षते किं वेति । यतः भागवताः धर्माः प्रायेण प्रायशः मया न निरूपिताः । ततः किं वा मम असावसंतोषः पारिशेष्यादिदं भागवतधर्मानिरूपणमेव ममासंतोषहेतुर्भवितुमर्हतीति निश्चित्य तदेवोपपादयति प्रिया इति । ये भागवताः धर्माः ते एव परमहंसानां भागवतानां साधूनां प्रियाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृद्याः भवन्ति। ये इत्थंभूताः परमहंसाः ते एव अच्युतप्रिया भगवत्प्रीतिभाजनभूता भवन्ति हि। सर्वान्तरात्मनि भगवति प्रीते सति हि तन्नियाम्यस्य मनसस्तोषः। स भगवांस्तु भागवतेषु तुष्टेषु सत्सु स्वयं तुष्यतीति। तेषां भागवतपरमहंसानां संतोषहेतवस्ते भागवता धर्मा एव तदनिरूपणादुचित एवायं ममासंताष इति भावः। प्रायेणेत्यनेन भारतेऽपि क्वचिदेव भागवतधर्मनिरूपणं कृतमस्तीति सूचितम् ॥ ३१ ॥ नरलोकस्थो महापुरुषोऽपि नरलोकभावमनुकुर्वन्केनचित्प्रेरित एव स्वकार्ये प्रवर्त्तते इति न्यग्यात्तत्सिद्ध्यै नारदागमनमाकाङ्क्षमाणं व्यासं प्रतिनारदागमनमाह। तस्येति। एवमित्थम् आत्मानं खिल न्यूनं मन्यमानस्य अत एव खिद्यतः तस्य कृष्णस्य प्रागुदाहृतम् आश्रमं सरस्वतीतटस्थं प्रति नारदः अभ्यागादध्यागच्छत् ॥ ३२ ॥ तमिति। आगतं स्वाश्रमे समायातं तम् अभिज्ञाय लक्षणैर्नारदमुनिं ज्ञात्वा सहसा त्वरया प्रत्युत्थाय मुनिर्व्यासः सुरपूजितं सुरैरपि पूज्यमानं नारदं विधिवत् पूजयामास। सरस्वतीतीरवर्तिस्वाश्रमस्थितः भागवतधर्मज्ञापनहेतुना नारदेन संचोदितो व्यासो भागवतसंहितामकरोदिति शौनकप्रश्नपरिहारः ॥ ३३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-
यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जनाख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

सूत उवाच

अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः। देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥

गौरवं श्रीहरेः कीर्तेर्व्यासचित्तप्रसत्तये। पञ्चमे नारदेनोपदिश्यते सर्वधर्मतः ॥

अथेति। अथ यथावत्पूजनविधानानन्तरम्। सुखं तथा आसीनः। बृहच्छ्रवः कीर्तिर्यस्य सः। वीणा महती नाम तन्त्री पाणौ यस्य सः। देवर्षिर्नारदः स्मयन्निव मन्दस्मितं कुर्वन्निव उपासीनं स्वाज्ञया स्वसमीपे उपविष्टं विप्रर्षिं व्यासं प्राह। स्मयन् इत्यनेन मुखप्रसत्तिर्द्योतिता इवेत्यनेनाङ्गो महानपि मुह्यतीति सूचितम् ॥ १ ॥ पाराशर्येति। हे महाभाग ऐश्वर्याद्यनन्तभाग्यनिधे हे पाराशर्य पराशरपुत्र। भवतः शारीरः स्थूलशरीराभिमानवान् मानसः सूक्ष्मशरीराभिमानवान् वा। आत्मा आत्मना एव स्वत एव परितुष्यति कच्चित्। यदर्थं तवायमवतारस्तत्संसाधनजन्यसंतोषवान्वर्त्तते न वेत्यर्थः। एकस्यापि शरीरद्वयाभिमानिन आत्मनः स्थूलशरीरजरोगाद्युपद्रवतः सूक्ष्मशरीरजाद्युपद्रवतश्चापरितोषः स्यात्तद्द्वयाभावेन विधेयावतारप्रयोजनसंसिद्ध्या स संतोषो भवति न वेति लोकानुकरणजः प्रश्नो बोध्यः ॥ २ ॥ कुत एवं पृच्छसीत्यत्राह। जिज्ञासितमिति। ते त्वया जिज्ञासितं ज्ञातुमिष्टं यत्तसर्वं सुसंपन्नमपि निष्पन्नं जातमस्ति न वा। अपिशब्दः प्रश्नद्योतकः। मया तु, त्वया सर्वं ज्ञातमस्तीत्येव ज्ञायते इति भावः। यतः यस्त्वं सर्वार्थपरिबृंहितं सर्वपुरुषार्थपूर्णम् अत एव महद्विपुलम् अद्भुतं शब्दतोऽर्थतश्च चित्रं भारतं कृतवान्। अतः सुसम्पन्नं ते जिज्ञासितमस्तीति भावः ॥ ३ ॥ जिज्ञासितमिति किंच यत् सनातनमनादिनिधनाविच्छिन्नसंप्रदायं ब्रह्म बेदः तत् त्वया अधीतं जिज्ञासितं विचारितं च। सनर्थस्त्वविवक्षितः। पूर्वोत्तरमीमांसयोः प्रणायनप्रणयनाभ्यामिति भावः। तथापि त्वमेवं कृतकृत्यः सन्नपि हे प्रभो अकृतार्थः अकृतकृत्य इव आत्मानं शोचसि। शोचन्निव लक्ष्यसे इत्यर्थः ॥ ४ ॥ एवामापृष्ट आह व्यासः अस्तीत्यादिभिस्त्रिभिः। हे नारद त्वया उक्तं सर्वम् इदं मे मम अस्ति एव जिज्ञासितं सुसंपन्नमित्यादि यत्त्वयाभिहितं तदिदं सर्वमपि मम विद्यते एवेत्यर्थः। तथाप्येवं सत्यपि मे मम आत्मा न परितुष्यते। आत्मनेपदमार्षम्। तन्मूलं तस्यासंतोषस्य निमित्तमित्यर्थः। अव्यक्तं मया न ज्ञायते एवेत्यर्थः। अतः अगाधबोधमपारज्ञानं सर्वज्ञमिति यावत्। आत्मनो विष्णोर्भवतीत्यात्मभवो ब्रह्मा तस्यात्मनः शरीरादुत्सङ्गादुदभूत् उत्पन्नस्तम्। त्वा त्वां पृच्छामहे। अपरितोषमूलमिति शेषः। यद्वा अव्यक्तं सूक्ष्मं तन्मूलं त्वां विशेषणद्वयोपेतं भवन्तं पृच्छामहे इत्यन्वयः। अत्राप्यात्मनेपदं पूर्ववत्। आत्मभुवात्मभूतमिति पाठे उवङादेशश्छान्दसः ॥ ५ ॥ नाहं जानामीति मावोच इत्यभिप्रायेणाह। स वा इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स वै ज्ञानिनामग्रणीरेव भवान् समस्तगुह्यं देहिनामन्तर्गतं सर्वमित्यर्थः। वेद जानासि। कुतः यद्यस्माद्धारणात् त्वया पुराणः पुरुषः सर्वजगत्कारणभूतः सर्वज्ञः परमपुरुष इत्यर्थः। उपासितः कथं परमपुरुषोपासनमात्रेणाहं जानीयामित्यत्राह। परे ब्रह्मादयोऽवरे यस्मात्स चासावीशः सर्वनियन्ता भगवान् मनसैव संकल्पमात्रेणैव विश्वं सृजति अवति रक्षति अत्ति संहरति च। अथापि गुणैःसृष्ट्यादिकारणैः सत्वादिभिः असङ्गः न सज्जते इत्यर्थः। स्वसंकल्पकृतजगदुदयविलयलीलस्य सर्वनियन्तुः सर्वप्राण्यन्तर्गतवस्तुवेदित्वात्। 'यथा क्रतुरस्मिन् लोके पुरुषो भवति' इति न्यायेन तद्भावभावनस्त्वमपीश्वरवदखं जानास्येवेति भावः 'क्रतुरस्मिन्' इति छान्दोग्यश्रुतिः तत्र क्रतुरध्यवसायः। अयं पुरुषः यादृशक्रतुस्तथाऽस्मिन् लोके भवति। अयमर्थः श्रीभाष्ये तृतीयेऽध्याये तृतीयपादे 'व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्' इति सूत्रे प्रपञ्चितः। यथैवोपासते तथैव भवतीति तदुक्तानार्थं इत्यलमप्रकृतपल्लवनेन ॥ ६ ॥ एतदेवोपपादयन्नसंतोषनिमित्तं वदेत्याह। त्वमिति। हे नारद त्वं त्रिलोकीम् अन्तः पर्यटन्, अर्कः इव बहिष्ठवस्तुद्रष्टा। वायुः इव सर्वेषाम् अन्तश्चरः सन् आत्मसाक्षी अन्तःकरणस्य साक्षाद्द्रष्टा हृद्गतार्थवेदीत्यर्थः। भवसि। अतः परं चावरं च तयोः समाहारस्तस्मिन् ब्रह्मणि परे ब्रह्मणि परमात्मनि अवरे ब्रह्मणि तत्स्वरूपावेदके वेदाख्ये ब्रह्मणि च धर्मतो निवृत्तधर्मैः व्रतैः स्वाध्यायनियमैश्च स्नातस्य पारंगतस्य समाप्तधर्मव्रतस्येत्यर्थः। मे मम यत् न्यूनं तत् अलमतिशयेन विचक्ष्व विशिष्टतया ब्रूहीत्यर्थः। न्यूनशब्दे भावप्रधानो निर्देशः ॥ ७ ॥ 'किं वा भागवता धर्मा न प्रायेण निरूपिता' इति तदुत्प्रेक्षितमेव तावदसंतोषहेतुमाह भवतेति द्वाभ्याम्। अमलं शृण्वतां वदतां चाखिलदुरितापहम्। भगवतः यशः भवता अनुदितप्रायं बहुतया न वर्णितमित्यर्थः। प्रायग्रहणेन भारते प्रसङ्गप्राप्ततया भगवद्यशोऽप्राधान्येन तदपि क्वचित्क्वचिदुदितं न तु सकलप्रबन्धगतत्वेन प्राधान्येन चोदितमिति सूच्यते। येन भगवद्यशोऽननुवर्णितेन एव असौ तवात्मा न तुष्येत। असौ भगवान्वा। भगवदपरितोषे सति तन्नियाम्यं त्वदीयमन्तःकरणमपि न तुष्यत्येवेति भावः। तत् भगवद्यशोवर्णनं खिलं न्यूनं दर्शनं ज्ञानं मन्ये। अतः प्राधान्येनैव तद्यशोवर्णनेनैव तवात्मा तुष्टिमेष्यति नान्यथेति भावः ॥ ८ ॥

प्रायशब्दाभिप्रायं व्यनक्ति। यथेति। हे मुनिवर्य यथा धर्मादयः धर्मार्थकामादयः अर्थाः पुरुषार्थाः चकाराद्धर्मादिसाधनान्यपि अनुकीर्तिताः। भारते इति शेषः। तथा वासुदेवस्य महिमा त्वया हि न अनुवर्णितः॥ ९ ॥ एवं तदुत्प्रेक्षितमेवासंतोषहेतुं दृढीकृत्याथ 'प्रियाः परमहंसानां त एव ह्यच्युतप्रिया' इति तदुत्प्रेक्षितमेव दृढीकर्तुमभागवतधर्मप्रतिपादकस्य प्रबन्धस्य परमहंसैरनादरणीयत्वमाह। नेति। यत् वचः शास्त्रं, वक्ति शास्तीति वच इति व्युत्पत्तेः। धातूनामनेकार्थत्वाद्वचः शासनार्थत्वम्। चित्राणि पदानि यस्मिंस्तत्, मञ्जुलानुप्रासादिरमणीयार्थवत्सदपीत्यर्थः। जगत्पवित्रयति तथाभूतं हरेः यशः कर्हिचित् न प्रगृणीत। शृण्वतां वदतां च पवित्रत्वापादिकां हरिकीर्तिं क्वचिदपि न वदेत् चेदित्यर्थः। तर्हि तच्छास्त्रं वायसं तीर्थम् उशन्ति। भगवज्जना वायसतीर्थतुल्यमिच्छन्तीत्यर्थः। काकतुल्यानां कामिनां रतिस्थानं मन्यन्ते इति भावः। यतः मानसाः सत्त्वप्रधाने मनसि वर्तमानाः। उशिक् कमनीयं परमात्मस्वरूपं क्षयो वासस्थानं येषां ते हंसा भागवतपरमहंसाः कर्हिचित् यत्र यस्मिन् शास्त्रे न निरमन्ति श्रवणौ दत्त्वा न शृण्वन्तीत्यर्थः। यथा मानससरोनिवासास्तत्रापि कमनीयपद्मषण्डनिवासिनः प्रसिद्धा हंसाः संत्यक्तविचित्रान्नादिलेपवत्पत्रावल्यादियुक्तोच्छिष्टगर्तात्मककाकक्रीडास्थाने न निरमन्ते तद्वदिति ॥ १० ॥ तदेवं भगवद्यशोभिरनङ्कितस्य प्रबन्धस्य शब्दतोऽर्थतश्च चित्रपदादिमत्त्वे सत्यपि भागवतानुपादेयत्वमुक्तम्। अथ भगवद्यशोऽङ्कितस्य वैचित्र्यरहितस्यापि शब्दतोऽर्थतश्च सदोषस्याप्यतीव तदुपादेयत्वमाह। तदिति। प्रतिश्लोकं अबद्धवत्यपि अपशब्दादियुक्तेऽपि शब्दतोऽर्थतश्च दोषवति सत्यपीत्यर्थः। यस्मिन् प्रबन्धे अनन्तस्यापारमहिम्नो भगवतः यशोऽङ्कितानि गोवर्द्धनोद्धरणपारिजातहरणाऽनभ्यसिताष्टाङ्गयोगगोपपशुपक्ष्यादिसहजसमाधिविधापनस्वमूर्त्तिसर्वावतारप्रदर्शनप्रभृतीनि यशांसि तैः चिह्नितानि भगवद्दिव्यमानुषगुणप्रत्यायकानीति यावत्। नामानि नारायणवासुदेवकृष्णघनश्यामप्रभृतीन्यभिधानानि दृश्यन्ते इति शेषः। तद्वाग्विसर्गः स एव वाचां सृष्टिरूपः प्रबन्धः जनता जनसमूहस्तस्या अघं पापं विस्रवति नाशयतीति जनताघविस्रवः। अन्तर्भावितण्यर्थात्स्रवतेः पचादित्वादच्। भावे प्रत्यये तु जनताया अघस्य विस्रवो नाशो यस्मात् अत एव भागवतास्तमुपाददते इतिवदन्विशिनष्टि। यदिति। यद्यं वाग्विसर्गं साधवो भागवताः परमहंसाः श्रावयितृसद्भावे शृण्वन्ति श्रोतृसद्भावे गृणन्ति कथयन्ति तदुभयाभावे गायन्ति केवलं स्वयमेव कीर्त्यन्ति। सामान्याभिप्रायेण यत्तदोरिति च नपुंसकनिर्देशः। सज्जनगृहीतत्वाज्जनपापविनाशहेतुत्वाच्च वासुदेवमाहात्म्यप्रतिपादकमेव शास्त्रं भागवतोपादेयं नान्यदतस्तथाविधं शास्त्रं प्रणेतृभी रचनीयमिति भावः ॥ ११ ॥

ननु धर्मादितत्साधनानामपि पुरुषाभिलषितत्वेन हितत्वात्तस्यानिराकरणमप्यर्थं वदेवेत्याशङ्क्य विषमिश्रपयःप्रशंसातुल्यं तन्निरूपणमित्यभिप्रायेणैश्वर्यकैवल्यतत्साधनानां पुरुषार्थत्वं तत्साधनत्वं च प्रतिक्षिपति। नैष्कर्म्यमिति। निर्गतं कर्मणो निष्कर्म निष्कर्म्यं स्वार्थे ष्यञ्। कर्मणो बहिर्भूतम् आत्मयाथात्म्योपासनात्मकं ज्ञानमित्यर्थः। तत् निरञ्जनं रागद्वेषाद्यञ्जनरहितं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागादिभिरनुपप्लुतमपीति यावत्। अच्युतस्य भगवतो भावो भक्तियोगस्तेन वर्जितं रहितम् अपि, अपिशब्दश्चेदित्यर्थे। चेत् ज्ञानमलं ज्ञानानां मलवद्धीनम् अत एव न शोभते। यद्वा नैष्कर्म्यमात्मावबोधरूपम् अत एव निरञ्जनमुपाधिनिवर्त्तकम् अपि ज्ञानम् अच्युतभाववर्जितं चेत् न अलं शोभते। नातीव शोभते इत्यर्थः। 'सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक्' इति केवलिनोऽपि पुनश्च्यवनधर्मोक्तेर्न कैवल्यस्य पुरुषार्थत्वं, नापि तत्साधनज्ञानयोगस्य पुरुषार्थसाधनत्वमिति भावः। यदा निष्काम-कर्मणोऽपीत्थंभूतता तदा शश्वत साधनकाले फले चेत्यर्थः। अभद्रं दुःखरूपं यत्काम्यं कर्म, यत् अकारणमकाम्यं कर्म, च तत्कर्मापि ईश्वरे न अर्पितं चेत् कृष्णार्पणबुद्ध्या न कृतं भवेच्चेत्तर्हीत्यर्थः। कुतः पुनः शोभते। बहिर्मुखत्वेन सत्त्वशोधकत्वा-भावात्। अयमर्थः। ज्ञानयोगः कर्मयोगश्च भगवद्भक्तिवर्जितो यदा न शोभते तदा तथाविधं काम्यकर्म न शोभते अत्र किमु वक्तव्यमिति कैमुत्यन्यायेन सिद्धमिति॥ १२॥ तदेवं लोकहितार्थं प्रवृत्तस्य तव केवलत्रिवर्गतत्साधननिरूपणमनुचितमित्युक्तं भवति। यतस्त्रैवर्गिककर्मणोऽनर्थगर्भत्वमस्यतस्त्वमखिलानिष्टपरिहारेण प्रायेण भगवद्भक्तियोगनिष्पादकतच्चेष्टितज्ञानजनकं प्रबन्धं कुर्वित्याह। अथो इति। अथो अतः कारणात्। भगमेव भागः महान् भागो यस्य स तत्संबुद्धिः हे महाभाग, भगमत्र भगवदंशभूतत्वमखिलनिगमद्रष्टृत्वं च। भवान्, अमोघा यथार्था दृक् धीर्यस्य सः। शुचि विशुद्धं श्रवो यशो यस्य सः। सत्यं भूतहितं तस्मिन् रतः। धृतानि व्रतानि येन सः। अस्ति। अतः त्वम् उरुक्रमस्य भगवतः यत् विचेष्टितं तदेव नृणाम् अखिलानां बन्धानां गर्भजन्ममरणादिरूपाणां मुक्तिस्तस्यै। समाधिना अनुस्मर सम्यगालोचनपूर्वकं प्रबधानेत्यर्थः॥ १३॥ विपक्षे दोषान्तरमाह। अत इति। अत उरुक्रमचेष्टितात् पृथग्दृशः अत एव अन्यथा प्रकारान्तरेण यत् किंचन अर्थान्तरं विवक्षतः तया विवक्षया कृतैः स्फुरितैः रूपैर्नामभिश्च वक्तव्यत्वेनोपस्थितैः रूपनामभिरित्यर्थः। दुःस्थिता अनवस्थिता सती मतिः कुत्रचित् कदाचित् क्वापि विषये वाताहतनौर्वायुना आघूर्णिता तरी इव आस्पदं स्थितिं न लभेत। यद्वा एवं चेत्त्वदात्मनोऽसंतोषो निवर्त्तेत नान्यथेत्याहेति अत इति। अत उरुक्रमात् अन्यथा उरुक्रमानात्मकत्वेन अब्रह्मात्मकस्वतन्त्रवस्तुत्वेनेति यावत्। यत् किंचन वस्तु विवक्षतः वक्तुमिच्छतो जनस्य अत एव तत्कृतरूपनामभिः 'नामरूपे व्याकरवाणि' इति श्रुत्युक्तोरुक्रमकृतैर्देव-मनुष्यादिरूपनामभिर्हेतुभिः पृथग्दृशः। भगवत्कृतनामरूपविभागान्यथोक्तिसंजातपृथग्दृष्ट्युपेतस्येत्यर्थः। तव दुःस्थिता मतिः कुत्रचित् कर्हिचित् क्वापि आस्पदं न लभेत। यत्किंचन विवक्षितं भवेच्चेत्तदुरुक्रमात्मकतया तद्विभूतित्वेनैव वर्णय। एवं चेत्तव मतिः सुस्था सत्यास्पदं लब्धा। अतदात्मकतया स्वतन्त्रवस्तुत्वेन वर्णयितुमुद्युक्तः स्याश्चेत्ततः पृथग्दृष्टेस्तव दुःस्थिता सती मतिः आस्पदं न लप्स्यतीत्यर्थः। अतः प्राधान्येनोरुक्रमचेष्टितमेव वर्णनीयं तत्प्रसङ्गाद्यत्किंचिद्वस्तु वर्णयितुमिष्टं तदपि तद्विभूतितयैव वर्णनीयं नैवं चेत्त्वन्मतिर्व्याकुलैव भवितेति भावः॥ १४॥

एवं हरियशःसंकीर्त्तनं विना भारतादिषु त्वया कृतं धर्मादिवर्णनमकिंचिदित्युक्तं सांप्रतं भूतहिताचरणार्थं प्रवृत्तस्त्वं तदहितमेव कृतवानसीत्याह। जुगुप्सितमिति। स्वभावरक्तस्य अर्थकामयोः स्वभावत एवानुरागवतो जनस्य धर्मकृते अर्थकाम-साधनभूतधर्मार्थम् अनुशासतो भारतनिर्माणद्वारा बोधयतः, प्रवृत्तकर्मसहजरुचेस्तदेव धर्मरूपतया कथयत इत्यर्थः। तत्र अयं महान् व्यतिक्रमः। चिकीर्षितविपरीतानुष्ठानरूपो महानन्याय आपतित इत्यर्थः। अत इदं त्वया जुगुप्सितं निन्दितं कृतम्। स्वभावत एवार्थकामपारवश्यमूलकतापत्रयाभिहतं जनं प्रति पुनरर्थकामसाधनमेवानुतिष्ठेत्यनुशासनं निन्दितमिति भावः। जुगुप्सितं निन्द्यं काम्यकर्मादि स्वभावरक्तस्य धर्मकृतेऽनुशासत इति योजनापि युक्तैवास्ति। ननु मयैवमनुशासने कृतेऽपि स्वस्वरुच्यनुसाराल्लोको निःश्रेयसः साधने एव प्रवर्त्ततां, भारते क्वचिदर्थकामयोर्ममानभिप्रेतत्वेन हेयत्वेनोक्तत्वान्न दोष इत्यत्राह यद्वाक्यत इति। यद्वाक्यतो यस्य तव वचनात् अयमेव मुख्यो धर्मः' इति मत्वा स्थितः इतरः प्राकृतोऽपि जनः तस्य काम्य-कर्मादेः प्रवृत्तधर्मस्य निवारणं न मन्यते। अन्येन तत्त्वज्ञेन जनेन 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इत्यादि-श्रुत्या। किं बहुना। स्वयं त्वयैव वा क्रियमाणं निवारणं यथार्थमेतदिति न मन्यते इत्यर्थः। नारदेन विश्रामितो व्यासः सांप्रतं यत्त्रिवर्गनिवारणं वक्ति तदेतन्न सत्यं, एतेन यत्पूर्वमुक्तं तदेव सत्यमिति संकल्प्य सांप्रतं त्वद्वाक्यमपि जनो न मंस्यतीति भावः॥ १५॥ ननु अकृत्स्नविज्जनो ममाभिप्रायं न जानातु नाम कृत्स्नवित्तु जानात्येवेत्यत आह। विचक्षण इति। यदपि अस्य विभोर्भगवतः अनन्तपारस्य कर्मणि षष्ठीयम्। अपारचेष्टितमित्यर्थः। विचक्षणो निपुणबुद्धिः निवृत्तितः निवृत्तधर्मनिष्ठतया सुखं यथा तथा वेदितुम् अर्हति। भगवद्वैभवाभिज्ञो जनो दुर्लभ इति भावः। ततः गुणैः रजआदिगुणमूलकैः रागादिभिः प्रवर्त्तमानस्य अनात्मन आत्मपरमात्मज्ञानरहितस्य जनस्य, विभोः परमेश्वरस्य चेष्टितं भवांस्त्वं दर्शय। प्रबन्धनिर्माणेन प्रदर्शयेत्यर्थः। शासनं नाम अज्ञातज्ञापनरूपं तत्रार्थकामयोः क्वचिदपि हेयत्वानुक्तावपि तद्विचक्षणो जानात्येवातस्तं प्रति क्वचिदप्यर्थकामयोर्हेयत्व-ज्ञापनं व्यर्थमेव त्वदभिप्रायानभिज्ञत्वादविचक्षणं प्रत्यपि तद्व्यर्थमेवातो विचक्षणजनस्यापि सुखप्रतिपत्तयेऽर्थकामयोर्हेयत्वं भगवच्चेष्टितज्ञानस्य निरतिशयपुरुषार्थसाधनत्वं च विपुलप्रबन्धनिर्माणेन दर्शयेति भावः॥ १६॥ यदुक्तं 'कुतः पुनः शश्वदभद्र-मीश्वरे न चार्पितं कर्म' इति कर्मणोऽभद्रगर्भत्वं भगवद्भक्तियोगस्य शश्वद्गर्भत्वं च तदुभयं प्रतिपादयति। त्यक्त्वेति। स्वधर्मं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्यक्त्वा ईश्वरेऽनर्पितं स्वसमीहितफलसाधनं निजधर्मं परित्यज्येत्यर्थः। हरेः चरणाम्बुजं भजन् भजनोद्यतः सन्नित्यर्थः। अपक्वः अपरिपक्वकषायः पतेत् म्रियेत यदि। पतेदित्यत्र शरीरमात्रत्यागोक्तिः। ततः अमुष्य यत्र क्व वा किम् अभद्रम् अभूत्। भविष्यतीत्यर्थः। न किंचिदपीति भावः। 'न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति' इत्यादिश्रीभगवदुक्तेः। अभजतां हरेश्चरणाम्बुजमभजद्भिरित्यर्थः। कर्त्तरि षष्ठीयम्। स्वधर्मतः केवलस्वधर्मसंशीलनात्। अथ कार्त्स्न्येन 'कार्त्स्न्ये अथो अथ' इत्यमरः। को वा अर्थः आप्तः संगतः न कोऽपीत्यर्थः। यद्वा। स्वधर्मत इति सार्वविभक्तिकस्तसिः। तदा स्वधर्मतः स्वधर्ममित्यर्थः। भजतां स्वधर्ममात्रमनुतिष्ठद्भिरित्यर्थः। को वार्थ आप्त इति संबन्धः 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इत्यपि भगवदुक्तेः। 'अन्तवदेवास्य तद्भवति तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' 'प्लवा ह्येते अदृढा यज्ञरूपाः' इत्यादिश्रुतेश्चेति भावः॥ १७॥ एवं भगवद्भक्तिस्वधर्मयोः शश्वद्भद्राभद्रगर्भत्वं प्रतिपादितम्। अथ तत्फलयोः उपायान्तरेण अलभ्यत्वलभ्यत्वे कथयन्नुपायसहस्रालभ्यसुखसाधनोपयुक्तमेव हि भूतहितं कार्यमित्याह। तस्यैवेति। उपरि ब्रह्मलोकादिषु अधः पातालादिषु भ्रमतां भ्रमणं कुर्वाणैः जीवैः, षष्ठी तु पूर्ववत्। यत् सुखं परब्रह्मानन्दानुभवात्मकं शर्म न लभ्यते। तस्य सुखस्य हेतोः एव तथाविधसुखसाधनोपयुक्तस्योपायस्य प्रदर्शनार्थमेव कोविदो निपुणमतिः प्रयतेत। एवं कृते सति तु भूतहितकारित्वं सत्यं नान्यथेति भावः। तत्प्राकृतभावप्रसिद्धं वैषयिकं सुखं तु सर्वत्र उपर्यधश्चेत्यर्थः। गभीररंहसा तीव्रजवेन। दुर्लक्ष्यवेगेनेत्यर्थः। कालेन कर्मणोऽप्युपलक्षणमिदम्। कालेन तदुद्बोधितेन प्राचीनेन कर्मणा चेत्यर्थः। भ्रमतामित्यस्यानुषङ्गः। कालेन कर्मणा च जायमानानां जनानामित्यर्थः। अन्यतः कालकर्मादिरूपादुपायान्तरादेव। दुःखवत् यथा दुःखं तद्वदित्यर्थः। लभ्यते अप्रार्थितमपि दुःखं कालकर्मादिहेत्वन्तरेण प्रयत्नं विनापि भवत्येव तद्वैषयिकं सुखमपीत्यर्थः॥ १८॥

यत्र क्व वा भद्रमभूदमुष्य किम्' इति काक्वा सूचितमभिप्रायं सिंहावलोकनन्यायेन विवृणोति। न वै इति। अङ्ग हे बादरायण मुकुन्दसेवी मुक्तिदस्य श्रीहरेर्भक्तः जनः जातु कदाचिदपि कथंचन कथंचिदपि संसृतिं संसरणं न आव्रजेत्। किं तु ततो विमुच्येतैवेत्यर्थः। इदं सुनिष्पन्नभक्तियोगनिष्ठपुरुषाभिप्रायकं 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्यते' इति श्रुतेः। अनिष्पन्नभक्तियोगोऽपि जनः इति शेषः। अन्यवत्केवलकाम्यकर्मनिष्ठजनवत् संसृतिं न व्रजेत्। 'न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति' इत्युक्तरीत्या कर्मिविलक्षणमेव प्राप्नोतीति भावः। तदेव विशदयति स्मरन्निति। मुकुन्दाङ्घ्र्योः श्रीहरिचरणाब्जयोः उपगूहनं, भगवता प्रसन्नीभूय स्ववक्षसि मूर्ध्नि चार्पितयोश्चन्दनार्द्रयोरङ्घ्र्योरालिङ्गनमित्यर्थः। स्मरन्। तत् श्रीहर्यङ्घ्र्युपगूहनस्मरणं पुनः विहातुं त्यक्तुं न इच्छेत्। कुतः। मुकुन्दाङ्घ्र्युपगूहनस्मृतिमान् जनः रसग्रहः। 'रसो वै सः' 'रसँ ह्येवायं लब्ध्वानन्दीभवति' इत्युक्तरीत्या निरतिशयानन्दात्मकरसरूपपरमात्मानं गृहीतवानित्यर्थः। तथाचोक्तं भगवता। 'यतते च ततो भूयः संसिद्धौ कुरुनन्दन। पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः' इत्यादिना॥ १९॥ ननु तर्हि के ते भगवद्गुणा ते मया वर्णनीया इत्यपेक्षायां तेषामानन्त्यान्न ते मयोपदेष्टुं शक्याः। त्वया वा ते साकल्येन वर्णयितुं च न शक्याः। किं तु तान्प्रादेशमात्रेण दर्शयामीत्याह। इदमिति। इदं विश्वं भगवान् हि, राजकीयपुरुषो राजेतिवत्। ननु राजकीयपुरुषाद्राजा तु पृथगेवास्तीति चेत्सत्यम्। स भगवांस्तु इतरः इव इतर एवास्तीत्यर्थः। 'इवौपम्ये परिभवे ईषदर्थेऽवधारणे' इत्यनेकार्थसंग्रहे हैमः। यथा राजा राजकीयपुरुषतोऽभिन्नवत्प्रतीयमानः सन्नपि ततो विलक्षण एवास्ति तथा भगवान्विश्वाभिन्नः सन्नपि विश्वविलक्षण एवास्तीत्यर्थः। ननु तर्हि कथंभूत इत्यत्राह। यतो भगवतः जगतां स्थानं स्थितिश्च निरोधो लयश्च संभव उत्पत्तिश्च ते प्रवर्त्तन्ते। भगवानिदमित्यनेन 'सर्वं खल्विदं ब्रह्म तज्जलान्' इतिश्रुत्यर्थः प्रदर्शितः। इदं सर्वं ब्रह्म, ब्रह्म तु तज्जलान् यतो जगदुत्पत्तिस्थितिलयास्तथाविधं, इदं तूत्पत्त्यादिभागिति तयोर्महान् भेदोऽस्तीति भावः। अतः इदमातिदेशिकं वाक्यं ज्ञेयम्। एवं भगवतो जगदुपादानत्वजगन्निमित्तत्वतदुभयाक्षिप्तसर्वशक्तित्वसर्वज्ञत्वस्थितिकारणाक्षिप्तसर्वान्तरात्मत्वचिदचिद्विशिष्टत्वतन्मूलकजगदभिन्नत्वतद्विलक्षणत्वकारणत्वाक्षिप्तोपास्यत्वमोक्षप्रदत्वादयो गुणाः सामर्थ्यादत्र फलितास्ते च त्वया सम्यग्वर्णनीया इति भावः। तद्धि उक्तभगवद्गुणादिजातं तु भवान् स्वयमात्मनैव वेद जानासि। तथापि मे मया भवतः प्रादेशमात्रं वै तद्गुणानामेकदेशमात्रमेव प्रदर्शितम्। 'आचार्यवान् पुरुषो वेद' इत्यादिश्रुत्यर्थसंपादनाय भवतो मया दिङ्मात्रं प्रदर्शितमित्यर्थः॥ २०॥ न च तवाचार्यापेक्षा ईश्वरावतारत्वादित्याह। त्वमिति। हे अमोघदृक् त्वम् अजम् आत्मानं, परमात्मनः परस्य पुंसः कलां, जगतः शिवाय प्रजातं, आत्मना अवेहि। यतो भवानमोघदृक् भगवदंशसंभूतश्च। तत्तस्माद्धेतोः महानुभावस्य भगवतोऽभ्युदयो जन्मकर्मगुणादिः अधिगण्यतां प्रबन्धनिर्माणेनाधिकतया कथ्यताम्। एवं चेत्कृतकृत्यस्य तवात्मन्यसंतोषो निःशेषनिवृत्तिमाप्स्यतीति भावः॥ २१॥ ननुमहानुभावाभ्युदयाधिगणनामात्रेण कथं कृतकृत्यत्वं कथंतरामसंतोषनिवृत्तिश्चेत्यत आह। इदमिति। पुंसः कृतार्थीभवितुमिच्छतः पुरुषस्य उत्तमश्लोकस्य ये गुणास्तेषामनुवर्णनं यत् इदं हि इदमेव तपसः अनशनादेः कृच्छ्राचरणस्य। श्रुतस्याध्ययनस्य। स्विष्टस्य यागादेः। चकाराद्वापीकूपतडागखननादिपूर्त्तकर्मणः। बुद्धिश्च दत्तं च तयोः। तत्र बुद्धेर्ज्ञानस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दत्तस्य दानस्येत्यर्थः। अविच्युतश्च्यवनरहितः प्रतिहतिरहित इति यावत्। अर्थः प्रयोजनं कविभिः निरतिशयप्रयोजनयाथात्म्यविद्भिः निरूपितः। भारतादेरतिविस्तृतत्वात्ततः सारग्रहणं जलधिमथनात्सुधालब्धिकल्पम्, अतोऽविचक्षणैर्दुष्करं तस्मान्मुमुक्षूणामतीव सेव्यं साररूपमर्थजातं संकलय्य दर्शयेति भावः। तपआदीननुतिष्ठतः पुंसो यद्युत्तमश्लोकगुणानुवर्णनश्रवणयो रुचिर्जायेत तदैव तेषां साफल्यम्। अन्यथा तु तपआदीनां वैयर्थ्यमेवेत्यनेनोक्तम्॥ २२॥

भगवद्गुणवर्णनादेः स्वतः पुरुषाराधनरूपत्वादविच्युतार्थत्वमस्त्येवेति वक्तुं तत्र दृष्टान्ततया स्वस्य पौर्वदैहिकं वृत्तान्तमाह। अहमित्यादिना यावदध्यायसमाप्ति। हे मुने पुरा पूर्वस्मिन्कल्पे अतीतभवे पूर्वजन्मनि तु अहं कस्याश्चन वेदवादिनां दास्याः सकाशात्। अभवम्। पुत्रत्वेनोत्पन्न आसमित्यर्थः। प्रावृषि वर्षर्तौ वेदवादिनां गृहेष्विति शेषः। निर्विविक्षतां चातुर्मास्यदीक्षां प्रवेष्टुमिच्छतां, एकत्र निवासं कर्तुं विचारं कुर्वाणानामित्यर्थः। योगिनां भागवतपरमहंसानाम्। शुश्रूषणे निमित्ते सेवाविधानार्थमित्यर्थः। अहं बालकः सन्नेव निरूपितो नियोजितः। वेदवादिभिरिति शेषः। पुरा पुराशब्दस्यातीतकालसामान्यवाचित्वेन निश्चयानुदयात्तदर्थं मतीतेत्युक्तमिति तुशब्दः सूचयति॥ २३॥ शिष्यसद्गुणेन गुरूणां शिष्ये प्रेमप्रवृत्तिं दर्शयन्नात्मनि तेषां कृपोदयमाह। ते इति। ते मुनयो योगिनः यद्यपि तुल्यदर्शनाः समदर्शिनः अभवन्। तथापि अर्भके अत्यल्पबालविग्रहधारिणि अपेतं त्यक्तमखिलं चापलं येन तस्मिन्। निरस्तसमस्तचंचलस्वभाव इत्यर्थः। दान्ते जिह्वादीन्द्रियनिग्रहवति। अधृतक्रीडनके निरस्तबालक्रीडासाधने। अनुवर्त्तिनि अनुकूलवर्त्तिनि। शुश्रूषमाणे तदनुशासनानुरूपां सेवां कुर्वति। अल्पभाषिणि मितभाषणकर्त्तरि मयि कृपामनुग्रहलक्षणदयां चक्रुः॥ २४॥ कृपाफलं वदन्नात्मानं विशिनष्टि। उच्छिष्टेति। द्विजैर्योगिभिः अनुमोदितः कृतानुज्ञः सन् तैर्दत्तान् उच्छिष्टलेपान् भुक्तावशिष्टान् पात्रस्थानन्नादीन् सकृतदेकवारं भुञ्जे स्म भुक्तवानस्मि। तेन तथाविधान्नभोजनेनापापान्नि विनष्टानि किल्बिषाणि भागवतधर्मरुचिप्रतिबन्धकानि यस्य तथाभूतः आसम्। एवममुना प्रकारेण प्रवृत्तस्य भागवतशुश्रूषणे प्रवर्त्तमानस्य अत एव विशुद्धं भागवतधर्मरुचिप्रतिबन्धरहितं चेतो यस्य तस्य मम तद्धर्मे भागवतधर्मे एव आत्मरुचिरन्तःकरणप्रीतिः प्रजायतेऽप्रजायत॥ २५॥ तद्धर्मात्मरुचौ प्रजातायां किं जातं तत्राह। तत्रेति। मं मधुसूदनं माति सर्वोत्तमत्त्वेन प्रमाणयतीति ममो भगवत्प्रमाता तत्संबुद्धिः हे मम 'मो यमे समयेऽपि स्याद्विषे च मधुसूदने' इति मेदिनी। हे अङ्ग व्यास तत्र तद्धर्मे आत्मरुचौ प्रजातायां सत्याम् अन्वहमनुदिनं कृष्णकथाः प्रगायतां कथयतां योगिनाम् अनुग्रहेण मनोहरा मनोज्ञाः ताः कृष्णकथाः अशृणवं श्रुतवान् अस्मि। ताः अनुसवं त्रिकालं श्रद्धया निशृण्वतः मे मम, प्रियं श्रोतॄणां प्रीत्यावहं श्रवः कीर्तिर्यस्य तस्मिन् भगवति रतिरनुरागः अभवदजायत॥ २६॥ तस्मिन्निति हे महामुने तदा यदा भगवति रतिर्जाता तस्मिन्काले प्रियश्रवसि तस्मिन्हरौ लब्धा रुचिर्येन तस्य मम अस्खलिता स्थिरा मतिः बभूव। यया मत्या अहं स्वमायया स्वस्य भगवतो या माया संकल्पस्तया भगवत्संकल्पेनेत्यर्थः। कल्पितमुत्पादितं सत् असत् कार्यकारणात्मकमित्यर्थः। एतत् जगत्, मयति गच्छति अन्तर्यामितया सर्वमिति मय् तस्मिन्मयि। सर्वान्तरात्मनीत्यर्थः। गत्यर्थान्मयतेः क्विप्। परे ब्रह्मणि परमेश्वरे पश्ये अपश्यम्। विश्वाधार एकः परमात्मैवास्ति नान्य इति बुद्धवानित्यर्थः। 'आत्माधारोऽखिलाश्रयः' इतिदत्तात्रेयोक्तेः। यद्वा। यया मत्या परे ब्रह्मणि मयि परब्रह्मधार्ये ममात्मनीत्यर्थः। वर्त्तमानं सदसत्कार्यकारणात्मकं एतज्जगत्। स्वमायया स्वसंबन्धिन्या प्रकृत्या कल्पितं निष्पादितं न तु स्वत इत्यर्थः। अहं पश्ये दृष्टवानस्मि। 'तद्यथाऽऽरेषु नेमिरर्पिता नाभावारा' इत्यादिश्रुत्या 'जिवभूतां महाबाहो ययेदं धार्यते जगत्' इति स्मृत्या चोक्तप्रकारेण प्रकृतिश्चेतनधार्या चेतनः परमात्मधार्य इति देहात्मभेदमात्मपरमात्मसंबन्धं च ज्ञातवानस्मीत्यर्थः॥ २७॥ इत्थमिति। इत्थमुक्तप्रकारेण। शरत्प्रावृषिकौ शरत्प्रावृषौ ऋतू मासचतुष्टयपर्यन्तमित्यर्थः। अनुसवमनुकालं महात्मभिः मुनिभिः संकीर्त्यमानं हरेः अमलं यशः विशृण्वतः मम आत्मरजस्तमोपहा आत्मगतरजस्तमसोरपहन्त्रीत्यर्थः। भक्तिःप्रवृत्ता बभूव॥ २८॥

ननु सद्गुरूपदेशमन्तरेण केवलं यशःश्रवणमात्रेणैव कथं ज्ञानोदय इति चेत्तत्राह। तस्येति। तस्य प्रवृत्तभक्तेः अनुरक्तस्यानुरागवतः बालस्य सतः अपि एवं प्रश्रितस्य विनीतस्य। हतमेनः पापं यस्य तस्य। श्रद्दधानस्य श्रद्धायुक्तस्य। दान्तस्य जितेन्द्रियस्य। अनुचरस्यानुवर्त्तिनश्च मे मम मह्यमित्यर्थः॥ २९॥ ज्ञानमिति। यत् भगवता साक्षात् उदितं गुह्यतमं तत् ज्ञानं गमिष्यन्तः चातुर्मास्यानन्तरं गन्तुमुद्यताः दीनवत्सलाः योगिनः कृपया। अन्ववोचन्नुपदिदिशुः। अत्र गुह्यतममित्यस्यायमर्थः। साधनभूतधर्मतत्त्वज्ञानं गुह्यं, तत्साध्यं विविक्तात्मज्ञानं गुह्यतरं, तत्प्राप्येश्वरज्ञानं गुह्यतममिति। भगवता साक्षादुदितं भागवतं शास्त्रमित्यर्थः। इति द्वयोरेकसंबन्धः॥ ३०॥ ज्ञानं विशिनष्टि। येनेति। येन ज्ञानेन एव वेधसो विश्वविधातुः भगवतः वासुदेवस्य मायानुभावं त्रिगुणात्मकप्रकृतिर्महिमानम्। अहम् अविदं ज्ञातवानस्मि। अनेन विरोधिस्वरूपज्ञानमुक्तम्। येन ज्ञानेन तत्पदं श्रीवासुदेस्थानं गच्छन्ति। अनेन प्राप्यप्रापकविषयं ज्ञानमुक्तम्। अर्थपञ्चकज्ञानमुपादिशन्निति फलितम्। अर्थपञ्चकज्ञानं नाम जीवादिपञ्चानामनादिवास्तवभेदज्ञानम्। तदुक्तं सुधासिन्धौ सप्तमतरङ्गे शतानन्दमुनिचरणैः। 'जीवेशब्रह्मकृष्णानां मायायाश्चापि वास्तवः। अस्त्यनादिरयं भेद इति जानीहि निश्चितम्' इति॥ ३१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

एवं स्वपूर्वजन्मवृत्तान्तदृष्टान्तेन परमेश्वरगुणश्रवणादेस्तद्भक्तियोगसाधनत्वमुक्तं भक्तियोगस्य शश्वद्धर्मगर्भत्वं पूर्वमेव प्रतिपादितं धर्मकृतेऽनुशासतः स्वभावरक्तस्येत्यनेन त्रैवर्गिककर्ममूलकतापत्रयाभिहतजनस्य पुनस्त्रैवर्गिकधर्मानुशासनं, नचार्पितं कर्मेत्यनेन निन्दितं, अनभिसंहितफलस्य भगवद्भक्तियोगानुग्राहकस्य वर्णाश्रमधर्मस्येश्वरार्पणेन तापत्रयनिवृत्तिहेतुत्वाद्धुपादेयत्वं च सूचितम्। अथैकेन श्लोकेन अनभिसंहितफलस्य कर्मणो भक्तियोगनिष्पादनद्वारा तापत्रयनिवृत्तिहेतुत्वं वदन् त्रैवर्गिकस्य कर्मणः पुनः पुनस्तापत्रयहेतुत्वमेव सदृष्टान्तमुपपादयति। एतदिति त्रिभिः। हे ब्रह्मन्। तापानामाध्यात्मिकाधिभौतिकाधिदैविकानां दुःखानां त्रयं तस्य चिकित्सितं येन तत्। तापत्रयप्रतिकारकमित्यर्थः। एतत् एव संसूचितम्। श्रुतिस्मृत्यादिभिरिति शेषः। किं तदित्यत्राह। यत् कर्म ब्रह्मणि गुणैश्वर्यविभूत्यादिबृहत्त्वावति भगवति षडैश्वर्यसपन्ने ईश्वरेऽक्षरादिनियन्तरि परमेश्वरे भावितं समर्पितम्। एतदिति संबन्धः। ईश्वरार्पितकर्मैव तापत्रयचिकित्सितमिति सूचितमित्यर्थः। 'धर्मेण पापमपनुदति' 'अविद्ययामृत्युं तीर्त्वा' इत्यादिका श्रुतिः। 'यज्ञदानतपःकर्म पावनानि मनीषिणाम्' इत्यादिका स्मृतिश्च। तापत्रयं हि पापमूलकमस्ति तच्च अनभिसंहितफलेन धर्मेण पापे निवृत्ते भक्तियोगनिष्पत्तिद्वारा निवर्त्तते इति श्रुतिस्मृतिभिः सूच्यते इति भावः ॥ ३२ ॥ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्त्तकत्वमिति चेत्सामग्रीभेदेन घटते इति सदृष्टान्तमाह द्वाभ्याम्। आमय इति। हे सुव्रत भूतानां यः आमयः रोगः येन घृतादिना जायते तदेव द्रव्यम् आमयकारणभूतं तदेव केवलं घृतादि द्रव्यमित्यर्थः। तं घृताद्यशनजमामयं न पुनाति। न निवर्त्तयतीत्यर्थः। किंतु। चिकित्सितं पारदहिङ्गुलताम्रभस्मादिद्रव्यान्तरैर्भावितं सत् यथा पुनाति हि निवर्त्तयत्येव ॥ ३३ ॥ एवमिति। एवं तथा नृणां संसारिणां सर्वे क्रियायोगाः क्रियालक्षणा उपायाः संसृतिहेतवः स्वत एव संसारहेतवः सन्ति। ते क्रियायोगा एव परे परमात्मनि कल्पिता अर्पिताः स्युश्चेत्तदा आत्मविनाशाय अनेकजन्मोपार्जितदुष्कर्मविनाशाय कल्पन्ते समर्था जायन्ते। तस्मात्केवलं बन्धकं प्रवृत्तकर्म ब्रह्मार्पणेनौषधीकृतं सत् ज्ञानभक्त्यादिद्वारा संसाराख्यरोगनिवर्त्तनसमर्थं जायते इति भावः। अत्रोक्तार्थक्रमो यथा। प्रथमं महत्सेवा, ततस्तत्कृपा, ततस्तद्धर्मश्रद्धा, ततो भगवत्कथाश्रवणं, ततो भगवति रतिस्तया देहद्वयात्मविवेकज्ञानं, ततो भगवति दृढा भक्तिस्ततः परमार्थतया भगवत्स्वरूपस्य तत्त्वतो वेदनं, ततस्तत्कृपया सर्वज्ञत्वादिभगवत्गुणाविर्भाव इति ॥ ३४ ॥

ननु 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः' इत्यत्र ज्ञानेनाज्ञानप्राप्तकर्मनाशस्योक्तेः। 'भक्त्या मामभिजानाति यावान्यश्चास्मि यादृशः' इत्यत्र भक्तियोगात् ज्ञानयोगनिष्पत्त्युक्तेश्च। प्रथमं साधनात्मको भक्तियोगस्ततो हि ज्ञानयोगस्ततः कर्मनाश इति क्रमदर्शनात्कथं कर्मणा कर्मनाश इत्याकाङ्क्षायामाह। यदत्रेति। अत्र लोके यत् कर्म क्रियते तत् भगवत्परितोषणं यथा भवेत्तथा कर्त्तव्यम्। तद्यथा। 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्' इति। 'कायेन वाचा मनसेन्द्रियैर्वा' इत्यादि च। अयमेव भक्तियोगः। अतः भक्तियोगसमन्वितं यत्कर्म भवेत् तदधीनं ज्ञानं हि। अस्यायं भावः। भगवदर्पणेन क्रियमाणः कर्मनिर्हार एव भक्तियोगः एवं कर्मनिर्हारस्य भक्तियोगत्वाद्भक्तियोगजं ज्ञानमपि कर्मनिर्हारात्मकमेव। एवं सति ज्ञानस्य कर्मनिर्हारत्वे उक्तार्थः संपन्न एव ॥ ३५ ॥ परमेश्वरार्पणेन क्रियमाणं कर्म भक्तियोगं जनयति इत्येतत्सदाचारेण दर्शयति। कुर्वाणा इति। यत्र यदा भगवच्छिक्षया यत्करोषीत्याद्युक्तरीत्या असकृत् कुर्वाणाः भवन्ति तदा कृष्णस्य गुणनामानि गृणन्ति अनुस्मरन्ति च। कृष्णमिति शेषः। यथा भगवच्छिक्षयाऽसकृत्कृतानि कर्माणि भक्तियोगानुग्राहकाणि तथा गुणनामानुस्मरणादिकमपीति भावः ॥ ३६ ॥ गुणनामस्मरणादिपूर्वकमनभिसंहितफलकर्मानुष्ठानप्रकारमेव दर्शयंस्तथाकुर्वाण एवोत्तमाधिकारीत्याह। ॐ नम इति। वसति विश्वस्मिन्नन्तर्यामितयेति वासुः स चासौ देवश्च। यद्वा वसति विश्वमस्मिन्निति वासुः स चासौ देवश्च वासुदेवस्तस्मै। 'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते' इति विष्णुपुराणोक्तेः। प्रकृष्टं द्युम्नं प्रकाशो बलं वाऽस्येति प्रद्युम्नस्तस्मै। न निरुद्धः सर्वव्यापकत्वे केनचिदपीति अनिरुद्धस्तस्मै। संकर्षयतीन्द्रियार्थविषयकज्ञानमाकृष्याऽऽपादयतीति संकर्षणस्तस्मै। भगवते तुभ्यम् ॐम् नमो नमः। धीमहि ध्यायेम च। नमो नम इति नामोच्चारणप्रकारदर्शनम्। धीमहीति गुणस्मरणप्रकारप्रदर्शनम्। वासुदेवपदेन सर्वाधारत्वं सर्वान्तरात्मत्वं च। प्रद्युम्नशब्देन निरतिशयदीप्तियुक्तत्वम्। अनिरुद्धपदेन सर्वव्यापकत्वम्। संकर्षणपदेन अतीन्द्रियार्थविषयकज्ञानापादकत्वं च फलितम्। अस्योपलक्षणत्वादेतत्प्रभृतयो गुणा अनुसंधेया इत्यर्थः ॥ ३७ ॥ इतीति। इतीत्थम्। मूर्त्यभिधानेन अमूर्तिकं कर्मवश्यप्राकृतमूर्तिरहितम्। मन्त्रमूर्तिं मन्त्रप्रकाश्यमूर्तिम्। यज्ञपुरुषं यज्ञाराध्यं परमपुरुषम्। यः यजते स्वधर्मैराराधयति सः पुमान् सम्यग्दर्शनः 'ज्ञानी त्वात्मैव मे मतम्' इत्युक्तविधोऽधिकारीत्यर्थः ॥ ३८ ॥ एवं यजतामाशु भक्तियोगो निष्पद्यत इत्यभिप्रायेणात्मानं दृष्टान्तयति। इममिति। हे ब्रह्मन् मदनुष्ठितमिमं स्वनिगमं भगवतोऽनुशासनमवेत्य दृष्ट्वा केशवः स्वस्मिन् भावं भक्तिं तत्साध्यं ज्ञानमैश्वर्यं देवर्षित्वोचितम्। मे मह्यम् अदात् ॥ ३९ ॥ अतस्त्वमप्येवं कुर्वित्युत्तरमुपसंहरति। त्वमिति। अदभ्रमनल्पं श्रुतं यस्य तत्संबुद्धौ हे अदभ्रश्रुत अनल्पकीर्ते। त्वमपि विभोर्भगवतो विश्रुतं दिग्विख्यातं सुयशः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रख्याहि प्रबधान। येन विश्रुतप्रख्यानेन विदां बोद्धृणां बुभुत्सितं बोद्धुमिष्टं समाप्यते आपूर्यते। नैव निरवशिष्यते इति यावत्। यच्छ्रुतवतो जिज्ञासितव्यं नावशिष्यते तथाविधमाख्यानं कुर्वित्यर्थः। किंच। दुःखैस्त्रिविधैस्तापैर्मुहुः अर्दित आत्मा मनो येषां तेषां संक्लेशा आध्यात्मिकादयस्तापास्तेषां निर्वाणमपोहनम्। अन्यथोपायान्तरेण न उशन्ति नैव मन्यन्ते। त्वदन्येषां भागवतकरणशक्त्यभावात्त्वत्कृतिरेव तवालंबुद्धिकारणमिति भावः॥ ४०॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिताया-मन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे पञ्चमोऽध्यायः॥ ५॥

——:※:——

अथ षष्ठोऽध्यायः

सूत उवाच

एवं निशम्य भगवान् देवर्षेर्जन्म कर्म च। भूयः प्रपच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः॥ १॥

षष्ठे प्रागूजन्मसंभूतं स्ववृत्तं नारदोऽब्रवीत्। कृष्णसंकथनोद्भूतं व्यासस्य प्रत्ययाय हि॥ १॥

'अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः' इत्युक्तं तत उपरितनं देवर्षिवृत्तान्तं जिज्ञासुः व्यासः पृच्छतीत्याह सूतः। एवमिति। हे ब्रह्मन् शौनक एवमित्थं वर्णितं देवर्षेर्नारदस्य जन्म कर्म च निशम्य सत्यवतीसुतः भगवान् व्यासः तं देवर्षिं भूयः पुनः प्रपच्छ॥ १॥ प्रश्नमेवाह भिक्षुभिरिति त्रिभिः। हे नारद तव विज्ञानादेष्टृभिः विज्ञानोपदेशकारिभिः भिक्षुभिर्भागवतपरमहंसैः विप्रवसिते चातुर्मास्यान्तेऽन्यत्र गमने कृते सति ततः पश्चात आद्ये वयसि वर्त्तमानः भवान् किमकरोत्कृतवान्॥ २॥ स्वायंभुवेति। हे स्वायंभुव स्वयंभूपुत्र नारद ते त्वया परं वयो भिक्षुविप्रवासप्रभृति वयः कया वृत्त्या वर्तितं नीतम्। काले प्राप्ते सति इदं कलेवरं कथंच कथं वा उदस्राक्षीः उत्सृष्टवानसि। प्राक्कालीनस्यापि कलेवरस्य वृत्तान्तकथनमुखेन प्रस्तुतत्वादिदमिति संनिहिततया अभिहितम्॥ ३॥ प्राक्कल्पेति। हे मुनिसत्तम मुनिषु श्रेष्ठ प्राक्कल्पविषयां पूर्वकल्पभवाम् एतां भिक्षूपदेशप्राप्तां ते तव स्मृतिम् एषः कालः कथमिति शेषः। न व्यवधान्न तिरोहितवान्। अडभाव आर्षः। आगमशास्त्रस्यानित्यत्वाद्वा। हि यत एषः सर्वनिराकृतिः सर्वेषां पूर्वजन्मसंज्ञादीनां निराकरणकारकः। अस्तीति शेषः॥ ४॥ इत्थमापृष्टो नारदो यथावद्वक्तुमारेभे। भिक्षुभिरिति। हे व्यास मम विज्ञानादेष्टृभिर्भिक्षुभिर्विप्रवसिते प्रयाते सति तत आद्ये वयसि वर्त्तमानः अहम् एतद्वक्ष्यमाणम् अकारषं कृतवान्॥ ५॥

तदेवाह एकात्मजेत्यादिना कल्पान्त इत्यतः प्राक्तनेन ग्रन्थेन। एकेति। एकोऽहमेवात्मजः पुत्रो यस्याः सा। योषित् मूढा किंकरी च मे मम जननी अनन्यगतौ अविद्यमानान्यपोषणे आत्मजे मयि स्नेहानुबन्धनं स्नेहपारवश्यं चक्रे। योषिदिति स्त्रीस्वभावोक्तिः। मूढा किंकरी आभ्यां मूर्खत्वपराधीनत्वे उक्ते॥ ६॥ सेति। सा मम जननी अस्वतन्त्रा किंकरीत्वात्परतन्त्रा अथापि मम योगक्षेमम् इच्छती सत्यपि कल्पा समर्था न आसीत् न बभूव। अप्राप्तस्य प्राप्त्युपायो योगः। प्राप्तस्य परिपालनं क्षेमम्। कुतः। लोकः सेवको जन ईशस्य स्वामिनो वशे हि। कथमिव। दारुमयी काष्ठनिर्मिता योषा यथा, सा यथा जडयन्त्रप्रवर्तकपुरुषाधीना तथेत्यर्थः॥ ७॥ अहमिति। अहं चाहमपि तदा पञ्चहायनः पञ्चवर्षवयस्को बालकः। अत एव दिक् पूर्वादिश्च, देशो मरुधन्वादिश्च, कालो हेमन्तादिश्च, तेषु अव्युत्पन्नस्तद्बोधवर्जितः। अतः तदवेक्षया मात्रवेक्षया तद्देहावसानप्रतीक्षणेन हेतुनेत्यर्थः। तत्पूर्वोक्तं यद्ब्रह्मकुलं तस्मिन्। तेषां ब्राह्मणानां गृह एवेत्यर्थः। ऊषिवान् वासं कृतवान् अस्मि॥ ८॥ कियन्तं कालमवात्सीदिति मातृमरणपर्यन्तमवात्समिति परिहारमभिप्रेत्याह। एकदेति। एकदा कदाचित् निशि रात्रौ गां दुहन्तीम्। हेतौ शतृप्रत्ययः। गां दोग्धुमित्यर्थः। गेहात् निर्गतां कृपणां दीनां मन्मातरं पथि मार्गे पदा पादेन आस्पृष्ट ईषदाक्रान्तः। अथापि कालचोदितः कालशरीरकदैवेन संचोदितः सन् सर्पः अदशत्। तेन सा ममारेत्यर्थात् द्रष्टव्यम्॥ ९॥ तदेति। तदा अहं तन्मातृमरणं भक्तानां शं सुखम् अभीप्सतः [illegible]मयमानस्य ईशस्य परमेश्वरस्य अनुग्रहम् अयमेव मे परमेश्वरानुग्रह इतीत्यर्थः। मन्यमानः सन् उत्तरां दिशं प्रातिष्ठं प्रस्थितवानस्मि॥ १०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

स्फीतानिति । तत्र प्रस्थाने स्फीतान् समृद्धान् जनपदान् देशान् । द्वितीयान्तानामतियातोऽहं महद्विपिनमद्राक्ष-मित्युपरिष्टादन्वयः । पुराणि च ग्रामाश्च व्रजाश्च आकराश्च तान् । तत्र पुराणि राजाश्रयाणि । ग्रामा बहुजनाकीर्णाः । रत्नाद्युत्पत्तिस्थानानि आकराः । गोपालानां गवां च निवासस्थानानि व्रजाः खेटाश्च खर्वटाश्च वाट्यश्च ताः । खेटाः कृषीवल-ग्रामाः । खर्वटा निषादादिग्रामाः । वाट्यः पुष्पवाटिकाः । वनानि उपवनानि च । वनानि स्वतः सिद्धवृक्षाणां समूहाः । उपवनानि रोपितवृक्षाणां समूहाः ॥ ११ ॥ चित्रेति । चित्रस्वनैरिति । चित्रा नानाविधा ये धातवो गैरिकादयस्तैर्विचित्रा आश्चर्यरूपा अद्रयो गिरयस्तान् । इभैर्गजैर्भग्नाश्छिन्ना भुजाः शाखा येषां ते ये द्रुमास्तान् । यद्वा इभैर्गजैर्भग्ना भुजद्रुमा भूर्जवृक्षा येषु तानित्यद्रिविशेषणम् । 'भूर्जपत्रो भुजो भूर्जे' इति यादवः । शिवानि विशुद्धानि जलानि येषु तान् । जलाशयान् सरांसि । तथा सुरैर्देवैः सेविताः क्रीडिताः चित्रा नानाविधाः स्वनाः येषां तैः पत्ररथैः पक्षिभिः संकुला इति शेषः । विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः नलिनीः पुष्करिणीः पद्माकरानिति यावत् । अतियातः अतिक्रम्य गतः एकः एव अहं महत् विपिनं वनमद्राक्षं समपश्यम् । इति द्वयोरेकाऽन्वयः ॥ १२-१३ ॥ एतद्विपिनमेव वर्णयति । नलेति । नलाश्च वेणवश्च शरस्तंबाश्च कुशाश्च कीचकाश्च तैर्गह्वरं दुर्गमम् । तत्र नला ग्रन्थिपर्णापरसंज्ञा नडाः । वेणवः स्थूलवंशाः । शरस्तंबाः प्रसिद्धाः । यद्वा । नलादीनां द्वन्द्वं कृत्वा तदन्तस्य स्तंबशब्दस्य प्रत्येकं संबन्धः । कुशाः प्रसिद्धाः कीचकाः सच्छिद्रवंशाः । घोरमुग्रम् । प्रतिभयाकारं प्रतिमुखं गच्छतां भयापादकम् । व्यालाश्च उलूकाश्च शिवाश्च तासामजिरं क्रीडास्थानम् । व्याला दुष्टगजा अजगरा वा । उलूका घूकाः । शिवाः शृगालविशेषाः । इत्थं भूतं विपिनमद्राक्षमिति पूर्वेण संबन्धः ॥ १४ ॥

परीति । परिश्रान्तानि इन्द्रियाणि आत्मा देहश्च यस्य सः । तृषा पिपासा तया व्याप्तः । बुभुक्षितः क्षुधितश्च अहं नद्याः ह्रदे स्नात्वा उपस्पृष्टो विहिताचमनादिः पीत्वा जलमिति शेषः । गतः श्रमो यस्य तथाभूतः । अभूवमिति शेषः ॥१५॥ तस्मिन्निति । निर्मनुजे मनुष्यसंचाररहिते तस्मिन् अरण्ये पिप्पलोपस्थे विपुलाश्वत्थमूले आश्रितः स्वस्तिकासने उपविष्टः अहं यथाश्रुतं परमहंसेभ्यः यथा श्रुतं तथा आत्मस्थं जीवात्मनि स्थितं हृदयकमलस्थं वा आत्मानं परमात्मानम् आत्मना मनसा अचिन्तयं ध्यातवानस्मि ॥ १६ ॥ ध्यायत इति । भावोऽभ्यासस्तेन निर्जितं वशीकृतं यच्चेतस्तेन चरणाम्भोजं श्रीहरेश्चरणकमलं ध्यायतश्चिन्तयतः । औत्कण्ठ्यात्प्रेमपूर्वकाऽनुध्यानाद्धेतोरश्रूणामानन्दजनेत्रजलानां कला बिन्दवो ययोस्ते अक्षिणी यस्य तस्य मे मम हृदि शनैः हरिः आसीत आविरासीत् ॥ १७ ॥ प्रेमेति । हे मुने तदा प्रेम्णः स्नेहस्यातिभर आधिक्यं तेन हेतुना निर्भिन्ना अभिव्यक्ताः पुलका रोमाञ्चा यस्मिंस्तदङ्गं शरीरं यस्य सः । अतिनिर्वृतः अतीव सुखितः आनन्दसंप्लवे आनन्दस्य महापूरे लीनो मग्नः सन् उभयं देहम् आत्मानं च न अपश्यम् । न दृष्टवानस्मि ॥ १८ ॥ रूपमिति । मनःकान्तं मनसोऽतीव प्रियम् अत एव शुचा शोकस्तामपहन्तीति तत् शोकस्यापहन्तृ । आविर्भूतं यत् भगवतः रूपं तत् पुनः अपश्यन् अचक्षाणोऽनिरीक्षमाणः अभवम् । तदा वैक्लव्याद्व्याकुलीभावाद्धेतोः दुर्मना दुःखितमानसः इव सहसा आशु उत्तस्थे । यद्वा तत् पुनः अपश्यन् सन् सहसा उत्तस्थे । वैक्लव्यात् दुर्मनाः जातः इव आसम् ॥ १९ ॥

दिदृक्षुरिति । भूयः पुनरपि तद्भगवद्रूपं दिदृक्षुर्द्रष्टुमिच्छुः अहं हृदि मनः प्रणिधाय स्थिरीकृत्य वीक्षमाणश्चिन्त-यन्सन्नपि यदा न अपश्यं तदा आतुरो विषयातुर इव अवितृप्तः अभवम् । आतुरो रोगीवेति वा ॥ २० ॥ एवमिति । एवममुना प्रकारेण विजने जनवर्जिते तस्मिन् स्थाने यतन्तं, तं द्रष्टुं पुनः पुनर्यत्नं कुर्वन्तं मामुद्दिश्य गिरां वाचाम् अगोचरः 'यतो वाचो निवर्त्तन्ते' इत्यादिश्रुत्युक्तरीत्या वागविषयः । अपरिच्छेद्यत्वादिति भावः । अदृश्यः सन्निति तात्पर्यम् । भगवानिति विशेष्य-मध्याहर्त्तव्यम् । गंभीराऽगाधा चासौ श्लक्ष्णा मधुरा च तया वाचा, शुचो मानसीः शोकजा व्यथाः, प्रशमयन्निव विनष्टा कुर्वन्निव आह कथयामास ॥ २१ ॥ उक्तिमेवाह हन्तेति चतुर्भिः । हन्तेति विस्मये । भवान् इह भूलोके अस्मिन् जन्मनि अस्यां शूद्रयोनावित्यर्थः । मां द्रष्टुं न अर्हति । पाठान्तरे माशब्दो नञ्पर्यायः । अतो 'माङि लुङ्' इति लुङभाव आर्षः । दर्शना-नर्हत्वे हेतुं वदन्नात्मानं विशिनष्टि । अविपक्वोऽविनष्टः कषायो दर्शनप्रतिबन्धकः पुण्यपापात्मकः कषाय इव दुरपनेयः कर्मो-पाधिर्येषां तेषाम् । कषेण भोगेन अयते गच्छतीति कषायः पापमिति पक्षेऽभुक्तपापफलानामित्यर्थः । कुयोगिनां जन्मना अनभिज्ञानेन वा कुत्सितः योगो ध्यानादिर्येषामस्तीति तेषाम् । अहं दुर्दर्शः दुःखेनापि द्रष्टुमशक्यः । भवामीति शेषः ॥ २२ ॥ तर्हि सकृत्कथं दर्शितमित्यत्राह । सकृदिति । हे अनघ सांसारिकदुःखरहित सकृत्तद्रूपं मया दर्शितं इति यत् एतत् ते तव कामाय मय्यनुरागाय मद्विषयकदिदृक्षायै इत्यर्थः । किंकाममात्रेणेत्यत आह । मत्कामो मां द्रष्टुं कामयमान इत्यर्थः । साधुः साधुचरितः पुमान् शनकैः सर्वान् हृच्छयान् हृद्गतान् कामादीन् दोषान् मुञ्चति निरस्यति । साधुशब्दे निर्विसर्गपाठे साधु यथातथेत्यर्थः ॥ २३ ॥ सदिति । यतः ते तव अदीर्घयाऽल्पकालिकया एव सतां साधूनां सेवया मयि दृढा मतिः जाता । ततः इमम् अवद्यं दोषरूपशूद्रजातिजत्वाद्गर्ह्यम् । लोक्यते इति लोको देहस्तम् । शूद्रजात्युत्पन्नकलेवरमित्यर्थः । हित्वा त्यक्त्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मज्जनतां मद्भृत्यतां गन्ता असि। कल्पान्तरे इति शेषः। ब्रह्मपुत्रत्वेनोत्पन्नस्त्वं कल्पान्तरे परमभागवतत्वं यास्यसीत्यर्थः ॥ २४॥ मतिरिति। मयि निबद्धा इयं मतिः कर्हिचित् कदाचिदपि न विपद्येत न नश्येत्। प्रजानां सर्गः सृष्टिश्च निरोधः संहारश्च तत्समाहारस्तस्मिन् अपि स्मृतिनाशकयोः प्रजासर्गनिरोधयोर्जातयोः सतोरपीत्यर्थः। स्मृतिर्जातिस्मरणशक्तिश्च मदनुग्रहात् न विपद्येत। अनेन भगवदैकान्तिकसाधुजनसङ्गस्त्वभिमतफलप्रद इत्युक्तं भवति ॥ २५॥ एतावदिति। अलिङ्गं कर्मकृतदेहरहितम्। वस्तुतस्त्वचक्षुर्ग्राह्यदिव्यशरीरमित्यर्थः। नभः लिंङ्गं दृष्टान्तत्वेन गमकं यस्य तत्। सर्वगमप्याकाशवन्निर्लेपमित्यर्थः। आकाशशरीरं वा इश्वरं सर्वनियन्तृ महत् सर्वोत्तममृद्धिमद्गुणोपेतं तत् भूतं भूतशब्दवाच्यं ब्रह्म। 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितम्' इति श्रुतेः। एतावत् उक्त्वा विरराम तूष्णीमास। तेन भूतेन अनुकम्पितः कृपापात्रीकृतः। अहं च महतां महीयसे। 'अणोरणीयान्महतो महीयान्' इति श्रुतेः। तस्मै महाभूताय शीर्ष्णा शिरसा अवनामं नमस्कारं विदधे कृतवान् ॥ २६॥

नामानीति। ततः अनन्तस्य भगवतः नामानि हृतत्रपो गतलज्जः सन् पठन् भद्राणि लोकानां मङ्गलावहानि गुह्यानि वेदेऽपि गूढानि कृतानि कर्माणि चकाराज्जन्मान्यपि स्मरन् गां भूमिं पर्यटन् तुष्टं मनो यस्य सः। गता स्पृहा शब्दादिविषयाभिकाङ्क्षा यस्य सः। विगतो मत्सरो यस्य सः। विगतो मदो यस्य सः। विमद इत्यत्रापद इति पाठे अनिकेतः। कालं देहावसानावसरं प्रतीक्षन् आसमिति क्रियापदमध्याहार्यम्। यावत्कल्पावसानं जीवितवानस्मीत्यर्थः ॥ २७॥ एवमिति। हे ब्रह्मन् एवं कृष्णे भगवत्येव मतिर्यस्य तस्य अत एवामलो विशुद्ध आत्मा मनो यस्य तस्य अत एव असक्तस्य शब्दादिविषयेषु काप्यासक्तिमप्राप्तस्य मम काले मद्देहारम्भकप्रारब्धावसानसमये कालो मृत्युः, काले प्रावृट्काले प्राप्ते सौदामनी सौदामन्याख्या विद्युत्तडिद्यथा सहसाऽऽपद्यते तथेत्यर्थः। प्रादुरभूदुपस्थितो बभूव। सौदामनीशब्दस्तु इत्थं व्युत्पद्यते। सुदाम्नः पर्वतस्यादूरभवा सौदामनी। चातुरर्थिकेऽणि 'अणि अन्' इति प्रकृतिभावेऽणन्तत्वात् ङीप्। सौदामिनीत्यपि पाठः। सौदामनीविद्युतोः पर्यायत्वेऽपि कौरवपाण्डववत्पृथगुक्तिर्युज्यते ॥ २८॥ प्रयुज्यमाने इति। मयि तां प्रसिद्धां शुद्धां भागवतीं तनुं प्रयुज्यमाने 'हित्वावद्यमिमं लोकं गन्ता मज्जनतामसि' इति या भगवत्पार्षदरूपा शुद्धसत्त्वमयी तनुः प्रतिश्रुता तां प्रति भगवता मयि नीयमाने सतीत्यर्थः। आरब्धं यत्कर्म तन्निर्वाणं समाप्तं यस्य सः। पाञ्चभौतिकः पञ्चभूतात्मकः देहः न्यपतत्। अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं च सूचितम्। अत्र केचिदेतदर्थमन्यथा कुर्वन्ति परंतु तदपेक्षया 'देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्' इति प्राकृतैर्देहेन्द्रियासुभिर्हीनानां दिव्यदेहानामित्यर्थः। 'सुरूपदिव्यावयवाः सुसाराः' इति। 'गुणापाये ब्रह्मशरीरमेति'। 'ब्राह्मीं संविशते तनुम्' इत्यादिशतशो वाक्यप्रामाण्याद्यथोक्त एवार्थः साधुः ॥ २९॥

एवं स्वप्राक्कल्पीयो वृत्तान्तः कथितः। अथ तत उपरितनं वृत्तान्तमाह। कल्पान्त इत्यादिना। तदा कल्पान्ते इदं जगत्। आदाय स्वस्मिन्प्रविलाप्य उदन्वतः प्रलयार्णवस्य अम्भसि जले शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोः विभोर्ब्रह्मणश्चतुर्मुखस्य अनुप्राणं निःश्वासेन सह अन्तर्मध्यम् अहं विविशे प्रविष्टः। 'ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः। अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुना' इतिकौर्मोक्तेः ॥ ३०॥ सहस्रेति। सहस्रयुगपर्यन्ते चतुर्युगसहस्रपरिमितस्वनिशावसाने। उत्थाय विष्णोर्नाभिकमलादुत्पद्य इदं व्यष्ट्यात्मकं जगत् सिसृक्षतः स्रष्टुमिच्छोश्चतुर्मुखस्य प्राणेभ्यः प्राणादिभ्यः मरीचिमिश्राः मरीचिसहिताः ऋषयो वसिष्ठादयः अहं नारदश्च जज्ञिरे उद्बभूवुः। अहं च जज्ञे इति पुरुषवचनविपरिणामेनान्वयः ॥ ३१॥ अन्तरिति। ततः महाविष्णोः अनुग्रहात् क्वचिदपि अविघाता अप्रतिहता गतिर्यस्य सः। अस्कन्दितमखण्डितं व्रतं ब्रह्मचर्यं यस्य सः। अहं त्रीन् लोकान् अन्तः बहिश्च त्रिलोक्या अन्तर्बहिश्चेत्यर्थः। पर्येमि परितः संचरामि। ये कर्मिणस्ते बहिर्गन्तुं न शक्नुवन्ति। ये तपआदिभिर्ब्रह्मलोकं गताः ते त्वन्तर्न यान्ति अहं तु विष्णुप्रसादात् काप्यकुण्ठगतिरन्तर्बहिश्च पर्यटामीत्यर्थः ॥ ३२॥ किमिति पर्यटसि ईश्वराज्ञया लोकमङ्गलार्थमित्याह चतुर्भिः। देवदत्तामिति। देवेनेश्वरेण दत्ताम् एतदुक्तं स्कान्दीयविष्णुखण्डान्तर्गते वासुदेवमाहात्म्ये। 'तथास्त्विति प्रतिश्रुत्य कृष्णस्तेनेति याचिताम्। गानोपयुक्तां महतीं वीणां दत्त्वाऽब्रवीत्पुनः' इति। स्वरा निषदर्षभगान्धारषड्जमध्यमधैवतपञ्चमा इति सप्त ते एव ब्रह्माभिव्यञ्जकत्वाद्ब्रह्म तेन विभूषिताम्। स्वरैः सन्निधापितेन भगवता विभूषितामित्यर्थः। इमां पाणिस्थां वीणां मूर्च्छयित्वा वादयित्वा 'मूर्च्छा वीणादिवादनम्' इति वैजयन्ती। हरिकथां गायमानः अहं चरामि अटामि ॥ ३३॥

प्रगायत इति। प्रियं भक्तानां प्रीत्यावहं, श्रवो यशो यस्य सः। तीर्थं गङ्गाख्यं पादे यस्य स तीर्थपादः भगवान् स्ववीर्याणि निजयशांसि प्रगायतः मे मम चेतसि आहूतः इव शीघ्रं दर्शनं याति दृष्टो भवतीत्यर्थः ॥ ३४॥ तदेवमापृष्टं यथावदनुवर्ण्याथ सर्वथा त्वं हरिचरित्राण्येवानुवर्णयेत्यभिप्रायेण तापत्रयातुरजनानां भगवद्गुणवर्णनानुश्रवणमन्तरेण तापत्रयविघातकमुपायान्तरं नास्तीत्याह। एतदिति द्वाभ्याम्। मुहुरसकृत् मात्राः शब्दादिविषयास्तासां स्पर्शैरिच्छा समनुभवतृष्णा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तया आतुरं पीडितं चित्तं येषां तेषां जनानां हरिचर्यानुवर्णनं यत् एतत् भवसिन्धुप्लवः संसारसिन्धुतरणार्थंनौविशेषः दृष्टः हि ॥ ३५ ॥ तर्हि यमादियोगमार्गविधानं व्यर्थमित्यत्राह । यमादिभिरिति । मुकुन्दसेवया भगवतः कथाश्रवणादिरूपया परिचर्यया यद्वद्यथा आत्मा जीवः अद्धाऽञ्जसा शाम्यति भगवन्निष्ठबुद्धिमान् भवति, तथा कामश्च लोभश्च ताभ्यां वैरिभ्यां हतः पीडितः सः मुहुः अनुष्ठितैः यमादिभिः योगपथैर्योगमार्गैः अद्धा न शाम्यति तस्माद्धरिकथासेवैव संसारतरीति भावः ॥३६॥ प्रश्नस्योत्तरमुपसंहरति । सर्वमिति । हे अनघ त्वया अहं यत् पृष्टः तत् सर्वम् इदम् आख्यातम् । आख्यातमेव संगृह्य दर्शयति । मे मम जन्म च कर्म च तयो रहस्यम् । तथा भवतस्तव आत्मा मनस्तुष्यते येन तच्च सर्वमाख्यातम् ॥ ३७ ॥ व्यासनारदयोः संवादमुपसंहरति सूतः । एवमिति । यदृच्छिकः स्वेच्छाचारी भगवान्, नारं ज्ञानं ददातीति । अरदो दोषदो न भवतीति वा । आरवदङ्गारकवद्‌ः 'दोअवखण्डने, आयुः खण्डको न भवतीति वा नारदः मुनिः । वासवीसुतम् उपरिचरवसुवीर्यजायाः सत्यवत्याः पुत्रं व्यासम् एवमित्थं संभाष्य आमन्त्र्यापृच्छ्य वीणां रणयन् ययौ ॥ ३८ ॥ देवर्षिं स्तौति । अहो इति । अहो अयं देवर्षिः धन्यः । यद्यतः शार्ङ्गधन्वनः श्रीहरेः कीर्तिं तन्त्र्या वीणया गायन् माद्यन् हर्षमग्नः सन् आतुरं तापत्रयक्लिष्टम् इदं जगत् रमयति सुखयति । धन्यत्वं च स्वस्य परस्य च सुखापादकत्वमित्यर्थः ॥ ३९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

——:❀:——

अथ सप्तमोऽध्यायः

शौनक उवाच

निर्गते नारदे सूत भगवान्बादरायणः । श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥ १ ॥

वक्तुं परीक्षितो जन्म श्रोतुर्भागवतस्य तु । उच्यते सप्तमे दण्डो द्रौणेः सुप्तसुतान् घ्नतः ॥ १ ॥

वासवीसुतमामन्त्र्य नारदो ययावित्युक्तं तत उपरितनं व्यासवृत्तान्तं पृच्छति शौनकः । निर्गत इति । हे सूत नारदे निर्गते सति विभुः भगवान् बादरायणो व्यासः तदभिप्रेतं नारदस्याभीष्टं श्रुतवान् सन् ततो नारदगमनानन्तरं किम् अकरोत् ॥ १ ॥ ब्रह्मेति । सरस्वत्यां सरस्वत्याख्यायां ब्रह्मनद्यां ब्रह्मदैवत्यायां ब्रह्मर्षिभिः सेव्यमानायां वा नद्याम् । पश्चिमे तटे शम्याप्रास इति प्रसिद्धः, ऋषीणां सत्रवर्द्धनः सत्राणि वर्द्धन्तेऽस्मिंस्तथाभूतः, सत्रं वर्द्धयत्यधिकफलं करोतीति वा व्यासस्य आश्रमः प्रोक्तः । सूक्ष्माग्रः स्थूलमूलः षट्त्रिंशदङ्गुलो दण्डः शम्या सा बलवता क्षिप्ता सती यावद्दूरे पतेत्तावदेकं यजनं भवति एषा याज्ञिकप्रसिद्धिः । शम्या प्रास्यते क्षिप्यतेऽस्मिन्निति शम्याप्रासः यज्ञार्हभूमितयातिपवित्रो देश इत्यर्थः । शम्याः युगकीलाः प्रास्यन्ते परिध्यर्थे प्रक्षिप्यन्तेऽस्मिन्निति शम्याप्रास इति वा ॥ २ ॥

तस्मिन्निति । बदरीणां षण्डैः समूहैर्मण्डितस्तस्मिन् ऋष्युपभोगयोग्यफलबदरीवृक्षसमूहालंकृते इत्यर्थः । तस्मिन् स्वे आत्मीये आश्रमे शम्याप्रासे आसीनः व्यासः अपः उपस्पृश्याचम्य स्वयमात्मना मनः प्रणिदध्यौ विषयान्तरेभ्यः प्रत्याहृत्यात्मस्थमकरोदित्यर्थः । 'समाधिनानुस्मर तद्विचेष्टितम्' इति नारदोपदिष्टं ध्यानं कृतवानिति भावः ॥ ३ ॥ ध्यानेन किं लब्धमभूत्तत्राह । भक्तीति । भक्तियोगेन भगवतो भक्त्यात्मकेन योगेन अमले रागादिदोषरहिते मनसि सम्यक् एकाग्रतया प्रणिहिते श्रीहरिमूर्त्ताववस्थापिते सति । भगवन्मूर्त्तिमुद्दिश्य निश्चलीकृते सतीत्यर्थः । पूर्वं प्रथमतः पुरुषं परमपुरुषम् अपश्यत् । ततः तदपाश्रयां तस्य परमपुरुषस्य श्रीहरेरधीनां तच्छरीरभूतामिति यावत् । मायां च अपश्यत् । पूर्वमित्यत्र पूर्णमिति पाठे पूर्णं देशतः कालतो गुणतश्चापरिच्छिन्नमित्यर्थो बोध्यः ॥ ४ ॥ मायां विशिनष्टि ययेति । परोऽपि मायाख्यायाः प्रकृतेः स्वरूपस्वभावगुणैर्विलक्षणोऽपि जीवः यया मायया मोहितः सन् त्रिगुणात्मकं गुणत्रयपरिणामात्मकशरीरमेव आत्मानं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वं मनुते । तत्कृतं देहात्मभ्रमकृतम् अनर्थं जननमरणतापत्रयोपभोगरूपमनर्थम् अभिपद्यते प्रतिपद्यते च । अनेन यथाविधं जीवस्वरूपमनाद्यविद्यात्मकमायाकृतमस्य बन्धनं तत्कृतं देवमनुष्यादिदेहस्यात्मत्वेन मननं ततोऽनर्थशतभाक्त्वं चापश्यदिति भावः ॥ ५ ॥ अनर्थेति । साक्षात्प्रत्यक्षे अधोक्षजे परमेश्वरे भक्तियोगम् एव अनर्थोपशममनर्थोपशामकम् अपश्यत् । साक्षाद्भगवद्भक्तियोगमेवानर्थोपशमनोपायत्वेन व्यासो निश्चितवानित्यर्थः । एतत्सर्वं स्वयं दृष्ट्वा एवम् अजानतः लोकस्य अर्थे विद्वान्व्यासः सात्वतसंहितां भागवतसंदर्भरूपसंहितामित्यर्थः । चक्रे । सात्वतशब्दस्तु पुरस्तादेव निरुक्तः । अनेन श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः । स यथा । विद्याख्यायाः मायाशक्तेर्नियन्ता नित्याविर्भूतपरमानन्दमनोहरमूर्तिः सर्वज्ञः सर्वशक्तिरीश्वरः अविद्याख्यया तन्मायययानादिकालतः संमूढोऽतिरोहितज्ञानस्वरूपोऽपि तिरोहितधर्मभूतज्ञानस्ततस्तद्विपरीतधर्मा जीवस्तस्येश्वरभक्त्या लब्धात्मपरमात्मयथार्थवेदनेन मोक्ष इति । तदुक्तं विष्णुस्वामिना । 'ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः । स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः' । तथा । 'स ईशो यद्वशे माया स जीवो यस्तयार्दितः । स्वाविर्भूतपरानन्दः स्वाविर्भूतसुदुःखभूः' इति ॥ ६ ॥ संहिताया अनर्थोपशामकत्वं दर्शयति । यस्यामिति । यस्यां सात्वतसंहितायां श्रूयमाणायां सत्यां वै श्रोतुमुपक्रमितायां सत्यामेव किं पुनः श्रुतायां सत्यामित्यर्थः । पुंसः परमपूरुषे स्वाश्रितजीवजातमोहाद्यपहर्तृत्वेनोत्तमे पुरुषे कृष्णे शोकश्च मोहश्च भयं च तान्यपहन्तीति तथोक्ता भक्तिः उत्पद्यते । तत्र शोको दृष्टार्थवियोगजोऽन्तःकरणविक्षोभो रोदनचिन्तनादिलिङ्गोऽप्रतीकारविषयः । मोहो नाम 'अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः' इत्युक्तविधः । भयमागामिदुःखदर्शनजं प्रतिकूलं ज्ञानम् ॥ ७ ॥ स इति । मुनिः परब्रह्मयाथात्म्यमननशीलः स व्यासः भागवतीं संहितां कृत्वा अनुक्रम्य विवक्षितार्थान् क्रमविशेषेण विन्यस्य तदनुक्रमेणैवेमां संहितां विधाय निवृत्तिनिरतं सांसारिकधर्मवैमुख्यद्वारा केवलचित्तैकाग्र्यावहशमदमादिभिर्जाता या निवृत्तिस्तत्र निरतस्तम् । आत्मजं स्वपुत्रं शुकम् अध्यापयामास । यद्वा । संहितां कृत्वा अनुक्रम्य संशोध्येति योजना ॥ ८ ॥ तत्र लब्धावसरः पृच्छति शौनकः । स वा इति । निवृत्तिनिरतः अत एव सर्वत्र श्रोतव्येष्वध्येतव्येषु च उपेक्षक आदररहितः । आत्मारामः परमात्मैकपरः मुनिः सः शुकः कस्य वा हेतोरिति शेषः । कस्माद्धेतोरित्यर्थः । बृहतीं विपुलाम् एतां संहिताम् अभ्यसदधीतवान् । वै इत्यवधारणे । कथमेकाग्रचित्तो भगवन्मननपरस्तद्विरोधिनीमेतां बृहतीं संहितामभ्यसदिति प्रश्नाशयः ॥ ९ ॥

नेयं संहिता भगवन्मननविरोधिनी प्रत्युत तदुपयुक्तभगवत्स्वरूपगुणविवरणरूपेयमस्त्यत एतामधीतवानित्युत्तरं वक्तुं तावदस्याः संहिताया भगवद्भक्तिस्वरूपगुणविषयकतां ब्रुवन्नात्मारामाणामपि भगवद्गुणादिश्रवणभक्तिमृतेऽनवस्थानमाह सूतः । आत्मारामा इति । ग्रन्थिरेव ग्रन्थः निर्निवृत्तो ग्रन्थो येषां ते । निवृत्तदेहाद्यहंभावरूपहृदयग्रन्थय इत्यर्थः । अत एव आत्मारामाः स्वस्वरूपसुख एव रममाणाः अपि मुनयः उरुक्रमे भगवति अहैतुकीमनन्यप्रयोजनां भक्तिं कुर्वन्ति चैव हरिः इत्थंभूता एवंविधा गुणा यस्य सः । भवतीति शेषः । आत्मारामैरपि यद्भक्तिमन्तरा क्षणं स्थातुं यथा न शक्यते तथाविधालौकिकानेकगुणवान्हरिरस्तीत्यर्थः । इत्थं भक्तेस्तदनुध्यानात्मकत्वात्तस्यां भजनीयस्वरूपगुणविषयकज्ञानस्यापेक्षितत्वात्तद्विवरणरूपामिमां संहितामधीतवानिति भावः । यद्येवं मुक्तमनोवशीकरणक्षमो भगवान भवति तदा अमुक्तमनोवशीकरणक्षमो भगवान्स्यात्तत्र किमु वक्तव्यमिति तु सर्वथैतस्य हृद्गतोऽभिप्रायः ॥ १० ॥ एतदेव पुनरगूढतयाह । हरेरिति । हरेः गुणैः अतिशयितज्ञानानन्दादिगुणैराक्षिप्ता आकृष्टा मतिर्यस्य सः बादरायणिः व्याससुतः भगवान् श्रीशुकः यतः नित्यं विष्णुजनप्रियः भवति । अतः महत् अपि एतत् आख्यानं श्रीभागवतरूपम् अध्यगादधीतवान् । विष्णुजनप्रियत्वादेतद्व्याख्यानादिप्रसङ्गेन तत्संगतिकामः पपाठेति भावः । एतावता 'तस्य पुत्रो महायोगी' इत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तम् ॥ ११ ॥ अन्यद्यत्पृष्टं परीक्षितः प्रायोपवेशेन श्रवणं कथमिति 'तस्य जन्म महाश्चर्यम्' इत्यादिना तस्योत्तरं वक्तुमाह । परीक्षित इति । अथ राजर्षेः परीक्षितनृपस्य जन्म च कर्माणि च विलायनं मरणं च तत्समाहारस्तत् पाण्डुपुत्राणां संस्थां स्थितिं च वृत्तान्तमिति यावत् तदेतत्सर्वं कृष्णस्य भगवतः कथाया उदयः अनुप्रसक्तिर्यस्यां क्रियायां यथा तथा वक्ष्ये ॥ १२ ॥ तत्र परीक्षितो जन्म निरूपयिष्यन्नादौ तावद्गर्भस्थ एव परीक्षित्कृष्णेनाश्वत्थाम्नो ब्रह्मास्त्राद्रक्षित इति वक्तुं कथां प्रस्तौति । यदेत्यादिना । यदा यदेत्यस्य तदेति तृतीयेनान्वयः । मृधे युद्धे कौरवाश्च सृञ्जयाश्च तेषां वीरेषु वीराणां गतिः स्वर्गस्तां गतेषु प्राप्तेषु सत्सु अथो अनन्तरं धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेण भीमेन आविद्धा प्रयुक्ता या गदा तस्या अभिमर्श आघातस्तेन भग्नावूरू एव दण्डौ यस्य तथाभूते सति कौरवसृञ्जयानामित्यत्र पाण्डवा अपि कौरवा एव तथापि सृञ्जयवंशजो धृष्टद्युम्नः पाण्डवानां सेनापतिरिति सृञ्जयानामित्युक्तम् ॥ १३ ॥ भर्तुरिति । द्रौणिरश्वत्थामा स्वचिकीर्षितं भर्तुर्दुर्योधनस्य अप्रियमपि प्रियम् इति पश्यन् मन्यमानः सन् स्वपतां शयानानां कृष्णा द्रौपदी तस्याः सुतास्तेषां शिरांसि छित्त्वा उपाहरत् । इदं कर्म तस्य दुर्योधनस्य विप्रियम् एव । यद्वा तस्याश्वत्थाम्नः एतत् कर्म विप्रियम् एव । सर्वलोकस्यापीति शेषः । अत एव जुगुप्सितं तत् जनाः अधुनापि विगर्हयन्ति निन्दयन्ति । स्मेति वितर्के ॥ १४ ॥ मातेति । तदा यदा एवं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जातं तस्मिन् काले माता द्रौपदी सुतानां तत्रापि शिशूनां घोरं विकोशखड्गशिरःकर्त्तनरूपदारुणापचारकृतं निधनं मरणं निशम्य दृष्ट्वा श्रुत्वा वा परितप्यमाना बाष्पाणां कलास्ताभिराकुले अक्षिणी यस्यास्तथाभूता सती अरुदत्। तदा तां द्रौपदीं सान्त्वयन्नुपच्छन्दयन् किरीटमाली अर्जुनः आह वक्ष्यमाणप्रकारेणोवाच किरीटस्यैकत्वेऽपि तदग्राणां बाहुल्यान्मालीत्युक्तम्। यद्वा किरीटानां किरीटोपेतराजान्तराणां माला सहचरा श्रेणिः अस्यास्तीति। व्रीह्यादेराकृतिगणत्वात् 'व्रीह्यादिभ्यश्च' इति मत्वर्थीय इनिः। यद्वा। किरीटेनेन्द्रदत्तेन मालते शोभते तच्छील इति ॥ १५ ॥

तदेवाह। हे भद्रे ब्रह्मबन्धोर्ब्राह्मणाधमस्य आततायिनः हनिष्यन्मरिष्यामीति क्रूरक्रियाकारिणः मद्वैरिणः शिरः गाण्डीवमुक्तैर्गाण्डीवनिःसृतैः विशिखैः शरैः यद्यदा उपाहरे छित्वा त्वत्समीपे आहरेयम्, यद्यदा च आक्रम्य आहृतं तच्छिरः पादेन समाक्रम्य दग्धपुत्रा सती त्वं स्नास्यसि तदा तु तर्ह्येव ते तव शुचः शोकाश्रूणि प्रमृजामि मार्जयिष्यामीत्यर्थः। 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहर्त्ता च षडेते आततायिनः' इति शस्त्रपाणेराततायित्वस्मरणादाततायिन इत्युक्तम् अत्र तु शस्त्रपाणिर्नाम शस्त्रधारणेन निरपराधिप्राणिघातक एव बोध्यः। 'आततायिनमायान्तं हन्यादेवाविचारयन्' इति स्मृतेस्तद्धनने न मे बाध इति भावः॥ १६ ॥ इतीति। इतीत्थं वल्गवो मनोहरा विचित्रा विविधाश्चाश्चर्यभूताः ये जल्पा वाग्विशेषास्तैः प्रियां द्रौपदीं सान्त्वयित्वा अच्युतः श्रीकृष्णः मित्रं सूतः सारथिश्च यस्य सः। सारथीकृतस्वमित्राच्युत इत्यर्थः। दंशितः कवचितः, उग्रं धनुर्गाण्डीवं यस्य सः। कपिध्वजो हनुमच्चिह्नितः ध्वजो यस्य सः सोऽर्जुनः रथेन साधनेन गुरोर्द्रोणाचार्यस्य पुत्रमश्वत्थामानम् अन्वाद्रवदन्वधावत्॥ १७ ॥ तमिति। कुमारहा कुमारघाती सोऽश्वत्थामा आपतन्तमाधावन्तं तमर्जुनं दूरात् एव विलक्ष्य प्रत्यभिज्ञाय उद्विग्नं भीतं मनो यस्य सः, प्राणान् पर्याप्तुमिच्छुः प्राणपरीप्सुर्जिजीविषुरित्यर्थः। तथाभूतः सन् उर्व्यां भूमौ यावद्गमं यावद्गन्तुं शक्यं तावदित्यर्थः। रथेन साधनेन रुद्रभयात् को दक्षप्रजापतिः यथा। यद्वा पञ्चमशिरश्छेदनाय प्रवृत्तं रुद्रं दृष्ट्वा तद्भयात्को ब्रह्मा इव। यद्वा को ब्रह्मा मृगो भूत्वा सुतां लब्धुमुद्यतः सन् रुद्रस्य भयाद्यथा पलायते स्म तथा पराद्रवत्पलायितवान्। यथार्क इति पाठेऽत्र वामनपुराणकथा सूचिता। तथाहि। विद्युन्माली नाम कश्चिद्राक्षसो महेश्वरभक्तस्तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततोऽसावर्कस्य पृष्ठतो भ्राम्यन्विमानदीप्त्या रात्रिं विलोपितवांस्ततोऽर्केण निजतेजोभिर्द्रावयित्वा तद्विमानं पातितं तच्छ्रुत्वा कुपितरुद्रभयादर्कः पर्याद्रवत् ततो रुद्रस्य क्रूरदृष्टयादंदह्यमानः पतन्वाराणस्यां पतितो लोलार्कनाम्ना विख्यात इति। यथार्किरिति पाठेऽत्र वायुपुराणप्रसिद्धा कथानुसंधेया। सा तु पुरा रुद्रस्य तृतीयनेत्रस्य तेजसो भयादर्कपुत्रः शनैश्चरोऽपलायतेति ॥ १८ ॥ यदेति। द्विजात्मजो द्रौणिः यदा आत्मानं स्वम् अशरणं रक्षकरहितम्। ननु पलायनमेव रक्षकमस्ति, न, तस्यापि कुण्ठिततरत्वादित्याह। श्रान्ता वाजिनोऽश्वा यस्य तम् ऐक्षत पर्यालोचितवान्। तदा ब्रह्मशिरः अस्त्रं ब्रह्मास्त्रमित्यर्थः। आत्मा त्रायतेऽनेनेत्यात्मत्राणं स्वरक्षणोपायं मेने अबुध्यत। द्विजात्मज इत्यनेनादीर्घदर्शित्वं सूचितम्। द्विजत्वात्तस्य च तथात्वाद्ब्रह्मशिरोऽस्त्रेणार्जुनं हत्वात्मानं रक्षिष्यामीत्यध्यवसितवानित्यर्थः॥ १९ ॥ अथेति। अथानन्तरं सलिलम् उपस्पृश्याचम्य समाहितः अस्त्रप्रयोगोपयुक्तमनःप्रणिधानयुक्तः संहारमस्त्रोपसंहारम् अजानन् अपि प्राणकृच्छ्रे प्राणापदि उपागते उपस्थिते सति तद्ब्रह्मशिरोऽस्त्रं संदधे प्रयुयोज ॥ २० ॥ तत इति। ततस्तस्मादस्त्रात् सर्वतो दिशं सर्वासु दिक्षु प्रादुर्भूय व्याप्नुवत् प्रचण्डमुग्रं तेजः प्रादुष्कृतम्। ततः प्राणापदं च अभिप्रेक्ष्य प्राणविपत्तिकारित्वेनोत्प्रेक्ष्येत्यर्थः। जिष्णुरर्जुनः विष्णुं श्रीकृष्णं ह स्फुटम् उवाच ॥ २१ ॥ तदेवाह कृष्णेत्यादिपञ्चभिः। तत्र अकाण्डे प्रादुर्भूतस्य तस्य तेजसः याथात्म्यस्य तदुपसंहारस्य चानभिज्ञोऽर्जुनस्तदुभययाथार्थ्यं विबुध्य ज्ञानसमर्थं भगवन्तं कृष्णं प्रष्टुकामो नाहमपि वेद्मीति मावोच इत्यभिप्रायेण तावद्भगवन्तं स्वाभाविकैस्तद्धर्मैः स्तौति चतुर्भिः। कृष्णेति। हे कृष्ण कृष्ण। 'कृषिर्भूवाचकः शब्दोणश्च निर्वृत्तिवाचकः' इति कृष्णशब्दनिरुक्तेः कृष्णशब्दावबोधितसर्वलोकसुखावहकत्वरूपगुणानुसंधानकृतसंभ्रमाद्द्विरुक्तिः। यद्वा। हे। कृष्ण सदानन्दात्मक हे कृष्ण स्वाश्रितदुःखकर्षणशीलेति तदर्थद्वयद्योतनाय द्विरुक्तिः। हे महाभाग महैश्वर्यसंपन्न। हे भक्तानामभयंकर। दंदह्यमानानां त्रिविधतापैरिति शेषः। जनानां संसृतेः अपवर्गः अपवर्जयिता संसाराद्विमोचक इति यावत्। त्वम् एकः एव असि। कृत्स्नजगत्सुखावहस्य तत्रापि भक्तानामभयंकरस्य संसृतिरूपमहाभयक्षपणक्षमस्य तव कियानस्मिन्नुपस्थितभयापनयने प्रयास इति भावः॥ २२ ॥

नन्वेवंविधस्त्वीश्वरो नाहमित्यत आह। त्वमिति। त्वम् एव साक्षात्प्रत्यक्षः ईश्वरः, आद्य आदौ भवः निखिलजगत्कारणत्वेनावस्थित इत्यर्थः। पुरुषः सर्वान्तरात्मतया सर्वप्रशासितृत्वेन सर्वहृदयान्तर्वर्तीत्यर्थः 'पूःसंज्ञे वै शरीरेऽस्मिन् शयनात्पुरुषो हरिः' इति निरुक्तेन सर्वान्तरात्मत्वं सर्वाधारत्वं च फलितम्। अथापि प्रकृतेः परः 'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अपरेयमितस्त्वन्यां प्रकृतिम्' इत्यादिश्लोकद्वयेनोक्तप्रकृतिद्वयाद्विलक्षणः प्रकृतिधर्मस्पर्शवर्जित इत्यर्थः। नन्वीश्वरः सर्वधारकश्चेत्तर्हि तस्य किं धारकं देहाद्विलक्षणस्यापि जीवस्य देवोऽहं मनुष्योऽहमिति देहधर्मस्पर्शदर्शनात्कथं तस्य स्वशरीरभूतप्रकृतिधर्मास्पर्शश्चेत्येवंविधशङ्कानिरासाय विशिनष्टि। चिच्छक्त्या नित्याविर्भूतापरिच्छिन्नधर्मभूतज्ञानशक्त्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शक्तिशब्दः सर्वत्र कार्योपयोग्यपृथक्सिद्धविशेषणवाची। मायां चेतनाचेतनात्मिकां प्रकृतिं व्युदस्य उपचारादत्र मायाशब्दस्य तद्धर्मपरत्वान्मायाधर्मैरस्पृष्ट इत्यर्थः। केवल एव कैवल्यः स्वार्थे ष्यञ् तस्मिन् केवले इत्यर्थः। आत्मनि स्थितः स्वे महिम्नि प्रतिष्ठित इत्युक्तरीत्या आधारान्तरानपेक्ष इत्यर्थः। जीवस्तु कर्मणा संकुचितज्ञानत्वाद्देहात्मभ्रमेण देहधर्मानात्मन्यध्यस्यति ईश्वरस्तु चिच्छक्त्या तान्व्युदस्य तत्तज्जीवान्तरात्मतया तत्तज्जीवकर्मानुरूपं फलं प्रयच्छन्नितराधार्योऽवतिष्ठते इति भावः ॥२३॥ तदेवाह। स एवेति। सः एव उक्तविध ईश्वर एव त्वं मायया मोहितं चेतो यस्य तस्य देहात्मभ्रमस्वतन्त्रात्मभ्रमसंपादिका माया तत्कार्येण संमोहितचित्तस्येत्यर्थः। जावलोकस्य धर्मादिलक्षणं धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयरूपं श्रेयः तद्विपर्ययरूपमश्रेयश्च स्वेन वीर्येण विधत्से। स्वाभाविकेनाप्रच्युतेन माहात्म्येनोपलक्षितस्त्वं तत्तत्कर्मानुगुण्येन प्रयच्छसीत्यर्थः॥ २४॥ न केवलमन्तरात्मतयैवं विधत्सेऽपि स्ववतारमुखेनापीत्यभिप्रायेणाह। तथेति। भुवः भारजिहीर्षया भुवो भारभूतान् दुष्कृतिनः संहर्तुमिच्छया इत्यर्थः। तथा अनन्यभावानामनन्यप्रयोजनभक्तियोगनिष्ठानां स्वानामात्मीयजनानाम् असकृन्मुहुर्मुहुः अनुध्यानाय च ते तव अयम् अवतारः। भवतीति शेषः। अत्र चकारत्रयमध्ये एकः समुच्चये द्वितीयोऽप्यर्थे तृतीयोऽवधारणार्थो बोध्यः॥२५॥ एवं संस्तुत्य प्रकृतं पृच्छति। किमिदमिति। हे देवदेव यत् इदम् आयाति तत् किं स्वित्। कुतः वा आयाति। प्रथमो याथात्म्यप्रश्नः। द्वितीयस्तद्धेतुप्रश्नः। नन्वहं त्वेतत्कथयिष्याम्येव त्वं तत्किं न जानासीति भगवदाशङ्कामुत्सारयन्स्वस्य तदज्ञानतामावेदयति न वेद्मीति। अहं तु सर्वतोमुखं सर्वतः प्रसर्पत् परमदारुणं तेजः आयाति इति एतावदेव वेद्मि इतरत् न एतत्केन शमिष्यतीत्यपि न जानामीति भावः॥ २६॥ इत्थं संस्तुतो विज्ञापितश्च सन्सर्वज्ञो भगवानाह। वेत्थेति द्वाभ्याम्। हे अर्जुन इदं तेजः प्राणबाधे उपस्थिते सति द्रोणपुत्रस्य कर्त्तरि षष्ठी तेन द्रोणपुत्रेणेत्यर्थो बोध्यः। प्रदर्शितं प्रयुक्तं ब्राह्मम् अस्त्रं वेत्थ जानीहि। नन्वनेन प्राणबाधे उपस्थिते प्रदर्शितमिति कुतो वावगतमित्यत्राह। असौ द्रौणिः संहारं प्रयुक्तब्रह्मास्त्रोपसंहारं न वेद न जानात्येव। यस्योपसंहारोऽभिज्ञैर्ज्ञायते तदेव तैः प्रयुज्यतेऽनेन तु तदबुद्ध्वापि प्रयुक्तमतो ज्ञायते प्राणबाधे इति॥ २७॥ तर्हि कथमिदमुपसंहर्त्तव्यमित्यत्राह। नहीति। हे अर्जुन अस्य द्रोणपुत्रप्रदर्शितस्य ब्रह्मास्त्रस्य प्रत्यवकर्षणं प्रतिभटं प्रतीकारसमर्थतया त्वेतन्निवर्त्तकमित्यर्थः। हि यतः अन्यतमं ब्रह्मास्त्रादन्यत् किंचित् अस्त्रं न हि नैव विद्यते इत्यर्थः। अतः अस्त्रज्ञः ब्रह्मास्त्रप्रयोगोपसंहाराभिज्ञस्त्वं अस्त्रतेजसा ब्रह्मास्त्रतेजसैव उन्नद्धमुद्रिक्तम् अस्त्रतेजः एतत्प्रयुक्तब्रह्मास्त्रतेजः जहि। त्वमप्येतत्प्रतिभटमन्यद्ब्रह्मास्त्रं विमुच्य तदभिभाव्य द्वयोपसंहारं कुर्वित्यर्थः॥ २८॥ श्रुत्वेति। इत्थं भगवता प्रोक्तं भगवता कथितमस्त्रोपसंहारोपायमित्यर्थः। श्रुत्वा परे शत्रवस्त एव वीरास्तान् हन्तीति परवीरहा परेषां शत्रूणां संबधिनो वीरान् हन्तीति वा। फाल्गुनोऽर्जुनः अपो जलानि स्पृष्ट्वा आचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्रह्मास्त्रं निवर्त्तयितुं ब्राह्मं तत्प्रतिभटं ब्रह्मास्त्रमेव संदधे प्रयुयोज॥ २९॥

संहत्येति। ततः उभयोर्द्वयोस्तयोरस्त्रयोः शरसंवृते शराभ्यां संवेष्टिते तेजसी अन्योऽन्यं संहत्य संगत्य रोदसी द्यावापृथिव्यौ खमाकाशं च आवृत्यावेष्ट्य अर्कवह्निवत् यथा प्रलये संकर्षणमुखाग्निरुपरिस्थितोऽर्कश्च संहत्य वर्द्धेते तद्वदित्यर्थः। ववृधाते स्मेत्यध्याहार्यम्॥ ३०॥ दृष्ट्वेति। ततः त्रीन् लोकान् प्रदहत् महत् तयोर्द्रौण्यर्जुनयोः अस्त्रतेजः तत्प्रयुक्तास्त्रतेज इत्यर्थः। दृष्ट्वा तु तेन दह्यमानाः सर्वाः प्रजाः सांवर्त्तकं प्रलयकालीनाग्निम् अमंसत मेनिरे॥ ३१॥ प्रजेति। लोकव्यतिकरं लोकोपमर्दनरूपं तं प्रत्यक्षदृश्यं प्रजोपप्लवं प्रजोपद्रवं वासुदेवस्य श्रीकृष्णस्य मतमभिप्रायं च आलक्ष्य अर्जुनः द्वयं च ब्रह्मास्त्रद्वयमपीत्यर्थः। संजहार उपसंहृतवान्॥ ३२॥ तत इति। ततः। अमर्षेण कोपेन ताम्रे रक्ते अक्षिणी नेत्रे यस्य सोऽर्जुनः आसाद्य समीपमेत्य दारुणमुग्रं गौतमीसुतं द्रोणपत्न्याः कृप्याः पुत्रमश्वत्थामानं रशनया रज्वा पशुं यथा तथा तरसा बलेन बबन्ध॥ ३३॥ शोकरोषादियुक्तस्याप्यर्जुनस्य धर्मनिष्ठाख्यापनाय श्रीकृष्णवाक्यं प्रदर्शयति। शिबिरायेति। रिपुं द्रौणिं बलात् रज्वा बध्वा शिबिराय राजनिवेशं प्रति स्कन्धावारापरपर्यायसेनानिवेशनस्थानं प्रतीत्यर्थः। निनीषन्तं नेतुमिच्छन्तं अर्जुनम् अम्बुजेक्षणः कृष्णः भगवान् प्रकुपितः सन् आह एतद्धर्मनिष्ठाप्रख्यापनायेति भावः॥ ३४॥ तदेवाह पञ्चभिः। मैनमिति। हे पार्थ ब्रह्मबन्धुं ब्राह्मणाधमं एनमश्वत्थामानं त्रातुं जीवयितुं मा अर्हसि नैव योग्योऽसीत्यर्थः। किंतु योऽसौ अश्वत्थामा निशि रात्रौ तत्रापि सुप्तान् तत्रापि अनागसो निरपराधान् तत्रापि बालकान् अवधीद्धतवान् इति हेतोः इमं जहि। अस्य वध्यत्वे हेतुत्रयमस्ति। अनागस्त्वं सुप्तत्वं बालकत्वमिति। 'अनागसं प्रसुप्तं च बालकं हन्ति यो नरः। स खण्डशो निशातव्य इत्येवं मनुरब्रवीत्' इति स्मृतेः॥ ३५॥ बालस्य सुप्तस्य च रिपोरपि वधो धर्मो नेति सूचयन्नवध्यानन्यानपि दर्शयति। मत्तमिति। धर्मवित् पुमान् मत्तं मद्यादिपानेन मदान्धम्। प्रमत्तमनवहितं विस्मृतिमन्तं वा। उन्मत्तं ग्रहवातपित्तप्रकोपादिना। सुप्तं निद्रितम्। बालं विशेषानभिज्ञम्। स्त्रियं बाल्ये तारुण्ये वार्द्धके च पराधीनवृत्तिमतीमङ्गनाम्। जडं स्वतो विवेकज्ञानशून्यम्। प्रपन्नं शरणागतम्। विरथं रथादिसाधनरहितम्। विपथमितिपाठे युद्धमार्गादपक्रान्तम्। भीतं भयोपेतम्। इत्येवंविधं रिपुं न हन्ति॥ ३६॥ स्वेति। यः अघृणो निष्कृपावान् अत एव खल इन्द्रियारामो दुरात्मा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

-या पुमान् परप्राणैः परेषामसुभिः। स्वप्राणान् प्रपुष्णाति तद्वधः तदीयव्यापादनविधानं तस्य श्रेयः श्रेयस्करम्। हि। अन्यथा यद्दोषाद्यस्मादकृतप्रायश्चित्तात्पापात् पुमान् अधः याति नरकेषु पतति। तथा च स्मरन्ति 'राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः। विधूतकल्मषा यान्ति स्वर्गं सुकृतिनो यथा' इति॥ ३७॥ प्रतिज्ञा च रक्षणीयेत्याह। प्रतिश्रुतमिति। किंच हे मानिनि यः ते तव पुत्रहा पुत्राणां हन्ता तस्य शिरः आहरिष्ये आनयिष्यामि। इति मम शृण्वतः सतः भवता पाञ्चाल्यै द्रौपद्यै प्रतिश्रुतं प्रतिज्ञानं चाप्यस्ति॥ ३८॥ तदिति। हे वीर पापः पापात्मा आततायी आत्मबन्धुहा भवत्सुतविनाशकः 'आत्मबन्धुः सुतः स्तोकः पुत्रोऽङ्गज उदाहृतः' इत्यभिधानादात्मबन्धुशब्दः पुत्रपरो बोध्योऽत्र कुलपांसनः कुलदूषकश्च। असावश्वत्थामा भर्त्तुर्दुर्योधनस्य विप्रियमप्रीतिकरम् इदं कर्म कृतवान् तत्तस्मात् वध्यताम्॥ ३९॥

एवमिति। एवमित्थं धर्मं परीक्षता धर्मपरीक्षार्थमेवं कथयतेत्यर्थः। कृष्णेन यद्यपि चोदितः संप्रेरितः तथापि महान् गुरुकृतोपकाराभिज्ञः पार्थोऽर्जुनः आत्महनं स्वसुतहन्तारमपि गुरुसुतं हन्तु न ऐच्छत्॥ ४०॥ अथेति। अथ गोविन्दः श्रीकृष्णः प्रियो विशेषप्रेमास्पदमित्ररूपः सारथिश्च यस्य सोऽर्जुनः स्वशिबिरं स्वकीयस्कन्धावारं सेनानिवेशनस्थानमिति यावत्। उपेत्यागत्य हतान्स्वशत्रुमारितान् आत्मजान् स्वपुत्रान् शोचन्त्यै प्रतिशोचन्त्यै प्रियायै द्रौपद्यै तं द्रौणिं न्यवेदयत्॥ ४१॥ तथेति। पशुवत् पशुर्यथा पाशेन बध्यते इत्यर्थः। तथा तद्वत् पाशबद्धं परितः पाशेन नद्धं सन्तम् आहृतं कर्मजुगुप्सितेन स्वार्थसन्नन्ताज्जुगुप्साशब्दाद्भावे क्तः। स्वायोग्यनिन्दितकर्माचरणाद्धेतोरित्यर्थः। अवाङ्मुखमधोवदनम् अपकृतं पुत्रहत्ययाप-कर्त्तारमपि गुरोर्द्रोणस्य सुतमश्वत्थामानं निरीक्ष्य दृष्ट्वा कृष्णा द्रौपदी वामस्वभावा मृदुस्वभावा सती कृपया हेतुना ननाम। तस्मै प्रणामान्विदधे इत्यर्थः॥ ४२॥ न केवलं नत्वा तुष्णीमभूत्किं तु वचनं चोवाचेत्याह। उवाचेति। सती साध्वी द्रौपदी अस्य गुरुसुतस्य बन्धनेनानयनं बन्धनपूर्वकमानयनमित्यर्थः। बंधनं चानयनं चेति वा। असहन्ती च असहमाना सत्येव उवाच। हे पार्थ एषः ब्राह्मणः अतः वर्णानां गुरुः तत्रापि भवतां तु नितराम्। अतः मुच्यतां मुच्यतां संभ्रमतो वीप्सा॥ ४३॥ ननु न ह्येष मद्गुरुरपि तु स्वत्पुत्रविनाशित्वादाततायी, तत्सुत इति तदभिप्रायं निराकुर्वती अतिशयितमेतद्गुरुत्वमाह द्वाभ्याम्। सरहस्य इति। हे पार्थ भवता यदनुग्रहाद्यस्य द्रोणाचार्यस्यानुग्रहतः भवता रहस्येन गोप्यमन्त्रेण सहितः सरहस्यः धनुर्वेदः विसर्गः प्रयोगश्च उपसंयम उपसंहारश्च ताभ्यां सहितः सविसर्गोपसंयमः। अस्त्रग्रामो ब्राह्माग्नेयपार्जन्याद्यस्त्रसमुदायश्च शिक्षितः अभ्यस्तः॥ ४४॥ स इति। स एष भगवान् द्रोणः प्रजारूपेण पुत्ररूपेण वर्त्तते। एतच्छब्दो द्रोणस्यैवाकारान्तरेणाव-स्थितिपरामर्षकः 'आत्मा वै पुत्र' इति श्रुतेरित्यर्थः। पुत्रविषयापकारेण पितैवापक्रियते यतो गुरुपुत्रस्य गुरुवत्पूजार्हत्वादिति भावः। ननु स तु स्वर्गं गत इत्यत्राह तस्येति। तस्य द्रोणस्य आत्मनः शरीरस्य अर्द्धमर्द्धांशरूपा पत्नी कृपी एतदाख्या वदङ्गना आस्ते यतो वीरसूर्वीरपुत्रवती अतः न अन्वगात् तदनु मरणं न कृतवती। अर्द्धमिति समांशाभिप्रायेण नपुंसकनिर्देशः। 'अर्द्धो वा एष आत्मनो यत्पत्नी' इति श्रुतेः। श्रुतौ पुंस्त्वं छान्दसम्। 'पुंस्यर्द्धोऽर्द्धं समेंऽशके' इत्यमरोक्तेः। 'जायपती अग्नि-मादधीयाताम्' इति श्रुतेश्चोभयोरेकाकारत्वावगमात्तस्यास्तदर्द्धत्वं बोध्यम्। तथा च मनुः। 'एतावानेव पुरुषो यज्जायात्मा प्रजेति ह। विप्राः प्राहुस्तथा चैतद्यो भर्त्ता सा स्मृताङ्गना' इति। एतट्टीका मन्वर्थमुक्तावली। 'एतावानिति। नैकः पुरुषो भवति, अपितु भार्या स्वदेहमपनीयापत्यानीत्येतत्परिमाण एव पुरुषः। तथा च वाजसनेयब्राह्मणम्। अर्द्धो ह वा एष आत्म-नस्तस्मात् यज्जायां न विन्दते नैतावत्प्रजायते असर्वोहि तावद्भवति, अथ यदैव जायां विन्दते अथ प्रजायते तर्हि सर्वो भवति' तथा चैतद्वेदविदो विप्रा वदन्ति 'यो भर्त्ता सैव भार्या स्मृता' इति एवं च तस्यामुत्पादितं भर्त्तुरेवापत्यं भवतीति यतश्च दंपत्यैरैक्यमत' इति। अतो गुरुपत्नीभक्त्या च मुच्यतामिति भावः॥ ४५॥ न केवलं गुरुभक्तिरेवात्र हेतुः किंत्वन्योऽ-प्यस्तीत्याह। तदिति। हे धर्मज्ञ गुरौ गुरुपुत्रेषु च नमनादिलक्षणधर्माभिज्ञेत्यर्थः। भगानां भाग्यानां समुदायो भागः महान् भागो यस्य तत्संबुद्धिर्हेमहाभाग। तत्तस्मात् अश्वत्थाम्नो दुःखे सति तन्मातुरपि दुःखं स्यात्तेन तत्कोपेनास्मत्कुलस्यापि पापं भवेद्यस्मात्तस्मादित्यर्थः। अभीक्ष्णशः पुनः पुनः पूज्यं सर्वदा वन्द्यं गौरवं कुलं भवद्भिः कृत्वा वृजिनं पापकर्मनिमित्तं दुःखं प्राप्तुं नार्हति। योग्यं न भवतीत्यर्थः॥ ४६॥ एतद्विषयादकृत्यात्कृपी नितरामहमिव दुःखिता स्यात्तत्तवानुचितमित्यभिप्रायेणाह। मारोदीदिति। मृता वत्साः पुत्राः यस्याः सा अत एव आर्त्ता अहं मुहुः अश्रुमुखी सती यथा रोदिमि तथा अस्य ब्राह्मणस्य जननी पतिरेव देवता यस्याः सा गौतमस्य दुहिता कृपी मारोदीत्। तस्मादस्मत्कुलहिताय मुच्यतामयं गुरुपुत्र इत्यर्थः॥ ४७॥

विपक्षे बाधकमाह। यैरिति। अजितः क्रोधपरवश आत्मा मनो येषां तैरजितात्मभिः यैः राजन्यैः ब्रह्मकुलं विप्रकुलं कोपितं कोपविषयीकृतम्। अत एव शुचा शोकेन अर्पितं प्रापितं सत् तत्कुलं तेषां राजन्यानां कुलं सानुबन्धं सपरिवारम् आशु प्रदहति। अत्र प्रदहनक्रियाकर्तृ ब्रह्मकुलं, कर्म तु राजन्यकुलम्॥ ४८॥ धर्म्यमिति। हे द्विजाः इत्थं धर्म्यं धर्मादनपेतं न्याय्यं न्यायात्रीतेरनपेतं सकरुणं करुणायुक्तं निर्व्यलीकमनृताप्रियतारहितम्। समं शत्रुमित्रभावशून्यम्। महदर्थतः अत्युत्कृष्टम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आशयगंभीरं वा। राज्ञ्या द्रौपद्याः वचः निशम्य राजा धर्मसुनो युधिष्ठिरः प्रत्यनन्दत प्रशशंस। अत्र धर्म्यमित्यादयः वचसः षड्गुणाः पूर्वश्लोकषट्के उक्ता द्रष्टव्याः। तत्र धर्म्यं मुच्यतां मुच्यतामिति। न्याय्यं सरहस्य इत्यादि। सकरुणं तस्यात्मनोऽर्द्धमति। निर्व्यलीकं तद्धर्मज्ञेति। समं मा रोदीदिति। महत्, यैः कोपितमिति ॥ ४९ ॥ नकुल इति। नकुलः सहदेव युयुधानः सात्यकिः धनंजयोऽर्जुनश्च भगवान् देवकीपुत्रः श्रीकृष्णः। अन्ये येऽनुजीविनस्ते च या योषितः स्त्रियश्च सर्वे ते च प्रत्यनन्दन्निति वचनविपरिणामेन पूर्वेणान्वयः ॥ ५० ॥ तत्रेति। तत्र सर्वकृतद्रौपदीवचनानुमोदनसमये इत्यर्थः। अमर्षितः संप्रकुपितो भीमः आह। तस्य सर्वथा पापकर्मवतो द्रौणेरित्यर्थः। वधो हननमेव श्रेयानुत्तमः स्मृतः स्मृतिषूक्तः। अन्यथास्य नरकपातप्रसङ्गादिति भावः। यतः योऽयं द्रौणिः भर्त्तुर्दुर्योधनस्य अर्थेऽपि न, आत्मनः अर्थे चापि न। किंतु, वृथा निष्प्रयोजनमेव सुप्तान् शिशून् अहन् जघान ॥ ४१ ॥ निशम्येति। चतुर्भुजः श्रीकृष्णः भीमगदितं द्रौपद्याश्च वचनमिति शेषः, निशम्य सख्युरर्जुनस्य वदनम् आलोक्य स्मयन्नीषद्धसन्निव इदं वक्ष्यमाणम् आह। अत्र चतुर्भुजशब्दोक्तेरयं भावः। भीमे एनं हन्तुं प्रवृत्ते, द्रौपद्यां च सहसा तन्निवारणे प्रवृत्तायाम्, उभयोः संवारणाविष्कृतभुजचतुष्टय इति ॥ ५२ ॥ तदेवाह। ब्रह्मबन्धुरिति द्वाभ्याम्। ब्रह्मबन्धुः कर्मभिरवरतां प्राप्तोऽपि ब्राह्मणजातीयो जन इत्यर्थः। न हन्तव्यः। ब्रह्मबन्धुत्वादयं न हन्तव्य इति हेतुगर्भम्। 'आततायी वधार्हणः, आततायित्वादयं वधमर्हतीत्यपि हेतुगर्भम्। उभयं हननाहननमित्युभयमपीत्यर्थः। मयैव आम्नातमभिहितम्। अतः अनुशासनं मदनुशासनं परिपाहि परिपालय। 'न जातु ब्राह्मणं हन्यात्'। 'आततायिनमायान्तं हन्यादेवाविचारयन्' इत्यादिकमुभयविधमदायमेवानुशासनमस्ति तदुभयं यथा पालितं स्यात्तथा कुर्वित्यर्थः ॥ ५३ ॥ तत्रान्यतरकरणेऽन्यदकृतं स्यात्तत्त्रानुचितमित्यभिप्रायेणाह। कुर्विति। हे अर्जुन प्रियां द्रौपदीं सान्त्वयता त्वया यत् प्रतिश्रुतं प्रतिज्ञातं शिरश्छिन्द्यामिति तदपि सत्यं यथार्थं कुरु। तथा भीमसेनस्य च, द्रौपद्याः पाञ्चाल्याः, मह्यमेव मम चापि, प्रियं कुरु। तत्र वधे भीमस्य प्रियं भवति। अवधे द्रौपद्याः प्रियं भवति। द्वये मम ततस्तथा कुरु येन कृतेन सर्वसामञ्जस्यं स्यादिति भावः ॥५४॥ अर्जुन इति। ततः अर्जुनः इत्थं भगवता संप्रेरितः पार्थः सहसा झटिति हरेः श्रीकृष्णस्य हार्दं हृद्गताभिप्रायम् आज्ञाय ज्ञात्वा अथ असिना क्षुरधारेण खड्गेन द्विजस्य द्रौणेः मूर्द्धन्यं मूर्ध्नि धारितं मूर्द्धा सहोत्पन्नमित्यर्थः। मणिं, सहमूर्द्धजं मूर्द्धजैः केशैः सह यथा भवति तथा जहार हृतवान् ॥ ५५ ॥ विमुच्येति। ततः रशनाबद्धं रज्ज्वा संबद्धं विमुच्य बन्धनरज्जुमपसार्येत्यर्थः। बालानां हत्यया हता प्रभा यस्य तम्। तेजसा तेजःप्रदेन मणिना च हीनं रहितम्। अथवा तेजसा सामर्थ्येन शरीरकान्त्या वा। मणिना रत्नेन च हीनम्। एवमलक्ष्मीनिधानमतिहतप्रभं चेत्यर्थः। शिबिरात् निरयापयत् निःसारयामास ॥ ५६ ॥

नन्वेवमपि स्वप्रतिश्रुतं भीमगदितं च न कृतमेवेत्याशङ्कमानं शौनकं प्रति, ब्रह्मबन्धूनां प्राणत्यागलक्षणमरणप्रतिनिधिरयं वध इत्याह सूतः। वपनमिति। हे शौनक, वपनं सश्मश्रुकेशमुण्डनम्। द्रविणादानं हिरण्यादिधनापहरणम्। तथा स्थानात् निर्यापणं स्वदेशान्निष्कासनं च ब्रह्मबन्धूनां एष एव वधः वधप्रतिनिधिः। अन्यः दैहिकः शिरः पाण्यादिच्छेदरूपः न अस्ति। तत्रैतत्त्रयमपि कृतमेव ततोऽस्य वधोऽकृतोऽपि कृतप्राय एवेति भावः ॥ ५७ ॥ पुत्रेति। ततः सर्वे पाण्डवा युधिष्ठिरादयः कृष्णया द्रौपद्या सह पुत्रशोकातुराः सुतशोकपीडिताः सन्तः मृतानां स्वानां पुत्रबन्धूनां यत् कृत्यं निर्हरणादिकं दाहार्थनयनादिकं तत् चक्रुः। केचिदिमं श्लोकमग्रिमाध्यायारम्भे एव योजयन्ति ॥ ५८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथाऽष्टमोऽध्यायः

सूत उवाच

अथ ते संपरेतानां स्वानामुदकमिच्छताम् । दातुं सकृष्णा गङ्गायां पुरस्कृत्य ययुः स्त्रियः ॥ १ ॥

परीक्षिद्रक्षणं क्रुद्धद्रौणेरस्त्रात्प्रकीर्त्यते । कुन्त्या कृताष्टमे कृष्णस्तुतिः शोकश्च भूभुजः ॥ १ ॥

अथेति । अथानन्तरं ते पाण्डवाः संपरेतानां प्राणवियोग प्राप्तानाम् उदकं तिलोदकम् एतच्छ्राद्धादीनामप्युपलक्षणम् । इच्छतां प्रेतरूपेण कामयमानानां स्वानां स्वबन्धूनां दातुमुदकप्रदानं कर्त्तुं स्त्रिया द्रौपद्यादिस्त्रीः पुरस्कृत्य एतस्मिन्कार्ये स्त्रीपुरःसरत्वविधानात । सकृष्णाः श्रीकृष्णेन सहिताः गङ्गायां ययुः ॥ १ ॥ ते इति । तत्र ते सर्वे पाण्डवादयः पुनः वारंवारं भृशं विलप्य परिदेवनलक्षणं रोदनं कृत्वा उदकं निनीय तिलोदकं दत्त्वा च हरेः श्रीकृष्णस्य पादाब्जयोः रजसा पूता या सरित्तस्या जलं तस्मिन् आप्लुताः । आप्लुत्य विशुद्धा बभूवुरित्यर्थः । पुनरित्यस्याऽऽप्लुता इत्यनेनान्वयविधाने पुनरित्युक्त्या पूर्वमपि स्नाता इति बोध्यम् ॥ २ ॥ तत्रेति । तत्र गङ्गातीरे आसीनमुपविष्टं सहानुजमनुजैर्भीमादिभिः सहितं कुरुपतिं युधिष्ठिरं धृतराष्ट्रं च पुत्रशोकार्त्तां गान्धारीं कृष्णां द्रौपदीं पृथां कुन्तीं च माधवः श्रीकृष्णः सान्त्वयामासेत्युत्तरेणान्वयः । पुत्रशोकार्त्तामिति गान्धार्यादिभिस्तिसृभिरन्वेतव्यम् । केचित्तु सहानुजं संजयेन सह वर्त्तमानं कुरुपतिं धृतराष्ट्रमित्यर्थं कुर्वंति तदा सहानुजशब्दः पाण्डुसुतधर्मराजादीनामप्युपलक्षणम् , तेषामपि शोकार्त्तत्वेनात्र सान्त्वनीयत्वात् । न च विदुरपरः, तस्य पूर्वमेव धृतराष्ट्रेण निर्यापितत्वात् यादवक्षयानन्तरमागामिनस्तस्य तदा अवस्थानासंभवात् ॥ ३ ॥ सान्त्वयामासेति । हता बन्धवो येषां तान् अत एव शुचा शोकेन अर्पितानर्दितान् युधिष्ठिरादीन्, न विद्यते प्रतिक्रिया प्रत्युपायो यस्यास्ताम् । भूतेषु कालस्य गतिं जन्ममरणाद्यापादनरूपां स्थितिं दर्शयन् मुनिभिः सह माधवः सान्त्वयामासेत्यनुषञ्जनीयम् ॥ ४ ॥ ततश्चाजातशत्रोः सकलेष्टं साधितवानित्याह द्वाभ्याम् । साधयित्वेति । कितवैर्धूर्तैर्दुर्योधनादिभिः हृतम् । अजातशत्रोर्युधिष्ठिरस्य स्वमात्मीयं राज्यं साधयित्वा कचस्पर्शेन द्रौपद्याः केशपाशग्रहणेनैव क्षतं क्षीणमायुर्येषां तान् असतः दुष्टान् दुःशासनादीन् राज्ञोऽन्यान्नृपांश्च घातयित्वा अर्जुनादिभिरिति शेषः ॥ ५ ॥ याजयित्वेत्यादिभाविकथासंक्षेपः । याजयित्वेति । तं युधिष्ठिरं त्रिभिः उत्तमकल्पकैरुत्तमपक्षोपेतैरश्वमेधैः याजयित्वा शतमन्योः शतक्रतोरिव दिक्षु पावनं तद्यशो युधिष्ठिरस्य कीर्त्तिम् अतनोद्विस्तारयामास । उभयोरेकसंबन्धः ॥ ६ ॥ आमन्त्र्येति । ततः पाण्डुपुत्रान् युधिष्ठिरादीन् च शब्दादन्यानपि आमन्त्र्यापृच्छ्य, शैनेयः शिनेर्नप्ता सात्यकिश्च उद्धवो देवभागसुतश्च ताभ्यां संयुतः । पूजितैरात्मना कृतपूजनैः द्वैपायनो व्यास आदिर्येषां तैः विप्रैर्ब्राह्मणैः प्रतिपूजितः ॥ ७ ॥ गन्तुमिति । हे ब्रह्मन् शौनक । द्वारिकां प्रति गन्तुं कृतमतिः कृष्णः रथम् आस्थितोऽधिष्ठितः सन् तदा अभिधावन्तीं स्वसन्मुखं धावमानां भयविह्वलां भयेन विवशाम् उत्तरामभिमन्युपत्नीम् । इत्थं विज्ञापयन्तीमिति शेषः । उपलेभे पश्चि ददर्शेत्यर्थः ॥ ८ ॥

विज्ञापनमेवाह । पाहीति द्वाभ्याम् । हे देवदेव देवानामपि देववत्पूज्य । हे जगत्पते निखिलजगन्नातः हे महायोगिन् सूक्ष्मार्थदर्शिन् पाहि पाहि न विद्यते भयं यस्मात्तथाभूतं त्वत् त्वत्तः अन्यं न पश्ये । अदर्शने हेतुं वदन्ती अन्यान्विशिनष्टि । यत्र येषु त्वद्व्यतिरिक्तेषु परस्परं मृत्युः मृत्युग्रस्ता इत्यर्थः । न हि स्वयं मृत्युवश्योऽन्यं मृत्योस्त्रातुं प्रभुरिति भावः । पश्ये इति स्वस्याभिमतप्रकाशनायात्मनेपदप्रयोगः ॥ ९ ॥ ननु किं तव भयमुपस्थितं यस्मात्त्वं मया रक्षणीया इत्यत्राह । अभिद्रवतीति । हे ईश हे विभो तप्तश्चासावायसोऽयसो विकाररूपः । यद्वा । तप्तमायसं लोहमयं शल्यं यस्य सः शरः माम् अभिद्रवति मदभिमुखमागच्छतीत्यर्थः । अतः हे नाथ स शरः मां कामं यथेष्टं दहतु । मम गर्भः मा निपात्यताम् । यथा मद्गर्भपातो न भवेत्तथाऽनुगृहाणेत्यर्थः ॥ १० ॥ उपधार्येति । भक्तवत्सलः । भगवान् तस्या उत्तरायाः वचः अतिदीनतोपेतां वाचम् उपधार्याकर्ण्य इदमवनिमण्डलं पाण्डुपुत्ररहितं कर्त्तुं मुक्तं द्रौणेः स्वपराभवेनातिकुपितस्याश्वत्थाम्नः अस्त्रं तत्प्रयुक्तं ब्रह्मास्त्रमित्यर्थः । अबध्यत अध्यवस्यत् ॥ ११ ॥ अत एव बहुमुखं तदागतमित्याह । तर्हीति । हे मुनिश्रेष्ठ अथानन्तरं तर्ह्येव तदानीमेव पाण्डवा युधिष्ठिरादयः आत्मनः अभिमुखान् दीप्तान् ज्वलितान् पञ्च सायकानन्तकराम्बाणान् आलक्ष्य समीक्ष्य सद्यः अस्त्राणि उपाददुर्जगृहुः । 'षोऽन्तकर्मणि' इति धातोः स्यन्ति अन्तं कुर्वन्तीति सायकाः ण्वुल् अकादेशः युगागमश्च ॥ १२ ॥ व्यसनमिति । तदा न अन्यविषय आत्मा येषां तेषाम् । अन्येषु भगवद्वार्त्तारहितेषु विषयेषु शब्दादिषु आत्मा मनो येषां तथाविधा न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवन्तीत्यनन्यविषयात्मानस्तेषां वा। तेषां पाण्डवानां तद्ब्रह्मास्त्रान्तरैरनिवर्त्यत्वाद्दुष्परिहारतया प्रसिद्धं व्यसनं दुःखं वीक्ष्य अवलोक्य विभुः सर्वथा समर्थः श्रीकृष्णः सुदर्शनेन सद्यो ब्रह्मास्त्रपराभावुकतयान्वर्थशोभनदर्शननामवता स्वास्त्रेण स्वानां पाण्डवानां रक्षां व्यधादकरोत्। तैः सद्यस्तदनिवार्यत्वात्स्वसुदर्शनेन तान्सायकान्निरस्य पाण्डवान् ररक्षेत्यर्थः॥ १३॥

अन्तःस्थ इति। ततः सर्वभूतानाम् अन्तःस्थः सर्वान्तरात्मतयावस्थितः। आत्मा अन्तः प्रविश्य धारकः। योगेश्वरः निरतिशयसूक्ष्मार्थदर्शी उत्तरागर्भप्रविष्टब्रह्मास्त्रदर्शीति भावः। हरिः स्वाश्रितापद्धर्त्ता कृष्णः कुरुतन्तवे कुरूणां संतत्यविच्छेदाय कुरुवंशविस्तारं कर्तुमित्यर्थः। पाण्डवानामपि कुरुवंशजत्वादेवमुक्तम्। वैराट्या विराटपुत्र्या उत्तरायाः गर्भं स्वमायया स्वकीययोगसामर्थ्येन आवृणोत्। यथा ब्रह्मास्त्रं तं न दहेत्तथा गूहितमकरोदित्यर्थः। स्वयोगशक्त्या यदन्तः प्रविश्य तद्गर्भमासाद्य सुदर्शनास्त्रेण ब्रह्मास्त्रतेजश्छिच्छेदेति भावः॥ १४॥ कथमप्रतिभटं ब्रह्मास्त्रं सुदर्शनेनापि निरस्तमिति शौनकाभिप्रायं विबुध्य तत्प्रतिवक्ति। यद्यपीति। ब्रह्मशिरः अस्त्रं ब्रह्मास्त्रमित्यर्थः। यद्यपि अप्रतिक्रियं केनाप्यनिवार्यं प्रतिकार-रहितमित्यर्थः। अत एव अमोघमव्यर्थं च भवति तथापि हे भृगूद्वह शौनक, वैष्णवं विष्णोः संबन्धि तेजः तेजोरूपं सुदर्शनम् आसाद्य तु समशाम्यत्। ब्रह्मास्त्रं सुदर्शनास्त्रेतरास्त्राप्रतिक्रियं, सुदर्शनं तु सर्वास्त्राप्रतिक्रियमिति भावः॥ १५॥ अत्र न विस्मयः कार्य इत्याह। मेति। सर्वाश्चर्यमये सर्वाश्चर्यस्वरूपे आश्चर्यशक्तिप्रचुरे इति वा। अच्युते स्वाश्रितास्त्रभूषणगुण-विभूत्यादीन्न च्यावयति न विहृतान्करोतीत्यच्युतस्तथाभूते। विनाशरहिते इति वा। एतत्सुदर्शनेन ब्रह्मास्त्रनिरसनम् आश्चर्यं मा अमंस्थाः न मन्यस्वेत्यर्थः। हि। सर्वाश्चर्यमयत्वमेव व्यञ्जयितुं विशिनष्टि। यो भगवान् अजः स्वयं कर्मायत्तोत्पत्त्यादि-षड्भावविकाररहितः सन् इदं चिदचिदात्मकं कृत्स्नं जगत् देव्या देवस्य स्वस्य संबन्धिन्या मायात्मकाश्चर्यशक्त्या। 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति श्रुतेः। दीप्यमानया स्वेच्छया वा सृजति, अवति, हन्ति च। कृत्स्नजगत्सृष्टिस्थितिलयलीलस्य सुदर्शनेन ब्रह्मास्त्रनिरसनमेतत्कियदिति नाश्चर्यं कार्यमित्यर्थः॥ १६॥ ब्रह्मेति। ब्रह्मतेजसा ब्रह्मास्त्रेण विनिर्मुक्तास्तैः आत्म-जैर्युधिष्ठिरादिभिः कृष्णया द्रौपद्या च सह सती साध्वी पृथा कुन्ती प्रयाणाभिमुखं कृष्णम् इदं वक्ष्यमाणम् आह॥ १७॥

तदेवाह। नमस्ये इत्यादिषड्विंशत्या श्लोकैः। तत्र प्रयाणाभिमुखं श्रीकृष्णमवलोक्य तद्वियोगमसहमाना तं प्रयाणतो निवर्त्तयितुं लौकिकोऽपि कश्चिद्गुणाढ्यः पुमानेवंविधसकलराजविनाशजातसर्ववैरितावसरे स्वाश्रितान्विहातुं नोत्सहते तर्हि परमकारुणिकस्य सर्वान्तरात्मनोऽचिन्त्यविविधविचित्रानन्तशक्तेः स्वेच्छास्वीकृताश्चर्यरूपदिव्यतनोराश्रितवात्सल्यजलनिधेरा-श्रितार्त्तिहरस्य निरतिशयसुखरूपस्य योगपरिशुद्धमनसैव गोचरस्याविज्ञातचिकीर्षितस्य सर्वशरीरकस्य सर्वसुहृदोऽचिन्त्यविविध-विचित्रचेष्टितस्यावितर्क्यावतारस्य तव पदाम्बुजमन्तरेण नास्माकमन्यच्छरणमस्त्यतः कथमनन्यात्मनोऽस्मान्विहाय गन्तुमुद्युङ्क्ते इति विज्ञापयति। तत्र तावल्लौकिकपुरुषवैजात्यज्ञापनायानितरसाधारणैर्धर्मैर्विशिष्टं नमस्करोति। आद्यं सर्वजगत्कारणम्। प्रकृतेः परं पुरुषम् ईश्वरम्। अलक्ष्यं प्रकृतेः परत्वान्न लक्ष्याहम्। सर्वभूतानां ब्रह्मादिस्थावरान्तानाम् अन्तः बहिश्च अवस्थितम्। अन्तर्बहिश्च व्याप्य नियन्तृतयावस्थितमित्यर्थः। त्वा त्वां नमस्ये नमस्करोमि। नमस्कारेण पूजयामीत्यर्थः। अत्र प्रकृतेः पर इत्यनेन सांख्याभिमतः पुरुषः प्राप्तः ततो व्यावृत्त्यर्थमीश्वर इत्युक्तम्। ईश्वरत्वं च ब्रह्मादिसाधारणं तद्व्यावृत्त्यर्थं सर्वभूता-नामन्तर्बहिश्चावस्थितमित्युक्तम्। अनेन च 'यच्चकिंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इति श्रुतिरुपबृंहिता भवति। नमस्ये इत्यत्र नमः शब्दात् 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इत्यतः करण इत्यनु-वर्त्तमाने 'नमोवरिवश्चित्रङः क्यच्' इति करोत्यर्थे क्यचि परस्मैपदप्राप्तावात्मनेपदमार्षम्॥ १८॥ मायेति। पूर्वमलक्ष्यमित्युक्तं तत्र हेतुः। मायैव जवनिका तिरस्करिणी तयाच्छन्नं तिरोहितम्। जवनिका यथान्तःस्थं तिरोधत्ते तद्वज्जीवाज्ञानरूपया मायया इन्द्रियाणामविषयभूतमित्यर्थः। ननु तर्हि किं सर्वेषामिन्द्रियाविषयं नेत्याह। अज्ञानां भगवदनुपासकानामधोऽ-धोगच्छन्त्यः परावृत्य व्रजन्त्य इति यावत्, अक्षजा इन्द्रियवृत्तयो यस्मात्तं। भगवदऽभक्तेन्द्रियवृत्त्यविषयमित्यर्थः। तत्र हेतुः। अव्ययेति। विविधविकारं गच्छतीति व्ययः न व्ययोऽव्ययस्तम्। यो विविधविकारभाक् स एव अज्ञाक्षजविषयः। अयं त्वऽतथा-त्वादऽज्ञाधोऽक्षज इत्यर्थः। अनेन योगविशुद्धमनसामेव गोचरो नान्येषामिति सूचितम्। तथा च श्रूयते। 'न चक्षुषा पश्यति कश्चनैनम्' इति। 'न मांसचक्षुरभिवीक्षते तम्' इति। 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मदर्शिभिः' इति। 'हृदा मनीषा मनसा-भिक्लृप्ता य एनं विदुः' इत्यादि। अत एवंभूतं त्वां योगानभिज्ञत्वात्केवलं नमस्करोमीति संबन्धः। नन्वहं तु सर्वेषां दृश्य एव भवामि किमेवं ब्रूषे तत्राह। मूढदृशा नटयाथात्म्यमविजानता पुंसा नाट्यधरः नटः यथा न लक्ष्यते तथा त्वं न लक्ष्यसे। नटयाथात्म्यमविजानता पुंसा नाट्यधरो नटो यथाऽयमेवंविध इति न ज्ञायते किंतु नाट्योपयुक्तवेषविशिष्टतया एव दृश्यते तद्वत्त्वमपीत्यर्थः। अनेनाज्ञाधोऽक्षज इत्यनेन च योगपरिशुद्धमनसा ग्राह्यत्वमऽपरिशुद्धमनोऽग्राह्यत्वं चोपपादितमिति भावः॥ १९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं परिशुद्धमनोग्राह्यत्वं वदन्त्यो योगानधिकारिण्योऽपरिशुद्धमनसः स्त्रियो वयं त्वां कथं जानीम इत्याह । तथेति । तथा तथाहीत्यर्थः । मुनीनां सदा त्वत्स्वरूपमननशीलानाम् अमलात्मनां विशुद्धमनसां परमहंसानां भक्तियोगविधानार्थं आत्मारामानपि अचिन्त्यनिजगुणैराकृष्य भक्तियोगं कारयितुमवतीर्णमित्यर्थः । त्वां स्त्रियः वयं कथं पश्येमहि यथार्थतया जानीमहि ॥ २० ॥ हन्त स्त्रीणां यदि ज्ञानभक्त्योरेवमशक्यत्वं तर्हि तासां स्त्रीणां भगवदुपासनाऽभावेन च मोक्षाभावः प्राप्त इत्याशङ्क्य तत्स्तुतिरेव तद्द्वयजनकद्वारा मोक्षसाधिकेति समभिप्रेत्य स्तौति । कृष्णेति । कृषति विलिखिति दारयति मोह-पटलमिति कृष्णस्तस्मै । नीलोत्पलदलश्यामायेति वा । वसुदेव आनकदुन्दुभिस्तस्य पुत्रो वासुदेवस्तस्मै । देवक्या नन्दनः पुत्र-स्तस्मै । नन्दश्चासौ गोपश्च तस्य नामैकदेशे नाभाकादिवन्नाममात्रस्यापि ग्रहणौचित्यात्कुं कुत्सां मारयति विनाशयतीति नन्द-गोपकुमारस्तस्मै । यद्वा । नन्दगोपनाम्नो राज्ञः कुं कुष्टं मारयतीति तस्मै । गवा वेदेन विन्दते लभ्यत इति । वराहरूपेण भूम्युद्धरणात्कामधेनोरैश्वर्यप्राप्तेरिन्द्रेण स्वर्गनिवेदनान्मत्स्यरूपेण वेदाहरणतो गां, भुवं, धेनुं, स्वर्गं, वेदं वाऽविददिति वा तस्मै गोविन्दाय नमः ॥ २१ ॥ नम इति । पङ्कजं नाभौ यस्य तस्मै नमः पङ्कजानां माला विद्यतेऽस्येति तस्मै नमः । पङ्कजवन्नेत्रे यस्य तस्मै कमलदलायतलोचनायेत्यर्थः । नमः । पङ्कजाङ्किताबङ्घ्री यस्य तस्मै ते तुभ्यं नमः ॥ २२ ॥

तत्कृतोपकाराननुस्मरति । यथेति द्वाभ्याम् । हे हृषीकेश इन्द्रियगणनाथ खलेन दुरात्मना कंसेन 'कसि हिंसायाम्' इत्यनुशासनाद्धिसाशीलतयान्वर्थनाम्नेत्यर्थः । अतिचिरं रुद्धा कारागृहे स्थापिता शुचा शोकेन अर्पिता शोकं प्रापितेत्यर्थः । देवकी त्वया यथा विमोचिता हे विभो सर्वशक्ते तथा अहं चाहमपि सहात्मजा सपुत्रा नाथेन त्वयैव विपदां गणात् मुहुः विमोचिता । किं नैव, किं तु, मातृतोऽहमधिकतया रक्षितास्मीत्यर्थः । तद्यथा । सा देवकी त्वतिचिरं रुद्धा सती तथा शुचाऽर्पिता सती तस्मादेव सकृद्विमोचिता । न च तस्याः पुत्रा रक्षिताः । अस्ति चान्यो नाथस्तस्याः । अहं तु विपद्गणात्तत्रापि मुहुः मुहुः शीघ्रं च सात्मजा च नाथेन त्वयैव विमोचिता अतः मातृतस्तव मय्यधिका प्रीतिरस्तीति प्रतिभाति । अनेन भगवतः स्वार्थनिरपेक्षपर दुःखनिराचिकीर्षारूपं कृपालुत्वमाश्रिताऽनिष्टपरिहर्तृत्वं निम्नोन्नतानादरेणाश्रितमात्रपक्षपातित्वं च प्रदर्शितमिति फलितम् ॥२३॥ कोऽसौ विपद्गणः यस्मात्त्वं विमोचितेत्यत्राह । विषादिति । हे हरे वयं विषात् भीमाय दत्तात्कालकूटगरलात् । महाग्नेः जतुगृह-दाहप्रयुक्तप्रकृष्टवह्नेः । पुरुषादा हिडिम्बादयो राक्षसास्तेषां दर्शनात् । पाठान्तरे हिडिम्बबककिर्मीरादीनां भक्षणादित्यर्थः । असतां दुर्योधनादीनां द्रौपदीकेशग्रहणादिनिन्दितकर्मणां सभाया द्यूतस्थानात् । वनवासकृच्छ्रतो वननिवासजातसंकटात् । मृधे मृधे रणे रणे अनेकेषां महारथानामस्त्राणि नागाग्नेयपार्जन्यादीनि महास्त्राणि तेभ्य इति ततः । तथा द्रौण्यस्त्रतोऽश्वत्थाम्नो ब्रह्मास्त्राच्च त्वया अभिरक्षिताः आस्म अभवाम । तस्मादहमद्य त्वां शरणं गतास्मीति वाक्यशेषः ॥ २४ ॥ भगवत्स्मरणविरोधि-संपत्परंपरायाः सकाशात् विपत्परंपरैव श्रेयसी भगवद्दर्शनहेतुत्वादतः विपद एवास्माकं सन्त्विति विज्ञापयति । विपद इति । हे जगद्गुरो नोऽस्माकं तत्र तत्र तेषु तेषु सांसारिकव्यापारेष्वित्यर्थः । शश्वन्निरन्तरं विपदो विशिष्टा आपदः सन्तु । यद्यासु यासु विपत्स्वित्यर्थः । अपुनर्भवं मोक्षं दर्शयतीत्यपुनर्भवदर्शनं भवतः दर्शनं स्यात् । अस्यायं भावः । यद्यापत्सु सकलापन्मूलसंसृतिपरि-हारक्षमं भवतो दर्शनं स्यात्तदा तु नः सर्वदा ता विपद एव भवन्तु नाम । अन्यथा तु तन्निवृत्तिरेव स्तादिति ॥ २५ ॥

नन्वहमीश्वर एव त्वां चेत्तर्हि त्वमिव स्वैरेऽपि मामेवंविधं किं न वदन्तीत्यत आह । जन्मेति । जन्म सत्कुलप्रभवश्च, ऐश्वर्यं धन च, श्रुतं विद्या च, श्रीः राज्यसमृद्धिश्च ताभिरेधमानो वर्द्धिष्णुर्मदो यस्य सः एवंविधः पुमान् । नास्ति किंचन येषां तेऽकिंचना निष्कामास्तेषां गोचरो विषयस्तं त्वाम् अभिधातुं परमेश्वरोऽयमेवास्तीति कथितुं नैवार्हति वै । त्रिमदोन्मत्तत्वेन भाषणयाथात्म्यविवेकाभावादिति भावः ॥ २६ ॥ प्रस्तुतभूतस्वमनोरथपूरणाय प्रणमति । नम इति । श्रीकृष्ण त्वत्तोऽन्यत्किंचन उपादेयं न विद्यते येषां तेऽकिंचना ऐकान्तिकभक्तास्त एव वित्तं सर्वस्वं यस्य तस्मै । यद्वा । विद्यते लभ्यते इति वित्तो लाभः । अकिंचनानां वित्तो लाभरूपः । यद्वा । अकिंचनैर्वित्तो ज्ञातस्तस्मै । वित्तस्य नपुंसकत्वेऽकिंचनानां परमधनरूपायेत्यर्थः । निवृत्ता धर्मार्थकामविषया गुणवृत्तया यस्मात् । यद्वा । निवृत्ता गुणानां रजआदीनां वृत्तयः कामक्रोधादयो यस्य । यद्वा । निवृत्ता गुणवृत्तयो जाग्रदाद्यवस्थारूपा यस्मात् । यद्वा । निरन्तरं वृत्ता ज्ञानादिगुणानां वृत्तिः स्थितिर्यस्मिंस्तस्मै नमः । आत्मन्यारमति क्रीडते इत्यात्मारामः स्वानुभवैकपरस्तस्मै । यद्वा । आत्मनां स्वात्मवत्प्रेष्ठानां स्वैकान्तिकभक्तानामारामः क्रीडार्थकोपवन-रूपस्तस्मै । शान्ताय ऊर्मिषट्करहिताय अशनापिपासाशोकमोहजरामृत्यवः षडूर्मयः । कैवल्यं प्रकृतिसंबन्धराहित्यं मोक्षः इति यावत्, तस्य पतिर्मोक्षप्रदस्तस्मै नमः ॥ २७ ॥ ननु ब्रह्मरुद्राद्यन्तर्यामः कश्चित्त्वदुक्तविधः स्यान्न त्वहं ततो देवकीपुत्रं मां कथमेवं स्तौषीत्यत्राह । मन्ये इति । हे कृष्ण त्वाम् ईशानं ब्रह्मादीनपि स्ववशीकुर्वाणम् अनादिनिधनमाद्यन्तशून्यं विभुं प्रभुं सर्वत्र समं यथा भवति तथा चरन्तम् । सर्वाणि भूतानि यथाकर्म समं यथा तथा कालयन्तमित्यर्थः । ननु पार्थसारथेर्मम कथं साम्यं तत्राह । यत् यस्मात्कालान्निमित्तभूतात् भूतानां मिथः परस्परं कलिः कलहः भवति तथाविधं कालं मन्ये । कालशरीरित्वात्तत्तत्कर्मानु-सारेण सुखदुःखादींस्तांस्ताननुभावयतस्तव न वैषम्यनैर्घृण्यादिकमस्तीत्येवंविधमहिमस्त्वम् , न देवकीपुत्र इति भावः ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समं चरन्तमित्येतद्विवेचयन्पार्थसारथितया प्रतीयमानं निग्रहानुग्रहजं वैषम्यं त्वयि नैवास्तीत्याह। वेदेति। हे भगवन् नृणां मनुष्याणां विडम्बनमनुकारम् ईहमानस्य कुर्वाणस्य तव चिकीर्षितं कर्त्तुमिष्टं कश्चित् कोऽपि न वेद न जानाति। अर्जुनोऽनुग्राह्यः दुर्योधनो द्वेष्य इति न वैषम्यादिकमस्ति त्वयि। यतः पूतनायमलार्जुनकंसादिविषयनिग्रहस्याऽप्यन्ततस्तेषां निरतिशयपुरुषार्थरूपमुक्तिहेतुत्वदर्शनादिति भावः। यत् एवमत एव त्वयि वैषम्यादिरहिते तदापादयतां नृणां मतिरेव विषमेत्याह न। यस्येति। यस्य तव कर्हिचिदपि कश्चिदपि दयितः द्वेष्यश्च न अस्ति। किं तु यस्मिंस्त्वयि नृणां मतिरेव विषमा अस्ति त्वयि स्वतो विषममतिर्नास्ति। किं तु, नृभिः स्वात्मनि वर्त्तमाना सा त्वयि कल्प्यते इत्यर्थः। नृणां विडम्बनमीहमानस्येत्यनेन तव नरचेष्टानुकारमात्रमेव, न तु सर्वथा तत्सजातीयमेव चेष्टितं 'जन्म कर्म च मे दिव्यम्' इति त्वयैवोक्तत्वादित्यपि सूचितमेव ॥ २९ ॥ विडम्बनमेवान्यथानुपपत्त्या द्रढयति। जन्मेति। हे विश्वात्मन् कृष्ण अजस्य जन्मरहितस्य कर्मायत्तोत्पत्तिरहितस्येत्यर्थः। अकर्त्तुः प्राचीनकर्मानुरूपप्रवृत्तबुद्ध्यधीनकर्मसहितजीववत्कर्माऽनाचरतः। आत्मनः सर्वान्तरात्मनः तव तिर्यञ्चश्च नरश्च ऋषयश्च तेषु यादस्सु च जन्म कर्म तत्सजातीया चेष्टा च इति यत् तत् अत्यन्तं विडम्बनमत्यन्तानुकरणमात्रमेव। अन्यथाऽजस्याकर्त्तुरात्मनश्च तन्न घटत एवेति भावः। तत्र तिर्यक्षु वराहादिरूपेण, नृषु राघवादिरूपेण, ऋषिषु वामनादिरूपेण, यादस्सु मत्स्यादिरूपेण जन्म बोध्यम्। कर्म च घ्राणपूर्वं पृथ्व्यन्वेषणादि एकपत्नीव्रतधरत्वादि निःस्पृहत्वद्योतनादि स्वजातितो भयप्रदर्शनादि चापि बोध्यम् ॥ ३० ॥

एतद्विडम्बनमात्रं न चेद्विदुषामपि मोहजनकमिदमतिविडम्बनं न घटेतेत्यभिप्रायेणाह। गोपीति। हे कृष्ण त्वयि, कृतम् आगो मन्थनीभञ्जननवनीतापहरणरूपोऽपराधो येन तथाभूते सति। गोपी यशोदा दाम आददे। नित्यमुक्तमपि त्वां बद्धुं यदा रज्जुं परिजग्राहेत्यर्थः। तावत् तदा अश्रुभिः कलिलं कलुषितमञ्जनं ययोस्तथाभूते संभ्रमे भयसूचकाटोपयुक्ते अक्षिणी यस्य तत्। यद्वा। अश्रुभिः कलिलं व्यामिश्रम् अञ्जनं ययोस्ते च ते संभ्रमे व्याकुले अक्षिणी यस्मिंस्तद्यथा तथा वक्त्रं मुखं निनीय अधः कृत्वा, भयस्य मां ताडयिष्यतीति भीतेः भावना तया भयाभिनयावधानेन स्थितस्य यद्यतस्त्वत्तः भीः सर्वजनभयहेतुर्मृत्युरपि बिभेति। तस्य ते तव या दशा अवस्था अभवत् सा दशा मां विमोहयति। तस्मात्तवैतत्सर्वं चेष्टितं विदुषामप्यतीव मोहजनकमस्तीति भावः ॥ ३१ ॥ प्रथमेऽध्याये शौनककृतषट्प्रश्नेषु पञ्चमे प्रश्ने 'कृतवान्किल वीर्याणि, इति यदुक्तं तत्प्रश्नोत्तरं कुर्वन्सूतः कुन्तीमुखेन यतो विडम्बनमात्रं ते नूनाख्यमतोऽतात्त्विकं ततः देवक्यां तव जन्मानुकरणं यत्तन्निमित्तं विद्वांसोऽनेकधा वदन्तीति विज्ञापयति चतुर्भिः। केचिदिति। केचित्त्वदवतारप्रयोजननिर्णयं कर्त्तुं प्रवृत्तानां मध्ये केचन विद्वांस इत्यर्थः। अजमपि त्वां प्रियस्य भक्तस्य पुण्यश्लोकस्य पवित्रकीर्तेः यदोः कीर्त्तये मलयस्य पर्वतस्य कीर्त्तये तत्र चन्दनम् इव अन्ववाये यदुवंशे जातम् आहुः। यद्वा। मलस्य अन्ववाये चन्दनमिव यदोः अन्ववाये प्रियस्य पुण्यश्लोकस्य युधिष्ठिरस्य कीर्त्तये अजं त्वां जातमाहुः ॥ ३२ ॥ अपरे तु अस्य साधुलोकस्य क्षेमाय सुरद्विषामसुराणां वधाय च अजस्त्वं वसुदेवस्य पत्न्यां देवक्यां याचितस्ताभ्यां सुतपःपृश्निरूपाभ्यां पूर्वजन्मनि कृतयाचनः सन् अभ्यगात् अभ्यगाः। पुत्रत्वमिति शेषः। वसुदेवस्येत्यपादानस्यैव शेषत्वविवक्षया षष्ठी। यद्वा। अपरे बुधाः देवैर्याचितोऽजस्त्वं सज्जनक्षेमाय सुरद्विषां वधाय च वसुदेवस्य सकाशद्देवक्यामभ्यगादाविर्भूत इति ब्रुवते ॥ ३३ ॥ भारेति। अन्ये प्राज्ञाः उदधौ भूरिभारेण अन्तर्निभृतभूरिणा भारेण सीदन्त्या आसन्नमज्जनायाः नावो नौकायाः इव भूरिभारेणासुरजनजदुःसहभारेण सीदन्त्याः परिखिन्नायाः भुवः भारावतरणाय आत्मभुवा ब्रह्मणा प्रार्थितः सन् जातोऽसि हि इत्याचक्षते ॥ ३४ ॥

भवे इति। केचन बुधाः अस्मिन् भवे संसारे अविद्या देहात्मभ्रमादेर्निमित्तमज्ञानं च, कामस्तन्मूलकशब्दादिविषयाभिलाषश्च, कर्माणि तदनुकूलव्यापारात्मिकाः क्रियाश्च, तैः क्लिश्यमानानां जनानां श्रवणं नाम्नां श्रुतिविषयप्रापणं च स्मरणं स्वमूर्तेः परिचिन्तनं च तदर्हाणि चेष्टितानि करिष्यन्कर्त्तुमित्यर्थः। जात इत्याहुरित्यर्थः ॥ ३५ ॥ अविद्यादिभिः क्लिश्यमानानां श्रवणाद्यर्हाणीत्यनेन भगवच्चेष्टितानां क्लेशापहर्तृत्वं सूचितं तच्च प्रत्यक्षभगवच्चरणारविन्दसेवासक्तानां तद्भक्तियोगनिष्पादनद्वारा स्यात् इत्यभिप्रायेण साक्षाद्भगवत्प्राप्तिमतां तत्पदाम्बुजोपासनया भवप्रवाहोपरम इत्याह। शृण्वन्तीति। ये जनाः तव प्रत्यक्षस्य भगवतो भवतः ईहितं चेष्टितं लीलामिति यावत्। शृण्वन्ति वक्तृसान्निध्ये सत्याकर्णयन्ति। गृणन्ति श्रोतृसान्निध्ये कथयन्ति। तदुभयासन्निधौ स्वयमेव अभीक्ष्णशो मुहुर्मुहुः गायन्ति कीर्त्तयन्ति। स्मरन्ति। चिन्तयन्ति नन्दन्त्यन्यैः कीर्त्त्यमानमभिनन्दन्ति च ते एव भवप्रवाहस्य उपरमो विरतिर्यस्मात्तत् तावकं त्वदीयं पदाम्बुजम् अचिरेण पश्यन्ति। साक्षात्त्वत्पदाम्बुजशरणं प्राप्तानामेव भवप्रवाहोपरम इति भावः ॥ ३६ ॥ स्वात्मादिभ्योऽप्यत्यन्तहितकरत्वात्त्वद्विरहोऽस्माकमतिदुःसहस्ततः प्रयाणमुपसंहरेति सूचयितुं त्वत्पादाम्बुजैकशरणानस्मान् सांप्रतं हातुमुत्सहसे किमिति काकाह षड्भिः। अपीति। हे प्रभो अद्य त्वम् अपि स्वकृते स्वार्थे हितः प्रवृत्तः किम्। सुहृदः अनुजीविनः नोऽस्मान् जिहाससि स्वित्। हातुमिच्छसि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किमित्यर्थः। त्यागानर्हतां सूचयितुं स्वात्मनो विशिनष्टि। राजसु नृपेषु योजितमुत्पादितमंहो दुःखं यैस्तेषाम्। कृतानेकनृपत्य-पराधानामित्यर्थः। येषामस्माकं भवतः पदाम्बुजात् अन्यत् परायणं न च नैव अस्ति। पाठान्तरे स्वानां कृतमीहितमपेक्षितं येन तस्य संबोधनमिति वा ॥ ३७ ॥

ननु तव बन्धवो यदवः पुत्राश्च पाण्डवास्ते च शूराः समर्थाश्च तत्किं कार्पण्यं भाषसे इति चेत्सर्वमिदं निर्हेतुकया त्वत्कृपयैव संपन्नमित्यभिप्रायेणाह। के इति। यर्हि यदा भवतः अदर्शनं यदा त्वमस्मान्न निरीक्षसे तदा नाम शूरत्वादि-विख्यातिश्च रूपं गौरत्वादिरूपसमृद्धिश्च ताभ्यां कृत्वा यदुभिश्च सह पाण्डवाः वयं के, न केऽपि अतितुच्छा इत्यर्थः। कथमिव हृषीकाणामिन्द्रियाणाम् ईशितुर्जीवस्य अदर्शने नाम देवदत्तादिकं रूपं गौरादि च यथा न किंचित तद्वत्। यथा सहस्रजिदादि-विख्यातनामभाजः गौरत्वादिरूपसमृद्धिभाजः सेन्द्रियस्यापि शरीरस्य शरीरिकृतनिरीक्षणमन्तरा अकिंचित्त्वं तथा शूरत्वादि-गुणभाजां यदूनां पाण्डवानां च भवत्कृतनिरीक्षणं विनाऽकिंचित्त्वमेवेत्यर्थः ॥ ३७ ॥ किंच। नेयमिति। हे गदाधर इयमस्म-त्पाल्या राजधानीभूः स्वान्यऽसाधारणानि यानि लक्षणानि ध्वजवज्रोर्ध्वरेखाङ्कुशादीनि तैर्विलक्षितानि चिह्नितानि तैः त्वत्पदैर्भ-वदङ्घ्रिलक्ष्मभिः अङ्किता चिह्निता सती यथा इदानीं अधुना भाति तथा तत्र द्वारकायां त्वयि निर्गते सति द्वारकां प्रति त्वया निर्गमने कृते सतीत्यर्थः। न शोभिष्यते ॥ ३९ ॥ इमे इति। हे कृष्ण तव वीक्षितैर्निरीक्षणैः एव इमे जनपदा देशाः, सुपक्वाः ओषधया धान्यादिकाः, वीरुधो लता येषु ते तथाभूताः सन्तः। अधुना स्वृद्धाः सुसमृद्धाः भवन्ति। तथा। वनानि च अद्रयश्च नद्यश्च उदन्वन्तः जलाशयाश्च एधन्ते वर्द्धन्ते। हि ॥ ४० ॥ सांप्रतं तवैतो गमने पाण्डवानामकुशलमिति पाण्डवेषु यादवेषु पुत्रामज्ञादिस्नेहसाहजिकतया भागवतत्वादिसमीक्षोत्पादितस्नेहतया चोभयतो व्याकुलचित्ता सती उभयथापि स्नेहस्य संसारहेतुत्वं च जानती सती तेषु स्नेहनिवृत्तिं प्रार्थयते। अथेति। अथ पक्षान्तरे हे विश्वेश सर्वान्तःकरणनियन्तः हे विश्वात्मन् सर्वान्तरात्मन् हे विश्वमूर्ते विश्वशरीरक। स्वकेषु स्वीयत्वेनाभिमतेषु पाण्डुषु पाण्डवेषु वृष्णिषु स्वसंबन्धितया मतेषु यादवेषु च मे मम दृढं वर्त्तमानमिति शेषः। इमं स्नेहपाशं छिन्धि निवर्त्तय। पुत्रादिस्वसंबन्धिषु सहजस्नेहास्पदेषु भागवतत्वजोऽपि सोऽनर्थमूलमेवातस्तं निवर्त्तयेति प्रार्थयामीत्यर्थः। तथाचोक्तं द्विशताधिकद्विचत्वारिंशे श्रीहरिवाक्यसुधासिन्धोस्तरङ्गे श्रीहरि-कृष्णभगवद्भिः। 'प्रीतिरत्रत्यदैत्येषु प्राग्जन्मजनितेष्विव। विचार्य नैव कर्त्तव्या तूभयेषां समत्वतः। कृष्णाश्रयस्य माहात्म्यात्प्रीतिं ये तेषु कुर्वते। द्विगुणा जायते तेषां सा संबन्धद्वयेन वै। तेषां सा तद्वतां कृष्णतद्भक्तेभ्योऽपि भूयसी। जायते स्वजनेष्वेव तया ते सत्पथच्युताः' भवन्तीति शेषः। इति ॥ ४१ ॥

न केवलं स्वीयेषु स्नेहपाशच्छेदनमात्रं प्रार्थयामि किंतु त्वय्यनपायिनीं रतिं त्वमेव वितरेत्याह। त्वयीति। हे मधुपते यादवनाथ 'यादवानामेव माधवा इति नामान्तरं तच्च नवमस्कन्धे स्फुटीभविष्यति'। मे मम मतिः त्वयि अनन्यविषया अत्वदितरविषया सती, असकृत्पुनः, अद्धा तत्त्वतः, उदन्वति समुद्रे गङ्गा भागीरथी ओघं जलप्रवाहं इव रतिं प्रीतिम् उद्वहतात्। यथा गङ्गा समुद्रमप्राप्य स्वजलं वोढुं न क्षमा, किं तु समुद्रं प्राप्यैव स्वजलौघं वहति, एवं त्वामप्राप्य रन्तुमक्षमा मे मतिस्त्वय्येव रतिमुद्वहतामित्यर्थः ॥ ४२ ॥ 'अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी' इत्युक्तेर्महतां पुरः स्वाभिप्रेतार्थविधापनेऽञ्जलिरेवोपायो न ततोऽन्योऽस्तीत्यभिप्रायेण कृतोपकारानतुस्मरन्ती बहुधा संबोध्य नमस्करोति। श्रीकृष्णेति। हे श्रीकृष्ण सर्वलोकसुखकर, कृष्णोऽर्जुनस्तस्य सखा कृष्णसखस्तत्संबोधनम्। वृष्णिषु यादवेषु ऋषभः श्रेष्ठस्तत्संबोधने हे वृष्णिकुलश्रेष्ठ। अवनिध्रुहाम् अवन्यु-पलक्षितलोकोपद्रवकारिणां राजन्यानां वंशोऽन्ववायस्तस्य दहनस्तत्संबोधनम्। यथा वेणूनामग्निर्नाशकस्तद्वद्राजन्यकुलनाशक इत्यर्थः। न विद्यतेऽपवर्गोऽन्तो यस्य तथाभूतं वीर्य तत्संबोधनम्। हे गोविन्द संप्राप्तकामधेन्वैश्वर्य। गावो धेनवश्च द्विजा ब्राह्मणाश्च सुरा देवाश्च तेषामार्तिहरोऽवतारो यस्य तत्संबुद्धिः। हे योगेश्वर सूक्ष्मदर्शिन् हे अखिलगुरो यथायोग्यं ज्ञानोपदेशकर्तः। हे भगवन् ते तुभ्यं नमः ॥ ४३ ॥ पृथयेति। इत्थं पृथया कुन्त्या कर्त्र्या। कलानि मधुराणि पदानि वचांसि तैः करणैः परिणूतः परिगीतः अखिल उदयो महिमा यस्य सः। णूत इति दीर्घत्वं छन्दोऽनुरोधेन। वैकुण्ठः श्रीकृष्णः मायया हासात्मिकयाऽऽश्चर्यशक्त्या लोकं मोहयन् इव मन्दं जहास। वक्ष्यति हि 'हासो जनोन्मादकरी च माया' इति। मन्दमिति क्रियाविशेषणम् ॥ ४४ ॥

तामिति। स्वपुरं यास्यन यातुमुद्युक्तोऽपि भगवान् तां पृथां स्त्रियोऽन्याः सुभद्राद्रौपदीप्रमुखा नारीश्च बाढम् इति उपामन्त्र्य न गमिष्यामि सांप्रतं स्थास्यामीत्युक्त्वा तद्वाक्याङ्गीकारकरणपूर्वं ता अनुज्ञाप्येत्यर्थः। प्रेम्णा गाढानुरागेण राज्ञा युधिष्ठिरेण च निवारितः सन् गजसाह्वयं हस्तिनापुरं प्रविश्य कंचित्कालमुवासेति शेषः। अयं भावः। प्रथमतः सज्जीभूय द्वारिकां प्रति गमनाय हस्तिनापुरतो निःसृत्य पृथासुभद्रादीनामाज्ञां गृहीत्वा गङ्गातीरान्तिकवर्त्तिरथस्थानं प्राप्य यावद्रथमारो-ढुमुपक्रमते तावदागतोत्तरावचः श्रुत्वा तामाश्वास्य तिष्ठति तावत्तद्विरहमसहमानया पृथया त्वयि मेऽनन्यविषया मतिरिति संप्रार्थितस्तदा संजातकरुणस्तां चान्याः स्त्रीश्च न यास्यामि स्थास्यामीत्युपदिश्य रथस्थानात्पुरे प्रविश्य भूयोऽपि स्त्रिय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपामन्त्र्य स्वपुरं यास्यन् राज्ञा निवारितः प्रत्यावृत्त्य नृपमन्दिरमागच्छन् कृष्णो भगवता राज्ञो वचोऽङ्गीकृतमिति तद्गतस्नेहं सर्वेभ्यः प्रदर्श्य नृपमन्दिरे भूय उवासेति ॥ ४५ ॥ अथ भीष्मनिर्वाणोत्सवं वक्तुमुपोद्धातकथां प्रस्तौति । व्यासाद्यैरिति । ईश्वरस्य श्रीकृष्णस्येहाभिप्रायस्तस्या अज्ञैरवेदिभिः स्वभक्तभीष्मनिर्याणमहोत्सवं कर्त्तुं राज्ञा सह कुरुक्षेत्रे गन्तव्यं तत्र तन्मुखे नैवायं प्रबोधनीय इति हीश्वराभिप्रायः । स च कार्यद्वयविधायकस्तमजानद्भिरित्यर्थः । व्यासाद्यैः कृष्णद्वैपायनादिभिः । अद्भुतकर्मणा, यथा कुरुपाण्डवसंधानार्थं गतोऽपि यथोचितमेव वदन्नपि विग्रहं दृढीचकार । तथात्रापि सर्वैः साकं प्रबोधमाचरन्नपि केवलबोधमेव दृढीचकारेत्याश्चर्यरूपकर्मणेत्यर्थः, कृष्णेन च । इतिहासैः प्रबोधितः सन्नपि शुचा शोकेन अर्पितो व्याप्तः सन् नृपः न अबुध्यत विवेकं न प्राप । किन्तु ज्ञात्यादिमरणनिमित्तशोकेनातितरां संजातसंताप एवास्थादिति भावः ॥ ४६ ॥ अबोधमेव प्रपञ्चयति षड्भिः । आहेति । हे विप्राः स्नेहाज्जातो मोहो भ्रमस्तस्य वशं गतः प्राप्तः अत एव सुहृदां ज्ञातितदनुबन्धिनां वधं प्राकृतेन धर्माधर्मविवेकविधुरेण आत्मना मनसा चिन्तयन् अहर्निशं पर्यालोचयन् धर्मसुतः राजा युधिष्ठिरः आह अब्रवीत् । अत्रास्य स्नेहमोहवशंगतत्वं तु स्वयं धर्मसुतो धर्मात्मा च तस्य हरिविमुखदुष्टतराधर्मिस्वसंबन्ध्यसंबन्धिहननं धर्म एवास्ति तत्राधर्मत्वशङ्का या जाता तदेवेति ॥ ४७ ॥

तदेवाह यावदध्यायसमाप्ति । अहो इति । अहो हे मुनयः दुरात्मनः मे मम हृदि रूढमङ्कुरितम् अज्ञानं तु पश्यत किम् तत्तत्राह । पारक्यस्य श्वशृगालादिभक्ष्यस्य देहस्य हेतोरेव केवलदेहसुखार्थमेवेत्यर्थः । मे मया बह्व्यः अक्षौहिणीरक्षौहिण्यः सेनाः हताः । धर्मात्मनो मे नैतद्युक्तमिति भावः । 'अक्षौहिणी प्रसंख्याता रथानां द्विजसत्तमाः । संख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः । शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः २१।८।७० । गजानां च प्रसंख्यानमेतदेव प्रकीर्त्तितम् २१।८।७० । ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु । नराणामपि पञ्चाशच्छतानि त्रीणि चैव हि १०।९।३।५० । पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च । दशोत्तराणि षट् प्राहुः संख्यातत्त्वविदो जनाः ६५।६।१० । एतामक्षौहिणीं प्राहुर्यथावदिह संख्यया' इति ॥ ४८ ॥ बालेति । बालाश्च द्विजाश्च सुहृदश्च मित्राणि च पितरश्च भ्रातरश्च गुरवश्च तान् द्रोहितवानिति बालादिध्रुक् तस्य । तत्र बालाः सौभद्रादयः । द्विजा द्रोणादयः । सुहृदो द्रुपदादयः । मित्राणि धनदानेष्टाः भटविशेषाः । पितरो भूरिश्रवःप्रभृतयः । भ्रातरो दुर्योधनादयः । गुरवो भीष्मादयः । मे मम वर्षाणामयुतानि तेषामप्ययुतानि तैः अपि निरयान्नरकात् मोक्षः न स्यात न हि भवेत् ॥ ४९ ॥ ननु 'शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्' । धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते' इत्यादिशास्त्रैर्धर्म्ययुद्धस्य धर्मत्वावबोधनात्तत्र हतान्प्रति किं शोचसे तत्राह । नेति । प्रजाभर्त्तुः प्रजापोषणाधिकृतस्य राज्ञः । धर्मयुद्धे द्विषां वधः एनः पापं न, किं तु धर्म एव, इति यत् शासनमनुशासनात्मकं वचः तत् मे मम बोधाय विवेकाय न तु कल्पते । विवेकं जनयितुं नैव समर्थमित्यर्थः । अस्यायं भावः । 'स्वप्रजानामन्यतो बाधे प्रसक्ते यः पदातिं हन्ति स भवति चातुर्मास्ययाजी' इत्यादिना वेदेन तद्वधोऽनुज्ञातः दुर्योधनेन तु प्रजायां पाल्यमानायां सत्यामपि केवलं राज्यलोभमात्रेण हतत्वात्पापमेवेदं मया कृतमतो नैतच्छिक्षायै जायत इति ॥ ५० ॥

ननु धर्मार्थं यतमानस्यावर्जनीयतया प्रसक्तमपि पापं वर्णाश्रमधर्मैरपोहितुं शक्यमेव 'धर्मेण पापमपनुदति' इतिशास्त्रादित्यत आह । स्त्रीणामिति । मया हता बन्धवः पतयो यासां स्त्रीणाम् इह यः असौ द्रोहः उत्थितः उपस्थितः, तं व्यपोहितुमपाकर्त्तुं गृहमेधीयैः कर्मभिः । अहं कल्पः न । समर्थो नास्मीत्यर्थः । बहुकालानुभाव्यफलो विपुलो द्रोहोऽल्पकालनिर्वृत्तिभिर्गृहमेधीयैः कर्मभिर्नापोहितुं कल्पः । वस्तुतस्तु कर्मणा कर्मनिर्हार एवायुक्त इति भावः ॥ ५१ ॥ ननु 'सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजेत य उ चैनमेवं वेद' इति श्रुतेः पापमश्वमेधेन नश्येदित्येते वदिष्यन्तीत्याशङ्क्याविवेकविजृम्भितं हेतुवादमाश्रित्य निराकरोति । यथेति । यथा पङ्काङ्गं सपङ्कमङ्गं पङ्केन कर्दमेनैव मार्ष्टुं शोधयितुं लोक इति शेषः । न अर्हति नो शक्नोति । पाठान्तरे यथा घनपङ्केन पङ्काम्भो न मृज्यते इत्यर्थः । यथा च सुराकृतं सुराकृतदोषदूषितं भाण्डं सुरया मार्ष्टुं न अर्हति तथा यज्ञैः एकामपि भूतहत्यां न मार्ष्टुम् अर्हति एव । अयं भावः । यथा पङ्कलेशलिप्ताङ्गमदभ्रतरपङ्केन न मृज्यते । यथा सुरालेशकृतमपावित्र्यं बह्व्या सुरया न मृज्यते तथैव भूतहत्यामेकां प्रमादतो जातां बुद्धिपूर्वहिंसाप्रायैर्यज्ञैर्मार्ष्टुं नार्हतीति ॥ ५२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ नवमोऽध्यायः

सूत उवाच

इति भीतः प्रजाद्रोहात् सर्वधर्मविवित्सया । ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् ॥ १ ॥

नवमे सर्वधर्माणां निरूपणमुदीरितम् । भीष्मकृतं नृपोद्देशात्तन्मुक्तिश्च स्तुतिर्हरेः ॥ १ ॥

यदर्थं तस्याविवेकः श्रीकृष्णेन संवर्द्धितस्तद्दर्शयति । इतीति । इत्युक्तप्रकारेण प्रजाद्रोहात् भीतः युधिष्ठिरः । सर्वे च ते धर्माश्च तेषां विवित्सा वेदितुमिच्छा तया हेतुना यत्र देवव्रतो भीष्मः अपतत् तत् विनशनं कुरुक्षेत्रं प्रति ततो हस्तिनापुरात् प्रागात् प्रतस्थे । स्वर्ग्यधर्मविवित्सयेति पाठे स्वर्ग्यान् स्वर्गार्हान् धर्मान्बोद्धुमिच्छयेत्यर्थो बोध्यः ॥ १ ॥ तदेति । तदा तद्भ्रातरस्तस्य युधिष्ठिरस्य भीमादयो भ्रातरः । सर्वेऽपि सन्तः शोभना अश्वा घोटका येषु तैः । स्वर्णैन सुवर्णपरिच्छदेन भूषिता अलंकृतास्तैः रथैः अन्वगच्छन् । तथा व्यासश्च धौम्यश्च तावादी येषां ते विप्रा ब्राह्मणाश्च अन्वगच्छन् । यदा विप्रा इति संबोधनं तदा मुनय इति शेषो बोध्यः ॥ २ ॥ भगवानिति । हे विप्रर्षे शौनक सधनंजयः सार्जुनः । भगवान् श्रीकृष्णोऽपि रथेन अन्वगच्छत् । तदा सः नृपो युधिष्ठिरः तैः भीमादिभिः गुह्यकैर्यक्षैः कुबेरः इव व्यरोचत अराजत ॥ ३ ॥ दृष्ट्वेति । दिवः स्वर्गात् च्युतं पतितम् अमरं कंचन महान्तं देवमिव भूमौ निपतितं भीष्मं दृष्ट्वा सानुगाः सभृत्याः पाण्डवाः चक्रिणा श्रीकृष्णेन सह प्रणेमुः ॥ ४ ॥

तत्रेति । हे सत्तम शौनक तत्र तदा भरतपुंगवं वंश्यश्रेष्ठं भीष्मं द्रष्टुं सर्वे ब्रह्मर्षयो वसिष्ठादयः देवर्षयो नारदादयः राजर्षयो विश्वामित्रादयश्च तत्रासंस्तत्क्षणमेव आगत्य स्थितवन्तः ॥ ५ ॥ तानेव कांश्चिन्नाम्ना निर्दिशति । पर्वत इति द्वाभ्याम् । पर्वतः, नारदः, धौम्यः, भगवान्वेदव्यासाद्यैश्वर्यवान् बादरायणः कृष्णद्वैपायनः, बृहदश्व,ः भरद्वाज,ः सशिष्यः स्वशिष्यैरुपेतः रेणुकासुतः परशुरामः ॥ ६ ॥ वसिष्ठ इति । वसिष्ठः, इन्द्रप्रमदः, त्रितः, गृत्समदः, असितः, कक्षीवान, गौतमः, अत्रिः, अथ कौशिको विश्वामित्रः सुदर्शनश्च ॥ ७ ॥ अन्ये इति । हे ब्रह्मन् शौनक अमला निर्मलान्तःकरणाः, ब्रह्मरातः शुक आदिर्येषां ते, शिष्यैः उपेता युक्ताः । कश्यपश्च आङ्गिरसो बृहस्पतिश्चादी येषां ते अन्ये मुनयश्च आजग्मुः ॥ ८ ॥ तानिति । धर्मज्ञः, देशः कुरुक्षेत्रं च कालः शरतल्पशयनत्वादिश्च तयोर्विभागम् अस्मिन्समये मयैवं कार्यमिति स्वकर्त्तव्यौचित्यं वेत्तीति देशकाल-विभागवित् । वसूत्तमः भीष्मः पूर्वजन्मनि भीष्मस्य वसुत्वात् वसूत्तम इत्युक्तम् । महाभागान्महैश्वर्योपेतान् । पाठान्तरे भीष्म-विशेषणम् । समेतान्समन्ततः समायातान् तान् पर्वताद्याङ्गिरसान्तान्मुनीन् उपलभ्याभिज्ञाय पूजयामास । प्रत्युत्थानादिवन्दना-दिपूजायामशक्तत्वान्मानसीं, वाचिकीम्, आञ्जलिकीं वा पूजां कृतवानित्यर्थः ॥ ९ ॥ कृष्णमिति । तत्प्रभावज्ञः श्रीकृष्णस्य यथार्थं तया माहात्म्याभिज्ञः भीष्मः आसीनं स्वाग्रत उपविष्टं जगदीश्वरं, मायया स्वसंकल्परूपज्ञानेनोपात्तो विग्रहो येन तं कृष्णं हृदिस्थं ध्यानेन स्वहृदयावस्थितं कृत्वा च पूजयामास । मानसैरुपचारैः समर्चयामासेत्यर्थः ॥ १० ॥ पाण्डुपुत्रानिति । ततः भीष्मः, प्रश्रयो विनयश्च प्रेम स्नेहश्च ताभ्यां संगता युक्तास्तान् । पाठान्तरे ताभ्यामवनतान् । उपासीनान् समीपे उपविष्टान् अनुवर्त्तमानान्वा पाण्डुपुत्रान् अनुरागाश्रैरनुरागजैरश्रुबिन्दुभिः अन्धीभूतेन चक्षुषा अभ्याचष्ट । आभिमुख्येनापश्यत् अभ्यभाषत च । चक्षेरुभयार्थकत्वात् अत्र तन्त्रेणोभयमपि विवक्षितम् ॥ ११ ॥ तन्त्रोक्तिमाह । अहो इति द्वादशभिः । हे धर्मनन्दनाः यूयं, विप्रा ब्राह्मणाश्च धर्मः स्वधर्मश्च अच्युतो भगवांश्च तानाश्रयन्तीति तथाभूताः सन्तः यत् क्लिष्टं यथा तथा जीवथ तत् कष्टम् अहो अन्याय्यम् । अहो आश्चर्यादप्याश्चर्यमेतत् । कुतः । उक्तहेतुत्रयादेवं जीवितुं न अर्हथ । यतो विप्रादिष्वेकोऽपि सुखजीवनायालम्, तत्र तद्बहुत्वे सुखजीवने किं वक्तव्यं तदन्यथाभाव एवात्राश्चर्यमिति भावः । अहोऽन्याय्यमिति संधिस्त्वार्षः ॥ १२ ॥ संस्थिते इति । अतिरथे पाण्डौ संस्थिते मृते सति, बालाः प्रजाः पुत्राः यस्याः सा वधूश्च । अनेन दैन्यं दर्शितम् । पृथा कुन्ती तोकवती अपत्यवती सत्यपि युष्मत्कृते भवदर्थं मुहुः पुनः पुनः बहून् क्लेशान् प्राप्ता । प्राप्ताऽतोकवती यथेति पाठे, अतोकवत्यपुत्रा यथा बहुक्लेशवती भवति तथा बालप्रजा युष्मन्माता युष्मत्कृते क्लेशान् प्राप्तेति योजना । प्राप्ता तोकवती यथेति नञ्प्रश्लेषवर्जितपाठे । तोकवती यथा तोकपोषणादावतिक्लेशं प्राप्नोति तथेयमपीति दृष्टान्तयोजना ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंविधयुष्मदप्रिये भवद्प्रारब्धकर्मनियामकोऽत्र कालात्मा हरिरेव हेतुरित्यभिप्रेत्याह। सर्वमिति। हे पार्थाः भवतां यत् अप्रियं दुःखम् अभूत् एतत् सर्वं कालकृतं कालोद्बुद्धदैवकृतं मन्ये। यत्कृतमेवंविधं नोऽप्रियम् असौ कः कालस्तत्राह। वायोः वशे घनावलिर्मेघपङ्क्तिरिव यद्वशे यस्य वशे सपालः पालैः पालकैः सहवर्त्तमानः लोकः वर्त्तते, स एव काल इत्यर्थः। अत्र वायोरिव घनावलिरिति दृष्टान्तेन जडाजडो लोको यस्य वशे वर्त्तते स भगवान्नारायण एव सर्वगुणपूर्णत्वान्नामतः कालात्मत्वात्काल इत्युच्यते इति गूढोऽभिप्रायः ॥ १४ ॥ अत्यन्तासंभावितमिदं समभवदिति विस्मयते। यत्रेति। यत्र धर्मसुतः राजा सर्वं प्रजारञ्जको नृपः, यत्र गदापाणिः क्षितिभारायितदितिसुतशोणितदिग्धां गदां पाणौ बिभ्रद्भक्त्या वशीकृतपरब्रह्मकृष्णः राज्ञः कनिष्ठो भ्राता वृकोदरो भीमः, यत्र अस्त्री द्रोणेन्द्राद्युपात्तास्त्रग्रामः सन् गाण्डीवं चापं करे दधानः, कृष्णः इन्द्रद्वारा प्रादूर्भूतः स्वयं नरर्षिरर्जुनः, यत्र रिपूणां पूयशोणितवमनकारि गाण्डीवाख्यं धनुः पाणौ बिभ्राणो द्रोणाप्तास्त्रग्रामः कृष्णापरसंज्ञोऽर्जुन इत्यर्थः। यत्र कृष्णः सर्वसुपर्वाधिराजोऽनन्तबलवीर्यादिगुणार्णवः श्रीमान्वासुदेवः सुहृन्मित्रम्। ततस्तत्र विपत् इदमाश्चर्यम्। पुण्यशारीरबलाऽस्त्रनैपुण्यशस्त्रदेवसंपत्तौ सत्यामपि यत्रैवं विपत्तदेतद्दुर्घटघटनापटुना कालेनेत्येवं मन्ये इति भावः। कृष्णः स्त्रीति सविसर्गपाठे, स्त्री द्रौपदी बोध्या। अत्र धर्मसुतादीनामतिसमर्थत्वे सर्वापन्निवर्त्तककृष्णसुहृत्त्वेऽपि यदेवंविधविपदनुभवनं कालशरीरककृष्णस्य कालानुवृत्तित्वात् कालस्य च तद्विपन्निमित्तकर्मोद्बोधकत्वादिति गूढाऽभिप्रायः ॥ १५ ॥ ननु तद्वशे लोकः सकालोऽपि श्रीकृष्णायत्तशक्तिमांश्चेत्तर्हि कालानुवृत्त्या किमस्य चिकीर्षितमित्यत्राह। न हीति। हे राजन् अस्य श्रीकृष्णस्य विधित्सितं चिकीर्षितं कोऽपि पुमान् कर्हिचित् न वेद। हि निश्चितमेव। अवेद्यत्वज्ञापनाय विधित्सितं विशिनष्टि। यस्य विधित्सितस्य विजिज्ञासा विशेषतो ज्ञातुमिच्छा तया युक्ताः सहिताः, विधित्सितं ज्ञातुं प्रवृत्ता इत्यर्थः। कवयः ब्रह्मादयोऽपि मुह्यन्ति। हि सर्वेषां स्वकृतादृष्टानुसारेण फलदाने स्वाज्ञया प्रवृत्तस्य कालस्यानुसरणं विदधतोऽस्य सुहृत्त्वेऽपि प्रारब्धकर्मानुकूल्यत्वेन विपत्करत्वरूपविधित्सितस्य सर्वदुर्बोधत्वं युक्तमेवेति द्वितीयहिशब्देन द्योतितम् ॥ १६ ॥

अस्त्वेवं प्रकृते किमित्यत्राह। तस्मादिति। तस्मात्सर्वलोकस्य कर्मानुसारतः फलप्रदकालायत्तसुखादिमत्त्वात्कृष्णस्य कालाद्यनुवर्त्तित्वाच्चेत्यर्थः। हे भरतर्षभ युधिष्ठिर इदं सुखदुःखादिकं सर्वं दैवतन्त्रं दैवायत्तं व्यवस्य निश्चित्य हे नाथ हे प्रभो तस्य दैवस्य अनुविहितः 'तस्येति कर्त्तरिषष्ठी' तेन प्रवर्तित इत्यर्थः। त्वम् अनाथाः प्रजाः पाहि पालय ॥ १७ ॥ दैवतन्त्रमित्यनेन कालकर्माद्युद्बोधयिता तदनुवर्त्ती चेश्वरः श्रीकृष्णः परोक्षं प्रदर्शितस्तथापि शोकाविष्टहृदा नृपतिना नानुबुद्धस्ततः कालदैवादिशब्दैः सहाभिधानरूपं तत्पारोक्ष्यं प्रोझ्येदानीमपरोक्षतया प्रदर्शयन् लोकानामपि यथा तत्स्वरूपबोधः स्यात्तदर्थं दैवादिशब्दोक्तं तं याथात्म्योक्त्या वेदयति। एष इति। हे नृपते एषः श्रीकृष्णः साक्षात्प्रत्यक्षस्त्वन्नयनविषयवर्त्ती सन्नपि भगवान् षाड्गुण्यपरिपूर्णः, आद्यो जगत्कारणभूतः, पुमान् परमपुरुषः, नारायण एव सन्, मायया लोकं जनं मोहयन्सन् गूढस्तिरोधायितस्वकीयवेषः संश्च वृष्णिषु यादवेषु चरति। कश्चिद्यादव इवानुकरोतीत्यर्थः। वै निश्चितमेतन्न प्रतारणम्। अतः कालदैवादिशब्दैः सहाभिधानरूपपारोक्ष्येणायमेव सम्यक् तुभ्यमेवं परोक्षप्रियत्वादभिहित इति भावः ॥ १८ ॥ ननु परोक्षप्रियत्वात्, यद्ययं नृनाट्यानुकृत्या प्रच्छन्नैश्वर्यतया चरति तर्हि क एनं यथावद्वेदेत्याशङ्क्याह। अस्येति। हे नृप अस्य श्रीकृष्णस्य अनुभावं महिमानं गुह्यतमं सन्तमपि भगवान् शिवः शंकरः वेद वेत्ति जानातीत्यर्थः। तथा देवर्षिः नारदः वेत्ति। साक्षात् भगवान् कपिलः कर्दमसूनुश्च वेत्ति ॥ १९ ॥ इत्थं शिवादयः सुपर्वाणो, यं सर्वकारणपरमेश्वरतया जानन्ति, तं त्वं तु मातुलेयादितया वेत्सि, दौत्यं सारथ्यं च विधापयसीत्याह। यमिति। हे नृप। त्वं तु यं कृष्णं मातुलेयं मातुलपुत्रं, प्रियं प्रीतिविषयं, मित्रं प्रीतिकर्त्तारं, सुहृत्तमम् उपकारानऽनपेक्ष्योपकारकं च मन्यसे यं च त्वं सचिवं मन्त्रिणम्, कदाचित् दूतं संदेशहरम्, अथ कदाचित् सौहृदात् स्नेहातिशयात् सारथिं यन्तारं च, अकरोः कृतवानसि ॥ २० ॥

तथाप्यहो सर्वोत्तमोऽहमस्म्यनेन सारथ्यादिषु योजित इत्येवंरूपास्य विषमा बुद्धिर्नास्तीत्याह। सर्वात्मन इति। सर्वात्मनः सर्वान्तर्यामिणः, समदृशः यथाविधं यद्वस्तु तथा तद्वेदनेऽपि सर्वपदार्थान् प्रकृतिजत्वेन जानातीत्यतः तेषु समदृष्टिमतः, अद्वयस्य समाधिकरहित्वादद्वितीयस्य, अनहंकृतेः प्राकृतवैकृतशरीररहितत्वाद्देहाद्यहंबुद्धिरहितस्य, अत एव निरवद्यस्य रागादिदोषरहितस्य अस्य कृष्णस्य तत्कृतं सारथित्वादिकृतिनिमित्तम्, मतिवैषम्यं ममेदं योग्यमयोग्यमिति मतिवैषम्यं क्वचिदपि न अस्ति। अनेकविधानां जीवानां हितविधानार्थं कृतावतारत्वात्स्वसमाधिकवर्जितत्वात्स्वेतरप्राकृतजनवदहंभावाभावादेवमस्यास्तीति भावः ॥ २१ ॥ एवंविधविषममतिष्वस्मासु अस्य संसर्गकारणं किमित्याशङ्क्य युष्मद्विधभक्तभक्त्या द्रवीभूतमनोऽनुकम्पैव कारणमीत्याह। तथापीति। हे भूप तथापि एकान्तेषु अव्यभिचारिभक्तिमत्सु युष्मासु अनुकम्पितमुक्तप्रकारेण कृतकृत्यस्याप्यस्यानुकम्पां पश्य। अस्य परमानुकम्पैव भवत्संसर्गकारणमिति भावः। ननु तात त्वयैवंविधास्यानुकम्पिता कथं विदिता इति चेत् क्षेत्रज्ञानुजिघृक्षया जगद्व्यापारे प्रवृत्तस्य वैषम्यनैर्घृण्यादिपरिहाराय व्याजमात्रापेक्षिणः कृष्णस्य स्वानुवर्तिनो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नितरां प्रियाः कृपाविषयाश्च भवन्ति। तेन भक्तस्य मुमूर्षोर्ममेदानीं चक्षुर्विषयतां प्राप्त इत्यनेन विदितेत्याह। यदिति। यद्यतः कृष्णः असून् प्राणान् त्यजतः त्यक्तुमुद्युक्तस्य मे मम साक्षात्प्रत्यक्ष एव दर्शनम् आगतः प्राप्तः। प्राणत्यागकाले प्रायेण स्वेनाऽकृतकृत्यैः संतोषिताः पुत्रादयोऽपि पूर्वमेव विमुखा गच्छन्ति एवंविधेऽप्यस्मिन् समये मद्दोषानऽगणयित्वा पुरःस्थितः अहो किं कथ्यते कृपालुतेति भावः॥ २२॥ प्राणत्यागकाले हरिदर्शनफलमाह। भक्त्येति। भक्त्या यस्मिन् हरौ मनः आवेश्य, वाचा यन्नाम श्रीहरे हरिकृष्ण कृष्ण नारायणादिनाम कीर्त्तयन्संश्च कलेवरं देहं त्यजन् योगी काम्यन्ते इति कामाः शब्दादिविषयास्तेषां निमित्तभूतैः कर्मभिः पुण्यपापात्मकैः कामैः कर्मभिश्चेति वा मुच्यते, संसृतिबन्धाद्विमुक्तो भवतीत्यर्थः। तं प्रत्यक्षतो दृष्ट्वा म्रियमाणस्य मे मुक्तिः किं वर्णनीयेति वाक्यशेषः। एवंभूतमहिम्नः कृष्णस्य प्रभूतप्रीतिपात्रं साक्षाद्धर्मो भवान् भवति ततस्तदुक्तप्रकारेण स्वधर्मेऽधर्मबुद्धिं हित्वास्यानुमतेन त्वं राज्यं कुर्विति परमतात्पर्यार्थः॥ २३॥

एवं युधिष्ठिरं प्रत्यभिधायेदानीं स्वच्छन्दमृत्युर्भीष्मः उत्तरायण समयपर्यन्तं भगवतोऽवस्थानं प्रार्थयते। स इति। अहं यावत् इदं पञ्चभूतरचितं कलेवरं देहं हिनोमि त्यजामि। तावदुत्तरायणकालपर्यन्तं देवदेवः, प्रसन्नश्चासौ हासस्तेन अरुणाभ्यां लोचनाभ्यां च उल्लसदधिशोभमानं मुखाम्बुजं यस्य सः। चतुर्भुजः भगवान् स कृष्णः ध्यानपथो ध्यानविषयभूतः सन् प्रतीक्षतां मामत्रावस्थानेन पालयतामिति प्रार्थयामीत्यर्थः। अत्रान्येषां द्विभुजतया प्रतीयमानत्वेऽपि स्वस्य दिव्यदृक्संभूत्या निरीक्षणादस्य चतुर्भुजत्वमुक्तं बोध्यम्॥ २४॥ युधिष्ठिर इति। युधिष्ठिरः तद्भीष्मवचः आकर्ण्य निशम्य शरपञ्जरे शयानं भीष्मम् ऋषीणाम् अनुशृण्वतां सतां विविधान्नानाविधान् धर्मान् अपृच्छत॥ २५॥ 'धर्मादयो ये संपृष्टा अर्थाः कुन्तीसुतेन वै। क्रमात्पितामहः प्राह तांस्त्रिभिः सम्यगेव हि,॥ १॥ पुरुषेति। पुरुषाणां स्वभावो ज्ञत्वाज्ञत्वशक्तत्वाशक्तत्वादिरूपस्तेन तदनुरूपेण विहितान् कर्त्तव्यतया विधिबोधितान् यथावर्णं यथाश्रमं ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च योग्यान् 'योग्यार्थकयथाशब्दस्याव्ययीभावः' वैराग्यरागावकामकामौ तावेवोपाधी ताभ्याम्, आम्नाता वेदेनोक्ताश्च ते उभयलक्षणाः प्रवृत्तिनिवृत्तिभेदभिन्नाश्च तान् यथैकस्यैवाग्निहोत्रादिकर्मणः 'अग्निहोत्रं जुहुयात्स्वर्गकामः'। 'यावज्जीवमग्निहोत्रं जुहुयात्' इति च स्वर्गाधिकारजीवनाधिकाररूपाभ्यामुपाधिभ्यामेव भेदः। एवं वैराग्यरागोपाधिभ्यां प्रवृत्तिधर्मत्वेन निवृत्तिधर्मत्वेन चाम्नातानपि वस्तुत एकरूपान्वर्णाश्रमादिधर्मानित्यर्थः॥ २६॥ दानधर्मानिति। दानधर्मान् सुकृतोद्भावक, नैकविधदानप्रकारान् राजधर्मान्नीतिशास्त्रोक्तान् मोक्षधर्मान् पञ्चरात्रादितन्त्रोक्तान्। स्त्रीधर्मान् सधवा वधवाभेदेन स्त्रीसदाचारान् भगवद्धर्मांस्तच्छ्रवणकीर्त्तनादीन् विभागशः पृथक् पृथक् समासव्यासौ संक्षेपविस्तारौ तावेव योगावुपायौ ताभ्यामिति ततः॥ २७॥

धर्मेति। हे मुने तत्त्ववित् तद्याथात्म्याभिज्ञो भीष्मः सहोपायान् ससाधनान् धर्मार्थकाममोक्षांश्च, यथाधिकारं प्रतिनियतोपायसहितान् धर्मादीनित्यर्थः। यथा यथावत्। नानाख्यानेषु ये ये इतिहासास्तेषु, यथा सन्ति तथा वर्णयामास। त्रिष्वेतेषु वर्त्तमानानां द्वितीयान्तानां वर्णयामासेत्यनेन संबन्धः॥ २८॥ धर्ममिति। छन्दमृत्योः स्वेच्छया मरणं कुर्वतो योगिनः यः उत्तरायणः कालः वाञ्छितः भवति सः कालः, धर्मं प्रवदतः तस्य भीष्मस्य प्रत्युपस्थितः उत्क्रमिष्यतो ज्ञानिनोऽनुगुणे काले किंचित्सुखाधिक्यं भवतीति तुशब्दो वक्ति॥ २९॥ तदेति। तदा यदा स कालः प्रत्युपस्थितस्तदेत्यर्थः। सहस्रणीः युद्धे स्वसमीपस्थान् सहस्रं रथिनो नयति पालयतीति। यद्वा। सहस्राणां कुरुपाण्डवानां नीर्नायक इति। यद्वा। सहस्रं सहस्रपरिमितान् स्ववंश्यान् नयति सद्गति प्रापयतीति। यद्वा। स्वमुक्तिसमये स्वोपदिष्टसहस्रजनानां स्वेन सह भगवद्धामप्रापक इति। भीष्मः गिरः वाचः उपसंहृत्य विरमय्य विमुक्तः सङ्गो देहतदनुबन्ध्यादिरासक्तिर्येन तत्, मनः स्वमानसं पुरःस्थिते स्वसन्मुखमवस्थिते लसन्तौ पीतौ पिशङ्गौ पटौ परिधानीयोत्तरासङ्गवसने यस्य तस्मिन् चतुर्भुजे प्रादुर्भावकाले चतुर्भुजोक्तेरस्यापि दिव्यदृक्त्वात्तथा प्रतीयमाने आदिपुरुषे कृष्णे वसुदेवनन्दने मीलिते दृशौ दृष्टी येन, अमीलितदृक् अर्द्धमुकुलितनयनयुगलः सन्वा, व्यधारयत्। कोटिमन्मथमनोमोहकतन्मूर्त्तिध्यानैकप्रवणं चित्तमकरोदित्यर्थः॥ ३०॥ विशुद्धयेति। विशुद्धया फलरागादिदोषरहितया भगवन्मनोहरविग्रहानुध्यानात्मिकया धारणया हतं निरस्तम् अशुभं भगवत्प्राप्तिविलम्बावहं प्रारब्धं यस्य सः, तदीक्षया साक्षाद्भगवद्दर्शनेन एव आशु गतः निरस्त आयुधश्रमः शस्त्रप्रहारजा पीडा यस्य सः, निवृत्ताः सर्वेषामिन्द्रियाणां वृत्तयः विभ्रमो देहादिभ्रमश्च यस्य सः। यद्वा। निरस्तो निवृत्तो सर्वेषामिन्द्रियाणां वृत्तीनां व्यापाराणां विभ्रमो विलासो यस्य सः। एवंभूतः भीष्मः जन्यं शरीरं विसृजंस्त्यक्ष्यन् सन् जनार्दनं श्रीकृष्णं तुष्टाव॥ ३१॥

स्तुतिमेवाह। इतीत्यादिभिरेकादशभिः श्लोकैः। तत्र तावत्परमव्योमस्थं वेदान्तैकवेद्यं दिव्यात्मस्वरूपं प्रकृतावताररूपं तत्प्रयोजनं चानुसंधाय तस्मिन्स्वमतिदार्ढ्यं प्रार्थयते। हे कृष्ण 'इति हेतौ' यतोऽहं त्वां ध्यायामि ततो हेतोरित्यर्थः। मतिर्मद्बुद्धिः वितृष्णा निवृत्तान्यलोकभोगादितृष्णा सती भगवति परमेश्वरे त्वयि उपकल्पिता प्रतिष्ठिता भवत्विति शेषः। कथंभूते भगवति सात्वतानां यादवानां पुंगवः श्रेष्ठस्तस्मिन्, सात्वतानां भागवतानां पुंगवे स्वामिनीति वा। विभूम्नि विगतो भूमा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्मात्तस्मिन्, स्वसुखं स्वाभाविकमात्मसुखम् उपगत उपगतवांस्तस्मिन्, अपरिच्छिन्नस्वाभाविकानन्दशालिनीत्यर्थः। क्वचित्कदाचित् विहर्तुं जगत्सर्गविधानरूपेण क्रीडितुम्, प्रकृतिं मायात्मिकां स्वशक्तिम्, उपेयुषि निरीक्षणादिना प्राप्तवति। कथंभूतां प्रकृतिं यद्यस्याः प्रकृतेः सकाशात् भवप्रवाहः सृष्टिपरंपरा भवति। यद्वा। त्यागिनः स्वगुरोर्जामदग्न्यस्य धनुर्विद्यास्वीकृत्यादिनानुभवात् स्वेन स्वेष्टदेवत्वेन मानितस्य गृहिणः श्रीकृष्णस्य च पाण्डवादिसंबन्धेन प्रचुरानुभवात् सांप्रतं च दिव्यचक्षुर्द्वारोपलम्भाद्भूतभविष्यद्वर्त्तमानत्यागिगृहिभगवदवतारान्मनसि निधाय श्रीकृष्णस्य नारायणमुन्यात्मना त्यागित्वं कृष्णात्मना च गृहित्वमित्युभयविधावतारत्वं समीक्ष्य स्तौति। तत्र पूर्वार्द्धं यथाव्याख्यानम्। स्वसुखं स्वभक्तैर्मुन्यादिभिः सहैकत्रावाससख्यभावादिसंजातं विनोदविधानादिरूपं सुखमित्यर्थः। उपगते नारायणमुनिजामदग्न्यदत्तकपिलाद्यवताररूपेण संप्राप्ते, क्वचित् विहर्तुं गृहिवद्विहारं विधातुं प्रकृतिं रुक्मिण्यादिरूपां स्वशक्तिम् उपेयुषि कृष्णरामयज्ञादिरूपेण संप्राप्तवति। कथंभूता सा। यद्यस्याः सकाशात् भवप्रवाहः जगत्सर्गः। यद्वा। यस्माद्भगवतः भवप्रवाहः 'यतो वा इमानि भूतानि जायन्ते' इत्युक्त उत्पत्त्यादिप्रवाहस्तस्मिन्निति भगवद्विशेषणम्। रुक्मिण्याः प्रकृतित्वं तु 'आत्तरजोऽतिमात्रो मामोक्षते तदु ह नः परमानुकम्पा' इति रुक्मिणीवाक्यादेव ज्ञेयम्॥ ३२॥

इदानीं श्रीमूर्तिं वर्णयन् तत्र रतिं प्रार्थयते। त्रिभुवनमिति। त्रिषु भुवनेषु कमनं त्रिलोक्यामेकमेव कमनीयम्। त्रिभुवनानां कमनमिच्छा यस्मिंस्तदिति वा। तमालवत्तमालद्रुमपुष्पवन्नीलो वर्णो यस्य तत्। रवेः प्रातःकालीनसूर्यस्य करा इव स्वत एव गौरे पीते वरे निर्मले अम्बरे परिधानीयप्रावारपटौ यस्मिंस्तत्। अलककुलैः कुटिलकुन्तलजालैरावृतमाननाब्जं मुखपद्मं यस्मिंस्तथाभूतं च वपुः दधाने विजयसखेऽर्जुनेनातिसख्यत्वात्प्रतोदाश्वप्रग्रहोपादानपूर्वं सारथ्यकर्माचरणार्थमवस्थिते श्रीकृष्णे मे मुमूर्षोर्मम रतिः प्रीतिः अनवद्या अहैतुकी फलाभिसंधिरहिता एवेत्यर्थः। अस्तु॥ ३३॥ विजयसखित्वमेवानुवर्णयन् कृष्णे स्वमनोरमणं प्रार्थयते। युधीति। युधि संग्रामे तुरगरजोभिरितस्ततः संचारिताश्वखुरोत्थितरेणुभिर्विधूम्रा धूसरास्ते च ते विष्वक्च इतस्ततश्चलन्तः कचाः कुन्तलाः तैः लुलितं विकीर्णं श्रमवारि भक्तवत्सलताद्योतकस्वेदबिन्दुरूपं तेन अलंकृतमास्यं मुखाम्बुजं यस्य तस्मिन्, मम निशितशरैर्मदीयैस्तीक्ष्णैर्बाणैः विभिद्यमाना त्वग्यस्य तस्मिन्। विलसत् तैरेव मच्छरैस्त्रुट्यत् कवचं यस्य तस्मिन्। यद्वा। पूर्वार्धं यथाव्याख्यानम्। मम निशितशरैस्तीक्ष्णैरपि मदीयविशिखैरित्यर्थः। विभिद्यमानशब्दे भावप्रधानो निर्देशः। विगतं भिद्यमानत्वं यस्याः सा विभिद्यमाना त्वग्यस्य तस्मिन्। अच्छेद्याऽभेद्यत्वान्मदीयतीक्ष्णबाणैरणुमात्रमप्यक्षतत्वचीत्यर्थः। अत एव विलसत्प्रतिभटायुधजक्षतवर्जितत्वाद्विशेषेणशोभमानं कवचं वर्म यस्य तस्मिन् कृष्णे आत्मा मन्मानसम् अस्तु, दृढं यथा तथा तिष्ठत्वित्यर्थः॥ ३४॥ सपदीति। किंच सख्युरर्जुनस्य वचः 'सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत। यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्' इति वचनं निशम्याकर्ण्य सपदि तत्क्षणमेव। निजपरयोः स्वपरयोः बलयोः सैन्ययोः मध्ये रथं निवेश्य संस्थाप्य स्थितवति, अक्ष्णा कालात्मिकया स्वदृष्ट्या परसैनिकायुः दुर्योधनसैनिकानामायुः हृतवति। असौ भीष्मः, असौ कर्णः, असौ द्रोण इति तत्प्रदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुषो व्याकर्षणं कृत्वा सर्वथाऽर्जुनस्यैव जयं कृतवति इत्यर्थः। अनेन तत्र स्थित्वा कृताऽर्जुनसखिता प्रदर्शिता। पार्थसखे 'एककार्यं भवेन्मित्रं समप्राणः सखा मतः' इतिवाक्योक्तलक्षणवत्यर्जुनमित्रे श्रीकृष्णे मम रतिः अस्तु सर्वकालं स्तात्॥ ३५॥

न केवलं सपत्नायुर्हरणेनैवार्जुनस्य जयमावहत्, किं तु अविद्याहरणेनापीत्याह। व्यवहिता व्यूहरचनया दूरे स्थिता या पृतना कौरवसेना तस्या मुखमिव मुखमग्रभागस्तत्। मुखभागावस्थितं भीष्मं मां मदनुगतान् द्रोणादींश्चेत्यर्थः। निरीक्ष्य दोषबुद्ध्या 'हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान्'। इति संतर्कितदोषबुद्ध्या 'न योत्स्ये' इत्युक्त्वा इति शेषः। स्वजनवधात् विमुखस्य निवृत्तस्य तदुक्तं भगवद्गीतायाम्। 'एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्। विसृज्य सशरं चापं शोकसंविग्नमानसः' इति निवृत्तिं प्राप्तस्यार्जुनस्य कुमतिं दुष्टनिग्रहशिष्टपरिपालनलक्षणव्यापारबुद्धेर्विपरीतबुद्धिम् आत्मविद्यया 'अशोच्यानन्वशोचस्त्वम्' इत्यादिशास्त्राभिहिताध्यात्मविद्यया यः श्रीकृष्णः अहरत्। 'करिष्ये वचनं तव' इति दुष्टनिग्रहणे धर्मबुद्धिं कारितवान्। परमस्य परमेश्वरस्य तस्य श्रीकृष्णस्य चरणरतिः मे मम अस्तु॥ ३६॥ जिघांसया स्वस्योपर्य्याधावनदशायामवस्थितं रूपमन्तरे संदधानस्तदेव तत्प्राप्त्युपायमध्यवस्यन्नसौ मम तु महान्तमनुग्रहं कृतवानित्याह द्वाभ्याम्। स्वनिगममिति। स्वनिगमं 'युद्धे आयुधं न ग्रहीष्यामि किं त्वऽशस्त्र एवाहं साहाय्यमात्रं करिष्यामि' इत्येवंरूपां स्वप्रतिज्ञामित्यर्थः। अपहाय हित्वा मत्प्रतिज्ञां 'श्रीकृष्णं शस्त्रं ग्राहयिष्यामि' इत्येवंरूपां मम प्रतिज्ञामित्यर्थः। ऋतं सत्यं यथा भवति तथा अध्यधिकां कर्तुं यः श्रीकृष्णः रथस्थः अपि अवप्लुतः सहसैवावतीर्णः सन् इभं गजं हन्तुं हरिः सिंह इव शोभमानः धृतो रथचरणो निजं सुदर्शनचक्रं येन सः, तदा च चलन्ती गौः पृथ्वी यस्मात्सः संजातसंरम्भेण मानुष्यनाट्यविस्मृत्योदरस्थसर्वभूतभुवनभारेण प्रतिपदं चलायमानीकृतसकलवसुधः। गतं तेनैव संरम्भेण पथि पतितमुत्तरीयवस्त्रं यस्य तथाभूतः सन् मां हन्तुं अभ्ययात्॥ ३७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शितेति। एवं यदा समभ्ययात्तदा स्मयमानस्येति शेषः। आततायिनो धृतधनुषः मे मम शितास्तीक्ष्णा ये विशिखा बाणास्तैर्हतः अत एव विशीर्णदंशो विध्वस्तकवचः क्षतजेन रुधिरेण परिप्लुतो व्याप्तः सन् यः मद्वधाथ प्रसभं हठादेव अभिससार। वारयन्तमप्यर्जुनं निर्भर्त्स्य अतिक्रम्य च मां हन्तुं प्रसभतोऽभिजगामेत्यर्थः। एवं लोकदृष्ट्यार्जुनपक्षपातीव प्रतीयमानः सन्नपि, मद्भक्तेनोक्तं यद्वचस्तद्वृथा मास्त्विति मद्वचनरक्षणरूपं वस्तुतो ममानुग्रहमेव कृतवानिति भावः। सः मुकुन्दो निजजनमुक्तिप्रदः भगवान् मे मम गतिः स्वप्राप्त्युपायभूतः भवतु। यद्वा। शिता विशिखा मद्बाणाः हताः संप्राप्ता येन सः, तथापि अविशीर्णोऽशिथिलो दंशः कवचं यस्य सोऽखण्डितकवचः, क्षतजपरि रुधिरनिर्याणं विनापि, प्लुतः श्रमवार्य्याप्लुताङ्गः यः आततायिनः प्रहरतः अपि मे मम प्रसभं शस्त्रधारणप्रतिज्ञारूपं हठात्कारं विबुद्ध्येति शेषः। अभि, मां तथाविधं लक्षीकृत्य। मद्वधार्थं मां हन्तुं ससार समाययौ। सः मुकुन्दो मद्विधस्यापराधानऽगणयित्वापि मुक्तिप्रदः भगवान् मे मम गतिः शरणं भवतु॥ ३८॥ तदेवमन्यायसहस्रैरपि भृत्यरक्षाव्यग्रे कृष्णे रतिमाशास्ते। विजयेति। विजयोऽर्जुनस्तस्य रथ एव कुटुम्बं कुटुम्बवदङ्कत्यैरपि रक्षणीयो यस्य तस्मिन्। आत्तं गृहीतं तोत्रं प्रतोदो येन तस्मिन्। धृत उपात्ता हयानामश्वानां रश्मयः प्रग्रहा येन तस्मिन्, रश्माविति वक्तव्ये रश्मिनीत्यार्षम्। तच्छ्रिया तया सारथ्यश्रिया ईक्षणीयः शोभमानस्तस्मिन् भगवत्यचिन्त्यैश्वर्ये, इह युद्धे ये सर्वे हताः ते यं निरीक्ष्य, स्वरूपम्, अपहतपाप्मत्वादिगुणाष्टकविशिष्टं स्वाभाविकनिजरूपं मुक्तिमिति यावत्। गताः प्राप्ताः तस्मिन्कृष्णे मुमूर्षोर्मर्त्तु मुद्यतस्य मे मम रतिः अस्तु भवतु। अन्यायवर्तिन्यप्यस्मिन्मम रतिप्रार्थनमस्यानन्यभगवत्त्वादिति भावः॥ ३९॥

न केवलं क्षत्रधर्मेण तेन युध्यमानास्तेन हताश्च तं निरीक्ष्य स्वरूपं प्रापुः। अपि तु, तत्कामेन तमनुवर्त्तमानास्तद्दर्शनस्पर्शनजातानन्दमदान्धा अपि गोपवध्वस्तमेवापुरित्याह। ललितेति। ललिता सुन्दरा चासौ गतिर्गमनं सा च विलासो रत्यादिश्च वल्गुहासः सुन्दरतरहसनं च प्रणयनिरीक्षणं स्नेहपूर्वं समीक्षणं च तैः कल्पित उरुरधिको मानो यासां ताः गोपवध्वो गोपीजनाः उन्मदेनोद्रिक्तकामेनान्धाः स्वपरविवेकरहिताः कृष्णमेवात्मानं मन्यमाना इत्यर्थः। अत एव कृतं भगवत्कृतं पूतनानिरासगोवर्द्धनोद्धरणादिकं भगवतश्चेष्टितमिति यावत्। अनुकृतवत्याऽनुकुर्वन्त्यः सत्यः यस्य श्रीकृष्णस्य प्रकृतिं स्वभावं साधर्म्यमिति यावत्। अगन् आगमन्। मकारलोप आर्षः। किलेत्यनेन तत्प्रसिद्धिर्द्योत्यते। तस्मिन्मे रतिरस्त्विति पूर्वेणैवान्वयः अत्र। मञ्जुगत्यादिकं भागवतमात्मीयं वा बोध्यम्॥ ४०॥ युधिष्ठिरराजसूयसभास्थं स्वरूपमनुसंधाय तस्य स्वचक्षुर्विषयतां प्रार्थयते। मुनीति। युधिष्ठिरराजसूये मुनिगणाश्च नृपवर्या राजश्रेष्ठाश्च तैः संकुले व्याप्ते अन्तःसदसि सभामध्ये एषां मुनिगणादीनाम्, ईक्षणीयः अहो रूपमहो महिमेत्येवं बह्वाश्चर्येण विलोकनीयः सन्, अर्हणमग्रपूजाम्, युधिष्ठिरपृष्टमन्मुखेन कृतनिर्णयं मुनिगणसत्वप्रकृतिनृपत्याद्यभिमतमग्रपूजनमित्यर्थः। उपपेदे प्राप्तः। आत्मा अन्तरात्मा सर्वेषामन्तर्यामीत्यर्थः। एषः कृष्णः मम दृष्टिगोचरः दृष्टिविषयः सन् आविः भवतु। यावत्तनुत्यागमवतिष्ठत्विति भावः। यद्वा। आविरात्मा दृश्यमानप्रकटस्वरूपः सन्नेव दृशि गोचरः अस्त्वित्यन्वयः॥ ४१॥ अथ स्वनयनगोचरमेव कृष्णं सर्वान्तरात्मानमनुसंधाय तं प्राप्तोऽस्मीत्याह। तमिति। प्रतिदृशं दृशं प्रति। नैकधा सर्वजनानां चक्षुरभिमानित्वतश्चक्षुरिन्द्रियनियामकतयाऽनेकरूपत्वेन स्थितं सन्तमपि अर्कं सूर्यं ज्ञानी इव यथा, इवशब्दोऽत्र यथापर्यायः। एकमाकाशस्थसूर्याभिन्नतया एकस्वरूपमेव समधिगच्छति तथा अहमपि आत्मकल्पितानां भगवता स्वेनैव तत्तत्कर्मानुरूपं प्रदत्तकरणकलेवराणां शरीरभाजां प्राणिनां हृदि हृदि प्रतिहृदयं धिष्ठितमधिष्ठितम्, अन्तरात्मतया बहुत्वेनावस्थितमपि अजं तम् इमम् एकमेव तमेतं कृष्णमित्यर्थः। विधूतौ भेदमोहौ यस्य सः, सर्वान्तरात्मा कृष्णोऽन्यो मन्नयनगोचरोऽयं कृष्णोप्यन्य इत्येवंरूपा भेदः, देहसंबन्धिष्वात्मीयतासंमाननरूपं विपरीतज्ञानं मोहश्च तौ यस्य निवृत्तौ भवतः तथाभूतः सन्नित्यर्थः। समधिगतः अस्मि। सम्यगेव जानामीत्यर्थः। एनं श्लोकं मतभेदेनान्ये बुधास्तु नैकधा व्याख्यायन्ते तत्तेषामनुरूपमेवास्तु॥ ४२॥

कृष्ण इति। एवमुक्तप्रकारेण स्तुत्वेति शेषः। भगवति परमैश्वर्ये आत्मनि परमात्मनि कृष्णे मनश्च वाक्च दृष्टिश्च तासां वृत्तयो व्यापारास्ताभिः आत्मानं प्रत्यगात्मानम् आवेश्य तन्मूर्तिसंलग्नमनुसंधायेत्यर्थः। स भीष्मः अन्तः अन्तर्लीनः श्वासः प्राणवायुर्यस्य तथाभूतः सन् उपारमच्छरीरं विहायार्चिरादिगत्या परमपुरुषं संप्राप्त इत्यर्थः 'न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते' इति श्रुतेर्योगिनोऽस्यान्तःश्वासत्वमुक्तम्॥ ४३॥ संपद्यमानमिति। तदा भीष्मं निष्काले निर्दोषे ब्रह्मणि संपद्यमानं सर्वोपाधिविधूननपूर्वकं ब्रह्म प्राप्नुवन्तमित्यर्थः। आज्ञाय विबुध्य सर्वे ते युधिष्ठिरादयस्तत्रोपविष्टा जनाः दिनात्यये सायंकाले रात्रावित्यर्थः। वयांसि पक्षिणः इव तूष्णीं जोषं बभूवुः॥ ४४॥ तत्रेति। तत्र तदा देवाश्च मानवाश्च तैर्नादिता वादिताः दुन्दुभयः नेदुर्दध्वनुः। साधवः भागवताः शशंसुः। अहो भीष्मस्य भाग्यं माहात्म्यं चानितरसाधरणमिति तुष्टुवुः। राज्ञां नृपाणां पश्यतां सतामिति शेषः। पुष्पवृष्टयः खादाकाशात् पेतुः पतितवत्यः। भीष्ममूर्ध्नि इति शेषः। राज्ञां मध्ये ये साधवोऽनसूयवस्ते शशंसुरिति वा॥ ४५॥ तस्येति। हे भार्गव शौनक संपरेतस्य परलोकं प्राप्तस्य मुक्तस्येति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यावत्। तस्य भीष्मस्य निर्हरणादीनि दाहसंस्कारप्रभृतीनि कर्माणि कारयित्वा युधिष्ठिरः मुहूर्त्तं दुःखितः अभवत् संबभूव ॥ ४६ ॥ तुष्टुवुरिति। तथा वृष्टा भगवन्महिमावलोकनेन रोमाञ्चितगात्राः मुनयः कृष्णं तस्य कृष्णस्य गुह्यं वेदान्तवेद्यं स्वरूपयाथात्म्यं तत्प्रकाशकानि यानि नामानि तैः। यद्वा। तदीयवेदशिरोगीताद्यन्तरहस्यनामभिः तुष्टुवुरस्तुवन्। ततः ते मुनयः कृष्णो हृदये येषां ते, कृष्णे हृदयं मनो येषामिति वा तथाभूताः सन्तः पुनः स्वाश्रमान् प्रययुः प्रपेदुः ॥ ४७ ॥ तत इति। ततः युधिष्ठिरः सहकृष्णः श्रीकृष्णेन सहितः गजाह्वयं हास्तिनपुरं गत्वा पितरं धृतराष्ट्रं तपस्विनीं पतिव्रतां गान्धारीं च सान्त्वयामास ॥ ४८ ॥ पित्रेति। ततः विभुः राज्यकरणशक्तिमान् राजा युधिष्ठिरः पित्रा धृतराष्ट्रेण अनुमतः अनुज्ञातः वासुदेवानुमोदितः श्रीकृष्णेन कृतानुमोदनः संश्च पितृपैतामहं पित्रादिक्रमप्राप्तं राज्यं धर्मेण शास्त्रोक्तवर्त्मना चकार ॥ ४९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः

शौनक उवाच

हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः।
सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः ॥ १ ॥

हस्तिनापुरतो यातुर्दशमे कृतकर्मणः। हरेः स्त्रीभिः कृता प्रोक्ता स्तुतिस्तद्द्वारिकागमः ॥ १ ॥

धर्मेण राज्यं चकारेत्युक्तं तदेव विस्तरतो बुभुत्सुरुक्तानुवादपूर्वकं पृच्छति शौनकः। हत्वेति। स्वरिक्थं स्वराज्याख्यं रिक्थम्, अस्माकम् इति स्पर्द्धन्ते, इति स्वरिक्थस्पृधस्तान् स्वदायलिप्सूनित्यर्थः। यद्वा। स्वरिक्थाय स्पृत् संग्रामो येषां तान्, अत एव आततायिनो धनादिहरणादाततायित्वं प्राप्तान्, प्रतिवीरं हत्वा मन्तुकामानिति वा दुर्योधनादीन् हत्वा प्रत्यवरुद्धं प्रत्यधिगतं प्रतिप्राप्तमिति यावत्। भोजनं राज्यं येन सः, धर्मभृतां धर्मधारिणां वरिष्ठः श्रेष्ठः। गविष्ठ इति पाठे, गविष्ठः वचसिस्थितः धर्मभृतां व्यासादीनामिति तत्पक्षे बोध्यम्। व्यासादिमुनिवचनावस्थित इत्यर्थः। युधिष्ठिरः अनुजैर्भीमादि-स्वभ्रातृभिः सह कथं प्रवृत्तः, राज्यशासने इति शेषः। ततो राज्यशासनानन्तरं किम् अकारषिदकार्षीत् इति प्रश्नद्वयम् ॥ १ ॥ तत्र तावत्कथं प्रवृत्त इति प्रश्नस्योत्तरं श्रीकृष्णप्रीतिं पर्यालोच्य राज्ये प्रवृत्त इत्येवंरूपमाह सूतः। वंशमिति। भवभावनः सृष्टिवर्द्धनः ईश्वरः हरिः, वंशोऽन्ववाय एव दवो वनं तस्मादुद्भूतो यः क्रोधरूपोऽग्निस्तेन निर्हृतं दग्धं, यथा वेणूनां वनं वातप्रेरणया परस्परसंघर्षणजाग्निना दग्धं भवेत्तथा दग्ध्वा विनष्टमित्यर्थः। कुरोः वंशं संरोहयित्वा परीक्षिद्रक्षणेन संरोह्य अङ्कुरितं कृत्वेत्यर्थः। युधिष्ठिरं निजराज्ये निवेशयित्वा प्रीतमनाः बभूव ह स्फुटमेतत्। कृतकृत्यत्वादिति भावः। भवभावन इत्यनेन वंशसंरोहणशक्तिर्दर्शिता। ईश्वर इत्यनेन स्वभक्तस्य पुनः स्वराज्यस्थापनरूपं माहात्म्यं सूचितम्। हरिरित्यनेन स्वाश्रित-संसारोन्मूलनकर्त्तुर्हरेः पाण्डवरिपुसंहरणं किमु वक्तव्यमिति न्यायो दर्शितः ॥ २ ॥

प्रवृत्तौ हेतुमुक्त्वा किमकार्षीदिति प्रश्नोत्तरमाह चतुर्भिः। निशम्येति। भीष्मोक्तम् अच्युतोक्तं च निशम्य अथ प्रवृत्तं सुप्रतिष्ठितं च तद्विज्ञानं देहात्मविवेकादिरूपं च तेन विधूतो विनष्टः विभ्रमो देहात्मादिविशिष्टो भ्रमो यस्य सः, अनुजैर्भीमा-दिभिरनुवर्त्तितः सेवितः युधिष्ठिरः, अजितस्य वामनस्य आश्रयो यस्य सः इन्द्रः इव अजितस्य श्रीकृष्णस्याश्रयो यस्य तथाभूतः सन् परिध्युपान्तां दिगन्तावधि चतुःसमुद्रान्तामित्यर्थः। गां पृथिवीं शशास पालयामास ॥ ३ ॥ तस्य राज्यमनुवर्णयन् कृष्णाश्रयफलमाह। काममिति। अजातशत्रौ राज्ञि सतीत्यग्रिमतृतीयश्लोकोक्तमत्रानुषञ्जनीयम्। पर्जन्यो मेघः कामं यथेष्टं ववर्ष। मही पृथ्वी, सर्वान् कामान् दोग्धि प्रपूरयतीति तथाभूता अभूदिति शेषः। ऊधस्वतीरूधस्वत्यः ऊधः क्षीराशयः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्थूलोधस इत्यर्थः। गावो धेनवः पयसा क्षीरेण मुदा व्रजान् गोष्ठानि सिषिचुः स्म अभ्यषिञ्चन् ॥ ४ ॥ नद्य इति। तस्य युधिष्ठिरस्य संबन्धिन्यः नद्यः समुद्राः गिरयः रत्नानि फलन्ति स्मेति शेषः। वनस्पतयो वृक्षाश्च वीरुधो मातुलिङ्गादयश्च ताभिः सह वर्त्तमानाः सवनस्पतिवीरुधः सर्वाः ओषधयो व्रीह्यादयः अन्वृतु ऋतावृतौ कामं यथेष्टं फलन्ति पफलुरित्यर्थः। वै निश्चितमेव ॥ ५ ॥ नाधय इति। अजातशत्रौ युधिष्ठिरे राज्ञि नृपतौ सति जन्तूनां प्राणिनां कदाचित् आधयो मानस्यो व्यथाः व्याधयो दैहिकाश्च तद्रूपाः, दैवानि च भूतानि च आत्मा च हेतुर्निमित्तं येषां ते तथाभूताः क्लेशाः न अभवन्, तत्राधिदैविका अनावृष्ट्यादयः क्लेशाः, आधिभौतिका उन्मादादयः क्लेशाः, आध्यात्मिकाः कुष्ठादयः क्लेशा बोध्याः ॥ ६ ॥ पूर्वप्रस्तुतस्य निवृत्तप्रयाणस्य भगवतः कृष्णस्य वृत्तान्तमाह, उषित्वेत्यादिना यावदेकादशाध्यायसमाप्ति। उषित्वेति। सुहृदां युधिष्ठिरादीनां विशोकाय शोकाभावाय शोकनिवृत्तिं विधातुमित्यर्थः। च स्वसुः स्वभगिन्याः सुभद्रायाश्च प्रियकाम्यया हरिः हास्तिनपुरे कतिपयान् मासान् उषित्वाऽवस्थाय ॥ ७ ॥

आमन्त्र्येति। तं युधिष्ठिरम् आमन्त्र्य पृष्ट्वा द्वारिकां गमिष्यामीति युधिष्ठिरायोक्त्वेत्यर्थः। तेन अनुज्ञातः सन् तं परिष्वज्य अभिवाद्य शिष्टाचाररक्षणाय तदभिवादनं कृत्वा कैश्चित्समवयस्कैः परिष्वक्तः अर्जुनादिभिरालिङ्गित इत्यर्थः। अभिवादितः सहदेवादिभिः कृताभिवन्दनश्च हरिः रथम् आरुरोह। इत्युभयोरेकसंबन्धः ॥ ८ ॥ सुभद्रेति। तदा सुभद्रा, द्रौपदी, कुन्ती, तथा, विराटतनयोत्तरा, गान्धारी, धृतराष्ट्रः, युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातो दुर्योधनानुजः, गौतमः कृपाचार्यः, यमौ नकुलसहदेवौ च ॥ ९ ॥ वृकोदर इति। वृकोदरो भीमः। धौम्यश्च मत्स्यसुतादयः उत्तराप्रभृतयः मत्स्यसुतायाः पुनर्ग्रहणं स्वगर्भरक्षककृष्णविरहे मोहाधिक्यात्। यद्वा। मत्स्यसुता सत्यवती तदादयः स्त्रियः। चकारादन्येऽपि। विमुह्यन्तः मोहं गताः कर्त्तव्यतामजानन्तः सन्तः शार्ङ्गधन्वनः कृष्णस्य विरहं विश्लेषं न सेहिरे नैवासहन्त ॥ १० ॥ पार्था मुकुन्दविरहं न सेहिरे इत्येतदाश्चर्यं न भवति किं तु तेषामेतद्युक्तमेवेति कैमुत्यन्यायेनाह। सत्सङ्गादिति द्वाभ्याम्। सत्सङ्गात्साधुजनानां प्रसङ्गाद्धेतोः मुक्तः परित्यक्तः दुःसङ्गः पुत्रदारादिविषयः कुसङ्गो येन सः बुधः सदसद्विवेकवान्मनीषिजनः कीर्त्यमानं साधुभिः संकथ्यमानं रोचनं रुचिजनकं यस्य भगवतः यशः सकृदेकवारमपि आकर्ण्य हातुं सत्सङ्गं त्यक्तुं न उत्सहते न शक्नोति ॥ ११ ॥ तस्मिन्निति। तस्मिन् श्रीकृष्णे भगवति दर्शनं च स्पर्शश्च संलापश्च शयनं च आसनं च भोजनं च तैः न्यस्ता निहिता धीर्मतिर्येषां ते तथाभूताः पार्थाः पाण्डवाः तस्य विरहं वियोगं कथं सहेरन् न कथंचित्सोढुं शक्नुयुरित्यर्थः ॥ १२ ॥

विरहमसहमानानां तेषां भक्तिप्रसारातिरेकमाह। सर्वे इति। अनिमिषैः पक्ष्मव्यापाररहितैः अक्षैर्नेत्रैः तं श्रीकृष्णं वीक्षन्तः समीक्ष्यमाणाः अनु श्रीकृष्णस्य पश्चात् द्रुतानि प्रयातानि चेतांसि येषां ते कृष्णानुगतहृदया इत्यर्थः। ते पूर्वोक्ताः सर्वे स्नेहसंबद्धाः स्नेहेनातितरां सक्ताः सन्तः। पाठान्तरे स्नेहश्च संबन्धश्च तयोः समाहारस्तस्मात् स्नेहाच्छारीरसंबन्धाच्चेत्यर्थः। तत्र तत्र अर्हणाद्यानयनार्थमितस्तत इत्यर्थः। ह स्फुटं यथा तथा विचेलुः परिबभ्रमुः ॥ १३ ॥ एवं समासत उक्त्वा यदा सज्जीभूय स चलितुमुद्युक्तस्तत आरभ्य तद्वृत्तमाह। न्यरुन्धन्निति। तदा बान्धवाश्च ताः स्त्रियश्च कुन्तीप्रभृतयो नार्य इत्यर्थः। अगाराद्गृहात् देवकीसुते श्रीकृष्णे निर्याति निर्याते सति अभद्रममङ्गलं नो स्यात् न भवेत् इति बुद्ध्या औत्कण्ठ्यात्प्रेमपूर्वकानुध्यानात् उद्गलत् उद्गच्छत् अपि बाष्पमश्रु न्यरुन्धन् स्तम्भितवत्यः ॥ १४ ॥ मृदङ्गेति। तदा मृदङ्गाश्च शङ्खाश्च भेर्यश्च ताः। तत्र मृदङ्गा मुरजाः, शङ्खाः कम्बवः, भेर्यः चर्मपिहिता दीर्घमहद्दारुकृता वाद्यविशेषाः। तथा वीणाश्च पणवाश्च गोमुखाश्च ते वीणा वल्लक्यः, पणवा ढक्का एतन्नामानो वाद्यविशेषाः, गोमुखा रणशृङ्गादयः। धुन्धुर्यश्चानकाश्च घण्टाश्च ते। धुन्धुर्यः काख्यात्मका वाद्यविशेषाः, आनकाः पटहाः, घण्टाः प्रसिद्धाः आद्या येषां ते। दुन्दुभयस्तूरश्चीनवाद्यविशेषाः नेदुः, मृदङ्गादयो दशवाद्यभेदास्तदा दध्वनुरित्यर्थः ॥ १५ ॥ प्रासादेति। कुरुणां नार्यः कुर्वङ्गनाः दिदृक्षया श्रीकृष्णं द्रष्टुमिच्छया प्रासादानां राजभवनानां शिखराण्यग्रप्रदेशास्तेष्वारुढा उपविष्टाः। प्रेम स्नेहश्च व्रीडा ह्रीश्च स्मितं मन्दहासश्च तत्सहितमीक्षणं दर्शनं यासां ताः सत्यः। पाठान्तरे प्रेमव्रीडस्मितेक्षणानि सन्त्यासामिति तथा। द्वन्द्वान्मत्वर्थीयोऽर्शाद्यच्। व्रीडशब्दस्य क्लीबत्वे मानं महाकविप्रयोगः स तु 'व्रीडमावहति मे' इति रघुवंशैकादशे सर्गे रामं प्रति परशुरामवाक्यगः। कृष्णे कुसुमैः ववृषुः ॥ १६ ॥

सितातपत्रमिति। प्रियः श्रीकृष्णस्य प्रीतिविषयः गुडाकाया निद्राया ईशः गुडाकेशो जितनिद्रोऽर्जुनः 'निद्रा गुडाका संप्रोक्ता प्रमीला मृत्युरुच्यते' इत्यभिधानात्। इन्द्रकीलके विनिद्रो भूत्वा तपस्तप्त्वा पशुपतेः सकाशादेतन्नामार्जुनो लब्धवान्। प्रियतमस्य श्रीकृष्णस्य शिरसि इति शेषः। मुक्तानां मौक्तिकानां दामभिः सरैर्विभूषितं मौक्तिकमालालंकृतप्रान्तमण्डलम्। रत्नमयो दण्डो यस्य तत् सितातपत्रं श्वेतच्छत्रं जग्राह दधारेत्यर्थः। ह स्फुटम् ॥ १७ ॥ उद्धव इति। उद्धवः सात्यकिश्च परमाद्भुतेऽत्युत्तमे व्यजने जगृहतुः एव। पथि राजमार्गे कुसुमैर्नानाविधैः सुमनोभिः विकीर्यमाणः मधुपतिः श्रीकृष्णः रेजे शुशुभे ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अश्रूयन्तेति। निर्गुणस्य सत्वादिप्राकृतगुणरहितस्य गुणा दिव्यगुणा आत्मानः स्वरूपभूता यस्य, तस्य भगवतः तेजोबलादिषाड्गुण्यस्वभावस्येत्यर्थः 'सत्वादयो न सन्तीशे यत्र च प्राकृता गुणाः' इति। 'तेजोबलैश्वर्यमहावबोधः स्ववीर्यशक्त्यादिगुणैकराशिः' इत्यादिविष्णुपुराणाद्युक्तेर्भगवतः प्राकृतगुणरहितत्वेन निर्गुणत्वं दिव्यगुणवत्त्वेन सगुणत्वम्। नानुरूपाश्च ता अनुरूपाश्च, तत्र तत्र द्विजेरिताः अत एव सत्याः, आशिष अश्रूयन्त। तत्र नानुरूपा अवाप्तसमस्तकामत्वात्। अनुरूपा भक्तिस्नेहकारित्वात। यद्वा। निर्गुणशब्दपर्यायपरमानन्दस्य सुखीभव, इत्यादयो नानुरूपाः। गुणात्मनो मानुषनाट्यधरस्यानुरूपाश्च द्विजाशिष इति ॥ १९ ॥ न केवलं कुरुपुरस्त्रियो हरौ पुष्पावकीरणमकुर्वन्, किं तु स्तुतिमपीति भावेनाह। अन्योऽन्यमिति। उत्तमश्लोके श्रीकृष्णे एव चेतांसि यासां तासां कौरवेन्द्रपुरस्त्रीणां सर्वेषां श्रुतीनां मनोहरः सुखकरः। यद्वा श्रुतयः श्रोत्राणि च मनांसि च हरति वशीकरोतीति तथाभूतः, अन्योन्यं परस्परं संजल्पः संलापः आसीत्। यद्वा उत्तमश्लोकचेतसां कौरवेन्द्रपुरस्त्रीणां तदा अन्याऽन्यं संजल्पः आसीत्। तर्हि सः स्त्र्यालापमात्रस्वरूपः स्यादिति चेन्न। किं तु सर्वाश्च ताः श्रुतय उपनिषदश्च तासां मनोहरः, उपनिषदोऽपि मूर्तिमत्यः यं जल्पमभ्यनन्दंस्तथाभूत इत्यर्थः ॥ २० ॥

तत्र तेजः सौन्दर्याद्यतिशयेन विस्मिताभ्यः सखीभ्यः अन्याः स्त्रियः कथयन्ति, नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति प्राहुः। स वै इति। गुणेभ्यः अग्रे सत्वादि प्रकृतिगुणक्षोभात्पूर्वमित्यर्थः। निशि प्रलये सति च निमीलितात्मन् निमीलिता अन्तर्लीनतां प्राप्ताः आत्मानो जीवा यस्मिंस्तस्मिन्। निमीलितात्मन्नित्यत्र 'सुपां सुलुक्' इत्यनेन सप्तम्या लुप्तत्वादिदं लुप्तसप्तम्यन्तं बोध्यम्। एवंभूत ईश्वरे वैराजपुरुषे जगदात्मनि वैराजतत्कारणभूततत्त्वादीनां च लयस्थानभूते प्रधानपुरुषे इत्यर्थः। लीने सतीति शेषः। आत्मनि जगदात्मनि तस्मिन्प्रधानपतौ, अविशेषे प्राकृतविशेषभाववर्जितेऽक्षरब्रह्मणीत्यर्थः। यद्वा। अविशेषे नानाविधसकलाप्राकृतपदार्थवत्त्वेऽपि तेजःप्राचुर्यात्तेजोमयतयाऽविशेषवत्प्रतीयमानेऽक्षरब्रह्मणीत्यर्थः। तथा च श्रुतिः 'स वेदैतत्परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रम्' इति। लीने सति। एवं सुप्तशक्तिषु जगदुपकरणभूतासु सर्वासु शक्तिषु सुप्तासु सतास्वित्यर्थः। पुरातनः पुराणः पुरुषः यः एकः स्वसमानापरवर्जितः आसीत्, न तु केवलः। एकशब्दस्यात्र केवलार्थत्वे 'यः स्वभक्तेभ्यो रमते स मे सर्वस्वम्' इति श्रुतिप्रकोपः स्यात्, स वै स एव अयम्। किलेति परमार्थे। नैवानयोः कश्चिद्विशेष इति भावः। यद्वा। संजल्पमेवाह। स वै किलेत्यादिदशभिः। तावत्प्रलयदशायां कृत्स्नजगदुपादानत्वे निमित्तत्वे च य एकोऽवस्थितः। यश्च ततो 'बहु स्यां प्रजायेय'। 'नामरूपे व्याकरवाणि' इति संकल्पपूर्वकं नामरूपव्याकर्त्ता यश्च 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति वेदाविःकर्तृत्वेन च प्रसिद्धः। यश्च मुमुक्षुभिर्ध्येयो दृश्यश्च वेदान्तवेद्यस्वरूपस्वभावः। यश्च जगत्सर्गस्थितिलयलीलः, स एवायं कृष्ण इति जल्पन्ति चतुर्भिः। निशि प्रलयदशायां गुणेभ्यः अग्रे सत्वादिगुणसमुन्मेषात्पूर्वं सुप्तशक्तिषु कर्मरूपासु शक्तिषु फलप्रदानाय प्रवृत्तास्वित्यर्थः। जगदात्मनि चिदचिद्रूपजगच्छरीरके ईश्वरे नियन्तरि निमीलितान् निवृत्तसर्गादिसंकल्पे अत्रात्मा मतिः सा संकल्परूपोपादेया आत्मनि स्वस्मिन् अविशेषे सति विशेषाः पृथिव्यादिभूतानि 'महदाद्या विशेषान्ता' इति प्रयोगात। कार्यवर्गरहिते सतीति वा। यः एकोऽद्वितीयः अविभक्तचिच्छरीरकतयैक उपादानभूतः। अविभक्तनामरूपता ह्युपादानता। एकशब्दे केवलार्थः अद्वितीयार्थश्च वर्तते, तत्र केवले उपादानता, अद्वितीये निमित्तता, एवंविधो यः आसीत्, स वै स एव अयं पुरातनः पुरुषः किलेति ॥ २१ ॥

तदेवं सृष्टेरादौ प्रलयानन्तरं च सूक्ष्मचिदचिच्छरीरतयावस्थानमुक्त्वा सृष्टिप्रलययोर्मध्ये स्थूलचिदचिच्छरीरतयावस्थानमाहुः। स एवेति। न विद्येते नामरूपे यस्य स चासावात्मा जीवस्तस्मिन्। रूपं च नाम च रूपनामनी ते विधित्समानश्चिकीर्षुः। शास्त्रकृद्वेदप्रवर्त्तकः, य एकः अद्वितीयश्च भूत्वा तदा त्वस्थादेव। भूयः पुनरपि निजवीर्येनोदितां बहु स्यामित्यादिस्वसंकल्पोद्भूतकालशक्तिप्रेरिताम्, स्वजीवमायां स्वशेषभूतस्य धर्मिणः, जीवस्य, ज्ञानरूपधर्मस्य तिरोधायिकाम्, सिसृक्षतीं सृष्टुमुन्मुखीम्, प्रकृतिम् अनुससार। अन्तरात्मतया प्रविश्य नामरूपे व्याकरोत्। सः एव अयं कृष्ण इति संवन्धः। भूय इत्यनेन सृष्टिप्रवाहस्यानादित्वं सूचितम्। 'धाता यथा पूर्वमकल्पयत्' इति श्रुत्या तथोक्तत्वात् ॥ २२ ॥ अस्य दर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः। स वा अयमिति। अत्र कर्मभूमौ जितानीन्द्रियाण्यन्तर्बाह्यानि यैस्ते जितेन्द्रियाः। निर्जितः प्राणायामेन वशीकृतः मातरिश्वा प्राणवायुर्यैस्ते। ह्रस्वत्वमार्षम्। सूरयो योगिनः भक्त्या उत्कलितः संयुक्तः अमलो रागादिमलरहितश्च य आत्मा तेन, भक्तियुक्तनिर्मलान्तःकरणेनेत्यर्थः। यत्पदं यस्य स्वरूपं पश्यन्ति। यः एषः सत्त्वमन्तःकरणं परिमार्ष्टुं संशोधयितुं च अर्हति कृष्णः अयं वै। उक्तविधो भगवानयं कृष्ण एवेत्यर्थः। ननु निश्चये। द्वितीयमवधारणमितरसदृशनिषेधार्थम्। एवं श्रवणाद्युपायसंस्कृतया भक्त्या यावदन्तःकरणं शुध्यति तावन्न कर्मयोगादिभिरिति भावः। यद्वा। ननु इति छेदः, नु अहो एष कृष्णः, सत्त्वं सांप्रतं जातमेतत्स्वरूपविषयकं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमनेनाप्रत्यक्षीकर्त्तुं न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्हति। ततोऽस्माभिरपि अनेन सहैव गन्तव्यमित्यर्थः। परिमार्ष्टुमित्यत्र परिपूर्वो मार्ष्टिर्वर्जनार्थः ॥ २३ ॥ अथास्य पुण्यश्लोकतामप्याहुः। स वै इवि। हे सखि गुह्येषु वेदेषु वेदान्तापरसंज्ञासूपनिषत्सु गुह्यवादिभिः वेदवादिभिः वेदान्तगुह्यस्वरूपगुणयाथात्म्योपदेष्टृभिरित्यर्थः। अनुगीता अनुगीयमाना सती विशुद्धा कथा यस्य सः, यश्च एकः एव सन्, आत्मनः स्वस्य लीला तया लीलार्थमित्यर्थः। जगत् सृजति, अवति रक्षति, अत्ति संहरते। अत्र जगति न सज्जते। जगदन्तरात्मतयावस्थितोऽपि तद्गतदोषैर्न युज्यते इत्यर्थः। स ईशः परमेश्वरः अयं कृष्णः वै ॥ २४ ॥

नन्वयमेवंविधश्चेत्किमर्थं यादवान्यतमरूपेगात्रतिष्ठते इत्याशङ्कायां दुष्कृतिविनाशाय साधुपरित्राणाय च प्रतियुगमवतीर्य दुष्कृतीनां विनाशं सद्धर्मपरित्राणं च करोति तथाऽधुनाप्येवंरूपेणावतीर्ण इत्यभिप्रायेण जल्पन्ति। यदा हीति। यदा तमोधियः तमोव्याप्तमतयः नृपाः तमोऽधिकासुरप्रकृतयो राजान इत्यर्थः। अधर्मेण धर्मविरुद्धेन श्रुतिस्मृत्यविहितप्राणिहिंसादिकर्मणा जीवन्ति स्वशरीरयात्रां कुर्वन्ति तत्र तदा एष उक्तविधः श्रीहरिः भवाय दुष्कृतिविनाशपूर्वं साधूनामभ्युदयाय सत्त्वतः शुद्धसत्त्वेन युक्तानीति शेषः। शुद्धसत्त्वमयानीत्यर्थः। रूपाणि युगे युगे दधद्बिभ्राणः सन्, भगमैश्वर्यम्, सत्यं सत्यप्रतिज्ञत्वम्, ऋतं यथार्थोपदेशकत्वम्, दयां भक्तकृपाम्, यशोऽद्भुतकर्मत्वं च धत्ते। स्वाभाविकैरेतैर्धर्मैरनपेत एवावतिष्ठते इत्यर्थः। यदा सत्त्वत इत्यत्र सात्वत इति, धत्ते इत्यत्र धर्ममिति च पाठः, तदा एषः सात्वतः सात्त्विकान् देवादीननुगृह्णन् धर्मादिनामयुक्तानि रूपाणि युगे युगे दधद्धानः वर्त्तते इति शेषः। वराहमत्स्यादिरूपस्य भूम्युद्धरणकर्मणा धर्माख्या। कपिलादेरणिमाद्यष्टैश्वर्ययोगाद्भगाख्या। कल्क्यादेस्तमोविनाशकसत्त्वगुणाभिव्यञ्जकतया सत्याख्या। व्यासादेर्ज्ञानप्रवर्त्तकत्वेन ऋताख्या इति विवेकः। तस्मादिदानीमधर्मप्रवर्त्तकान् जरासंधादीन्निगृह्णन्देवावतारात् युधिष्ठिरादीननुगृह्णन्कृष्णात्मनावतीर्णः किलेत्यर्थः ॥ २५ ॥ यतो भगवानुक्तविधः श्रीमन्नारायण एव श्रीकृष्णरूपेण यदुकुलेऽवतीर्य मधुवने विहृत्य द्वारकायामधिवसन्प्रजाः पालयन्नष्टाभिर्महिषीभिरन्याभिश्च विहरन् योऽवर्त्तत, तत्संबन्धवतां यदुकुलमधुवनद्वारिकावनितादीनां भाग्यं तपश्चैतावदिति वाचा मनसा चाऽवगन्तुमशक्यमिति श्रीकृष्णावतारसौभाग्यवर्णनेन विशेषतो जल्पन्ति। अहो इति षड्भिः। यद्यस्मात् पुंसां सात्वतानाम् ऋषभो नायकः, श्रियो लक्ष्म्याः प्रियः पतिः, एषः श्रीकृष्णो भगवान् स्वजन्मना यदोः कुलम् अञ्चति पूजयति प्रशस्तं करोतीति यावत्। ततः तत् अलं श्लाघ्यतमम्। चङ्क्रमणेन पुनः पुनः संचारेण, मधोः वनं मथुरां च अञ्चति प्रशस्तं करोति। अतः मधोः वनम् अलं नितरां पुण्यतमम्। अहो अहो आश्चर्यादप्याश्चर्यं नैतद्धन्यत्वं वक्तुं शक्यमिति भावः ॥ २६ ॥

अहो इति। अहो बत इदं त्वत्याश्चर्यम्। किं तत् कुशस्थली द्वारिका स्वर्यशसः तिरस्करी, स्वर्ग उत्कृष्ट इति यत्तद्यशस्तस्य परिभवकर्त्रीत्यर्थः। भुवः पृथिव्याः पुण्ययशस्करी पवित्रकीर्तिसंपादयित्री भवति। यद्यतः यत्प्रजा यत्रत्याः सर्वाः प्रजाः अनुग्रहेण ईषितं प्रेषितं यत्स्मितं तत्पूर्वोऽवलोकः समीक्षणं यस्य तम्। पाठान्तरे अनुग्रहेषितमनुग्रहार्थमिष्टं स्मितसहितोऽवलोको यस्य तं स्वपतिमात्मनाथं श्रीकृष्णं नित्यं पश्यन्ति। स्वशब्दस्यात्मार्थत्वात्पतिशब्दस्य नाथार्थत्वात् आत्मनाथमित्यनेन न पित्रादिवद्देहमात्रपतिरिति ज्ञेयमस्यात्मात्मत्वात्। अनुग्रहोषितमिति पाठेऽनुग्रहार्थम् उषितं कृतनिवासमित्यर्थः। एतत्स्वर्गे नैवास्तीति भावः ॥ २७ ॥ नूनमिति। अस्येति कर्त्तरि षष्ठी। अस्यानेन कृष्णेनेत्यर्थः। गृहीताः पाणयो यासां ताभिः रुक्मिण्याद्यङ्गनाभिः ईश्वरः परमेश्वरोऽयं कृष्णः व्रतानि कृच्छ्रचान्द्रायणादीनि च स्नानानि गङ्गादिपुण्यजलावनानि च हुतानि वह्नौ विधिना होमविधानानि च तान्यादयो यस्य दानादेस्तेन समर्चितः सम्यक् पूजितः। नूनं हे सखि हि यस्मात् या अस्य गृहीतपाणयः स्त्रियः मुहुर्वारंवारम् अधरामृतमस्याधरसुधां पिबन्ति। अनाराधितेश्वराणामेतद्दुर्लभमिति भावः। यस्मिन्नधरामृतमाधुर्यास्वादने आशयश्चित्तं यासां ताः व्रजस्त्रियः संमुमुहुः संमोहं प्राप्ताः तथाविधमस्याधरामृतपानं कुर्वाणा एतदङ्गना बहुभाग्या इति भावः ॥ २८ ॥ एतत्प्रपञ्चयति द्वाभ्याम्। या इति। शुष्मिणो बलातिरेकमत्तान् चैद्यप्रमुखान् शिशुपालप्रभृतीन् प्रमथ्य मथनपूर्वकं विजित्य स्वयंवरे वीर्यं स्वबलमेव शुल्कमुपायनत्वेन देयं द्रव्यं तेन याः हृता आनीताः, प्रद्युम्नश्च साम्बश्च आमश्च ते सुता यासां रुक्मिणीजाम्बवतीनाग्नजितीनां ता आदयो यासां सत्यभामादीनां ताः। तथा याः भौमवधे नरकासुरवधे कृते सति सहस्रशः अपरा अन्याश्च आहृताः। अस्य श्लोकस्योत्तरश्लोकेनान्वयः ॥ २९ ॥

एता इति। एताः सर्वाः स्त्रियः, निरस्तं शौचं शुचित्वं यस्मात्। अपास्तं गतं पेशलं भद्रं स्वातन्त्र्यं मार्दवं वा यस्मात्तथाभूतमपि स्त्रीत्वं परं केवलं साधु शोभनं कुर्वते। बत हर्षे। यासां स्त्रीणां गृहात्, पतिः जन्ममरणक्लेशाद्रक्षणकर्त्ता, पुष्करलोचनः कमलनयनः, कृष्णः, आहृतिभिर्हे भैष्मि एहीत्यादिभिराह्वानैः हृदि स्पृशन् हृदयंगमः सन्, जातु कदाचिदपि न अपैति न निर्गच्छति। यद्वा। आहृतिभिः पारिजातादिप्रियवस्त्वाहरणैः, हृदि स्पृशन्सत्यभामाद्याः आनन्दयन् सन् यासां गृहाद्गृहं संप्राप्य, जातु नामैति सद्गृहान्न सन्त्यजति। अहो सख्यः किं वाच्यः एतत्संबन्धसंभवानन्दः सोऽयं केवलमनुभववेद्य एवेति भावः ॥ ३० ॥ एवमिति। एवममुना प्रकारेण गदन्तीनां पुरयोषिताम्, गिर उक्तविधा वाचः, प्रणयभरभरिताः शुद्धाश्च वाणीरित्यर्थः। सस्मितेन मन्दहाससहितेन निरीक्षणेन हासकिर्मीरितकटाक्षेणेत्यर्थः। अभिनन्दयन्प्रतिपूजयन्सन्नेव सः हरिः ययौ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगाम ॥ ३१ ॥ अजातशत्रुरिति । तदा अजातशत्रुर्युधिष्ठिरः परेभ्यः शङ्कितः सन् मधुद्विषो मध्वसुरहन्तुरपि तस्य गोपीथाय रक्षणाय चतुरङ्गिणीं हस्त्यश्वरथपदातिमतीं पृतनां सेनां स्नेहात प्रायुङ्क्त प्रयुक्तवान् ॥ ३२ ॥ अथेति । अथ शौरिः श्रीकृष्णः विरहेण स्वविश्लेषेणातुरानऽतीव दुःखितान् दूरगतान् दूरप्रदेशपर्यन्तमायातान् । दृढं स्निग्धमनुरागो येषां तान् कौरवान् युधिष्ठिरादीन् पाण्डोः कुरुवंशजत्वात्पाण्डवा अपि कौरवा एव । संनिवर्त्य सान्त्वनेन सम्यक् प्रतिवार्य प्रियैरुद्धवादिभिः सह स्वनगरीं द्वारिकां प्रायात्प्रययौ ॥ ३३ ॥

कुर्विति । कुरवश्च जाङ्गलाश्च पाञ्चालाश्च शूरसेनाश्च तान्, सयामुनान् यामुनदेशसहितान् देशान् ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् अथ सारस्वतान् क्रमोऽत्र न विवक्षितः ॥ ३४ ॥ मरुधन्वमिति । मरुर्निरुदको देशः धन्वोऽल्पोदको देशस्तत्समाहारम् । सौवीरश्च आभीरश्च तयोः परान् पश्चादवस्थितान् देशान् अतिक्रम्य, आनर्तान् द्वारिकासन्नजनपदान् विभुः श्रीहरिः उपागात् प्राप्तः तदा । हे भार्गव शौनक, मनागीषत् श्रान्ता वाहा अश्वा यस्य तथाभूतः । अभूदिति शेषः ॥ ३५ ॥ तत्रेति । तत्र तत्र तेषु तेषूक्तेषु देशेषु यत्रत्यैस्तत्तद्देशावस्थितजनैः प्रत्युद्यतानि निवेदितानि अर्हणान्युपायनानि यस्मै स तथाभूतः हरिः सायमपराह्णे । यद्वा । सायं षट्घटिकावशेषदिनात्मके काले, पश्चात् दिशं पश्चिमां दिशं भेजे प्राप्तः । तदा च गविष्ठः गोभिः स्वकिरणैः सह तिष्ठतीति व्युत्पत्त्यांशुमानित्यर्थः । गामुदकं गतः । अस्तं गत इत्यर्थः । 'असौ वा गविष्ठोऽप्सूदेत्यस्तमेति' इति श्रुतेः । यद्वा । तदा सायंकाले जाते रथादवतीर्य हरिर्गविष्ठः भूमौ स्थितस्ततो गां जलाशयं गतः सन् पश्चादिशं संध्यां भेजे उपासितवानित्यर्थः । यद्वा । हरिर्यावदानर्त्तानुपागात्तदा गविष्ठः पश्चादिशं प्रति, सायं भेजे, गामुदकं च गत इति ॥ ३६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे दशमोऽध्यायः ॥ १० ॥

अथ एकादशोऽध्यायः

सूत उवाच

आनर्त्तान् स उपव्रज्य स्वृद्धान् जनपदान् स्वकान् । दध्मौ दरवरं तेषां विषादं शमयन्निव ॥ १ ॥

पुरीं निर्विश्य चानर्त्तैः स्तूयमानस्य बन्धुभिः । वर्ण्यते वर्तमानस्य कृष्णस्यैकादशे रतिः ॥ १ ॥

आनर्त्तानिति । स श्रीकृष्णः स्वृद्धान्समृद्धान् स्वकानात्मीयान् आनर्त्तान् जनपदान् उपव्रज्य तेषां तत्रत्यानां जनानां विषादं स्वविश्लेषखेदं शमयन्निव दरवरं पाञ्चजन्याख्यस्वीयशङ्खश्रेष्ठं दध्मौ वादितवान् ॥ १ ॥ स इति । तदा धवलं स्वतः श्वेतवर्णमुदरं यस्य तथाभूतः सन्नपि, दामोदरस्य श्रीकृष्णभगवतः अधरस्याधरोष्ठस्य शोणो रक्तवर्णस्तेन शोणिमा यस्य सः, स पूर्वोक्तः दरः पाञ्चजन्यो भगवच्छङ्खः देध्मीयमान आपूरितमुखवायुना शब्दं कुर्वन्सन्, अब्जखण्डे रक्तकमलसमूहे उत्स्वन उच्चशब्दः कलहंसः यथा तथा करकञ्जसंपुटे संपुटीकृतभगवद्धस्तकमले उच्चकासे नितरां शुशुभे ॥ २ ॥ तमिति । जगतां यद्भयं तस्यापि भयावहो भयकारो तम् । पाठान्तरे जगतां लोकानां भयं भीतिर्येभ्यो दैत्येभ्यस्तत्सकाशाद्भयं तस्य अपहो नाशनस्तं निनदं पाञ्चजन्यशङ्खध्वनिम् उपश्रुत्य श्रुत्वा भर्तुः श्रीकृष्णस्य दर्शनं समीक्षणं तस्मिन् लालसमौत्सुक्यं यासां ताः श्रीकृष्णदर्शनसमुत्सुकाः सर्वाः प्रजाः तं श्रीकृष्णं प्रत्युद्ययुः प्रत्युज्जग्मुः ॥ ३ ॥

तत्रेति । प्रीतीति । आदृताः श्रीकृष्णेन कृतादराः प्रीत्या स्नेहेन उत्फुल्लानि विकसितानि मुखानि यासां ताः प्रजाः, रवेः दीपम् इव तत्र कृष्णे उपनीताः समर्पिताः बलयः पूजाद्रव्याणि याभिस्तथाभूताः सत्यः, नित्यदा सर्वकालं निजलाभेन नित्यनिरवधिकस्वानुभवानन्दलाभेन पूर्णकाममवाप्तसमस्तकामम् आत्मारामं स्वानुभवैकनिष्ठं सर्वसुहृदम् अत एव अवितारं रक्षकं श्रीकृष्णम् अर्भका बालाः पितरं स्वजनकम् इव हर्षेण गद्गदा तया गिरा वाचा प्रोचुः ॥ ४-५ ॥ नता इति । हे नाथ विरिञ्चि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रह्मा च वैरिञ्च्याः सनकादयश्च सुरेन्द्रा इन्द्रादयश्च तैर्वन्दितं नमस्कृतम् इह संसारे परमुत्तमं क्षेमं निःश्रेयसम् इच्छतां परायणं परमं शरणम्। यत्र पदारविन्दे परेषां ब्रह्मादीनामपि प्रभुः, तानपि वशीकर्तुं शक्त इत्यर्थः। कालः अपि न प्रभवेत् समर्थो न भवेत्, तथाविधं ते तव अङ्घ्रिपङ्कजं सदा नताः स्म। परः प्रभुरिति पाठे यत्र त्वयि विषये परः प्रभुः कालः अपि न प्रभवेत् तस्य ते पदाम्बुजमिति वान्वयः। 'सर्वस्य वशी सर्वस्येशानः'। न तस्येशे कश्चन' इत्यादिश्रुत्यर्थोऽत्रानुसंधेयः॥ ६॥ भवायेति। विश्वं भावयतीति विश्वभावनस्तत्संबुद्धिः हे सृष्टिस्थितिप्रतिसंधिमज्जगत्कर्त्त इत्यर्थः त्व नोऽस्माकं भवायाभ्युदयाय भव। नोऽस्माकं त्वम् एव माता अथ पिता सुहृद्भ्राता पतिः स्वामी नोऽस्माकं सद्गुरुः निर्दोषगुरुस्थानीयः परमं दैवतं च त्वम् एव। यस्य तव अनुवृत्त्या सेवालक्षणेनानुवर्त्तनेन कृतिनः कृतार्था इति यावत्। बभूविम, तं दैवतानां परमं दैवतम्, पतिं पतीनां परमं परस्तात् 'न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्' 'यो वै वेदांश्च प्रहिणोति' इत्यादिश्रुत्यर्थमनुसंधायेमानि वचनानि ज्ञेयानि॥ ७॥ कृतार्थत्वमेवाहुः। अहो इति। अहो भगवान् भवता त्वया वयं सनाथाः स्म निरतिशयसुखप्रदनाथवन्तो बभूविम। कुतः। यद्यस्मात् त्रैविष्टपानां देवानामपि दूरे दर्शनं यस्य तत्, देवानामपि दुर्लभदर्शनमित्यर्थः। प्रेम्णा सस्मितं तद्युक्तं स्निग्धं निरीक्षणं यस्मिंस्तत्, सर्वं पूर्णं सौभगं सौन्दर्यं यस्मिंस्तत्तथोक्तम्। सर्वेष्वङ्गेषु सौभगं यस्मिंस्तदिति वा तव रूपं पश्येम। अहो अस्मद्भाग्यमिति भावः॥ ८॥

अर्भका इव सकरुणमाहुः। यर्हीति। भो अम्बुजाक्ष भवान् यर्हि यदा सुहृदां दिदृक्षा द्रष्टुमिच्छा तया गुरून् मधून् वा कुरुसंज्ञान्मधुसंज्ञान्वा जनपदान् इत्यर्थः। हास्तिनपुरं मथुरां प्रति चेति भावः। अपससार। भवानित्यत्र नो भवानिति पाठे न इत्यनादरे षष्ठी। नोऽस्मान् अनादृत्य अपससार अपहाय जगामेत्यर्थः। हे अच्युत तत्र तदा रविं सूर्यं विना आन्ध्यात् अक्ष्णोः इव नेत्रयोर्यथा तथा तव नः त्वदीयानामस्माकमपीत्यर्थः। क्षणः क्षणपरिमितः कालः अब्दकोटिप्रतिमः संवत्सरकोटिकालतुल्यः भवेत् स्यात्॥ ९॥ इतीति। इतीत्थम् एवंविधा इत्यर्थः। चकारादन्या अपि उदीरिता उच्चैरुच्चारिताः प्रजानां वाच शृण्वानः भक्तवत्सलः भगवान् दृष्ट्या साभिनन्दावलोकनेन अनुग्रहं वितन्वन्कुर्वन् सन् पुरीं द्वारकां प्राविशत्॥ १०॥ एवं सामान्यतः पुरीप्रवेशमुक्त्वा विशेषतस्तं कथयन्नादौ तां वर्णयति पञ्चभिः। आत्मतुल्यबलैः कृष्णसमानसामर्थ्यैः। यद्वा। परस्परमात्मनां तुल्यसामर्थ्यैः मधवश्च भोजाश्च दशार्हाश्च अर्हाश्च कुकुराश्च अन्धकाश्च वृष्णयश्च तैः। मध्वादयो यादवानामेवावान्तरविशेषाः। नागैः काद्रवेयादिभिः। भोगिभिः भोगवतीमेतत्संज्ञा भुजङ्गमपुरीम् इव गुप्तां रक्षिताम्॥ ११॥ सर्वर्त्विति। सर्वर्तुषु युगपत्प्रवृत्तेषु सर्वो विभवः फलपुष्पादिसमृद्धिः येषां ते, पुण्यवृक्षा मन्दारपारिजातादयः लताश्रमा लतामण्डपाश्च येषु तैः उद्यानोपवनारामैः वृतानां पद्माकराणां सरसां श्रीः शोभा यस्यां ताम्। तत्रोद्यानं राज्ञां क्रीडास्थानम्। उपवनं वनसमीपस्थम्। आरामाः कृतकाः। यद्वा। उद्यानं फलप्रधानम्। उपवनं पुष्पप्रधानम्। आरामः क्रीडार्थवनम्। केचित्तु उद्यानानि प्रमदाभिः सह क्रीडाभूमयः उपवनानि नगरान्नातिदूरे समारोपितवृक्षसमुदायाः आरामाः पुराद्बहिः रथ्योभयपार्श्वेरोपितवृक्षसमुदाया इति वदन्ति। अयं भावः सर्वर्तुविभवसहिता ये पुण्यवृक्षलताश्रमास्तैर्युता ये उद्यानोपवनारामास्तैर्वृतपद्माकरश्रीयुतामिति॥ १२॥

गोपुरेति। गोपुराणि पुरद्वाराणि च द्वाराणि पुरगतगृहाणां द्वाराणि च मार्गा उपनिष्कराणि च तेषु 'घण्टापथः संसरणं तत्पुरस्योपनिष्करम्' इत्यमरः। कृतानि कौतुकतोरणानि जम्ब्वाम्रपल्लवादिनिर्मितानि उत्सवतोरणानि यस्यां ताम्। ध्वजा गरुडादिचिह्नाङ्किताश्च पताका जयप्रदयन्त्राङ्किताश्च चित्राणां ध्वजपताकानामग्रैः अन्तः प्रतिहत आतपो यस्यां ताम्॥ १३॥ संमार्जितेति। महामार्गा राजवीथयश्च रथ्या उपवीथयश्च आपणकानि वणिजादीनां क्रयविक्रयादिगृहाणि च चत्वरा गजाश्वादिशालाः संमार्जिता विधूतावस्करा महामार्गादयो यस्यां ताम्। केचित्तु चत्वराण्यङ्गणानीत्याहुः। अन्ये चत्वरं चतुष्पथमिति प्राहुः। गन्धजलैश्चन्दनादितोयैः सिक्तामुक्षिताम्। फलानि क्रमुकादीनि च पुष्पाणि मल्लिकायूथिकादिसुमनांसि च अक्षताश्च फलानि च अक्षता अष्टयवादिधानाश्च अङ्कुरा यवप्ररोहाश्च तैः उप्तां विकीर्णाम्॥ १४॥ द्वारीति। गृहाणां द्वारि द्वारि प्रतिगृहं चेत्यर्थः। दधि च अक्षताश्च फलानि च इक्षवश्च ताभिः पूर्णकुम्भैर्जलापूर्णघटैः बलिभिः पूजाद्रव्यैः धूपाश्च दीपकाश्च तैः अलंकृताम्। एवंविधां पुरीं प्राविशदिति पूर्वेणान्वयः॥ १५॥ निशम्येति। प्रेष्ठं निरतिशयप्रियतमं श्रीकृष्णम् आयान्तं समागच्छन्तं निशम्याकर्ण्य महामना उदारमानसः वसुदेवः अक्रूरश्च उग्रसेनश्च, अद्भुतविक्रमः रामश्च, प्रत्युज्जग्मुरिति चतुर्थेनान्वयः॥ १६॥ प्रद्युम्न इति। प्रद्युम्नो रौक्मिणेयः। चारुदेष्णः प्रद्युम्नानुजः, जाम्बवतीसुतः साम्बः, एते सर्वे प्रहर्षवेगेन प्रकृष्टहर्षजवेन उच्छ्वसितानि सहसा परित्यक्तानि शयनासनभोजनानि यैस्ते॥ १७॥ वारणेन्द्रमिति। वारणेन्द्रं करधृतमौक्तिकपूर्णघटं गजेन्द्रं पुरस्कृत्याग्रे कृत्वा ससुमङ्गलैः पाण्युपात्तपुण्यादिमङ्गलवस्तुसमूहैः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्राह्मणैः पुरस्कृतैर्विप्रैः, शङ्खाः कम्बवश्च तूर्याणि काहलानि च तेषां निनादस्तेन ब्रह्मघोषेण वेदघोषेण च सह आदृता आदरयुक्ताः हृष्टा मुदिताः। अत एव। प्रणयेन स्नेहेन हेतुना आगतं साध्वसं भयसंभ्रमो येषां तथाभूताः सन्तश्च, रथैः स्यन्दनैः प्रत्युज्जग्मुः ॥ १८ ॥

वारमुख्या इति। तथा लसद्भ्यां कुण्डलाभ्यां निर्भातौ कपोलौ येषु तेषु वदनेषु श्रीः शोभाः यासां ताः तद्दर्शनोत्सुकाः शतशः वारमुख्या गणिकाश्रेष्ठाश्च यानैः रथैः प्रत्युज्जग्मुः ॥ १९ ॥ नटेति। नटा नवरसाभिनयचतुराश्च, नर्त्तकास्तालाद्यनुसारेण स्त्रीणां नृत्यशिक्षकाश्च, गन्धर्वाः पुरोगानं कुर्वाणानां स्त्रीणां पश्चादुपविश्य वितन्त्रीमर्दलादिवादका गायकजनाश्च ते, सूताः पौराणिकाश्च, मागधा वंशावलिपाठकाश्च, बन्दिनो मङ्गलवादिनश्च ते। 'सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः। बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः' इत्युक्तेः। प्रत्युज्जग्मुश्च। अद्भुतानि उत्तमश्लोकचरितानि गायन्ति च ॥ २० ॥ भगवानिति। तत्र तेषु वसुदेवादिष्वागतेषु सत्सु भगवान् श्रीकृष्णः। उपसंगम्य वसुदेवादिभिरुपसंगमं विधाय पश्चात् बन्धूनां स्वबन्धुजनानाम् अनुवर्तिनां तेषामनुवर्त्तमानानां सर्वेषां पौराणां पुरजनानां च यथाविधि यथायोग्यं मानम् आदधे। सन्मानं चकारेत्यर्थः ॥ २१ ॥ सन्मानप्रकारं दर्शयति। प्रह्वेति। विभुः श्रीकृष्णः प्रह्वः प्रह्वत्वं शिरसा नमस्कारश्च, अभिवादनं वाचा नतिश्च, आश्लेष आलिङ्गनं च, करस्पर्शः पाणिना संस्पर्शनं च, स्मितं सन्मुखं प्रेक्ष्य मन्दहासविधानं च, ईक्षणं नयनाभ्यां नयनसंयोजनं च, तैः आश्वास्योपच्छन्द्य, आश्वपाकेभ्यः श्वपाकानभिव्याप्य, अभिमतैः तेषां योग्यैः वरैस्तद्वाञ्छितार्थदानैश्च मानमादधे इति पूर्वेण संबन्धः ॥ २२ ॥ स्वयमिति। स्वयं श्रीकृष्णश्चापि सदारैः सपत्नीकैः। गुरुभिः स्थविरैर्वृद्धैः विप्रैः अन्यैः बन्दिभिश्च कर्तृभिः आशीर्भिः युज्यमानः सर्वैः कृताशीर्वचन इत्यर्थः। पुरं द्वारिकाम्। अविशत् ॥ २३ ॥ राजमार्गमिति। हे विप्र शौनक द्वारिकायाः राजमार्गं कृष्णे गते सति तस्य श्रीकृष्णस्येक्षणे समीक्षणविधाने महानुत्सवो हर्षो यासां ताः कुलस्त्रियः कुलीनाङ्गनाः हर्म्याणि सौधानि आरुरुहुः ॥ २४ ॥

ननु दृष्टचरस्यादृष्टपूर्वदर्शनवद्दर्शने किमित्युत्कण्ठातिशय इति चेत्तत्राह। नित्यमिति। श्रियो धाम स्थानमङ्गं वपुर्यस्य तम् अच्युतं, यद्यस्मात् नित्यं निरीक्षमाणानाम् अपि द्वारिकौकसां द्वारिकानिवासिनां दृशः न वितृप्यन्ति पुनः पुनर्दृष्ट्वापि दर्शनेनालमिति भावं न प्राप्नुवन्ति। तस्मादुत्कण्ठया तासां हर्म्यारोहणं युक्तं हि ॥ २५ ॥ नैतदाश्चर्यमित्येतदेवाभिनयेनाह। श्रिय इति। यस्येत्यस्य उरोमुखबाहुपदाम्बुजैः प्रत्येकमन्वयः। यस्य श्रीकृष्ण य उरो वक्षः श्रियो लक्ष्म्याः निवासः स्थानम्। उरसो लावण्यस्यानुभवाय श्रीस्तदेव समाश्रितवतीत्यभिप्रायः। यस्य मुखं दृशां पश्यज्जनदृशां पानपात्रं सौन्दर्यामृतपानाय पात्ररूपम्। यस्य बाहवः लोकपालानां निवासस्थानम। लोकपालानां बलस्थानभूता इत्यर्थः। यस्य पादाम्बुजं च, सारं श्रीकृष्णं गायन्तीति सारंगा मुनयस्तेषां निवासभूतं सारंगाणां सारग्राहिणां ब्रह्मादीनां यत्पदाम्बुजं परायणमिति वा। तमच्युतं निरीक्षमाणानामपि दृशो न वितृप्यन्तीति युक्तमेवेत्यर्थः ॥ २६ ॥ सितेति। पथि मार्गे सितं श्वेतं यदातपत्रं तच्च व्यजने च तैरुपस्कृतः, सितातपत्रेणावृतः व्यजनाभ्यां वीज्यमानः संश्च शोभमान इत्यर्थः। वनमालया च उपस्कृतः, पिशङ्गे पीते वाससी यस्य सः। प्रसूनानां पुष्पाणां वर्षास्तैः अभिवर्षितः, प्रजाभिः मूर्द्ध्नि कृतसुमनोभिवर्ष इत्यर्थः। भगवान् अर्कश्च उडुपो नक्षत्रैः सहितश्चन्द्रश्च चापमिन्द्रधनुश्च वैद्युतं विद्युच्च तैर्युगपदुदितैरर्कादिभिः, वैद्युतमित्यत्र स्वार्थेऽण्। घनो मेघः यथा तथा बभौ। अत्रार्कः छत्रस्योपमानम्। नक्षत्राणि पुष्पवृष्टेः। चन्द्रः परिभ्रमकृतमण्डलाकारयोश्चामरयोः। चापं वनमालायाः। विद्युत्तेजः पिशङ्गवाससोः। अभूतोपमेयम्। यदि घनस्योपरि सूर्यबिम्बम्, उभयतश्चन्द्रौ, सर्वतो नक्षत्राणि, मध्ये मिलितं चापद्वयं च, स्थिरं विद्युत्तेजश्च यदि भवेत्तर्हि स घनो यथा भाति तथा हरिर्बभावित्यर्थः। यद्वा। उडुपस्थानीयं सितातपत्रम्। गुरुशुक्रस्थानीये व्यजने नक्षत्रस्थानीयानि प्रसूनानि। चापस्थानीया वनमाला। विद्युत्स्थानीयं पिशङ्गवस्त्रम्। अर्कस्थानीयं तु मुकुटमिति ॥ २७ ॥ प्रविष्ट इति। ततस्तु पित्रोर्देवकीवसुदेवयोः गृहं प्रविष्टः सः भगवान्, मातृभिः देवकीरोहिण्यादिभिः परिष्वक्त आलिङ्गितः सन्, देवकीप्रमुखाः सप्त मातृः। सप्तेति मातृसौदर्यादादरविशेषज्ञापनार्थमुक्तम्। अष्टादशापि वसुदेवभार्या मातृतुल्यत्वात्समाना अस्य सन्तीति बोध्यम्। मुदा शिरसा ववन्दे ॥ २८ ॥ ता इति। ता देवक्यादयः कृष्णमातरः पुत्रं श्रीकृष्णम् अङ्कमुत्सङ्गम् आरोप्य स्नेहेन स्नुतौ प्रस्नुवन्तौ पयोधरौ स्तनौ यासां ताः। हर्षेण विह्वलित आत्मा मनो यासां तास्तथाभूताः सत्यः नेत्रजैः जलैरानन्दबाष्पैः सिषिचुः ॥ २९ ॥ अथेति। अथानन्तरं काम्यन्ते इति कामा इच्छाविषयास्ते सर्वे यत्र सन्ति तथोक्तम्। नास्त्युत्तमं यस्मात्तत्तथाभूतं स्वभवनं स्वगृहम् आविशत्। यत्र स्वभवने पत्नीनां षोडश सहस्राणि प्रासादाः, षोडशसहस्रपदमष्टोत्तरशतस्याप्युपलक्षणम्। तथाभूतम् ॥ ३० ॥ पत्न्य इति। तदा प्रोष्य देशान्तरे उषित्वा प्रवासं कृत्वेति यावत्। गृहान् उपागतं पतिं स्वस्वामिनम् आराद्दूरादेव 'आराद्दूरसमीपयोः' इत्यभिधानात्। विलोक्य पत्न्यो रुक्मिण्यादयः संजातो मनसि महोत्सवो यासां ताः। व्रीडितानि विलोचनान्याननानि च यासां तथाभूताः सत्यः, व्रतैः साकम् आसनानि च आशयाश्च तत्समाहार आसनाशयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

तस्मात् उत्तस्थुः। अत्र भगवद्दर्शनसमकालं तदङ्गना आसनाशयव्रतेभ्य उत्तस्थुरित्यस्यायं विवेकः। आसनात्तु देहेनैव, श्रीकृष्णः संश्लेषे व्यवधानासहत्वादन्तःकरणपर्यायाशयात्तु आत्मना, पत्युरागमनाद्धास्यक्रीडाचरणादिना व्रतेभ्य इति। अपाङ्गैरेव वीक्षणाद्व्रीडितलोचनाः। अवनतमुखत्वाद्व्रीडिताननाश्च 'क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका इति प्रोषितभर्तृकानियमा याज्ञवल्क्येनोक्ताः॥ ३१॥ तमिति। हे भृगुवर्य दुरन्तोऽगाधः भावः स्नेहो यासां ताः पत्न्यः तं समागतं पतिम् आत्मजैः स्वपुत्रैः, दृष्टिभिः निरीक्षणैः, अन्तरात्मनान्तःकरणेन च, परिरेभिरे आलिङ्गितवत्यः। शरीरपरिरम्भस्य रहःकालिकत्वात्तं न साक्षाच्चक्रुरत आयान्तं तं दर्शनात्पूर्वं बुद्ध्या, ततः समीक्षणैः, ततः समीपमागते आत्मजैर्गृहीतकण्ठं स्वयमालिङ्गयन्त्य इव परिरेभिरे इत्यर्थः। विलज्जतीनां तासां स्त्रीणां नेत्रयोः निरुद्धम् अपि अम्बु बाष्पोदकं विक्लवादधाष्टर्याद्धेतोः आस्रवदीषत् सुस्राव॥ ३२॥

यद्यपीति। असौ कृष्णः यद्यपि पार्श्वगतस्तासां समीपस्थः तत्रापि रहोगतः एकान्तावस्थितश्च भवति। तथापि तस्य श्रीकृष्णस्य अङ्घ्रियुगं चरणद्वन्द्वं पदे पदे क्षणे क्षणे तासां नवं नवमेव अभूत्। यतस्तत्पदात्तस्य पदारविन्दात् का अङ्गना विरमेदलमिति मत्वा विरामं कुर्यात्। यद्यस्मात् चला चञ्चलप्रकृतिः श्रीः लक्ष्मीः अपि कर्हिचित्कदाचिदपि न जहाति यदङ्घ्रिपद्मं न परित्यजति। तर्हि अन्याः कथं त्यक्तुं शक्नुयुरिति भावः॥ ३३॥ अथोपरितनं वृत्तान्तं संगृह्य विवक्षुरुक्तवृत्तान्तं समासतोऽनुवदति। एवमिति। क्षितेर्भूमेः भाराय जन्म येषां क्षितेर्भारस्य जन्म उदयो येभ्यस्तेषामिति वा। अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः प्रसृतं तेजः प्रभावो येषां तेषां नृपाणां कौरवाणां पाण्डवानां चेत्यर्थः। मिथः परस्परम् एवमुक्तप्रकारेण वैरम्, श्वसनो वायुः अनलमग्निमिव विधाय वर्द्धयित्वा स्वयं श्रीकृष्णः निरायुधः सन्नेव वधेन तेषां मिथोवधेन उपरतः विरामं प्राप्तः। वायुर्यथा वेणूनामन्योऽन्यं संघर्षेणानलं विधाय मिथोदाहेन यथोपशाम्यति तद्वदिति भावः॥ ३४॥ स इति अस्मिन् नरलोके स्वमायया स्वेच्छया अवतीर्णः प्रादुर्भूतः भगवान् सः एषः कृष्णः प्राकृतः यथा स्त्रिय एव रत्नानि तेषां कुटे समुदायस्थः स्थितः सन् रेमे चिक्रीडे। प्राकृतो यथेत्यनेन स्त्रीवश्यत्वानुकारमात्रमेव। न तु परमार्थतस्तदस्तीति सूचितम॥ ३५॥ तदेव व्यञ्जयितुं विशिनष्टि। उद्दामेति। यासां स्त्रीणां उद्दामो गम्भीरो यो भावोऽभिप्रायस्तस्य पिशुनः सूचकोऽमलो विशुद्धः वल्गुः सुन्दरो हासः व्रीडावलोको लज्जापूर्वकं च ताभ्यां निहतोऽभिभूतः सन् मदनः कामोऽपि संमुह्य मोहं प्राप्य स्वयं चापं धनुः अजहात्तत्याज ताः प्रमदोत्तमाः कुहकैर्वञ्चनोपायैः, यस्य श्रीकृष्णभगवतः इन्द्रियं मनः विमथितुं संक्षोभयितुं न शेकुर्न प्राभवन् तमित्युत्तरेणान्वयः॥३६॥ तमिति। मनुजं व्यापृण्वानं मनुजवच्चेष्टमानं मनुष्यभावेन स्वयाथात्म्यमाच्छादयन्तमित्यर्थः। असङ्गं वस्तुतो निःसङ्गमपि सङ्गिनमिव भासमानं तमिमं भगवन्तम् अयं लोको जनः आत्मौपम्येन यतः मन्यते अतः सोऽयं लोकः अबुधः नितरामज्ञः॥ ३७॥ अथ विषयैरनाकृष्टत्वमीश्वरस्य नाश्चर्यमित्यभिप्रायेणेश्वरत्वं निर्वक्ति। एतदिति। प्रकृतिस्थः मूलप्रकृतिव्यापकः सन्नपि तद्गुणैः सत्त्वादिभिः आत्मस्थोऽपीति शेषः। आत्मस्थैर्जीवगताविद्यास्मितारागद्वेषादिभिश्च गुणैः सदा न युज्यते इति यत् एतदेव ईशस्य परमेश्वरस्य ईशनमीश्वरत्वम्। हेयगुणास्पर्शोदाहरणमाह। स्वभक्तजनानामिति शेषः। तदाश्रया भगवत्स्वरूपाश्रया बुद्धिर्ज्ञानात्मिका मतिः यथा आत्मस्थैः निजदेहात्मनोरवस्थितैः गुणैः सततपरिणामित्वाविद्यास्मितादिभिः न युज्यते। तथा इति संबन्धः। अस्यायं भावः। यदा भगवदेकान्तिकभक्तजनानां भगवत्स्वरूपाश्रया तन्माहात्म्यज्ञानादिरूपा बुद्धिर्देहात्मगतैरुक्तगुणैर्न युज्यते तदा तदन्तर्यामितयावस्थितो भगवांश्चिज्जडप्रकृतिगुणैर्न युञ्ज्यादत्र किं वक्तव्यमिति॥ ३८॥ यथैवमज्ञो लोकस्तमुक्तविधमीश्वरमात्मतुल्यं मन्यते तथा तत्स्त्रियोऽप्यज्ञानात्तमात्मवश्यममन्यन्तेत्याह। तमिति। भगवति प्रत्यक्षतया भूमौ विद्यमाने कुसङ्गपरपर्यायाऽसज्जनानां मतयः यथा ईश्वरं सन्तमपि, तं न जानन्ति किंतु मौढ्यात्तमन्यथैव मेनिरे। एवं भर्तुः स्वस्वामिनः प्रमीयते इति प्रमाणं स्वरूपं तदविदः स्वभर्तृस्वरूपमजानन्त्य इत्यर्थः। ताः अबलाः स्त्रियः यतः मूढाः अतः तं भगवन्तं स्त्रैणं स्त्रीलम्पटम्, रहः अनुव्रतं स्त्रीसमूहानुवर्तिनं च मेनिरे॥ ३९॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसुनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे एकादशोऽध्यायः॥ ११॥

——:❀:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वादशोऽध्यायः

शौनक उवाच

अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा । उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥ १ ॥

द्रौणिदण्डादि यत्प्रोक्तं विस्तरात्प्राक् प्रसङ्गतः । वर्ण्यते द्वादशे तत्तु परीक्षिज्जन्म चात्र यत् ॥ १ ॥

परीक्षितोऽथ राजर्षेर्जन्म कर्म विलायनम् । संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम्' इति प्रतिज्ञाय पाण्डवानां राज्यस्थितिरुपोद्घातरूपा सप्तमाध्यायमारभ्य सप्रसङ्गं निरूपिता । इदानीमौपोद्घातिकमुक्तानुवादपूर्वकं पृच्छति । अश्वत्थाम्नेति । उरु महत्तेजो यस्य तेन अश्वत्थाम्ना उपसृष्टेन ब्रह्मशीर्ष्णा ब्रह्मास्त्रेण हतः उत्तरायाः गर्भः ईशेन श्रीकृष्णेन पुनः आजीवितः इत्युक्तानुवादः ॥ १ ॥

तस्येति । हे सूत महात्मनो महानुभावस्य महाबुद्धेः तस्य भगवता जीवितस्योत्तरातनयस्य परीक्षिन्नृपतेः यत् जन्म कर्माणि निधनं च यथैव आसीत् । स नृपः यथा प्रेत्य मृत्वा गतवान् यां गतिं प्राप्तवान् तदिदमित्यग्रिमेणान्वयः ॥ २ ॥ तदिदमिति । यदि गदितुं मन्यसे वक्तुमिष्टं योग्यं च मन्यसे चेत्तर्हि इत्यर्थः । तदिदं श्रोतुम् इच्छामि । कुतः यस्य नृपतेः शुकः ज्ञानम् अदात् । अतः श्रद्दधानानां नोऽस्माकं ब्रूहि । अत्र तु जन्मैव प्राधान्येन पृच्छ्यते तस्य कर्मादिकं तु युधिष्ठिरादिवृत्तान्तानन्तरकालिकत्वात्तच्छ्रवणानन्तरमेव विशेषतः प्रष्टव्यमस्त्यथापि तज्जन्मकालिकजातकद्वारा सामान्यतो बुभुत्सुना जन्मना सहोपात्तमत एवोत्तरेऽपि जातकद्वारैव तत्कर्मादिकं प्रदर्श्यते इत्यवगन्तव्यम् ॥ ३ ॥ परीक्षितो जन्मप्रकारं वक्तुं तावत्तादात्विकं युधिष्ठिरावस्थानं कथयन्निःस्पृहस्यापि तस्य राज्ञः श्रीकृष्णानुग्रहात्तादृक् पौत्रः समजनीति वक्तुं तस्य श्रीकृष्णे भक्त्युद्रेकमाह । अपीपलदिति त्रिभिः । कृष्णस्य पादयोर्याऽनुसेवा सातत्येन संशीलनं तया श्रीकृष्णपादकमलानुध्यानेन हेतुना इत्यर्थः । सर्वकामेभ्यः निर्गता स्पृहा यस्य तथाभूतः धर्मराजो युधिष्ठिरः प्रजाः रञ्जयन् प्रीणयन् सन्नेव पितृवत् स्वकीयाः पितरः यथा तथेत्यर्थः । अपीपलत्प्रजाः पालयामास । नृपतेरप्यस्य निःस्पृहत्वं श्रीकृष्णपादानुसेवनादेवावगन्तव्यम् ॥ ४ ॥ तत्सेवया स्पृहाभावे हेतुत्वं सदृष्टान्तमाह । संपद इति द्वाभ्याम् । संपदो भोग्यभोगोपकरणादयः समृद्धयः । ऋतवः स्वर्गादिसुखसाधनान्यश्वमेधादीनि । लोकाः करप्रदा जनाः । महीष्यश्च भ्रातरश्च ते । महीष्यः पत्न्यो द्रौपद्यादयः । भ्रातरो दिग्विजयिनो भीमादयः । मही निष्कण्टका पृथिवी । जम्बूद्वीपाधिपत्यम्, त्रिदिवं गतं स्वर्गपर्यन्तं व्याप्तमित्यर्थः । यशश्च ॥ ५ ॥ किं ते इति । हे द्विजाः सुरस्पार्हाः सुराणामपि स्पृहणीयाः ते संपदादयः कामाः विषयाः मुकुन्दे श्रीकृष्णे एव मनो यस्य तस्य राज्ञो युधिष्ठिरस्य क्षुधितस्याशनया अन्नैकमनसः इतरे स्रक्चन्दनवीणादयः यथा तथा मुदं प्रीतिम् अभिजह्रुः किम्, संपादितवन्तः किम्, न संपादितवन्त एवेत्यर्थः । अनेन वैराग्यातिशयो मोक्षातिशयः सुखातिशयश्च दर्शितः ॥ ६ ॥

अथ परीक्षितो जन्म वक्तुं तावत्तस्य प्रस्तुतात्मिकां मातुरुदरावस्थानदशामाह । मातुरिति सार्द्धैः पञ्चभिः । हे भृगुनन्दन हे शौनक, वीरः मातुः गर्भगत उदरगतः, अस्त्रतेजसा ब्रह्मास्त्रतेजसा दह्यमानः स उत्तरातनयः, तदा यदोत्तरया श्रीकृष्णः संप्रार्थितो द्वारिकागमनात्प्रतिनिवृत्तश्च तदनन्तरे काले, कंचिल्लोकविलक्षणं पुरुषं ददर्श ॥ ७ ॥ तं विशिनष्टि चतुरक्षराधिकैः त्रिभिः श्लोकैः । अङ्गुष्ठेति । अङ्गुष्ठेन परिमिताङ्गुष्ठपरिमिता मात्रोन्नाहो यस्य तम् । उत्तरपदलोपः समासः । न विद्यते मलं देहजं यस्य तम् । स्फुरत्पुरटो हिरण्मयो मौलिर्यस्य तम् । देदीप्यमानस्वर्णमुकुटमित्यर्थः । अपीच्यमतिसुन्दरं हृष्टपुष्टतयातिस्पृहणीयमिति यावत् । दृश्यते इति दर्शनं रूपं यस्य तम् । तडिदिव वासा वस्त्रं यस्य तम् । श्यामं नवीननीरदमेचकवर्णम् । आभ्यां पदाभ्यां विद्युद्युक्तमेघोपमा सूचिता । अच्युतं स्वयं न च्यवते स्वाश्रितांश्च च्यावयतीति तम् अविकारं वा ॥ ८ ॥ श्रीमदिति । श्रीमन्तः वर्तुलत्वादिगुणैः शोभावन्तो दीर्घा आजानुलम्बिनश्चत्वारो बाहवो यस्य तम् । तप्ते तापेन निर्मलीकृते कांचने सुवर्णमये कुण्डले यस्य तम् । क्षतजवत्कोणयोः शोणवर्णे अक्षिणी यस्य तं संरम्भादत्यारक्तनेत्रमिति वा । अहो मद्भक्तस्यापि गर्भास्त्रपीडेति क्रोधेनेति भावः । गदा पाणौ यस्य तम् अत एव उल्कस्याङ्गारस्येवाभा यस्यास्तां गदां मुहुः भ्रामयन्तम् आत्मनः स्वस्य सर्वतोदिशं पूर्वादिदिक्षु परिभ्रमन्तं परितो भ्रमणं कुर्वाणम् ॥ ९ ॥ अस्त्रेति । गोपतिः सूर्यः नीहारम् इव, पाठान्तरे नीहारं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधमन्तं गोपतिमिवेत्यन्वयः। स्वगदया अस्त्रतेजो ब्रह्मास्त्रतेजः विधमन्तं नाशयन्तं संनिकर्षे समीपे स्थितमेवंविधं पुरुषम्, असौ कः इति पर्य्यैक्षत, पर्यालोचितवान्। यतः पर्य्यैक्षत तत एव प्रवृत्तिनिमित्तात्परीक्षिच्छब्दवाच्यश्च स बभूवेति भावः॥ १०॥ विधूयेति। तद्ब्रह्मास्त्रतेजः विधूय निरस्य अमेयात्मा अपरिच्छिन्नस्वरूपस्वभावः। धर्मं गोपायतीति धर्मगुप् विभुः। यद्वा। धर्मं गोपायन्तीति धर्मगुपो राजानस्तेषां विभुः प्रभुः। तेषामपि पालकत्वात्। भगवान् हरिः दशमास्यस्य दशमासपरिच्छेद्यस्य परीक्षितः मिषतः पश्यतः सतः, तत्र यत्र स दृष्टस्तत्रैवेत्यर्थः। अन्तर्दधे अन्तर्हितः। न त्वन्यत्र गतः। दशमासिकगर्भस्य परिपक्वत्वादयं मां रक्षतीति स्नेहेन स्वं पश्यन्तमपि तमनादृत्य विमुखात्तत्रैवान्तर्हित इति भावः॥ ११॥

तत इति। ततो भगवतस्तिरोभावानन्तरं सर्वेषां गुणानामुदर्के उत्तरफलं यस्मिंस्तस्मिन् उत्तरोत्तराधिक्यफलसूचक इत्यर्थः। अनुकूलैरन्यैर्ग्रहैः सहिताः सानुकूलास्तेषां ग्रहाणां गुरुशुक्रादिशुभग्रहाणामुदयो यस्मिंस्तस्मिन् लग्ने इति शेषः। पाण्डोः वंशधरः अन्वयवर्द्धनः, भूयः पुनः ओजसा पाण्डुनृपतिसदृश इत्यर्थः। जज्ञे प्रादुर्बभूव॥ १२॥ तस्येति। ततः प्रीतं प्रसन्नतां प्राप्तं मनो यस्य स राजा युधिष्ठिरः, धौम्यश्च कृपश्च तावादी येषां तैः विप्रैर्ब्राह्मणैः मङ्गलम् आशिषं पुण्याहमिति यावत्। वाचयित्वा तस्य स्वपौत्रस्य जातकं जातकर्म कारयामास। चोऽवधारणे॥ १३॥ हिरण्यमिति। तदा नृपतिः स युधिष्ठिरः हिरण्यं सुवर्णम्, गां धेनुम्, महीं पृथ्वीम्, ग्रामान्, वरानुत्तमान् हस्त्यश्वान् हस्तिनोऽश्वांश्चेत्यर्थः। यद्वा। वरानिति कामान् कामवतां कमितिपदार्थानित्यर्थः। स्वन्नं शोभनमन्नं च विप्रेभ्यो ब्राह्मणेभ्यः प्रजातीर्थे प्रजोत्पत्तिनिमित्तदानकालरूपे तीर्थे प्रादात्। यतः तीर्थवित्, यतः स्वयं तीर्थविद्भवति ततः प्रादादित्यर्थः। तथाचोक्तम् 'खले यज्ञे विवाहे च संक्रान्तौ ग्रहणे तथा। पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्' इति। 'देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्। आयान्ति हि नृपश्रेष्ठ पुण्याहमिति चाब्रुवन्' इति च स्मृतेः॥ १४॥ तमिति। दैवेनेति। तस्मादिति। तुष्टास्ततः संप्राप्तहिरण्यादिना तुष्टिं प्राप्ताः ब्राह्मणाः प्रश्रयेण विनयेनानतोऽवनतस्तं राजानं तं युधिष्ठिरम् ऊचुः। तदेवाह। एष हीति सार्द्धद्वयेन। हे पौरवर्षभ कुरूणां कुरोर्वंशे जातानां भवतां शुक्ले शुद्धे अस्मिन् कुले प्रजातन्तौ पुत्राख्यसंताने अप्रतिघातेन दुर्वारेण दैवेन संस्थां विनाशम् उपेयुषि गच्छति सति, वो युष्माकम् अनुग्रहार्थाय अनुग्रहाख्यप्रयोजनाय प्रभविष्णुना समर्थीभवनशीलेन विष्णुना रातो दत्तः तस्मात् लोके नाम्ना विष्णुरातः इति प्रसिद्धः बृहच्छ्रवा विपुलकीर्तिः गुणैः महान् एषः महाभागवतः भविष्यति अत्र न संदेहः॥ १५–१७॥

विप्रैर्महाभागवतो भविष्यतीत्येवमुक्तो युधिष्ठिरस्तस्य भाविनो गुणान् बुभुत्सुः पृच्छति। अपीति। हे सत्तमाः एषः सांप्रतं जातोऽयमर्भकः साधुवादेन साधूनामुपदेशेन। यद्वा। साधुवादेन सादरभाषणेन यशसा सत्कीर्त्या च महात्मनः अत्युदारान् पुण्यश्लोकान्पवित्रकीर्तिमतः वंश्यानस्मद्वंशोत्पन्नान् राजर्षीन्पाण्ड्वादीन् अनुवर्त्तिता अपि स्वित्। अनुवर्तिष्यति किम्। पाण्ड्वादिवत्सुयशस्वी भविष्यति किमिति प्रश्नः। अपि स्वित् इत्येतद्द्वयं समुदितं प्रश्नद्योतकम्॥ १८॥ एवं राज्ञा पृष्टा जातककोविदा ब्राह्मणास्तस्य भाविनो गुणान्वर्णयन्ति पार्थेत्यादिभिर्दशभिः। न केवलमितरासाधारणैक-गुणमेवानुवर्त्तिता। अपि तु तत्तदसाधारणगुणान्सर्वानपीत्याहुः। पार्थेति। हे पार्थ। मानवः मनोर्वैवस्वतस्य सुतः इक्ष्वाकुः इव साक्षात् प्रजाविता प्रजानां रक्षिता भवितेति शेषः। दाशरथिर्दशरथपुत्रः रामः श्रीसीतापतिः यथा तथा ब्रह्मण्यः ब्राह्मणेषु हितः सत्यसंधः सत्यप्रतिज्ञश्च भविता॥ १९॥ एष इति। एषः त्वत्पौत्रः औशीनर उशीनरदेशाधिपतिः उशीनरसुतो वा शिबिः येन स्वमांसं श्येनाय दत्त्वा शरणागतः कपोतो रक्षितः सः यथा तथा दाता दानशूरः शरण्यः शरणागतपालकश्च भविता हि। दौष्यन्तिर्दुष्यन्तपुत्रो भरतः इव स्वानां ज्ञातीनां यज्वनां यष्टॄणां च यशः वितनिता यशसो विस्तारयिता भविता॥ २०॥ धन्विनामिति। हे राजन् एष त्वत्पौत्रः धन्विनां धनुष्मताम् अग्रणीः, श्रेष्ठस्तु द्वयोः अपि, अर्जुनयोः कार्त्तवीर्यपार्थयोः तुल्यः दुराक्रम्यतया दुःसहतया च ताभ्यां तुल्यः भविता इत्यर्थः। हुताशः अग्निः इव दुर्द्धर्षः प्रसोढुमशक्यः। समुद्रः इव दुस्तरः अगाधाशयश्च भविता॥ २१॥ मृगेन्द्र इति। हे नृप असौ त्वत्पौत्रः मृगेन्द्रः सिंहः इव विक्रान्तः पराक्रमी, पदविक्षेपवान्वा भविता। हिमवान् इव निषेव्यः भूतानामुपजीव्यः। वसुधा भूमिः इव तितिक्षुः प्रसहिष्णुः। अनन्यगतिकत्वेन वसुधेव क्षन्ता इत्यर्थः। पितरौ मातापितरौ इव सहिष्णुरपराधसहनशीलश्च भविता॥ २२॥ पितामहेति। साम्ये सर्वभूतसमत्वे सामञ्जस्ये वा पितामहसमः ब्रह्मणा तुल्यः। प्रसादे प्रसन्नतायां ज्ञानप्रदानेनानुग्रहे वा गिरिशोपमः शिवसमानः। सर्वभूतानां पुरुषार्थलिप्सूनां सर्वजनानाम् आश्रय आश्रयितुं योग्यः, रामाश्रयः श्रीनिवासः देवः यथा साक्षाच्छ्रीपतिरिव भविता॥ २३॥

सर्वेति। सर्वे सद्गुणा निर्दोषा गुणास्तत्कृतं माहात्म्यं यस्मिन्सः एषः कृष्णम् अनुव्रतः अनुवर्तिता स्यात्। कृष्ण-तुल्यसद्गुणमाहात्म्ययुक्त इत्यर्थः। यद्वा कृष्णम् अनुव्रतः एषः सर्वैः सतां गुणैः माहात्म्यं महत्ता यस्य सः भविता। यद्वा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वसद्गुणमाहात्म्ये विषये कृष्णमनुव्रतो यादवेन्द्रमनुगतः कृष्णमर्जुनं वानुव्रतः सर्वैः सद्गुणैः माहात्म्यं यत्तस्मिन्वा कृष्णतुल्यः। रन्तिदेवः इव उदारः दानी। ययातिः इव धार्मिकः धर्मशीलः भविता ॥ २४ ॥ धृत्येति। धृत्या धैर्येण पाठान्तरे धैर्ये बलिसमः वैरोचनितुल्यः। प्रह्लादः इव कृष्णे भगवति। भक्तः इति शेषः। सत्प्रहः सतां ग्राहकश्च। यद्वा। कृष्णे श्रीकृष्णे प्रह्लादः इव सन् भद्रः ग्रहोऽभिनिवेशो यस्य सः। यद्वा। गृह्णातीति ग्रहो भक्तिः सन् ग्रहो भक्तिर्यस्य सः। एषः शिशुः अश्वमेधानाम् आहर्त्ताऽनुष्ठाता कर्त्ता इत्यर्थः। वृद्धानां ज्ञानादिना वृद्धानां जनानां पर्युपासकः यथोचितं सेवकः भविता ॥ २५ ॥ राजर्षीणामिति। राजर्षीणां जनमेजयादीनां जनयिता उत्पादकः। संततिरप्यस्य सती भवितेत्यर्थः। उत्पथगामिनां धर्ममार्गातिवर्तिनाम्। यद्वा। अशास्त्रविहितमार्गवर्तिनां शास्ता। भुवः पृथिव्याः हेतोः धर्मस्य च कारणात् रक्षार्थम्। पृथ्व्यर्थं धर्मार्थं चेत्यर्थः। एषः शिशुः कलेः निग्रहीता कलिं निग्रहीष्यतीत्यर्थः ॥ २६ ॥ तक्षकादिति। द्विजपुत्रोपसर्जितात् ब्राह्मणपुत्रेण शापद्वारा नियोजितात् तक्षकात् आत्मनः स्वस्य मृत्युं मरणम् उपश्रुत्याकर्ण्य मुक्तः परित्यक्तः सङ्गो देहतदनुबन्ध्यादिषु संप्रसङ्गो येन तथाभूतः सन् हरेः श्रीकृष्णस्य पदं स्थानं प्रपत्स्यते प्राप्स्यति ॥ २७ ॥ एतदेवोपपादयति। जिज्ञासितेति। व्यासमुतात् पाराशरिपुत्रात् मुनेः शुकात् जिज्ञासितं विचारितं निर्णीतमिति यावत्। आत्मयाथात्म्यं देहतदनुबन्ध्यसङ्गहेतुभूतं प्रत्यगात्मपरमात्मस्वरूपस्वभावतत्त्वं येन सः असौ परीक्षिदाख्यस्त्वत्पौत्रः, हे नृप इदं शरीरं गङ्गायां हित्वा त्यक्त्वा नास्ति कुतश्चिद्भयं यस्मिन् तत् हरेः पदं धाम अद्धा स्फुटं यास्यति ॥ २८ ॥

इतीति। इतीत्थं राज्ञे युधिष्ठिराय उपादिश्य तद्गुणकर्मादिकमावेद्य जातककोविदाः जातकमधिकृत्य प्रवृत्ते ज्योतिःशास्त्रे अतिनिपुणाः सर्वे विप्राः, लब्धा प्राप्ता अपचितिः पूजा यैस्ते तथोक्ताः सन्तः स्वकान् गृहान् प्रति जग्मुः ॥ २९ ॥ परीक्षिदिति नाम निर्वक्ति। स इति। स जातककोविदानुवर्णितभाविगुणः एष उत्तरासुतः परीक्षिदिति लोकविख्यातः अभूदिति शेषः। यद्यस्मात् प्रभुः समर्थोऽयमुत्तरासुतः गर्भदृष्टं मातुरुदरे समीक्षितं पुरुषम् अनुध्यायन् चिन्तयन् सन्, इह लोके नरेषु परीक्षेत परीक्षितवान्। अन्वेषितवानिति यावत्। परीक्ष्य श्रीकृष्णमध्यवस्यदित्यर्थः। पूर्वदृष्टमिति वा पाठः। परिपूर्वादीक्षतेः शतरि परीक्षदिति रूपसिद्धावपि परीक्षिदिति प्रायिकः पाठो दृश्यते 'हृसृरुहियुषिभ्य इति' इत्यौणादिकसूत्रे ईक्षतेर्ग्रहणाभावेऽपि बाहुलकादितिप्रत्यये हरित्सरिदादिशब्दवद्व्युत्पाद्यः ॥ ३० ॥ स इति। सः प्रसिद्धः सः परीक्षिदिति विख्यातः राजपुत्रः, पितृभिर्वृद्धैर्पितृभिर्हेतुभूतैः अन्वहम् आपूर्यमाणः इव, अयमिवशब्दोऽवधारणे बोध्यः। अन्नपानादिभिरिति शेषः। आशु शीघ्रमेव ववृधे। कथमिव शुक्ले शुक्लपक्षे आपूर्यमाणाभिः काष्ठाभिः पञ्चदशकलाभिः उडुपश्चन्द्र इव। अत्रैकस्तच्छब्दः प्रसिद्धार्थताद्योतकः। अपरस्तु प्रकृतपरामर्षकः। पूर्वं 'किमकारषीत्तत' इति द्वितीयप्रश्नोत्तरं वक्तुं बुद्धौ स्थापितानपि भगवत्प्रयाणोक्तिप्रसक्ततयाऽनुक्तानप्यश्वमेधान् स्वावसरे सप्रकारं कथयति। यक्ष्यमाण इत्यादिना। यक्ष्यमाण इति। ज्ञातिद्रोहजिहासया ज्ञातिवधप्रयुक्तदोषपरिजिहीर्षया अश्वमेधेन यक्ष्यमाणो भगवन्तमाराधयितुकामः राजा युधिष्ठिरः करदण्डयोः अन्यत्र। करः स्वामिग्राह्यो भागः, दण्डः प्रसिद्धः। तयोरन्यत्र ताभ्यां विनेत्यर्थः। अलब्धधन उपायान्तरेणाप्राप्तधनः सन् दध्यौ चिन्तितवान्। करदण्डाभ्यां लब्धं धनं यागानर्हम् उपायान्तरेण तु न प्राप्तं धनम् अतः कथं यक्ष्यामीति चिन्ताव्याकुलो बभूवेत्यर्थः। अश्वमेधेन पापनिवृत्तौ श्रुतिस्मृती यथा। 'तरति ब्रह्महत्यां योऽश्वमेधेन यजेत' इति 'ब्रह्महत्याश्वमेधाभ्यां नापरं पुण्यपापयोः' इति ॥ ३२ ॥ तदिति। तदभिप्रेतं युधिष्ठिरस्याभिप्रेतम् आलक्ष्य अच्युतचोदिताः तत्र नृपेणाकारितेन श्रीकृष्णेन संप्रेरिताः भ्रातरो भीमादयः उदीच्यां दिशि प्रहीणं मरुत्तस्य यज्ञे परित्यक्तं सुवर्णपात्रादिकं भूरिशः प्रभूतं धनं स्वापतेयम् आजह्रुरानीतवन्तः ॥ ३३ ॥

तेनेति। तेन धनेन संभृता संचिताः संभारा यागसाधनानि येन सः, अत एव लब्धकामः युधिष्ठिरः, भीतः ज्ञातिद्रोहाद्भयं प्राप्तः सन्, त्रिभिः वाजिमेधैरश्वमेधैः यज्ञैः हरिं समयजत्। निश्छिद्रं यथा तथा हरिः सम्यगाराधितवानित्यर्थः ॥ ३४ ॥ आहूत इति। राज्ञा युधिष्ठिरेण आहूत आकारितः भगवान् श्रीकृष्णः द्विजैः नृपं युधिष्ठिरं याजयित्वा सुहृदां प्रियकाम्यया सर्वेषां प्रसन्नतां कर्त्तुमिच्छया कतिचित् मासान् उवास। यज्ञसमाप्तितः पश्चादपि तत्र निवासं चकारेत्यर्थः ॥ ३५ ॥ तत इति। हे ब्रह्मन् ततः बन्धुभिः सह राज्ञा युधिष्ठिरेण कृष्णया द्रौपद्या च अभ्यनुज्ञातः स्वयं श्रीकृष्णः सार्जुनोऽर्जुनेन सहितः यदुभिश्च वृतः परिवेष्टितः सन् द्वारवतीं ययौ द्वारिकां प्रति प्रयातः ॥ ३६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

——:❀:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रयोदशोऽध्यायः

सूत उवाच

विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् । ज्ञात्वाऽगाद्धास्तिनपुरं तयाऽवाप्तविविधित्सितः ॥ १॥

उक्तस्त्रयोदशे राज्ञो धृतराष्ट्रस्य निर्गमः । वक्तुं पौत्राभिषेकेण विदुरोक्त्या महोदयम् ॥ १ ॥

अथेदानीं परीक्षितः कलिनिग्रहादिकर्माणि कथयिष्यन्नादौ विदुरागमनेन धृतराष्ट्रस्य प्रस्थानम्, ततोऽर्जुनागमनम्, ततः पाण्डवप्रस्थानं च निरूपयति त्रिभिरध्यायैः । तत्र विषयेषु रागः संसृतये जायते तदभावश्च विमुक्तये जायते ततो मुमुक्षुणा स्वतः परतो वा वैराग्यं संपादनीयमिति अयमर्थः, प्रतिपाद्यतेऽस्मिन्नध्याये । तत्र शुद्धान्तःकरणस्यैव विषयविरागः सुदृढ इति । स च सत्कर्मणा तीर्थसेवया वा स्यादित्यभिप्रेत्य विदुरस्तीर्थसेवां चकार । तां कृत्वा युधिष्ठिरादिबन्धुदिदृक्षा तस्य जाता तया तस्य हास्तिनपुरागतिमाह । विदुर इति । विदुरः कुरुपाण्डवयुद्धात्प्रागेव मन्त्राय धृतराष्ट्रेणाहूतस्तत्पुत्रेण च पराभूतः सन्निति शेषः । तीर्थयात्रायां निमित्तभूतायां सत्यां गतः । तत्र गङ्गाद्वारे इति शेषः । मैत्रेयात् कौषारवेः ऋषेः आत्मनः परमात्मनः गतिं याथात्म्यं ज्ञात्वा तया आत्मगत्या ज्ञानविषयभूतया अवाप्तं विधित्सितं येन सः कृतकृत्य इत्यर्थः । अवाप्तविविदिषित इति पाठे विदितवेद्य इत्यर्थः । 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इति । 'आत्मनि खल्वरे दृष्टे श्रुते मते विदिते इदं सर्वं विज्ञातं भवति' इति श्रुतेः । पुनः हास्तिनपुरम् अगात् ॥ १ ॥

'तयाऽवाप्तविधित्सितः' इत्येतदेवोपपादयति । यावत इति । क्षत्ता विदुरः कौषारवाग्रतः कुषारवगोत्रप्रसूतत्वान्मैत्रेयः कौषारवः तस्य पुरत इत्यर्थः । यावतः कर्मयोगव्रतादिविषयान्यावत्संख्याकान् प्रश्नान कृतवान् । तत्र कतिपयानामेव प्रश्नानामुत्तरैः गोविन्दे जाता एका अव्यभिचारिणी भक्तिर्यस्य तथाभूतः सन् तेभ्योऽवशिष्टप्रश्नेभ्यः उपरराम । चोऽवधारणार्थः । हशब्दस्तृप्तिसूचकः । अवशिष्टप्रश्नानामुत्तराणि न शुश्रावेत्यर्थः । जातैकभक्तिरित्यनेनास्य कृतकृत्यत्वमुक्तम् ॥ २ ॥ तमिति । तम् आगतं बन्धुं विदुरं दृष्ट्वा ज्ञात्वेत्यर्थः । सहानुजो भ्रातृभिः सहितः धर्मपुत्रः युधिष्ठिरः धृतराष्ट्रः युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातः, सूतः संजयश्च, तथा शारद्वतः कृपः, पृथा कुन्ती ॥ ३ ॥ गान्धारीति । हे ब्रह्मन् गान्धारी धृतराष्ट्रभार्या । द्रौपदी पाञ्चाली । सुभद्रा बलभद्रानुजा । उत्तरा परीक्षिन्माता । कृपी द्रोणभार्या । ज्ञातयः सगोत्राः । अन्याश्च स्त्रियः पाण्डोः जामयो ज्ञातिभार्याः पुत्रभार्याः स्वसारो वेति केचित् । अन्तःपुरस्त्रिय इत्यपरे । ससुताः सत्यः, आगतं प्राणं तन्वः शरीराणि इव, कुतश्चिन्मूर्च्छादिदोषतः प्राणे सन्ने सति कराङ्घ्र्याद्युपेतं शरीरं निश्चेष्टं भवति पुनस्तस्मिन्नाविर्भूते यथोत्तिष्ठते तथोत्थायेत्यर्थः । प्रहर्षेण तं प्रत्युज्जग्मुः ॥ ४ ॥ अभिसंगम्येति । परिष्वङ्गा आश्लेषाश्च अभिवादनानि प्रणतयश्च तैः विधिवद्यथोचितम् अभिसंगम्य विरहप्रयुक्तं यदौत्कण्ठ्यं तेन कातराः परवशाः सन्तः । उत्तरपदलोपः । प्रेमबाष्पौघमानन्दाश्रुसमूहं मुमुचुः । ततः कृत आसनपरिग्रहो येन तम्, तं विदुरं राजा युधिष्ठिरः अर्हयांचक्रे पूजयामास ॥ ५ ॥ तमिति । ततः भुक्तवन्तं कृतभोजनं विश्रान्तं विगतश्रमम् आसने सुखं यया तथा आसीनमुपविष्टं च तं विदुरं प्रश्रयावनतः विनयानतपूर्वकायः राजा युधिष्ठिरः येषां स्वजनानां शृण्वतां सतां प्राह ॥ ६ ॥ तदेवाह । अपीत्यादिभिश्चतुर्भिः । युष्माकं पक्षयोः छाया तया समेधितान् उपचयं प्राप्तान् । पक्षिणो हि स्वापत्यानि यथा अतिस्नेहेन पक्षच्छायया वर्द्धयन्ति तद्वत्तव पक्षपातच्छायया संप्राप्तवृद्धीनित्यर्थः । नोऽस्मान् स्मरथ अपि । अपिरत्र किमित्यर्थे । यूयमिति शेषः । समेधितत्वमेवाह । समातृका मात्रा सहिताः वयं विषं च अग्निश्च तावादी यस्य तस्मात् विपद्गणात् त्वया मोचिताः ॥ ७ ॥ कयेति । क्षितिमण्डलं चरद्भिः वो युष्माभिः कया वृत्त्या वर्त्तितं देहवृत्तिः कृता । इहास्मिन् भूतले कानि तीर्थानि जलप्रधानानि स्थानानि । क्षेत्रमुख्यानि भगवदर्चासिद्धजनावासप्रधानानि स्थानानि च भवद्भिः सेवितानि ॥ ८ ॥

कृतकृत्यानां भवतां च तीर्थयात्रया निमित्तभूतया यत्प्रतितीर्थमटनं तन्न स्वप्रयोजनार्थं किं तु तीर्थानुग्रहार्थमित्याह । भवद्विधा इति । हे विभो भवद्विधा भवादृशाः भागवता भगवदैकान्तिकोपासकाः स्वयं स्वान्तःस्थेन स्वमनोऽवस्थितेन गदाभृता भगवता तीर्थभूताः पावित्र्यसंयुताः अतस्तीर्थयात्राकृतं पवित्रत्वं वो नापेक्षितमिति भावः । तर्हि किमर्थं तीर्थान्यटन्तीत्यत्राह ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र स्वगमनेन तीर्थान्यपि तीर्थीकुर्वन्ति। मलिनजनसंपर्केण मलिनतां प्राप्तानि तीर्थान्यपि तद्गतपापापोहनेन पुनस्तीर्थीकर्त्तुं तत्राटन्तीति भावः। तथा च नवमे। 'किं चाहं न भुवं यास्ये नरा मय्यामृजन्त्यघम्। मृजामि तदघं काहं राजंस्तत्र विचिन्त्यताम्' इति गङ्गयोक्ते भगीरथ आह 'साधवो न्यासिनः शान्ता धर्मिष्ठा लोकपावनाः। हरन्त्यघं तेऽङ्गसङ्गात्तेष्वास्ते ह्यघभिद्धरिः' इति॥ ९॥ अपीति। हे तात, कृष्ण एव देवता येषां ते नोऽस्माकं सुहृदः बान्धवाश्च यदवो यादवाः दृष्टाः। अथवा स्वपुर्यां द्वारिकायां सुखं यथा तथा आसते इति श्रुताः अपि किम्॥ १०॥ इतीति। हे शौनक इतीत्थं धर्मराजेन उक्तः विदुरः यदुकुलक्षयं विना अन्यत सर्वं तन्नृपतिपृष्टं यथानुभूतं दृष्टं श्रुतं चानतिक्रम्येत्यर्थः। क्रमशः समवर्णयत्॥ ११॥ यदुकुलक्षयं कुतो नावर्णयत्तत्राह। नन्विति। ननु हे शौनक दुर्विषहं सोढुमशक्यं स्वयम् उपस्थितं स्वत एवोपस्थास्यत् अप्रियं दुःखितान् द्रष्टुम् अक्षमः सकरुणो करुणापरवशो जनः नृणां यच्छ्रवणेनातीव दुःखिताः स्युस्तथाविधानां जनानां पुरः नावेदयेत् न कथयेत्। एवंभूतदयावच्छैलीसत्वादुक्तविधो विदुरोऽपि न कथयामासेत्यर्थः॥ १२॥ कंचिदिति। स्वकैः स्वकीयैः युधिष्ठिरादिभिः अथ देववदीश्वरवत् सत्कृतो बहुमतः विदुरः ज्येष्ठस्य भ्रातुर्धृतराष्ट्रस्य श्रेयस्कृत् सर्वेषां युधिष्ठिरादीनां प्रतीतिं प्रसन्नताम् आवहन् संश्च कंचित् कालम् अवात्सीत्। अस्य भ्रातुः श्रेयस्करणमत्र तस्य मरणज्ञापनपूर्वकं मुक्त्युपायप्रदर्शनरूपं विवक्षितम्॥ १३॥

ननु कथं तस्य तन्मरणज्ञानसामर्थ्यं शूद्रोऽसौ तं कथमुपदिशेच्चेति चेन्न ह्यसौ शूद्रः, किं तु तद्रूपेण स्वयं यम एवासीत्। एवं चेत्तस्यात्रागमने किं कारणं तस्मिन्यमेऽत्रागते चामुत्र को दण्डधर इत्यपेक्षायामाह। अबिभ्रदिति। यमः स्वयं वैवस्वतः शापात् माण्डव्यऋषेः। शापं प्राप्येत्यर्थः। यावत् वर्षशतं यावत्संख्याकवर्षशतपर्यन्तमित्यर्थः। शूद्रत्वं दधार। तावत्संख्याकवर्षशतपर्यन्तम् अर्यमा अर्यमाख्यः पित्रन्तर्गतः पितृविशेषः। अघकारिषु पापकर्तृषु यथावद्यथाघं तत्पापानुरूपमिति यावत्। दण्डम् अबिभ्रत्कारयामास। पापफलमभोजयदित्यर्थः। माण्डव्यो नाम कश्चिदृषिः कस्मिंश्चिन्नदीतीरे तपश्चरंस्तत्र कस्माच्चिन्नगराच्चौर्यं गृहीत्वागतैश्चौरैः सहानुधावद्भिर्नगरपालैरज्ञानात् गृहीत्वा राज्ञे निवेद्य तदनुज्ञया शूले समारोपितोऽभूत्तत्रापि शूले तपः कुर्वन्तमपि जाज्वल्यमानं दृष्ट्वा जनैर्निवेदितो राजा ससंभ्रममुपागम्य शूलादवरोप्य प्रसाद्य प्रस्थापयामास। कोपेन जाज्वल्यमानेन यमसमीपं गतेन मुनिना कस्मादहं शूलमारोपित इति पृष्टो यमः, मुने त्वं बाल्ये शलभं कुशाग्रेणाविध्य क्रीडितवानसि। तेन दोषेणायमवस्थाविशेषः प्राप्त इति प्राह। तच्छ्रुत्वा माण्डव्यस्तं शशाप। बाल्येऽजानतो मे महान्तं दण्डं यतः त्वं कारितवानतः शूद्रो भवेति माण्डव्यशापः॥ १४॥ अथ युधिष्ठिरः किं चकारेति मुन्याशंङ्कामुत्तरयन् राज्यस्यापकर्षं निरुपयंस्तदुत्कर्षं निगमयति। युधिष्ठिर इति। लब्धं राज्यं येन सः युधिष्ठिरः कुलंधरं कुलनिर्वाहं वंशधरमिति यावत्। पौत्रं परीक्षितं दृष्ट्वा लोकपालाभैरिन्द्रादिलोकपालसदृशैः भ्रातृभिः परमया श्रिया संपदा च मुमुदे॥ १५॥ एवमिति। एवमुक्तप्रकारेण गृहेषु सक्तानामासक्तिं प्राप्तानां तदीहया गार्हीयचेष्टया गृहव्यापारेणेत्यर्थः। प्रमत्तानामविदितमृत्युकालानां कर्त्तरि षष्ठी। तैरित्यर्थः। अविज्ञातः परमश्चासौ दुस्तरश्च सर्वान्वशीकुर्वन् अत एव कस्याप्यवश्य इत्यर्थः। कालः अत्यक्रामदतिक्रान्तवान्। युधिष्ठिरादीनां विषयानुभवकालो व्यतिक्रान्तो बभूवेत्यर्थः॥ १६॥ भ्रातुः श्रेयस्क्रियाप्रकारं प्रपञ्चयति। विदुर इत्यादिभिर्दशभिः। तत्कालातिक्रमणम् अभिप्रेत्य ज्ञात्वा विदुरः धृतराष्ट्रम् अभाषत। हे राजन् शीघ्रं निर्गम्यताम्। त्वया गृहादिति च शेषः। आगतमुपस्थितम् इदं भयं पश्यालोचय॥ १७॥

किं तत्राह। प्रतिक्रियेति। हे प्रभो यस्य कालस्य कुतश्चित्कारणात् कर्हिचित्कदाचिदपि प्रतिक्रिया निवर्तनक्रिया इह जीवलोके नास्ति। निवर्त्तनोपायो न विद्यते इत्यर्थः। स एष भगवान् भगवन्नियाम्यः कालः सर्वेषां नोऽस्माकं समागतः। मृत्युकालः समुपस्थित इत्यर्थः॥ १८॥ गृहासक्तिं त्याजयितुं कालं विशिंषन्नाह। येनेति। अयं परिदृश्यमानः जनः लोकः येन कालेन अभिपन्नोऽभिपद्यमानः ग्रस्त इति यावत्। प्रियतमैः अतिशयप्रियैः हृदयंगमैरित्यर्थः। प्राणैरसुभिरपि सद्यस्तत्क्षणम् एव वियुज्येत। तर्हि अन्यैः प्राणानुबन्धिभिः धनादिभिः वियुज्येत इति किमुत। तत्र किं वक्तव्यमित्यर्थः। स कालः समागत इत्यन्वयः॥ १९॥ तदत्रावस्थानमिति दैन्यमिति दर्शयन्विरक्तिमुत्पादयितुं तस्यावस्थां वर्णयति। पित्रित्यादिभिश्चतुर्भिः। हे राजन् ते तव पितरश्च, भ्रातरश्च, सुहृदश्च, पुत्राश्च, ते सर्वे हता मृताः। वयो यौवनं च विगतम्। आत्मा देहश्च जरया ग्रस्तः तथापि परगेहं शत्रूणां भवनम् उपाससे। जीवनार्थमिति शेषः। न श्रेयःसाधनायेहसे। अतो मृतस्य तव परलोके न सुखावाप्तिर्भवितेति भावः॥ २०॥ जीविताशां त्याजयितुं विस्मयमान आह। अहो इति। अहो अत्याश्चर्यमिदं जन्तोः प्राणिनः जीविताशा बहुकालं जीवामीतीच्छा महीयसी महत्तरा बलवतीत्यर्थः। यया जीविताशया भवान् भीमेन आवर्जितमपवर्जितं तिरश्चीनहस्तविधानपूर्वं परिभूय दत्तमित्यर्थः। पिण्डं कवलं गृहपालवत्सारमेय इव आदत्ते स्वीकरोति॥ २१॥ ननु भीमस्य मत्कनिष्ठभ्रातृपाण्डोः पुत्रत्वेन मत्पुत्रत्वात्तद्दत्तान्नेन शरीरपोषणमुचितमेवेति चेत्सत्यं विषदानादिना त्वयाऽपराद्धत्वात्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दत्तेनान्नेन प्राणधारणं तवात्यन्तमनर्हम्। एतद्दत्तपिण्डस्य विषोपमत्वादित्यभिप्रेत्याह। अग्निरिति। येषामित्यस्याग्न्यादिभिः प्रत्येकमन्वयः। येषाम् अग्निः निसृष्टः। लाक्षागृहेष्विति शेषः। येषां गरो विषं दत्तम्। येषां दाराः द्रौपदी दूषिताः। कचग्रहणवस्त्रापहरणादिभिरवमता इत्यर्थः। येषां त्वया धनं क्षेत्रम्, राज्यं च चकाराद्गोधनम्। हृतम्। तद्दत्तैस्तदपवर्जितैः असुभिः प्राणैः कियत्। न किंचित्। लज्जाकरत्वान्मृतिरेव गरीयसी अतो निर्गम्यतामिति भावः॥ २२॥

तस्येति। तस्य तद्दत्तासोः कृपणस्य जिजीविषोर्जीवितुमिच्छोः अनिच्छतः देहत्यागमनिच्छतोऽपि तव अयं देहः जीर्णे वाससी इव जरया परैत्यपगमिष्यत्येव। अनिच्छतोऽपि पुंसः वाससी यथा कालेन जीर्येते नश्यतश्च तद्वदिति भावः। अत एव धीरो भवेत्याशयः॥ २३॥ यदि मद्देहः परैति तर्हि अत्र ज्ञातिसंनिधावेव परैत्वित्यत्राह। गतेति। यः पुमान्, गतः स्वार्थः स्वापेक्षितपुरुषार्थो यस्मात् तं यशोधर्मादिशून्यमित्यर्थः। इमं देहं विरक्तः देहादिषु स्पृहारहितः। मुक्तानि परित्यक्तानि बन्धनानि संसृतिबन्धविधायकानि पुण्यपापात्मकानि येन सः। अविज्ञाता ज्ञातिभिरप्यविदिता गतिर्देहत्याग-लोकान्तरप्राप्तिरूपा गतिर्यस्य एवंविधः संश्च जह्याद्धातुमिच्छेत्। स वै स एव, धीरः मोक्षभाक् उदाहृतः। संप्राप्तदुःखस्यापि संप्रोक्तप्रकारतः सहनेन मुक्तिप्राप्तेः पुरुषार्थसाधनयोग्यस्य देहस्य पुरुषार्थसाधनतपश्चरणादिना हानौ सत्यामपि दोषा-भावान्निर्जनं वनं गत्वा तपश्चर्यया शरीरमिदं साधितस्वार्थं कुर्विति भावः॥ २४॥ इतोऽपि प्राप्तवनस्य तव तपःसाधनमेव श्रेयस्करमिति सूचयन्नाह। य इति। यः पुमान् स्वकात्स्वस्मात् स्वबुद्ध्येत्यर्थः। परतोऽन्यस्मात् वा। परबोधनेन चेत्यर्थः। इह लोके जातनिर्वेदः उत्पन्नवैराग्यः आत्मवान्वशीकृतमनाः सन् हरिं स्वसमाश्रितानां संसृतिबन्धहरं भगवन्तं हृदि कृत्वा निधाय ध्यानेन संनिधाप्येति यावत्। गेहात् प्रव्रजेत्। सः एव नरोत्तमः नरेषु श्रेष्ठः उदाहृतः॥ २५॥ त्वं तु नरोत्तमो नाभूः अतः इदानीं धीरो भवेत्येतदेवाह। अथेति। अथ अतः स्वैः ज्ञातिभिः अज्ञाता न विदिता गतिर्यस्य सः भवान् उदीचीं दिशं यातु। तत्र हेतुमाह। इतोऽस्मात्कालात् अर्वाक् अर्वाचीनः एष्यन्नित्यर्थः। कालः प्रायशः पुंसां गुणान् धैर्यादीन् विकर्षत्याच्छिनत्तीति तथाभूतः भवितेति शेषः॥ २६॥

एवमिति। एवममुना प्रकारेण अनुजेन विदुरेण बोधितः आजमीढः अजमीढवंशोत्पन्नः, प्रज्ञा बुद्धिरेव चक्षुर्यस्य सः अन्ध इत्यर्थः। राजा धृतराष्ट्रः भ्रात्रा विदुरेण संदर्शितः प्रदर्शितः अध्वा गन्तव्यदेशमार्गो यस्य सः। अनेन विदुरोऽपि तेन सहैव निरगादिति सूचितम्। दृढिम्नो नितरां दृढान् सुदृढमूलानिति यावत्। स्वेषु देहतदनुबन्ध्यादिषु स्नेहा अनुरागास्त एव पाशाः पाशवद्बन्धहेतुत्वात्तान् छित्वा निश्चक्राम। गृहादिति शेषः॥ २७॥ पतिमिति। साध्वी सुशीला पतिव्रता पतिशुश्रूषा-रूपव्रतवती सुबलस्य नृपतेः पुत्री गान्धारी च, न्यस्तदण्डानां प्रहर्षो यस्मिंस्तं हिमालयं हिमाचलं प्रयान्तं पतिम् अनुजगाम। ननु सुकुमारी सा हिमादिदुःखबहुलं हिमवन्तं कथं गतेत्याशङ्कायां दुःखदमपि किंचित्केषांचित्प्रहर्षहेतुर्भवतीति दृष्टान्तेन तत् द्रढयति। मनस्विनां शूराणां युद्धे यत्संप्रहारः तीव्रशस्त्राभिघातः इव स यथा शूराणां हर्षजनकस्तथा अस्याः हिमाचलं प्रति गमनमुत्साहजनकमभूदिति। पाठान्तरे सत्संप्रहारं युद्धं यथा हर्षकरं तथा हर्षकरमित्यर्थः॥ २८॥ अजातशत्रुरिति। ततः हुता अग्नय आहवनीयाद्यो येन तथाभूतः। अनेन रात्रावेव धृतराष्ट्रो निरगादित्यपि सूचितम्। कृतं मैत्रं मित्रदैवत्यं संध्यावन्दनं येन सः अजातशत्रुर्युधिष्ठिरः, विप्रान् ब्राह्मणान्, तिलाश्च, गावश्च, भूमिश्च रुक्मं सुवर्णं च, तैः सत्कृत्येति शेषः। नत्वा नमस्कृत्वा च गुरुवन्दनाय स विदुरगान्धारीधृतराष्ट्रानभिवादयितुं गृहं तयोर्निवासभवनं प्रविष्टः सन् पितरौ विदुरधृतराष्ट्रौ सौबलीं गान्धारीं च, न च नैव, अपश्यत्। पितराविति द्विवचनेन विदुर एव विवक्षितः सौबल्याः पृथगुपादानात्॥ २९॥ तत्रेति। ततः तत्र धृतराष्ट्रगृहे आसीनमुपविष्टं संजयम् उद्विग्नमानसः भीतमानसः युधिष्ठिरः पप्रच्छ। हे गावल्गणे गवल्गणसूनो संजय नेत्रयोः हीनः नेत्राभ्यां रहित इत्यर्थः। वृद्धः नोऽस्माकं तातः क कुत्र गत इत्यर्थः॥ ३०॥ अम्बेति। हताः पुत्राः यस्याः सा अत एव आर्त्ता दुःखिता अम्बा गान्धारी च क गता। पितृव्यः पितुर्भ्राता सुहृच्च विदुरः क गतः। हताः बन्धवः पुत्राः यस्य सः अत एव दुःखितः संजातदुःखो धृतराष्ट्रः अकृतप्रज्ञे मन्दमतौ विवेकहीने इति यावत्। मयि शमलमपराधम् आशंसमान-श्चिन्तयन् अत एव भार्यया सह गङ्गायाम् अपतत्। अपि जाह्नव्यां पतितवान् किमित्यर्थः॥ ३१॥

वात्सल्ययुक्तत्वात्सापराधेष्वपि दोषमनवेक्ष्यापकारमप्युपकारत्वेन चिन्तयन्पृच्छति। पितरीति। यौ पितृव्यौ पितरि पाण्डौ उपरते मृते सति सर्वान् सुहृदः पुत्रान् नोऽस्मान् शिशूनेव व्यसनत आपद्भ्यः अरक्षताम्। तौ पितृव्यौ इतः स्थानात् क गतौ छत्रिन्यायेनोपात्तविदुराभिप्रायाद्वा व्यसनतोऽरक्षतामित्युक्तम्॥ ३२॥ कृपयेति। एवं युधिष्ठिरेणोक्तः सूतः संजयः आत्मेश्वरं स्वप्रभुं धृतराष्ट्रम् अचक्षाणोऽपश्यमानः अत एव अत्यतीव पीडितः दुःखितः विरहकर्शितस्तद्विरहेण क्षणादेव कृशीभूतः सन् कृपया स्नेहवैक्लव्याच्च न प्रत्याह। प्रत्युत्तरं वक्तुं न प्रबभूवेत्यर्थः॥ ३३॥ विमृज्येति। ततः शनैः पाणिभ्याम् अश्रूणि विमृज्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मना विवेकात्मिकया धिया आत्मानं संकल्पविकल्पात्मकं मनः विष्टभ्य प्रतिबध्य स्थिरीकृत्येति यावत्। प्रभोर्धृतराष्ट्रस्य पादौ अनुस्मरन् अजातशत्रुं युधिष्ठिरं प्रत्यूचे ॥ ३४ ॥ नाहमिति। हे कुलनन्दन वो युष्माकं पित्रोः विदुरधृतराष्ट्रयोः गान्धार्याः वा वाशब्दश्चार्थः। व्यवसितं निश्चितम् अहं न वेद नैव वेद्मि। हे महाबाहो त्वमिवाहमपीति शेषः। महात्मभिस्तैः मुषितः वञ्चितः अस्मि ॥ ३५ ॥ अथेति। अथ तस्मिन्नेव समये इत्यर्थः। सह तुम्बुरुस्तुम्बुरुणा सहितः भगवान् नारदः तत्र युधिष्ठिर-समीपे इति शेषः। आजगाम। सानुजः भ्रातृसहितः युधिष्ठिरः तमवलोक्येति शेषः। प्रत्युत्थाय अभ्युत्थानं कृत्वा अभिवाद्य अभ्यर्चयन्निव शोकवेगादभ्यर्चनं कृतमिव मत्वा आह। न तु राजाऽभ्यर्चयत्। 'शोकक्रान्तः क्षुधाक्रान्तः श्रद्धया रहितः पुमान्। गुरुदेवद्विजातीनां पूजनं मनसाचरेत्' इति स्मृतेस्तथैव कुर्वन् सन्नाह। अभ्यर्चयन्मुनिमिति पाठे तु सुगमम् ॥ ३६ ॥ नाहमिति। हे भगवन् अहं पित्रोर्विदुरधृतराष्ट्रयोः गतिं गमनप्रकारं न वेद न जाने। तौ इतोऽस्मात्स्थानात् क्व गतौ इति च न जाने। हतपुत्रा अत एव आर्ता तपस्विनी अम्बाऽस्मन्मातृसमा सा गान्धारी वा क्व गता इत्यपि न जाने ॥ ३७ ॥

दिष्ट्येति। हे भगवन्। दिष्ट्येत्यानन्दद्योतकमव्ययम्। व्यसनार्णवे पितृविश्लेषजदुःखसमुद्रे मग्नानां निमज्ज-मानानां नोऽस्माकम्। कर्त्तरि षष्ठी। अस्माभिरित्यर्थः। अपारे दुष्प्रापपरतीरे अर्णवे कर्णधारस्तत्तारयिता कैवर्त्तकः इव पारदर्शनः भगवांस्त्वं दृष्टः। अतस्तद्गतिज्ञस्त्वं ब्रूहीति भावः ॥ ३८ ॥ इत्थमिति। हे भार्गव इत्थं धर्मपुत्रेण युधिष्ठिरेण पृष्टः सर्वज्ञः मुनिसत्तमः भगवान् सः नारदः तं युधिष्ठिरम् आबभाषे ॥ ३९ ॥ भाषणमेवाह, तत्र यत पृष्टं पित्रोर्गतिं ब्रूहीति तस्योत्तरं विवक्षुस्तावन्मनसि विचारयति, भगवान् जगज्जीवकर्मानुगुणसुखदुःखादिफलप्रदाने प्रवृत्तस्तत्र त्वरावांश्च भवति। कृत्स्नजगदन्तर्गतः यं च कर्मायत्तदेहतदनुबन्ध्यादिसंश्लेषविश्लेषनिमित्तं शोकं कुरुते तदस्य न युज्यते इति विवक्षुरादावेव यथावृत्तकथने शोकेन मूर्च्छितः पतेदयमिति मनसि निधाय प्रथमं तावच्छोकमुपशमयति वैराग्योत्पादनाय। मा कंचनेति। हे राजन् कंचन मा शुचः। देहं तदनुबन्धिनं वा कंचिदपि शोकविषयं मा कार्षीरित्यर्थः। कुतः यद्यस्मात् इदं जगत् ईश्वरवशं भवतीति शेषः। कर्मानुगुणफलप्रदानप्रवृत्तेश्वरायत्तत्वात्तन्नियाम्यमस्तीत्यर्थः। कोऽसावीश्वर इत्यत्राह। सपाला इन्द्रादिलोकपालैः सहिताः इमे लोकाः विरिञ्चिप्रभृतयोऽकिंचनपर्यन्ता इमे जना इत्यर्थः। ईशितुः सर्वनियामकस्य यस्य परमेश्वरस्य बलिं पूजां वहन्ति। सर्वेऽपि तत्किंकरा एव भवन्तीत्यर्थः। स परमेश्वर एव भूतानि संयुनक्ति एकत्र मेलयतीत्यर्थः। स एव वियुनक्ति च। अर्कतूलवद्यतस्ततो वियोजयतीत्यर्थः ॥ ४० ॥ जीवस्य स्वविधेयक्रियाप्रवृत्तावीश्वरपारतन्त्र्यं सदृष्टान्तमाह। यथेति। यथा नसि नासिकायां प्रोताः तन्त्यां नसि प्रोतरज्जौ दामभिस्तद्गतानल्परज्जुभिः बद्धाश्च गावो बलीवर्दादयः शकटादिसंभृत-भारं कर्षकगृहं प्रति वहन्ति। एवं वाक्तन्त्यां वेदलक्षणायां रज्जौ नामभिरल्पदामस्थानीयैर्ब्राह्मणादिब्रह्मचार्यादिनामभिः बद्धाः संनद्धाः सन्तः ईशितुः परमेश्वरस्य बलिं वहन्ति ॥ ४१ ॥

स्वक्रियाप्रवृत्तावेवं पारतन्त्र्यमुक्त्वा संयोगवियोगयोरपि पारतन्त्र्यमाह। यथेति। यथा क्रीडोपस्कराणां क्रीडा-साधनानां संयोगविगमौ क्रीडितुः इच्छया स्याताम्। तथैव नृणां संयोगविगमावपि ईशेच्छया परमेश्वरस्य इच्छात्मक-संकल्पेन एव स्याताम्। अत्रायं भावः। देहतदनुबन्ध्यादीन् त्वं नित्यान्मत्वा शोचसि किमनित्यान्मत्वा वोभयथा वा। पक्षत्रयेऽपि न ते शोकविषयाः। यतो देहिनां देहादिसंश्लेषविश्लेषौ तावत्क्रीडार्थं जगद्व्यापारे प्रवृत्तस्येश्वरेच्छया तत्तत्कर्मानु-गुण्येन संपद्येते क्रीडितुरिच्छया क्रीडोपस्करसंयोगवियोगवदिति ॥ ४२ ॥ उक्तार्थमनुवदंस्तत्पुनः प्रतिक्षिपति। यदिति। यद्यदि लोकं ध्रुवं स्थिरं मन्यसे। अथवा लोकम् अध्रुवमस्थिरं मन्यसे, वा उभयं ध्रुवाध्रुवं मन्यसे। यदि ब्रूषे उभयमिति तर्हि तत् न च नैव युक्तम्, न हि द्व्यात्मकं वस्तु दृष्टं श्रुतं वा। परस्परविरुद्धयोर्ध्रुवत्वाध्रुवत्वयोरेकत्र समावेशाऽसंभवेन निरस्त इति भावः। अस्त्वेवं तथापि ध्रुवाध्रुवयोरेकपक्षस्तु स्यादित्येतत्पक्षद्वयमपि प्रतिक्षिपति। सर्वथा न हीति। ते देहादयः मोहजात् स्नेहात् अन्यत्र सर्वथा न हि शोच्याः। स्नेहं विनान्योऽत्र शोकहेतुरेव नास्तीत्यर्थः। आत्मनोऽविनाशित्वान्न स शोच्यः। देहादेर्विनाशिस्वभावत्वात्सोऽपि न शोच्यः। उभयात्मकं तु वस्त्वेव न भवति। अतः शोकहेतुः केवलं देहात्मभ्रम-मूलको देहादिष्वनुराग एव। तथा च भगवद्वचनम्। 'नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वन-योस्तत्त्वदर्शिभिः' इति ॥ ४३ ॥ तस्मादिति। अङ्ग हे राजन् तस्माच्छोकस्य केवलस्नेहहेतुत्वात् अज्ञानकृतं देहात्मभ्रमकृतम् आत्मनः स्वस्य मनसो वा वैक्लव्यं दैन्यं जह्यपनय। तदभिप्रेतं प्रश्नान्तरं सर्वज्ञत्वात्स्वयमेवाविष्कृत्य प्रतिवक्ति। कथमिति सार्द्धद्वयेन। तत्र कथमित्यर्द्धेन प्रश्नाविष्कारः ततः श्लोकद्वयेन तस्य प्रतिवचनमिति विवेकः। अनाथाः रक्षितृहीनाः अत एव कृपणाः दीनाः ते। बतेति खेदे। मां विना मदृते कथं वर्त्तेरन् जीवेरन्। इति शब्दोऽत्राध्याहर्त्तव्यः। कथं वर्त्तेरन्निति पृच्छसि चेदित्यर्थः ॥ ४४ ॥ तावत्त्वापि तत्तुल्ययोगक्षेमत्वे सति स्वस्मिन् यस्तद्रक्षकत्वाभिमानस्तं त्यजेत्यभिप्रायेणाह। कालेति। कालो गुणक्षोभकश्च, कर्म जन्मनिमित्तमदृष्टं च, गुणाः सत्त्वादयस्तदुपादानरूपाश्च, तदधीनः पाञ्चभौतिकः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथिव्यादिपञ्चभूतारब्धः अयं देहः अस्तीति शेषः। अयमित्यनेन त्वद्देहोऽप्येवंविध एवेति सूचितम्। एवंविधदेहः स्वयं सर्पग्रस्तः परं यथा स्वयं सर्पग्रस्तोऽन्यान् सर्पग्रस्तान्यथा न गोपायति तद्वदित्यर्थः। कथम् अन्यान् गोपायेत् रक्षेत् न रक्षेदेवेत्यर्थः। तस्मादहं पित्रादिरक्षाकर्त्तेत्यज्ञानं त्यजेति भावः॥ ४५॥

अस्त्वेवमथापि जीविकावति गृहे स्थितानामस्माकं जीवनं सुशकं परं तु इतो गतानां तेषां जीवनं कथं स्यादिति चेदीश्वरेण विहिता वृत्तिः सर्वत्र सुलभैवेत्याह। अहस्तानीति। सहस्तानां हस्तयुक्तानां मनुष्याणाम् अहस्तानि औषधिफलमूलादीनि जीवनम् 'व्रीहयश्च मे यवाश्च मे' इत्यादिश्रुत्युक्तेः। चतुष्पदां गोमहिष्यादीनाम् अपदानि न पद्यन्ते तथाशीलानि तृणादीनि जीवनम्। 'पशवो यवसं क्षीरं वत्सं कृत्वा तु गावृषम्। अरण्यपात्रे चाधुक्षन्' इति चतुर्थेऽत्रैव यवसस्य तदन्नत्वोक्तेः। तत्र तेषु प्राणिषु मध्ये महतामपादानां सतां महत्तोपेतानामजगरादिहिंस्राणां फल्गूनि क्षुद्राणि भूतानि जीवनम्। किं बहुना जीवस्य जीवसंज्ञावतः प्राणिनः, जीवयतीति जीव ओषध्यादिरूपमन्नं जीवनं प्राणधारणहेतुः। जीवशब्दोऽत्र भक्ष्यपरः। अनेन सर्वेषां स्वस्ववृत्तिः सर्वत्र सुलभैवेत्युक्तम्॥ ४६॥ अखिलस्य विश्वस्य श्रीहर्यधीनत्वाद्वृत्त्यादिकसंकल्पान् संपरित्यज्य तद्भजनमेवावश्यं कर्त्तव्यमित्याह। तदिति। हे राजन् यस्मात् हरेरितरदिति शेषः। इदमेतत् सर्वम् अनित्यमस्वतन्त्रं च भवति इति शेषः। तत्तस्मात् एकोऽद्वितीयः स्वसमाधिकतावर्जित इत्यर्थः। स्वदृक् स्वयंप्रकाशः यः भगवान् स एव आत्मनां सर्वेषां जीवेश्वरादीनाम् आत्मा अन्तः प्रविश्य प्रशासकः। अत एव अन्तरोऽन्तर्यामितया सर्वकालं वर्त्तमानः अनन्तरः पृथगपि स्वधाम्नि मूर्तिमत्तया विराजमानः अस्तीति शेषः। तं भगवन्तं मायया स्वकीयेच्छया उरुधा द्विभुजमपि सन्तं चतुर्भुजाष्टभुजसहस्रभुजादिमत्त्वेन अनेकप्रकारं पश्य। अनन्तैश्वर्यवतस्तस्य न किमप्यघटमानमिव भवतीति भावः॥ ४७॥ ननु भगवता त्वयेश्वरवशं जगदित्युक्तं प्राक् स चानन्तरश्लोके विशेषणमात्रेण तन्नामाप्रदर्शनपूर्वं वर्णितः। तं कथं वयं बुद्ध्यामहे कास्ते वास्तीदृशो महामायावी चेति चेद्द्वारिकायामित्याह। सोऽयमिति द्वाभ्याम्। हे महाराज सः निखिलजगदन्तरात्मा वशीकृतलोकत्रयः कालशरीरकः भगवान् अयं श्रीकृष्णः भूतानि स्वाज्ञानुवर्त्तीनि भावयत्यभ्युदययुक्तानि करोतीति तथाभूतः सन्। हेतुगर्भमिदं विशेषणम्। अनेन साधु-परित्राणं द्योतितम्। सुरद्विषां दुष्कृतकार्यसुराणाम् अभावाय नाशाय। अनेन 'विनाशाय च दुष्कृताम्' इति सूचितम्। कालरूपः दुष्टैरधर्मिभिः संप्रवर्त्तिताधर्मविनाशनपूर्वं धर्मसंस्थापनार्थमधर्मिसंहर्तृतया तैः स्वमृत्युरूपतयेक्षितः संश्च अस्यां भूमौ अद्य अवतीर्णो यदुकुले प्रादुर्भूतः अस्तीति शेषः॥ ४८॥

तर्हि स कृष्णो द्वारिकायामस्त्येवेत्यास्थां मा कृथा इत्याह। निष्पादितमिति। तेन च देवकार्यं तद्विपक्षक्षपणरूपं देवकृत्यं निष्पादितम्। अधुना तु अयं भगवान् अवशेषमवशिष्टं प्रतीक्षते। तत्संपादनानन्तरं निजं धाम यास्यतीति शेषः। स्वकुलविनाशरूपोऽयं गूढोऽभिसंधिः प्रतीयते। अतः ईश्वरः परमेश्वरः स कृष्णः यावत् इह भूलोके भवेत्, तावत् एव यूयम् अपि अवेक्षध्वम्। अत्रावस्थानमिति शेषः। भगवत्तिरोधानश्रवणानन्तरं पितृवद्गृहान्निर्गच्छतेति भावः। यदुकुलक्षयादिकं च भूतमपि विदुरवद्देवायमपि नावर्णयत्॥ ४९॥ तदेवं पितृशोकं कृष्णस्यात्रावस्थित्यास्थां च निवार्य अहं पित्रोर्गतिं न वेद्मि तां त्वं ब्रूहीति कृतप्रश्नोत्तरजिज्ञासवे तस्मै तेषां यथावृत्तं कथयति। धृतराष्ट्र इति। हे राजन् धृतराष्ट्रः स्वभार्यया गान्धार्या भ्राता विदुरेण च सह हिमवतो हिमाचलस्य दक्षिणेन दक्षिणदिग्वर्तिनि भागे ऋषीणाम् आश्रमं गतः। हिमवतो दक्षिणपार्श्वानन्तरवर्ति-नमृष्याश्रमं संप्राप्त इत्यर्थः॥ ५०॥ कोऽसावाश्रम इत्यत्राह। स्रोतोभिरिति। या वै प्रसिद्धा इत्यर्थः। स्वर्धुनी स्वर्गनदी गङ्गा सप्तानां ऋषीणां प्रीतये आत्मानं सप्तभिः स्रोतोभिः प्रवाहैः सप्तधा व्यधात्। सप्तभिः प्रवाहैः यत्र सुविभक्ता बभूवेत्यर्थः। तं प्रदेशं नाम्ना सप्तस्रोतः प्रचक्षते प्रवदन्ति। तं देशं त्वत्पित्रादयो गता इति संबन्धः॥ ५१॥ तत्र तेन कृतमष्टाङ्गयोगमाह। स्नात्वेति चतुर्भिः। तस्मिन् स्रोतसि सः त्वत्पिता धृतराष्ट्रः अनुसवनं त्रिकालं स्नात्वा यथाविधि अग्नींश्च हुत्वा अब्भक्षः केवल-जलमात्रमेव भक्षयन् उपशान्तो रागाद्यकलुषित आत्मा मनो यस्य सः। विगता ईषणा दारधनपुत्रानुरागरूपा यस्य तथाभूतः सन् आस्ते। तत्र स्नानं होमोऽब्भक्षणं चेति नियमा उक्ताः। विगतैषण इत्यनेन यमा उक्ताः॥ ५२॥ जितासन इति। जित-मासनं येन सः। एकासनेन चिरमासीनः सन्नपि क्लमरहित इत्यर्थः। जिताः श्वासाः प्राणादिवायवो येन सः। प्रत्याहृतानि शब्दादिविषयेभ्यो नियमितानि षडिन्द्रियाणि येन सः। हरिभावनया भगवद्गुणाद्यनुस्मृत्या ध्वस्तानि निरस्तानि रजःसत्त्व-तमसां मलानि येन सः। भगवद्भावनानिरस्तरजआदिगुणत्रयकार्यरूपमुक्तिप्रतिबन्धकपुण्यापुण्यादिरूपमल इत्यर्थः। तथाभूतश्च आस्ते इति सबन्धः। अत्र जितासन इत्यादिना आसनप्राणायामप्रत्याहारा उक्ताः। हरिभावनयेति धारणोक्ता। अनेनैव फलतो ध्यानमप्युक्तम्॥ ५३॥

विज्ञानेति। विज्ञानात्मनि विज्ञानस्वरूपे क्षेत्रज्ञे प्रत्यगात्मनि 'विज्ञानं यज्ञं तनुते' 'यो विज्ञाने तिष्ठन्' इत्यादौ श्रुतौ जीवात्मनि विज्ञानशब्ददर्शनात्। षडिन्द्रियाणीति शेषः। संयोज्य इन्द्रियैरनाकृष्टचित्त इत्यर्थः। इन्द्रियाणां पूर्वं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रस्तुतत्वादर्थात्सिद्धया शेषत्वेनोपादानं कृतम्। तमेवंविधम् आत्मानं क्षेत्रज्ञं घटाम्बरं घटोपाधिकमाकाशम् अम्बरे महाकाशे इव आधारे ब्रह्मणि प्रविलाप्य ब्रह्मसमानाकारतयाऽनुसंधायेत्यर्थः। महाकाशे घटाकाशमिव ब्रह्मण्यात्मानं प्रविलाप्य स्थाणुरिवास्ते इत्युत्तरेणान्वयः। अम्बरदृष्टान्तेन जीवब्रह्मणोः स्वरूपैक्यमनुसंहितमिति न भ्रमितव्यम्। घटाद्युपाध्यपगमेन घटाकाशस्य महाकाशसश्लेषेऽपि स्वरूपभेदसद्भावात्। न च वाच्यं घटाकाशमहाकाशयोर्भेदो नास्तीति। पञ्चीकरणसरणादाकाशेऽपि भेदस्य वेदान्तिभिरप्यवश्याङ्गीकार्यत्वात् यद्याकाशेंऽशभेदो नाभ्युपगम्येत तदा कृत्स्नस्याकाशस्य घटाद्युपहितप्रसङ्गः। न चेष्टापत्तिः घटाकाशमहाकाशयोर्व्याप्यव्यापकभाववैपरीत्यापातात्। कात्स्न्येनाकाशस्य घटोपहितत्वे हि तत्परिच्छिन्नाकाशस्य व्याप्यत्वं सुस्पष्टम्। अन्तःसंश्लेषदशायामपि घटाकाशमहाकाशयोः प्रदेशदोऽस्त्येव। उपाध्यपगमेन समानाकारत्वमात्राभिप्रायक एवायं दृष्टान्त इत्यवगन्तव्यम्। यद्वा। घटाम्बरं भटनिभृतसंघृष्टश्रीखण्डचन्दनाख्यसुरभिद्रव्यमम्बरे कटाहादिनिभृतकेसरादिसंघृष्टचन्दनात्मकसुरभिद्रव्ये इव प्रविलाप्येत्यर्थः। अम्बरं व्योमवस्त्रयोः। कर्पासे सुरभिद्रव्ये' इत्यनेकार्थसंग्रहे हैमः॥ ५४॥ ध्वस्तेति ध्वस्तो निवृत्तः मायागुणानां रजआदीनामुदर्को रागद्वेषादिकार्योत्तरोत्तरोदयो यस्य सः। निरुद्धानि करणानीन्द्रियाण्याशयो वाशनान्तःकरणं वा येन सः। निवर्त्तिता अखिला आहारा अब्भक्षादयोऽपि येन तथाभूतः सन् स्थाणुः स्तम्भ इव अचलो निश्चलः आस्ते। प्रत्याहृतषडिन्द्रिय इत्यनेन तु इन्द्रियाणां विषयेभ्य आकर्षणमात्रमुक्तम्। निरुद्धकरणाशय इत्यनेन तु पुनर्विषयेषु प्रवृत्तिप्रतिबन्ध उक्तः। अतो न पौनरुक्त्यम्। तथा ध्वस्तरजःसत्त्वतमोमल इत्यनेन पुण्यपापाद्यभाव उक्तः। ध्वस्तमायागुणोदर्क इत्यनेन पुण्यापुण्यमूलकरागद्वेषाद्यभाव उक्तः। आभ्यां द्वाभ्यां श्लोकाभ्यां समाधिः पुनरुत्थानाभावश्चोक्तः। तथाभूतमप्यानेतुमुद्यन्तं प्रत्याह। संन्यस्तानि त्यक्तान्यखिलानि देहधारणार्थान्यपि कर्माणि येन तस्य। तस्य धृतराष्ट्रस्य अन्तरायो विघ्नभूतः त्वं मा एव अभूः नैव भव। अडागमश्छान्दसः॥ ५५॥

दर्शनमपि तावत्कुर्यामित्युद्यन्तं प्रत्याह। स वा इति। हे राजन् स धृतराष्ट्रः अद्यतनाद्वर्त्तमानाद्दिनादारभ्य परतः परस्मिन् पञ्चमे अहनि स्वं कलेवरं देहं हास्यति त्यक्ष्यति। तर्हि दाहार्थं गमिष्यामि नेत्याह। तत्कलेवरं चापि भस्मीभविष्यति योगाग्निनैव भस्मसाद्भविता। वै निश्चितमेव॥ ५६॥ तर्हि गान्धार्यानयनाय गमिष्यामि नेत्याह। दह्यमाने इति। ततः सहोटजे पर्णशालासहिते पत्युः स्वभर्त्तुः देहे अग्निभिः गार्हपत्यादिवह्निभिः दह्यमाने सति तस्य पत्नी साध्वी पतिव्रता गान्धारी बहिः स्थिता सती तं पतिम् अनु पश्चात् अग्निं वेक्ष्यति अनुप्रवेक्ष्यति॥ ५७॥ तर्हि विदुरानयनार्थं गन्तव्यमेव नेत्याह। विदुर इति। कुरुनन्दन ततः विदुरस्तु तत् आश्चर्यं निशम्य दृष्ट्वा हर्षश्च शोकश्च ताभ्यां भ्रातुर्विमुक्तिविश्लेषजाभ्यां युतः युक्तः सन् तस्मात्स्थानात् तीर्थनिषेवकः तीर्थानि सेवितुमिच्छन्संश्च गन्ता गमिष्यति॥ ५८॥ इतीति इतीत्थम् उक्त्वा सहतुम्बुरुस्तुम्बरुणा सहितः नारदः स्वर्गम् अरुहत् आरुरोह। स्वर्गं प्रत्यूर्ध्वं जगामेत्यर्थः। अथ युधिष्ठिरः तु तस्य नारदस्य वचः हृदि कृत्वा स्वमनसि निधाय शुचः शोकान् अजहात् तत्याज॥ ५९॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे त्रयोदशोऽध्यायः॥ १३॥

——:※:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ चतुर्दशोऽध्यायः

सूत उवाच

संप्रस्थिते द्वारिकायां जिष्णौ बन्धुदिदृक्षया । ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥ १ ॥

विशङ्कितो नृपो दृष्ट्वा त्वरिष्टानि चतुर्दशे । अर्जुनादश्रृणोत्कृष्णतिरोधानमितीर्यते ॥ १ ॥

संप्रस्थिते इति । बन्धूनां यदूनां दिदृक्षा द्रष्टुमिच्छा तया पुण्यः श्लोको यशो यस्य तस्य कृष्णस्य विचेष्टितमभिप्रायं ज्ञातुं च जिष्णावर्जुने द्वारिकायां संप्रस्थिते प्रस्थानपूर्वकं द्वारिकायां प्रविष्टे सति ॥ १ ॥ व्यतीता इति । कतिचित् सप्त-परिमिता इत्यर्थः । मासाः व्यतीताः व्यतिक्रान्ताः बभूवुः । तथापि अर्जुनः ततो द्वारिकातः कालातिक्रमेऽपीति शेषः । नायात् नागच्छत् तदा कुरूद्वहो युधिष्ठिरः घोररूपाणि निमित्तान्यरिष्टोत्पातानित्यर्थः । ददर्श ॥ २ ॥

कालस्येति । विपर्यस्ता विपरीततां प्राप्ता ऋतूनां वसन्तादीनां धर्मा यस्य तस्य कालस्य रौद्रां घोरां गतिं च द्वितीयान्तानां ददर्शेति पूर्वेण दृष्ट्वेत्युत्तरेण वान्वयः । क्रोधश्च, लोभश्चानृतं च, तत्प्रवण आत्मा मनो येषां तेषां नृणां पापीयसीं वार्त्तां जीवनार्थकां प्रवृत्तिम् ॥ ३ ॥ जिह्मेति जिह्मप्रायं कौटिल्यप्रचुरं व्यवहृतं व्यवहारं शाठ्यमिश्रं वञ्चनसहितं सौहृदं सख्यं च पिता च माता च सुहृच्च भ्राता च दंपती स्त्रीपुंसौ च तेषां कल्कनं कलहादिकं च ॥ ४ ॥ कन्येति । कन्यां विक्रीणातीति तं तातं पितरं, पित्रोः अपोषकं सुतं च वेदेभ्यो विमुखास्तान् ब्राह्मणान् ब्रह्मवादिनो वेदपाठकान् शूद्रांश्च ॥५॥ निमित्तानीति । तथा अत्यरिष्टानि अत्यशुभसूचकानि निमित्तानि दुःखसूचकानि वामाक्षिभुजस्फुरणादिकारणानि दृष्ट्वा काले अनुगते उक्तविधनिमित्तसहिते काले समागते सति त्वित्यर्थः । नृणां लोभाद्यधर्मप्रकृतिं निमित्तभूतविपरीतकालानुसारिणां नृणां लोभाद्य-धर्मस्वभावं चेत्यर्थः । दृष्ट्वा आदिशब्देन क्रोधादिसंग्रहः । नृपो युधिष्ठिरः अनुजं भीमम् उवाच ॥ ६ ॥ तदेवाह षोडशभिः । संप्रेषित इति । हे भ्रातः द्वारिकायां बन्धुदिदृक्षया द्वारिकावस्थितानां बन्धूनां दिदृक्षार्थमित्यर्थः । पुण्यश्लोकस्य कृष्णस्य विचेष्टितं ज्ञातुं च जिष्णुरर्जुनः संप्रेषितः प्रस्थापित इत्यर्थः ॥ ७ ॥ गता इति । हे भीमसेन तस्य सप्त मासाः अधुना गताः संव्यतिक्रान्ताः । तथापि तव अनुजोऽर्जुनः कस्य वा हेतोः कस्मात्कारणादित्यर्थः, न आयाति । इदं तदनागमननिमित्तम् अहम् अञ्जसा तत्त्वतः न वेद न वेद्मि ॥ ८ ॥ अपीति । अपिशब्दः संभावनाद्योतकः । देवर्षिणा नारदेन यः कालः आदिष्टः सः अयं कालः अधुना उपस्थितः अपि, संप्राप्तः किमित्यर्थः । कोऽसावित्यत्राह । यद्यस्मिन्काले भगवान् श्रीकृष्णः आत्मनः स्वस्य आक्रीडं क्रीडासाधनम् अङ्गम्, मनुष्यनाट्यानुकृतिमद्वपुः उत्सिसृक्षति उत्स्रष्टुमिच्छति स कालः । क्रीडार्थं मनुष्यसंस्थान-भागं शुद्धसत्त्वमयमप्राकृतं सकलसौन्दर्यैकाश्रयभूतं स्वभक्तजनचित्ताकर्षकं निजाङ्गं कृष्णो भूमेर्विश्लेषयितुमिच्छति किमित्यर्थः ॥ ६ ॥

ननु भगवानुत्सृजत्विमं लोकमङ्गं चेति चेन्नेत्थं वाच्यमित्युक्त्वा भगवन्तं विशिनष्टि । यस्मादिति । हे भीम यस्माद्भगवतो हेतोः नोऽस्माकं संपदो भोग्यभोगोपकारणादिरूपाः समृद्धयः राज्यम्, दाराः स्त्रियः, प्राणाः, कुलम्, प्रजाः, सपत्नविजयः शत्रुविजयश्च । आसन् बभूवुः । यदनुग्रहात् लोका यज्ञकरणानुरूपाः पुण्यलोकाश्च भविष्यन्ति तद्वियोगं कथं सहिष्यामः इति शेषः । अस्माकं सर्वपुरुषार्थ हेतुः श्रीकृष्णः अतस्तद्वियोगं विना ह्येतादृशमनिष्टं न भवेदिति भावः ॥ १० ॥ पश्येति । हे नरव्याघ्र, दिव्यान् दिविभवान्, भौमान् भूमौ भवान्, सदैहिकान्, देहे च संभूतानित्यर्थः । दारुणान् घोरान्, अदूरात् समनन्तरमेव नोऽस्माकं बुद्धिं मोहयतीति तथाभूतं भयं च शंसतः सूचयतः उत्पातान पश्य ॥ ११ ॥ तत्रादौ दैहिकानुत्पातान् दर्शयति । ऊर्विति । अङ्ग हे भीम, मह्यं मम ऊरूः सक्थि च अक्षि नेत्रं च बाहुर्भुजश्च ते पुनः पुनः स्फुरन्ति कम्पन्ते । ऊर्वादयो वामा बोध्याः । पुंसां वामाङ्गस्फुरणस्यापशकुनत्वात् । हृदये वेपथुः कम्पश्च अपि भवति । तान्येतान्यूर्वा-दिस्फुरणादीनि आरात्समनन्तरकालमेव मह्यं विप्रियं दास्यन्ति । मम विप्रियप्राप्तिसूचकानि भविष्यन्तीत्यर्थः ॥ १२ ॥ भौमा-नुत्पातानाह सार्द्धैस्त्रिभिः । शिवेति । एषा शिवा क्रोष्ट्री शृगालविशेष इति यावत् । अनलवदग्निवज्ज्वलदाननं यस्याः सा तथाभूता सती उद्यन्तमुद्गच्छन्तम् आदित्यं सूर्यम् अभि आदित्याभिमुखमित्यर्थः । रौति क्रोशति । अङ्ग हे भीम, अयं सारमेयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्वा, माम् अभि मामभिलक्ष्येत्यर्थः । अभीरुवदभीतवत् । निःशङ्कमित्यर्थः । रोदिति प्लुत भवति ॥ १३ ॥ शस्ता इति । शस्ताः प्रशस्ताः गवाश्वादयः पशवः मां सव्यं वामम् आत्मनां वामपार्श्वस्थमित्यर्थः । कुर्वन्ति । अपरेऽप्रशस्ताः खरमहिषादयः पशवः मां दक्षिणमात्मनां दक्षिणपार्श्वस्थमित्यर्थः । कुर्वन्ति । हे पुरुषव्याघ्र, मम वाहानश्वांश्च रुदतो रोदनं कुर्वाणान् लक्षये पश्यामि ॥ १४ ॥

मृत्य्विति । मृत्युदूतः मृत्योर्दूतवदनिष्टकरः कपोतः शिलाकणाशनाख्यः पक्षिविशेषः कुह्वानैः इमं देशं शून्यम् इच्छति । अयम् उलूको घूकः मनः कम्पयन् प्रत्युलूकस्तत्प्रतिपक्षो घूकश्च तावेतौ अनिद्रौ निद्रारहितौ सन्तौ कुह्वानैः कूकू इत्येवंविधैर्ह्वानैः शब्दैः कुत्सितैः शब्दैरित्यर्थः । इमं देशं शून्यम् इच्छतः सूचयतः ॥ १५ ॥ धूम्रा इति । दिशः धूम्रा धूसराः दृश्यन्ते इति शेषः । परिधयः अग्निमिव लोकमावृण्वन्ति । अद्रिभिः पर्वतैः सह भूः पृथ्वी कम्पते । दिव्योत्पातानाह सार्द्धद्वाभ्याम् । स्तनयित्नुभिराकालिकैर्मेघैः गर्जितैर्वा साकं सह महान् निर्घातः अनभ्रवज्रपातः आसीत् ॥ १६ ॥ वायुरिति । खरः कठिनः स्पर्शो यस्य सः वायुः रजसा धूल्या तमोऽन्धकारं विसृजन्विशेषेण सृजन्सन् वाति । जलदा मेघाः सर्वतः सर्वतोदिशं बीभत्समिव भीषकं यथा स्यात्तथा असृक् रुधिरं वर्षन्ति मुञ्चन्ति ॥ १७ ॥ सूर्यमिति । हे भीम सूर्यं हता प्रभा यस्य तथाभूतं पश्य । दिवि व्योम्नि मिथः परस्परं ग्रहमर्दं भृग्वाङ्गिरसादिग्रहाणां परस्परं कलहमित्यर्थः । पश्य ! सुतरां संकुलैर्व्यामिश्रैः भूतानां रुद्रानुचरपिशाचानां गणैः रोदसी द्यावापृथिव्यो ज्वलिते प्रदीप्ते इव दृश्येते । पश्येति संबन्धः ॥ १८ ॥ पुनर्भौमानाह सार्द्धैस्त्रिभिः । नद्य इति । नद्यः पर्वतात्मजाः । नदाः शोणादयः सरिद्विशेषाः । क्षुभिताः संचलिताः भवन्ति । शुष्का भवन्तीति वा । सरांसि मनांसि च क्षुभितानि प्राणिनामिति शेषः । निमित्तमन्तरेण कलुषितानि भवन्ति । अग्निर्नित्यमाज्येन ज्वलनस्वभावोऽपि वह्निराहवनीयादिः आज्येन घृतसेकेन न ज्वलति । अतः अयं कालः किं विधास्यति । अहं तु न वेद्मीति भावः ॥ १९ ॥ न पिबन्तीति । वत्सा गवां तर्णकाः स्तनं स्तन्यं न पिबन्ति । मातरस्तत्प्रस्वो गावश्च वत्सान्प्रति न दुह्यन्ति । स्तन्यमिति शेषः । न प्रस्नुवन्तीत्यर्थः । गावः अश्रूणि मुखे यासां तथाभूताः सत्यः रुदन्ति । व्रजे गोष्ठे ऋषभा वृषभाः न हृष्यन्ति । प्रहृष्टाः सन्तस्तटाघातं न कुर्वन्तीत्यर्थः । दैवतानि देवप्रतिमाः रुदन्ति इव स्विद्यन्ति गात्रतः प्रस्वेदं मुञ्चन्ति । उच्चलन्ति उत्प्लुत्य पतन्तीव च दृश्यन्ते । क्वचित्तु स्विद्यन्तीत्यत्र खिद्ययन्ति इत्यपि पाठः ॥ २० ॥

इमे इति । इमे जनपदाः देशाश्च, ग्रामाः संवसथाश्च, पुराणि च उद्यानानि च आकराश्च आश्रमाश्च ते । तत्र पुराणि नगराणि । उद्यानान्यारामाः । आकरा मण्यादिखन्यः । आश्रमा मुनिनिवासाः । आश्रमा इत्यत्र पाठान्तरे पुरादीनामाश्रया इमे जनपदा इति योजना । भ्रष्टा नष्टा श्रीर्येभ्यस्तैः । निर्गत आनन्दो येभ्यस्तथाभूताः सन्तः नोऽस्माकं किम् अघं दुःखं दर्शयन्ति दर्शयिष्यन्ति । वयं तु न विद्म इति भावः ॥ २१ ॥ एषामुत्पातानामिदं फलमित्यहं स्वयमुद्भावयामीत्याह । मन्य इति । एतैः महोत्पातैः कृत्वा अहं तु इदं मन्ये उद्भावयामि नूनम् । किम् । न विद्यते अन्येषु पुरुषेषु श्रीर्वज्राङ्कुशोर्ध्वरेखादिशोभा येषां तैः । अन्यपुरुषेष्वसंभावितषोडशलक्ष्मकान्तिभिः भगवतः श्रीकृष्णस्य पदैः पादविन्यासैः हीना रहिता अत एव हतं गतं सौभगं सौन्दर्यं यस्यास्तथाभूता भूः पृथ्वी जाता इति ॥ २२ ॥ इतीति । हे ब्रह्मन् इतीत्थं दृष्टानि ज्ञातान्यरिष्टानि येन तेन चेतसा तस्य युधिष्ठिरस्य राज्ञः चिन्तयतः सतः कपिध्वजोऽर्जुनः यदुपुर्या द्वारिकायाः सकाशात् प्रत्यागमत ॥ २३ ॥ तमिति । ततः समायातं पादयोः निपतितं तमर्जुनम् अयथापूर्वं पूर्वं यथा तथा न भवतीति तम् । आतुरं दुःखितम्, अधोवदनमवाङ्मुखम् । नयनाब्जयोः अब्बिन्दून् अश्रुबिन्दून् मुञ्चन्तं सृजन्तम्, अयथापूर्वं पादयोर्निपतितमिति वा । अस्मिन्पक्षेऽयथापूर्वं नाम पूर्वं यथा प्रोष्य पुनरागमने क्रमेण युधिष्ठिरभीमादिवन्दनमकरोत्तद्विनिमयेन तदाचरणमिति ॥ २४ ॥ विलोक्येति । विच्छायं विगतकान्तिं विलोक्य उद्विग्नं कम्पितं हृदयं यस्य तथाभूतः सन् नारदेरितं नारदाभिहितं संस्मरन्संश्च नृपो युधिष्ठिरः सुहृदां मध्ये अनुजमर्जुनं पृच्छति स्म । उभयोरेकसंबन्धः ॥ २५ ॥ प्रश्नमेवाह । कच्चिदित्यादिना यावदध्यायसमाप्ति । कच्चिदिति । कच्चिदितीष्टप्रश्नद्योतकमव्ययम् । तत्र तावत्सामान्यतः सर्वबन्धूनामिष्टानि पृच्छति । हे बन्धो आनर्त्तपुर्यां द्वारिकायां नोऽस्माकं स्वजनाः मधवश्च, भोजाश्च, दशार्हाश्च, अर्हाश्च, सात्वताश्च, अन्धकाश्च, वृष्णयश्च, ते सुखं यथा तथा आसते कच्चित् ॥ २६ ॥

किं वक्ष्यतीति शङ्कयाऽनुक्रमेण पृच्छति । शूर इति । हे मारिष सौम्य पार्थ, पाठान्तरे शूरविशेषणम् । अस्माकं मातामहः शूरः स्वस्ति कुशली यथा तथा आस्ते कच्चित् । अथ तथा नः मातुलः आनकदुन्दुभिः वसुदेवः सानुजः स्वानुजसहितः कुशलमस्यास्तीति कुशलो आस्ते कच्चित् । वसुदेवस्यानुजास्तु देवभागो, देवश्रवाः, आनकः, संजयः, शामकः, कङ्कः, शमीकः, वत्सरः, वृक इति नव ॥ २७ ॥ सप्तेति । सप्त स्वसारः परस्परं भगिन्यः मातुलान्योऽस्माकं मातुल्यः । सहात्मजाः स्वस्वपुत्रैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सहिताः सस्नुषाः पुत्रभार्याभिः सहिताः देवकीप्रमुखाः देवकीधृतदेवाशान्तिदेवाउपदेवाश्रीदेवादेवरक्षितासहदेवाख्याः तत्पत्न्यः वसुदेवस्याङ्गनाः स्वयं क्षेमं यथा तथा आसते कच्चित् ॥ २८ ॥ कच्चिदिति असन् दुरात्मा पुत्रः कंसनामा तनयो यस्य सः। आहुक उग्रसेनः राजा जीवति कच्चित्। अस्याहुकस्य अनुजः कनिष्ठो भ्राता देवकश्च जीवति कच्चित्। ससुतः कृतवर्माख्यपुत्रसहितः हृदीकः, अक्रूरः श्वफल्कसुतः, जयन्तश्च गदश्च सारणश्च ते ॥ २९ ॥ आसते इति। ये शत्रुजिदादयः ते च सर्वे वसुदेवपुत्राः कुशलं यथा तथा आसते कच्चित्। सात्वतां भक्तानां पतिः प्रभुः, भगवद्भक्तवाचकः सात्वच्छब्दो हलन्तः। यादववाचकः सात्वतशब्दस्त्वदन्त इति विवेकः। भगवान् रामो बलभद्रः सुखम् आस्ते कच्चित्। द्वयोरेकसंबन्धः ॥ ३० ॥ अथ महारथश्रीकृष्णपुत्राणां कुशलं पृच्छति। प्रद्युम्न इति। सर्ववृष्णीनां मध्ये महारथः प्रद्युम्नः सुखम् आस्ते कच्चित्। तथा भगवान् गम्भीररयो युद्धे गम्भीरवेगः, अनिरुद्ध उत अनिरुद्धोऽपि, वर्द्धते मोदते इत्यर्थः ॥ ३१ ॥ सुषेण इति। सुषेणः चारुदेष्णश्च जाम्बवतीसुतः साम्बश्च कार्ष्णिप्रवराः कृष्णसुतानां श्रेष्ठाः ऋषभादयः अन्ये च सपुत्राः स्वस्वपुत्रसहिताः सुखम् आसते कच्चित् इति उपरिष्टादन्वयः ॥ ३२ ॥ तथैवेति। तथैव शौरेः श्रीकृष्णभगवतः अनुचराः भृत्याः श्रुतदेवश्च उद्धवश्च तावादी येषां ते, ये च अन्ये सुनन्दश्च नन्दश्च तौ शीर्षण्यौ प्रधानौ येषां ते सात्वतर्षभा यादवश्रेष्ठाः ॥ ३३ ॥

अपीति। रामश्च कृष्णश्च तयोर्भुजावेवाश्रयो येषां ते। ते सर्वे अपि स्वस्ति आसते। बद्धसौहृदाः अस्मासु कृतसौहृदाः ते सर्वे अस्माकम् अपि कुशलं स्मरन्ति किमिति शेषः। द्वयोरेकसंबन्धः ॥ ३४ ॥ अथ भगवतः कुशलं पृच्छति। भगवानिति। ब्रह्मण्यो ब्राह्मणप्रतिपालकः गोविन्दः भक्तवत्सलः भगवान् स्वयं श्रीकृष्णोऽपि पुरे द्वारिकापुरे सुधर्मायां सभायां सुहृद्वृतः स्वसुहृद्भिः परिवारितः सन् सुखं यथा तथा आस्ते कच्चित् ॥ ३५ ॥ भगवतोऽत्रावस्थाने हि लोकानां मङ्गलं नान्यथेत्याशयेनाह। मङ्गलायेति। लोकानां स्वभक्तजनानां मङ्गलाय शुभाय क्षेमाय प्राप्तपरिपालनाय भवाय वृद्धये च अनन्तः शेषः सखा यस्य सः बलभद्रसहितः आद्यः पुमान् यदुकुलाम्भोधौ आस्ते। किमिति शेषः। चशब्दा मङ्गलाद्यनेकप्रयोजनार्थाः ॥ ३६ ॥ यद्बाह्विति। यस्य श्रीकृष्णस्य बाहू एव दण्डौ ताभ्यां गुप्ता रक्षिता तस्यां स्वपुर्यां द्वारिकायाम् अर्चिताः सर्वैर्लोकैर्बहुमताः यदवः महापौरुषिकाः वैकुण्ठनाथानुचराः इव परमानन्दं यथा भवति तथा क्रीडन्ति। यद्वा। वैश्रवणबाहुदण्डगुप्तं चैत्ररथं प्राप्य महापौरुषिका यक्षा इव। यद्वा। परमानन्दं सकलानन्दैकाधारभूतं पुरुषोत्तमं प्राप्य महापौरुषिका अक्षरमुक्ताः इव क्रीडन्तीति ॥ ३७ ॥ यदिति। यस्य भगवतः पादयोः शुश्रूषणं परिचरणमेवैकं मुख्यं तपआदिभ्यः श्रेष्ठं कर्म तेन हेतुना सत्या सत्यभामा आदिर्यासां ताः व्यष्टसहस्रयोषितः षोडशसहस्रसंख्याः स्त्रियः, संख्ये युद्धे त्रिदशान् देवान् निर्जित्य श्रीकृष्णबलेन पराभाव्य वज्रमशनिरायुधं यस्य स इन्द्रो वल्लभः पतिर्यासां शच्यादीनां तासामुचिताः, तदिति ताः। तदित्यव्ययम्। आशिषोऽभीष्टार्थप्रदपारिजातरूपाः हरन्ति स्वीकुर्वन्ति। तदाशिषस्तेषामिन्द्रादीनामाशीरूपाः पारिजाताद्या इति वा ॥ ३८ ॥

यदिति। यस्य भगवतो बाहुदण्ड एवाभ्युदयः प्रभावस्तदनुजीविनः। यद्वा। यस्य बाहुदण्डयोरभ्युदयो दिग्विजयश्रीस्तमनुजीवितुं शीलमस्त्येषामिति। यद्बाहुदण्डप्रभवोपजीविन इति पाठे यद्बाहुदण्डप्रभव उपजीवो जीवनं विद्यते एषामिति। सर्वथा यद्बाहुदण्डप्रतापोपजीविन इत्यर्थः। यदुप्रवीरा यादवश्रेष्ठाः न विद्यते कुतोऽपि भयं येषां तथाभूताः सन्तः, बलात् स्वसामर्थ्यतः, इन्द्रादीन्निर्जित्येति शेषः। आहृतां समानीतां सुरसत्तमोचितां देवेन्द्रार्हां सुधर्मां सभाम् अङ्घ्रिभिः मुहुः अधिक्रमन्त्याक्रमन्ति। स भगवान् सुखमास्ते इति गतपञ्चमश्लोकेनान्वयः ॥ ३९ ॥ तस्य निस्तेजस्कत्वादेर्हेतून् विकल्पयंस्तव किमेतादृशदुःखनिमित्तमिति पृच्छति। कच्चिदिति। हे तात ते तव अनामयमारोग्यं कच्चित्। ननु कथमेवं पृच्छसे इति चेत्तत्र वक्ति। मे मम भ्रष्टं तेजो यस्मात्तथाभूतः निस्तेजस्क इत्यर्थः। विभासि संलक्षसे। भ्रष्टतेजस्त्वे कारणं पृच्छति। अलब्धमानः बन्धुभ्यः सकाशात्तत्र मानस्त्वया न लब्धः किमित्यर्थः। अथवा अवज्ञातः बन्धुभिस्त्वं तिरस्कृतोऽसि किं वेत्यर्थः। हे तात तत्र किं वा चिरोषितः तत्र बहुकालं किमर्थं स्थित इत्यर्थः। चिरावस्थानेऽपमानावज्ञे संभवतस्ततस्तत् पृच्छामीति भावः ॥ ४० ॥ कच्चिदिति। अभावैरिति छेदः। न विद्यते भावः सद्भावो येषां तैः, अत एव अमङ्गलैः शब्दादिभिः विषयैः न अभिहतः कच्चित्। प्रेमशून्यशब्दाद्युपलब्धिर्हि ताडनसमाना जायते। तथात्वं तु, तव न जातमिति भावः। अथवा आशया वित्ताद्याशया प्राप्तेभ्यः अर्थिभ्यः उक्तं तुभ्यं त्वद्याचितं दास्यामीति कथितं सत् न दत्तं कच्चित्। अथवा दत्तं सदपि यत्प्रतिश्रुतं यावद्दातुमङ्गीकृतं तावन्न दत्तं किम् ॥ ४१ ॥ कच्चिदिति। हे तात यतः त्वं शरणप्रदः स्वशरणागतरक्षकोऽसि ततः शरणोपसृतं स्वशरणं प्राप्तं ब्राह्मणम्, बालम्, गाम्, वृद्धम्, रोगिणम्, स्त्रियम्, सत्त्वमन्यं वा कंचित्प्राणिनं न अत्याक्षीः कच्चित्, न त्यक्तवानसि किमित्यर्थः ॥ ४२ ॥ कच्चिदिति। हे तात त्वम् अगम्यां गमनानर्हाम्, विधवा पराङ्गना वा शास्त्रे गमने निषिद्धास्ति तथाविधां स्त्रियमित्यर्थः। स्त्रियं नागमः न गतवानसि कच्चित्। अथवा गम्यां गमनार्हां स्वाङ्गनामपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असत्कृतां स्नानादिसंस्काररहितां जरन्मलिनवस्त्रामनलंकारां नागमः किम् । शृङ्गाररसस्य शुचिनामत्वात्स्नान-गन्धसत्स्वच्छवसनालंकरणोपेतायाः शास्त्रे संगमयोग्यत्वोक्तेस्तदन्यथात्वे तद्गमननिषेधोक्तेः । अथ भवान् पथि मार्गे नोत्तमैर-नुत्तमैः समैरित्यर्थः । असमैरधमैर्वा न पराजितः कच्चित् ॥ ४३ ॥

अपि स्विदिति । हे तात त्वं संभोज्यान् प्रथमतः संभोजनार्हान् वृद्धान् बालकांश्च पर्यभुङ्क्थाः अपि स्वित् । त्यक्त्वा भुक्तवानसि किम् । परिरत्र वर्जने । अक्षमं कर्तुमयोग्यं जुगुप्सितं गर्ह्यं यत् किंचित् कर्म तत् न कृतवानसि किम् । तत्तु एकादशीभोजनं स्वर्णस्तेयमप्रशस्ताचरणादिरूपं ज्ञेयम् ॥ ४४ ॥ कच्चिदिति । हृदयेन हृदयंगमेन नित्यं प्रेष्ठतमेन आत्म-बन्धुना श्रीकृष्णेन अथ कात्स्न्र्येन सर्वथेत्यर्थः । रहितः अत एव शून्यो निरानन्दः असीति मन्यसे कच्चित् । अन्यथोक्तहेतूना-मन्यतमस्याप्यभावे ते तव रुग्रोगः मनःपीडेति यावत् । न स्यात् । अतः केनचिदुक्तान्यतमेन हेतुनावश्यं भवितव्यमित्यर्थः । अयं भावः । तव मन्निष्ठत्वादात्मैकनिष्ठत्वात्कृष्णप्रेष्ठत्वाच्च लोकशास्त्रनिषिद्धं न करोष्येव त्वं ततस्तेन कृष्णेन वियुक्तत्वा-द्विच्छायोऽसीति मन्ये इति भावः ॥ ४५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-न्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

——:*:——

अथ पञ्चदशोऽध्यायः

सूत उवाच

एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञाऽऽविकल्पितः । नानाशङ्कास्पदं रूपं कृष्णविश्लेषकर्शितः ॥ १ ॥

दृष्ट्वा प्रवेशं नृपतिः कले राज्यं परीक्षिति । न्यस्यारुरोह स्वरिति प्रोक्तं पञ्चदशे स्फुटम् ॥ १ ॥

एवमिति । कृष्णसखः श्रीकृष्णभगवतो मित्रं कृष्णोऽर्जुनः भ्रात्रा राज्ञा युधिष्ठिरेण एवमुक्तप्रकारेण नानाशङ्कास्पदं रूपं प्रति आविकल्पितः । प्रथमं तेजोविहीनत्वादिकमालक्ष्य नानाशङ्कास्पदतया विकल्पभावं नीत इत्यर्थः । कृष्णस्य भगवतो विश्लेषेण वियोगेन कर्षितः कृशः कृतः ॥ १ ॥ शोकेनेति । शोकेन विश्लेषजशोकेन हेतुना शुष्यती वदनं मुखं च हृत् हृदयं च ते एव सरोजे कमले यस्य सः । अत एव हृता प्रभा यस्य सः । विभुं परमात्मानं तं श्रीकृष्णमेव अनुध्यायंस्तत्कृतोपकार-स्मरणपूर्वं तमेव संचिन्तयन्सन्नित्यर्थः । प्रतिभाषितुं नृपतिं प्रति वक्तुं नाशक्नोन्न शशाक इति द्वयोरेकसंबन्धः ॥ २ ॥ कृच्छ्रेणेति । ततः कृच्छ्रेण महता प्रयत्नेन शुचः शोकाश्रूणि नेत्रयोः नयनयोः संस्तभ्य, पाणिना आमृज्य, शोकत उद्गच्छन्ति यान्यश्रूणि तानि नेत्रयोरेव संस्तभ्य गलितानि च तानि पाणिनामृज्येत्यर्थः । परोक्षेण दर्शनागोचरेण श्रीकृष्णेन हेतुना समुन्नद्ध उद्रेकतां प्राप्तो यः प्रणयः प्रेमा तेन यदौत्कण्ठ्यं तेन कातरो व्याकुलः । यद्वा । प्रणयः स्नेहश्च, औत्कण्ठ्यं प्रेमपूर्वकानुध्यानं विरहासहत्वदशा वा तच्च, समुन्नद्धाभ्यां ताभ्यां कातरोऽधीरः ॥ ३ ॥

सख्यमिति । सारथ्यादिषु सारथिकर्मविधापनादिक्रियास्वित्यर्थः । सख्यं हितैषित्वम् । मैत्रीमुपकारिताम् । समानशीलत्वं सखित्वं नियोगादिकरणार्हतां मैत्रीमिति वा । सौहृदं सुहृद्भावः संबन्धिता वा तच्च संस्मरन् सम्यक् चिन्तयन् सन् बाष्पगद्गदया बाष्पेण कण्ठावरोधात्कुण्ठीभावः स्खलिताक्षरयेत्यर्थः । गिरा वाचा अग्रजं स्वज्येष्ठं नृपं युधिष्ठिरम्, इति वक्ष्यमाणरीत्या आह । एवं द्वयोरेकसंबन्धः ॥ ४ ॥ उक्तिमेवाह । वञ्चितः इत्यादित्रयोविंशत्या । वञ्चित इति । हे महाराज अहं बन्धुरूपिणा बन्धुरूपतां प्राप्तेन हरिणा आश्रितार्तिहरेण साक्षाद्भगवता श्रीकृष्णेन वञ्चितः प्रतारितः अस्मीति शेषः । देवान् विस्मापयतीति तत् देवानामप्याश्चर्यजनकमित्यर्थः । मे मम महत् सर्वोत्तमं यत् तेजः तत् येन मां वञ्चयता श्रीकृष्णेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपहृतम्। देवेति राज्ञः सम्बोधनं वा येनेत्यादीनां यच्छब्दानां तेनाहमस्मि मुषितः पुरुषेण भूम्नेत्युपरिष्टादन्वयः ॥ ५ ॥ एतमर्थं सदृष्टान्तमाह। यस्येति। यथा एषः पित्रादेर्देहः उक्थेन प्राणेन रहितः सन् मृतकः शवः प्रोच्यते। अपिशब्दादर्शनायोग्यश्च प्रोच्यते, तद्वत् यस्य भगवतः क्षणवियोगेन अयं मत्प्रभृतिकः लोकः, अप्रियं दर्शनं यस्य तथाभूतः भवति हि। यथा प्राणत्यागे पित्रादिशरीरमपि पुत्रादिभिरप्रियदर्शनत्वाद्बहिर्भूमौ निक्षिप्यते तथाऽयं लोको देहोऽपि प्राणरूपयद्वियोगतः बन्धूनां मम चाप्रियदर्शनवत्प्रवीयत इति भावः ॥ ६ ॥ श्रीकृष्णकृतानुपकारान्संस्मरति। यत्संश्रयादिति। द्रुपदगेहे द्रुपदराजभवने स्वयंवरमुखे स्वयंवरप्रारम्भे स्मरेण कामेन हेतुना दुष्टो मदो येषां तेषाम् उपागतानां द्रौपदीरूपसंश्रवणसंस्मरणजातकाममदवशतया समायातानामित्यर्थः। राज्ञां तेजः मया यस्य कृष्णस्य भगवतः संश्रयः सम्यगाश्रयणं तस्माद्धेतोः। हृतम् अपहृतं खलु। तथा सज्जीकृतेन समारोपितमौर्वीकेण धनुषा मत्स्यो मत्स्याकारो यन्त्रविशेषश्च अभिहतश्छिन्नः। कृष्णा द्रौपदी च अधिगता लब्धा। यन्त्रोपरि परिभ्रमन्मत्स्यो विद्धः ततस्तत्कर्मसंदर्शनप्रकुपिततत्प्राप्तिप्रतिरोधकराजकं विनिर्जित्य द्रौपद्युपलब्धा। एतदस्मदीयशौर्यवीर्यादिकं यत्तद्यदधीनं तेन वञ्चितोऽस्मीति समुदायार्थः ॥ ७ ॥

यत्संनिधाविति। यस्य भगवतः संनिधिः संनिधानं तस्मिन् यत्संनिधानेन हेतुनेत्यर्थः। सामरगणं देवतागणसहितम् इन्द्रं त्रिदशाधिनाथं तरसा जवेन विजित्य पराभाव्य खाण्डवाख्यवनम् उ विस्मये। अहम् अग्नये विप्ररूपेण याचमानाय वह्नये अदां दत्तवानस्मि। निपातरूप उशब्दोऽत्र विस्मयार्थद्योतकः। एवंविधं यत्कर्माहं कृतवानस्मि तदेतदत्याश्चर्यमिति भावः। तथा अद्भुता आश्चर्यभूताः, शिल्पानि विविधप्रतिमारचनादीनि, मायाः स्थले जलप्रत्ययादिरूपाश्च यस्यां सा मयकृता, खाण्डवदाहे वह्नेः संमोचितेन मयनाम्नाऽसुरतक्ष्णा कृतेत्यर्थः। सभा मया लब्धा। तथा यत्संनिधौ, ते तव अध्वरे राजसूययज्ञेऽश्वमेधयज्ञे वा नृपतयो राजानः दिग्भ्यो निखिलदिशाभ्यः बलिम् अहरन् आहृत्य तुभ्यं समर्पयामासुः ॥ ८ ॥ श्लोको विगीतस्तथापि व्याख्यायते। यत्तेजसेति। हे नृप गजायुतस्येव सत्त्वमुत्साहशक्तिः वीर्यं बलं च यस्य सः तव अनुजः आर्यो मम ज्येष्ठभ्राता भीमः यत्तेजसा नृपशिरः स्वङ्घ्रिर्यस्य तं जरासंधं मखार्थे तव क्रत्वर्थम् अहन् हतवान्। प्रमथनाथमखाय तेन जरासंधेन आहृता निर्जित्यानीताः भूपाः नृपाः यद्यस्मान्मोचिताः तत्तस्मात् ते तव अध्वरे बलिम् अनयन् आनीतवन्तः ॥ ९ ॥ पत्न्या इति। हे राजन् अधिमखं राजसूययज्ञे विभक्त्यर्थेऽव्ययीभावः। क्लृप्तः रचितो यो महाभिषेकः तेन श्लाघिष्ठमत्यन्तश्लाघनीयं चारु सुन्दरं कबरं केशबन्धनम्, कितवैर्महाकपटवद्भिर्दुःशासनादिभिः सभायां विकीर्य उन्मोचनपूर्वं विक्षिप्य स्पृष्टम्। अतस्तदानीमशरणत्वात्स्मरणसमकालं संप्राप्तस्य कृष्णस्य पदयोः पतितान्यश्रूणि मुखाद्यस्यास्तस्याः तव पत्न्या द्रौपद्याः, पदशब्दसापेक्षस्यापि पतितशब्दस्याश्रुपदेन समासो नित्यसापेक्षत्वात्। तथाविधदशावत्त्वं वीक्ष्य तदैव कृतसंकल्पत्वात् यः श्रीकृष्णः तस्त्रियो दुःशासनाद्यङ्गनाः हता मृता ईशाः पतयो यासां ताः अत एव विमुक्ताः केशा यासां तास्तथाभूताः भीमाविद्धगदाभग्नोरुदण्डादीन्स्वपतीनालिङ्ग्य रुदतीर्विकीर्णकेशपाशास्ततोऽवरोपितकेशकलापाश्चेत्यर्थः। अकृत कृतवान् ॥ १० ॥

यो नो जुगोपेति। अरिविहितात् दुर्योधनप्रेषितात्, यः अयुतेन विप्राणामयुतेन सहाग्रे भुङ्क्ते इति। यद्वा। शिष्याणामयुतस्याग्रे तत्पङ्क्तौ भुङ्क्ते इति तस्मात् दुर्वाससः दुरन्तकृच्छ्रात् दुर्वाससो हेतोरायातादपारसंकटात् इत्यर्थः। वनम् एत्य यः श्रीकृष्णः शाकान्नशिष्टं प्रक्षालितपात्रलग्नमवशेषभूतशाकाल्पकवलमित्यर्थः। उपभुज्य नोऽस्मान् जुगोप। ननु शाकावशेषमात्राशनमात्रतः कथमरक्षत्तत्राह। यतो यत्कृतशाकान्नशेषभोजनमात्रतः, सलिले नदीतोये विनिमग्नसंघो विनिमग्नो मुनीनां सार्थः त्रिलोकीमपि तृप्ताम् अमंस्तामन्यत। तेन भगवता मुषितोऽस्मीति संबन्धः। इयं कथा महाभारतान्तर्गतवनपर्वणो द्विषष्ट्यधिकद्विशततमाध्यायात्सविस्तरं बोध्या। तदुक्तानार्थबोधाय किंचिल्लिख्यते। कदाचिद्दुर्योधनेन दुर्वाससे आतिथ्यं कृतं तेन परितुष्टेन वरं वृणीष्वेत्युक्ते दुर्वाससः शापात्पाण्डवा नश्येयुरिति मनसि निधाय दुर्योधनेनोक्तं युधिष्ठिरोऽस्मत्कुलमुख्योऽस्य-तस्तस्यापि भवतैवमेव शिष्यायुतसहितेनातिथिना भवितव्यम्। किं तु द्रौपदी यथा क्षुधा न सीदेत्तथा तस्यां भुक्तवत्यां तद्गृहं गन्तव्यमिति वरं वव्रे। ततश्च तथैव युधिष्ठिरं दुर्वाससि प्राप्ते सति परमादरेण युधिष्ठिरेण माध्याह्निकं कृत्वा शीघ्रमागम्यतामिति विज्ञापितो मुनिसंघोऽघमर्षणाय जले निममज्ज। तत्र चिन्तातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णस्तत्क्षणमेव भक्तवात्सल्यतया समायातस्तया चावेदिते वृत्तान्ते भगवताऽप्युक्तम्। हे द्रौपदि अहमपि बुभुक्षितोऽस्मि ततः प्रथमं मां भोजयेति। तया चातिलज्जयोक्तं 'स्वामिन् मद्भोजनपर्यन्तमक्षय्यमप्यन्नं सूर्यदत्तस्थाल्यां भवेन्मया च सर्वान्संभोज्य भुक्तमस्ति अतोऽन्नं तत्र न भवति सांप्रतं किं कुर्याम्' इति तयाऽभिहितेऽपि अतिनिर्बन्धेन स्थालीमानाय्य तत्कण्ठलग्नं किंचिच्छाकान्नं प्राश्योक्तम्। 'अनेन विश्वात्मा भगवान्प्रीयताम्'। अथ भीमं प्रत्युक्तं मुनिसंघं भोक्तुमाह्वयेति ततस्तत्र तदाह्वानार्थं तद्गमनात्प्रागेव समुनिसंघस्तु तावताऽतितृप्तः सन्तृथा पाकविधापनतया भीमोऽस्मांस्ताडयिष्यतीति भयेन पलायित इति ॥ ११ ॥ यदिति। यत्तेजसा यस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णस्य तेजसा युधि वराहमायाधरमूकदानवनाशकशरोपादाननिमित्ते युद्धे विस्मापितः मया विस्मयं प्रापितः। स किरातवेशधरः शूलपाणिः भगवान् गिरिशः शंभुः निजं स्वकीयम् अस्त्रं पाशुपताख्यं मे मह्यम् अदात्। अन्ये लोकपालाश्चापि स्वं स्वमस्त्रं मह्यं ददुरिति शेषः। किं च अहम्, अमुनाऽधुना तेजोविहीनतां प्राप्तेन कलेवरेण एव, महेन्द्रभवने महत् आसनार्द्धं प्राप्तः। इन्द्रासनस्यार्द्धमधिष्ठितवानस्मीत्यर्थः। महदिति पृथक् पदम्। अन्यथा 'आन्महतः समानाधिकरणे' इत्यात्वापत्तिः। आर्षत्वात्तदभावो वा। इयं कथापि वनपर्वण एव ज्ञेया ॥ १२ ॥

तत्रैवेति। तत्र महेन्द्रभवने एव विहरतः क्रीडमानस्य मे मम गाण्डीवेन लक्ष्यते इति गांडीवलक्षणं भुजदण्डयुग्मं गाण्डीवज्याघातलक्षणलक्षितं भुजदण्डयुगलमित्यर्थः। अरातिवधाय कालकेयनिवातकवचाख्यशत्रुहननाय सेन्द्रा इन्द्रेण सहिताः देवाः श्रिताः सहायत्वविधापनार्थमाश्रिताः। एतत् यदनुभावितं येन प्रभावयुक्तं कृतम्, यत्प्रभावत इदं निष्पन्नमित्यर्थः। हे आजमीढ अजमीढकुलोत्पन्न युधिष्ठिर भूम्रा परमानन्दरूपेण पुरुषेण परमपुरुषेण तेन कृष्णेन अहम् अद्य मुषितः वञ्चितः अस्मि। मां विहाय स्वलोकं जगामेत्यर्थः ॥ १३ ॥ यद्बान्धव इति। यः श्रीकृष्णो भगवान्बान्धवो यस्य सः अहम् एकः, अतीर्यमवार्यं सत्त्वं बलं यस्य तं भीष्मादिमहातिमिङ्गिलोपेततयाऽतिदुस्तरमित्यर्थः। अनन्तोऽपरिच्छिन्नः पारोऽवधिर्यस्य तम्, गाम्भीर्येण देशतश्च निरवधिकमित्यर्थः। कुरुबलाब्धिं कुरुसेनासमुद्रं रथेन साधनेन ततरे। उत्तरगोग्रहे तीर्णवानस्मि। आर्षत्वात् 'तृफलभजत्रपश्च' इत्येत्वाभ्यासलोपाभाव आत्मनेपदं च। मया, यद्बान्धवेन मया, परेषां शत्रूणां बहुधनं च प्रत्याहृतम्। तथा शिरोभ्यस्तेषां मूर्द्धभ्यः तेजस्पदं तेजस आश्रयं मणिमयं मण्यात्मकं धनं च प्रत्याहृतम्। शत्रुभूतभीष्मादिमौलिमुकुटगतमण्यात्मकं धनमात्रमेव संमोहनास्त्रेण तान्मोहयित्वा केवलं न हृतम्, किं तु तेजोभिमानसामर्थ्यलक्षणं धनमपि यद्बान्धवप्रभावत एवापहृतमिति भावः ॥ १४ ॥ यो भीष्मेति। हे विभो अदभ्रा अनल्पा ये राजन्यवर्या राजन्यश्रेष्ठास्तेषां रथमण्डलानि रथजालानि तैर्मण्डिता विभूषितास्तासु भीष्मश्च कर्णश्च गुरुर्द्रोणश्च शल्यश्च तेषां चम्वः सेनास्तासु यो भगवान् मम अग्रेचरः सारथिरूपेण पुरःसरः सन् रथयूथपानां भीष्मादीनाम् आयुर्जीवितं मनांसि उत्साहादिशक्तित्रयम्। यद्वा। समनस्कानि चक्षुरादिज्ञानेन्द्रियाणि,। सहो बलम्, शरीरसामर्थ्यमिति यावत्, ओजः शस्त्रादिकौशल्यात्मकप्रकाशं च, दृशा केवलेन विलोकनमात्रेणैव आच्छैत् हृतवान् ॥ १५ ॥

यद्दोष्ष्विति। यद्दोष्षु भगवतो बाहुषु प्रणिहितं प्रणिधापितं त्वयेति शेषः। त्वया यस्य करं गृहीत्वा मत्करं तत्करे समर्प्य तेनैकीभावं गमितस्तं मा मामित्यर्थः। गुरुर्द्रोणश्च, भीष्मश्च, कर्णश्च, द्रौणिरश्वत्थामा च त्रिगर्त्तस्त्रिगर्त्तदेशाधिपतिः सुशर्मा च, शलः शल्यश्च, सैन्धवः सिन्धुदेशाधिपतिर्जयद्रथश्च, बाह्लिकः शंतनोर्भ्राता च, ते आद्या येषां तैः निरूपितानि प्रयुक्तानि अमोघमहिमानि सप्रतिहतमहिमानि अस्त्राण्याग्नेयादीनि। आसुराणि असुरेण हिरण्यकशिपुना कारितास्त्रघातादीनि नृहरिदासं नृसिंहदासं प्रह्लादमिव न उपस्पृशः नैवास्पृशन्। एवं यद्बान्धव इत्यादिश्लोकत्रयाणामपि तेन मुषितोऽहमिति पूर्वोक्तेन एव संबन्धो बोध्यः ॥ १६ ॥ स्वकृतापराधमनुस्मरन् संतप्यमान आह। सौत्ये वृत इति। यत्पादपद्मं यस्य भगवतः कमलकोमलाङ्घ्रिं भव्याः साधवः अभवाय मुक्तये भजन्ति। यः आत्मदः आत्मपर्यन्तवदान्यः। 'य आत्मदा बलदा' इति श्रुतेः। ईश्वरः सर्वनियन्ता सः कुबुद्धिना मे मया सौत्ये सारथ्ये वृतः। श्रान्ता वाहा अश्वा यस्य तं भुविष्ठं भूमौ स्थितम्, जयद्रथवधे हि जलपानं विनाऽश्वाः श्रान्तास्ततो रथादवतीर्य बाणैर्भुवं भित्त्वा जलं संपादितं तत्पानविधापनेनाश्वा विश्रान्ता यावता कालेन जातास्तावत्कालपर्यन्तं भूमौ कृतावस्थानमपीत्यर्थः। मां रथिनोऽपि अरयः शत्रवः यस्य भगवतोऽनुभावेन प्रभावेण निरस्तं विमोहितं चित्तं येषां तथाभूताः सन्तः न प्राहारन्न प्रहृतवन्तः। स सौत्ये वृत इति मत्कुमतित्वमिति भावः ॥ १७ ॥ नर्माणीति। हे नरदेव माधवस्य तस्य श्रीकृष्णभगवतः उदारं गम्भीरं रुचिरं सुन्दरं यत्स्मितं मन्दहासस्तेन शोभितानि नर्माणि परिहासवाक्यानि तथा कार्यप्रस्तावेषु हे पार्थ, हे अर्जुन, हे सखे, हे कुरुनन्दन, इतीत्यादीनि हृदिस्पृशानि मधुराक्षरोपेतत्वाद्धृदयंगमानि संजल्पितानि संबोधनात्मकवाक्यानि स्मर्तुः स्मरतः मम हृदयं लुठन्ति छिन्दन्ति। यद्वा। लोठयन्ति क्षोभयन्तीति यावत्। णिजभावोऽस्मिन् पक्षे आर्षः ॥ १८ ॥

शय्यासनेति। शय्या एकासने शयनं च, आसनमेकस्मिन्विष्टरे उपवेशनं च, अटनं यत्र तत्र गमनं च, विकत्थनं स्वगुणश्लाघनं च, भोजनं सहोपविश्यान्नालादिवस्तुन आदानप्रतिदानादिपूर्वं भोजनविधानं च, तान्यादयो यासां तासु क्रियासु ऐक्यात्साधारण्यात् साम्यादिति यावत्। अव्यतिरेकाद्धेतोरित्यर्थः। कदाचित्कस्याश्चित् क्रियाया व्यभिचारं दृष्ट्वा, सत्ययुक्तस्त्वं हे वयस्य कृतवानेतद्विहितवानसि किम्, इति वक्रोक्त्या मया विप्रलब्धस्तिरस्कृतोऽपि, महानत्युदारमनाः कृष्णः, महितया स्वमहिमातिशयाद्धेतोः सख्युः अघमपराधं सखा इव, तनयस्याघं पितृवत्पितेव, कुमतेः मे मम सर्वं मत्कृताघस्यानेकत्वात्सकलमपि अघमपराधं सेहे सोढवान्। अत्र बहूनि पाठान्तराणि सन्ति, तानि क्लेशसाध्यत्वादुपेक्षितानि ॥ १९ ॥ त्वया शङ्कितं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पराजयं चापि प्राप्तोऽहमित्याह। सोऽहमिति। हे नृपेन्द्र सख्या जन्मप्रभृतिसहवर्त्तमानमित्रेण, प्रियेण निरतिशयप्रीतिविषयेण, सुहृदा अनिमित्तबन्धुत्वाद्धितैषिणा, हृत् अयते गच्छतीति हृदयस्तेनातिस्निग्धेन पुरुषोत्तमेन श्रीकृष्णेन रहितः, अत एव शून्य उज्जानकारण्यवच्छून्यभावोपेतहृदयः, अहमर्जुनः स पूर्वोक्तगुणोपेतः सन्नपि, अङ्ग हे नृपते अध्वनि मार्गे उरुक्रमस्य श्रीकृष्णस्य परिग्रहस्तं श्रीकृष्णकलत्रमण्डलमित्यर्थः। रक्षन् असद्भिर्दुर्जनैः गोपैर्गोपावटङ्ककङ्काख्यक्षत्रविशेषैः अबला योषिदिव निर्जितः अस्मि॥ २०॥ श्रीकृष्णवियोग एवात्र हेतुर्नान्य इत्याह। तदिति। हे राजन् धनुरिदं चापं तद्वै गाण्डीवमेव। इषवो बाणाः ते वै। अग्निदत्ततूणीरस्था एव। रथोऽपि स तेनाऽग्निना विश्राणित एव। हयास्तुरगा अपि ते तन्नियुक्ता एव। रथी रथीति संज्ञोपेतः अहं सोऽर्जुन एव। ये भगवता सहावस्थानदशायां धनुरादयस्ते एवाधुनाऽपि सन्ति। रथीचाऽहं स एवाधुनाऽप्यस्मि इत्यर्थः। यतो येभ्यः यानि धनुरादीनि तान्यालम्ब्येत्यर्थः। नृपतयोऽतिबलिनोऽपि नृपाः, आमनन्ति विशिष्टं रथिनं मां मन्यन्ते इत्यर्थः। यद्यपि स एव समाजोऽस्त्यथाऽपि सर्वं तद्धनुरादिकम् ईशरिक्तं श्रीकृष्णरहितं सत् क्षणेन असदविद्यमानप्रायम् अभूत्। कथमिव। भस्मन् केवलभस्मन्येव हुतमिव सन्मन्त्रविधानैरपि केवलभूलां हुतवदित्यर्थः। कुहकराद्धम् अतिप्रीतादपि मायाविनः सकाशादुपलब्धं स्वर्णरूप्यमुद्रादिकमिवेत्यर्थः। ऊष्याम् ऊषरभूमौ उप्तमिव सम्यक्कर्षणादिना वापार्हीकृतोपरभूम्युप्तबीजवदित्यर्थः। भगवद्वियोगेन ममैतत्सर्वं निदर्शनत्रयप्रायमभवदिति भावः॥ २१॥

राजन्निति। वारुणीमिति। हे राजन् सुहृत्पुरे द्वारिकायां त्वया अनुपृष्टानामभिष्टानाम्, वारुणीमन्नमयीं मदिरां सुरां पीत्वा मदेन तदुत्थेन मोहेन उन्मथितानि चेतांसि येषां तेषाम्, अत एव अन्योन्यम् अजानताम् इव मुष्टिभिः एरकायष्ट्याभृतमुष्टिभिः मिथः निघ्नताम्, विप्राणामृषीणां शापेन विमूढास्तेषां नोऽस्माकं सुहृदां मध्ये चतुःपञ्च चत्वारः पञ्च वेत्यर्थः। अवशेषिता अवशेषतां प्राप्ताः। अन्ये सर्वे तु विनष्टा इत्यर्थः। तत्र चतुःपक्षे एको हार्दिक्यस्य सुतः, द्वितीयः सात्यकेः सूतुः, तृतीयोऽनिरुद्धसूनुर्वज्रनामा, चतुर्थं हतशेषं भोजकलत्रम्। उद्धवेन सह पञ्चेति द्वयोरेकान्वयः॥ २२॥ २३॥ एवमिदं यत्सकलयादवनिधनं चतुःपञ्चावशेषितत्वं च सर्वमेतत्कालात्मकृष्णकृतमित्याह। प्रायेणेति। यद्यथा यत्संकल्पादिति शेषः। भूतानि मिथः परस्परं निघ्नन्ति मिथः भावयन्ति उत्पादयन्ति च, स्त्रीपुंससंयोगेनोत्पद्यन्ते व्याघ्रसर्पादिद्वारा मिथो नश्यन्ति च इत्यर्थः। तथा एतत् षट्पञ्चाशत्कोटिसंख्यया मिथः समुद्भवनं मिथो निहननं चापि प्रायेण प्रायशः ईश्वरस्य श्रीकृष्णभगवतः चेष्टितं सर्वमेतद्यत्संकल्पमूलकमेवेति भावः॥ २४॥ इममर्थं सोदाहरणं स्पष्टयन् भूभारावतरणार्था या यात्रा तदर्थमवतीर्णः स्वयमुदासीन एव भूभारं संजहारेत्याह जलौकसामिति द्वाभ्याम्। जलौकसामिति। हे राजन् जले जलौकसां मत्स्यादीनां मध्ये यद्वत् यथा आणीयसः सूक्ष्मान् जलौकसः महान्तो जलौकसः अदन्ति भक्षयन्ति। दुर्बलान् बलिनो बलवन्तः निहन्ति, महान्तः बलिनः बलिनो महान्तः मिथः परस्परं घ्नन्ति॥ २५॥ एवमिति। एवं विभुः श्रीकृष्णः महद्भिः बलिष्ठैः यदुभिः इतरान् हत्वा, यदुभिः यदून् अन्योन्यं हत्वा भूभारान् भुवो भारभूतान्सर्वान् संजहार। ह प्रसिद्धमेतत्। यद्वा। महद्भिः बलिष्ठैः पाण्डवैः दुर्योधनजरासंधादीन्, महद्भिः यदुभिः इतरानसुरांशजनृपान्। महद्भिः यदुभिः महतः यदूनेव अन्योऽन्यं परस्परं युद्धं कारयित्वा भूभारान् संजहारेति योजना॥ २६॥ अतः परं वक्तुं न शक्नोमीति सूचयन्नाह। देशेति। देशश्च, कालश्च, अर्थश्च, तैर्युक्तानि तत्तद्देशतत्तत्कालतत्तद्वस्तूचितानि इत्यर्थः। हृन्मानसं तस्मिंस्तापस्तमुपसमयन्तीत्युपशमानि अहंकाराश्रितसंसारसमुद्रशोषणकारणानि गोविन्दाभिहितानि स्वयं श्रीकृष्णेन सङ्ग्राममूर्द्धिन गीतारूपेण मां प्रति कथितानि वाक्यानि स्मरतश्चिन्तयः मे मम चित्तं हरन्ति आकर्षन्ति॥ २७॥

बान्धवनिमित्तस्नेहलक्षणभक्त्यतिशयेन तच्चरणस्मरणमाह। एवमिति। एवमित्थम् अतिगाढेनातिशयेन दृढेन सौहार्देन प्रेमलक्षणभक्तिसाधनपरेण सुहृत्त्वेन कृष्णपादसरोरुहं श्रीकृष्णाङ्घ्रिपद्मं चिन्तयतः स्मरतः जिष्णोरर्जुनस्य मतिः शान्ता विशोका विमला अस्माल्लोकाद्विरक्ता च आसीत्। यद्वा विमला मतिर्मननसमर्था बुद्धिः शान्ता सुखपूर्णा भगवत्स्वरूपातिनिष्ठावतो चाऽऽसीदिति॥ २८॥ मतिवैमल्यफलमाह। वासुदेवेति। वासुदेवस्य श्रीकृष्णभगवतोऽङ्घ्योः पादपद्मयोरनुध्यानं तेन परिबृंहितं वृद्धिं प्राप्तं रंहो वेगो यस्यास्तया, भक्त्या वासुदेवाविच्छिन्नस्मृतिसंतानरूपया प्रीत्यात्मिकया, निर्मथिता निरस्ताः अशेषाः समग्राः कषायाः कषायवद्दुर्मोच्याः रागादयो यस्याः सा धिषणाबुद्धिर्यस्य सः अर्जुनः॥ २९॥ गीतमिति। सङ्ग्राममूर्द्धनि युद्धारम्भे भगवता श्रीकृष्णेन यत् गीतं गीतोपनिषन्मुखेनोपदिष्टं ज्ञानं स्वात्मपरमात्मतत्प्राप्तिसाधनादियाथात्म्यगोचरो बोधः, तत् ज्ञानं कालकर्मतमोरुद्धं महता कालेन कर्मणा नानाक्रियासक्त्या तमोगुणेन च रुद्धं तिरोहितमपि विभुस्तत्त्वावधारणसमर्थः। अत एव पुनः अध्यगमत्। निर्मथिताशेषकषायत्वाद्भूयोऽध्यवस्यदित्यर्थः। द्वयोरेकसंबन्धः॥ ३०॥ तमेव भगवद्गीतज्ञानाधिगमं समासतो दर्शयति। विशोक इति। ब्रह्मसंपत्त्या स्वान्तर्गतज्ञानवत्कर्मयोगादिना शुद्धस्य स्वक्षेत्रज्ञस्याक्षरब्रह्मणा सहैक्यं विभाव्य भगवत्पराभक्तिफलकसम्यक्ज्ञानसंपन्नत्वाद्धेतोरित्यर्थः। संछिन्न-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वैतसंशयः निवृत्तदेवमनुष्यत्वादिस्वनिष्ठभेदभ्रम इत्यर्थः। अत एव नैर्गुण्याद्युक्तरीत्या निर्गुणभावाप्तेर्हेतोः लीनप्रकृतिनिवृत्तैश्वर्यादिलब्धीच्छात्मकस्वभावः, अलिङ्गत्वात्क्षेत्रज्ञादिस्वरूपनिर्णयादावनवबोधरूपलिङ्गरहितत्वाद्धेतोः असंभवः। क्षेत्रज्ञादिस्वरूपादेर्यथार्थनिर्णयवत्तया संप्रज्ञातसमाध्युपेततया च तैलधारावदविच्छिन्नभगवत्स्वरूपानुसंधानातिरिक्तार्थसंभववर्जितः सन् अर्जुनः विशोकः अभूदिति शेषः। अनेन हेतुत्रयपूर्वकार्जुनविशेषणत्रयेण भगवद्गीतोक्तषट्कत्रयार्थोऽन्तर्गतः क्रमेणोक्तो बोध्यः। स च श्रीगोपालानन्दस्वामिसंप्रदर्शितः प्रदर्श्यते। तत्र षडध्यायात्मके पूर्वषट्के तु अन्तर्गतज्ञानेन कर्मयोगेन ज्ञानयोगप्रधानेन त्यागिधर्माभिधसांख्ययोगेन च साधनभक्त्या च शुद्धस्य स्वक्षेत्रज्ञस्याब्रह्मणैक्यं विभाव्य सर्वनियन्तुः पुरुषोत्तमस्य परा भक्तिः कर्त्तव्येति। मध्यमषट्के स्वैकान्तिकभक्तैरुपास्यमानस्य भगवतः समाहात्म्यज्ञानैकान्तभक्तिकथनपूर्वकमैश्वर्यनिष्ठानां कैवल्यनिष्ठानां भगवन्निष्ठानामिन्द्रादिदेवनिष्ठानां च पृथक् पृथक् प्राप्य मुक्तमिति। अन्तिमषट्के तु क्षेत्रज्ञादिस्वरूपनिर्णयो गुणविभागः पुरुषोत्तममाहात्म्यज्ञानाय क्षराक्षरस्वरूपनिर्णयो दैवासुरपुरुषस्वरूपस्वभावनिर्णयः सात्त्विकाहारादिस्वरूपौंकारादिशब्दप्रवृत्तिनिर्णयस्त्यागसंन्यासैकार्थतानिश्चयप्रभृत्यर्थसमुदायश्चोक्त इति॥ ३१॥

एवं यादवसंस्थां श्रीकृष्णस्य स्वधामप्राप्तिं चाभिधाय पाण्डवानां स्वःप्रयाणमुपक्रमते। निशम्येति। भगवतो मार्गस्तं श्रीकृष्णस्य स्वकीयलोकगमनप्रकारमित्यर्थः। यदुकुलस्य संस्थां नाशं च निशम्य श्रुत्वा युधिष्ठिरः निभृतात्मा समाहितचित्तः सन् स्वःपथाय निरतिशयसुखरूपलोकमार्गाय। स्वःशब्दोऽत्र सुखपरः। मतिं स्वमनीषां चक्रे॥ ३२॥ पृथेति। पृथा कुन्ती चापि धनंजयोदितमर्जुनेन कथितं यदूनां नाशं तां दुर्विज्ञेयां भगवद्गतिं 'सौदामन्या यथाकाशे यान्त्या हित्वाऽभ्रमण्डलम्। गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः' इति वक्ष्यमाणप्रकारां भगवतः स्वधामगमनरीतिं च अनुश्रुत्य यथावदाकर्ण्य अधोक्षजे अन्तर्दृष्टिलभ्ये भगवति श्रीकृष्णे एकान्तभक्त्या अनन्यप्रयोजनयैकान्तिकभक्त्या विवेशित आत्मा मनो यया सा तथाभूता सती संसृतेः उपरराम विरक्ता बभूव। देहं जहाविति वा॥ ३३॥ भगवन्मार्गमिति भगवद्गतिमित्यनेन चोक्ता भगवतः स्वलोकं प्रति गतिः, किम्, कृष्णाख्यतनुत्यागपूर्विका उत तया सहितैवेति शौनकाभिप्रेतं विशदयन्नुक्तमपि भगवतो यादवेभ्यो वैलक्षण्यमबुद्ध्वा तत्साम्यं वदतो मन्दमतीन्प्रति वैलक्षण्यं स्पष्टयति। ययेति। अजोऽजन्मा स्वयं श्रीकृष्णभगवान् यया यादवरूपया तन्वा भुवः पृथिव्याः भारम् अहरत् तां तनुं कण्टकेन कण्टकम् उद्धृत्येति शेषः। इव, विजहौ मनुष्यभावेन संस्थानं तत्याज। स्वासाधारणया चतुर्भुजादिमत्या तन्वाऽवतीर्य पित्रोः प्रार्थनया मनुष्यसंस्थानसंस्थितां तनुं भूभारमपनेतुं जग्राह। तां तनुं तिरोधाप्य स्वासाधारणतन्वा जगामेत्यर्थः। अत्रायं भावः। मनुष्यसंस्थानेनैव किं न जगामेत्याकाङ्क्षायां तत्र दृष्टान्तमुखेनोत्तरं कण्टकं कण्टकेनेवेति कृतवान्। तत्र कण्टकविद्धचरणः पुमान् तदपनोदके कण्टकान्तरं परिगृह्य तेन तदपनुद्य ततस्तं तदपनोदकं चापीत्येवं कण्टकद्वयं जहाति, तद्वदिति सांप्रतं भगवतस्तद्द्वयत्यागे साम्यमाह। द्वयमिति। ईशितुर्भगवतः द्वयं चापि समम्। अपनोद्यं दुष्कृतवज्जनशरीरजालमपनोदकं मनुष्यसंस्थानं चोभयमपि हातव्यत्वेन सममपनोदकशरीरस्यापि यावदुपाधि धार्यत्वादिति भावः॥ ३४॥

अथ प्रसिद्धं श्रीकृष्णमूर्त्तेर्विशेषं दृष्टान्तान्तरेणाह। यथेति। भगवान् यथा यथावदेव मत्स्यादिरूपाणि धत्ते जह्याज्जहाति चेत्यर्थः। कथमिव। नटः यथा, नटो यथा नाट्योपयुक्तानि वेषान्तराणि परिगृह्य नाट्यविधानानन्तरं जहाति तथेत्यर्थः। एवं कृष्णोऽपि येन कलेवरेण भूभारः क्षपितः भूभारं क्षपितवानित्यर्थः। तत् कलेवरं जहौ। अत्रायं भावः। नटो यथा नाट्योपयोगिवेषान्तराणि धृत्वा तत्फलसिद्धौ तानि हित्वा, स्वेन रूपेणावतिष्ठते तथा भगवानपि प्रयोजनोपयोगिमत्स्यादिरूपाणि धृत्वा तत्फलसिद्धौ तानि हित्वा स्वकीयरूपेणावतिष्ठते। तद्वदयं कृष्णोऽपि कार्यार्थी यादवकुलार्हवेषं भूभारक्षपणाय दधार। तमपि क्षपितभूभारः सन् जहाविति॥ ३५॥ युधिष्ठिरस्य स्वर्गारोहणप्रसङ्गाय कलिप्रवेशमाह। यदेति। श्रवणीयाः श्रोतव्याः सत्यः कथा यस्य सः भगवान्, मुकुन्दः स्वाश्रितानां मुक्तिप्रदः, श्रीकृष्णः स्वतन्वा स्वासाधारणदिव्यमङ्गलविग्रहेण उपेतः सन्निति शेषः। इमां महीं यदा यस्मिन्नहनि जहौ तत्याज। तदाहस्तस्मिन्नहन्येव अप्रतिबुद्धचेतसामविवेकिनाम् अभद्रहेतुरशुभहेतुः कलिः अन्ववर्त्तत प्रावर्त्तत। अंशेन प्रविष्टस्यापि अधर्मरूपेणानुवृत्तिरुक्ता॥ ३६॥ युधिष्ठिर इति। बुधः विवेकी युधिष्ठिरः पुरे स्वनगरे राष्ट्रे स्वजनपदे च गृहे स्वभवने च तथा आत्मनि स्वस्मिन् तस्य कलेः परिसर्पणमनुवर्त्तनं व्याप्तिमिति यावत्। विभाव्य ज्ञात्वा तत्तन्मूलकं लोभश्च, अनृतं च, जिह्मं कौटिल्यं च, हिंसनं च, तान्यादयो यस्य पारुष्यादेस्तत् अधर्मचक्रं च विभाव्य गमनाय गृहान्निर्गमनाय पर्यधात् निश्चितवान्। 'प्रणिधानं तु निक्षेपः परिधानं तु निश्चयः' इति अभिधानान्निश्चयार्थत्वम्॥ ३७॥ स्वराडिति। ततः स्वराट् चक्रवर्त्ती स्वयं युधिष्ठिरः गुणैः आत्मनः स्वस्य सुसममऽनवमम्, विनयिनं विनयवन्तम्, पौत्रमभिमन्योः सुतम्, परीक्षितं गजाह्वये हास्तिनपुरे, तोयनीव्याः समुद्रमेखलायाः भूमेः पतिम् अभ्यषिञ्चदभिषिक्तवान॥ ३८॥ मथुरायामिति। तथा मथुरायां मधुपुर्यां वज्रं वज्रसंज्ञमनिरुद्धपुत्रं शूरसेनपतिं शूरसेनानां जनपदानामधिपतिं निरूप्य कृत्वा, ततः प्राजापत्यां प्रजापतिदेवताकाम् इष्टिं च निरूप्य सर्वस्वदक्षिणामिष्टिं विधायेत्यर्थः। ईश्वरः राज्यादिषु निर्विद्य संन्यसने समर्थः युधिष्ठिरः अग्नीनाहवनीयादींस्त्रेताग्नीन् अपिबदात्मनि समारोपयामास॥ ३९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदेवाह । विसृज्येति । तत्र स्वगृहे एव तत्प्रसिद्धं सर्वं दुकूलानि च, वलयानि कटकानि च, तान्यादयो यस्य तत विसृज्य त्यक्त्वा निर्ममो ममतावर्जितः निरहंकारो देहादावहंकृतिवर्जितः। संछिन्नान्यशेषाणि बन्धनानि प्रकृत्यादीनि येन। संछिन्नान्यशेषाणि पापादिबन्धनानि यस्येति वा। संछिन्नान्यशेषाणि बन्धनान्युपाधयो येनेति वा तथाभूतः बभूव ॥ ४० ॥ तत्प्रकारमाह द्वाभ्याम्। वाचमिति। वाचं वागित्युपलक्षणं कर्मज्ञानोभयेन्द्रियाणाम्। ततः सव्यापाराणि कर्मेन्द्रियज्ञानेन्द्रियाणीत्यर्थः। मनसि जुहाव तत् द्वयमपि मनोऽधीनमस्तीत्यमन्यतेत्यर्थः। मनस इन्द्रियप्रकृतित्वाभावात्। अयमर्थः कार्यस्य कारणे लयनियमाल्लयरूपार्थविधाने इन्द्रियाणां राजःप्रकृतित्वमस्ति। मनसः सत्त्वप्रकृतित्वमस्ति। ततस्तेषां तस्मिन् लयोक्त्यसंभवादुक्तार्थो युक्त एव। तन्मनः प्राणे जुहाव। मनःप्रवृत्तिं प्राणाधीनां मेने इत्यर्थः। मनसः प्राणाऽऽधीनवृत्तित्वात् प्राणसंवादादिषु च तथा दर्शनात्। प्राणादीनां लयानुसंधानप्रकारमाह। तं च प्राणं इतरेऽपानवायौ तेन प्राणाकर्षणात्। अपानव्यापार उत्सर्गस्तत्सहितं सोत्सर्गम् अपानं मृत्यौ तदधिष्ठातृदेवतायाम्। तं मृत्युं पञ्चत्वे पञ्चभूतानामैक्ये देहे अजोहवीत्। हि। मृत्युर्हि देहस्यैव नात्मन इति भावितवानित्यर्थः। अजोह्वीदिति यङ्लुगन्तात् लुङि रूपम् ॥ ४१ ॥ त्रित्वेति। पञ्चत्वं पञ्चभूतैक्यरूपं देहं त्रित्वे गुणत्रये हुत्वा। तच्च त्रित्वं मुनिः मननशीलः सन् एकत्वेऽविद्यायाम् अजुहोत् सव सर्वारोपहेतुमविद्याम् आत्मनि जीवे अजुहवीत्। अजोहवीदिति वक्तव्ये अजुहवीदित्यार्षम्। एवं शोधितम् आत्मानम् अव्यये कूटस्थे ब्रह्मणि अजोहवीत्। न तस्यान्यत्र लय इत्यर्थः ॥ ४२ ॥ तदेवमात्मभावाऽऽप्तिप्रकारमुक्त्वा बाह्यस्थितिमाह। चीरवासा इति द्वाभ्याम्। ततः चीरं वल्कलं वासो यस्य सः, निराहारः देहस्थितीभूतान्नाहारवर्जितः। बद्धवाक् मौनी। मुक्ता विक्षिप्ता मूर्द्धजाः केशा यस्य सः, आत्मनः स्वस्य रूपमाकारं जडश्च, उन्मत्तश्च, पिशाचः पिशाचाविष्टजनश्च, तेषां तुल्यं तद्वत दर्शयन् लोकमिति शेषः ॥ ४३ ॥

अनवेक्षमाण इति। बधिरः यथा तथा अशृण्वन्, अन्धः इव अनवेक्षमाणः सन् गृहात् निरगात्। महात्मभिः विरक्तैर्महानुभावैः पूर्वं गता गतपूर्वा ताम्। यतः यां गतः प्राप्तः पुनः न आवर्त्तते ताम् उदीचीम् आशां दिशम्। हृदि परं ब्रह्म, स्वेन साक्षादनुभूतं परब्रह्मात्मकश्रीकृष्णस्वरूपं ध्यायन् आनखादाशिखं बिचिन्तयन्सन् प्रविवेश ॥ ४४ ॥ सर्वे इति। अधर्मः मित्रं यस्य तेन कलिना स्पृष्टाः प्रजाः भुवि दृष्ट्वा वीक्ष्य कृतः निश्चयो यैस्ते युधिष्ठिरस्य पश्चाद्गमनाय कृतनिर्णयाः सर्वे भ्रातरो भीमादयः तं युधिष्ठिरम् अनु पश्चात् निर्जग्मुः ॥ ४५ ॥ तेषामिति। असाधुकृतास्तुच्छीकृताः सर्वे अर्था देहतदनुबन्ध्यादयो यैस्ते। यद्वा। साधुकृताः सर्वेऽर्था धर्मादयो यैस्ते तथाभूताः, ते युधिष्ठिरानुगा भीमादयः आत्मनो देहस्य आत्यन्तिकं मरणं ज्ञात्वा वैकुण्ठचरणाम्बुजं श्रीकृष्णभगवत्पादपद्मं मनसा धारयामासुः ॥ ४६ ॥ नारायणचरणाम्बुजधारणफलमाह। तद्ध्यानेति अवापुरिति द्वाभ्याम्। तद्ध्यानोद्रिक्तया वैकुण्ठपदाब्जध्यानप्रवृद्धया भक्त्या विधूतकल्मषाः निवृत्तभगवत्प्राप्तिप्रतिबन्धकपूर्वोत्तराघाः। अत एव विशुद्धधिषणाः अतिशुद्धबुद्धयः, अत एव एकान्तमतयः एकान्तिकभावयुक्तबुद्धयः, परे भागवताः असद्भिः असाधुभिः विषयात्मभिः विषयसंप्रसक्तमानसैर्जनैः दुरवापां दुःखेनाप्याप्तुमशक्याम्, तस्मिन् सर्वशास्त्रप्रसिद्धे नारायणपदे यां गतिम् अवापुः, स्थानं स्थानशब्देनाऽभिहितां तां गतिमित्यर्थः। ते वैकुण्ठपाब्जध्यानोद्रिक्तभक्तिविशुद्धकल्मषत्वविशुद्धधिषणत्वैकान्तिकमतित्वसंयुताः पाण्डवाः, विरजेन रजस उपलक्षणत्वाद्रजस्तमोभ्यां वर्जितेनेत्यर्थः। आत्मना अवापुः एव। हीति द्वितीयमवधारणमुक्तार्थदार्ढ्यार्थकं बोध्यम्। इति द्वयोरेकान्वयः ॥ ४७–४८ ॥ विदुरोऽपीति। विदुरः अपि कंचित्कालं तीर्थान्यटित्वा पाण्डवादीनां गतिमाकर्ण्य आत्मवान् कृष्णे भगवति समाहितचित्तः सन् प्रभासे देहं परित्यज्य कृष्णावेशेन, स्वान्तः प्रविष्टश्रीकृष्णेन हेतुनेत्यर्थः। तच्चित्तः कृष्णैकविषयकचित्तः संश्च पितृभिः तदानीं स्वं नेतुमुपागतैर्यमादिभिः सह स्वक्षयं ययौ, पुनर्यम एव भूत्वा स्वकं लोकं ययावित्यर्थः। पुनरधः पतनाभावात्पाण्डवादीनां मुक्तत्वकथनम्। ते हि प्रारब्धकर्मावसाने विमोक्ष्यन्त एव अतो न विरोधः ॥ ४९ ॥

द्रौपदीति। तदा द्रौपदी चाऽपि पतीनाम् अनपेक्षतां स्वापेक्षारहिततताम् आज्ञाय ज्ञात्वा वासुदेवे भगवति एकान्ता विजातीयप्रत्ययान्तराऽव्यवहिता मतिर्यस्यास्तथाभूता सती तं वासुदेवम् आप अवाप हि ॥ ५० ॥ श्रीकृष्णादीनां प्रयाणश्रवणादिफलमाह। य इति। इतीत्थंभूतम् अलं नितराम्, स्वस्त्ययनं पठतां शृण्वतां च शुभाऽऽवहम्, पवित्रं च भगवत्प्रयाणं श्रीकृष्णस्य स्वधामगमनम्, भगवत्प्रियाणामिति पाठे एतत्पाण्डुसुतानां विशेषणम्। पाण्डोः सुतानां युधिष्ठिरादीनां च एतत् संप्रयाणं च यः पुमान् श्रद्धया शृणोति, सः हरौ श्रीकृष्णे भगवति भक्तिं लब्ध्वा सिद्धिं मुक्तिम् उपैति ॥ ५१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ षोडशोऽध्यायः

सूत उवाच

ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह ।
यथा हि सूत्यामभिजातकोविदाः समादिशन् विप्र महद्गुणस्तथा ॥ १ ॥

खिन्नयोः कलिना पृथ्वीधर्मयोः षोडशे ततः । संवादे पालकस्याऽऽप्तिः कथ्यतेऽत्र परीक्षितः ॥ १ ॥

तदेवं 'संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम्' इति प्रतिज्ञातं पाण्डुपुत्राणां संस्थानं परीक्षिज्जन्मोपेतमुपपाद्य 'परीक्षितोऽथ राजर्षेर्जन्म कर्म विलायनम्' इति प्रतिज्ञातानि परीक्षितः कर्माणि वर्णयति । तत्र परीक्षितो जन्म तु पाण्डवपुत्र-वृत्तान्तकथने एवाऽन्तर्भाव्याऽभिहितम् । विलायनं तु द्वादशे वक्ष्यति । इतः परं चतुरध्याय्या तु तत्कर्माणि वर्ण्यन्ते इति विवेकः । तत इति । ततः पाण्डवानां निर्गमनानन्तरम् । हे विप्र शौनक महान्तो गुणा यस्य सः, महतां गुणा यस्मिन्स इति वा । परीक्षिन्नृपः सूत्यां जन्मदिने जातकोविदाः जातकज्ञानपटवः द्विजाः, अभि बालकमेनं लक्ष्यीकृत्य यथा हि शास्त्रदृशा निश्चित्य समादिशन् कथयामासुः । तथा एव महाभागवतः सन्, द्विजवर्यशिक्षया कृपादिब्राह्मणश्रेष्ठसदुपदेशेन महीं पृथ्वीं ह स्फुटं यथा तथा शशास पालयामास ॥ १ ॥ स इति । स परीक्षिन्नृपः उत्तरस्य एतन्नामधेयस्य मातुलस्य इरावतीमेतन्नामधेयां तनयां सुताम् उपयेमे उदुवाह । ततः तस्यामिरावत्यां चतुरश्चतुःसंख्याकान जनमेजयादीन् जनमेजयश्रुतसेनभीमसेनोग्रसेनसंज्ञान् सुतान् पुत्रान् उत्पादयदुदपादयत् । अडभाव आर्षः । आगमशास्त्रस्याऽनित्यत्वाद्वा । तृतीयचरणेऽक्षराधिक्यमार्षम् । पाठान्तरे हेतौ शतृप्रत्ययः । तदा सुतानुत्पादयितुमिरावतीमुपयेमे इति योजना ॥ २ ॥

आजहारेति । शारद्वतं कृपाचार्यं गुरुं कृत्वा वृत्त्वेत्यर्थः । गङ्गायां गङ्गातीरे भूरिदक्षिणान्मुख्यकल्पतोऽप्यधिक-दक्षिणावतः त्रीन् त्रिसंख्याकान् अश्वमेधानेतत्संज्ञान् क्रतून् आजहार कृतवानित्यर्थः । यत्र येष्वश्वमेधेषु देवा इन्द्रादयः अक्षिगोचराः प्रत्यक्षेक्ष्याः बभूवुः । तथाविधानाजहारेत्यर्थः ॥ ३ ॥ निजग्राहेति । क्वचित्कदाचित दिग्विजये निमित्ते चरन् वीरः परीक्षित् क्वचिदेकान्तप्रदेशे पदा पादेन गोमिथुनं स्त्रीपुंसयोर्गवोर्युग्मं घ्नन्तं ताडयन्तं शूद्रं सन्तमपि नृपलिङ्गधरं राजचिह्नधारिणं कलिं ओजसा पराभिभवसामर्थ्यात्मकेन स्वबलेन निजग्राह निगृहीतवान् ॥ ४ ॥ तत्र लब्धप्रश्नावकाशः शौनकः पृच्छति । कस्येति । नृपः परीक्षित् दिग्विजये कलिं कस्य हेतोः कस्मात्कारणात निजग्राह इत्येकः प्रश्नः । यः पदा गाम अहनत् संतताड असौ नृदेवचिह्नधृक् राजचिह्नधारी शूद्रः कः इत्यपरः प्रश्नः । यद्यपि नृपलिङ्गधरं शूद्रमिति सामानाधिकरण्यनिर्देशेनैव कलिरेव नृदेवचिह्नधृक् शूद्र इति ज्ञात एवेति प्रश्नानुपपत्तिः तथापि क इत्यस्य किं गुण इत्यभिप्रायोऽस्त्यतः प्रश्नोपपत्तिः ॥ ५ ॥ तदिति । हे महाभाग महात्मन् तत्कलिनिग्रहादिकं यदि कृष्णकथाश्रयं श्रीकृष्णभगवत्कथोपेतम् अथवा अस्य कृष्णस्य पदाम्भोजयोश्चरण-कमलयोर्यो मकरन्दस्तं लिहन्तीति तेषां विष्णुपदाम्बुजमकरन्दास्वादिनां सतां साधूनां कथाश्रयं स्यात् तर्हि कथ्यताम् । अयं भावः । यदेतत्कलिनिग्रहादिकमस्माभिः पृच्छ्यते तदस्मन्महत्तामालोक्य न वर्णनीयं किं तु भगवत्तज्जनकथाश्रयं स्याच्चेद्वर्णनीयमिति ॥ ६ ॥

तत्र हेतुं वदन् कृष्णतद्भक्तकथाऽनाश्रयाणामश्रोतव्यत्वमवर्णनीयत्वं चाह । किमन्यैरिति । अङ्ग हे सूत यत् येभ्योऽश्रोतव्याऽवर्णनीयश्रवणवर्णनेभ्यः आयुषः असद्व्ययो निरर्थकः क्षयः भवति । तैः क्षुद्रायुषामल्पायुषाम् ऋतं कर्मफलम् इच्छतां मर्त्यानां मरणशीलानां नृणां संबन्धिभिः अन्यैः कृष्णतद्भक्तजनकथाऽनाश्रयैः अत एव असदालापैः किम् । वर्णितैः श्रुतैर्वा तैर्न किंचित्प्रयोजनं किं तु केवलमायुर्व्यय एवेति भावः । यद्वा ऋतं सद्रूपं परं ब्रह्म इच्छतां तत्प्राप्तिं कामयमा-नानामित्यर्थः । मर्त्यानां क्षुद्रायुषां नृणामस्माकम् अन्यैः असदालापैः किम्, न किंचित्प्रयोजनमस्ति । यद्येभ्यः केवलम् आयुषः असद्व्ययः भवतीत्यन्वयः ॥ ७ ॥ ननु यावत्त्वत्पृष्टार्थवर्णनश्रवणं तावत्क्षुद्रायुषां मर्त्यानां युष्माकं मम च जीवनमेवादौ निर्द्धारयितुं न शक्यमित्यत्राऽऽह । इह नैमिषे क्षेत्रे शामित्रकर्मणि शमितृशब्दः पशुसंज्ञपनकर्तृवाची । तस्येदं शामित्रं तच्च तत्कर्म च तस्मिन् वस्तुतस्त्वत्र पशुसंज्ञपनाऽभावात्तथाविधपापपशुसंज्ञपनदर्शनाच्चेह पापापनोदकभगवद्गुणानुभवनम्, तच्च मृत्युप्रमुखानां सर्वेषामेव साध्यं तच्च ब्रह्मसत्रे युज्यते । ततो भगवद्गुणवर्णनश्रवणात्मकेऽस्मिन्ब्रह्मसत्रे इत्यर्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगवानिति, समर्थः मृत्युः आहूतः कथाश्रवणार्थकारितः अन्तकः सर्वान्तकरः स मृत्युः, यावत् इह आस्ते तावत् कश्चिदपि न म्रियते मरणं न प्राप्स्यति। संबन्धवशतया मरणस्य विक्षेपहेतुत्वात्तस्योक्तरीत्याऽसंभवाच्च विक्षेपो न स्यात् भगवत्कथाश्रवणे इति भावः ॥ ८ ॥ नन्वितरत्राऽमरणाद्विक्षेपो मास्तु तस्यात्र विद्यमानत्वादत्र कस्यचिन्मरणे विक्षेपः स्यादेवेत्यत्राह। एतदिति। एतदर्थमत्रावस्थितानामप्यमरणार्थम्। हिशब्दोऽवधारणार्थः। परमर्षिभिः भगवान्मृत्युरपि आहूतः मृत्युरपि स्वव्यापारं विहाय भगवद्गुणश्रवणार्थं स्थितोऽस्ति। ततः न कमपि हनिष्यतीत्यभिप्रायेणैवेहाहूतोऽस्तीति भावः। तत्कथ्यतां महाभागेत्यादिश्लोकद्वये विष्णुतद्भक्तकथाश्रयस्यैव वर्णनीयत्वं श्रोतव्यत्वं चोक्तं तदेव सहेतुकमुपपादयति सार्धेन। नृलोके इह मनुष्यलोके हरेर्लीलैवामृतं यस्मिंस्तत्। यद्वा। हरेर्लीला यस्मिंस्तत् प्रतिपाद्यहरिलीलमित्यर्थः। तच्च तदमृतं वचः अमृततुल्यं वाक्यमित्यर्थः। पीयेत तत् अहो तस्यैव पातव्यश्रोतव्यत्वात्तद्ये पिबन्ति तेषां भाग्यमेतावदिति वक्तुं नैव शक्यमिति भावः ॥ ९ ॥

यथा मर्त्यस्याऽसत्प्रसङ्गादायुषो वैयर्थ्यं तथा निद्रार्थादिपरस्याऽपि वृथैव जीवनमित्याह। मन्दस्येति। मन्दस्य मन्दचेष्टस्य, मन्दा प्रज्ञा बुद्धिर्यस्य तस्य, मन्दमल्पमस्यायुर्यस्य तस्य, हरिलीलामृतं वचोऽशृण्वतो जनस्येति शेषः। वयः नक्तं रात्रौ तु केवलं निद्रया ह्रियते ह्रस्यते। दिवा च अहनि तु व्यर्थानि पुरुषार्थशून्यानि यानि कर्माणि तैः सांसारिककर्मभिः ह्रियते। हरिलीलामृतं वचः पिबतस्तु रात्रिंदिवगतं वयः सफलमिति भावः। अत्राऽयं विवेकः। अल्पस्यापि कस्यचित्प्रज्ञाबाहुल्यादनेकोपनिषत्सच्छास्त्राभ्यासादिना तदर्थग्रहणेन नक्तं दिवायुषः किंचित्सफलत्वं स्यादतो मन्दप्रज्ञस्येत्युक्तम्, मन्दप्रज्ञस्याऽपि कल्पायुषः कस्यचिन्महतः कृपया तत्सत्त्वं स्यादतो मन्दायुष इत्युक्तम्, अल्पायुषोऽपि कस्यचिद्भाग्यात्मकपूर्वसंस्कारवशतः संजातसत्प्रसङ्गतस्तत्सत्त्वं स्यादत उक्तं मन्दस्येति। निर्भाग्यस्य तु सर्वथैव तदसत्त्वात्, सत्प्रसङ्गं कृत्वा हरिकथाश्रवणेन तत्सत्कर्त्तव्यमिति ॥ १० ॥ इत्थमापृष्टः सूतः सहेतुकं कलिनिग्रहादिकं वर्णयति। यदेत्यादिना यावत्सप्तदशाध्यायसमाप्ति। यदेति। कुरुजाङ्गले कुरुविषये हास्तिनपुरे इति यावत्। वसन् कृतनिवासः। परीक्षिन्नृपः यदा निजचक्रवर्त्तिते स्वाज्ञारूपचक्रानुशिष्टे देशे कलिं प्रविष्टं शुश्रावेति शेषः। कुरुजाङ्गलादिके इति पाठे कुरुजाङ्गलादिके निजचक्रवर्त्तिते देशे कलिं प्रविष्टं शुश्रावेत्यन्वयः। तदा अनतिप्रियां स्वस्यात्यरुचिकरां वार्त्तां निशम्य तत्क्षणमेव संयुगशौण्डिर्युद्धप्रवीणः संयुगशौरिरिति पाठे सङ्ग्रामे शौरितुल्यः सः शरासनं धनुः आददे जग्राह 'जङ्गलं निर्जले देशे' इत्यभिधानचिन्तामण्युक्तेर्विशेषेण सामान्यलक्षणया केवलदेशरूपार्थवाचकाज्जङ्गलशब्दात्स्वार्थेऽणि जाङ्गलशब्दः केवलदेशरूपार्थगमकस्ततः कुरुजाङ्गले इत्यस्य कुरुदेशे इत्यर्थो बोध्यः ॥ ११ ॥ स्वलंकृतमिति। ततः स्वलंकृतं सकलस्वर्णोपकरणसंशोभितम्। श्यामाः कृष्णवर्णाश्च ते तुरंगा अश्वास्तैर्योजितः संयोजितस्तं मृगेन्द्रध्वजं सिंहलक्ष्मलक्षितकेतुं रथम् आस्थित आश्रितः रथाश्च, अश्वाश्च, द्विपा हस्तिनश्च, पत्तयः पद्गाश्च, तैर्युक्ता तया स्वसेनया वृतः परीक्षिन्नृपः दिग्विजयं कर्त्तुं पुरात् निर्गतः ॥ १२ ॥

भद्राश्वमिति। भद्राश्वं मेरोः पूर्ववर्त्ति वर्षम्। केतुमालं मेरोः पश्चिमवर्त्ति वर्षम्। भारतं मेरोर्दक्षिणदिग्भागगं धनुराकृति लवणाब्ध्यासन्नवर्षम्। उत्तरान् कुरुन् मेरोरुत्तरदिग्भागगधनुराकृतिलवणाब्ध्यासन्नकुरुविषयांश्च। किंपुरुषादीनि सर्वाणि वर्षाणि, तत्रायं विवेकः। मेरोः सर्वत इलावृत्तम्, तत उत्तरतो रम्यकम्, हिरण्मयम्, च। दक्षिणतो हरिवर्षं किंपुरुषं च। तानि विजित्य बलिं जगृहे। सर्वतः करमाददे इत्यर्थः ॥ १३ ॥ तत्रेति। तत्र तत्र तेषु तेषु देशेष्वित्यर्थः। महात्मनां महानुभावानां स्वपूर्वेषां युधिष्ठिरादिस्वपितॄणां प्रगीयमानं गायकैः स्वपुरतः उपगीयमानं कृष्णमाहात्म्यसूचकं श्रीकृष्णस्य भगवतो महामहिमाऽवगमकं यशः उपशृण्वानः सम्यक् श्रवणविषयतां नयन् ॥ १४ ॥ आत्मानमिति। अश्वत्थाम्नः अस्त्रतेजसः ब्रह्मास्त्रतेजसः सकाशात् आत्मानं परित्रातं कृष्णेन परिरक्षितम्, वृष्णयो यादवाश्च, पार्था युधिष्ठिरादयश्च, तेषां केशवे श्रीकृष्णे स्नेहं महानुरागम्। तथा तेषां वृष्णिपार्थानां केशवे भक्तिं च उपशृण्वन् ॥ १५ ॥ तेभ्य इति। परमसंतुष्टो नितरां हृष्टः अत एव प्रीत्या स्नेहेन उज्जृम्भिते विकसिते लोचने यस्य सः, महामना उदारबुद्धिः परीक्षिन्नृपः तेभ्यः श्रावयितृजनेभ्यः महाधनानि बहुमूल्यानि वासांसि महावस्त्राणि हारान्मुक्तमालाश्च ददौ इति त्रयाणामेकसंबन्धः ॥ १६ ॥ सारथ्येति। स्निग्धेषु श्रीकृष्णस्वरूपे गाढानुरागोपेतेषु पाण्डुषु युधिष्ठिरादिषु विष्णोः श्रीकृष्णस्य सारथ्यं च, पारषदं च सेवनं च, सख्यं च, दौत्यं च, वीरासनं च, अनुगमनं स्तवनं च, प्रणामश्च तान् जगत्प्रणतिं विष्णोर्जगत्कृतप्रणामं च शृण्वन् नृपतिः परीक्षित् विष्णोः श्रीकृष्णस्य पदारविन्दे भक्तिं करोति स्म। चकारेत्यर्थः। तत्र सारथ्यं सारथेः कर्म। पारषदं सभापतिकर्म। रेफषकारयोर्विश्लेषश्छान्दसः। सेवनमुक्तकर्मकरणम्। सख्यं सख्युः कर्म। दौत्यं संदेशकरत्वरूपं दूतस्य कर्म, वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणम्। अनुगमनं पृष्ठतः प्रयाणम्। स्तवनं स्तुतिः। प्रणामो नमस्कारः। पाण्डवेषु श्रीकृष्णेन कृतान्येतानि कर्माणि श्रुत्वा स्मृत्वा कृष्णं बहुमन्यमानस्तच्चरणभक्तिं चकारेति भावः ॥ १७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्येति। एवमुक्तप्रकारेण पूर्वेषां युधिष्ठिरादीनां वृत्तिं भगवति वर्त्तनप्रकारम्, अन्वहं वर्त्तमानस्यानुतिष्ठतः तस्य परीक्षितः नातिदूरे सन्निकृष्टप्रदेशे यत् आश्चर्यमेकं महच्चित्रम् आसीत्। किलेत्यनलीके। तत् मे मत्तः निबोध। कथयिष्यतो मत्तः सकाशाच्छृणिवत्यर्थः ॥ १८ ॥ किं तदित्यत्राह। धर्म इति। एकेन पदा सत्याख्येनैकेन पादेनेत्यर्थः। चरन् धर्मः वृषरूपधरो धर्माधिदेवः, विवत्सां वत्सरहितां मातरं वत्सजननीम् इव अश्रूणि वदने यस्यास्तां गां गोरूपधरां पृथ्व्यधिष्ठात्रीं देवीम्, विच्छायां निस्तेजस्काम् उपलभ्य निरीक्ष्य पृच्छति स्म अपृच्छत् ॥ १९ ॥ प्रश्नमेवाह—कच्चिदित्यादिभिः षड्भिः। कच्चिदिति। हे भद्रे हे धेनो ते तव आत्मनो देहस्य अनामयमारोग्यं कच्चित्। आरोग्यमस्ति किमित्यर्थः। ईषत् किंचित् म्लायता हर्षक्षयमुपगतेन वैवर्ण्यं भजतेति यावत्। मुखेन वदनेन यतः विच्छाया निस्तेजस्का असि भवसि। अतः अहं तु भवतीं त्वाम् अन्तरा हृदयमध्ये आधिः क्लेशो यस्यास्तथाभूताम आलक्षये। ततः हे अम्ब कंचन दूरे बन्धुं दूरस्थं बन्धुं शोचसि ॥ २० ॥ पादैरिति। किं च, पादैस्त्रिभिरङ्घ्रिभिः न्यूनम्, अत एव, एकः पादो यस्य तं मा मां मल्लक्षणं जनमित्यर्थः। शोचसि। अहो स्वित् एतत्प्रतिप्रश्नमन्वेतव्यम्। उताथवा वृषलैः शूद्रप्रायै राजभिः भोक्ष्यमाणम्, इत ऊर्ध्वमिति शेषः। आत्मानं शोचसि उत। हृतो यज्ञे भागो येषां तान् सुरादीन्देवादीन् शोचसि। उताथवा मघवतीन्द्रे अवर्षति सति प्रजाः दुर्भिक्षपीडितान् जनान् शोचसि ॥ २१ ॥ अरक्ष्यमाणा इति। हे उर्वि पृथिवि पुरुषादैः राक्षसैः इव राक्षसवन्नृशंसजनैरित्यर्थः। आर्त्तान् पीडितान् बालान् बालकान्, अरक्ष्यमाणाः स्त्रियः स्त्रीः शोचसि। यद्वा। भर्तृभिः अरक्ष्यमाणाः स्त्रियः, पितृभिः अरक्ष्यमाणान् बालान्, प्रत्युत तैरेव निर्दयैरेव पुरुषादैरिवार्त्तान् क्लिष्टान् तान् शोचसि इत्यन्वयः। अथो ब्रह्मकुले कुकर्मणि दुर्वृत्ते सति देवस्य विष्णोरियं देवी तां वाचं त्रयीलक्षणां शोचसि। उत राजकुले अब्रह्मण्ये ब्राह्मणेष्वसाधुनि सति कुलाग्र्यान् ब्राह्मणान् शोचसि ॥ २२ ॥

किमिति। कलिना उपसृष्टान्व्याप्तान् क्षत्त्रबन्धून् क्षत्त्रियाधमान् शोचसि। अथवा तैः क्षत्त्रबन्धुभिः, इतस्ततः यतस्ततः अवरोपितानि उपद्रुतानि राष्ट्राणि शोचसि। उत अशनं निषिद्धमांसादिभक्षणं च, पानम् अपेयमद्यादिपीतिश्च, वासः गुह्याङ्गेक्षणं यथा स्यात्तथाविधवस्त्रधारणं च, स्नानं प्रचुरजन्तुमयजलाप्लवनं च, व्यवायः पराऽङ्गनाभिर्मैथुनाचरणं च, तेषून्मुखश्चासौ जीवलोकश्च तं शोचसि किम्। एतदर्थस्फुटता शिक्षापत्र्यां 'न भक्ष्यं सर्वथा मांसं यज्ञशिष्टमपि क्वचित्' इति 'अब्राह्मान्नेन पक्वं यदन्नं तदुदकं च न' इति 'अगालितं न पातव्यं पानीयं च पयस्तथा' इति 'यस्मिन्परिहितेऽपि स्युर्दृश्यान्यङ्गानि चात्मनः' इति 'व्यभिचारो न कर्तव्यः पुंभिस्स्त्रीभिश्च मां श्रितैः' इत्यादिश्लोकानामर्थप्रकाशिकाटीकातो ज्ञेया ॥ २३ ॥ यद्वेति। यद्वा हे अम्ब मातः हे धरित्रि ते तव भूरिरतिशयितो यो भारस्तस्यावतारोऽवरोपणं तदर्थं कृतोऽवतारः स्वस्वरूपप्राकट्यं येन तस्य, अधुना अन्तर्हितस्य हरेः श्रीकृष्णस्य हरेरिति कर्त्तरि षष्ठी। हरिणेत्यर्थः। विसृष्टा त्यक्ता सती तस्य हरेः, निर्वाणे मोक्षे विशेषेण लम्बितानि संनिहितानि मोक्षकराणीत्यर्थः। कर्माणि चेष्टितानि स्मरती त्वं शोचसि। यद्वा। हे अम्ब धरित्रि ते तव भूरिभरावतारकृताऽवतारस्य हरेः निर्वाणं विलम्बितमाश्रितं येषु तानि कर्माणि स्मरन्ती त्वं तेन विसृष्टा सती शोचसि। निर्वाणविडम्बितानीति पाठे निर्वाणं मोक्षः, विडम्बितमुपहसितं यैस्तानि मोक्षादप्यधिकसुखानीत्यर्थः। यद्वा। निर्वाणं स्वस्वयोग्यं मोक्षं विशेषेण लम्बयन्ति पुरःस्थितं कारयन्तीति ॥ २४ ॥ इदमिति। हे वसुंधरे इदं सांप्रतमुपस्थितं तव आधेर्मानसव्यथायाः मूलं मम मह्यं आचक्ष्वाख्याहि। येन मनोदुःखेन त्वं विकर्षिता विशेषतः कृशत्वं प्राप्ता असि। हे अम्ब सुरार्चितं सुरैरपि बहु मन्तव्यमित्यर्थः। ते तव सौभगं स्पृहणीयं सौन्दर्यं बलिनां बलवतामपि बलीयसा बलवत्तरेण कालेन अद्य हृतमपहृतं किं वा ॥ २५ ॥

धर्मेणेति पृष्टा पृथिव्याह दशभिः। भवानिति। हे धर्म यन्मामाऽऽधिमूलं भवान् माम् अनुपृच्छति तत्सर्वं वेद हि। त्वं जानास्येवेत्यर्थः। तथापि वक्ष्ये इति शेषः। येन हेतुभूतेन श्रीकृष्णेन त्वं लोकसुखावहैर्लोकानां सुखकारिभिस्तपःशौचदयासत्याख्यैः चतुर्भिः पादैः वर्त्तसे अवर्त्तथाः। अधुना येन कारणेन विनैकपादेन वर्त्तसे तदेव ममाप्याऽऽधिमूलमिति भावः ॥ २६ ॥ कारणविशेषजिज्ञासायां तदुपपादयति सत्यमित्यादिभिः पञ्चभिः। सत्यमिति। सत्यं भूतहितयथार्थभाषणम्। शौचं हेयप्रतिभटत्वं बाह्याभ्यन्तरशुद्धिमत्त्वं वा। दया परदुःखासहनम्। सज्जनेष्वार्त्तप्राणिषु च चित्तद्रवीभाव इत्यर्थः। क्षान्तिः सापराधजनापराधसहिष्णुता, क्रोधप्राप्तौ चित्तसंयमनं वा। त्यागः अर्थिषु मुक्तहस्तता, पूर्णकामताप्रयुक्तानादरो वा। संतोषोऽलंबुद्धिः सर्वदा क्लेशराहित्यं वा। आर्जवमवक्रता। मनोवाक्कायानामेकरूपत्वमित्यर्थः। शमो मनोनिग्रहः, इदं प्रियमिदमप्रियमिति बुद्धिविधुरता वा। दमो बाह्येन्द्रियनिग्रहः। तपः स्वधर्मः, कृच्छ्रचान्द्रायणाद्युपवासनियमो वा। साम्यमरिमित्रादिराहित्यम्। तितिक्षा द्वन्द्वाप्रतिहतत्वम् अपराधसहनं वा। उपरतिर्व्यर्थव्यापारोपरतिः, लाभप्राप्तावौदासीन्यं वा। श्रुतं सर्वशास्त्रार्थयाथात्म्यवित्त्वम् ॥ २७ ॥ ज्ञानमिति। ज्ञानमाश्रितानिष्टपरिहारेष्टप्रापणोपयुक्तम्, आत्मपरमात्ममायास्वरूपाणां यथार्थतया संवेदनं वा। विरक्तिः शब्दादिविषयरागराहित्यम्। विषयानाकृष्टचित्तत्वमित्यर्थः। ऐश्वर्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समग्रजगदीशितृत्वसामर्थ्यं 'ऐश्वर्यं चाणिमादयः' इति भगवदुक्तं वा। शौर्यं युद्धेष्ववैमुख्यम्, स्वाश्रितार्थैकसंग्रामोत्साहो वा। तेजः परैरप्रधृष्यत्वम्। साहजिकः प्रभाव इत्यर्थः। बलं शारीरं प्रसिद्धम्, दक्षत्वं वा। स्मृतिः कर्त्तव्यार्थानुसंधानम्। स्वातन्त्र्यमपराधीनता, सर्वक्रियास्वनन्यापेक्षत्वमित्यर्थः। कौशलं क्रियानिपुणता। सर्वकर्मणि वैचित्र्यकरणबुद्धिरित्यर्थः। कान्तिः सौन्दर्यं 'न तत्र सूर्यो भाति' इति श्रुत्युक्तविधा दीप्तिर्वा। धैर्यं विकारहेतावुपस्थितेऽप्यव्याकुलता, युद्धे स्वगृह इव प्रवेशसामर्थ्यमिति वा। मार्दवमक्रूरता चित्ताकाठीन्यमित्यर्थः ॥ २८ ॥ प्रागल्भ्यमिति। प्रागल्भ्यं सभासु धार्ष्ट्यम्। प्रतिभातिशय इत्यर्थः। प्रश्रयो विनयः। शीलं सद्वृत्तिः, सुस्वभावो वा। सहः प्राणस्य स्वाभाविकसामर्थ्यम्। ओजोऽन्नादिजनितम्। बलं धारणसामर्थ्यम्। सहओजोबलानि मनसो ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च पाटवानीति वा। भगः षड्गुणवत्त्वम्। गाम्भीर्यं दुरवगाह्याभिप्रायत्वम् अक्षोभ्यत्वमिति वा। स्थैर्यं क्रोधनिमित्तैरविकारः, अचञ्चलता वा। आस्तिक्यं शास्त्रार्थविश्वासः, गुरुवाक्ये श्रद्धानता वा। कीर्तिर्यशः। मानः पूजार्हता, परेषां माननं वा। अनहंकृतिर्गर्वाभावः, देहात्माभिमानराहित्यं वा ॥ २९ ॥

एते इति। एते एकोनचत्वारिंशत्। अन्ये ब्रह्मण्यत्वशरण्यत्वाश्रितवत्सलत्वादयश्च महान्तो गुणा महागुणाः। भगवन्नित्याः भगवत्स्वरूपे नित्यं वर्त्तमानाः। भगवन्निति परमे व्योमन्नितिवल्लुप्तसप्तम्यन्तं वा। तदा नित्या इति पृथक् पदम्। महत्त्वम् इच्छद्भिर्जनैः प्रार्थ्याः संप्रार्थनीयाः सन्तोऽप्येते यत्र यस्मिन् भगवति तु कर्हिचित्कदाचिदपि न वियन्ति। न च्यवन्ति। कदाचिदपि भगवतः सकाशात् क्षीणा न भवन्ति साहजिकत्वादिति भावः ॥ ३० ॥ तेनेति। हे वृष गुणपात्रेण प्रोक्ताविनाशिगुणैकभाजनेन, श्रीनिवासेन लक्ष्म्या अनपाय्या वासरूपेण, तेन श्रीकृष्णेन सांप्रतमधुना रहितम्, अत एव पाप्मना पापरूपेण पापहेतुना वा कलिना सपरिवाराधर्मसहितेन तिष्येण, ईक्षितं पराभूतिविधानाय सम्यक्स्वनयनविषयतां नीतम्, लोकममुं भारतवर्षवासिजनं शोचामि। पञ्चानां श्लोकानामेकसंबन्धः ॥ ३१ ॥ आत्मानमिति। किं च तेन रहितम् अमरोत्तमं देवश्रेष्ठं भवन्तं चापि, न केवलं भवन्तमपि तु आत्मानं मां चापि। न केवलं मां वा, किं तु देवानिन्द्रादीन्, पितॄनग्निष्वात्तादीन्, ऋषीन्, साधून्, सर्वान् वर्णान् ब्राह्मणादीन्। तथा आश्रमान्ब्रह्मचर्यादीन् अपि शोचामि। त्वामधर्माभिभूतत्वेन, मां ःभारातिशयासहिष्णुत्वेन, देवादीनयज्ञभागभाक्त्वेन साधूनपरिरक्षकत्वेन, वर्णाश्रमांस्तद्धर्मविलोपेन च शोचामीति भावः ॥ ३२ ॥ तस्य सर्वपरिरक्षकभगवतो विरहोऽतिदुःसह इत्याह चतुर्भिः। ब्रह्मादय इति। ब्रह्मादयश्चतुर्मुखप्रभृतयः सुरेशाः यस्याः श्रियोऽपाङ्गमोक्षः ईषत्तिर्यक्दृष्टिप्रपातस्तं कामयन्त इति तथाभूताः स्वेषु श्रीकटाक्षनिपातमाकाङ्क्षमाणाः सन्त इत्यर्थः। बहुतिथं बहुकालपर्यन्तं तपः समचरन्। सा एवंभूता श्रीर्लक्ष्मीरपि स्ववासं स्वासाधारणनिवासभूतं अरविन्दवनं विहाय भगवत्प्रपन्ना एकं भगवन्तमेव समाश्रिता सती अनुरक्ता यत्पादलावण्यानुरागवती सती च यत्पादसौभगं यस्य पादयोः सौन्दर्यमेव अलमतिशयेन भजते सेवते ॥ ३३ ॥

तस्येति। तस्योक्तविधगुणैकाधारस्य भगवतः श्रीकृष्णस्य अब्जं पद्मं च, कुलिशं वज्रं च अङ्कुशः सृणिश्च, केतुर्ध्वजश्च, तेषां केतानि आश्रयभूतानि तैः श्रीमत्पदैः समलंकृताङ्गी सम्यगलंकृतमङ्गं यस्याः सा, लेखात्मकाब्जादिचिह्नोपेतश्रीमच्चरणपद्माङ्कसंशोभिताङ्गेत्यर्थः। अहं पृथ्वी ततो भगवतः सकाशात् विभूतिं शोभां संपदम् उपलभ्य प्राप्य त्रीन् लोकान् अत्यतिक्रम्य अरोचे शोभितवत्यस्मि। यद्वा। विभूतिं लक्ष्मीमुपलभ्य त्वयाऽप्येवं भाग्यं न लब्धमित्युपालभ्य। यद्वा। विभूतिं सर्वां समृद्धिमधिगम्य त्रीन् लोकानत्यरोचे इति संबन्धः। एवम् उत्स्मयन्तीं गर्वं कुर्वाणां मां स श्रीकृष्णो भगवान् तदन्ते स्वावतारप्रयोजनसाधनान्ते। अथवा तदन्ते विभूतेर्नाशकाले प्राप्ते सति व्यसृजत् त्यक्तवान् ॥ ३४ ॥ यो वै इति। आत्मतन्त्रः स्वतन्त्रः यो भगवान् मम अतिभरमत्यन्तभाररूपम् आसुरवंशराज्ञाम् असुरसंपद्युक्तवंशोद्भवनृपाणाम् अक्षौहिणीशतम् अपानुदत् वै। किं च आत्मनि स्वस्मिन् पौरुषेण सामर्थ्येन विद्यमानेनेति शेषः। ऊनपदं पादत्रयविकलम् अत एव दुःस्थं दुःखितं त्वां सम्पादयन् पादचतुष्टयसंपन्नं कर्त्तुमिच्छुः सन् यदुषु यादवेषु रम्यं रमणीयम् अङ्गं शरीरम् अबिभ्रत् धृतवान् ॥ ३५ ॥ का वा इति। किं च यः प्रेमावलोकः स्नेहपूर्वं समीक्षणं च, रुचिरस्मितं सुन्दरो मन्दहासश्च, वल्गुजल्पो मधुरभाषणं च, तैः। मधुमानिनीनां यादवस्त्रीणां समानं गर्वसहितं स्थैर्यं स्तब्धत्वम् अहरत् हृतवान्। यस्य श्रीकृष्णस्याङ्घ्रिभ्यां पादपद्माभ्यां विटङ्किताऽलंकृता तस्याः मम रोमोत्सवो रोमोद्गमः बभूव। तस्य पुरुषोत्तमस्य श्रीकृष्णस्य विरहं का वा मादृशी सहेत। न कापि सहेतैवेत्यर्थः ॥ ३६ ॥ तयोरिति। एवमित्थं तयोः पृथ्वीधर्मयोः कथयतोर्मिथः संभाषमाणयोः सतोः तदा परीक्षित् नाम प्रसिद्धः इति नाम्नेति शेषः। राजर्षिः प्राचीं कुरुक्षेत्रे पूर्ववाहिनीं सरस्वतीं नदीं प्राप्तः संगतः ॥ ३७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सप्तदशोऽध्यायः

सूत उवाच

तत्र गोमिथुनं राजा हन्यमानमनाथवत् । दण्डहस्तं च वृषलं ददृशे नृपलाञ्छनम् ॥ १ ॥

उच्यते निग्रहो राज्ञा कलेः सप्तदशे कृतः । वीर्ययुक्तस्य तस्यापि वक्तुं वैराग्यमद्भुतम् ॥ १ ॥

तत्रेति । तत्र प्राच्यां सरस्वत्यां गङ्गायां घोषवत्तत्तीरे इत्यर्थः । अनाथवत् हन्यमानं नाथरहितो यथा हन्यते तथा ताड्यमानमित्यर्थः । गोमिथुनं पूर्वोक्तमिति शेषः । नृपस्येव लाञ्छनानि यस्य तं, दण्डो हस्ते यस्य तम्, वृषलं शूद्रं च राजा परीक्षिन्नृपः ददृशे अपश्यत् ॥ १ ॥ गोमिथुनं विविच्याह । वृषमिति । मृणालं पद्मकन्दस्तद्वद्धवलं श्वेतवर्णं बिभ्यतं भीतमिव मेहन्तं मूत्रं मुञ्चन्तम् । वेपमानं कम्पमाभजन्तम् । एकेन पदा स्थितत्वात् सीदन्तं भग्नाङ्गत्रत्तिष्ठन्तम् । शूद्रेण ताडितं वृषं ददृश इति पूर्वश्लोकादनुषञ्जनीयम् ॥ २ ॥ स्त्रियं विशिनष्टि । गामिति । धर्मदुघां यज्ञयोग्यपयोदधिघृतदोग्ध्रीं शूद्रपदा हतां शूद्रेण वामपादेन ताडिताम् अत एव भृशं दीनां विवत्सां वत्सरहिताम् अश्रूणि वदने यस्यास्ताम् । अश्रुसहित-वदनामित्यर्थः । क्षामां कृशां यवसं तृणम् इच्छन्तीं कामयमानां गाम् अपश्यदिति शेषः ॥ ३ ॥ पप्रच्छेति । कात्तस्वराः स्वर्णमयाः परिच्छदाः परिकरा यस्मिंस्तं सुवर्णपरिकरपरिष्कृतमित्यर्थः । रथं स्यन्दनम् आरूढः । समारोपितं सज्जीकृतं कार्मुकं धनुर्येन सः परीक्षिन्नृपः मेघगम्भीरया वाचा पप्रच्छ अप्राक्षीत् ॥ ४ ॥ तत्र प्रथमं शूद्रं प्रतिप्रश्नप्रकारमाह । कस्त्वमिति द्वाभ्याम् । कस्त्वं त्वं को भवति ननु किमर्थं त्वं मां पृच्छसि इत्यत्राह । अहमेव शरणं रक्षिता यस्य तस्मिन्, लोके अस्मिन्निति शेषः । बली बलवान्सन् अबलान् दुर्बलान् बलात् हंसि । अतः पृच्छामीति शेषः । नृपोऽहमिति चेत्तत्राह । नटवत् वेषेण केवलेन वेषमात्रेणैव नरदेवः राजा असि भवसि । कर्मणा अद्विजः शूद्रः असि । ब्राह्मणक्षत्रियविट्स्वेवंविधकर्मादर्शनान्नटव-द्राजवेषं नाटयंस्त्वमित्थंभूतकर्मणा केवलं शूद्रेष्वप्यधम एव भवसीति भावः ॥ ५ ॥ कस्त्वमिति । गाण्डीवं धनुर्यस्य तेनार्जुनेन सह कृष्णे श्रीकृष्णभगवति दूरं गते स्वलोकं प्रति कृतगमने सतीत्यर्थः । कः शमनः यमसदृश इति यावत् । 'को ब्रह्मात्मा-निलार्केषु शमने सर्वनाम्नि च' इति विश्वः । त्वम् अशोच्यान् शोकानर्हान् रहस्येकान्ते प्रहरन् भवसि, अतः वधम् अर्हसि अतः शोच्योऽसि । स्वजनेनेति शेषः । त्वामेवंविधकर्मणाऽहं वधिष्यामि । ततस्त्वद्बन्धुजनास्त्वच्छोकं कर्त्तार इति भावः ॥ ६ ॥ अथ वृषभं पृच्छति । त्वमिति । हे मृणालधवल पादैस्त्रिभिरङ्घ्रिभिः न्यूनः, पदा एकेनाङ्घ्रिणा चरन् त्वं वा कः भवसि । ननु वृष एवाऽहंप्रत्यक्षेक्ष्यो भवामि तत्र त्वमिति कः प्रश्न इत्यत्राह । वृषरूपेण वृषसमानाकारेण नोऽस्मान् परिखेदयन् अस्मद्बुद्धेः परिघातं कुर्वन्नवस्थित इत्यर्थः । कश्चित् देवः भवसि, किं वा देवं विनैवंविधतया स्ववर्त्तनविधानमन्यस्याति-दुष्करमिति ॥ ७ ॥

कुतः परिखेदकत्वं तत्राह । न जात्विति । कौरवेन्द्राणां कौरवकुलोत्पन्नानां वरेण्यनृपाणां दोर्दण्डैर्भुजपरिघैः परिरम्भितमाश्लिष्टं परिपालितमिति यावत् । तस्मिन् अस्मिन् भूतले ते तव शुचोऽश्रूणि विना अन्येषां प्राणिनाम् अश्रूणि जातु कदाचित् न अनुपतन्ति । विना त्वामिति पाठे त्वां विना केषांचिदपि प्राणिनां शुचो नाऽनुपतन्तीत्यन्वयः ॥ ८ ॥ एवमुक्ते पुनरपि शोचन्तं प्रत्याह । मा सौरभेयेति । हे सौरभेय सुरभिपुत्र वृष मा अनुशुचः शोकं मा कार्षीः । ते तव वृषलादस्माच्छूद्रात् भयं व्येतु नश्यतु सांप्रतं गामाश्वासयन्नाह मेति । हे अम्ब खलानां दुष्टानां शास्तरि दण्डधरे मयि तिष्ठति सति त्वं चापि मा रोदीः । रोदनं मा कार्षीः । ते तव भद्रं सुखमेव भविष्यति ॥ ९ ॥ मद्धितार्थमेवैनं हनिष्यामि न तवोपकारायेत्याह । यस्येति । हे साध्वि यस्य राज्ञः राष्ट्रे देशे राज्ये इत्यर्थः । असाधुभिर्दुरात्मभिः कृत्वा सर्वाः प्रजाः त्रस्यन्ते बिभ्यति । असाधु-भिरिति करणत्वविवक्षया तृतीयायाः प्रयुक्तत्वान्न 'भीत्रार्थानाम्—' इत्यपादानत्वम् । मत्तस्य प्रमत्ततावतः तस्य राज्ञः कीर्तिः सद्धर्मसद्गुणादिनिष्ठताजन्यं यशः, आयुर्जीवितकालः, भगो भाग्यम्, गतिः परलोकः, नश्यन्ति नाशं प्राप्नुवन्ति ॥ १० ॥ एष इति आर्त्तानां दुःखितानाम् आर्त्तिनिग्रहः दुःखपरिहारः यः एषः राज्ञो नृपस्य परः सर्वोत्तमः धर्मः सदाचारः हि । अतः भूतद्रुहं भवादृक्प्राणिद्रोहकारिणम् अत एव असत्तममतिदुर्जनम् एनं वधिष्यामि । अनेन कस्य हेतोर्निजमाहेति चोद्यं परिहृतम् ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनरपि शोचन्तं वृषं पृच्छन्नाश्वासयति । क इति चतुर्भिः । कोऽवृश्चदिति । हे सौरभेय सुरभेः पुत्र । चतुष्पदः प्राक् पादचतुष्टयोपेतस्य तव त्रीन् पादान् कः अवृश्चत् । कृष्णानुवर्त्तिनामस्माकं राज्ञां राष्ट्रे त्वादृशाः दुःखिताः मा भूवन् न सन्तु ॥ १२ ॥ आख्याहीति । हे वृष अकृताऽगसामकृतापराधानां साधूनां निर्दोषाणां वो युष्माकं भद्रं मङ्गलम् अस्त्विति शेषः । पार्थानां पार्थान्वयोत्पन्नानामस्माकं कीर्त्तिदूषणं यशोदूषणकरम् आत्मवैरूप्यकर्त्तारं पादच्छेदेन भवतो विरूपता-पादकपुरुषम् आख्याहि । यः अनागसि निरपराधे जने अघं द्रोहं युञ्जन्कुर्वन् आस्ते । अस्यैवंविधस्य जनस्य सर्वतः सर्वत्र मन्मत्तः सकाशात् भयं च भीतिरेव भविष्यतीति शेषः ॥ १३ ॥ एतस्य दण्डेऽहमसमर्थ इति माशङ्कीरित्याह । अनागस्स्विति । यः इह लोके अनागस्सु निरपराधेषु भूतेषु जनेषु निरङ्कुशः शासकाऽत्रमतिपूर्वमौद्धत्येनोत्पथगः सन् आगस्कृत् द्रोहकृत् भवेत्, तस्य साक्षात् अमर्त्यस्य देवस्य सतोऽपि साङ्गदं केयूरसहितं भुजम् आहर्त्ता आहरिष्यमाणः अस्मि । साङ्गदमित्यनेन मूलत उत्पाट्याहरिष्यामीति सूचितम् ॥ १४ ॥ नन्वेकस्य निग्रहेणाऽन्यस्यानुग्रहे तव किं प्रयोजनं तत्राह । राज्ञ इति । इह लोके अनापदि आपत्कालमृते इत्यर्थः । उत्पथान्कुमार्गेण गच्छतः अन्यानधर्मिष्ठान् यथाशास्त्रं शासतो दण्डयतः अनापद्यु-त्पथानित्यनेन आपदि दुर्वृत्तिर्न दोषावहेत्यपि सूचितम् । राज्ञः स्वधर्मे तिष्ठन्तीति स्वधर्मस्थास्तेषामनुपालनं तत्तद्योग्यतया रक्षणं परमः धर्मः हि ॥ १५ ॥ एवमुक्तवन्तं नृपं प्रति वृष आह तत्रादौ तद्वचोऽभिनन्दति एतदिति । हे राजन् पाण्डवेयानां पाण्डुवंशजानां वो युष्माकम् आर्त्तानां न विद्यते भयं यस्मात्तत् एतत् वचः युक्तम् एव । पाण्डवेयान् विशिनष्टि । येषां पाण्डवेयानां गुणगणैर्हेतुभिः भगवान् कृष्णः दौत्यादौ दूतत्वप्रभृतिकर्मणि कृतः संप्रवृत्तः । एवंविधगुणगणाश्रयाणामेतद्वचो युक्तमेवेति भावः ॥ १६ ॥ कोऽवृश्चदिति यत्पृष्टं तत्रोत्तरमाह । नेति हे पुरुषर्षभ पुरुषश्रेष्ठ यतः यस्मात्पुरुषात्सकाशात् क्लेशबीजानि दुःखकारणानि स्युः, तं पुरुषं वयं न विजानीमः । यतः वाक्यभेदविमोहिताः क्लेशकारणानि वदतां नानाविधै-र्वाक्यैर्विमोहं प्राप्ता भवाम इत्यर्थः ॥ १७ ॥

वाक्यभेदानेव दर्शयति । केचदिति । केचित् विकल्पवसनाः आत्मनः सुखदुःखप्रदमिति शेषः । आत्मानं निजात्मानमेव आहुः । तदेतदास्तिकनास्तिकाख्योभयमतसिद्धम्, तत्रादौ विकल्पं भेदं वसते आच्छादयन्तीति विकल्पवसना योगिनः 'आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः' इत्यात्माऽतिरिक्तग्रहाणेन सर्वेषां सुखादिकारणं स्वात्मानमेवाहुर्योगिनः । विकल्पैः कुतर्कैः वसते प्रवर्त्तन्ते ते विकल्पवसना नास्तिकाः अपि सुखदुःखादिहेतुमात्मन आत्मानमेवाहुः । तद्यथा । न तावद्देवतादीनां तत्र सुखदुःखादिप्रदाने हेतुत्वम्, कर्माधीनत्वात्प्रभुत्वाभावात् । कर्मणश्चात्माधीनत्वादात्मैवैतद्धेतुरिति । अन्ये दैवज्ञाः दैवं ग्रहादिरूपां देवतां तत्कारणमाहुः । 'ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च । भावाभावौ च जगतस्तस्मात्पुण्यतमा ग्रहाः' इति याज्ञवल्क्योक्तेः । परे मीमांसकाः, कर्म यज्ञादिरूपा क्रिया तां तद्धेतुमाहुः । 'अथातो धर्मजिज्ञासा' 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्याद्युक्तेः । यद्वा । परे बौद्धाः कर्मादृष्टमेव तद्धेतुमाहुः । यथा तन्मतमालम्ब्य भगवद्वचनं 'कर्मणा जायते जन्तुः कर्मणैव विलीयते । सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते' इति । अपरे एतत्संज्ञनास्तिकमतस्थाः लोकायतिकाः स्वभावं पूर्वकृतकर्मपरिणामरूपं प्रभुं तद्धेतुमाहुः । 'प्राग्भवीयेषु जीवानां नानाकर्मसु यानि तु । पक्कीभूयैकरसतां जीवैः प्राप्तानि तानि हि । स्वभाव इति संप्रोक्तः प्रकृतिर्वासनेति च' इति सुधासिन्धोर्द्विशताधिकत्रिचत्वारिंशत्तमतरङ्गा-त्स्वभावशब्दार्थो ज्ञेयः । तं तद्धेतुं वदतां मतमालम्ब्य यथा भगवद्वाक्यम् 'स्वभावतन्त्रो हि जनः स्वभावमनुवर्त्तते । स्वभाव-स्थमिदं सर्वं सदेवासुरमानुषम्' इति ॥ १८ ॥ अप्रतर्क्यादिति । केचित् अप्रतर्क्यात्तर्काऽगोचरात्प्रधानात् सर्वेषां सुखदुःखानि भवन्तीत्याहुः तथाहि 'यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् । स एष यर्हि प्रकृते-र्गुणेष्वभिविषज्जते । अहंक्रियाविमूढात्मा कर्त्ताऽस्मीत्यभिमन्यते । तेन संसारपदवीमवशोऽभ्येत्य निर्वृतः । प्रासङ्गिकैः कर्मदोषैः सदसन्मिश्रयोनिषु' इति । केष्वपि केषुचिद्बुधेषु तु 'अनिर्देश्यादसङ्गो ह्ययं पुरुषः' इति श्रुतेः कथंचिन्निर्देष्टुमशक्यादन्तर्यामिण सकाशात् सुखदुःखानि भवन्ति । इति निश्चयः अस्ति । 'अन्तः प्रविष्टः शास्ता जनानाम्' । 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवाऽसाधु कर्म कारयति तं यमधो निनीषते' इति श्रुतेः । हे राजर्षे अत्रैवं विकल्पितेषु क्लेशकारणेषु मध्ये अनुरूपं प्रकृतक्लेशाऽनुगुणं कारणं स्वमनीषया श्रुतिस्मृत्यनुकूलया सूक्ष्मया स्वधिया विमृश विचारय विचार्य निश्चिनुहि इत्यर्थः ॥ १९ ॥

एवमिति । हे द्विजसत्तम शौनक एवमित्थं धर्मे प्रवदति सति सम्राट् सार्वभौमः सः परीक्षित् विखेदो विगतखेदः सन् समाहितेनान्तर्वृत्तीकृतेन मनसा तं धर्मस्याभिप्रायं प्रत्यचष्टत । चक्षिर्दर्शनेऽपि वर्त्तते । ततः दृष्टवानालोच्य निर्णीतवानि-त्यर्थः । सकलेषु पूर्वोक्तपक्षेषु मध्ये तत्तत्कर्मानुगुणमन्तः स्थित्वा फलं लम्भयतो वैषम्यनैर्घृण्यवर्जिताद्भगवतः सर्वं सर्वेषां भवतीति ज्ञातवानिति भावः । 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते । इति मत्वा भजन्ते मां बुधा भावसमन्विताः । बुद्धिर्ज्ञानमसंमोहः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षमा सत्यं दमः शमः। सुखं दुःखं भवो भावो भयं चाभयमेव च। अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः। भवन्ति भावा भूतानां मत्त एवापृथग्विधाः। अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभि जानन्ति तत्त्वेनातश्च्यवन्ति ते' इति स्मृतेः 'न कर्माविभागादुपपद्यते चाप्युपलभ्यते च' 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति' इत्यादिन्यायाभ्यां चान्येषां तदग्रेऽकिंचित्त्वात्ततः पृथक्कल्पना अज्ञानविषयाः इति। ननु तदाऽज्ञानिनां कर्मादिभिस्तानि सन्तु। कथं ज्ञानिष्वपि तद्दर्शनमिति चेत्तदुत्तरमुक्तप्रायमपि सुधासिन्धौ चतुस्त्रिंशे तरङ्गे श्रीहर्युक्तं प्रदर्श्यते 'भगवद्विमुखानां तु सुखदुःखे स्वकर्मभिः। भक्तानां तु हरेराज्ञापालनत्यागतश्च ते' इति स्फुटमेव समाहितमस्ति॥ २०॥ निर्णीतमेव तदभिप्रायं तं प्रत्याह धर्ममित्यादिषड्भिः। धर्ममिति। हे धर्मज्ञ वृषरूपधृक् बलीवर्दरूपधृत् त्वं साक्षात् धर्मः एव असि। अतः धर्मम् एव ब्रवीषि। अधर्मकारिणि पुरुषे सन्निहितेऽपि 'पुरुषं तं न विजानीम' इति अधर्मासूचकं वचो ब्रुवंस्त्वं धर्ममेव ब्रवीषीति भावः। कुतः यद्यस्मात् अधर्मकृतोऽधर्मकारिणः स्थानम् अधर्मकारिभिः प्राप्यं यत्स्थानमित्यर्थः। तत् सूचकस्यापि भवेत्। 'असत्कृतमधर्मं तु वदन् धर्ममवाप्नुयात्' इति वचनात्सूचने दोषाभावस्त्वस्त्यथापि 'यद्यधर्मः कृतः सद्भिर्न स वाच्यः कथंचन' इति 'पतितं पतित इत्युक्त्वा पतति' इति च जानन् सन् न ब्रवीषीति भावः॥ २१॥ अथवा सतो दुःखित्वदर्शनादसतश्च सुखित्वदर्शनात्सुखदुःखादिबीजं दुर्ज्ञेयमेवास्तीति दर्शयन्नाह। अथवेति। अथवा देवस्य जगत्स्रष्टुर्भगवतो माया तस्याः गतिः प्रवृत्तिः भूतानां चेतसः वचसश्च अगोचरः अविषया ज्ञानविषया न भवतीत्यर्थः। नूनम्, गोचरशब्दो नियतपुल्लिङ्गः। इत्येवंभूतः निश्चयः। तस्माद्वा नोक्तवानसीति संबन्धः॥ २२॥

धर्मोऽसीत्यनेन त्वं साक्षाद्धर्माधिदेव एवासीति, यत उक्तं तत एव तत्पादा अपि न लौकिकवृषभपादसजातीयाः, अपि तु विशिष्टा एवेति वदंस्तद्बाधकान् दर्शयति। तप इति। हे धर्म तव धर्माधिदेवस्य भवतः तपः, शौचम्, दया, सत्यम्, इत्येते चत्वारः पादाः प्रकीर्तिताः। तत्र अधर्मस्यांशैरधर्मस्याङ्गभूतैः त्रिभिः स्मयश्च, सङ्गश्च, मदश्च, तैः त्रयः पादाः भग्नाः। तत्र स्वस्मिन्नेवोत्कर्षधीः स्मयः स तपोनाशहेतुः। 'तपः क्षरति विस्मयात्' इति स्मृतेः। सङ्गः शौचविरोधो 'शौचं स्त्रीसङ्गतस्तथा' इति वचनात्। मदो दयाविरोधी चित्तविकारः। 'हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः' इति नारदोक्तेः। यत्र मदे॥ २३॥ अथ वृषलं तच्चिकीर्षितं च निश्चित्याह। इदानीमिति। हे धर्म ते तव पादश्चतुर्थपादरूपं सत्यम् अस्ति। यतः निर्वर्त्तयेत स्वनिर्वाहं विधत्से इत्यर्थः। इदानीं तं तत्र सत्यात्मकं पादमपि अधर्मः सकलाधर्मपात्रम् अनृतेन एधितो वृद्धिं गतः अयं कलिः जिघृक्षति ग्रहीतुमिच्छति। 'सत्यमनृतभाषणात्' इति वचनादनृतेन सत्यनाशः प्रसिद्ध एवास्ति। अत्रैवंविधा स्थितिः। कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मः, कृतावसाने तपो नाशः। त्रेतायां त्रिपाद्धर्मः, त्रेतान्ते शौचनाशः। द्वापरे द्विपाद्धर्मः, द्वापरान्ते दयानाशः। कलावेकपाद्धर्मः, कलेरन्ते सत्यस्यापि नाशः जायते॥ २४॥ अथ गां तत्क्लेशहेतुं च निश्चित्याह। इयमिति। इयं गौश्च साक्षात् भूः पृथिवी भवति। भगवता श्रीकृष्णेन न्यासितोऽपनीत उरुरतिशयितो भरो भारो यस्याः सा सती श्रीमद्भिः चक्राब्जोर्ध्वरेखास्वस्तिकादिकैकोनविंशतिलक्ष्मशोभावद्भिः तस्य श्रीकृष्णभगवतः पादन्यासैश्चरणाम्बुजारोपणैः सर्वतः सर्वत्र कृतं कौतुकमुत्सवो यस्याः सा एवंभूता बभूव॥ २५॥ शोचतीति। अधुना तु उज्झिता तेन भगवता त्यक्ता सती साध्वी साधुगुणोपेतापि दुर्भगा भाग्यहीना इव अब्रह्मण्या ब्रह्मकुलासाधवः नृपव्याजा नृपवेषमात्रधराः शूद्राः मां भोक्ष्यन्ति इति हेतोः अश्रूणि कलयति मुञ्चतीति अश्रुकला। यद्वा अश्रूणां कला बिन्दवो यस्याः सा संततस्रुतनेत्रजलधारा सती शोचति॥ २६॥ इतीति। इतीत्थं धर्मं महीं पृथिवीं च सान्त्वयित्वा एव महारथः परीक्षित् अधर्महेतवे अधर्मस्य कारणाय कलये कलिं हन्तुमित्यर्थः। निशातं तीक्ष्णं खड्गमसिम् आददे। विकाशं कृत्वोद्धृतवानित्यर्थः॥ २७॥

तमिति। तं परीक्षितं नृपं जिघांसुं हन्तुमिच्छुम् अभिप्रेत्यालक्ष्य भयविह्वलः कलिः नृपलाञ्छनं किरीटादिराजचिह्नं विहाय त्यक्त्वा सहसातूर्णमेव शिरसा तस्य परीक्षितः पादयोर्मूलं समगादष्टाङ्गविशिष्टतया तच्चरणकमलयोः पपातेत्यर्थः॥२८॥ पतितमिति। वीरो वीररसप्रधानः दीनवत्सलः शरण्यः शरणागतप्रतिपालकः श्लोक्यः प्रशंस्यः परीक्षिन्नृपः पादयोः पतितम् अङ्घ्रिपतितकलिमित्यर्थः। वीक्ष्य कृपया न अवधीत्तं न हतवान्। किं तु हसन्निव इवशब्देनाहो खलानां खलतेति ध्यायन्सन्नित्यर्थः। इदं वक्ष्यमाणवचनम् आहाब्रवीत्॥ २९॥ तदेवाह। न ते गुडाकेशेत्यादिभिश्चतुर्भिः गुडाकेशोऽर्जुनस्तस्य यशोधरा ये वयं तेषाम्, अर्जुनकीर्तिं बिभ्रतां कौरवाणामस्माकमित्यर्थः। सन्निधाविति शेषः। बद्धाञ्जलेः ते तव किंचिदपि भयं न अस्ति। किंतु हे कले, भवता त्वया मदीये क्षेत्रे कथंचन केनाप्यंशेन न वर्त्तितव्यं वै। कुतः त्वम् अधर्मबन्धुरधर्म एव बन्धुर्यस्य सः, अधर्मानुबन्धीत्यर्थः। भवसीति शेषः। अत्र स्वदेहमारभ्य राष्ट्रपर्यन्तस्थानविवक्षया क्षेत्रमित्युक्तं बोध्यम्। ततस्तत्र सर्वत्राधर्मबन्धुत्वात्त्वया न स्थातव्यमित्यर्थः॥ ३०॥ तदेव प्रपञ्चयति त्वामिति। नरदेवा राजानस्तेषां देहाः शरीराणि तेषु वर्त्तमानं त्वम् अन्वनुसृत्येत्यर्थः। लोभः, अनृतम्, चौर्यम्, अनार्यम्, अंहः ज्येष्ठा, माया, कलहः, दम्भश्च अयं अधर्मपूगः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रवृत्तः जायते। ततो मत्क्षेत्रे न वर्त्तितव्यमिति भावः। तत्र लोभः परवित्ताभिलाषः। सत्पात्रे सद्व्यये प्राप्ते सत्यपि स्ववित्तापरित्यागो वा। अनृतं स्वपरद्रोहे सावकाशत्वेऽपि सर्वदा सर्वथानृतभाषणविधानम्। चौर्यं प्रत्यक्षं परोक्षं वा वञ्चनादिना परस्यापहरणम्। अनार्यं दौर्जन्यम्। अंहः पापं स्वधर्मत्यागो वा। ज्येष्ठा अलक्ष्मीः। माया मायागुणकार्यं रागद्वेषादिकं कपटम्। कलहो निष्प्रयोजनं कलहाचरणम्। दम्भो धर्मध्वजित्वम् ॥ ३१ ॥ न वर्त्तितव्यमिति। हे अधर्मबन्धो तत्तस्माद्धेतोः धर्मेण सत्येन च वर्त्तितव्ये वर्त्तितुमर्हे अस्मिन् ब्रह्मावर्त्ते क्षेत्रे 'सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं' तद्ब्रह्मावर्त्तं तत्र क्षेत्रे इत्यर्थः। भवता न वर्त्तितव्यम्। यत्र ब्रह्मावर्त्ते यज्ञवितानविज्ञाः यज्ञानुष्ठानकोविदाः यज्ञैः यज्ञेश्वरं परमपुरुषं यजन्ति आराधयन्ति ॥ ३२ ॥

यस्मिन्निति। किं बहुना अस्मिन्देशे, इज्या आराध्या इन्द्रादयस्ते मूर्त्तिः शरीरं यस्य सः। यद्वा। इज्या यागस्तद्रूपा मूर्त्तिर्यस्य सः। इच्छामूर्त्तिरिति पाठे भक्तेच्छानुरूपा मूर्त्तिर्यस्य स इत्यर्थः। 'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्' इति भगवदुक्तेः। इज्यमानो यज्ञैराराध्यमानः, वायुः इव, स्थिराश्च जङ्गमाश्च तेषां स्थावराणां जङ्गमानां च भूतानामित्यर्थः। अन्तः बहिश्च व्याप्येति शेषः। आत्मान्तः प्रविश्य प्रशासनधारणे कुर्वन्नित्यर्थः। भगवान्सर्वदा षडैश्वर्यसंपन्नः एषः हरिः यजतामाराधयितॄणां जनानाम् अमोघान् कामान् इष्टार्थान् शं मोक्षाख्यसुखं च तनोति प्रयच्छति ॥ ३३ ॥ परीक्षितेति। परीक्षिता राज्ञा एवमुक्तप्रकारेण आदिष्टोऽनुशिष्टः स पूर्वोक्तः कलिः जातवेपथुः संजातगात्रकम्पः सन् उद्यतोऽसिः खड्गो येन तम्, तं नृपम् उद्यतं प्राणिप्राणापहारायोद्युक्तं दण्डपाणिं यममिव इद वक्ष्यमाणवचनं आहोवाच ॥ ३४ ॥ तदेवाह। यत्रेति द्वाभ्याम्। हे सार्वभौम सकलपृथ्वीपते तव आज्ञया अत्र न वस्तव्यमित्येवंभूतेन तव निदेशेनेत्यर्थः। यत्र क्वचन यत्र कुत्रापि वत्स्यामि। यत्स्थानं भवान्निर्देक्ष्यति तत्र निवासं तु यथाकथंचन करिष्यामीत्यर्थः। परं तु तत्र तत्र तेषु तेषु सर्वेषु स्थानेष्वित्यर्थः। अपि आत्तेषुशरासनमुपात्तसशरधनुषं त्वां भवन्तमेव लक्षये पश्यामि ॥ ३५ ॥ तदिति। हे धर्मभृतां श्रेष्ठ ते तव अनुशासनमाज्ञाम् आतिष्ठन् सर्वथा संपादयन्सन् यत्र यस्मिन् स्थाने त्वामेवं सशरधनुष्पाणिं न लक्षये तथाविधे स्थानक इत्यर्थः। नियतो निश्चलः सन् वत्स्ये वत्स्यामि, तत् स्थानं मे मम मामित्यर्थः। निर्देष्टुं प्रदर्शयितुम् अर्हसि एव ॥ ३६ ॥ अभ्यर्थित इति। राजा यदा कलिना एवम् अभ्यर्थितः तदा तस्मै कलये स्थानानि निवासार्हपदानि ददौ। तान्येवाह। द्यूतम् अक्षैर्देवनम्, पानं सुरादेः। स्त्रियः पराङ्गनासङ्गः, सूना प्राणिहिंसा। यत्र येष्वेतेषु स्थानेषु चतुर्विधः अधर्मः अधर्मस्य पादास्तिष्ठन्ति तानि ददावित्यर्थः ॥ ३७ ॥

पुनरिति। पुनश्च पुनरपि याचमानाय स्थानान्तरं सम्यग्याचते कलये प्रभुः परीक्षित् जातरूपं सुवर्णस्थानम् अदात्। ततः पुनरपि स्थानान्तराणि याचमानाय अनृतम्, मदम्, कामम्, रजः, पञ्चमं वैरं च अदात्। अनृतादीनि पञ्च येषु तानि स्थानानि ददावित्यर्थः। अनयोर्द्वयोः श्लोकयोरयं भावः। तपःशौचदयासत्यरूपा धर्मस्य चत्वारः पादा अत्राभिहिताः। द्वादशे च सत्यम्, दया, तपो, दानम्, इति त एव प्रोक्ताः। तत्र सत्यदयातपांसि तु तान्येव। दानशब्देन शौचं ज्ञेयम्, भूताभयदानस्य मनःशुद्धिरूपत्वात्। तत्प्रतिभटस्याधर्मस्य पादाः स्मयसङ्गमदानृतरूपा अत्र प्रोक्ताः। द्वादशेऽनृतहिंसाऽसंतोषविग्रहशब्दैस्ते प्रोक्ताः। तत्रानृते शङ्का नास्ति। उभयत्रैकेन शब्देनैवोपादानात्। असंतोषशब्देन तद्धेतुर्गर्वापरसंज्ञः स्मयः। विग्रहशब्देन तद्धेतुः सङ्गः। मदेन हिंसोत्पत्तिदर्शनात् हिंसा, मदेऽन्तर्गता। एवं सति परीक्षिता दत्तेषु द्यूतादिषु चत्वारोऽप्यधर्मपादा आगताः। द्यूतेऽनृतम्। पाने मदः। स्त्रीषु सङ्गः। सूना हिंसा तस्यां स्मयः। यद्यपि सर्वं सर्वत्र संभवति, तथापि प्राधान्यमेषामेषु प्रदर्शितम्। एतावतापि तदसंतोषे भूयो याचमानाय तदेव चतुष्कं यत्र तादृशं सुवर्णं दत्तम्। सुवर्णस्य श्रीरूपत्वात्तन्मदेन मत्तावुद्दिश्य नारदवाक्यं यथा। 'नह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः। श्रीमदादाभिजात्यादिर्यत्र स्त्रीद्यूतमासवः। हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः' इति। एवं द्यूतादौ पञ्चस्थाने दत्ते पुनर्याचतेऽपि तदेव पुनर्दत्तम्। अनृतम्, मदः, कामः, रजः, वैरम्, च। तत्रानृतमधर्मपादः प्रसिद्धः। मदो मदे। कामः सङ्गे पराङ्गनाद्यासक्तिरूपे। हिंसाया रजोमूलत्वात्तस्याः स्मयेऽन्तर्भावोक्तेर्न ततः पृथक्त्वम्। वैरं च स्त्रीसुवर्णनिष्ठमिति तत्तदन्तर्गतमित्याडम्बरबाहुल्येऽपि द्यूतादिकमेव न ततः किंचित्पृथगित्यलमेतत्पल्लवनेन ॥ ३८ ॥ अमूनीति। प्रभवत्यस्मादिति प्रभवः अधर्मस्य प्रभवः अधर्मोत्पादक इत्यर्थः। कलिः औत्तरेयेण उत्तरासूनुना परीक्षिता नृपेण दत्तानि अमूनि पञ्च स्थानानि तन्निदेशकृत तस्याज्ञां पालयन् सन्नित्यर्थः। न्यवसत्। अमूषु स्थानेषु निवासं चकारेत्यर्थः। अत्रौत्तरेयेणेति मातृसंबन्धेन तन्नामोक्तिर्वध्यस्य तस्य कलेः जीवन्मुक्तत्वजा बोध्या ॥ ३९ ॥ अथेति। यतो द्यूतादीनि कलेरावासस्थानानि सन्ति। अथातो हेतोः बुभूषुर्भवितुमिच्छुरात्मसत्तां लब्धुमिच्छुः पुरुषः क्वचित्कदाचिदपि एतानि द्यूतादीनि न सेवेत। बुभूषुरित्यनेनैतानि सेवमानोऽन्ततः स्थावरतां प्राप्नुवन्नसत्प्रायो भवेदिति सूचितम्। राजा तु विशेषतः एतानि न सेवेत। कुतः यतः अयं धर्म एव शीलं यस्य सः। तच्च कुतः लोकानां जनानां पतिः पालयिता। अन्यथा राजानमवलोक्य प्रजा अपि तथा कुर्वन्त्यो नश्येयुरिति भावः। एतच्च राज्ञोऽनुचितमित्यभिप्रायेण विशिनष्टि। गुरुर्हितोपदेष्टा ॥ ४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृषस्येति । ततः परीक्षित् वृषस्य वृषरूपस्य धर्मस्य नष्टान् तपः, शौचम्, दयाम्, इति त्रीन् पादान् प्रतिसंदधे संयोजयामास । तथा महीं गोरूपधरां पृथ्वीं च आश्वास्य सान्त्वयित्वा समवर्द्धयत्सम्यक् पुपोष ॥ ४१ ॥ स एष इति । स उक्तविधप्रभावः एषः परीक्षिन्नृपः एतर्हि अधुना अनतिविप्रकृष्टकाले इत्यर्थः । अरण्यं वनं विविक्षता प्रवेष्टुमिच्छता पितामहेन युधिष्ठिरेण राज्ञा उपन्यस्तं प्रदत्तं पार्थिवोचितं सार्वभौमनृपतियोग्यम् आसनं सिंहासनम् अध्यास्तेऽध्यास्त ।, 'वर्त्तमानसामीप्ये वर्त्तमानवद्वा 'इति भूते लट् ॥ ४२ ॥ आस्ते इति । कौरवेन्द्रः कौरवश्रेष्ठः श्रिया सार्वभौमलक्ष्म्या उल्लसन्प्रकाशमानः कौरवेन्द्रश्रियेत्येकं पदं वा । बृहद्बृहच्छ्रवा विपुलकीर्त्तिः चक्रवर्ती चक्रं भूमण्डलं वर्त्तयति पालयतीति तथाभूतः महाभागः राजर्षिः स परीक्षित् गजाह्वये पुरे हस्तिनापुरे अधुना वर्त्तमानसंनिकृष्टे भूतकाले आस्ते आस्त । स्मेत्यध्याहारो वा ॥ ४३ ॥ इत्थमिति । न केवलमुक्त एव तस्य प्रभावः, इत्थंभूता एवंविधा अनुभावा अन्येऽपि प्रतापा यस्य तथाभूतः अयम् अभिमन्युसुतः नृपः परीक्षित् अभवदिति शेषः । अत एवाधुना तस्याभावे सत्यपि तद्भयात्कलेरत्र देशे प्रवेशाभावादेव भवतामिदं सत्रं प्रवर्त्तते इत्याह । यस्येति । यस्य परीक्षितः क्षोणीं पृथिवीं पालयतः सतः अत्रापि वर्त्तमानसामीप्ये भूते लटः शत्रादेशः । पालितवतः सत इत्यर्थः । अपनीतेऽपि कर्पूरे तन्मञ्जुषायां तद्वासनानुवृत्तिवत्तदीयचक्रानुवृत्तहेतोरेव यूयं सत्राय सत्रं कर्त्तुं दीक्षिताः वर्त्तध्वे । अन्यथा कलिनाभिभूतं सत्रमिदं न प्रवर्त्तेतेत्यर्थः ॥ ४४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायाः-
सन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

——:※:——

अष्टादशोऽध्यायः

सूत उवाच

यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः । अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ॥ १ ॥

अष्टादशे ब्रह्मशापो राज्ञस्तस्य निरूप्यते । जातोऽनुग्रह एवास्य वैराग्यमावहन् स च ॥ १ ॥

अथैतत्प्रबन्धपिपृच्छिषामुद्बोधयितुं पारीक्षितमवशिष्टं वृत्तान्तं समासतो वदन् तन्निर्याणस्यात्याश्चर्यरूपत्वात्तत्कथन-संभावनाय तज्जन्माश्चर्यमनुस्मारयन्नुपसंहरति । यो वा इति । यः परीक्षिन्नृपः मातुः उदरे द्रौण्यस्त्रविप्लुष्टः अश्वत्थामप्रयुक्त-ब्रह्मास्त्रेणादग्धशरीरः सन्नपि अद्भुतकर्मणः भगवतः कृष्णस्य अनुग्रहात् वै एव न मृतः ॥ १ ॥

ब्रह्मेति । यस्तु यश्च परीक्षिन्नृपः ब्रह्मणो ब्राह्मणस्य कोपः शापप्रदानहेतुः क्रोधस्तेनोत्थितः समुत्पन्नस्तस्मात् प्राणानां विप्लवो नाशो यस्मात् तस्मात् उरुभयात् तक्षकान्नागात् भगवत्येवार्पित आशयोऽन्तःकरणं येन तथाभूतः सन् न संमुमोह मोहं न प्राप्तः ॥ २ ॥ उत्सृज्येति । स भूपतिः सर्वतः सर्वत्र देहतदनुबन्ध्यादिषु सङ्गं स्नेहलक्षणामासक्तिम् उत्सृज्य सर्वथा त्यक्त्वा वैयासकेः व्याससूनोः शुकस्य शिष्यः भूत्वा, विज्ञाते गर्भे बाह्यतश्च संविदिते अजिते भगवति श्रीकृष्णे संस्थितिर्निष्ठा यस्य तथाभूतः सन्, स्वमात्मीयं कलेवरमङ्गं गङ्गायां भागीरथ्यां जहौ तत्याज ॥ ३ ॥ मोहाभावमेव ससेतुकमुपपादयति । नेति । उत्तमश्लोकस्य भगवतो वार्त्ता येषां तेषाम्, तस्योत्तमश्लोकोक्तं कथैवामृतं तत् जुषतां सेवमानानाम्, तस्य भगवतः पदाम्बुजं चरणकमलं स्मरताम्, चिन्तयतां पुंसाम् अन्तकालेऽपि संभ्रमः न स्यादेव । अत एव पूर्वश्लोकोक्तं नाश्चर्यावहमिति भावः ॥ ४० ॥ सिंहावलोकन्यायेन यस्य पालयतः क्षोणीमित्यनेनाभिप्रेतमुपपादयंस्तस्मिन् राज्ञि सुतरां तत्र चित्रमित्याशयेनाह । तावदिति । इह लोके सर्वतः सर्वत्र प्रविष्टः अपि कलिः यावद्यावत्कालम् उर्व्यां भूमौ आभिमन्यवोऽभिमन्योः सुतः एकराट् स्वतुल्यराजान्तररहितः महान् ईश ईश्वरः पतिरिति यावत् । बभूव । तदाज्ञा यावदनुवृत्ता बभूवेति वा । तावत् न प्रभवेत्समर्थो न बभूव । अनेन मदीये राष्ट्रे त्वया न वर्त्तितव्यम् इति यदभिहितं तस्यायं कलेः सामर्थ्यप्रकटनाभावरूपोऽभिप्रायो, न तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्प्रवेशाभावरूप इत्यपि सूचितम् ॥ ५ ॥ ननु तदा कलेरप्रवेश एवास्तु यर्हि प्रविष्टस्तु तदा खल्वित्युच्यते तर्हि स कदा उर्व्यां प्रविष्टः, प्रविष्टोऽपि न प्रभवति कुतः, तत्राह यस्मिन्निति । यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे भगवान् श्रीकृष्णः गां भूमिं उत्ससर्ज तत्याज । तदैव तस्मिन्नेवाहनि तस्मिन्नेवक्षणे इत्यर्थः । अधर्मप्रभवः अधर्मस्य प्रभवो यस्मिन्तथाभूतः असौ कलिः इह लोके अनुवृत्तः प्रविष्टो बभूव ॥ ६ ॥

नन्वेनमधर्महेतुं कलिं सर्वथा हन्तुं योग्यमपि किं न हतवांस्तत्राह । नानुद्वेष्टीति । सम्राट् सार्वभौमः परीक्षित् कलिं न अनुद्वेष्टि तन्मरणपर्यन्तं द्वेषं न कृतवानित्यर्थः । वर्त्तमानसामीप्ये लट् । कुतः सारङ्ग इव भ्रमरवत् सारभुक् सारग्राही । सारङ्गो यथा कमलगतं साररूपं मकरन्दमेव गृह्णाति न तु तन्नाशयति तद्वत्कलिगतसारग्राहित्वान्न तं जघानेत्यर्थः । कोऽसौ तद्गतः सारो यज्जिघृक्षुत्वं नानुद्वेष्टीत्यत्राह । यद्यस्मिन्कलौ युगे कृतानि भगवन्नामकीर्त्तनादिरूपाणि कुशलानि पुण्यकर्माणि आशु शीघ्रमेव सिद्ध्यन्ति भगवत्प्राप्तिमावहन्ति । संकल्पमात्रेण फलन्तीत्यर्थः । इतराण्यकुशलानि पापरूपाणि कर्माणीति यावत् । तानि आशु न सिद्ध्यन्ति न फलदानि भवन्तीत्यर्थः । तानि तु कृतान्येव सिद्ध्यन्ति न तु संकल्पितमात्राणीति भावः । एतत्सारभुक् नानुद्वेष्टि इति संबन्धः । अनेन कृतादियुगेषु कृतानां कुशलकर्मणां चिरेण फलप्रदत्वमितरेषां त्वाश्विति च सूचितम् । तथा च विष्णुपुराणे । 'यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन यत् । द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ । तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः । प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम्' इति ॥ ७ ॥ ननु दोषबाहुल्याद्द्वेष एव युक्त इति चेन्न साक्षाद्भगवदाश्रयवत्सु तस्याकिंचित्करत्वादित्याह । किं न्विति । बालेषु धैर्यवर्जितया मूर्खेषु नृषु विषये शूरेण शौर्यवता, धीरेषु साक्षाद्भगवत्संबन्धवत्तया धैर्यवत्सु नृषु भीरुणा भीतिमता कलिना किं नु कृतं स्यात् । न कोऽप्यनर्थः कृतः स्यादित्यर्थः । तदेव दृष्टान्तेन दर्शयन्विशिनष्टि । यः कलिः अबीषु वृकः इव प्रमत्तेषु जनेष्वेव अप्रमत्तः वर्त्तते भगवतः साक्षात्त्वकाल उक्तो हरिलीलाकल्पतरौ । स यथा । 'यावत्स्युस्तेऽत्र सन्तोऽच्युर्यास्त्वय्यैवास्थापितास्तथा । त्वच्छास्त्राणि तथेह त्वं जाने साक्षादिति स्थितः १ तवार्चा नैष्ठिकैर्जुष्टा धर्मिष्ठाः साधवस्तथा । न गौणश्चागमो धर्मो भवेद्यावदिह प्रभो २ तावद्देवावताराणां कारणं पुरुषोत्तमः । साक्षात्त्वं वर्त्तसे लोके जानामीत्थं दयानिधे' इति ३ ॥ ८ ॥ उपसंहरति । उपवर्णितमिति । हे मुनयः यूयं यत् माम् अपृच्छत तत् एतत् वासुदेवकथोपेतं पुण्यं शृण्वतां वदतां च पुण्यावहं पारीक्षितं परीक्षिन्नृपतिसंबन्धि आख्यानं मया वो युष्मभ्यम् उपवर्णितम् ॥ ९ ॥

यथेयं पारीक्षिती कथा भगवतो गुणकर्माश्रयत्वात्सेव्यासीत्तथा अन्या अपि तादृश्यः कथाः मुमुक्षुभिः सेव्या इति संसूचयंस्तत्पिपृच्छिषामुद्बोधयितुमेव साकल्येन भगवत्कथानां श्रोतव्यतामाह । या या इति । कथनीयानि कथयितुं योग्यानि उरूणि बहुलानि कर्माणि चेष्टितानि यस्य तस्य भगवतः, गुणाः कर्माणि च आश्रयो विषयो यासां ताः । याः याः कथाः स्युः, ताः ताः अस्य वीप्सा यच्छब्देक्षया । बुभूषुभिः सद्भावमिच्छद्भिः मोक्षकामैरित्यर्थः । पुंभिः स्त्रीपुंसैरित्यर्थः । संसेव्याः ॥ १० ॥ यदुक्तं 'उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः । वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम्' । इत्यनेन शुकोपदिष्टैतत्पुराणश्रवणजज्ञानेन नृपो मुक्तो बभूवेति तद्वैयासक्युपदिष्टपुराणश्रवणद्वारा तज्जन्यज्ञानलिप्सुः पृच्छति शौनकः । सूतेत्यादिभिः सप्तभिः । तत्र तावज्जन्ममरणाद्यनन्तदुःखावहदुःसहसंसृतिक्षपणद्वारा निरतिशयानन्दरूपपरब्रह्मप्राप्तिहेतुं तत्कथामृतं पाययन्तं महोपकर्त्तारं सूतमाशिषा योजयन्पुनर्विस्तरेण कथनार्थं सूतोक्तिं सत्सङ्गं चाभिनन्दति त्रिभिः—सूतेति । हे सूत हे सौम्य त्वं शाश्वतीः समाः अनन्तान्वत्सरानित्यर्थः । जीव हि । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । कुत एवमाशासे इत्यत्र तं विशिनष्टि । यः त्वं मर्त्यानां मरणधर्मवतां नोऽस्माकम् अमृतममृततुल्यं कृष्णस्य विशदं विशुद्धं यशः शंससि कीर्त्तयसि । यद्वा । मर्त्यानाम् अमृतं कृष्णस्य विशदं यशः कीर्त्तिं नोऽस्मभ्यं शंससीति योजना । अतो हर्षातिशयादाशासामीति भावः ॥ ११ ॥ तदेव व्यनक्ति । कर्मणीति । अनाश्वासे अविश्वसनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् । अस्मिन् कर्मणि निर्भयत्वानिमित्तभूतायामस्यां सत्रक्रियायामित्यर्थः । निष्ठानामिति शेषः । धूमेन धूम्रो विवर्ण आत्मा शरीरं येषां तेषां केवलकर्मजडानामिति भावः । अज्ञानावृतमनसामिति वा । कर्मणि षष्ठी । इत्थंभूतानस्मानित्यर्थः । भवान् मधु मधुरं गोविन्दस्य पादपद्मयोर्य आसवोऽमृतं तत् आपाययति ॥ १२ ॥ यत एवमत एव स्वर्गमोक्षादयोऽपि न भगवत्सङ्गिसङ्गलेशेनापि तुल्या इत्यभिप्रायेणाह । तुलयामेति । भगवत्सङ्गिनो विष्णुभक्तास्तेषां सङ्गस्तस्य लवेन अत्यल्पककालेन अपि स्वर्गम् अपुनर्भवं च न तुलयाम । यद्वा भगवान् साक्षात्परमेश्वरस्तत्सङ्गिनो ये साधवस्तेषां यः सङ्गः स विद्यते यस्य तस्य लवेन लेशमात्रेणापि सङ्गेन सहेति शेषः । स्वर्गं स्वर्गसुखं न तुलयाम । तुलया तोलिते तत्समं न पश्याम इत्यर्थः । अपुनर्भवं मोक्षमपि न तुलयाम न तुल्यं मन्यामहे इत्यर्थः । भगवान् श्रीकृष्णस्तत्सङ्गी श्रीशुकस्तत्सङ्गवान् सूतस्तस्य भवतः लवमात्रसङ्गेन तुल्यौ स्वर्गमोक्षौ वयं न मन्यामहे इति गूढस्तेषामाशयः । यदा स्वर्गमोक्षौ लवसत्सङ्गिसङ्गतुल्यौ न भवतस्तदा मर्त्यानां मरणधर्मवतां लोकानाम् आशिषो राज्याद्याः किमुत, न तुलयाम इति किं वक्तव्यम् ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु मत्पितुर्नित्यं संश्रुतभगवद्गुणकथोऽपि अश्रुतभगवद्गुणकर्मवत्किं पृच्छसीति चेच्छ्रुतभगवत्कथस्यापि मे न तत्कथायामलंबुद्धिर्जायते इत्याशयवानाह। को नामेति। महत्तमानामेकान्तेन परमयनमाश्रयो यस्तस्य श्रीकृष्णभगवतः। यद्वा। महत्तमानामेकान्तं परमुत्कृष्टमयनं प्राप्यः प्रापक आधारश्च यस्तस्य तत्र ईयते प्राप्यते इत्ययनम् अयति प्रापयतीति अनयः। ईयन्ति प्राप्नुवन्त्यस्मिन्नित्ययनम् इति त्रिधा व्युत्पत्त्यायनशब्दानां तन्त्रेण निर्देशः। कथायां विषयभूतायां रसवित्कथा-रसज्ञश्चेत् को नाम पुमान् तृप्येत् न कोऽपीत्यर्थः। ननु श्रुतानामेव भगवद्गुणकर्मणां पुनः पुनः श्रवणेन को वा रसो निष्पद्यते इत्याशङ्कां निराकुर्वन् भगवन्तं विशिनष्टि। अगुणस्य प्राकृतहेयगुणरहितस्य भगवतः गुणानां कल्याणगुणानाम् अन्तमवधिं भवो रुद्रश्च, पाद्मः पद्मभवश्चतुर्मुखश्च, तौ मुख्यौ येषां ते तथोक्ताः ये योगेश्वराः तेऽपि न जग्मुः। अश्रुतानामपि गुणकर्मणामानन्त्याच्छ्रुतानामपि तेषां नवनवायमानत्वाच्च न कोऽपि तृप्येदिति भावः। 'सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु' इति विष्णुपुराणे। 'योऽसौ निर्गुण इत्युक्तः शास्त्रेषु जगदीश्वरः। प्राकृतैर्हेयसंयुक्तैर्गुणैर्हीनः स उच्यते' इति च पाद्मे। 'मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम्। सुहृदं प्रियमात्मानं साम्याऽसङ्गादयो गुणाः' इत्यत्रैवैकादशे 'न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि। वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः' इति विष्णुधर्मे च। 'गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरीश्वरः' इति ब्रह्मतर्के। ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्द-वाच्यानि विना हेयैर्गुणादिभिः' इति लघुभागवतामृते वैष्णवे। एवं पूर्वश्लोकेन सत्सङ्गमभिनन्द्यानेन स्वश्रवणौत्सुक्यमा-विष्कृतमिति भावः॥ १४॥ ततः किमत आह। तन्नो भवानिति। यतोऽस्माकं भगवत्कथाश्रवणेऽलंबुद्धिर्नास्ति तत्तस्मात्कारणा-दित्यर्थः। हे विद्वन् भगवद्गुणकर्मयाथात्म्याभिज्ञ नोऽस्माकं मध्ये भगवानेव प्रधानं सेव्यो यस्य सः। भगवानेव प्रधानं मुख्यं श्रेयो यस्य स इति वा। भवान् महत्तमैकान्तपरायणस्य हरेः श्रीकृष्णभगवतः शुश्रूषतां श्रोतुमिच्छतां विशुद्धं विशुद्ध्यावह-मित्यर्थः। उदाराचरितमितिविपुलचेष्टितं नोऽस्मभ्यं वितनोतु विस्तरतु। विस्तार्य कथयत्वित्यर्थः॥ १५॥

संप्रति यन्मया पृष्टं तच्च शुकपरीक्षित्संवादेन कथयेत्याह द्वाभ्याम्। स वै इति। स उक्तविधः महाभागवतः अदभ्रबुद्धिः परीक्षित् वैयासकिशब्दितेन व्यासपुत्रशुकोपदिष्टेन येन ज्ञानेन भागवतश्रवणजातेन येन ज्ञानसाधनेनेत्यर्थः। अपवर्गं मोक्षमाख्यातीति तत्, मच्छरणागतानां सद्य एव मोक्षः स्यादिति कथयतीत्यर्थः। अपवर्ग इत्याख्या यस्य तदिति वा। खगेन्द्रध्वजः श्रीकृष्णो भगवांस्तस्य पादमूलं भेजे। वै॥ १६॥ तन्न इति। परं पुण्यं वदतां शृण्वतां च निरतिशयपुण्यावह-मित्यर्थः। यद्वा। परमुत्कृष्टं स्वतुल्याधिकपुराणान्तररहितमिति यावत्। पुण्यं सत्त्वशोधकम्, असंवृता असंकुचिताः स्पष्टा वा अर्थाः मुमुक्षुजनोपादेयशास्त्रार्था यस्मिंस्तत्। यद्वा। असंवृतः स्पष्टः अर्थः पुरुषार्थो यस्मात्तत्, अत्यद्भुता अत्याश्चर्यकारिणी योगनिष्ठा भक्तियोगनिष्ठा यस्मात्तत्। यद्वा। अत्यद्भुतानां योगानां भक्तिज्ञानादिलक्षणानां निष्ठा प्रतिपाद्यतया नितरां स्थितिर्यस्मिंस्तत्तथोक्तम्। यद्वा। अत्यद्भुते योगे ध्याने निष्ठा यस्य तत्, अनन्तस्यापरिच्छिन्नस्वरूपस्वभावस्य भगवत आचरितैश्चेष्टितैः उपपन्नं युक्तम् अत एव भागवतानां भगवद्भक्तानामभिरामममाह्लादकरम्, भागवताः अभिरमन्तेऽस्मिन्निति वा। भागवतशब्दस्यान्यगामित्वव्युदासाय विशिनष्टि। पारीक्षितं परीक्षिता श्रुतम्। अनेनास्य कर्मज्ञानभक्तियोगप्रकाशकत्वं दर्शितम्। तत् आख्यानं श्रीभागवतमिति भावः। नोऽस्मभ्यम् आख्याहि कथय॥ १७॥ इत्थं भगवद्गुणानुवर्णने प्रवर्तितः सूतस्तावदात्मानं कृतार्थं मन्यते। अहो इति। अहो इति स्वभाग्यं शिरःकम्पेनाविष्करोति। किं तद्भाग्यमित्यत्र तदेव दर्शयति। वयं बहुवचनं श्लाघायाम्। विलोमजाता ब्राह्मण्यां क्षत्रियाज्जाताः अपि वृद्धानां ज्ञानेन वयसा जन्मना च, वृद्धानां भागवतानां यानुवृत्तिरादरः सेवा वा तया हेतुभूतया, अद्याधुना जन्मभृतः सफलजन्मानः आस्म भवाम जाता इति यावत्। हेति हर्षे आश्चर्ये वा। विलोमजातानामपि हेत्वन्तरेण प्राशस्त्यमूलको हर्ष आश्चर्यं च युक्तमेवेत्यभिप्रायेणाह। दौष्कुल्यमिति। महत्तमानां भवादृशानामभिधानयोगो लौकिकोऽपि संभाषणलक्षणः संबन्धः दौष्कुल्यं दुष्कुलप्रभवत्वप्रयुक्तं हीनत्वम्, आधिं तन्निमित्तं मनःक्लेशं च शीघ्रमाशु विधुनोति अपनयति॥ १८॥

कुत इति। महत्तमैकान्तपरायणस्य तस्य भगवतः नाम गृणतः कीर्त्तयतः पुंसः कुतः पुनः किं पुनर्वक्तव्यम्। यतो महत्तमानामभिधानयोग एव दौष्कुल्यमाधिं च धुनोति। कुतः पुनः साक्षात्तन्नाम संकथयतः पुंसः तत् द्वयं संभाव्यतेत्यर्थः। ननु को वासौ महत्तमैकान्तपरायणभूतः, के तस्य महिमानः, तन्नामग्रहणमात्रस्यैव कथं दौष्कुल्यादिपरिहारकत्वं कथंतरां तद्भक्ताभिधानयोगस्य तत्त्वमित्यतस्तं विशिंष्यन्नाह। यः भगवान् पूर्णषाड्गुण्यः अनन्ताः शक्तयो यस्य तथाभूतः। पावकस्य दाहकत्वशक्तिवन्नामाभिधातृगतदौष्कुल्याद्यपनोदकशक्तिरित्यर्थः। अनन्तः स्वरूपेणाप्यन्तरहितश्च। यं भगवन्तं महत्सु गुणा यस्य तस्य भावस्तत्त्वं तस्मात् महद्गुणत्वादनन्तगुणत्वाद्वा अनन्तं गुणतोऽप्यन्तवर्जितम् आहुः। 'सत्यं ज्ञानमनन्तम्' इत्यादयो वेदान्तास्तस्य नाम गृणते इति भावः। महच्छब्दस्यात्वाभावश्छान्दसः। अनन्त इत्यनेन नानन्तगुणत्वादित्यनेन च तस्मिन्स्व-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरूपतो गुणतश्चानन्त्यमनन्तपदप्रवृत्तिनिमित्तमिति सूचितम्। अनेन स्वभक्ताभिधानयोगस्य दौष्कुल्याद्यपनोदनोपयुक्तानेकगुणाश्रयत्वं चोक्तम्। गुणानां महत्त्वं नामानन्त्यमनितरसाधारण्यं चानितरसाधारणानवधिकगुणत्वादित्यर्थः ॥ १९ ॥ महद्गुणशब्दाभिप्रेतमेव विशदयंस्तत्संगृह्य दर्शयामीत्यभिप्रायेणाह। एतावतेति। गुणैः न विद्यते साम्यं यस्य सः तैर्न विद्यतेऽतिशायनमतिशयो यस्य सः। असाम्यश्चासावनतिशायनश्च तस्य निःसमाभ्यधिकगुणस्येत्यर्थः। सूचितेन दिङ्मात्रं प्रदर्शितेन एतावता महिम्ना अलं पर्याप्तम्। कस्तद्विस्तरतो वक्तुं शक्नोति। एतावतेति कियता इति चेत् विभूतिर्लक्ष्मीः, प्रार्थयतः प्रार्थयमानान् इतरान्ब्रह्मादीनपि हित्वा कटाक्षवीक्षामप्यकृत्वा अनभीप्सोः स्वात्मरतत्वादनिच्छोरकामयमानस्येत्यर्थः। अपि यस्य भगवतः अङ्घ्रिरेणुं पादपद्मधूलिं जुषते सेवते, इयता श्रियः पतित्वमेव तन्माहात्म्यदर्शनायालमित्यर्थः ॥२०॥

अन्यामपि तन्माहात्म्यदिशं दर्शयामीत्यभिप्रायेणाह। अथापीति। अथापि पुनरपि यस्य भगवतः पादनखो वामपादाङ्गुष्ठनखस्तस्मादवसृष्टमर्वाक् प्रस्रुतं गलितमित्यर्थः। विरिञ्चेन ब्रह्मणा उपहृतं समर्पितम् अर्हणाम्भः अर्घ्यजलं श्रीमत्पादावनेजनोदकमिति यावत्। गङ्गेति प्रसिद्धं जलमित्यर्थः। कहे ईशेन शिवेन सह वर्तमानं जगच्चतुर्दशभुवनात्मकमिन्द्रादिलोकपालाद्यन्तर्गतं विश्वं पुनाति पवित्रयति। विरिञ्चोपहृतं सेशमिति चाभ्यां तयोरपि तदुपासकत्वमुक्तम्। यस्मादेवं तस्मात् लोके भुवने मुकुन्दान्मुक्तिप्रदात् एवंविधमहागुणगणाद्युक्ताच्छ्रीनिवासात्तीर्थपदान्नारायणादित्यर्थः। अन्यतमोऽन्यः। स्वार्थे तमट्प्रत्ययः। कोनाम कोवा भगवत्पदार्थः भगवत्पदाभिधेयः ज्ञानशक्तिबलैश्वर्यतेजःप्रभृत्यसंख्येयकल्याणगुणगणपौष्कल्यवदभिधायकेन भगवच्छब्देन प्रवृत्तिनिमित्तानामाश्रयः पुरुषोत्तमादन्यः को वाभिधीयते न कोऽपीत्यर्थः। एतेन योऽनन्तशक्तिर्भगवानित्यत्र कोऽसौ भगवानित्याकाङ्क्षा शमिता। को नामेत्यनेन निरतिशयज्ञानादिगुणवत्तया भगवानिति नामवाच्य एको लक्ष्मीकान्त एवास्ति तदन्येषां सर्वेषां तदर्वाक्तनत्वाश्च कोऽपि तत्समः। अनेन विरिञ्चिपूज्यत्वशिवशुद्धिकरत्वतीर्थपदत्वभगवन्नामवाच्यत्वाद्वितीयत्वानि तत्सर्वोत्तमत्वसूचकानि ज्ञापितानीति गूढोऽभिप्रायः ॥ २१ ॥ मुकुन्दत्वं विवृणोति। यत्रेति। यत्र यस्मिन्मुकुन्दे भगवति अनुरक्ता अनुरागयुक्ताः सन्तः धीरा जितेन्द्रियाः। सर्वथा निवृत्तविषयवासनाबुद्धय इत्यर्थः। सहसाऽकस्मादेव देहादिषु देहे तदनुबन्ध्यादिषु चेत्यर्थः। ऊढं रूढमूलं सङ्गं स्नेहलक्षणं व्यपोह्य निरस्य यत् अन्त्यं तुरीयं परमकाष्ठापन्नत्वाच्चतुर्थं पारमहंस्यं भागवतपरमहंसाश्रमं व्रजन्ति। यस्मिन्पारमहंस्येऽन्त्याश्रमे अहिंसा कायवाङ्मनोभिः प्राणिद्रोहवर्जनम्। उपशमो बाह्यान्तःकरणदमादिः। स्वधर्मः स्वाभाविकधर्मः अस्ति ॥ २२ ॥ एवं स्वभाग्यमभिनन्द्य अथैवंविधानन्तमाहात्म्यशालिनो भगवतो माहात्म्यं वर्णयितुमहं न प्रभुरस्म्यथापि, यथामति पारीक्षितोपाख्यानव्याजेन वर्णयामीत्यभिप्रायेणाह। अहमिति। हे अर्यमणः ज्ञानाधिकाः। अध्यात्मकसूर्यसमाना इति वा। भगवन्माहात्म्ये सर्वाङ्गैः पृष्टः अहं यावान् यत्प्रमाणः आत्मावगमः मद्बुद्धेः प्रसरः। तावत् आचक्षे। यावान् भगवन्महिमा मद्बुद्धिविषयो भवति तावन्तं महिमानं प्रवक्ष्यामि। नातोऽधिकमित्यर्थः। तथा हि। यथा पतत्त्रिणः पक्षिणो आत्मसमं स्वबलानुरूपमेव नभः प्रति पतन्त्युद्गच्छन्ति। न कृत्स्नम्, तथा विपश्चितो ज्ञानिनः अपि समं स्वबुद्धिबलानुरूपं विष्णुगतिं भगवन्महिमानं पतन्ति विषयीकुर्वन्ति। नभस्युद्गच्छन्तः पतत्त्रिणः नभसोऽभावान्नैव निवर्तन्ते किं तु स्वबलक्षयान्निवर्तन्ते, एवं विपश्चितो मतिक्षयादेव निवर्तन्ते न तु भगवन्महिम्नः क्षयादित्यर्थः। तथा चोक्तमन्यत्रापि। 'इषुक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात्' इति ॥ २३ ॥

अथ तत्पृष्टं भागवताख्यं पुराणं परीक्षिच्छुकसंवादरूपं शुश्रावयिषुस्तावत्संवादप्रभृतिं तदुपोद्घातरूपं परीक्षिच्छुकयोः संगमम्, परीक्षितः प्रायोपवेशम्, तन्मूलं विप्रशापम्, तन्निमित्तं चाह यावत्स्कन्धसमाप्ति। तत्रादौ राज्ञो निर्वेदनिमित्तं ब्राह्मणशापं वक्तुमुपक्रमते। एकदेति। एकदा कदाचित् परीक्षित् धनुः स्वशरासनम् उद्यम्य सज्यं कृत्वोद्धृत्य वने कानने मृगयामाखेटं विचरन् 'आरण्याः पशवो मृगा' इत्युक्तविधमृगशब्दाभिधेयसिंहादीनुद्दिश्य वने संचरन्नित्यर्थः। अत एव मृगान् सिंहान् अन्वनुसृत्य गतः भृशं नितरां तृषितः संजाततृषः क्षुदस्य संजातेति क्षुधितः। तारकादित्वादितच् ॥ २४ ॥ जलाशयमिति। जलाशयं जलाधारं तटाकविशेषमिति यावत्। अचक्षाणोऽपश्यन् सन् तं प्रसिद्धम् आश्रमं प्रविवेश आङ्गिरसशमीकमुनेराश्रमं प्रविष्टवानित्यर्थः। तत्र आसीनं ध्यानमुद्रयोपविष्टं शान्तं प्रसन्नमनसं संप्रज्ञातसमाधिस्थमिति यावत्। मीलिते लोचने येन तं किंचिन्मीलितलोचनद्वयमित्यर्थः। मुनिमाङ्गिरसं ददर्श इति द्वयोरेकसंबन्धः ॥ २५ ॥ प्रतिरुद्धेति। इन्द्रियाणि च, प्राणश्च, मनश्च, बुद्धिश्च, प्रतिरुद्धाः परमात्मन्येव संनिधापिताः इन्द्रियादयो येन तम्। तत्रेन्द्रियरोधो विषयेभ्यः प्रत्याहृत्यात्मसंमुखीनतया तत्स्थापनम्। प्राणरोधः कुम्भके श्वासरोधः, चेष्टानिवृत्तिर्वा। मनोरोधः संकल्पराहित्यम्। बुद्धिरोधस्तस्यास्तत्स्वरूपैकाग्रता। अत एव उपारतं बाह्यव्यापाराद्उपरामं प्राप्तम्। स्थानत्रयाज्जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयात् परं स्वात्मानमित्यर्थः। प्राप्तमनुसंदधतं ब्रह्मभूतं परब्रह्मविषयकभावनयान्वितं निजात्मानं ब्रह्मरूपं विभाव्य तत्र परमात्मस्वरूपं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चिन्तयन्तमिति भावः। अत एव अविक्रियं द्वन्द्वप्रयुक्तविकाररहितम्। निवातस्थदीपोपममित्यर्थः ॥ २६ ॥ विप्रकीर्णाभिर्विक्षिप्ताभिर्जटाभिराच्छन्नमावृतं रौरवेण रुरोर्मृगस्य संबन्धिना अजिनेन चर्मणा संवृतमिति शेषः। तथाभूतमेवंविधं मुनिं विशेषेण शुष्यत्तालु यस्य स नृपः उदकं जलम् अयाचत संप्रार्थितवान् इत्युभयोरेकसंबन्धः ॥ २७ ॥

अलब्धेति। न लब्धं तृणं भूमिश्च आदिशब्दादन्यच्चोपवेशार्थं येन सः। यद्वा। आदिशब्देन मधुपर्कादिकं ग्राह्यम्। न संप्राप्तमर्घ्यं सूनृतं मधुरं वचश्च येन तथोक्तः। 'तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता' इति स्मृतेः। अत एव आत्मानम् अवज्ञातमवहेलितम् इव मन्यमानः राजा चुकोप। क्षुधादिनिमित्तोऽयं कोपो नान्यनिमित्तक इत्यर्थद्योतको हशब्दः ॥ २८ ॥ अभूतपूर्व इति। हे ब्रह्मन् शौनक क्षुद्बुभुक्षा च, तृट् पिपासा च, ताभ्याम् अर्दितः संजातपीड आत्मा शरीरं यस्य तस्य राज्ञः सहसाऽकस्मात् एव पूर्वं भूतो भूतपूर्वः न भूतपूर्वोऽभूतपूर्वः कदाचिदपि पूर्वं न जात इत्यर्थः। मत्सरो द्रोहोऽपचिकीर्षेति यावत्। मन्युः क्रोधः अमर्ष इति यावत्। स च ब्राह्मणं मुनिं प्रति अभूत् ॥ २९ ॥ शापनिमित्तमाह। स इति। ततः स राजा तु विनिर्गच्छंस्तदाश्रमान्निर्गन्तुमुद्युक्तः सन् रुषा हेतुना ब्रह्मर्षेर्ब्रह्मर्षितस्य अंसे स्कन्धे धनुष्कोट्या धनुषोऽग्रभागेन गतासुं प्राणवर्जितं सर्पं निधाय पुरम् आगमत्। अत्र केचिदनर्हतामनादृत्य धनुष्कोट्या गतासुं कृतं सर्पमित्याहुस्तन्न युक्तम्। इत्थंभावस्य राज्ञः अनर्हत्वात् ॥ ३० ॥ किमर्थं मुनेरंसे सर्पं निहितवानित्यत्र राज्ञस्तात्पर्यमाविष्करोति। एष इति। एषः मुनिः निभृतानि नियमितानि अशेषाणि करणानीन्द्रियाणि यस्य सः। मीलिते ईक्षणे लोचने यस्य सः। तथाभूतः किं यथार्थसमाधिनिष्ठोऽयमास्ते किमित्यर्थः। आहोस्वित् क्षत्रबन्धुभिः अस्माकं किं नु स्यात्। किं प्रयोजनं विद्यते इति बुद्धया इत्यर्थः। मृषा मिथ्याभूतः समाधिर्यस्य तथाभूतः आस्ते। अयं सत्समाधिरसत्समाधिर्वेत्यभिप्रायेण निधाय गत इत्यर्थः ॥ ३१ ॥ तस्येति। ततः अर्भकैः स्वसवयोभिरन्यैर्ब्रह्मर्षिबालैः विहरन् कौशिकीनदीजले क्रीडनमाचरन् बालकः सन्नपि अतितेजस्वी प्रशस्तब्रह्मतेजःसंपन्न इत्यर्थः। तस्य ब्रह्मर्षेः पुत्रः शृङ्गीनामकः तातं स्वपितरं राज्ञा परीक्षिन्नृपेण अघं प्रापितमपराधनिमित्तकदुःखविषयीकृतं श्रुत्वाऽन्येभ्य आकर्ण्य तत्र अर्भकमध्ये एव इदं वक्ष्यमाणवाक्यम् अब्रवीत् अतितेजस्वीत्यनेन शापदानसामर्थ्यमस्यास्तीति दर्शितम्। बालक इत्यत्राल्पार्थकप्रत्ययेन वयसा बालो न तु सामर्थ्येनेत्यपि दर्शितम् ॥ ३२ ॥

तदेवाह। अहो इति पञ्चभिः। बलिभुजां काकानाम् इव पीनां पुष्टानां पालानां पृथिव्याः पालकानां राज्ञाम् अधर्मः अन्यायः अद्यास्माभिर्दृष्ट इति शेषः। अहो कष्टम्। तत्कुत इति तत्राह। द्वारपानां शुनां श्वपकानां स्वामिनि गृहपतौ यत् अघं तत् इव दासानां ब्राह्मणानां सहजतयैव दासरूपाणां द्वारपानां तद्गृहद्वाररक्षकानां राज्ञां सम्प्रति स्वामिनि ब्राह्मणे अघं दृष्टम्। यद्वा। बलिभुजां वायसानामिव शुनां श्वपकानामिव पीनामेधितानां द्वारपालानां ब्राह्मणद्वाररक्षकाणां दासानां च पालानां राज्ञां स्वामिनि ब्राह्मणे अघमपराध इति, यदेष एव अहो अधर्म इति योजना ॥ ३३ ॥ एतदेवोपपादयति। ब्राह्मणैरिति। ब्राह्मणैः क्षत्रबन्धुर्हि क्षत्रियस्तु द्वारपालः निरूपितः। श्वा इव द्वाररक्षणार्थत्वेन नियोजितोऽस्तीत्यर्थः। द्वास्थः स क्षत्रबन्धुः तद्गृहे ब्राह्मणगेहे श्वा इव कथं सभाण्डमेकपात्रं यथा तथा भोक्तुम् अर्हति योग्यो भवेत्। स यथा स्वामिना दण्ड्यस्तथाऽयमप्यस्माकं दण्ड्य एवेत्यर्थः ॥ ३४ ॥ कृष्णे इति। उत्पथगामिनामुन्मार्गं प्रतिपन्नानाम्, विहितमार्गं परित्यज्य गच्छतामिति यावत्। शास्तरि दण्डयितरि कृष्णे भगवति गते स्वलोकं प्रयाते सति भिन्नसेतून् विभिन्नमर्यादान् तानुत्पथगामिनः। अहम् अद्य शास्मि शिक्षयामि दण्डयामीत्यर्थः। मे मम बलं पश्यत ॥ ३५ ॥ स च दण्डः कीदृश इत्यत्राह। इतीति। रोषताम्राक्षः क्रोधोदयरक्तनेत्रः शमीकमुनिसुतः शृङ्गी वयस्यान् स्वसवयसः ऋषिबालकान् मुनिसुतान् प्रति इतीत्थम् उक्त्वा कौशिक्या नद्याः अपः, संघिरार्पः। कौशिकीनदीजलानि उपस्पृश्याचम्य केचित्तु कौशिक्यप उपस्पृश्येति पेठुस्तन्मते कौशिकी कुशपाणिः सन् अपः उपस्पृश्येति योजना। वाग्वज्रं शापात्मकवाग्रूपं वज्रं ह स्फुटं यथा तथा विससर्ज। राज्ञे इति शेषः। राजानमुद्दिश्य शापं प्रायुङ्क्तेत्यर्थः ॥ ३६ ॥

वाग्वज्रमेव दर्शयति। इतीति। इतीत्थं लङ्घितातिक्रान्ता मर्यादा येन तं मे मम ततद्रुहं ततस्तातः पिता इति यावत्। तस्याऽपकारिणम्। ततेति ह्रस्वत्वमार्षम्। कुलाङ्गारं कुलनाशकं राजानम् इतोऽस्माद्दिनात् इति शेषः। सप्तमे अहनि चोदितः मया संप्रेरितः तक्षकः एतन्नामा सर्पः दङ्क्ष्यति भक्षयिष्यति। धक्ष्यतीति पाठे भस्मीकरिष्यति ॥ ३७ ॥ तत इति। ततः बालः स ऋषिकुमारः आश्रमं यत्र स्वपितावस्थितो भवति तं निजमाश्रममित्यर्थः। अभ्येत्यागत्य गले सर्पो यस्य तत्कलेवरं यस्य तम्, गले सर्पकलेवरं यस्येति वा। अलुक्समासः। पितरं स्वतातं वीक्ष्यालोक्य दुःखार्त्तः दुःखपीडितः मुक्तः कण्ठो येन सः। उच्चस्वरयुक्तं यथा स्यात्तथेत्यर्थः। ह स्फुटं यथा तथा च रुरोद ॥ ३८ ॥ स वा इति। हे ब्रह्मन् ततः सः वै वैशब्दोऽप्यर्थे। सोऽपीत्यर्थः। आङ्गिरसः अङ्गिरसः कुलोत्पन्नः शमीको मुनिः। सुतविलापनं सुतकृतं विलापं श्रुत्वा शनकैः नेत्रे उन्मील्य स्वांसे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वस्कन्धे मृतोरगं गतासुं सर्पं दृष्ट्वा ॥ ३९ ॥ विसृज्येति । विसृज्य तं परिहृत्य हे वत्स पुत्र कस्मात् विरोदिषि विशेषेण रोदनमाचरसि । ते तव केन अपकृतं प्रतिकृतं वा । भावेक्तः । केन तवापकारः कृत इत्यर्थः । इति पुत्रं पप्रच्छ । इत्युक्तप्रकारेण उक्तः स्वपित्राऽभिहितः स शृङ्गी संन्यवेदयत्सम्यक् सर्वमपि वृत्तान्तं तं प्रति कथयामास । इति द्वयोरेकसंबन्धः ॥ ४० ॥ निशम्येति । ततः तस्य शापस्यार्हो योग्यो न भवतीत्यतदर्हस्तं शापप्रदानानर्हमित्यर्थः । नरेन्द्रं परीक्षिन्नृपं शप्तं प्रति, दत्तशापं निशम्याकर्ण्य सः ब्राह्मणः आङ्गिरसः शमीको मुनिः आत्मजं पुत्रं शृङ्गिनामानं न अभ्यनन्दत् । त्वयेदं साधु कृतमिति नोक्तवान् । प्रत्युतानिन्दश्चेत्याह सार्द्धैः सप्तभिः । बतेति खेदे । हे अज्ञ ते त्वया महत् अंहः पापं कृतम् । अहो नेदमस्माकं युक्तम । यतः अल्पीयसि द्रोहे अल्पापराधे निमित्ते उरुर्महान् दमो दण्डः धृतः कृतः । इत्येतदिति संबन्धः ॥ ४१ ॥

अपकृतैरपि नरैर्नरदेवो नापकार्य इत्याह । न वै इति । हे अविपक्वबुद्धे नृभिः अपकृतैरपि नरैः नरदेवो राजा न वै नैव अपकार्यः । अतः त्वं नरदेवं राजानं पराख्यं परमपुरुषम् अयं सामर्थ्यलभ्योऽर्थः । नरदेवनाम्नि रथाङ्गपाणाविति वक्ष्यमाणानुगुण्यान्नरदेव इत्याख्यामात्रमेव, स तु साक्षादीश्वर एवेति भावः । तं संमातुं संमाननविषयं कर्तुमेव अर्हसि । न त्वपकर्तुम् । तत्र हेतुमाह । यद्यस्मात्तद्विषयानपकाराद्धेतोरेवेत्यर्थः । दुर्विषहेण शत्रुभिरसोढव्येन तस्य तेजसा गुप्ताः प्रजाः अकुतोभयाः कुतश्चिदपि भयरहिताः सत्यः भद्राणि मङ्गलानि सुखानीति यावत् । विन्दन्ति लभन्ते । तस्माल्लोकसुखावहो नरदेवो न हन्तव्य इति भावः । यद्वा हे अविपक्वबुद्धे परो विष्णुरित्याख्या ख्यातिर्यस्य तं नरदेवं नृभिरितरजनैः संमातुं समतया द्रष्टुं न वै नैव अर्हसि । इति पूर्वार्द्धान्वययोजना । उत्तरार्द्धं तथैव ॥ ४२ ॥ विपर्ययेऽनर्थमाह । अलक्ष्यमाण इति त्रिभिः । अङ्ग हे पुत्र नरदेवनाम्नि नरदेवाख्ये रथाङ्गपाणौ चक्रपाणौ विष्णाविति यावत् । अलक्ष्यमाणे अदृश्यमाने अविद्यमाने इति यावत् । पालनमकुर्वाणे सतीत्यर्थः । तदा हि तत्क्षणमेव अयं लोकः अरक्ष्यमाणः अत एव चौरप्रचुरश्चोरभूयिष्ठः सन् अविवरूथवत् वृकप्रचुराविसंघ इव क्षणात् विनङ्क्ष्यति नष्टो भविष्यतीत्यर्थः । यद्वा । अविवरूथवत् रक्षारहितसेनावदित्यर्थः । 'सेनारक्षावरूथः स्यादवरोधो निवेशनम्' इत्यभिधानम् ॥ ४३ ॥ ननु नश्यन्तु का नो हानिरित्यत्राह । तदिति । नष्टो नाथो यस्य लोकस्य तस्य वसोर्वसुनो धनस्य विलुम्पकात् अपहर्तुश्चोरादेर्हेतोः यत्पापं भविष्यति तत्पापम् अनन्वयमसंबन्धं सत । अद्याधुना नोऽस्मान् उपैति उपैष्यतीत्यर्थः । तदेव स्फुटं दर्शयति । पुरुदस्यवश्चोरबहुलाः जनाः परस्परं घ्नन्ति, नाशं कुर्वन्ति, शपन्ति वाक्पारुष्यं कुर्वन्ति, पशून् गवादीन्, स्त्रियोऽङ्गनाः, अर्थान् धनानि, वृञ्जते अपहरन्ति । इत्येतत इति संबन्धः । अयं भावः । रक्षकाभावाल्लोकधनानि यदा चौरा हरिष्यन्ति तदा दरिद्रतां प्राप्ता लोकाः परस्परस्य पशून्हनिष्यन्ति, नारीः शपनपूर्वं धर्षयिष्यन्ति, अर्थान् हरिष्यन्ति, तदा वर्णसंकरतापि भविष्यति । तदा तस्याघस्यास्मन्निमित्तत्वादसंबन्धं तदस्मानेव प्राप्स्यतीति ॥ ४४ ॥

तदेदि । किं च तदा वर्णाश्रमाचारयुतः त्रयीमयो वैदिकः 'तत आगत' इत्यधिकारे 'मयट्च' इति मयट् । नृणाम् आर्याणां शिष्टानां संमतो धर्मः । चोऽप्यर्थे । विलीयते नङ्क्ष्यति । ततः धर्मक्षयाद्धेतोः अर्थश्च, कामश्च, तयोरभिनिवेशितोऽभिनिविष्ट आत्मा मनो येषां तेषां नृणां शुनां श्वपाकानां कपीनां वानराणाम् इव च वर्णसंकरः भविष्यति । अयं भावः । यदोक्तप्रकारेण पशुहन्त्रादिशिक्षाकरो न स्यात्तदा शिष्टसंमते धर्मेऽधिकृतानां वेदप्रतिपादितो धर्मः क्रमेण ह्रासमायायात्, ततः स्रक्चन्दनवनितादिभोगासक्तजनानां शुनां कपीनां यथा तथा भक्षणभोगादावनवस्थानाद्धीनजातीनामुत्तमजातिभिः, उत्तमजातीनां हीनजातिभिर्भोगसंकरतारूपः कलुषीभाव एव भवितेति ॥ ४५ ॥ एवं सामान्येन नरदेवस्याऽनिग्राह्यत्वमुक्त्वाथ प्रकृतं परीक्षितं निर्दिश्याह । धर्मपाल इति । स परीक्षित्संज्ञः नरपतिः तु धर्मपालः वर्णाश्रमधर्ममर्यादापालकः बृहच्छ्रवा विपुलकीर्त्तिः, सम्राट् सार्वभौमः, तत्रापि साक्षान्महाभागवतः, प्रत्यक्षश्रीकृष्णभगवदैकान्तिकोपासकः । अनेन ब्रह्मविदपकर्तॄणां नो गतिरेव सती नास्तीति सूचितम् । राजर्षिः केवलं राजव्याजः ऋषिरेव । हयमेधयाट् योऽश्वमेधेनेष्टवान् । क्षुत्तृड्भ्यां यः श्रमस्तेन युतः अत एव दीनश्च, तथाभूतः सर्वथा अस्मच्छापं नैव अर्हति । अयं भावः । अत्र धर्मपालादीनि विशेषणानि हेतुगर्भाणि, ततः धर्मपालत्वात्, महाभागवतत्वात्, राजर्षित्वात्, सम्राट्त्वात्, नरपतित्वाच्च सर्वथा दोषवर्जितः क्षुत्तृट्श्रमान्वितत्वेन दीनतामापद्यास्मदाश्रममागतोऽर्घ्यादिपूजायोग्योऽयमस्मत्तः शापानर्हस्तस्मै शापदानेनाऽस्मानिवार्यमघमापन्नमिति ॥ ४६ ॥ एवात्मजमनभिनन्द्य तत्कृतादघादात्मनोऽनर्थमाशङ्क्य भगवन्तं क्षमापयति । अपापेष्विति । सर्वात्मा सर्वान्तरात्मा शप्तृशप्तयोरुभयोरप्यन्तरात्मतयाऽवस्थित इत्यर्थः । भगवान् अपापेषु निरपराधेषु स्वभृत्येषु स्वैकान्तिकोपासकभक्तजनेषु अनेन अपक्वबुद्धिना विवेकरहितमतिमता बालेन कृतम् इदं पापं क्षन्तुम् अर्हति ॥ ४७ ॥ साक्षान्मद्विषयापराधः कथंचिन्मच्छरणकरणादिना मया सह्यः स्यान्मद्भक्तविषयापराधस्तु न कथंचिदपि, किं तु तैरेव सह्यते इत्येवंविधं भगवदभिप्रायमाशङ्क्य तानेव क्षमापयति । तिरस्कृता इति । तिरस्कृताः परिभूताः, विप्रलब्धाः प्रतारिताः, क्षिप्ता अवज्ञाताः, हतास्ताडिता अपि तद्भक्ताः भगवद्भक्ताः प्रभवः प्रत्यपकर्तुं समर्थाः सन्तोऽपि अस्य तिरस्कारकर्तुः संबन्धि तत्तत्तिरस्कारा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युद्दिश्य न प्रतिकुर्वन्ति तिरस्कारादिकर्तॄन्प्रति प्रतिक्रियां नैव कुर्वन्ति । किं तु केवलं क्षाम्यन्तीत्यर्थः । हिशब्देन 'क्षमाबलमशक्तानां शक्तानां भूषणं क्षमा' इति प्रसिद्धिं दर्शयति ॥ ४८ ॥ इतीति । इतीत्थं स महामुनिः पुत्रकृताघेन स्वपुत्रकृतभगवद्भक्तापराधेन अनुतप्तः संप्राप्तपश्चात्तापः सन् राज्ञा स्वयं विप्रकृतोऽकृतः संश्चापि तत् राजकृतमघमपराधं नैव अचिन्तयत् । अनुतप्तत्वस्य त्वयं भावः । यदि राज्ञा स्वपुत्रं प्रति शापो दत्तः स्यात्तदा तु तस्य तन्निष्कृतिरूपत्वान्नापराधजन्यं दुःखं भवेद्राज्ञो भगवद्भक्तत्वेन तदसंभवतः संजातपरिताप इति ॥ ४९ ॥ कुतो नाचिन्तयदिति चेत्साधूनामयं स्वभाव एवेत्याह । प्रायश इति । लोके परैरन्यैः द्वन्द्वेषु शीतोष्णसुखदुःखादिषु योजिताः संयोजिताः अपि साधवः प्रायशः प्रायेण न व्यथन्ति न हृष्यन्ति च । यथा सुखे योजिता न हृष्यन्ति, तथा दुःखे योजिताः सन्तोऽपि न व्यथन्तीत्यर्थः । कुतः यतः आत्मा अगुणाश्रयः गुणकार्यरागद्वेषाद्याश्रयो न भवतीत्यर्थः । यद्वा । आत्मा तेषां मनः गुणाश्रयः शुभशीलाश्रयः ॥ ५० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे अष्टादशोऽध्यायः ॥ १८ ॥

——:※:——

अथैकोनविंशोऽध्यायः

सूत उवाच

महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्नात्मकृतं सुदुर्मनाः ।
अहो मया नीचमनार्यवत् कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ १ ॥

प्रायोपविष्टे संप्रोक्तः स्थिते राज्ञि मुनिव्रजैः । वृते शुकागमस्तत्र गङ्गायामूनविंशके ॥ १ ॥

ननु परीक्षितो धर्मपालत्वादिकं न युज्यते नृशंसवन्नीचकर्मकरणात्पश्चात्तापानुदयाच्चेत्याशङ्कापरिहारत्वेनाह । महीपतिरिति । अथ स्वपुरप्रवेशानन्तरं परीक्षित् तु आत्मकृतं मुनेः स्कन्धे मृतसर्पशरीरारोपणलक्षणमात्मनानुष्ठितं यत्कर्म तत् विचिन्तयन्मयेदं गर्ह्यं कृतमिति मुहुःध्यायन् अत एव सुदुर्मनाः सुतरां दुःखितमानसः अभूत् इति शेषः । तदेव दर्शयति । अहो इति सार्द्धद्वयेन । अहो मया अनार्यवन्मूर्खजनवत् निरागसि निरपराधे गूढमनभिव्यक्तं तेजः सामर्थ्यं यस्य तस्मिन् अप्रकाशिततेजोलक्षणमहिम्नीत्यर्थः । ब्रह्मणि ब्राह्मणविषये नीचं पापम् अमीवमिति पाठेऽपि स एवार्थः । निकृष्टं कर्मेत्यर्थः । कृतं महीपतेः कर्मणो गर्ह्यत्वद्योतनाय ब्रह्मणीति । सोऽप्यपराधी चेत्कथंचिद्घटते इत्यतो निरागसीति । प्रतिक्रियासामर्थ्यप्रकटनाय गूढतेजसीति 'ब्रह्म वेदस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः' इति अभिधानाद्ब्रह्मणीत्यस्य ब्राह्मणे इत्यर्थः । 'ब्राह्मणो नावमन्तव्यो निरागास्तु विशेषतः' इति स्मृतेः ॥ १ ॥

तच्च दुष्कृतमपरिहार्यविपत्तिकरमिति चिन्तयतीत्याह । ध्रुवमिति । ततः ब्राह्मणावहेलनरूपात् कृतदेवहेलनान्मयैव विहितादस्माद्भगवद्धेलनरूपात्कर्मणो निमित्तात् न केवलं मया ब्राह्मणोऽवहेलितः, किं तु साक्षाद्देवो भगवानेवेत्यभिप्रायेणैव देवहेलनादित्युक्तम् । मे मम दुरत्ययं निवर्त्तितुमशक्यं व्यसनं दुःखं नातिदीर्घात्कालात् ध्रुवं भविष्यति । तत् अस्तु अचिरादेव भवतु । तत्रापि अद्धा साक्षात् न तु पुत्रादिद्वारेणेति प्रार्थना । तदपि काममसंकोचतः, किमनिष्टं प्रार्थयसे इत्यत्राह । मे मम अघनिष्कृताय पापस्य प्रायश्चित्ताय । ननु कृतप्रायश्चित्तानामपि पुनस्तथाविधे कर्मणि प्रवृत्तिर्दृश्यते अत आह । यथा पुनः एवंविधमघं न कुर्याम्, तथा अस्त्वित्यर्थः । निरङ्कुशतयाहं पुनरेवंविधमघं यथा न कुर्यां तथाविधाघनिष्कृतये भवत्विति भावः ॥ २ ॥ एवं साक्षात्स्वस्यैव व्यसनं संप्रार्थ्य तत्प्रागेव किंचित्प्रार्थयते । अद्येति । प्रकोपितं कोपं प्रापितं यद्ब्रह्मकुलं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्कर्तृको निग्रहात्मकोऽनलोऽग्निः अद्य एव मे मम राज्यं बलं सैन्यं ऋद्धकोशं प्रभूतधनौघं च दहतु। यथा पुनः अभद्रस्य मे मम द्विजाब्ज, देवाश्चः ताभ्यः। द्विजादीन् पीडयितुमित्यर्थः। पापीयसी एवंविधापचिकीर्षायुक्तत्वात्पापरूपा धीर्मतिः न अभूत् मा भूदित्यर्थः। तथाशिक्षार्थं दहत्विति भावः॥ ३॥ स चिन्तयन्निति। इत्थममुना प्रकारेण चिन्तयन् स राजा मुनेः सुतोक्तः मुनिसुतेन कथितः तक्षकाख्यः शापात्मकोक्त्या प्रणोदिततक्षकसर्पदंशरूपः निर्ऋतिः सप्तमेऽहनि संप्राप्यो मृत्युः यथा भविष्यति, तथा अशृणोत्। शमीकसंप्रेरितशिष्यात् शुश्राव। अथ ततः स राजा प्रसक्तस्य विषयेष्वासक्तिं प्राप्तस्य स्वस्य विरक्तिकारणं वैराग्योदयहेतुं तक्षकानलं तक्षकविषाग्निं न चिरेण शीघ्रं यथा स्यात्तथा साधु मेने॥ ४॥ 'स सम्राट् कस्य वा हेतोः' इति शौनकप्रश्नं परिहरति। अथो इति। अथो ततः पुरस्तात् एव हेयतया विमर्शितौ विचारपूर्वकं हेयत्वेन निश्चितौ इमं लोकम् अमुं परलोकं चेत्युभौ लोकौ विहाय, लोक्यते इति लोकः फलं सुखमिति यावत्। ऐहिकामुष्मिकसुखस्पृहां संपरित्यज्येत्यर्थः। कृष्णाङ्घ्रिसेवां स्वदृष्टश्रुतश्रीकृष्णभगवतश्चरणोपासनाम् अधिमन्यमानः निरवधिपुरुषार्थसाधनतयाधिकं मन्यमानः सन् अमर्त्यनद्यां देवानां नदीरूपायां गङ्गायां प्रायमनशनव्रतम् उपाविशत्। अनशनव्रतेन दीक्षितो बभूवेत्यर्थः। यद्वा। प्रायं प्रकृष्टमयनं श्रीकृष्णैकशरणं यथा भवति तथेत्यर्थः॥ ५॥

स्वगृहेऽन्यत्र वा प्रायमनुपविश्य किमिति विशेषेणामर्त्यनद्यामेव तदुपाविशदित्याशङ्कामपनुदन्नमर्त्यनद्यामिति यद्विशिष्योक्तं तस्य फलमाह। या वै इति। या गङ्गा लसन्ती श्रीर्यस्याः सा चासौ तुलसी च तया विमिश्राः संपृक्ता ये कृष्णाङ्घ्रिरेणवः श्रीकृष्णपादरजांसि तैरभ्यधिकं सर्वोत्कृष्टं यदम्बु तस्य नेत्री वाहिनी भवति। या उभयत्र अन्तर्बहिश्च इहामुत्र च वा सेशान् लोकपालैः सहितान् लोकान्सर्वजनान् पुनाति वै। तामेवंविधां नदीं मरिष्यमाणः आसन्नमरणः कः पुमान् न सेवेत। सर्वोऽपि सेवेत इत्यभिप्रायेण तस्यामेव प्रायमुपाविशदित्यर्थः॥ ६॥ इतीति। पाण्डवेयः पाण्डुकुलोत्पन्नः सः परीक्षित् इतीत्थं विष्णुपद्यां गङ्गायां प्रायोपवेशं प्रति व्यवच्छिद्य विनिश्चित्य संकल्प्येति यावत्। मुक्तस्त्यक्तः समस्तेषु देहतदनुबन्ध्यादिषु सङ्गो येन सः। मुनीनां व्रतं यस्य सः। उपशान्त इत्यर्थः। नास्त्यन्यस्मिन् भावो यस्य सः। यद्वा। न विद्यतेऽन्यो भावो भावना चिन्ता यस्य तथाभूतः सन् मुकुन्दाङ्घ्रिं मुक्तिप्रदश्रीकृष्णपादपद्मं दध्यौ ध्यातवान्॥ ७॥ तत्रेति। तदा तत्र राज्ञः संनिधौ महानुभावाः सशिष्याः स्वस्वशिष्यैः सहिताः मुनयः भुवनं लोकं पुनानाः पवित्रीकुर्वन्तः सन्तः उपजग्मुः समायन्। उपजग्मुरित्यनेनैवंभूतनृपतिदर्शनार्थमेवायन्न तु तीर्थस्नानार्थं कृतार्थत्वात्तीर्थपावनत्वाच्चेति संसूचितम्। ननु तादृशानामपि तीर्थयात्रा दृश्यते। तत्राह प्रायेणेति। सन्तस्तथाविधाः साधवः प्रायेण बहुधा तु तीर्थाभिगमो यानं तस्यापदेशा व्याजानि तैः स्वयम् एव तीर्थानि पुनन्ति हि। यथा च ते पुनन्ति तथोपपादितं पुरस्तात् 'तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता' इत्यत्र॥ ८॥ के च ते मुनय इति तान् दर्शयति। अत्रिरिति सार्द्धद्वयेन। अत्रिः, वसिष्ठः, च्यवनः, शरद्वान्, अरिष्टनेमिः, भृगुः, अङ्गिराः पराशरश्च, अथ गाधिसुतो विश्वामित्रः, रामः परशुरामः, उतथ्यः, इन्द्रप्रमदश्चेध्मवाहश्च तौ, इन्द्रप्रमदः, इध्मवाहः इत्युभौ॥ ९॥

मेधातिथिरिति। मेधातिथिः, देवलः, आर्ष्टिषेणः, भारद्वाजः, गौतमः, पिप्पलादः, मैत्रेयः, और्वः, कवषः, कुम्भयोनिरगस्त्यः, द्वैपायनो व्यासः, नारदश्च। भगवान् इति द्वैपायननारदाभ्यां संबध्यते॥ १०॥ अन्ये चेति। अन्ये चान्येऽपि। देवर्षिवर्याः पर्वतादयश्च, ब्रह्मर्षिवर्याः जमदग्न्यादयश्च, राजर्षिवर्या अम्बरीषादयश्च, ते। अरुणादयः काण्डर्षेयाश्च। तत्राजग्मुरिति संबन्धः। राजा परीक्षित् नानार्षेयप्रवरान् नाना नानाविधानि यान्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् श्रेष्ठान् समेतान्समुपागतान्संधीभूयाभ्यागतानित्यर्थः। तान्मुनीन् अभ्यर्च्य अर्घ्यपाद्यार्पणादिभिः संमान्य शिरसा ववन्दे। तच्चरणाब्जयोः स्वशिरो निधाय ननामेत्यर्थः॥ ११॥ सुखेति। अथ तेषु सर्वेषु मुनिषु सुखोपविष्टेषु सुखं यथा तथा कृतोपवेशनेषु सत्स्वित्यर्थः। भूयः पुनरपि कृतो विहितः प्रणामो येन सः, अग्रे उपस्थितस्तेषां समीपे तिष्ठन्, अभिगृहीतपाणिः बद्धाञ्जलिः, विविक्तं विवेकयुक्तं चेतो यस्य सः परीक्षित्, यत् स्वचिकीर्षितं तत् विज्ञापयामास॥ १२॥ अनुमोदनेनानुग्रहमालक्ष्यात्मानं श्लाघयंस्तदेवाह। अहो इति चतुर्भिः। महत्तमैर्महापुरुषैर्भवद्भिरनुग्रहणीयमनुग्रहीतुं शीलं वृत्तं येषां ते। यद्वा। महत्तमानुग्रहणायं महत्तमानुग्रहलभ्यं शीलं येषां ते तथोक्ताः। वयं नृपाणां राज्ञां मध्ये धन्यतमाः अहो। अस्मद्भागधेयम् अनेवंभूतं राजकुलं निन्दति। राज्ञामिति। ब्राह्मणानां भवतां पादाशौचात्पादसेवामूलकविशुद्धेः दूरात् विसृष्टं त्यक्तं यत्, राज्ञां कुलं तत्, गर्ह्यं निन्द्यं कर्म यस्य तथाभूतं भवति। बतेति खेदे। यद्वा ब्राह्मणानां पादाशौचात्पादक्षालनोदकात् दूरादेव विसृष्टं क्षिप्तं दूरे हि पादोदकं तैर्विसृज्यते। 'दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत' इति स्मृतेः। तत्रापि स्थातुमयोग्यमित्यर्थः। कुतः राज्ञां कुलं बतेति खेदे। गर्ह्यं कर्म यस्य तदित्यात्मानमुद्दिश्योक्तम्॥ १३॥

ननु महत्तमानुग्रहणीयशीले त्वयि कथमधुना तत्कृतनिग्रहप्रवृत्तिरिति चेन्नायं तत्कृतो निग्रहः शापरूपोऽपि सोऽनुग्रह एवास्ति, यतः भगवत्प्रसादादेव जातत्वादित्याह। तस्येति। अभीक्ष्णं पुनः पुनः गृहेषु व्यासक्तं चित्तं यस्य तस्य। तस्य एव मे मम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अघस्य प्रकृतब्रह्मविदपचाररूपपापस्य परिहारकः इति शेषः। निर्वेदमूलः देहतदनुबन्ध्यादिषु विरक्तिहेतुः द्विजशापरूपः परावरेशः भगवानेव प्रसक्तः मामनुग्रहीतुं प्रवृत्तः। भगवत्संकल्प एव हि द्विजशापव्याजेन प्रवृत्त इत्यर्थः। कथं तस्यानुग्रहरूपत्व-मित्यत्राह। यत्र यस्मिन्मयि प्रसक्तः द्विजशापरूपः परावरेशः आशु अभयं धत्ते आदधाति ब्रह्मविदपचारपरिहारहेतुत्वान्निर्वेद-मूलत्वात्सत्सङ्गद्वारा मुक्त्याधायकत्वाच्चानुग्रहरूप एवेत्यर्थः ॥ १४ ॥ अस्त्वेवं प्रकृतं किमित्यत्राह। तमिति। हे विप्राः। भवन्तः देवी इयं गङ्गा च ईशे भगवति धृतं चित्तं येन तथाभूतं तमुक्तविधं मा माम् उपयातम् अनुवर्त्तिनं शरणागतं वा प्रतियन्तु जानन्तु। द्विजोपसृष्टः ब्राह्मणेन प्रणोदितः तक्षकः कुहकः कपटधृतनैकविधवेषवान्सन्साक्षाद्वा अलं नितरां दशतु। नाहं बिभेमीति भावः। किं तु यूयं विष्णुगाथाः नानाविधदिव्यमानुषचरित्रोपेता मदिष्टदेवश्रीकृष्णकथाः गायत कथयत। अलमित्यस्य गायतेत्य-नेन वान्वयः ॥ १५ ॥ पुनश्चेति। पुनश्च किं च मम भगवति अनन्ते रतिर्भक्तिः तदाश्रयेषु भगवद्भक्तेषु प्रसङ्गश्च भूयात्। एवमनुगृह्णतेति भावः। किं च यां यां सृष्टिं यद्यज्जन्मेत्यर्थः। उपयामि प्राप्नोमि तत्र सर्वत्र जन्मनि महत्सु भवादृशेषु मैत्री अस्म-दीयोऽयमिति चित्तवृत्तिलक्षणा मित्रता भगवदनुकूलतेत्यर्थः। अस्तु। द्विजेभ्यः वो युष्मभ्यं नमः ॥ १६ ॥ इतीति। इतीत्थम् अध्यवसाययुक्तः निश्चययुक्तः धीरः धृतिमान् राजा परीक्षित्, स्वसुते जनमेजये न्यस्तो निहितो भारो राज्यभरो येन सः, उदङ्मुख उत्तरदिगभिमुखास्यः सन् समुद्रपत्न्या गङ्गाया दक्षिणकूले दक्षिणतीरे प्राचीनकूलेषु प्राचीनाग्रेषु, अत्र प्राचीनमूलेष्वि-त्यपपाठः। कूलशब्दस्याग्रवाचकत्वं वेदे प्रसिद्धम्। तथा चाश्वलायनगृह्यम्। 'अप आप्लुत्य शुचौ देशे यज्ञोपवीत्याचम्याक्लिन्न-वासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मुख उपविश्य' इति 'प्राक्कूले बर्हिष्यासीनो गङ्गाकूल उदङ्मुख, इति च द्वादशस्कन्धे वक्ष्यति। अष्टमे च। 'प्राक्कूलेषूपविष्टेषु सुरेषु दितिजेषु च' इति। कुशेषु दर्भेषु आस्ते स्म। उपविष्टवान् ॥ १७ ॥

एवमिति। किं च एवमित्थं तस्मिन् नरदेवदेवे परीक्षिति प्रायोपविष्टेऽनशनव्रतमुपादाय स्थितवति सति, दिवि आकाशे देवसंघाः देवानां समूहाः तं राजानं प्रशस्य प्रस्तूय मुदा प्रसूनैः कुसुमैः मुहुः पुनः पुनः भूमौ व्यकिरन् वर्षितवन्तः। दुन्दुभयश्च नेदुर्दध्वनुरेव ॥ १८ ॥ महर्षय इति। ततः ये महर्षयः समुपागताः ते सर्वे उत्तमैः श्लोक्याः प्रशंसनीया ये गुणास्तैर-भिरूपोऽनुरूपस्तं राजानं प्रशस्य साधु साध्विति अनुमोदमानाः सन्त ऊचुः। कुतः यद्यतः ते प्रजास्वनुग्रह एव शीलं स्वभावः स एव सारो येषां ते तथाभूताः भवन्तीति शेषः। वै महर्षीणामेवंभूतत्वात्प्रशंसानुमादमाना ऊचुरित्यर्थः ॥ १९ ॥ उक्तिमेवाह। न वा इति। हे राजर्षिवर्य नित्यं कृष्णं वसुदेवनन्दनं साक्षाच्छ्रीकृष्णं समनुव्रतेषु अनुवर्त्तमानेषु भवत्सु इदं चित्रं न वै, न भवति हि। किं तत्, ये भगवतः श्रीकृष्णस्य पार्श्वं सामीप्यं कामयन्ते समभिलषन्ति तच्छीलाः सन्तः राज्ञां किरीटैर्जुष्टं सेवितम् अध्यासनं सार्वभौमसिंहासनं सद्यः श्रीकृष्णस्वधामगमनश्रवणसमकालमेव जहुस्तत्यजुरित्येतदिति संबन्धः। एतद्युधिष्ठिराद्यभिप्रायेणोक्तं बोध्यम् ॥ २० ॥ एवं राजानमुक्त्वा ततो मिथ आहुः। सर्वे इति। भागवता भगवद्भक्ता एव प्रधाना नितरां सेव्या यस्य सः अयं राजा कलेवरं स्वदेहं विहाय त्यक्त्वा विरजस्कं शुद्धसत्त्वमयं विशोकं नित्यनिर्दुःखं परं त्रिगुणातीतं लोकं नित्यविभूत्यपरसंज्ञं गोलोकं यावद्यावता कालेन यास्यति। तावत्तावत्कालपर्यन्तं सर्वे वयम् अद्य इह राज्ञः संनिधावेव आस्महे आसीमहि ॥ २१ ॥ आश्रुत्येति। समं वैषम्यरहितं मधुच्युत् मधुरामृतस्रावि गुरु गम्भीरार्थम् अव्यलीकं निष्कपटं च तत् ऋषिगणवचः मुनीनां वचनम् आश्रुत्याकर्ण्य युक्त आत्महिताचरणोद्युक्तः परीक्षित् एतानृषीन् अभिवन्द्य प्रणम्य विष्णोः सर्वान्तरात्मनः श्रीकृष्णस्य चरितानि चरित्राणि शुश्रूषमाणः सन् अभाषत पुनस्तान्प्रत्युवाच ॥ २२ ॥

तदेवाह। समागता इति। त्रयाणां लोकानां पृष्ठमुपरिभागस्तस्मिन्। सत्यलोके इत्यर्थः। मूर्त्तिधरा मूर्त्तिमत्तया विद्यमानाः वेदा ऋगादयश्चत्वारोऽपि निगमाः यथा तद्वद्ब्रह्मसमानाः यूयं सर्वे सर्वतः सर्वाभ्यो दिग्भ्य एव समागताः मदनुग्रहार्थमिह समायाता इति भावः। समागतानां वः परानुग्रहम् आत्मशीलम् ऋते विना इहास्मिन् लोके अमुत्र परलोके च कश्चन कश्चिदपि अर्थः प्रयोजनं न अस्ति। परेषु मादृशेषु अनुग्रहविधापनात्मकात्मशीलं विनान्यथागमनकारणं नास्ति हीत्यर्थः ॥ २३ ॥ तत इति। हे विप्राः यतो भवदागमनमस्मदनुग्रहैकप्रयोजनं ततो हेतोः वो युष्मान् विश्रम्य विश्वस्य इतिकृत्यतायाम् एवं कर्त्तव्यमित्यस्य भाव इतिकृत्यता तस्याम् इत्थंकर्त्तव्यतायामित्यर्थः। इमं पृच्छ्यं प्रष्टव्यं प्रश्नमिति यावत्। विपृच्छे। कर्त्तव्यज्ञानार्थं प्रष्टव्यार्थं भवद्भ्यः पृच्छामीत्यर्थः। पृच्छामेव संप्रदर्शयंस्तां सम्यक् निर्णीयतेत्याह। म्रियमाणैर्मु-मूर्षुभिर्जनैः सर्वात्मना सर्वप्रकारेण सर्वास्ववस्थास्वपि यन् कृत्यं कर्त्तव्यं शुद्धं पापकर्मसंपर्करहितं तथा संसृत्यनिमित्तं च यत् कर्म तत्र अभियुक्तास्तद्विमर्शनाभिमुख्ययुक्ताः सन्तः यूयम् आमृशत विमृश्य विमृश्य तदुपदिश्यत। हे अभियुक्ताः एकमतय इति वा ॥ २४ ॥ तत्रेति। तेषु यागयोगतपोदानादिभिर्विवदमानेषु सत्सु तत्रैव पृच्छतो राज्ञः संनिधौ भगवान् भगवदनुग्रहादलौकिकैश्वर्यसंपन्नः व्यासपुत्रः श्रीशुकः अभवदागत्य तस्थौ। कथंभूतः यदृच्छया गां भूमिम् अटमानः। अनपेक्षः कृत्यापेक्षारहितः निजलाभतुष्टः। ब्रह्मात्मकस्वात्मानुभवेनैव संतोषं प्राप्तः। अलक्ष्यम् ऋषिभिरपि इत्थंभावेन ज्ञातुम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शक्यं लिङ्गं स्वरूपं यस्य सः, मुनीनामप्यनाकलनीयाश्रमादिलिङ्ग इत्यर्थः। अवधूतः अवज्ञाय जनैस्त्यक्तो यस्तस्येव वेषो यस्य तथाभूतः अत एव। स्त्रियश्च, बालाश्च, तैः स्त्रिबालैः स्त्रिशब्दस्य ह्रस्वत्वं छान्दसम्। वृतः परिवृतश्च ॥ २५ ॥

तमिति। तमित्यादीनां प्रत्युत्थिता इति तृतीयश्लोकेनान्वयः। तं तत्र समायातं द्विगुणान्यष्टौ वर्षाणि यस्य तम्। षोडशवर्षवयस्कमिव वर्त्तमानमित्यर्थः। पादौ च, करौ च, ऊरू च, बाहू च, अंसौ च, कपोलौ च, गात्रं च, सुकुमारं पादादि यस्य तम्। चारुणी सुन्दरे आयते विशाले च अक्षिणी यस्मिन्, उदुन्नता नासा नासिका यस्मिन्, तुल्यो लम्बह्रस्वादि-वैषम्यं विना समौ कर्णौ यस्मिन्, शोभने भ्रुवौ यस्मिन्, ततः सर्वेषां कर्मधारयः। तदेवंभूतमाननं यस्य तम्। कम्बुवच्छङ्ख-वद्वर्त्तुलो रेखात्रयोपेतश्च सुजातः सुन्दरः कण्ठो यस्य तम् ॥ २६ ॥ निगूढेति। कण्ठस्याधोभागयोः स्थिते अस्थिनी जत्रुणी निगूढे संपूर्णमांससत्त्वेनाप्रकाशे जत्रुणी यस्य, तं पृथु विशालं तुङ्गमुन्नतं वक्षो यस्य तम्, आवर्त्तवद्वर्त्तुला विविक्तरन्ध्रयुक्ता च नाभिस्तुन्दकूपिका यस्य तम्, वलिभिस्त्रिर्यैकृनिम्नत्रिसंख्याकाभिः वल्गु रम्यम् उदरं यस्य तम्, दिश एव अम्बरं यस्य तम्, चीवरधरत्वेन प्रशस्ताम्बररहितमित्यर्थः। उपरि वाससा रहितं वा। अन्यथा मोक्षधर्मादिषूक्तप्रकारविरोधः। वक्रा विकीर्णाश्च केशा यस्य तम्, प्रलम्बाजानुलम्बौ बाहू यस्य तम्, स्वमरोत्तमस्यामरश्रेष्ठस्येवाभा यस्य तम् ॥ २७ ॥ श्याममिति। श्यामं श्यामलाङ्गम्, सदा अपीच्यं कमनीयं वयो यस्मिंस्तस्याङ्गस्य शरीरस्य लक्ष्म्या कान्त्या रुचिरस्मितेन सुन्दरमन्दहासेन च स्त्रीणां मनोज्ञं स्पृहणीयम्, गूढं मषीसंवृतमणिवत्तिरोहितं वर्चो यस्य तथाभूतमपि तल्लक्षणज्ञाः शुकस्य चिह्नाभिज्ञाः ते मुनयः स्वासनेभ्यः प्रत्युत्थिताः बभूवुः ॥ २८ ॥ स इति। अथ विष्णुरातो गर्भे श्रीकृष्णेन कृतरक्षणः स परीक्षित् आगताय यदृच्छयोपयाताय अतिथये तस्मै शुकाय शिरसा नम्रेणेति शेषः। सपर्यां पूजां जहार चकार। शिरसा प्रणामविधानपूर्वकं पूजां चक्रे इत्यर्थः। 'अनेन कथमालक्षितः पौरैः'। 'कथं वा पाण्डवेयस्य' इति प्रश्नः परिहृत इति बोध्यम्। ततस्तदनन्तरं तमनुसृत्यागताः अबुधाः अज्ञाः अर्भका बालाः स्त्रियश्च निवृत्ताः। सर्वमुनिकृतसंभावनेक्षणेन लज्जाप्त्या प्रतिनिवृत्ता बभूवुः। ततः पूजितः नृपतिना कृतसमर्हणः स शुकः महासने राज्ञा समर्पिते महत्यासने उपविवेश, स उपविवेशेत्यत्र 'सोऽचिलोपे चेत्' इत्यनेन पादपूरणे सति सोर्लोपस्य विहितत्वात्संधिः सुगमः ॥ २९ ॥ स इति। तत्रासने उपविष्ट इति शेषः। महीयसाम् अपि महान्माहात्म्ययुक्तः भगवान् स शुकः ब्रह्मर्षयश्च, राजर्षयश्च, देवर्षयश्च तेषां संघातैः संवृतः सन् अलमतिशयेन व्यरोचत। कथमिव ग्रहाः शुक्रादयश्च, ऋक्षाण्यश्विन्यादीनि च, तारास्तदुभयेतराश्च, तेषां निकराः समूहास्तैः परीतः परिवृतः इन्दुः चन्द्रः यथा तथा व्यरोचत ॥ ३० ॥ प्रशान्तमिति। प्रशान्तं सात्त्विकवेषम्, आसीनं राजदत्तासने ध्यानमुद्रयावस्थितम्, अकुण्ठा आवरणरहिता मेधा धीर्यस्य तं मुनिं श्रीशुकं भागवतो भगवद्भक्तः नृपः परीक्षित् अभ्युपेत्य प्रश्नविधानाय समीप-मागत्य मूर्ध्ना प्रणम्य, उपागमनस्य नमस्कारोत्तरत्वादादौ नमस्कृत्य, नत्वा प्रश्नविधानस्य नमस्करणपूर्वत्वात्पुनर्नमस्कृत्य, बद्धाञ्जलिः प्रश्नविधावुचितत्वात्कृतकरसंपुटः। अवहितः श्रवणोपयुक्तावधानतायुक्तः सन् सुनृतया गिरा प्रियवचनेन अन्वपृच्छत् ॥ ३१ ॥ तदेवाह। अहो इति यावत्समाप्ति, तावत्समागमनेनात्मनः कृतार्थतामाविष्करोति। अहो इति। हे ब्रह्मन् क्षत्रबन्धवः अपि वयम्, सन्तः सेव्या येषां तथाभूताः अद्य अभूम। अहो अत्याश्चर्यमिदम्। राज्यमदान्धानां सत्सेवनप्रवृत्त्यदर्शनादिति भावः। यद्वा। सतां वः सेव्या अनुग्राह्या अभूम। तत्र हेतुमाह। कृपया निष्कारणकरुणया भवद्भिः अतिथिरूपेणातिथिभवनव्याजेन वयं तीर्थकाः कृताः पवित्रीकृताः योग्याः इति वा ॥ ३२ ॥

कथमतिथिरूपेणास्मदागमनेन यूयं तीर्थीभूता इत्यत्र तत्कैमुत्यन्यायेन दर्शयति। येषामिति। येषां भवतां संस्मरणात् एव सद्यः पुंसां स्मर्तृणां गृहाः शुध्यन्ति वै। तदा भवतां दर्शनं च, स्पर्शनं च, पादशौचं चरणक्षालनोदकं च, आसनमुपवेशनं च, तान्यादयो येषां तैः शुध्यन्तीति किं पुनः वक्तव्यम् ॥ ३३ ॥ भवत्संगत्या विशेषोऽप्यस्तीत्याह। सांनिध्यादिति। यत एवम् अतो हेतोः हे महायोगिन् ते तव सांनिध्यादेव हेतोः पुंसां मादृशानां जनानां महान्ति अपि सर्वाणि पातकानि विष्णोः सांनिध्यात् सुरेतरा असुरादयः इव सद्यस्तत्क्षणमेव नश्यन्ति वै। अनेन ब्रह्महत्यादिपापपरिहारोऽपि भवतीत्युक्तं भवति। तत्र भवदाश्रयमात्रतः पूर्वतनानि तानि भस्मीभवन्ति पश्चात्तनानि न श्लिष्यन्तीति शास्त्रनिश्चितम्, वैशब्देनोक्तम्। न केवलमस्मत्पापहानिरेव किं तु अस्मत्संगतानामपीति सूचितम् ॥ ३४ ॥ किं च भवद्दर्शनादिकं भगवतः श्रीकृष्णस्यानुग्रह-कारितमन्यथा कथं दुर्लभं तदस्मभ्यं स्यादित्याह द्वाभ्याम्। तावत्तदनुग्रहस्त्वस्माकं सुलभ इति संभावयामीत्यभिप्रायेणाह। अपीति। अपिशब्दः संभावनाद्योतकः। मे मम भगवान् कृष्णः प्रीतः प्रसन्नः स्यात्। तत्र हेतुं वदंस्तं विशिनष्टि। पाण्डुसुताः प्रिया यस्य सः पाण्डुसुतानां वा प्रियः। भगवान् पाण्डुसुतप्रियः अस्तु। त्वत्प्रियस्तु कथमित्यत्रोभयत्रानुगतिं हेतुं वदन्विशिनष्टि। पिता श्रीकृष्णस्य तातो वसुदेवस्य स्वसा भगिनी पितृष्वसा कुन्ती, तस्या अपत्यानि पुत्राः पैतृष्वस्रेयाः युधिष्ठिराद-यस्तेषां प्रीतये इति प्रीत्यर्थं तान्प्रीणयितुमित्यर्थः। तद्गोत्रस्य पैतृष्वस्रेयसंतानस्य आप्तबान्धवः हितकृतबन्धुः जातः। प्रथमं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पितृष्वसुः प्रियः, तत्प्रियत्यर्थं तत्पुत्रेषु प्रियः, पुनस्तत्प्रीत्यर्थं तत्पुत्रादिष्वित्येवं यावत्तत्संतानप्रिय इत्यर्थः। पाठान्तरे आत्तं स्वीकृतं बान्धवं बन्धुकृत्यं येन सः। इष्टबान्धव इत्यर्थः। भगवत्प्रसादेन त्वद्दर्शनं जातम्, तत्प्रसादस्तु तत्पितृष्वसुः संतान-प्रभावत्वादिति भावः ॥ ३५ ॥

अन्यथेति। अन्यथा भगवतः प्रीत्यभावे श्रीकृष्णप्रसादं विनेत्यर्थः। अव्यक्ता गतिर्यस्य सः सांसारिकैरलक्ष्यगतेरित्यर्थः। वनमस्यास्तीति वनो वनवासी प्रकृतऋषिसंघापेक्षया अतिशयेन वनीति वनीयांस्तस्य वनीयसः। संसिद्धस्य कृतकृत्यस्य ते तव दर्शनं नृणां संसारिणां तत्रापि नितरां म्रियमाणानां नोऽस्माकं कथं स्यात् ॥ ३६ ॥ अत इति। यतो दुर्लभमपि त्वद्दर्शनमभूत्, अतः योगिनामपि परमं गुरुं त्वां संसिद्धिं पृच्छामि। संसिद्धिशब्दो मुक्तिसाधने उपचरितः। मुक्तिसाधनं पृच्छामीत्यर्थः। तदेव विशदयति। इह लोके पुरुषस्य मुमुक्षोः पुंसः तत्रापि म्रियमाणस्य सर्वथा यत् कार्यं कर्त्तव्यं मुक्तिसाधनतयेति शेषः। तत् पृच्छामि तद्ब्रूहीत्युत्तरेणान्वयः ॥ ३७ ॥ कर्त्तव्यमेव विभज्य पृच्छन् तद्विपर्ययमकर्त्तव्यमपि ब्रूहीत्याह। यदिति। हे प्रभो नृभिर्मुमुक्षुभिस्तत्रापि मुमूर्षुभिः। यत् श्रोतव्यम्, यज्जाप्यम्, यत्कर्त्तव्यम्, यत्स्मर्त्तव्यम्, अथो अपि च यच्च भजनीयमाराध्यं वा तत् ब्रूहि। यद्वा। यच्च विपर्ययमश्रोतव्यादि च तत्सर्वं ब्रूहि ॥ ३८ ॥ एतत्पृष्टं प्रति वदताऽनियतावस्थानेनापि त्वया यावन्मत्तनुत्यागमत्रावस्थातव्यमित्यभिप्रायेण तदवस्थानमनियतत्वेन स्तौति। नूनमिति। हे ब्रह्मन् गृहमेधिनां गृहाश्रमिणां गृहेषु भगवतस्तव अवस्थानं क्वचिदपि गोदोहनमपि गौर्दुह्यते यावताकालेन तावान् कालो गोदोहनशब्देनात्र विवक्षितस्ता-वत्कालमपि न लक्ष्यते नूनं हि। अवधारणार्थाव्ययद्वयमुक्तार्थान्वर्थताद्योतनाय ॥ ३९ ॥ एवमिति। एवमित्थं राज्ञा आभाषितः 'अहो अद्य वयं ब्रह्मन्' इत्यादिनाऽभिमुखीकृतः पृष्टः 'अतः पृच्छामि संसिद्धिम्, इत्यादिना संपृष्टश्च भगवान् भगवतैश्वर्योपेतः धर्मज्ञः मुमुक्षूणां मुमूर्षूणां कर्त्तव्यधर्मयाथात्म्याभिज्ञः बादरायणिः स श्रीशुकः श्लक्ष्णया विशुद्धया समृद्धया वा गिरा वाण्या प्रत्यभाषत। प्रश्नानामुत्तराण्युवाचेत्यर्थः ॥ ४० ॥

एषा व्याख्यार्पिता कृत्वा श्रीहरेश्चरणाम्बुजे। सतां प्रित्यै यथाबुद्धि प्रथमस्कन्धसंगता ॥ १ ॥
कृत्वा धर्मसुतं हतारिमवनावादौ परीक्षिन्नृपं द्रौण्यस्त्रादभिरक्ष्य तिष्यजयिनं भूमौ विधायाथ तम्।
तस्यान्तावसरे शुकर्षिमिषतो ज्ञानं प्रदाय स्वकं तद्रक्षामकरोन्नमामि तमहं शापान्मुनेः श्रीहरिम् ॥ २ ॥
यन्नामकीर्त्तनमघौघहमस्तिलोके यद्दानयोगतपसामपि सत्फलं च।
तं नित्यसिद्धपरदिव्यगुणैकपात्रं धर्मात्मजं हृदि दधे भगवत्प्रसादः ॥ ३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां प्रथमस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

इति भक्तरञ्जनीटीकासहितः श्रीमद्भागवतप्रथमस्कन्धः समाप्तः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वितीयः स्कन्धः

अथ प्रथमोऽध्यायः

श्रीशुक उवाच

वरीयानेष ते प्रश्नः कृतो लोकहितो नृप । आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥

॥ श्रीस्वामिनारायणाय नमः ॥

आत्मात्मनां श्रुतिशिरोगदितानुभावो नारायणः परमपूरुष आत्मतन्त्रः । नृत्वेऽपि यः स्वपरभावयुतश्च भक्तिधर्मात्मजस्तमनिशं हृदये दधामि ॥ १ ॥
यः स्वीयसूनुतनयं निजसत्पदे मामस्थापयन्निजसुतात्मतया दयालुः । स्वामीति यो जगति संप्रथितो मनीषां मय्येष ईरयतु वै भगवत्प्रसादे ॥ २ ॥

वर्ण्यतेऽथ दशाध्यायैरादौ भागवतं त्विह । नामोक्तिलक्षणोक्तिभ्यां द्वितीये तु समासतः ॥ ३ ॥
पूर्वमुक्तः सप्रसङ्ग उपोद्घातः शुकागमः । पृष्टं कृत्यं नृणां राज्ञा शुकः प्राह हरिं स्मरन् ॥ ४ ॥

वेदान्तोपबृंहणपरेऽस्मिन् पुराणे उपोद्घातरूपप्रथमस्कन्धान्ते प्रसङ्गाच्छुकागम उक्तः । स शुकः श्रोतव्याद्यर्थान् मनस्यनुसंधाय राज्ञा श्रोतव्यादीन् प्रति पृष्टः सन्निदानीं राज्ञः प्रश्नमभिनन्दति । वरीयानिति । हे नृप ते त्वया यः प्रश्नः कृतः 'यच्छ्रोतव्यमथो जाप्यम्' इत्यादिना त्वया योऽनुयोगो विहित इत्यर्थः । सः एषः प्रश्नः वरीयान् श्रेष्ठः सर्वोत्तमत्वादतिशयेनाङ्गीकार्य इत्यर्थः । अत एव लोकानां हितं श्रेयो यस्मात्तथाभूतः । पुंसां श्रोतव्यादिषु श्रोतव्यमन्तव्यानिदिध्यासितव्यार्थेषु परः । श्रोतव्याद्यर्थतत्त्वविषय इत्यर्थः । कुतः । यतः । आत्मवित्संमतः आत्मविद्भिर्मुक्तैरपि संस्तुतः । पाठान्तरे क्रियाविशेषणम् । यथा लोकस्य हितं भवति तथा कृत इत्यर्थः । न केवलं तवैव हितकरोऽयं किंतु सर्वस्येत्युक्तमनेन ॥ १ ॥ तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन् ब्रूहि । यद्वा । विपर्ययमित्यस्योत्तरमाह । श्रोतव्यादीनीति त्रिभिः । हे राजेन्द्र गृहेषु सक्तानामिति शेषः । अत एव गृहमेधिनां गृहाश्रमगतपञ्चसूनापराणाम् । मेधतिरत्र हिंसार्थः । अत एव आत्मतत्त्वमात्मयाथात्म्यम् । अपश्यतामजानताम् । नृणां श्रोतव्यादीनि सहस्रशोऽसंख्यातानि सन्ति । मुमुक्षोस्तु ब्राह्माद्यनेकसंज्ञाभिहतः परमात्मैकः श्रीहरिरेवेत्यभिप्रायः ॥ २ ॥

एतैश्च वृथैवायुर्व्ययो भवतीत्याह । निद्रयेति । हे राजन् । नक्तं रात्रौ यत् वय आयुः तत् निद्रया निद्रासक्त्या व्यवायेन स्त्रीसंभोगेन वा ह्रियते । दिवा दिवसे यद्वयः तत् अर्थेहया अर्थार्जनानुकूलोद्यमात्यासक्त्या । वाऽथवा कुटुम्बभरणेन । दैववशादर्थसिद्धौ कथंचिज्जातायां सत्यामपि गृहकार्यकरणादिना परस्परं संप्राप्तक्लेशेन कुटुम्बसन्माननपूर्वं तद्भरणक्लेशेन चेत्यर्थः । ह्रियते । चकारावनुक्तसमुच्चयार्थौ । उक्तातिरिक्तव्यापारान्तरेणापीत्यर्थः ॥ ३ ॥ ननु नश्वरकुटुम्बार्थं कथं चायुर्व्ययं कुर्यात्तत्राह । देहेति । देहश्च अपत्यानि च कलत्र पत्नी च तान्यादयो येषां तेषु । आत्मसैन्येषु देहसंबन्धिषु असत्स्वन्तवत्सु सत्स्वपि प्रमत्तस्तेष्वत्यासक्तः जनः तेषां देहादीनां निधनं नाशं पश्यन्नपि स्वपितृपुत्रादिदृष्टान्तेन निरीक्षमाणः सन्नपीत्यर्थः । न पश्यति नानुसंधत्ते । यस्मादहमुत्पन्नः स सपत्नीको मत्तातो मृतः । योऽयं पुत्रः समुत्पन्नः स पुत्रोऽपि पश्यन्तं मामनादृत्य मृतस्तदुभयद्रष्टा उभयोरर्थाभिलाषी चाहं कथं जीविष्यामि लोकवृत्तस्यैवंविधत्वादित्यात्मनि मोहेन नायं जनो विचारयतीति भावः ॥ ४ ॥ एवं विपर्ययप्रश्नोत्तरमुक्त्वा श्रोतव्यादिप्रश्नोत्तरमाह । तस्मादिति । हे भारत भरतनृपवंशोत्पन्न । यतःश्रीनारायण श्रवणादिना विना न संसारनिवृत्तिस्तस्मात् सर्वात्मा सर्वजीवानामन्तर्यामी 'अन्तः प्रविष्टः शास्ता जनानाम्' इति श्रुतिप्रत्यभिज्ञानात् । जनशब्दस्य चेतनमात्रे स्वारस्यात् । हरिराश्रितदुरितहर्त्ता । अनेन भगवदुपासकानां स्वप्राप्तिविरोधिदुरितनिवर्त्तकत्वं भगवत उक्तं भवति । ईश्वरः कार्यकारणावस्थचेतनाचेतननियन्ता । अनेन कारणत्वमभिप्रेतम् । 'कारणं तु ध्येय' इति श्रुतेः । ईदृशः । भगवान् षाड्गुण्यपूर्णः श्रीपुरुषोत्तमः । अभयं मोक्षम् इच्छता कामयामानेन श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्च । स्वरूपसौन्दर्यलावण्यगुणविभूतिविशिष्टपरमात्मविषयकं श्रवणादिकं मुमुक्षुणा काय नान्यविषयकमित्यर्थः । 'आत्मा वारे द्रष्टव्यः' 'तमेवैकमात्मानमेव जानीथान्या वाचो विमुञ्चथ' इति श्रुतेः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतस्मात्परमन्यत्कर्तव्यं नास्तीत्याह। एतावानिति। सांख्यं ज्ञानयोगश्च, योगः फलाभिसंधिरहितः कर्मयोगश्च ताभ्याम्। 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति भगवद्वचनात्। स्वधर्मो भगवदधीनतारूपैका वृत्तिस्तदुपासनमिति यावत्, तस्य परिनिष्ठया अविघ्नपरिसमाप्त्या च। अन्ते देहावसाने नारायणस्मृतिः साध्या इति यत् एतावान् पुंसां पर उत्कृष्टः जन्मलाभः मनुष्यलोके जन्मप्राप्तेः फलम्। ज्ञानकर्मयोगानुगृहीतभगवदुपासनासाध्या नारायणस्मृतिरेवैकाऽन्तकाले संपाद्येत्यर्थः॥ ६॥ अत्रार्थे सदाचारं प्रमाणयति। प्रायेणेति। हे राजन् विधिषेधतः विधिनिषेधात्मकवेदबोधितात्काम्यात्कर्मणः निवृत्ताः। न त्वावश्यकात्पञ्चमहायज्ञाद्यनुष्ठानरूपात्कर्मणः निवृत्ता इत्यर्थः। मुनयः शुभाश्रयसंशीलनपराः साधवः। नैर्गुण्यस्थाः रजआदिसंकीर्णतावर्जितब्रह्मस्वरूपस्थाः। ब्रह्मात्मना शुभाश्रयभगवदुपासका इत्यर्थः। इत्थंभूताः सन्तः प्रायेण बाहुल्यतस्तु हरेराश्रितदुरितहारिणो भगवतः गुणानुकथने केवले गुणानुवादे रमन्ते स्म॥ ७॥ न केवलं पूर्वे एवारमन्ताहमपि तत्रैव रमे, तद्विशेषापादनाय श्रीहरिगुणचरित्रादिप्रधानं पुराणमहमप्यधीतवानित्याह श्लोकद्वयेन। इदमिति। इदं मया वक्ष्यमाणं पुराणम्। बुद्धिसंनिहितत्वादिदमित्युच्यते। भागवतं भगवता प्रोक्तम्। चतुःश्लोक्या एतन्मूलभूताया, ब्रह्माणं प्रति स्वयं भगवता प्रोक्तत्वात्। यद्वा। भगवत्स्वरूपादिप्रतिपादकत्वेन भागवतम्, ब्रह्म वेदस्तेन संमितं तुल्यम्। यद्वा। ब्रह्म परमात्मा कृष्णः सम्यक् मितं प्रमितं येन तथाविधम्। नाम प्रसिद्धं भवतीति शेषः। तच्च त्वं कदा कस्मात्समधिगतवांस्तत्राह। द्वापर आदिर्यस्य कलेस्तस्मिन्। कलिद्वापरयोः संध्यारम्भे इत्यर्थः। शंतनुचक्रवर्त्तिसमकालं व्यासावतारस्य प्रसिद्धेः। पितुर्मम जनकात्। द्वैपायनाद्व्यासात्। एतत् अहम् अधीतवान्। अत्र कृष्णावतारापेक्षया द्वापर आदिर्यस्य कलेरिति ज्ञेयं नतु द्वापरस्यादाविति। 'व्यासः षट्शतवर्षीयो धृतराष्ट्रमजीजनत्' इति वचनात्। द्वापरान्ते भारतकथाप्रवृत्तिकथनाच्च॥ ८॥

ननु सिद्धस्य तव कुतोऽध्ययनप्रवृत्तिस्तत्राह। परिनिष्ठित इति। हे राजर्षे नैर्गुण्ये त्रिगुणातीतेऽक्षरब्रह्मणि। परिनिष्ठित आत्मैक्यभावेन स्थितोऽपि अहम् उत्तमश्लोकस्य क्षराक्षरपुरुषेभ्यः श्रेष्ठकीर्त्तेः श्रीकृष्णस्य लीला चरित्रात्मिका तया गृहीतचेता आकृष्टान्तःकरणः सन्। यत् एतत् आख्यानं श्रीमद्भागवतपुराणं तत् अधीतवान् अस्मि॥ ९॥ आरूढोत्कृष्टसमाधीनां मादृशानामप्यस्य पुराणस्योपादेयत्वमस्ति यदा तदा केषामेतदनुपादेयम्, न केषांचिदपीति कैमुत्यन्यायेनोत्तमपदमारुरुक्षोस्तव तु सुतरामेवेदमुपादेयमिति तुभ्यं तदुपदिशामीत्याह। तदिति। तदेतच्छ्रीमद्भागवतं पुराणं ते तुभ्यम् अहम् अभिधास्यामि कथयिष्यामि। ननु चिरकालमशुश्रूषवे मह्यं कथमभिधास्यसीत्यत्राह। भवान् महापौरुषिकः अस्ति। महापुरुषो भगवान्। 'वेदाहमेतं पुरुषं महान्तम्' इति श्रुतेः। स उपास्यत्वेनास्यास्तीति महापौरुषिको महापुरुषभक्तः। न हि भगवद्भक्तानां रहस्यार्थोपदेशने चिरं शुश्रूषापेक्षेति भावः। यस्येत्यधिकरणार्थे संबन्धसामान्यतः षष्ठी। यस्मिन्पुराण इत्यर्थः। श्रत् श्रद्धां दधताम्। श्रद्धां कुर्वतामित्यर्थः। श्रदित्युपसर्गप्रतिरूपकं श्रद्धार्थमव्ययम्। मुकुन्दे मुक्तिप्रदायिनि श्रीकृष्णे भगवति आशु सत्यहैतुकी निष्कामेति यावत्। मतिर्भक्तिरित्यर्थः स्यात्॥ १०॥ मुमुक्षावतां साधकानां सिद्धानां च नातः परमन्यन्मोक्षसाधनमस्तीत्याह। एतदिति। हे नृप निर्विद्यमानानां तापत्रयजन्यक्लेशनिवहैर्विरज्यमानानाम् अत एव। अकुतोभयं मोक्षम् इच्छतां कामयमानानां मुमुक्षावतां साधकानामित्यर्थः। योगिनां वैराग्यादिसाधनसामग्रीमतामनभिसंहितफलकर्मयोगनिष्ठानां सिद्धानां चेत्यर्थः। हरेः स्वाश्रितदुरितहरस्य श्रीकृष्णस्य एतत् नामानुकीर्त्तनम्। स्वेप्सितफलप्रदमितिशेषः। निर्णीतम्। यद्वा। विषयिणां मुमुक्षूणां मुक्तानां च नातः परं वाञ्छितफलदमस्तीत्याह। एतदिति। इच्छतां कामिनाम्। तत्तत्फलसाधनमेतदेव। निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमप्येतदेव योगिनां ज्ञानिनां मुक्तानामित्यर्थः। मुक्तताफलं च एतदेव निर्णीतं नात्र प्रमाणं वक्तव्यमित्यर्थः। कि तत् अकुतोभयं हरेः नामानुकीर्त्तनमिति यत्तदित्यर्थः। इदं हरेर्नामानुकीर्त्तनं स्वरूपचिन्तनादेरप्युपलक्षणम्। ततस्तत्स्वरूपचिन्तनादिकं चापि मुक्तिसाधनं नान्यदित्यर्थः॥ ११॥

सांप्रतमल्पमेवायुरवशिष्टं तावता किमहं साधयेयमिति शुचं माकार्षीरित्याह। किं प्रमत्तस्येति। इह लोके प्रमत्तस्य देहापत्यकलत्रादिष्वासक्तस्य परोक्षैरज्ञाततयैव गतैः बहुभिः। हायनैः संवत्सरैः। किम्, किं प्रयोजनं सिद्धं न किमपीत्यर्थः। विदितं ममैतद्वृथा यातीति ज्ञातं मुहूर्त्तमेव वरम्। यतो येन विदितेन मुहूर्त्तेन श्रेयसे घटेत यत्नं कुर्यात॥ १२॥ विदितस्य मुहूर्त्तमात्रकालस्यापि स्वकीयश्रेयोघटकत्वे इतिहासमाह। खट्वाङ्ग इति। खट्वाङ्गः नाम। नामशब्दः प्रख्यात्यर्थे। राजर्षिः। आयुषः स्वकीयायुः कालस्य इयत्तामेतावत्तां ज्ञात्वा इहास्मिन् लोके सर्वं देहादिष्वात्मात्मीयत्वाद्यभिमानं मुहूर्त्तात् उत्सृज्य हित्वा। अभयं भयनिवर्तकं हरिं गतवान् शरणं संप्राप्तः। अभूदिति शेषः। एवं ह्यत्र पौराख्यायिका। खट्वाङ्गो हि दैत्यवधार्थं देवैः संप्रार्थितः स्वर्गे गत्वा देवपक्षे स्थित्वा दैत्यैर्युद्धं विधाय तत्र दैत्यान् पराभावयांचकार। ततस्तदीयं तत्कर्म समीक्ष्य संप्रीतैर्देवैर्नृपते वरमस्मत्तो वृष्णीष्वेत्युक्ते तेन विचारितं वरं संप्राप्य तत्फलोपभोगस्य दीर्घायुष्ट्या सफलत्वं नान्यथातोऽहं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ममायुः कियदस्तीति पृच्छेयं ततस्तेभ्यस्तत् ज्ञात्वा वरणीयं कथयिष्यामीति ततस्तान्प्रति पृष्टं ममायुः कियदस्तीति कथ्यतामित्युक्ते देवैरुक्तं तत्तु मुहूर्त्तमात्रमस्तीति श्रुत्वा ततो विमानेन शीघ्रं भुवमागत्य हरिं शरणं गत इति ॥ १३ ॥ तव तदपेक्ष्या दीर्घायुष्ट्वान्न हृत्तापः कार्य इत्यतस्तत्सर्वं हरिचरणारविन्दस्मरणविषयत्वेन कल्पयेत्याह । तवेति । हे कौरव्य कुरुकुलोत्पन्न नृपते तवापि तव त्वित्यर्थः । एतर्हि इदानीं जीवितावधिर्जीवितस्य परिमाणम् । सप्ताहं सप्ताहोरात्रपर्यन्तमस्ति । तावत्तावता सप्ताहोरात्रप्रमाणेन कालेन सांपरायिकं पारलौकिकं साधनं यत तत् सर्वम् उपकल्पय संपादय ॥ १४ ॥

'संपरायस्तु संग्राम आपदागामिकालयोः' इति यादवकोशेक्ष्या संपरायशब्द उत्तरकालवचनस्तत्र संपाद्या मुक्तिः यत्सांपरायिकं तच्च वैराग्योदयसाध्यं तच्च विषयवैतृष्ण्यतारूपं तस्य मुक्तिसाधनत्वमुक्तमस्त्यष्टावक्रेण 'मुक्तिमिच्छसि चेत्तात विषयान् विषवत्त्यज । क्षमार्जवदयातोषसत्यं पीयूषवद्भज' इति ततोऽत्रादौ वैराग्यमाह । अन्तकाल इति । अन्तकाले स्वदेहावसानकाले आगते संप्राप्ते सति तु पुरुषः गतसाध्वसः निवृत्तभयः सन् असङ्गः काप्यनासक्तिः स एव शस्त्रं तेन वैराग्यरूपकृपाणिकयेत्यर्थः । देहे स्पृहां सुखेच्छाम् । तं देहम् अनु च । ये देहमनुसृत्य वर्तमाना अपत्यकलत्रादयो देहानुबन्धिनस्तेषु चेत्यर्थः । स्पृहामात्मीयताभिमानप्रयुक्तभोगेच्छां छिन्द्यात् ॥ १५ ॥ प्राप्तवैराग्यस्य विषयविरक्तिसुदृढताप्तये संसाधनीयमष्टाङ्गयोगसंसाधनमाह । गृहादिति । गृहात् प्रव्रजितः । गृहे स्थितस्य विरक्तिमतोऽपि पुनरप्यासक्तिसंभवाद्गेहान्निर्गत इत्यर्थः । अष्टाङ्गवतो योगस्य धीर इत्यादिना 'आश्रयं भद्रमीक्षत' इत्यन्तेनाष्टाङ्गसंक्षेपोक्तिः । धीरः जितेन्द्रियः स्वमनःक्षोभहेतौ रम्यविषयादावुपस्थितेऽपि तत्र दोषेक्ष्या तद्भोगव्याकुलतावर्जित इत्यर्थः । अनेन ब्रह्मचर्यादिलक्षणो यम उक्तः । यमस्याहिंसास्तेयब्रह्मचर्यापरिग्रहरूपत्वात्पञ्चापि उक्तप्राया एव । पुण्यानि स्वपावित्र्यापादकानि यानि तीर्थजलानि गङ्गादितोयानि तेष्वाप्लुतः स्नातः अनेन स्नानादिनियम उक्तः । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानां पञ्चानां नियमरूपत्वात्तत्रादिमशौचस्य स्नानेन संसिद्धेरत्रादौ स्नानेन तदुपादानं बोध्यम् । शुचौ परिशुद्धे विविक्ते एकान्ते । विधिवच्चैलाजिनकुशोत्तरमित्यासनोक्तिव्युत्क्रमेण कल्पितं यदासनं तस्मिन् आसीनः । कल्पितासने विधिवदासीन इति वा स्वस्तिकादीन्यनतिक्रम्योपविष्ट इत्यर्थः । स्वस्तिकादीनां तेषामासनानां चतुरशीतिप्रकारभेदभिन्नत्वेऽपि स्वस्तिकपद्मादौ सुखकरे तत्रोपविष्ट इति भावः । अनेनासनरूपं तृतीयं तदङ्गमुक्तम् ॥ १६ ॥ स्थिरासनविधेयप्राणायामश्चतुर्थं तदङ्गं तस्य च जपगर्भत्वाज्जपमन्त्रमाह । अभ्यसेदिति । त्रयाणामकारोकारमकाराणां वृत् वर्तनं यस्मिंस्तत् त्रिवृत् अक्षरत्रयग्रथितमित्यर्थः । परंब्रह्मविद्यास्वादावुक्तत्वात् श्रेष्ठम् । शुद्धम् ब्रह्माक्षरं ब्रह्मणः प्रतिपादकमक्षरं प्रणवम् । मनसा अभ्यसेत् । जितश्वासः वशीकृतप्राणवायुः । ब्रह्मबीजं प्रणवम् । अविस्मरन् संस्मरन्सन्नित्यर्थः । मनः यच्छेत् 'चले वायौ चलं चित्तम्' इत्युक्तेस्तज्जयेन मनोजयः सुसाध्यः ॥ १७ ॥

मनसेन्द्रियप्रत्याहारस्य साध्यत्वान्मनसश्च प्राणायामेन वशवर्तित्वात्तेन तदुक्त्वा सांप्रतं तेनेन्द्रियप्रत्याहारमाह । नियच्छेदिति । बुद्धिः सारथिर्यस्य सः पुमान् । मनसा स्वेन वशीकृतेन स्वान्तेनेत्यर्थः । अक्षान् श्रोत्रादीनिन्द्रियाणि । विषयेभ्यः तत्तद्विहारभूमिरूपेभ्यः । नियच्छेत्प्रत्याहरेत् । 'बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च' इति श्रवणात् । अनेन प्रत्याहाराख्यं पञ्चमं योगाङ्गमुक्तम् । अथ धारणाख्यं षष्ठं तदङ्गमाह । मनसश्च कर्मवासनामयत्वाद्विक्षिप्तत्वे किं कर्तव्यं तत्राह । पुनश्च कर्मभिरुद्वासनाभिः । आक्षिप्तं विक्षेपं प्राप्तं मनः शुभार्थे शुभाश्रये भगवद्रूपे धिया माहात्म्यज्ञानयुतनिश्चयात्मिकया बुद्ध्या धारयेत् स्थिरं कुर्यात् । शुभाश्रये भगवति मनसोऽवस्थापनं धारणा । शुभाश्रयस्य पुनः पुनश्चिन्तनं ध्यानम् । तस्य विजातीयप्रत्ययान्तराव्यवहितत्वं समाधिरिति भेदः ॥ १८ ॥ अथ ध्यानाख्यं सप्तमं योगाङ्गमाह । तत्रेति । तत्र युगपत्सर्वावयवध्यानाशक्तौ अव्युच्छिन्नेन शुभाश्रयसमग्रभगवत्स्वरूपावियुक्तेन चेतसा चित्तेन । एकावयवमेकैकावयवं यथा भवति तथा ध्यायेत् । युगपत्पूर्णभगवत्स्वरूपध्यानाशक्तस्तदीयैकैकावयवं स्मरेदित्यर्थः । अथाष्टमं तदङ्गं समाधिमाह । निर्विषयं दृष्टश्रुतबाह्यविषयानुभवरहितं मनः युङ्क्त्वा शुभाश्रयभगवत्स्वरूपे समाधाय ततः । किंचन न स्मरेत् । किमपि बाह्यविषयादिकं न चिन्तयेदित्यर्थः । एतदङ्गसंसिद्धावानन्दसंप्लवे लीनत्वान्न किंचिदस्तु द्रष्टुं वा क्षमते इत्येतत्फलितार्थः । अथ च शुभाश्रयस्वरूपमाह । पदमिति । यत्र मनः प्रसीदति । यस्मिन्स्वरूपे चिन्त्यमाने मनो रागाद्यकलुषितं भवतीत्यर्थः । तत् एव विष्णोः परमम्, परो मा न विद्यते यस्मात् तत्परमं सर्वोत्कृष्टमित्यर्थः । पदं स्वरूपं भवति ॥ १९ ॥ एवं परमं पदमाप्तमपि मनो गुणाधीनत्वात्कदाचिद्रागादिकालुष्यवशतया विक्षिप्तं भवेच्चेत्तच्छमनोपायमाह । रज इति । यदा रजश्च तमश्च ताभ्याम् आक्षिप्तं विक्षिप्तम् । विमूढम् । रजसा आक्षिप्तं तमसा विमूढं च आत्मनः स्वस्य मनः भवेत् । तदा धीरः सन् धारणया यच्छेत् । पुनरपि विहितया धारणया वशीकुर्यात् । धारणाया माहात्म्यमाह । या धारणा, तत्कृतं रजस्तमोभ्यां कृतं मलं हन्ति निवर्त्तयति ॥ २० ॥

यस्यामिति । यस्यां धारणायां संधार्यमाणायाम् । धारणायां क्रियमाणायामित्यर्थः । पाकं पचतीतिवन्निर्देशः । भद्रं शुभम् । आश्रयं धारणाधारभूतं भगवत्स्वरूपम् ईक्षतः निरीक्षमाणस्य परस्मैपदित्वाभावाच्छतृप्रत्यय आर्षः । योगिनः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तिलक्षणः योगः । 'प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते' इत्युक्तलक्षणो भक्तियोग इत्यर्थः । आशु शीघ्रम् । संपद्यते सपन्नो भवति । एतादृशमाहात्म्यवती धारणेत्यभिप्रायः ॥ २१ ॥ एवं संग्रहेणाष्टाङ्गयुक्ते योगे उपदिष्टे पुनर्विस्तरबुभुत्सया पृच्छति । यथेति । हे ब्रह्मन् यत्र भगवतः स्थूलसूक्ष्माख्ये द्वे रूपे स्तस्तयोर्मध्ये यस्मिन् रूप इत्यर्थः । धारणा संमता । तच्च यथा संधार्यते सा च यादृशी यत्स्वरूपा कृता सती आशु शीघ्रम् । सैव पुरुषस्य मनोमलं हरेत् । तथा तां मे ब्रूहीति शेषः । अत्र यत्रेति धारणाविषयः प्रश्नः । यादृशीति धारणादशाविशेषप्रश्नः । यथेति यत्नकर्मविशेषप्रश्नः । ननु धारणाया एव दशाविशेषादीनां विशेषेणायं प्रश्नः, न तु प्रधानभूतस्य ध्यानस्येति चेद्ध्यानस्य धारणापूर्वकत्वाद्धारणानुसारेणैव ध्यानाच्च तत्प्रश्नेनैव गतार्थत्वान्न पृथक्त्वम् ॥ २२ ॥ तत्र ध्येयं ब्रह्मैकरूपमेवास्त्यथापि नानाशब्दादिभेदादित्यादिन्यायेनोपास्यब्रह्मरूपाणां वा संयोगरूपचोदनाख्यविशेषवत्तया नानात्वेनोपासनामपि नानात्वाद्धेतोः प्रथमं जगच्छरीरकस्य तस्योपासनमाह । जितासन इति । जितमासनं येन सः आसनकृतायासरहितः । जितः श्वासः प्राणो येन सः स्ववशीकृतप्राणवायुः । जितः सङ्गो येन सः जितान्तःकरणः । जितानीन्द्रियाणि येन सः जितबाह्येन्द्रियः । पुमान् स्थूले स्थविष्ठे । भगवतः रूपे मनः स्वीयं स्वान्तं धिया सारथीभूतया बुद्ध्या संधारयेत् । अनेन यथेत्यस्योत्तरं ज्ञेयम् ॥ २३ ॥ चिदचिदात्मकप्रपञ्चस्य भगवच्छरीरत्वकथनपूर्वकं तस्य धारणाविषयत्वमाह । विशेष इत्यादिना । विशेषः कार्यकारणाकारः पृथिव्यादिभूतमयः प्रपञ्चः । तस्य परमेश्वरस्य अयं विराट्संज्ञः देहः । स्थवीयसामतिस्थूलानां मध्ये, स्थविष्ठोऽतिशयेन स्थूलतरः चैव । यत्र देहे । विश्वं समस्तम् । भूतमतीतम् । भव्यं भविष्यत् । भवद्वर्त्तमानं च । यत्समष्टिव्यष्ट्यात्मकं पदार्थजातम् अस्ति । तदिदं सर्वं दृश्यते अन्तर्गतत्वेनोपस्यते । अयं भावः । यथा शिलादिमूर्तिर्भगवदावेशाद्ध्येया तथायमपि ॥ २४ ॥

वस्तुतस्तु विराड्देहतज्जीवतदन्तर्यामिभगवत्स्वरूपाभेदमारोप्योपासनं कर्त्तव्यमित्याशयेन विषयमाह । आण्डकोश इति । सप्तावरणसंयुते पृथिव्यप्तेजोवाय्वाकाशाहंकारमहत्तत्त्वानि सप्तावरणानि तैर्युक्ते अण्डकोशे आण्डकोशाख्ये अस्मिन् शरीरे वैराजः विराट्संज्ञः यः पुरुषः असौ भगवान् धारणाश्रयः धारणाविषयः । अनेन पुरुषावतारसंज्ञो हिरण्यगर्भो ध्येयतयोक्तो न तु चतुर्मुखः । तस्य 'एवं पुरा धारणयात्मयोनिः' इत्यनेनैतद्रूपोपासकत्वावगमात् ॥ २५ ॥ एवं चतुर्दशभुवनात्मकाण्डकोशस्य तच्छरीरत्वं सामान्येनोक्त्वाण्डकोशान्तर्गतपदार्थान् विभज्य तेषां तदवयवशक्त्यावस्थानात् तत्पादाद्यवयवत्वेन तदुपासनमाह । पातालमिति । एतस्य वैराजपुरुषस्य पादमूलं पादतलम् । पादयोरधोभागमिति यावत् । पातालम् । पठन्ति वदन्ति हि । पातालस्यैतत्पादतलशक्त्यावस्थानात्तत्त्वेनोपास्यं वदन्तीत्यर्थः । एवं रसातलादिष्वपि योजना कार्या । पार्ष्णिः पादस्य पृष्ठभागश्च प्रपदं पादाग्रं च ते एते उभे रसातलं पठन्ति । अथ विश्वं सृजतीति विश्वसृट् तस्य विश्वसृजः गुल्फौ घुटिके महातलं पठन्ति । पुरुषस्य जङ्घे प्रशस्तलक्षणे द्वे अपि पिण्डकारव्यपर्वणी । तलातलं पठन्ति वै ॥ २६ ॥ द्वे जानुनी इति । विश्वमूर्त्तेः द्वे जानुनी सुतलं गृणन्ति वदन्ति । वितलम् अतलं च अस्य ऊरुद्वयं गृणन्ति । ऊरुद्वयाधोभागे वितलम् । उपरि भागे त्वतलमिति विभागः । हे महीपते तज्जघनं कटितलं महीतलं भूर्लोकं गृणन्ति । नभस्तलं भुवर्लोकं नाभिसरः । च । अगाधत्वचतुर्मुखजनकपद्मनिदानत्वाभिप्रायेण नाभिसर इत्युक्तम् । गृणन्ति । तत्त्वेनोपास्यं वदन्तीत्यर्थः ॥ २७ ॥

उर इति । अस्य वैराजस्य उरःस्थलमुरःप्रदेशम् । ज्योतिरनीकं ज्योतिश्चक्रस्थानं स्वर्लोकं विदुः । स्वर्लोक एतदुरस्त्वेन उपास्य इत्यर्थः । अस्य ग्रीवा महः । महर्लोकोऽस्य ग्रीवात्वेनोपास्य इत्यर्थः । जनलोकः अस्य वदनं वै । जनलोक एतद्वदनत्वेनैवोपास्य इत्यर्थः । तपस्तपोलोकम् । आदिपुंसो भगवदादिमावताररूपस्य रराटीं ललाटं विदुः । सत्यं सत्यलोकं तु सहस्रं शीर्षाणि यस्य शीर्षाणि शिरांसि विदुः ॥ २८ ॥ इन्द्रादय इति । इन्द्रादयः उस्रा देवाः । अमुष्य भगवतः बाहवः इति आहुः । अस्माकं य इन्द्रियाधिष्ठाता देवः सोऽस्येन्द्रियगोलकरूपः अस्माकं य इन्द्रियविषयः सोऽस्येन्द्रियरूप इति भावः । दिश अस्मच्छ्रोत्रेन्द्रियदेवतारूपा आशाः । अमुष्य पुरुषस्य कर्णौ श्रोत्रेन्द्रियाधिष्ठानभूतकर्णबिले गोलकरूपावित्यर्थः । शब्दः ध्वन्यात्मको वर्णात्मकश्चेत्युभयविधः शब्दः अमुष्य श्रोत्रं श्रोत्रेन्द्रियरूपः । परमस्य समाभ्यधिकतारहितस्यास्य । नासे नासापुटे तु नासत्यदस्रौ अश्विनौ भवत इति शेषः । गन्धः शान्तोग्रादिरूपेण नानाविधो गन्धः । अस्य घ्राणस्तदिन्द्रियम् । इद्धः प्रदीप्तः अग्निः तस्य मुखं गोलकरूपः । अस्तीति शेषः ॥ २९ ॥ द्यौरिति द्यौरन्तरिक्षलोकः । अक्षिणी नेत्रगोलकरूपा अस्ति । तत्र पतङ्गः सूर्यः चक्षुरिन्द्रियम् अस्ति । विष्णोर्वैराजपुरुषस्य पक्ष्माणि च । चकारस्त्वर्थे । उभे अहनी अहोरात्रे भवतः । तद्भ्रूविजृम्भः तस्य भ्रूविनामः भ्रूविलास इति यावत् । परमेष्ठिधिष्ण्यं परमेष्ठिनश्चतुर्मुखस्य स्थानम् । आपः जलाभिमानी वरुणः । अस्य वैराजस्य तालुः । पुंस्त्वमार्षम् । रसो मधुरादिः अस्य जिह्वा एव ॥ ३० ॥

छन्दांसीति । छन्दांसि वेदाः अनन्तस्य त्रिविधपरिच्छेदशून्यस्य वैराजस्य शिरो ब्रह्मरन्ध्रं गृणन्ति कथयन्ति । अस्य दंष्ट्रा यमः । यमं दंष्ट्रां कथयन्तीत्यर्थः । स्नेहकला अस्मदादीनां स्नेहांशाः द्विजानि दन्ताः नपुंसकत्वमार्षम् । अस्मदादीनां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्नेहांशो वैराजस्य दन्तान्कथयन्तीत्यर्थः। हासः हसनम्। जनोन्मादकरी माया। चोऽवधारणे। जनताश्चर्यकारिणीं मोहनशक्तिरूपां मायां तस्य हासं कथयन्त्येवेत्यर्थः। यस्य अपाङ्गमोक्षः कटाक्षः दुरन्तसर्गः अनवसाना विश्वसृष्टिः। अपारसर्गं यदपाङ्गमोक्षं वदन्तीत्यर्थः ॥ १३ ॥ व्रीडेति। व्रीडा लज्जा, अस्य उत्तरोष्ठः। संधिरार्षः। लोकादौ वर्तमानां लज्जां तस्योत्तरमोष्ठं वदन्तीत्यर्थः। लोभः अस्य अधरः ओष्ठः। लोकादौ वर्त्तमानं लोभमस्याधरमोष्ठं वदन्तीत्यर्थः। धर्मः स्तनः। धर्ममस्य स्तनं वदन्तीत्यर्थः। धर्मस्य तत्स्तनोत्पन्नत्वात्तत्त्वेनोक्तिः। अधर्मपथोऽधर्मसर्गः अस्य पृष्ठः। अधर्मपथमस्य पृष्ठभागं वदन्तीत्यर्थः। पुंस्त्वमार्षम्। कः प्रजापतिः। तस्य वैराजस्य मेढ्रम्। प्रजापतिं तस्य मेढ्रं वदन्तीत्यर्थः। क्लीबत्वमार्षम्। मित्रौ मित्रावरुणौ तस्य वृषणौ अण्डकोशौ च वदन्ति। समुद्राः तस्य कुक्षिम् उदरम्। कुक्षिः पुंसि। समुद्रांस्तस्य कुक्षिं वदन्तीत्यर्थः। गिरयः पर्वताः तस्य अस्थिसंघाः गिरींस्तस्यास्थिसमूहान्वदन्तीत्यर्थः ॥ ३२ ॥ नद्य इति। नद्यो गङ्गायमुनादयः स्रोतस्विन्यः अस्य नाड्यः। नदीरस्य नाडीत्वेन वदन्तीत्यर्थः। अथ महीरुहा वृक्षाः। विश्वतनोर्जगदात्ममूर्त्तेः अस्य तनूरुहाणि रोमाणि। महीरुहांस्तस्य तनूरुहश्रेणिं वदन्तीत्यर्थः। हे नृपेन्द्र मातरिश्वा वायुः। अनन्तवीर्यश्वसितम् अपारवीर्यस्यास्य प्राणः। पाठान्तरे अनन्तवीर्योऽपारसामर्थ्यः, मातरिश्वा अस्य श्वसितमित्यन्वयः वा। वायुमस्य प्राणं वदन्तीत्यर्थः। वयः कालः गतिर्गमनम्। कालमस्य गमनक्रियां वदन्तीत्यर्थः। गुणानां सत्वरजस्तमसां प्रवाहः, तस्य व्यापारः। गुणप्रवाहरूपं संसारं तदीयं व्यापारं वदन्तीत्यर्थः ॥ ३३ ॥

ईशस्येति। अम्बुवाहान् मेघान् ईशस्य वैराजपुंसः केशान् विदुः। हे कुरुवर्य संध्ये सायंप्रातःसंध्ये भूम्नो विभोः वासो वस्त्रं वदन्ति। संध्याद्वयमस्य वासस्त्वेन वदन्तीत्यर्थः। अव्यक्तं प्रधानप्रकृतिम्। अस्य हृदयं हृत्पद्मरूपम् आहुः। सः प्रसिद्धः सर्वविकारकोशः सर्वौषधिविकारहेतुः, चन्द्रमाः अस्य मनश्च। चन्द्रमसमस्य मनस्त्वेन कल्पयन्तीत्यर्थः ॥ ३४ ॥ विज्ञानेति। महिं महत्तत्त्वम्। सर्वात्मनः सर्वान्तर्यामिणो विश्वरूपस्य वा। विज्ञानशक्तिं व्यवसायशक्त्यपरसंज्ञं चित्तमित्यर्थः। आमनन्ति कथयन्ति। गिरित्रं कैलासाचलरक्षकं शिवम् अन्तःकरणमहंकारम् अनात्मन्यात्माभिमानहेतुरूपमिति यावत्। आमनन्ति। अत एव 'रुद्रो वक्षसि चाभवत्' इति विश्वरूपोक्तिः संगच्छते। अश्वा घोटकाश्च अश्वतर्यो रासभाद्वडवायामुत्पन्नाश्च उष्ट्राः क्रमेलकाश्च गजा हस्तिनश्च ते सर्वे नखानि। अश्वादींस्तन्नखत्वेनामनन्तीत्यर्थः। सर्वे पशवो ग्राम्या गोमहिष्यादयः, मृगा आरण्याः पशवश्च अस्य श्रोणिदेशे स्थिताः तस्माज्जाता भवन्तीत्यर्थः। उभयविधाः पशवस्तच्छ्रोणित्वेनानुसंधेया इत्यर्थः। ॥ १५ ॥ वयांसीति। वयांसि तित्तिर्यादयः पक्षिणः। विचित्रम्। तस्य व्याकरणं 'नामरूपे व्याकरवाणि' इति श्रुत्युक्तं शिल्पनैपुण्यमित्यर्थः। यथाहुः। 'येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः। मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति' इति। मनुर्मन्त्रः स्वायंभुवो वा। मनीषा बुद्धिः। मनुं तद्बुद्धित्वेन वदन्तीत्यर्थः। मनुजो मनुष्यवर्गः। निवासः तन्निवासस्थानम्। मनुजांस्तन्निवासस्थानत्वेन वदन्तीत्यर्थः। 'पुरुषत्वेनाविस्तरामात्मा' इति श्रुतेः। मनुजो निवासस्तत्स्वरूपज्ञानोत्पत्तिस्थानमिति वा। गन्धर्वाश्च विद्याधराश्च चारणाश्च अप्सरसश्च तत्समाहारः। अस्य स्वरः षड्जादिः। असुरानीकवर्योऽसुरसमूहश्रेष्ठः प्रह्लादः। अस्य स्मृतिः। दैर्घ्यमार्षम्। स्वरस्मृतीरसुरानीकवीर्य इति पाठे गन्धर्वादयः यस्य स्वरस्मृतीः षड्जादिस्वरस्मृतय इत्यर्थः। असुरानीकं वीर्यं यस्य सः। असुरानीकस्य जनकं वीर्यं यस्येति वा ॥ ३६ ॥

ब्रह्मेति। ब्रह्म ब्राह्मणः तस्य आननम्। तदाननोत्पन्नवृत्तिमत्वात्तदाननमिति भावः। महात्मा वैराजः। क्षत्रं क्षत्रियः भुजा यस्य सः। विट् वैश्यः ऊरू यस्य सः। अङ्घ्रौ श्रितोऽङ्घ्रिश्रितः कृष्णवर्णः शूद्रो यस्य सः। क्षत्रियादयस्तद्भुजाद्युत्पन्नवृत्तिभाक्त्वेन तद्भुजादित्वेनानुसंधेया इत्यर्थः। नानाभिधा नानानामका अभीज्या यष्टव्या वसुरुद्रादयस्तेषां गणास्तैरुपपन्नो युक्तः। द्रव्यात्मको हविःसाध्यः। वितानयोगः यज्ञप्रयोगः। कर्म तदाराधनरूपा क्रियेत्यर्थः ॥ ३७ ॥ इयानिति। ईश्वरविग्रहस्य यः संनिवेशः अवयवविन्यासः। ते तुभ्यं मया कथितः। असौ इयानेतावानेव। स्थविष्ठे स्थूले अस्मिन् वैराजसंबन्धिनि वपुषि स्वबुद्ध्या स्वकीयया मत्या मनः। मुमुक्षुभिरिति शेषः। संधार्यते। यतः यस्मादेवंविधेश्वरविग्रहात् किंचित् अन्यदिति शेषः। न अस्ति। एतच्छरीरबहिर्भूतं किमपि नास्ति सर्वं तच्छरीरान्तर्भूतमेवास्तीत्यर्थः। पातालमेतस्येत्यारभ्य इयानसावीश्वरेत्यन्तैः श्लोकैः पारमेश्वरीयपुरुषावतारवैराजस्य स्थविष्ठं यदेतद्रूपमुक्तं तस्य पादादीनां स्मरणं च तत्पुरुषाकृतिपरमेश्वरावतारस्य तदास्थापिततदर्चावतारस्य च पादादिध्यानेन सह कर्त्तव्यमित्येष उक्तश्लोकीयो गूढोऽभिप्राय इति ॥ ३८ ॥

सर्वस्य तच्छरीरान्तर्भूतत्वेऽप्यन्तर्यामिणस्य सर्वकर्मफलप्रदत्वात्तद्भजनमाह। स इति। यथा यः आत्मा परमात्मा जागर्तीति शेषः। अग्रे स्वप्नपदोपादानात्। सर्वेषां धीवृत्त्या अनुभूतमनुभावितं सर्वं येन सः। अनुभूतशब्दोऽन्तर्भावितण्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वेषां स्थूलधीवृत्त्याऽनुभावितसात्त्विककर्मफलरूपसर्वसुखादिप्रसमीक्षक इत्यर्थः। अस्ति तथैव स एक एव स्वप्नजनेक्षिता। स्वप्ने सर्वजनानां सूक्ष्मधीवृत्त्यनुभावितराजसकर्मफलरूपसर्वसुखादीक्षिता अस्ति। एवमन्तः स्थित्वा कर्मफलप्रदस्य चेतनाचेतनशरीरिणश्चेतनशरीरगतदोषास्पर्शित्वमाह। तमिति। सत्यं स्वस्वरूपतो गुणतश्च निर्विकारम्। अनेनास्य स्वशरीरभूतचेतनाचेतनदोषास्पर्शित्वमुक्तम्। आनन्दनिधिमानन्दाश्रयम्। अनेनास्य पुरुषार्थरूपत्वमुक्तम्। इदं चानन्दस्वरूपत्वस्याप्युपलक्षणम्। 'आनन्दं ब्रह्मणो विद्वान्। 'विज्ञानमानन्दम्' इत्युभयत्रापि श्रवणात्। तमुक्तविधं परमात्मानं भजेतोपासीत। यद्वा। सत्यमित्यचिद्व्यावृत्तिः। आनन्दनिधिमिति चेत्रज्ञव्यावृत्तिः। अन्यत्र न सज्जेत्। अब्रह्मात्मकं स्वतन्त्रं किंचिद्वस्तु प्रकल्प्य तत्रासक्तो न भवेदित्यर्थः। यतो यस्मात्तदासङ्गात् आत्मनः स्वस्य पातो नाम संसारः स्यादित्यर्थः। तस्मान्नासज्जेदन्यत्रेति भावः॥ ३९॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे प्रथमोऽध्यायः॥ १॥

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात्।
तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः॥ १॥

प्रोक्तस्थूलधारणातो द्वितीये तु जितं मनः। धार्यं विष्णाविति प्रोक्तं सर्वसाक्षिण्यधीश्वरे॥ १॥

एवं वैराजधारणामुक्त्वा मुमुक्षोर्हृदयकमलोपास्यं तदुपासनानिष्ठस्यार्चिरादिना गतिं च वक्ष्यन् उक्ताया वैराजधारणया एव तावन्माहात्म्यमाह। एवमिति। पुरा पूर्वं प्रलयसमये इत्यर्थः। आत्मयोनिश्चतुर्मुखः। एवमुक्तप्रकारया धारणया तुष्टात्प्रसन्नतां प्राप्तात् हरेः सकाशात्। नष्टां पूर्वकल्पीयचतुर्मुखेन सह विनाशं प्राप्तां स्मृतिं सर्गविषयकज्ञानं प्रत्यवरुध्य लब्ध्वा व्यवसायबुद्धिः संप्राप्तप्राक्कल्पीयसमस्तजगत्सर्गविषयविज्ञानः। अत एव अमोघदृष्टिः अमोघा यथावस्थिता दृष्टिस्तत्तद्वस्तुविषयकज्ञानं यस्य स तथोक्तः सन् अप्ययात्प्रलयात्। प्राक् पूर्वं यथा आसीत्। तथा इदं विश्वं ससर्ज। पूर्वकल्पपदार्थसजातीयानेव पदार्थानसृजतेत्यर्थः। अत्र यद्यपि पूर्वकल्पे विनष्टां स्मृतिं परिलभ्येत्यनेन पूर्वकल्पे यश्चतुर्मुखः स एवास्मिन्कल्पेऽपि प्रतीयते तथापि प्रतिकल्पं चतुर्मुखानां भेद एव न्याय्यः। 'स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति' इत्यग्रेऽत्रैवोक्तेः। तथाच तत्तत्कल्पचतुर्मुखस्य 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे'। 'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति। तन्मुक्त्यवगमेन पुनरावृत्त्यसंभवात् भगवत्पूर्णकृपापात्रस्य पुनः संसारायोगाच्च। तथाहि वक्ष्यति भगवान्। 'ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः। नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः' इति। अतः प्रतिकल्पं भिन्ना एव चतुर्मुखाः। अत एव यद्यपि पूर्वानुभूतविषयकज्ञानपरः स्मृतिशब्दस्तथापीह सर्गविषयकज्ञानपरः। स्मृतिशब्दप्रयोगस्तु ज्ञातृज्ञेयज्ञानानामत्यन्तसाजात्याभिप्रायकृतः पूर्वदृष्टात्यन्तसजातीये गव्यन्तरे स एवायं गौरिति प्रत्यभिज्ञावत्। ननु वैराजधारणया चतुर्मुखस्य विश्वसृष्टिसामर्थ्यं विश्वसृष्टौ सत्यां च सृष्टानां पातालादीनां वैराजपादतलादिरूपेण धारणा इतीतरेतराश्रयवदाभाति। न च स्वक्ष्यमाणपदार्थविषयकज्ञानसद्भावेन पातालादीनामवयवत्वकल्पनं युक्तम्, स्मृतिं प्रत्यवरुध्य इत्यनेन ज्ञानस्यापि धारणातो लभ्यत्वावगमात्। सत्यम्, भगवन्नाभिकमलाच्चतुर्मुखे उत्पन्ने तदीयतपश्चर्यया भगवति च प्रसन्ने 'भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम्। ताभ्यामन्तर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान्। तत आत्मनि लोके च भक्तियुक्तः समाहितः। द्रष्टासि मां ततं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रह्मन्मयि लोकांस्त्वमात्मनः' इति वक्ष्यमाणरीत्या स्वक्ष्यमाणेषु सर्वेषु पदार्थेषु दृष्टेषु तेषां च पदार्थानां भगवदवयवत्वेन धारणया सृष्टिविषयज्ञानस्य सृष्टिविषयसामर्थ्यस्य च लाभस्यात्राभिधानात्। दैनंदिनकल्पाभिप्रायं वा। एवं प्रपञ्चशरीरकभगवद्ध्यानाद्ब्रह्मणः सृष्टिक्षमत्वलाभ उक्तः ॥ १ ॥

अथ मुमुक्षुभिः स्वहृदि उपास्यस्वरूपं वक्ष्यन् 'यावानर्थ उदपाने सर्वतः संप्लुतोदके' इति न्यायेन वेदतो मुमुक्षोः साकल्येनार्थानुपादेयत्वमाह। शाब्दस्येति। शाब्दस्य शब्दब्रह्मात्मकस्य ब्रह्मणो वेदस्य एष पन्थाः। हि निश्चितम्। एषा कथनदिग्भवतीत्यर्थः। क इत्यत्र आह। यदिति। अपगतो निवृत्तोऽर्थः पुरुषार्थो येभ्यस्तैः अपगतपरमपुरुषार्थैरित्यर्थः। नामभिः स्वर्गादिविषयकशब्दैः। धीर्बुद्धिः। ध्यायति चिन्तां करोति यत्। नाममात्रसारभूतस्वर्गाद्यर्थं कर्मणि बुद्धिप्रावण्यापादनमिति यत्सोयं वेदमार्ग इत्यर्थः। नाम्नां सारवत्त्वम्, न स्वरूपत इति द्योतनार्थं नामपदप्रयोगः। ननु 'अक्षय्यं ह चातुर्मास्ययाजिनः सुकृतं भवति' 'अपामसोमममृता अभूम' इत्यादौ स्वर्गादिसुखस्याक्षय्यताश्रवणात्कथमेवं नाममात्रसारतेति विपरीतार्थज्ञान-निवृत्तये स्वर्गादीनामपार्थत्वमेवाह। परिभ्रमन्निति। मायामये मायारूपे प्रपञ्चे। वासनया अनादिकर्मवासनया। शयानो वर्त्त-मानः। अत एव तत्र स्वर्गादिविषये परिभ्रमन् अर्थान्मोक्षस्तदुपायादीन् न विन्दते न लभते। यथा प्रसुप्तः पुरुषः स्वप्ने राज्यं संप्राप्तोऽपि क्षणानन्तरं दरिद्र एव तद्वद्वेदोदितक्लेशबहुलकर्मसंसाधनेन तत्तल्लोकं प्राप्तोऽपि निरवद्यसुखं न लभते तेषां क्षयिष्णुत्वा-दिति भावः ॥ २ ॥ ननु मातृपितृसहस्रेभ्योऽपि वत्सलतमो वेदः आत्मनामुज्जीवने प्रवृत्तः सन्कथं नाममात्रसारभूतस्वर्गाद्यर्थक-कर्माणि बोधयन्नात्मवृन्दं प्रतारयेदित्याशङ्क्यां परिहरन्मुमुक्षोस्ततः स्वापेक्षितांशस्योपादेयतामाह। अत इति। अतः वेदोक्तस्य साकल्येनानुपादेयत्वात्। कविः हेयोपादेयविषयकविवेकवान्। अस्यायं भावः। वेदो हि तमःप्रचुराणां रजःप्रचुराणां सत्त्व-प्रचुराणां च लोकानां वत्सलतयैव हितं बोधयति। यद्येषां स्वगुणानुगुण्येन स्वर्गादिसाधनमेव हितं नावबोधयेत्तदा ह्येते रजस्तमः-प्रचुरतया सात्त्विकफलमोक्षविमुखाः स्वापेक्षितफलमजानन्तः कामप्रावण्यवशा अनुपाये उपायभ्रान्त्या प्रणष्टा भवेयुरिति गुणत्रय-प्रचुराणां स्वर्गादिफलानि तत्साधनानि च बोधयति। केवलसात्त्विकस्य मुमुक्षोस्तु तानि परित्याज्यान्येव सन्ति परिगृहीतानि वा तत्फलानि परित्यज्य सर्वाणि कर्माणि मोक्षैकफलतयानुष्ठेयानीति, विवेकसंपन्नः। अत एव, अप्रमत्तः कदाचिद्देहधारणार्थतया परिग्राह्येष्वप्यन्नपश्वादिष्वनासक्तः, व्यवसायबुद्धिः स्वर्गादीनां क्षयिष्णुत्वसातिशयत्वनिश्चयात्मकज्ञानवान् सन्, नामसु नाममात्रसारभूतेषु भोग्येषु यावदर्थः स्यात्। नानाविधेषु फलेषु तत्साधनभूतेषु बहुषु कर्मसु वेदबोधितेषु सत्स्वपि यावता देहधारणमुपासनासिद्धिजन्या निर्वृतिश्च भवति तावत्परिग्रहवान्स्यादित्यर्थः। देहधारणार्थमपि क्षुद्रफलेषु न यतितव्यमित्याह। सिद्ध इति। अर्थे स्वापेक्षितेऽर्थे अन्यथा यत्नं विना पूर्वकर्मानुरूपतया यथोचितं सिद्धे दैवात्सिद्धिं प्राप्ते सति तत्र तत्तत्क्षुद्रफल-तदुपायादिष्वपि न यतेत। कथंभूतो न यतेत। तत्र यत्ने क्रियमाणे परिश्रमं समीक्षमाणः। भवितव्यमेव भवति तत्परिश्रमस्तु पुलाककण्डनवच्छ्रमफल एवेतिभावः ॥ ३ ॥

अन्यथासिद्धिं विवृणोति। सत्यामित्यादिद्वयेन। क्षितौ अतिमृदुवालुकोपेतायां पृथिव्यां सत्यां कशिपोः शय्यायाः पर्यङ्का-देरिति यावत्। प्रयासैः तदर्जनाद्यनुकूलप्रयत्नैः किम्, न किमपि। किं तु परिश्रम एवेत्यर्थः। स्वसिद्धे स्वत एव निष्पन्ने बाहौ भुजे सति उपबर्हणैरुच्छीर्षकार्जनप्रयासैरित्यर्थः। किं हि, किं नु, न किंचिदित्यर्थः। अञ्जलौ हस्तसंपुटे सति। पुरुधा नानाविधा या अन्नपात्री भोजनभाजनं तया परयाचनालभ्यभोजनभाजनार्जनेनेत्यर्थः। किम्, न किंचित्प्रयोजनम्। दिशश्च 'दिक्शब्देन दिक्पतितचैलखण्डा लक्ष्यन्ते, वल्कलानि च तानि आदिर्यस्य ऊर्णादेस्तद्दिग्वल्कलादि तस्मिन्। 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इत्यनेन पुंस्त्वम्। न तु वल्कलाद्यभावे दिशाःएव वल्कलादिस्थानीयासु सतीष्वित्यर्थस्वारस्यम्। 'अपवित्रकरो नग्नोऽनर्हः स्यात्सर्वकर्मसु' इति नग्नस्य कर्मानर्हत्वस्मरणात्। मुमुक्षोरप्यावश्यकानामनुष्ठेयत्वात्। 'अचलितमतिरच्युतः स्वधर्मात्' इति दत्तात्रेयस्यापि स्वधर्माचरणोक्तेः। जडविप्रस्यापि 'स्वपितृसंनिधावेवासध्रोचीनमिव स्म करोति' इति स्वपितृ-सांनिध्याभावे तु याथातथ्येन करोतीत्यर्थसिद्धेस्तस्य स्वधर्माचरणं कुपटावृतकटिरिति विशेषणेन गुह्याङ्गाच्छादकचीवरधारणं च प्रतीयते तत एवंविधानामप्यनग्नत्वमेव युक्तमित्यलमप्रकृतार्थपल्लवनेन। दुकूलैः क्षौमादिवासोभिः किम्, न किमपि प्रयोजनम् ॥ ४ ॥ ननु भवादृशानां योगिनां क्षित्यादिना शरीरयात्रासिद्धावप्यपरिपक्वयोगिनां पुंसां शीतादिनिवारणाय वल्क-लान्यन्नं तोयं वासस्थानं चापेक्षितं तच्च याच्ञादिप्रयत्नं विना कथं प्राप्येत तत्राह। चीराणीति। चीराणि जीर्णवस्त्रखण्डानि पथि मार्गे न सन्ति किम्। अयं भावः। यदा ज्वरशीताद्यार्तिवशतया कन्थादिं विना स्थातुं न शक्यं स्यात्तदा वस्त्रक्षालनार्थकरजका-वतारपतितदोरकानुपादाय बब्बूलकण्टकीयसूच्या मार्गलब्धवस्त्रखण्डैः कृतक्षालनैः कन्थां निर्माय तया तामापदमुत्तीर्य तां रक्षित्वा परित्यज्य वा गुह्याङ्गाच्छादनमात्रधरो विचरेदिति किमर्थं तदर्थं याचनं विधीयते इति। भोज्यार्थस्य याचनं विना कथं सिद्धिः स्यादित्यत्राह। परान् बिभ्रति पुष्णन्ति फलादिभिर्ये ते परभृतः। अङ्घ्रिपाः कपित्थजम्बूकर्कन्ध्वादयस्तरवः। भिक्षां न एव दिशन्ति अपि तु दिशन्त्येवेत्यर्थः। स्वतो याचनमन्तरैव भिक्षाप्रदास्तत्रस्तदर्थमपि याचनं न युज्यते इति भावः। ननु भवत्त्वेवं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तोयार्थं तु याचनं युज्यते तत्राह। सरितः स्वत एव शीतमिष्टोदकवहाः स्रोतस्विन्य अशुष्यन् अपि किम्। अयत्नसिद्धास्ताः सर्वत एवोपलभ्यन्ते ततो जलार्थयाचनमपि न घटत एवेति भावः। ननु वर्षवातातपातिशयत्वे किंचिद्वासस्थानं त्वपेक्षितं तद्याचनं विना कथं प्राप्यते इत्यत्राह। गुहा देवखातगिर्यादिबिलानि रुद्धाः केनचित्पिहिताः किम्। सर्वत्र वर्षादिनिवृत्तये ता विद्यन्ते एव किं तद्याचनेनेति भावः। ननु तासु सिंहादिसद्भावे कदाचित्तासामलाभे वा किं कार्यं तत्राह। अजितः कैश्चिदप्य-पराजितः स्वभक्तानां समन्ततोऽभिरक्षको भगवान् उपसन्नान्स्वशरणागतान् न अवति न रक्षति किम्। रक्षत्येव। एवं सर्वथा स्वदेहनिर्वाहकवस्तूनां स्वतः सिद्धत्वे सति कवयो ज्ञानिनो योगिजनाः। धनेन यो दुर्मदस्तेनान्धान्विवेकचक्षुर्वर्जितान् कस्माद्धेतोः भजन्ति। कविभिरन्नाद्यर्थमपि धनादिदुर्मदान्धा न भजनीयाः, किंतु यदृच्छालब्धाशनादिना भाव्यमिति भावः॥ ५॥

उक्तरीत्या स्ववर्त्तनं विदधत इतरत्र वैतृष्ण्याद्भगवत एव प्रीतिविषयत्वाच्च दुःसेव्यानितरान् प्रोज्झ्य तेनापि हरिस्तु सम्यक् सेव्य इत्याह। एवमिति। एवमुक्तप्रकारेण। स्वचित्ते चित्तात्मकनिजान्तःकरणे स्वत एव सिद्धे उक्तानुसंधानपरे सति। यदृच्छया लब्धाशनादिवृत्तिं दृष्ट्वा प्रसन्नस्य स्वतः स्वतन्त्रस्य हरेः प्रसादात्स्वचित्ते एवं स्वाधीनतया वर्तमाने सतीत्यर्थः। यः आत्मा अन्तःप्रविश्य धारकः, अत एव प्रियः निरतिशयप्रीतिविषयः, अत एव अर्थः निरतिशयपरमपुरुषार्थस्वरूपः। पुरुषार्थ-स्वरूपस्यापि दुर्भगत्वेऽभजनीयत्वं स्यादत आह। भगवान् हेयप्रतिभटसमग्रज्ञानशक्तिबलैश्वर्यवीर्यतेजःसंपन्नस्वरूपः। एवं-विधैतत्स्वरूपस्य तदीयज्ञानादिगुणानां च परिच्छिन्नत्वशङ्कां निवर्त्तयति। अनन्तः स्वरूपसौन्दर्यलावण्यगुणाद्यन्तरहित-त्वादनन्तः। यत्र यस्मिन् सेव्यमाने संसारहेतुपरमश्च बन्धहेतुभूताविद्यानिवृत्तिरपि भवति। तमेवंविधं भगवन्तं निर्वृतः इतरविषयवैतृष्ण्यान्निरतिशयसुखरूपपरमात्मोपासनाच्च सुखितः। नियतार्थः नियतप्रयोजनः। फलान्तरलब्ध्याशासंनिवृत्तः सन्नित्यर्थः। भजेत उक्तविधो योगी उपासीतेत्यर्थः॥ ६॥ एतदेवार्थान्तरचिन्तानिन्दया द्रढयति। क इति। तामुक्तविधां परस्य श्रीहरेरनुचिन्तां संस्मरणं धारणा वा ताम् अनादृत्य अगणयित्वा तु पशून् ऋते कर्मजडान्विना यथा 'पशुरेवं स देवानाम्' इति श्रुतेः। असतीमशोभनां विषयचिन्तामिति शेषः। कः नाम कोनु वेत्यर्थः। युञ्ज्यात् कुर्यात्। कथंभूतः नरके विगत-तरणत्वाद्वैतरणी नाम नदी तस्यां पतितं हरेरनुपासनाख्यदोषात्संपतितं तत्र च स्वकर्मजान् परितापानाध्यात्मिकादिक्लेशान् जुषाणं सेवमानं जनं पश्यन्। श्रीहरिभजनचिन्तामनादृत्य काम्यकर्मासक्त्या स्वर्गादिसुखसंप्रेप्सुः पशुरेवेति भावः। 'चतुर्वेद्यपि यो विप्रो वासुदेवं न विन्दति। वेदभारभराक्रान्तः स वै ब्राह्मणगर्दभः' इतिवचनात्॥ ७॥

योग्यतातारतम्येनाधिकारिणां बहुत्वात्स्थूलरूपोपासनायोग्यानामुपास्तिमभिधायाधुना स्वदेहहृदयकमलकर्णिका-निकेतनात्मोपासनायोग्यानां तदितरफलान्तरतदुपायनिवृत्तानामुपासनात्मकभगवद्ध्यानप्रकारमाह। केचिदित्यादिना। भगवदुपासनाप्रकारबाहुल्येनोपासकबाहुल्यात्केचिदित्युक्तिः, न तु स्वासंमतत्वेन। केचित्स्वात्मनि परमात्मोपासनात्मक-योगयोग्या योगिनः स्वदेहस्यान्तर्मध्ये यो हृदयावकाशस्तस्मिन् वसन्तं प्रादेशमात्रं प्रादेशसंबन्धिनी मात्रा वपुःपरिमाणं यस्य तं हृदयान्तःप्रदेशसंबन्धिन्या मात्रया परिच्छिन्नमित्यर्थः। 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इति छान्दोग्ये वैश्वानरविद्यायां त्रैलोक्यशरीरकेऽप्युपासकानुग्रहाय उपासनायाः प्रदेशसंबन्धिमात्रया परिच्छिन्नत्वश्रवणात् हृदय-कमलस्याङ्गुष्ठमात्रत्वाच्च उक्त एवार्थो युक्तस्ततस्तर्जन्यङ्गुष्ठविस्तारः प्रादेशस्तत्परिमितमित्ययुक्तमिति बोद्धव्यम्। एतदर्थविचारः श्रीभाष्ये प्रथमाध्यायगतद्वितीयपादे 'वैश्वानरः साधारणशब्दविशेषात्' इत्यारभ्य नवसु सूत्रेषु भवति स ततः सविस्तरं बोध्यः 'ततस्तौ हृदयाकाशे पश्येदन्तर्दृशा चिरम्। आत्मज्योतिश्च तत्रैव पश्येत्तस्थं च साक्षिणम्' इति सौधासैन्धवीयद्विशताधिकैक-विंशतितमे तरङ्गे श्रीहरिणा हृदयाकाशे ध्यानोक्तेः। प्रादेशमात्रं हृदयावकाशमात्रप्रमाणतया प्रतीयमानमिति तु शतानन्द-मुनिचरणाः। चतुर्भुजं चतुर्बाहुम्। कंजं कमलं च रथाङ्गं चक्रं च शङ्खश्च गदा च तासां धरस्तम्। कमलचक्रे दक्षिणबाहुभ्यां शङ्खगदे वामबाहुभ्यां बिभ्राणमित्यर्थः। एवंविधं पुरुषं धारणया स्मरन्ति धारणापूर्वकमुपासते इत्यर्थः। तैलधारावदखण्डित-मनोवृत्त्या स्मरन्तीतिभावः॥ ८॥ प्रसन्नवक्त्रमित्यादिना श्लोकचतुष्टयेन तमेव विशिनष्टि। प्रसन्नवक्त्रामनुग्रहोन्मुखमुखम्। नलिनं पद्मं तद्वदायते दीर्घे ईक्षणे यस्य तम्। कदम्बस्य नीपस्य कुसुमानि कदम्बानि तेषां किञ्जल्काः केसरास्तद्वत्पिशङ्गे पीते वाससी यस्य तम्। लसन्ति महारत्नानि येषु तानि हिरण्मयानि सुवर्णमयानि अङ्गदानि केयूराणि यस्य तम्। स्फुरन्ति महारत्नानि येषु तानि किरीटकुण्डलानि यस्य तम्॥ ९॥

उन्निद्रमिति। उन्निद्रं विकसितं यत् हृत्पङ्कजं हृदयकमलं तस्य कर्णिका मध्यं सैवालयं स्थानं तस्मिन्। योगेश्वरैः सनकादिभिरास्थापितौ ध्यानविषयीकृतौ पादपल्लवौ यस्य तम्। श्रीर्लक्ष्मीरेव लक्ष्म स्वर्णरेखारूपेण वक्षसि चिह्नं यस्य तम्। यद्वा श्रीरेव लक्ष्मास्यास्तीति तम्। पामादिविहितमत्वर्थीयो नप्रत्ययस्तस्याकृतिगणत्वात्। कुं पृथिवीं स्तुभ्नाति वेष्टयतीति कुस्तुभः समुद्रस्तस्माज्जातं कौस्तुभं रत्नं तेन युक्ता कंधरा ग्रीवा यस्य तम्। कौस्तुभं रत्नं कंधरायां यस्येति वा। अत्र कंधरा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दस्तदासन्नवक्षःपरः। अम्लाना ग्लानिमप्राप्ता लक्ष्मीः शोभा यस्यास्तया वनमालया आचितं व्याप्तम्। अक्षितमितिपाठे सुन्दरम्। वृतमितिपाठे आचितेन समानार्थता ज्ञेया ॥ १० ॥ विभूषितमिति। मेखलया कटिसूत्रेण महाधनैरनर्घ्यैः अङ्गुलीयकैरङ्गुलीभूषणैः, नूपुरौ मञ्जीरौ च कङ्कणे कटकौ च तान्यादयो येषां तैश्च विभूषितं विशेषेणालंकृतम्। स्निग्धाश्चामलाश्चाऽऽकुञ्चिता वक्राश्च नीला मेचकाश्च ये कुन्तलास्तैर्विरोचमाने आनने यो हासस्तेन पेशलः सुन्दरस्तम् ॥ ११ ॥ अदीनेति। अदीनमुदारं यल्लीलाहसितं तेन युक्तं यदोक्षणं तेनोल्लसन्तो ये भ्रूभङ्गा भ्रूविक्षेपास्तैः संसूचितो भूर्यनुग्रहो येन तम्। यद्वा। अदीना चासौ लीला च तयोद्भूताभ्यां हसितेक्षणाभ्यामुल्लसन्त्योर्भ्रुवोर्भङ्गेन स्फुरणविशेषेण संसूचितो भूर्यनुग्रहो येन तम्। चिन्तामयं चिन्ताविषयं चिन्तयाविर्भवन्तं चिन्ताप्रचुरमीक्षेतेति क्रियाविशेषणं वा। एवंविधम् एनमीश्वरं यावत् धारणया मनः अवतिष्ठते तावत् ईक्षेतोपासीतेत्यर्थः ॥ १२ ॥

युगपत्कृत्स्नशुभाश्रयगोचरध्यानाशक्तस्य तदुपायभूतमुक्तरूपस्यैव ध्यानक्रमविशेषमाह। एकैकश इति। गदाभृतो गदाधरस्य परमात्मनः पादावादिर्यस्मिन्कर्मणि यथा तथा यावद्धसितं पादप्रभृतिमन्दस्मितावधीत्यर्थः। एकैकशः अङ्गानि एकैकावयवमित्यर्थः। धिया स्वमनीषया अनुभावयेच्चिन्तयेत्। जितं जितम् अनायासेन ध्यानविषयतां संप्राप्तं संप्राप्तं स्थानं पादगुल्फाद्यवयवमित्यर्थः। अपोह्य त्यक्त्वा। परं परं जङ्घाजान्वादि धारयेत्। तच्च धीर्बुद्धिः यथा यथा शुध्यति प्रसीदति अनाकुलीभवतीत्यर्थः। तथा तथा धारयेत। कृत्स्नशुभाश्रयगोचरभक्तियोगोत्पत्तेः पूर्वमिदमवयवशो विभावनं यत्नेन कर्तव्यमुत्पन्नायां भक्तौ ह्यन्ययोगात् ॥ १३ ॥ अतः पादादि तत्सर्वं यत्नेनावयवशो ध्येयमित्याह। यावदिति। परे ब्रह्मादिभ्य उत्कृष्टा ब्रह्मपुरस्था मुक्तपुरुषा अवरा निकृष्टा यस्मात्तस्मिन् विश्वेश्वरे सकलविश्वनियन्तरि द्रष्टरि सर्वसाक्षिणि सर्वज्ञे इति यावत्। अस्मिन्नुक्तविग्रहविशिष्टे पुरुषे भक्तियोगः विशेषाकारेण कृत्स्नशुभाश्रयगोचरः प्रीतिपूर्वकोऽविच्छिन्नो ध्यानयोगः यावत् न जायेत नोत्पद्येत तावत् क्रियावसाने आवश्यकानुष्ठानान्ते पुरुषस्य प्रादेशमात्रं पुरुषमित्युक्तस्य भगवतः स्थवीयः स्थविष्ठं रूपं दिव्यात्मस्वरूपापेक्षया स्थविष्ठविग्रहं प्रयतः समाहितः स्मरेत अवयवशो ध्यायेत ॥ १४ ॥ एवमेकैकमवयवं शिक्षयित्वा पश्चादेकैकाङ्गध्यानपूर्वकं कृत्स्नध्यानाभ्यास उक्तः। अथेदृशोपासननिष्ठस्य देहत्यागप्रकारं वक्ष्यन्स्वात्मनः परमात्मनि समर्पणप्रकारमाह। स्थिरमिति। अङ्ग हे राजन् यतिः योगी यदा परिपूर्णभक्तियोगसंपादकशरीरावस्थितिहेतुभूतप्रारब्धावसानकाले इति शेषः। इमं लोकं प्रकृतममुं देहमित्यर्थः। जिहासुर्हातुमिच्छुः भवति तदा मनः स्वमानसं देशे गङ्गातीरादौ। काले उत्तरायणादौ च न सज्जयेत् आसक्तं न कुर्यात। किं तु जितासुः जितप्राणः। स्थिरं निर्भयदेशस्थतया स्थिरतोपेतं सुखं स्वास्तिकपाद्मादिषु यत्सुखकरं च आसनम् आश्रित आस्थितः सन् मनसा प्राणानिन्द्रियाणि नियच्छेदनन्यपराणि कुर्यात्। चोऽवधारणे ॥ १५ ॥

मन इति। अमलया भगवदुपासने निर्धूतमलया स्वबुद्ध्या निश्चयात्मिकया स्वमत्या मनः नियम्य बुद्धिव्यापारमात्ररतं कृत्वा एतां मनःसंयुतां बुद्धिं क्षेत्रज्ञे निनयेत् नियच्छेत्। तं क्षेत्रज्ञम् आत्मनि परमात्मनि नियच्छेत्। एवम् आत्मानं जीवम्, आत्मनि परमात्मनि अवरुद्ध्य समर्प्य धीरः, लब्धा उपशान्तिर्येन सः प्राप्तनिवृत्तिः सन्नित्यर्थः। कृत्यात् विरमेत। अमलया ज्ञानादित्रिसाधनयुक्तया भक्त्या कृत्वा निर्मलत्वं प्राप्तया स्वबुद्ध्या मनो नियम्य, मनसो बुद्धौ विलापनं कृत्वेत्यर्थः। एतां बुद्धिं क्षेत्रज्ञे जीवे निनयेत्प्रापयेत्। तं क्षेत्रज्ञाभिधं जीवात्मानम् आत्मनि अक्षरब्रह्मणि प्रापयेत्। अक्षरब्रह्मणैक्यं प्राप्तमात्मानं क्षेत्रज्ञम् आत्मनि परमात्मसंज्ञे परब्रह्मणि अवरुद्ध्य निश्चलं कृत्वा धीरः लब्धोपशान्तिः परमात्मसमाधिना प्राप्तपरमानन्दः सन् कृत्याद्विरमेतेति वा व्याख्या ॥ १६ ॥ अस्य प्राप्यं परमात्मस्वरूपमाह द्वाभ्याम्। न यत्रेति। यत्र संप्राप्यपरमात्मस्वरूपे अनिमिषां ब्रह्मादीनां देवानां परः कालः न प्रभुः किमपि कर्तुं न समर्थः। तत्र ये जगताम् ईशिरे ते देवाः कुतः, तु, प्रभवः स्युः। यदा यत्र जगन्नियामका देवा न प्रभवस्तदा तत्र तन्नियाम्यानां जगदन्तर्वर्तिप्राणिनां तु तत्प्रभुतावार्तैव वक्तुं योग्या न भवतीत्यनुक्तसिद्धमेव। तत्सर्वैरनियम्यं सर्वनियन्तृ च भवतीति भावः। किंच। यत्र प्रधानं प्रधानप्रकृतिः न, सत्त्वं रजः तमश्चेति तद्गुणाः न। महान्प्रधानकार्यभूतं महत्तत्त्वं न, विकारः महतः कार्यरूपोऽहंकारश्च न, वै। स्वकीयकार्यजननक्षमा नैव भवन्तीत्यर्थः ॥ १७ ॥ परमिति। यत् वैष्णवं विष्णोः सम्बन्धि परं सर्वोत्कृष्टम्, पद्यते गम्यते इति पदं प्राप्यं स्वरूपम् आमनन्ति। वेदान्ता इति शेषः। किं कर्तुमिच्छव आमनन्तीत्यत्राह। यत् यस्मिन् अतत् परमात्मव्यतिरिक्तं नेति नेतीत्येवं उत्सिसृक्षव उत्स्रष्टुमिच्छवः। परमात्मस्वरूपातिरिक्ताऽतदात्मकप्राकृतभावं तत्र निषेद्धुं नेति नेतीति पदव्याहारैर्बोधयन्त इत्यर्थः। कालादिभिरनियाम्यं कालादीनां नियन्तृ च यत्तत्त्वादिप्रकृतिकार्यास्पृष्टं वैष्णवप्राप्यं स्वरूपं तत् वेदान्ता आमनन्तीति भावः। पुनः किं कृत्वाऽऽमनन्तीत्यत्राह। दौरात्म्यं रागाद्युपहतचित्तत्वं विसृज्य त्यक्त्वा। तत् अर्हपदम् अर्हस्याराधनीयस्य भगवतः पदम्, अनन्यतात्पर्यकाः सन्तः आमनन्ति। तत। स योगी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृदा हृदयेन पदे पदे क्षणे क्षणे उपगुह्य आश्लिष्य कृत्याद्विरमेत तदा कृतकृत्यो भवेदिति पूर्वेणान्वयः। अत्रोक्तार्थं स्फुटता श्रीगोपालानन्दस्वामिकृतव्याख्यातो बोध्या ॥ १८ ॥ एवं परमात्मस्वरूपसंप्राप्तसमाधेर्योगिनो भगवत्स्वरूपसंप्राप्तिप्रकार-मुक्त्वास्य देहादुत्क्रान्तिप्रकारमाह। इत्थमिति। मुनिः इत्थम् उपरमेत् देहादिति शेषः। तु शब्दः कृत्यादुपरतेर्देहादुपरतेश्च वैषम्यद्योतकः। इत्थमिति यदुक्तमेतदेवोपपादयति विज्ञानेति। व्यवस्थितः किंचिदप्यब्रह्मात्मकं न भवति सर्वमपि ब्रह्मात्मकमस्तीति कृतव्यवस्थितमतिः विज्ञानं भगवदुपासनात्मकं ज्ञानं यत्तदेव दृक् प्रत्यक्षतापन्नं यस्य सः। वीर्यं तादृशस्य ज्ञानस्य यत्सामर्थ्यं तेन सुरन्धितः निःशेषनिवृत्तः आशयो वासना यस्य सः। मुनिः योगी स्वपार्ष्णिना स्वपादमूलेन गुदं मूलाधाराख्यं चतुर्दलपद्मस्थानम् आपीड्य निरुद्ध्य ततः मूलाधारपीडनानन्तरम् अनिलं प्राणवायुं षट्सु नाभ्यादिषु वक्ष्यमाणेषु स्थानेषु, जितः क्लमः खेदो येन सः। निवृत्तश्रमः सन्नित्यर्थः। उन्नमयेत् ऊर्ध्वं नयेत्। लिङ्गस्थषड्दलस्वाधिष्ठान-पद्मनयनपूर्वमूर्ध्वमाकृष्य नाभिस्थे दशदले मणिपूरके स्थापयेदित्यर्थः॥ १९ ॥

नाभ्यामिति। मनस्वी जितचित्तः मुनिर्योगी नाभ्या स्थितं स्वाधिष्ठानादाकृष्य, नाभिस्थे दशदले मणिपूरके चक्रे स्थितमित्यर्थः, प्राणं हृदि अनाहताख्ये द्वादशदले हृदयकमले अधिरोप्य, तस्माद्धृदयपद्मात्सकाशात उदानगत्या उदानवायोः संचारप्रकारेण तं प्राणम् उरसि कण्ठादधोदेशस्थे षोडशदले विशुद्धिचक्रे नयेत्। ततः सकाशात् धिया स्वबुद्ध्या अनुसंधाय गन्तव्यदेशानुसंधानं विधाय। स्वतालुमूलं स्वजिह्वामूलवर्त्तिपूर्वचक्रस्यैवाग्रभागम्। शनकैः नयेत्। ततो बहुधागमनसंभवाच्छन-कैरित्युक्तम् ॥ २० ॥ तस्मादिति। निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायतनानि प्राणमार्गा येन तथाभूतः। अनपेक्षः विषयान्तरापेक्षावर्जितो मुनिः। तस्मात्स्वतालुमूलात् भ्रुवोः अन्तरं भ्रूमध्यप्रदेशं तत्रस्थद्विदलाज्ञाचक्रं प्रति उन्नयेतोर्ध्वं नयेत। तत्र भ्रूमध्ये मुहूर्त्तार्द्धमेकघटिकापर्यन्तं स्थित्वा अकुण्ठदृष्टिः स्वगन्तव्यविषयाऽप्रतिहतज्ञानसंपन्नः परं परमात्मानं गतः प्राप्तः। अनुसंदधत् सन्नित्यर्थः। मूर्द्धन् मूर्द्धानं ब्रह्मरन्ध्रम् इति यावत्। 'सुपां सुलुक्' इति सुपो लुक् निर्भिद्य विसृजेत्। स्थूलदेहमिति शेषः ॥ २१ ॥ अथ मुमुक्षोर्गन्तव्यमर्चिरादिमार्गं वक्ष्यंस्तस्य धूमादिमार्गस्य हेयत्वज्ञापनाय धूमादिमार्गेण गतानां गन्तव्यलोकानाह। यदीति। हे नृप पारमेष्ठ्यं चतुर्मुखलाकम् अष्टाधिपत्यम् अणिमाद्यष्टैश्वर्यसंपन्नम्। वैहायसानां खेचराणां सिद्धानामिति यावत। यत् विहारं विहारस्थानम्। उत तदपि यदि प्रयास्यन् गमिष्यन् भवति तदा गुणसंनिवाये मरणे मनसा इन्द्रियैश्च सहैव गच्छेत्। स्थूलदेहस्यैव भस्मीभावात् सूक्ष्मदेहेन सहैव गच्छेदित्यर्थः॥ २२ ॥

योगेश्वराणामिति। योगेश्वराणां भगवद्भक्तिव्यतिरिक्तयोगमात्रनिष्ठानाम् अब्रह्मात्मकस्वतन्त्रजीवोपासकाना-मित्यर्थः। त्रिलोक्याः भूरादिस्वर्गान्तलोकत्रयस्य अन्तमध्ये बहिः जनलोकादिषु च पवनान्तरात्मना पवनस्य वायोरन्तर्मध्ये आत्मा यस्य तेन वायुभूतसूक्ष्मदेहेनेत्यर्थः। गतिम् आहुः। भगवद्भक्तिव्यतिरिक्तयोगनिष्ठानां गतिरितरैः केवलकर्ममात्रप्रसक्तैः न लभ्यते इत्याह। नेति। विद्या शास्त्रजन्यं ज्ञानं च, तपः कर्मयोगश्च, योगो यमनियमादिश्च, समाधिरब्रह्मात्मकस्वात्मस्वरूपा-नुसंधानं च तान् भजन्तीति तेषां योगेश्वराणां तां गतिं ब्रह्माण्डान्तर्गतापेक्षितलोकगतिं कर्मभिरभिसंहितफलैः कर्मभिः न प्राप्नुवन्ति। केवलकर्मिभ्योऽधिको यागी केवलयोगिभ्योऽधिको भगवदुपासक इत्यभिप्रायः। एवं हेयत्वेन धूमादि-मार्गगतिरुक्ता ॥ २३ ॥ अथ मुमुक्षोरर्चिरादिमार्गगमनप्रकारमाह। वैश्वानरमिति। हे नृप ब्रह्मपथेन ब्रह्मप्रेप्सोर्मार्गभूतया शोचिषा प्रकाशमानया सुषुम्णया सुषुम्णाख्यया नाड्या देहात् निर्गत इति शेषः। विहायसा शीर्षकपालबहिष्ठाकाशेन गतः ब्रह्मधाम प्रति चलितो योगी वैश्वानरं श्रुतावर्चिःशब्देनोक्तमातिवाहिकदेवं याति। अथानन्तरं विधूतकल्कः निवृत्तपुण्यपापः सन् उदस्तादुपरिस्थितं हरेरादित्यस्य शैशुमारं शिशुमाराख्यं चक्रं प्रयाति। सुषुम्णा देहस्यान्तर्बहिश्चावस्थितास्तीत्यादिविशेषविचारः सुधासिन्धोः पञ्चषष्टितमतरङ्गे 'इडा वामे स्थिता नाडी पिङ्गला दक्षिणे तथा। तयोर्मध्ये सुषुम्णास्ति हृद ऊर्ध्वं विनिःसृता। तस्या अन्तं तु मूर्द्धानं यदा प्राप्नोति योगवित्। तदा वैश्वानरं देवं शिशुमारस्थमेत्य सः। तेजोमयीं सुषुम्णां च मार्गरूपां समीक्षते। सा तु दीर्घा ब्रह्मरन्ध्रान्मायेशपुरुषावधि। अस्तीत्युक्ता सुषुम्णा ते यथान्तश्च बहिः स्थिता' इत्युक्तो वेदितव्यः ॥२४॥ तदिति विश्वस्य ग्रहतारकनक्षत्रादिकृत्स्नस्य नाभिमाश्रयभूतं विष्णोः स्थानमिति शेषः। विरजेन प्रणष्टपुण्यपापेन अणीयसा सूक्ष्मतरेण आत्मना तु लिङ्गशरीरेणैव तुशब्दोऽवधारणे एकोऽसहायः सन् योगी ब्रह्मविदां नमस्कृतं ब्रह्मविद्भिर्नमस्कृतं तत् शिशुमारचक्रम् अतिवर्त्य यत् यत्र कल्पायुषः आकल्पन्तायुःकालाः विबुधा देवाः रमन्ते। तं जनलोकम् उपैति प्रयाति ॥ २५ ॥

अथो इति। अथो अनन्तरम्। स योगी अनन्तस्याधस्तादवस्थितस्य शेषभगवतः मुखानलेन अवान्तरप्रलये शेष-मुखोद्भूताग्निना विश्वं त्रैलोक्यं दंदह्यमानं निरीक्ष्य त्रिकालज्ञानबलाद्भविष्यदऽपरोक्षं दृष्ट्वेत्यर्थः। यत्स्थानं द्वैपरार्ध्यं द्विपरार्द्धस्थायि सिद्धेश्वरैः जुष्टानि धिष्ण्यानि विमानानि यस्मिंस्तत्। पारमेष्ठ्यं चतुर्मुखसंबन्धि उ श्रेष्ठं तत्स्थानं निर्याति। वरुणेन्द्रादि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राप्तिस्त्वर्थसिद्धा। केचित्तु जनलोके स्थित्वा कल्पान्ते पारमेष्ठ्यं पदमुपैतीत्ययमर्थोऽसमञ्जस एव। पुण्यपापविधूतस्योक्तत्वेन तत्रावस्थितिहेतुभूतकर्माभावात्तेषु लोकेषु स्थित्ययोगादतो दोषं तत्र दृष्ट्वा पारमेष्ठ्यं तद्यातीत्यर्थो युक्त एव ॥ २६ ॥ चतुर्मुखलोकस्य स्वर्गाद्यपेक्षया चिरकालस्थायित्वेऽपि शोकाद्यसंभिन्नत्वेऽपि तत्रत्यानां स्वाधोवर्त्तिलोकभोग्यशोकादीक्षया दयाजन्यदुःखानुभवनमाह। न यत्रेति। यत्र पारमेष्ठ्ये पदे शोकः दुःखादिहेतूनामात्मन्यविस्मरणं न। जरा देहवैवर्ण्यतापादिवृद्धावस्था न। मृत्युः प्राणवियोगहेतुः न। अर्तिः रोगादिजं दुःखं न कुतश्चित् शीतातपवातवर्षादिभ्य इत्यर्थः। उद्वेगो मनः क्षोभश्च भयमागामिदुःखदर्शनजं ज्ञानं च ते न। अनिदंविदाम् इदंशब्दवाच्यपरिदृश्यमानप्रपञ्चविलक्षणपरब्रह्मस्वरूपाविदुषां क्रियया कर्मणा हेतुभूतेन दुरन्तमपारं यद्दुःखं तस्य प्रभवः दुःखोत्पत्तिहेतुभूतः संसारस्तस्यानुदर्शनम् उत्प्रेक्षणं तस्मात्। चित्ततश्चित्तेन अदः दुःखं यत् तद्विनेति शेषः ॥ २७ ॥ तत इति। ततः विशेषं पृथिवीमयमण्डकटाहं प्रतिपद्य व्याप्येत्यर्थः। तेनात्मना पृथ्वीरूपेणोपलक्षितः सन्। निर्भयः क्लेदनादिभयवर्जितः संश्च अपः पृथिव्यावरणाव्यवहितं जलावरणं प्रतिपद्य अनलमूर्त्ति तदनन्तरावर्त्तमानमावरणाग्निमित्यर्थः। प्रतिपद्य प्रथमान्तपाठे तन्मयमूर्तिः सन्नित्यर्थः। अत्वरन् दाहादिशङ्काराहितत्वात्त्वरामकुर्वन्नित्यर्थः। ज्योतिर्मयः सन् वायुर्भूत्वा अभ्रं भवतीतिवत्संश्लेषाभिप्रायो ज्योतिर्मयशब्दः। वायुमनलाव्यवहितावरणवायुम् उपेत्य काले पूर्वपूर्वावरणातिक्रमानन्तरकाले। वाय्वात्मना वायुसंश्लिष्टरूपेणोपलक्षितः सन् बृहत् स्वकार्यभूतवाय्वाद्यपेक्षया वृद्धिमत् आत्मनः विष्णोः लिङ्गम् आत्मलिङ्गं खं वाय्वव्यवहितमावरणाकाशम् उपेत्य गन्धादीनि प्रयातीति संबन्धः ॥ २८ ॥

एवमावरणानि भित्त्वा गच्छतो मुक्तस्य सूक्ष्मदेहस्थैरिन्द्रियैस्तत्तद्भूतगुणग्रहणमाह। घ्राणेनेत्यादिना। घ्राणेन अधिष्ठितेन स्वकीयघ्राणेन्द्रियेण। गन्धम् आवरणभूतपृथ्व्या गन्धगुणम् उपेत्य, एवं रसनेनेन्द्रियेण अपां गुणं रसम्। दृष्ट्या चक्षुरिन्द्रियेण तेजोगुणं रूपम्। त्वचा त्वगिन्द्रियेण श्वसनं वायुगुणं स्पर्शम्। श्रोत्रेणेन्द्रियेण नभोगुणत्वं नभोगुणं शब्दभावं च उपेत्य, योगी प्राणेन अन्तःकरणेन आकूतिमभिप्रायम् उपैति। यद्वा। प्राणेन तत्तत्कर्मेन्द्रियेण आकूतिं तत्तत्क्रियाम् उपैति। वै त्वेव चेत्यव्ययानि सर्वेषां सांकर्याभावद्योतकानि। ननु घ्राणादिनेन्द्रियेण गन्धादिं तत्तद्विषयं तु प्राकृता अपि जना गृह्णन्त्येवास्यापि तथात्वे तेभ्यः को विशेष इति चेत् घ्राणाद्यात्मना गन्धादिभावेन तत्तद्याथात्म्यानुभवनरूपोऽस्य महानेव विशेषोऽवगन्तव्यः। अत्र प्राणशब्देनेन्द्रियवृत्तिहेतुभूतमुख्यप्राणेन विवक्षितस्तेनाकूतिग्रहणासंभवात्। अतोऽन्तःकरणं विवक्षितम्। अन्तःकरणप्रसूतो ह्यभिप्रायः। एवं घ्राणादिभिर्गन्धादीनुपेत्य तत्तद्भूतभेदनदशायां तत्तद्गुणान् गृह्णन्नुपैतीत्यर्थः ॥ २९ ॥ तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्त्या महदादिप्राप्तिमाह। स इति। स योगी गत्या गमनेन देवमयं देवोत्पत्तिप्रधानम्। मनोमयं मनःप्रधानम्। दिग्वाताकंप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रप्रजापत्यात्मकदेवानां मनसश्चोत्पत्तिकारणभूतं सात्त्विकांहकाररूपमित्यर्थः। भूतानि पृथिव्यप्तेजोवाय्वाकाशरूपाणि च सूक्ष्माणि गन्धरसरूपस्पर्शशब्दरूपाणि च तत्समाहारम इन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणरूपज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थरूपकर्मेन्द्रियाणि च तेषां संनिकर्षं कारणभूतम्। भूतसूक्ष्मकारणतामसाहंकाररूपम् इन्द्रियकारणराजसाहंकाररूपं चेत्यर्थः। इन्द्रियाणामुपलक्षणत्वाद्बुद्धिप्राणावपि राजसाहंकारकार्यभूतावेव। एवंविधं विविधं विविधं कार्यमस्येति विकार्थं तम्। स्वकार्यरूपेण परिणामिनमहंकारमित्यर्थः। संसाद्य तेन सह। विज्ञानतत्त्वं महत्तत्त्वं याति। ततः गुणानां सत्त्वरजस्तमसां संनिरोधः साम्यं यस्मिंस्तत् प्रधानं याति। अहंकारस्त्रिविधः। तामसो राजसः सात्त्विक इति। तत्र तामसाज्जडानि पृथिव्यादिपञ्चभूतानि पञ्चशब्दादीनि चेत्येवं दशोत्पद्यन्ते। राजसाद्बहिर्मुखानि दशेन्द्रियाणि बुद्धिप्राणौ च जायन्ते। सात्त्विकान्मन इन्द्रियदेवताश्च प्रादुर्भवन्ति। तेषां लयोऽपि तत्तदहंकारे एव। केचित्तु सत्त्वतमसोः कार्ये पृथगुक्त्वा सत्त्वतमःसंनियोगत इन्द्रियोत्पत्तिं संभाव्य रजसः पृथक् कार्यं न वदन्ति। चेतसस्तु महद्रूपत्वान्न तेषु गणनम् ॥ ३० ॥

तेनेति। अवसाने प्रकृतेरवधौ सति 'गौरनाद्यन्तवती सा जनित्री भूतभाविनी नित्या सततविक्रिया' इति श्रुतेः प्रकृतेर्नित्यत्वात् 'याथातथ्यतोऽर्थान् व्यदधात्' इति श्रुतेः। सत्यकार्यहेतुत्वात्सत्यैव तव शक्तिर्माया न त्विन्द्रजालतुल्या' इति लघुभागवतामृते उपरतसमस्तमायामयेति गद्यव्याख्याने मायातत्कार्ययोः सत्यत्वोक्तेः 'कोशाड्ढ्ञ्' इति सूत्रव्याख्याने महाभाष्ये मायाकार्यस्य सत्यत्वप्रतिपादनाच्च। देशावधिरूपोऽत्रावसानशब्दः संप्रोक्तः। तदीयभूतसूक्ष्मेन्द्रियाणां स्वकारणेषु लयोऽप्यवसानशब्देन विवक्षितः। तेन आत्मना विरजसा स्वस्वरूपेणेत्यर्थः। उपलक्षितः योगी शान्तमूर्मिषट्करहितम्। आनन्दं निरतिशयानन्दस्वरूपम् आत्मानं परमात्मानम्। आनन्दमयः परमात्मसाम्यापत्त्याथितस्वरूपगतानन्दस्य स्वात्मनि समुदयेनाऽतिशयितानन्दप्रचुरः सन् उपैति। यः योगी एतां भागवतीं भगवदुद्देश्यां गतिम् अर्चिरादिमार्गमित्यर्थः। गतः स योगी पुनः इहास्मिन्प्रकृतिमण्डले अङ्ग कर्माधीनं देहं प्रति न विषज्जते। नासक्तो भवति। वै ॥ ३१ ॥ अथ मार्गद्वयमुक्तं निगमयति। एते इति। हे नृप एते सृती अर्चिरादिधूमादिसंज्ञौ द्वौ मार्गावित्यर्थः। वेदगीते 'ये चेमेरण्ये श्रद्धां तप इत्युपासते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेऽर्चिषमभिसंभवन्ति। अथ य इमे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति' इत्यादिना वेदबोधिते इत्यर्थः। ये वै, ये सृती 'कर्मभूते' पुरा कल्पादौ ब्रह्मणा पृष्टः सन् आराधितः सम्यगुपासनया प्रीतः वासुदेवः भगवान् सर्वभूतान्तरात्मा स्वयं परमेश्वर इत्यर्थः। ब्रह्मणे चतुर्मुखाय आह उवाच अत एव सनातने। त्वया ह स्फुटं यथातथा अभिपृष्टे। यच्छ्रोतव्य-मित्यनेनार्चिरादिमार्गस्य ब्रूहि। यद्वा। विपर्ययमित्यनेन धूमादिमार्गस्यापि पृष्टत्वात् यत्त्वया सम्पृष्टे इत्यर्थः। ते सृती। चकारान्मया कथिते चेत्यर्थः ॥ ३२ ॥ संसारिणोऽर्चिरादिप्राप्तौ भक्तियोगादन्य उपायो नास्ति। अर्चिरादिगतिचिन्तापि भक्ति-योगोदयोपाय इत्याह। न हीति। इहास्यां संसृतौ संसारे विशतः अनादिकालतः प्रविष्टस्य जनस्य अतः अर्चिरादेः सकाशात् अन्यः अपरः शिवः सुखकरः कल्याणरूप इत्यर्थः। पन्था मार्गः। न हि नैव विश्रुतः। यतः अर्चिरादिमार्गचिन्तनात् वासुदेवे सर्वान्तरात्मनि भगवति परमात्मनि भक्तियोगः भवेत्। तस्मात्तच्चिन्ता कार्या। तथा च सूत्रकारः। 'योगिनः प्रति स्मर्येते स्मार्त्ते चैते'। योगिनो योगनिष्ठान् प्रति स्मार्ते स्मृतिविषयभूते देवयानपितृयानाख्ये गती। योगाङ्गतयाऽनुदिनम्। स्मर्येते 'नैते सृती पार्थ जानन् योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन' इति स्मरणादिति सूत्रार्थः। यद्वा। संसरतः पुंसः तपोयोगादयः बहवः योगमार्गाः सन्ति तत्र समीचीनस्त्वयं मार्ग एवेत्याह नहीति। इहास्यां संसृतौ विशतः परिभ्रमत इत्यर्थः। पुंस इति शेषः। यतः अनुष्ठितायतो योगादेः सकाशात् वासुदेवे भगवति, भक्तियोगः भवेत् अतोऽस्मात् अन्यः शिवः सुखरूपः निर्विघ्नो वा पन्थाः कल्याणमार्गः नहि नास्त्येव ॥ ३३ ॥

कुत एवमत आह। भगवानिति। भगवान् स्वयं ब्रह्मा कुटस्थः निर्विकारः एकाग्रचित्तः सन्नित्यर्थः। त्रिस्त्रिवारान्। कात्स्न्येन साकल्येन ब्रह्म वेदम्, मनीषया अन्वीक्ष्य विचार्य यतः भक्तियोगात् आत्मन् आत्मनि परमेश्वरे इत्यर्थः। रतिः परमा प्रीतिः भवेत्। स एव भक्तियोगः संपाद्यः। इति अध्यवस्यत् निश्चितवान् ॥ ३४ ॥ नन्वतीन्द्रिये भगवति कथं भक्ति-रुत्पद्यते कथंतरां रतिरित्याशङ्क्य परिशुद्धमनोविषयत्वादुभयमपि संभवतीत्याशयेनाह। भगवानिति। स्वात्मना योगपरिशुद्ध-मनसा। सर्वभूतेषु भगवान् हरिः लक्षितः साक्षात्काराहः 'विशुद्धेन मनसाभिक्लृप्तः' इति श्रुतेः। तर्हि स किं घटादिवत्-साक्षात्कारार्हः न, दृश्यद्रष्टृत्वेन इत्याह। द्रष्टा सर्वज्ञत्वेन दृश्यस्य साक्षाद्द्रष्टेति ज्ञानेन साक्षात्कारार्ह इत्यर्थः। एवं सति तु केवलयोगपरिशुद्धमनोमात्रविषयत्वम्। इति चेन्न केवलं योगपरिशुद्धमनोविषय एव, किं तु प्रमाणान्तरविषयोऽपीत्याह। दृश्यैर्दर्शनार्हैः अनुभवितुमर्हैरित्यर्थः। बुद्ध्यादिभिर्महदादिभिः। 'महान्वैबुद्धिलक्षणः' इति वचनात्। कार्यभूतमहदादि-भिस्तत्कारणभूतो द्रष्टाऽनुमीयते इत्यर्थः। एवं सत्यपि केवलानुमानविषयत्वं प्राप्तमिति चेन्न केवलमनुमानविषय एव किंतु शास्त्रविषयोऽपीत्याह। लक्षयन्तीति लक्षणानि वेदान्तवाक्यानि 'सत्यं ज्ञानमनन्तम्' यतो वा इमानि भूतानि इत्यादीनि वैः। अनुमापकैः स्मृतिवचनैः। एवं श्रुतिस्मृतिभ्यामप्युपलक्षित इत्यर्थः। अनेन केवलानुमानगम्यत्ववादिनो वैशेषिका निरस्ताः तन्निरासस्तु शास्त्रयोनित्वादित्यधिकरणसाध्यः ॥ ३५ ॥ यच्छ्रोतव्यमित्यादि प्रश्नोत्तरमुपसंहरति। तस्मादिति। हे राजन् तस्माद्धेतोः भगवान् हरिः सर्वत्र सर्वेष्वपि देशेषु सर्वदा सर्वेष्वपि कालेषु सर्वात्मना सर्वप्रकारेण नृणां श्रोतव्यः, कीर्त्तितव्यः, स्मर्त्तव्यश्च भवतीति शेषः ॥ ३६ ॥

अस्तु भक्तियोगपरिशुद्धमनोग्राह्यत्वम्, भक्तियोगारम्भः कथं स्यादित्यत आह। पिबन्तीति। भगवतः सकलैश्वर्य-संपन्नस्य आत्मनः परमात्मनः 'सतामिति कर्त्तरि षष्ठी' सतां सद्भिः। श्रवणपुटेपु कर्णपुटेपु। संभृतं पूरितम्। अनेन सत्सेवया प्रथमं भवितव्यमित्युक्तं भवति। कथामृतं ये पिबन्ति ते विषयादिदूषिताशयं विषयैर्मलिनीकृतमन्तःकरणं पुनन्ति। सत्सेवा-संप्राप्तहरिकथाश्रवणेन शब्दादिविषयकलुषितमन्तःकरणं पवित्रयन्तीत्यर्थः। सत्सेवादिभक्तियोगान्तस्य फलमाह। व्रजन्तीति। तस्य भगवतश्चरणसरोरुहयोरन्तिकं समीपं प्राप्नुवन्ति च। प्रथमं सत्सेवा ततस्तेभ्यो भगवत्कथायाः श्रवणपुटाभ्यामाकर्णनं ततो भक्तियोगारम्भस्तत आगमोत्थविवेकविमोकादिसाधनसप्तकजन्यज्ञानाभ्यासानुगृहीता प्रत्यक्षतापन्ना मुक्तिरित्ययं क्रमोऽत्रोक्तः ॥ ३७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

——:※:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तृतीयोऽध्यायः

श्रीशुक उवाच

एवमेतन्निगदितं पृष्टवान् यद्भवान्मम । नृणां यन्म्रियमाणानां मनुष्येषु मनोषिणाम् ॥ १ ॥

विष्णुभक्तेस्तृतीये तु मुनेः श्रैष्ठ्यं विशृण्वतः । उद्रेकेण हरेर्भक्तेर्गुणानां श्रवणादरः ॥ १ ॥

एवं मुमुक्षोर्भगवद्गुणश्रवणादिकं कर्त्तव्यमित्युक्तमथ तदेव व्यतिरेकमुखेन द्रढयितुमन्यदेवतानां क्षुद्रफलदत्वं वक्ष्यन् पूर्वोक्तमनुवदति । एवमिति । मनुष्येषु कदाचिद्दैववशान्मनुष्यत्वं प्राप्तेषु जीवेषु मनीषिणां शास्त्रीयप्रतिभावतां तत्रापि म्रियमाणानामासन्नमृत्यूनां नृणां यत् यद्विशेषतः, यत् यत्कर्त्तव्यं भवान् मम मामित्यर्थः । पुरा पृष्टवान् तत एतत् भगवच्चरित्रश्रवणादिकमेव कर्त्तव्यम् । इत्येवं निगदितमुक्तमित्यर्थः ॥ १ ॥ कामितफलप्राप्त्यर्थमन्येषां देवतानां भजनमाह । ब्रह्मवर्चसेति । ब्रह्मवर्चसं वृत्ताध्ययनजं तेजस्तत्कामः शिष्यप्रशिष्यादिषु वेदादिप्रणेतृत्वेन तत्कामयमानस्तु । ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं बृहस्पतिं वा यजेत भजेदाराधयेदित्यर्थः । इन्द्रियकामश्चक्षुरादीन्द्रियपटुताकामस्तु इन्द्रं दिवस्पतिं शक्रमित्यर्थः । यजेत । प्रजाकामः संतानकामो जनाभिवृद्धिकामो वा 'प्रजा तु जनपुत्रयोः' इति यादवः । प्रजापतीन् दक्षादीन् यजेत ॥ २ ॥

देवीमिति । श्रीकामो लक्ष्मीकामस्तु देवस्येयं तां विष्णोः संबन्धिनीं मायां विस्मयनीयशक्तिं लक्ष्मीमिति वा यजेत । तेजस्कामः प्रभावकामनः विभावसुमग्निं यजेत । वसुकामः अर्थकामः हिरण्यकाम इत्यर्थः । वसून् अष्टावपि वसुसंज्ञदेवान् यजेत । अथ वीर्यकामः पराक्रमकामः रुद्रान् एकादशापि रुद्राख्यदेवान् यजेत । तथा सति वीर्यवान भवेदिति शेषः ॥ ३ ॥ अन्नाद्येति । अन्नं भोज्यम् अद्यं भक्ष्यं तत्कामस्तु । तत्र 'अखरविशदमभ्यवहार्यम्' भोज्यम् खरं कठिनम्, विशदं विविक्तावयवं भक्ष्यमितिभेदः । अदितिं देवमातरम् । यजेत । स्वर्गकामः स्वर्गप्राप्तिवाञ्छोपेतः अदितेः सुतान् देवान् द्वादशादित्यान् यजेत । राज्यकामः राज्यप्राप्तीच्छावान विश्वान् देवान् त्रयोदशापि विश्वेदेवसञ्ज्ञान्देवान् यजेत । विशां दिशां संसाधकः दिक्पतित्वकामः साध्यान साध्यसंज्ञान् देवान् यजेत ॥ ४ ॥ आयुरिति । आयुःकामो दीर्घायुरिच्छावान् । अश्विनावश्विनीकुमारसंज्ञौ देवौ यजेत । पुष्टिकामो दैहिकबलाभिकामः इलां पृथ्वीं यजेत् । प्रतिष्ठाकामः स्वस्थानादप्रच्युतिकामः पुरुषः लोकमातरौ रोदसी द्यावाभूमी यजेत् । सर्वलोकाधारत्वात्तयोर्लोकमातृत्वम् ॥ ५ ॥ रूपाभिकाम इति । रूपाभिकामः स्वशरीरसौन्दर्यमभिकामयमानः गन्धर्वान् देवगायकान् यजेत् । स्त्रीकामो मनोरमपत्नीप्राप्तिकामः अप्सराश्चासावुर्वशी च तां यजेत् । सर्वेषाम् आधिपत्यकामः प्रभुत्वकामः परमेष्ठिनं चतुर्मुखं विधिमिति यावत यजेत् ॥ ६ ॥ यज्ञमिति । यशःकामः । यज्ञं रुचिप्रजापतिसुतं यज्ञनामानं विष्णुं यजेत् । कोशकामः वसुसंचयकामः, वसुकाम इत्यत्र तु धनमात्रमिति न पौनरुक्त्यम् । प्रचेतसं वरुणं यजेत् । विद्याकामः विद्याप्राप्तिकामः तु ज्ञानप्राप्तिकामो वा गिरिशं शिवं यजेत् । 'ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेदधोक्षजात' इति रेवाखण्डोक्तेः । दांपत्यार्थं दंपत्योरन्योऽन्यप्रीत्यर्थं सतीं पतिव्रताम् उमां गिरिजां यजेत् ॥ ७ ॥

धर्मार्थमिति । धर्मार्थमक्षयपुण्यरूपमोक्षार्थकधर्मसिद्ध्यर्थमित्यर्थः । उत्तमश्लोकमुत्तमकीर्त्तिं विष्णुं यजेत् । 'अकामो धर्मकामो वा मोक्षकामोऽपि यो भवेत् । अथवा सर्वकामो यः स विष्णुं पुरुषं यजेत्' इति स्कान्दोक्तेर्विष्णोरेवोत्तमत्वोक्तेः । तन्तुं संतानं तन्वन् विस्तारयन्, संतानाविच्छिन्नसृष्टिकाम इत्यर्थः, पितॄन् अर्यमादिपितृगणान् यजेत् । रक्षाकामः बाधानिवृत्तिकामः पुण्यजनान् यक्षान् । ओजस्कामो बलकामः मरुद्गणान् आवहविवहादिवायुगणात्मकदेवान् यजेत् ॥ ८ ॥ राज्येति । राज्यकामः मनून्मनुरूपान् देवान् यजेत् । अभिचरन् शत्रुमरणमिच्छंस्तु निर्ऋतिं राक्षसं यजेत् । कामकामः भोगेच्छुः सोमं चन्द्रं यजेत् । अकामः वैराग्यकामः परं पुरुषमाश्वरं यजेत् ॥ ९ ॥ अकाम इति । अकामः केवलभगवदेकान्तभक्तभावेतरलोकभोगसुखेच्छावर्जितः । सर्वकामः उक्तानुक्तेहामुत्रार्थफलभोगकामः, उदारधीः, अत एव, मोक्षकामो वा तीव्रेण अविच्छिन्नेन, भक्तियोगेन परं पुरुषं यजेत् । नन्वकाममोक्षकामयोः परमपुरुषाराधनमनन्तफलरूपत्वाद्युक्तमेव । सर्वकामस्य तु फलस्य सान्तवत्त्वात्तथाविधफलप्रदेन्द्राद्याराधनमेव युक्तमिति चेत् 'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्' इत्युक्तरीत्या इन्द्रादिरूपिणोऽपि परमपुरुषस्यैवान्तवत्फलप्रदत्वात्तत्फलेप्सुभिरिज्यमानः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परमपुरुष एवान्तवरफलानि प्रयच्छति । 'अनन्यांश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्' इत्युक्तरीत्याऽनुभज्यमानः स एव मुक्तिं प्रयच्छतीत्यतः सर्वमस्य युज्यते एव ॥ १० ॥ नन्वेवं सर्वथा भजद्भिः केन मोक्षोऽवाप्यते इति चेत् सत्सङ्गतो भगवत्यचलभावेनेत्याह। एतावानिति । इहास्मिन् लोके यजतां भजतां निःश्रेयसस्य मोक्षस्योदयो लाभः एतावान् एतदवधिकः एव । भागवतसंगतः भगवदैकान्तिकभक्तानां साधूनां सङ्गादित्यर्थः। भगवति साक्षात्परमेश्वरे अचलः दुर्जनवाक्यसंश्रुत्या चलतावर्जितः भावः इति यत् एतावानिति संबन्धः। भागवतसङ्गाद्भगवत्यचले भावे सति निःश्रेयसोदयः सिद्ध एव, तस्माद्भागवतसङ्गान्मोक्षार्थी भगवत्यचलो भावः संपाद्य इति भावः ॥ ११ ॥

यद्भागवतसंगत इत्यनेन सूचितां हरिकथां प्रस्तौति । ज्ञानमिति। यद्यासु हरिकथारतिषु सतीषु आसमन्ततो भावेन प्रतिनिवृत्तं शान्तिं प्राप्तं गुणोर्मीणां कामादीनां चक्रं समुदायो यस्मात्तत्। यदा इति छेदपक्षे। यदा हरिकथारतिदशायां प्रतिनिवृत्तं गुणाः सत्वादिकार्याणि च ऊर्मयः अशनायापिपासाशोकमोहजरामृत्यवश्च तेषां चक्रं यस्मात्तथाभूतमित्यर्थः। ज्ञानम् आत्मप्रसादश्चित्तनैर्मल्यम् उभयत्र लोकद्वये गुणेषु शब्दादिषु विषयेषु वर्त्तमानेष्विति शेषः। असङ्गो वैराग्यम्। अथ च कैवल्ये मुक्तौ संमतः पन्था उपायः कैवल्यसंमतपथः एवंभूतः भक्तियोगः। यद्वा। कैवल्यं ब्रह्मभावस्तदस्त्येषामिति तथाभूतैर्निजात्मानं ब्रह्मरूपतया भावयमानैर्मुक्तपुरुषैः संमतः स्वीकृतः पन्था मार्गो यस्य तथाभूतः भक्तियोगः। तुश्चार्थः। एते संपत्स्यन्ते। अनेन 'निजात्मानं ब्रह्मरूपं देहत्रयविलक्षणम्। विभाव्य तेन कर्त्तव्या भक्तिः कृष्णस्य सर्वदा' इति सूचितम्। तथाभूतासु हरिकथासु निर्वृतः तच्छ्रवणेन सुखितः कः रतिं प्रीतिम् आसक्तिमित्यर्थः। न कुर्यात् सर्वोऽपि कुर्यादेवेत्यर्थः। उत यत्रेति पाठे उताप्यर्थः यत्रेति यास्वित्यर्थः ॥ १२ ॥ एवं हरिकथाप्रभावे उक्ते पुनर्जगद्व्यापाररूपहरिकथाबुभुत्सया मुनिनृपयोः संवादमवतारयितुं शौनकः पृच्छति। इत्यभिव्याहृतमित्यादिना। इति पूर्वोक्तप्रकारेण अभिव्याहृतं बादरायणिनाऽभिहितं वचनं निशम्य श्रुत्वा भरतर्षभः भरतवंशश्रेष्ठः राजा परीक्षित् ऋषिं परब्रह्मस्वरूपसंदर्शिनम्। कविं शब्दब्रह्मणि निष्णातम्। वैयासकिं व्यासपुत्रं श्रीशुकं प्रति, भूयः पुनः अन्यत् किं पृष्टवान् ॥ १३ ॥ एतदिति। हे विद्वन् हे सूत एतद्राजा यदन्यत्पृष्टवांस्तत् शुश्रूषतां श्रोतुकामानां नोऽस्माकं भाषितुं कथयितुम् अर्हसि। तत्प्रश्ने तव को लाभ इति चेत्तत्राह। कथा इति, हरिकथा एव उदर्कं उत्तरफलं यासां ताः। हरिकथाप्रधाना इत्यर्थः। कथाः सतां भगवद्भक्तानां सदसि सभायां स्युः। ध्रुवम् इत्थंभूतो निश्चय एव, अतः भगवत्कथाश्रवणमेव लाभ इति भावः ॥ १४ ॥

राज्ञो भगवद्भक्तत्वमेवाह। स इति। पाण्डवेयः पाण्डुनृपतिकुलोत्पन्नः महारथः 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्' इत्युक्तमहारथलक्षणः सः। राजा परीक्षित् भागवतो भगवत एकान्तिको भक्तः। वै निश्चितमेव। यः परीक्षिन्नृपः बालक्रीडाभिः क्रीडन्सन् कृष्णक्रीडां श्रीकृष्णार्चनरूपां क्रीडाम् आददे। यस्य बालक्रीडा अपि श्रीकृष्णपूजारूपा एव अतः स आबाल्यादेव भागवत इत्यभिप्रायः ॥ १५ ॥ वैयासकिरिति। एवमेव भगवान् 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्' इत्यादिगुणविशिष्टभगवत्तादात्म्यतया भगवच्छब्दवाच्यः। वैयासकिर्व्यासपुत्रः श्रीशुकः। चापि, वासुदेवः श्रीकृष्ण एव परम् अयनं परमप्राप्यं परमोपायश्च यस्य स तथोक्तः। एवमुभयोरपि भागवतत्वात्तत्संवाद एव पृष्टव्य इत्याह। हि यस्मात्। सतां भागवतानां समागमे संगतौ। उरुगायस्य भगवतो गुणैरुदारा महत्यः कथाः स्युः प्रवृत्ता भवेयुः ॥ १६ ॥ वासुदेवकथामन्तरेण जीवनमेव व्यर्थं ततः वृथैव क्षीयमाणमायुः हरिकथयैव सफलं कार्यमित्याशयेनाह त्रिभिः। आयुरिति। उद्यन्नुदयं गच्छन्। अस्तमदर्शनं च यन् प्राप्नुवन्, निम्लोचन्नित्यर्थः। असावादित्यः, पुंसां यत् आयुः तत् हरति वै। 'आदित्यस्य गतागतैरहरहः संक्षीयते जीवितम्' इत्यभियुक्तोक्तेः। उत्तरश्लोकवार्त्तया श्रीहरेर्मनोरमया कथया यत् यः क्षणः कालः नीतो गमितः तस्य कालस्य ऋते वर्जयित्वा, भगवत्कथावार्त्तया यावान्कालो यातः स सफलस्तद्विना ग्राम्यवार्त्तादिप्रसक्त्या यो गतः स निष्फल एवेत्यर्थः ॥ १७ ॥ हंत सर्वेषु लोकेषु तु दीर्घकालं जीवन् पुमान स्तूयते इति तत्राह। तरव इति। तरवः किं न जीवन्ति। यथा तरूणां दीर्घकालं जीवनं तद्वन्नृजन्मप्राप्तावपि तस्य वृक्षजीविकैव जीवनमिति भावः। तरूणां तु श्वासाभावोऽस्त्यस्य तु सोऽस्तीति कथमस्य तत्तुल्यत्वमिति चेत्तत्राह। भस्त्राः दृतयः अयःसंतापनार्थाश्चर्मकोशविशेषा इति यावत्। न श्वसन्ति किम्। वायुमूर्ध्वं न निःसारयन्ति किमित्यर्थः। तासामाहारादिकं नास्ति तत्राह। अपरे वृथायुर्व्ययं कुर्वन्तोऽन्ये ग्रामपशवः उत ग्रामपशवोऽपीत्यर्थः। न खादन्ति नाश्नन्ति, न मेहन्ति न रेतः सिञ्चन्ति किम्। मैथुनं न कुर्वन्ति किमित्यर्थः। यदि खादनमेहनाभ्यां तदाधिक्यमुच्यते तर्हि श्ववराहादिषु तदुभयदर्शनात्तत्साम्यमस्येति भावः ॥ १८ ॥

एतदेव पुनः सोपस्करमाह। श्वेति। गदाग्रजः श्रीकृष्णः जातु कदाचिदपि नामेषन्मात्रमपि यत्कर्णपथोपेतः न। यस्य श्रवणविषयतां न प्राप्तः तथाविधः पशुः, नृत्वेऽपि शृङ्गपुच्छरहितः पशुसमः सः पुरुषः। श्वानश्च विड्वराहाश्च उष्ट्राश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खराश्च तैः संस्तुतः, अस्मद्विजातीयः सन्नपि त्वमस्मद्धर्मभात्त्वेनास्मत्सदृशतां प्राप्त इति तैः कृतप्रशंसः जायते। तत्र श्वानो वदन्ति, वयं यथा प्रतिगेहमटमाना जनावज्ञामनुभवामस्तथा त्वमपि स्वजनाद्यवज्ञामनुभवसि ततोऽस्मत्सदृशः खल्विति। विड्वराहा वदन्ति, कश्मलविषयासक्तिमन्तो बहिरन्तः कच्चरपच्चरवपुष्मन्तः सन्तो वयं यथा वर्त्तामहे तथा नृत्वेऽपि त्वमस्मत्सदृश एवं भवसीति। उष्ट्रा वदन्ति, वयं यथा कण्टकितरुसकण्टकशाखा अश्नुवाना सुखं मन्यामहे तथा कण्टकवद्दुःखदविषयासक्तो भवानपि अस्मत्समान एव भवति। खरा वदन्ति, वयं यथा रक्षित्रा घासादिनाऽसंभाविताः सन्तोऽत्र तद्भृतभारवाहा भ्रमामस्तथाऽऽचरंस्त्वमप्यस्मत्सदृश एव भवसीति ॥ १९ ॥ वैराग्याभावेन दुःखाकरगृहे सतोऽपि हरिकथां श्रावं श्रावं वर्त्तमानस्य पुंसः श्रोत्रादीन्द्रियसाफल्येनायुषः साफल्यमन्यथा व्यर्थत्वमित्याशयेनाह। बिले इति। उरुक्रमस्य भगवतः विक्रमान् व्यापारांश्चरित्राणीत्यर्थः। न शृण्वतः। नरस्य बतेति खेदे। ये कर्णपुटे ते कर्णपुटे बिले गिरिदरीसमाने वृथारन्ध्रे वा वल्मीकरन्ध्रे वा। हे सूत नरस्य या जिह्वा, उरुगायो भगवांस्तस्य गाथाः कथाः चेद्यदि, न च उपगायति, न चेदुपगायति तर्हि दर्दुरस्य भेकस्येयं दार्दुरिका मण्डूकजिह्वेव असती अर्थशून्या ज्ञेया। न च त्रिवर्गसाधनोपयोगिनी, न च मोक्षार्थोपयोगिन्यतः विद्यमानापि भेकरसनेवाकिंचित्करीति भावः ॥ २० ॥ भार इति। पट्टकिरीटजुष्टं पट्टेन स्वर्णतन्तुयुतवस्त्रोष्णीषेण किरीटेन मणिमयमुकुटेन च सेवितं यत् उत्तमाङ्गं शिरः नरस्येति शेषः। मुकुन्दं न नमेत् भगवन्तं न नमस्कुर्यात। यदि तर्हि तदुत्तमाङ्गमपि परं केवलं भारः, यथा ग्रीवोपरि बहुभारोऽश्मगोलकः स्थापितः स्यात्तद्वत्केवलं तद्धारायमाणमेव बोध्यमित्यर्थः। नरस्य यौ करौ लसन्ती शोभमाने काञ्चनकङ्कणे सौवर्णे करभूषणे ययोस्तौ तथाभूतौ सन्तावपि हरेः साक्षात्पुरुषोत्तमस्य सपर्यां सेवां नो कुरुतः यदि तर्हि उक्तविधावपि तौ तत्करौ शावौ वा शवसंबन्धिनाविव ज्ञेयौ अस्वीयोत्तमार्थसाधकत्वादितिभावः ॥ २१ ॥

वर्हायिते इति। ये नराणां नयने आकर्णान्तविश्रान्ते सती अपि विष्णोः श्रीहरेः लिङ्गानि मूर्त्तीः न निरीक्षतश्चेत्तदा ते तन्नयने बर्हायते केकिपिच्छगतनयनसदृशचन्द्रकवदाचरिते मयूरपिच्छगनेत्रतुल्ये इत्यर्थः। यौ नृणां पादौ हरेः सर्वावतारैकनिदानश्रीहरिनाम्नो भगवतः क्षेत्राणि दुर्गनगरवृत्तपुरीद्वारिकादीनि न अनुव्रजतश्चेत् तौ तत्पादौ द्रुमजन्म भजत इति तथाभूतौ ज्ञेयौ वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥ जीवन्निति। यस्तु मर्त्यः जातु कदाचिदपि भागवताङ्घ्रिरेणुं साक्षाद्भगवतश्चरणरजः। यद्वा। साक्षाद्भगवत्संबन्धवन्मुनिसदाद्यपरसंज्ञभगवज्जनचरणधूलिं न अभिलषेदऽभितः स्वाङ्गे न धारयेत स मर्त्यः जीवन् शवः। जीवन्नपि गतासुशवसमान एवेत्यर्थः। यस्तु मनुजः श्रीविष्णुपद्याः श्रीविष्णुपदप्रियायाः श्रीविष्णुपादलग्नाया वा तुलस्याः गन्धं सुगन्धं न वेद अभिघ्राय नाभिनन्देदित्यर्थः। सः अपि श्वसन् शवः श्वासकृतकुणपतुल्यः, आसन्नप्राणवियोगो भूमौ शायितः प्राणावियुक्तशवतुल्यतामापन्नो ज्ञेयः ॥ २३ ॥ तदिति। गृह्यमाणैः स्मरणकीर्त्तनादिभिः गृह्यमाणैः हरिनामधेयैः हरे कृष्ण हरिकृष्ण स्वामिन्नारायण इत्येवंभूतैः संबोधनात्मकतयोच्चार्यमाणैर्भगवन्नामधेयैः यद्यदीयं हृदयं न विक्रियेत द्रवीभावापत्तिरूपं विकारं न प्राप्नुयात। अथ मुखे विकारः भगवदुत्कर्षश्रवणस्मरणादौ प्रफुल्लतारूपो मुखविकारः। नेत्रे जलमानन्दाश्रुबिन्दवः। गात्ररुहेषु शरीररोमसु हर्षः रोमाञ्चश्च न स्यात् तत्तदीयम् इदं हृदयम् अश्मसारं कालायससंघटितमित्यर्थः। बतेति खेदे, यदा भगवतश्चरित्रश्रवणस्मरणकीर्त्तनादिना हृदयद्रवीभावः स्यात्तदा तु, आनन्दाश्रुरोमाञ्चादिकमवश्यमेव स्यात् इत्यर्थः ॥ २४ ॥ अथेति। भागवतप्रधानो भगवद्भक्तेषु मुख्यः त्वं मनोनुकूलं मम मनसोऽतिप्रियमेव प्रभाषसे, अथातो हेतोः। अङ्ग हे मुने। आत्मविद्याविशारदः परमात्मस्वरूपस्वभावगुणविभूत्यैश्वर्यादिकथनात्मकपरविद्यायां पटुतरः वैयासकिः श्रीशुकः। पृष्टः नृपतिना कृतानुयोगः सन्, नृपतिं प्रति साधु यथा तथा यदाह तत् अभिधेहि मह्यं कथयेत्यर्थः। यतः एवं हरिकथाश्रवणाद्यभावे जन्मादेर्नैष्फल्यं ततस्त्वत्त एव श्रोतुमिच्छा प्रवर्त्तते इति भावः ॥ २५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

——:※:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ चतुर्थोऽध्यायः

सूत उवाच

वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः । उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥

हरेश्चरित्रं सृष्ट्यादि पृष्टं तुर्ये परीक्षिता । वर्ण्यते ब्रह्मतत्पुत्रसंवादेन शुकेन तत् ॥ १ ॥

एवमापृष्टः सूतो राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह । वैयासकेरिति । आत्मनः सर्वगुणपूर्णस्य परमात्मनो हरेः तत्त्वस्य स्वरूपयाथार्थ्यस्य निश्चयो यस्मात्तत्तथाभूतम् । वैयासकेः श्रीशुकस्य इत्युक्तप्रकारं वचः उपधार्य श्रुत्वा औत्तरेय उत्तरापुत्रः परीक्षिन्नृपतिः । कृष्णे सतीं मतिं व्यधात् अकरोत् । श्रीकृष्ण एवैकः सेव्यो नान्यः, इत्थंभूतां मतिं चकारेत्यर्थः ॥ १ ॥ आत्मजायाराज्यादिचिन्तामलदूषितान्तःकरणस्य तस्य कृष्णे सन्मतिविधानं कथमित्यत्राह । आत्मेति । आत्मा देहश्च, जाया पत्नी च, सुताः पुत्राश्च, अगाराणि सौधानि च, पशवो हस्त्यश्वादयश्च, द्रविणं धनं च, बन्धवः संबन्धिजनाश्च, तेषु । अविकले निरुपद्रवे राज्ये च । 'स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ तथा सुहृत् । सप्तैतानि समस्तानि लोकेऽस्मिन् राज्यमुच्यते' इति मनूक्तेः । सप्तप्रकृतिपूर्णे राज्ये चेत्यर्थः । नित्यं निरूढां नितरामासक्तिं प्राप्तां ममतां स्वत्वाभिमतिं जहौ तत्याज ॥ २ ॥ किमन्यत् पृष्टवानिति प्रश्नं परिहरति । प्रपच्छेति । किं च हे सत्तमाः शौनकादयः । कृष्णानुभावश्रवणे श्रीकृष्णलीलाकर्णने श्रद्दधानः श्रद्धां कुर्वाणः । अत एव महामनाः नृपः, यूयं मां प्रति यत् यं हरिलीलात्मकमर्थं पृच्छथ । इममेव अर्थं हरिकथालक्षणं पप्रच्छ ॥ ३ ॥ स कथंभूतः सन् पप्रच्छेत्यत्राह । संस्थामिति । संस्थां विज्ञाय, प्रथमतस्तु स्वमरणमेव विबुध्येत्यर्थः । ततः त्रैवर्गिकं धर्मार्थकामसाधनम् । यत् कर्म तच्च संन्यस्य सर्वं संपरित्यज्य, भगवति परमेश्वरे वासुदेवे श्रीकृष्णे स्वस्य ममात्मा स्वामी श्रीकृष्ण एक एवास्ति नान्य इत्येवंभूतो भावो भक्तिस्तं दृढं यथा तथा गतः । एवंविधः सन् पप्रच्छेति पूर्वेणान्वयः ॥ ४ ॥ निजबुभुत्सितमवतारयितुं मुनिवचनमभिनन्दति । समीचीनमिति । हे ब्रह्मन् हे अनघ । हरेः कथाः कथयतः सतः, मां प्रति त्वया हरिकथायां कथ्यमानायां सत्यामित्यर्थः । मह्यं मम तमोऽज्ञानं विशीर्यते नश्यति अतः सर्वज्ञस्य तव वचो वचनं समीचीनम् । यदिष्टसाधनावबोधकं तत्प्रतिबन्धकं च तदेव वचनं समीचीनं सर्वथा त्वद्वचनस्य तथात्वानुभवात्त्वमेव मह्यं हरिकथां कथयेति भावः ॥ ५ ॥

बुभुत्सितं पृच्छति । भूय इति । हे मुने भगवान् श्रीहरिः आत्ममायया स्वेच्छया स्वनियम्यया स्वशक्तिरूपया प्रकृत्येति वा अधीश्वरैर्ब्रह्मादिभिः । दुर्विभाव्यमप्रतर्क्यं दुरुत्पाद्यं वा । इदं विश्वं यथा येन प्रकारेण सृजते, एतदेव भूयः प्राचुर्येण पुनर्वा विवित्सामि वेदितुमिच्छामि ॥ ६ ॥ यथेति । किं च । पुरुशक्तिरनन्तशक्तियुक्तः अत एव विभुः समर्थः परः पुमान् परमपुरुषः यां यां शक्तिं ब्रह्मादिशरीरम् । उपाश्रित्याधिष्ठाय यथा सृजते तथैव, यथा गोपायति विष्ण्वादिशरीरेण रक्षति । यथा च पुनः संयच्छते रुद्रादिशरीरेण संहरति । इदमपि विवित्सामि । श्रीहरेर्ब्रह्मादिशरीरद्वारा जगत्सर्गादिकमुक्तमस्ति बृहन्नारदीये । 'यस्याज्ञया जगत्सर्वं ब्रह्मा सृजति नित्यशः । हरिश्च पालको रुद्रो नाशकः स हि मोक्षकः' इति । तत्रैवान्यत्र 'ब्रह्मेशविष्ण्वाख्यशरीरभेदैर्विश्वं सृजत्यत्ति च पाति यश्च । तमादिदेवं परमं परेशमाधाय चेतस्युपयाति शान्तिम्' इति ॥ ७ ॥ आत्मानमिति । किं च आत्मानं जीवं क्रीडयन् संसारे तत्कर्मानुसारेण क्रीडां विधापयन्' क्रीडन् नानावतारान् धृत्वा स्वं भजमानैस्तैः क्रीडामाचरन्सन्भगवान् । करोति विकरोति च । यथा तत्तदपेक्षितं सामान्यतः करोति, विशेषतश्च करोति तत्तदपि विवित्सामि । चकारात्स्वयं यथा निर्विकारः शुद्धश्च तिष्ठति तदपि विवित्सामि । भगवच्चेष्टाविषयस्य ज्ञानस्य वक्ता ज्ञानिष्वपि दुर्लभ इति भावेनाह नूनमिति । हे ब्रह्मन् अद्भुतकर्मणः विस्मयनीयव्यापारस्य भगवतः हरेः चेष्टितं कविभिर्ज्ञानाधिकैरपि दुर्विभाव्यमप्रतर्क्यम् इव आभाति प्रतीयते । नूनम् । अज्ञैर्दुर्विज्ञेयमिति किं वक्तव्यमित्यर्थः ॥ ८ ॥ अन्यदपि पृच्छति । यथेति । एकः स्वयं श्रीहरिः जन्मभिरवतारैः । भूरिशो बहूनि । कर्माणि चेष्टितानि । कुर्वन् संस्तु वर्त्तते एव । परं तु आदौ सः प्रकृतेः गुणान् सत्त्वादीन् युगपत् बिभर्त्ति वाऽथवा क्रमशः बिभर्ति । यथा बिभर्त्ति तथा विवित्सामि । तुशब्देन गुणानां विरुद्धस्वभावत्वेन युगपद्ग्रहणे अनुपपत्तिं सूचयति । अपिपदेन क्रमशो ग्रहणं संभावितमिति सूचितम् । अत्र यथा सृजते इत्यनेन निमित्तोपादानाधिकरणानां प्रश्नः । यथा गोपायतीत्यनेन रक्षितुः स्वस्य रक्षणमपि किं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवान्तर्यामितया अथवा स्वावतारेणैवेति प्रश्नः। यथा संयच्छते इत्यनेन संयमाधिकरणप्रश्नः ज्ञेयः। यतोऽग्रे करिष्यमाणानां नारदीयानां प्रश्नानामत्रैवावतरिष्यमाणत्वात्। 'यथा गुणांस्तु प्रकृतेः' इत्यनन भगवदवतारस्य गुणत्रयात्मकत्वमथवा त्रयाणामेवान्यतमगुणात्मकत्वमथवा अप्राकृतत्वमेवेति प्रश्नः। अत्र यद्यपि न तृतीयपक्षः प्रश्नारूढस्तथापि प्रष्टुरभिप्रेतोऽस्ति तस्यैव सिद्धान्तकोटित्वात्॥ ६॥

विचिकित्सितमिति। एतत्पूर्वोक्तं मे मम विचिकित्सितं विचारितुमिष्टं भवति अतः भगवान् यथा यथावत् ब्रवीतु कथयतु। यतस्त्वमेवैतत्कथयितुं समर्थोऽसीत्याह। भवान् शाब्दे ब्रह्मणि शब्दात्मके ब्रह्मणि निष्णातः परिनिष्ठितः कृत्स्नशास्त्रार्थविदित्यर्थः। परस्मिन् ब्रह्मणि च निष्णातः अस्ति खलु। अनेन परब्रह्मविषययोगजन्यज्ञानसंपत्तिरुक्ता॥ १०॥ इतीति। हरेः गुणानुकथने इत्युक्तप्रकारेण राज्ञा परीक्षिता उपामन्त्रितः प्रार्थितो मुनिः हृषीकेशं भगवन्तं सर्वेन्द्रियनियन्तारमिति यावत्। अनुस्मृत्य सम्यक् स्मृतिपथं नीत्वा प्रतिवक्तुं प्रचक्रमे। उपचक्रमे। देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः॥ ११॥ तदेवाह त्रयोदशभिः। नम इति। परस्मै प्रकृतिपुरुषविलक्षणाय पुरुषाय सर्वकालं पुरुषसमानाकृतये। तथापि भूयसे स्वरूपतो गुणतो विभूतित ऐश्वर्यतश्च सर्वेषामन्तर्बहिश्च व्याप्य वर्त्तमानतारूपबृहत्त्वेन वर्त्तमानायेत्यर्थः। तदेव दर्शयति। सतः सत्यस्य जगतः उद्भव उत्पत्तिश्च स्थानं पालनरूपा स्थितिश्च निरोधो लयश्च एतन्निमित्तं या लीला तया। गृहीतं शक्तीनां रजःसत्त्वतमःप्रधानहिरण्यगर्भविष्णुरुद्राणां त्रितयं त्रिकं येन तस्मै। यद्वा। गृहीतं शक्तीनामिच्छाज्ञानक्रियाख्यानां त्रितयं येन तस्मै। 'इच्छा ज्ञानं क्रिया चेति नित्याः शक्तय ईशितुः, इति वचनात्। श्रीहरिस्वरूपावस्थितेच्छादिशक्तित्रयविवेचनं तु सुधासिन्धोः पञ्चषष्टितमतरङ्गेऽस्ति सविस्तरं तत्तत एवावगन्तव्यम्। देहिनाम् अन्तर्भवाय अन्तरात्मने। अनुपलभ्यं चर्मचक्षुर्भिरनुपलक्ष्यं वर्त्म यस्य तस्मै भगवते नमः। वर्त्मशब्दः गन्तव्यमार्गपरोऽपि अत्र सर्वदा दिव्यावयवोपेतभगवत्स्वरूपावबोधादिमार्गपरः उपचारात्। अनेन पुरुषायेति पदद्योतितायाः भगवतो दिव्यावयवोपेतपुरुषाकृतेः सर्वदा सत्त्वेऽपि तस्या अभक्तप्राकृतकरणागोचरत्वमुक्तम्॥ १२॥

नन्वनुपलक्ष्यवर्त्मत्वे त्वनुपास्यत्वं स्यादिति चेत्तत्राह। भूया नम इति। सतां स्वैकान्तिकसाधूनां वृजिनानि पापानि छिनत्तीति तस्मै। असतामसाधूनां दुष्कृतिजनानाम् असंभवाय विनाशकाय अनेन 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्' इत्येष भगवद्वाक्यार्थः स्मारितः। अखिलं पूर्णं सत्त्वं स्वदिव्यभावरूपसत्त्वं यस्यां तथाभूता एव मूर्त्तिर्नृनाट्यप्रदर्शका आकृतिर्यस्य तस्मै। स्वस्य सदा दिव्यदेहतायुतत्वेऽपि सत्परित्राणदुष्कृतविनाशार्थं भूमौ प्रादुर्भावकाले संप्रदर्शितमनुष्यभावसमानदेहायेत्यर्थः। स्वतः प्राकृतदेहेन्द्रियाग्राह्यमूर्त्तिमत्त्वेऽपि साधुपरित्राणदुष्कृद्विनाशादि कर्त्तुं स्वानां स्वसौलभ्यातिशयविधानेन तज्जसुखातिशयप्रदानं कर्त्तुं च स्वस्याखिलसज्जननयनविषयता यथा स्यात्तथा रामकृष्णहरिकृष्णादिरूपमनुष्यभावमयमूर्त्तितया प्रतीयमानायेति भावः। ननु अखिलसत्त्वमूर्त्तये इत्यस्य शुद्धसत्त्वमयमूर्त्तये इति प्रसिद्धोऽर्थः कुतो न क्रियते इति चेत् सुधासिन्धोर्द्विशताधिकाष्टादशे तरङ्गे 'यद्यसौ निर्गुणो न स्याच्छुद्धसत्वात्मको भवेत्। तत्संबन्धात्कथं तर्हि निर्गुणा गोपिकादयः' इति सत्त्वनिषेधोक्तेः। द्विशताधिकैकषष्टितमे तरङ्गे च 'रूपेऽस्यास्मिन्नक्षरस्थे मूलरूपे च किंचन। भेदो न सर्वथाऽस्तीति जानीत निश्चितं हृदि' इति च भगवतो दिव्यमनुजाकारयोरभेदत्वोक्तेश्च विरोध आयायात्तन्निवृत्तये इति ज्ञेयम्। प्रकृतिपुरुषविलक्षणत्वात्सर्वजगत्कारणत्वात् वात्सल्यादिगुणवत्त्वाच्च मुमुक्षूपास्यत्वं भगवत उक्तम्। अथ मोक्षप्रदत्वमाह। परमहंसानां भागवतपरमहंसानामयं पारमहंस्यस्तस्मिन्। भागवतपरमहंससंबन्धिनीत्यर्थः। आश्रमे चतुर्थाश्रमे इत्यर्थः। व्यवस्थितानां पुंसाम् इदं मुमुक्षुमात्रोपलक्षणम्। परमहंसानां प्राचुर्येण मुमुक्षुत्वात्तदाश्रमनिर्देशः। ब्रह्मविद्याङ्गत्वेन तत्तत्स्वाश्रमप्रयुक्तधर्मानुष्ठानपराणामित्यर्थः। पुनर्भूयो भूयः। अनुमृग्यदाशुषे निजनित्यसहवासेन स्वमूर्त्तिसमीक्षणानन्दानुभावनलक्षणानुमृग्यार्थदानशीलाय भूयो वारंवारं नमः। अनेन भूया नम इति पदेन च सर्वेस्मान्नारायणप्रसादसाधनाद्भक्तिपूर्वकं पुनः पुनर्नमनमेव तत्प्रीतिजनकमस्तीत्यपि सूचितम्॥ १३॥ सौलभ्यविशिष्टत्वं द्योतयन्नमस्करोति। नमो नम इति। सात्वतां यादवानाम् ऋषभाय श्रेष्ठाय आश्रितवात्सल्यातिरेकात्सात्त्वच्छ्रेष्ठत्वेनावतीर्णायेत्यर्थः। ते तुभ्यं मुहुः नमः। स्वानामतिसुलभोऽपि दुर्योगिनां दुर्लभ एवेत्याह विदूरेति। कुयोगिनां कुत्सितयोगिनां भगवद्भक्तिरहितयोगनिष्ठानामिति यावत्। विदूरातिदूरतरा काष्ठा दिगपि यस्य तस्मै। दुर्योगिभिर्यस्य दिगपि दुर्ज्ञेया तथाविधयेत्यर्थः। ते तुभ्यं नमः। अत्र कुयोगीति पदेन भगवद्विमुखा ये, ते कुसङ्गिनः। तेन च भगवत्सुमुखाः सत्सङ्गिनः। एवं सति सत्सङ्गिकुसङ्गिशब्दावच्यानादिसिद्धौ स्त इत्यपि सूचितम्। तदेवं वैषम्यप्रतीतावपि निर्दोषत्वाय भगवतोऽचिन्त्यैश्वर्यमाह निरस्तेति। साम्यं समता च अतिशयोऽधिकता च निरस्तौ न विद्यमानौ साम्यातिशयौ यस्य तेन। राधसा स्वतेजसैश्वर्येण वा उपलक्षिताय स्वधामनि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वनिवासस्थानभूते ब्रह्मणि ब्रह्मपुरे रंस्यते रममाणाय स्वैकान्तिकभक्तैः क्रीडमानायेति यावत्। 'दिव्ये ब्रह्मपुरे ह्येष स व्योम्न्यात्मा प्रतिष्ठितः' इति 'यः स्वभक्तेभ्यो रमते स मे सर्वस्वम्' इति 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति च श्रुतिशतोक्तेः। ते तुभ्यं नमो नमनमस्तु ॥ १४ ॥

विचित्रैश्वर्यवत्त्वेन यत एवमवैषम्यमत एव तत्कीर्तनस्मरणादेः समस्तदुरितनिवर्त्तकत्वमित्याह। यत्कीर्त्तनमिति। यत्कीर्त्तनं यस्य भगवते दिव्यादिव्यचरित्रसंकीर्त्तनम्। यत्स्मरणं यस्य भगवतो गुणैश्वर्यशारीरचिह्नानां चिन्तनम्। यदीक्षणं यस्य भगवतः साक्षात्त्वाभावे तदर्चाविग्रहनिरीक्षणम्। यद्वन्दनं यस्य भगवतोऽर्चावतारमुद्दिश्य यथाशास्त्रं वन्दनविधानम्। यच्छ्रवणं यस्य भगवतः प्राकृताप्राकृतपदनिबद्धाऽपदनिबद्धचरित्रश्रवणविधानम्। यदर्हणं यस्य भगवतोऽर्चावतारस्य षोडशाद्युपचारैः संपूजनम्। लोकस्य यत्कीर्त्तनादिनिष्ठस्य जनस्य कल्मषं कश्मलं दुरितमिति यावत्। सद्यस्तत्क्षणमेव विधुनोति विनाशयति। सुभद्रं सुमङ्गलं श्रवः कीर्त्तिर्यस्य तस्मै। तस्मै भगवते नमः नमः। अनेन सर्वसाधनेभ्यो नमनादिभक्तेः श्रैष्ठ्यमनुस्मारितम् ॥ १५ ॥ न केवलं श्रवणादिभिर्दुरितनिवृत्तिरेव किं तु 'मामेव ये प्रपद्येरन् मायामेतां तरन्ति ते' इति भगवदुक्तेर्यच्चरणोपसादनाद्विशुद्धेनात्मना परिपूर्णं भक्तियोगं ततो ब्रह्मपदं च प्राप्नुवन्तीत्याह। विचक्षणा इति। विचक्षणा विवेकिनः यस्य भगवतश्चरणौ तयोरुपसादनं तस्मात्। यच्चरणैकशरणप्राप्तिलक्षणनिषेवणादित्यर्थः। अन्तरात्मनो मनसः उभयत इहामुत्र च सङ्गं व्युदस्य निरस्य, गतो निवृत्तः क्लमः सांसारिकतापत्रयानुभवजः खेदो येषां तथाभूताः सन्तः, हि पूर्णभक्तियोगं प्राप्येत्यर्थः। ब्रह्मगतिं ब्रह्मपदम्। विन्दन्ति प्राप्नुवन्ति। अयमर्थो 'ब्रह्मविदाप्नोति परम्' इति श्रुतिप्रसिद्धः। सुभद्रश्रवसे तस्मै नमः नमः ॥ १६ ॥

भक्तिशून्यानां सर्वाण्यपि साधनानि निष्फलानि सन्तीत्याह। तपस्विन इति। तपस्विनः कृच्छ्रचान्द्रायणादितपोनिष्ठाः। दानपरा गोभूम्यादिदानप्रसक्ताः। यशस्विनो ब्रह्मण्यत्वादियशःख्यातिपरायणाः। मनस्विना मनआदीन्द्रियनिग्रहपराः। मन्त्रविदो मन्त्रजापपराः। सुमङ्गलाः सदाचारपराः। एते सर्वे यदर्पणं विना, तपआदेर्यस्मिन् भगवति समर्पणमृते, यदुपासनाङ्गत्वेन तपआदीनामनुष्ठानमन्तरेति यावत्। क्षेमं तपआदेः परमं फलमित्यर्थः। न विन्दन्ति न लभन्ते, यद्यपि तत्फलं यत्किंचिद्दुरितनिवृत्त्यादिरूपमाप्नुवन्ति तदपि नाक्षयम। यदि कुत्रचित्तदक्षय्यतया प्रोक्तं स्यात्तदर्थवादमात्रमेव फलप्रदातुरिन्द्रादेरपि क्षयिष्णुत्वदर्शनात्। भक्तियोगाङ्गत्वेन तपआदिकुर्वाणास्तु निरतिशयं फलं प्राप्नुवन्तीत्यभिप्रायः। सुभद्रश्रवसे तस्मै नमः नमः ॥१७॥ किं वक्तव्यं भागवता आत्मानं विशोध्य ब्रह्म प्राप्नुवन्तीति, भागवताश्रिता हीनजातीया अपि प्राप्नुवन्तीत्याह। किरातेति। किराताश्च हूणाश्च अन्ध्राश्च पुलिन्दाश्च पुष्कसाश्च, आभीराश्च कङ्काश्च, यवनाश्च ते। खस आदिर्येषां ते अन्ये च। ये पापाः पापजातयः ते सर्वे यस्य भगवत उपाश्रयः साक्षात्संबन्धो येषां तेषामाश्रयो येषां ते तथाभूताः सन्तः शुध्यन्ति। यद्वा। यदून् पातीति यदुपः श्रीकृष्णस्तस्याश्रयो येषां तेषामाश्रयो येषां ते इति। तस्मै प्रभविष्यतीति प्रभविष्णुस्तस्मै 'बाहुलकग्रहणाद्भविष्यदर्थे प्रत्ययः। सामगसारवविप्रज्ञातौ धर्मावतारहरिप्रसादापरसंज्ञधर्मशर्मणो मूर्त्त्यपरसंज्ञभक्तौ पत्न्यां हरिकृष्णनाम्ना प्रादुर्भविष्यते श्रीकृष्णाय नमः 'अन्योऽपि धर्मरक्षायै देहः संभ्रियते मया' इति श्रीकृष्णोक्तेरेवमर्थाचरणम्। ननु संभ्रियते इत्यत्र तु वर्त्तमानार्थतास्ति इतिचेत् 'वर्त्तमानसामीप्ये भूते भविष्यति च' इति वर्त्तमानवत्त्वोक्तेर्भविष्यतोऽप्यर्थस्य भगवद्दृष्ट्या वर्त्तमानार्थत्वान्न बाधः। नन्वेकस्य कृष्णस्य द्विवारं प्रादुर्भावः कथमिति चेन्मत्स्यकूर्मवराहाणां यथा द्विः प्रादुर्भावता लघुभागवतामृते प्रोक्तास्ति। अन्यावताराणां चेत्थंभावता तत्रैवोक्तास्ति तथास्यापि। अस्य सारवज्ञातौ संभूतिः स्कान्देऽभिहितास्ति सा ततो बोध्या। भगवत्संबन्धादवरजातिज्ञानामप्युत्तमत्वे 'अपि चेत्सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवहितो हि सः' इति। 'मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्' इति च भगवद्गीतावाक्यं प्रमाणम्। अस्यार्थो रामानुजकृत उपादेयः। साधुसङ्गादुत्तमत्वे प्रमाणानि। 'न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनन्त्युरुकालेन दर्शनादेव साधवः' 'साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्। मदन्यं ते न जानन्ति नाहं तेभ्यो मनागपि'। साधुसङ्ग एव सत्सङ्गस्ततः शुद्ध्या भगवत्प्राप्तिः। अस्यैवैकादशस्कन्धे द्वादशेऽध्याये 'सत्सङ्गेन तु दैतेया' इत्यादिनाऽभिहितास्ति सा ततो बोध्या। 'मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः' इति जडभरतसङ्गतो रहूगणस्यापि पञ्चमे तथात्वोक्तिः। शबरात्पर्णशबरीजाता आर्द्धवकापरसंज्ञाः किराताः। वैदेहजात् पुल्कसीजाता हूणाः। वैश्यात् ब्राह्मणीजातो वैदेहकः। वैदेहकपुत्राः पुतिबापरसंज्ञकाः आन्ध्राः। अज्ञातविप्रादिभाषाः मधुपायिनः निष्ठ्यात् किरातीजाताः पुलिन्दाः। व्यभिचाराज्जातश्चौरस्तस्माज्जाता वा। शूद्रात् ब्राह्मण्यां जातश्चाण्डालस्तस्माज्जाताः पुष्कसाः। ब्राह्मणाद्वैश्यायां जातोऽम्बष्ठः। ब्राह्मणादम्बष्ठकन्यायां जाता आभीराः। कङ्काः कर्परापरसंज्ञाः "काठी" इति लोकप्रसिद्धाः। नृपाद्वैश्यायां जाताः श्मश्रुला यवनाः। खसाः कङ्का "इव खशिया खोजा" इति लोकप्रसिद्धाः। तत्र शका इति पाठे शकास्तुरुष्कविशेषाः। आदिशब्दगृहीताः डोंबकुरुविन्दप्रभृतयः। तत्रोक्तैस्तथा चानुक्तैः सह चतुःषष्टिजातयः। तथाचोक्तम्। 'ब्राह्मणस्य त्रयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुत्रा वर्णास्त्रिष्वनुलोमजाः। शूद्रस्य च त्रयः पुत्रास्तेष्वेव प्रतिलोमजाः। त्रयस्त्रयः क्षत्रविशोः प्रतिलोमानुलोमजाः। एते द्वादश-वर्णानां पुत्रा एकैकशस्तु ते। चातुर्वर्ण्ये प्रसूयन्ते चतुरश्चतुरः सुतान्। ते चत्वारिंशदष्टौ च पूर्वैर्द्वादशभिः सह। ब्राह्मणाद्यैश्च-तुर्भिश्च चतुःषष्टिर्हि जातयः। ते सर्वे दस्यवो दोषैश्चौर्याद्यैः सद्बहिष्कृताः' इति जातिविवेकाभिधाने। अन्ये पापा ब्रह्महत्यादि-कर्त्तारः। सज्जनसेवया एतादृशा अपि शुध्यन्ति तदा साक्षाद्भगवत्संबन्धेन शुध्येयुरत्र किं वक्तव्यम्। 'एक एव हरिः स्वामी शब्दवाच्योऽस्ति सर्वथा। अन्यस्तु तदुपास्त्यात्तगुणयोगात्तथोच्यते' इति बृहद्विष्णुपुराणोक्तस्वामिसंज्ञाप्रसिद्धनारायणावतार एव भवितेति त्रिकालदर्शी शुको भागवतप्रवचने मङ्गले नमस्कृतवान् ॥ १८ ॥ उक्तावतारस्यैव सर्वोपास्यत्वमनुस्मरन् प्रार्थयते। स एष इति। स पूर्वोक्तार्थतया प्रसिद्धः। एष प्रभुर्विष्णुः आत्मा परमात्मा आत्मवतां केवलयोगनिष्ठानामपि अधीश्वरः योगफलप्रदः। त्रयीमयः वेदपूर्वभागोक्तकर्माराध्यत्वात्तत्फलप्रदः। धर्ममयः स्मार्त्तदानादिधर्माराध्यत्वात्तत्फलप्रदः। तपोमय उपनिषद्भा-गोक्तोपासनात्मकज्ञानमयः। तज्ज्ञानप्राचुर्येवेद्यस्तत्फलप्रद इत्यर्थः। तत्तद्देवतानां तत्तत्फलप्रदातृत्वश्रवणात्कथं तस्यैव सर्वकर्मा-राध्यत्वमित्यत आह। गतव्यलीकैर्गतदोषैः अजशंकरादिभिः ब्रह्मरुद्रादिभिः वितर्क्यं निश्चेतुमशक्यं लिङ्गं चिह्नं यस्य सः। ब्रह्मादयोऽपि यदीयं लक्षणं वितर्कयन्ति तथाभूतः तेषामप्यन्तरात्मत्वेनोपास्य एवेत्यर्थः। ब्रह्मादिरूपेण स्वं भजमानानां तत्तदात्म-तयाराधनफलप्रद इति हृदयम्। एवंभूतभगवत्प्रसादं स्वस्य प्रार्थयते भगवानिति। एवंभूतः सः भगवान् प्रसीदताम्। अनेन सर्वदेवानामप्येतदुपास्यत्वं विवक्षितम् ॥ १९ ॥

साम्प्रतं श्रीकृष्णहरिकृष्णयोरेकात्मतां मनसि निधाय तयोः सर्वपालकत्वमनुस्मरन्नाह। श्रिय इति। श्रियो रुक्मिणी-रूपाया लक्ष्म्याः अनवधिकातिशयस्वयोगैश्वर्यसंपद्रूपश्रियश्च पतिः। यज्ञानां गोवर्द्धनयजनादीनां विष्णुयागमहारुद्रातिरुद्रादि-यज्ञानां च पतिः। अनेनोभयोर्वैदिकमर्यादापालकत्वं बोध्यम्। प्रजानां कंसार्दितयदुमाधवकुकुरादिकुलजजनानाम् असुरसमूहार्दित-सज्जनानां च पतिः, तद्द्रोग्धृविनाशनेन तद्रक्षक इत्यर्थः। अनेनाब्रह्मस्तम्बपर्यन्ताश्रितप्रजापालकत्वमुभयोः साम्येनोक्तम्। धियां भगवद्गीतैकादशस्कन्धाद्युक्तहरिगीताजनशिक्षासुधासिन्ध्वाद्युक्तमोक्षोपायध्यानोपासनामतीनां पतिः। अनेन भगवद्वयात्मक-निगमहार्दबोधकत्वसाम्यमुभयोरभिहितम्। लोकपतिः सर्वलोकैकनाथः। अनेन सर्वभुवनान्तर्गतजनानामवैषम्येण शुभचिन्तन-रूपमुभयोरेकक्रियाकर्तृत्वं सूचितम्। धरापतिः भूलोकपालः। परेषां लोकानां पतित्वे सत्यपि भूलोकेऽधर्मबाहुल्यात्ततस्तदवनार्थं पृथगुक्तिः। श्रीकृष्णहरिकृष्णादिरूपेण भूलोकेऽवतीर्य दुष्कृतविनाशनकर्तृता विशेषतो मर्यादापालकतारूपमुभयैकक्रियाकर्तृत्व-मुक्तम्। अन्धकाश्च वृष्णयश्च सात्वताश्च तेषां तत्कुलोत्पन्नजनानां पतिः गतिः। सतामच्युतगोत्रावलम्बिसज्जनानां पतिः गतिश्च। भगवानुक्तविशेषणविशिष्टधृतधार्यावतारद्वयोऽयं परमेश्वरः मे मह्यं प्रसीदतु। अनेनोभयत्र समविशेषणोपादानेन साधुपरित्राणमेवावतारकृत्यं दुष्कृतिविनाशनं त्वानुषङ्गिकमिति व्यञ्जितम् ॥ २० ॥ उक्तार्थजातमिदं किंप्रमाणं कथं वा ज्ञातुं शक्यमित्याशङ्कामपनुदन् ज्ञानप्रदत्वेन सतां पतित्वमेव व्यक्तं कुर्वंस्तत्प्रसादं प्रार्थयते। यदङ्घ्रीति द्वाभ्याम्। ययोः श्रीकृष्ण-हरिकृष्णयोरङ्घ्री चरणौ तयोरनुध्यानं चिन्तनमेव समाधिस्तेन धौतया शोधितया धिया बुद्ध्या आत्मनो धृतोभयरूपात्मक-परमात्मनः तत्त्वं याथात्म्यं कवयो व्यासशतानन्दादयः कविजनाः स्वयम् अनुपश्यन्ति हि जानन्त्येवेत्यर्थः। अन्ये च यथारुचं यथारुचि स्वस्वप्रतिभानुसारेणेत्यर्थः। एतद्भगवत्तत्त्वं वदन्त्युपदिशन्ति चेत्यर्थः। मुकुन्दः स्वदर्शनस्पर्शनादिकर्तृजनमुक्तिप्रदः। स उक्तप्रकारः भगवान् मे मह्यं प्रसीदताम्। उक्तार्थबोधे तत्तदवतारचरित्रशास्त्रं प्रमाणं तच्छ्रवणेन तन्माहात्म्यं च ज्ञातुं शक्यमिति भावः। तथा चोक्तं श्रीहरिवाक्यसुधासिन्धोः शताधिकैकनवतितमे तरङ्गे। 'संप्रदाये यत्र यस्तु स्वेष्टदेवो मतो भवेत्। तत्संबन्धी भवेद्ग्रन्थो यः स तं पोषयेद्ध्रुवम्। तत्र हि स्याज्जन्महेतुस्तस्य तच्चरितानि च। आविर्भावात्तिरोभावावधि सर्वाण्यनु-क्रमात्। संप्रदायं यथा स्वेष्टदेवग्रन्थः प्रपोषयेत्। अन्यग्रन्थस्तथा नैव वेदादिरपि निश्चितम्' इति ॥ २१ ॥

प्रणोदितेति। किंच पुरा कल्पादौ अजस्य ब्रह्मणः हृदि सतीं सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता येन परमात्मना प्रणोदिता संप्रेरिता सती, स्वानि लक्षणानि शिक्षाद्युक्तानि यस्याः सा स्वाऽसाधारणचिह्नवती सरस्वती त्रयीरूपा आस्यतो ब्रह्मणो मुखतः प्रादुरभूत प्रादुर्भूता किल। स विधिहृदि त्रयीप्रेरकः ऋषीणां ज्ञानप्रदानाम् ऋषभः श्रेष्ठः मे मम प्रसीदताम् ॥ २२ ॥ इदानीं देहेन्द्रियादिप्रवर्तको भगवानेव मद्वचसां सर्वजनप्रीतिप्रतिपादकः स्यादिति प्रार्थयते। भूतैरिति। यः परमात्मा महद्भिः भूतैः महदादिपृथिव्यन्तैर्भूतैरित्यर्थः। इमाः शरीर्यधिष्ठिताः पुरः शरीराणि निर्माय 'बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः' इत्युक्तरीत्या सृष्ट्वा विभुः स्वयं तत्तज्जीवान्तर्व्यापनस्वभावः सन् अमूषु आसु पुरीषु शेते अवतिष्ठते। यत्, अत एव पूरुषः। जीवयुक्ततया सजीवे स्वतो जडे पुरशब्दवाच्ये शरीरेऽवस्थितिरूपशयनविधानात्पुरुषशब्दवाच्य इत्यर्थः। एवंभूतः संश्च षोडश गुणान् शब्दादिपञ्चविषयान् वागादिपञ्चकर्मेन्द्रियव्यापारान् प्राणादिपञ्चवायुवृत्तीः एकं मनसः संकल्पादिगुणमित्येतान् षोडश-गुणानित्यर्थः। स्वयं षोडशात्मकः षोडशसंख्याकानामात्मभूतः सन् भुङ्क्ते प्रकाशयति। स्वयं वा क्षेत्रज्ञद्वारा लीलारसमनु-भवति। जीवान्तर्यामित्वेन गुणग्रहणं भगवतो लीलारसानुभवः, जीवस्य तु कर्मायत्ततया तदनुभव इति तयोर्महान् भेदः। सः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगवान् मे मम वचांसि अलंकृषीष्ट प्रीतिजनकानि कुर्यात् ॥ २३ ॥ एवं भगवन्तं नमस्कृत्य स्वगुरुं पितरं च व्यासं नमस्करोति। नम इति। वासुदेवाय व्यासस्यापि वासुदेवावतारत्वाद्वासुदेवायेत्युक्तम्। वेधसे सर्वज्ञाय भगवते तस्मै व्यासाय नमः। कथंभूताय सौम्यास्तच्छिष्याः ज्ञानमयं यस्य व्यासभगवतो मुखमेवाम्बुरुहं पद्मं तस्मिन् य आसवो मकरन्दस्तं पपुः तस्मै। केचित्त्वत्र बहुनर्थान् विकल्प्य व्याख्यायन्ते तत्त्वस्माभिरप्रकृतत्वादुपेक्ष्य व्याख्या कृता ॥ २४ ॥

एवं गुरुदेवते नमस्कृत्य प्रकृतप्रश्नोत्तरमवतारयितुं तस्य सांप्रदायिकत्वं सूचयन्नारदहिरण्यगर्भयोः प्रश्नोत्तरे संवादयति। एतदेवेति। हे राजन्। त्वया यत्पृष्टं तत्रोत्तरमेतदेव, किं तत, वेदः गर्भः अंतःस्थो यस्य सः आत्मभूर्ब्रह्मापि विपृच्छते स्वस्मै प्रश्नं कुर्वते नारदाय तत् अभ्यधात्। ब्रह्मा नारदाय किमाह तत्राह। साक्षात्स्वपुरः साक्षाद्भावं प्राप्तः हरिः श्रीनारायणः आत्मनः स्वस्मै इत्यर्थः। यत् आह तत्। अस्याय भावः आदौ नारायणेन ब्रह्मणे यत्प्रोक्तं ब्रह्मणा नारदाय नारदेन व्यासाय व्यासेन मह्यं तदेतदहं त्वत्प्रश्नपरिहारत्वेन वक्ष्यामीति ॥ २५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

श्रीनारद उवाच

देवदेव नमस्तेऽस्तु भूतभावन पूर्वज। तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥ १ ॥

वक्त्यजः पञ्चमे पृष्टः सृष्ट्याद्यं नारदेन च। विराट्सृष्ट्यात्मिकां लीलां हरेः कालादिशक्तिभिः ॥ १ ॥

नारदाय विपृच्छते वेदगर्भोऽप्यभ्यधादित्युक्तं तत्र नारदप्रश्नमाह। देवदेवेति। हे देवदेव हे भूतभावन भूतस्रष्टः। अत एव हे पूर्वज अनादे, ते तुभ्यं नमः अस्तु। आत्मतत्त्वस्य परमेश्वरस्य निदर्शनं नितरां प्रकाशकं यत् ज्ञानं तत विजानीहि। अयमन्तर्भावितणिजर्थः। ततः विशेषेण ज्ञापयेत्यर्थः ॥ १ ॥ यद्रूपमिति। हे प्रभो। इदं कार्यरूपं जगत् यद्रूपं यस्य रूपं यदात्मकमिति यावत्। अस्य निमित्तकारणं किमिति प्रश्नः। यतः सृष्टम्, यत उपादानभूतात्सृष्टं यदुपादानात्मकमिति यावत्। अस्योपादानकारणं किमिति प्रश्नः। यः अधिष्ठानमाधारो यस्य तत, अस्याधारः क इति प्रश्नः। यस्मिन् संस्था लयो यस्य तत्। अस्य लयाधारः क इति प्रश्नः। यः परोऽस्माद्विलक्षणः सन् शास्ता यस्य तत्। इदं कस्याधीनमिति प्रश्नः। यत च, उक्तातिरिक्तानि अन्यानि कान्यस्योपकरणानीति प्रश्नः। तस्य तत्त्वं तत्तत्त्वं मत्कृतप्रश्नानां याथार्थ्यतयोत्तरमित्यर्थः। तत्त्वतः यथार्थतया वद ॥ २ ॥ न जानामीति न वक्तव्यमित्याह। सर्वमिति। हे ब्रह्मन्। हि यतः भगवान् भूतं प्राग्जातं भव्यं जनिष्यमाणं च भवज्जायमानं च तेषां प्रभुः। भूतभविष्यद्वर्त्तमानकालस्थवस्तुजातस्योत्पादकः अतः यत्सृष्टं तत् एतत् सर्वं वेद। त्वं जानासीत्यर्थः। किं च। विश्वं सकलं जगत् तव त्वयेत्यर्थः। करामलकवत्। हस्तधृतनिर्मलोदकबिन्दुवदित्यर्थः। विज्ञानावसितं भगवत्प्रसादसंप्राप्तज्ञानेन निश्चितम्। अस्तीति शेषः। करामलकवन्निश्चितजगत्स्वरूपस्य तव किमविदितमस्ति सर्वकालं तस्य साक्षादनुभवसिद्धत्वादिति भावः। एवं जगद्विषयको नारदकृतः प्रश्नो बोध्यः ॥ ३ ॥

आस्तां तावदिदं त्वं त्वामेव कथयेत्याह। यद्विज्ञान इति। यतः विज्ञानं यस्य सः, कस्तव विज्ञानद इत्यर्थः। यद्वा सप्तमीबहुव्रीहिः, कस्मिन्विषये तव विज्ञानमस्तीत्यर्थः। य आधारो यस्य स यदाधारः। कस्तवाश्रय इत्यर्थः। यः परो यस्य स यत्परः। कस्य त्वमधीनोऽसीत्यर्थः। य आत्मा यस्य स यदात्मकः। कस्त्वदात्मा इत्यर्थः। मम तु त्वमेव स्वतन्त्रः परमेश्वर इति भाति। तपश्चरणेन तु परशङ्कया पृच्छामीत्याह सार्द्धैश्चतुर्भिः। एकः असहायः त्वम् आत्ममायया आत्मनः संकल्पेन भूतैः पृथिव्यादिभिर्भूतैः एव भूतानि देवादीनि सृजसि ॥ ४ ॥ आत्मन्निति। तानि सृष्टानि भूतानि आत्मन् आत्मनि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वस्मिन्नित्यर्थः। स्वयं न पराभावयन्। स्वात्मानं पराभवमप्रापयन्। अमोघवाञ्छः सन्नित्यर्थः। भावयसे पालयसि। अस्योपलक्षणत्वात्संहरसीत्यपि ज्ञेयम्। तत्र दृष्टान्तमाह। ऊर्णनाभिर्लूताख्यः कीटविशेष इव आत्मशक्तिं स्वस्य प्रकृतिम् अवष्टभ्यावलम्ब्य अक्रमः अस्पृष्टश्रमः, श्रमरहितः सन्नित्यर्थः। सृजसि पासि संहरसीत्यर्थः॥ ५॥ एतद्देवोपपादयति। नाहमिति। हे विभो अहं तु अस्मिन्कारणावस्थे जगति सतीत्यर्थः। त्वत्त इति शेषः परमुत्कृष्टं न वेद। हि अपरं निकृष्टं समं मध्यमं च न वेद। कार्यावस्थे जगति सत्यपीति शेषः। नामदेवमनुष्यादि च, रूपं शुक्लादि च, गुणाः सत्त्वादयश्च तैः भाव्यमुत्पाद्यम्। सच्चेतनात्मकम् असदचेतनात्मकं किंचिदपि वस्तु अन्यतः त्वत्तोऽन्यस्मात् न वेद। किं तु त्वत्त एव समुत्पन्नमस्तीति जानामीत्यर्थः॥ ६॥ यदि मत्तोऽन्यतो न जानासि तदा यत्परस्त्वमित्यादिप्रश्नः कुत प्रसक्त इत्यत्राह। स इति। स उक्तविधः जगत्स्रष्टेति प्रसिद्धः भवान्। घोरमितरैश्वरितुमशक्यत्वान्महत् तपः सुसमाहित एकाग्रमनाः सन्नित्यर्थः। अचरत् कृतवान् यत्। तेन दुश्चरतपश्चरणेन, परस्यान्यस्य आशङ्का अस्मादपि परं किंचिदस्तीत्येवंभूता ताम् प्रयच्छसि। ततः त्वं नोऽस्मान् खेदयसे। परशङ्काप्रदानेन चित्तविक्षेपं जनयसीत्यर्थः॥ ७॥ प्रश्नमुपसंहरति। एतदिति। हे सर्वज्ञ हे सकलेश्वर अनुशासितस्त्वया शिक्षितः अहम् इदं भवतोपदेक्ष्यमाणं यथैव बुध्ये जाने तथा एतत् सर्वं पृच्छतः मे मम मह्यमित्यर्थः। विजानीहि विशेषेण ज्ञापय॥ ८॥

अथ ब्रह्मा यथाप्रश्नमुत्तरयिष्यंस्तावत्प्रश्नमभिनन्दति। सम्यगिति। हे वत्स पुत्र। कारुणिकस्य मयि करुणावतः ते तव। इदं विचिकित्सितं सम्यक् त्वयेदं सम्यक् ज्ञातुमिष्टमित्यर्थः। कुत इत्यत आह। हे सौम्य यद्यस्मात् अहं भगवद्वीर्यदर्शने भगवत्प्रभावज्ञापनरूपे धर्मे चोदितः प्रवर्त्तितः॥ ९॥ अभिमतार्थजिग्राहयिषया प्रश्नं विविनक्ति। नानृतमिति। भो इति संबोधने हे नारद। मां प्रति यथा प्रब्रवीषि। एकः सृजति भूतानीत्यादिना यत्पृच्छसि इत्यर्थः। तच्चापि तव त्वदीयं वचः नानृतम् अतीव नासत्यम्। किं तु। मत्तः परं भगवन्तम् अविज्ञाय अज्ञात्वा त्वं ब्रवीषि। अविज्ञायेति यदुक्तं तदज्ञाने हेतुमाह। मे मम एतावत्त्वम् एतावन्महिमवत्त्वम्। यतः परमकारणात् भवति हि। तं मत्तः परमज्ञात्वा ब्रवीषीत्यर्थः॥ १०॥ तर्हि एवंभूतमहिमवतस्त्वत्तः परः कोऽसावीश्वर इत्यपेक्षायां भक्त्या नमस्करिष्यन्नाह। येनेति। हे पुत्र अर्कः सूर्यः यथा स्वरोचिषा स्वयंप्रकाशेन येन भगवता रोचितं प्रकाशितमेव रोचयति। एवं सोमः, यथा अग्निः, यथा ऋक्षाण्यश्विन्यादीनि नक्षत्राणि च, ग्रहाः शुक्रादयश्च, तारकाः सामान्यताराश्च ते यथा तत्प्रकाशितमेव रोचयन्ति तथा अहमपि स्वरोचिषा येन रोचितमेव विश्वं रोचयामि। यथा च श्रुतिः। 'न तत्र सूर्यो भाति न च चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति' इति। 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्' इति स्मृतिश्चात्रानुसंधेया॥ ११॥ नारदेनाज्ञात्वापि स्वसर्वोपरित्वं यत्कथितं तदेतद्भगवद्भक्तस्य मम दुर्मतश्रवणं जातं स च मय्यपराध आयातः स च भगवद्भक्तेन निरपराधबुभूषुणा मया भगवन्नमनेन परिहर्तव्य इति भावेन भगवन्तं प्रणमति। तस्मै इति। तस्मै मह्यमित्थंभूतैश्वर्यप्रदाय वासुदेवाय भगवते नमो नमस्कुर्महे। धीमहि तमिति शेषः। तमेव ध्यायाम इत्यर्थः। अनेन जातापराधनिवृत्त्यै वैष्णवैर्मन्त्रद्वयं जप्यमित्यपि ज्ञापितम्। तद्यथा। 'ॐ नमो भगवते वासुदेवाय' 'नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्'। अनेन द्वादशाक्षरी चतुर्विंशत्यक्षरीति द्वे विद्ये हिरण्यगर्भेण नित्यं सेव्ये स्त इत्यपि प्रदर्शितम्। अहो निरवधिकातिशयैश्वर्यस्य श्रीहरेरिच्छात्मकमायाबलमिति स्वशिरो धूनयन्वदति। दुर्जययाऽभक्तैर्जेतुमशक्ययेत्यर्थः। यन्मायया यस्य भगवतो मायया शक्त्या मां जगद्गुरुं ब्रुवन्ति वदन्ति 'ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा। विष्णुमायामहावर्त्तमोहान्धतमसावृताः' इत्यभियुक्तोक्तन्यायेन मायामोहिता मां जगद्गुरुं ब्रुवन्ति ते चातत्त्वविदः। तत्त्वविदस्तु न तथा वदन्तीति भावः॥ १२॥

इतरेषां मायाया दुर्जयत्वं भगवतस्तदसंस्पर्शं चाह। विलज्जमानयेति। यस्य श्रीहरेर्भगवतः ईक्षापथे दृष्टिमार्गे स्थातुमवस्थानं कर्तुम्। विलज्जमानया मत्कपटमसौ जानातीति मत्वा यस्य दृष्टिपथेऽवस्थातुं विलज्जमानतया तस्मिन्स्वकार्यं कर्तुमशक्नुवत्येत्यर्थः। अमुया मायया विमोहिताः सन्तः दुर्धियः मम अहम् इति विकत्थन्ते। हे जनाः इदं विश्वं मम वशेऽस्ति सर्वस्याहं कर्त्तास्मीति स्वश्लाघां कुर्वन्तीत्यर्थः॥ १३॥ विकत्थनमेवाह। द्रव्यमिति। द्रव्यं पृथिव्यादिभूतमेव कारणमिति केचिद्वदन्ति। कर्म एव कारणमिति च केचिद्वदन्ति। काल एव कारणमिति चान्ये वदन्ति। स्वभाव एव कारणमित्यपरे। जीवः कर्माधीनत्वाज्जीव एव कारणमित्यपरे। एवं यन्मायया मोहिता विकत्थन्ते इत्यर्थः। एवं तैः स्वतन्त्रतयाभिमता द्रव्यादयः पदार्था भगवदधीना एव, न स्वतन्त्रा इत्याह। वासुदेवादिति हे ब्रह्मन्। वासुदेवात् द्रव्यादिषु पदार्थेषु तत्तच्चेतयितृतयावस्थितात्भगवतः परः तत्त्वतः परमार्थसत्यरूपः अन्यः अर्थः, न च नैव अस्ति। यथा वासुदेवात्परोऽन्योऽर्थो नास्ति तथैव अतदात्मकम् अतत्परतन्त्रं च नास्तीत्युक्तं वक्ष्यमाणेषु च सूचितम्। कालादीनामस्वातन्त्र्यं वासुदेवस्यैव तन्नियामकत्वेन स्वातन्त्र्यमुक्तमस्ति सुधासिन्धोः शताधिकषष्ठे तरङ्गे। 'कालः कर्म च मायापि तदधीना भवन्ति हि। न स्वतन्त्राः कचित्तस्मान्मुख्यः कर्त्ता स ईश्वरः'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यादिना ॥ १४ ॥ ननु 'हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम'। 'ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्त्ता भुवनस्य गोप्ता' इत्याद्याः श्रुतयस्त्वद्गुणप्रतिपादनपरास्त्वामेव कारणं ब्रुवन्ति ताः कथमन्यविषयाः स्युरिति चेन्मदन्तःस्थस्य हरेरेव मन्नाम्ना प्रतिपादका इत्याशयेनाह। नारायणपरा इति। वेदाः नारायण एव परः प्रतिपाद्यो येषां ते 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेः। यद्वा। नारायणः परं कारणं येषां ते तथोक्ताः। 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इत्यादि श्रुतेः। ननु वेदे तु 'इन्द्रो यातोऽवसितस्य राजा'। 'अग्निर्मूर्द्धा दिवः ककुत्पतिः' इतीन्द्राग्न्यादयो देवाः कारणभूताः श्रूयन्ते तत्राह। देवा इन्द्रादयः नारायणस्य यदङ्गं तस्माज्जाताः तच्छरीरभूताश्चेत्यपि विवक्षितम् 'चन्द्रमा मनसो जातः' 'स आत्मा अङ्गान्यन्ये देवता' इत्यादिश्रुतेः। लोकाः स्वर्गादयः कर्मप्राप्याः नारायणः परः स्वामी येषां ते तथोक्ताः। मखाः क्रतवश्च नारायणः पर आराध्यो येषां ते तथोक्ताः ॥ १५ ॥

नारायणेति। योगो विवेकादिजन्य उपासनात्मको योगः, नारायणः परो ध्येयो यस्मिन् तथोक्तः। तपः विद्याङ्गभूतं कर्म नारायणः परः पर्यवसानभूमिर्यस्य तत्तथोक्तम्। ज्ञानं शास्त्रजन्योऽवबोधश्च नारायणः परो ज्ञेयो यस्य तत्तथोक्तम्। गतिर्योगफलमर्चिरादिका सापि नारायणः परो गन्तव्यो यस्याः सा तथोक्ता भवतीति शेषः। एवं सर्वं तदधीनमिति कथनेन 'नाहं वेद परं ह्यस्मिन्नापरं न समं विभो' इत्यंशस्योत्तरमुक्तं भवति ॥ १६ ॥ तर्हि त्वं किं करोषीत्यपेक्षायामाह। तस्यापीति। अखिलात्मनः सर्वान्तर्यामिणः। द्रष्टुः सर्वज्ञस्यापि, ईशस्य सर्वं स्ववशीकृत्य नियन्तुः, कूटस्थस्य निर्विकारस्य तस्य नारायणस्य ईक्षया संकल्परूपज्ञानेनैव सृष्टः अहं तेन अभिचोदितः संप्रेरितः सन्नेव सृज्यं सृजामि। स तु प्रयोजकोऽहं तु तत्प्रयोज्य इति भावः ॥ १७ ॥ ननु कुतोऽयं नियोजकस्त्वं च नियोज्यः, कुतो वा तस्य सर्वज्ञत्वादयो धर्मास्तव च तद्विपरीता इति चेन्मायेश्वरत्वमायावश्यत्वाभ्यामित्याह। सत्त्वमिति। निर्गुणस्य हेयगुणरहितस्य। विभोः दिव्यगुणेन व्यापकेन भगवता इत्यर्थः। तृतीयास्थाने संबन्धसामान्ये षष्ठी। मायया स्वप्रकृतिद्वारा स्थितिसर्गनिरोधेषु निमित्तेषु स्थित्याद्यर्थमित्यर्थः। सत्त्वं रजः तमः इति त्रयः गुणाः गृहीताः स्वनियाम्यत्वेन परिगृहीताः। सृष्टिस्थितिसंहाररूपलीलापरिकरत्वेन सत्त्वादयो गुणा ईश्वरेण परिगृहीता इत्यभिप्रायः ॥ १८ ॥ एवं गुणानामीश्वरलीलापरिकरत्वमुक्त्वा तेषां जीवबन्धनकर्तृत्वमाह। कार्येति। द्रव्यं च ज्ञानं च क्रिया च तासामाश्रयास्तत्कारणभूताः। तत्र द्रव्यं महाभूतानि, ज्ञानशब्देन देवताः, क्रियाशब्देनेन्द्रियाणि। गुणाः सत्त्वादयः, मुक्तं स्वरूपगतप्रकृतिसंबन्धरहितमपि मायिनमनादिकालतो मायावश्यम्। संबन्धमात्रे णिनिः। एवंभूतं पुरुषं जीवम्, कार्यं शरीरं च कारणमिन्द्रियं च ताभ्यां कर्तृत्वं तस्मिन्निमित्ते, देवतामृते इन्द्रियाणाम् अकिंचित्करत्वात्तदुपादानेन तदुपादानं बोध्यम्। नित्यदा बध्नन्ति। द्रव्यज्ञानक्रियाणां मध्ये द्रव्यस्य मोहनस्वभावता। ज्ञानस्य प्रकाशनस्वभावता। क्रियायाः प्रवर्त्तनस्वभावता। तत्र द्रव्यस्य मोहनवाचित्वं पारिशेष्यादवगम्यते। अत एवास्मिन्नध्याये बहुशः प्रयोगाश्च। 'सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः। निबध्नन्ति महाबाहो देहे देहिनमव्ययम्। तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्। सुखसङ्गेन बध्नाति ज्ञानसंगेन चानघ। रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्। तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तं निबध्नाति भारत' इति गीतावचनानि चात्र स्मारितानि। द्रव्याद्याश्रया गुणाः पुण्यपापनिष्पादनद्वारा अधिभूताध्यात्माधिदैवतवशं पुरुषं वशंवदं कुर्वन्तीति भावः ॥ १९ ॥

एवं गुणानां जीवबन्धकत्वमुक्तम्। अथ स्वलीलापरिकरीकृतमायः परमेश्वरः सर्वेषां मम चेश्वर इत्याह। स एष इति। हे ब्रह्मन् नारद एभिः त्रिभिः लिङ्गैः सत्त्वादिगुणैः, स्वशरीरभूतप्रकृतिस्थैरेभिस्त्रिभिर्गुणैरुपलक्षित इत्यर्थः। स्वलक्षिता स्वच्छन्दा गतिर्यस्य स तथोक्तः। न त्वन्यदर्शितमार्गः। अधोक्षजः सः एष एवंविधैश्वर्यसंपन्नः भगवान्, सर्वेषां मम च ईश्वरो नियन्ता। स्वलक्षितगतिरित्यत्र स्वैरात्मीयैर्लक्षिता, अस्वीयैस्तु सुतरामलक्षिता गतिर्यस्येत्यर्थं केचनाहुः ॥ २० ॥ 'एवमेकः सृजति भूतानि' इति प्रश्नस्योत्तरमुक्त्वा यद्रूपमित्यादेः प्रश्नस्योत्तरं वदंस्तावत्सृष्टिप्रकारमाह। कालमिति। मायेशो मायाधिपतिः स्वया मायया स्वसंकल्पेन। यद्वा। विश्वसर्गद्वारभूतया प्रकृत्या विबुभूषुः प्रकृतिद्वारा नानानामरूपभाग्भवितुमिच्छुः। अपरप्रेर्योऽकर्मपरवशः संश्चेति शेषः। यदृच्छया अहैतुकं यथा स्यात्तथेत्यर्थः। आत्मन् आत्मनि प्राप्तं संगतम्। कालो गुणवैषम्यरूपगुणक्षोभहेतुस्तम्। कर्म जीवादृष्टम्। स्वभावः प्रकृतेः परिणामस्तं च उपाददे। तेषां तत्तत्कार्योन्मुखतामापादितवानित्यर्थः ॥ २१ ॥ कालकर्मस्वभावोपादानफलं प्रदर्शयन्महतः सृष्टिमाह। कालादिति। कालात् हेतुभूतात् गुणव्यतिकरात्, जातादिति शेषः, कालकृतगुणवैषम्यादित्यर्थः। परिणामस्वभावतः कालहेतुकगुणव्यतिकरात्मकप्रकृतिपरिणामस्वभावादित्यर्थः। कर्मणो जीवादृष्टाच्च हेतोः पुरुषाधिष्ठितात्परमपुरुषाश्रितात् अव्यक्तादिति शेषः। महतो महत्तत्त्वस्य जन्म उत्पत्तिः अभूत्। अत्राधिष्ठितत्वं नाम तदाहितस्वकार्यजननसामर्थ्यवत्त्वम्। यद्वा। गुणानां व्यतिकरो यस्मिंस्तस्मादिति बहुव्रीहिः। व्यतिकरो मिश्रणं तच्च समानां गुणानां विषमत्वापत्तिः ॥ २२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महत अहङ्कारोत्पत्तिमाह। महतस्त्विति। विकुर्वाणाद्विक्रियमाणात् रजो रजोगुणश्च सत्त्वं सत्त्वगुणश्च ताभ्यामुपबृंहितात्प्रवृद्धात् महतः सकाशात्तु। द्रव्यज्ञानक्रियात्मकस्तु मोहनप्रकाशनप्रवर्तनस्वभाव एव। तमःप्रधानस्तमोगुणप्रधानस्तत्त्वविशेषः अभवत्। महतस्त्रिगुणात्मकत्वेऽपि क्रियाशक्तिज्ञानशक्तिप्रधानत्वाद्रजःसत्त्वोपबृंहितादित्युक्तम्। एवमहङ्कारस्य तमःकार्यप्रधानत्वात्तमःप्रधान इत्युक्तम्। अत एवाहङ्कारकार्येषु तामसं बहु, राजसं सात्त्विकं चाल्पम्, एवं महत्कार्येषु तामसमल्पं तदितरदुभयं बह्विति मन्तव्यम् ॥ २३ ॥ तमःप्रधानस्त्वभवदिति निर्नामकमुक्तं ततस्तमःप्रधानस्य किं नामधेयमित्यत आह। सोऽहङ्कार इति। हे प्रभो यः तमःप्रधान उक्तः, सः अहङ्कारः इति प्रोक्तः। तस्य त्रैविध्यमाह विकुर्वन्निति। विकुर्वन् रूपान्तरं गच्छन्, स च त्रिधा समभूत्सम्यगभूत्। वैकारिकः, तैजसः, तामसश्च इति इत्येवंविधा यद्भिदा, यस्याहङ्कारस्य भेदा इत्यर्थः। वैकारिकस्तैजसश्च तामसश्चेति सात्त्विकराजसतामसाहङ्काराणां क्रमेण नामानि। तेषां प्रतिनियतस्वभावान् प्रातिलोम्येनाह। द्रव्यशक्तिरिति। द्रव्ये शक्तिर्यस्य सः। महाभूताख्यद्रव्योत्पादने सामर्थ्यवानित्यर्थः। क्रियायां शक्तिर्यस्य सः। चक्षुरादीन्द्रियाणां स्वस्वविधेयक्रियायां प्रवर्त्तनसामर्थ्यवानित्यर्थः। ज्ञाने शक्तिर्यस्य सः। शब्दादिविषयज्ञानसंपादने सामर्थ्यवानित्यर्थः। इति अभूत् ॥ २४ ॥ एवमहङ्कारस्य त्रैविध्यमुक्तम्। अथ तामसाहङ्काराच्छब्दादितन्मात्रक्रमेणाकाशादिभूतसृष्टिमाह। तामसादिति। विकुर्वाणाद्विक्रियमाणात्। भूतादेर्भूताद्यपरनामकात् तामसात् अहङ्कारादपि। भूतादिरिति तामसाहङ्कारस्यैव नामान्तरमस्ति। 'शब्दो भूतादिसभ्येति भूतादिर्महति प्रभुः' इत्येकादशे तथा दर्शनात्। नभः आकाशम् अभूत्। शब्दद्वारा नभ उदपद्यतेत्यर्थः। एवमेव स्पर्शादिष्वपि द्रष्टव्यम्। एतदेव शब्दस्य स्वभावं कथयन्नुपपादयति लिङ्गमिति। तस्य नभसः मात्रा सूक्ष्मरूपम्, गुणः व्यावर्त्तकोऽसाधारणो धर्म इत्यर्थः। एवंभूतः यः शब्दः सोऽप्यभूदिति शेषः। शब्दद्वारा ततो नभ उत्पद्यत इति भावः। शब्दस्य लक्षणं द्रष्टृदृश्ययोरात्मानात्मनोः लिङ्गं प्रमाणं यत् स शब्द इत्यर्थः। शब्दो हि शास्त्रात्मना आत्मानात्मनोः प्रमाणम्। यदाह सूत्रकारः। 'शास्त्रयोनित्वात्' इति। यदिति नपुसकत्वं लिङ्गापेक्षया। केचित्तु शब्दस्य लक्षणं लिङ्गमित्युक्त्वा कुड्याद्यन्तरितेन केनचिदुच्चैर्गजो गज इत्युक्ते यो गजद्रष्टा यश्च तेन दृश्यो गजस्तयोर्लिङ्गं बोधकम् इत्याहुः ॥ २५ ॥ नभस इति। अथानन्तरं विकुर्वाणाद्रूपान्तरं गच्छतः नभसः सकाशात्' स्पर्शो गुणो यस्य सः, परान्वयात्कारणभूतनभोऽनुवृत्तेः शब्दवांश्च अनिलो वायुः अभूत्। स्पर्शतन्मात्राद्वाराऽनिलोऽभूदित्यर्थः। तस्य प्राणादिबलपोषकत्वरूपं लक्षणान्तरमाह। प्राणः ओजः सहः बलम्। प्राणादीनां बलपोषक इत्यर्थः। तत्र प्राणः अवस्थाविशेषोपपन्नो वायुः। ओजः प्रवृत्तिशक्तिः। सहो वेगः। बलं धारणसामर्थ्यम्। ओजःसहोबलानि इन्द्रियमनःशरीराणां पाटवानि तेषां हेतुरिति केचित्। अवष्टंभशक्तिर्वाद्वा ओजः। 'हृदि तिष्ठति यच्छुद्धमीषद्रक्तं सपीतकम्। ओजः शरीरे सङ्ख्यातं तन्नाशे नाशमृच्छति' इत्यायुर्वेदे ॥ २६ ॥ वायोरपीति। कालश्च कर्म च स्वभावश्च तेभ्य इति ततः। कालादेर्हेतोरित्यर्थः। विकुर्वाणाद्विक्रियमाणात्। वायोः सकाशादपि रूपवत्स्वकीयरूपतन्मात्रायुक्तं स्पर्शशब्दवत् कारणभूताकाशवायुगुणानुवृत्तेः स्पर्शशब्दाभ्यां च युक्तं तेजः उदपद्यत। वै' कालकर्मस्वभावत इति पूर्वापरयोरनुक्तमस्त्यथापि देहलीदीपकन्यायेन पूर्वापरयोप्यनुसंधेयम् ॥ २७ ॥ तेजस इति। विकुर्वाणाद्विक्रियमाणात् तेजसः सकाशात्तु रसात्मकं रसगुणं रसतन्मात्रकमित्यर्थः। अम्भो जलम् आसीत्। तच्चाम्भः स्वतः रसगुणम्। रूपवतस्तेजसोऽन्वयाद्रूपवत्। स्पर्शवतो वायोरन्वयात्स्पर्शवत्। परस्य वायोरपि परवर्त्तिनः सशब्दस्याकाशस्यान्वयाच्च। घोषवत् शब्दवत् ॥ २८ ॥ विशेष इति। तुशब्दोऽथार्थे विशेषोऽथेति वा पाठः। अथानन्तरम्। विकुर्वाणाद्विक्रियमाणात् अम्भसो जलात्सकाशात् गन्धवान् गन्धगुणः विशेषः पृथिवी अभूत्। स च परेषामन्वयस्तस्मात् पितृपितामहप्रपितामहवृद्धप्रपितामहसमानां जलतेजोवायुनभोगुणानामन्वयतः रसस्पर्शशब्दरूपगुणान्वितः रसरूपस्पर्शशब्दगुणान्वित इत्यर्थः ॥ २९ ॥

वैकारिकादिति। वैकारिकात् वैकारिकापरनाम्नः सात्त्विकाहङ्कारादित्यर्थः। मनः जज्ञे। वैकारिकाः दश देवाश्च जज्ञिरे। ते देवा यथा। दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च वह्निश्च इन्द्रश्च उपेन्द्रश्च मित्रश्च कः प्रजापतिश्च ते। तत्र दिगादयः पञ्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः' वह्न्यादयः पञ्च। वाक्पाणिपादपायूपस्थानामधिष्ठातारः। मनसस्त्वधिष्ठाता चन्द्रमाः। ननु भगवत्प्रेरितपुरुषसंयोगात्प्रधानप्रकृतेर्महांस्ततस्त्रिविधोऽहङ्कारस्त्रिविधात्तस्मात्तत्त्वोत्पत्तिस्तेभ्योऽण्डाभिमानिवैराजोत्पत्तिस्ततश्चतुर्मुखस्ततो मरीच्यादयो मरीचेः कश्यपस्तत आदित्येन्द्राद्युत्पत्तिः। अतस्तेषामण्डोत्पत्तेः प्राक् सृष्ट्ययोगात्कथमेषामिन्द्रियाधिष्ठातृत्वमितिचेत् सत्यम्। एता इन्द्रियदेवता न कश्यपसूनवः किं त्वेते तु परमाकाशस्था देवाः कश्यपसुतेभ्यो भिन्ना नित्याश्च। तथाच लघुभागवतामृते पाद्मे। 'साध्या मरुद्गणाश्चैव विश्वेदेवास्तथैव च। नित्याः सर्वे परे धाम्नि ये चान्ये त्रिदिवौकसः। ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदिवौकसः' इति। भगवत्संकल्पानुगृहीतानां परमाकाशस्थानां तेषामिन्द्रियाधिष्ठातृत्वोपपत्तिः संभवति। एवं देवताभेदान्न बाधः। ननु कोऽसौ परमाकाश इति चेच्छ्वेताश्वतरोपनिषदि 'ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः' इत्युक्तो यः सः। पाद्मे च। 'तस्याः पारे परव्योम त्रिपाद्भूतं सनातनम्। अमृतं शाश्वतं नित्यमनन्तं परमं पदम्' इति। एतदेवात्रैवान्यत्र वैकुण्ठशब्देनाप्युक्तमस्ति। 'वैकुण्ठ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भुवने नित्ये निवसन्ति महोज्ज्वलाः। अवताराः सदा तत्र मत्स्यकूर्मादयोऽखिलाः' इति। एवं बहुत्र परमाकाशो वैकुण्ठशब्देनाप्यभिहितोऽस्ति अत्रैव नवमेऽध्याये 'वृतं चतुःषोडशपञ्चशक्तिभिः' इति ब्रह्मेक्षितभगवद्धामरथभगवद्वर्णने तत्त्वाभिमानिदेवसंवृतत्वं भगवत उक्तमस्ति। न च परमाकाशस्थाभिस्तत्त्वाभिमानिदेवताभिरिन्द्रियाधिष्ठातृदेवतासिद्धौ चतुर्मुखकृता दिगादिदेवतासृष्टिर्व्यर्थैवेति वाच्यम्। व्यष्टीन्द्रियाधिष्ठानार्थं दिगादिदेवतासृष्टेरावश्यकत्वात्। या तत्त्वकृता भगवतः स्तुतिरभिहितास्ति सापि परमाकाशस्थदेवकृतेति न बाधः। नन्वेषां सर्वेन्द्रियाधिष्ठातृत्वे तदिन्द्रियाणां केऽधिष्ठातार इतिचेत्स्वपरनिर्वाहकत्वन्यायेन यथा तैः समर्थैर्भूयते तथाभूता' तेषु परमात्माहिता शक्तिरस्तीति नानवस्थाप्रसङ्ग इति अप्रासङ्गिकपल्लवनेन कृतम्॥ ३०॥

तैजसादिति। विकुर्वाणाद्विक्रियमाणात्। तैजसात्तु राजसाहङ्कारतस्तु श्रोत्रं त्वक् घ्राणश्च दृक् च जिह्वा च ताः वाक् च दोषौ पाणी च मेढ्रमुपस्थश्च अङ्घ्री च पायुश्च' ते एतानि दश इन्द्रियाणि अभवन्। तत्र पञ्च ज्ञानशक्तिः ज्ञानशक्तीनीत्यर्थः। पञ्च क्रियाशक्तिः क्रियाशक्तीनीत्यर्थः बुद्धिः प्राणश्च। तु शब्दश्चार्थे। तैजसौ उभावपि तैजसाहङ्कारकार्यावित्यर्थः। क्रमस्त्वत्र न विवक्षितः॥ ३१॥ यदेति। हे ब्रह्मवित्तम नारद यत् यदा' भूतानि च इन्द्रियाणि च मनश्च गुणास्तन्मात्रात्मकाः शब्दादयो विषयाश्च, ते एते भावाः पञ्चभूतदशेन्द्रियबुद्धिप्राणमनांसि, शब्दादयः पञ्च, सत्वादिगुणत्रयम्, महदहङ्कारौ एते पदार्थाः। असंहता अन्योऽन्यमसंश्लिष्टाः। परस्परममिलिता इत्यर्थः। आसन्' तदा आयतनस्य ब्रह्माण्डाख्यभगवच्छरीरस्य निर्माणं सर्जनं तस्मिन् ब्रह्माण्डकरणे इत्यर्थः। न शेकुः शक्तिमन्तो नासन्नित्यर्थः॥ ३२॥ तदेति। तदा यदा ते भगवन्तं शरणमाप्य अभिष्टूय तूष्णीमासंस्तदेत्यर्थः। भगवतः स्तुतिप्रसन्नस्य चेष्टकरूपेण तं गणं प्रविष्टस्य हरेः शक्त्या चोदिताः प्रेरिताः अभूवन्। ततश्च। अन्योऽन्यं संहत्य च, पञ्चीकरणोक्तप्रकारेण मिलित्वैव सदसत्त्वं सत्त्वं पञ्चीकरणेन स्थूलत्वम्, असत्त्वमपञ्चीकृततारूपेण सूक्ष्मत्वं च उपादाय उभयं सदसदात्मकम् अदः ब्रह्माण्डं ससृजुः हि॥ ३३॥ ब्रह्माण्डान्नः सृष्टिं वक्तुं हरेस्तत्र व्यक्तिप्रकारमाह। वर्षपूगेति। वर्षपूगसहस्रान्ते प्रलयकालावसाने इत्यर्थः। जीवयत्यचेतनं चेतयतीति जीवः परमपुरुषः। कालकर्मस्वभावस्थः। कालकर्मस्वभावानाश्रितः सन्नित्यर्थः। अजीवमचेतनम्। उदकेशयं गर्भोदकावस्थितं तत् अण्डम् अजीवज्जीवयति स्म। अत्रोदकेशयमित्यनेनाण्डसृष्टेः पूर्वं गर्भोदकसंज्ञिका सृष्टिरर्थसिद्धाऽनुसंधेया। सा च सत्सङ्गिजीवनीयप्रथमप्रकरणस्थहरिगीतातो बोध्या॥ ३४॥ स एवेति। सः एव पुरुषः। ब्रह्मशरीरकः परमपुरुष इत्यर्थः। अण्डं निर्भिद्य तस्मात् निर्गतः अण्डात्पृथग्भूय अवकाशलाभादनुपरुद्धसंचारादिमानभूदित्यर्थः। ब्रह्मणो भगवदात्मकत्वेन सामानाधिकरण्यमाह। सहस्रेति। यो ब्रह्मशरीरकत्वेनावस्थितः स एव उरवश्च अङ्घ्रयश्च बाहवश्च अक्षाणि नेत्राणि सहस्रमपरिमितानि ऊर्वादीनि यस्य सः। आननानि मुखानि च शीर्षाणि मस्तकानि च सहस्रसंख्यानि यान्याननशीर्षाणि तानि विद्यन्ते यस्य तथाभूतः। जात इति शेषः। इति पुरुषसूक्तश्रुत्यर्थोऽनेनाभिहितः। तद्यथा। 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इति। एतदेव भगवद्गीतायामप्युक्तम्। 'सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमान्' इति॥ ३५॥

यस्येति। मनीषिण उपासकाः। यस्य सर्वतः पाणिपादादिमतो वैराजपुरुषापरसंज्ञस्य ब्रह्मणः अवयवैः पादतलादिप्रतीकैः लोकान् पातालादीन् इह लोके कल्पयन्ति। लोकान् यदवयवत्वेन रचयन्तीत्यर्थः। तदवयवैर्लोकरचनामाह। कट्यादिभिः अधः अतलादीन् सप्त लोकान्। जघनादिभिः ऊर्ध्वं भूरादीन् सप्त लोकान् कल्पयन्ति। तत्र कटिरूरुमूलयोः पश्चाद्भागः। जघनं पुरोभागः॥ ३६॥ वर्णानां तद्विभूतित्वात्तस्तदुत्पत्तिं दर्शयति। पुरुषस्येति। ब्रह्म ब्राह्मणः पुरुषस्य मुखम्। क्षत्रं क्षत्रियः एतस्य पुरुषस्य बाहवः। इति कार्यकारणयोरभेदविवक्षयोक्तम्। वैश्यः भगवतः ऊर्वोः। ऊरुभ्यामित्यर्थः। जात इति शेषः। शूद्रः भगवतः पद्भ्यां पादाभ्याम् अभ्यजायत। तथा श्रुतिः। 'ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत' इति॥ ३७॥ इदानीमुपासनार्थं लोककल्पनाभेदं दर्शयन् सन् सप्तलोकपक्षमाह। भूर्लोक इति। भूर् इति अव्ययं भूमेर्नामान्तरगमकम्। अस्य पुरुषस्य पद्भ्यां पत्तलमारभ्य जघनपर्यन्ताभ्यां पादाभ्यामित्यर्थः। भूर्लोकः। इति कल्पितः। पातालाद्यतलान्तानां सप्तलोकानां भूम्यन्तर्गतत्वेन तानगणयित्वा भूमिमारभ्य सप्तलोकपक्षोक्तेरादौ भूर्लोकोक्तिर्बोध्या। नाभितः नाभेः सकाशात् भुवर्लोकः कल्पितः। भुवर् इत्यव्ययमन्तरिक्षलोकवाचकम्। हृदा स्वर्लोकः कल्पितः महात्मनः पुरुषस्य उरसा महर्लोकः कल्पितः। हृदेत्युरसेति च तृतीये सप्तम्यर्थे वा ज्ञेये। हृदयं कमलाकारं तदूर्ध्वभाग उरः ज्ञेयः॥ ३८॥ ग्रीवायामिति। अस्येति शेषः। जनलोकोऽस्येति वा पाठः। चकारः किञ्चेत्यर्थे। अस्य ग्रीवायां जनलोकः कल्पित इति शेषः। स्तनच्छन्दं कुर्वद्द्वयं ओष्ठयोर्द्वयं तस्मात् तपोलोकः। पाठान्तरे स्तनद्वयादित्युपासनार्थत्वादूर्ध्वाधोभाववैपरीत्यं न दोषः। मूर्द्धभिः तु सत्यलोकः अस्य मूर्धस्थाने सत्यलोकः कल्पितोऽस्तीत्यर्थः। स ब्रह्मलोकस्तु सनातनः। एतत्सत्यलोकविशेषणम्। सनातनत्वं चास्य भूराद्यपेक्षया बोध्यम्। यद्वा ब्रह्मलोको वैकुण्ठाख्यो लोकस्तु सनातनः न तु सृज्यप्रपञ्चान्तर्वर्तीत्यर्थः। अतिप्रपञ्चत्वादयं वैराजः ध्येयो बोध्यः॥ ३९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं चतुर्दशलोकपक्षं दर्शयति। तत्र जघनादिभिर्भूरादयः पूर्वोक्ता एव सप्तात्र ग्राह्याः। कट्यादिभिरधः सप्तलोकानाह। तत्कट्यामिति द्वाभ्याम्। तत्कट्यां च अतलं कॢप्तम्। विभोः ऊरुभ्यां वितलं कॢप्तम्। जानुभ्यां शुद्धं हरिभक्तमित्रासत्वाच्छुद्ध्युपेतं सुतलं कॢप्तम् जङ्घाभ्यां तु तलातलं कॢप्तम् तत्कट्यामित्यत्र सप्तम्युपादानादग्रिमासु तृतीयासु सप्तम्यर्थे तृतीयात्वं बोध्यम् ॥ ४० ॥ महातलमिति। गुल्फाभ्यां पुरुषस्य घुटिकाभ्यां तु महातलं कॢप्तम्। अत्रापि तृतीया सप्तम्यर्थ एव। प्रपदाभ्यां पादाभ्यां रसातलं कॢप्तम्। पादतलतः पादतलाभ्यां पातालं कॢप्तम्। इतीत्थं पुमान् पुरुषः लोकमयः आसीत् ॥ ४१ इदानीं संग्रहेण लोकत्रयक्लृप्तिमाह। भूर्लोक इति। अस्य पुरुषस्य पद्भ्यां पादयोरित्यर्थः। भूर्लोकः कल्पितः। नाभितो नाभावित्यर्थः। भुवर्लोकः कल्पितः। अस्य मूर्ध्ना स्वर्लोकः कल्पितः अत्र अतलादीनां भूमावन्तर्भावेन महरादीनां स्वर्लोकेऽन्तर्भावेन त्रिलोकविवक्षा ज्ञेया। इति वा लोककल्पना ज्ञेया। अत्रेदं तात्पर्यमुक्तं भवति। चतुर्दशलोकपक्षस्त्वेकः, सप्तलोकपक्षस्त्वपरः। त्रिलोकपक्षस्त्वन्यः अधिकारिभेदेन ध्यानार्थत्वात्कल्पनाया विकल्प उपपन्न इति ॥ ४२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितान्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः

ब्रह्मोवाच

वाचो वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः। हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥

प्रोक्ता विराड्विभूतिश्च षष्ठेऽध्यात्मादिभेदतः। सर्वं पुरुषसूक्तेन पूर्वोक्तं च दृढीकृतम् ॥ १ ॥

एवं महदादिक्रमेण सृष्टस्य कृत्स्नस्य प्रपञ्चस्य वैराजविभूतित्वमभिधाय तदेव पुरुषसूक्तोक्तार्थसंवादेन दृढीकुर्वन् यद्रूपमित्यादेरुत्तरमाह। वाच इति। वाचोऽस्मदादीनां वागिन्द्रियस्य वह्नेस्तदधिष्ठातृदेवताभूतस्याग्नेश्च। अनुक्तमपि तद्विषयरूपं वक्तव्यमप्यत्र ज्ञेयम्। तस्य च मुखं वैराजभगवत आस्यं क्षेत्रं स्थानम् आश्रय इत्यर्थः। अस्मदादिवागादित्रिकस्यैतन्मुखमुत्पत्तिस्थानमित्यर्थः। छन्दसां गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्याख्यानां सप्तानां छन्दसाम् अस्य सप्त धातवः क्षेत्रम्। अस्य त्वक् गायत्र्याः असृगुष्णिजः। मांसमनुष्टुभः। मेदो बृहत्याः। अस्थि पङ्क्तेः। मज्जा त्रिष्टुभः। शुक्रम्, जगत्याः। उत्पत्तिस्थानमिति भावः। 'त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः' इत्यायुर्वेदे। हव्यं देवानां कव्यं पितृणाममृतं तदुभयशेषं मनुष्याणां च यान्यन्नानि तेषाम्। सर्वः मधुरादिभिः षड्भिर्भेदैः युक्तः सकलोऽपि यो रसस्तस्य। चकारादस्मदादिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च। तस्य वैराजस्य जिह्वा क्षेत्रम्। 'मधुरो लवणस्तिक्तः कटुरम्लः कषायकः' इति रसषड्विधत्वमायुर्वेदे। एवं सर्वत्रानुक्तमुन्नेयम् ॥ १ ॥ सर्वासूनामिति। सर्वासूनामस्मदादिप्राणानां वायोः प्रवहादिभेदवतो मुख्यवायोश्च तन्नासे पुरुषस्य नासारन्ध्रे परमायने उत्तमक्षेत्ररूपे स्त इत्यर्थः। ओषधीनां फलपाकान्तानामौषधीनाम्। अश्विनोरस्मदादिघ्राणेन्द्रियदैवतयोर्दस्रयोः। चकारात् घ्राणेन्द्रियस्य मोदप्रमोदयोश्च क्षेत्रम्। तस्य पुरुषस्य घ्राणः घ्राणम्। नपुंसकस्य घ्राणस्य पुंशक्तिमत्त्वद्योतनाय घ्राण इत्युक्तम्। ओषध्यादीनामुत्पत्तिस्थानं तस्य घ्राणेन्द्रियमित्यर्थः। तत्र मोदः अनुकूलवस्तुदर्शनजः सुखविशेषः। प्रमोदस्त्वनुकूलवस्तुनः स्वीयत्वबुद्धिजः सुखविशेष इति भेदः ॥ २ ॥ रूपाणामिति। रूपाणां चक्षुरिन्द्रियविषयभूतशुक्लादितेजोगुणानाम्। तेजसां रूपप्रकाशकानां च अस्मदादिचक्षुरिन्द्रियस्य चेति शेषः। तस्य चक्षुश्चक्षुरिन्द्रियं स्थानम्। दिवो द्युलोकस्य सूर्यस्य चक्षुरिन्द्रियाधिष्ठातुः रवेः अक्षिणी तन्नेत्रगोलकौ स्थानम्। सर्वत्र षष्ठ्यन्तनिर्दिष्टानां प्रथमान्तनिर्दिष्टं क्षेत्रं द्रष्टव्यम्। दिशामस्मदादिश्रोत्रेन्द्रियाधिष्ठातृदेवताभूतानाम्। तीर्थानां जलप्रधानानां च। इदं क्षेत्राणामप्युपलक्षणम्। तत्र क्षेत्राणि महानुभावमहापुरुषावासप्रधानानि। तस्य कर्णौ क्षेत्रम्। आकाशोऽवकाशः शब्दः श्रोत्रेन्द्रियविषयश्च तयोः श्रोत्रं तस्य श्रोत्रेन्द्रियं क्षेत्रम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्गात्रमिति । वस्तूनां ये सारा: सारांशास्तेषां सौभगस्य च सौभाग्यस्य स्पृहणीयताया इति यावत् । तद्गात्रं तस्य शरीरं भाजनं स्थानम् । स्पर्शवायोः स्पर्शश्च वायुश्चेत्यर्थ: । चकारादस्मदादित्वगिन्द्रियस्यापि । सर्वमेधस्य समस्तयज्ञस्य च अस्य त्वक् भाजनम् । पूर्वं वायावुक्तेऽपि पुनरत्रोक्तिस्तु त्वगिन्द्रियाधिष्ठातुरस्य वायो: तत: पृथक्त्वद्योतनाय । एव हि पादपूरणार्थौ ॥ ४ ॥ रोमाणीति । यैर्वा यैर्वृक्षैरेव यज्ञस्तु यज्ञोऽपि संभृत: संसाधितः स्यात । तासाम् उद्भिज्जजातीनां सर्वेषां भूमिमुद्भिद्य जातानां वृक्षादीनामित्यर्थ: । अस्य रोमाणि क्षेत्रम् । अस्य केशश्मश्रुनखानि शिलालोहे च अभ्रविद्युतौ च तासां क्षेत्रम् । तत्रास्य नखानि शिलालोहयो: स्थानम् । केशश्मश्रूणि अभ्रविद्युतोरिति विवेक: । क्षेमकर्मणां रक्षाकारिणाम् । लोकपालानामिन्द्रादीनां प्रायशः बाहव: पुरुषस्य भुजा: स्थानम् ॥ ५ ॥ विक्रम इति । भूर्भुव:स्वरिति षष्ठीबहुवचनान्तम् । भूरादीनां त्रयाणां लोकानामित्यर्थ: । तस्य पुरुषस्य विक्रम: त्रिविधपादविन्यास: स्थानम् । क्षेमस्य प्राप्तरक्षणस्य शरणस्यानिष्टनिवारणस्य च सर्वेषां कामानां वरस्य वरणस्यापि हरे: चरण: आस्पदमुत्पत्तिस्थानम् । चोऽवधारणे ॥ ६ ॥ अपामिति । अपां जलानां वीर्यस्य शुक्रस्य सर्गस्य सृष्टे: पर्जन्यस्य जलाभिमानिनो मेघस्य प्रजापतेः सर्गाभिमानिनो दक्षादे: पुंसो भगवतः शिश्न: उपस्थेन्द्रियाधिष्ठानां क्षेत्रम् । प्रजात्यानन्द: संतानार्थ: संभोगस्तेन या निर्वृतिस्तापहानिस्तस्या: तुशब्दादस्मदादिगुह्येन्द्रियस्य च उपस्थस्तदुपस्थेन्द्रियम् आस्पदम ॥ ७ ॥ पायुरिति । हे नारद यमस्य मित्रस्य मित्रनाम्नो देवस्य अस्मदादिपाय्विन्द्रियस्य तद्विषयस्य परिमोक्षस्य मलत्यागस्य च तस्य पुंस: पायु: पाय्विन्द्रियम् आस्पदम् । हिसाया: निर्ऋते: राक्षसस्य अलक्ष्म्या वा मृत्यो: निरयस्य नरकस्य च पुंस: गुद: गुदम् अपानद्वारं क्षेत्रं स्मृतः । तत्र पायुरिन्द्रियं गुदमधिष्ठानम् ॥ ८ ॥

पराभूतेरिति । पराभूते: पराजयस्य अधर्मस्य पापाभिमानिनोऽधर्माख्यस्य देवस्य तद्वृद्धिपुष्टिहेतोः कलेश्च तमस: अज्ञानस्यापि, पश्चिमः पुंस: पृष्ठभाग:, आस्पदम् । नदनदीनां शोणगङ्गादीनाम् । तुशब्दादितरनदीनां च । नाड्यः पुंसः शिरा: क्षेत्रम् । गोत्राणां गिरीणाम् अस्थिसंहति: पुंसोऽस्थिसंहति: क्षेत्रम् ॥ ९ ॥ अव्यक्तेति । अव्यक्तं प्रधानं च रसोऽन्नादिसारश्च सिन्धव: समुद्राश्च तेषां भूतानां प्राणिनां निधनस्य च लयस्य संहारस्येति यावत् । पुंस: उदरं क्षेत्रं विदितम् । ज्ञानिभिरिति शेष: । मनस: सर्वदेहिमनस्तत्त्वस्य पुंस ईश्वरस्य यत हृदयं तत् पदं स्मृतम् ॥ १० ॥ धर्मस्येति । धर्मस्य सुकृताभिमानिन: धर्माख्यस्य देवस्य मम चतुर्मुखस्य च । तुभ्यं तव कुमाराणां सनकादीनां भवस्य रुद्रस्य च विज्ञानस्य तत्त्वस्य च महत्तत्त्वस्येत्यर्थ: । परमस्य भगवत: आत्मान्त:करणं परायणं श्रेष्ठमुत्पत्तिस्थानम् ॥ ११ ॥ एवं परमात्मन: सकाशाज्जातं कृत्स्नं जगत्तद्विभूतिभूतं तच्छरीरत्वेन ततो न विविक्तमित्युक्तमेतदेव पुरुषसूक्तार्थकथनेन प्रथयति । तत्र सहस्रशीर्षेत्यर्द्धर्चस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्चार्थ: पूर्वाध्याये कथितः । पुरुष एवेदं सर्वमित्यस्यार्थमाह । अहमित्यादिभि: सार्धैस्त्रिभि: । अहं चतुर्मुख:, भवान्नारद:, भवो रुद्रश्चैव, इमे ये ते तव अग्रजाः मुनय: सनकादयः मरीच्यादयश्च सुरा देवाश्च असुरा दैत्याश्च नरा मनुष्याश्च ते । नागा: सर्पाः खगा: पक्षिणः मृगा हरिणश्च सरीसृपा: सहस्रपदादयश्च ते ॥ १२ ॥ गन्धर्वा इति । गन्धर्वा विश्वावसुप्रभृतयो देवगायका: । अप्सरस: पूर्वचित्त्यादयो देवाङ्गनाश्चेति द्वन्द्व: । यक्षाः कुबेरादय: । रक्षांसि च भूतानि च गणाश्च उरगाश्च ते । तत्र रक्षांसि नैर्ऋतादीनि । भूतानि प्रेतविशेषा: । गणा: प्रमथादय: । उरगा भुजङ्गमविशेषाः । पशवो गोमहिष्यादय: । पितरोऽर्यमप्रभृतय: । सिद्धा देवयोनिविशेषाः । विद्याध्रा विद्याधराख्या: । चारणा बहुभाषका याचकविशेषा: । द्रुमा अश्वत्थादयस्तरव: ॥ १३ ॥

अन्ये चेति । किं च, अन्ये ये विविधा अनेकप्रकाराः जलं च स्थलं च नभश्च तान्योकांसि स्थानानि येषां ते जीवा: । संधिरार्ष: । ग्रहा: सूर्यादयश्च ऋक्षाण्यश्विन्यादीनि नक्षत्राणि च, केतव औत्पात्तिकग्रहविषयाश्च ते । ताराः उक्तेतरा तारका: । तडितो विद्युत: । स्तनयित्नवो मेघास्तद्गर्जितानि वा ॥ १४ ॥ 'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्' इत्यस्या अर्थमुद्दिश्याह । सर्वमिति । किंच यत भूतं भूतकालसंभूतम । भाव्यं भविष्यत् भविष्यत्कालसंभूत्यर्हम् । भवत् वर्त्तमानकालभवं च । यत्कालत्रयवर्त्ति वस्तुजातमित्यर्थ: । सर्वं सकलम् इदं पुरुष: एव । कृत्स्नवस्तुजातस्य पुरुषावयवरूपत्वाच्छरीरातिरिक्तस्वतन्त्रं वस्तु नास्तीत्यर्थ: । नामरूपविभागानर्हातिसूक्ष्मप्रकृतिपुरुषकालशरीरकस्य परमपुरुषस्यैव विभक्तनामरूपप्रकृतिपुरुषशरीरतया जगदाकारेणावस्थानादिदं पुरुष एवेति सामानाधिकरण्येनैक्योपदेश उपपन्न: । एवमेव 'सर्वं खल्विदं ब्रह्म' । 'ब्रह्मायमात्मा' । 'ब्रह्मैवेदम्' 'तत्त्वमसि' इत्यादिसर्ववेदान्तवाक्येषु सामानाधिकरण्येनैक्योपदेशो बोध्य: । अथ श्रुत्यर्थः । यत् भूतं यत् भाव्यं चकाराद्भवत् इदं सर्वं पुरुष: एवेति । स भूमिं सर्वत: स्पृत्वाऽत्यतिष्ठत् दशाङ्गुलमित्यस्या अर्थमुद्दिश्याह । तेनेति । तेन पुरुषेण इदं विश्वम् आवृतं विश्वस्मिन् स पुरुषस्त्विति शेषः । वितस्ति वितस्तिमात्रप्रदेशम् अधि अतिक्रम्य तिष्ठति हृत्पद्मे इति शेषः । वितस्तीत्याधिक्यमात्रं विवक्षितं न परिमाणमनुपयोगादपरिच्छिन्नत्वाच्च । अथ श्रुत्यर्थ: । स: पुरुष: भूमिं विश्वं सर्वतः परितः स्पृत्वा आवृत्य दशाङ्गुलं दशाङ्गुलमात्रप्रदेशम् अत्यतिक्रम्य अतिष्ठदिति । मूले विश्वमिति यत्पदं तच्छ्रुतिगतभूमिपदस्यार्थ: ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वितस्तिमिति दशाङ्गुलपदस्यार्थः। अधि इति अतिशब्दस्यार्थः। वितस्तिमधितिष्ठता इति पाठे वितस्त्यन्ते नाभ्या उपरि तिष्ठति 'हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्' इति श्रुत्युक्तरीत्या नाभ्या उपरि वितस्त्यन्तप्रदेशान्ते स्थितं हृदयमधितिष्ठता तेन परमात्मपुरुषेण इदं विश्वम् आवृतमित्यन्वययोजना कार्या ॥ १५ ॥

विराड् हृत्पद्मस्थस्यान्तर्बहिः प्रकाशकत्वं दृष्टान्तेनाह। स्वधिष्ण्यमिति। प्राणः 'असौ वा आदित्यः प्राणः' इति श्रुत्या प्राणशब्देनाभिहितः असावादित्यः स्वधिष्ण्यं स्वस्य मण्डलं प्रतपन् अन्तः प्रकाशयन् बहिश्च बहिःप्रदेशेऽपि प्रतपति प्रकाशयति। एवमित्थमेव पुमान् पुरुषः, विराडन्तःस्थः परमात्मेति यावत्। विराजं स्वधिष्ण्यभूतं विराड्देहम्, अन्तः प्रतपन् प्रकाशयन् बहिश्च बहिरपि प्रतपति प्रकाशयति। समष्टिव्यष्टिपुरुषजीवान्तरात्मत्वेन वसतोऽपि नित्यमुक्तस्य परस्यास्य अभोक्तृत्वं मोक्षप्रदत्वं च प्रतिपादयन्। 'उतामृतत्वस्येशानो यदन्नेनातिरोहति' इत्यस्या अर्थमुद्दिश्याह। स इति। स पुरुषः न विद्यते भयं यस्मात्तदभयं तस्य अमृतस्य मोक्षस्य ईशः मोक्षं प्रदातुं समर्थः। यद्यस्मात्। मर्त्यं मरणधर्मकत्वादनित्यम्। अन्नं कर्मफलम्। अत्यगात् अतिक्रान्तवान् अतिक्रम्य स्थित इत्यर्थः। 'अनश्नन्नन्योऽभिचाकशीति' इति श्रुत्युक्तरीत्या असंक्रान्त-कर्मफलसंबन्धत्वात्परमात्मा मोक्षप्रद इत्यर्थः। अथ श्रुत्यर्थः। उत किंचेत्यर्थः। अमृतत्वस्य मोक्षस्य ईशानः प्रदाता। कुतः यद्यस्मात् अन्नेन अतिरोहति अन्नेनेति व्यत्ययेन द्वितीयार्थे तृतीया। अन्नमतिरोहति इत्यर्थः। कर्मफलासंबन्धाद्दैश्वर्यं कदाचिदपि तिरोधानं नाप्नोतीत्यर्थः ॥ १६ ॥ प्रपञ्चात्मकस्यास्य कुत एवंविधत्वेत्याशङ्क्य तत्परिहाराय 'एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः' इत्यस्याः श्रुतेरर्थमुद्दिश्याह। महिमेति। हे ब्रह्मन् ततः उक्तप्रकारेणान्नेनातिरोधानाद्धेतोः पुरुषस्य परमपुरुषस्य एषः प्रपञ्चात्मकत्वेऽप्यमृतेशत्वरूपः महिमा दुरत्ययः अपारः, प्रपञ्चात्मकत्वेऽपि प्रपञ्चानभिभूतत्वात्। एवं प्रपञ्चगतदोषा-संस्पर्शित्वमसृतेशित्वं चानुपपद्यमानमपि तस्य महिम्ना उपपद्यते इति भावः। अतोऽयं पुरुषो ज्यायानिति शेषः। अथ श्रुत्यर्थः। अस्य पुरुषस्य महिमा एतावान् एवंविध इत्यर्थः। अतः पुरुषः, सः पुमांस्तु ज्यायान् महत्तर इति। एवमपार-महिमत्वमस्य प्रतिपाद्य 'पादोऽस्य विश्वा भूतानि' इत्यस्याः श्रुतेरर्थमुद्दिश्याह। पादेष्विति। तिष्ठन्त्यत्रेति स्थितयो भूरादिलोकाः। ते पादा इव पादा अंशा यस्य सः स्थितिपात् तस्य स्थितिपदः पुंसः पादेषु अंशभूतेषु भूरादिषु त्रिषु लोकेष्वित्यर्थः। सर्वभूतानि देवादिचतुर्विधभूतजातानि विदुः। स्थितानीति शेषः। अथ श्रुत्यर्थः। विश्वा भूतानि सर्वाण्यपि भूतजातानि अस्य पुरुषस्य पादः। सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति बोध्यम् ॥ १७ ॥

भूतेषु फलवैचित्र्यं दर्शयन् बद्धमुक्तयोरसांकर्यं दर्शयन् तत्प्राप्यस्थानानां तद्विभूतित्वं च प्रदर्शयन् 'त्रिपादस्यामृतं दिवि' इत्यस्याः श्रुतेरर्थमुद्दिश्याह। अमृतमिति। त्रयाणां लोकानां मूर्द्धा मस्तकस्थानीयो महर्ल्लोकस्तस्य त्रिमूर्द्धन्यो महर्ल्लोक-स्येत्यर्थः। मूर्द्धसु मूर्द्धवदुपरि विद्यमानेषु जनस्तपःसत्यलोकेष्वित्यर्थः। अमृतं क्षेमम् अभयम् अधायि अनुक्रमेण निहितं भवतीत्यर्थः। अथ श्रुत्यर्थः। अस्य पुरुषस्य संबन्धि त्रिपात्त्रिविधम् अमृतममृतक्षेमोभयात्मकं सुखं दिवि जनादित्रिषु लोकेष्वस्त्येवेत्यर्थः। ते च लोकास्त्रिलोक्या बहिरेवासन्नित्याह। पादा इति। अप्रजानां स्त्रीस्वीकाराभावात्प्रजोत्पादनवर्जितानां ब्रह्मचारिवानप्रस्थसंन्यासिनामित्यर्थः। ये आश्रमा देहत्यागानन्तरं निवासस्थानभूताः त्रयः पादाः पुंसोंऽशभूता जनादयस्त्रयो लोकाः ते त्रिलोक्याः भूर्भुवःस्वराख्यलोकत्रयात् बहिरुपरितनप्रदेशे आसन्। एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन् 'त्रिपादूर्ध्वमुदैत्' इति श्रुत्यर्थमुद्दिश्याह। अन्त इति। अपरोऽप्रजाश्रमादन्यः न विद्यते बृहद्व्रतं यस्य तथाभूतः गृहमेधो गृहाश्रमः तु त्रिलोक्याः अन्तः गृहिजनो देहान्ते यथाकर्म त्रिलोक्यामेव पर्यटतीत्यर्थः। अत्रायं भावः। विराट्पुरुषस्य चतुर्दशलोकात्मकाश्चतुर्दशपादास्तत्र पातालादिसप्तलोकानां भूमिबिलगत्वात्तमःप्रायत्वाच्छुत्या गणनैव न कृता। अतः सप्तैवावशिष्टाः। सप्तस्वपि भूरादित्रयाणां गृह्यधिप्राप्यत्वान्नश्वरसुखवत्त्वमेव। महर्ल्लोकस्य सुखवत्त्वेऽपि कल्पान्ते दशलोक-दाहकाले तद्दाहजतापप्रसक्तेस्तत्रत्यानां तत्त्यागदर्शनान्नाविनाशि सुखमतः सोऽप्यकिंचित्प्राय एव। जनलोकेऽमृतपर्यायम-विनाशिसुखमस्ति यावज्जीवं तत्स्थानापरित्यागोक्तेः। तथापि दशलोकदाहोष्मपीडया महर्लोकं परित्यज्य तत्र गतजनकृतवार्ता-श्रुतिजदुःखसंभवात्। किंचिदक्षेमसंभिन्नं सुखम्, तपोलोके तदभावात्क्षेमात्मकमेव सुखम्। सत्यलोके तु तस्य मोक्षप्रत्यासत्ति-मत्त्वतोऽभयमेव। अथ श्रुत्यर्थः। गृहिसुखं त्रिपाद्भूरादित्रिलोकस्थमेव। ततो बहिर्भूतानां सुखं तु ऊर्ध्वमुदैज्जनाद्यूर्ध्व-लोकगमेवेति ॥१८॥

त्रिलोक्या बहिरन्तरावस्थानरूपोऽयमधिकार आश्रमावस्थानभेदेन एकस्यैव न तु भिन्नविषय इति दर्शयन 'ततो विष्वङ् व्यक्रामत्साशनानशने अभि' इत्यस्याः श्रुतेरर्थमुद्दिश्याह। सृतीति। विविधं सुष्ठु अञ्चतीति विष्वङ् पुरुषः क्षेत्रज्ञ इति यावत। साशनानशने भोगापवर्गप्राप्तिसाधनभूते उभे सृती दक्षिणोत्तरौ मार्गौ विचक्रमे तौ प्रति चलति स्म। यत् यतः। अविद्या साशनात्मिका या सृतिः सा अविद्यारूपा। विद्या भगवदुपासनात्मकतयाऽनशनधर्मा या सृतिः सा विद्यारूपा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एका कर्मरूपतया धूममार्गप्रापकत्वेनाविद्यारूपा। द्वितीया चाऽकर्मरूपतयार्चिर्मार्गप्रापणत्वेन विद्यारूपा, एवं द्वेऽविद्या-विद्यारूपे भवत इत्यर्थः। तत्र पुरुषः क्षेत्रज्ञस्तु उभयाश्रयः यथासङ्ख्यथारुचिसाधनद्वयान्यतमनिष्ठो जायते। तेनोभयविध-गत्यन्यतमगतिभाग्भवतीत्यर्थः। चोऽवधारणे। अथ श्रुत्यर्थः। विष्वङ् क्षेत्रज्ञः पुरुषः साशनानशने सृती अभिलक्ष्य ततस्तद-नन्तरं व्यक्रामदिहामुत्र फलभोगविरक्त्युदयं विनोभे प्रति चलति इति ॥ १९ ॥ एवमधिकारिभेदेन तद्गन्तव्यमार्गद्वयं तत्प्राप्तिप्रकारं चोक्त्वा अथ भगवतो विराट्पुरुषस्य स्वविभूतिभूतप्रपञ्चाद्वैलक्षण्यं प्रपञ्चात्मना परिणतत्वेऽपि तद्गतदोषा-संस्पर्शित्वं प्रतिपादयन् 'तस्माद्विराडजायत विराजोऽधिपूरुषः' इत्यस्याः श्रुतेरर्थमुद्दिश्याह। यस्मादिति। विराडण्डकारण-भूतपरमपुरुषः यस्मादण्डात यदण्डं सृष्ट्वा इत्यर्थः। ल्यब्लोपे पञ्चमी। तत्र स्वयमपीति शेषः। भूतेन्द्रियगुणात्मकः व्यष्टि-प्रपञ्चरूपः जज्ञे। तथापि तत् द्रव्यं द्रव्यात्मकं विश्वम् अण्डं तद्व्यष्टिप्रपञ्चात्मकं विराट्देहं च गोभिः स्वमयूखैः आतपन् विश्वं प्रकाशयन् सूर्य इव अत्यगादतिक्रान्तवान्। पूर्वोक्त एव दृष्टान्तः। अथ श्रुत्यर्थः। तस्मात्कारणरूपपरमपुरुषात् विराट् अण्डशरीराभिमानी पुरुषः अजायत। विराजः सकाशात् पुरुषः अध्यधिकः अधिकत्वं स्वात्मप्रकाशकत्वेन स्वीयाण्डप्रकाशकत्वेन चेति अनुक्तोऽपि सूर्यदृष्टान्तः श्रुतौ बोध्यः ॥ २० ॥

ननु सर्वं पुरुष एवोक्तरीत्यास्ति चेत्तर्हि यज्ञस्य तत्साधनानां च ततोऽपृथग्भावाद्यज्ञैः पुरुषाराधनसिद्धिर्न स्यादित्या-शङ्कापरिहाराय 'यत्पुरुषेण हविषा' इत्यादि श्रुत्यर्थानुद्दिश्य संग्रहेण तद्दर्शयति। यदेति। महात्मनः अस्य विराडाख्यपुरुषस्य नाभौ भवं नाभ्यं तस्मात् नलिनात्कमलात् अहं चतुर्मुखः यदा। आसम् अभूवम्। पुरुषावयवात् ऋते विना यज्ञसंभारान् अन्यानि यज्ञसाधनानि नाविदं नापश्यं च ॥ २१ ॥ तेष्विति। तदा तेषु पुरुषावयवेषु यज्ञस्य साधनानि अकल्पयमिति शेषः। साधनान्याह। पशवः मेधगुणोपेता ऐतरेयब्राह्मणोक्ताः। सवनस्पतयो यूपादिकार्हतरुसहिताः। कुशा दर्भाः इदं देवा इज्यन्तेऽस्मिन्निति देवयजनं यागभूमिश्च। इदमिति वचनाद्यज्ञार्हे स्थाने उपविश्य कथयतीति गम्यते। उरुगुणान्वितः बहुगुणयुक्तः कालः वसन्तादिश्च ॥ २२ ॥ वस्तूनीति। हे सत्तम वस्तूनि पुरोडाशादीनि ओषधयस्तदर्थाः व्रीह्यादयः। स्नेहा आज्यादयः। रसाः क्षीरादयः। मधुरादयो वा। लोहाः सुवर्णादयः 'लोहोऽस्त्री' इति मेदिनी। मृदः कपालाद्याः। रसादीनां द्वन्द्वः। जलं गङ्गादिगतम्। ऋचो नियतपादबद्धाः। यजूंषि अनियतच्छन्दोबन्धोपेतानि। सामानि गानप्रधानानि। चातुर्होत्रं चतुर्भिरध्वर्युप्रभृतिभिः क्रियमाणं कर्म च ॥ २३ ॥ नामेति। नामधेयानि ज्योतिष्टोमादीनि। मन्त्रा ऋगादीना-मुक्तत्वात्स्वाहाकारादयश्च। दक्षयन्ति कर्मणीति दक्षिणाः होत्रादिभ्यो द्रव्यदानानि च। व्रतानि पयोभक्षणादिकानि च। ब्रह्मचर्यादीनि इति वा। देवतानुक्रमः देवतानामनुक्रम उद्देशः। यद्वा। देवतेति पृथक्पदम्। देवतास्तत्तन्मन्त्रवाच्या अग्न्यादिकाः। अनुक्रमस्तासां तारतम्यं पौर्वापर्यलक्षणम्। अनुपाठो वा कर्मक्रमो वा। कल्पः प्रयोगविधिप्रतिपादको बौधायनादिकृतः। संकल्प 'इदं करिष्ये' इति मनोवाग्भ्यां स्मरणकीर्तनलक्षणः कर्तव्याध्यवसायः। तन्त्रं क्रियाकलापः। अनुष्ठानप्रकारो वा। एव चेति पादपूरणार्थकौ उक्तार्थऋतत्वबोधकौ वा ॥ २४ ॥

गतय इति। गतयो विष्णुक्रमाद्याः। मतयो देवताध्यानानि। श्रद्धा कर्तव्यविषया त्वरा। प्रायश्चित्तमन्तराला-वाप्तान्तरायपरिहारत्वेन यथोक्तकर्मफलसाधनं कर्म। समर्पणं देवतां प्रति न ममेत्युक्त्वा स्वत्वत्यागपूर्वकं हविरर्पणम्। कृतस्य भगवति समर्पणमित्यन्ये। एवं मया एते संभारा यज्ञसाधनानि पुरुषावयवैः संभृताः संपादिताः ॥ २५ ॥ इतीति। पुरुषावयवैः इतीत्थं संभृताः संपादिताः संभारा येन सः अहं तम् एव पुरुषं सर्वान्तरात्मकम् ईश्वरं नियन्तारं यज्ञं विष्णुं तेनैव यज्ञेनैव अयजमिष्टवानस्मि। अनेन 'यज्ञेन यज्ञमयजन्त' इति मन्त्रार्थो उक्तः ॥ २६ ॥ 'तेन देवा अयजन्त' इत्यस्यार्थं सप्रपञ्चं दर्शयति। तत इति द्वाभ्याम्। ततः ते तव भ्रातरः इमे मरीच्यादयः नव प्रजानां पतयः सुसमाहिता एकाग्रचित्ताः सन्तः व्यक्तमिन्द्रादि-रूपम्। अव्यक्तं स्वतः पुरुषं परमपुरुषम्। अयजन् इष्टवन्तः ॥ २७ ॥ तत इति। ततः काले स्वस्वावसरे मनवः अपरे ऋषयश्च विभुं परमात्मानम्। क्रतुभिर्यज्ञैः ईजिरे। ततः पितरोऽग्निष्वात्तादयः। ततः विबुधा इन्द्रादयः। ततः दैत्याः प्रह्लादादयः। ततः मनुष्याः प्रियव्रतप्रभृतयः। विभुं परमात्मानं क्रतुभिर्यज्ञैः ईजिरे ॥ २८ ॥ एवं यद्रूपमित्यादीनां प्रश्नानां पुरुषसूक्तसंवादेनोत्त-राण्यभिधाय यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति। नारायण इति। तत् इदं विश्वं स्वतः अगुणः सत्त्वादिगुणरहितः, सर्गादौ गृहीता मायया उरवो गुणा येन तथाभूतश्च यो भवति तस्मिन् भगवति नारायणे आहितं तस्मिन्नारायणे एव सूक्ष्मरूपेणावस्थितं भवतीत्यर्थः ॥ २९ ॥ स च विश्वं स्वशरीरभूतेन मया सृजति, स्वशरीरभूतेन रुद्ररूपेण हरति, स्वशरीरभूतेन पुरुषात्मविष्णुरूपेण पातीति ब्रुवन्नुपसंहरति। सृजामीति। तन्नियुक्तः सर्गक्रियायां तन्नियुक्तः अहं चतुर्मुखः तद्वशः सन् विश्वं सृजामि। तद्वशः हरो रुद्रः हरति। पुरुषरूपेण परिपाति। एवं सः त्रिशक्तिधृक् अस्तीति शेषः ॥ ३० ॥

सांप्रतं यद्रूपमित्यादिप्रश्नानां यदात्मकस्त्वमित्यादिप्रश्नानां च सामान्येनोत्तरं 'वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः' इति 'पुरुष एवेदं सर्वम्' इति श्रुत्या च यद्दृढीकृतं तदुपसंहरति। इतीति। हे तात। इदं विश्वं प्रति यथा अनुपृच्छसि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विश्वविषयं प्रश्नं करोषीत्यर्थः। तस्य प्रश्नस्योत्तरमिति शेषः। सदसदात्मकं चेतनाचेतनात्मकं कृत्स्नं जगत् किंचित् अपि भगवतः सकाशात् अन्यत् पृथक् न भाव्यं नानुसंवेयम् इति ते तुभ्यम् अभिहितम्। केचित्तु भाव्यं सृज्यमित्युक्त्वा तत्सदसदात्मकमित्यनेन विशेषयन्ति ॥ ३१ ॥ यदुक्तम् 'एतावत्त्वं यतो हि मे' 'तमविज्ञाय मामीश्वरं ब्रवीषि' इति तदुपपादयन्नुपसंहरति। न भारतीति। अङ्ग, हे नारद, मे मम भारती वाक् मृषा मिथ्या न उपलक्ष्यते न दृश्यते। मे मम मनसः गतिर्वृत्तिः क्वचित्कदाचित् मृषा न वै। मे मम हृषीकाणीन्द्रियाणि असत्पथे असद्विषये न पतन्ति न प्रवर्त्तन्ते। यद्यस्मात् मे मया औत्कण्ठ्यं प्रियवस्तुनि मनोवृत्तिविशेषः स्नेहलक्षणा भक्तिरिति यावत् तद्वता हृदा मनसा हरिः धृतः ध्यातः। अतः मे वाङ्मनइन्द्रियाणां वृत्तयः सत्यार्थाः, न तु मत्प्रभावेणेत्यर्थः। अनेन यावद्भगवत्स्वरूपे गाढानुरागेण कायवाङ्मनसां वर्त्तनं तावन्न हृषीकाणामसत्पथे प्रवर्त्तनमन्यथा प्राकृतविषयप्रवणतायां तु तेषां तत्र तत्स्यादेवेति सूचितम्। अनेन 'वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः। अकामां चकमे क्षत्तः सकाम' इत्येतदपि समाहितं तत्कालेऽस्य तथात्वाभावादि‍ति भावः ॥ ३२ ॥ अतो ममापि ज्ञानप्रदो मदचिन्त्यस्वरूपस्वभावः सर्वेश्वरश्च मत्तोऽन्योऽस्तीत्याह। सोऽहमिति। समाम्नायमयो वेदप्रतिपाद्येषु प्रधानः समीचीनज्ञानसंप्रदायप्राचुर्यो वा, तपोमयस्तपस्विषु प्रधानः, विद्यातपोभ्यां सर्वोत्कृष्ट इत्यर्थः। प्रजापतीनां मरीच्यादीनाम् अभिवन्दितः तैर्नमस्कृतः पतिः तेषां पतिश्च। सः अहं समाहित एकाग्रमनाः सन् निपुणं निर्विघ्नं यथा तथा योगं ध्यानयोगम् आस्थाय समास्थाय यतः आत्मसंभवः यस्मात् परमात्मनः सकाशादुत्पन्नः तत्कृपालब्धज्ञानसंपन्नश्च जातः। तं परमात्मानं नाध्यगच्छं स्वरूपतो गुणतश्चैतावानिति न ज्ञातवान्। कुतोऽन्यस्य वार्त्ता। एतच्च तृतीयस्कन्धे पद्मोद्भवे वक्ष्यते ॥ ३३ ॥

नारदायैवंविधं हरिमहिमानं व्याचक्षाणस्तं स्मारं स्मारं भक्तिप्रसरसिन्धुनिमग्नः सन्नमस्करोति। नतोऽस्म्यहमिति। यत एवं परमात्मनो निरवधिकातिशयमहिमत्वमस्त्यतः शरणं समीयुषां प्राप्तानां भवच्छिदं संसारनिवर्त्तकम्, स्वस्त्ययनं स्वानन्दानुभवप्रदं मङ्गलानामाश्रयं वा, सुमङ्गलं सुसेव्यं तच्चरणं परमात्मनोऽङ्घ्रिकमलम् अहं नतः अस्मि। केवलं नमस्कारमात्रं करोमीत्यर्थः। हि यस्मात् य आत्ममायाविभवं स्वमायाविस्तारं पर्यगात् न जानाति। परिशब्दो निषेधे। एतावानिति स्वयं न ज्ञातवानित्यर्थः। अथ तर्हि अपरे कुतः जानीयुः। स्म प्रसिद्धौ। ननु सर्वज्ञः कथं न जानातीति चेदन्ताभावादिति दृष्टान्तेनाह। यथा स्वस्याऽन्तः तं नभः न प्राप्नोति तद्वत्। नहि खपुष्पादर्शनं सार्वज्ञं निहन्तीति भावः। तथा च वक्ष्यति 'द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि' इति। उक्तोभयविधार्थे प्रमाणं श्रुतिः। यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद' इति ॥३४॥ इदानीं स्वात्मानं निदर्शनीकृत्य कस्यापि तत्साकल्यज्ञानं नास्तीत्याह। नाहमिति। यद्वतां गतिं यस्य परमार्थस्वरूपमित्यर्थः। अहं चतुर्मुखः न वेद्मि। यूयं सनकादयः न विदुः। वामदेवो रुद्रः न वेत्ति। 'न चाहं न च शंकरः' इति वैष्णवे चतुर्मुखवचनात्। तर्हि अपरे सुराः किमुत, कथं विद्युरिति भावः। कुतो न विद्युरित्यत आह। तन्मायया 'दैवी ह्येषा गुणमयी' इत्युक्तविधया भगवतो मायया मोहिता बुद्धिर्येषां ते तन्मायामोहितबुद्धित्वादेव न विदुरित्यर्थः। तर्हि किं किं विदुरित्यत आह। तेन एव विनीर्मितम् इदमचेतनं शरीरं च आत्मसमं विचक्ष्महे आत्मानं देहाकारं मन्यामह इत्यर्थः। तुशब्देन देहात्मविभागमप्यजानतां कथं परमात्मवेदनमिति भावः ॥ ३५ ॥ एवं तर्हि तन्मायातरणे क उपाय इत्यत आह। यस्येति। यस्य भगवतः अवतारकर्माणि अवताराणां चेष्टितानि अस्मदादयश्चतुर्मुखप्रभृतयः गायन्ति। यं भगवन्तं तत्त्वेन याथात्म्येन न विन्दन्ति न जानन्ति। हि तस्मै भगवते नमः। तस्य गुणकर्मानुकीर्त्तनमेव मायातरणोपाय इत्यभिप्रायः ॥ ३६ ॥

ननु तर्हि के तदवताराः कानि तच्चेष्टितानि यदनुकीर्त्तनेन माया तीर्यते इत्याशङ्कायामवतारांस्तत्कर्माणि च वक्ष्यमाणः यद्रूपमित्यादि प्रश्नानामुत्तराण्युपसंहरति। स एष इति। अजः कर्माधीनजन्मरहितः एष आद्यः कारणभूतः स पुरुषः सर्वान्तरात्मा आत्मा परमपुरुषः। कल्पे कल्पे प्रतिकल्पमित्यर्थः। आत्मनि सर्वाधारभूते स्वात्मन्येव आत्मना परमात्मभूतेन स्वस्वरूपेण आत्मानमुपादानभूतं सृजति संयच्छति संहरति च पाति रक्षति च ॥ ३७ ॥ नन्वयं जगद्व्यापारः किं भगवतः कर्माधीनः नेत्याशङ्क्य विशेषणैस्तत्स्वरूपशुद्धतामाह। विशुद्धं पुण्यपापात्मककर्मरहितम्। अतो न जगद्व्यापारः कर्माधीन इत्यर्थः। एवं च कर्माधीनव्यापारवज्जीवस्वरूपाद्वैलक्षण्यमुक्तं भवति। जीवविलक्षणं चेत्तर्त्किं जडमित्यत आह। केवलं ज्ञानं क्वचिदपि न जडमित्यर्थः। तर्हि किं घटपटाद्याकारवृत्तिज्ञानमित्यत आह, प्रत्यक् स्वस्मै भासमानम्। ननु जीवोऽप्येवंरूपोऽस्त्यत आह सम्यगवस्थितमर्थान्तरानपेक्षस्थितिम्। जीवस्तु परमात्मधर्म इत्यभिप्रायः। अन्यानपि चेतनाचेतनविलक्षणाकारानाह। सत्यत्वं स्वरूपतो धर्मतश्च निर्विकारम्। अनेन स्वरूपतो विकार्यचेतनद्रव्यं स्वभावतोऽविकारो चेतनश्च व्यावृत्तः। पूर्णमवाप्तसमस्तकामम्। निर्गुणं सत्त्वादिगुणरहितम्। अनाद्यन्तमुत्पत्तिनाशरहितम्। नित्यं कालाद्यनवच्छिन्नम्। अद्वयं समाभ्यधिकरहितम्। एते यथासंभवं चेतनाचेतनव्यावर्त्तकत्वेनानुसंधेयाः ॥ ३८ ॥ अत्र विद्वदनुभवं प्रमाणयति। ऋषे नारद, यदा मुनयः आत्मा अन्तःकारणं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च इन्द्रियाणी च आशयो वासना च प्रशान्ता आत्मेन्द्रियाशया तेषां ते तथाविधाः स्युः। तदा उक्तविधं परमात्मस्वरूपं विन्दन्ति जानन्ति। समीचीनतर्कैर्विविच्य तत्स्वरूपं चेतनाचेतनविलक्षण बुद्ध्यन्ति। कुतर्कैस्तद्दुर्ज्ञेयत्वमाह। तदेव ज्ञानम् असन्तश्च ते तर्काश्च असतां वा तर्कास्तैः हेतुवादैः यदा विप्लुतमुपद्रुतं स्यात् तदा तिरोधीयेत ज्ञातमप्यज्ञातवदेव जायेतेत्यर्थः॥ ३९॥

'यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः' इति यदभिहितं तदाश्रुत्य के तदवताराः कानि च तत्कर्माणि इति तत्पिपृच्छिषामाकलय्याथ तदवतारांस्तत्कर्माणि च विवक्षुरादिममवतारमाह। आद्य इति। पुरुषः विराट्पुरुषः भूम्नो भगवतः परस्य विष्णोः आद्यः अवतारः। अस्याद्यत्वं मात्स्यकौर्माद्यपेक्षया। अथास्य विभूतिराह। कालः परमाण्वादिपरममहदन्तः। स्वभावः प्रकृतिगतपरिणामस्वभावः। सच्चेतनम् असदचेतनं मनो सनस्तत्त्वं च। द्रव्यं पृथिव्यादि। विकारो महदहङ्कारादिः। गुणः सत्त्वादिः। इन्द्रियाणि ज्ञानकर्मात्मकानि। विराडन्तरिक्षम्। स्वराट् स्वर्गः। 'अयं लोकस्तु वै सम्राडन्तरिक्षं विराट् स्मृतः। स्वराडसौ स्मृतो लोकः' इत्युक्तेः। स्थास्नु स्थावरम्। चरिष्णु जङ्गमम्॥ ४०॥ अहमिति। अहं चतुर्मुखः, भवः शर्वः, यज्ञः विष्णुः, दक्षादयः ये इमे प्रजेशाः, ये भवदादयः नारदप्रभृतयः सनकादयश्च। स्वर्लोकपालाः इन्द्रादयः। खगलोकपालाः गरुडादयः। नृलोकपालाः प्रियव्रतादयः। तललोकपालाः अनन्तबल्यादयः॥ ४१॥ गन्धर्वेति। गन्धर्वाश्च, विद्याधराश्च, चारणाश्च, तेषामीशाः। तत्र गन्धर्वेशा विश्वावस्वादयः। विद्याधरेशाश्चित्रकेत्वादयः। चारणेशाः पुष्पदन्तादयः। ये यक्षाश्च रक्षांसि च उरगाश्च नागाश्च तेषां नाथाः। तत्र यक्षनाथाः कुबेरादयः। रक्षोनाथा निर्ऋत्यादयः। उरगनाथा वासुक्यादयः। नागनाथा अनन्तादयः। पूर्वोक्तोऽनन्त एककुण्डलस्ततोऽयमन्यः। रक्षोरगेति संधिरार्षः। ये वा ये च, ऋषीणाम् ऋषभाः श्रेष्ठाः वसिष्ठादयः। पितॄणाम् ऋषभाः अग्निष्वात्तादयः। दैत्येन्द्राश्च, सिद्धेश्वराश्च, दानवेन्द्राश्च, ते। तत्र दैत्येन्द्राः प्रह्लादादयः। सिद्धेश्वराः कव्यादयः। दानवेन्द्रा वृषपर्वादयः। ये अन्ये च प्रेताश्च, पिशाचाश्च, भूतानि च, कूष्माण्डाश्च, यादांसि च, मृगाश्च, पशवश्च, तेषामधीशाः। तत्र प्रेताधीशाः संयमनीनाथादयः। पिशाचाधीशा घण्टाकर्णादयः। भूताधीशा भैरवादयः। कुष्माण्डाधीशा भृङ्गीरुक्मादयः। यादसामधीशास्तिमिङ्गिलगिलादयः। मृगाधीशाः सिंहादयः। पश्वधीशा नन्दिकेश्वरादयः॥ ४२॥

यदिति। किं च लोके यत् भगवदैश्वर्यमुक्तम्। महस्वत् स्वतः महत्त्ववत्। ओजस्वत् अवष्टम्भवत्। सहस्वत्सहनगुणवत्। ओजःसहसोर्द्वन्द्वं कृत्वा वतुप्। बलवत् इच्छाकरणशक्तिमत्। क्षमावत् क्रोधासमुत्थितिमत्। श्रीश्च ह्रीश्च विभूतिश्च आत्मा च तैर्युक्तं तद्वत्। तत्र श्रीमच्छोभावत्। ह्रीमल्लज्जावत्। विभूतिमन्नियाम्यवर्गवत्। आत्मवद्बुद्धिमत्। अद्भुतार्णमद्भुतशब्दवाच्यम् आश्चर्यसमुद्रं वा। परं यद्यच्छ्रेष्ठम् एतत्सर्वं रूपवतः प्रशंसायां मतुप्। भगवतः तत्त्वं स्वरूपं च अकर्मकृत्त्वेच्छोपात्तदिव्यमङ्गलास्पदविग्रहस्य भगवतो विराट्पुरुषस्य विभूतिरित्यर्थः। रूपवदस्वरूपमिति पाठे रूपवत्कमनीयरूपम्। अस्वरूपं निरवयवं च। एवं यद्यत् परं श्रेष्ठं वस्तु तत्तत्सर्वं तत्त्वम्। परमेश्वरविभूतिरित्यर्थः॥ ४३॥ अवताराणामानन्त्यात्तत्र प्रसिद्धानेव वक्ष्यामीत्याह प्राधान्यत इति। हे ऋषे। कर्णयोः कषाया असत्कथाश्रवणैर्ये मलास्तान् शोषयन्तीति तान्। सुपेशान् सुन्दरान् भूम्न आनन्दादिगुणपूर्णस्य पुरुषस्य भगवतः प्राधान्यतः मुख्यान् यान् लीलावतारान् आमनन्ति मुनयः कथयन्ति तान् इमान् लीलावतारान् ते तुभ्यम् अनुक्रमिष्ये क्रमेण वर्णयिष्यामि। तदनुक्रमणामृतं त्वया आपीयतां भवान् शृणोत्वित्यर्थः। यद्वा। आपीयतामिति शत्रन्तम्। तदा पिबतां कर्णकषायशोषानतुक्रमिष्ये इत्यन्वयः॥ ४४॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे षष्ठोऽध्यायः॥ ६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सप्तमोऽध्यायः

ब्रह्मोवाच

यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥

ब्रह्मणा कथिता लीलावतारा सप्तमे हरेः । तत्कर्मार्थगुणैः सार्द्धं नारदाय तु पृच्छते ॥ १ ॥

पूर्वाध्यायान्ते अनुक्रमिष्ये इति यत्प्रतिज्ञातं तत्संपादयंस्तान् भगवदवतारांस्तत्कर्माणि तत्प्रयोजनानि तद्गुणांश्च ब्रुवन् वराहकल्पस्य प्राथम्यात्प्रथमतो वराहावतारं तत्कर्म चाह । यत्रेति । सकलयज्ञमयीं स्रुक्स्रुवादिसर्वयज्ञोपकरणाधारां क्रोडस्य वराहस्येयं क्रौडी तां तनुं बिभ्रत् सन् अनन्तः ब्रह्मादिभिः संस्तुतोऽपारमहिमः भगवान् यत्र यदा क्षितितलोद्धरणाय उद्यतः सम्यगेकार्णवोदके निमज्ज्य रसातलगतां महीमुद्धृत्य दंष्ट्राग्रे निधायोर्ध्वं गतः । तदा अन्तर्महार्णवे समुद्रस्य मध्ये उपागतं मह्युद्धरणप्रतिरोधाय समीपमुपयातं तं प्रसिद्धम् आदिदैत्यं हिरण्याक्षं वज्रधर इन्द्रः । वज्रधरशब्दोपादानादिन्द्रः वज्रेणेत्यर्थो बोध्यः । अद्रिं पर्वतम् इव दंष्ट्रया ददार विदारितवान् । अत्र दंष्ट्रयेत्यनेन दंष्ट्रोपलक्षिते गल्लप्रदेशे चपेटप्रहारेणेत्यर्थः प्रतिभाति । तृतीयस्कन्धे करेण कर्णमूलेऽहन्नित्युक्तेः । यद्वा । अनन्तः श्रीहरिः ब्रह्मादिप्रार्थनया यत्र यदा क्षितितलोद्धरणाय प्रलयकालीनैकार्णवोदकादिति शेषः । विधेर्घ्राणादाविर्भूय उद्यत उद्युक्तः । आसीदिति शेषः । तदा सकलयज्ञमयीं क्रौडीं श्वेतवर्णां तनुं बिभ्रत् बभूवेति शेषः । स च स्वायंभुवमन्वन्तरस्यादाविति बोध्यम् । अयं च श्वेतो वराह इति भावः । स एवान्तः, चाक्षुषमन्वन्तरे तु नीलवर्णक्रोडतनुः नीरादाविर्भूय क्षितिमुद्धर्तुमिति शेषः । प्रवृत्तः तदा अन्तर्महार्णवे उपागतं तम् आदिदैत्यं हिरण्याक्षं वज्रधरः अद्रिम् इव दंष्ट्रया ददारेति योजना । तत्र हेतुर्लघुभागवतामृते । यथा 'द्विराविरासीत्कल्पेऽस्मिन्नाद्ये स्वायंभुवान्तरे । घ्राणाद्विधेर्धरोद्धृत्यै चाक्षुषीये तु नीरतः । कदाचिज्जलदश्यामः कदाचिच्चन्द्रपाण्डुरः । यज्ञमूर्त्तिस्थविष्ठोऽयं वर्णद्वययुतः स्मृतः । दक्षात्प्राचेतसात्सृष्टिः श्रूयते चाक्षुषेऽन्तरे । अतस्तत्रैव जन्मास्य हिरण्याक्षस्य युज्यते । उत्तानपादवंश्यानां तनयस्य प्रचेतसाम् । दक्षस्यैव दितिः पुत्री हिरण्याक्षो दितेः सुतः । कल्पारम्भे तदा नास्ति सुतोत्पत्तिर्मनोरपि । क्वासौ प्राचेतसो दक्षः क्व दितिः क्व दितेः सुतः । अतः कालद्वयोद्भूतं श्रीवराहस्य चेष्टितम् । एकत्रैवाह मैत्रेयः क्षत्तुः प्रश्नानुरोधतः' इति । ननु मन्वन्तरसमाप्तौ दशलोकलयोक्तेः पूर्वमन्वन्तराधिकारिणः भाव्यमन्वन्तराधिकारिणश्च क्व वा तिष्ठन्तीति चेत्तर्ह्येतस्यापि 'मन्वन्तरे परीक्षीणे देवा मन्वन्तरेश्वराः । महर्लोकमथासाद्य तिष्ठन्ति गतकल्मषाः' इत्यादिविशेषो भागवतामृतात् ज्ञेय इति ॥ १ ॥ यज्ञावतारमाह । जात इति । रुचेः प्रजापतेः सकाशात् आकूतिसूनुः तद्भार्याया आकूतेः पुत्रः सुयज्ञः नाम जातः । अथ सः दक्षिणायां दक्षिणासंज्ञायां स्वभार्यायां सुयमान् अमरान् सुयमाख्यगणयुक्तान् यावान्देवानित्यर्थः । 'यज्ञस्य दक्षिणायां तु पुत्रा द्वादश जज्ञिरे । यामा इति समाख्याता' इति वचनात् । अजनयत् । सः एव इन्द्रः सन् यदा लोकत्रयस्य महतीम् आर्त्तिं त्रिलोक्या महद्दुःखमित्यर्थः अहरत् । ततः स्वं भक्षितुं प्राप्तेभ्यो राक्षसेभ्यः स्वावनविधानेन स्वार्त्तिमप्यपहरच्चेत्यपि ज्ञेयम् । लोकत्रयस्योपलक्षणत्वात् तदा स्वायंभुवेन मातामहेन मनुना पूर्वं सुयज्ञ इति उक्तः सन्नपि अनु पश्चात् हरिः इति उक्तः । एतद्यज्ञकृतमन्वन्तरं त्वष्टमस्कन्धे स्फुटीभविष्यति । अनेन देवोत्पादनं लोकत्रयार्त्तिहरणं चास्य कर्म दर्शितम् । एवं सर्वत्रावतारस्तत्कर्म च ज्ञेयम् ॥ २ ॥ अथ कपिलावतारमाह । जज्ञे इति । हे द्विज सः विष्णुः कर्दमगृहे कर्दमभार्यायां देवहूतिसंज्ञायां 'गृहं गृहाश्च पुं भूम्नि कलत्रेऽपि च सद्मनि' इति मेदिनी । नवभिर्नवसंख्याकाभिः स्त्रीभिर्भगिनीभिः समं सह जज्ञे । कपिलनाम्ना प्रादुरासीत् । स च स्वमात्रे स्वजनन्यै आत्मगतिं तत्त्वसंख्यानोक्तिपूर्वं तेभ्यः पृथग्भूतात्मज्ञानावगमनरूपामात्मविद्याम् ऊचे । अनेन स्वमात्रे ज्ञानप्रदानरूपं तच्चरित्रं दर्शितम् । यया विद्यया देवहूतिरिति शेषः । अस्मिन् देहे जातं गुणत्रयसङ्ग एव पङ्कस्तम् । निरन्तरगुणत्रयनिषेवणोत्पन्नाविद्याकामकर्मात्मकमित्यर्थः । आत्मशमलं मनःकल्मषं विधूय सांख्यशास्त्रश्रवणजातज्ञानवारिणा प्रक्षाल्येत्यर्थः । कपिलस्य गतिं कपिलप्रोक्तामात्मस्वरूपप्राप्तिरूपां सिद्धिमित्यर्थः । प्रपेदे प्राप्तवती । इदं स्वमात्रेऽत्रात्मगतिप्रदानमुपलक्षणमासुरिप्रभृतिभ्य आत्मगतिप्रदानस्य 'कपिलो वासुदेवाख्यस्तत्त्वं सांख्यं जगाद ह । ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च । तथैवासुरये सर्ववेदार्थैरुपबृंहितम्' इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाद्मोक्तेः। अत्र कर्दमगृहे देवहूत्यामित्यादिभिरस्य विशेषित्वं तु सेश्वरसांख्यवक्तृपरमेश्वरावतारत्वप्रदर्शनाय। निरीश्वरसांख्यप्रवर्तकाग्निपुत्रान्यकपिलव्यावृत्त्यर्थं च। तथा च लघुभागवतामृते। 'सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह। सांख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितम्' इति। वनपर्वणि चाग्निवंशवर्णने। 'कपिलं परमर्षिं च यं प्राहुर्यतयः सदा। अग्निः स कपिलो नामा सांख्ययोगप्रवर्त्तकः' इति ॥ ३ ॥

दत्तात्रेयावतारमाह। अत्रेरिति। अपत्यं हरिणा समं पुत्रम् अभिकाङ्क्षतः आकाङ्क्षमाणस्य अत्रेः तुष्टः, तपसेति शेषः। भगवान्, त्वत्तपसा प्रसन्नेन मया स त्वत्प्रार्थितः अहम् एव दत्तः त्वत्पुत्रत्वेन विश्राणित इति यद्यस्मात् आह ततः सः भगवान् नाम्ना दत्तः इति जातः। अत्रिपत्न्यामनसूयायां प्रादुर्भूय दत्तनाम्ना प्रसिद्धोऽभूदित्यर्थः। स्वभक्तेभ्यो योगैश्वर्यदानरूपं तच्चरित्रं दर्शयति। यस्य पादपङ्कजयोः परागस्तेन पवित्रा देहा येषां ते। यदुः कार्त्तवीर्यस्य पूर्वजश्च, हैहयः कार्त्तवीर्योऽर्जुनश्च, तावाद्यौ येषामलर्कप्रह्लादादीनां ते, उभयीमैहिकामुष्मिकीं योगर्द्धिम् अणिमाद्यष्टैश्वर्यरूपामैहिकीं मुक्तिरूपामामुष्मिकीं च योगसम्पत्तिमित्यर्थः। आपुः। केचित्तु मुक्तिरूपां योगर्द्धिमिति वदन्ति ॥ ४ ॥ अथ कुमारावतारमाह। तप्तमिति। आदौ मे मया विविधलोकसिसृक्षया नानाविधानां लोकानां स्रष्टुमिच्छया तपः तप्तं कृतम्। सनादखण्डितात् तस्मात् सुतपसः महतस्तपसः हेतोः सः श्रीहरिः, चतुःसमः चत्वारः सनशब्दा नाम्नि यस्य सः। सनत्कुमारः, सनकः, सनन्दनः, सनातन इति कुमारचतुष्टयनाम्ना प्रसिद्धः अभूत्। तस्य चरितमाह। प्राक् पूर्वं यः कल्पसंप्लवः प्रलयस्तस्मिन्विनष्टं विच्छिन्नसंप्रदायमित्यर्थः। आत्मतत्त्वम् आत्मपरमात्मनोः स्वरूपसंबन्धिज्ञानमित्यर्थः। इहास्मिन्कल्पे सम्यक् जगाद। यदात्मतत्त्वं मुनयः तन्मननकर्त्तारो योगिजना: आत्मन्नात्मनि स्वस्वमनसीत्यर्थः। अचक्षत। साक्षादपश्यन्नित्यर्थः। ज्ञात्वा चान्येभ्यश्चाप्यूचुरित्यपि ज्ञेयम् ॥ ५ ॥ नरनारायणावतारमाह। धर्मस्येति। धर्मस्य धर्मप्रजापतेः पत्न्यां दक्षदुहितरि दक्षप्रजापतिपुत्र्यां मूर्त्यां मूर्तिसंज्ञायाम्। स्वः असाधारणः तपःप्रभावस्तपःप्रतापो यस्य सः। 'प्रतापमाहात्म्ययोः प्रभावः' इत्यभिधानात्। यद्वा स्वमात्मीयं स्वविषयकमिति यावत् यत्तपः तस्य प्रभावो यस्य सः। नारायणः नरः इति मूर्त्तिद्वयेन स हरिः अजनिष्ट जातः। तत्प्रभावमाह। अनङ्गपृतना यद्यपि स्वयं मन्मथसेनारूपाः तथापि देव्यः इन्द्रप्रेषिता अप्सरसः तु, आत्मनः सकाशात् भगवतः परमात्मनः अनियमावलोपं नियमलोपाभावं दृष्ट्वा, घटितुं तपसस्तत्पातनविधानरूपस्वकार्यं कर्त्तुम्, न शेकुः समर्था न बभूवुः। स्वतोऽप्यधिकसौन्दर्यमन्दिराणां भगवता तत्क्षणसृष्टानां स्त्रीणां दर्शनाल्लज्जितास्ततोऽन्ववर्त्तन्तेत्यस्मिन्नर्थे तुशब्दः। यद्वा। भगवान् दक्षस्य दुहितरि धर्मस्य पत्न्यां मूर्त्याम् अजनिष्ट मूर्तिचतुष्टयेन प्रादुर्बभूव। तथा च महाभारते मोक्षधर्मेषु नारायणीये 'नारायणो हि विश्वात्मा चतुर्मूर्त्तिः सनातनः। धर्मात्मजः संबभूव पितैवं मेऽभ्यभाषत। कृते युगे महाराज पुरा स्वायंभुवेऽन्तरे। नरो नारायणश्चैव हरिः कृष्णः स्वयंभुवः। तेषां नारायणनरौ तपस्तेपतुरव्ययौ। बदर्याश्रममासाद्य शकटे कनकामये। अष्टचक्रं हि तद्यानं भूतयुक्तं मनोरमम्। यत्राद्यौ लोकनाथौ तौ कृशौ धमनिसंततौ। तपसा तेजसा चैव दुर्निरीक्ष्यौ सुरैरपि। यस्य प्रसादं कुर्वाते स देवौ द्रष्टुमर्हति'। इति। लघुभागवतामृते च। 'शास्त्रेऽन्यौ हरिकृष्णाख्यावनयोः सोदरौ स्मृतौ। एभिरेकोऽवतारः स्याच्चतुर्भिः सनकादिवत्' इति। एतौ हरिकृष्णौ गृहिणौ बभूवतुरिति तत्रैव तट्टीकायामुच्यते इति। तत्र नारायणः नरश्च स्वतपःप्रभावः। एतावुभौ तु स्वकीयतपसः प्रभावातिशयोपेतौ बभूवतुरित्यर्थः। प्रभावातिशयमेवाह। दृष्टात्मन इति पाठः। अनङ्गपृतनाः कामस्य सेनास्थानीयाः देव्यो देवस्त्रियः दृष्टात्मनो नित्यमपरोक्षीभूतनिजस्वरूपस्य नरनारायणात्मनः भगवतः नियमावलोपं तपआदेर्भङ्गं घटितुं कर्त्तुं न शेकुः ॥ ६ ॥ यत्र कामविजयी क्रोधोऽपि बिभेति तत्र कामो न प्रभवतीति किं वक्तव्यमित्याह। काममिति। कृतिनः कृतकृत्याः शिवादयः रोषदृष्ट्या क्रोधयुक्तया स्वदृशा कामं मदनं दहन्ति तेऽपि असह्यं सोढुमशक्यमपि आत्मानं दहन्तमपि रोषं क्रोधं न दहन्ति नाभिभवन्ति। ननु प्रत्युत ते क्रोधेनैवाभिभूयन्ते इत्यर्थः। सः अयं रोषः यदन्तरं यस्य भगवतो मनः निविशन् प्रवेष्टुमित्यर्थः। अलमतिशयेन बिभेति भयमधिगच्छति। तर्हि अस्यैवंविधस्य हरेः मनः पुनः, मनस्तु कामः कथं नु श्रयेत, न कथमपीत्यर्थः। कामजेत्राप्यजेयं रोषं जितवतो मनः कामः कथं श्रयेदित्यर्थः। यद्वा। सः अयम् अमलं रागद्वेषलक्षणमलविधुरत्वान्निर्मलम्। यदन्तः यस्य मनः इत्यर्थः। निविशन् निवेष्टुमिच्छन्नित्यर्थः। बिभेति। अस्य मनः पुनः, पुनस्त्वर्थे। तथाचास्य मनस्त्वित्यर्थः। कथं नु श्रयेतेति अन्वययोजना ॥ ७ ॥

पृश्निगर्भावतारमाह। विद्ध इति। राज्ञ उत्तानपदः अन्त्यन्तिके समीपे इति यावत्। सपत्न्या अपरमातुः सुरुचेः उदितानि वाक्यान्येव पत्त्रिणो बाणास्तैः विद्धस्ताडितः, अत एव बालः सन्नपि, तपसे तपश्चर्त्तुं यः ध्रुवः वनानि उपगतः, वने तपस्तप्त्वा गृणते स्तुतवते तस्मै ध्रुवाय प्रसन्नः यो भगवान् ध्रुवगतिं ध्रुवाख्यमाकल्पस्थायि पदम् अदात्। सोऽप्ययमेकोऽवतार इत्यर्थः। ध्रुवगतिं विशिनष्टि। यदुपरि ध्रुवगत्यात्मकस्य यस्य ध्रुवपदस्योपरि स्थिता इत्यर्थः। मुनयो भृग्वादयः, अधस्ताच्च स्थिता दिव्याः मुनयः सप्तर्षिप्रभृतयः स्तुवन्ति ध्रुवगतिप्रभावं प्रशंसन्तीत्यर्थः। ध्रुववरदातुः पृश्निगर्भभगवदवतारत्वं लघुभागवतामृताद्बोध्यम् ॥ ८ ॥ पृथ्ववतारमाह। य इति। यः पृथुः अर्थितः ऋषिभिः संप्रार्थितः सन्, उत्पथगतं मामेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यजध्वं मत्तोऽन्यद्दैवतं नास्तीत्यादि संभाषणपूर्वं कुमार्गगामिनम्। अत एव द्विजानां हितोपदेशार्थागतमुनीनां वाक्यवज्रं स्ववाक्यातिक्रमणजरोषोच्चारितवचनवज्रं तेन विप्लुष्टं विशेषेण दग्धं पौरुषं पुरुषकारः भगमैश्वर्यं च यस्य तम्। अत एव निरये पतन्तं येनं स्वतातं त्रात्वा नरकपतनात्संरक्ष्य जगति पुत्रपदं च लेभे। 'पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा' इति पुत्रपदव्युत्पत्तिस्मरणात। पुदाख्यान्नरकाद्वेनं पितरं संरक्ष्य पुत्रपदवाच्यतामपि प्राप्तवानित्यर्थः। तच्चरित्रान्तरमाह। येन पृथुना वसुधा भूमिः सकलानि सर्वाणि वस्तूनि अन्नादिद्रव्याणि दुग्धा अदुह्यत। दुहिर्द्विकर्मकः ॥ ९ ॥ ऋषभावतारमाह नाभेरिति। ऋषयो वेदाः यद्ब्रह्म पारमहंस्यं परमहंसप्राप्यं पदं स्वरूपम् आमनन्ति। असौ तथाविधब्रह्मरूपोऽप्ययं हरिः ऋषभः ऋषभाख्यो राजेति प्रसिद्धिं गमिष्यन् नाभेः आग्नीध्रपुत्रात् सुदेविसूनुः आस। मेरुदेव्या एव सुदेवीत्यपि नामान्तरं तस्याः पुत्रः बभूवेत्यर्थः। 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति ह्रस्वः कालिदासवत्। अत एव वैदेहिबन्धोर्हृदयं विदद्रे इति महाकविप्रयोगः। समदृक् सर्वस्यापि स्वात्मकत्वेन समदर्शनः, स्वस्थः 'स्वे महिम्नि प्रतिष्ठितः' इति श्रुतेः स्वस्मिन्नेव स्थितः। प्रशान्तानि करणानीन्द्रियाणि यस्य सः। परितः शब्दादिषु मुक्तस्त्यक्तः सङ्ग आसङ्गो येन एवंभूतोऽपि यः ऋषभः जडयोगचर्यां जडवद्योगाचरणं चचार वै ॥ १० ॥

हयग्रीवावतारमाह। सत्र इति। तपनीयं सुवर्णं तद्वद्वर्णो यस्य सः। 'हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः' इति श्रुतेः। छन्दोमयः वेदमयः वेदोत्पादकत्वेन तत्प्रचुर इत्यर्थः। मखमयो यज्ञाराध्यः। अखिलानां देवतानामात्मा। 'स आत्मा अङ्गान्यन्या देवताः' इति श्रुतेः। एवंभूतः यः यज्ञपुरुषः सः एषः साक्षात् भगवान् मम ब्रह्मणः सत्रे यज्ञे नाम्ना हयशीर्षः आस बभूव। श्वसतः निःश्वसतः अस्य हयग्रीवस्य नस्तः नासिकातः उशतीः शुद्धत्वेन कमनीयाः भगवद्गुणवर्णनसंजातशुद्धितया मनोहरा इत्यर्थः। वाचो वेदलक्षणाः बभूवुरुदपद्यन्त। तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इत्यादिश्रुतेः। वेदानां तद्विहितानां कर्मणां तदाराध्यदेवतानां तत्प्रवर्त्तकत्वतदाराध्यत्वतदात्मकत्वान्यनेनोक्तानि ॥ ११ ॥ मत्स्यावतारमाह। मत्स्य इति। युगान्तसमये प्रलयकाले मनुना भाविना वैवस्वतेन मनुना मत्स्यः मत्स्यरूपधरः भगवान् उपलब्धः दृष्टः। क्षोणीमयः पार्थिवद्रव्याधारनौकात्मकपृष्ठ्याश्रयः इत्यर्थः। अत एव निखिलानां जीवनिकायानां समस्तजीवसमूहानां केतः निलयः स मत्स्यः मे मम मुखात् विस्रंसितान् वेदमार्गान् हयग्रीवदैत्येनापहृतान्वेदरूपमार्गान् आदाय तं हत्वोपादाय उरुभयेऽतिभयंकरे तत्र सलिले प्रलयकालीनाब्धिजले हेति सहर्षं यथा तथेत्यर्थः। विजहार विहृतवान्। ब्रह्मणे वेदप्रदानमेवास्यावतारस्य चरित्रम्। यद्वा। मे मम मुखात् विस्रंसितान् गलितान् वेदमार्गान् हयग्रीवदैत्येनापहृतान् दृष्ट्वा, मत्स्यो मत्स्यरूपधरः सन् भगवानवतीर्य तं हत्वा तानादाय ब्रह्मणे दत्त्वा तिरोहितवान्। पुनः युगान्तसमये मन्वन्तरान्तजातप्रलये सप्तर्षिभिः सह स्तुवता मनुना तत्काले सत्यव्रतसंज्ञेन सतापि भाविना वैवस्वतेन मनुना उपलब्धः स मत्स्यः क्षोणीमयः क्षोणीमयनावाश्रयः अत एव अखिलजीवनिकायानां केत आश्रयः सन् तत्र उरुभये महाभयंकरे सलिले प्रलयसमुद्रजले विजहार इति। एतदर्थोपोद्बलकवाक्यानि 'मत्स्योऽपिप्रादुरभवद्द्विः कल्पेऽस्मिन्वराहवत्। आदौ स्वायंभुवीयस्य दैत्यं घ्नन्नाहरच्छ्रुतीः। अन्ते तु चाक्षुषीयस्य कृपां सत्यव्रतेऽकरोत्' इत्यादीनि लघुभागवतामृततोऽवगन्तव्यानि ॥ १२ ॥

कूर्मावतारमाह। क्षीरोदधाविति। अमृतलब्धये अमृतलाभार्थम्, अमराः सुराश्च दानवा असुराश्च तेषां यूथपाः श्रेष्ठास्तेषाम् उन्मथ्नतां मन्थनं कुर्वतां सतां समुद्रमिति शेषः। क्षीरोदधौ क्षीरसागरे अतिभारेण मज्जन्तमिति शेषः। गोत्रं मन्दराचलम् आदिदेवः स भगवान् कच्छपवपुः धृतकूर्मतनुः भूत्वा पृष्ठेन पृष्ठभागेन विदधार धृतवान्। तदा अद्रेर्मन्दरस्य पारवर्त्तैः परिभ्रम एव कषाणः कर्षणं यस्यां तथाविधा कण्डूः कण्डूतिर्यस्य स तथोक्तः। कषाण इति दीर्घ आर्षः। एवंभूतः सन् निद्रया क्षण उत्सवो यस्य सः। यद्वा। निद्रायाः क्षणोऽवसरो यस्य सः आसीदिति शेषः। यथा केनचित्कस्यचित्पृष्ठादेः खर्जनादिना कण्डूत्यपनये समारब्धे स निद्राति तथायमपीति भावः। कूर्मस्यापि द्विःप्रादुर्भाव उक्तोऽस्ति लघुभागवतामृते। पाद्मे प्रोक्तं 'दध्रे क्षोणीमयमेवार्थितः सुरैः। शास्त्रान्तरे तु 'भूधारी कल्पादौ प्रकटोऽभवत्' एतट्टीका। पाद्मे इति। 'अयं पृष्ठधृतमन्दरः सुरैरर्थितोऽधस्तात् क्षोणीं दध्रे' इति पाद्ममतम्। शास्त्रान्तरे विष्णुधर्मोत्तरादौ तु कल्पादौ यो भूधारी कूर्मः स एव मन्दरं धर्तुं प्रकटोऽभूत्। एष पक्षः सुलग्नत्वादुत्तरत्वाच्च सिद्धान्तो बोध्य इति ॥ १३ ॥ नृसिंहावतारमाह। त्रैविष्टपेति। त्रिविष्टपे भवास्त्रैविष्टपा देवास्तेषां यत् उरु भयं दैत्येभ्यो जाता महती भीतिस्तद्धरतीत्येवं शीलम्। भ्रमन्त्या स्फुरन्त्या भ्रुकुट्या दंष्ट्राभ्यां च करालं भयंकरं वक्त्रं मुखं यस्मिंस्तत् नृसिंहरूपं कृत्वा धृत्वा हरिः आराद्दूरात् गदया सह आशु अभिपतन्तं स्वसमीपे समागच्छन्तं स्फुरन्तं करवालपरिभ्रामणमण्डलानि चरन्तं दैत्येन्द्रं हिरण्यकशिपुम् ऊरौ स्वकीयोरुप्रदेशे निपात्य पातयित्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नखैः विददार विदारितवान्। वक्षसीति शेषः। 'त्रैविष्टपोरुभयहासनृसिंहरूपम्' इति पाठे। त्रैविष्टपानामुरु भयं हन्तीति तथाभूतः स भगवान्। भ्रमद्भ्रुकुट्यादिविशेषणविशिष्टं नृसिंहरूपं कृत्वेत्यन्वयः॥ १४॥

हरिसंज्ञकावतारमाह। अन्तरिति द्वयेन। यूथपतिर्गजेन्द्रः 'यूथपोऽनेकपो द्विपः इत्यभिधानात्। सरसि सरोवरे तत्रापि अन्तस्तस्य मध्यमेऽगाधजलप्रदेशे उरुबलेनाधिकबलवता ग्रहेण मकरेण पदे गृहीतः तदा आर्त्तो दुःखितः अम्बुजहस्तः शुण्डागृहीतपद्मः सन् हे आदिपुरुष कारणपुरुष अखिलानां लोकानां नाथस्तत्संबुद्धितीर्थं तीर्थवद्विशुद्धिकरं श्रवः कीर्त्तिर्यस्य स तत्सम्बुद्धिः। हे पावनकीर्ते इत्यर्थः। श्रवणेनैव मङ्गलं कल्याणसंपादकं नामधेयं यस्य तत्संबुद्धिः त्वमस्माद्रक्ष इदम् आह॥ १५॥ श्रुत्वेति। श्रुत्वा गजेन्द्रस्य तद्वचनमाकर्ण्य तं गजेन्द्रं हरिः शरणार्थिनं ज्ञात्वा भगवान्, भवगच्छब्दवाच्यत्वमृष्यादीनामप्यस्ति ततो व्यावर्त्तयति। अप्रमेयः इयत्तारहितः अपरिच्छिन्नस्वरूपस्वभाव इत्यर्थः। अप्रमेयत्वमाकाशस्याप्यस्ति ततो व्यावर्त्तयति। चक्रायुधः धृतचक्रहेतिः चक्रधरत्वमन्येषां योद्धृणामप्यस्ति ततो व्यावर्त्तयति। पतगानां पक्षिणां राजा गरुडस्तस्य भुजयोरधिरूढः। भुजस्कन्धयोरतिसामीप्यादेवमुक्तम्। एवंभूतः सन् तदन्तिके आगत्य तस्माद्ग्राहात्। चक्रेण सुदर्शनेन। नक्रवदनं ग्राहस्य मुखं विनिपाट्य विदार्य गजं हस्ते शुण्डायां प्रगृह्य कृपया उज्जहार॥ १६॥ वामनावतारमाह। ज्यायानिति। अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिपतिरुरुक्रमो भगवान्। अवरजः विवस्वदाद्येकादशभ्यः कनीयान्सन्नपि गुणैः ज्यायानतिश्रेष्ठः भवतीति शेषः। यद्यतो हेतोः। अथ प्रतिश्रुतानन्तरमेव इमान् लोकान् विचक्रमे पादन्यासैः क्रान्तवान्। तत्र हेतुः बलेश्चक्रवर्त्तिनः सकाशात् क्ष्मां भूमिं त्रिपदस्य स्वत्रिपदपरिमितभूमियाचनस्य छलं कपटं यस्मिंस्तेन वामनेन वामनरूपेण जगृहे गृहीतवान्। ननु स्वयमीश्वरः सन् दुर्बलवत्किमिति तथा चक्रे तत्राह। पथि चरन् धर्ममार्गे वर्त्तमानो जनः प्रभुभिः समर्थैरपि याच्ञां ऋते याच्ञाचरणं विनेत्यर्थः। न चाल्य ऐश्वर्यान्न भ्रंशनीयः॥ १७॥

ननु तर्हि याच्ञाविधानेन यच्चालनं तदप्यनुचितमेवेत्याशङ्क्य भगवत्स्वरूपयथार्थप्रबोधवतो बलेर्लौकिकस्वीयैश्वर्यभ्रंश इष्ट एवेत्याह। नार्थ इति। अङ्ग हे नारद उरुक्रमस्य विस्तृतपादन्यासस्य हरेः पादशौचं चरणक्षालनोदकरूपा इत्यर्थः। आ अप इति छेदः। अपो जलानि आसमन्तात् शिखां शिखायां मूर्ध्नीत्यर्थः। धृतवतः दधानस्य शिखेति पाठे सप्तम्या आर्षो लुक्। बलेः विबुधाधिपत्यं विबुधानामधिपतिताप्राप्तिरूपं फलं यत् अयम् अर्थः न, सदृशं फलं नैवेत्यर्थः। एतदेवोपपादयति। यो बलिः प्रतिश्रुतं प्रतिज्ञातमर्थं ऋते विना अन्यत् न चिकीर्षत् वै। शुक्रेण वारितः तदनादरेण तेन शप्तः संश्रापि स्वकृतमन्यथा कर्त्तुं नैच्छदित्यर्थः। अडभाव आर्षः। किंतु। हरये आत्मानं तृतीयपादपूरणार्थं स्वदेहमपि शिरसा अभिमेने, भगवच्छेषभूतमात्मानं हरये समर्पितवान् इत्यर्थः। त्रिपदच्छलेन त्रैलोक्यं दत्तवतो बलेर्दानफलमिन्द्रपदावाप्तिरिति केचित्संगिरन्ते तदनेन निराकृतमिति भावः। अत्र लघुभागवतामृते तु 'वामनस्त्रिरभिव्यक्तिं कल्पेऽस्मिन् प्रतिपेदिवान्'। 'अस्मिन्ब्राह्मे कल्पे' इत्येतट्टीकायाम्। 'तत्रादौ दानवेन्द्रस्य बाष्कलेरध्वरं ययौ'। तत्र ब्राह्मकल्पे। 'आदौ स्वायंभुवीयेऽन्तरे'। इति एतट्टीकायाम्। 'ततो वैवस्वतीयेऽस्मिन् धुन्धोर्मखमसौ गतः'। अस्मिन्वर्त्तमाने वैवस्वतीयेऽन्तरे। धुन्धोरेतन्नाम्नोऽसुरस्य। यदुक्तं वामने। 'धुन्धोर्यज्ञं वरारोहे भगवान्मधुसूदनः। देहं वामनकं कृत्वा गत्वाऽयाचत्त्रिविष्टपम्' इत्येतट्टीकायाम्। 'अदितौ कश्यपाज्जातः सप्तमेऽस्य चतुर्युगे। प्रतिग्रहकृते जातास्त्रय एते त्रिविक्रमाः' इति। 'अस्य वैवस्वतीयस्य सप्तमे चतुर्युगे' इत्येतट्टीकायामिति॥ १८॥ हंसावतारमाह। तुभ्यमिति। हे नारद भृशमत्यन्तं विवृद्धभावेन प्रवृद्धस्नेहेन परिपृष्टस्त्वया साकल्येन संपृष्टः। परितुष्ट इति पाठे भृशं विवृद्धभावेन अत्युद्रिक्तया भक्त्या परितुष्टस्त्वयि प्रसन्नतां प्राप्तः भगवान्। हंसरूपेणेति शेषः। योगमनभिसंहितकर्मफलात्मककर्मयोगम्। आत्मसु प्रकृतिविविक्तात्मसु तत्त्वं याथात्म्यं तस्य दीपं दीपवत्प्रकाशकं भागवतं भगवदुपासनरूपं ज्ञानं च आत्मतत्त्वप्रकाशकं साधनसप्तकानुगृहीतं भगवदुपासनात्मकमवबोधमित्यर्थः। साधु यथा तथा तुभ्यम् उवाच। चकारात्सनकादिभ्योऽपि उवाचेत्यर्थः। आत्मसतत्त्वदीपमिति पाठे तत्त्वमेव सतत्त्वं आत्मनः सतत्त्वं तस्य दीपम् एतदाख्यानमेकादशे स्फुटं वक्ष्यति। यदेव हंसोक्तयोगादिकमेवेत्यर्थः। वासुदेवशरणाः 'बहूनां जन्मनामन्ते, इत्युक्तरीत्योपायत्वेन वासुदेवमेव शरणं गताः अञ्जसा सुखेन विदुः। हंसोक्तं ज्ञात्वा तथैवानुतिष्ठन्तीत्यर्थः॥ १९॥

तत्तन्मन्वन्तरावतारं तच्चरितं चाह। चक्रमिति। मनुवंशधरः मनोर्वंशस्य प्रतिपालकः सन्। मन्वन्तरेषु दशसु दिक्षु दिशासु अविहतमप्रतिहतमनभिभाव्यमिति यावत्। स्वतेजः स्वप्रतापोपबृंहितं चक्रम् आज्ञारूपं चक्रवदप्रतिहतप्रभावमित्यर्थः। बिभर्ति। किं च। दृप्तेषु गर्वितेषु दुष्टेष्विति पाठे दुर्जनेषु राजसु दमं दण्डं त्रिपृष्ठे तृतीयस्यां दिवि। सत्ये सत्यलोके च चरित्रैः स्वकीयशोभनचरितैः। उशतीं कमनीयां स्वकीर्तिम्। प्रथयन्विस्तारयन्सन् व्यदधात् व्यधत्त॥ २०॥ धन्वन्तर्यवतारमाह। धन्वन्तरिश्चेति। लोके स्वयमेव कीर्त्तिः। अनेनास्य कीर्त्यतिशय उक्तः। अमृतं मरणशून्यमायुर्यस्मात्सः भगवान् धन्वन्तरिः अवतीर्य धन्वन्तरिरूपेणाब्धेः प्रादुर्भूयेत्यर्थः। पुरुरुजां भूरिदुःखयुक्तानां महारोगग्रस्तानामिति यावत्। नृणां जनानां नाम्ना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वनामोच्चारणमात्रत एव रुजो रोगान् आशु तत्क्षणमेव हन्ति। रुद्धं पूर्वं दैत्यैः प्रतिषिद्धं यज्ञे भागं च अत्रापोपलेभे। आयुर्वेदम् आयुर्विषयमुपवेदं च अनुशास्ति। तत्प्रवर्त्तितायुर्वेदमार्गस्य विश्वस्मिन्विद्यमानत्वाद्वर्त्तमानार्थप्रयोगः। अत्र लघुभागवतामृते 'षष्ठे च सप्तमे चायं द्विराविर्भावमागतः। षष्ठेन्तरेऽब्धिमथनादुद्धृतामृतकमण्डलुः। उद्गतो द्विभुजः श्याम आयुर्वेदप्रवर्त्तकः। सप्तमे च तथारूपः काशिराजसुतोऽभवत्' इत्युक्तमस्ति 'षष्ठे चाक्षुषीये सप्तमे वैवस्वतीये' इति तट्टीकायाम् ॥ २१ ॥ परशुरामावतारमाह। क्षत्रमिति। विधिना दैवेन क्षयाय मृत्यवे उपभृतं संवर्द्धितं समर्पितमिति वा। ब्रह्मभ्यो ब्राह्मणेभ्यो द्रुह्यतीति ब्रह्मध्रुक् अतः उज्झितस्त्यक्तः पन्था वेदमार्गो येन तत्, अत एव नरकार्त्तिलिप्सु नारकं दुःखं लब्धुमिच्छु, अवनेः कण्टकं भूमेः कण्टकतुल्यं क्षत्रं क्षत्रियकुलं महात्मा धृतभार्गवरूपः असौ हरिः, उर्वी धारा यस्य स चासौ परश्वधश्च तेन दीर्घतीक्ष्णधारावता परशुना, त्रीन्वारानिति त्रिः, त्रिरावृत्ताः सप्त त्रिःसप्त, त्रिःसप्तवारानिति त्रिःसप्तकृत्वः। एकविंशतिवारानित्यर्थः। उग्रवीर्योऽसह्यवार्यः सन्नित्यर्थः। उद्धन्ति उत्पाटयति ॥ २२ ॥

दाशरथिरामावतारमाह। अस्मदिति। अस्माकं ब्रह्मादीनां प्रसादेऽनुग्रहे सुमुखः अस्मद्दत्तवराविरोधेनावतीर्ण इति भावः। कलेशः प्रकृतिपुरुषयोरधिपतिः कलया भरतादिरूपांशेन सह 'कला स्यादंशशिल्पयोः' इति हैमः। स हरिः इक्ष्वाकुवंशे इक्ष्वाकुकुले अवतीर्य प्रकटीभूय गुरोः दशरथस्य निदेशे आज्ञायां तिष्ठन् आज्ञां पालयन्नित्यर्थः। दयिता सीताख्या पत्नी च अनुजः लक्ष्मणाख्यः कनीयान् बन्धुश्च ताभ्यां सहितः सन् यो रामः वनम् आविवेश यस्मिन् रामे विरुद्धय, रामेण सह विरोधं कृत्वेत्यर्थः। दशकन्धरो रावणः आर्तिं नाशम् आच्छेत्संप्राप्तः ॥ २३ ॥ यस्मा इति। हरो रुद्रः तद्वत् सपदि शीघ्रम् अरिपुरं स्वशत्रो रावणस्य नगरीं दिधक्षोर्दग्धुमिच्छोः पुरा रुद्रो यथा स्वशत्रोस्त्रिपुरस्य पुरं दग्धुं समुत्सुकोऽभवत्तथात्मरिपो रावणस्य पुरीं दग्धुमुत्सुकाच्छ्रीरामादित्यर्थः। ऊढं प्राप्तं यद्भयं तेनाङ्गे वेपः कम्पो यस्य सः, दूरे दूरप्रदेशे वर्त्तमाना सुहृत्सीता यस्य तस्य रामस्य, मथितः सीतावियोगतया क्षुभितः यो रोषः क्रोधस्तेन सुशोणा रक्तवर्णा या दृष्टिः श्रीरामसंबन्धिनी दृक् तया, मकरा मत्स्याश्च उरगाः सर्पाश्च नक्रा ग्राहाश्च तेषां चक्रं समूहः तातप्यमानं पुनः पुनः पापच्यमानं मकरोरगनक्रचक्रं यस्मिन् सः उदधिः समुद्रः यस्मै श्रीरामाय मार्गम् अदात् दत्तवान् ॥ २४ ॥ वक्ष इति। किंच अधिसैन्ये स्वपरसैन्यमध्ये उच्चरत उत्कर्षयुक्ततया विचरतः दारहर्तुः स्वाङ्गनाहरणकर्तुः रावणस्य वक्षःस्थलस्पर्शेन वज्रसमस्य रावणस्य वक्षसः संस्पर्शेन रुग्णा भग्ना ये महेन्द्रस्य शक्रस्य वाहो वाहनरूप ऐरावतो गजस्तस्य दन्ताश्चत्वारोऽप रदास्तैः विडम्बिताः स्वधवलिम्ना धवलीकृताः याः ककुभो दिशस्तासां यो जयस्तेन रूढ उत्पन्नो यो हासः अहो मत्समोऽद्य कोऽन्योऽस्तीति गर्वस्तम्। कदाचित्संजातरावणेन्द्रसङ्ग्रामे इन्द्रेण रावणवक्षो भेत्तुं स्वीयश्चतुर्दन्तो गज ऐरावतनामा संनोदितस्तेन च तद्वक्षसि प्रहारे कृते तदीयाश्चत्वारोऽपि दन्ताश्चूर्णतां प्राप्तास्तानि दन्तचूर्णानि दिक्षु पतितानि तैर्दिशोऽपि धवलतया प्रकाशमाना आसंस्त-द्विलोक्य मत्समो जगति को योद्धास्तीत्युत्पन्नगर्वमित्यर्थः। धनुषः विस्फूर्जितैः धनुषो निःसृत्य विशेषतः स्फूर्तिं संप्राप्तैः शरैरित्यर्थः। यद्वा विस्फूर्जितैष्टङ्कारघोषैः असुभिः प्राणैः सह सद्यः शीघ्रं विनेष्यति अपनेष्यति। गर्वेण सह तत्प्राणानपनेष्य-तीत्यर्थः ॥ २५ ॥

कृष्णावतारमाह। भूमेरिति। सुरेतरा असुरा आसुरसंपत्त्या जाता राजान इति यावत्। तेषां वरूथैः सैन्यैः विमर्दिता भारेण पीडिता तस्याः भूमेः क्लेशव्ययाय दुःखविनाशनाय भारापहारं विधातुमित्यर्थः। जातः प्रादुर्भूतः कलया चातुर्येण सिता निबद्धाः कृष्णाः श्यामाः केशाः शिरोरुहा येन सः। अनेन रसिकशिरोऽवतंसत्वमस्योक्तम्। अत एव जनैः अनुपलक्ष्यः मार्गो गतिर्यस्य तथाभूतः संश्चापि आत्मनः स्वस्य महिमा महत्त्वम् उपनिबध्यते अभिव्यज्यते येषु तानि स्वमाहात्म्यप्रकाशकानीत्यर्थः। कर्माणि चरित्राणि करिष्यति। यद्वा। कलया भक्त्या सितः वशीकृत्य बद्ध इव स्वहृद्यास्थापितः कृष्णो येन तथाभूत हे नारद, केशः प्रजापतेर्मे स्वामी कृष्णः शेषं समानम्। कलधातोः कामधेनुवत्सकलार्थ दत्वाद्भक्त्यर्थ त्वम्। नन्वेवं सति तु विष्णुपुराणमहाभारतयोः प्रोक्तं सितकृष्णवर्णकेशप्रादुर्भावत्वं कथं सेत्स्यतीत्युच्यते चेद्यत्तत्र तथोक्तं तत्तु, न तत्केशमात्राव-ताराभिप्रायं किं तु भूभारावतारूपं कार्यं कियदेतद्यतो मत्केशावपि कर्त्तुं समर्थाविति द्योतनार्थं रामकेशवयोर्वर्णस्तवनार्थं च केशोद्धरणमिति गम्यते। अन्यथा तत्रैव पूर्वापरविरोधापत्तेः 'कृष्णस्तु भगवान् स्वयम्' इत्येतद्विरोधापत्तेश्च ॥ २६ ॥ कर्मणां परमेश्वरत्वप्रकाशकत्वमेव प्रपञ्चयति। तोकेनेति। तोकेन बालेन सता उलूकिकाया बक्याख्यशकुनीरूपायाः सत्या अपि जनवञ्चनार्थं परिधृतमनुष्यजातीयस्त्रीसमानवेषायाः पूतनायाः जीवहरणं यत् अतोऽप्यग्रे भविष्यति स्वे हरिकृष्णावतारे करिष्यमाणकोटरादिबालग्रहविद्रावणस्याप्येतदुपलक्षणं बोध्यम्। त्रैमासिकस्य च त्रिमासवयस्कस्यापि सतः पदा पादेन शकटः अपवृत्तः, यत्, शकटान्तः प्रविश्य स्वविनाशार्थागतमसुरं ज्ञात्वा पादेन शकटावर्त्तनं कृत्वा तेन तं प्रहृत्य तं तिराहित-वानिति यत्, हरिकृष्णाख्येऽतोऽप्यग्रे करिष्यमाणेऽवतारे त्रैमासिकेन स्वेन करिष्यमाणकालीदत्तापसर्पणस्यापीदमुपलक्षणम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रैमासिकेन श्रीहरिणा कृतं श्रीहरिजिघृत्सुकालीदत्तसंबन्धिकमेतच्चरितं श्रारामप्रतापात्संश्रुत्यात्र संनिवेशितमस्ति। रिङ्गता जानुभ्यां गच्छता, अन्तरगतेन मध्यं प्राप्तेन येन दिविस्पृशोरत्युच्चयोः अर्जुनयोः ककुभद्रुमयोः उन्मूलनं यत्तत्तु इतरथा अनीश्वरत्वे न भाव्यम् वै। इदमपि हरिकृष्णकरिष्यमाणमपसृत्य पुनरागतद्रुममध्यस्थितिघाताद्वारा कालीदत्तप्राणसमुन्मूलनं यत्तस्योपलक्षणम्। अवतारद्वयेऽपि सर्वथास्यानीश्वरत्वे त्वेतत्सर्वमनुपपन्नं स्यादिति भावः ॥ २७ ॥

यद्वा इति। किं च व्रजे वसन् विषतोयस्य विषान्वितजलस्य पीतं पानं येषां ते तान् व्रजपशून् पालांस्तु गोपालानपि अनुग्रहदृष्टिः कृपामृतदृष्टिः तस्याः वृष्टिर्वर्षणं तया अजीवयत् इति यत्, हरिकृष्णावतारेऽप्येतत्समानम्। यतोऽसुरजनसंपायितगरलतो निजाश्रितबहुजनानां रक्षणस्य विधास्यमानत्वात्। एतदपि मानसारामश्रीहरिमातुलास्याद्बहुवारं श्रुत्वा लिखितमस्ति। ह्रदिन्यां यमुनायां वै एव विहरन् सन् तच्छुद्धये ह्रदिन्या निर्विषत्वाय अत्यतिशयितं यद्विषं तदेव वीर्यं तेन विलोलाश्चञ्चला जिह्वा यस्य तम्। उरगं कालियाख्यसर्पम् उच्चाटयिष्यत्पलाययिष्यदिति यत् तदपीतरथा न भाव्यमित्यर्थः ॥ २८ ॥ तदिति। निशि रात्रौ निःशयानं स्वपन्तं कालियदमने यमुनातीरे इति शेषः। दावाग्निना वनवह्निना शुचिवने शुचिर्ग्रीष्मस्तत्संबन्धित्वेन शुष्कतोपेततृणादिमति कानने परिदह्यमाने समन्ततः प्रदग्धुमुपक्रान्ते सति अतो दावाग्नेर्हेतोः अवसितो निश्चितोऽन्तकालो यस्य तम्, व्रजं व्रजवासिजनं नेत्रे पिधाप्य पिहिते कारयित्वा मुञ्जाटव्यामिति शेषः। सबलः बलभद्रेण सहितः। अनधिगम्यं दुर्विज्ञेयं वीर्यं यस्य तथाभूतः सन् उन्नेष्यति अग्निं पीत्वा व्रजमुद्धरिष्यति यदित्यर्थः। तदपि कर्म दिव्यमिव। अमानुषमिवेति लौकिकोक्तिः ॥ २९ ॥ गृह्णीतेति। किं च अमुष्य श्रीकृष्णस्य माता यशोदा यत् यत् उपबध्यतेऽनेनेति उपबन्धं बन्धनसाधनमित्यर्थः। शुल्वं मुञ्जनिर्मितां रज्जुं गृह्णीत ग्रहीष्यति तत् तत् सुतस्य अमुष्य श्रीकृष्णस्य तु न माति, उदरे न पर्याप्तमित्यर्थः। किं च जृम्भतः मुखं व्यादायालस्यं परिहरतः अस्य कृष्णस्य वदने मुखे भुवनानि चतुर्दशापि भुवनानि संवीक्ष्य दृष्ट्वा गोपी यशोदा शङ्कितमनाः सभयमानसा सती पश्चात् प्रतिबोधिता ज्ञापितैश्वर्या आसीत् यत् तच्च कर्म दिव्यमिवेति पूर्वेणान्वयः ॥ ३० ॥

नन्दमिति। किं च वरुणस्य पाशात् भयात् वरुणभृत्यकृतपाशबन्धनजातभयादित्यर्थः। नन्दं स्वपितरं मोक्ष्यति मोचयिष्यति। मयसूनुना व्योमासुरेण बिलेषु पिहितांस्तिरोधायितान् गोपांश्च मोक्ष्यति। किं च अह्नि दिवसे अतिश्रमेण आप्तं व्यापारग्रस्तं निशि रात्रौ शयानम् अनेन वैकुण्ठप्राप्तिसाधनानुष्ठानाभावो दर्शितः। गोकुलं गोकुलवासिजनं दृष्ट्वा तेषु स्वात्मवृत्तिजनितकृपयेति शेषः। विकुण्ठे निरतिशयानन्दे नित्ये वैकुण्ठाख्ये लोके उपनेष्यति। तांस्तल्लोकं प्रापयिष्यतीत्यर्थः। स्मेत्याश्चर्ये ॥ ३१ ॥ गोपैरिति। गोपैः मखे इन्द्रयागे प्रतिहते निवारिते सति व्रजविलवाय जलौघप्रवर्षणेन गोष्ठविनाशं कर्तुमित्यर्थः। देवे पर्जन्याभिमानिनि देवेन्द्रे अभिवर्षति सति जलमिति प्रसिद्धत्वेन कर्माविवक्षा। कृपया हेतुना पशून् अस्योपलक्षणत्वाद्व्रजवासिन इत्यर्थः। रिरक्षुः रक्षितुमिच्छन् सप्तवर्षः सप्त वर्षाणि वयो यस्य तथाभूतः सन्नपि, अनघैककरे श्रमरहिते निजे एकस्मिन्करे। अनघेति नारदसंबोधनं वा। सलीलं लीलया सहितं यथा तथा महीध्रं गोवर्द्धनाद्रिं सप्तदिनानि सप्तदिनपर्यन्तम् उच्छिलीन्ध्रं छत्राकम् इव धर्त्ता धरिष्यति ॥ ३२ ॥ क्रीडन्निति। निशाकरश्चन्द्रस्तस्य रश्मिभिर्मयूखैः गौर्यत्युज्ज्वला तस्यां निशि रात्रौ रासोन्मुखः रासक्रीडाभिमुखः सन् वने क्रीडन्विहरन् कृष्णः कलानि मधुराणि पदानि यस्मिंस्तच्च तदायतं दीर्घं मूर्च्छितमालापविशेषयुक्तं गीतं तेन सप्तस्वरसमाहारवता गानेनेत्यर्थः। उद्दीपित उज्ज्वलितः स्मरः काम एव रुग्रोगो यासां तासाम्। व्रजं बिभ्रतीति व्रजभृतो गोपास्तेषां वध्वोऽङ्गनास्तासां गोपीनां हर्तुश्चोरयितुः धनदानुगस्य शङ्खचूडाख्यकुवेरभृत्यस्य शिरः हरिष्यति। इदमप्यस्य परमेश्वरत्वे घटते नान्यथेति भावः ॥ ३३ ॥ ये चेति ये वेति द्वयोरेकसंबन्धेन चरित्रान्तराणि समाहृत्य वदति। ये चेति। किं च ये, प्रलम्बो भाण्डीरक्रीडायां गोपरूपधरोऽसुरश्च, खरो धेनुकश्च, दर्दुरो बकश्च, केशी हयाकृत्यसुरश्च, अरिष्टो वृषाकृत्यसुरश्च, मल्लाश्चाणूरादयश्च, इभः कुवलयापीडः करी च, कंसश्च, यवनः कालयवनश्च, ते। कुजो भौमासुरश्च, पौण्ड्रको मिथ्यावासुदेवसंज्ञाप्रसिद्धश्च, तावाद्यौ येषां ते, ते अन्ये च, ये शाल्वश्च कपिर्द्विविदश्च बल्वलः वातापिभ्रातुरिल्वलस्य सुतश्च, दन्तवक्त्रश्च, सप्तोक्षाणः सप्तबलीवर्दाश्च, शम्बरोऽसुरश्च, विदूरथो दन्तवक्त्रबन्धुश्च, रुक्मी च, ते मुख्या येषां ते ॥ ३४ ॥

ये वेति। मृधे युद्धे ये वा येऽन्येऽपि, समितौ संग्रामे शालन्ते श्लाघन्ते इति समितिशालिनः। आत्तानि गृहीतानि चापानि धनूंषि यैस्ते, धृतविकटधन्वान इत्यर्थः। काम्बोजश्च, मत्स्यश्च, कुरवश्च, कैकयश्च, सृञ्जयश्च, ते आद्या येषां ते। अत्र काम्बोजादिशब्दैस्तत्तद्देशाधिपतयो बोध्याः। बलश्च भीमश्च पार्थश्च ते व्याजाः कपटयुक्ता आह्वया नामानि यस्य तेन हरिणा श्रीकृष्णेन एव हताः। बलभीमादिरूपेण स्वेन हरिणैव संहृता इत्यर्थः। यद्यपि प्रलम्बादयो बलभद्रेण हताः काम्बोजादयश्च भीमार्जुनादिभिः। शम्बरः प्रद्युम्नेन, यवनो मुचुकुन्देन तथापि हरिबलेन तैस्तेषां हतत्वाद्धरिहता इत्युच्यते इति ज्ञेयम्। तत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

येऽन्तकाले सद्भावा जाताः स्युः ते तु तदीयं निलयं तद्भावानुरूपं पदं यास्यन्ति। ये तदाप्यसद्भावोपेतास्ते तु अलमतिशयितम् अदर्शनं यास्यन्ति। एतच्च सर्वमपि कर्म दिव्यमिव तच्चान्यथा न भाव्यमिति पूर्वेणान्वयः। यद्वा। प्रलम्बादयः बलभीमपार्थव्याजाह्वयेन कृष्णेन अदर्शनं नाशं कालेन तन्निलयं च यास्यन्ति। हरिणा हरिनाम्ना भक्तिधर्मयोः पुनः प्रादुर्भूतेन कृष्णेन भक्तिभावेन ये संबन्धं प्राप्ता भविष्यन्ति ते तु सद्यः तदीयं हरिनाम्नः कृष्णस्य संबन्धि निलयं धाम यास्यन्ति 'अन्योऽपि धर्मरक्षायै देहः संभ्रियते मया। विरामायाप्यधर्मस्य काले प्रभवतः क्वचित्' इति दशमस्कन्धोक्तं तद्वचनमेव वराहद्वयादिवत् श्रीकृष्णावतारद्वैविध्यं वक्ति। ननु तत्र संभ्रियते इति वर्त्तमानप्रयोगः कथं संभविष्यति। भविष्यदर्थस्य प्रयोगस्य योग्यत्वादिति चेद्भाविकालङ्कारे भूतभाव्यार्थसाक्षात्कारवर्णने तथा दर्शनान्नैव दोषः। किं च भगवद्गीतायामपि 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः। न चैव न भविष्यामः सर्वे वयमतः परम्' इति वचनेन भङ्ग्यन्तरेण स्वीयपुनः प्रादुर्भावोक्तेश्च। पुनस्तत्रैव 'यदा यदा हि धर्मस्य' इत्यारभ्य 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युगे' इति वाक्ये हरिरूपेण पुनः स्वप्रादुर्भावकालस्य नातिदूरवर्त्तित्वाद्वर्त्तमानप्रयोगः। वर्त्तमानसामीप्ये भूते भविष्यति वर्त्तमानार्थप्रयोगघृते वैयाकरणसंमतत्वात्। 'अहं पश्यामि चैतस्य नाशकाल उपस्थितः' इत्याद्यभियुक्तवाक्ये भविष्यदर्थे वर्त्तमानप्रयोगदर्शनात्। कृष्णावतारद्वयप्रपञ्चो नित्यानन्दमुनिप्रणीतहरिदिग्विजयग्रन्थात्सविस्तरं बोध्यः॥ ३५॥ व्यासावतारमाह। कालेनेति। कालेन कालबलेन मीलिताः संकोचं प्राप्ता धियो येषां तेषां स्तोकमल्पमेवायुर्जीवितकालो येषां तेषां नृणां स्वनिगमः स्वकृतो वेदराशिः। बताहो दूरपारः दुर्गमः इति अवमृश्य विचार्य सत्यवत्याम् आविर्हित आविर्भूतः स हरिः अनुयुगं युगानुरूपं वेदद्रुमं वेदात्मकं सुरतरुं विटपशः शाखाभेदेन हि निश्चितमेव विभजिष्यति। विभक्तं करिष्यति। स्मेति प्रसिद्धौ। तुः पादपूरणे॥ ३६॥ बुद्धावतारमाह। देवद्विषामिति। निगमवर्त्मनि वैदिकमार्गे निष्ठितानां नितरां स्थितानाम्, मयेन मयनाम्नाऽसुरेण रचिताभिः कृताभिः अदृश्यपूर्भिरलक्ष्यवेगाभिः पूर्भिः पुरीभिः। लोकान् घ्नतां नाशयतां देवद्विषामसुराणाम्, मतिं विमोहयतीति मतिविमोहः मतिं प्रलोभयतीति मतिप्रलोभः स चासौ स च तम्। मतेर्विमोहो यस्मान् मतेः प्रलोभो यस्मात्स चासौ स चेति वा। तं वेषं पाखण्डवेषं विधाय विरचय्य, बह्वधिकं यथा भवति तथा औपधर्म्यं धर्माभासं पाखण्डधर्मं भाष्यते भाषिष्यते 'असौ व्यक्तः कलेरब्दसहस्रद्वितये गते' इति लघुभागवतामृते तत्प्रादुर्भावकाल उक्तोऽस्ति। गयाप्रान्तस्थे धर्मारण्यग्रामे॥ ३७॥ कल्क्यवतारमाह। यर्हीति। सतां सत्पुरुषाणाम् अपि आलयेषु गृहेषु यर्हि यदा हरेः कथाः न स्युः। द्विजजनास्त्रैवर्णिकाः पाखण्डिनः स्युः। वृषलाः शूद्राः नृदेवा राजानः स्युः। तथा यत्र येषु त्रैवर्णिकालयेषु स्वाहा स्वधा वषट् स्मशब्दश्चार्थे इत्येवंविधाः गिरो वाचः न स्युः। तत्र स्वाहा वषडिति द्वाभ्यां दैवं कर्मोपलक्ष्यते। स्वधेति पित्र्यं कर्म च। तदा युगान्ते कलियुगावसाने भगवान् कलेः शास्ता कल्किरूपेण शिक्षकः भविष्यति। यद्वा। भगवान् कलेः सकाशात् शास्ता जनानामिति शेषः। अत्र च ब्रह्मनारदसंवादात्प्राग्भाविनो वराहादयः, मन्वन्तरास्तु भूता भाविनश्च। धन्वन्तरिपरशुरामौ तात्कालिकौ श्रीरामादयस्तु भाविनः तत्र तु क्वचिद्भूतादिनिर्देश आर्ष इति द्रष्टव्यम्॥ ३८॥

सृष्ट्यादिकार्यभेदेन भगवतो विभूतीराह। सर्ग इति। तपः पूर्वजगत्पर्यालोचनम्। तपः प्रसिद्धं वा। अहं ब्रह्मा ये प्रजेशाः प्रजापतयः, नव ऋषयः मरीच्यादयश्च, एते सर्वे सर्गकर्मनिमित्तं पुरुशक्तिभाजो भगवतः मायाविभूतयः भगवन्नियाम्यवर्गाः। धर्मश्च, मखो यज्ञो विष्णारिति यावत् विष्णोरनन्यत्वात्तद्गतं पालनाऽनुरूपं सामर्थ्यं मखशब्देन विवक्षितम्। स च, मनवश्चतुर्दशापि ते च, अमराश्चतुर्दशापि इन्द्राश्च, अवनीशाः प्रियव्रतादयो नृपतयश्च, ते सर्वे स्थाने स्थितिकाले प्राप्ते पालनक्रियानिमित्तमित्यर्थः। पुरुशक्तिभाजः मायाविभूतयः। अधर्मश्च, हरो रुद्रश्च, मन्युवशाः क्रोधवशाः सर्पादयश्च, असुरा दैत्याश्च, ते आद्या येषां ते इमाः सर्वाः, अन्ते तु अन्तकाले संप्राप्ते संहारनिमित्तं त्वित्यर्थः। पुरुशक्तिभाजः मायाविभूतयः आश्चर्यरूपा विभूतय इत्यर्थः। सृष्टिपालनसंहारकालेषु स्वेच्छया विविधो भूत्वाऽस्मदादिषु स्थित्वा सृष्टिपालनसंहारान्करोतीति भावः॥३९॥ भगवदवतारांस्तच्चेष्टितानि च साकल्येनाऽभिधातुं न कोऽपि समर्थ इत्याह। विष्णोरिति। इह लोके यः कविर्बुद्धिमान् पुरुषः पार्थिवानि पृथिवीसंबन्धीनि रजांसि भूमिपरमाणून् विममे गणितवान् तादृशोऽपि कतमः नु को वा कविरित्यर्थः। विष्णोः सर्वाऽन्तरात्मनो भगवतः वीर्यगणनां प्रादुर्भावचरित्रसंख्यामित्यर्थः। विधातुम् अर्हति शक्नोति। नार्हतीत्यर्थः। यस्मात् त्रैविक्रमे, अस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेनेत्यर्थः। त्रयाणां गुणानां साम्यं त्रिसाम्यं माया तद्रूपं सदनमधिष्ठानं तदारभ्य ऊर्ध्वधिकं यथा तथा कम्पयानं बहुकम्पमानमित्यर्थः। त्रिपृष्ठं सत्यलोकं यः विष्णुः चस्कम्भ धृतवान्। एवंविधसर्वशक्तेरपरिच्छिन्नस्वरूपस्वभावस्य भगवतो वीर्याणि साकल्येन वर्णयितुं कः प्रभवेदित्यर्थः। 'चस्कम्भ यः स्वरभसा स्खलतांस्त्रिपृष्ठं यन्मां निशाम्य सदनादुरुकम्पमानात्' इति पाठे यो भगवान् स्वरभसा स्वपादविन्यासवेगेन ऊर्ध्वधिकं कम्पमानात् यत् यस्मात् सदनात्तत्तत्स्वनिवासस्थानात् स्खलतः पतमानान्प्राणिनः निशाम्य दृष्ट्वेत्यर्थः। तान् त्रिपृष्ठं सत्यलोकं मां च चस्कम्भ स्तंभयामासेति समन्वयः। तथा च मन्त्रः 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि। यस्त्रेधा विचक्रमाणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्तरं लोकमस्कम्भायत् सधस्थम्' इति । अस्यार्थः । विष्णोः तु वीर्याणि कं प्रवोचं कः प्रावोचदित्यर्थः । यः पार्थिवानि रजांसि अपि विममे सोऽपि । यो विष्णुः त्रेधा विचक्रमाणस्त्रिविक्रमं कुर्वन् उत्तरं लोकम् अस्कम्भायदवष्टब्धवानित्यर्थः । कथंभूतम् । सधस्थम् । सहस्य सधादेशः । तिष्ठन्तीति स्थाः तत्रस्थैर्देवैः सह वर्त्तमानमित्यर्थः ॥ ४० ॥ इत्थं भगवदवतारप्रयोजनान्युक्त्वा नाऽहं न यूयमिति पूर्वप्रस्तुतमुपसंहरति । नाऽन्तमिति । मायाबलस्य आश्चर्यरूपबलस्य । यद्वा । माया प्रकृत्याख्यपरिकरः बलं सेना यस्य स तस्य पुरुषस्य परमपुरुषस्य अन्तं स्वरूपस्वभावयोरवधिम् अहं चतुर्मुखः न विदामि । ते तव अग्रजाः अमी मुनयः सनकादयः न विदन्ति । तर्हि अपरे ये ते कुतः विदन्ति न जानीयुरेवेत्यर्थः । किं बहुना । दशशतानि सहस्रपरिमितानि आननानि मुखानि यस्य सः । आदिदेवः शेषः द्विसहस्रजिह्वः सन्नपीति भावः । यस्य गुणान् गायन् सन् अधुना अपि अस्य भगवतः पारं गुणविभूत्यैश्वर्याद्यन्तं न समवस्यति नाऽध्यवस्यति न प्राप्नोतीत्यर्थः ॥ ४१ ॥ नन्वविदितस्वरूपस्वभावावधित्वे कथं केवलतद्भजनेन मुच्येरन्नित्याशङ्क्याऽपरिच्छिन्नस्य वस्तुनोऽपरिच्छिन्नत्वेन ज्ञानं मुक्तिसाधनमेव, न तु अपरिच्छिन्नं परिच्छिन्नत्वेन जानतोऽज्ञानित्वात् । अतः परमात्मस्वरूपमपरिच्छिन्नत्वेन जानन्तो भजमाना मुच्यन्त एवेत्याह । येषामिति । निर्व्यलीकं निष्कपटं यथा तथा सर्वात्मना उपायोपेयत्वबुद्ध्या आश्रितपदः संश्रितपादः यदि भवेत तदा स एषः अनन्तः भगवान् येषां दययेत् ते भगवद्दयाविषयाः जनाः दुस्तरां तर्त्तुमशक्यां देवमायां विष्णोस्त्रिगुणात्मिकां प्रकृतिम् अतितरन्ति एव, निःशेषं तरिष्यन्तीत्यर्थः । चकारात्तत्स्वरूपस्वभावादिकमपि यथावस्थितत्वेन जानन्ति तेषां देहात्मभ्रमो निवर्त्तते इत्याह नैषामिति । एषां सर्वात्मना भगवन्तमाश्रितानां श्वानश्च शृगालाश्च तेषां भक्ष्ये भक्षणयोग्ये कलेवरे मम अहम् इति धीः अनात्मन्यात्मबुद्धिर्या, अस्वे स्वमिति या मतिः, इत्युक्ता बुद्धिरित्यर्थः न, न भवेदित्यर्थः ॥ ४२ ॥

कत्येवंविधा भगवत्प्रपन्नाः सन्तीत्यत आह । वेदेति । अङ्ग हे नारद अहं वेद जानामि । हि भगवन्तमिति शेषः । अतः परमस्य भगवतः योगमायां 'दैवी ह्येषा गुणमयी' इत्युक्तप्रकारां स्वदेहेन्द्रियादिरूपेण संयुज्यमानां विचित्रसर्गकरीं प्रकृतिमित्यर्थः । तरिष्यामीति शेषः । यूयं सनकाद्यभिप्रायेण बहुवचननिर्देशः । भगवान् भवो रुद्रश्च, अथ दैत्यवर्गः प्रह्लादः । मनोः पत्नी शतरूपा, सः मनुः स्वायंभुवश्च, तदात्मजाः प्रियव्रतादयश्च । बहुवचनेन तस्य कन्याश्च, प्राचीनबर्हिः प्राचीनबर्हिषो विसर्गलोपश्छान्दसः । ऋभुः देवविशेषः । उताऽथ अङ्गो वेनस्य पिता, ध्रुवश्च ॥ ४३ ॥ इक्ष्वाकुरिति । इक्ष्वाकुः, ऐलः पुरूरवाश्च, मुचुकुन्दश्च, विदेहो जनकश्च, गाधिश्च, रघुश्च, अम्बरीषश्च, सगरश्च, ते । गयश्च, नाहुषो ययातिश्च, तावाद्यौ येषां ते । मान्धाता च, अलर्कश्च, शतधनुश्च, अनुश्च, रन्तिदेवश्च, देवव्रतो भीष्मश्च, ते । शतधन्वनुरित्यत्र संधिरार्षः । देवव्रत इत्यत्र समाहारतः क्लीबत्वेऽपि पुंस्त्वमार्षम् । बलिः अमूर्त्तरयः दिलीपः ॥ ४४ ॥ सौभरीति । सौभरिश्च, उत्तङ्कश्च, शिबिश्च, देवलश्च, पिप्पलादश्च, ते । सारस्वतश्च, उद्धवश्च, पराशरश्च, भूरिषेणश्च, ते । विभीषणश्च, हनूमांश्च, उपेन्द्रदत्तः शुकश्च, ते । ये च अन्ये पार्थोऽर्जुनश्च, आर्ष्टिषेणश्च, विदुरश्च, श्रुतदेवश्च, ते वर्या मुख्या येषां ते ते ॥ ४५ ॥ ते वै इति । ये भवदादयः ते सर्वेऽपि विदन्ति । परमात्मानं जानन्ति । देवमायां देवस्य विष्णोर्नियाम्यां प्रकृतिं च अतितरन्ति । वै निश्चितम् । किं च भागवतसङ्गेन स्त्र्यादयोऽपि तरन्तीत्याह । अद्भुताः क्रमा पादन्यासा यस्य सोऽद्भुतक्रमस्त्रिविक्रमो भगवान् स एव परायणमुत्कृष्टं प्राप्यं प्रापकः आधारश्च येषां तेषां भागवतानां शीले शिक्षा वासना येषां ते तथाभूताः यदि भवेयुः तर्हि स्त्रियश्च, शूद्राश्च, हूणाश्च, शबराश्च, ते पापजीवाः अपि तं विदन्ति अतितरन्ति च । किं बहुना । भागवतसङ्गेन ये तिर्यग्जनाः तेऽपि अतितरन्ति । तदा शुभे भगवतो रूपे धारणा मनोनियमनं येषां ते । पाठान्तरे । श्रुतधारणाः शास्त्रार्थधारिणो ब्राह्मणादयः तरन्ति । तत्र किमु वक्तव्यं ते विदन्ति तरन्ति चेत्यर्थः ॥ ४६ ॥

ननु भवदादयो यत्स्वरूपं जानन्ति तत्स्वरूपं कीदृशमित्यपेक्षायां चिदचिद्विलक्षणत्वेन तत्स्वरूपं विशोध्य तस्य स्वरूपस्याजस्रानुचिन्तनपरायणानां स्वर्गप्राप्त्युपकरणत्यागोऽर्थत एवेत्याह युग्मेन । शश्वदिति । तद्वै इति । विशोकं दुःखेनासंपृक्तम् अजस्रसुखं नित्यानन्दमयं यत् पदं ब्रह्म इति विदुः 'सत्यं ज्ञानमनन्तम्' 'विज्ञानमानन्दम्' विशोको विजरः' इत्यादयो वेदान्ता आमनन्तीत्यर्थः । तदेव परमस्य पुंसः परमपुरुषस्येत्यर्थः । भगवतः पदं स्वरूपमित्यर्थः वै । ननु तत्पदं केवलं वेदान्तैनैव वेद्यमिति विशेषतः किमित्युच्यते । अनुमानादिप्रमाणान्तरैरपि तद्विषयत्वोपपत्तेः इति चेद्वेदान्तेतरप्रमाणैस्तदविषयत्वमेवेत्याह । माया जडात्मिका प्रकृतिः अभिमुखे तस्य सन्मुखप्रदेशे अवस्थातुमिति शेषः । विलज्जमाना च लज्जामुपगच्छति सत्येव परैति अपसरति, दृष्टिमार्गं विहाय वर्त्तते इत्यर्थः । मायाकार्याणि मनइन्द्रियादीनि तत्स्वरूपमवगन्तुमसमर्थानि भवन्तीत्येतदभिप्रायः । न केवलमस्यानुमानादिलौकिकप्रमाणाऽविषयत्वमेव । किं तु अलौकिकप्रमाणभूतो वेदैकदेशात्मकः पूर्वभागो यस्तस्याऽप्यविषयत्वमेवास्तीत्याह । शब्द इति, पुरुकारकवान् साध्यसाधनाद्यनेककारकान्वितः क्रियार्थः अग्निष्टोमाद्यनेकक्रियार्थप्रतिपादकः शब्दो वेदपूर्वभागोऽपि यत्र स्वरूपे न, साक्षाद्बोधकः सन्न प्रवर्त्तते इत्यर्थः । ननु जीवस्याऽपि स्वरूपमजरसुखरूपमेवाऽस्तीत्यत आह । आत्मतत्त्वम् आत्मनो जीवस्याऽप्यन्तः स्थितं तत्त्वरूपम् 'सत्यं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म इति वाक्यप्रत्यभिज्ञानेनाऽजस्रसुखस्याऽनन्तरत्वेन विशेषितत्वादपरिच्छिन्नदुःखासंभिन्ननित्यसुखस्वरूपत्वं परमात्मन एव स्वरूपमित्यर्थः। ननु जीववदस्याऽपि कर्माधानसुखदुःखसंबन्धः स्यादिति संप्राप्तां शङ्कां वारयति। शुद्धमिति, शुद्धमकर्मवश्यम् अत एव सदसतः चिदचिद्भ्यां सकाशात् परं विलक्षणम्। नन्वस्याऽकर्मवश्यता कुत इत्यत आह। सममिति, सममनेकरूपं चिदचिदन्तर्यामित्वेनाऽवस्थितस्याऽपि तत्तद्वस्तुगतदोषाऽसंस्पर्शादकर्मवश्यतोपेतमिति भावः। नन्वाम्रादिफलानां तत्तत्प्रदेशभेदेनाम्लमधुरादिरसवत्सुखापरपर्यायानुकूलज्ञानस्वरूपस्य ब्रह्मणः प्रदेशभेदेन जडरूपता स्यादित्याशङ्कां वारयति। प्रतिबोधमात्रमिति। प्रतिबोध एव प्रतिबोधमात्रम् मात्रचा काऽपि जडता नास्तीति तद्व्यावृत्तिः सूचिता। 'विज्ञानघन एव प्रज्ञानघन एव, इति श्रुतेः। मोक्षप्रदत्वमप्यस्याऽसाधारणो धर्म इत्याहाऽभयमिति। अभयं न विद्यते भयं यस्मात्तदभयं संसारनिवर्त्तकमित्यर्थः। तत्कुतः। शश्वत्सदा प्रशान्तम् अशनायापिपासाद्यूर्मिषट्करहितम्। अतः तदुपासकानामपि शान्तिसंपादकमिति भावः। 'परमं साम्यमुपैति' 'मम साधर्म्यमागताः' इति हि श्रुतिस्मृती। यतयः एवंभूतभगवत्स्वरूपचिन्तने प्रयतमानाः मुनयः, सह अञ्चतीति सध्र्यङ्। सहस्य सध्र्यादेशः। जीवसहचरं मन इत्यर्थः। यद्यत्र नियम्य उक्तस्वरूपे भगवति निश्चलं कृत्येत्यर्थः। कृत्यन्ते छिद्यन्ते अनेन संशया इति कर्त्तं ज्ञानम्। 'छिद्यन्ते सर्वसंशयाः' इति श्रुतेः 'कृती छेदने' तद्भिन्नमकर्त्तं स्वर्गादिफलसाधनं कर्मेत्यर्थः। तस्य हेतिं हेतिवदुपकरणमित्यर्थः। जह्युः त्यजन्तीत्यर्थः। तत्र दृष्टान्तः। स्वराट् वर्षप्रदः इन्द्रः। नितरां पिबन्त्यस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनं कुद्दालहेपुकादिकं तदिव स्वर्गाद्यर्थाऽनुष्ठानोपकरणमर्थादेव त्यजन्तीत्यर्थः॥ ४७-४८॥

ननु स्वर्गादिफलेप्सूनां तत्साधनोपकरणोपादानमावश्यकमित्यत आह। सश्रेयसामिति। अस्य देहिनः भावा ब्राह्मणादिवर्णरूपा ब्रह्मचर्याद्याश्रमरूपाश्च तेषां स्वभावेनाऽनुगुण्येन विहितस्य सतः कर्मणः प्रसिद्धिः फलसिद्धिः, यतः सकाशात् जायते, सः भगवान् श्रेयसां स्वर्गादिफलानाम् अपि विभुः प्रभुः तत्फलप्रदातेत्यर्थः। अन्तर्यामितयाऽवस्थितस्य परमात्मन एव स्वर्गाद्यर्थं कर्मस्वपि प्रवर्त्तकत्वात्तदाराध्यत्वात्तत्फलप्रदत्वाच्च तद्भजनेनैवेप्सितस्वर्गादिफलस्याऽपि सिद्धेः। कामिभिरपि स एव भजनीय इत्यर्थः। भगवतः सर्वान्तर्यामित्वे शरीरभूतचेतनाऽचेतनगतदोषसंस्पर्श इत्याशङ्कायामाह। देह इति, स्वधातुविगमे स्वधातूनां स्वदेहारम्भकाणां भूतसूक्ष्माणां विगमो वियोगस्तस्मिन्सति अनु पश्चात् देहे विशीर्यमाणे सति तत्र तस्मिन्नवस्थितः पुरुषः परमपुरुषः व्योम गगनम् इव न विशीर्यते विशीर्णतां न प्राप्नोति। कुतः। यतः अजः कर्माधीनोत्पत्त्यादिशून्यः। अत्र देहशब्दश्चेतनस्याऽपि प्रदर्शनार्थः। तेन चिदचिद्गतदोषास्पृष्ट इत्यर्थः॥ ४९॥ अध्यायत्रयार्थमुपसंहरति। सोऽयमिति। हे तात नारद सोऽयं पूर्वप्रतिपादिताकारः विश्वभावनः सकलविश्वैककारणभूतः भगवान् ज्ञानशक्तिबलैश्वर्यादिसंपन्नः श्रीवासुदेवः समासेन संग्रहेण ते तुभ्यम् अभिहितः मयेति शेषः। संग्रहमेवाह। यत् सदसत् चिदचिदात्मकं वस्तु अन्यदतदात्मकमिव अज्ञानां भातीति शेषः। तथापि अन्यस्माच्चिदचिद्भ्यो विलक्षणात् हरेः, न च अतदात्मकं नैवेत्यर्थः॥ ५०॥ स्वोक्तसंग्रहस्य प्रामाणिकत्वं कथयंस्त्वमप्येतत्प्रवर्त्तयेत्याह। इदमिति। विभूतीनां भगवतोऽवताररूपविभूतीनाम् अयं संग्रहः इति यत् इदं भागवतं नाम भगवद्विषयत्वाद्भगवता प्रोक्तत्वाद्वा भागवतनामकं मे मह्यं भगवता उदितम्। एतद्भागवतं त्वं विपुलीकुरु॥ ५१॥

वैपुल्यप्रकारमाह। यथेति। सर्वात्मनि सर्वान्तरात्मनि अत एव अखिलाधारे सर्वैकाधारभूते भगवति परमेश्वरे हरौ श्रीहरिकृष्णभगवति नृणां भक्तिः यथा भविष्यति यादृशवर्णनविधानेन नृणां हरौ सम्यग्भगवद्भक्त्युदयः स्यादित्यर्थः। इति तथैवेत्यर्थः। संकल्प्य श्रीहरिमूर्त्तिध्यानपूर्वकं संकल्पं कृत्वेत्यर्थः। वर्णय वर्णनेनैतद्विपुलतां समाचरेत्यर्थः॥ ५२॥ ननु त्रिवर्गे यथा नृणां रुचिर्भवेत्तथा। वर्णयेति किं नोच्यते इत्यत आह। नृजन्मनीति। नृजन्मनि मनुष्यजन्मनि कृतेन त्रिवर्गसंसाधककर्मणा भगवान् न तुष्येत यदि प्रसन्नो न स्याच्चेदित्यर्थः। तर्हि नश्वरैर्विनाशिभिः, धर्मार्थकामैः धर्मादिप्रापककर्मभिः किं कार्यं सिद्ध्यति, न किमपि प्रयोजनं सिद्ध्यतीत्यर्थः॥ ५३॥ धर्मस्य ह्यपवर्ग्यस्येति पूर्वोक्तरीत्या परस्परं भगवद्भक्तावुपयुज्यमानानामेव साफल्यम्, केवलानां तु तेषां वैफल्यमित्येतदन्वयव्यतिरेकाभ्यामाह। कृष्णे इति। उत्तमः श्लोकः स्तवो यस्य स तस्मिन्, कृष्णे अधोक्षजापरसंज्ञे श्रीकृष्णपरमात्मनि अनपायिन्यव्यभिचारिणी भक्तिः न च, नैव भवेच्चेदित्यर्थः। तर्हि कृतैः सम्यक् निष्पादितैः। वर्णाश्चाश्रमाश्च तेषां य आचारो धर्मः स च, दानानि च, होमश्च, ते आदयो येषां तैः किं स्यात्। न किमपि सिद्ध्यतीत्यर्थः॥ ५४॥ भगवद्विभूतिवर्णनादीनां फलमाह। मायामिति। अमुष्य पूर्ववर्णितस्य ईश्वरस्य मायां प्रकृतिं जगत्सृष्ट्यादिप्रकाररूपामित्यर्थः। वर्णयतः अनुमोदितुश्च श्रद्धया नित्यं शृण्वतश्च आत्मा मनोन्तःकरणमिति यावत्। मायया मायाया गुणैस्तमआदिभिः न मुह्यति मोहं न प्राप्नोतीत्यर्थः॥ ५५॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे सप्तमोऽध्यायः॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथाष्टमोऽध्यायः

राजोवाच

ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च । यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ॥ १ ॥

आक्षिपन्देहसंबन्धमष्टमे त्वीशजीवयोः । बुभुत्सितान्पुराणार्थान् बहून् पप्रच्छ भूपतिः ॥ १ ॥

यत् 'त्वमेतद्विपुलीकुरु' इत्युक्तं तदेव विपुलीकरणं राजा पृच्छति । ब्रह्मणेति । हे ब्रह्मन् हे शुक देवदर्शनः परमात्ममूर्त्यखण्डदर्शी नारदश्च देवर्षिरपि ब्रह्मणा चतुर्मुखेन, अगुणस्य स्वस्वरूपे प्रकृतिजन्यसत्त्वादिगुणवर्जितस्य भगवतः गुणाख्याने दिव्यगुणसंकथने चोदितः संप्रवर्तितः सन् यस्मै यस्मै पृच्छते जनाय यथा येन प्रकारेण प्राह भगवत्तत्त्वं कथयामास ॥ १ ॥ एतदिति । हे वेदविदांवर हे सकलनिगमार्थज्ञजनश्रेष्ठ एतन्नारदेन विस्तरेण वर्णितं परमात्मस्वरूपरहस्यम् अहं वेदितुं सम्यग्बोद्धुम् इच्छामि । तत्तस्मात्कारणात् त्वं वेदविदांवरो भवान् अद्भुतं श्रोतृवक्तृजनाश्चर्यकरं वीर्यं प्रभावस्तेजो बलादिकं वा यस्य तस्य हरेः, लोकानां सुशोभनं मङ्गलं याभिस्ताः कथाः कथयस्व । एतदुत्तरश्लोकादनुषञ्जनीयम् ॥ २ ॥ कथयस्वेति । हे महाभाग अखण्डभगवद्ध्यानबुद्धिमन् अखिलानां सर्वेषामात्माऽन्तर्यामी तस्मिन् कृष्णे आनन्दैकभुवि श्रीवासुदेवे यथा मनः, निःसङ्गं तदितरासक्तिवर्जितं सत् निवेश्याऽऽसज्य कलेवरं देहं त्यक्ष्ये हास्यामि । भगवतः कथाः संशृण्वानस्तमेव देहावसाने संस्मरन् शरीरम् त्यक्ष्याम्यतस्तत्कथा एव कथयस्वेति स्वप्रयत्नो दर्शित इत्यर्थः । इति त्रयाणामेकसंबन्धः ॥ ३ ॥

नन्वल्पकालं विहितेन भगवत्कथाश्रवणेन केन प्रकारेणावसाने स्मृतिः संपद्येतेत्यत्राह । शृण्वत इति । भगवान् षडैश्वर्यादिसंपन्नः श्रीकृष्णः स्वचेष्टितं स्वकीयदिव्यादिव्यचरित्रं नित्यं प्रतिदिनमहर्निशं वा श्रद्धया विश्वासपूर्वत्वरया शृण्वत आकर्णयतः वक्तरि सतीति शेषः । गृणतः कथयतश्च श्रोतरि सतीति शेषः । पुंसः हृदि हृदयपद्मे । नाऽतिदीर्घेण अल्पेनाऽपि कालेन विशते प्रविशति स्वकृतप्रयत्नं विनापि परमकारुणिको भगवान् स्वयमेव तस्याऽन्तर्निविशतीत्यर्थः ॥ ४ ॥ भगवत्कृततद्धृदयप्रवेशसंभूतफलमाह । प्रविष्ट इति । कर्णरन्ध्रेण कर्णशष्कुलीछिद्रेण कथाश्रवणद्वारेति शेषः । स्वानां स्वभक्तजनानां भावसरोरुहं हृदयकमलम् अभिप्रायपर्यायस्य भावस्य हृदयेऽवस्थानादाधाराधेययोरेकत्वकल्पनयाऽत्र भावशब्दो हृदयरूपार्थको बोध्यः । प्रविष्टः कृष्णः सलिलस्य जलस्य शमलमाविलतारूपं मलं शरच्छरत्कालः यथा, तथा रागादिरूपं भक्तस्य हृदयशमलं धुनोति नाशयति । शरदृष्टान्तस्याऽत्राऽयं भावः । कतकफलादिद्रव्यान्तरप्रक्षेपादिना घटादिस्थे जले शोधिते केवलं तदेव शुद्धिं प्राप्नोति, न तु नदीतडागादिगतम्, कुम्भस्थः स मलोऽपि कुम्भस्यान्त एव तिष्ठति, न तु सर्वथा विनाशं गच्छति । ततस्तस्य किंचिच्चलनेन क्षुब्धं सत्पुनराविलं जायते । एवं तपोदानादिरूपं विहितं प्रायश्चित्तं न सर्वथा सर्वं पापं धुनोति । किं त्ववशेषतासहितमेव, तदपि कस्यचिदेव, किंचिदेव । कृष्णस्तु स्वीयहृद्गतमात्रः सन्नेव सर्वेषां स्वभक्तानां पापं निःशेषं हरतीति ॥ ५ ॥ ततश्च तस्य कृतार्थीभवनरूपं फलमाह । धौतात्मेति । धौतो भगवदन्तःप्रवेशेन शुद्धतां प्राप्त आत्मा मनो यस्य सः निष्पाप इत्यर्थः । पुरुषो भगवद्भक्तः, मुक्ताः परित्यक्ताः सर्वे परिक्लेशा रागद्वेषादयो येन स तथाभूतः सन्, पान्थः प्रवासादागत्य गृहं प्राप्तो जनः, मुक्तसर्वपरिक्लेशः परिहृताऽध्वभवनानाविधपरिक्लेशः सन्नित्यर्थः । स्वशरणं निजगृहं यथा न मुञ्चति, तथाकृष्णपादमूलं स्वपरित्राणकारकं श्रीकृष्णाङ्घ्रिमूलं न मुञ्चति । किं तु सर्वकालं तदेवैकं स्मरतीति भावः ॥ ६ ॥

एवं भगवत्कथाश्रवणोऽत्युत्कण्ठतामुद्भाव्य स्वाऽविदितानर्थान् क्रमेण वक्ष्यमाणस्तावत्संदिग्धार्थान् पृच्छति । यदिति । हे ब्रह्मन् अधातुमतः स्वरूपत एव प्रकृतिजन्यभौतिकशरीरवर्जितस्य अस्य जीवस्य यत् यः देहारम्भः शरीरोपलम्भः धातुभिर्महाभूतैरेव स्यात् । 'धातुर्वातादिशब्दादिगैरिकादित्वगादिषु । महाभूतेष्विन्द्रियेषु शब्दयोनिस्वभावयोः' इत्यभिधानम् । अधातुमतोऽस्य शरीरलब्धिर्धातुभिरेव भवेदिति तु ज्ञातमस्त्येवेत्यर्थः । इदं त्वत्र संशयविषयमस्तीत्याह । स च देहारम्भः यदृच्छया निर्हेतुकः किम् । वा अथवा हेतुना स सहेतुकोऽस्ति किं वेत्यर्थः । एतत् भवन्तः यथा यथावदेव जानते; अतः कथयन्त्विति शेषः ॥ ७ ॥ योऽसावीश्वरः सोऽपि जीवदेहतुल्यदेहवान् कथितोऽस्त्यतो जीवादीश्वरस्य को वा विशेषः, यदि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेषो नास्तीत्युच्यते तदा तद्भजनात्कथं सर्वत्र मोक्ष इत्युच्यते इत्यभिप्रायेण पृच्छति। आसीदिति सार्द्धेन। लोकानां संस्थानं विन्यासो यस्मिंस्तत्तदेव लक्षणं यस्य तत् पद्मम् यदुदरात् यस्य जठरतः आसीत्। जगदाकारं पद्मं यस्योदरस्थनाभितो बभूवेत्यर्थः। असावेवंविधो वैराजपुरुषोऽपि, पृथक् विभक्तैः पृथक्त्वात्मकविभागवद्भिरित्यर्थः। इयत्तावयवैः परिमिततोपेतकरचरणाद्यवयवैः, अयं जीवसंज्ञः पुरुषः लौकिकः पुमानित्यर्थः। यावत्प्रमाणः यत्संख्याकावयवयुक्त इत्यर्थः। प्रोक्तोऽस्ति वै। तावान् संस्थावयवान् इव, तावत्संस्थाकावयवोपेत इवेत्यर्थः। इत्येवं प्रोक्तः। यथापरिच्छिन्नाऽवयवयुक्तो जीवस्तथा परिच्छिन्नाऽवयव इवेश्वरोऽपि कथितोऽस्तीति भावः। स्वसंस्थावयवानिवेति पाठे स्वसंस्थानभूतैरवयवैरन् जीवन्नयं संसारी जीव इवेत्यर्थो बोध्यः। अन्निति तज्जलानितिवत् ज्ञेयम्। अतो जीवेश्वरयोर्विशेषः कथनीय इति तात्पर्यार्थः॥ ८॥ 'आसीद्यदुदरात्पद्मम्' इत्युक्तभगवद्दर्शनप्रकारं तदवस्थितिप्रदेशं च जिज्ञासमानोऽवश्यं तद्विशेषो वाच्य इत्यन्यदपि पृच्छति। अज इति। भूतात्मा महाभूतारब्धदेहः। यद्वा। व्यष्टिभूतानां नियन्ता नाभिपद्मसमुद्भवः समष्ट्यभिमानिवैराजनाभिकमलसंभूतः। अजश्चतुर्मुखो विधिः, यदनुग्रहात् अनिरुद्धरूपस्य यस्य वैराजस्याऽनुग्रहतः भूतानि व्यष्टिभूतानि सृजति। येन वैराजाऽनुगृहीतेनाजेन। तद्रूपमनिरुद्धस्वरूपं ददृशे व्यलोकि॥ ९॥

स इति। स्थितिश्च उद्भवश्च, अप्ययश्च, विश्वस्य स्थित्युद्भवाप्यया यस्मात्तथाभूतः। मायेशः मायाख्यस्वशक्तेर्नियन्ता पुरुषः, सर्वदा पुरुषाकृतिः, स भगवान् आत्ममायां जगत्सर्गादिप्रवृत्तस्वप्रकृतिं मुक्त्वा अतीत्य अपि जगद्व्यापारादुपरतः सन्नपीत्यर्थः। सर्वगुणाश्रयः पूर्णषाड्गुण्यः संश्च यत्र यस्मिन्देशे शेते वसति एतदादिप्रश्नानां तत्त्वतोऽर्हस्युदाहर्तुमिति सर्वान्ते क्रियायाः संबन्धः अत्र तं देशं कथयेति वा योजना॥ १०॥ पुनरपीदानीं श्रुतार्थमेवाऽनुवदन् 'यस्येहावयवैर्लोकान्कल्पयन्ति' इति 'पातालमेतस्य हि पादमूलम्' इति चोभयथाऽप्यनुपपत्तिं मन्वान आशङ्कते। पुरुषावयवैर्वैराजपुरुषावयवैः सपालाः सेश्वराः लोकाः पातालादयः पूर्वकल्पिताः, पूर्वस्मिन्कल्पे कल्पिताः प्रथमं सृष्टा वा इदानीं तथा शुश्रुम इत्याह। सपालैर्दिक्पालसहितैः लोकैः अमुष्य पुरुषस्य अवयवाः कल्पिताः इति शुश्रुमः। एवं सति 'धाता यथा पूर्वमकल्पयत्' इति श्रुतिविरोध इत्यभिप्रायः। एवं संदेहविपर्ययाभ्यां प्रश्नः॥ ११॥ इदानीमज्ञातान्बहूनर्थान् पृच्छति। यावानित्यादिना। कल्पः महाकल्पः यावान् यत्परिमाणकः, विकल्पोऽवान्तरकल्परूपः कालविभागः यावान्वा। भूतः भव्यः भवन् इति शब्दो यस्मिन्सः अतीतानागतवर्त्तमानाख्य इत्यर्थः। कालः यथा अनुमीयते ग्रहाणां संचरणादिना यथाऽनुमितिविषयतां नीयते। सतः कार्यस्य स्थूलदेहाभिमानिदेवपितृमनुष्यादेरित्यर्थः। यत् आयुर्मानमायुषः परिमाणं च तदपि॥ १२॥ कालस्येति। हे द्विजसत्तम कालस्य अण्वी निमेषादिसूक्ष्मरूपा बृहती अपि संवत्सराद्यात्मिका स्थूलरूपापि या अनुगतिः प्रवृत्तिः लक्ष्यते सा च। यावन्त्यः यावत्संख्याकाः यादृश्यः यत्प्रकारकाः कर्मगतयः कृतकर्मतः प्राप्यानि फलानि स्थानानि वा ताश्च॥ १३॥ यस्मिन्निति। हे द्विजसत्तम यस्मिन् देशे कर्मसमवायः। जीवैः कृतानि कर्माणि परोक्षीभवन्ति सन्त्यपि यत्र प्रदेशे फलनिष्पत्तिं प्राप्य तिष्ठन्ति स देश इत्यर्थः। येन देवादिभावं प्राप्तेन जीवेन यथा येन प्रकारेण उपगृह्यते यादृशं कर्मफलं प्राप्यते इत्यर्थः। तच्च गुणानां सत्वादीनां गुणिनां सत्वादिगुणवतां च परिणामः परिणामहेतुत्ताम्। तत्र गुणानां परिणामहेतुर्यः सः गुणिनां परिणामो देवादिशरीरपरिग्रहणे यो वा हेतुः स हेतुश्च, सविस्तरम् एव विस्तारेण सहितो यथा स्यात्तथैवेत्यर्थः॥ १४॥

भ्विति। भूः पृथ्वी च, पातालं च, ककुभो दिशश्च, व्योमाकाशं च, ग्रहा आदित्यादयश्च, नक्षत्राण्यश्विन्यादीनि च, भूभृतः पर्वताश्च, तेषाम्। तत्र पातालमुपलक्षणं स्वेतरषण्णामपि भूविवराणां सरितो नद्यश्च, समुद्राः क्षारोदादयश्च, द्वीपा जम्ब्वादयश्च, तेषाम् एतानि भ्वादीनि ओकांसि निवासस्थानानि येषां तेषां प्राणिनां च संभव उत्पत्तिप्रकारः। यथा तेषां संभवः स चापीत्यर्थः॥ १५॥ प्रमाणमिति। अण्डकोशस्य ब्रह्माण्डस्य बाह्याभ्यन्तरवस्तुनः तद्बाह्याभ्यन्तरवर्त्तिवस्तुनश्च प्रमाणम् अण्डाद्बाह्यं वस्तु त्वावरणादिकम्, आभ्यन्तरं वस्तु तु चतुर्दशलोकादिकम्। महतां भागवतानाम् अनुचरितं चरित्रं च, वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्यादीनां च विनिश्चयः तत्तत्स्वभावेन निर्द्धारः स च॥ १६॥ अवतारेति। यत् हरेः आश्चर्यतममत्याश्चार्यसहितम् अवतारानुचरितं तच्च। यान्याश्चार्यकराणि श्रीहरेश्चारित्राणि तान्यपीत्यर्थः। युगानि कृतादियुगस्वरूपमित्यर्थः। युगमानं युगानां परिमाणं युगे युगे प्रतियुगं चः धर्मः स च॥ १७॥ नृणामिति। नृणां मनुष्याणां यः साधारणः धर्मः मनुष्यमात्रस्य सामान्यतया पालनीयो यो वृषः, सविशेषः वर्णाश्रमविशेषनिबन्धनरूपः यः धर्मः, श्रेणीनां तत्तद्व्यवहारोपजीविनां प्राणिनां यः धर्मः व्यवहारनियमलक्षणः, राजर्षीणां प्रजापालनाधिकारनिष्ठानां क्षत्रियाणां यः धर्मः, कृच्छ्रेष्वापत्सु जीविनां च यः धर्मः स च॥ १८॥ तत्त्वानामिति। तत्त्वानां परिसंख्यानं प्रकृत्यादिसर्वतत्त्वानां या परिसंख्येत्यर्थः। लक्षणं तत्स्वरूपम्, हेतुलक्षणं हेतुत्वेन लक्षणं च तेषां तत्तत्कार्यहेतुत्वेन लक्षणं चेत्यर्थः। पुरुषाराधनविधिः। परमपुरुषाराधनप्रकारः, आध्यात्मिकस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकृतिविविक्तात्मस्वरूपविषयस्य योगस्य ज्ञानयोगस्य यः प्रकारः स इति शेषः ॥ १९ ॥ योगेश्वरेति। योगेश्वराणामैश्वर्याणि अणिमादीनि तेषां या गतिः स्वरूपं सा, योगिनां संशीलिताष्टाङ्गयोगानां लिङ्गभङ्गः सूक्ष्मशरीरपातः। वेदा ऋग्वेदादयश्च, उपवेदा आयुर्वेदादयश्च, धर्मो धर्मशास्त्राणि च तेषाम्, इतिहासो महाभारतं च, पुराणं ब्राह्मादि च तयोः, स्वरूपमिति शेषः ॥ २० ॥

संप्लव इति। सर्वभूतानां संप्लवोऽवान्तरः प्रलयः। यद्वा। संप्लवः सम्यगुद्भवः विक्रमो विविधक्रमः स्थितिरिति यावत्। प्रतिसंक्रमः संहारः महाप्रलय इति यावत्। इष्टं वैदिकं कर्म तेन सहितं पूर्तं स्मार्त्तं कर्म तस्य, काम्यानां कारीर्यादीनां वैदिककर्मणां त्रिवर्गस्य धर्मार्थकामलक्षणस्य च यः विधिः प्रकारः, तत्रेष्टं कर्म 'हिंस्रं द्रव्यमयं काम्यम्' इत्यादिना सप्तमस्कन्धे संप्रदर्शितमस्ति। पूर्तं तु 'वापीकूपतडागादि देवतायतनानि च। अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते' इति स्मृत्युक्तलक्षणं बोध्यम् ॥ २१ ॥ यश्चेति। अनुशायिनां भुक्तशेषकर्मणा सह परलोकभ्रष्टानां यः सर्गः समुत्पत्तिप्रकारश्च। पाखण्डस्य विधर्मादि-पञ्चविधतया प्रसिद्धेषूपधर्मस्य संभवश्चोत्पत्तिप्रकारः, आत्मनो जीवस्य बन्धमोक्षौ बन्धनस्य मोक्षस्य च यः प्रकारः, स्वरूपतः व्यवस्थानं च, मुक्तिदशायामवस्थानस्य यः प्रकार इत्यर्थः ॥ २२ ॥ यथेति। आत्मतन्त्रः स्वतन्त्रः विभुः सर्वान्तरात्मा भगवान् श्रीहरिः आत्ममायया स्वनियाम्यया प्रकृत्या यथा विक्रीडति मायां विसृज्य यथा साक्षिवत्तद्द्रष्टृवत् उदास्ते प्रलये उदासीनस्तिष्ठति ॥ २३ ॥ सर्वमिति। एतत् सर्वं 'यदधातुमत' इत्यत आरभ्य 'उदास्ते साक्षिवद्विभुः' इत्यन्तं प्रथमान्तनिर्दिष्टं सकलं प्रश्नजातमित्यर्थः। चकारादपृष्टं गुह्यमपि यत्तच्च पृच्छते प्रपन्नाय च मे मह्यं हे महामते हे भगवन् तत्त्वतो यथार्थतः अनुपूर्वशस्तत्तत्प्रसङ्गानुक्रमेण उदाहर्त्तुमितिहासं पुरस्कृत्य कथयितुम् अर्हसि त्वं योग्यो भवसि। अत्र भगवन्निति महामते इति च विशेषणद्वयं प्रश्नोत्तरप्रदानार्हताद्योतकम्, तत्र 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' इति भगवल्लक्षणं त्रैकालिकवस्तुयाथात्म्यज्ञानवत्त्वं महामतित्वं च ॥ २४ ॥ योग्यतामुपपादयति। अत्रेति। अत्र मत्पृष्टेष्वर्थेषु आत्मभूः परमात्मनः सकाशात्संजातः परमेष्ठी ब्रह्मा यथा प्रमाणं तथा भगवानैश्वर्योपेतो भवानपि प्रमाणं सम्यक् ज्ञाता। अत्रार्थे भवानपि परमेष्ठीवदेव सम्यक् ज्ञाता इत्यर्थः। यतो ब्रह्मनारदव्यासक्रमेण संप्रदायोऽप्यस्तीत्याह। परे चेति पूर्वेषां चाऽपि पूर्वजैः कृतं परे अर्वाञ्चो जनाः इह लोके अनुतिष्ठन्ति सर्वपूर्वेषां मरीच्यादीनामपि पूर्वजैर्ब्रह्मादिभिः कृतं शास्त्रार्थ-मर्वाचीनाः जनाः समाश्रयन्तीत्यर्थः ॥ २५ ॥

नन्वनशनतो द्विजशापतश्चात्याकुलस्य तव कुतो विस्तृतार्थश्रवणं स्यात्तत्राह। न म इति। हे ब्रह्मन् अच्युतपीयूषं भगवत्कथामृतं पिबतः मे मम अमी असवः प्राणाः अनशनात् कुपितद्विजात्, कोपं प्राप्य द्विजेन प्रेरितात्तक्ष-कादित्यर्थः। अनशनतक्षकदंशस्मृतिं प्राप्येति भावः। न परायन्ति न व्याकुलीभवन्तीत्यर्थः। अन्यत्र भगवत्कथामृतपान-मनाचरतः सतस्त्वित्यर्थः। परायन्ति। अयं भावः। यावदच्युतकथामृतपानं करोमि, तावदनशनद्विजकोपाभ्यां कृत्वा ममासुव्याकुलता न भवति। कथामृतपानादन्यत्र त्वसुव्याकुलता जायते अतो ममासुव्याकुलतानिवृत्तये यावद्देहपातमविच्छेदेन कथामृतपानमेव सर्वथा विधापयेति ॥ २६ ॥ मुनिसंसदि राज्ञा पृष्टः शुकः किं प्रावोचदिति शौनकादीनां मुनीनां मानसीं शङ्कां परिहरतः सूतस्य वाक्यमाह। स इति। इतीत्थं सत्पतेर्भागवतपरमहंसैकनाथस्य भगवतः कथायां राज्ञा विष्णुरातेन विष्णुना संरक्षितेन परीक्षिन्नृपतिनेत्यर्थः। उपामन्त्रितः संप्रवर्तितः सः प्रसिद्धः ब्रह्मविषयकं ज्ञानं रातीति ब्रह्मरातः शुकः संसदि महासभायां भृशं प्रीतः सन् ॥ २७ ॥ प्राहेति। ब्रह्मसंमितं वेदतुल्यम्। यद्वा। ब्रह्म ब्रह्मात्मकं श्रीकृष्णस्वरूपं सम्यक् मितं प्रमाणविषयतां नीतं येन तत् ब्रह्मकल्पे त्रिंशत्कल्पानां मध्ये ब्राह्माख्ये कल्पे उपागते सृष्ट्युपक्रमे समायाते सति इत्यर्थः। ब्रह्मणे चतुर्मुखाय विधये भगवत्प्रोक्तं स्वयं भगवता स्वमुखेनाभिहितमित्यर्थः। भागवतं नाम भागवतमिति संज्ञया प्रसिद्धमित्यर्थः। पुराणं प्राह कथयामासेति द्वयोरेकाऽन्वयः ॥ २८ ॥ यद्यदिति। पाण्डूनां पाण्डुकुलोत्पन्नानाम ऋषभः श्रेष्ठः परीक्षित नृपः यत् यत् अनुपृच्छति अन्वपृच्छत्। सर्वं तत्तत्प्रश्नप्रतिसूचनम् आनुपूर्व्येण प्रस्तावक्रमेण न तु प्रश्नक्रमेणेत्यर्थः। आख्यातुं भागवताख्यानेन प्रश्नानामुत्तरं कर्त्तुम् उपक्रान्तवान् ॥ २९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-
यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥

—:❀:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ नवमोऽध्यायः

श्रीशुक उवाच

आत्ममायामृते राजन्परस्यानुभवात्मनः । न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा ॥ १ ॥

हरिणा ब्रह्मणे प्रोक्तं पुनर्भागवतं शुकः । नवमे कथयामास नृपप्रश्नोत्तरं ब्रुवन् ॥ १ ॥

अथ नृपतिकृतानामनुयोगानां प्रतिवचनं गदितुं भागवताख्यानं समारप्स्यमाणः' प्रथमतः संसारिणो जीवस्यायं देहारम्भः सहेतुको निर्हेतुको वेति प्रश्नस्य, जीववतुल्यदेहपरिमाणावयवत्वेनेश्वरस्यापि वैराजस्य जीवतुल्यत्वात्तत्प्रयुक्ताभजनीयत्वाच्चामोक्षप्रदत्वप्रश्नस्य, आत्ममायां मुक्त्वा यत्र शेते तं देशं च कथयस्वेति प्रश्नस्य चोत्तरं करिष्यन्नादौ सहेतुकत्वनिर्हेतुकत्वप्रश्नोत्तरं ब्रुवन्, परमैश्वर्यविशिष्टस्य भगवतः कालमाययोर्वश्यत्वाभावं वक्तुं जीवाख्यसंसारिचेतनवर्गस्य कालमायावश्यत्वमाह। आत्मेति। हे राजन्। अनुभवो ज्ञानं तदेवात्मा स्वरूपं यस्य तस्य अत एव परस्य देहाद्यचेतनवर्गेभ्यो विलक्षणस्य जीवस्य अर्थसंबन्धः भोग्यभूतशब्दादिविषयेषु भोक्तृतया संबन्धः। आत्ममायां परमात्मनियम्यप्रकृतिम् ऋते विना अञ्जसा तत्त्वतः सामीचीन्येनेति यावत्। न घटेत न संगच्छेत। कथमिव। स्वप्नद्रष्टुः इव यथा 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति, अथ रथान्, रथयोगान्, पथः सृजते कामं कामं पुरुषो निर्मिमाण' इति श्रुत्युक्तेः। स्वप्नद्रष्टुर्जीवस्य रथादिपदार्थसंबन्धस्तत्तदर्थप्रदर्शने संप्रवृत्तस्य भगवतो मायां विना नोपपद्यते। तद्वत् ज्ञानरूपस्य स्वरूपतो मायातः परस्याप्ययास्यमर्थसंबन्ध इत्यर्थः। अनादिकालतो भगवदिच्छातो जगत्सर्गादिसंप्रवृत्तभगवद्वश्यप्रकृतेरनादिसंबन्धवतः प्रकृतितिरोहितज्ञानात्मगुणस्य जीवस्याज्ञानात्मकप्रकृतितिरोहितपररूपत्वात्प्राकृतेष्वर्थेषु भोग्यताबुद्धिरित्युक्तं भवति। एवं च सति प्रकृत्या तिरोहितस्वीयपररूपत्वमेवास्य देहारम्भहेतुरिति भावः। अनेनास्य देहसंबन्धस्याहेतुकत्वं निरस्तमिति बोध्यम् ॥ १ ॥ उक्तार्थमेव स्फुटबोधाय पुनर्विवेचयति। बह्विति। बहुरूपया विचित्रतया परिणामभाजा मायया भगवतो मायात्मिकया शक्त्या बहुरूपः इव आभाति। भगवन्मायाऽनादिकालतस्तिरोहितज्ञानधर्मोऽप्याधाराधेयतया धर्मात्मकात्मज्ञानस्य स्वरूपात्मकात्मज्ञानस्य चैक्याद्भगवन्मायातिरोहितज्ञानस्वरूपतयोक्तो जीवः देवमनुष्याद्याकारानात्मन्यारोप्य बहुरूप इवाभातीत्यर्थः। अस्या मायायाः गुणेषु सत्त्वादिगुणकार्येषु शब्दादिषु रममाणः शब्दादीन् भुञ्जानः सन्नेवेत्यर्थः। मम इति अहम् इति मन्यते। ममेदं कलत्रपुत्रादिरित्यहं देवमनुष्यादिरिति चाहंकारममकाराभ्यां निबद्धो भवतीत्यर्थः ॥ २ ॥

पूर्वाध्याये द्वाविंशे श्लोके 'व्यवस्थानं स्वरूपत' इति जीवविषयप्रश्नान्तरस्याप्युत्तरं जीवप्रस्तावाद्वदन् साक्षाद्भगवद्भक्त्या स्वस्वरूपसाक्षात्कारे सति स्वस्य शब्दादिषु जातप्रावण्यस्य निवृत्तिरित्याह। यर्हीति। अयं जीवः यर्हि वा यदैव मुक्ताविति शेषः। कालमाययोः अपादानाऽविवक्षायां संबन्धसामान्ये षष्ठी। कालमायाभ्यामित्यर्थः। परस्मिन् कालमायाकार्यासंस्पृष्टे इत्यर्थः। स्वे आत्मीये भगवदैकान्तिकभक्तिविधानसंजाततत्तादात्म्यतया श्रुत्यात्मीयत्वेनाभिहिते इत्यर्थः। महिम्नि अपहतपाप्मत्वादिसत्यसंकल्पपर्यन्तगुणाष्टकाविर्भावलक्षणे महत्त्वे रमेत क्रीडेत। कालमायापरत्वरूपे महत्त्वे तत्र वर्तेतेत्यर्थः। तदा उभये प्रकृतिकालवश्यत्वं त्यक्त्वा गतसंमोहो निवृत्ताहंकारममकारः सन् उदास्ते। शब्दादिषु भोग्यत्वबुद्धितया तत्संपादनसिद्ध्यर्थकप्रवृत्तिशून्यो भवतीत्यर्थः। अनेनाविर्भूतगुणाष्टकविशिष्टत्वे नावस्थितिरेव स्वरूपतोऽवस्थानम्। एवंविधस्वरूपस्थितिमतोऽपि निजात्मन आत्मभूतनिरतिशयानन्दपरब्रह्मानुभवः परब्रह्मशरीरभूतत्वेन स्वात्मानुभवो वा। शब्दादिविषयप्रावण्यनिवर्त्तक इति च कथितं भवति ॥ ३ ॥ यत्तूक्तं भगवतोऽपि जीववद्देहसंबन्धाविशेषात्कथं तद्भजनेन मुक्तिरिति तस्योत्तरं कालमायावश्यजीवस्य कर्माधीनः प्राकृतो देहः ईश्वरस्य त्वप्राकृतस्वेच्छोपात्तदिव्यदेहवत्त्वम् ततस्तद्भजनान्मोक्षोपपत्तिरित्येवं कथयिष्यन्कालमायावश्यजीवविलक्षणेश्वरस्वरूपविशोधनं केन प्रकारेण ज्ञायते इत्यत्राह। आत्मतत्त्वेति। अव्यलीकं निर्दोषं यद्व्रतं तपोभक्तिप्रभृतिकं तेन आदृत आराधितः भगवान् ब्रह्मणे चतुर्मुखाय रूपमप्राकृतस्वीयमूर्त्ति दर्शयन् आत्मतत्त्वं जीवविलक्षणपरमात्मयाथात्म्यं तस्य विशुद्ध्यर्थं विशोधनार्थं निर्दोषत्वेन निश्चयार्थमिति यावत्। ऋतं सत्यं यथार्थमित्यर्थः। यद्वचनमाह तत्कथयिष्यामीति शेषः ॥ ४ ॥ आत्मतत्त्वविशुद्धिकरं भगवत्कथितमेवोपपादयितुमितिहासं प्रस्तावयति। स इति। जगतां व्यष्ट्यात्मकप्राणिनां पर उत्तमः प्रभुरिति यावत्। गुरुर्धर्मोपदेष्टा च। आदिदेव-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्चतुर्मुखो विधिः। स्वधिष्ण्यं स्वोद्भवहेतुभूतभगवन्नाभिपद्मरूपं स्थानम् आस्थायाधिष्ठाय स्वाधारभूतपद्माधारस्वरूपान्वेषणाय पूर्वं जले निमज्ज्य तदलब्ध्वा पश्चात्परावृत्य तत्र स्वधिष्ण्ये स्थित्वेत्यर्थः। सिसृक्षया स्रष्टुमिच्छया जगत्सर्गं कर्तुमिच्छन् सन्नित्यर्थः। ऐक्षत् स्वस्वान्ते समपश्यत्, मया जगत्कथं स्रष्टव्यमित्यालोचितवानित्यर्थः। स एवमीक्षमाणो ब्रह्मा यया दृष्ट्या प्रपञ्चस्य जगतो निर्माणं रचना तस्य विधिः प्रकारः भवेद्विदितः स्यात, तां पूर्वकल्पे इव प्रसिद्धाम्। अत्रास्मिन्प्रपञ्चनिर्माण-विधौ संमतां योग्यां दृशं प्रज्ञां न अध्यगच्छत् न प्राप्तवान्॥ ५॥

ततः किं वृत्तं तत्राह। स चिन्तयन्निति। चिन्तयन् जगत्सर्गबुद्धिप्राप्त्युपायमन्तर्ध्यायन् विभुः स ब्रह्मा एकदा कदाचित् द्विर्गदितं द्विवारमुक्तं व्यक्षरं द्विवर्णात्मकं वचः अम्भसि जले उपाश्रृणोत्। स्वसमीपे एव श्रुतवान्। ते द्वे अक्षरे दर्शयति। स्पर्शाः कादयो मावसानास्तेषु यत् अक्षरं षोडशं तकाराख्यवर्णात्मकम्, यच्च एकविंशं पकाराख्यवर्णात्मकम्, तद्रूपं वच इत्यर्थः। तस्य वचसः स्फुटतया निर्देशार्थं तस्यार्थमाह। हे नृप यत्तयेति वचः निष्किंचनानां त्यक्तधनानां परमहंसा-नामिति यावत। धनं विदुर्वदंति। येन ते तपोधना इति प्रसिद्धा अभवन्निति भावः। तद्वचः उपाश्रृणोत्। तस्य च द्विवार-मुक्तत्वात्तप तपेति लोण्मध्यमपुरुषैकवचनं तद्वीप्सा त्वादरातिशयार्था॥ ६॥ निशम्येति। निशम्य तप तपेति तद्वचः श्रुत्वेत्यर्थः। तस्य वचसो यो वक्ता तस्य दिदृक्षा द्रष्टुमिच्छा तया, दिशो दशाप्याशाः विलोक्य ऊर्ध्वीभूय समीक्षणं कृत्वेत्यर्थः। तत्र तासु दिक्षु अन्यत्पद्मेतरद्वस्तु अपश्यमानो न समीक्षमाणः सन्नेव पुनः स्वधिष्ण्यमभ्युत्थानविधानात्प्राक्त्वेनाधिष्ठितं यत्स्थानं तत आस्थायाध्यास्य तपसि तपश्चरणनिमित्तम् उपादिष्टः केनचित्प्रत्यक्षनियुक्तः इव तद्वचः हितमात्मनो हितकारकं विमृश्य विचार्य मनश्चित्तम् आदधे तपसि धृतवान्॥ ७॥ दिव्यमिति। ततश्च स ब्रह्मा अखिला समग्रा ये लोकास्तेषां तापनं प्रकाशनं यस्मात्तथाभूतं दिव्यं सहस्राब्दं देवमानेन सहस्रवर्षपर्यन्तमित्यर्थः। त्रिशताधिकषष्टिदिनैर्मानुषमेकवर्षम्, तच्च देवानामेकं दिनम्, तथाविधषष्ट्यधिकत्रिशतदिनैर्देवानामेकं वर्षम्' एवंविधदेवसहस्रवर्षस्य मानुषवर्षसंख्या त्रिलक्षाधिक-षष्टिसहस्रवर्षपरिमिता संपन्ना। तावत्कालपर्यन्तमिति स्थूलगणनया बोध्यम्। तपः अतप्यत तपश्चकारेत्यर्थः। तं ब्रह्माणं विशिनष्टि। तपतां तपश्चरतां मध्ये तपीयान् अतिशयिततपःसंयुक्तः। अमोघं स्वेन आचरणीये तपस्यव्यर्थं दर्शनं संकल्परूपं ज्ञानं यस्य सः। अनिलः प्राणवायुश्च आत्मा मनश्च जितौ तौ येन सः। विजितप्राणो विजितमनाश्चेत्यर्थः। त्रिजितानि उभयेन्द्रियाणि ज्ञानकर्मेन्द्रियात्मकानि हृषीकाणि येन सः। समाहित एकाग्रमनाश्च स्मेति प्रसिद्धौ॥ ८॥

इदानीं 'स चापि यत्र पुरुष' इति प्रश्नं परिहरति। तस्मा इति। सभाजितस्तपसा सम्यगाराधितः भगवान् यद्यस्मात परम् उत्कृष्टं न नैवास्ति। अत एव परं श्रुत्या सर्वेभ्यः श्रेष्ठत्वेनोक्तं तथाभूतं 'परः श्रेष्ठारिदूरान्योत्तरे क्लीबं तु केवले' इति मेदिनी। स्वलोकं वैकुण्ठाख्यं तस्मै चतुर्मुखाय संदर्शयामास। तमेव लोकमनुवर्णयति पञ्चभिः। क्लेशा अविद्यास्मितराग-द्वेषाभिनिवेशाः। एतेषां लक्षणानि पातञ्जलयोगसूत्रीयद्वितीयपादादवगन्तव्यानि। विमोहः स्वपरभेदः साध्वसं भयम्, व्यपेता नित्यनिवृत्ताः संक्लेशादयो यस्मात्तम्, स्वदृष्टवद्भिः स्वशरीरकं परमात्मानमेकाग्रनिरीक्षणतयानुभवद्भिः। विबुधैः विशेषेण बुध्यन्ते इति विबुधा ज्ञानाधिका नित्यमुक्ताश्च तैः। अधिष्ठितं समाश्रितम्॥ ९॥ सांप्रतं तत्र क्लेशमोहाद्यभावमाह। प्रवर्त्तते इति। यत्र वैकुण्ठाख्ये लोके रजो रजोगुणः, तमस्तमोगुणः, तयोस्ताभ्यामित्यर्थः। मिश्रं तदुभयसंपर्कवदित्यथः। सत्त्वं सत्त्वगुणश्च न प्रवर्त्तते। कालविक्रमश्च न। परिणामहेतुर्यः कालस्य पराक्रमः सोऽपि यत्र नास्तीत्यर्थः। यत्र लोके माया न, सत्त्वरजस्तमोगुणानामाधाररूपा प्रकृतिरपि यत्र न भवतीत्यर्थः। अपरे प्रकृतिजातसत्त्वादिगुणजाता रागलोभादयः किमुत। तत्र न सन्तीति किमु वक्तव्यम्। अनेन तस्य लोकस्य मायाकल्पितत्वशङ्का निरस्ता। तर्ह्ययं शून्यागारसदृश इति चेत्तत्राह। हरेरिति। यत्र लोके सुरा देवेन्द्रादयोऽदितिजाश्च, असुरा हिरण्यकशिप्वात्मजादयो दितिजाश्च तैरर्चिताः। सुपूजिताः हरेः अनुव्रता उपासकाः। दृश्यन्ते इति शेषः। तस्माच्छुद्धसत्त्वमयः स लोकोऽस्तीति भावः॥ १०॥ ननु तत्र ते हर्यनुव्रताः कथंभूता दृश्यन्ते इत्यपेक्षायां तेषां भगवत्सारूप्यमाह। श्यामेत्यादिसार्द्धेन। श्यामा मेचकवर्णाश्च तेऽवदाता उज्ज्वलाश्च श्यामावदाताः। कृष्णवर्णं त्विषाऽकृष्णमित्युक्तभगवत्स्वरूपसारूप्यभाक्त्वादुक्तविधा इत्यर्थः। शतपत्रे पद्मदले इव आयते लोचने ईक्षणे येषां ते। पिशङ्गे पीते वस्त्रे परिधानीयप्रावरणीये वाससी येषां ते। पीताम्बरधरा इत्यर्थः। सुशोभनाः सुतरां वा रुचो दीप्तयो येषां ते प्रकृष्टदीप्तिमन्त इत्यर्थः। अथवा सुरुचः कमनीयाः। सुष्ठु पेशः सौन्दर्यं येषां ते अतिसुकुमार-शरीरा वा। उन्मिषन्तो दीप्यमानाः मणयो येषु तानि प्रवेकानि श्रेष्ठानि निष्कानि कनकमयानि आभरणानि कटककटिसूत्र-प्रभृतीनि येषां ते। सुवर्चसोऽतिलावण्यवन्तः। सर्वे चतुर्बाहवश्च प्रवालवद्वैदूर्यवन्मृणालवद्वर्चो वर्णः प्रभावो येषां ते। कुण्डलानि कर्णवेष्टनानि च मौलयो मुकुटानि च, माला मौक्तिकादिस्रजश्च, परिस्फुरन्त्यस्ता येषां सन्तीति तथाभूताः। अत्र माला-शब्दादिनिरार्षः। अत इति तपरकरणात्॥ ११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं पार्षदाननुवर्ण्य पुनरपि लोकमनुवर्णयति । भ्राजिष्णुभिरिति । भ्राजिष्णुभिर्देदीप्यमानाभिः महात्मनां नित्यमुक्तानां लसन्ति प्रकाशमानानि यानि विमानानि तेषामावलयः पङ्क्तयस्ताभिः यः लोकः परितः समंततः विराजते संशोभते । प्रमदोत्तमानामुत्तमवनितानां या दिवः कान्तयस्ताभिः, विद्युत्तडितस्ताभिः सह वर्त्तमानाः सविद्युतो या अभ्राणां घनानामावलयः श्रेणयस्ताभिः नभः यथा आकाशं यद्वत्तद्वदित्यर्थः । विद्योतमानो विराजमानः भवति । तत्र विद्युत इवाङ्गनाः, अभ्रावलय इव विमानानि, नभ इव वैकुण्ठलोकः ॥ १२ ॥ श्रीरिति । यत्र यस्मिन् लोके रूपिणी नित्यं सुरूपयुक्ता श्रीः विभूतिष्वाद्या स्वयं महालक्ष्मीः, उरुगायः स्वयं साक्षाद्भगवांस्तस्य पादावङ्घ्री तयोः मानमर्चनं विभूतिभिर्भूलीलादिभिः सह बहुधा पञ्चरात्रोक्तानेकप्रकारैः करोति । कथंभूतोरुगायमानं करोतीत्याकाङ्क्षायां तां विशिनष्टि । या श्रीः प्रेङ्खं दोलां 'दोला प्रेङ्खः पुमान्प्रेङ्खे' इति रत्नकोशे । प्रेङ्खः स्त्रीपुंसयोः । श्रिता भगवत्पदचर्चनक्रियातो निवृत्ता सत्याश्रिता, कुसुमाकरो वसन्तस्तस्यानुगाः कीरपरभृद्भ्रमरादयस्तैः । विगीयमाना विविधं यथा भवति तथा गीयमाना 'मातर्धन्यासि त्वं यदनन्यलभ्यां भगवतः सेवां करोषि' इति शुकादिच्छद्मना ब्रह्मादिभिः कृतस्तवेति भावः । स्वयं तु प्रियकर्म प्राणप्रियस्य भगवतश्चरित्राणि गायती भवति ॥ १३ ॥ ददर्शेति । तत्र य एवंभूतो लोकोऽस्ति तस्मिन् श्रियो महालक्ष्म्याः पतिं महापुरुषं भगवन्तं ददर्श । श्रीपतिं विशिनष्टि । यज्ञपतिं तपःप्रभृतिमखानां प्रवर्त्तकम् आराध्यं फलप्रदं चेत्यर्थः । जगत्पतिं चिदचिदात्मकस्य जगतोऽद्वितीयं स्वामिनमित्यर्थः । अखिलाः सकलाः सात्वन्तः सात्वच्छब्दवाच्यपञ्चरात्रोक्तधर्मनिष्ठा भक्तजनास्तेषां पतिं स्वामिनम्, स्वकीयलोकसंप्रापणेन रक्षणकर्त्तारमित्यर्थः । सात्वच्छब्दः पञ्चरात्रार्थको भारते नारायणीयाख्याने प्रसिद्धोऽस्ति । सुनन्दश्च, नन्दश्च, प्रबलश्च, अर्हणश्च, ते आदयो येषां तैः, स्वे आत्मीया ये पार्षदाः परिचारकास्तेषु मुख्याः श्रेष्ठास्तैः परिसेवितं परितः कृतसंसेवनं 'विभुं सर्वगतं सर्वात्मानमित्यर्थः । 'विभुः सर्वगते पत्यौ चन्द्रे रविकुबेरयोः' इति कोशात् ॥ १४ ॥

भृत्येति । भृत्येषु स्वसेवकेषु यः प्रसादः प्रसन्नता अनुग्रह इति यावत्तस्मिन्नभिमुखं संमुखोभूत्वावस्थितम्, दृशोर्नेत्रयोरासवोऽमृतं यस्य तम् । यद्वा । दृगासवमिव यस्य तम् अमृतदेशीयकटाक्षवन्तमित्यर्थः । प्रसन्नो हासो यस्मिन् अरुणे लोचने यस्मिन् तथाभूतमाननं यस्य तम् । किरीटिनमुत्तमाङ्गधृतमुकुटम् । कुण्डलिनं श्रवणद्वयविधृतकर्णवेष्टनम् । चतुर्भुजं भुजचतुष्टययुक्तम् । पीताम्बरं हरितालवर्णवासोयुगलधारिणम् । वक्षसि हृदये श्रिया लक्षितमलंकृतम् ॥ १५ ॥ अभ्यर्हणीयेति । अभ्यर्हणीयं पूजनीयं यदासनं तत् आस्थितमाक्रम्याधिष्ठितं परं विभुत्वादत्युत्कृष्टं चतुःषोडशपञ्चशक्तिभिः । पञ्चविंशतितत्त्वाधिष्ठातृशक्तिभिरित्यर्थः । वृतम्, तत्र चतस्रः प्रकृतिपुरुषमहदहंकाररूपाः । षोडश एकादशेन्द्रियपञ्चमहाभूताख्याः । पञ्च तन्मात्राख्या बोध्याः । अनेन द्वादशस्कन्धस्थितास्त्रभूषणाध्यायोक्तप्रकारः स्मारित इति भावः । स्वैः शरीरभूतैः स्वस्मिन्स्वाभाविकैर्वा, इतरत्र च कर्मतारतम्यवत्सु संसारिषु त्वित्यर्थः । अध्रुवैः अनित्यैः भगवदुपासनानुगुणं भगवद्भक्तेषु नित्यवत्प्रतीयमानत्वेऽपि देशकालानुरोधेनोपासनाविरहे तददर्शनात्तदितरेष्वस्थिरैरिति भावः । भगैरैश्वर्यधर्मयशःश्रीज्ञानवैराग्याधिष्ठातृदेवताविशेषैः युक्तम्, स्वे धामन् धाम्नि एव रममाणं स्वस्वरूपभूतानन्दे एव संक्रीडन्तमित्यर्थः । अत एव ईश्वरं सर्वनियन्तारं ददर्शेति पूर्वमेवान्वितमस्ति । 'मुक्तत्वात्ममायां मायेश' इत्युक्तस्य परिहारोऽप्यनेन कृतो वेद्यः । एवं श्लोकत्रयस्यैकसंबन्धः ॥ १६ ॥

तदिति । तस्य परमेश्वरस्य दर्शनं साक्षात्समीक्षणं तेन य आह्लाद आनन्दस्तेन परिप्लुतमार्द्रीभूतम् अन्तरं हृदयं यस्य सः । हृष्यन्ती रोमाञ्चं कुर्वती तनुर्यस्य सः, प्रेमभरेण प्रीतिपूरेणाश्रूणि लोचनेषु यस्य सः । आनन्दाश्रुपेतनयनाष्टक इत्यर्थः । विश्वसृट् ब्रह्मा पारमहंस्येन भागवतपरमहंसानुष्ठेयेन पथा भक्तिमार्गेण यत् पादाम्बुजं चरणकमलमिति यावत् । अधिगम्यते प्राप्यते तत् । अस्य भगवतः पादाम्बुजं ननाम नमस्कृतवान् ॥ १७ ॥ तमिति । प्रजाविसर्गे प्रजासर्जनरूपे कर्मणि समुपस्थितं सम्यगुद्युक्तं निजं स्वकीयं यच्छासनं सृष्टिकर्मणि नियोजनं तत्राहणं योग्यं प्रीयमाणं स्वस्मिन्सर्वातिशायिप्रीतिमन्तं कर्विं कस्यचिदर्थस्य संपादनाय स्वेनेषत्प्रेरणे कृतेऽपि बहुभिः प्रकारैस्तत्संपादनसमर्थमित्यर्थः । तं ब्रह्माणं प्रीतमनाः तस्मिन्ब्रह्मणि निरवधिप्रेमातिशयसंयुक्तस्वान्तः प्रियः ब्रह्मणोऽपि प्रीतिपात्रं भगवान् करे पाणौ स्पृशन् ब्रह्मणः पाणिं स्वपाणिनाददानः सन्नित्यर्थः । ईषन्मन्दं मन्दं यस्मिंस्तं हासः तेन शोचिः शोभा कान्तिर्वा यस्यास्तया गिरा वाण्या प्रियं यथा तथा बभाषे । ब्रह्मणः यथा प्रियं लगेत्तथा कथयामासेत्यर्थः ॥ १८ ॥ त्वयेति । वेदा निगमा गर्भे यस्य तत्संबुद्धिः । सिसृक्षया स्रष्टुमिच्छया हेतुना चिरं दिव्यसहस्राब्दात्मकबहुकालं भृतेन संचारितेन चीर्णेनेति यावत् । तपसा करणेन । त्वया कर्त्रा कूटयोगिनां दाम्भिकानां योगवताम् । दुस्तोषः दुःखेनापि तोषयितुमशक्यः अहं सध्र्यक् सम्यक् तोषितः प्रसन्नतामापादितः ॥ १९ ॥ स्वतुष्टिफलमाह । वरमिति । हे ब्रह्मन् ते तुभ्यं भद्रं मङ्गलम् अस्त्विति शेषः । वरेशं वरप्रदानसामर्थ्येश्वरतोपेतं मा मां प्रतीति शेषः । अभिवाञ्छितमभीष्टं वरं वरय । पुंसां श्रेयसां फलानां परिश्रामः साधनप्रयासः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मद्दर्शनमवधिर्यस्य तथाभूतः भवतीति शेषः ॥ २० ॥ यन्मल्लोकसमीक्षणं तव जातं तच्च मत्प्रसादादेवाभूदिति मन्तव्यमित्याह । मनीषितेति । लोकावलोकनं वैकुण्ठलोकसमीक्षणं कृतं यदिति शेषः । अयं मम एव मनीषितानुभावः मत्संकल्पस्यैव प्रभाव इत्यर्थः । नन्विदं लोकावलोकनं यत्तत् मया मत्तपोबलेनैवोपलब्धमित्याशङ्कायां तव तपः प्रवृत्तेर्मत्कृतत्वादेव नात्र त्वत्सामर्थ्यमित्याह । रहसि त्वदितरजनस्येदानीमदर्शनादस्मिन्नेकान्तस्थाने इत्यर्थः । यन्मद्वचः उपश्रुत्य तप तपेति मदीयं वचनमाकर्ण्य त्वं परमं श्रेष्ठतोपेतं तपः चकर्थ कृतवानसि ॥ २१ ॥

तदपि त्वं यदा स्वविधेये कांदिशिको जातस्तदा मयाऽऽदिष्टमित्याह । प्रत्यादिष्टमिति । तत्र तदा सर्गारम्भे इति यावत् । त्वयि कर्मविमोहिते जगत्सर्गकर्मणि मोहं प्राप्ते सतीत्यर्थः । मयैव प्रत्यादिष्टं त्वां प्रत्याभिमुख्येनोपदिष्टम् अतस्त्वयायं ममैवानुभावो बोध्य इति भावः । ननु त्वत्प्रसादजनकं तदितरत्किं न भवति, यतो मह्यं तदादिष्टमित्याशङ्कायां तदितरस्याऽतथात्वं वदंस्तत्प्रशंसति । तप इत्यादिना । हे अनघ निर्दोष ब्रह्मन् तपः मे मम हृदयमन्तरङ्गा शक्तिः साक्षात्प्रत्यक्षः अहं तपसः आत्मा स्वरूपं भवामीति शेषः । 'तपसैव सोऽतप्यत यस्य ज्ञानमयं तपः' इति श्रुतेः ॥ २२ ॥ सृजामीति । तपसा श्रुत्युक्तभूतपूर्वजगदाकारपर्यालोचनज्ञानरूपेण तपसेत्यर्थः । एवकार उक्तार्थदाढर्यार्थः । इदं विश्वं सृजामि, पुनः तपसा ग्रसामि, तपसा बिभर्मि, सृष्टिसंहारपालनानि तपसैव करोमीत्यर्थः । तपः मे मम दुस्तरमपारमहिमयुक्तं वीर्यं शक्तिः । नास्य प्रभावो ममापि निरूपणार्ह इति भावः ॥ २३ ॥ एवं हरिणाऽनुगृहीतोऽजो भगवन्तं प्रति स्वबुभुत्सितमर्थद्वयं निवेदयति । भगवन्निति । हे भगवन् सर्वभूतानां सर्वेषां प्राणिनां गुहां हृदयदरीम् अवस्थितः 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिः' इति श्रुत्यभिहितायां बुद्धावधिष्ठित इत्यर्थः । अत एव अध्यक्षः सकलेन्द्रियवृत्तीनां साक्षाद्द्रष्टा असीत्यर्थः । ततः अप्रतिरुद्धेन स्वेतरकृतप्रतिहतिवर्जितेन प्रज्ञानेन स्वकीयस्वाभाविकज्ञानेन चिकीर्षितं कर्त्तुमिष्टं मदादिपरंपरया विधापयितुं यच्चन्निर्द्धारितं स्यात्तत्तदित्यर्थः । यद्यपि वेद हि जानास्येव । हि प्रसिद्धौ वा । तथापीत्युत्तरेणान्वयः ॥ २४ ॥ वरं वरयेति त्वदाज्ञाया अवश्यपाल्यत्वाद्वरं याचे इति विज्ञापयति । तथापीति । तथापि हे नाथ नाथमानस्य याचमानस्य मम नाथितं प्रार्थितं नाथय प्रयच्छ । नाथितमेवाह । परावरे इति । अरूपिणः कर्माधीनप्राकृतरूपरहितस्य ते तव परं चावरं च ते रूपे तु यथा येन प्रकारेण जानीयां बुध्येयम् । तथाविधां मनीषां धेहीति तृतीयेनान्वयः । तत्र परं दिव्यमात्मस्वरूपमवरं चिदचिदात्मकं स्वरूपम् ॥ २५ ॥

द्वितीयं नाथितमाह द्वाभ्याम् । आत्मेति । क्रीडसीति । हे हरे अमोघसंकल्पः सत्यसंकल्पः आत्मा सर्वान्तरात्मा त्वम् आत्ममायायोगेन स्वकीयालौकिकाश्चर्यशक्तिसंबन्धेन नानाशक्त्युपबृंहितं त्वदीयनानाविधशक्तिभिर्वृद्धिं प्राप्तं विश्वं विसृजन् विविधतया सिसृक्षमाणः, बिभ्रत् आदावेवं सृष्ट्वा तस्य सम्यक् पालनं कुर्वन्, विलुंपन् प्राप्ते काले तत्संहरन् । तत्र विश्वे आत्मना स्वसंकल्पेन आत्मानं रामकृष्णादिरूपं गृह्णन्नुपाददानः सन् विश्वस्मिन्निति शेषः । ऊर्णनाभिः यथा ऊर्णुते लालां सृजन् तां पालयन्नन्ते संहरन् सन्, यथा तत्रात्मानमाच्छादयन् क्रीडतीत्यर्थः । तथा क्रीडसि । हे माधव तद्विषयां तद्बोधविषयां मनीषां मयि धेहि देहि 'यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः । तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः' इति दत्तात्रेयोक्तेः ॥ २६–२७ ॥ उक्तविधमनीषाप्राप्तिप्रयोजनमाह । भगवन्निति । हे भगवन् शिक्षितं भवता प्रकाशितप्रकारमित्यर्थः । भगवच्छिक्षितमित्येकपदत्वे भगवता त्वया शिक्षितमनुशिष्टमित्यर्थः । प्रजासर्गम् अहम् अतन्द्रितोऽनलसः सन् । करवाणि हि । निश्चितमेव ईहमान एवं प्रजासर्गं कुर्वाणः सन्नपि यदनुग्रहाद्यस्य भगवतोऽनुग्रहाद्धेतोः न बध्येयम् । यथा बद्धो न भवेयं तथानुगृह्णीष्वेत्यर्थः ॥ २८ ॥ प्रजाः सृजतो मेऽवश्यमेव मदो भविताऽतः बन्धमूलाहंकारहेतुः स मा भूदिति तन्नाशं प्रार्थयते । यावदिति । भो ईश हे भगवन् ते त्वया, सख्युः सखा इव लौकिकस्य मित्रस्य मित्रमिवेत्यर्थः । कृतः करस्पर्शादिना संमानित इत्यर्थः । अहं प्रजाविसर्गे ते परिकर्मणि प्रजासंसर्जनरूपायां तव परिचर्यायामित्यर्थः । अविक्लवः धीरः अव्याकुल इति यावत् । स्थितः सन्नेव यावत् यावत्कालपर्यन्तं जनं लोकं विभजामि तत्तत्कर्मानुसारादुत्तममध्यमादिभेदतः सृजामीत्यर्थः । तावत्कालपर्यन्तम् अजमानिनः स्वयंभूत्वसंजातस्वतन्त्रत्वाभिमानवतः मे मम समुन्नद्धमदः जगत्सर्गस्वतन्त्रताजातः प्रभुत्वाहंकारः । मा त्वत्प्रसादान्मा स्यादित्यर्थः । यद्वा । मदः मा समुन्नद्ध उद्रिक्तो न भवेदित्यर्थः ॥ २९ ॥

इत्थं ब्रह्मणा कृतप्रार्थनो भगवांस्तमनुगृह्णन परावररूपप्रकाशकं चतुःश्लोक्यात्मकं भागवतमाह । ज्ञानमिति । परमं च, तद्गुह्यं च परमगुह्यम् । परमत्वादतिगोप्यमित्यर्थः । विज्ञायतेऽनेनेति विज्ञानं तच्च शास्त्रं योगश्चेति द्विविधम्, तेन समन्वितं सहितं रहस्येन मन्त्रेण सह वर्त्तमानम् । मन्त्रात्मकरहस्यार्थसहितमित्यर्थः । यत् ज्ञानं प्रधानभावेन ज्ञातुं योग्यं भगवत्स्वरूपविषयकं ज्ञानं तस्य अङ्गमप्रधानतया सम्यक्ज्ञातव्यं चिदचित्स्वरूपविषयकं ज्ञानं च मया गदितं सत मे मत्तः गृहाण ॥३०॥ समग्रतया त्वत्कथितार्थसम्यगुपादानेऽहं समर्थो नास्मीत्याशङ्कमानं प्रत्याह । यावानिति । अहं 'सत्यं ज्ञानम्' 'यः सर्वज्ञः' इत्यादिश्रुत्युक्तज्ञानस्वरूपो ज्ञानगुणकश्चाहमित्यर्थः । यावान् यत्परिमाणकः अपरिच्छिन्न इत्यर्थः । यथाभावः यादृक्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वभावः स्वाभाविकी ज्ञानबलक्रियाचेत्युक्तसर्वज्ञादिज्ञानगुणक इत्यर्थः। रूपे चिदचिद्वस्तुनी, गुणस्तयोर्गुणः, कर्म जगद्व्यापारः, यानि रूपगुणकर्माणि यस्य सः। यादृशरूपो यादृशगुणो यादृशकर्मा चाहमस्मीत्यर्थः। तथैव तत्त्वविज्ञानं मत्स्वरूपगुणविभूति-याथात्म्यविज्ञानं मदनुग्रहान्मत्प्रसादाद्धेतोः। ते तव अस्तु भवतु ॥ ३१ ॥ यावानित्यस्यार्थं स्फुटयन्नेव प्राधान्यतया ज्ञेयं परशब्दोक्तं भगवत्स्वरूपमाह। अहमिति। सच्चेतनम् असदचेतनं च ताभ्यां परं विलक्षणं यद्ब्रह्माख्यं वस्तु तत् अहम् एव आसमभवम्। अन्यत् न, चिदचिद्विलक्षणं न भवति। अन्यस्य सर्वस्य चिदचिदन्तर्गतत्वात् केवलोऽहमेव तद्विलक्षणो भवामी-त्यर्थः। अग्रे सृष्टेः प्राग्यद्वस्तु पश्चात्सृष्टिकाले जातस्त्वं एतत्सकलमेतत्त्वत्सृष्टं कार्यजातं च तच्च। तदपि अहम् अस्मि। यः अवशिष्येत सः अहम् एव अस्मि। संहारकाले न संह्रियेत सोऽप्यहमेवास्मीत्यर्थः। अस्यायं भावः। प्रकृतिपुरुषविलक्षणस्तच्छ-रीरकः, सर्वशक्तिः, सर्वेश्वरो, योऽहं स एव सृष्टेः प्रागविभक्तनामरूपसूक्ष्मप्रकृतिपुरुषशरीरकः सृष्टिकाले विभक्तनामरूपस्थूल-प्रकृतिपुरुषशरीरकः, सृष्टेः संहृतिकाले संहृत्यापन्ननामरूपप्रकृतिपुरुषशरीरकोऽप्यहमेवासम्। एवं कारणावस्थायामविभक्तनाम-रूपप्रकृतिपुरुषशरीरकत्वेन कार्यावस्थायां विभक्तनामरूपप्रकृतिपुरुषशरीरकत्वेनावस्थितस्यापि परमात्मनः मम शरीरभूतस्य चेतनस्याज्ञत्वदुःखित्वकर्मवश्यत्वादिभिर्विकारैः अचेतनस्य परिणामित्वजडत्वादिभिर्विकारैश्चास्पर्शात् चेतनाचेतनवैलक्षण्यम-विहितमेवावतिष्ठते। जीवात्मनस्तु स्वशरीरगतबालत्वयुवत्वस्थविरत्वादिभिर्विकारैस्तदहंमत्या संस्पर्शात्तदवैलक्षण्यमेव यावन्मोक्ष-मवतिष्ठते। एवं मम कार्यत्वं कारणत्वं च स्वशरीरभूतप्रकृतिपुरुषद्वारोपपन्नमेतद्विस्तारजिज्ञासास्ति, यस्य तेन तद्विस्तारः श्रीभाष्यादवगन्तव्यः ॥ ३२ ॥

एवं चिदचिद्विलक्षणस्य परमात्मनः परस्वरूपमुक्त्वाऽवरशब्दोक्तमङ्गतया ज्ञातव्यं चिदचित्स्वरूपमाह। ऋतेऽर्थमिति। प्रकृत्यनुसंधाने केवलं तस्यां प्रतीयमानायां सत्यामिति शेषः। यदचिद्वस्तु अर्थं चित्तत्वम् ऋते विना प्रतीयेत सर्वकालं जडमेव। न स चैतन्यमिति ज्ञायते इत्यर्थः। आत्मस्वरूपानुसंधानवेलायामिति शेषः। आत्मनि केवले चित्स्वरूपे प्रतीयमाने सति तु यच्चित्तत्त्वं तत् यदचित्तत्वं तच्च प्रतीयेत। न तु केवले चित्तत्वमित्यर्थः। तत्र यच्चित्स्वरूपं वस्तु सर्वकाल-चेतनतावदेव तत्तु यदचित्स्वरूपं वस्तु तज्जडमेव, एवं सति तयोर्मध्ये यदचित् तत् आत्मनो मम मायां विद्यात्। एवं चित्प्रकाश-स्वरूपम् अचिदप्रकाशस्वरूपमिति तयोर्लक्षणे अभिहिते। अथ चित्प्रकाशे चिदचितोः प्रकाशनं यदभिहितं तच्च विरुद्धाकारवेदन-तस्ततस्तद्दृष्टान्तेन समर्थयते यथाभासः यथा तम इति, तेजसि सति पर्वतादौ तेजस्तमश्चेत्युभयमपि प्रकाशमानं जायते। तमसि तेजः प्रकाशमानं न जायते उभयोर्विरुद्धाकारत्वादिति भावः ॥ ३३ ॥ एवं परस्परविलक्षणं चिदचित्स्वरूपमुक्त्वाथैतयोर्विषये निजानुप्रवेशेनोभयप्रशासनरूपं पालनं स्वस्य तद्गतदोषास्पर्शं चाह। यथेति। महान्ति भूतानि आकाशवायुतेजःप्रभृतीनि यथा उच्चावचेषु स्थूलसूक्ष्मेषु भूतेषु स्वकार्यभूतघटकरकादिषु यद्यपि अनुप्रविष्टानीव भान्ति। तथापि अप्रविष्टानि एव ज्ञेयानीति शेषः। घटकरकादिगतभेदच्छेदनादिनाऽसंस्पृष्टत्वात्। तथा अहमपि तेषु चेतनाचेतनेषु प्रविष्टः तेषु न प्रविष्टः तद्गतदोषैर-संस्पृष्टत्वात्। अनेन स्वस्य परिच्छिन्नवस्त्वनुप्रवेशेऽपि स्वतः पृथगवस्थानादपरिच्छिन्नत्वं दृष्टान्तेनाभिहितमिति भावः ॥ ३४ ॥

एवमपरिच्छिन्नत्वप्रतिपादनेन 'यावानहम्' इत्येतत्स्पष्टीकृतम्। इत्यत्र भगवतो जगत्कारणत्वोक्त्याक्षिप्तचेतनाचेतन-वैलक्षण्यापादनतः सार्वज्ञसर्वशक्तितादिप्रतिपादनेन 'यथा भाव' इत्येतत्स्पष्टीकृतम्। 'ऋतेऽर्थम्' इत्यादिना परमात्मशरीरभूत-परस्परविलक्षणचेतनाचेतनस्वरूपप्रतिपादनेन 'यद्रूप' इति स्पष्टीकृतम्। 'तथा तेषु' इत्यनेन चेतनाचेतनयोः परमात्मशरीरत्वप्रति-पादनाच्छरीरगताः धर्माः मच्छरीरभूतचेतनद्वारा ममैव धर्माः इति प्रतीतेः यद्गुणः इति ज्ञापितम्। अहमेवासम्' इत्यनेन स्रष्टृत्वपालकत्वसंहर्तृत्वरूपजगद्व्यापारात्मककर्मप्रतिपादनेन 'यत्कर्म' इति व्यक्तीकृतम्। पुनश्च प्रकृतिपुरुषविलक्षणेश्वरत्वरूपं समासेन कथयिष्यंस्तस्यैव जिज्ञास्यत्वमाह। एतावदिति। आत्मनः परमात्मनः तत्त्वजिज्ञासुना स्वरूपं ज्ञातुमिच्छुना जनेन एतावदेव जिज्ञास्यम्, परस्परपृथग्भूतस्वभावयोश्चिदचितोरन्तरात्मभूतं यद्भगवत्स्वरूपं तदेव जिज्ञास्यमित्यर्थः। तच्च काभ्यां जिज्ञास्यं तत्राह। अन्वयव्यतिरेकाभ्याम् एतदेवं जिज्ञास्यमेवेति यो निश्चयः सोऽन्वयः। कदाचिदप्यन्यन्न जिज्ञास्यमिति निश्चयो व्यतिरेकस्ताभ्यामित्यर्थः। कथं तज्जिज्ञास्यं तत्राह। यदात्मनस्तत्त्वं सर्वत्र सर्वदा च स्यात् अनेन प्रकारेण जिज्ञास्यमित्यर्थः। तत्र सर्वदा स्यादित्यनेनास्य अचिद्व्यावृत्तिरुक्ता। सर्वत्रेत्यनेनास्य चिच्छब्दवाच्यजीवाद्व्यावृत्तिरुक्ता। यद्वा। अन्वयव्यतिरेकाभ्यां जिज्ञास्यमित्यस्यैवं योजना। अन्वयः स च चिदचिच्छरीरकपरमात्मन एव कार्यात्मना कारणात्मना च विद्यमानत्वम्। व्यतिरेकश्चिदचिच्छरीरकपरमात्मव्यतिरिक्तवस्त्वन्तराभाववेदनम्। ताभ्याम्, अस्यायं भावः। उक्तरीत्या परमात्मनः सद्भावात्तदितरासद्भावाच्चैवंभूतपरमात्मविज्ञानेन सर्वविज्ञानात् ज्ञातव्यान्तराभावाच्चैतावच्छब्दाभिहितं भगव-त्स्वरूपमेव जिज्ञास्यमिति ॥ ३५ ॥ एवं 'परावरे यथारूपे जानीयां ते' इत्यस्योत्तरमुक्तम्, सांप्रतं 'नेहमानः प्रजासर्गम्' इत्यस्योत्तरमाह। एतदिति। परमेणात्युत्तमेन समाधिना चित्तैकाग्र्येण एतत् मतम् उक्तविधो यो मत्संमतोऽर्थस्तमित्यर्थः। भवान् समातिष्ठ सम्यगनुतिष्ठ। भवानिति संहाराद्यधिकर्तृरुद्रादेरप्युपलक्षणम्। एवं सति कल्पाः सृष्टयश्च, विकल्पाः संहाराश्च,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेषु कर्हिचित् कदाचिदपि न विमुह्यति। सर्वार्थस्य मदधीनत्वमनुसंधाय समुन्नद्धमदापहतो न भविष्यतीत्यर्थः। अनेनैव तथा 'तद्विषयां धेहि मनीषाम्' इत्यस्यापि उत्तरं दत्तं भवति ॥ ३६ ॥

संप्रदिश्येति। अजनः कर्मायत्तोत्पत्तिवर्जितः हरिर्भगवान् जनानां व्यष्टिप्राणिनां परमेष्ठिनं सर्वोत्तमाधिपतित्वे स्थितं ब्रह्माणं प्रति एवमुक्तप्रकारेण संप्रदिश्य तस्य परमेष्ठिनः पश्यतः तच्चतुर्मुखब्रह्मणे प्रदर्शितम् आत्मनः स्वस्य संबन्धि रूपं स्वकीयां तनुमित्यर्थः। न्यरुणत्तिरोभावयांबभूव ॥ ३७ ॥ अन्तर्हितेति। अन्तर्हितः तिरोधापितः। इन्द्रियार्थश्चक्षुरिन्द्रियविषयभूतं प्रत्यक्षरूपं येन तस्मै हरये उरुकरीतिमते भगवते विहितो विरचितः अञ्जलिर्येन सः। सर्वभूतमयः स्रक्ष्यमाणदेवादिभूतानां बुद्धिस्थत्वेन तद्विषयकज्ञानप्रचुर इत्यर्थः। स चतुर्मुखो ब्रह्मा इदं विश्वं पूर्ववत् पूर्वकल्पे यथा तथेत्यर्थः। ससर्ज सृष्टवान् अनेन 'धाता यथापूर्वमकल्पयत्' इति श्रुत्यर्थः स्मारितः ॥ ३८ ॥ अथानन्तरं पूर्वोक्तो ब्रह्मनारदसंवादः संप्रवृत्तः इत्याह। प्रजापतिरिति पञ्चभिः धर्मपतिः भागवतानां धर्माणां सम्यक् प्रवर्त्तनेन गोप्तेत्यर्थः। प्रजापतिर्ब्रह्मा प्रजानां स्वस्रक्ष्यमाणानां जनानां भद्रं मङ्गलम् अन्विच्छन् विमृशन् सन् स्वार्थे स्वप्रयोजने काम्या विमर्शनरूपेच्छा तया, एकदा कदाचित् यमानहिंसादीन् नियमांस्तपः सन्तोषादींश्च आतिष्ठदनुष्ठितवानित्यर्थः। यमनियमा उक्ता योगशास्त्रे 'अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्। क्षमा धृतिर्मिताहारः शौचं चेति यमा दश। तपः संतोष आस्तिक्यं दानमीश्वरपूजनम्। सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम्। एते तु नियमाः प्रोक्ता' इत्यादि ॥ ३९ ॥ तमिति। मायामिति। हे राजन् रिक्थादानां पुत्राणां निर्द्धारणे षष्ठी। प्रियतमोऽति-प्रीतिपात्रं कुतः यतः, अनुव्रतः पितृच्छन्दानुवृत्त्या वर्त्तमानः शुश्रूषमाणः पितुः सकाशात्परमेश्वरमहिमानं ज्ञातुकामः शीलेन स्वभावेन प्रश्रयेण विनयेन दमेन बाह्येन्द्रियदमनेन चकाराच्छमेन, अन्तरिन्द्रियनिग्रहेण युक्त इति शेषः। मायेशस्य मायाया अधिपस्य विष्णोः श्रीहरेः मायां तन्नियाम्यामाश्चर्यस्वरूपां शक्तिं विविदिषन्वेदितुमिच्छन् महाभागवतो भगवत ऐकान्तिकभावेनो-पासकः, महामुनिर्मुनिष्वत्युत्तमः नारदः तं पूर्वोक्तप्रकारं पितरं ब्रह्माणं पर्यतोषयत्। प्रसन्नं चकारेत्यर्थः ॥ ४०–४१ ॥

तुष्टमिति। देवर्षिः नारदः लोकानां प्रपितामहम्, पितरम् स्वजनकम्, ब्रह्माणं तुष्टं स्वकृतसेवया प्रसन्नतां प्राप्तं निशम्य दृष्ट्वा ज्ञात्वेत्यर्थः। भवान् यत् मा माम् अनुपृच्छति तत् परिपप्रच्छ ॥ ४२ ॥ तस्मा इति। प्रीतः प्रसन्नतां प्राप्तः भूत-कृद्भूतानां स्रष्टा ब्रह्मा तस्मै स्वं पृष्टवते पुत्राय नारदाय पुरा स्वस्मै इति शेषः। भगवता प्रोक्तं चतुःश्लोक्यात्मना संक्षेपेण कथितम्, दशलक्षणानि यस्य तत्, उपरितनाध्यायोक्तैर्दशभिर्लक्षणैश्चिह्नितमित्यर्थः। इदं भागवतं पुराणं प्राह। चतुःश्लोक्यामपि सर्गादयो दशार्थाः सूचिताः सन्ति। ते प्रदर्श्यन्ते। 'अहमेवासम्' इति श्लोकेन परमेश्वरस्य सर्गस्थाननिरोधहेतु-त्वोक्त्या आश्रयसर्गपोषणनिरोधानामुक्तिः। सर्वकारणतारूपसकलातिशायितायाश्चानयैवोक्त्या वैकुण्ठविजयरूपा स्थिति-रप्युक्ता 'पश्चादहं यदेतच्च' इत्यनेन कार्यात्मकचिदचिदाख्यव्यष्टिसृष्टेरपि चतुर्मुखशरीरकारणत्वोक्त्या तस्यापि स्वकारण-त्वोक्त्या विसर्गोऽपि संकथितः। परस्परपृथक्त्वेन प्रकृतिपुरुषशोधके 'ऋतेऽर्थम्' इति श्लोके आत्मस्वरूपस्याप्रतीतिदशायां मायास्वरूपप्रतीतिकथनादात्मस्वरूपप्रतीतिदशायां तत्प्रतीतिमायाप्रतीत्योरनादिकर्मवासनाऽऽयत्तत्वप्रतीतेः कर्मवासनात्मिका ऊतयोऽपि सूचिताः। 'यथा महान्ति भूतानि' इति श्लोके हरेः सर्वान्तरात्मत्वतः प्रशासितृतारूपपालकत्वोक्त्यैव पालनाधि-कृतभगवदवतारकथानां भगवदनुवर्त्तिमन्वादिकथानां चापि सूचितत्वेन मन्वन्तरेशानुकथे अपि सूचिते। परमपुरुषशरीरक-प्रकृतिविलक्षणजीवरूपशोधनेनैव प्रकृतिविनिर्मुक्त्याविर्भूतगुणाष्टकस्वरूपेणावस्थितिरूपा मुक्तिरित्यपि सूचितमिति ॥ ४३ ॥ नारद इति। हे नृप नारदः सरस्वत्या नद्याः तटे परमं ब्रह्म ध्यायते भगवतः स्वरूपध्यानं कुर्वते इत्यर्थः। अमितमपरिमितं तेजो यस्य तस्मै व्यासाय वेदशास्त्रार्थतत्त्वावबोधवत्त्वेन व्याससंज्ञाय मुनये प्राह प्रोक्तवान्। व्यासः मह्यं प्रोक्तवानिति तु 'अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम्' इति पूर्वमेवोक्तमस्ति ॥ ४४ ॥ एवं सत्संप्रदायागतश्रीभागवताख्यानेनैव भवत्कृत-प्रश्नानां प्रतिवचनानि कथयिष्यामीत्याह। यदुतेति। इदं विश्वं वैराजात् पुरुषात् चतुर्मुखाद्ब्रह्मण इत्यर्थः। यथा आसीत् तत्कथयेति शेषः। इति यत् त्वया अहं पृष्टः तदुत तदपि उपाख्यास्ये 'अजः सृजति भूतानि भूतात्मा यदनुग्रहात्' इत्यादिना कथयिष्यामि इत्यर्थः। अन्यान् कृत्स्नशः प्रश्नांश्च उपाख्यास्ये भागवताख्यानेनोत्तरयिष्यामीत्यर्थः। एवं 'यत्र शेते' इत्यस्य परीक्षित्प्रश्नस्योत्तरं कृतं भवति। तथा च परमव्योमकथनादप्राकृतशुद्धसत्त्वमयलोकस्य परिग्रहकथनेनेश्वरस्य जीववद्धातुभिर्दे-हारम्भप्रश्नोऽपि प्रत्युक्तः। अन्यत्र सर्वत्रेश्वरस्य व्याप्तिकथनात्परिच्छिन्नत्वमपि परिहृतम् ॥ ४५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे नवमोऽध्यायः ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ दशमोऽध्यायः

श्रीशुक उवाच

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः । मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥

श्रीमद्भागवतव्याख्यामुखेन शुकसन्मुनिः । वक्तुं प्रश्नोत्तरं राज्ञो ह्यारेभे दशमे स्फुटम् ॥ १ ॥

अथ वैराजात्पुरुषादिदं 'यथासीत्तदुपाख्यास्ये' इति प्रतिज्ञातत्वात्तदवयवैर्देवादिसृष्टीरभिधास्यन् प्रथमतः पुराणं दशलक्षणं प्रोक्तं भगवतेति प्रस्तुतत्वात्तदीयदशलक्षणानि दर्शयति । अत्रेति । अत्रास्मिन् भागवते पुराणे सर्गः, विसर्गः, स्थानम्, पोषणम्, ऊतयः, मन्वन्तरेशानुकथाः, मन्वन्तरकथनमीश्वरचेष्टाकथनं चेत्यर्थः । निरोधः, मुक्तिः, आश्रयश्चेति दशार्थाः प्रतिपाद्याः सन्तीति शेषः ॥ १ ॥ नन्वेवं प्रतिपादनीयानामर्थानां प्राचुर्यात्ततश्च प्रतिपाद्यभेदोपपत्तेः शास्त्रभेदः प्रसज्येतेत्याशङ्कायामाह । दशमस्येति । इहास्मिन् भागवते पुराणे दशमस्याश्रयस्य परब्रह्मण इति यावत् । विशुद्ध्यर्थं तत्त्वतो ज्ञानार्थं नवानां सर्गादिनवसंख्याकार्थानां लक्षणं महात्मानः परापरयथार्थताभिज्ञाः श्रुतेन स्तुत्यादिस्थानेषु श्रुत्यैवाभिव्यञ्जितेन अर्थेन प्रयोजनेन अञ्जसा सुखेन वर्णयन्ति । च साक्षाद्दर्शयन्त्येवेत्यर्थः । एवं सति अत्र दशमवर्णनस्यैव प्राधान्यं तत्प्रयोजनत्वेनान्येषां प्रतिपादनान्न शास्त्रभेद इत्यर्थः ॥ २ ॥ सर्गादीनां दशानां प्रत्येकं लक्षणं ब्रुवन्नादौ सर्गविसर्गयोर्लक्षणे आह । भूतेति । ब्रह्मणः प्रयोजककर्त्तुः परब्रह्मणः सकाशात् जातात् गुणवैषम्याद्धेतोः भूतान्याकाशादीनि पृथिव्यन्तानि च । मात्राः शब्दादिगन्धान्तास्तन्मात्रसंज्ञाश्च । इन्द्रियाणि श्रोत्रादीनि पञ्च, वागादीनि पञ्चेत्येवं ज्ञानकर्मभेदेनोभयविधानि अक्षाणि च । धीशब्देन महत्तत्वं सा च तासां महदादिपृथिव्यन्तानामित्यर्थः । जन्म एतेषामुत्पत्तिर्या स इत्यर्थः । सर्गः उदाहृतः । सृष्टिकाले परब्रह्मणः सकाशाज्जातगुणवैषम्यापरसंज्ञकमहत्तत्त्वादहंकारद्वारा भूतमात्रेन्द्रियधीसंभूताण्डाभिमानवान् विराट्देहाभिमानी च यो वैराजपुरुषस्तदन्तानामुत्पत्तिः सर्ग इत्यर्थः । पौरुषः पुरुषशब्दवाच्यवैराजोत्पन्नपुरुषप्रयोज्यचतुर्मुखकर्तृक इत्यर्थः । एवंभूतो यः सर्गः स विसर्गः स्मृतः ॥ ३ ॥

स्थितिरिति । वैकुण्ठस्य श्रीहरेर्विजयः सर्वोत्कर्षः वैकुण्ठविजयः दुष्टशिष्टनिग्रहानुग्रहलक्षणः परमोत्कर्ष इत्यर्थः । स्थितिः तस्य वैकुण्ठस्य योऽनुग्रहो जगद्रक्षणरूपः प्रसादविशेषः । तत् पोषणम्, तदिति विधेयप्राधान्यात् क्लीबत्वम् । सतां धर्मः सद्धर्मः वैकुण्ठानुगृहीतानां सर्वेषां मन्वन्तराधिपतीनां यो धर्मः स इत्यर्थः । मन्वन्तराणि मन्वन्तरकथा ज्ञेयेत्यर्थः । कर्मणां वासनाः कर्मवासनाः ऊतयः । अपरिमितानां जीवानामनादिकर्माणि तत्संस्काराश्च ये नानासृष्टिहेतुभूतास्ते ऊतय इत्यर्थः ॥ ४ ॥ अवतारेति । हरेर्मत्स्याद्यवतारधर्त्तुः परमेश्वरस्य अवतारानुचरित मत्स्याद्यवतारैः कृतानां नानाविधचरित्राणां कथनमित्यर्थः । अस्य हरेः अनुवर्त्तिनां च पुंसां भगवदैकान्तिकजनानामित्यर्थः । नानाविधानि यान्याख्यानानि तैरुपबृंहिताः विविधेतिहासैः संवृद्धिं नीताः सत्कथा इत्यर्थः । ईशकथा ईशानुकथाः प्रोक्ताः ॥ ५ ॥ निरोध इति । अस्य जीवाख्यस्य आत्मनः जीवसमुदायस्येति भावः । सह शक्तिभिः स्वस्वकर्मशक्तिभिः सहेत्यर्थः । अनुशयनं सूक्ष्मावस्थयावस्थानं निरोधः । अन्यथाभावं देवादिरूपं हित्वा अनाद्यचित्संबन्धवतो जीवस्याज्ञातेन यद्देवादिरूपेण मननमस्ति तद्भगवदुपासनाजातज्ञानेन संपरित्यज्येत्यर्थः । स्वरूपेण प्रादुर्भूतापहतपाप्मत्वादिगुणाष्टकविशिष्टरूपेणेत्यर्थः । व्यवस्थितिरवस्थानं मुक्तिः ॥ ६ ॥ आभास इति । आ समन्ताद्भासनमाभासः जगत आविर्भावः उत्पत्तिरिति यावत् । निरोधः प्रलयः चकारात् स्थितिश्च यतो यस्मात् अध्यवसीयते ज्ञायते प्रमाणेन प्रतीयते इति यावत् । 'आविर्भावतिरोभावजन्मनाशविकल्पवत्' इत्युक्तेः । यद्वस्तु परं ब्रह्म, परमात्मा, इति च शब्दैः शब्द्यते श्रुतिस्मृत्यादिष्वध्यवसीयते सः आश्रयः ॥ ७ ॥ अथाश्रयस्य परमात्मनः सर्वकारणत्वात्तत्रोपयोगिनीं तस्य सार्वज्ञतां वक्तुं ज्ञातृज्ञेयज्ञानाख्यकरणानां परमेश्वरात्मकत्वमाह । य इति । आत्मनीत्यध्यात्मं ज्ञानशक्तिमान् जीवस्तत्र भवो नियन्तृतया वर्त्तमानः आध्यात्मिकः योऽयं पुरुषः परमपुरुषः सः असौ एव आधिदैविकः देवेष्वित्यधिदेवं तत्र भव आधिदैविकः । चक्षुरादीन्द्रियाभिमानिष्वादित्यादिषु वर्त्तमानः अस्ति । स एव भूतेष्वित्यधिभूतं तत्र भवः आधिभौतिकः, अधिभूतशब्दवाच्येषु शब्दादिविषयेषु तदन्तरात्मतया वर्त्तमानः स्मृतः हि । तत्रैवंविधाध्यात्मा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दित्रिकेषु वर्त्तमान इति शेषः। यः परमात्मा सः उभयः उभयविधः शरीरशरीर्यात्मको विच्छेदो भेदो यस्येति तथाभूतः अपि स्मृतः। अध्यात्मादीनां शरीरत्वात्परमात्मनः शरीरित्वात् ज्ञातुरात्मनः चक्षुरादित्यादेः करणस्य शब्दादेर्ज्ञेयस्य च भगवदात्मकत्वमेवेत्यर्थः॥ ८॥

एवं त्रयाणां भगवदात्मकत्वमभिधाय तस्य सर्वज्ञतां वक्तुं स्वशरीरभूतानामपि जीवानामसर्वज्ञतामाह। एकमिति। वयं तु यदा यस्मात् एकतराभावे अध्यात्मादित्रयाणां मध्ये एकस्याप्यभावे इत्यर्थः। एकं त्रयाणां मध्ये यं कमपि न उपलभामहे नैव साक्षात्कुर्महे नाप्नुम इत्यर्थः। चक्षुराद्यभावे प्रकाशाभावे तद्विषयभूतघटादिपदार्थाभावे वा। नैकमप्युपलभामहे इति भावः। परमात्मा तु कोटित्रयसाक्षात्कर्त्तेत्याह। त्रितयमिति। तत्र तदा यस्मिन्कालेऽस्माभिस्त्रिकान्यतमाभावत त्रिकान्यतमं न स्वीक्रियते तस्मिन्कालेऽपि योऽयं परमात्मा स तु त्रितयं ज्ञातृकरणज्ञेयानां त्रयं वेद साक्षात्करोत्येव स स्वात्मा। स किं जीवः, न, किंतु आश्रयाश्रयः अचिदात्मकशरीराद्याश्रयभूतस्य जीवस्याप्याश्रय इत्यर्थः। यथा 'रथस्यारेषु नेमिरर्पिता' इत्यादिश्रुतेः। स्वाश्रयाश्रय इतिपाठे स स्वस्याप्याश्रय अन्येषामप्याश्रय इत्यर्थः॥ ९॥ एवं सकलानप्याश्रयपर्यन्तानर्थान् कथयित्वा 'यथासीत्तदुपाख्यास्ये' इति प्रतिज्ञातत्वाच्चतुर्मुखसृष्टिं वक्तुमारभमाणः पञ्चमाध्यायोक्तं 'स एष पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः' इत्येतदनुवदति। पुरुष इति यदा पुरुषः वैराजरूपः स असौ परमेश्वरः अण्डं विनिर्भिद्य विनिर्गतः तदा आत्मनः स्वस्य अयनं स्थानम् अन्विच्छन्विमृशन् सन् शुचिः यतः स्वयं शुद्धोऽस्त्यत एव शुचीः शुद्धाः अपो जलानि असाक्षीत सृष्टवान्॥ १०॥ तास्विति। स्वसृष्टासु तास्वप्सु सहस्रपरिवत्सरान् सहस्रशब्दस्योपलक्षणत्वाद्बहून्वत्सरानित्यर्थः। अवात्सीत् उवास। अस्यैतदेव नारायणशब्दप्रवृत्तिनिमित्तमित्याह। तेनेति। यद्यस्मात् पुरुषान्नराद्उद्भवन्तीति पुरुषोद्भवाः। यद्वा। पुरुषान्नराद्उद्भवो यासां ता नरशब्दवाच्यपरमपुरुषादुत्पन्ना भवन्तीत्यर्थः। इति आपः नारास्ता अयनमस्येति नारायणशब्दव्युत्पत्तिः। तेन ईदृशव्युत्पत्तिगम्येनायनवत्त्वेन निमित्तेन नारायणः नारायणशब्दवाच्यः नामेति स्मृत्यन्तरप्रसिद्धः। अभूदिति शेषः। तथा च स्मर्यते 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इति॥ ११॥

हरिणेयं सृष्टिः स्वाधीनसाधनान्तरकृतास्तीति द्योतयंस्तस्यैवायं प्रभावातिशय इत्याह। द्रव्यमिति। द्रव्यं महत्तत्त्वादिपृथिव्यन्तो भूतसमुदायः, कर्म जीवादृष्टं च, कालः गुणवैषम्यताया हेतुः, स्वभावः प्रकृतेः परिणामतारूपश्च, स्वयं जीवश्चापि यदनुग्रहतः यस्य भगवतः परमानुग्रहात् सन्ति सत्तावन्तो विद्यन्ते। यदुपेक्षया यत्कृतेक्षणवृत्तिप्रतिलोमत्वे सति न सन्ति एव सत्तावर्जिता इव जायन्त एवेत्यर्थः। द्रव्यादयो यत्संकल्पानुगुणसत्तास्थितिप्रवृत्तिका इति भावः॥ १२॥ एक इति। एवंभूतो नारायण इति शेषः। एकोऽविभक्तनामरूपसूक्ष्मचिदचिच्छरीरकत्वेनैकः अत एव नानात्वं देवमनुष्यादिरूपेण नानाविधतया भवितुमित्यर्थः। इच्छन्सन् योगः स्वात्मानुभवरूपं ध्यानं स एव तल्पं शयनं तस्मात् समुत्थितः संश्च, देहं स्वशरीरात्मकं हिरण्मयं रमणीयं वीर्यं चिदचिदात्मकं कारणद्रव्यं मायया स्वेच्छया त्रिधा त्रिभिः प्रकारैः करणज्ञातृज्ञेयरूपेणेत्यर्थः। व्यसृजत व्यधात्॥ १३॥ अथोक्तं त्रैविध्यं विवृणोति। अधिदैवमिति। प्रभुः ईश्वरः अधिदैवम्, अथ अध्यात्मम् अधिभूतम्, इति त्रिधा। व्यसृजदिति शेषः। तत्राधिदैवं नाम दिगादिदेवतासमधिष्ठित एकादशेन्द्रियरूपः करणवर्गः। अध्यात्मं नाम ज्ञातृवर्गः। अधिभूतं नाम पृथिव्याधिभूतगतगन्धादिर्ज्ञेयवर्गः। तत्र ज्ञातृसर्जनं नाम जीवानां तत्तत्कर्मानुसारतो देवादिदेहयोगसंपादनमेव। पौरुषं समष्टिपुरुषसंबन्धि एकं व्यष्टिकारणद्रव्यत्वेन बीजत्वादेकं तद्वीर्यं यथा त्रिधा करणविषयभोक्तृरूपेण अभिद्यत तत् शृणु, मत्त इति शेषः॥ १४॥ एवं प्रतिज्ञाय व्यष्टीन्द्रियसृष्टिविभागं वक्तुमिन्द्रियाश्रयप्राणव्यष्टिसृष्टिमाह। अन्तरिति। पुरुषस्य समष्ट्यात्मकवैराजस्य विचेष्टतः प्राणव्यापारं कुर्वतः सतः, ब्रह्मणि प्राणव्यापारं कुर्वति सतीत्यर्थः। शरीरे इत्यन्तःशरीरं तस्मिन्, य आकाशस्तस्मात् आकाशात्। यद्वा। अन्तः शरीरे आकाशादिति पृथक्पदे तस्मिन्पक्षे शरीरे अन्तः स्थितात् आकाशादिति योऽयम्। तच्छरीरान्तःस्थिताद‍ाकाशकार्यात्तत्प्राणात्मकाद्वायुविशेषादित्यर्थः। ओजः प्रवृत्तिसामर्थ्यम्। सहः वेगसामर्थ्यम्। बलं धारणसामर्थ्यं जज्ञे। ओजआदयो धर्मा अभवन्नित्यर्थः। ततः ओजआदिधर्माणां धर्मीभूतात्तत्प्राणात् प्राणः प्राणाख्यः महान्सर्वेन्द्रियेष्वग्रगण्यत्वान्मुख्य इत्यर्थः। असुः व्यष्टिप्राणिप्राणनहेतुर्मुख्योऽसुरित्यर्थः। जज्ञे, प्राण इत्येकवचनं जात्यभिप्रायम् आर्षं वा। इतरेषां शरीरान्तर्वर्तिनः प्राणा अभवन्नित्यर्थः॥ १५॥

उक्तविधस्य व्यष्टिप्राणस्य महत्त्वमाह। अनु प्राणन्तीति। सर्वजन्तुषु सर्वेषु प्राणिषु विषये प्राणन्तं चेष्टां कुर्वन्तं यं प्राणम् अनु पश्चात् प्राणा इन्द्रियाणि प्राणन्ति चेष्टां कुर्वन्ति अपानन्तं चेष्टां त्यजन्तं यं प्राणम् अनु पश्चात् सर्वे प्राणाः अपानन्ति चेष्टां त्यजन्ति। कथमिव नरदेवं राजानम् अनुगाः भृत्या इव। सर्वाण्यपीन्द्रियाणि प्राणाधीनवृत्तीनि भवन्तीत्यर्थः। यद्वा। व्यष्टिप्राणानां कारणभूतसमष्टिप्राणानुवर्तित्वमाह। अन्विति। यं वैराजशरीरस्थसमष्टिप्राणम् अन्वनुसृत्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्स्वभावानुवर्त्तित्वात्तदोजआदिसामर्थ्ययुक्ताः । एवं व्यष्टिप्राणाः प्राणापानादिव्यापारं कुर्वन्तीत्यर्थः ॥ १६ ॥ अथ गोलकापरसंज्ञाधिष्ठानसहितस्य देवतासहितस्य विषयसहितस्य रसनादीन्द्रियस्योत्पत्तौ मुख्यप्राणस्य कारणत्वं सूचयन्नाह । प्राणेनेति । क्षिपता अन्तर्व्याप्रीयमाणेन प्राणेन विभोर्ब्रह्मणः अन्तरा जाठराग्नौ दीपिते सतीति शेषः । क्षुत् क्षुधा तृट् तृषा च आजायते अजायतेत्यर्थः । ततः पिपासतः पातुमिच्छतः, जक्षतः अत्तुमिच्छतश्च सतः प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभूत् । समष्टिशरीराभिमानविधिमुखाद्व्यष्टिशरीरमुखान्युत्पन्नानीत्यर्थः । एवमग्रे समष्टिशरीराभिमानिविधिताल्वादेर्व्यष्टिशरीरताल्वादीन्यप्युत्पन्नानीति सर्वत्रोह्यम् । कुतः हस्तौ रुरुहतुः । 'नासिके निर्भिद्येताम् । निर्भिन्ने अक्षिणी तस्य । कर्णौ च निरभिद्येताम्' इत्यादिस्थले हस्तादीनां द्वित्वोत्पत्तिकथनेन ब्रह्मणो द्विबाह्वाद्यभावात्, देवादिव्यष्टिशरीरस्य हस्तादियुग्मविभागस्य सूचितत्वात् प्राणेन्द्रियव्यष्ट्युत्पत्तिरपि युक्तैवेति दिक् । पिपासतो जक्षतश्चेत्यत्र नटस्य शृणोतीतिवत्पञ्चम्यर्थे षष्ठी बोध्या । केचित्तु षष्ठीमेवात्र मन्यते ॥ १७ ॥ मुखत इति । मुखतः उक्तप्रकारेण मुखे तालु जिह्वामूलं निर्भिन्नं व्यष्टिशरीरिमुखान्तस्तालूत्पन्नमित्यर्थः । तत्र तालुनि जिह्वा उपजायते उपाजायतेत्यर्थः । ततस्तत्र नानारसः मधुराम्ललवणकटुकषायतिक्तात्मना षड्विधो रसः जज्ञे । योऽयं षड्विधोऽपि रसः सः जिह्वया अधिगम्यते ज्ञायते इत्यर्थः । तत्र तालु अधिष्ठानम्, जिह्वा इन्द्रियम्, नानारसो विषयः, वरुणस्तु देवता । एवं सर्वत्राधिष्ठानम् इन्द्रियं देवता विषय इत्येतच्चतुष्टयमनुक्तमप्यूह्यम् । मुखं विना जिह्वाया उत्पत्त्यसंभवात्प्राङ्मुखोत्पत्तिरभिहिता, न त्वधिष्ठानतया ततोऽधिष्ठानं तु ताल्वेव ॥ १८ ॥ विवक्षोरिति । विवक्षोर्वक्तुमिच्छोः भूम्नः सकलसद्गुणबाहुल्योपेतस्य भगवतः मुखतः आस्यात् वह्निः वागभिमानिनी देवता वागिन्द्रियम्, तयोः वाग्वह्न्योः व्यापाररूपमिति शेषः । व्याहृतं संभाषणम् अभूत् । अत्र मुखमधिष्ठानम्, वागिन्द्रियम्, व्याहृतं विषयः, वह्निर्देवता । तस्यैवंभूतस्य ब्रह्मणः गले कण्ठे सुचिरं बहुकालं वायोरिति शेषः, निरोधः समजायत । वै जले इति पाठे जलेऽण्डोदके ॥ १९ ॥

नासिके इति । नभस्वति वायौ दोधूयति अतिशयेन प्रचलति सति निरोधादिति शेषः । नासिके नासापुटे निरभिद्येतां वायुपूरिते नासिके समुत्पद्येतामित्यर्थः । ततः जिघृक्षतो घ्रातुमिच्छतः सतः तत्र नसि नासिकायां घ्राणः इन्द्रियम्, गन्धवहो गन्धग्राही वायुश्च प्रवृत्ताविति शेषः । नासिके अधिष्ठानम्, घ्राण इन्द्रियम्, गन्धो विषयः, वायुर्देवतात्र बोध्यः ॥ २० ॥ यदेति । यदा आत्मनि देहे निरालोकमालोकाभावः आसीदिति शेषः । अर्थाभावेऽव्ययीभावः । तदा आत्मानं स्वदेहं चकारादन्यद्वस्तु च दिदृक्षतो द्रष्टुमिच्छोः तस्य ब्रह्मणः अक्षिणी गोलकौ निर्भिन्ने । उत्पत्तिं प्राप्ते अभवतामिति शेषः । चक्षुरिन्द्रियाधिष्ठानभूते अक्ष्यात्मकगोलकावुत्पत्तिं प्राप्तावित्यर्थः । यदा अक्षिणी उत्पन्ने तदा तत्र चक्षुरिन्द्रियं गुणग्रहो रूपात्मविषयग्राहकं ज्योतिरादित्यात्मकम् उत्पन्नमिति शेषः । अक्षिद्वयमधिष्ठानम्, चक्षुरिन्द्रियम्, रूपं विषयः, आदित्योऽत्र देवता ज्ञेयः ॥ २१ ॥ बोध्यमानस्येति । ऋषिभिर्वेदैः बोध्यमानस्य अस्मदुक्तानि स्तुतिविषयवाक्यानि निबोधेति विज्ञाप्यमानस्येत्यर्थः । तत्तत्कृतबोधनम् आत्मनः ब्रह्मणः खस्य जिघृक्षतः सतः कर्णौ गोलकौ निरभिद्येताम् । तयोः दिशः दिगभिमानिन्यो देवताः । श्रोत्रमिन्द्रियम्, गुणग्रहः शब्दात्मकविषयग्राहकत्वं च आसीदिति शेषः । कर्णावधिष्ठानम्, श्रोत्रमिन्द्रियम्, शब्दो विषयः, दिशश्च देवताः ज्ञेयाः ॥ २२ ॥ वस्तुन इति । वस्तुनः यस्य कस्यचित्पदार्थस्य मृदु सुकोमलत्वं च, काठिन्यं कठिनता च, लघु लघुत्वं च, गुरु गौरवं च, ऊष्णमीषदुष्णत्वं च, शीतता च ताम् । यद्यप्युष्णत्वमपीन्द्रियविषय एवास्ति तथापि तस्य जिघृक्षाभावादोष्णत्वमित्युक्तम् । गुर्वुष्णेति पाठे यणादेशश्छान्दसः सवर्णत्वात् । जिघृक्षतः गृहीतुमिच्छतः त्वक् निर्भिन्ना । एकत्राधिष्ठानात्मिकान्यत्रेन्द्रियात्मिका सती उत्पन्ना । तस्यां त्वचि अधिष्ठानरूपायां त्वचीत्यर्थः । रोम रोमाणि । विभक्तिलोपश्छान्दसः । महीरुहाः वृक्षाः उत्पन्ना इति शेषः । अत्र त्वगधिष्ठानम्, रामाणीन्द्रियम्, कण्डूर्विषयः, महीरुहाः देवता ज्ञेयाः । तत्रेन्द्रियात्मिकत्वचि वायुः वातः वृतोऽधिष्ठितः, आवृत्य स्थितः सन्नित्यर्थः । त्वचा साधनेन अन्तः बहिश्च, लब्धः गुणः स्पर्शो येन सः तथाभूतः ज्ञेयः । अन्तर्बहिश्च वायुः स्पर्शसंपादक इत्यर्थः । अत्र चर्माधिष्ठानम्, त्वगिन्द्रियं स्पर्शो विषयः । वायुर्देवता ज्ञेयः । वस्तूनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकमतेनोक्तम् । किं च, त्वगिन्द्रियं सूक्ष्मस्थूलरूपं बाह्याभ्यन्तरं चेति द्विस्थानम्, स्थानभेदाच्च कण्डूः स्पर्शश्चेति विषयभेदः । विषयभेदाच्च महीरुहा वायुश्चेति देवताद्वयं बोध्यम् । एवं चैकमेव त्वगिन्द्रियं बाह्यचर्मगतं लोमसु व्याप्तमोषधिदेवताकं कण्डूग्राहकमेतदेवान्तर्बहिश्च स्पर्शं गृह्णद्वायुदैवतमिति । एतत्तु 'त्वचमस्य विनिर्भिन्नाम्' इत्यादिश्लोकद्वयेन तृतीयस्कन्धे स्पष्टीभविष्यति ॥ २३ ॥ हस्ताविति । नाना नैकविधानि यानि कर्माणि तेषां चिकीर्षा तया नानाकर्म चिकीर्षत इत्यर्थः । लब्धपदार्थादानं कर्त्तुमिच्छत इति भावः । तस्य ब्रह्मणः हस्तौ रुरुहतुर्निर्भिन्नौ भवत इत्यर्थः । तयोर्हस्तयोस्तु बलवान् पाणीन्द्रियापरपर्यायबलसहितः इन्द्रः अस्थात् । तदा उभयाश्रयमिन्द्रियदेवताश्रितम् आदानं वस्तूपादानम् अभवत् । हस्तावधिष्ठानम्, बलमिन्द्रियम्, आदानं विषयः, इन्द्रो देवता ज्ञेयः ॥ २४ ॥ गतिमिति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिकामिकामभीष्टां स्वेच्छानुसारामिति यावत्। गतिं चलनक्रियां जिघृक्षतो गृहीतुमिच्छतो ब्रह्मणः पादौ रुरुहाते उदपद्येताम्। पद्भ्यां पादयोरित्यर्थः। स्वयं यज्ञो विष्णुः स्थितः। नृभिः कर्मभिर्गत्याख्यकर्मशक्तिभिः हव्यं क्रियते। यज्ञोपयोगि हव्यात्मकद्रव्यं प्राप्यते इत्यर्थः। पादावधिष्ठानम्, गत्याख्यमिन्द्रियम्, हव्यार्थं गमने कृते तदाप्तिर्विषयः, विष्णुर्देवता ज्ञेयः॥ २५॥ निरभिद्यतेति। प्रजा अपत्यं च आनन्दो रतिश्च तयोः संबन्ध्यमृतं सुधासदृशं सुखं तदर्थयते तच्छीलस्तस्य, शिश्नः लिङ्गं निरभिद्यत उदपद्यत। शिश्नग्रहणं योषिल्लिङ्गस्याप्युपलक्षणं, तत्र उपस्थः आसीत्। तदुभयाश्रयं शिश्नोपस्थाश्रयं कामानां कामसंबन्धि प्रियं सुखं जायते वै। अत्र शिश्नोऽधिष्ठानम्, उपस्थ इन्द्रियम्, कामोपभोगजन्य आनन्दो विषयः। प्रजापतिर्देवता इति ज्ञेयम्॥ २६॥

उत्सिसृक्षोरिति। धातुमलं भुक्तान्नादीनामसारांशं पुरीषसंज्ञमिति यावत्। उत्सिसृक्षोस्त्यक्तुमिच्छोर्ब्रह्मणः गुदं गोलकरूपं मलत्यागस्थानं निरभिद्यत। ततो गुदात् पायुः, ततः मित्रः अभूत्। उभयाश्रयः इन्द्रियदेवताश्रयः उत्सर्गः धातुमलत्यागश्च अभूत् वै। गुदमधिष्ठानम्, पायुरिन्द्रियम्, मलत्यागो विषयः, मित्रो देवता ज्ञेयः॥ २७॥ एवं ज्ञानकर्मात्मकोभयेन्द्रियाणां व्यष्टिसृष्टिं कथयित्वा अन्यासामपि नाभ्यादिव्यष्टीनां प्राणापानाश्रयत्वं वदति। आसिसृप्सोरिति। पुरः स्वाधिष्ठितादेहात् पुर्य्यामन्यस्मिन् देहे आसिसृप्सोः प्रवेष्टुकामस्य ब्रह्मणः नाभिद्वारं निरभिद्यतेति शेषः। तत्र नाभिद्वारे अपानः, ततः अपानतः अपाने मृत्युः स्थितः। ततः उभयाश्रयमपानमृत्युसमाश्रयं पृथक्त्वं मरणम् आसीत्। नाभिरधिष्ठानम्, अपान इन्द्रियम्, पृथक्त्वं विषयः। मृत्युर्देवता ज्ञेयः॥ २८॥ आदित्सोरिति। अन्नपानानामन्नपानानि। आदित्सोरादातुकामस्य ब्रह्मणः कुक्षिश्च, अन्त्राणि च, नाडयो नाड्यश्च, आसन्। तयोः कुक्षिनाड्योः नद्यः समुद्राश्च आसन्। तदाश्रये तुष्टिः पुष्टिश्च अभूताम्। एकत्र कुक्षिरन्नसंग्रहेऽधिष्ठानम्, अन्त्राणीन्द्रियाणि, तुष्टिर्विषयः, समुद्रा देवताः। अन्यत्र पातसंग्रहे कुक्षिरधिष्ठानम्, नाड्य इन्द्रियाणि, पुष्टिर्विषयः, नद्यो देवताः॥ २९॥ निदिध्यासोरिति। आत्ममायां स्वरूपतिरोधायकप्रकृतिं निदिध्यासोर्निरूपयतः ब्रह्मणः हृदयं निरभिद्यत। ततः मनः ततः चन्द्रः, संकल्पः, कामश्च उभयाश्रय इत्यर्थः। एवावधारणे। कमलमुकुलाकारहृदयमधिष्ठानम्, मन इन्द्रियम्, संकल्पो विषयः, चन्द्रो देवता ज्ञेयः॥ ३०॥ तदेवमाधिदैवादिभेदं विभागपूर्वमुक्त्वा तेषामंशभूतानां धातुप्रभृतीनां स्वरूपमाह। त्वगिति द्वाभ्याम्। त्वक् स्थूलं च, चर्म तदुपरिस्थितं सूक्ष्मं मांसं च, रुधिरं च, मेदश्च, मज्जा चाऽस्थीनि च। द्वन्द्वैकवद्भावः। ये सप्त धातवः निर्दिष्टाः, ते भूम्यप्तेजोमयाः आरब्धाः। प्राणस्तु व्योमाम्बुवायुभिः आरब्धः। त्वगादीनां पाञ्चभौतिकत्वेऽपि वाग्याकाशयोराहारादिरूपेण संवर्द्धकत्वाभावाद्भूम्यादित्रिकमयत्वमुक्तम्॥ ३१॥

गुणात्मकानीति। इन्द्रियाणि गुणेषु शब्दादिषु आत्मा येषां तानि गुणात्मकानि। शब्दादिविषयग्रहणार्थं तदभिमुखस्वभावानीत्यर्थः। गुणा अपि यदात्मकाः, सः क इत्यत्र सोऽहंकार इत्याह। गुणाः शब्दादयः। भूतादेरहंकारात्प्रकर्षेण भवन्तीति तथाभूताः। इन्द्रियाण्यपि तत्प्रभवत्वात्तदात्मकान्येवेति बोध्यम्। मनः सर्वविकाराणामेव आत्मा सर्वविकारस्वरूपमेव भवतीत्यर्थः। बुद्धिः विज्ञायतेऽनेनेति विज्ञानं महत्तत्त्वं तद्रूपिणो 'महान्वै बुद्धिलक्षणः' इति वचनात्। अनेन बुद्धिमनसोः स्वरूपं चाप्युक्तम्॥ ३२॥ उपसंहरति। एतदिति। मही पृथ्वी आदिर्येषां तानि तैः अष्टभिः प्रकृत्या सहाष्टसंख्याकैः आवरणैः बहिः आवृतं च आवृतमेव। उत्तरोत्तरदशगुणपृथिव्यप्तेजोवाय्वाकाशाहंकारमहदव्यक्तरूपैरष्टभिरण्डावरणैर्बहिः संविहितावरणमित्यर्थः। एतत् अण्डकटाहापरसंज्ञब्रह्माण्डाख्यं भगवतः स्थूलं महत् रूपं ते तुभ्यं मया व्याहृतं सम्यगभिहितम्। अस्य महत्त्वं 'महतो महीयान्' इति श्रुतेः॥ ३३॥ एवं स्थूलमुक्त्वा सूक्ष्मशरीरमाह। अत इति अतोऽस्मात् स्थूलरूपात् परं परत्वेनावस्थितं सूक्ष्मतमं 'अणोरणीयान्' इति श्रुत्यातीवसूक्ष्मत्वेनोक्तम्। अव्यक्तं स्वप्रसादं विना चक्षुरादीन्द्रियाग्राह्यम्। 'यमेवैष वृणुते तेन लभ्यः' इति श्रुतेः। निर्विशेषणं निर्गतं विशेषणं यस्मात्तथाभूतं शार्करीयमूर्त्ताविव भेदकभाववर्जितमित्यर्थः। एवंभूतं कुतः वाङ्मनसः परम्। देवमनुष्यादिबुद्धिशब्दागोचरम्, तदपि कुतः। आदिरुत्पत्तिश्च, मध्यमुत्पत्तिनिधनयोरन्तरावस्था च, निधनं विनाशश्च, न विद्यन्ते तानि यस्येत्यनादिमध्यनिधनम् अवस्थात्रयशून्यमित्यर्थः। तथा कुतः नित्यं 'नित्यो नित्यानाम्' इति श्रुतेः। कालापरिच्छिन्नम्। कालपरिच्छिन्नमेवावस्थात्रयवत्स्यादिति भावः। एवंभूतं भगवतः सूक्ष्मतमं परं स्वरूपमस्तीति शेषः॥ ३४॥

अनयोः सूक्ष्ममतिमज्जनगृहीतत्वेन ते उभे अपि भगवज्जनग्राह्ये इत्याशयेनोपसंहरति। अमूनी इति। अमूनी स्थूलसूक्ष्मे एते भगवद्रूपे मया ते तव अनुवर्णिते। मायासृष्टे भगवदिच्छया विरचिते उभे अपि रूपे जगति ये अविपश्चितो ज्ञानदुर्बलाः जनाः ते न गृह्णन्ति न जानन्तीत्यर्थः। ये भगवदुपासकास्ते तु भगवन्मूर्त्तेः शुभाश्रयत्वेनोपास्यत्वादुभे रूपे अपि गृह्णन्त्येवेति भावः। एतदितरमूर्त्तेरशुभाश्रयत्वतोऽग्रहणं तु युक्तमेव। तथाच शौनकेन विधिसनकादीनां जगदन्तर्वर्त्तिनाम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यावेष्टितत्वेन शुभाश्रयतानर्हतामुक्त्वा आदौ बद्धानामेव पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपापन्नानां च, स्वतः शुद्धिविरहाच्छुभाश्रयताप्रतिषेध उक्तः 'आब्रह्मस्तम्बपर्यन्ता जगदन्तर्भवास्थिताः। प्राणिनः कर्मजनितसंसारवशवर्त्तिनः। यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः। अविद्यान्तर्गताः सर्वे ते हि संसारगोचराः। पश्चादुद्भूतबोधाश्च ध्यानेनैवोपकारकाः। नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः। तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत्' इत्यादिना प्राधान्येनोपास्यत्वनिषेधः, भगवद्विभूतित्वेनोपासनं तु सम्यगिष्टमेवेति ॥ ३५ ॥ शरीरशरीरिभावेन स्थूलस्य भगवद्रूपत्वमुपपादयितुं ब्रह्मादिरूपेण भगवत एव स्रष्टृत्वादिकमाह। स इति। वाच्यं च वाचकश्च तयोर्भावस्तत्त्वं तया अवस्थितः। तत्र जगच्छरीरत्वतः वाच्यतयावस्थितः। आकाशशरीरकत्वाच्चाकाशगुणशब्दरूपेण वाचकतयावस्थित इत्यर्थः। अकर्मकः अकर्मवश्यः सकर्मा संकल्पमात्रव्यापारकः। परः परमात्मा सः भगवान् ब्रह्मरूपधृत् सन् नामानि च, रूपाणि च, क्रियाः कृत्यानि च, ताः धत्ते व्याकरोति। तत्र प्रजापत्यादीनि नामानि तद्वाच्यानि रूपाणि तद्विधेयानि जगत्सर्गादिकर्माणि क्रिया इति विवेकः॥ ३६ ॥ 'नामरूपक्रिया धत्ते' इत्यनेन भगवतो यत्तदाधानमुक्तं तदेव प्रपञ्चयति। प्रजापतीनित्यादिसार्द्धैस्त्रिभिः। तत्र द्वितीयान्तानां धत्ते इत्यनेनान्वयः। प्रजापतीन् दक्षादीन्, मनून् स्वायंभुवादीन्, देवानिन्द्रादीन्, ऋषीन् सप्तर्षिप्रभृतीन्, पृथगरूपसरूपभेदेन द्विविधानित्यर्थः। पितृगणानर्यमाग्निष्वात्तादीन्, सिद्धाश्च, चारणाश्च, गन्धर्वांश्च, तान्। विद्याधराश्च, असुराश्च, गुह्यकाश्च तान्। तत्र सिद्धा विश्वावसुप्रभृतयः। चारणाः परमनोरञ्जकवार्त्ताविधानचतुराः। गन्धर्वास्तुम्बुरुप्रभृतयः देवगायकाः। विद्याध्रा जीमूतवाहनादयः। असुरा नरामिषाशनवर्जिता दैत्यविशेषाः, गुह्यका मणिभद्रादयः॥ ३७ ॥

किन्नरेति। किन्नराश्चाप्सरसश्च ताः। किन्नरानप्सरश्चेत्यर्थः। तत्र किन्नरा अश्वादिमुखा नराकृतयः, अप्सरसो मेनकाद्याः, नागान् काद्रवेयान्, सर्पांस्तक्षकादीन्, किंपुरुषांश्चोरगाश्च तान्। तत्र किंपुरुषा देवयोनिविशेषाः। उरगाः सर्पविशेषाः। मातरश्च, रक्षांसि च, पिशाचाश्च, तान्। तत्र मातरो ब्राह्म्यादयः। रक्षांसि मायाविनो लङ्कादिनिवासिनो नरामिषाद्याहाराः। पिशाचा मांसाशिनो भूतविशेषा घण्टाकर्णादयश्च। प्रेताश्च, भूतानि च, विनायकाश्च तान्। तत्र प्रेताः सवासनमृता भूतविशेषाः। भूतानि बालग्रहाः। भूतस्य पुंस्त्वे भृङ्ग्यादयः। विनायका विघ्नाभिमानिनः॥ ३८ ॥ कूष्माण्डेति। कूष्माण्डाश्च, उन्मादाश्च, वेतालाश्च, तान्। तत्र कूष्माण्डा रुक्माण्डादयः। उन्मादाः कालकर्णादयः। वेताला अभिचारार्थोपास्या भूतविशेषाः। यातुधानान् भृगुकुत्सादीन् रक्षोविशेषान्। ग्रहानादित्यादीन्नवापि। खगानन्नलपक्ष्यादीन्। मृगान् कृष्णसारादीन्। पशून्गोमहिष्यादींश्चतुःपादान्। वृक्षांश्चलदलादींरुरुभेदान्। गिरीन् लोकालोकादीन्। नृपाश्च सरीसृपाश्च तान्। तत्र नृपाः प्रियव्रतादयः। नृपेति संबोधनं वा। सरीसृपाः सहस्रपादादयः॥ ३९ ॥ उक्तानां प्रजापत्यादीनां संख्यानं कर्तुमशक्यत्वात्सामान्यतो निर्दिशति। द्विविधा इति। द्विविधाः स्थावरजङ्गमरूपेण द्विप्रकाराः। चतुर्विधाः जरायुजाण्डजस्वेदजोद्भिज्जरूपेण चतुःप्रकाराः। जलं च, स्थलं च, नभ आकाशं च तान्योकांसि येषां ते तान्, ये अन्ये देवादयस्तांश्चापि धत्ते इति पूर्वेणान्वयः। ननु देवासुरमनुष्यात्मककुशलाकुशलमिश्रादिष्वन्यतमेनैकेन रूपेणैव किं न धत्ते इत्यत्राह। कुशलेत्यादिना। कुशला उत्तमाः, अकुशला नीचाः, मिश्रा मध्यमाः, कर्मणां चेत्रज्ञानुष्ठितपुण्यापुण्यरूपकर्मणां पराः प्राप्याः गतयः फलानि भवन्ति। कर्मणां विचित्रत्वात्तत्फलानामपि वैचित्र्यमिति भावः॥ ४० ॥

सत्वादिगुणभेदेन कर्मगतिवैचित्र्यं प्रपञ्चयति। सत्वमितिसार्द्धेन। हे राजन् सुरा देवाश्च नरो मनुष्याश्च, नारका असुराश्च, सुरनृनारकाः। सुरादिरूपा इत्यर्थः। सत्वं रजः तमः इत्येवं तिस्रस्त्रिविधाः गतयः सन्ति। तत्रापि सात्विकराजसतामसात्मकसुरनृनारकासु गतिष्वपि यदा एकैकतर एकैक इत्यर्थः। स्वभावः सात्त्विकादिः। अन्याभ्यामवशिष्टाभ्यां द्वाभ्यां स्वभावाभ्याम् उपहन्यते अभिभूयते। तदा एकैकशः गतयः त्रिधा त्रिभिः प्रकारैः भिद्यन्ते। अत्रायं विवेकः। सत्वहेतुकपुण्यफला सुगतिः, रजोहेतुकपुण्यपापफला मनुष्यगतिः, तमोहेतुकपापफला नारकी गतिः, ताभिः केचित्सत्वप्रचुराः, केचिद्रजःप्रचुराः, केचित्तमःप्रचुराः इत्युच्यन्ते। तत्रापि सत्वप्रचुरा उत्तमाः रजःप्रचुराः मध्यमाः,। तमःप्रचुराः कनिष्ठाः। इत्युच्यन्ते एवं सात्त्विकादयोऽपि प्रत्येकं त्रिधा भवन्तीति। अनेन 'यावत्यः कर्मगतयो यादृशीद्विजसत्तम' इति राजप्रश्नोऽपि दत्तोत्तरो ज्ञेयः॥४१॥ एवं ब्रह्मान्तर्यामित्वेन स्रष्टृत्वं कथयित्वा विष्णुरूपेण पालयितृत्वमाह। स इति। जगद्धाता जगत्स्रष्टा स एव भगवान्, तिर्यञ्चश्च नराश्च सुराश्च ते आत्मानो येषां तैः तिर्यङ्नरसुररूपैः। तत्र तिर्यञ्चो वराहमीनकच्छपहंसादयः। नरा रामकृष्णप्रभृतयः। सुरा वामनसुयज्ञादयः। एतैरवतारैः इदं विश्वं जगत् स्थापयन् पालयन् धर्मरूपधृत् धर्मशरीरकः सन् पुष्णाति भोगैः संवर्द्धयति॥ ४२ ॥ रुद्रशरीरत्वेन संहर्तृत्वमाह। तत इति। ततः स्थितिविधानानन्तरं काले प्रलयकाले संप्राप्ते सति आत्मनः सकाशात् यत इदं सृष्टं तत। यद्वा। आत्मनः आत्मना संबन्धसामान्ये षष्ठी। सृष्टम् इदं यत्तदिति संबन्धः। कालाग्निरुद्रात्मा सन् अनिलः घनानीकम् इव संनियच्छति संहरति॥ ४३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगद्व्यापारस्य जीववत्कर्मायत्तत्वमाशङ्क्य नेत्याह। इत्थमिति। भगवत्तमः ज्ञानाद्यप्राकृतगुणैरतिपूर्णतमः भगवान् इत्थंभावेन प्रकृतस्रष्टृत्वादिभावेन संयुक्तः, कथितः सम्यक् प्रतिपादितः। तथापि सूरयो ब्रह्मविदः इत्थंभावेनोक्तरीत्या चिदचिद्रूपेण परं केवलं द्रष्टुं न अर्हन्ति हि। किं तु तद्विलक्षणत्वेन द्रष्टुमर्हन्ति। भगवान् भगवत्तम इत्युभे परमेश्वरविशेषणे। जीववैलक्षण्यप्रतिपादके। तेन जीवस्याभगवत्तमत्वात्तद्व्यापारः कर्मायत्तः भगवतस्तथाभूतत्वाभावात्सोऽकर्मायत्त इति भावः ॥ ४४ ॥ ननु 'स एव सृज्यः स च सर्गकर्त्ता। तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम्' इत्यादिना ह्येकस्यैव सृज्यत्वं स्रष्टृत्वं कर्त्तृत्वमकर्त्तृत्वं चावगम्यते, तत्कथं युज्यते इत्याशङ्क्योभयतारूपयोर्विधिनिषेधयोर्विषयव्यवस्थां दर्शयति। नास्येति। अस्य जगतः कर्मणि सृष्टौ परस्य परमात्मनः जन्मादि न अनुविधीयते। परमात्मा स्वरूपेण सृज्यो भवतीति नोच्यते इत्यर्थः। किं तु सृज्यवस्त्वन्तरात्मकतया तद्विशिष्टत्वात् सृज्य इत्युच्यते, न स्वतः। तस्मात् स्वरूपेण तस्याजत्वम्, सृज्यत्वं तु तद्द्वारकमित्यविरोध इति भावः। एवमेकस्य सृज्यत्वस्रष्टृत्वविरोधं परिहृत्य कर्त्तृत्वाकर्त्तृकत्वविरोधं परिहरति। कर्त्तृत्वमिति। मायया प्रकृत्या जीवेष्विति शेषः। कर्त्तृत्वं प्राकृतकरणकलेवरसापेक्षं कर्त्तृत्वम्, आरोपितं समाहितमस्ति, तत्तथाविधं कर्त्तृत्वं भगवति नास्तीति शेषः। इत्येवं प्रतिषेधार्थं भगवति तद्वर्ण्यते इति शेषः। हि प्राकृतकरणकलेवरसापेक्षं जीवगतं कर्त्तृत्वं यत्तत्परमात्मनि नास्ति। संकल्पमात्रेण कर्त्तृत्वं तु अनुविधीयते इत्युभयोरविरोधः। 'कामाच्च नानुमानापेक्षा' इति सूत्रे भगवतः प्रकृत्यधीनकर्त्तृत्वाभावः प्रतिपादितोऽस्ति 'नास्य कर्मणि जन्मादौ परस्यानुविधीयते। कर्त्तृत्वप्रतिषेधार्थम्' इत्यपि पाठस्तत्रायमर्थः। ननु पूर्वश्लोकार्थे हि तद्विलक्षणत्वेन द्रष्टुमर्हन्तीति यदुक्तमेतत्कथमुपपद्यते जीववदस्यापि जन्मकर्मादिदर्शनादित्यत आह नास्येति। अस्य चिदचिदात्मकप्रपञ्चस्य जन्मादौ कर्मणि परस्य परमात्मनः न अनुविधीयते, परमात्मनः प्रपञ्चवत्कर्मायत्तजन्मादिकं न प्रतिपाद्यते इत्यर्थः। 'अजायमानो बहुधा विजायते' इत्यादिवेदान्तवाक्यैरिति शेषः। परमात्मनो जन्मादिकमकर्मायत्तमिति कुतो ज्ञायते इत्याह। हि यस्मात् तज्जन्मकर्मादिकं मायया स्वकीयसंकल्परूपज्ञानेन, माया वयुनं ज्ञानमिति ज्ञानपर्यायोऽत्र मायाशब्दः। 'मायया सततं वेत्ति प्राणिनां च शुभाशुभम्, इति प्रयोगदर्शनात्। कर्त्तृत्वप्रतिषेधार्थं कर्मायत्तकर्त्तृत्वस्य प्रतिषेधार्थम् आरोपितं स्वस्मिन् गृहीतमित्यर्थः। मदीयजन्मकर्मादिकं जीवानामिव न कर्मायत्तमिति प्रदर्शनाय स्वेच्छयैव स्वस्मिन्दैवमानुषजन्मकर्मादिकं संग्रहीतमिति भावः। तथाचोक्तं भगवतैव। 'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया' इति ॥ ४५ ॥

'पुरुषोऽण्डं विनिर्भिद्य' इत्यादिनोक्तमर्थमुपसंहरति। अयं त्विति। ब्रह्मणो ब्रह्मसंबन्धी अयं कल्पो महाकल्पः सविकल्पः विकल्पोऽवान्तरकल्पस्तत्सहितः अवान्तरकालविभागसहित इत्यर्थः। उदाहृतः दिङ्मात्रेणोक्तः। अथास्मिन्कल्पे इव कल्पान्तरेऽपि सृष्टिर्जायते इत्याह विधिरिति। यत्र महाकल्पे प्राकृताः महदादिपृथिव्यन्ताः वैकृताः पृथिव्यादिविकारैरारब्धाश्चेत्येवं द्विविधाः सर्गाः सन्ति। विधिः एवंभूतोऽयं प्रकार इत्यर्थः। साधारणः अन्यैर्महाकल्पैः समानः। अस्यायं भावः। मन्वन्तरादिविविधकल्पसहितः अयं ब्रह्मणः प्रथमः कल्पः मया तत्रोदाहृतः। तथाविधानामन्येषां ब्रह्मकल्पानामवान्तरकल्पानां च विधिः समान एवेति। अनेन 'पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः' इत्यादिनोद्भावितः 'धाता यथा पूर्वमकल्पयत्' इत्यादिश्रुतिभिर्यो विरोधः स परिहृतः। पुरुषावयवानामुपासनार्थं मिथस्तादात्म्योपदेशेन प्रतिकल्पं सृष्टेरेकरूप्ये सति विरोधाभावः स्फुट एव ॥ ४६ ॥ श्रोतृप्रवृत्त्यर्थं वक्ष्यमाणस्कन्धार्थं सविस्तरं प्रतिजानीते। परिमाणमिति। कालस्य परिमाणं स्थूलसूक्ष्मात्मिकां परिमितिं लक्षणेन सहितो विग्रहो लक्षणविग्रहः कल्पस्य लक्षणविग्रहस्तं च कल्पलक्षणं विग्रहस्वरूपं चेत्यर्थः। तत्र कल्पलक्षणं कल्प ईयान् एवंरूप इति। विग्रहोऽवान्तरकल्पो मन्वन्तरादिविभागरूप इति द्वयम्। यथा यथावत् विस्तरेणेत्यर्थः। पुरस्तात्तृतीयस्कन्धे व्याख्यास्ये विस्तरेण व्याख्यास्यामि। तत्र पाद्मं कल्पम् अथो कार्त्स्न्येन व्याख्यायमानं शृणु। पाद्मः कल्पस्तु ब्रह्मणः प्रथमपरार्द्धान्तिमभवः। तत्र यथास्माकं प्रतिपदादिपूर्णिमान्तः शुक्लः पक्षः, पुनः प्रतिपदादिः अमान्तः कृष्णपक्षः। तद्वद्विधेः श्वेतकल्पादिकौर्मकल्पान्ताः पञ्चदश कल्पाः शुक्लपक्षीयप्रतिपदादिपूर्णिमान्ततिथिस्थानीयाः। नारसिंहकल्पादिपितृकल्पान्ताः पञ्चदश कल्पाः कृष्णपक्षीयप्रतिपदाद्यमावास्यान्ततिथिस्थानीयाः। तत्र पितृकल्पपद्मकल्पयोः पर्यायता। तत्र तस्य शुक्लप्रतिपत्स्थानीयः श्वेतः कल्पः। द्वितीयो द्वितीयास्थानीयो नीललोहितः कल्पः। तृतीयस्तृतीयस्थानीयो वामदेवः कल्पः। एवं गाथान्तरः, रौरवः, प्राणः, बृहत्, कन्दर्पः, सेव्यः, ईशानः, ध्यानः, सारस्वतः, उदानः, गारुडः, कौर्मः, कृष्णपक्षप्रतिपत्स्थानीयः नारसिंहः द्वितीयास्थानीयः समाधिः। आग्नेयः, विष्णुजः, वंशः, सोमवंशः, भावनः, सपुमान्, वैकुण्ठः, आर्चिषः, लोकः, वैराजः, गौर्य्याख्यः, माहेश्वरः, पितृकल्पः, अयं विधेरमावास्यास्थानीयः। एतेषु मध्ये द्वितीयपरार्द्धादौ श्वेतः कल्पस्तत्र वराहप्रादुर्भावात स श्वेतवराहाख्यः कल्प इत्युच्यते ॥ ४७ ॥

एवं स्थिते 'इत्यभिव्याहृतं राजा निशम्य भरतर्षभः' इत्यादिना राजा भूयः शुकं किं पृष्टवानिति राजप्रश्नगर्भशौनकप्रश्नस्य 'वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः' इत्यादिना सूतेनोक्तमुत्तरं श्रुत्वा पुनरपि राजकृतप्रश्नानामेव शुकोक्तान्युत्तराणि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विदुरमैत्रेयसंवादरूपेण श्रोतुकामः कथान्तरं पृच्छति। यदाहेति त्रिभिः। हे सूत भागवतोत्तमः भगवद्भक्तेषु श्रेष्ठः। भगवान् 'ऐश्वर्यस्य समग्रस्य' इत्यादिनोक्तभगसंपन्नः क्षत्ता विदुरः सुदुस्त्यजांस्त्यक्तुमशक्यान् बन्धून् धृतराष्ट्रादीन् त्यक्त्वा भुवः पृथिव्याः संबन्धीनि तीर्थानि चचार इति यद्भवान् आह ॥ ४८ ॥ ततः किं तत्राह। कुत्रेति। तस्य विदुरस्य कौषारवेर्मैत्रेयस्य च कुत्र कस्मिन्प्रदेशे अध्यात्मसम्मतः अध्यात्मविज्जनस्वीकृतः संवादः अभूदिति शेषः। पृष्टः विदुरेणानुयुक्तः भगवान् स मैत्रेयः तस्मै विदुराय, यद्वा यदेव तत्त्वं ह स्फुटं यथा तथा उवाच। तन्नः ब्रूहीत्युत्तरेणान्वयः ॥ ४९ ॥ ब्रूहीति। हे सौम्य सूत तत इदं तत्त्वं विदूरस्य विचेष्टितं बन्धुत्यागनिमित्तं च यत् तत् पुनर्भूयोऽपि यथा येन प्रकारेण आगतवान् धृतराष्ट्रसमीपे इति शेषः। तत्र यन्निमित्तं तन्नो ब्रूहीत्यर्थः ॥ ५० ॥ राज्ञेति। परीक्षिता राज्ञा पृष्टः महामुनिः श्रीशुकः यन्मैत्रेयोक्तम् अवोचत्। तदेव राजप्रश्नानुसारतः राजकृतप्रश्नानुक्रमेण वो युष्मभ्यम् अभिधास्ये कथयिष्यामि शृणुत तच्छ्रवणं कुरुतेत्यर्थः। यूयमिति शेषः। अत्रायमर्थः यत् यूयं पृच्छथ इदमेव राजापि शुकं पृष्टवान्। शुकोऽपि विदुरमैत्रेयसंवादं पुरस्कृत्य ये राज्ञा पूर्वं प्रश्नाः कृताः तदनुसारेण सर्वं पुराणार्थमवोचत्तदेवाहं वोऽभिधास्यामि तथैव यूयं शृणुतेति ॥ ५१ ॥

हरिणा विधये येन श्रीमद्भागवतं परम्। तेनापि नारदायोक्तं तत्तन्मूलं हरिं भजे ॥ १ ॥
श्रीमद्भागवतस्यैषा द्वितीयस्कन्धसंगता। कृत्वार्पिता हरेरङ्घ्र्योष्टीकेयं भक्तरञ्जनी ॥ २ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां द्वितीयस्कन्धे दशमोऽध्यायः ॥ १० ॥

इति श्रीमद्भागवते भक्तरञ्जनीटीकायां द्वितीयस्कन्धः समाप्तः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तृतीयः स्कन्धः

प्रथमोऽध्यायः

श्रीशुक उवाच

एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल। क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥ १ ॥

श्रीसहजानन्दस्वामिने नमः।

ॐ नमः श्रीभागवतपरमहंसपरिसंसेवितचरणकमलयुगलाय निजजनान्तःकरणैकावासस्थानाय श्रीस्वामिनारायणाय।

यच्चारित्रजलौघचञ्चलतरङ्गस्नानसक्तश्रितं नृणां संसृतिवार्द्धिराशु परिशुष्यत्येव घोरो महान्।
यस्माच्छ्रीपुरुषोत्तमाज्जगदिदं काले सदा जायते तत्त्वं योगिजनस्य यस्तमनिशं ध्याये हृदीष्टप्रदम् ॥ १ ॥

इहागाधे सद्भागवतजलधौ संप्रपतितं तृतीयस्कन्धोदभ्रमचलिततत्त्वात्मकमणिम्।
विमज्ज्योन्मज्ज्यान्वेषणपरतरः प्राप्य तमहं प्रकाशं संकुर्वन्मुनिपतिमलं नौमि मतये ॥ २ ॥
आदौ भगवता प्रोक्तं संक्षेपाद्विधये स्वयम्। शेषेण विस्तरात्प्रोक्तं प्राह भागवतं पुनः ॥ ३ ॥
द्वेधेवं श्रीभागवतसंप्रदायप्रवृत्तिका। अस्ति तत्र द्वितीये तच्चतुःश्लोक्या निरूपितम् ॥ ४ ॥
तदेव ब्रह्मदेवर्षिसंवादे दशलक्षणम्। प्रोक्तं तदत्र शेषोक्त्या विस्तरेण विवेचितम् ॥ ५ ॥
तृतीये प्रथमं तत्र क्षत्तुर्मैत्रेयसंगमः। प्रोक्तश्चतुर्भिरध्यायैर्विशेषेण विबुद्धये ॥ ६ ॥
ततोऽष्टभिर्विसर्गैश्च सह सर्गप्रपञ्चनम्। आविर्भावादिकं क्रौडं सप्तभिस्तत ईरितम् ॥ ७ ॥
समाहारो विसर्गस्य तत एकेन कीर्तितः। चतुर्भिस्तत्प्रसङ्गेन कापिलं जन्म कीर्तितम् ॥ ८ ॥
आख्यानं नवभिः प्रोक्तं कपिलस्य ततः परम्। स्कन्धस्यैवं प्रवृत्तिर्हि तृतीयस्यास्ति शोभना ॥ ९ ॥
त्र्यधिकत्रिंशताध्यायैरत्रैवं सर्गवर्णनम्। सर्गोऽण्डसंभवः क्षोभाद् गुणानामीशवीक्षया ॥ १० ॥
अध्याये प्रथमे तत्र त्यक्त्वा बन्धून्निरायुषः। संवादो निर्गतस्योक्तः क्षत्तुः प्रागुद्धवेन हि ॥ ११ ॥

अथात्रभवान् श्रीशुकमुनिः पूर्वस्कन्धान्ते 'यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु' इति स्वेन प्रतिज्ञातमर्थं सम्यक् प्रतिपिपादयिषुर्निजप्रतिपिपादयिषितस्य प्रामाणिकताप्रथिमसिद्ध्यै विदुरस्य मैत्रेयस्य च संवादं प्रस्तोष्यंस्त्वयाहमिव कौषारविरपि क्षत्त्रा पृष्ट इत्याह श्लोकद्वयेन। एवमिति। वो युष्माकं पाण्डवानामित्यर्थः। मन्त्रकृत् दौत्यकर्त्ता अखिलेश्वरः प्राणिशास्तृयमांशसंभूतत्वादखिलेश्वरत्वेन व्यवहृतः भगवान् साक्षाद्भगवदैकान्तिकोपासकत्वोद्भूतैश्वर्यसंपन्नत्वाद्भगवानिति विशेषितः, अयं विदुरः आत्मसात्कृतमात्मीयत्वबुद्ध्या संगृहीतं पौरवेन्द्रगृहं धृतराष्ट्रसौधं हित्वा त्यक्त्वा। यद्वा। यदा प्रविवेश वनमिति शेषः। तदा ऋद्धिमत्संपन्नसर्वोत्तमोपकरणं स्वगृहं निजभवनं त्यक्त्वा वनं प्रविष्टेन क्षत्त्रा विदुरेण भगवांस्त्रैकालिकज्ञानवान् मैत्रेयो मित्रासुतः कौषारविः एतद्यत्त्वया पृष्टं तदेव भवदीयप्रश्नानुसारेणैवेत्यर्थः। पुरा पृष्टः किल। स्वस्वीयद्रोहितया पौरवेन्द्रगृहस्य भगवता प्रथमतस्त्यक्तत्वात्पुनस्त्यागायोगाद्भगवदर्हविशेषणानि अर्थान्तरेण विदुरपरतया व्याख्यातानि। तथात्वे त्यक्त्वा हित्वेति पुनरुक्तिप्राप्तौ त्यक्त्वेत्यनेन विदुरस्य पौरवेन्द्रगृहस्य मानसस्त्याग उक्तस्ततो भगवत्संबन्धेन ऋद्धिमतः स्वगृहस्य देहेन त्यागस्योक्तत्वात्पुनरुक्त्यभावः सूचितः ॥ १–२ ॥ अथेदानीमत्र लब्धावसरो राजा पृच्छति श्लोकद्वयेन। कुत्रेति। भगवतः यमांशत्वादैश्वर्यवतः क्षत्तुर्विदुरस्य मैत्रेयेण सह कुत्र कस्मिन् प्रदेशे संगमः संगतिः। आस बभूव। तेन मैत्रेयेण सह कदा वा कस्मिन्काले नु संवादः अभूत्। हे प्रभो शुक एतत् नोऽस्मभ्यं वर्णय ॥ ३ ॥ स्वस्य शुश्रूषालौल्यमाविष्कुर्वन्नाह। न हीति। महात्मनो भगवत्येकस्मिन्नेव प्रवणचित्तस्य तस्य विदुरस्य संबन्धी, साधूनां सतां यो वादो हरिचरित्रप्रकाशकतारूपस्तेनोपबृंहितो विस्तृतः, वरीयसि परावरतत्त्वज्ञानादिगुणैरुत्कृष्टे तस्मिन्मैत्रेये यः प्रश्नः सः अल्पस्यार्थस्योदयो यस्मात्सोऽल्पार्थोदयः अल्पप्रयोजनोदयः न हि नैव भवति। अतस्तदवश्यं मया श्रोतव्यमिति भावः ॥ ४ ॥ सूतः शौनकप्रश्नपरिहाराय विदुरमैत्रेयसंवादं कथयिष्यतः शुकस्य परीक्षिता संवादं कथयति। स एवमिति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परीक्षिता राज्ञा एवं पृष्टः साकल्येन संपृष्टः सुष्टु बहु वेत्तीति सुबहुवित् स ऋषिवर्यः ऋषिषु श्रेष्ठः, अयं मद्बुद्धिविषयस्थः श्रीशुकमुनिः प्रीतात्मा अतिसुन्दरप्रश्नश्रवणसंप्रसन्नचित्तः सन् श्रूयतां इति तं प्रत्याह ॥ ५॥ एवं राज्ञा संप्रष्टो मुनिवरो विदुरमैत्रेयसंवादं प्रस्तोतुमिच्छुस्तावत्त्यागानर्हस्यापि पौरवेन्द्रगृहस्य विदुरकृतत्यागे निमित्तत्वेन कौरवापराधानाह। यदेत्येकादशभिः श्लोकैः। यदा तु विनष्टा नाशं प्राप्ता दृष्टिर्धर्मविषयकज्ञानचक्षुर्यस्य सः, अत एव अधर्मेण असाधून् खलान् स्वसुतान् दुर्योधनादीन् स्वपुत्रान् पुष्णन् पोषणं कुर्वन् राजा धृतराष्ट्रः यविष्ठस्य कनिष्ठस्य भ्रातुः पाण्डोः विबन्धून् पितृहीनान् सुतान् युधिष्ठिरादीन् लाक्षाभवने लाक्षोपगूढगृहे प्रवेश्य प्रविष्टान्कृत्वा ददाह दग्धवान्। तदा स विदुरः अयान्निर्गत इत्येकादशे क्रियासंबन्धः ॥ ६ ॥

यदेति। यदा नृपो धृतराष्ट्रः सभायां स्नुषाया आत्मनः पुत्रवधूरूपायाः, स्वास्रैः स्वकीयनेत्राश्रुभिः कुचकुङ्कुमानि स्वस्तनगतकुङ्कुमानि हरन्त्याः क्षालयन्त्याः कुरुदेवस्य युधिष्ठिरस्य देव्याः स्वर्गाभिमानिश्यात्मद्रौपद्याः पत्न्याः केशाभिमर्शं कबरीभारपरामर्शलक्षणं गर्ह्यं निन्द्यं सुतकर्म दुःशासनकृतक्रियां न वारयामास। तदायादिति अन्वयः ॥ ७ ॥ द्यूत इति। तमो यथार्थज्ञानग्लानिकारणं पुत्रवचनं जुषाणोऽङ्गीकुर्वाणः नृपः यद्यदा वनागतस्य वनात्प्रत्यागतस्य सत्यं धर्म एव अवलम्ब आश्रयो यस्य तस्य, साधोः तु साधुलक्षणलक्षितस्यैव, द्यूते अधर्मेण पाशकपरिवृत्तिविधानरूपेणाधर्मेण अधर्मरूपेण दुर्योधनेन वा जितस्य पराजितस्य समयेन प्रतिज्ञावसरेण वनवासावसानसमयेन हेतुनेत्यर्थः। दायं रिक्थं याचतो याचमानस्य अजातशत्रोर्युधिष्ठिरस्य न अदात्। समयेऽपि भागं न ददावित्यर्थः। तदायादिति संबन्धः ॥८॥ यदेति। पार्थेन युधिष्ठिरेण प्रहितः प्रेषितः जगतां गुरुर्धर्मोपदेष्टा कृष्णः वसुदेवनन्दनो भगवान् सभायां यानि पुंसां भीष्मादीनाम् अमृतायनानि अमृतस्राविणि वचांसि हितोपदेशवचनानि जगाद। तानि वचांसि, यदा च क्षतो हतः पुण्यलेशोऽल्पमात्रमपि सुकृतं यस्य सः 'लिश अल्पीभावे' इति धातोर्लेश इति रूपम्। अनेनास्य पापं बहुलं पुण्यमल्पं तदपि नष्टमित्युक्तम्। राजा धृतराष्ट्रः उरु बहु यथा तथा न मेने तदायादिति संबन्धः ॥९॥ यदेति। यदा पूर्वजेन धृतराष्ट्रेण मन्त्राय मन्त्रालोचनं कर्तुम् उपहूतः स्वसमीपे आहूतः भवने तदावासवेश्मनि प्रविष्टः मन्त्रदृशां मन्त्रविदां वरीयान् विदुरः पृष्टः अनुयुक्तः सन् अथ प्रश्नानन्तरं तत् आहोवाच। किम्। मन्त्रिणः अद्यापि यत् वैदुरिकमिदं विदुरवाक्यमिति वदन्ति। नाम अनूद्य केनचित्कस्मैचित्प्रमाणाय विदुरनयश्लोके पठिते इदं वैदुरिकं वाक्यमत्र प्रमाणरूपं सत्यमेवास्तीति वदन्तीत्यर्थः। यद्वा। यत् वैदुरिकं विदुरोक्तं यमेव मन्त्रमित्यर्थः। मन्त्रिण इतरे सर्वे मन्त्रकर्त्तारः मन्त्रकाले प्रमाणायाद्यापीति शेषः। वदन्ति, तदाहेति अन्वययोजना। किलेत्यवधारणे ॥ १० ॥

तदेव समस्याह। अजातशत्रोरिति त्रिभिः। दुर्विषहं सोढुमशक्यं तव आगोऽपराधं तितिक्षितो मृष्यतः सहमानस्येत्यर्थः। अजातशत्रोर्युधिष्ठिरस्य दायं प्रतियच्छ देहि। ननु तितिक्षाऽसमर्थधर्मः, असमर्थेन केवलं तितिक्षावतैव भाव्यमित्यत्राह। अनुजैरर्जुनादिभिः सहितः सहानुजः वृकोदरो भीमः स एवाहिः सर्पो वृकोदराहिः। रुषा त्वदपराधसमीक्षणजातक्रोधेन श्वसन्निःश्वासान्मुञ्चन्सन्नित्यर्थः। यत्राजातशत्रुसंनिधौ वर्त्तते युधिष्ठिराज्ञां प्रतीक्षमाणस्तिष्ठतीत्यर्थः। यद्यस्माद् वृकोदरात् त्वम् अलं नितरां बिभेषि। यं त्वमिति पाठे त्वं यं प्रति बिभेषीत्यर्थः ॥ ११ ॥ ननु त्वं कथमेवं ब्रवीषि बिभेषीति, यतो मत्पुत्राः किं बलीयांसः न भवन्तीति चेद्भगवत्सहायानां तेषां पार्थानामतिबलीयस्त्वमेवास्तीत्याह। पार्थानिति। दीव्यति बलवत्तरेषु संग्रामकाले परान्मशकानिवागणयित्वा क्रीडतीति देवः। न केवलमेतावदेव सामर्थ्यवानसः यतः भगवान्समग्रज्ञानशक्त्यादिभिरपि संपन्नः, अतः मुकुन्दः स्वाश्रितानां मुक्तेरपि प्रदाता, साक्षाच्छ्रीकृष्णः पार्थान् युधिष्ठिरादींस्तु गृहीतवान् मम प्राणा हि पाण्डवा इत्यभिमानविशेषेण परिगृहीतवान्। गृह्णात्वेवं भगवांस्तांस्ततोऽपि किमित्यत आह। स भगवांस्तु क्षितिदेवा ब्राह्मणास्ते देवा देववत्पूज्या यस्य सः ब्रह्मण्य इत्यर्थः। अस्यायं भावः। भगवान् ब्रह्मण्यः ते ब्राह्मणा, युधिष्ठिरान्तिके तेनाविताः सन्तः सहस्रशस्तिष्ठन्ति यत्र ते तत्र ब्रह्मण्यो भगवान्वर्त्तते। यत्र भगवान् तत्रैव विजयः 'तत्र श्रीर्विजयो भूतिः, इति न्यायेक्षणादिति। ननु स भवत्येवंविधः परन्तु दूरस्थेन तेन भगवता किमत्र भवितव्यमिति मा वोच इत्याह। स्वपुर्याम् आस्ते। तेषामात्मीयानां पाण्डवानां पुर्यामुपप्लवाख्यनगर्यां तिष्ठतीत्यर्थः। आस्तां स तत्र तथाप्येकेन तेन किमित्यत आह। यदुदेवा यदुश्रेष्ठाः सात्यकिप्रद्युम्नानिरुद्धसाम्बादिमहारथास्तैर्दीव्यति सह वर्त्तते तथाभूतः। यादवास्तत्संनिधावेवासते इति भावः। ननु यादवतुल्या योद्धारस्तु मत्संनिधावपि सन्तीत्यत आह। विनिर्जिताः अशेषाः नृदेवा राजानो यैर्यादवैस्तेषामपि देवः समस्तदिग्विजेतारो ये जरासन्धादयस्तज्जेतृयादवानामपि प्रभुरित्यर्थः। उक्तविधभगवत्सहायाः पाण्डवास्त्वया नावमान्याः किं तु दायदानेन सत्कार्या इति तात्पर्यार्थः ॥ १२ ॥

एवं भगवत्सहायानां पार्थानामजेयत्वमभिधाय सांप्रतं पुत्रसंमत्यभावान्मया युधिष्ठिराय राज्यं दायो वा न दत्तमिति धृतराष्ट्राभिप्रायं विद्वान्विदुरो विष्णुवैष्णवद्वेषिणः पुत्रस्यापि परित्याग एव श्रेयानिति वक्ति। स एष इति। हे ज्येष्ठभ्रातः त्वं यं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुर्योधनम् अपत्यबुद्ध्या अपत्यमत्या, न पतति कुलं यस्मात्तदपत्यमिति मनीषयेत्यर्थः। पुष्णासि। सः एषः दुर्योधनाख्यः दोषः पापप्रचुरतात्मकदोषमयत्वात्केवलं मूर्त्तदोषरूपः सन्नेव गृहान् त्वद्भवनमित्यर्थः। प्रविष्टः मूर्त्तिमांस्तव पापराशिरेव त्वदपत्यरूपेण त्वत्पत्नीतः प्रसवं प्राप्य प्रेमास्पदतां जनयंस्त्वद्गृहं प्रविष्टोऽस्तीति भावः। ननु गुणीव मम भासमानः स एवंविधस्त्वया कथमुच्यते इत्यत्राह। यतः पुरुषं पूर्णषड्गुणं विष्णुं द्वेष्टीति पुरुषद्विड् भगवद्द्वेषो आस्ते विद्यते। उपलक्षणमेतत्तद्भक्तद्वेषित्वस्यापि। यत एवं स कृष्णद्वेषी ततः कृष्णाद्विमुखः। उपलक्षणमेतत्तद्भक्तविमुखत्वस्यापि। अतः गतश्रीः श्रीप्रसादरहितः भवति। तथा च लक्ष्मीवाक्यं 'मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रिये धियः। ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्धृदया यतोऽजित' इति। अतः आशु शीघ्रम् अशैवममङ्गलरूपमेनं दुर्योधनं कुलस्य कौशलमारोग्यता तस्मै त्यज। 'त्यजेदेकं कुलस्यार्थे' इति वाक्यात्स्वकुलानिष्टनिवृत्तये जहीति भावः॥ १३॥ इतीति। इत्यमुना प्रकारेण ऊचिवान्। विदुर इति शेषः। अथास्य स्वगृहत्यागं वक्ष्यन्नस्मिन् सामर्षत्वादरिक्ताभिभवमाह। तत्र विदुरेणोक्तरीत्या संकथ्यमाने सतीत्यर्थः। प्रवृद्धो वृद्धिं प्राप्तो यः कोपस्तेन स्फुरितश्चञ्चलोऽधरो यस्य तेन, कर्णो राधेयश्च, अनुजो दुःशासनश्च, सौबलः शकुनिश्च, तैः सह वर्त्तमानस्तेन सुयोधनेन दुर्योधनेन सद्भिः सत्पुरुषैः स्पृहणीयमभिकाङ्क्षणीयं शीलं स्वभावः सद्वृत्तं वा यस्य सः। क्षत्ता विदुरः असत्कृतस्तिरस्कृतः ज्येष्ठस्य पुरत एव धिक्कृत इत्यर्थः॥१४॥ तिरस्कारप्रकारमाह। क इति। दास्याः सुतम्, तत्रापि जिह्मं कुटिलात्मानम्, एनम् अत्र स्थानेऽस्मिन्मन्त्रविधाने वा कः उपजुहावाहूतवान्। ननु किं वास्य जिह्मत्वं येनैवं ब्रवीषि इत्यत्राह। यद्बलिना यस्य ममान्नेनैव पुष्टः वृद्धिं प्राप्तः तस्मिन्मयि प्रतीपः प्रतिकूलः सन् परकृत्ये शत्रूणां कार्ये आस्ते वर्त्तते। परकृत्य इति प्रथमान्तपाठे परेषां कृत्यं कार्यसंपादनं यस्येति व्यधिकरणो बहुव्रीहिः। शत्रुकार्यसंसाधनपर इत्यर्थः। अतः श्वसानः श्वासमात्रावशेषो सन् जीवनमात्राऽवशेषः सन्नित्यर्थः। पुरात् अस्मन्नगरात् आशु निर्वास्यतां निष्कास्यताम्। श्वसान इत्यत्र श्मशान इति पाठे श्मशानः शूद्रः। 'यद्युह वा एतच्छ्मशानं यच्छूद्र' इति श्रुतेः॥ १५॥

रहसि मर्मवाक्संताडितस्यापि संभावितस्य लोकप्रसिद्धसंताडनात्प्रागेवावकाशे सति निर्गमनं श्रेय इति सूचयन्नाह। स इति। स विदुरः इत्थमुक्तप्रकारेण भ्रातुः पुरः समक्षं अत्युल्बणा अतिकठिना कर्णबाणाः कर्णयोः बाणवत् प्रविशन्तः शब्दास्तैः कर्णयोरापतद्भिस्तीक्ष्णैर्वाक्यैरित्यर्थः। मर्मसु मर्मस्थानेषु ताडितः अपि गता विनष्टा व्यथा परुषवाक्श्रवणजाता पीडा यस्य सः। 'यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ। समदुःखसुखम्' इत्युक्तरीत्या विगतबाध इत्यर्थः। अत एव स्मयन्नीषद्धसन् स्वीयमिति पाठे धनुर्विशेषणम्। स्वयमिति पाठे विदुरविशेषणम्। धनुः स्वशरासनं द्वारि तद्गृहद्वारशाखाप्रदेशे निधाय तीर्थान्यटिष्यतो मम किं धनुषेति बुद्ध्यावस्थाप्य। एते नूनं मरिष्यन्तीत्यतो मम किं धनुषेति मत्या वा। भीमादिभिः संगत्यास्माभिर्योत्स्यतीति दुर्योधनः शङ्कां मा करोत्विति मनीषया वा धनुषो निधानं बोध्यम्। मायां सर्वजनमोहोत्पादिकां भगवन्मायाम् उरु बहु यथा तथा मानयानः अहो भगवन्मायाया माहात्म्यमिति तां बहुमन्यमानः सन् अयात्तद्गृहान्निर्जगाम। तीर्थयात्रामुद्दिश्येति शेषः॥ १६॥ एवं तत्कृतगृहत्यागहेतूंस्तत्त्यागं चाभिधाय तस्य तीर्थाटनप्रकारमाह। स इत्थभिः। कौरवाणां कुरुनृपवंशोत्पन्ननृपाणां पुण्यं बहुजन्मोपार्जितसुकृतं तेन लब्धः संप्राप्तः स विदुरः गजाह्वयाद्धास्तिनपुरात् निर्गतः सन्, कौरवपुण्यलब्ध इत्यनेन तेषां भाग्यमेव तेन रूपेण गतमिति सूचितम्। उर्व्यां पृथिव्यां यानि पदानि स्थानानीति यावत्। सहस्राणि बह्वयः मूर्त्तयो रामकृष्णनृसिंहरङ्गेशवेङ्कटेशहस्तीशलक्ष्मीनारायणनरनारायणाद्यर्चारूपाणि यस्य तथाभूतो भगवान् अधिष्ठितः सम्यगधिष्ठायावस्थितः तानि, तीर्थं गङ्गा पादे यस्य तस्य हरेः पदानि स्थानानि पुण्यस्य सुकृतस्य चिकीर्षा कर्त्तुमिच्छा तया हेतुना अन्वाक्रमदनुचचार॥ १७॥

पुरेष्विति। पुरेषु साकेतादिकप्राक्तनभगवदाविर्भावनगरेषु, पुण्यानि यान्युपवनानि तानि च, अद्रयश्च, कुञ्जाश्च, तेषु। यद्वा। उपवनादीनां द्वन्द्वं कृत्वा पुण्यशब्देन तेषां कर्मधारयः। तत्रोपवनानि पुरोपकण्ठवनानि। अद्रयः श्रीपर्वतादयः। कुञ्जाः सिंहगिरित्रजाद्यणुतरपर्वताः। पुरेष्वित्यत्र वनेष्विति पाठे वनानि वृन्दावनादीनि। अपङ्कानि निर्मलानि तोयानि जलानि येषु तेषु। सरितश्च, सरांसि च, तेषु। तत्र सरितो गङ्गायमुनागोदावरीरेवादयो नद्यः। सरांसि पुष्करादीनि तडागानि। अनन्तस्य भगवतः लिङ्गैर्मूर्त्तिभिः समलंकृतेषु सम्यक् शोभमानेषु। तीर्थायतनेषूक्तेतरतीर्थदेवालयादिषु अनन्योऽव्यभिचरितभगवद्भक्तियोगनिष्ठः एकाकीति वा। एवंभूतः सन् चचार पर्यटनं चकार॥ १८॥ गामिति। गां भूमिं पर्यटन् परिभ्रमन् मेध्यैः पवित्रैः विविक्तैर्जात्याश्रयनिमित्तादुष्टैरन्नादिभिर्वृत्तिराजीविका यस्य सः। सदा त्रिकालम् आप्लुतः कृतस्नानः सन्नपि अधोऽनास्तरणभूमौ शयनं यस्य सः अत एव अवधूतो रजोरूषितदेहः अभ्यङ्गोद्वर्त्तनादिसंस्काररहितो वा। स्वैः स्वदेहसंबन्धिभिर्जनैः अलक्षितः अविज्ञातः, अवधूतानां वेषो वल्कलाजिनवारणादिरूपो यस्य स तथाभूतः सन् हरिस्तोष्यते एभिरिति हरितोषणानि व्रतानि चेरेऽचरत॥ १९॥ इत्थमिति। इत्थमनेन प्रकारेण भारतम् एव कर्मभूमित्वादिति शेषः। वर्षं व्रजन् पर्यटन् यावद्यावता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कालेन प्रभासं प्रभासतीर्थं प्रति गतवान्। विदुर आजगाम। तावत्तावता कालेन पार्थो युधिष्ठिरः। अजितेनार्जुनेन श्रीकृष्णेन हेतुना वा। एकमातपत्रं श्वेतच्छत्त्रं यस्यां ताम्। एकस्य स्वस्यैव चक्रं सैन्यं यस्यां तां क्षितिं पृथिवीं शशासानुशिष्टवान्। क्षितिमिति 'क्षि निवासगत्योः' इति धातो रूपं प्रोक्तं, तत्सर्वत्र संनिवासश्चौराद्युपद्रववर्जितसुगमनं च तेनोपतापरहितता यौधिष्ठिरीये राज्ये इति सूचयति ॥ २० ॥ तत्रेति। अथ प्रभासतीर्थं प्रति गमनानन्तरं तत्र प्रभासतीर्थे तिष्ठन्विदुर इति शेषः। वेणुभ्यो वायुवशतः परस्परसंघर्षणवद्भ्यो वंशेभ्यः जातो यो वह्निरग्निस्तं संश्रयते इति वेणुजवह्निसंश्रयं वनं काननं यथा दग्धं विनष्टं स्यात् तथा संस्पर्द्धया परस्परसंघर्षेण जाताम्, सुहृदां कौरवादीनां विनष्टिर्विनाशस्तां शुश्राव। अथ सुहृद्विनाशश्रवणानन्तरं अनुशोचन्निदमघटितं जातमिति तच्छोकं कुर्वन्सन् प्रत्यक् पश्चिमाभिमुखं यथा भवति तथा वाहिनीं सरस्वतीं सरस्वत्याख्यां नदीं प्रति तूष्णीम् इयाय गतवान्। तूष्णीमित्यनेन दुःखेन क्षेत्रवासिनोऽपि नापृच्छदिति व्यज्यते ॥ २१ ॥

तस्यामिति। स विदुरः तस्यां सरस्वत्यां त्रितस्य त्रितमुनेः, उशनसो भार्गवस्य, मनोः स्वायंभुवस्य, अथ पृथोर्वैन्यस्य, अग्नेः, असितस्य मुनेः, वायोः, सुदासस्य राजर्षेः, गवां धेनूनां, गुहस्य कार्तिकेयस्य, श्राद्धदेवस्य सूर्यसूनोः, यत् तीर्थं तच्च आसिषेवे। एकादशापि तीर्थानि आसेवितवानित्यर्थः ॥ २२ ॥ न केवलमेवं नदीतीर्थान्येवासेवितानि किं तु तद्देशभवानि क्षेत्राण्यप्यासेवितवानित्याह। अन्यानीति। इहास्यां पृथिव्यां द्विजदेवाः ऋषयश्च देवाश्च तैः। ऋषिभिः देवैश्चेत्यर्थः। कृतानि विनिर्मितानि। येषामायतनानां दर्शनं समीक्षणं तस्मात् कृष्णम् अनुस्मरन्ति। समीक्षका जना इति शेषः। अङ्गमङ्गं प्रतीति प्रत्यङ्गं यान्यायुधानि गदादीनि तेषु मुख्यं चक्रं तेनाङ्कितानि मूर्द्धन्यहेमकुम्भेषु चिह्नितानि मन्दिराणि येषु तानि विष्णोः अन्यानि च अन्यान्यपि नानायतनानि बहुविधानि स्थानानि आसिषेवे इति पूर्वेणान्वयः ॥ २३ ॥ तत इति। तस्या इति ततः सरस्वत्या नद्याः सकाशात् व्रजन्विदुर इति शेषः। ऋद्धं समृद्धं सुराष्ट्रं देशं सौवीरांश्च, मत्स्यांश्च तांश्च, तानपि, अवान्तरदेशविभागाभिप्रायं बहुवचनम्, कुरवश्च, जाङ्गलाश्च, तान्, देशान् तु देशानपि, अत्रापि पूर्ववद्बहुवचनम्। अतिव्रज्य अतिक्रम्य यावत यावता कालेन यमुनाम् उपेत्य अवर्त्तत। तावत् तत्र यमुनातीरे भागवतं भगवदैकान्तिकोपासकम् उद्धवं ददर्श ॥ २४ ॥ स इति। स विदुरः वासुदेवस्य श्रीकृष्णस्यानुचरोऽनुचरवत्सेवावर्ती वासुदेवोऽनुचर्यते येनेति वा। तं प्रशान्तं शमदमादिसंपन्नं बृहस्पतेः सकाशात् प्राप्तो नयो नीतिशास्त्रं येन तं सापेक्षित्वेऽपि गमकत्वात् समासः। प्रतीतं सर्वत्र विख्यात-मुद्धवं प्रणयेन गाढानुरागेण हेतुना गाढं यथा तथा आलिङ्ग्याश्लिष्य, भगवतः प्रजाः पोष्यास्तासाम्, भगवतः तत्पुत्रपौत्र-नप्तृप्रभृतिप्रजानामन्येषां तत्पोष्यवर्गाणां चेत्यर्थः। स्वानामात्मीयजनानां च भद्रं कुशलम् उद्धवम् अपृच्छत् ॥ २५ ॥

तत्र प्रथमतस्तु रामकृष्णयोः कुशलं पृच्छति कच्चिदिति। हे उद्धव स्वनाभौ भवः स्वनाभ्यः स चासौ पाद्मः पद्मसंभवो ब्रह्मा तस्यानुवृत्तिः प्रार्थना तया, इह भूर्लोके किल अवतीर्णौ प्रादुर्भावं प्राप्तौ पुराणावनादिसिद्धौ पुरुषौ उर्व्यां कुशलं सुखं विधाय कृत्वा कृतक्षणौ संप्राप्तनिवृत्त्यवसरौ सन्तौ शूरगेहे वसुदेवसद्मनीत्यर्थः। कुशलं सुखं यथा तथा आसाते कच्चित् इति प्रश्नः। हरेः कुशलप्रश्नः लोकानां सुखकर्तृत्वमपेक्ष्यैवेति ज्ञेयम् ॥ २६ ॥ नवभिः श्लोकैर्यदूनां कुशलं पृच्छंस्तत्रादौ वसुदेवस्य कुशलं पृच्छति। कच्चिदिति। कुरूणां कुरुवंशोत्पन्नानां नोऽस्माकं परमः सुहृत् भामः पूज्यः भद्ररूपो वा। यद्वा भामो भगिनीपतिः। लोके हि कुत्रचित् श्यालकपत्नीमाह्वानादौ भगिनीत्वेन व्यवहरन्ति। ततः कुन्ती वसुदेवस्य भगिनी सा पाण्डुना परिणीताऽतः पाण्डोर्वसुदेवः श्यालकः तत्पत्नी देवकी सा च पाण्डोराह्वानादौ भगिनीतया व्यवहार्या एवं सति पाण्डोर्बन्धूनामपि सा भगिनीतया व्यवहार्या। ततः विदुरस्य पाण्डोः कनिष्ठबन्धुत्वात्स वसुदेवपत्नीं देवकीमाह्वानादि-व्यवहारे भगिनीत्याख्यया भाषते तत्पतिर्वसुदेवोऽत्रानया रीत्या भगिनीपतिरित्यभिहितो बोध्यः। स भगवत्पितृत्वेन प्रसिद्धः शौरिः शूरपुत्रो वसुदेवः अङ्ग हे उद्धव सुखं यथा तथा आस्ते कच्चित्। द्वारिकायामिति शेषः। कथंभूतः शौरिः यः असौ शौरिः वदान्योऽत्युदार, स्वसॄणां भगिनानां वराणां भगिनीपतीनां तर्पणं तृप्तिकरवस्तुप्रदानेन संतोषविधानं तेन सः वरान् तदभीष्टार्थान् पितृवत् शूरनृपतिवदेव ददाति अदादित्यर्थः। विदुरो यस्मिन्काले उद्धवं प्रति एवं वक्ति, तस्मिन्काले उक्तार्थस्य भूतत्वेऽपि 'भूते भविष्यति च वर्त्तमानवत्' इत्युक्तेर्वर्त्तमानप्रयोगः ॥ २७ ॥ अथ प्रद्युम्नक्षेममापृच्छति। अङ्ग हे उद्धव यदूनां यदुकुलोत्पन्नानां वरूथाधिपतिः सेनापतिः वीरः प्रद्युम्नः सुखं यथा तथा आस्ते कच्चित्। कथंभूतः प्रद्युम्नः। रुक्मिणी, विप्रान् आराध्य आदिसर्गे पूर्वजन्मनि स्मरं कामं यं प्रद्युम्नं पुत्रं केशवतः भगवतः सकाशात् अभिलेभे लब्धवती। विप्रानाराध्येति कथनं लोकवनितानामाराधितब्राह्मणप्रसादेन पुत्रादिस्वाभीष्टप्राप्तिरिति प्रदर्शनपरं न तु स्वार्थपरं बोध्यम् ॥ २८ ॥

उग्रसेनानामयं पृच्छति। कच्चिदिति। हे उद्धव नृपासनाशां पुना राज्यप्राप्त्यभिलाषं दूरात् परिहृत्य स्थितमिति शेषः। यमुग्रसेनं शतपत्रनेत्रः कमलनयनः स्वयं श्रीकृष्णो भगवान् अभ्यषिञ्चत्स्वराज्येऽभिषिक्तवान्। एवंविधः सात्वताश्च,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृष्णयश्च, भोजाश्च, दाशार्हकाश्च, तेषाम् अधिपः स उग्रसेनः सुखम् आस्ते कच्चित्। द्वारिकायामिति शेषः ॥ २९ ॥ अथ कृष्णसुतसाम्बसौख्यं पृच्छति। कच्चिदिति। हे सौम्य उद्धव, यः गुहः अग्रे पूर्वजन्मनि अम्बिकया भवान्या गर्भे धृतः भवादिति शेषः। एवंभूतं देवं देवसेनाग्रेसरतया द्योतमानं यं गुहं स्वामिकार्त्तिकेयम्, व्रताढ्या व्रतनिष्ठा सती जाम्बवती असूत। एवंभूतः रथिनां रथिकानाम् अग्रणीः श्रेष्ठः सदृक्षः श्रीकृष्णेन समानः हरेः श्रीकृष्णस्य सुतः साम्बः साधु सुखं यथा तथा आस्ते कच्चित् ॥ ३० ॥ अथ सात्यकिक्षेमं पृच्छति। क्षेममिति। फाल्गुनादर्जुनात् लब्धं धनूरहस्यं धनुर्वेदो येन सः यः युयुधानः, अधोक्षजस्य श्रीकृष्णस्य या सेवा तया एव, तदीयामधोक्षजसंबन्धिनीं यतिभिः परमहंसैरपि दुरापां गतिम् अञ्जसा सुखेनैव लेभे प्राप्तवान्। सः युयुधानः सात्यकिः क्षेमं कुशलं यथा तथा आस्ते कच्चित् ॥ ३१ ॥ अथाक्रूरस्य कुशलं पृच्छति। कच्चिदिति। बुधः विज्ञातभगवत्तत्त्वः अत एव न विद्यते अमीवं पापं यस्य सः, भगवन्तं प्रपन्नः श्रीकृष्णं शरणं प्राप्तः श्वफल्कपुत्रः अक्रूरः स्वस्ति सुखं यथा तथा आस्ते कच्चित्। योऽक्रूरः कृष्णस्य पादाभ्यामङ्कित-श्चिह्नितो यो मार्गस्तस्य पांसवो रजांसि तेषु प्रेम्णा कृष्णपादाङ्कितमार्गदर्शनजनितप्रीत्यतिशयेन विभिन्नं धैर्यं यस्य स तथाभूतः सन् अचेष्टत व्यलुण्ठत ॥ ३२ ॥ अथ देवक्याः सुखं पृच्छति। कच्चिदिति। देवक इति नाम यस्य स चासौ भोजो देवकभोजस्तस्य पुत्री तस्याः, विष्णुः श्रीकृष्णः प्रजाऽपत्यं यस्यास्तस्या देवक्याः, देवमातुरदितेः इव शिवं कुशलं कच्चित्। या देवकी स्वगर्भेण देवं भगवन्तं, त्रयी वेदः यज्ञवितानं यज्ञविस्तररूपम् अर्थं यथा प्रकाशकतया बिभर्ति, तथा दधार वै ॥ ३३ ॥

अथानिरुद्धकुशलं पृच्छति। अपिस्विदिति। यः सात्वतां भगवदैकान्तिकभक्तानां वो युस्माकं कामदुघः अभीष्ट-प्रपूरकः, मनोमयं योगपरिशुद्धेन मनसा ग्रहीतुं योग्यं लौकिकप्रमाणाविषयमित्यर्थः। अत एव यं शब्दयोनिं शास्त्रप्रमाणकं सत्त्वं सत्त्वमूर्त्तिर्भगवांस्तस्य तुरीयतत्त्वं चतुर्थांशम् आमनन्ति, भगवान् सः अनिरुद्धः सुखम् आस्ते अपिस्वित्। उताऽपि-स्विदादयः शब्दाः कच्चित्पर्यायाः। स्म हेति पादपूरणार्थौ ॥ ३४ ॥ अवशिष्टानां सर्वेषां यादवानां कुशलं युगपत्पृच्छति। अपिस्विदिति। हे सौम्य उद्धव निजात्मदैवं स्वकीयानामात्मवत्प्रेमास्पदं दैवतम् इष्टदेवत्वेन सर्वथोपासनार्हं श्रीकृष्ण-मित्यर्थः। अनन्यवृत्त्या एकान्तभक्तिभावेन समनुव्रताः अनुसृताः ये अन्ये हृदीकश्च, सत्यात्मजाः सत्यभामायाः पुत्राश्च, चारुदेष्णश्च, गदश्च, ते आदिर्येषां ते। ते चापि स्वस्ति कुशलं यथा तथा चरन्ति अपिस्वित् ॥ ३५ ॥ एवं यादवानां कुशलं पृष्टम्। अथ पाण्डवानां तत्पृच्छन् युधिष्ठिरस्य ज्येष्ठत्वादादौ तत्कुशलं पृच्छति। अपीति। यस्य युधिष्ठिरस्य सभा तस्यां, विजयोऽर्जुनस्तत्कर्तृका या अनुवृत्तिः सेवा तया हेतुभूतया, या साम्राज्यलक्ष्मीस्तया दुर्योधनः अतप्यत। यं विजयोऽ-नुवर्त्तते तमेव साम्राज्यलक्ष्मीरप्यनुवर्त्तते इति बुद्ध्या अतप्यतेत्यर्थः। एवंभूतः धर्मो युधिष्ठिरः स्वदोर्भ्यां स्वकीयभुज-तुल्याभ्यां विजयोऽर्जुनश्च अच्युतः श्रीकृष्णश्च ताभ्यां सह वर्त्तमानः सन् धर्मेण वेदशास्त्राविरोधिना धर्ममार्गेण सेतुं वर्णाश्रमादिमर्यादां परिपाति अपिस्वित् ॥ ३६ ॥ अथ भीमस्य क्षेमं पृच्छति। किं वेति। गदायाः विचित्रं माग गतिं चरतः विचित्रतया गदां भ्रमयत इत्यर्थः। यस्य भीमस्य अङ्घ्रिपातं पादाघातं रणभूः संग्राममही न सेहे। एवंभूतः पुनश्च कृताघेषु कृतापराधेषु अहिवत्कृष्णाहिवत् अत्यमर्षी अत एव तत्कृतं दीर्घतमं बहुकालानुसंचितम् अघमपराधं संस्मरन् भीमो वृकोदरः अमर्षं व्यमुञ्चत्। किं वा तान्हत्वाऽमर्षमत्यजत्किमित्यर्थः ॥ ३७ ॥ अथार्जुनस्य क्षेमं पृच्छति। कच्चिदिति। रथयूथपानां मध्ये यशो दधातीति यशोधाः कीर्त्तिधारकः गाण्डीवधन्वाऽर्जुनः, उपरता निवृत्ता अरयो यस्मात्स उपरतारिः आस्ते कच्चित्। कथंभूतोऽर्जुनः यस्य गाण्डीवधन्वनः शरकूटेन बाणसमूहेन शरपञ्जरेण वा गूढः संवृतः आच्छन्न इति यावत्। इतरैः किंचिदप्यलक्षित इत्यर्थः। माययेच्छया किरातः किरातवेषधरः गिरिशो रुद्रः तुतोष संतुष्टोऽ-भवदित्यर्थः ॥ ३८ ॥

नकुलसहदेवयोः क्षेमं पृच्छति। यमाविति। पार्थैर्युधिष्ठिरभीमार्जुनैः पक्ष्मभिः अक्षिणी नेत्रे इव वृतौ रक्षितौ अक्षिणीवेति प्रगृह्यत्वाभाव आर्षः। पृथायाः कुन्त्याः स्तनपौ स्तनपानं कृत्वोज्जीवनतां प्राप्तौ माद्रीसञ्ज्ञेन पाण्डोर्मृतेर्जातत्वान्माद्र्या तदनु मरणं निश्चित्य स्तनपावपि स्वसुतौ कुन्त्यै समर्पितौ। ततः सा पाण्डोश्चितायां प्रविश्य मृता। तत्सुतौ कुन्त्या स्वस्तनपानं कारयि-त्वोज्जीवितावतस्तौ पृथायाः स्तनपावित्यभिहितम्। यमौ युग्मजातौ नकुलसहदेवौ मृधे युद्धे पराच्छत्रोः स्वरिक्थं स्वकीयदायम्, वज्रिवक्त्रादिन्द्रमुखात् सुपर्णौ गरुडौ अमृतम् इव उद्दायं लब्ध्वा रेमते उतस्वित्। यदि द्वौ गरुडाविन्द्रादमृतमानयेतामित्यभूत-त्वादभूतोपमेयम् ॥ ३९ ॥ पृथायाः कुशलं किं पृच्छेयं यतस्तस्याः पाण्डुं विना प्राणधारणमेवाश्चर्यकरमस्तीत्याह। अहो इति। अहो इत्याश्चर्ये। यः पाण्डुस्तु अतिरथः अत एव एकवीरोऽसहायवीरः धनुरेव द्वितीयं यस्य सः तथाभूतः सन् चतस्रः ककुभो दिशः विजिग्ये जितवान्। एवंभूतेन तेन प्रसिद्धेन राजर्षिवर्येण पाण्डुना विना अपि अर्भकार्थे स्वार्भकपोषणार्थं साध्व्यपि कुन्ती ध्रियतेऽवतिष्ठते जीवतीत्यर्थः। इत्थंभूतायाः पृथायाः किं नु कुशलं पृच्छेयमिति भावः ॥ ४० ॥ अथ धृतराष्ट्रमनुशोचति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सौम्येति। हे सौम्य उद्धव यो धृतराष्ट्रः परेताय परलोकं गताय भ्रात्रे पाण्डवे विदुद्रुहे तत्पुत्रेभ्यः द्रोहाचरणेन तस्मै एव द्रोहं कृतवानित्यर्थः। स्वपुत्रान् दुर्योधनादीन् समनुव्रतेन स्वपुत्रानुसारिणेत्यर्थः। येन धृतराष्ट्रेण सुहृन्मित्रं मित्रवदतीव हितार्थीत्यर्थः। अहं स्वपुर्या हस्तिनापुरनगरात् निर्यापितः विवासितः अत एव अधः नरके पतन्तमधर्माचरणेन नरकगामिनत्यर्थः। यं धृतराष्ट्रम् अनुशोचे शोचामि ॥ ४१ ॥ एवं यादवपाण्डवकौरवाणां कुशलं पृष्ट्वा स्ववर्त्तनप्रकारमाह। स इति। सः अहं तत्समक्षं तत्पुत्रेण विवासितोऽहमित्यर्थः। मर्त्यविडम्बनेन स्वैश्वर्याच्छादकमानुष्यानुकरणे नृणां यथार्थतया तत्स्वरूपमजानतां जनानां दृशो दृष्टीश्चित्तवृत्तीरिति यावत् चालयतः भ्रामयतः विधातुर्जगन्नियन्तुः हरेः श्रीकृष्णस्य प्रसादात् अनुग्रहात् पदवीं तद्विभूतिभूतं जगदित्यर्थः। तन्माहात्म्यं वा पश्यन् अत एव गतविस्मयः निवृत्ताश्चर्यः अत्र भूतले नान्योपलक्ष्यः प्रच्छन्नः गूढः सन्निति यावत्। चरामि ॥ ४२ ॥

नन्वयं श्रीकृष्णः स्वयं विधाता स्वभक्तानुग्रहीता च भवतीति किमिति स्वभक्तान् पार्थान्नानुगृहीतवान् स्वस्मिन् द्वेषिणः कौरवान्वा किमिति न निगृहीतवान् येन स्वभक्तानामपि तेषां दुःसहवनवासादिक्लेशाः, स्वस्य च दौत्ये बन्धनोद्यमादिपराभव एतत्त्वयुक्तमेव। ततस्तेषामपराधानन्तरं हननमेव वरं नापराध्यपराधोपेक्षा युक्तेत्यत आह। नूनमिति। त्रिभिरभिजनवित्तविद्याभिः धनैश्वर्यसेनाभिर्वा यो मदस्तेनोत्पथा उद्धतास्तेषां चमूभिः सेनाभिः महीं भुवं मुहुः पुनः पुनः चालयतां परिभ्रामयतां नृपाणां वधाद्धेतोः प्रपन्नानां स्वशरणं प्राप्तानां पाण्डवानामार्त्तिः पीडा तस्य जिहीर्षा परिहर्त्तुमिच्छा तया हेतुना च ईश तत्कृताघसमये एव हन्तुं समर्थः सन्नपि भगवान् कुरूणाम् अघमपराधं व्युपैक्षत। तदानीमेव तेषां वधे कृते सति असद्वृत्तिराजन्यवधः सम्यक् प्रपन्नार्त्तिहरणं न स्यादित्याशयेन प्रतीक्षितवानित्यर्थः। नूनं निश्चितमेव 'विद्यामदो धनमदस्तथैवाभिजनो मदः। एते मदा मदान्धानां त एव हि सतां दमाः'। इति त्रयो मदाः ॥ ४३ ॥ जगन्नियन्तुर्भगवतः किं मर्त्यविडम्बनेन प्रयोजनमिति चेत्सर्वदुर्वृत्तवधाद्यर्थमेव नान्यथेति कैमुत्यन्यायेनाह। अजस्येति। अजस्य कर्माधीनोत्पत्तिवर्जितस्य जन्म अकर्मायत्ताप्राकृतैच्छिकदिव्यदेहाविष्करणरूपः प्रादुर्भाव उत्पथानां कुमार्गगामिनां कंसादीनां नाशनं तस्मै भवति। अकर्त्तुः कर्माधीनकरणायत्तव्यापाररहितस्य कर्माणि चरित्रात्मककर्माचरणं पुंसां स्वभक्तजनानां ग्रहणाय ग्राहयितुं स्वचरित्रश्रवणादेः संसृतिमुक्तिहेतुत्वात्स्वाश्रितजनांस्तदर्थं श्रवणादिना ग्राहयितुं चेत्यर्थः। भवति। अन्यथा उक्तप्रयोजनार्थं न चेद्भगवतो जन्मधारणकर्माचरणादिना किं प्रयोजनमिति भावः। ननु हे उद्धव गुणानां सत्त्वादीनां परो भगवदैकान्तिकोपासनया तन्नियन्तृतां प्राप्त इत्यर्थः। कः कश्चनापि योगी देहयोगं कर्माधीनतोद्भूतप्राकृतशरीरं कर्मतन्त्वं तत्संबन्धजं कर्मविस्तारं च उत स्वित् अर्हति। नार्हतीत्यर्थः। तदा भगवांस्तदुभयं नार्हतीत्यत्र किं वक्तव्यमित्यर्थः ॥ ४४ ॥ तस्मादेवंभूताचिन्त्यमायाविनोदस्य साधुपरित्राणाद्यर्थमवतीर्णस्य स्वाश्रितवात्सल्यजलधेर्वार्त्तां कथयेति वदन्नुपसंहरति। तस्येति। हे सखे स्वे स्वकीये अनुशासने आज्ञायाम् अवस्थितानाम् आज्ञोल्लंघनमकुर्वतामित्यर्थः। प्रपन्नाः स्वशरणागता ये अखिललोकपा इन्द्रादयो लोकपालास्तेषां अर्थाय प्रयोजनाय यदुषु यादवेषु जातस्यावतीर्णस्य अजस्य कर्मायत्तोत्पत्तिरहितस्य तीर्थं तीर्थतोपेततया संसारतारणी कीर्त्तिर्यशो यस्य तस्य। तस्य भगवतः श्रीकृष्णस्य वार्त्तां तदीयं सकलं वृत्तान्तमित्यर्थः। कीर्त्तय कथय ॥ ४५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

इति भागवतः पृष्टः क्षत्त्रा वार्त्तां प्रियाश्रयाम् । प्रतिवक्तुं न चोत्सेह औत्कण्ठ्यात्स्मारितेश्वरः ॥ १ ॥

कृष्णं विश्लेषतः शोचन्नुद्धवोऽथो द्वितीयके । श्वसन् बालचरित्राणि क्षत्त्रे कार्ष्ण्यान्यवर्णयत् ॥ १ ॥

एवं विदुरेण संपृष्ट उद्धवस्तस्य भगवतो जन्मप्रभृतितिरोधानावधिदिव्यचरित्रवर्णनानुरूपमुत्तरं करिष्यतीति तन्मनसि संस्मरन् शुकस्तावदुद्धवस्य भगवद्विरहौत्कण्ठ्यावेशेन तत्प्रतिवचनासामर्थ्यमाह । इतीत्यादिभिः षड्भिः । क्षत्त्रा विदुरेण प्रियः प्राणवत्प्रेमास्पदरूपो यः कृष्णः स आश्रयो यस्यास्तां स्वेष्टभगवद्विषयामित्यर्थः । वार्त्तां प्रति इत्युक्तप्रकारेण पृष्टः भागवतो भगवदेकान्तिकभक्तः उद्धवः । औत्कण्ठ्यात् स्नेहविशेषात, स्मारितः स्मृतिपथं प्रापित ईश्वरः श्रीकृष्णो यस्य सः एवंभूतः सन्, प्रतिवक्तुम् उत्तरं वक्तुं न चोत्सेहे समर्थो नाभूत् ॥ १ ॥ एकान्तभक्तानामेतद्युक्तमत एतदेव कैमुत्यन्यायेन प्रपञ्चयति । य इति द्वाभ्याम् । पञ्च हायना वत्सरा यस्य सः, पञ्चवर्षवयःप्रमाण इत्यर्थः । अस्य श्रीकृष्णस्य सपर्यां पूजां बाललीलया रचयन्नाचरन् बालक्रीडया कृष्णं कंचित्प्रकल्प्य कल्पितैरेव साधनैस्तत्परिचर्यां कुर्वन्नित्यर्थः । यः उद्धवः मात्रा कंसाख्यजनन्या प्रातराशाय प्रातर्विधेयभोजनविधापनार्थं याचितः प्रार्थितः सन्नपि तत्प्रातराशं न ऐच्छत् ॥ २ ॥ स इति । एवं बाल्यप्रभृति तस्य भगवतः सेवया कालेन जरसं जरां वृद्धत्वमिति यावत् । गतः प्राप्तः, श्रीकृष्णं सेवमानः सन्नेव यो वार्द्धकं प्राप्त इत्यर्थः । स उद्धवः वार्त्तां स्वप्रियोदन्तं प्रति पृष्टः अत एव भर्त्तुः श्रीकृष्णस्य प्रभोरितिपाठे स एवार्थः पादौ कमलाकृत्यङ्घ्री अनुस्मरन् सन् कथं प्रतिब्रूयात् ॥ ३ ॥ एवं तस्य प्रत्युत्तरासामर्थ्यमभिधायाथ परिपूर्णभक्तियोगेन परवशस्यास्य महता प्रयत्नेन तदुत्तरप्रदानसामर्थ्यमाह । स इति । कृष्णाङ्घ्रिसुधया श्रीकृष्णचरणस्मरणामृतेन, तृतीयात्र सप्तम्यर्थे । साधु यथा तथा निमग्नः भृशमत्यन्तं तीव्रेण भक्तियोगेन निर्वृतः परमानन्दं प्राप्तः, स एवं परवशवत्प्रतीयमान उद्धवः, मुहूर्त्तं घटिकाद्वयपर्यन्तं तूष्णीम् अभूत् ॥ ४ ॥

उद्धवस्यैवंविधामवस्थां पश्यतो विदुरस्य मनसि किं प्रत्यभादत्राह । पुलकेति । पुलको रोमाञ्चस्तेनोद्भिन्नानि सर्वाण्यङ्गान्यवयवा यस्य सः, मीलद्दृशा अर्द्धोन्मीलितदृष्ट्या शुच आनन्दाश्रूणि मुञ्चन्, स्नेहो भगवति यो गाढानुरागस्तस्य प्रसरः प्रवाहस्तस्मिन् संप्लुतो निमग्नः एवंविध उद्धवः, तेन विदुरेण पूर्णार्थः कृतकृत्यः लक्षितो लक्षणतो ज्ञातः ॥ ५ ॥ ततः परं विदुरस्य काभीष्टसिद्धिरभूदित्याशङ्क्य तत्प्रश्नप्रवचनोपक्रमसिद्धिरित्याह । शनकैरिति । भगवतो लोकस्तस्मात् संप्रज्ञात-समाधिना संप्राप्ताद्भगवद्दर्शनादित्यर्थः । नृलोकं देहानुसंधानं शनकैः पुनः आगतः सन् नेत्रे विमृज्य संमृज्य उत्स्मयन् उत्कृष्टं मन्दस्मितं कुर्वन् उद्धवः विदुरं प्रत्यभाषत ॥ ६ ॥ श्रीकृष्णविरहेण संतप्यमानः प्रत्याह । कृष्णेति । कृष्ण एव द्युमणिः सूर्यः तस्य निम्लोचोऽस्तमयस्तस्मिन्सति अजगरेण कालरूपमहासर्पेण ह स्फुटं यथा स्यात्तथा गीर्णेषु ग्रस्तेषु अत एव गता श्रीः शोभा येषां तेषु नोऽस्माकं गृहेषु त्वत्पृष्टानां बन्धूनामिति शेषः । कुशलं क्षेमम् अहं किं नु ब्रूयाम् ॥ ७ ॥ दुर्भग इति । बतेति खेदे । अयं लोको जनः दुर्भगो भाग्यहीनः, तत्रापि यदवो यादवाः नितरामतिशयेनैव दुर्भगाः । कुतः ये यदवः संवसन्तः श्रीकृष्णेन सह सम्यक्कृतावासाः सन्तोऽपि हरिं न विदुः । साक्षादयं परमेश्वर एवास्तीति नैवाविदन् । किं तु अस्मादृश एष कश्चिद्या-दवोऽस्तीति सम्यगजानन् । कथमिव मीनाः क्षीरसागरस्था मत्स्याः उडुपं दुर्वासःशापतः समुद्रपतितं चन्द्रमिव, यथा क्षीरसमुद्रपतितमुडुपं तदा तत्रत्या मीनाः केवलं कश्चित्कमनीयोऽयमपि जलचर इत्येवं विदुर्न त्वयममृतमयश्चन्द्र इति तद्वदिति भावः । केचित्तु उडुपं प्लवमिवेति व्याचख्युः । तत्र मीनाः, उडुपरूपोऽयमपि कश्चिज्जलचर इति जानन्ति । न तूत्तारणहेतुरय-मित्येवं यदवोऽपि अयं स्वाश्रितदुरितान्यपहरन् संसारपारं नयतीति न जानन्ति किं तु कश्चिद्यादव इत्याहुरिति ॥ ८ ॥ भाग्यहीनत्वादेव न विदुर्न तु ज्ञानसामग्र्यभावादित्याह । इङ्गितज्ञा इति । इङ्गितं चित्तस्थं जानन्तीतीङ्गितज्ञा अत एव पुर्वतिशयेन प्रौढा बहुनिपुणाः एकस्मिन्नेव स्थाने आरमन्तीत्येकारामाश्च ये सात्वताम् ऋषभं श्रेष्ठं श्रीकृष्णं भूतावासं स्वसमानक्षेत्रज्ञमेव अमंसतामन्यन्त । यद्वा उक्तविधा अपि यादवाः भूताः सर्वे प्राणिन आवासो निवासस्थानं यस्य । यद्वा । भूतानामावासस्तम् । ईश्वरं सन्तं सात्वतामृषभममंसतेति ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न केवलं यादवा एवैनमेवममन्यन्त किं त्वन्येऽपीत्याह । ये च देवस्य भगवतः मायया स्पृष्टा मोहिताः अत एव असदचेतनं शब्दादिविषयवृन्द्रम् आश्रिता भोग्यत्वेन संश्रिताः । अन्ये शिशुपालादयश्चापि ते सर्वेऽपि भूतावासममंसतेति पूर्वेणान्वयः । तर्हि भवदादयोऽपि मायास्पर्शा विशेषान्न जानीयुरेवेत्यत आह । भ्राम्यत इति । आत्मनि परमात्मनि हरौ उप्ताः समर्पिता आत्मानो मनांसि यैस्तेषां मादृशानां धीः तद्वाक्यैर्भगवन्मायामोहितानां तेषां जीवोऽयमित्यादिवाक्यैः न भ्राम्यते 'ददामि बुद्धियोगं तं येन मामुपयान्ति ते' इति स्वयं भगवतैव गीतत्वादिति भावः । अयं भावः । यादवोऽयमस्मद्बन्धुरिति स्वसमानमानितया, वैरमनेनाश्रिताः शिशुपालादयो महाच्छलग्घुपेतोऽस्मञ्जिघांसुरिति च नैकधा वदन्ति । तद्वाक्यैर्भगवत्स्वरूप-निक्षिप्तचेतसो मादृशस्य मतिस्तु न मोहं प्राप्नुयात्तथाविधास्तु मूढा एवेति ॥ १० ॥ ननु कोऽसौ हरिरिति चेन्यादृग्ज्ञानिधी-बोध्यो वसुदेसूनुः कृष्णः स इत्याह । प्रदर्श्येति । यः कृष्णः, न तप्तं तपो यैस्तेषाम् अतः अवितृप्ता दृशो येषां तेषां नृणाम्, लोकलोचनं तु लोकैरवलोकनीयमपि कर्मणि ल्युट् । अतिसुन्दरमित्यर्थः । स्वबिम्बं वपुः श्रीमूर्त्तिमिति यावत् । प्रदर्श्य एतावन्तं कालं दर्शयित्वा आदाय तादृशस्यान्यस्य विलोकनीयस्याभावाल्लोकानां लोचनवद्वर्त्तमानं तदाच्छिद्येत्यर्थः । अन्तरधादन्तर्दधे । तस्मिन् हरावुप्तात्मनां बुद्धिर्न भ्राम्यते इति पूर्वेण संबन्धः । आदायान्तरधादित्यनेन स्वश्रीमूर्त्या सहैव गमनम्, न तु प्राकृतवदिति सूचितम् ॥ ११ ॥ लोकलोचनमित्यनेन सूचितमेव वपुषः सौन्दर्यं वर्णयति त्रिभिः । यदिति । मर्त्यलीलासु मनुष्यलीलासु औपयिकं योग्यं स्वस्य या योगमाया आश्चर्यशक्तिस्तस्या बलं तत् दर्शयता लोकस्येति शेषः । गृहीतमुपात्तं भगवतेति शेषः । स्वस्य च स्वस्यापि विस्मापनमाश्चर्यकरं सौभगर्द्धेः सौभाग्यसमृद्धेः परं पदं पराकाष्ठाभूतं भूषणानि कौस्तुभादीन्याभरणानि भूषयन्त्यलं कुर्वन्तीति भूषणभूषणानि अङ्गान्युरःप्रभृतीनि यस्मिंस्तदेवंभूतं यद्वपुः तदादायान्तर-धादिति पूर्वेणान्वयः ॥ १२ ॥

यदिति । किं च बतेति विस्मये । धर्मसूनोर्युधिष्ठिरस्य राजसूये राजसूयाख्ययागविशेषे त्रिलोकः त्रिभुवनस्थो जनः दृशां स्वस्त्ययनं दृक्स्वस्त्ययनं परमानन्दकरं यद्वपुः कार्ष्णं श्रीमूर्त्तिमित्यर्थः । निरीक्ष्य सर्वेन्द्रियवृत्तीनामेकस्यां चक्षुर्वृत्तावस्था-पनपूर्वं नितरां समीक्ष्य धातुर्ब्रह्मणः अर्वाक्सृतौ अर्वाचीनमनुष्यसर्जने कौशलं ,यन्नैपुण्यं तत् कात्स्न्र्येन साकल्येन इह कृष्णवपुषि अद्येदानीं गतं पर्यवसितमुपक्षीणमिति यावत् । इतीत्थं अमन्यत मेने । नातः परं तस्य कौशलमस्तीति निश्चिकायेत्यर्थः । भगवद्वपुषोऽविधातृसष्टत्वेऽपि लोकदृशेयमुक्तिरवगन्तव्या । ननु लोकदृष्टचैवं वर्णनं ज्ञानिनो बादरायणस्यायुक्तमित्याशङ्कायां ज्ञानिदृशायं श्लोको व्याख्यायते । किं च बतेति हर्षे । अत्र जीवराशौ त्रिषु देवमानवदैत्येषु लोकः भगवत्स्वरूपज्ञानप्रकाशो यस्य सः । त्रिविधेष्वपि तस्य भगवत्तया स्वरूपज्ञानवान् जन इत्यर्थः । धर्मसूनोः राजसूये उपगतं सर्वाधिकत्वेन स्थितम् अत एव दृक्स्वस्त्ययनं यच्छ्रीकृष्णवपुः निरीक्ष्य सूतौ निजविहितोत्तममनुष्यसृष्टिविधानमार्गे प्रवर्त्तमानस्येति शेषः । विधातुर्ब्रह्मणः यत् कात्स्न्र्येन कौशलमतिमङ्गलरूपादिविषयनिर्माणपाटवं तत् अर्वाक् नीचमतिनिकृष्टमित्यर्थः । इत्येवम् अमन्यत । श्रीकृष्णसौन्दर्य-स्याकृत्रिमत्वात्कृत्रिमस्य तत्तुल्यता कथं घटेतेति भावः ॥ १३ ॥ यस्येति । यस्य श्रीकृष्णभगवतः अनुरागेण स्नेहेन प्लुताः प्रवृत्ताः ये, हासो हसनं च, रासः क्रीडा च, लीलावलोको भ्रूनर्त्तनादिलीलापूर्वकं समीक्षणं च, तेऽनुरागप्लुतहासरासलीलाऽवलोकास्तैः प्रतिलब्धो मानो याभिस्ताः । यद्वा । अनुरागेण प्लुतौ यौ हासरासौ ताभ्यां सहितो यो लीलावलोकस्तेन प्रतिलब्धः संप्राप्तः मानो यासां ताः, व्रजस्त्रियः दृग्भिः समीक्षणैः सह, अनुप्रवृत्ताः गच्छन्तं भगवन्तमेवानुगताः धियो, मतयो यासां ताः, गच्छतो भगवतः पश्चादादौ यासां दृष्टयः प्रवृत्तास्ततो बुद्धय एवंविधा इत्यर्थः । अत एव खिलो निवृत्तः कृत्यस्य तत्प्रसन्नताविधेयतपआदि-साधनात्मककर्त्तव्यार्थस्य शेषोऽवशिष्टोऽपि भागो यासां ताः । एवंभूताः सत्यः अवतस्थुः । यत्र कृतो गाढानुराग एव संसृतिनिवृत्तिहेतुस्तथाविधमहिमोऽयं कृष्ण इति भावः ॥ १४ ॥

एवंभूतवपुःपरिग्रहनिमित्तं वपुषः स्वरूपं चाह । प्रशान्तरूपेष्विति । प्रशान्तरूपेषु सत्त्वप्रधानदेवादिभगवच्छरीरेषु इतरैः स्वरूपैः रजस्तमःप्रधानैरन्यैरसुरराक्षसादिभिर्भगवच्छरीरैरित्यर्थः । अभ्यर्द्यमानेषु पीड्यमानेषु सत्सु अनुकम्पितो जातानुकम्पः आत्मा चित्तं यस्य सः । सत्त्वप्रधानदेवादिशरीरकृपापरवश इत्यर्थः । परे रजस्तमसी अवरेऽपकृष्टे यस्य सत्त्वस्य तस्येशः स्वशरीरभूतसत्त्वगुणाधिपतिरित्यर्थः । भगवान् अजोऽजन्मा सन्नपि कर्मायत्तोत्पत्तिशून्यः सन्नपि इत्यर्थः । महांश्चासावंशो बलभद्रस्तेन युक्तः, अग्निः यथा तथा जातः हि । अकर्मायत्तस्वेच्छोपात्ताप्राकृतदिव्यरूपविशिष्टोऽवतीर्ण इत्यर्थः । अग्निर्यथेत्युप-मानस्यायं भावः । यथाग्निर्दार्वादिषु स्वस्वभावमत्यजन्नेवाविर्भवति, तथा भगवानपि देवमनुष्यादिषु निरस्तनिखिलदोषोऽनव-धिकातिशयासंख्येयकल्याणगुणाकरत्वरूपस्वस्वभावमत्यजन्नेवावतीर्ण इति । भगवतः सत्त्वादिगुणवज्जनशरीरत्वं तु अनेन जीवेनात्मनानुप्रविश्य 'नामरूपे व्याकरवाणि' । 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म सत्यं चानृतं च सत्यमभवत्' इत्यादि-श्रुत्युक्तरीत्या बोध्यम् ॥ १५ ॥ अजहत्सर्वज्ञत्वस्य सत्यसंकल्पस्य ज्ञानशक्तिबलैदार्यादिसत्स्वभाववतो भगवतो मर्त्यलीलानुकारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वैश्वर्याच्छादनार्थक एव न कर्मायत्त इत्याह। मामिति श्लोकद्वयेन। अजस्याजन्मनो भगवतः वसुदेवगेहे कांसीयबन्धनागारे, बन्धनागारस्य वसुदेवगेहत्वोक्तिस्तत्र प्राचुर्येण तन्निवासत्वात्। यत् जन्मविडम्बनं जातवदनुकरणं न तु नृसिंहवदकस्मादाविर्भावः। पश्चात् स्वयम् अनन्तवीर्यः सन्नपि अरिभयात्कंसभीतित इव व्रजे च व्रजेऽपि, वासोऽस्त्यस्येति वासः। अर्शआदित्वादच्। निलीय व्रजे विहितावास इत्यर्थः। अभवत्। पुनः अरिभयात्कालयवनभयादिव पुरान्मथुरायाः सकाशात् व्यवात्सीत् पलायत् इति यत् एतत् हि निश्चयेन मां खेदयति। मच्चित्तं व्यामोहयतीत्यर्थः। एतत्सर्वमस्यैश्वर्याच्छादनार्थमेवास्तीति भावः॥ १६॥ दुनोतीति। किं च पित्रोः देवकीवसुदेवयोः पादौ अभिवन्द्य बहुस्नेहप्रदर्शनपूर्वं नमस्कृत्य कंसव्यापादनानन्तरमिति शेषः। हे तात पितः, हे अम्ब मातः, कंसात् उर्वधिकं यथा तथा शङ्किता भीतास्तेषाम्, न कृता निष्कृतिर्यैस्तेषाम् अविहितभवच्छुश्रूषाणामित्यर्थः। नोऽस्माकं युवां प्रसीदतम्। अस्मदुपरि प्रसादं कुरुतमित्यर्थः। इति यदाह एतत् स्मरतः मम चेतः कर्म दुनोति खेदयति॥ १७॥ यद्येवं तर्ह्ययमनीश्वर एव किं नस्यादित्याशङ्कापरिहाराय मनुष्यलीलामनुकुर्वाणो भूयो भूय ऐश्वर्यमपि संप्रकाशितवानिति वदन्निरवधिकातिशयवात्सल्यादिगुणयुक्तस्य तस्य वियोगोऽतिदुःसह इत्याह सप्तभिः। क इति। यः कृष्णः भ्रूरेव विटपो लताविशेषः विस्फुरंश्चलंश्चासौ भ्रूविटपश्च तेन भ्रूभङ्गानुवर्तिनेत्यर्थः। कृतान्तेन मृत्युना भूमेः भारं तिरश्चकार अपहृतवान्। अमुष्य श्रीकृष्णस्य अङ्घ्री पादावेव सरोजे पद्मे तयोः रेणुः पांसुस्तं विजिघ्रन् अवघ्राणतया सेवमानः को वा पुमान् को नु ज नइत्यर्थः। विस्मर्तुं विस्मरणपथं नेतुम् ईशीत शक्नुयात्। भ्रूभङ्गेन भुवो भारापहरणमैश्वर्यप्रकाशकम् ज्ञेयम्॥ १८॥

न च तस्येश्वरत्वं संसाधनीयं भवद्भिरपि दृष्टत्वादित्याह। दृष्टेति। यां सिद्धिं योगिनो भक्तियोगनिष्ठाः सम्यक् यथार्थतया निष्पादितेन योगेन एकान्तिकभक्तियोगेन संप्रहृयन्ति वाञ्छन्ति। सा सिद्धिः भगवत्प्राप्तिः राजसूये कृष्णं द्विषतः अपि चैद्यस्य शिशुपालस्य भवद्भिः दृष्टा ननु। तस्य विरहस्तं कः सहेत। द्विषतोऽपि निरतिशयपुरुषार्थरूपमुक्तिं प्रयच्छतो वात्सल्यनिधेः कृष्णस्य वियोगं को नु सोढुं शक्नुयादित्यर्थः॥ १९॥ न केवलं द्विषतां भजतां च कृष्णः स्वपदप्रापकः, किं तूदासीनानामपीत्याह। तथैवेति। किं च तथैव यथा एतद्भक्ता विद्विषश्च तत्पदमापुस्तद्वदेवेत्यर्थः। आहवे युद्धे नयनाभिरामं नयनानन्दकरं कृष्णमुखारविन्दं श्रीकृष्णमुखकमलं नेत्रैः पिबन्तोऽनुभवन्तः पार्थस्यार्जुनस्यास्त्राणि तैः पूताः पवित्रतामाप्ताः ये अन्ये भक्तविद्विड्भ्य इतरे उदासीना अपि नरलोकवीरा राजानः अस्य भगवतः पदं स्थानम् आपुः॥ २०॥ एवं मर्त्यलीलामनुकुर्वतो भगवतो भूभारावतरणमुक्तिप्रदत्वादिकमैश्वर्यमभिहितम्। अथैवमैश्वर्यं प्रकाशयत एव पुनर्मर्त्यलीलानुकृतिमाह। स्वयमिमिति द्वाभ्याम्। सम एव साम्यः स च, अतिशयोऽधिकश्च साम्यातिशयौ, न विद्येते साम्यातिशयौ यस्य सः। समाभ्यधिकरहित इत्यर्थः। त्रयाणां प्रकृतिपुरुषकालानामधीशः स्वामी। यद्वा। त्रयाणां लोकानामधिपतिः। सत्त्वादिगुणत्रयाधिपतिर्वा। अतः स्वराडनन्याधीनस्तस्य भावः स्वाराज्यं तेन या लक्ष्मीरैश्वर्यवीर्ययशआदिसंपत्तिस्तया आप्ताः समस्ताः कामा यस्य सः। सर्वदा सन्निहितभोग्यभोगोपकरणभोगस्थानसमृद्ध इत्यर्थः। बलिं पूजां हरद्भिः निवेदयद्भिः। चिरं बहुकालं लोकान् पालयन्तीति तैः, किरीटानां मुकुटानां कोटिभिरीडितः सेवितः पादपीठो यस्य सः॥ २१॥ तदिति। तस्य भगवतः अङ्ग हे विदुर परमेष्ठिधिष्ण्ये सार्वभौमसिंहासने निषण्णं सम्यगवस्थितम् उग्रसेनं प्रति तिष्ठन् उक्तानेकैश्वर्यसंपन्नोऽपि स्वयं भगवानवस्थितः सन्नेव, हे देव हे राजन् निधारय मया वक्ष्यमाणं वचनमवधारय, इत्येवं यत् न्यबोधयद्विज्ञापितवान्, तदेतद्भगवद्विज्ञापनवचः, कैङ्कर्यं किङ्करभावम् उपाश्रितानापन्नान्, अलं भृतानि पाठेऽप्ययमेवार्थः। नः अस्मान् विग्लापयति। अहो निरवधिकातिशयैश्वर्यवतोऽप्येवं निर्हेतुकं दैन्याचरणमिति मनोग्लानिमुत्पादयतीत्यर्थः॥ २२॥

एवं परमेश्वरस्याप्युग्रसेनानुवृत्तिः केवलनिष्कारणापारकरुणयैवेति सूचयन्नपकारिष्वपि तस्य कृपालुतां दर्शयन्नाह। अहो इति। अहो आश्चर्ये। इयं बकी बालभक्षणशीला पूतना 'बक भक्षणे' इति धातो रूपम्, स्तनयोः संभृतं तच्च तत्कालकूटं विषं तत्। शाकपार्थिवादिः। जिघांसया हन्तुमिच्छया हेतुना अपाययत्। एवम् असाध्वी दुष्टापि बकी धात्र्या यशोदाया उचिता तां तत्संबन्धिनीमित्यर्थः। गतिं सद्गतिं लेभे संप्राप्तवती। तत एवं विहितापराधाया अपि तस्या यो मुक्तिं विहितवानेवंभूताद्भगवतः अन्यं दयालुं कं वा कं नु पुरुषं शरणं भजेम व्रजेम॥ २३॥ ननु 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेर्भगवतः भक्तियोगेनैव प्राप्यत्वश्रवणात्कथमुदासीनानां द्विषतां च मुक्तिमदादित्युच्यते इत्यत आह। मन्य इति। ये असुराः त्र्यधीशे त्रयाणां लोकानामेकस्मिन् स्वामिनि भगवति, संरम्भः क्रोधावेशस्तेन मार्गेण अभिनिविष्टं चित्तं येषां ते, संयुगे युद्धे प्राणांस्त्यक्ष्यन्तः सन्त इति शेषः। तार्क्ष्यः कश्यपस्तस्य पुत्रो गरुत्मांस्तस्य अंसे भुजशिरसि स्थित्वा आपतन्तमागच्छन्तं सुनाभं चक्रमायुधं यस्य तं मनोहरायुधधरं भगवन्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मित्यर्थः। अचक्षतापश्यन्। तान् सर्वानसुरान् भागवतान् भगवद्भक्तान् मन्ये। तस्मिन्काले भगवद्दर्शसंजातया दैव्या संपदा युक्ततया तेषां भागवतत्वसंमननमिति बोध्यम्। 'तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्' इति वक्ष्यमाणरीत्या भक्तियोगनिष्ठतुल्या एव द्विषदादयोऽपीति भावः ॥ २४ ॥ इदानीं श्रीकृष्णस्यान्तर्द्धानलीलाप्रकारं वक्तुमादित आरभ्य तच्चरितं संक्षेपतो वर्णयति। वसुदेवस्येत्यादिना। अजेन ब्रह्मणा अभियाचितः संप्रार्थितः, अस्याः भूमेः कं सुखं चिकीर्षुः कर्त्तुमिच्छुः भगवान्, भोजेन्द्रः कंसस्तस्य बन्धनं काराग्रहं तस्मिन् वसुदेवस्य देयक्यां देवकीसंज्ञायां वसुदेवभार्यायामित्यर्थः। जातः, समग्रज्ञानशक्तिबलैश्वर्यादिसंपन्नः सन्नेव प्रादुर्भूत इत्यर्थः ॥ २५ ॥ तत इति। ततोऽनन्तरं कंसादौग्रसेनेः विशेषेण बिभ्यतीति विबिभ्यत्तेन अतिभीतेन पित्रा वसुदेवेन निमित्तभूतेन नन्दव्रजम् इतः गतः। तत्र नन्दव्रजे एकादश समाः संवत्सरान् गूढार्चिर्गुप्ततेजाः अनभिव्यक्तैश्वर्य इत्यर्थः। सबलः सरामः अवसदुषितवान् ॥ २६ ॥ किं कुर्वन्नवसदित्यत आह। परीत इति। वत्सान् पान्तीति वत्सपालकास्तैः परीतः संवेष्टितः सन् वत्सान् चारयन्, कूजन्तः शब्दान्कुर्वन्तो ये द्विजाः पक्षिणः तैः संकुलिता व्याप्ता अङ्घ्रिपा वृक्षा यस्मिंस्तस्मिन् यमुनाया नद्या उपवनं प्रान्तवर्त्ति काननं तस्मिन्, विभुः स्वयं सर्वान्तर्यामी सन् व्याहरत् आक्रीडत् ॥ २७ ॥

कौमारीमिति। व्रजो गोष्ठमोको निवासस्थानं येषां तेषां प्रेक्षणीयां दर्शनीयां कौमारीं कुमारावस्थाविधेयां चेष्टां दर्शयन् सन् स्वयं कदाचित् हसन्निव, कचित् रुदन्निव, वर्त्तमानः मुग्धः सुन्दरः यो बालसिंहस्तस्येवावलोकनं यस्य स तथाभूतः सन् व्याहरदिति पूर्वश्लोकक्रियया संबन्धः ॥ २८ ॥ स एवेति। उक्तविधः कृष्णः अधिकं वयः प्राप्तः सन्नेवेति शेषः। लक्ष्म्याः शोभादिसंपदः निकेतमास्पदम्, श्वेताः गोवृषाः यस्मिंस्तत् गोधनं गवां समूहं चारयंस्तृणान्यादयन् रणच्छब्दं कुर्वन्वेणुर्यस्य, तादृशः सन् अनुगान् अनुयायिनः। गोपान् अरीरमत् रमयामास। चारयन्नित्यत्र चौरादिको णिच्। अरीरमदित्यत्र प्रयोजक एव। सितगोवृषमिति पदं तु, सितास्तन्तूनां रज्वा नासिकायां स्यूताः प्रोता गोवृषाः ककुद्मन्तो यस्मिन्निति तु अन्ये व्याचख्युः। सिता नानावर्णाः सितवर्णस्य सर्ववर्णप्रकृतित्वात्तथाभूताः गावो वृषाश्चेत्यपरे व्याचख्युः ॥ २९ ॥ प्रयुक्तानिति। भोजराजेन कंसेन प्रयुक्तान् प्रहितान्, मायिनो वञ्चकान्, कामरूपिणः स्वेच्छानुरूपवेषधारिणः, तान् तान् शकटधेनुकारिष्टादीन्, बालः क्रीडनकान् तृणादिनिर्मितान् सिंहादीनिव लीलया व्यनुदद्हनत्। बालः क्रीडनकानिवेत्यनायासे दृष्टान्तः ॥ ३० ॥ विपन्नानिति। विषपानेन कालियह्रदजलपानेन विपन्नानापन्नान्मूर्च्छितानिति यावत्। गोगोपान् दृष्ट्वेति शेषः। भुजगाधिपं कालियं निगृह्य दमित्वा गोपान्, गावः गाश्च, उत्थाप्य यमुनायाः सकाशादभ्युत्थानं विधाप्य तद्विषसंपृक्तं तोयं जलं प्रकृतिस्थितं निर्विषं कृत्वा अपाययत्। गोगोपांस्तृषार्वाजितांश्चक्रे इत्यर्थः ॥ ३१ ॥

अयाजयदिति। उरुरतिशयितो भारः संवृद्धिर्यस्य वित्तस्य धनस्य सद्व्ययं समीचीनोपयोगं चिकीर्षन्कारयितुच्छन् प्रभुः श्रीकृष्णः द्विजोत्तमैरुत्तमब्राह्मणैः सहितः सन् गोसवेन गोसवाख्ययागेन, इन्द्रपूजाभङ्गेन कृता गवां पूजैव गोसवस्तदाख्यक्रतुनेत्यर्थः। गोपराजं नन्दम् अयाजयत् ॥ ३२ ॥ वर्षतीति। हे भद्र विदुर भग्नो भञ्जनं प्राप्तो मानोऽभिमानो यस्य तस्मिन् विहतपूजे इत्यर्थः। इन्द्रे शक्रे कोपात्कोपं प्राप्य वर्षति पुष्कलजलं मुञ्चति सति अतिविह्वलः व्याकुलतां प्राप्तः व्रजो नन्दगोष्ठः, अनुगृह्णता नन्दादीन् प्रसादयता कृष्णेन कर्त्रा गोत्रो गोवर्द्धनाचल एव लीलातपत्रं तेन त्रातः संरक्षितः ॥ ३३ ॥। शरदिति। शरदि शरत्काले यः शशी चन्द्रमास्तस्य कराः किरणास्तैः मृष्टमुज्ज्वलं रजनीमुखं प्रदोषकालं मानयन् कृतार्थतामापादयन् स्त्रीणां गोपीनां मण्डलं निवहं मण्डयतीति मण्डलमण्डनः। कलान्यव्यक्तमधुराणि पदानि अक्षराणि यस्मिन्कर्मणि तत्तथा गायन् रेमे अरमत ॥ ३४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तृतीयोऽध्यायः

उद्धव उवाच

ततः स आगत्य पुरीं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः।
निपात्य तुङ्गाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्याम् ॥ १ ॥

यत्कृतं मथुरामेत्य कृष्णेनाथ तृतीयके। व्रजात्कंसवधाद्यं तद्द्वारिकायामवर्णयत् ॥ १ ॥

मथुराद्वारिकयोर्भगवता कृतेषु चेष्टितेषु मध्ये प्रथमतो मथुरायां कृतानि तच्चेष्टितान्याह। तत इति द्वाभ्याम्। स्वपित्रोर्देवकीवसुदेवयोः शं सुखं चिकीर्षया कर्तुमिच्छया बलदेवेन संयुतः सन् ततो व्रजात् पुरीं मधुपुरीं मथुरामित्यर्थः। आगत्य संप्राप्य रिपुयूथनाथं शत्रुवृन्दनायकं कंसमित्यर्थः। ओजसा बलेन तुङ्गादुच्चाद्राजमञ्चात् उर्व्यां भूमौ निपात्य हतं स्वेनैव व्यापादितम् अत एव विगता असवः प्राणाः यस्य तथाभूतं सन्तं व्यकर्षत्। देवानां विश्वासार्थमिति भावः ॥ १ ॥ सांदीपनेरिति। सांदीपनेः सांदीपन्याख्योपाध्यायात सकृदेकवारं प्रोक्तं कथितं तेनैकवारमेवोच्चार्याध्यापितमित्यर्थः। सविस्तरं षडङ्गोपेतं ब्रह्म वेदम् अधीत्य पठित्वा तस्मै सांदीपनये मृतं पुत्रं मृतपुत्रप्रदानरूपं वरं पञ्चजनोदरात् पञ्चजनो नाम कश्चित्सामुद्रोऽसुरस्तस्योदरविदारणद्वारा यमपुरीं गत्वा ततस्तत्पुत्रमानीयेत्यर्थः। प्रादात् ॥ २ ॥

अथ द्वारिकाकृतानि तच्चेष्टितान्याह। समाहुता इति। श्रियो लक्ष्म्याः सवर्णेन समानरूपेण युक्तयेति शेषः। भीष्मककन्यया रुक्मिण्या निमित्तभूतया रुक्मिण्युद्वाहार्थमित्यर्थः। रुक्म्यादिभिरिति शेषः। ये शिशुपालादयः समाहुताः सम्यगाहूताः ह्रस्वत्वमार्षम्। तत्र शिशुपालस्तु परिणाययितुमन्ये जन्यभावेनेति बोध्यम्। एषां शिशुपालादीनां मिषतां सतां मूर्ध्नि तच्छिरःप्रदेशे पदमङ्घ्रिं दधद्दधानः तानभिभूयेत्यर्थः। गान्धर्ववृत्त्या परस्परसंकेतरूपया वृत्त्या बुभूषया भवितुमिच्छया उद्वोढुमिच्छयेति यावत्। सुपर्णः शोभमानरथः सन् स्वभागं स्वभागरूपां रुक्मिणीं जह्रे हृतवान्। रुक्मिण्या कृष्णभागत्वं यथा विष्णुपुराणे 'राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि। अन्येष्वप्यवतारेषु विष्णोरेषानपायिनी' इति। तत्रैवान्यत्र। 'भास्करस्य प्रभा यथा' इति ॥ ३ ॥ ककुद्मिन इति। न विद्धा अविद्धा अच्छिद्रा नसो नासिका येषां तान् ककुद्मिनो वृषभान् दमित्वा संछिन्ननासान्कृत्वा नाग्नजितीं नग्नजिद्राज्ञः कन्यां स्वयंवरे उवाह परिणिनाय। तेन ककुद्मतां दमनेन, भग्नः खण्डनं प्राप्तः मानो वयं बलवत्तरा इत्येवंभूतोऽभिमानो येषां तानपि, गृध्नतः कन्याग्रहणं कामयमानान् अत एव अज्ञान् मन्दमतीन् शस्त्रभृतः श्रीकृष्णात्पथि कन्याहरणधिया धृतविविधायुधान्नृपान् स्वयम् अक्षतः सन्नेव, स्वस्य शस्त्राणि तैः सुदर्शनादिस्वीयदिव्यायुधैरित्यर्थः। जघ्ने हतवान्। मार्गे स्वं रुद्ध्यमानानपि राजव्रजान्विजित्य नाग्नजितीमुदवहदित्यर्थः ॥ ४ ॥ प्रियमिति। प्रभुः स्वयं स्वतन्त्रः सन्नपि ग्राम्यो विषयभोगासक्तो जनः इव, प्रियायाः सत्यभामायाः प्रियमभीष्टं विधित्सुः कर्तुकामः सन्निव, द्युतरुं स्वर्गीयपारिजातवृक्षम् आच्छेत् अहार्षीत। कथंभूतं यस्य पारिजातस्यार्थो निमित्तं तस्मिन्, ततस्तद्विमोचनायेत्यर्थः। वज्री संधृतवज्र इन्द्रः सगणो देववृन्दसहितः रुषा क्रोधेन अन्धोऽचक्षुरिव तं पारिजातमपहरन्तं भगवन्तम् आद्रवत्। स्त्रिया संप्रेरितः सन्नेव युद्धं कर्तुमभिमुखमाजगाम। तथाभूतं पारिजातस्य श्रीकृष्णार्हतामजानन्तं केवलनारीपरतन्त्रं वज्रधरं निन्दति। अयं वज्री वधूनां नारीणां क्रीडामृगः ननु। क्रीडार्थं संपादितमृगसमान एव ज्ञेय इति शेषः ॥ ५ ॥

सुतमिति। मृधे संग्रामे वपुषा देहेन खमन्तरिक्षलोकं ग्रसन्तं गिलन्तमिव स्थितं सुनाभेन चक्रेणोन्मथितो हतस्तं सुतं धरित्रीपुत्रं नरकं दृष्ट्वा धरित्र्या तन्मात्रा पृथिव्या आमन्त्रितः संप्रार्थितः सन् तत्तनयाय नरकस्य पुत्राय शेषं स्वपरिगृहीतावशिष्टं कोशराशिप्रभृतिकं दत्त्वा विश्राण्य तस्य नरकस्यान्तःपुरम् आविवेश संप्रविष्टवान्। क्वचित्तु धरित्र्या इति षष्ठ्यन्तः पाठो दृश्यते, तत्पक्षे धरित्र्याः सुतम्, आमन्त्रितस्तया संप्रार्थित इति योजना ॥ ६ ॥ तत्रेति। तत्र नरकान्तःपुरे कुजेन धरित्रीसुतेन नरकेण आहृता हठादानीताः ताः प्रसिद्धाः नरदेवकन्याः राजादिकुमार्यः आर्त्तबन्धुमार्त्तजनानां बन्धुवत्साहाय्यकरं हरिं दृष्ट्वा समीक्ष्य सद्यस्तत्क्षणमेव उत्थायाभ्युत्थानं कृत्वा प्रहर्षेण सहितौ यौ व्रीडानुरागौ लज्जास्नेहौ ताभ्यां प्रहिताः संप्रेरिता येऽवलोकास्तैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगृहुः। पतित्वेन स्वीकृतवत्यः ॥ ७ ॥ आसामिति। आसां पतित्वेन स्वं स्वीकृतवतीनां योषितां तासां नारीणां पाणीन् नानागारेषु प्रतिनारि विभिन्नेषु सौधेषु एकस्मिन्नेव मुहूर्त्ते स्वमायया स्वीयसंकल्पेन बहुरूपः विधृतानेकस्वरूपः सन् सविधं यथाविधि, विधिविवाहक्रियाबोधकः शास्त्रोपदेशस्तद्रीत्येत्यर्थः। जगृहे संगृहीतवान् ॥ ८ ॥ तास्विति। तासु गृहीतपाणिषु स्त्रीषु एकैकस्यां भार्यायां सर्वशः सर्वप्रकारेण आत्मतुल्यानि स्वात्मना समानानि दश दश अपत्यानि प्रकृतेः प्रकृत्यात्मकस्वशक्तेः विबुभूषया विविधभावेन भवितुमिच्छया मन्नियाम्यायाः प्रकृतेर्वृद्धिरीदृशीति प्रकाशयितुमिच्छयेति यावत्। अजनयदुत्पादयामास ॥ ९ ॥ कालेति। अनीकैः सैन्यैः पुरीं स्वनगरीं मथुरां द्वारिकां चेत्यर्थः। रुन्धत आवृण्वानान् कालः गर्गोत्पादितः कालयवनश्च, मागधो जरासंधश्च, शाल्वश्च, ते आदयो येषां तान् स्वयम् एव अजीघनत् घातितवान्। तेन स्वपुंसां भीमार्जुनादीनां दिव्यं तेजः प्रभावं कीर्त्तिं वा। आदिशद्दत्तवान्। स्वपुंसामिति अपादानत्वाविवक्षायां संबन्धसामान्ये षष्ठी। मुचुकुन्दभीमादिद्वारा तान् घातयन्नपि तेभ्यो यतः स्वयं सामर्थ्यं प्रायच्छत्ततः स्वयमेव तद्धन्तेत्यर्थः ॥ १० ॥

एतदेव किंचिद्विवेचयति। शम्बरमिति। शम्बरं शम्बरासुरम्, द्विविदं मैन्दवानरभ्रातरं द्विविदाख्यकीशम्, बाणं बलिसुतम्, मुरं नरकासुरपुरपरिखावासं मुरनामानमसुरम्, बल्वलमिल्वलभ्रातरं च, अन्यांश्च घातयदघातयत्। अडभावः आर्षः। घातयन्निति वा पाठः। कांश्च कतिचन दन्तवक्रादीन् अवधीत्स्वयं हतवान्। तत्र शम्बरं प्रद्युम्नेन, द्विविदबल्वलौ बलेन घातितवान्। बाणमुरदन्तवक्रादीन् स्वयमहनदिति विवेकः ॥ ११ ॥ अथेति। कुरुक्षेत्रं प्रति आपतताम् आगच्छतां येषां नृपाणां बलैः सैन्यैः भूः सकलाऽपि भूमिः चचाल चकम्पे। तथाभूतान् ते तव भ्रात्रोः पाण्डुधृतराष्ट्रयोर्ये पुत्रा युधिष्ठिरादयो दुर्योधनादयश्च तेषां पक्षयोः साहाय्ययोः पतितानवस्थितान् नृपान् अथ कार्त्स्न्येन अघातयदित्यनुषञ्जनीयम् ॥ १२ ॥ एवं कांश्चित्स्वयं निहत्य कांश्चिचान्यैर्व्यापादयित्वा स्वकुलं संहर्त्तुमिच्छंस्त्वद्भ्रातृसुतानां तत्पक्षपातिनृपाणां च वधेनापि पृथिव्याः भारो नूनं न क्षपति इत्यमन्यतेत्याह। स इति। सः भगवान् कर्णश्च, दुःशासनश्च, सौबलः शकुनिश्च, तेषाम्। कुत्सितश्चासौ मन्त्रश्च तस्य पाकः फलप्रदानसमयस्तेन स्वकीयानर्थावहगुह्यवादफलेनेत्यर्थः। श्रीः संपच्च, आयुर्बहुजीवनं च, ते हते श्र्यायुषी यस्य तम्। श्रियायुषमिति तु वरेणीयमिति वत्। भग्नावूरू यस्य तम्, उर्व्यां भूमौ शयानं पतितम्, सानुचरं परितः संभृच्छृगालादसहितम्, सुयोधनं दुर्योधनं पश्यन्नपि न ननन्द। संतोषं न प्रापेत्यर्थः ॥ १३ ॥ भगवतोऽसंतोषहेतुं वदंस्तस्य प्रकारमाह। कियानिति। मदंशैर्मच्छरीरभूतैः द्रोणो द्रोणाचार्यश्च, भीष्मः शंतनुसुतश्च, अर्जुनो मध्यमपाण्डवश्च, भीमो द्वितीयपाण्डवश्च, ते मूलान्यादयो येषां सात्यक्यादीनां तैः। अष्टादशाष्टादशसंख्याकाः अक्षौहिण्यः परिमाणं यस्य सः, अक्षौहिणीत्यत्र ह्रस्वत्वमार्षम्। यत् यः भुवः अयम् उरुभारः क्षपितोऽवतारितः सः भारः कियानल्प इत्यर्थः। क्षपितोरुभार इत्यत्र संधिरार्षः। यतः यदूनां यादवानां दुर्विषहं सोढुमशक्यं बलं सैन्यम् आस्ते तिष्ठति। यावद्भूमौ यादवाः सन्ति तावद्भीष्मादिद्वारा क्षपितोऽपि भूभारोऽक्षपित एवेति भावः ॥ १४ ॥

एवं यादवानां बलप्रशंसां कृत्वा तत्संहारेऽचलमुपायं संचिन्तितवानित्याह। मिथ इति। माध्व्याः मधुकुसुमकृतायाः सुरायाः मदात्तत्पानजातोद्धर्षात् ताम्राणि सिन्दूरारुणानि विलोचनानि येषां तेषाम्, एषां यदूनाम्, यदा मिथोऽन्योन्यं विवादः भविता। विप्रशापपरिजिहीर्षया प्रभासतीर्थगमनानन्तरमिति शेषः। तदा मयि सर्वान्तरात्मनि सर्वेषां संहर्त्तरि च मयीत्यर्थः। उद्यते अस्माल्लोकान्मल्लोकं गन्तुमुद्युक्ते सतीत्यर्थः। स्वयमेव एतेन विवादेन अन्तर्दधते स्म अतर्द्धीरन्नङ्क्ष्यन्ति स्मेति यावत्। इयानेतावान् एव एषां वधोपायः। इतोऽस्मादुपायात् अन्यः न अस्ति। एकात्मानोऽप्येते मयि स्वधाम गन्तुमुद्युक्ते सति विवादेन स्वयमेवान्तर्द्धीरन्निति भावः ॥ १५ ॥ एवमिति। भगवान् श्रीकृष्णः एवमुक्तप्रकारेण संचिन्त्य विचार्य धर्मजं युधिष्ठिरं स्वराज्ये स्वपितृपदे स्थाप्य स्थापयित्वा असमासत्वाल्ल्यबार्षः। साधूनां सज्जनानां वर्त्म वर्णाश्रममर्यादां दर्शयन् स्वानुष्ठानेन लोकमनुष्ठापयन् सुहृदो मित्राणि नन्दयामास ॥ १६ ॥ उत्तरायामिति। यः पूरोः नृपस्य वंशः अभिमन्युना साधु यथा तथा उत्तरायां स्वभार्यायां धृतः पूरोर्वंशवृद्धिकरः परीक्षिद्रूपो गर्भ उत्पादित इत्यर्थः। स उत्तरागर्भस्थः परीक्षित् द्रौणिरश्वत्थामा तस्यास्त्रं ब्रह्मशिरोनामास्त्रं तेन संभिन्नः संछादितः, अथापि पुनः भगवता श्रीकृष्णेन धृतः रक्षितः अभूत् वै ॥ १७ ॥ अयाजयदिति। विभुः स्वयं श्रीकृष्णो भगवान् धर्मसुतं युधिष्ठिरं त्रिभिः अश्वमेधैः अयाजयत्। स धर्मसुतोऽपि कृष्णम् अनुव्रतः अनुवर्त्तमानः अनुजैः सह क्ष्मां भुवं रक्षन्सन् रेमे ॥ १८ ॥ भगवानिति। विश्वात्मा विश्वस्यान्तः प्रविश्य धारकः भगवान् श्रीकृष्णः अपि लोकश्च, वेदश्च, तयोः पन्था लोकवेदपथस्तमनुगच्छतीति तथाभूतः श्रौतस्मार्त्तधर्मानुवर्त्तमान इत्यर्थः। सांख्यं संख्या बुद्धिस्तया गम्यं सांख्यं मुमुक्षूपास्यमात्मानमित्यर्थः। प्रकृतिपुरुषविवेकमित्यन्ये। आस्थितः स्वकीयानुभवानन्दमेव सम्यगनुभवन्नित्यर्थः। अत एव असक्तः शब्दादिष्वनासक्तः सन् द्वारवत्यां द्वारिकायां काम्यन्ते इति कामाः तान् कामान् सिषेवे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोकसंग्रहार्थं गृहस्थधर्मसंशीलनपरो बभूवेत्यर्थः ॥ १९ ॥ एतदेव प्रपञ्चयति । स्निग्धेत्यादिना । स्निग्धः कृपायुक्तः स्मितो मन्दहाससहितश्च योऽवलोकस्तेन अत्र स्मितशब्दोऽर्शआद्यजन्तः । पीयूषकल्पयाऽमृतसमानया वाचा, अनवद्येन निर्दोषेण चरित्रेण, श्रियो लक्ष्म्या निकेत आश्रयस्तेन आत्मना शरीरेण च ॥ २० ॥

इममिति । इमं लोकं सांप्रतं यत्र स्वयं विराजते तमेतं लोकमित्यर्थः । अमुमस्माल्लोकादुपरितनं स्वर्लोकं च रमयन्, तत्रापि अस्मिन् लोके यदूंस्तु सुतरामतिशयेन एव रमयन्, क्षणदया रात्र्या दत्तः क्षणो भगवत्प्राप्त्यवसरो यासां ताश्च ताः स्त्रियश्च तासु क्षणं सौहृदं यस्य सः एवंभूतः सन् रेमे क्रीडति स्म ॥ २१ ॥ तस्येति । एवं उक्तरीत्याऽनासक्तिपूर्वमित्यर्थः । बहून् संवत्सरगणान् रममाणस्य क्रीडां विदधतः तस्य श्रीकृष्णभगवतः । गृहमेधेषु गृहाश्रमोचितेषु । योगेषु कामभागोपायेषु विरागः संजिहीर्षावोऽनादरः समजायत ॥ २२ ॥ उक्तार्थमेव कैमुत्यन्यायेनाह । दैवाधीनेष्विति । योगेश्वरं योगफलप्रदं भगवन्तं योगेन भक्तियोगेन अनुव्रतः सेवमानः, स्वयं दैवाधीनः दैवायत्तसर्वक्रियः, कः पुमान् दैवाधीनेषु केवलदैवायत्तेषु कामेषु विश्रम्भेत । एते कामा नित्या इति विश्वासं कुर्यात् । न कोऽपीत्यर्थः । यदनुव्रतो यदा कामेषु नित्यत्वव्यवसायं न करोति, तदा भगवान्न विश्वसेदित्यत्र तु किमुत वक्तव्यमिति भावः ॥ २३ ॥ अथ निजकुलं संहर्तुमिच्छतो भगवतोऽभिप्रायानुरोधेन ब्राह्मणशापप्रवर्त्तनं यदुकुलसंहृतिविधानं च संग्रहेणाह । पुर्यां द्वारिकायां कदाचिद्भगवत्कदात्मकुलसंजिहीर्षानन्तरीयकाले इत्यर्थः । क्रीडद्भिः क्रीडामाचरद्भिः यदवश्च भोजाश्च तेषां कुमारका अर्भकास्तैः कोपिताः परिहासाचरणेन कोपं गमिताः मुनयः, यतः भगवतः श्रीकृष्णस्य मतमभिप्रायस्तत्र कोविदा निपुणाः अतः शेपुः शापं ददुः ॥ २४ ॥ भविष्यद्यदुकुलनाशं वक्ष्यंस्तेषां प्रभासयात्रामाह । तत इति । ततोऽनुक्रमेण विप्रशापज्ञानानन्तरं कतिपयैः मासैः वृष्णयश्च, भोजाश्च, अन्धकाश्च, ते आदयो येषां माधवकुकुरादीनां ते नानाविधारिष्टदर्शनानन्तरमिति शेषः । देवेन श्रीकृष्णेन विमोहिताः अत एव संहृष्टाः सन्तः रथैः रथानारुह्येत्यर्थः । प्रभासं ययुः ॥ २५ ॥ तत्रेति । तत्र प्रभासे स्नात्वा समुद्रे स्नानं कृत्वा तदम्भसा प्रभासतीर्थगताब्धिजलेन पितॄन्, देवान्, ऋषींश्च तर्पयित्वा एव, अथ बहुगुणाः दुग्धाधिक्यसौशील्यादिसर्वसद्गुणोपेताः गावो गाः विप्रेभ्यः ददुः ॥ २६ ॥ न केवलं गा एव ददुः, किं परलोके यद्यत्स्वात्मनः पुण्यफलत्वेन प्राप्यं तत्तद्द्रव्यजातं च ददुरित्याह । हिरण्यमिति । हिरण्यं स्वर्णमुद्राः, रजतं रूप्यमुद्राः, शय्यां सोपस्कराः शय्याः, एकवचनं जात्यभिप्रायम् । वासांसि दंपतीपरिधेयवस्त्राणि, अजिनानि, स्वर्णदक्षिणासहितानि मृगचर्माणि च, कम्बला ऊर्णाश्च तान्, हयान्सालंकारानश्वान्, रथान्स्वर्णवरूथोपेतस्यन्दनानि, इभान् स्वर्णकुथोपेतान्करिणः, कन्याः कन्यापरिणयनार्हधनानि । वृत्तिकरीं जीविकापर्याप्तां धरां धरित्रीमपि विप्रेभ्यो ददुरिति पूर्वेणान्वयः । दत्त्वेत्युत्तरश्लोकस्थेन वा ॥ २७ ॥ अन्नमिति । चारू रसो यस्मिन्मृष्टिरसयुक्तमित्यर्थः । अन्नमन्नाद्यं तेभ्यः विप्रेभ्यः भगवदर्पणं यथा भवति तथा दत्त्वा, गावश्च विप्राश्च तदर्था असवः प्राणा येषां ते, शूराः सुभटास्ते यदवः मूर्द्धभिः भुवि प्रणेमुः । भूमौ निपत्य विप्रेभ्यो मूर्द्धभिर्नमश्चक्रुरित्यर्थः ॥ २८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

——:❀:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ चतुर्थोऽध्यायः

उद्धव उवाच

अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीम्। तया विस्रंसितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ॥ १ ॥

बन्धूनां निधनं तुर्ये श्रुत्वा स्वज्ञानसिद्धये। औपगव्युपदेशेन मैत्रेयं विदुरोऽगमत् ॥ १ ॥

अथेति। अथ स्नानदानादिविधानानन्तरं ते यदवः तैर्विप्रैरनुज्ञाता भोजनाय कृताभ्यनुज्ञाः सन्तः भुक्त्वा विघसाशनं विधाय वारुणीं पैष्टीं मदिरां पीत्वा तया वारुण्या विस्रंसितं विनष्टतां प्राप्तं ज्ञानं स्वपरविज्ञानं येषां ते तथाभूताः सन्तः दुरुक्तैर्दुर्वचोभिः मर्म मर्मस्थानानि पस्पृशुः। 'न कंचिन्मर्मणि स्पृशेत्' इति शास्त्रं विस्मृत्य तथाचरन्नित्यर्थः ॥ १ ॥ तेषामिति। ततः मैरेयं मद्यं तस्य दोषस्तेन विषमीकृतानि विभ्रंशतां प्राप्तानि चेतांसि चित्तानि येषां तेषाम्, तेषां यदूनां रवौ सूर्ये निम्लोचत्यस्तं गच्छति सति वेणूनां स्तम्बगतबहुवंशानाम् इव मर्दनं परस्परसंघर्षणम् आसीत् ॥ २ ॥

तदा भगवता किमकारि तत्राह। तदा सः भगवान्कृष्णः तां तेषां तथाविधतारूपाम् आत्ममायायाः प्राक्तनस्वसंकल्परूपेच्छायाः गतिं परस्परकृतवधहेतुकस्वकुलनाशभवनरूपेच्छायाः फलोदयलब्धिमित्यर्थः। अवलोक्य सरस्वतीं नदीम् उपस्पृश्य सरस्वत्यां स्नात्वा इत्यर्थः। वृक्षमूलं चलदलतरुमूलप्रदेशम् उपाविशत्। पिप्पलद्रुममवष्टभ्याऽस्थादित्यर्थः ॥ ३ ॥ संक्षिप्योक्तमर्थं पुनर्विशदयति। अहं चेति प्रपन्नानां स्वशरणागतानामार्त्तिः पीडा तस्या हरः संहर्त्ता तेन स्वस्यात्मनः कुलं गोत्रं तत् संजिहीर्षुणा संहर्त्तुमिच्छता च भगवता श्रीकृष्णेन हे उद्धव त्वं बदरीं बदरिकाश्रमं प्रति प्रयाहि गच्छ। इत्यमुना प्रकारेण अहं ह स्फुटं यथा तथा उक्तः। पूर्वं द्वारिकायां मां प्रति भगवतेति कथितमित्यर्थः ॥ ४ ॥ अथापीति। हे अरिंदम विदुर अथापि द्वारिकायामेवैवं प्रथमत आदिष्टः सन्नपीत्यर्थः। तस्य श्रीकृष्णस्य अभिप्रेतं स्वकुलसंहारादिकं जानन् अहं भर्त्तुः कृष्णस्य पादविश्लेषणेऽक्षमः तच्चरणाब्जवियोगविधानेऽसमर्थ इत्यर्थः। अत एव पृष्ठतः प्रभासे गमनं कुर्वतः कृष्णस्य पश्चात् अन्वगमम् ॥ ५ ॥ नन्वनुगमनवचनेन मौसलावस्थायां तु तत्रोद्धवस्यावस्थानं न प्रतीयते मौसलानन्तरं च कृष्णदर्शनाभावेन तत्कृतवक्ष्यमाणज्ञानोपदेशसंभवः स्यादिति तदनुगमनमुक्तमयुक्तं स्यादिति चेन्मौसलानन्तरं भगवत्तिरोधानात् प्राक् तत्र तद्गमनादनुगमनं भगवत्कृतज्ञानोपदेशश्च युक्त एवेत्याह। अद्राक्षमिति। एवमनुगच्छन्नहमिति शेषः। सरस्वत्यां सरस्वतीनदीतीरे इत्यर्थः। कृतकेतं कृतनिवासं स्वतः, स्वस्वरूपतस्तु अकेतनमनाश्रयं तस्यैव सर्वाश्रयत्वादिति भावः। एकमसहायम् आसीनं दयितं निरतिशयप्रेमास्पदं श्रीनिकेतं लक्ष्म्या अनन्यैकाधारं पतिं विचिन्वन् गवेषमाणः सन् अद्राक्षं चक्षुषा दृष्टवानस्मि ॥ ६ ॥ उद्धवनिरीक्षितं तं विशिनष्टि द्वाभ्याम्। श्यामेति। श्यामश्चासाववदातश्च तम्। नीलश्वेतवर्णमित्यर्थः। विरजं निर्मलम्, प्रसन्ने अरुणे विलोचने यस्य तम्। चतुर्भिश्चतुःसंख्याकैः दोर्भिर्भुजैः, कृमिकोशेन रचितं कौशं पीतं च तत्कौशं च पीतकौशं तदेव अम्बरं तेन च अणूप्रत्ययः। विदितमयं स्वयं कृष्ण इति लक्षितम् ॥ ७ ॥

वाम इति। दक्षिणश्चासावङ्घ्रिश्च स एव सरोरुहं दक्षिणपादपद्मम्। वामे ऊरौ अधिश्रित्य वामोरूपरि स्थापयित्वेत्यर्थः। उपाश्रितः पृष्ठतोऽवष्टब्धोऽर्भको बालः अश्वत्थः पिप्पलद्रुमो येन तम्। त्यक्तं परिहृतं पिप्पलं कर्मफलं येन तम्। अत एव अकृशं कर्मायत्तकार्श्यस्थौल्याधिव्याध्यादिरहितम्, अहमद्राक्षमित्यनेन संबन्धः ॥ ८ ॥ तस्मिन्निति। तस्मिन्नवसरे भगवत्संनिधौ वा, द्वैपायनो व्यासः सुहृन्मित्रं सखा सहाध्येता च यस्य सः। महाभागवतामग्रण्यः, अत एव सिद्धः कृतकृत्यतायुक्तः, मैत्रेयः लोकाननुचरन् लोकेषु पर्यटन् यदृच्छया केवलभगवदिच्छयैव आससादागतोऽभूत् ॥ ९ ॥ तस्येति। प्रमोदेन श्रीकृष्णसंवीक्षणजनितातिशयितसंतोषेण भावेनोद्रिक्तया भक्त्या चानतया नम्रीभावं गता कंधरा ग्रीवा यस्य तस्य, अनुरक्तस्य भगवति गाढानुरागयुक्तस्य, तस्य भगवदेकान्तिकत्वेन लोकप्रसिद्धस्य, मुनेर्मैत्रेयस्य संशृण्वतः सम्यक्श्रवणं कुर्वतः सतः, मुकुन्दः स्वाश्रितजनमुक्तिप्रदः भगवान् श्रीकृष्णः, अनुरागश्च हासश्च ताभ्यां सहिता या समीक्षा सम्यग्विलोकनं तया विश्रमयन्विगतश्रमं कुर्वन् सन् मां प्रति उवाच ॥ १० ॥ भगवदुक्तिमेव स्पष्टं यथा तथाह द्वयेन। वेदेति। हे वसो उद्धव उद्धवस्य पूर्वजन्मनि वसुत्वात्तदभिप्रायकमिदं संबोधनम्। पुरा पूर्वजन्मनि विश्वसृजां प्रजापतीनां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसूनां च सत्रे यज्ञविशेषे, मम सिद्धिः प्राप्तिस्तस्याः काम इच्छा यस्य तेन त्वया अहम् इष्टः सम्यगाराधितः, अतः ते तव अन्तर्मनसा अन्तःकरणचतुष्टयान्तर्गतेन मनसा ईप्सितं संप्राप्तुमभिवाञ्छितं यत् तत् अहं वेद जानामि। अन्यैरनाराधितमच्चरणैस्त्वदितरैः दुरवापं दुःखेनाप्यवाप्तुमशक्यं तत्त्वदीप्सितं ददामि दास्यामि ॥ ११ ॥

तस्य भाग्यमभिनन्दन् पूर्वजन्माराधितभगवत्प्रसन्नताफलमाह। स एष इति। हे साधो उद्धव भवानामतीतानां तव जन्मनां मध्ये यद्यस्मिन्नेतस्मिन् जन्मनि ते त्वया मदनुग्रहः आसादित उपलब्धः, भगवदनुग्रहो यथा। 'मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव। अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परम्' इति सः एषः भवः जन्म इति यावत्। चरैर्देवमनुष्यादिभिर्मीयते साक्षाद्भगवदुपलब्ध्या तत्रापि तत्सेवाप्राप्त्या च प्रमाणीक्रियते इति चरमः। यस्मिन् जन्मनि साक्षाद्भगवत्प्राप्तिस्तत्सेवायाश्चोपलब्धिस्तदेव सफलं जन्म इति भगवदेकान्तिकजनाः सफलत्वेन तत्प्रमाणं कुर्वन्तीत्यर्थः। तत्र देवकृतैवंविधभवप्रशंसा यथा। 'अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः। यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः' इति। 'तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः। नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः' इति। यच्च नृलोकान्मर्त्यलोकान् रह एकान्ते उत्सृजन्तं त्यजन्तं मर्त्यलोकान्मद्धाम गोलोकं गच्छन्तमित्यर्थः। मां विशदानुवृत्त्या एकान्तिकया सुदृढभक्त्या ददृश्वान् दृष्टवानसि एतच्चापि दिष्ट्या। दृष्ट्यैव जातमस्तीत्यर्थः। केचित्तु अस्मिन् श्लोके चरम इत्यत्राचरम इति पदच्छेदं कृत्वा व्याख्यां कुर्वन्ति। तद्धेतुस्तु चरमोऽन्तिम इत्यन्यकृतव्याख्यायां दोषदर्शनात्। दोषस्तु, स्कान्दपाद्मादिषु दुर्वाससः शापेनोद्धवस्य पुनर्भूलोके जन्मोक्त्या विरोध इति। तथाचोक्तं तत्रैव। 'संसिद्धदेहोऽजन्मापि मुनेः शापात्स उद्धवः। नारायणेच्छया ऽयोध्यानगरेऽजनि वाडवात्' इति। क्वचित्तु जनिता द्विजादित्यपि पाठो दृश्यते। अतोऽचरमश्चरमसदृश इति तदर्थो युक्तः प्रतिभाति। 'तत्सादृश्यं तदन्यत्वं तदल्पत्वं विरोधिता। अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्त्तिताः' इति शाब्दिकोक्तेः। ननु 'तपः समास्थाय हरेरगाद्गतिम्' इत्येकादशे तस्य गतिप्राप्तिरुदितास्ति सा चैतट्टीकायां 'अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परम्' इत्येवमुक्तप्रकारामित्युक्तमस्ति, तथा सत्यऽस्य संसिद्धदेहताप्त्या तादृशदेहस्य कथं शापसंभव इति चेद्दृश्यते तादृशानामपि शापसंभवः। वैकुण्ठवासिनोर्जयविजययोः सनकादीनामिव गोलोकस्थाया राधिकायाः श्रीदाम्न इवेत्यलं परमप्रतिपादनपल्लवनेन ॥ १२ ॥

ननु ददामीति यत्प्रतिश्रुतं तत्किं ददासीत्यपेक्षायां निर्दिशति। पुरेति। हे उद्धव आदिसर्गे आदिसृष्टौ सृष्ट्युपक्रमे इति यावत्। मम नाभ्ये नाभेरुत्पन्ने पाद्मे कमले स्वार्थेऽण्। निषण्णाय समुपविष्टाय अजाय विधये पुरा पूर्वकाले मया प्रोक्तं समभिहितम्। मम महिमा मन्महिमा तस्यावभासः प्रकाशो यस्मात्तत् यच्च सूरयः भागवतं भगवदेकविषयत्वाद्भागवतसंज्ञं वदन्ति। अत एव परं सर्वोत्तमं यत् ज्ञानं तत् तुभ्यं ददामीत्यनुषञ्जनीयम् ॥ १३ ॥ एवं भगवता कथिते सति मयैवमुक्तमित्याह। इतीति। इतीत्थम् आदृतश्चासावुक्तश्च आदृतोक्तः परमस्य पुंसः परमपुरुषस्येत्यर्थः। प्रतीक्षणं कृपावलोकश्च, अनुग्रह आज्ञासंनिवेदनं च, तयोर्भाजनः पात्रभूतः। भाजनशब्दस्य पुंस्त्वमार्षम्। स्नेहेन प्रीत्यतिशयेनोर्ध्वाणि रोमाणि यस्य सः, भक्त्या समुत्पन्नरोमाञ्च इत्यर्थः। स्खलितान्यक्षराणि यस्य सः। गद्गदवागित्यर्थः। अहं शुच आनन्दाश्रूणि मुञ्चन् प्राञ्जलिः प्रबद्धाञ्जलिः सन् तं भगवन्तं प्रति आबभाषे आभाषितवानित्यर्थः ॥ १४ ॥ भगवतस्तवापरोक्षज्ञानसाधनपादारविन्दभक्तिमन्तरेण नान्यदाकाङ्क्षे इत्याभाषितवानित्याह। क इति। हे ईश कृष्ण ते तव पादावेव सरोजे ते भजन्तीति तेषां त्वच्चरणकमलं भजमानानां पुरुषाणामित्यर्थः। इह लोके चतुर्ष्वपि चतुःसंख्याकेष्वपि अर्थेषु धर्मार्थकाममोक्षेषु मध्ये को नु को वार्थः सुदुर्लभः। न कोऽप्यर्थो दुर्लभ इत्यर्थः। तथापि पुरुषार्थचतुष्टयस्य सुलभत्वेऽपि हे भूमन् प्रभो भवतस्तव पादावेवाम्भोजे तयोर्निषेवणं तस्मिन्नुत्सुक औत्सुक्ययुक्तः अहं न प्रवृणोमि पुरुषार्थचतुष्टयमिति शेषः ॥ १५ ॥ 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इत्युक्तविधज्ञानवानहं त्वन्नित्ययोगविरोधिधर्मादिकं नैव वृणोम्येतत्तु सांप्रतमारात्तिष्ठतु। किं तु अघटितघटनासमर्थतारूपां भवदीयां शक्तिं संस्मरतो मे चित्तं पारवश्यं भजतीत्यब्रुवमित्याह। कर्माणीति। अनीहस्य 'निष्कलं निष्क्रियम्' इत्यादिश्रुत्या निष्क्रियत्वेनोक्तत्वान्निर्व्यापारस्य ते तव कर्माणि नानाविधकर्माचरणम् अभवस्य 'जहात्येनां भुक्तभोगामजोऽन्यः' इति श्रुत्या जन्मरहितत्वेनाज इत्युक्तस्य भवो जन्म 'अजायमानो वहुधा विजायत' इत्यादिश्रुत्या जन्मवर्णनम्। कालोऽनेहा आत्मा शरीरं यस्य तस्य 'स कालकालः' इति श्रुत्या नियम्यत्वेन कालशरीरस्य दुर्गाश्रयः द्वारिकारूपजलदुर्गाश्रयणम्, अथ यच्च अरेः कालयवनात् सकाशाद्भयं तस्मात् पलायनम्, स्वात्मनि रतिर्यस्य तस्य आत्मारामस्य प्रमदानां नारीणामयुतं तस्याश्रयः बह्वीभिः प्रमदाभिर्गृहाश्रमाचरणमिति यत् इहास्मिन्विषये विदां विदुषां धीर्मतिः खिद्यति पारवश्यं याति ॥ १६ ॥

किं चेदमपि ज्ञानदुर्बलानां मतिव्यामोहकरमित्याह। मन्त्रेष्विति। मन्त्रेषु मन्त्रविधानप्रस्तुतेषु सत्सु मां त्वदेकदासमुद्धवम् उपहूय दूतप्रेषणपूर्वं समाहूय वै अक्रूरस्याप्याह्वानार्थः। अथवा अहो इत्यर्थकः। अकुण्ठित आवरण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रहितोऽखण्डोपरिच्छिन्नः सन् सत्यरूप आत्मबोधः स्वस्वरूपज्ञानं यस्य सः अनावृतापरिच्छिन्नात्मज्ञान इत्यर्थः। अत एव अप्रमत्तः सर्वकालमवहितः सन्नपि, हे देव त्वं मुग्ध इव कश्चिन्मूढजनो यथा तथा पृच्छेः। अत्रैवंविधं कार्यमापतितं तत्र किं विधेयमित्यपृच्छः। हे प्रभो कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थः तदिदम्, नोऽस्माकं मनः मोहयतीव मोहं प्रापयतीव वर्त्तते। इवशब्देन परमार्थत एतत्सर्वमुपपद्यत एवेति सूच्यते। तथाहि अकर्माधीयत्तक्रियस्य कर्माणि तु लीलयैव, अकर्मायत्तभवस्य स्वेच्छोपात्ताप्राकृतातिदिव्यसर्वमङ्गलास्पदविग्रहपरिग्रहरूपो भवश्च निमेषार्धकालपर्यन्तमपि स्वविरहाक्षमैकान्तिकस्वभक्तसुखप्रदानायोपपद्यते। दुर्गाश्रयणादिकं चासुरसंमोहनार्थकं मर्त्त्यलीलयोपपद्यते। तथा च श्रुतिसूत्रादिकानि। 'यो वै बालके एतेषां पुरुषाणां कर्त्ता यस्य चैतत्कर्म'। 'अजायमानो बहुधा विजायते' लोकवत्तु लीलाकैवल्यम्' इत्यादि ॥ १७ ॥ एवमभिधाय मम हृद्गताभिप्रायमपि सम्यगावेदितवानस्मीत्याह। ज्ञानमिति। हे भर्त्तः स्वामिन् स्वेषामात्मीयजनानामात्मात्मवत्प्रेमास्पदं भवांस्तस्य रहो रहस्यं याथात्म्यमिति यावत्। तस्य प्रकाशं प्राकट्यकरम्, परं ज्ञातव्यार्थेषु प्रधानतोपेतम्, समग्रमङ्गोपाङ्गसहितं ज्ञानम् उक्तविशेषणविशिष्टं यद्वयुनम्, भगवान् पूर्णषाड्गुण्यो भवान, कस्मै काय ब्रह्मणे इत्यर्थः। कस्मै इति सर्वनामत्वमार्षम्। प्रोवाचाऽऽख्यातवान्। तत् ज्ञानं नोऽस्माकं ग्रहणाय ग्रहीतुं क्षमम् अपि, योग्यं स्याच्चेदित्यर्थः। तर्हि वद उपदिश। यद्यस्मात् ज्ञानं प्राप्येत्यर्थः। वृजिनं पुरुदुःखरूपसंसारमित्यर्थः। अञ्जसा सुखेन तरेमातितरिष्यामः। 'ज्ञाननौर्व्यसनार्णवम्' इत्युक्तेर्ज्ञाननावैव संसाराम्बुधिपरपारप्राप्तिरिति तदेव कथयेति भावः ॥ १८ ॥ एवं मदभिप्राये मया निवेदिते भगवान्स्कृष्णा मह्यं तत्त्वमुपदिदेशेत्याह। इतीति। इत्यमुना प्रकारेण आवेदितं संनिवेदितं हार्दं हृद्गताभिप्रायो येन तस्मै मह्यं भगवानैश्वर्यषट्कोपेतः। अरविन्दे कमलच्छदाविव अक्षिणो यस्य सः, परः परमात्मा, स श्रीकृष्णः, आत्मनः स्वस्य परोऽन्यः ज्ञातव्य इतर इति यावत्। मा न विद्यते यस्याः सकाशात सा परमा तां परमां ज्ञातव्यान्तरवर्जितामित्यर्थः। स्थितिं याथात्म्यावगतिम् आदिदेशोपदिष्टवान् ॥ १९ ॥

उक्तार्थमुपसंहरति। स इति। आराधितौ पादौ यस्य स चासौ तीर्थं तीर्थवत्पवित्रताकरश्च तस्मात्। यद्वा। तीर्थशब्दः पावनवाची। तदा पादौ तीर्थं पावनौ यस्य आराधितश्चासौ स च तस्मात्। आराधितपवित्रपादादित्यर्थः। यद्वा। पादे तीर्थानि यस्य आराधितश्चासौ पादतीर्थश्च तस्मात्। यद्वा। आराधितं बहुकालमासेवितं पादतीर्थं पादोदकं यस्य तस्मात्, श्रीकृष्णभगवतः सकाशात् एवमुक्तप्रकारेण अधीतोऽधिगतः तत्त्वात्मविबोधस्य परमार्थपरमात्मस्वरूपज्ञानस्य मार्गोऽध्वा येन सः। यद्वा। तत्त्वात्मा परमात्मावगतिरूपः विबोधो वयुनं स मृग्यते परिशील्यतेऽनेनेति तत्त्वात्मविबोधमार्गः आत्मपरमात्मावगतिप्रकाशकं शास्त्रम्, अधीतः तत्त्वात्मविबोधमार्गो येन सः। स उक्तविधः अहं पादौ भगवतश्चरणौ प्रणम्य देवं श्रीकृष्णं परिवृत्य प्रदक्षिणीकृत्य विरहेण भगद्विश्लेषेण आतुरः खिन्न आत्मा यस्य सः। वियोगजातखेदातुरमानस इत्यर्थः। एवंभूतः सन् इह आगतः अस्मि ॥ २० ॥ भवानिहत्वागत इतः कुत्र यास्यसीत्याह। स इति। सः बदरीं त्वं प्रयाहीत्याज्ञप्तः अहं प्रभोः तस्य श्रीकृष्णस्य दयितमाकल्पान्ततपश्चरणरूपस्वाज्ञापालकस्वावतारनारायणनित्यनिवासतया प्रीतिजनकं बदर्याश्रममण्डलं बदरिकाश्रमपरिसरवर्त्तिकलापग्रामं प्रति तस्य श्रीकृष्णभगवतो दर्शनेन यो ममाह्लाद वियोगेन तद्विश्लेषेण या ममार्त्तिश्च ताभ्यां युतः सन्। पाठान्तरे त्वद्दर्शनजाताह्लादेन कृष्णवियोगोत्पन्नार्त्या च युत इत्यर्थः। गमिष्ये व्रजिष्यामि ॥ २१ ॥ तस्य कृष्णप्रियत्वे कारणं ब्रुवन्नाश्रमं प्रस्तौति। यत्रेति। यत्र बदर्याश्रममण्डले, ऋषिः ऋषिवेषधरः सर्वज्ञो वा, भगवान् नारायणः धर्मस्य पुत्रत्वेनावतीर्णः साक्षान्नारायणांशत्वान्नारायणनामा नरस्तद्भ्राता नराख्यश्च देवो भगवान् उभौ लोकभावनौ स्वाश्रितलोकानुग्राहकौ सन्तौ मृदु स्वाश्रितजनसुखकरम् आत्मवतामनुकम्पया 'तपोऽव्यक्तगतिश्चरति' इत्युक्तेः। तीव्रमितरदुश्चरं दीर्घमाकल्पान्तमाचरणीयं तपः तेपाते चरतः। परमेश्वरावतारयोरपि तयोरित्थंभूततपश्चरणं केवलं स्वाश्रितलोकानुग्रहार्थमेवेति भावः ॥ २२ ॥ एवमुद्धवत उपश्रुतवृत्तान्तस्य क्षत्तुरवस्थितिप्रकारमाह शुकः श्लोकद्वयेन। इतीति। बुधः विद्वान् क्षत्ता विदुरः इत्युक्तप्रकारेण उद्धवादौपगविमुखात सुहृदां ज्ञातीनां दुःसहं सोढुमशक्यमत्यन्तदुःखजनकमित्यर्थः। वधं नाशम् उपाकर्ण्य श्रुत्वा उत्पतितमुत्पन्नं शोकं ज्ञानेन स्वात्मपरमात्मयाथात्म्यज्ञानेन अशमयत् शमयामास। जीवात्मा सततं परतन्त्र एव परमात्मा सर्वदा स्वतन्त्र एवेति विशेषज्ञानविचारेण शोकोपशमनं चकारेत्यर्थः ॥ २३ ॥

स इति। कौरवर्षभः कुरुकुलातिश्रेष्ठः स विदुरः व्रजन्तं व्रजिष्यन्तं बदर्याश्रमं प्रतीति शेषः। महाभागवतं भगवदेकान्तिकभक्तश्रेष्ठं कृष्णपरिग्रहे कृष्णानुग्रहे मुख्यमग्रेसरं तमुद्धवं ज्ञात्वा विश्रम्भात् श्रीकृष्णैकान्तिकश्रेष्ठोऽयमुद्धवो निष्कपटत्वाद्विश्वासविधानार्होऽस्मीति विश्वासं प्राप्येत्यर्थः। इदं वक्ष्यमाणम् अभ्यधत्त कथितवान् ॥ २४ ॥ मत्पृष्टं यथार्थं निवेद-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यिष्यतीति संप्राप्तोद्धवविश्वासस्तदुपदिष्टतत्त्वजिज्ञासुः क्षत्ता पृच्छति। ज्ञानमिति। योगोऽस्त्येषामिति योगा योगिजनास्तेषामीश्वरः। योगशब्दोऽर्शआद्यजन्तः। पाठान्तरेऽयमर्थः सुगम एव। योगिनां योगसंसाधनफलप्रद इत्यर्थः। ईश्वरः स्वयं श्रीकृष्णो भगवान् स्वात्मनः स्वस्वरूपस्य यद्गुह्यो रहस्यं तस्य प्रकाशं प्रकाशकरं परं सर्वोत्तमं यत् ज्ञान ते तुभ्यम् आह, तत् ज्ञानं भवान् नोऽस्मभ्यं वक्तुम् अर्हति। यत् यस्मात् विष्णोः परमेश्वरस्य भृत्याः स्वस्य ये भृत्यास्तेषामर्थः प्रयोजनं तं कुर्वन्तीति स्वभृत्यार्थकृतः स्वभृत्यप्रयोजनसंसाधकाः सन्त इत्यर्थः। चरन्ति हि। न हि कृतार्थानामन्यत् कृत्यमस्तीति भावः॥ २५॥ ननूद्धवेनैवंविधं तद्वचनं श्रुत्वा किमप्यभिहितं तूष्णीं वा ततो गतमित्यत्राह। नन्विति। ननु हे विदुर ते त्वया ऋषिस्तत्त्वदर्शी कौषारवः मैत्रेयः, संराधितुं योग्यः संराध्यस्तत्त्वाय तत्त्वज्ञानं प्राप्तुं संराध्यस्तत्त्वसंराध्यः, तत्त्वोपदेशार्थं संपूज्य इत्यर्थः। न त्वहम्, ननु त्वं तदर्थं कुतो नेज्य इत्यत्राह। मर्त्यलोकं जिहासता हातुमिच्छता साक्षात्प्रत्यक्षं वर्त्तमानेन भगवता कृष्णेन मे मम अन्त्यन्तिके समीपे इत्यर्थः। आदिष्टः। मत्समक्षं त्वदुपदेशाय स्वयं स उपदिष्ट इत्यर्थः। अयं भावः। हे क्षत्तस्त्वं मनसि स्वोनतां मा धाः, यतो देवदेवेशः स्वयं मर्त्यं लोकं त्यक्ष्यन्मैत्रेयमामन्त्र्य हे मैत्रेय तीर्थान्यटित्वा भवन्तमुपसन्नाय क्षत्त्रे मदादिष्टमेतत् ज्ञानमुपादिशेरित्याज्ञप्तवानिति तुभ्यं नाहमुपदिशामीति॥ २६॥ विदुरोद्धवसंवादमुपसंहरति शुकः। इतीति। इतीत्थं विदुरेण सह विश्वमूर्त्तेर्जगच्छरीरकस्य भगवतः गुणानां कथा तया सुधया आप्लुतो निरस्तः उरुरतिमहांस्तापो भगवद्विरहसंतापो यस्य सः। औपगविरुद्धवः यमस्वसुर्यमुनायाः पुलिने तटे तां निशां रात्रि क्षणमिव समुषितः सम्यक् भगवच्चरित्रकथातस्तां रजनीं क्षणवदतिवाह्येत्यर्थः। ततः यमुनायाः अगात्। प्रातःकाले बदरिकाश्रमं प्रति जगामेत्यर्थः॥ २७॥

अत्रोद्धवविषये राजा किंचित्पृच्छति। निधनमिति। वृष्णयश्च भोजाश्च तेषु निधनं नाशम् उपगतेषु, ब्रह्मशापेन यादवानां शतैककुलेषु विनाशं प्राप्तेषु सत्सु स प्रसिद्धः उद्धवः तु एक उद्धव एवेत्यर्थः। कथम् अवशिष्टः। एतस्यापि विप्रशापविषयत्वादवशेषता न घटते इत्यर्थः। यद्यस्माद्धेतोः अधिरथानामतिरथिनां यूथं समूहं पान्ति रक्षन्तीति अधिरथयूथपास्तेषां यूथं पान्तीति अधिरथयूथपयूथपास्तेषु मुख्योऽग्रगण्यः, त्रयाणां ब्रह्मादीनामधीशः लोकत्रयेशो वा हरिः स्वयं श्रीकृष्णः अपि आकृतिं मनुष्यसमानतासंप्रदर्शितसंनिवेशं तत्यजे तिरोधापयामास। यद्वा आकृतिं भूमिं तत्यजे। आकृतिशब्दस्य भूपर्यायत्वात् 'शरीरमाकृतिर्देहः कुः पृथ्वी च मही तथा' इति कोशे आकृतिभुवोः पर्यायता। देहत्यागोक्तौ 'सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः' इति स्मृतिबाधश्चापि स्यात्॥ २८॥ ब्रह्मशापादेः सर्वस्य श्रीकृष्णसंकल्पानुसारित्वाच्छ्रीकृष्णसंकल्पेनैवायं शापविषयोऽप्युद्धव इहावस्थित इत्युत्तरमाह शुकः। ब्रह्मेति। अमोघं वाञ्छितं यस्य सः सत्यसंकल्पो भगवानित्यर्थः। ब्रह्मणां ब्राह्मणानां शाप आक्रोशोऽपदेशो मिषं यस्य तेन विप्रशापाभिधानेनेत्यर्थः। कालेन स्वशक्तिरूपमृत्युना स्फीतं समृद्धं स्वकुलं संहृत्य स्वकुलसंहारं कारयित्वेत्यर्थः। देहं 'यस्य पृथिवी शरीरम्' इति श्रुत्यभिहितस्वशरीरात्मकभुवमित्यर्थः। त्यक्ष्यन् अचिन्तयत्। स्वशरीरभूतभुवः सकाशादन्तर्द्धानं यास्यन्निदं विचारयामासेति भावः॥ २९॥ भगवद्विचारितमाह अस्मादिति। अस्मात् लोकात् इतो भूर्लोकादित्यर्थः। मयि उपरते स्वलोकं गते सति, अहमाश्रयो विषयो यस्य तन्मदाश्रयं मद्विषयं ज्ञानम्, संप्रतीदानीम् आत्मवतां स्वात्मपरमात्मयाथात्म्यज्ञानवतां मध्ये वरः श्रेष्ठः उद्धवः एव अद्धा तत्त्वतः यथार्थतयेत्यर्थः। अर्हति। स्वयं गृहीतुं तथान्यान् ग्राहयितुं तु चैक उद्धव एव योग्योऽस्ति नान्य इति भावः॥ ३०॥ एतदेव स्फुटमाह। नेति। उद्धवः अण्वल्पमात्रमपि मन्मत्तः सकाशात् न्यूनः ऊनः न भवति। मुक्तत्वान्मया सह समानभोगोऽस्तीत्यर्थः। कुतः। यद्यस्मात् गुणैः सत्त्वरजस्तमआत्मकप्राकृतगुणैस्तत्कार्यशब्दादिविषयैश्च न अर्दितः पीडां न प्राप्तः। अत एव प्रभुः स्ववशीकृतेन्द्रियवर्गः अनेन सकलापि मुक्तिसाधनसंपत्तिः सूचिता। अतः आत्मविद्वत्त्वाद्धेतोः मद्वयुनं मत्स्वरूपविषयं ज्ञानम्, लोकं ग्राहयन्सन् इह मर्त्यलोके तिष्ठतु। पुनरात्मप्रादुर्भावमिति शेषः। मुक्तस्य भगवत्समानभोगाद्यं तु 'निरञ्जनः परमसाम्यमुपैति'। 'जगद्व्यापारवर्जं भोगमात्रसाम्यलिङ्गाच्च'। 'मम साधर्म्यमागताः' इत्यादिश्रुतिसूत्रस्मृत्यादिविवक्षितं बोध्यम्। एतेन कारणेनोद्धवोऽवशिष्ट इति प्रश्नपरिहारः॥ ३१॥

उपसंहरति। एवमिति। एवमुक्तप्रकारेण त्रयाणां लोकानां गुरुरेक एव देशिकस्तेन, शब्दो वेदो योनिर्ज्ञप्तिकारणं यस्य तेन, शास्त्रप्रमाणगम्येनेत्यर्थः। भगवता संदिष्ट आज्ञप्तः उद्धवः बदर्याश्रमम् आसाद्य संप्राप्य समाधिना ध्यानयोगेन हरिं भगवन्तम् ईजे पूजयामास॥ ३२॥ एवमौद्धवीं कथां समाप्य सांप्रतं वैदुरिकीं कथामाह। विदुर इति। विदुरोऽपि, क्रीडया क्रीडार्थम् उपात्तदेहस्य निजेच्छोपात्ताप्राकृतदिव्यविग्रहस्य, परमात्मनः कृष्णस्य श्लाघितानि प्रशंस्यानि कर्माणि चरित्राणि चाजन्मादि उद्धवात् श्रुत्वा॥ ३३॥ देहेति। तस्य श्रीकृष्णभगवतः धीराणां योगिनाम् एवमुक्तरीत्या धैर्यवर्द्धनं योगवृद्धिकरम् अन्येषां विक्लवात्मनामधीरचित्तानां पशूनां च पशुतुल्यानामज्ञजनानां तु दुष्करतरं देहन्यासं स्वात्मदेहत्यागप्रकारं स्वेन विहितं पृथ्वीलोकत्यागप्रकारमित्यर्थः। श्रुत्वेति पूर्वश्लोकस्थमनुषञ्जनीयम्॥ ३४॥ आत्मानमिति। हे कुरुश्रेष्ठ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजन् कृष्णेन भगवता कर्त्रा, मनसा करणेन ईक्षितं चिन्तितं चिन्तनात्मना दृष्टमित्यर्थः। आत्मानं स्वं च, अस्यापि श्रुत्वेत्यनेनान्वयः। ध्यायन् कारुण्याम्बुधिं श्रीकृष्णमेव चिन्तयन्सन् भागवतो भगवदेकान्तिकभक्ते उद्धवे गते स्वसकाशात्प्रयाते सतीत्यर्थः। प्रेमविह्वलः निरतिशयप्रेमपरवशः सन् रुरोदाश्रूण्यवास्राक्षीदित्यर्थः॥ ३५॥ कालिन्द्या इति। भरतर्षभः भरतकुलश्रेष्ठः विदुरः सिद्धः संनिष्पन्नभक्तियोगनिष्ठः सन्नेव कतिभिः कतिचिद्भिः अहोभिर्दिनैः कालिन्द्या यमुनायाः सकाशात् स्वःसरितं गङ्गां यत्र गङ्गातीरे मित्रासुतः मुनिर्मैत्रेयः आस्ते। तत्र प्रापद्यत हरिद्वारे गङ्गां संप्राप्त इत्यर्थः॥ ३६॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता- यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे चतुर्थोऽध्यायः॥ ४॥

अथ पञ्चमोऽध्यायः

श्रीशुक उवाच

द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम्।
क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः॥ १॥

मैत्रेयः पञ्चमे पृष्टः क्षत्त्रा लीलां शुभां हरेः। सर्गं प्रोवाच तत्त्वानां कृतां तैश्च हरेः स्तुतिम्॥ १॥

एवं 'कुत्र क्षत्तुर्भगवतो मैत्रेयेणास संगमः। कदा वा सह संवाद' इत्यस्योत्तरं कथितम्। अथेतःप्रभृति तृतीय-चतुर्थस्कन्धाभ्यां विदुरमैत्रेयसंवादं कथयिष्यंस्तावद्विदुरस्य मैत्रेयोपसत्तिप्रकारं तत्संपृष्टभगवल्लीलारूपमहत्तत्त्वादिसृष्टिप्रकारं च स्फुटीकरिष्यंस्तावद्यथा क्षत्तुर्मैत्रेयोपसत्तिर्जाता तत्प्रकारमाह श्रीशुकः। द्वारीति। द्युनद्या गङ्गायाः द्वारि द्वारे आसीनं सम्यक् निषण्णम्, अगाधोऽपारः बोध आत्मपरमात्मयाथात्म्यज्ञानं यस्य तमगाधबोधं 'श्रोत्रियं ब्रह्मनिष्ठम्' इत्याद्युक्तरीत्या-चार्यलक्षणलक्षितमित्यर्थः। मैत्रेयम् उपसृत्य 'स गुरुमेवाभिगच्छेत्समित्पाणिः' इति प्रणाल्या तत्समीपं प्राप्येत्यर्थः। अच्युते परमात्मनि भावो भक्तिस्तेन शुद्धो निर्मलचित्तः अनेन 'प्रशान्तचित्ताय शमान्विताय' इत्यस्यार्थ उक्तः। सौशील्यमतिमहतोऽपि मन्दैः सह नीरन्ध्रतया संश्लेषस्वभावत्वमेव गुणस्तेनाभितृप्तः, कुरूणाम् ऋषभः श्रेष्ठः, क्षत्ता विदुरः पप्रच्छ। पृच्छतेर्द्विकर्म-कत्वादेकं मैत्रेयमिति कर्म द्वितीयमग्रिमश्लोकाभिहितं प्रश्नरूपं बोध्यम्॥ १॥ किं पृष्टवानित्यपेक्षायां तावत् 'परीक्ष्य लोकान्कर्म-चितान्' इत्यस्यार्थं सूचयंस्तदीयं प्रश्नमेवाह। सुखायेत्यादिपञ्चदशभिः श्लोकैः। लोको जनः सुखाय सुखं प्राप्तुमित्यर्थः। कर्माणि लौकिकाः श्रुतिस्मृत्युक्ताश्च क्रिया इत्यर्थः। तत्र लौकिककर्माणि कृष्यादीनि श्रुत्याद्युक्तानि यागादीनि करोति। तैः कर्मभिः सुखं निरतिशयसौख्यं वा, अन्यस्य दुःखस्योपारमम् उपशमं वा, अन्यदुपारमपदेऽन्यशब्दात्समासे तुक् आर्षः। न विन्देत नैव विन्दते। किं तु ततस्तैः कर्मभिरित्यर्थः। भूयः पुनः पुनः दुःखम् एव विन्देत। अतः अत्र निरतिशयसुखप्राप्तौ आत्यन्तिकदुःखनिवृत्तौ च, यत् युक्तं साधनत्वेन यत्कर्तव्यमित्यर्थः। तत् नोऽस्मभ्यं भगवान् वदेत्। जगदुत्पत्त्यादिज्ञान-संपन्नत्वेन भगवच्छब्दवाच्यस्त्वमस्मभ्यं सम्यक्कथयेत्यर्थः। 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इत्युक्तप्रकारेण कर्मणामात्यन्तिकदुःखनिवृत्तिपूर्वकनिरतिशयसुखप्राप्तिसाधनत्वानुपपत्तिं परीक्ष्यमाणाय निरतिशय-सुखसाधनविवित्सावते मह्यं तदुपदिशेत्यर्थः॥ २॥ विनिवृत्तबाह्यान्तःकरणव्यापारस्य केवलं भगवन्मूर्तिध्यानैकप्रवण-मानसस्य मे, किं नु भवत्कृतानुयोगप्रतिवचनेन प्रयोजनमित्याशङ्कां प्रशमयन्स्वं प्रति प्रतिवचनौत्सुक्यं प्रकटीकरोति। जनस्येति। दैवात्पूर्वकर्मवशात् अधर्मं शीलयत्यभ्यस्यतीति अधर्मशीलस्तस्य केवलमधर्मनिरतस्येत्यर्थः 'पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः नष्टप्रज्ञः पापमेव नित्यमारभते जन' इति वचनात्। अत एव कृष्णात् विमुखस्य पराङ्मुखस्य अतः सुतरां दुःखितः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुदुःखितस्तस्यातिदुःखवतः जनस्य अनुग्रहायानुग्रहं विधातुं भव्यानि भद्राणि मङ्गलरूपाणीति यावत्। जनार्दनस्य श्रीविष्णोः भूतानि भवादृशा भगवदेकान्तिकभक्ता इत्यर्थः। इहास्मिन्मर्त्यलोके चरन्ति गच्छन्ति नूनम्। कृपाप्रचुरतावतां भवद्विधानां सतां लोकानुजिघृक्षया हेतुनैव मर्त्त्यलोके संचरणं नान्यथेत्यर्थः॥ ३॥

सांप्रतं बुभूत्सितानि क्रमशः पृच्छति। तदिति। हे साधुवर्य सद्वृत्तम येन वर्त्मना संराधितः सम्यगाराधितः सः भगवान्स्वयं श्रीकृष्णः पुंसां स्वैकान्तिकभक्तजनानां भक्तिपूते भक्तियोगेन पवित्रतामापादिते हृदि हृत्पद्मे स्थितः सन्, तत्त्वमधिगम्यते येन तत्तत्त्वाधिगमं भगवत्तत्त्वावभासकमित्यर्थः। पुराणमनादिभूतवेदप्रमाणकं ज्ञानमवबोधं यच्छति आराधकेभ्यः प्रयच्छतीत्यर्थः। तत् शं सुखसंपादकं वर्त्म सुखसंपादनोपायमित्यर्थः। पाठान्तरे शर्मणो वर्त्मेत्येऽप्ययमेवार्थः। नोऽस्मभ्यम् आदिश कथय॥ ४॥ भगवत्कृतसृष्ट्यादिकर्मकथनश्रवणादिकमेव सुखवर्त्म नातोऽन्यदिति चेत्तत्सृष्ट्यादिप्रकारमपि कथयेत्याह। करोतीति। त्र्यधीशस्त्रिलोकीपतिः भगवान् आत्मतन्त्रः स्वतन्त्रः अकर्मवश्य एवेति यावत्। कृतावतारः ब्रह्मादिषु स्वैश्वर्यादिनानुप्रवेशपूर्वं तद्रूपेण विहितावतारः सन् यानि कर्माणि करोति एवं सामान्यत उक्त्वा पुनस्तान्येव विशेषतः पृच्छति। यथेत्यादिना। अग्रे सृष्टेः पूर्वं निरीहः निर्व्यापारः सन् एव स्वयम् इदं विश्वं यथा येन प्रकारेण ससर्ज ततः संस्थाप्य तेषां सम्यक्रक्षां कृत्वा जगतः वृत्तिं जीविकां यथा विधत्ते करोति एतद्वर्णयेति पञ्चमश्लोकक्रिययान्वयः॥ ५॥ यथेति। सः भगवान्, खे स्वशरीरभूते, खे आकाशे, अत्र खशब्देन 'अक्षरं तमसि लीयते' इति श्रुत्युक्ते आकाशस्यापि कारणभूते सूक्ष्मावस्थापन्ने तमःशब्दवाच्ये प्रकृतिद्रव्ये इति बोध्यम्। इदं कार्यं प्रपञ्चमिति यावत्। यथा पुनः निवेश्य जगत्सर्गं संहृत्य, पुनःशब्दो जगत्सर्गीयप्रागभावं दर्शयति। विवृत्ता वृत्ति र्यस्य सः, संनिवृत्तजगद्व्यापारः सन्नित्यर्थः। गुहायां परमाकाशे स्वकीयमहावैकुण्ठलोके इत्यर्थः। शेते वसति। हे योगीश्वराधीश्वरश्रेष्ठ एकः स्वयं भगवान्, एतच्चिदचिदात्मकं जगत्, अनुप्रविष्टः निजप्रशासनाधीनं विदधदऽतो धारकतया स्थितः सन्नित्यर्थः। बहुधा देवमनुजादिबहुनामभाक् यथा आसीत्॥ ६॥

भगवतो जगत्सर्गादिकर्मकथनश्रवणप्रसङ्गतोऽवतारभेदकृतकरिष्यमाणकर्माण्यन्तरागच्छन्त्यतस्तत्कथनश्रवणादौ मनः प्रविशति, ततोऽवतारकर्माणि चावश्यवक्तव्यानीत्याह। क्रीडन्निति। सः भगवानिति पूर्वश्लोकादनुषञ्जनीयम्। द्विजा ब्राह्मणाश्च, गावो धेनवश्च, सुरा इन्द्रादयो देवाश्च, तेषां क्षेमाय क्षेमं विधातुम् अवतारभेदैः। अत्र भेदशब्दो गुणावेशशक्त्याद्यवताराणां प्रदर्शनार्थः। क्रीडन् स्वयं क्रीडामाचरन्सन्नेव कर्माणि दुष्कृतिजनविनाशनसाधुपरित्राणादिरूपचरित्राणि विधत्ते यथा करोति। ननु भवता हरेश्चरित्राणि श्रुतपूर्वाणि पुनस्तदर्थं प्रश्नविधानस्य कोऽर्थ इति चेत्तत्रालंबुद्ध्यभावाद्विशेषतः श्रवणेच्छयौत्सुक्यमाविष्करोत्यर्द्धेन, मन इति। सुष्ठु श्लोक्यन्ते कीर्त्त्यन्ते इति सुश्लोकाः पवित्रकीर्त्तिमन्तस्तेषां मौलिरिव प्रधानभूतस्तस्य भगवतः चरितामृतान्यमृततुल्यानि चरित्राणीत्यर्थः। शृण्वतां सम्यगाकर्णयतामपि नोऽस्माकं मनः न तृप्यत्यलंभावं न गच्छतीत्यर्थः॥७॥ अथान्यदपि पृच्छति। यैरिति। अधिलोकनाथः लोकनाथाधिपतिः यैः तत्त्वभेदैः महदादिभेदभिन्नैर्यैस्तत्त्वैरित्यर्थः। सहविद्यमाना लोकपाला येषां ते इति सहलोकपालास्तान् लोकान्, अलोकान् लोकालोकपर्वताद्बहिर्वर्त्तमानान्भागान् नरकान् वा अचीकॢपत् कल्पयामास। यत्र येषु लोकादिषु सर्वाणि यानि सत्त्वानि प्राणिनः तेषां निकायाः समूहास्तेषां भेदो भिदा अधिकृतः कर्मानुगुणाधिकारवान् प्रतीतः प्रतीयते हि तान्वर्णयेत्युत्तरेणान्वयः॥ ८॥ येनेति। उत च किं चेत्यर्थः। आत्मयोनिः कारणं यस्य स आत्मयोनिः कारणान्तरवर्जित इत्यर्थः। विश्वसृट् जगत्स्रष्टा नारायणः प्रजानां व्यष्टिप्राणिनाम् आत्मा ज्ञानेन्द्रियाणि च, कर्म कर्मेन्द्रियाणि च, रूपाणि देवमनुष्यादिका नामाकृतयश्च, अभिधा देवमनुष्याद्या अखिलानां संज्ञाश्च, तासाम्। भिदां भेदम्, येन येन प्रकारेण, व्यधत्त अकरोत्। किं साक्षात्स्वयमेव परंपरया वा विहितवानित्यभिप्रायः। एतत् यन्मया पृष्टं चकारादपृष्टमपि यद्भवेत्तच्चापीत्यर्थः। नोऽस्मभ्यं हे प्रियवर्य वर्णय॥ ९॥ ननु महाभारते त्वया सर्वं श्रुतमस्त्येव ततो बहुश्रुतस्य तव किमनया शुश्रूषयेत्यत आह। परावरेषामिति। हे भगवन्मैत्रेय परे त्रैवर्गिकाश्च अवरा अपरे स्त्रीशूद्रादयश्च तेषां व्रतानि धर्माः व्यासमुखात् अभीक्ष्णं पुनः पुनः मे मया श्रुतानि, क्षुल्लान्यतितुच्छानि यानि सुखानि तानि आवहन्ति संपादयन्तीति तेषामल्पसुखसंपादकानामित्यर्थः। तेषां व्रतानां श्रवणेनेति शेषः। अतृप्नुमः तृप्ता अभूम। यस्तु तत्र कृष्णकथामृतौघः सूचितस्तमृते इत्याह। कृष्णस्य कथा एवामृतं तस्यौघः पूरस्तस्मात् ऋते विना, भगवत्कथाश्रवणेन तु न तृप्ता इत्यर्थः॥ १०॥

पुनरेतदेव स्फुटमाह। क इति। वो युष्माकं साधूनामित्यर्थः। सत्त्रेषु समाजेषु सूरिभिर्नारदादिविद्वद्भिः ईड्यमानात्प्रस्तूयमानात् तीर्थपदः श्रीकृष्णभगवतः अभिधानाच्चरित्रात्, कः अहर्निशं श्रद्धया शृण्वानः को वा पुरुष इत्यर्थः। तृप्नुयात्, न कोऽपि तृप्नुयादित्यर्थः। यत्तीर्थपाद्भगवान्, पुरुषस्य स्वगुणान् शृण्वतः पुंसः, कर्णनाडीं श्रवणविवरं यातो गतः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथाश्रवणतः श्रोत्रबिलद्वारेणात्मीयजनहृदयं प्रविष्टः सन्नित्यर्थः। भवप्रदां संसृतिसंपादकां देहरतिं देहस्योपलक्षणत्वादपत्य-कलत्रादिष्वासक्तिमित्यर्थः। छिनत्ति। न चैवं व्रतादीनां तापत्रयसंहृतिसामर्थ्यं भवतीति भावः॥ ११॥ ननु भगवतः कथायामेव यदि तापत्रयरूपसंसृतिबन्धविच्छेदकत्वमस्ति, तदा व्यासेन महाभारते केवला सैव प्राधान्येन किमिति नैवानुवर्णिता, किमर्थं वा बहुधा व्रतादीन्येव वर्णितानीत्याशङ्क्यान्यारोहवादन्यायेन श्रीमहाभारतस्यापि भगवद्गुणानुवर्णने एव तात्पर्य-मस्तीत्याह। मुनिरिति। हे मैत्रेय मुने ते तव सखा मुनिः कृष्णः अपि कृष्णद्वैपायनाख्यः स्वयं वेदव्यास एवेत्यर्थः। भगवद्गुणानां विवक्षुः भगवद्गुणान् विवक्षुः सन्नेवेत्यर्थः। भारतम् आह। यस्मिन् भारते ग्राम्याणि च तानि सुखानि च तेषामनुवादा भूयः कथनानि तैर्द्वारभूतैः अनु पश्चात् नृणां मतिः हरेः कथायाम् एव गृहीता अवतारिताऽस्तीत्यर्थः। शाखा-चन्द्रन्यायेन भगवतः कथायां जनबुद्ध्यवतारार्थं भारते ग्राम्यसुखानुवादः कृतः। न हि तावता तत्रैव तात्पर्यं वक्तुं युक्तमिति भावः। तथाचोक्तमितिहाससमुच्चये 'कामिनां वर्णयन्कामं लोभं लुब्धस्य वर्णयन्। नरः किं फलमाप्नोति कूपेऽन्धमिव पातयन्। लोकचित्तावतारार्थं वर्णयित्वात्र तेन तौ। इतिहासैः पवित्रार्थैः पुनरत्रैव निन्दितौ। अन्यथा घोरसंसारबन्धहेतू जनस्य तौ। वर्णयेत्स कथं विद्वान्महाकारुणिको मुनिः।' इति। अतो भारताभिप्रायो दुरवगम इत्यर्थः॥ १२॥ हरिकथामतिप्रवेशफलमाह। सेति। सा हरिकथामतिः विवर्द्धमाना अहरहः संश्रवणेन वृद्धिं प्राप्ता सती श्रद्दधानस्य कथाश्रवणे श्रद्धां कुर्वतः पुंसः अन्यत्र ग्राम्यविषयेषु विरक्तिं वैराग्यं करोति। ततः किमित्यत्राह। हरेर्भगवतः पदयोश्चरणयोरनुस्मृतिरनुध्यानं तया निर्वृतः संजातसुख-स्तस्य समस्तानि यानि दुःखानि तेषामत्ययो नाशस्तम् आशु धत्ते करोति। सश्रद्धहरिकथामतिजन्यविरक्त्याऽखण्डहरिस्मृतेः सर्वदुःखक्षय इति भावः॥ १३॥

अहो हरिकथामहिमा, या हरिकथा स्वस्यां श्रद्धां विदधतः शुश्रूषोः शब्दादिषु विषयेषु विरक्तिं कृष्णपदारविन्दयोर्भक्तिं च जनयति। त्रिविधतापविनाशं च विधत्ते तद्विमुखाः शोच्यशोच्या इत्याह। तानिति। वादो वाग्व्यापारश्च, गतिर्देह-व्यापारश्च, स्मृतिर्मनोव्यापारश्च, वृथा व्यर्थाः वादगतिस्मृतयो येषां तेषाम्, येषां हरिकथाविमुखानां तु आयुः, अनिमिषः देवो रविः, क्षिणोति क्षपयति। आयुःक्षपणस्य भक्ताभक्तयोस्तुल्यत्वेऽपि साक्षाद्भगवद्भक्तानामायुःक्षपणस्य भगवद्भक्त्या सफलत्वान्ना-भक्तायुःक्षपणतुल्यमित्यभक्तायुःक्षपणमेवात्रोक्तं बोध्यम्। अतः अविदोऽज्ञान् हरेः कथायां पूर्वोक्तविधगुणशालिन्यां भगवत्प्रबन्ध-कल्पनायामित्यर्थः। अघेन पूर्ववर्त्यनेकजन्मार्जितपापेन विमुखान् पराङ्मुखतां प्राप्तान्, अत एव शोच्याः सत्पुरुषैर्भगवद्वि-मुखतया शोचनीयास्तैर्भगवद्विमुखैरपि शोच्याः शोचनीयास्तान्, वयं तु पूर्वपापैरेवंविधा आस्तामेवैते मुग्धाः सन्तोऽपि कथं भगवत्कथाऽनभिमुखा इति शोच्यैरत्यन्तशोच्यानित्यर्थः। तानेवंभूतान् जनान् अनुशोचे॥ १४॥ प्रश्नोपसंहारं करोति द्वाभ्याम्। तदिति। हे कौषारव हे आर्त्तबन्धो तत्तस्मात् हरिकथाया एव सकलदुःखविनाशकरत्वाद्धेतोरित्यर्थः। शर्मदातुः सुखप्रदस्य, तीर्थं तीर्थवत् पवित्रतापादिका कीर्त्तिर्यस्य तस्य, अस्य हरेः कथासु सारं साररूपां कथाम् एव, मधुकरः पुष्पेभ्यः इव मकरन्दमिति शेषः। उद्धृत्य नोऽस्माकं शिवाय मङ्गलाय कीर्त्तय। तापत्रयाभिपीडितानामस्माकं सुखार्थं कथयेत्यर्थः॥ १५॥ भगवदवताराणामनेकत्वात्तत्कथास्वपि श्रीकृष्णकथामेव कथयेत्याह। स इति। यो भगवान् जन्मोत्पत्तिश्च, स्थितिरुत्पन्नपालनं च, संयमः पालने वृद्धिं नीतानां संहारश्च, विश्वस्य ये जन्मस्थितिसंयमास्तेभ्य इति तदर्थं तस्मिन्, प्रगृहीतोपात्ता शक्तिर्जग-त्स्रष्ट्रयादीच्छाशक्तिर्येन सः। सः ईश्वरः कृतावतारः सन् अतिपूरुषाणि अतिमानुष्याणि दिव्यानीति यावत्। यानि कर्माणि चकार तानि मह्यं कीर्त्तय॥ १६॥ एवं विदुरेण संपृष्टो मैत्रेय आहेत्याह श्रीशुकः। एवमिति। भगवान् भगवत उत्पत्त्यादिज्ञान-संपन्नः, सः कौषारविः कुषारवसुतः मुनिर्मैत्रेयः, क्षत्त्रा विदुरेण पुंसां निःश्रेयसार्थाय मोक्षोदयाय एवं पृष्टः सन्, तं क्षत्तारं बहु यथा तथा मानयन् संमानयन्सन् आह॥ १७॥ पुंसां निःश्रेयसार्थायेत्यनेन सूचितं क्षत्तुर्लोकानुग्रहकारित्वं प्रादुष्कुर्वंस्ताव-त्प्रथमं प्रश्नमभिनन्दति मैत्रेयः। साध्विति। हे साधो विदुर लोकान् साधु सम्यग्यथा तथा अनुगृह्णता, अधोक्षजे श्रीकृष्णे आत्मा मानसं यस्य तस्य, आत्मनः स्वस्य, कीर्त्तिं लोके वितन्वता विस्तारयता त्वया साधु समीचीनं पृष्टम्॥ १८॥

त्वयि हरिकथाविषयः प्रश्नः उचित एव नात्र चित्रमित्याह। हे क्षत्तः विदुर, बादरायणो व्यासस्तस्य वीर्यं तस्माज्जः संभूतस्तस्मिन् त्वयि, इदं हेतुगर्भं विशेषणम्। एतद्धरिकथाप्रश्न इति यत्तत् चित्रमाश्चर्यं न भवति। न केवलमाश्चर्यनिषेधे बादरायणवीर्यजत्वमात्रं हेतुः, किं तु अनन्यभावेनैकान्तिकभावेन ईश्वरः हरिः अपि हृदि गृहीत इति यत् ततोऽपि न चित्रम्॥ १९॥ व्यासवीर्यजत्वं स्पष्टयति। माण्डव्यशापादिति। प्रजानामऽभगवद्भक्तानां जनानां संयमनो दण्डयिता, अत एव भगवानैश्वर्यवान् यमः वैवस्वतः, माण्डव्यस्य शापस्तस्मात् माण्डव्याख्यमुनेराक्रोशादित्यर्थः। भ्रातुः सत्यवतीसुतस्य विचीत्रवीर्यस्य क्षेत्रे क्षेत्रत्वेन परिगृहीतायां भुजिष्यायां दास्यां सत्यवतीसुताद्व्यासात् जात उत्पन्नः साक्षाद्यम एव त्वमुत्पन्नो भवसीत्यर्थः॥ २०॥ भवानिति। किं च सानुगस्य भागवतजनसहितस्य भगवतः श्रीकृष्णस्य भगवान् नित्यं संमतः प्रीतिविषयः भवति। यदस्य तव ज्ञानोपदेशाय अस्मत्संक्रामितज्ञानमुपदेष्टुमित्यर्थः। व्रजन् भुवं त्यक्त्वा गमिष्यन् भगवान्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मा मां ह स्फुटं यथा तथा आदिशदादिष्टवान्। स्वविधेयभूत्यागसमये स्वसमीपेऽसन्तमपि भवन्तं स्मृत्वा ज्ञानोपदेशार्थं मामाज्ञप्तवान्। चकारात्स्वयमपि स्मृत्यैवोपदिष्टवान्। एतेन भगवन्निरतिशयप्रीतिविषयत्वमवगम्यते 'प्रियो हि ज्ञानिनो नित्यम्' इति स्मरणात् ॥ २१ ॥ अतो निरतिशयभगवत्प्रीतिभाजनाय तुभ्यं यथाप्रश्नं वर्णयामीति प्रतिजानीते। अथेति। अथातः युज्यते इति योगा सा चासौ माया आश्चर्यशक्तिश्च तयोपबृंहिताः भगवन्नियम्ययाऽऽश्चर्यशक्त्योपकल्पिता इत्यर्थः। स्थितिश्चोद्भवश्चान्तश्च अर्थश्च ते, विश्वस्य जगतः स्थित्युद्भवान्तार्थाः, स्थित्युत्पत्त्युपसंहारमोक्षाः यासु ताः, एवंभूताः भगवल्लीलाः, अनुपूर्वशोऽनुक्रमेण ते तुभ्यं वर्णयामि। विश्वस्थितीत्यत्र विश्वस्य स्थित्युत्पत्त्यन्ता अर्थो विषयो स्वरूपं वा यासां ता इति वा विग्रहो बोध्यः ॥ २२ ॥ प्रथमं सृष्टिलीला वर्णयितुं सृष्टेः पूर्वं कारणतयावस्थितस्य वस्तुनः स्वरूपमाह। भगवानिति। इदं परिच्छिद्यमानं नामरूपविभागार्हस्थूलचिदचिदात्मकं जगत् अग्रे सृष्टेः पूर्वकाले आत्मनां जीवानाम् आत्मा अन्तः प्रविश्य धारकः, विभुः स्वामी एकः अविभक्तनामरूपसूक्ष्मचिदचिच्छरीरः भगवानेव आस आसीत्। य एवंविधो भगवान् स एव, यतः आत्मा, ततः आत्मनः स्वस्येच्छा, सृष्ट्युपयोगी संकल्पस्तस्या अनुगतिरुन्मेषस्तस्यां सत्याम्, पूर्वकल्पे नाना या मतयस्ताभिरुपलक्षितः देवादिनानानामरूपविषयबुद्धिबोध्य इत्यर्थः। आस। नामरूपविषयमतीनामात्मपर्यन्तत्वादुक्तप्रकारो बोध्य इति भावः। सृष्टिकाले यः स्थूलचिदचिच्छरीरकः परमात्मा कथ्यते, तस्यैव प्रलयकाले स्थूलावस्थापरिहारेण सूक्ष्मचिदचिच्छरीरकतयावस्थितत्वेन कारणत्वमेकशब्देनात्र कथ्यते। न च चिदचिच्छरीरकत्वस्यात्राश्रवणादेक एवेत्यनेन सजातीयविजातीयस्वगतभेदवर्जितं ब्रह्मैव जगत्कारणमित्युच्यते इति भ्रमितव्यम्। अग्रे इति कालस्य निर्देशाद्विजातीयभेदस्य, आत्मनामात्मेति व्यतिरेकदर्शनेन, सजातीयभेदस्य भगवानित्यनेन कारणत्वौपयिकसार्वज्ञसर्वशक्तित्वसत्यसंकल्पत्वादिस्वगतभेदस्य चात्रैव प्रतिपन्नत्वात् ॥ २३ ॥

तदेवं तर्ह्यव्याकृतमासीत् 'तन्नामरूपाभ्यां व्याक्रियते' इति श्रुतेः प्रकृतिपुरुषकालशरीरकस्य सार्वज्ञ्यादिकल्याणगुणाकरस्यैव कारणत्वं प्रपञ्चयति द्वाभ्याम्। स इति। स वा एषः सोऽयं भगवान् तदा प्रलयदशायां द्रष्टा सर्वज्ञः। कुतः। असुप्ता दृक् ज्ञानं यस्य सः। असंकुचितज्ञान इत्यर्थः। तत्कुतः। एकराट् एकरूपप्रकाशवान्। जीववत्कर्मायत्तः संकोचविकाशभाग् ज्ञानसंपन्नः कदाचिदपि नैवेत्यर्थः। सुप्ताः शक्तयो यस्य सः। सूक्ष्मावस्थचिदचिदाख्यस्वशक्तिरित्यर्थः। अतः दृश्यं कार्यं न अपश्यत्। किं तु। तदा असन्तं व्यवहारानर्हम् इव नामरूपरहितमिवेत्यर्थः। आत्मानं मेने अमनुत। इवशब्देन तस्य सूक्ष्मदर्शित्वात्स्वशरीरभूतसूक्ष्मावस्थचिदचिद्विषयज्ञानसंपत्तिस्तु विद्यत एवेति सूच्यते ॥ २४ ॥ अथास्य चिदचिच्छरीरकत्वमाह। सा वा एतस्येति। हे महाभाग, सतः द्रष्टा तस्य, सद्भावतया स्वोदरोषितसकलपदार्थद्रष्टुः एतस्य भगवतः शक्तिः अपृथक्सिद्धविशेषणभूता, सा माया नाम मायेति संज्ञया प्रसिद्धा प्रकृतिः, सदसदात्मिका चेतनाचेतनात्मिका अस्ति, वा वै। यया सदसदात्मिकया प्रकृत्या इदं कार्यावस्थचेतनाचेतनात्मकं जगत् विभुरुक्तविधः स्वयं परमेश्वरः निर्ममे। जगद्गतदोषासंस्पृष्टः सन्निर्मितवान्। सैषा प्रलयकाले विभोः शरीरत्वेन सूक्ष्मावस्थयासीदिति भावः। प्रकृत्याश्चेतनाचेतनात्मकमभिहितं भगवता गीतायाम्। 'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्' इति। अत्र 'भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः' इत्यनेन सूक्ष्मचिदचिद्विशिष्टस्य भगवत उपादानत्वं 'ययेदं निर्ममे विभुः' इत्यनेन केवलविशुद्धस्वरूपस्यास्य निमित्तत्वं चाभिहितम् ॥ २५ ॥

अथ महदादिक्रमेण सृष्टिं वक्तुं स्वशरीरभूतपुरुषस्यान्तरानुप्रवेशं कृत्वा तद्द्वारारोपितसृष्टिसामर्थ्याया एव प्रकृतेर्महदादिरूपेण परिणामो, न तु केवलाया इति कथयति। कालेति। अधोक्षजः कालेन कालानुसरणेनैव वृत्तिर्वर्त्तनं यस्यास्तस्यां कालानुगुणवृत्तिमत्याम् अत एव गुणमय्यां साम्यतापन्नसत्त्वादिगुणप्रचुरायां मायायां तु महामायायामेव आत्मभूतेन स्वशरीरभूतेन पुरुषेण महापुरुषेण वीर्यवान्स्वयमविकृततासामर्थ्यवान्सन्नेव वीर्यं सृष्टिसामर्थ्यम् आधत्त संपादितवान्। मायाभिमानिस्वात्मकपुरुषानुप्रवेशेन तद्द्वारा मायां सृष्ट्युन्मुखामकरोदित्यर्थः। अत्रासंसूचितोऽपि महामायामहापुरुषाभ्यां प्रधानपुरुषयोरभेदः पुराणान्तराद्बोध्यः ॥ २६ ॥ ततोऽत्र प्रधानपतिमेव परमेश्वराभेदेन परिकल्प्यास्मादेव महदाद्युत्पत्तिक्रमं ब्रुवन्नादौ महतः सृष्टिमाह। तत इति। ततः पुरुषाहितवीर्यात् कालचोदितात्कालप्रेरितात् अव्यक्तात् स्वात्मकप्रधानापरसंज्ञायाः प्रकृतेः सकाशादित्यर्थः। महत्तत्त्वम् अभवत्। स च महान् विज्ञानात्मा स्वयमेव विज्ञानस्वरूपः आत्मदेहस्थं स्वस्मिन्नवस्थितं विश्वं चराचरात्मकं जगत् व्यञ्जन् व्यञ्जयन्प्रकाशयन्नित्यर्थः। तमोनुदः ध्वान्तं निवर्त्तयन् अभवत् ॥ २७ ॥ महतः सकाशादहंकारसृष्टिमाह द्वाभ्याम्। सोऽपीति। अंशो जीवश्च, गुणाः सत्त्वादयश्च, कालो गुणक्षोभकश्च, वैरुपलक्षित आत्मा स्वरूपं यस्य सः कालवशो गुणमयो जीवगर्भश्चेत्यर्थः। भगवतो या दृष्टिः संकल्परूपं ज्ञानं तस्याः गोचरो विषयः, आत्मा परमात्मशरीरकः, सोऽपि स महानपि, तन्महत्तत्त्वम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पीत्यर्थः। अस्य विश्वस्य सिसृक्षया अहंकारादीनि स्रष्टुमिच्छन्सन्नित्यर्थः। आत्मानं स्वस्वरूपं व्यकरोद्विकृतमकरोत् ॥ २८ ॥ महत्तत्त्वादिति। विकुर्वाणाद्विक्रियामापद्यमानात् महत्तत्वात् कार्यं शरीरं च, कारणमिन्द्रियं च, तयोः कर्त्ता स्रष्टा अत एव आत्मा कर्तृत्वेन कारणभूत इत्यर्थः। एतद्विवृणोति। भूतानि च, इन्द्रियाणि च, मनश्च, तेषां भवः भवत्यस्मादिति भवः भूताद्युत्पादक इत्यर्थः। भूतेन्द्रियमनोमय इति पाठे भूतेन्द्रियादिरूपेण परिणामस्वभावप्रचुरः। अहंतत्त्वमहंकारः। व्यजायत उत्पन्नोऽभूत् ॥ २९ ॥

अहंकारं विभजते। वैकारिक इति। वैकारिकः सात्त्विकाहंकारः तैजसो राजसाहंकारश्च तामसस्तामसाहंकारश्च, एतस्यैव भूतादिरिति नामान्तरम्। इत्येवम् अहमहंकारः त्रिधा च त्रिप्रकार एव। अथ वैकारिकाहंकारकार्यमाह। अहंतत्त्वादिति। विकुर्वाणाद्विक्रियमाणात् वैकारिकात्सात्त्विकात् अहंतत्त्वादहंकारात् मनः अभूदुद्भूव। वैकारिकाश्च ये देवाः श्रोत्रादीन्द्रियाधिष्ठातारो दिगादयो देवाः तेऽपि सात्त्विकाहंकारादेवोदभवन्। यतः येभ्यो देवेभ्यः अर्थाभिव्यञ्जनं शब्दादिविषयाणामुपलम्भो जायते। एवंभूतादेवावैकारिकादभूवन्नित्यर्थः ॥ ३० ॥ अथ राजसाहंकारकार्यमाह। तैजसानीति। ज्ञानं च कर्म तत्प्रधानानि ज्ञानकर्ममयानि। ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेत्युभयविधान्यपीत्यर्थः। इन्द्रियाणि च तैजसान्येव राजसाहंकारसहकृतसात्त्विकाहंकारकार्याण्येवेति तैजसानीत्यस्यार्थः। अथ तामसाहंकारकार्यमाह। तामसस्तामसाहंकारः भूतानामाकाशादीनां सूक्ष्माणां शब्दादीनां चादिः कारणभूतः अस्ति। अत एव यतः भूतादेः सकाशात् आत्मनो ब्रह्मणः लिङ्गं प्रमापकः शब्दः खं तत्कार्यमाकाशं च जायते ॥ ३१ ॥ नभःकार्यमाह। कालेति। कालश्च, माया चांशो जीवश्च, तेषां योगस्तेन, हेत्वर्थे तृतीया। कालादियोगेन हेतुना भगवद्वीक्षितं भगवतः संकल्पात्मकज्ञानविषयं नभ आकाशम् अभूत्। नभस उक्तविधादाकाशात् स्पर्शम् अनुसृतमुद्भूतम् आकाशादादौ स्पर्शाख्यतन्मात्रमुदपद्यत इत्यर्थः। स्पर्शस्य क्लीबत्वं तन्मात्रार्थत्वात्। विकुर्वद्विकारमधिगच्छत्तत्स्पर्शतन्मात्रम् अनिलं वायुं निर्ममे असृजत्। स्पर्शतन्मात्रतो वायुरुत्पन्न इत्यर्थः ॥ ३२ ॥ अनिल इति। अनिलः स्पर्शादुत्पन्नो वायुरपि विकुर्वाणः नभसा सहितः स्वगुणशब्दोपेताकाशेन संयुक्त इत्यर्थः। स्वयं च उरुबलान्वितः अधिकबलसंयुक्तः सन् रूपतन्मात्रं तन्मात्रसंज्ञं रूपं ससर्ज। तद्रूपतन्मात्रमपि लोकस्य लोचनं प्रकाशकं ज्योतिस्तेजः ससर्ज उरुबलान्वित इत्यत्र बलस्योपलक्षणत्वात्प्राणौजः सहोबलान्वित इत्यर्थो बोध्यः ॥ ३३ ॥ अनिलेनेति। अनिलेन अन्वितं स्पर्शगुणेन वायुनासहितमित्यर्थः। अनिलेनेति शब्दात्मस्वगुणयुक्तनभसोऽप्युपलक्षणम्। तज्ज्योतिरपि कालमायांशयोगतः परवीक्षितं भगवतः संकल्पात्मकज्ञानविषयमित्यर्थः। अत एव विकुर्वत्सत् रसमयं स्वतन्मात्ररससहितम् अम्भो जलम् आधत्त ससर्ज। रसमयमित्यनेन प्रथमं रसतन्मात्रं ततोऽम्भ इति अत्र क्रमो वेदितव्यः ॥ ३४ ॥

ज्योतिषेति। कालमायांशयोगतः ब्रह्मवीक्षितं ब्रह्मणः संकल्पात्मकज्ञानविषयमित्यर्थः। अत एव विकुर्वत् ज्योतिषा रूपाख्यस्वगुणयुक्ततेजसा अनुसंसृष्टं तदम्भोऽपि, गन्धो गुणो यस्यास्तां महीं पृथ्वीम् आधात् ससर्ज। रसगुणोपेतजलात्प्रथमं गन्धोऽभूत्ततः सकाशात्पृथिव्यभूदिति बोध्यम् ॥ ३५ ॥ भूतानामिति। हे भव्य विदुर नभआदीनामाकाशादीनां तेषां भूतानां मध्ये यद्यत परात्परमुत्तरोत्तरभूतं तत्तत परानुसंसर्गात् कारणात्मद्रव्यगुणानुवृत्त्येत्यर्थः। यथासंख्यं गुणान् विदुः। तथा हि। प्रथमस्य नभसः शब्दाख्य एक एव गुणः। अन्यान्वयाभावात्। द्वितीयस्य वायोस्तु स्वगुणः स्पर्शः, आकाशान्वयाच्छब्दश्चेति द्वौ गुणौ, तृतीयस्य तेजसः स्वगुणो रूपमाकाशपवनयोः शब्दस्पर्शौ चेति त्रयो गुणाः। चतुर्थस्याम्भसः स्वगुणो रसः, आकाशवायुतेजसां शब्दस्पर्शरूपाणीत्येवं चत्वारो गुणाः। मह्याः पञ्चम्याः स्वगुणो गन्धः, आकाशादिचतुर्णां शब्दादयश्चत्वारो गुणा इत्येवं पञ्चापि गुणा इति भावः ॥३६॥ अथ पृथिव्यादिमहत्तत्त्वान्तानि चैतानि तत्त्वानि पञ्चीकरणतया परस्परसंमेलनाभावाद्ब्रह्माण्डरचनायामसमर्थानि सन्तीश्वरं तुष्टुवुरित्याह। एत इति। एते पूर्वोक्ताः महदादयः देवाः देवस्य भगवतः शरीरत्वाद्देवसंज्ञयाभिहिताः कालश्च, माया चांशश्च, तद्रूपाणि लिङ्गान्यस्य सन्तीति कालमायांशलिङ्गी तस्य कालमायाजीवशरीरस्येत्यर्थः। विष्णोर्भगवतः कलाः शरीरभूताः अपि नानात्वात्पृथग्भूतत्वात् स्वतः परस्परसंबन्धाभावादित्यर्थः। स्वक्रियायां जगदावासार्थं ब्रह्माण्डरचनारूपस्वकर्मणीत्यर्थः। अनीशा असमर्थाः सन्तः विभुमन्तः प्रविश्य स्रष्टारं तं भगवन्तमित्यर्थः प्राञ्जलयो बद्धाञ्जलयश्च सन्तः प्रोचुः। स्वेषु सामर्थ्यप्रदानार्थकतदावेशविधापनाय तुष्टुवुरित्यर्थः। ननु भगवद्दृष्टिगोचरः, भगवद्वीक्षितं नभः, विकुर्वत् परवीक्षितम् विकुर्वद्ब्रह्मवीक्षितमित्येतेषां तत्त्वानां भगवत्संकल्परूपज्ञानविषयकत्वोक्त्या सृष्टिसामर्थ्यावगमात् पुनः स्तुतिप्रीतपरमेश्वरस्य वक्ष्यमाणानुप्रवेशजातसमर्थत्वोक्तिर्विरुध्यते। न च वाच्यं वक्ष्यमाणः सोऽनुप्रवेशोऽन्यस्य एवेति ज्ञानेन तस्यैवेश्वरस्यानुप्रवेशस्य वाच्यत्वात्। तावतैव तेषां तच्छरीरत्वोपपत्तेः। आधेयत्वविधेयत्वशेषत्वानां शरीरत्वनिर्वाहकत्वोक्तेः। यच्चेतनस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत् द्रव्यमाधेयं विधेयं शेषं च तत् तस्य शरीरमिति हि शरीरलक्षणमतो विरोध इति चेन्नैवं शङ्क्यम्, यतः पूर्वं महदादीनां स्वस्वकार्योत्पादनसामर्थ्याविहत्त्वार्थमीश्वरस्य प्रवेशत्वोक्तिः, वक्ष्यमाणा सा तु एभिः सर्वैः संहत्य ब्रह्माण्डोत्पादनसामर्थ्यापादकानुप्रवेशार्थेति न विरोधः ॥ ३७ ॥

'देवाः स्पर्धिष्णवोऽन्योन्यममिलन्तः समीडिरे। विश्वकर्मण्यनीशाना निर्विण्णाः परमेश्वरम्' तत्र प्रथमं तावत् कारणत्वादार्त्तोपास्यत्वमोक्षप्रदत्वादिगुणविशिष्टं परमेश्वरं प्रणमन्ति । नमामेति । हे देव भगवन् प्रपन्नाः स्वशरणागता ये जनास्तेषां ये तापा आध्यात्मिकाधिदैविकाधिभौतिकाः परितापास्तेषामुपशमो निर्हरणं तस्मिन्नातपत्रं छत्रमिव वर्त्तमानम् अनेन त्रिविधतापातुरजनोपास्यत्वमुक्तम् । यस्य पदारविन्दस्य मूलं तलं केत आश्रयो येषां ते यन्मूलकेताः, यतयः मनोनियमने यतमाना मुनयः, अञ्जसा सुखेन उरु संसारदुःखं बहिर्दूरत उत्क्षिपन्ति । त्यजन्ति । निर्मूलयन्तीत्यर्थः । अनेन मोक्षप्रदत्वमुक्तम् । एवंभूतं तत्ते तव पदारविन्दं नमाम नमस्कुर्मः । नन्वस्त्वेवं स्वकर्त्तव्यार्थसिद्ध्यर्थं तत्त्वानां भगवत्स्तवनम् परं तु महदादीनां तेषामचेतनत्वात्तत्कथंकारं विद्वन्मतिग्रहावहं स्यात् यद्युच्यते तदधिष्ठातृदेवकृततया स्यात् हन्त तर्हि तदधिष्ठातारो देवास्तु अण्डसृष्ट्यनन्तरोद्भूतब्रह्मणा सृष्टाः तथाभूतानामादित्येन्द्रादीनामण्डसृष्टेः प्रागऽसिद्धेः कथमुपपद्येत, न च वाच्यं तत्त्वानुप्रविष्टभगवद्द्वारा भगवत्स्तोतृत्वमुपपन्नम्, स्तुत्यस्तोतृत्वयोरेकस्मिन्नऽसंगतत्वादतः परमाकाशवर्त्तिन्यस्तत्त्वाभिमानिन्यो देवतास्तत्त्वान्यधिष्ठाय तुष्टुवुरित्येतत्समाधेयम् । 'वृतं चतुः षोडशपञ्चशक्तिभिः' इति परमाकाशे मुक्तात्मतत्त्वाभिमानिदेवतास्थित्यवगमात् ॥ ३८ ॥ एतदेव व्यतिरेकमुखेन कथयन्तो नमस्कुर्वन्ति । ऋत इति । हे ईश अस्मिन् भवे संसारे यत् ऋते यद्भगवत्पदाम्बुजं विना भगवत्पदारविन्दापासनमन्तरेणेत्यर्थः । तापत्रयेण अभिहताः जीवाः आत्मन्नात्मनि आत्मन्निति सम्बोधनं वा । शर्म सुखं न लभन्ते । हे भगवन् अतः अन्वयव्यतिरेकाभ्यां भवत्पदाम्बुजोपासनस्यैव तापत्रयनिवृत्तिपूर्वकमुक्तिसाधनत्वाद्धेतोः, तव सविद्यां मुक्त्युपायभूतोपासनासहिताम् अङ्घ्रिच्छायां लोकोत्तरकान्त्युपेतौ त्वदङ्घ्री इत्यर्थः । आश्रयेम प्राप्नुवाम ॥ ३९ ॥

ननु कथं मम चरणकमलोपासनव एवात्यन्तिकसांसारिकसुखदुःखयोर्निवृत्तिः कथ्यते । यतस्तत्सुखदुःखोत्पादकपुण्यपापरूपकर्मणामविनष्टत्वादित्याशङ्कायां त्वत्पदोपासनस्यैवात्यन्तिककर्मनिरासकत्वमस्तीति तस्यैव मुमुक्षूपास्यत्वाद्वयं तव तदेव शरणं गताः स्म इत्याहुः । मार्गन्तीति । हे हरे ऋषयः ते तव मुखमेव पद्मं तन्नीडं येषां तैः, भगवन्मुखकमलोत्पत्तिस्थानैरित्यर्थः । छन्दःसुपर्णैर्वेदात्मपक्षिभिः विविक्ते निःसङ्गे मनसि यत् मार्गन्ति । यत् अघानि मर्षन्तीत्यघमर्षाणि पापक्षपणकानि उदान्युदकानि यासां तासु सरित्सु वरा श्रेष्ठा तस्या गङ्गायाः परमुत्कृष्टं पदमुत्पत्तिस्थानम्, तीर्थपदः यस्य तव तत् पदमिति शेषः । प्रपन्नाः शरणं गताः । परमित्यत्र पदमिति पाठे शेषाभावः । अत्राघमर्षोदसरिद्वरायाः समस्तजनदुरितनिवर्त्तकत्वोक्तेस्तदुत्पत्तिस्थानत्वत्पदस्य दुरितनिवर्त्तकत्वं कैमुत्यन्यायसिद्धं बोध्यम् । मुखपद्मनीडैश्छन्दःसुपर्णैरित्यनेन 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितम्' इति श्रुतेर्भगवन्मुखपद्मोद्भूतत्वोक्तेर्नीडे जाताः जातपक्षाः शकुन्ताः नीडादुड्डीयेतस्ततो भ्रान्त्वा पुनर्नीडे प्रविशन्ति, तथा वेदा अपि भगवन्मुखनीडादुड्डीय कर्मज्ञानयोगादौ भ्रान्त्वा पुनस्त्वदास्यनीडं प्राप्य त्वदुपासनामेव मुक्तिहेतुतया वदन्तीति समभिहितं बोध्यम् ॥ ४० ॥ ननु मार्गन्तीति यदुक्तं तत्कथं संपत्स्यते इत्यत्राहुः । यदिति । श्रद्धा नाम स्वचिकीर्षितादरविशेषस्तया श्रद्धायुक्तया श्रुतवत्या श्रुतिविहितपञ्चमहायज्ञादिरूपासङ्गकर्मयोगयुक्तया भक्त्योपासनया, वैराग्यं शब्दादिष्वनासक्तिस्तदेव बलं यस्य तेन, ज्ञानेन प्रकृतिविविक्तात्मावबोधेन च ज्ञानकर्मयोगानुगृहीतभक्तियोगेन चेत्यर्थः । संमृज्यमाने शोध्यमाने हृदये, ते तव अङ्घ्रिसरोजपीठम् अवधार्य धारणाविषयं संपाद्य धीराः जितेन्द्रिया मुनयः यम् अन्वेषयन्ति तत व्रजेम शरणं याम । अनेन मार्गणप्रकार उक्तः ॥ ४१ ॥ अथ भगवतो भक्तानुग्राहकत्वं स्मरन्तः आहुः । विश्वस्येति । हे ईश विश्वस्य जगतः सर्गो जन्म च, स्थितिः पालनं च, संयमः संहारश्च, ते एव अर्थः प्रयोजनं तस्मिंस्तदर्थमित्यर्थः । कृतोऽवतारः प्रादुर्भावो येन तस्य ते तव, यत् पदाम्बुजं स्वपुंसां स्वभक्तजनानाम् अभयं न विद्यते भयं संसारो यस्मात्तथाभूतम्, स्मृतमखण्डां स्वस्मृतिं प्रयच्छति ददाति । तत्पदाम्बुजं सर्वे वयं शरणं व्रजेम । अहो पृथिव्यां साक्षात्प्रादुर्भूतस्य त्वच्चरणशरणस्य महिमा यत्स्वतो भक्तानुग्राहकं तापत्रयाभिहतिनिवर्त्तकं निरतिशयानन्दसाधनभूतध्रुवानुस्मृतिपदं च । ततस्त्वच्चरणशरणतावर्जिता अतीव दुर्भगा इति भावः ॥ ४२ ॥

स्वभक्तानां स्मृतं प्रयच्छतीत्यनेनाभक्ताननुग्राहकत्वं यत्संसूचितं तदेव पुनः प्रतिपादयन्तः शरणं व्रजन्ति । यदिति । हे भगवन् अनुबध्यन्ते इत्यनुबन्धाः पुत्रदारादयः पात्रवस्त्रादयः देहानुबन्धिनो गृहानुबन्धिनश्च, तैः सहिते असति अचेतनपरिणामरूपे देहगेहे समाहारद्वन्द्वे एकत्वम् । मम मामकीनमिदम् अहं देवोऽहं मनुष्योऽहम्' इतीत्थं ऊढः संरूढः दुराग्रहो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुरभिमानो यैस्तेषां पुंसाम्, पुर्य्यां शारीरहृदयगुहायामित्यर्थः। वसतोऽपि वात्सल्यातिरेकात् पुरीमधितिष्ठतोऽपि, ते तव यत् पदाब्जं सुदूरमतिविप्रकृष्टं तत् पदाब्जं शरणं व्रजेम ॥ ४३ ॥ अहंममाभिमानग्रस्तचित्तानां प्रथमतः सत्यसाधुसंगतिरेव दुर्लभा। कुतस्तर्हि तत्संगतिप्राप्त्या तच्छुश्रूषाचार्योपसत्तिप्रणामभगवत्पदाम्बुजोपासननिर्वृत्तिः स्यादित्याहुः। तानिति। परेषां ब्रह्मादीनामीशः परेशस्तत्संबुद्धिः हे ब्रह्मादीश्वरनियन्तः, हे उरुगाय भक्तजनैर्बहुधा गीतकीर्त्ते हरे, असद्वृत्तिभिरचेतनपरिणामरूपशब्दादिविषयप्रवणैः अक्षिभिरिन्द्रियैः पराहृतं दूरमपकृष्टमन्तर्मनोऽन्तःकरणं येषां तथाभूताः ये ये जनाः भवेयुः, अथो अतो हेतोः ते ते जनाः, ते तव पदयोश्चरणपङ्कजयोर्न्यासो गमनकालीनन्यासचातुर्यं तस्य विलासो विभ्रमस्तस्य लक्ष्मीः शोभा तस्याः सर्वकालं चिन्तकानिति शेषः। तान् प्रसिद्धसाधुजनान् नूनं वा निश्चयेनैवेत्यर्थः। न पश्यन्ति। अतस्तेषां न कदाचिदपि सत्संगतिजभगवदवबोधजमहार्थरूपसुखानुभव इति भावः। अथो इत्यत्र पथो इति पाठे पदन्यासविलासलक्ष्म्याः पथो मार्गभूतान् तानिति संबन्धः। अत्र केचन विलासलक्ष्म्यः इति, विलासलक्ष्म्या इति, अथो इति, पथ इति, लक्ष्मीनिति, तान्वा इत्यत्र त्वां वेति, लक्ष्म्या इति, पञ्चम्यन्तं पठित्वा बहुधा व्याख्यां चक्रुस्तासां ललाटकुट्टनप्रायत्वात्तास्तेष्वेव विलसन्त्विति तान्प्रणमामः ॥ ४४ ॥ उक्तार्थमेव स्फुटयन्ति द्वाभ्याम्। पानेनेति। हे देव ते तव कथा एव सुधा तस्याः अमृततुल्यकथाया इत्यर्थः। पानेन सादरसंश्रवणरूपपानेन प्रवृद्धा चासौ भक्तिश्च तया संप्रवृद्धप्रेमातिशयेनेत्यर्थः। विशदो निर्मल आशयोऽन्तःकरणं येषां ते, साधवः ते वैराग्यसारं वैराग्यसाररूपं कामाद्यनभिषङ्गस्वरूपमित्यर्थः। बोधं ज्ञानं प्रतिलभ्य भगवति गाढानुरागरूपं ज्ञानं संप्राप्येत्यर्थः। अञ्जसा सुखेन यथा अकुण्ठधिष्ण्यं मुक्तप्राप्यं भगवद्धाम अन्वीयुः प्रापुः ॥ ४५ ॥

तथेति। तथा तद्वदेव अपरेऽन्येऽपि, आत्मनोऽन्तःकरणस्य समाधिः स्थैर्यं स एव योग उपायस्तस्य बलं तेन। यद्वा। आत्मनः परमात्मनः यः समाधिः परमात्ममूर्त्तिविषयकं ध्यानं स एव योगस्तस्य बलं बलनिष्पादनं तेन, बलिष्ठां बलवत्तरां दुस्तरामित्यर्थः। प्रकृतिं भगवन्मायां जित्वा तीर्त्वा धीरा जितेन्द्रियाः पुरुषं परमपुरुषं त्वां भगवन्तं भवन्तमेव विशन्ति प्राप्नुवन्ति। तथापि तेषां श्रमः स्यात्। न तु ते तव सेवया अष्टाङ्गयोगयुक्तभक्तिनिष्ठानामपि त्वदेकैकाङ्गस्य ध्यानस्यैव दुःसंपाद्यत्वाच्छ्रमः स्यात्। त्वत्कथाश्रवणादिरूपसेवोपलक्षितानां तु सहजतया समग्रत्वन्मूर्तिस्फूर्त्त्या श्रमो न भवेदेवेति भावः ॥ ४६ ॥ ते एवं स्तुत्वा स्वाभिप्रायमाविष्कुर्वन्ति चतुर्भिः। तदिति। हे आद्य परमकारण तत् त्वदीयानामस्माकं त्वच्छरणागतत्वाद्धेतोः ते वयम्, त्वत्संबन्धिनो वयं देवा इत्यर्थः। त्वया लोकसिसृक्षया लोकान् स्रष्टुमिच्छया त्रिभिः सत्त्वादिभिर्गुणैः आत्मनि आधारभूते स्वकीयात्मनि अनुसृष्टाः महदाद्यनुक्रमेण सृष्टाः। स्मेति प्रसिद्धौ। आत्मभिरिति पाठे आत्मभिः स्वशरीरभूतैः त्रिभिः अनुसृष्टाः तथापि सर्वे वयं वियुक्ताः परस्परमसंमिलिताः सन्तः ते तुभ्यं स्वविहारतन्त्रं स्वस्य तव क्रीडोपकरणं यद्ब्रह्माण्डं तत् प्रतिहर्त्तवे सृष्ट्वा समर्पयितुं न शक्नुमः। त्वल्लीलोपकरणब्रह्माण्डरचनारूपप्रत्युपकारं विधातुं समर्था नैव भवाम इति भावः ॥ ४७ ॥ प्रतिहरणासामर्थ्यमेव प्रपञ्चयितुं कार्यस्यातिवैचित्र्यमाहुः। यावदिति। हे अज काले तत्तदवसरे ते तव बलिमुपहारमाराधनमिति यावत्। यथा येन प्रकारेण हराम समर्पयाम करवामेति यावत्। वयं च भगवतस्तव क्रीडोपकरणभूता वयमपि यत्र ब्रह्माण्डे स्थिताः सन्तः यथाहि यथैव अन्नम् अदाम भक्षयाम, यथा ते इमे लोकाः स्रक्ष्यमाणा देवादयो जनाः उभयेषां ज्ञानकर्मेन्द्रियाणां बलिं शब्दादीन् गन्तव्यादींश्च विषयानित्यर्थः। हरन्त उपस्थापयन्तः, अनूह्या निःसंशयाः सन्तः, अन्नम् अदन्ति सुखमनुभवन्ति, तथा कर्त्तुं न शक्नुम। यावत् यावच्छब्दोऽवधारणे। नशक्नुम एवेत्यर्थः। तथा च श्रुतिः। 'ता एनमब्रुवन्नायतनं नः प्रतिजानीहि यस्मिन् प्रतिष्ठिता अन्नमदाम' इति ॥ ४८ ॥ एवं ब्रह्माण्डसृष्टावात्मनामसामर्थ्यमावेद्याथ तत्सामर्थ्यं प्रार्थयिष्यन्तस्त्वमेव तत्प्रदानसमर्थ इत्याहुः। त्वं न इति। हे देव सान्वयानां सकार्याणां सुराणां देवानां नोऽस्माकं त्वम् आद्यः कारणभूतः असि। आद्यत्वेन विकाराश्रयत्वमाशङ्क्याहुः। तथापि कूटस्थो निर्विकारः पुरुषः, पुरि शेते इति तत्तदन्तरात्मतयावस्थितो न तु तत्तद्वस्तुगतविकाराश्रय इत्यर्थः। पुराणः सर्वापेक्षया त्वमेव पुरातनः न तु त्वदपेक्षया किंचित्पुराणमस्तीत्यर्थः। एवंभूतः अजः त्वम्, गुणाश्च कर्माणि च तेषां योनिस्तस्यां शब्दादिगुणग्राहकज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च कारणभूतायामित्यर्थः। शक्त्यां स्वापृथक्सिद्धविशेषणभूतायाम्, अजायां तु प्रकृतावेव रेतः सृष्टिसामर्थ्यवत्, कविं ज्ञानात्मकमहत्तत्त्वम् आदधे निहितवान् 'पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्' इति पूर्वमुक्तत्वात् ॥ ४९ ॥

तत इति। हे आत्मन् ततस्तस्मात् तवैव परमकारणत्वादित्यर्थः। सत्प्रमुखाः महत्प्रभृतयः वयं त्वच्छरीरभूता एते वयमित्यर्थः। यदर्थे यदर्थं बभूविम तत् ते तव किं कार्यं करवाम सृष्टिमिति चेत्तत्राहुः। हे देव त्वं क्रियार्थे सृष्ट्यर्थं यस्यानुग्रहो, येषामिति व्यधिकरणो बहुव्रीहिः। तेषां नो, यस्य तवानुग्रहभाजामस्माकं स्वचक्षुः स्वाधिकारानुरूपं ज्ञानं शक्त्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सामर्थ्येन सह परिदेहि। अत्रेदं तत्त्वं 'पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्'। 'रेतस्त्वजायां कविमादधेऽजः' इति परमात्मक-प्रधानपतिपुरुषसंसृष्टाया मायाया महदाद्यारम्भकत्वमवगम्यते। तत्र महदादिपृथिव्यन्ता अचेतनस्यैवावस्थाविशेषाः। तत्राख-ण्डिताया एव प्रधानमायायाः प्रदेशभेदेन महत्तत्त्वरूपेण परिणामः, एवं महतोऽप्यखण्डितप्रदेशभेदेनाहंकाररूपेण परिणामः, एवम् अहंकारादिष्वपि द्रष्टव्यम्। न तु कार्त्स्न्येन महदादीनामुत्तरोत्तरकार्यरूपेण परिणामः, कृत्स्नस्यापि महदादेः कार्यरूपेण परिणामे महदादीनां पृथक्स्थित्यनुपपत्तिः, तथा सति 'पृथिव्यप्सु लीयते' इत्यारभ्य 'महानव्यक्ते लीयते' इत्यन्तेनोक्तं लयश्रवणं विरुद्धं स्यात्। अतः सः लयस्त्वेवं वेद्यः। पूर्वपूर्वावस्थयावस्थितेन द्रव्येण तदेकदेशस्योत्तरोत्तरावस्थामापन्नस्य तदव थाप्रहाणेन संश्लेषः, एवं सति पञ्चीकरणोपपत्तिः अन्यथा पृथक्कृततत्त्वानामभावात्तदनुपपन्नं स्यात्। एवं महत्तत्त्वादहंकारत्वाकाशत्वा-दिपृथिवीत्वपर्यन्तावस्थापन्नस्य प्रधानद्रव्यस्य परमात्मात्मकप्रधानपतिपुरुषानुप्रवेशेन परमात्मशरीरत्वव्यपदेश उपपन्नः। एतत्प्रपञ्चो रामानुजीयश्रीभाष्यादवगन्तव्यः ॥ ५० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः

मैत्रेय उवाच

इति तासां स्वशक्तीनां सतीनामसमेत्य सः। प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥ १ ॥

ईश्वराविष्टतत्त्वैस्तु षष्ठे सृष्टिर्विराट्तनोः। अधिदैवादिभेदश्च तत्रोक्तो भगवत्कृतः ॥ १ ॥

तत्र तावत्परस्परममिलितानां तेषां परमात्मानुप्रवेशेन सृष्टिसामर्थ्यमाह। इतीति त्रिभिः। स तत्त्वसंस्तुतः ईश्वरः परमेश्वरः, इत्युक्तरीत्या असमेत्य अमिलित्वा सतीनां वर्त्तमानानां स्वशक्तीनां स्वशरीरभूतानां प्रसुप्तमनुद्बुद्धं लोकतन्त्रं लोकरचनासामर्थ्यं यासां तासाम्, तासां तत्त्वाभिमानिदेवतानां गतिं स्थितिं निशाम्य दृष्ट्वा ॥ १ ॥ कालसंज्ञामिति। तदा यदा तद्गतिदर्शनं कृतं तदनन्तरमित्यर्थः। काल इति संज्ञा यस्यास्तां कालाख्यां देवीं देवस्य स्वस्य संबन्धिनीं शक्तिम-पृथक्सिद्धविशेषणभूतरूपान्तरमित्यर्थः। बिभ्रदन्तः प्रवेशं कृत्वा प्रशासनेन धारयन्, उरुक्रमो विस्तृतपादन्यासः त्रिविक्रमो भगवान् त्रयोविंशतितत्त्वानां महदहंकारपञ्चभूतपञ्चतन्मात्रैकादशेन्द्रियाणां गणं समूहं युगपत्समकालम् आविशदनुप्रविष्टोऽभूत्। शक्तिं बिभ्रदित्यनेन प्रकृतेरनुप्रवेशकर्त्रा भगवता साहित्यतया पृथगनुक्तेस्तत्त्वगणस्य त्रयोविंशतिसंख्याकत्वं बोध्यम् ॥ २ ॥ स इति। चेष्टारूपेण प्रेरणात्मकचेष्टया उपलक्षितः, सुप्तं कर्म तद्व्यापारमित्यर्थः। प्रबोधयन्नुद्बोधयन् भगवान् स परमेश्वरः अनुप्रविष्टस्तेषु कृतानुप्रवेशः सन् भिन्नं पृथक् पृथगवस्थितं तं पूर्वोक्तप्रकारं गणं तत्त्वसमूहं संयोजयामास ॥ ३ ॥ आहित-सामर्थ्यस्य तत्त्वगणस्य ब्रह्माण्डोत्पत्तिद्वारा वैराजशरीरारम्भकत्वं संग्रहेणाह। प्रबुद्धकर्मेति। दैवेन भगवतः संकल्पेन प्रबुद्धमुद्बुद्धं कर्म स्वस्वव्यापारो यस्य सः। त्रयोविंशतिकः त्रयोविंशतिसंख्यायुक्ततत्त्वात्मकः गणः, प्रेरितः दैवेनैव विहित-संप्रेरणः सन्, स्वाभिरात्मीयाभिः मात्राभिरंशैः अधिपूरुषं विराड्ब्रह्मशरीरम् अजनयदसृजत् ॥ ४ ॥ कथमजनयदित्यपेक्षायां तदेव विवृणोति। परेणेति। मात्रया अंशभूतसंकल्परूपज्ञानेन स्वस्मिन् प्रतितत्त्वं स्वस्वकात्मनि विशताऽनुप्रविष्टेन परेण भगवता उपलक्षितः, यस्मिन् गणे चराचराः स्थावरजङ्गमाः लोकाः कार्यत्वेनावस्थिताः एवंभूतः विश्वसृड्गणः त्रयोविंशति-तत्त्ववृन्दमित्यर्थः। अन्योऽन्यं परस्परम् आसाद्य संहत्य चुक्षोभ परिणतोऽभूत्। समष्टिपुरुषगर्भब्रह्माण्डरूपेण परिणतोऽ-भूदित्यर्थः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुश्रूषावृत्तिनिमित्तकं शूद्रजन्म तेन स्ववृत्त्या भगवत्संतोषजननमेव परो धर्म इति सूचितम् ॥ ३३ ॥ तदेवोपपादयति । एत इति । एते वर्णाः ब्राह्मणादय एते चत्वारो वर्णा इत्यर्थः । स्वधर्मेण स्ववर्णोचितधर्मेण श्रद्धया आत्मविशुद्ध्यर्थम् आत्मनोऽनादिपापवासनादूषितान्तःकरणविशुद्ध्यर्थमित्यर्थः । स्वगुरुं स्वजनकं हरिं स्वाश्रितसंसारहरं भगवन्तं यजन्ति । कुतः यद्यतो हरेः सकाशात् वृत्तिभिः सह जाताः ततो यजन्तीत्यर्थः ॥ ३४ ॥

एवं समासतः सृष्टिलीलां संवर्ण्य पुनरपि प्रश्नावसरप्रदानायानन्तमहिम्नो भगवतः साकल्येन महिमानमुपवर्णयितुं न कोऽपि शक्त इति कथयन्नुपसंहरति । एतदिति । क्षत्तः दैवं कालश्च, कर्म जीवादृष्टं च, आत्मा जीवश्च, ते रूपाणि शरीराण्यस्य सन्तीति दैवकर्मात्मरूपो तस्य भगवतः पूर्णषाड्गुण्यस्य, युज्यते इति योगाऽधिष्ठेया चासौ माया च तस्याः बलं जननसामर्थ्यं तस्योदयो विभवो यस्मिंस्तत् एतद्विश्वम् उपाकर्तुं साकल्येन व्याकर्तुं वर्णयितुमिति यावत् । कः पुमान् श्रद्दध्यात् श्रद्धां कुर्यात् । न कोऽपीत्यर्थः ॥ ३५ ॥ ननु यदि कस्याप्यत्र शक्तिर्नास्ति तर्हि कथं भवता वर्ण्यते इत्यत आह । अथापीति । अङ्ग हे विदुर अथापि कार्त्स्न्येन वर्णयितुं कस्याप्यशक्तावपि, श्रुतं गुरुमुखाच्छ्रवणविषयतां नीतमनतिक्रम्येति यथाश्रुतम् । तत्रापि यथामति यावत्स्वबुद्धिविषयमनतिक्रम्य हरेः कीर्त्तिं कीर्त्तयामि । नह्यहं साकल्येन वर्णितुं क्षम इति भावः । एवं चेत्तर्हि किमेकदेशवर्णनेन प्रयोजनमित्यत्राह । स्वां स्वकीयाम् अन्यस्य हरिव्यतिरिक्तार्थस्य अभिधा कथनं तया असती दुष्टा तां गिरं वाचं सत्कर्तुं पवित्रतां संपादयितुमित्यर्थः । कीर्त्तयामीति संबन्धः ॥ ३६ ॥ एतदेव समुपपादयति । एकान्तेति । सुश्लोकमौलेः श्लोकनीयप्राधान्यस्य श्रीभगवतः गुणवादं गुणकथनं एव पुंसां वचसः एकान्तलाभमेकान्तफलम् आहुः तु एव । श्रुतिस्मृतीतिहासपुराणाभिज्ञा वदन्तीत्यर्थः । किं च विद्वद्भिः उपाकृतायामुपवर्णितायां कथासुधायां श्रुतेः श्रोत्रेन्द्रियस्य उपसंप्रयोगं संनिधावर्पणं एकान्तलाभम् आहुः कथयन्ति ॥ ३७ ॥ न केवलमस्माकमेव भगवन्महिमा कार्त्स्न्येन वक्तुं दुर्ज्ञेयः, किं तु विज्ञानाधिकानां ब्रह्मादीनामपि स दुर्ज्ञेय एवेत्याह । आत्मन इति । हे वत्स विदुर आदिना प्रथमोद्भवेन कविना ब्रह्मणा आत्मनो भगवतः महिमा संवत्सरसहस्रान्ते बहुवत्सरावसाने योगेन विपक्वया धिया अवसितः एतावानिति विज्ञातः किम् इति काकुः । यद्वा । अपरिच्छिन्नत्वेनेति शेषः । अपरिच्छिन्नोऽस्तीति बुद्ध इत्यर्थः ॥ ३८ ॥ न केवलमादिकविरेवापरिच्छिन्नत्वेन वेद, किं तु स्वयं भगवानपि एवमेव वेदेत्याह । अहो इति । अहो इत्याश्चर्ये । भागवती भगवत्संबन्धिनी माया आश्चर्यशक्तिः मायिनामाश्चर्यशक्तिमतामपि मोहिन्याश्चर्यजनयित्री । यद्यतो हेतोः आत्मा सर्वात्मा स्वयं हरिः आत्मवर्त्म स्वयोगमायागतिं न वेद एतावदिति नैवाविदत् । अनन्तत्वात् । तर्हि अपरे अन्ये किमुत अन्ये न विदुरित्यत्र किं वक्तव्यमित्यर्थः ॥ ३९ ॥ ननु वाचां मनसश्चागोचरेन्द्रियार्थदर्शिनः ऋषयो देवाश्च जानीयुरेव सर्वेषामपि दुर्ज्ञेयत्वेऽनुपास्यत्वप्रसङ्गः स्यादित्यत आह । यत इति । मनसा योगपरिशुद्धेन मानसेन सह वाचो वेदवचांसि अहमहंकाराधिष्ठाता रुद्रश्च अन्ये इमे देवाश्चापि अप्राप्य यतः निवर्त्तन्ते । तस्मै भगवते नमः । तत्स्वरूपगुणविभूतीनामपरिच्छिन्नत्वेनोपासनोपपत्तिसंभवः स्यादेवेति भावः ॥ ४० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सप्तमोऽध्यायः

श्रीशुक उवाच

एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः। प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥ १ ॥

वचनं संशयच्छेदि मुनेः संस्तूय सप्तमे। नानाप्रश्नाः कृताः क्षत्त्रा पुनः सम्यगुदीरिताः ॥ १ ॥

प्रथमं भगवतो जगदुपादानत्वमुक्तं तत्प्रयुक्तदोषसंस्पर्शो भगवत्यागतस्तत्परिहारबुभुत्सया विदुरो मैत्रेयं पृच्छतीत्याह शुकः। एवमिति। बुधस्तत्त्वदर्शी द्वैपायनसुतः श्रीवेदव्यासपुत्रः विदुरः भारत्या स्वगिरा प्रीणयन्निव एवमुक्तप्रकारेण ब्रुवाणं कथयन्तं मैत्रेयं प्रत्यभाषत। प्रीणयन्निवेत्यभिप्रायाज्ञानेनाक्षेपद्योतक इवशब्दः ॥ १ ॥ प्रथमं भगवतः स्रष्टृत्वमुपादानत्वं च न घटते इत्याह। ब्रह्मन्निति द्वाभ्याम्। हे ब्रह्मन् मैत्रेय भगवतः पूर्णषाड्गुण्यस्य चिन्मात्रस्य चिदात्मकस्य अविकारिणः परिणामादिविकाररहितस्य निर्गुणस्य सत्त्वादिगुणरहितस्य, गुणाः गुणकार्यभूताः क्लेशादयः, क्रियाः परिणामादयश्च लीलया अपि कथं युज्येरन्। अत्रायमभिप्रायः। भगवतः सृष्ट्यादिकर्तृत्वं जगदात्मना परिणामश्च यः सः कर्मणा लीलया वा। यद्युच्यते कर्मणा तर्हि 'अपहतपाप्मा' इत्यादिश्रुतिव्याकोपः, यद्युच्यते लीलया तदा सप्तद्वीपवर्ती मेदिनीमधितिष्ठतो महाराजस्य कन्दुकादिभिः खेलनारम्भाचरणवत्पूर्णस्य षाड्गुण्यमूर्त्तेरवाप्तसमस्तकामस्य स्वपरप्रयोजनरहितस्य भगवतः लीलयापि न संगच्छते। यदि महाराजः खेलाद्याचरेत्तदा तस्य तु अषाड्गुण्यपूर्णत्वादनवाप्तसमस्तकामत्वात्सत्त्वादिगुणवश्यत्वात्संगच्छेत ईश्वरस्य तद्विपरीतत्वान्न घटत इति ॥ २ ॥

अर्भकदृष्टान्तेनापि न घटेत इत्याह। क्रीडायामिति। अर्भकस्य बालकस्य क्रीडायाम् उद्यमः प्रवर्त्तकः कामः कामहेतुको हि क्रीडोद्यम इत्यर्थः। अन्यतः क्रीडोपकरणैः कालान्तरप्रवर्त्तनेन वा चिक्रीडिषा क्रीडेच्छा च स्यात्। ईश्वरस्य तु स्वतः तृप्तस्य स्वानुभवेनैव तृप्तस्येत्यर्थः। कथं कामः। सदा अन्यतः स्वव्यतिरिक्तस्वतन्त्रक्रीडोपकरणैः क्रीडाप्रवर्त्तकपुरुषान्तरैश्च निवृत्तस्य चिक्रीडिषा च कथं स्यात्। अयं भावः। अर्भकस्य क्रीडाप्रवर्त्तकः कामः क्रीडोपकरणानि कालान्तरप्रवर्त्तनं वा विद्यते। ईश्वरस्य स्वतस्तृप्तत्वात्स्वव्यतिरिक्तान्याभावादर्भकवच्चिक्रीडिषापि न युज्यते इति ॥ ३ ॥ हे गुरो त्वं यद्येवं ब्रुवीथाः प्रकृतिपुरुषशरीरकत्वं यतो भगवतोऽस्त्यतो जगदुपादानकारणतावतोऽप्यस्यागतो दोषसंस्पर्शः प्रकृतिपुरुषयोरेव व्रजिष्यति। एवं 'अस्राक्षीद्भगवान्विश्वम्' इति 'भगवानेक एवैष' इति सार्द्धेन शङ्कामुद्भाव्य 'देशतः कालतः' इति 'अमुष्य दुर्भगत्वम्' इत्यनेन सार्द्धेन स्वोद्घाटितमैत्रेयाभिशयं परिहरन्स्वानीतदोषमेव संस्थापयति श्लोकत्रयेण। अस्राक्षीदिति। गुणमय्या सत्त्वादिगुणप्रचुरया आत्ममायया स्वसंबन्धिन्या मायया भगवान् विश्वम् अस्राक्षीत। तया उपलक्षितः सन्नेव एतद्विश्वं संस्थापयति प्रतिष्ठापयति पालयतीति यावत्। भूयः पुनः प्रत्यभिधास्यति तिरोहितं करिष्यति। अपिपूर्वो धाधातुस्तिरोधाने वर्त्तते। तथैवाभिपूर्वोऽपि। स्वाधिष्ठेयां गुणमयीं मायां महदादिरूपेण परिणमय्य स्वयं शुद्धः सन्नेव पुरुषाधिष्ठितप्रकृतिजगुणत्रययुक्तत्रिमूर्त्तिरूपेण सृष्ट्यादीन्करोतीति भावः ॥ ४ ॥ अतः परिणामादयः स्वाधिष्ठेयमायागता न स्वगता इति चेत्तत्राह। देशत इति। यः असौ परमात्मा, देशतः दीपप्रभाया इव, कालतः विद्युत इव, अवस्थातः स्मृतेरिव, स्वतः स्वप्नवत्, अन्यतः घटवत्, अविलुप्तावबोधात्मा विशेषेण लुप्तज्ञानरूपो न भवति सर्वगतत्वान्नित्यत्वादविक्रियत्वादनितरानुभाव्यत्वतत्कालमात्रावसायित्वाभावात्कर्मवश्यत्वाभावादिति यथाक्रमं योजनीयम्। अत ईदृशः स परमात्मा अजया मायया कथं युज्येत। यदि वा केनापि देशादिना भगवान् लुप्तावबोधो भवेत्तर्ह्यविद्यासंबन्धोऽस्य समभविष्यत्तस्य त्वभावात्कथमस्याजया योग इति शङ्काभिप्रायः ॥ ५ ॥ एवं प्रकृतिशरीरकतया भगवति दोषमागतं दृढीकृत्य सांप्रतं जीवशरीरकत्वेऽपि तद्गतक्लेशानाश्रयत्वमर्द्धेनाशङ्क्य परिहरति। भगवानिति। एषः भगवान् एकः एव सर्वक्षेत्रेषु समस्तशरीरेषु अवस्थितः जीवान्तरात्मतयाऽवस्थितः 'अन्तःप्रविष्टः शास्ता जनानाम्'। 'य आत्मनि तिष्ठन्नात्मनोन्तरः' इत्यादिश्रुतेर्दुःखित्वसंसारित्वादयो गुणकार्यभूतदोषा न परमात्मानं स्पृशन्तीति चेत्तत्राह। अमुष्य भगवतः दुर्भगत्वं वा कर्मभिः क्लेशः वा कुतः स्यात्। अयमभिप्रायः। यदि परमात्मनः जीवादिषु व्याप्तिस्तर्हि अवस्थात्रयमूर्च्छोत्क्रान्तिषु जीवस्य तत्स्थानप्रयुक्ता दोषा ये ते तदन्तर्यामिणः परब्रह्मणोऽपि संभविष्यन्ति। न च परमात्मनोऽकर्मवश्यत्वतो दोषाभाव इति वाच्यम्। कर्मजन्यदेहसंबन्धजक्लेशाद्यपुरुषार्थयुक्तजीवरूपदेहे तन्नियमनार्थमन्तःस्थित्याप्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषार्थसंबन्धोऽवर्जनीय इति ॥६॥ प्रश्नमुपसंहरति । एतस्मिन्निति । हे विद्वन् मैत्रेय एतस्मिन् अज्ञानसंकटे अज्ञानरूपे संकटे मे मम मनः खिद्यते, तस्माद्धेतोः हे विभो मैत्रेय नोऽस्माकं मानसं मनःसंबन्धि महत् कश्मलं खेदं पराणुद अपाकुरु ॥ ७ ॥ एवं विदुरेणापृष्टो मैत्रेयः प्राह इति शुक आह । स इति । तत्त्वजिज्ञासुना तत्त्वं वेदितुमिच्छुना क्षत्त्रा विदुरेण इत्थमुक्तप्रकारेण चोदित आपृष्टः स मुनिर्मैत्रेयः भगवत्येव चित्तं यस्य स भगवच्चित्तः । गतः तत्त्वदर्शित्वेन विगतः स्मयो यस्य सः, तथाभूतः सन् स्मयन्निव प्रश्नस्य सुपरिहारकत्वादिति भावः । प्रत्याह विदुरं प्रत्यभाषत ॥ ८ ॥ यदुक्तं भगवतः स्रष्टृत्वोपादानाघटनं तत्र स्वाज्ञया ब्रह्मादिकृतेऽपि सृष्टृत्वे प्रयोजकत्वतः स्वस्य तत्त्वं युक्तमाश्चर्यरूपानन्तशक्तिमत्त्वतोऽस्योपादानत्वं च युक्तम्, निरवधिकातिशयकारुण्यस्य जीवहितार्थं लीलया सर्गादिविधानादौ न दोषः । 'स एकाकी न रमते' 'यः स्वभक्तेभ्यो रमते' इत्यादिश्रुतीक्षया स्वसमानस्वभाववन्मुक्तानुमोदनतः सर्गादौ प्रवृत्तेर्नार्भकदृष्टान्तजो दोषः, भगवतोऽनन्तशक्तिमतः कर्मणो लीलायाश्चालौकिकत्वात्तयोः सादृश्याभावान्नेतरदृष्टान्तप्रदानं युक्तं निमित्तोपादानात्मकोभयविधकारणत्वस्यैकस्मिन्भगवत्येव सत्त्वतो जीवेषु कर्मवश्यत्वाद्धरावकर्मवश्यत्वादनन्ताश्चर्यमूर्त्तेः 'परास्य शक्तिर्विविधैव श्रूयते' । 'स्वाभाविकी ज्ञानबलक्रिया च' इत्यादिश्रुत्यर्थांश्च मनसि निधाय मैत्रेयो वदति सेयमित्यादिना । सेयमिति । ईश्वरस्य कार्पण्यं कृपणत्वम्, विमुक्तस्य बन्धनमुत बद्धवत्प्रतीयमानत्वं चापि येन हेतुना न विरुध्यते, यत् विरुद्धं सदपि विरुद्धवद्यत् न प्रतीयते, सा इयं भगवतः माया आश्चर्यशक्तिः, भगवतः सर्वव्यापित्वेऽपि व्याप्यगतदोषाणामस्पर्शताहेतुभूताया आश्चर्यशक्तेर्योगाद्व्याप्यवस्तुगतदोषस्पर्शत्वान्न कश्चन विरोध इत्यर्थः ॥ ९ ॥ ननु स्वतः सच्चिद्रूपस्य जीवस्याप्यस्तु तथात्वमिति चेत् जीवस्य तु स्वतः सच्चित्स्वरूपत्वेऽपि तत्स्वरूपस्यानाद्यविद्याकर्मवासनारुचियुक्तप्रकृतिसंबन्धादिभिस्तिरोहितधर्मत्वेन तत्तद्देवादिदेहाभिमानेन क्लेशादिसंबन्धोऽवर्जनीय इति सदृष्टान्तमाह द्वाभ्याम् । यदर्थेनेति । यद्यस्माद्धेतोः अमुष्य कर्मवश्यस्य पुंसो जीवस्य अर्थेन पुरुषार्थभूतेनात्मस्वरूपेण विना आत्मविपर्ययः देवमनुष्यत्वादिभावः प्रतीयते । तत्प्रयुक्तः स्वशिरश्छेदनादिकः शोक इति शेषः । स्वशरीरभूतदेवमनुष्यादिशिरसि छिन्ने ममेदं शिरश्छिन्नमिति शोकश्चेत्यर्थः । उपद्रष्टुः देहमेवात्मतादात्म्येनानुसंदधतः प्रतीयतेऽनुभूयते । सेयं चापि भगवतो मायेत्यर्थः ॥ १० ॥

यथेति । यथा जले चन्द्रमसः असन्नपि स्वतश्चन्द्रमस्यविद्यमानोऽपीत्यर्थः । तत्कृतः जलाद्युपाधिकृतः कम्पादिश्चलनादिरूपः गुणः दृश्यते, एवम् आत्मनः असन्नपि अविद्यमानोऽपि अनात्मनो देहस्य गुणः द्रष्टुरुपद्रष्टुः देहस्य आत्मतादात्म्यमभिमन्यमानस्येति यावत् । दृश्यते । कर्माधीनस्यानाद्यविद्यासंबन्धेन स्वरूपाप्रतीतिर्देहात्मभ्रान्तिस्तया च शोकमोहादयः, परमार्थतस्तु न देहगतैर्धर्मैः स्पृश्यते इत्यभिप्रायः । परमात्मनस्तु अविद्यया अतिरोहितस्वरूपस्य प्रकृतिपुरुषयोर्नियन्तुः न अविद्यातत्कार्यप्रसङ्ग इत्यर्थः ॥ ११ ॥ न केवलं भगवतो जीवान्तरात्मत्वयावस्थितस्य जीवगतदोषास्पर्शमात्रत्वम्, प्रत्युत जीवगतहेयनिवर्त्तकत्वं चेत्याह । स वै इति । सः हेयगुणः निवृत्तिधर्मेण वासुदेवानुकम्पया भगवद्भक्तियोगेन च इह वै अत्रैव शनैः तिरोधत्ते, कर्मयोगानुगृहीतभगवद्भक्तिजन्यभगवत्कृपया तिरोधानं प्राप्नोतीत्यर्थः । यद्भक्त्या जीवगतहेयनिवृत्तिस्तस्य हेयरहितत्वमनुक्तमप्यर्थसिद्धं बोध्यम् ॥ १२ ॥ कियत्कालपर्यन्तं भक्त्याचरणेन हेयनिवृत्तिरित्यत्राह । यदेति । अर्थान् शब्दादीन् प्रति यदा इन्द्रियोपराम इन्द्रियाणामुपरतिर्निवृत्तिरिति यावत् । भवेत् । तदा परे प्रकृतिपुरुषविलक्षणे हरौ आश्रितबन्धहारिणि आत्मनि परमात्मनि दृष्टे पूर्वोक्तरीतिकृतभक्त्या साक्षात्कृते सति दृष्टे आत्मनि इति पदच्छेदः । अयादेशे यलोपे चार्षो गुणः । कृत्स्नशः क्लेशाः विलीयन्ते । 'तस्मिन् दृष्टे परावरे' इति श्रुतेः । कस्येव संसुप्तस्य गाढनिद्रां प्राप्तस्य इव, क्लेशविलयमात्रेऽयं दृष्टान्तः न तु पुनरुत्थाने, न हि संसुप्तस्य कात्स्न्र्येन दुःखनिवृत्तिः । तस्यैव जाग्रतः सतः पुनः क्लेशाश्रयत्वात् । अनेन साक्षात्कारपर्यन्तं भक्त्याचरणेन हेयनिवृत्तिरिति ज्ञापितम् ॥ १३ ॥ कैमुत्यन्यायेन पुनः क्लेशनिवर्त्तकत्वमाह । अशेषेति । मुरारेः श्रीहरेः गुणानुवादश्च, श्रवणं च, तत्समाहारम् । तत्रानुवादो हरिगुणानामनुवर्णनम्, श्रवणं श्रद्धापूर्वकमाकर्णनम् इत्युभयमेव अशेषसंक्लेशशमं विधत्ते करोति यदा, तदा आत्मलब्धा स्वात्मनि प्राप्ता तस्य भगवतश्चरणारविन्दयोर्यः परागस्तस्य सेवा तस्यां रतिः तैलधारावदविच्छिन्नतया संस्मरणसंततौ या प्रीतिः, कुतः पुनः अशेषसंक्लेशशमं विधत्ते तत्र किं वक्तव्यमित्यर्थः ॥ १४ ॥

अथ विदुरः स्वाभिप्रेतमाविष्कुर्वन्मैत्रेयकृतस्वप्रश्नोत्तरमभिनन्दति । संछिन्न इति । हे विभो मैत्रेय तव सूक्तं सोपपत्तिकं वाक्यं तदेवासिः खड्गः तेन त्वदीयसोपपत्तिकवाक्यासिनेत्यर्थः । मह्यं मम संशयः संछिन्नः । इदानीं हे भगवन् मे मम मनः उभयत्र भगवद्गुणानुवादश्रवणे चरणारविन्दपरागसेवायां च संप्रधावति प्रवणं भवति । अनेन स्वाभिप्रेतमाविष्कृतम् ॥ १५ ॥ तत्कृतोत्तरमेव प्रपञ्चेनाभिनन्दति । साध्विति । हे विद्वन् हरेः परमात्मनः, आत्मा जीवश्च, माया प्रकृतिश्च, ते अयनं वासस्थानम्, व्याहृतं त्वया यत् कथितम्, एतत् साधु सम्यक् व्याहृतम् । विश्वमूलं विश्वकारणं यत् ब्रह्म तत् बहिः न, जगतो बहिर्वर्त्ति न भवति, किं त्वन्तः प्रविष्टमित्यर्थः । किं च इदं जगदिति शेषः । निर्मूलं मूलभूतपरब्रह्मरहितमतदात्मकमित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यावत्। आभाति यत्तदिदमपि अपार्थमर्थशून्यं भ्रान्तिरूपमिति यावत्। अनेन जगतोऽब्रह्मात्मकत्वप्रतिभासो मिथ्यारूप इत्युक्तम् ॥ १६ ॥ एवं देहात्मप्रतीतिर्भ्रान्तिरूपेति वक्ष्यन्नब्रह्मात्मकस्वतन्त्रात्मभ्रमदेहात्मभ्रमवतां क्लेशवत्त्वमाह। य इति। लोके यश्च यस्तु जनः मूढतमः, यश्च बुद्धेः परं विलक्षणं ब्रह्मात्मकं स्वात्मानमित्यर्थः। गतोऽवगतवान्। कर्त्तरि क्तः। तावुभौ मूढतमात्मस्वरूपाभिज्ञौ सुखं यथा तथा एधेते वर्द्धेते। मूढतमस्य स्वमौढ्यमपि किंचित्सुखजनकमित्यभिप्रायः। अन्तरितो न मूढतमो, नापि बुद्धेः पारं गतः, किं तु संशयात्मा जनः, क्लिश्यति सर्वदा क्लेशानेवानुभवति ॥ १७ ॥ देहात्मप्रतीतेर्भ्रान्तिभावं कथयंस्तन्निवर्त्तने मूलकारणमाह। अर्थाभावमिति। प्रतीतस्यापि आत्मतादात्म्येन प्रतीयमानस्यापि नात्मनोऽनात्मनो देहस्येत्यर्थः। अर्थाभावमात्मत्वाभावं विनिश्चित्य तां च तां देहात्मप्रतीतिमपि युष्मच्चरणसेवया त्वदीयचरणयोः सश्रद्धं संसेवनेन अहं पराणुदे प्रणाशये अपाकरिष्यामीत्यर्थः ॥ १८ ॥ देहात्मप्रतीतिरूपव्यसनार्दने सत्सेवाया एव प्रथमं कारणत्वमाह। यत्सेवयेति। यत्सेवया येषां साधूनां सेवया सत्सेवयेति पाठे स एवार्थः। कूटस्थस्य निर्विकारस्य मधुद्विषो मधुनामासुरहन्तुः भगवतः परमेश्वरस्य पादयोश्चरणपद्मयोः तीव्रो विघ्नशतानुपहतः व्यसनार्दनस्तापत्रयनिवर्त्तकः रतिरासोऽनुरागोल्लासः प्रीत्यतिशय इति यावत्। भवेत् ॥ १९ ॥ सत्सेवापि बहुना तपसैवोपलभ्येतेति व्यतिरेकमुखेनाह। दुरापेति। अल्पतपसस्तपोहीनस्य यत्र येषु देवदेवः ब्रह्मादिदेवानामपि देवः जनार्दनः भगवान् नित्यम् उपगीयते, तथाभूतेषु वैकुण्ठवर्त्मसु वैकुण्ठप्रापकेषु भागवतेषु सेवा सेवाप्राप्तिः दुरापा हि। दुर्लभैवास्तीत्यर्थः। अनेन सत्सेवायाः श्रवणादिप्रणाल्यैव भक्त्युत्पादकत्वमिति सूचितम् ॥ २० ॥

अथार्थान्तराणि प्रष्टुकामस्तदुक्तमनुवदति। सृष्ट्वेति चतुर्भिः। विभुर्भगवान् विकारैरिन्द्रियादिभिः सहितानि सविकाराणि महदादीनि अग्रे व्यष्टिसृष्टेः पूर्वम् अनुक्रमात् सृष्ट्वा तेभ्यो महदादिभ्यः विराजं वैराजदेहम् उद्धृत्य महदाद्यावरणयुक्तविशेषापरसंज्ञाण्डसृष्टिद्वारोत्पाद्य तं विराजम् अनुप्राविशत् ॥ २१ ॥ प्रविष्टस्य स्वरूपं वर्णयति। यमिति। यं विराजि शरीरे भवस्तं वैराजं पुरुषं पुरुषशब्दवाच्यम् आद्यं सर्वकारणकारणं सहस्राङ्घ्र्युरुबाहुकम् आहुः। 'सहस्रशीर्षा पुरुषः' इत्याद्याः श्रुतयः कथयन्तीत्यर्थः। विराजं वर्णयति। यत्र यस्मिन्विराजि विश्वे सर्वे इमे लोकाः सविकाशं यथा तथा समासते असंकोचेन तिष्ठन्तीत्यर्थः ॥ २२ ॥ यस्मिन्निति। यस्मिन्विराजि इन्द्रियाणि ज्ञानकर्माख्यान्यक्षाणि च, अर्थाः शब्दादयश्च, इन्द्रियाणि तद्देवाश्च, तैः सहितः। त्रिवृत् त्रिगुणात्मकः दशविधः प्राणादिदशप्रकारवान् प्राणः त्वया ईरितः कथितः। यतो वैराजात् त्वया वर्णाः ईरिताः, वर्णा उत्पन्ना इति कथितमित्यर्थः। तद्विभूतीः नोऽस्मभ्यं वदस्व वर्णयस्व ॥ २३ ॥ यत्रेति। यत्र वैराजशरीरभूते यत्र ब्रह्माण्डे पुत्रैरात्मजैः, पौत्रैः पुत्रात्मजैश्च, नप्तृभिः पौत्रात्मजैः, गोत्रजैर्गोत्रोत्पन्नैश्च सह विचित्रा नानाविधा आकृतयो देहा यासां ताः प्रजाः आसन्। याभिः प्रजाभिः इदं ब्रह्माण्डं ततं व्याप्तम् ॥ २४ ॥ द्वितीयस्कन्धेऽष्टमेऽध्याये 'यदधातुमतो ब्रह्मन्' इत्यादिना राजकृतप्रश्नानां मध्ये केषांचित्प्रश्नानामुत्तराण्यभिधायावशिष्टानामुत्तराण्यभिधातुं विदुरमैत्रेयसंवाद 'एतमेतत्पुरा पृष्टः' इत्यादिना प्रस्तावितः। इदानीं विदुरकृतप्रश्नानाह। प्रजापतीनामित्यादिना यावदध्यायसमाप्ति। प्रजापतीनां मरीच्यादीनां पतिः स प्रसिद्धः पितामहत्वेन विख्यातो ब्रह्मेत्यर्थः। कान् प्रजापतीन् कांस्कान्प्रजापतीनित्यर्थः। चकॢपे सृष्टवान्। एतदादि सर्वस्य वर्णयेति वक्ष्यमाणेन संबन्धः। किं च सर्गान् वक्ष्यमाणान्नवविधान् प्राकृतान् सर्गान् अनुसर्गांस्तद्भेदांश्च एव प्राकृतसर्गतः पाश्चात्यान् सर्गानित्यर्थः। मनून् स्वायंभुवादिचतुर्दशापि मनून् मन्वन्तराधिपान्मन्वन्तरेषु येऽधिपास्तान् ॥ २५ ॥

एतेषामिति। किं च हे मित्रात्मज एतेषां मन्वन्तराधिपानाम् अपि वंश्यान्वंशसमुद्भूतान् वंश्यानां तद्वंशजातानामनुचरितानि तानि च भूमेः उपरि उपरिष्टात्, अधो भूमेरधस्ताच्च ये लोकाः आसते तिष्ठन्ति तांश्च, तेषां लोकानां संस्थां संनिवेशं च, अवयवविन्यासमित्यर्थः। प्रमाणं तेषां परिमाणं भूर्लोकस्य प्रमाणं च वर्णय ॥ २६ ॥ तिर्यङ्ङिति। गार्भा जरायुजाश्च, स्वेदाः स्वेदजाश्च, अण्डजा अण्डोद्भवाश्च, उद्भिजो भूमिमुद्भिद्य जाताः कक्षवृक्षादयश्च, तेषां चतुर्विधखन्युद्भवभाजामित्यर्थः। तिर्यञ्चः पश्वादयश्च, मानुषा मनुष्याश्च, देवाः सुपर्वाणश्च, तेषाम्। सरीसृपाः सर्पादयश्च, पतत्रिगः पक्षिणश्च, तेषां च, सर्गसंव्यूहं सर्गसंविभागं सर्गविकल्पनमित्यर्थः। नोऽस्मभ्यं वद कथय ॥ २७ ॥ गुणावतारैरिति। गुणावतारैः रजआदिगुणप्रधानैर्ब्रह्मादिभिरवतारैः सृजतो जगद्व्यापारं कुर्वतः, श्रीनिवासस्य भगवतः, विश्वस्य जगतः सर्गश्च, स्थितिश्च, अप्ययश्च तेषामाश्रयम्, तेषामाश्रयो विषयो यस्य तमिति वा। उदारविक्रमं महान्तं व्यापारं व्याचक्ष्व ॥ २८ ॥ वर्णेति। रूपं लिङ्गं च, शीलमाचारश्च, स्वभावः शमादिश्च, रूपशीलस्वभावास्तैरिति तृतीयार्थे तसिः। सा चाध्याहृतसहादियोगे रूपादिभिः सह वर्णा ब्राह्मणादयश्च, आश्रमा ब्रह्मचर्यादयश्च, तेषां विभागास्तान् चापि आख्याहीत्युत्तरेणान्वयः। एवमग्रेऽपि द्वितीयान्तानामनया क्रिययैवान्वयः। ऋषीणां जन्मानि च, कर्माणि च, तानि वेदस्य विकर्षणं विभागविधानं च ॥ २९ ॥ यज्ञस्येति। हे प्रभो प्रश्नोत्तरप्रदानसमर्थ यज्ञस्य क्रतोः वितानानि विस्तारांश्च, योगस्य अनभिसंहितकर्मयोगस्य पथो मार्गांश्च नैष्कर्म्यस्य प्रवृत्तिधर्मत्यागस्य सांख्यस्य ज्ञानयोगस्य पथश्च, भगवत्स्मृतं भगवता स्वयं श्रीमुखेनोक्तं तन्त्रं च, पञ्चरात्रसंज्ञसात्वततन्त्रमित्यर्थः ॥ ३० ॥ पाषण्डेति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाषण्डानां पन्था पाषण्डपथस्तस्य वैषम्यं पाषण्डमार्गोत्पत्तिविशेषम्, प्रतिलोमनिवेशनं ब्राह्मणादिकन्यानां क्षत्रियादिविवाहलक्षणम्, जीवस्य गुणकर्मजाः सत्त्वादित्रिगुणकर्मभ्यः संजाताः, यावतीर्यावत्संख्याकाः, याः गतयः फलानि, तावतीस्ताश्च ॥ ३१ ॥ धर्मेति । धर्मश्च, अर्थश्च, कामश्च, मोक्षश्च, तेषाम् अविरोधतः परस्पराविरोधेन निमित्तान्युपायान्, वार्त्तायाः कृष्यादिव्यापारस्य च दण्डोऽपकारिलोकशिक्षा तद्विषया या नीतिर्न्यायस्तस्याः । श्रुतस्य श्रुतिविहितसंध्योपासनादेश्च पृथक् प्रविभक्तं विधिम् ॥ ३२ ॥

श्राद्धस्येति । हे ब्रह्मन् मैत्रेय श्राद्धस्य च विधिं पितॄणामर्यमादीनां सर्गम् एव च, ग्रहाः सूर्यादयो नवापि खेचराश्च, नक्षत्राण्यश्विन्यादीनि सहाभिजिताष्टाविंशतिश्च, तारास्तदितरताराकाश्च, तेषाम् । कालावयवसंस्थिति कालावयवावच्छेदकतया कालचक्रे संस्थानम् ॥३३॥ दानस्येति । दानं गोहिरण्यादेः स्वस्वत्वनिवृत्तिपूर्वं परस्वत्वापादनम्, तस्य । तपसः कृच्छ्रचान्द्रायणादेः, वा अथेत्यर्थे । इष्टापूर्त्तयोः श्रौतस्मार्त्तकर्मणोश्च यत्फलं तदपि, प्रवासस्थस्य देशान्तरगतस्य अनुष्ठेयः यः धर्मः, उताथ च पुंसः आपदि विपदि यो धर्मोऽनुष्ठेयस्तं चापि ॥३४॥ येनेति हे अनघ धर्मयोनिर्धर्मप्रवर्त्तकः जनार्दनः अन्तरात्मतयात्मीयजनानामन्तःशत्रुदमनः भगवान् येन मार्गेण वा तुष्येत्, येषां यादृशानां वा संप्रसीदति । एतत्सर्वम् आख्याहि मह्यं कथय ॥ ३५ ॥ अपृष्टार्थप्रतिवचनौत्सुक्यमापादयन्नन्यदपि पृच्छति । अनुव्रतानामित्यादिना । हे द्विजोत्तम मैत्रेय अनुव्रतानामनुवृत्तिपूर्वं सेवमानानां शिष्याणां पुत्राणां च, गुरवः यतः दीनवत्सलाः दीनजनेषु वात्सल्यवन्तः अतः अनापृष्टं शिष्येणापृष्टमप्यर्थं ब्रूयुः । पुत्राणामित्यत्र दृष्टान्तार्थम्, यथा पुत्रेभ्यः अपृष्टमपि ब्रूयुस्तथा शिष्येभ्योऽपीत्यर्थः । मयाऽपृष्टोऽपि रहस्यार्थः कश्चिदस्ति चेत्सोऽपि वक्तव्य इति भावः ॥ ३६ ॥ तत्त्वानामिति । हे भगवन्मैत्रेय तेषां प्रसिद्धानां तत्त्वानां पृथिव्यादीनां प्रतिसंक्रमः प्रलयः कतिधा कतिप्रकारः । किं पृथिव्यादीनि सर्वाणि संहृत्य स्वपरमकारणे लीयन्ते, उतोत्तरेषां पूर्वस्मिन्प्रलयः उतोभयविधोऽपि, इत्यादिसंशयानां प्रवृत्तेः कतिधेत्युक्तिः । तत्र प्रलये इममेनं परमात्मानमिति यावत् । के उपासीरन् तदानीमनुपसंहृताः के वा मुक्तास्तं सेवन्ते इत्यर्थः । के उ स्वित् के वा नु जनाः अनुशेरते उपसह्रियन्ते इत्यर्थः ॥ ३७ ॥ पुरुषस्येति । पुरुषस्य जीवस्य च संस्थानं स्वकीयासाधारणस्वरूपम्, किं च परस्य परमात्मनः वा स्वरूपं च नैगमं शास्त्रजन्यं गुरुशिष्यप्रयोजनं गुरुशिष्यसंमेलनसंसाध्यमित्यर्थः । यत् ज्ञानं तच्च ॥ २८ ॥ निमित्तानीति । हे अनघ मैत्रेय इह सूरिभिर्ज्ञानवद्भिर्बुधैः तस्य ज्ञानस्य यानि निमित्तानि साधनानि प्रोक्तानि तानि च ब्रूहीत्यर्थः । गुरूपदेशमन्तरेण सर्वमेतन्न संपत्स्यते इत्याह । स्वतो गुरूपदेशमन्तरा पुंसां ज्ञानम्, भक्तिः, वैराग्यम्, च कुतः एव भूयान्नैवेत्यर्थः । एवावधारणे । ततो ज्ञानभक्तिवैराग्यादेर्गुरूपदेशमन्तरेणासिद्धेः प्रश्नः इति भावः ॥ ३९ ॥

एतानिति । हरेः कर्मविवित्सया भगवद्विचेष्टितबुभुत्सया एतान् प्रश्नान् प्रश्नविषयानर्थान् पृच्छतः अजया प्रकृत्या नष्टचक्षुषः हृतज्ञानस्य अत एव अज्ञस्य अन्धस्येति श्लेषः । मे मम मित्रत्वात्सुहृत्त्वात् सूर्यत्वादिति श्लेषः । मे मह्यं ब्रूहि । अन्धकारेण नष्टचक्षुःशक्तेः पुंसो यथा मित्रः सूर्यः प्रयोजकस्तथा नो मित्रस्त्वमिति भावः । म इत्यस्यार्थभेदान्न पौनरुक्त्यम् ॥ ४० ॥ भवभयभीतस्य तत्त्वोपदेशेनाभयप्रदानादन्य उत्तमो धर्मो नास्तीत्याह । सर्वे इति । हे अनघ मैत्रेय सर्वे चत्वारोऽपि वेदाश्च, वेदशब्देन तदध्ययनाध्यापनार्थज्ञानानि विवक्षितानि । किं च । यज्ञाः वेदार्थानुष्ठानरूपपञ्चमहायज्ञादयो मखाः, तपः विहितभोगसंकोचः, कृच्छ्रचान्द्रायणाद्याचरणं वा । ज्ञानानि नानाऽमरोपासनात्मकानि च । दानानीति पाठे गोभूस्वर्णादीनां विप्रेभ्यो विश्राणनानि । एतानि सर्वाणि जीवाभयप्रदानस्य संसारनिवृत्त्युपायभूतात्मपरमात्मतत्त्वोपदेशविधानरूपजीवाभयप्रदानधर्मस्य कलां मात्रामपि न कुर्वीरन् अभयदानफललेशमपि नैते संपादयितुमर्हन्तीत्यर्थः ॥ ४१ ॥ विदुरकृतप्रश्नोपसंहृतिमाचरंस्तेषामुत्तरप्रदानारम्भं मैत्रेयः करोतीत्याह श्रीशुकः । स इति । इत्थं पूर्वोक्तप्रकारेण आसमंतात्पृष्टः पुराणकल्पः यस्य सः । कल्पते इति कल्पः पुराणरहस्यार्थो मन्त्रकल्पवद्रहस्यार्थप्रकाशकतया कल्प इत्युक्तम् । यद्वा पुराणे कल्पते प्रकाशते इति पुराणकल्पो बुभुत्सितोऽर्थः आपृष्टः पुराणकल्पोऽयं सः । मुनिप्रधानः मुनिश्रेष्ठः सः मैत्रेयः कुरुप्रधानेन विदुरेण भगवत्कथायां संचोदितः संप्रवर्त्तितः अत एव प्रवृद्धहर्षः सन् प्रहसन्निव प्रश्नानां सुन्दरत्वात्सुखेनोत्तरयितुं शक्यत्वाच्च प्रहसन्निवेत्युक्तम् । तं विदुरम् आह प्रत्युवाचेत्यर्थः । अत्र तावदिदं ज्ञेयं राजप्रश्नानां विदुरप्रश्नानां चैकरूपता प्रतीयते, उभयत्रोभयेषां प्रत्यभिज्ञानात् । अत्रैषां मध्ये केषांचित्प्रश्नानां मैत्रेयोक्तान्येवोत्तराणि तृतीयतुरीयाभ्यामाह शुकः, अन्येषां तु स्वयमेतदाख्यानप्रवर्त्तनेनोपरितनैः स्कन्धैराचचक्षे । मैत्रेयस्य कार्त्स्न्येन प्रश्नानामुत्तरानभिधानं तु विदुरस्य महात्मनो भगवद्धर्मप्रवर्त्तकस्योत्तरितप्रश्नैरेव बुभुत्सायाः शान्तत्वादुपपद्यत इति ॥ ४२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचित/-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

——:※:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथाऽष्टमोऽध्यायः

मैत्रेय उवाच

सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ।
बभूविथेहाजितकीर्त्तिमालां पदे पदे नूतनयस्यभीक्ष्णम् ॥ १ ॥

ब्रह्माभूदष्टमे नाभेरित्युक्तं जलशायिनः । जले विम्यदजानंस्तं तपसेशमतोषयत् ॥ १ ॥

तत्र मैत्रेयो भगवत्कथाकथने स्वं प्रवर्त्तयितारं श्रोतारं क्षत्तारं समभिनन्दति । सत्सेवनीय इति । बतेत्यामन्त्रणे हे विदुर यद्यस्मात् भगवानेव प्रधानं यस्य सः । यस्य प्राप्यतयोपायतया च प्रधानभूतो भगवानेव तथाभूत इत्यर्थः । लोकपालः धर्मराजांशभूतत्वाद्विदुरोऽत्र लोकपाल इत्यभिहितः । त्वम् इह पुरुवंशे बभूविथोत्पन्नः अभूः । यस्त्वम् अजितः परमपुरुषः तस्य कीर्त्तयो यशांसि तासां माला पङ्क्तिः तां पदे पदे पुनः पुनः अभीक्ष्णं भृशं नूतनयसि नवां नवां करोषि । अतः पूरुवंशः पूरोर्नृपस्यान्ववायः सत्सेवनीयः सतां सेवितुं योग्यः ॥ १ ॥ एवं मैत्रेयो विदुरकृतप्रश्नमभिनन्द्य हे विदुर त्वत्कृतप्रश्नान् न केवलमस्मद्बुद्धिगोचरैर्वचोभिरुत्तरयामि, किं तु सत्संप्रदायागतश्रीभागवताख्यानेनेत्याह । सोऽहमिति । सः भवता पृष्टः अहं सदाचार्यश्रीपराशरपरमकृपया परावरतत्त्वदर्शी अहमित्यर्थः । यद्भागवतं पुराणं भगवानपरिमितैश्वर्ययुक्तसंकर्षणः ऋषिभ्यः सनकादिभ्यः साक्षाच्छ्रीमुखेनेत्यर्थः । आह तथाभूतं भागवतं पुराणं, क्षुल्लमल्पं च तत् सुखं च तस्मै अतितुच्छसुखसंपादनार्थमित्यर्थः । महदतिशयितं दुःखं क्लेशं गतानां प्राप्तानां नृणाम्, दुःखे सुखमानिलोकानां संबन्धिन इत्यर्थः । तस्य महतो दुःखस्य विरामाय नाशाय प्रवर्त्तये । अनेन लोकानामुज्जिजीविषयैवायं संवादः संप्रवृत्त इति गम्यते । यत उभयोरपि बहुज्ञत्वेन पृष्टव्यवक्तव्यान्तराभावात् ॥ २ ॥ श्रीमद्भागवतसंप्रदायस्य प्रवृत्तेर्भगवतः संकर्षणाच्चेत्येवं द्वेधा भिन्नत्वमस्ति तत्र भगवद्द्वारा तत्प्रवृत्तिर्द्वितीयेऽभिहिता । सांप्रतं त्वत्र संकर्षणतस्तत्प्रवृत्तिमभिधास्यमानः सनकादीनां विधिवत्संकर्षणोपसत्तिमाह चतुर्भिः । आसीनमिति । उर्व्यां पातालतले आसीनमुपविष्टम्, भगवन्तमैश्वर्यैकनिलयम्, आद्यं सर्वेष्वीश्वरत्वेनादिभूतम्, अकुण्ठं रजस्तमोभ्यामप्रतिहतं सत्त्वं यस्य तं शुद्धसत्त्वमयम्, दिव्यमङ्गलविग्रहविशिष्टमित्यर्थः । संकर्षणम् अतः चेतनाचेतनात्मकजगतः परस्य विलक्षणस्य परमात्मनः तत्त्वं याथात्म्यं विवित्सवः वेत्तुमिच्छवः कुमारमुख्याः सनत्कुमारप्रभृतयश्चत्वारोऽपि मुनयः अन्वपृच्छन् विधिवदुपसत्त्याऽनुपृष्टवन्त इत्यर्थः ॥ ३ ॥

तं संकर्षणमेव विशिनष्टि । यं वासुदेवाभिधं वासुदेवशब्दवाच्यम आमनन्ति कथयन्ति, तं स्वं स्वकीयं धिष्ण्यं ध्यानेन स्वावासभूतं स्वकारणभूतं वा भगवन्तम् एव बहु यथा तथा मानयन्तं सर्वोत्कर्षेण पूजयन्तम्, प्रत्यगात्मन्याभिमुख्येन निमित्तेन धृतं मुकुलितं यदक्षाम्बुजकोशं नेत्राम्बुजकुड्मलं तत् विबुधोदयाय सनकादीनामभ्युदयार्थम् ईषदल्पम् उन्मीलयन्तम् अन्वपृच्छन्निति पूर्वेणान्वयः ॥ ४ ॥ मुनीन्विशिनष्टि सार्द्धेन । स्वर्धुनीति । स्वर्धुन्या गङ्गाया उदुदकं तेनार्द्रास्तैः स्वजटाकलापैः, स्वकीयार्द्रजटाभूषणैः, श्रीमतो भगवतोऽतिशयितश्रोतृजनहितकारिण्याः श्रीभागवतकथायाः श्रवणार्थं सत्यलोकात्पातालं प्रत्यवतरन्तो निरन्तरं गङ्गामध्ये प्रविश्य तत्पतनशैघ्र्यतः शीघ्रमवतीर्णा इति तत्स्नानजातार्द्रजटाकलापा इति भावः । यत् पद्मं सप्रेम प्रेमसहितं यथा भवत्येवम् अहिराजकन्याः सर्पराजसुताः, वरार्थाः तत्पतिप्राप्तिकामाः सत्यः, नानाबलिभिः नानाविधोपहारैः अर्चन्ति पूजयन्ति, तथाभूतं चरणावुपधीयेतेऽस्मिन्निति चरणोपधानं पादपीठभूतं पद्ममित्यर्थः । उपस्पृशन्तो नमस्कुर्वन्तः ॥५॥ मुहुरिति । अस्य भगवतः कृतानि, कर्माणि, यतः तानि जानन्तीति तज्ज्ञाः तद्विचेष्टिताभिज्ञाः, ततः अनुरागेण प्रेमातिशयेन स्खलन्ति गलन्ति पदानि यस्मिंस्तेन वचसा मुहुः पुनः पुनः गृणन्तो गायन्तः मुनयः किरीटानां साहस्रं तस्मिन् ये मणिप्रवेकाः प्रत्युप्तमण्युत्तमाः तैः प्रद्योतितमुद्दामफणानामुदारफणानां सहस्रं यस्य तं संकर्षणमन्वपृच्छन्निति पूर्वेणान्वयः ॥६॥ एवं विधिवदाचार्योपसत्तिमभिधायोपसन्नेभ्यस्तेभ्यः श्रीभागवतमुपदिदेशेति वदंस्तदर्वाचीनतदाचार्यपरंपरामाह । प्रोक्तमिति । अङ्ग हे विदुर भगवत्तमेन भगवच्छब्दवाच्यैश्वर्यातिशयवता तेन संकर्षणेन एतद्भागवतं निवृत्तिधर्माभिरताय मोक्षधर्मेष्वत्यासक्ताय सनत्कुमाराय प्रोक्तं किल । सनत्कुमारायेत्येकत्वं संघाताभिप्रायकम् । स सनत्कुमारश्चापि पृष्टो विधिवदुपसत्तिपूर्वं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संपृष्टः सन् सांख्यायनेनेति शेषः। धृतानि व्रतानि शिष्यधर्मा येन तस्मै सांख्यायनाय आह ॥ ७ ॥ सांख्यायन इति पारमहंस्ये भागवतपरमहंसानां प्रीतिजनके एकान्तिकधर्मे मुख्यः प्रधानः पारहंस्यमुख्यः सः सांख्यायनः भगवद्विभूतीः विवक्षमाणः वक्तुमिच्छुः सन् ब्रुव आदेशभूतस्य वचेरुभयपदित्वाद्विवक्षमाण इत्यात्मनेपदम् अन्विताय अनुगताय अनुवर्त्तमानायेति यावत्। अस्मद्गुरवे मम गुरुभूताय बृहस्पतेश्चापि गुरुभूताय पराशराय शक्तिसूनवे अथ कार्त्स्न्येन जगाद संप्रोक्तवान् ॥ ८ ॥

प्रोवाचेति। दयालुः सः पराशरः मुनिः पुलस्त्येन उक्तः। हे पराशर त्वं परदेवतापरमार्थज्ञानवान्, पुराणवक्ता, च भवेति दत्तवरः सन् आद्यं सर्वमुख्यतयाग्रण्यं पुराणं श्रीभागवतं मह्यं मैत्रेयाय प्रोवाच। सः पराशरोपदिष्टश्रीभागवतपुराणः अहं हे वत्स विदुर श्रद्धालवे भगवत्कथाश्रवणश्रद्धावते नित्यम् अनुव्रताय तव तुभ्यम् एतद्भागवतपुराणं कथयामि। नित्यमिति पूर्वपरान्वयि। तवेति विभक्तिव्यत्यय आर्षः। पुलस्त्येनोक्त इत्यत्राख्यायिकैवमस्ति, पराशरः स्वपितामहस्य वसिष्ठस्यान्तिके यदाऽनुपविष्टस्तदा केनचित्पृष्टस्ते कः पितेति तदाकर्ण्य स तं प्रति मत्पिता वसिष्ठ इत्युवाच, तदाकर्ण्य स पृच्छक उवाच त्वत्पिता तु शक्तिरयं तु त्वत्पितामह इत्युक्त्वा गतस्ततः पराशरेण वसिष्ठाय प्रोक्तम्, सांप्रतमेको मुनिरागत्यैतो गतस्तेनोक्तं त्वत्पिता तु शक्तिरयं तु त्वत्पितामह इति तत्किम्, सत्यमहं तु त्वामेव पितरं जानामि इत्येवं पराशरवाक्यं श्रुत्वा साश्रुर्वसिष्ठ आह। पुत्र त्वत्पितरं राक्षसो भक्षितवांस्ततो मया त्वं संपाल्य वर्द्धितोऽसीत्येवं पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्त्रे प्रवृत्तस्ततस्तं प्रति वसिष्ठेनोक्तं मद्भ्राता पुलस्त्योऽस्ति तद्वंशोच्छेदस्त्वया न कार्य इति वसिष्ठवचनान्निवृत्तस्ततः स्वसंततिरक्षणातुष्टेन पुलस्त्येन पराशराय वरो दत्तः। वत्स भवान् पुराणसंहिताकर्त्ता भविष्यति। परदेवतापारमार्थ्यं च यथावद्वेत्स्यते इति ॥ ६ ॥ एवं संकर्षणाच्छ्रीमद्भागवतसंप्रदायप्रवृत्तिं प्रदर्श्य प्रस्तुतप्रश्नोत्तराणि विवक्षुः पूर्वोक्तमेव महदादिपृथिव्यन्ततत्त्वसृष्टिमुपजीव्य ब्रह्माण्डरूपपद्मोत्पत्तिं वक्ष्यंस्तदन्तरा जगद्व्यापाराधिकृतसमष्ट्यात्मकभगवदवस्थितिप्रकारमाह। उदेति द्वाभ्याम्। यद्यदा अहीन्द्रतल्पे शेषशय्यायाम् अधिशयानः विहितशयनः एकोऽसहायः, कृतक्षणस्तत्कालिकजगद्व्यापारादुपरतत्वेन लब्धयोगनिद्रावसरः, स्वात्मरतौ स्वात्मानुभवसुखे अहीनः पूर्णः अमीलितदृगलुप्तस्वस्वरूपज्ञानः, अनीह इति यदा पाठस्तदा स्वात्मरतौ कृतक्षणोऽनीहो निष्क्रिय इत्यन्वयः। एवंभूतः सन् निद्रया स्वात्मानुभवरूपयोगनिद्रया न्यमीलयत्। लोचने इति शेषः। तदा इदं विश्वं चेतनाचेतनात्मकं जगदित्यर्थः। उदैकार्णवोदकेन आप्लुतं व्याप्तम् आसीत् ॥ १० ॥

पुनस्तमेव विशिनष्टि। स इति। अन्तःशरीरे शरीरस्यान्तः, अर्पितानि निहितानि भूतसूक्ष्माणि येन सः। स्वोदरीकृतलोकयात्र इत्यर्थः। कालात्मिकां कालस्वरूपां शक्तिं स्वापृथक्सिद्धविशेषणभूतं कालमित्यर्थः। उदीरयाणः प्रेरयन् सः भगवान् स्वे स्वकीये पदे स्थानरूपे तस्मिन्पूर्वोक्ते सलिले जले 'विष्णोरायतनं ह्यापः' इति स्मृतेः। उवासोषितवान्। बहिर्व्यापाराभावे दृष्टान्तः। दारुणि काष्ठे अनलोऽग्निः रुद्धवीर्यः निरुद्धप्रकाशकत्वपिङ्गलरूपत्वदाहकत्वादिसामर्थ्यः सन् यथा अवतिष्ठते तथोवासेति। अग्निरिव सोऽपि स्वेच्छयैवानाविष्कृतस्रष्टृत्वादिसामर्थ्य आस्ते इत्यर्थः ॥ ११ ॥ एवमन्तरावस्थितिमभिधाय तस्य ब्रह्माण्डसृष्टयौन्मुख्यमाह। चतुरिति। चतुर्युगानां कृतादीनां चतुर्णां युगानां सहस्रं सहस्रशब्दोऽनन्ततावाची, तेन बहुकालपर्यन्तमित्यर्थः। अप्सु एकार्णवोदके स्वपन् अथापि उदीरितया पूर्वमेव बोधनार्थं नियुक्तया स्वया स्वापृथक्सिद्धविशेषणभूतया कालाख्यया कालसंज्ञया। स्वशक्त्या चैव आसादितं प्रापितं कर्मतन्त्रं क्रियाकलापो यस्य सः एवंभूतः सन् निपीतान्स्वात्मन्यर्पितान् अपीतानिति पाठे लीनान् लोकान् स्वदेहे ददर्श। लोककारणभूतान् भूतसूक्ष्मरूपानर्थान् दृष्टवानित्यर्थः ॥ १२ ॥ अथ पद्मकोशात्मकब्रह्माण्डोत्पत्तिप्रकारमाह द्वाभ्याम्। तस्येति। अर्थसूक्ष्मे भूतसूक्ष्मेऽभिनिविष्टा दृष्टिर्यस्य तस्य भगवतः अन्तर्गतः तनीयान् सूक्ष्मतरः अर्थः भूतसूक्ष्मवर्गः कालानुगतेन कालवशादुन्मेषणं प्राप्तेन रजसा गुणेन रजोगुणेनेत्यर्थः। विद्धः संक्षोभितः अत एव सूय्यन् प्रसूय्यन् उद्भविष्यन्सन्निति यावत्। तदा नाभिदेशात् अभिद्यत उदभूदित्यर्थः। उद्भूतरजसा भूतसूक्ष्मजातं जगदात्मकपद्मरूपेण परिणतमित्यर्थः ॥ १३ ॥ स कथंभूतो निरभिद्यत इत्यत्राह। स इति। आत्मा भगवान् योनिः कारणं यस्य सः परमात्मसृष्ट इत्यर्थः। सः पद्मकोशः स्वरोचिषा स्वकीयकान्त्या विशालमतिशयितं तत् सलिलं एकार्णवजलमित्यर्थः। अर्कः सूर्यः इव विद्योतयन् सन् कर्माणि जीवानामदृष्टानि प्रतिबोध्यन्तेऽनेनेति कर्मप्रतिबोधितस्तेन कालेन सहसानुक्रमेणेत्यर्थः। उदतिष्ठत्। यथा स्वस्मिंश्चतुर्दशभुवनरचना स्यात्तथा प्रवृद्धोऽभूदित्यर्थः ॥ १४ ॥ अथ भगवन्नाभिदेशोत्पन्नब्रह्माण्डरूपपद्मकोशे ब्रह्मोत्पत्तिं समुत्पन्नस्य तस्य व्यापारं च वक्ष्यंस्तस्य तदधिष्ठितपद्मस्य च भगवदात्मकत्वमाह। तदिति। उ इति विस्मये। सर्वे च ते गुणाश्च सर्वगुणाः जीवोपभोग्यार्थास्तानवभासयतीति तथाभूतं तत्पूर्वोक्तं लोकपद्मं सः एव यस्मात्पद्मं जातं स एव विष्णुर्भगवान् प्राविविशत्। अन्तर्यामितया प्रविष्टोऽभूत्। निवृत्तप्रेरणाद्विशेर्णिच्। यं स्वयंभुवं वदन्ति स्म। वेदमयो वेदप्रचुरः सः स्वयं विधाता स्रष्टा तस्मिन् पद्मे अभूदुत्पन्नः समभवत् ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्य ब्रह्मणोऽपि भगवदुपासनयैव प्रादुर्भूतज्ञानक्रियाशक्तेर्लोककर्तृकत्वम्, न स्वत इति वक्तुं तस्य प्रथमं मोहनमाह। तस्यामिति द्वाभ्याम्। स च स स्वयंभूरपि तस्याम् अम्भोरुहकर्णिकायां कमलमध्यप्रदेशे अवस्थितस्तिष्ठन् लोकं प्रपञ्चम् अपश्यमानः तद्दर्शनार्थमिति शेषः। व्योम्न्याकाशे विवृत्ते विस्फारिते नेत्रे येन सः। परिक्रमन् कमलमध्ये चतुर्दिक्षु परिभ्रमन् सन् अनुदिशं चत्वारि मुखानि लेभे प्राप्तवान्॥ १६॥ तस्मादिति। युगान्ते प्रलयान्ते यः श्वसनः पवनस्तेनावघूर्णं भ्रमत् जलोर्मीणां चक्रं यस्य तस्मात्। तस्मात् सलिलात् विरूढं संभूतं कञ्जं पद्मम् उपाश्रितः अधिष्ठितः आदिदेवो ब्रह्मा लोकतत्त्वं लोकात्मकपद्मतत्त्वम् आत्मानं स्वं च अद्धा तत्त्वेन न अविदत् उ इति विस्मये॥ १७॥ अवेदनं प्रपञ्चयति। क इति। अब्जपृष्ठे कमलकर्णिकायां स्थितः यः असौ अहम् एषः कः, अनन्यदद्वितीयम् एतत् अब्जं पद्मम् अप्सु कुतो वा कस्मात्सकाशात् केन हेतुना वा जातम्, यत्र अधिष्ठाने एतत्पद्मम् अधिष्ठितं तदधिष्ठानभूतं किंचन वस्तु इह अधस्तात् अस्ति। हि यस्मात् सता एव अनुभाव्यं विद्यमानाधिष्ठानेनैवाधिष्ठेयेन भवितव्यम्। अधिष्ठानाभावेऽधिष्ठेयस्य पद्मस्यैवासंभवादित्यर्थः॥ १८॥ स इति। स ब्रह्मा इत्थमुक्तप्रकारेण उद्वीक्ष्य तदब्जस्य तस्य पद्मस्य यन्नालं तस्य नाड्योऽन्तश्छिद्राणि ताभिः अन्तर्जलं जलस्यान्तः आविवेश प्रविष्टवान्। तत्तदा अजः ब्रह्मा खरं कठिनं नालं यस्य तच्च तत्पद्मं च तस्य नाभिमधिष्ठानं विचिन्वन् गवेषयन् अर्वाक् अधःप्रदेशं गतः सन्नपि तदधिष्ठानं न अविन्दत न लेभे॥ १९॥ तमसीति। हे विदुर अपारे तमसि नालान्तर्वर्तिगाढान्धकारे आत्मसर्गं स्वकारणं विचिन्वतः ब्रह्मणः सुमहान् दीर्घः त्रिणेमिः न्यूनाधिकसमदिवसरूपनेमित्रयात्मकालः अभूत्। यः अजस्य भगवतः हेतिः कालचक्रं सुदर्शनरूप इत्यर्थः। यश्च देहभाजां देहमेवात्मतया विजानतां भयं भीतिम् ईरयाणः प्रेरयन्सन् आयुः परिक्षिणोति प्राणिनामिति शेषः। 'नृणां भयमीरयाण' इत्यनेन संवत्सरशतमतिक्रान्तमित्युक्तं भवति 'शतायुर्वै पुरुषः' इति श्रुतेः॥ २०॥

एवं लोकपद्माधिष्ठानभूतः परमेश्वरो नान्वेषणादवगतः, किं तूपासनयैवेत्याह। तत इति द्वाभ्याम्। देवः स ब्रह्मा, न प्रतिलब्धः कामोऽधिष्ठानदर्शनरूपो मनोरथो येन सः, अत एव ततोऽन्वेषणात् निवृत्तः प्रतिनिवृत्तः सन् पुनः स्वधिष्ण्यं कमलकर्णिकारूपस्वस्थानम् आसाद्य संप्राप्य, शनैः जिताः वशीकृताः श्वासाः प्राणा येन सः, निवृत्तं विषयविमुखं चित्तं यस्य सः, स चासौ स च। अत एव आरूढ आश्रितः समाधियोगो येन स तथाभूतः सन् न्यषीदत् उपविवेश॥ २१॥ कालेनेति। पुरुषायुषा संवत्सरशतेन कालेन अभिप्रवृत्तः सुनिष्पन्नः यः योगस्तेन, विरूढ उत्पन्नो बोधो यस्य सः। सः अजः पूर्वं समाधिविधानात्प्राक् यत् विचिन्वन् सन्नपि न अपश्यत नापश्यत्। तत् स्वम् एव अन्तर्हृदये स्वान्तर्हृदि अवभातम् अपश्यत अपश्यत्॥ २२॥ यदपश्यत्तदाह। मृणालेत्यादिभिर्नवभिः श्लोकैः। नवस्वप्यपश्यदित्यस्यैवानुषङ्गः। फणा एवातपत्राणि तैरायुताः सर्वतो युक्ताः ये मूर्द्धानस्तेषां रत्नानि किरीटस्थानि तेषां द्युभिः प्रभाभिः हतं निरस्तं ध्वान्तमन्धकारं यस्मिंस्तच्च तद्युगान्ततोयं च तस्मिन्। द्युभिरित्यत्र समासान्तर्गतो विभक्त्यलुग्बोध्यः। स्थितो मृणालवत्पद्मतन्तुवद्गौरः श्वेत आयतश्च यः शेषस्तस्य भोगो देहः स एव पर्यङ्कस्तस्मिन् शयानम् एकं पुरुषम् अपश्यत्॥ २३॥ यं पुरुषमपश्यत्तं विशिनष्टि। प्रेक्षामिति। संध्याभ्रं नीविः परिधानवस्त्रमिव यस्य तस्य, उरूणि बहूनि रुक्माणि सुवर्णानि मूर्ध्नि शृङ्गे यस्य सः। यद्वा। रुक्मं सुवर्णं प्रचुरतया विद्यते येषु इति रुक्माः उरवो बहवः रुक्माः स्वर्णमयाः मूर्द्धानः शृङ्गाणि यस्य तस्य, रत्नानि पद्मरागादीनि च, उदधाराः प्रस्रवणोदकधाराश्च, औषधयस्तृणज्योतींषि च, सौमनस्यानि पुष्पसमूहाश्च, वनस्रजो वनमालाश्च, रत्नादीनि विद्यन्तेऽस्य तस्य। समासान्ताभाव आर्षः। वेणवः भुजा इव यस्य, अङ्घ्रिपाः पादपा अङ्घ्रय इव यस्य, स चासौ स च तस्य। हरितोपलाद्रेर्मरकतपर्वतस्य प्रेक्षां शोभां क्षिपन्तं स्वलावण्यातिशयेन तिरस्कुर्वन्तम्। संध्याशोभां पीताम्बरेण, भूयिष्ठकनकशृङ्गशोभां स्वर्णकिरीटैः, रत्नशोभां किरीटगतरत्नैः, उदधाराशोभां मौक्तिकहारसरैः, तृणज्योतिराख्यौषधिशोभां हारगतपीतरत्नप्रभाभिः, विचित्रसौमनस्य शोभां नीलरक्तश्वेतादिमणिमयहारप्रभाभिः, वनस्रक्शोभां वनमालया, वेणुशोभां भुजैः, अङ्घ्रिपशोभां पादैराक्षिपन्तमित्यर्थः। एवं हरिर्हि नीलद्युतिदेहः, पीताम्बरधरः, सौवर्णनिचितरत्नकिरीटालंकृतमूर्द्धा, कौस्तुभरत्नकन्धरः, नैकविधरत्नमौक्तिकमालाधरः, वनजतुलसीमञ्जरीमालाचितः, दीर्घदोर्दण्डमण्डितः, प्रणतार्त्तिहारी, सर्वसुखकरपादपद्म, इति सूचित इति बुद्ध्यते॥ २४॥

आयामत इति। किं च विचित्राण्यद्भुतानि दिव्यान्यमानुषाणि यान्याभरणान्यंशुकानि च तेषाम्, कृता संपादिता श्रीः शोभा येन तेन, लोकत्रयं संगृह्यतेऽनेनास्मिन्वेति लोकत्रयसंग्रहस्तेन, आयामतो दैर्घ्येण विस्तरतो विस्तारेण च, स्वमानदेहेन स्वानुरूपप्रमाणवता देहेन विशिष्टम्, अत एव स्वतोऽतिरम्यत्वेऽपि अपाश्रितवेषः स्वीकृतालंकारो देहो यस्य तम्॥ २५॥ पुंसामिति। स्वकामाय स्वाभिलषितफलाय विविक्तमार्गैः शुद्धत्वादसंकीर्णैर्वर्णाश्रमादिधर्मैः अभ्यर्चतामाराधयतां पुंसाम्, कामान् समीहितफलानि दोग्धीति कामदुघं च तदङ्घ्रिपद्मं च तत्, नखा एव इन्दवस्तेषां मयूखाः किरणास्तैः भिन्ना इतरेतरविलक्षणा या अङ्गुलयस्ता एव चारूणि सुन्दराणि पत्राणि यस्य तत्तथाभूतम्। कृपया परमकरुणया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रदर्शयन्तम् ॥ २६ ॥ मुखेनेति। लोकानामुपासकानामार्त्तिहरं दुःखनिवर्त्तकं स्मितं मन्दहासो यस्मिंस्तेन, परिस्फुरद्भ्यां चञ्चद्भ्यां कुण्डलाभ्यां मण्डितं शोभनं तेन, अधर एव बिम्बं सुपक्वबिम्बीफलं तस्य भासया, शोणायितेन शोणवदाचरता, सुनसेन शोभमाननासिकायुक्तेन, सुभ्रुवा शोभमानभ्रूयुगलवता च मुखेन मुखपद्मेन प्रत्यर्हयन्तम् उपासकान् संमानयन्तमित्यर्थः ॥ २७ ॥ कदम्बेति। किं च हे वत्स विदुर कदम्बकिंजल्कवत् कदम्बकुसुमपरागवत् पिशङ्गः पीतो वर्णो यस्य तच्च तद्वासो वस्त्रं तेन, मेखलया निचितरत्नया काञ्च्या च, नितम्बे स्वलंकृतम्, अनन्तं बहुधनं मूल्यं यस्य तेन अनर्घ्येणेत्यर्थः। श्रीवत्सो दक्षिणावर्त्तो रोम्णां भ्रमविशेषस्तेन युक्तं यद्वक्षःस्थलं तस्य वल्लभोऽतिप्रियस्तेन हारेण वक्षसि स्वलंकृतं च ॥ २८ ॥ पुनश्चन्दनवृक्षरूपेण निरूपयितुं विशिनष्टि। परार्ध्येति। परार्ध्येषु श्रेष्ठेषु केयूरेष्वंगदेषु ये मणिप्रवेका मण्युत्तमाः तैः पर्यस्ता व्याप्ता दोर्दण्डा एव सहस्रमनन्ताः शाखा यस्य तम्, चन्दनवृक्षोऽपि केयूरादितुल्यैः फलपुष्पादिभिर्व्याप्तशाखो भवति। अव्यक्तं ब्रह्म मूलं यस्य तम्, ब्रह्माभिव्यक्तिरूपत्वात् वृक्षस्यापि मूलमव्यक्तम्। अहीन्द्रस्यानन्तस्य भोगैः फणैर्देहावयवैर्वा अधिवीताः संवेष्टिता वल्शाः स्कन्धा यस्य तत्। वृक्षोऽपि सर्पैर्वेष्टितो भवति। भुवनाङ्घ्रिपेन्द्रं भुवनकारणात्मकवृक्षश्रेष्ठम् ॥ २९ ॥

प्रेक्षां क्षिपन्तमित्यत्रैव पर्वतरूपेण निरूपितमपि विशेषणान्तरैः पुनर्निरूपयति। चराचरौक इति। चराचराणामोकः स्थानम्, पर्वतोऽपि चराचरौको भवति। अहीन्द्रस्य शेषस्य बन्धुस्तम्। पर्वतोऽप्यहीन्द्राणां बन्धुः। सलिलेन जलेनोपगूढ आवृतस्तम्। मैनाकादिः पर्वतोऽपि सलिलोपगूढः। किरीटानां साहस्रमेव हिरण्यशृङ्गाणि यस्य तम्। मेर्वादिः पर्वतोऽपि हिरण्यशृङ्गः। आविर्भवत्स्पष्टं दृश्यमानं कौस्तुभरत्नं गर्भे मूर्त्तिमध्ये यस्य तम्। पर्वतस्यापि गर्भे क्वचिद्रत्नमाविर्भवति एवंभूतम्। भगवानेव महीध्रः पर्वतस्तम् ॥ ३० ॥ निवीतमिति। आम्नाया वेदास्त एव मधुव्रता भ्रमरास्तैः श्रीः शोभा यस्यास्तया, स्वकीर्त्तिमय्या स्वकीर्त्तिप्रचुरया, स्वकीर्त्तिं गायद्भिर्वेदरूपैर्भ्रमरैराहितशोभयेत्यर्थः। इत्थंभूतया वनमालया निवीतं कण्ठलम्बिन्या मालया व्याप्तमित्यर्थः। हरिं प्रेक्षकचित्तहारिणम्, सूर्यः प्रभाकरश्च, इन्दुर्ज्योत्स्नाकरश्च, वायुःस्पर्शसुखकरश्च अग्निश्चित्रमयूखधरश्च, तैरगमस्तं सूर्यादिभिः स्वव्यापारैराकलयितुमशक्यमित्यर्थः। त्रिषु लोकेषु धाम स्फूर्त्तिर्येषां तैः स्वीयरक्षणार्थं त्रिभुवने स्फुरद्भिः। परिक्रमन्ति च तानि प्राधनिकानि संग्रामसंसाधनप्रयोजनानि सुदर्शनाद्यायुधानि तैः, दुरासदं दुष्प्रापम् ॥ ३१ ॥ तर्हीति। यदैव हरिमपश्यत् तर्ह्येव तदैवेत्यर्थः। लोकानां विसर्गः सर्जनं तत्र दृष्टिर्ज्ञानं यस्य सः। लोकसृष्ट्यर्थकज्ञानवानित्यर्थः। जगतः विधाता स्रष्टा देवो ब्रह्मा, तस्य भगवतः नाभिसरसि यत्सरोजं पद्मं तत्, श्वसनं प्रलयकालीनं वायुम्, अम्भः सलिलम्, आत्मानं स्वात्मानं वियदाकाशं च ददर्श। अतः सरोजादिभ्यः परमन्यत् न। सृष्टिप्रकारादिकं न ददर्शेत्यर्थः ॥ ३२ ॥ अथालब्धजगत्सृष्टिज्ञानस्तल्लब्धये भगवन्तं तुष्टावेत्याह। स इति। स ब्रह्मा रजसा रजोगुणेन उपरक्तो युक्तः, अतः प्रजाः सिसृक्षन् स्रष्टुमिच्छन्नपि, इयदेव नाभिसरोजादिपञ्चकमेव कार्यबीजं लोकसृष्टेः कारणं दृष्ट्वा विसर्गाभिमुखः यतो लोकसर्जनप्रवणस्तत एवेत्यर्थः। अव्यक्तवर्त्मन्यनभिव्यक्तगतौ भगवति अभिनिवेशितः आत्मा चित्तं यस्य स एवंभूतः सन्, तम् ईड्यं स्तुत्यं भगवन्तम् अस्तौत् तुष्टाव। कर्मबीजमिति ईड्यभगवद्विशेषणं वा ॥ ३३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिताया-मन्वयार्थाविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥

—:*:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ नवमोऽध्यायः

ब्रह्मोवाच

ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यम् ।
नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि ॥ १ ॥

तुष्टं स्वतपसा दृष्ट्वा नवमेऽजो हरिं मुदा । सीदन्नेकार्णवेऽस्तौषील्लोकसर्गविधित्सया ॥ १ ॥

अथात्र भवान्ब्रह्मा कृत्स्नस्य चिदचिदात्मकप्रपञ्चस्य स्थितिं भगवच्छरीरत्वेन विबुध्यमानस्य स्वस्य कृतार्थता माविष्कुर्वन्नेवंविधज्ञानविवर्जितान्संभर्त्सयन्नब्रह्मात्मकवस्त्वभावमुपपादयति । ज्ञातोऽसीति । नन्विति संबोधने । हे भगवन् सुचिराद्बहुकालोपार्जितात्तपस इत्यर्थः । ल्यब्लोपे पञ्चमी । वहुकालं तपः संसाध्येति भावः । मे मया अद्याधुना ज्ञातः असि । यथावस्थितत्वेनाद्यैव मया दृष्टोऽसीत्यर्थः । भगवतः षाड्गुण्यपूर्णस्य तव गतिः स्वरूपं न ज्ञायते । इति यत्, तदेव देहभाजां कर्मायत्तप्रकृतिपरिणामरूपशरीरभाजां जीवानाम् अवद्यं महान् दोषः । हे भगवन् त्वत् त्वत्तः अन्यदत्त्वदात्मकं न नैवास्ति । अतस्त्वमेवैको ज्ञातव्योऽसीति भावः । ननु स्वतन्त्रवत्प्रतीयमानस्य देवमनुष्यादीतरवस्तुनोऽपि ज्ञातव्यवत्प्रतीतेरेवं कथमुच्यते इत्यत्राह । अपि देवादिवस्तुस्वतन्त्रत्वेन प्रतीतमपि तद्देवादिवस्तु न शुद्धम् अबाधितं न भवतीत्यर्थः । तत्राब्रह्मात्मकस्वतन्त्रत्वबुद्धिः केवलं मतिभ्रमादेवेति भावः । यद्यतः मायायाः प्रकृतेर्ये गुणास्तेषां व्यतिकरः परिणामस्तस्मात् त्वमेव उरुर्बहुधा विभासि । तत्त्वादिशरीरकमात्मानं परिणमय्य तन्मय एव जगद्रूपो भवसीत्यर्थः ॥ १ ॥ अथ 'जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन' इति भगवता स्वावतारस्य यथार्थतया ज्ञानस्यैव मोक्षसाधनत्वस्मरणादवतारयाथात्म्यं शोधयति । रूपमिति । अवबोधो ज्ञानं स एव रसस्तस्योदयः स्वाभाविकाविर्भावो यस्य तस्य नित्याविभूतनिरुपाधिकापरिच्छिन्नानन्दरूपज्ञानवत इत्यर्थः । अत एव शश्वत्सदा निवृत्तं तमोऽज्ञानं यस्मात्तस्य, तव यानि अवताराणां शतानि तेषामेकबीजम् अनेकेषामवताराणामेकमेव मूलभूतमित्यर्थः । यत एतत् रूपम् आदौ सर्गादावेव सतामनुग्रहस्तस्मै साधूनां परित्राणायेत्यर्थः । गृहीतं प्रकटीकृतम्, न तु जीववत्कर्मायत्तसुखदुःखोपभोगाय गृहीतमित्यर्थः । यस्य परिगृहीतैवंविधरूपस्य नाभिपद्ममेव भवनं गृहं तस्मात् अहं तवावेशावताररूपोऽहं ब्रह्मा आविरासं प्रकटोऽभूवम् ॥ २ ॥

नात इति । हे परम यस्मात्परो मा न विद्यते तथाभूत यद्वा । परा उत्कृष्टा मा लक्ष्मीर्यस्येति । यद्वा । परानात्मनोऽन्यान् जनान्माति सृजतीति परमस्तत्संबुद्धौ । न विद्धं वर्चो यस्य तत् अनावृतप्रकाशमित्यर्थः । न विद्यते विकल्पो भेदो यस्मिंस्तत् जातिगुणादिभेदरहितमित्यर्थः । आनन्दमात्रमानन्दमयं भवतस्तव यत् स्वरूपं तदेव पश्यामि । अतोऽस्माद्रूपात परं भिन्नं रूपं न पश्यामि । अतः कारणात हे आत्मन् सर्वान्तर्यामिन् ते तव एकमुपास्येषु मुख्यं विश्वसृजं विश्वस्य कारणम् अविश्वं विश्वविलक्षणम्, भूतानि चेन्द्रियाणि च, तेषामात्मा एवात्मकं भूतादिकारणमित्यर्थः । अदः एतदेव स्वरूपम उपाश्रितः अस्मि । शरणं गतःस्मोत्यर्थः ॥ ३ ॥ आकारविशिष्टस्य भगवतो भक्तैकलभ्यत्वं वदंस्तमेव नमस्करोति । तद्वा इति । हे भुवनमङ्गल विश्वस्य मङ्गलरूप ते त्वया उपासकानां नोऽस्माकं ध्याने मङ्गलायाभ्युदयाय तद्वै वेदान्तेपु प्रसिद्धमेव इदं रूपं दर्शितम् । तस्मै सुदृश्यस्वरूपगुणविभूतिमते भगवते पूर्णषाड्गुण्यमूर्त्तये तुभ्यं नमः अनुविधेम नमस्कुर्महि । यस्त्वम् असत्सु शब्दादिषु प्रकृष्टः सङ्गो येषां तैरसत्प्रसङ्गैः विषयसंसाधनार्थं निरीश्वरकुतर्कनिष्ठैरित्यर्थः । अत एव नरकभाग्भिर्देहिभिः न आदृतः नाभाजीत्यर्थः । स्मेति प्रसिद्धौ ॥ ४ ॥ बुद्धिपूर्वं त्वामभजन्तो नरकभाजस्त्वामादरेण भजमानास्तु कृतार्था इत्याह । ये त्विति । हे नाथ श्रुतिः श्रवणं सैव वातः पवनस्तेन नीतः प्रापितस्तम्, त्वदीयं यच्चरणाम्बुजं तस्य कोशस्तस्य गन्धस्तम्, कर्णविवरैः ये तु य एव जिघ्रन्ति, येषां च परया अव्यभिचारिण्या भक्त्या गृहीतौ चरणौ यस्य स तथाभूतः भवसि । तेषां स्वपुंसां निजभक्तानां च हृदयमेवाम्बुरुहं पद्मं तस्मात् न अपैषि नापसरसि । ये त्वत्कथाश्रवणमत्यादरेण कुर्वाणाः सन्त एकान्तिकभक्त्यासक्त्या त्वामुपसन्नास्तेषां हृदि भवान्नित्यं संनिहितो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवसीत्यर्थः ॥ ५ ॥ भवत्त्वेवंविधानां हृदि मत्सांनिध्यम्, तावता कथं तेषां कृतार्थतेत्यत्राह। तावदिति। हे हरे ते तव, न विद्यते भयं यस्मात्सोऽभयः संसृतिनिवर्त्तकस्तम् अङ्घ्रिं लोकः यावत् न वृणीत निरतिशयप्रियत्वेन नोपासीत, तावत् एव द्रविणं धनं च, देहः शरीरं च, सुहृदो मित्राणि च, ते निमित्तं यस्य तत् भयमागामिदुःखदर्शनजं ज्ञानम्, भाविद्रविणादिविपत्तिनिमित्तदुःखविषयज्ञानात्मकं भयमित्यर्थः। शोकस्तत्कालभाव्यद्रविणादिविनाशश्रवणजो मनःसंतापः, स्पृहा स्वानुकूलविषयोपलब्धीच्छा, परिभवोऽविहितकर्माचरणेक्षकलोककृतस्तिरस्कारः, विपुलोऽतिविस्तारयुक्तः लोभस्तृष्णा, आर्त्तिमूलं सर्वदुःखानां मूलकारणभूत इत्यर्थः। ममेति सर्वत्र ममतासंभूत इत्यर्थः। असदवग्रहः विनाशिवस्तुष्वात्मत्वाभिमानः तावत्कात्स्न्येन अनुवर्त्तते इति शेषः ॥ ६ ॥

एवं परमेश्वरस्य केवलभक्त्यैकलभ्यत्वमभिधाय योऽनादृतो नरकभाग्भिरसत्प्रसङ्गैरिति प्रस्तुतान्विषयभोगातिलालसान्विनिन्दंस्तानेव शोचति। दैवेनेति द्वाभ्याम्। ये जनाः सर्वाणि सकलानि अशुभानि भयशोकादीनि उपशाम्यन्तेऽनेनेति सर्वाशुभोपशामनस्तस्मात् भवतस्तव प्रसङ्गाद्दर्शनश्रवणादिरूपात्प्रकृष्टसङ्गात् विमुखानि इन्द्रियाणि चक्षुःश्रोत्रादीनि येषां ते। शश्वन्निरन्तरं कामसुखानि शब्दादिविषयसुखानि तेषां लेशोऽल्पो भागस्तस्यापि लवोऽल्पतरो भागस्तस्मै कामसुखसंप्राप्त्यर्थमित्यर्थः। लोभेन तृष्णातिशयेनाभिभूतं मनो येषां तथाभूताः, अत एव दीनाः क्षुद्राः सन्तः अकुशलानि केवलमक्षेमकराणि कर्माणीति शेषः। कुर्वन्ति। ते दैवेन पूर्वानुष्ठिताशुभकर्मणा हताः प्रतिहताः धियो येषां ते तथोक्ता मन्दभाग्या भवन्तीत्यर्थः ॥ ७ ॥ अकुशलत्वमेव दर्शयति। क्षुदिति। हे उरुक्रम क्षुत् क्षुधा च, तृट् तृषा च, त्रिधातवो वातपित्तश्लेष्माणश्च, तैः। आध्यात्मिकैः शीतं शीतातिशयश्च, उष्णम् आतपातिशयश्च, वातवर्षैस्तीव्रवातोपेतासारेण घनवर्षणानि च, तैश्च, आधिदैविकैः इतरेतरादन्योऽन्यनिमित्ताच्च आधिभौतिकैरित्यर्थः। सुतरां दुर्भरो दुष्पूरः तेन, काम एवाग्निस्तेन, अच्युता चासौ रुट् च तया। अविच्युतक्रोधेनेत्यर्थः। अच्युतेति संबोधनं वा। एतैः मुहुः पुनः पुनः अर्द्यमानाः पीड्यमानाः इमाः त्वद्दत्तदिव्यदृशो मम साक्षात्तया दृश्यमानाः प्रजाः संपश्यतो निरीक्षमाणस्य मे मम मनः सीदतेऽत्यन्तं क्लिश्यति ॥ ८ ॥ असदवग्रह आर्त्तिमूलमित्यनेन देहात्मभ्रमस्यार्त्तिमूलत्वमभिहितं तदुपपादयति। यावदिति द्वाभ्याम्। हे ईश भगवतः तव मायाबलं मायाबलकारितमित्यर्थः। इन्द्रियार्थं बाह्येन्द्रियविषयभोगार्थकम् इदं पृथक्त्वं देवमनुष्यादिदेहगतपृथग्भावम् आत्मनः आत्मसंबन्धितयेत्यर्थः। जनः यावद्यावत्कालपर्यन्तं पश्येत्। तावत् असौ संसृतिः न प्रतिसंक्रमेत न निवर्त्तेत। न केवलं संसृत्यनिवृत्तिरेव, किं तु क्रिया अर्थः प्रयोजनं यस्याः सा संसृतिः व्यर्था। परमपुरुषार्थशून्या सत्यपि दुःखनिवहमशर्मसमूहं वहति प्रापयति। अहंकारमूला संसृतिरुत्तरोत्तरकर्मोपार्जननिमित्तत्वान्मोक्षमार्गविरोधिनी दुःखातिशयकर्त्री चेत्यर्थः ॥ ९ ॥

भवत्त्वेवमविवेकवन्मतिमतां विवेकवन्मतिमन्तस्तु मुक्ता एव, किं तेषां भगवद्भजनेन कृत्यं तत्राह। अह्नीति। हे देव अह्नि दिने ऋषयः विवेकयुक्तत्वात्स्वयं ज्ञानोपदेष्टारोऽपि, युष्माकं प्रसङ्गो येषां ते युष्मत्प्रसङ्गाः साक्षात्त्वत्प्रसङ्गवन्तः स्वसद्धर्मनिष्ठतया ये सत्याः साधवस्तेभ्यो विमुखाश्चेत् तर्हि, आप्तानि विषयसंपादनासक्तानि च तानि आर्त्तानि क्लेशातिशयोपेतानि करणानीन्द्रियाणि येषां ते निशि रात्रौ निःशयाना निवृत्तबाह्येन्द्रियव्यापाराः विषयसुखलवमपि नानुभवन्त इत्यर्थः। नानाभूतेषु मनोरथेषु या धीस्तया स्वप्नदर्शनेनेत्यर्थः। क्षणेन भग्ना निद्रा येषां ते। प्रतिक्षणं भग्ननिद्रत्वात् सुषुप्तिसुखमप्यनाप्नुवन्त इत्यर्थः। दैवेनाहता व्यर्थीकृता अर्थरचना प्रयोजनविषयव्यापारो येषां तथाभूताः सन्तः इह लोके संसरन्ति। त्वत्त्वदीयाश्रयं विना न तेषां मोहनिवर्त्तकं ज्ञानमपीति भावः ॥ १० ॥ एवं स्वकीयं ज्ञानित्वं प्रदर्श्य देहाभिमानितया सधर्मभगवद्भक्तिविधुराणां संसृत्यनिवृत्त्यभिधानेन भगवतः सधर्मभक्त्यैकलभ्यत्वमेव सुदृढय्य स्वसद्धर्मनिष्ठनिष्कामभक्तेषु भगवत्सौलभ्यमाह। त्वमिति द्वाभ्याम्। हे नाथ श्रुतेन शास्त्रेण ईक्षितो दर्शितः पन्था मार्गो यस्य एवंभूतः त्वं पुंसां स्वभक्तानां भावयोगो भक्तियोगस्तेन परिभावितं संशोधितं यत् हृत्सरोजं हृदयकमलं तस्मिन् आस्से तिष्ठसि। ननु तथापि हे उरुगाय ते त्वद्भक्तजनाः धिया त्वद्भावोपेतस्वमनीषया तव यद्यद्वपुः विभावयन्ति समीक्षणार्थं ध्यायन्ति तत्तद्वपुः सतामनुग्रहस्तस्मै सदनुग्रहाय इत्थंभूतस्वसाध्वनुग्रहं विधातुमित्यर्थः। प्रणयसे त्वं प्रकटयसि। यादृशविग्रहविशिष्टं त्वां विशेषतो भावयन्ति, तादृशविग्रहविशेषस्त्वं भवसीत्यर्थः ॥ ११ ॥ सकामानां परस्परस्पर्द्धावत्त्वे त्वसुलभोऽपि भवांस्त्वत्प्रसन्नताहेतुभूतसर्वभूतदयावतां निष्कामानामेव सुलभ इत्याह। नेति। हे भगवन् अन्तरात्मा सर्वेषामन्तर्यामी अतः नानाजनेषु अवहितः स्वैश्वर्यशक्त्या स्थितः तथापि एकोऽद्वितीयः शक्तिशक्तिमतोरभेदादनन्य इत्यर्थः। सुहृदेवंभूतः सन्नपि सुहृद्वत्सर्वकामपूरकः भवान् असदलभ्यया देहमात्मतयाऽनुसंदधद्भिर्लब्धुमशक्यया सर्वभूतदयया स्वसुखदुःखानुसंधानपूर्वं सकामजनेष्वविद्यमानया सर्वभूतेषु करुणया यद्यथा प्रसीदति तथा हृदि बद्धकामैः हृदयनिबद्धनानार्थसंसाधनासक्तैः सुरगणैः 'विष्णुभक्तिपरो देवो विपरीतस्तथासुरः' इतिवचनात्कामनापूर्वं भक्तिमत्तया प्राप्तदेवसंज्ञैर्जनैः कर्तृभिः उपचितोपचारैः पुष्कलैः पुष्पाद्युपहारैः करणैः आराधितः सन्नपि न अति प्रसीदति। त्वं तेभ्यो निरतिशयसुखप्रदो न भवसीत्यर्थः। सकामाऽपि त्वद्भक्तिरासुराणां तु न कदाचिदप्यभ्युदेतीति भावः ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यतः फलप्राप्तिमनुसंधाय नानोपचारैरर्चितोऽपि त्वं नातिप्रसीदस्यतः स्वकृतकर्मणां सत्कर्मतासिद्ध्यर्थं परमेश्वरप्रीणनमनुसंधाय कर्मानुष्ठानं विधेयमित्याह। पुंसामिति। अतः फलाभिसंधिरहिततया कर्माचरणस्येश्वरप्रसन्नताहेतुत्वात् पुंसां भगवन्तमाराधयितॄणां संबन्धिभिः अध्वराद्यैः विविधकर्मभिः नानाविधश्रौतस्मार्त्तयज्ञादिकर्मभिरित्यर्थः। दानेन सत्पात्रे धनादिसमर्पणेन च, उग्रं च तत्तपः कृच्छ्रचान्द्रायणादि च, तेन व्रतचर्यया एकादश्यादिनानाव्रताचरणेन च, भगवतः तव आराधनं यत् तत् स एवेत्यर्थः। सत्यश्च ताः क्रियाश्च तासामर्थः सत्कर्मसंपादनप्रयोजनं त्वदाराधनैकप्रयोजनतया सर्वाणि कर्माण्यनुष्ठेयानीत्यर्थः। तत्र हेतुः धर्मः यथाविधि विहितो यज्ञादिरूपो वृषः यत्र यस्मिन्परमेश्वरे त्वयि अर्पितः अनेन परमेश्वरः प्रीयतामिति विनियोजितः भवेच्चेत्, तर्हि कर्हिचित्कदाचिदपि न ह्रियते न विनश्यति। एवंविधतया कर्मानुष्ठानस्याक्षयिष्णुफलसाधनत्वादिति भावः। तथाचोक्तं भगवता भगवद्गीतायाम्। 'नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते। स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्' इति॥ १३॥ एवं निष्कामधर्मस्याक्षयफलसाधनत्वमभिधाय त्वामेव वयं नमाम इत्याह। शश्वदिति शश्वत्सदा स्वरूपस्य महस्तेन प्रकृतिर्विविक्तात्मस्वरूपयाथात्म्यज्ञानेनैवेत्यर्थः। भेदो देवमनुष्यादिभावस्यात्मनि मानिता च, मोहस्तत्र स्वतन्त्रतादिमननरूपमज्ञानं च, निरस्तौ भेदमोहौ येषां योगिनां तेषामवबोधः स्वस्वरूपविषयं ज्ञानं च धिषणा भगवदुपासनात्मिका बुद्धिश्च, एते यस्य स तस्मै, योगिभ्यः स्वप्राप्त्युपायभूतेऽवबोधधिषणे प्रयच्छते इत्यर्थः। मोहायेति चतुर्थ्यन्तपाठे भेदरूपो मोहो भेदमोहः। निरस्तः स्वस्वरूपाविर्भावेन स्वस्मिन्नसंस्पृष्टः भेदमोहो देवमनुष्यादिभेदात्मको मोहो यस्य तस्मै सर्वान्तरात्मतयावस्थितत्वेऽप्यनात्मगतदोषासंस्पृष्टायेत्यर्थः। बोधे एव धिषणा यस्य तस्मै, अत एव परस्मै प्रकृतिपुरुषविलक्षणाय। तत्र हेतुः उद्भव उत्पत्तिश्च, स्थितिः पालनं च, लयः प्रलयश्च, विश्वस्य ये उद्भवादयस्तेषु निमित्तभूता या लीला क्रीडा तस्या रागो रसो यस्य तस्मै अलुक्समासः। ईश्वराय नियन्त्रे ते तुभ्यम् इदं नमो नमनं चक्रम करवाम॥ १४॥

ननु परिपूर्णस्य संप्राप्तसमस्तकामस्य लीलार्थमपि जगद्व्यापारो नोपपद्यते इत्याशङ्क्य भवभयसंपरितप्तसांसारिकजीवानुजिघृक्षया घटते, इत्यभिप्रायं प्रदर्शयंस्तदवतारगुणकर्मणां कीर्त्तनस्य कर्तृत्वकारयितृत्वयोस्तत्प्राप्त्युपायतामाविष्कुर्वन् शरणं व्रजति। यस्येति। यस्य तव अवताराश्च, गुणाश्च, कर्माणि च, तेषां विडम्बनान्यनुकरणानि येषु तानि नामानि। तत्रावतारविडम्बनानि देवकीनन्दनः, भक्तिनन्दनः, कौसल्यानन्दन इत्यादीनि। गुणविडम्बनानि सर्वज्ञभक्तवत्सलनैष्ठिकेन्द्रभगवानित्यादीनि। कर्मविडम्बनानि गोवर्द्धनोद्धारककंसारिरावणान्तकरकृत्याभीषणादीनि। ये जनाः असुविगमे प्राणोत्क्रमणकाले विवशाः सन्तः गृणन्ति उच्चारयन्ति, ते जनाः अनेकानि च तानि जन्मानि च, तेषां शमलमनेकजन्मार्जितपापमित्यर्थः। सहसा अचिरेण एव हित्वा विधूय अपावृतं निरस्तावरणम् ऋतं सत्यस्वरूपं ब्रह्म संयान्ति प्राप्नुवन्ति। अजं कर्मायत्तोत्पत्त्यादिरहितं तं त्वां प्रपद्ये शरणं यामीत्यर्थः। अयं भावः। स्वकीयावतारगुणकर्मप्रतिपादकनामाद्यनुस्मरणादिना संसृतिमतितरेयुरित्यनुजिघृक्षयैव भगवतो जगद्व्यापार इति॥ १५॥ भगवतो गुणावतारकर्माणि दर्शयन् भुवनद्रुमभावेन तं प्रणमति। यो वा इति। यः भुवनद्रुमः एकः प्रथममविभक्तनामादित्यैकरूपः स्थितिश्च, उद्भवश्च, प्रलयश्च, तेषां हेतवः। विभुः स्वयं विष्णुश्च, अहं ब्रह्मा च, गिरिशः शिवश्च, एवं त्रिपाद्भिः पादाः स्कन्धा यस्य तथाभूतः सन्, उरवः बहवः प्ररोहाः शाखोपशाखाः प्रद्युम्नसाम्बादयः मरीचिमन्वादयः गणेशकुमारादयश्च यस्य सः। सन् आत्ममूलं प्रधानं भित्त्वा गुणत्रयस्वरूपेण विभज्य, ववृधे वै। भुवनद्रुमाय भुवनात्मकवृक्षरूपाय तस्मै भगवते नमः। मदादिरूपेण सृष्ट्यादिव्यापारस्त्वयैव क्रियते इति भावः॥ १६॥ भगवन्तं वृक्षरूपकेण संवर्ण्य, तथाविधं नमस्कृत्य तस्य भक्तानुग्राहकत्वमेवाह। लोक इति। हे हरे अयं लोको जनः त्वदुदिते वेदात्मिकया वाचा त्वया गदिते भगवदर्चने भगवतस्तवाराधनरूपे स्वे स्ववर्णाश्रमोचिते कुशले क्षेमंकरे कर्मणि प्रमत्तः प्रमादयुक्तः। प्रत्युत विकर्मनिरतः स्वसुखानुबन्धिष्वहंममाभिमानगर्भेषु वैषयिकसुखेषु नितरामासक्तः सन् यावद्वर्त्तेत, तावत् बलवाननिवार्यसामर्थ्यः यः कालात्मा भवान् अस्योक्तप्रकारलोकस्य इह लोके निबद्धां जीविताशां सद्यः शीघ्रमेतच्छिनत्ति, तस्मै अनिमिषाय कालरूपिणे नमः अस्तु। अनेन तव स्वाज्ञानुवृत्तिभक्तजनानां सद्योऽनुग्राहकत्वमभक्तानां विपरीताशासंछेदनेन वैराग्योत्पादनपूर्वकमपि तदनुग्राहकत्वमेवं वैषम्यवर्जिताय ते नमस्करोमीति सूचितमिति भावः॥ १७॥ उक्तार्थमेव स्वदृष्टान्तेन द्रढयति। यस्मादिति। सकललोका अर्वाचीना ये जनास्तैर्नमस्कृतं संमानितं यत् द्विपरार्ध्यधिष्ण्यं द्विपरार्द्धकालस्थायिसत्याख्यलोकस्थानम् अध्यासित आरूढः अपि अहं यस्मात्कालशरीरकात्त्वत्तः बिभेमि। एवंभीतिमानहम् अवरुरुत्स्यमानस्त्वामेव समवाप्तुमिच्छन् बहवः सवास्त्वदाराधनरूपा यागा यस्य स बहुसवः बहुकालं बहुयागान्कुर्वन्सन्नित्यर्थः। तपः तेपे। तपश्चरणं करोमीत्यर्थः। पाकं पचतीतिवन्निर्देशः। तस्मै अधिमखाय मखाराध्याय भगवते तुभ्यं नमः॥ १८॥

इदानीं तत्तत्कालभाविलीलावतारकर्माणि दर्शयन् प्रणमति। तिर्यङ्ङिति। तिर्यञ्चो मत्स्यादयश्च, मनुष्याः कर्दमाद्यादयश्च, विबुधा आदित्यादयो देवताश्चादयो यासां तासु जीवयोनिषु आत्मेच्छया आत्मीयसंकल्पेनैव, न तु जीववत्क-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्मणेत्यर्थः । आत्मना स्वेन कृता ये सेतवस्तेषां परीप्सा रक्षणविधानेच्छा तया, असुरसंनिमज्जितधर्ममर्यादानामुन्मज्जनहेतुनेत्यर्थः । निरस्ता रतिर्येन सोऽपि अतिशयानन्दस्वरूपानुभवेनैव कदाचिदपि अस्पृष्टवैषयिकसुखः सन्नपीत्यर्थः । अवरुद्धः स्वीकृतः देहो मूर्त्तिर्येन सः, यस्त्वं रेमे तिर्यगादिसजातीयचेष्टितानि कुर्वन् क्रीडामाचरसीत्यर्थः । तत्र तिर्यक्षु मत्स्यकूर्मवराहहंसादयस्तेऽवताराः । मनुष्येषु रामकृष्णहरिकृष्णदत्तकपिलादयस्तेऽवताराः । विबुधेषु वामनसुयज्ञपृश्निगर्भादयोऽवताराः । तस्मै पुरुषोत्तमाय भगवते नमो नमस्कुर्मः । एवं स्वसंकल्पेनैव स्वस्वभावमजहदेव तत्तद्योनिष्ववतीर्य तत्सजातीयदिव्यचेष्टितानि कुर्वन्नक्रूरोद्धवमालाकारमुक्तमुन्युत्तमपर्वतादिगुहशबरीप्रमुखाननवधिकातिशयदयासौहार्दगर्भानुरागवल्गुलोकनालापाद्यमृतदानेना – प्यायन्सकलमनुष्यनयनविषयत्वं गतो यो भवसि, तस्मै नमस्करोमीति भावः ॥ १९ ॥ एवं सुखरूपगुणविभूतिविशिष्टं भगवन्तं नमस्कृत्य, स्वमनीषितं विजिज्ञापयिषुस्तात्कालिकं परिदृश्यमानं वैराजस्वरूपं प्रस्तुवन्नमस्करोति द्वाभ्याम् । य इति । दशार्द्धं पञ्च वृत्तयो यस्यास्तया दशार्द्धवृत्त्या अविद्यया निद्राहेतुभूतया पञ्चपर्वात्मिकाया अज्ञानपर्यायाया अविद्यायास्तामिस्रान्धतामिस्रमोहमहामोहतमोरूपाः वृत्तयस्ताभिश्च निद्राहेतुभूताभिरित्यर्थः । अनुपहतोऽनभिभूतः अपि, यस्त्वं जठरीकृतोदरे निवेशिता लोकयात्रा जगद्वृत्तान्तो येन तथाभूतः सन्, अहिः शेष एव कशिपुः शय्या तस्याः स्पर्शोऽनुकूलो यस्यास्तां निद्रां भीमानां भयंकराणामूर्मीणां माला विद्यन्ते यस्मिंस्तस्मिन् अन्तर्जले जलमध्यप्रदेशे जनस्य निद्राणस्य जनस्यं सुखं निद्रासुखमीदृगिति विवृण्वन्प्रदर्शयन् उवाह । योगनिद्रामनुभवसीत्यर्थः । तस्मै नम इत्युत्तरेणान्वयः ॥ २० ॥ यदिति । हे ईड्य यस्य नाभिपद्ममेव भवनं तस्मात् लोकत्रयमुपकरणं यस्य सः, लोकत्रयमुपकरोतीति वा, तथाभूतः अहं यदनुग्रहेण यस्य तवानुग्रहत एव आसमाविरभवम् । उदरस्थः भवः कार्यवर्गो यस्य तस्मै योगनिद्रावसाने विकसत् नलिनवत् ईक्षणं यस्य तस्मै । तस्मै सर्वान्तरात्मतया प्रसिद्धाय ते तुभ्यं नमः ॥ २१ ॥

एवं स्तुत्वा स्वमनीषितानि प्रार्थयते चतुर्भिः । स इति । समस्तानि सकलानि यानि जगन्ति तेषां चेतनाचेतनानामित्यर्थः । आत्मा एकः सुहृत् स प्रसिद्धः अयं भगवान् यत् येन सत्त्वेन ज्ञानेन शुद्धसत्त्वमयविग्रहेण वा भगेनैश्वर्येण च मृडयते विश्वं सुखयति, तेनैश्वर्येण एव मे मम दृशं प्रज्ञाम् अनुस्पृशतात् योजयतु दत्तादित्यर्थः । यथा अहम् इदं विश्वं पूर्ववत् पूर्वकल्पे यथा तथेत्यर्थः । 'धाता यथापूर्वमकल्पयत्' इति श्रुतेः । स्रक्ष्यामि सृष्टिं विधातुं क्षमो भूयासमित्यर्थः । प्रार्थनाया नैष्फल्यशङ्कां वारयति । असौ समस्तसुहृत सर्वान्तर्यामी अद्वितीयो भगवान् भवान् प्रणतप्रियः प्रणमत्सु निरतिशयप्रीतियुक्तः अहं च प्रणत इति भावः ॥ २२ ॥ ननु विश्वसृष्ट्यर्थमेव मया त्वं सृष्टस्तत्तदुपयोगिप्रज्ञामभ्यर्थितुं नार्हसीत्याशङ्कामपनुदन्नन्यदपि प्रार्थयते । एष इति । प्रपन्नवरदः स्वशरणागतवाञ्छितार्थप्रदः गृहीता अपरित्यक्ताः गुणाः स्वाभाविकसर्वज्ञत्वाद्यपहतपाप्मत्वादिज्ञानशक्त्यादिकाश्च येषु तथाभूता अवतारा यस्य स एषः भगवान् आत्मशक्त्या स्वापृथग्भूतविशेषणरूपया रमया लक्ष्म्या साकं यद् यद् देवमनुष्यतिर्यगादिसजातीयचेष्टितं करिष्यति कर्त्ता, तस्मिन् कर्मणि स्वस्य तव विक्रमः प्रबोधो यस्मिंस्तत् विक्रमम् इदं विश्वं सृजतः अपि त्वदाज्ञया सृजतोऽपि ममेत्यर्थः । चेतः चित्तं युञ्जीत । त्वदवतारगुणकर्मानुभवयुक्तं स्यात् । तथाऽनुगृह्णातु इति शेषः । यथा च यथैव कर्मशमलमनादिपापकर्मादिमालिन्यं विजह्याम्, यद्वा कर्मसृष्ट्याद्यासक्तिं तत्कृतं शमलं वैषम्यादि च यथा त्यजेयम्, तथानुगृह्णात्विति संबन्धः ॥ २३ ॥ अथ तत्स्वरूपगुणविभूतिप्रतिपादकवेदराश्यविस्मरणं प्रार्थयते । नाभिह्रदादिति । इह अम्भसि अस्मिन्नुदके इत्यर्थः । सतः विद्यमानस्य शयानस्येत्यर्थः । अनन्तशक्तेरपरिच्छिन्नज्ञानबलक्रियाशक्तेः पुंसः पुरुषाकृतेः यस्य तव नाभिह्रदात् विज्ञानशक्तिर्ज्ञानगुणकः अहम् आसम् । अस्य भगवतस्तव विचित्रमद्भुतमाश्चर्यकारि इत्यर्थः । रूपं श्रुत्या शरीरत्वेनाभिहितम् इदं चिदचिदात्मकं जगत् विवृण्वतो विस्तारयतः मे मम निगमस्य वेदस्य गिरां वेदावयवभूतानां वाचामित्यर्थः । विसर्गः प्रसरः उच्चारणमिति यावत् । मारीरिषीष्ट क्षीणः न स्यात् तथानुगृह्णात्वित्यर्थः ॥ २४ ॥

अथाभिमुख्येन तत्संभाषणं प्रार्थयते । स इति । अदभ्रकरुणो अनल्पकृपः पुराणोऽनादिसिद्धः पुरुषः पुरुषाकृतिः सः असौ भगवान्, विवृद्धः प्रेमा यस्मिंस्तथाभूतं स्मितं तेन, नयनाम्बुरुहं विजृम्भन्नुल्लासयन् विकासयन्सन्निति यावत् । विश्वविजयाय जगदुद्भवाय चकारादस्मदनुग्रहाय उत्थाय माध्व्या मधुरया गिरा वाण्या नोऽस्माकं विषादं खेदम् अपनयतान्निराकुर्यात ॥ २५ ॥ स्तुतिमुपसंहरति । स्वसंभवमिति । सः ब्रह्मा स्वस्य संभवो यस्मात्तं स्वोत्पत्तिकारणं भगवन्तमित्यर्थः । तपश्च, विद्या च, समाधिश्च, तैः कृच्छ्राद्याचरणोपासनाचित्तैकाग्र्यैः निशाम्य दृष्ट्वा एवमुक्तप्रकारेण यावन्मनोवचः स्वमनोवागनुसारेण स्तुत्वा, यथाशक्ति संस्तूयेत्यर्थः । न तु साकल्येनेति भावः । खिन्नवत् श्रान्तवत् विरराम । 'इषुक्षयान्निवर्त्तन्ते नान्तरिक्षक्षितिक्षयात् । मतिक्षयान्निवर्त्तन्ते न गोविन्दगुणक्षयात्' इति वचनादत्र श्रान्तत्वेन विरामः ॥ २६ ॥ अथेति । लोकेति । आत्मनः स्वस्य लोकसंस्थानविज्ञाने लोकानामवयवशो विन्यासविशेषस्य विबोधे परिखिद्यतः अलंबुद्धिमकुर्वतः, तेन तदा वर्तमानेन कल्पव्यतिकरः प्रलयस्तस्यामभस्तेन, विषण्णं सखेदं चेतो यस्य तस्य ब्रह्मणः अभिप्रेतम् अन्वीक्ष्य लक्षणतो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञात्वा अथ मधुसूदनः तं ब्रह्माणम् अगाधया गम्भीरया वाचा कश्मलं मोहं शमयन् इव आह ॥ २८–२८ ॥ मेति । हे वेदगर्भ विधे तन्द्रीं विषादकृतपारवश्यं मा गाः मा प्राप्नुहि । सर्गे सृष्टौ उद्यमं प्रयत्नम् आवह कुरु । भवान् यत् 'तेनैव मे दृशमनुस्पृशतात्' इत्यादिकं यदित्यर्थः । मां प्रार्थयते तत् अग्रे पूर्वमेव मया आपादितं संपादितमस्ति । हि निश्चितमेव ॥ २९ ॥ एवं चेत्कथमहं सृष्टिप्रकारं न जानामि इत्यत आह । भूय इति । हे ब्रह्मन् त्वं भूय एव पुनरपि तपः मम ध्यानं मदाश्रयां मद्विषयां विद्यामुपासनां च विद्याशब्देन ज्ञानमप्यभिहितमिति बोध्यम् । आतिष्ठ कुरु । ताभ्यां तपोविद्याभ्याम् अन्तर्हृदि हृदयकमलमध्ये अपावृताननावृतान् लोकान् द्रक्ष्यसि द्रष्टासि ॥ ३० ॥

तत इति । हे ब्रह्मन् ततः यथावल्लोकदर्शनानन्तरं भक्तियुक्तो मदीयभक्तिसहितः समाहित एकाग्रचित्तः त्वम् आत्मनि त्वयि लोके च चेतनाचेतनात्मके सर्वस्मिन् जगति चेत्यर्थः । ततं व्याप्तं माम्, मयि च आत्मनः मम मच्छरीर-भूतानिति यावत् । लोकान् द्रष्टासि द्रष्टुमर्हसीत्यर्थः ॥ ३१ ॥ 'कर्मशमले च यथा विजह्याम्, इति त्वयार्थितम्, तत्र कर्मशमल-निवर्त्तकं तु कृत्स्नचिदचिद्विलक्षणत्वेन तदन्तर्यामितया चोपासनमस्ति, ततस्तदेव जीवानां मुक्त्युपयोगीत्याह । यदा त्विति । हे ब्रह्मन् यदा तु दारुषु काष्ठेषु अग्निम् इव सर्वभूतेषु स्थितं मां लोकः प्रतिचक्षीत पश्येत्, तर्ह्येव प्रकृतिपुरुषविलक्षणतया तदन्तरात्मतया च दर्शनानन्तरमित्यर्थः । कश्मलं जह्यात् । दुःखं मोहं वा परित्यजेदित्यर्थः । अत्र दारुष्वग्निमिवेति दृष्टान्तसामर्थ्याद्भगवतश्चिज्जडविलक्षणयोगोऽभिप्रेतः । तेन कौटिल्यदैर्घ्यादिधर्मो हि दारुगतो न त्वग्निगत एवं कृत्स्नचिद-चिदन्तरात्मतयावस्थिते परमात्मनि चेतनाचेतनगतकर्मवश्यत्वसृज्यत्वपाल्यत्वनियाम्यत्वशेषत्वशरीरादयो न संगच्छन्तीत्य-भिप्रायः ॥ ३२ ॥ एवं सर्वात्मब्रह्मोपासनस्य मुक्तिसाधनत्वमभिधायाथ ब्रह्मशरीरतया प्रकृतिविलक्षणतया च स्वात्मोपासनमपि तत्साधनमित्याह । यदेति । हे ब्रह्मन् यदा जनः भूतानि पृथिव्यादीनि च, इन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि च, गुणा सत्त्वादयश्च, आशयः सवासनमन्तःकरणं च तैः रहितं स्वरूपेण सत्यज्ञानानन्दादिश्रुत्यभिहितात्मस्वरूपेण मया परमेश्वरेणात्मना धारकेण च उपेतं व्याप्तम् आत्मानं जीवात्मानं पश्यन् भवति । तदा स्वाराज्यमकर्मवश्यत्वम् ऋच्छति प्राप्नोतीत्यर्थः ॥ ३३ ॥ नन्वस्त्वेवं जनानां सृष्टिरूपव्यापारान्तरासक्तस्य मम, कथं सर्वात्मकब्रह्मानुसंधानं स्यादिति शोचन्तमजमनुगृह्णाति । नानेति । नाना नैकविधानि यानि कर्माणि तेषां वितानस्तेन जीवसंबन्धयनादिपुण्यपापरूपकर्मणां विस्तारेणेत्यर्थः । बह्वीर्बहुविधाः विचित्रा इति यावत् । प्रजाः देवतिर्यङ्मनुष्यस्थावरादिरूपाः सिसृक्षतः स्रष्टुमिच्छतः ते तव आत्मा चित्तम् अस्मिन् कर्मणि न अवसीदति मोहं न प्राप्नोतीत्यर्थः । किं तु मत्स्वरूपगुणविभूत्यनुसंधानासक्तमेव भवति । वर्त्तमानप्रयोगो भविष्यदर्थगमकः । कुत एवमत आह । एवंविधः मदनुग्रहः वर्षीयान्बहुलतरः त्वदुपरि जातोऽस्तीति शेषः ॥ ३४ ॥

अनुग्रहस्य वर्षीयस्त्वमेव दर्शयति । ऋषिमिति । आदौ भव आद्यस्तम् ऋषिं मन्मूर्त्तितद्गतरूपगुणविभूतिप्रतिपादक-कृत्स्नवेदराशिद्रष्टारमित्यर्थः । त्वां पापीयान् सर्गासक्तिबन्धकतयाऽतिपापरूपः रजोगुणः न बध्नाति न संसारयिष्यतीत्यर्थः । कुतः यद्यस्मात् मदनुग्रहात् प्रजाः संसृजतः अपि ते तव मनः मयि निर्बद्धं नितरामासक्तं भविष्यतीति शेषः ॥ ३५ ॥ मद्विषयक-ज्ञानादि तव मदनुग्रहादेवं संपन्नमित्याह त्रिभिः । ज्ञात इति । देहिनां देहासक्तानामभक्तानामित्यर्थः । दुर्विज्ञेयो दुःखेन ज्ञातुम-शक्योऽपि अहम् अद्याधुना भवता तु ज्ञातः । यद्यस्मात् त्वं मां भूतानि पृथिव्यादीनि च, इन्द्रियाणि ज्ञानकर्ममयाक्षाणि च, गुणाः सत्त्वादयश्चात्मा मनश्च तैः अयुक्तं मन्यसे । प्राकृतेन्द्रिययुक्ततयाऽभक्तानां प्रतीयमानमपि मामप्राकृतभूतेन्द्रियादियुक्तं मन्यसे इत्यर्थः ॥ ३६ ॥ तुभ्यमिति । किं च मम विचिकित्सा मद्विचिकित्सा तस्याम् 'अस्ति ह्यथस्तादिह किं च नैतदधिष्ठितं यत्र सतानुभाव्यम्' इत्येवंरूपायां मद्विषयायां विचारणायां निमित्तभूतायां सत्यामित्यर्थः । सलिले प्रलयार्णवोदके पुष्करस्य कमलस्य मूलं नालेन मार्गेण विचिन्वते गवेषमाणाय तुभ्यं मे मया आत्मा विग्रहः अबहिः दर्शितः । बहिर्दृष्ट्या गवेषमाणत्वात् दृग्विषयत्वेन न दर्शित इत्यर्थः ॥ ३७ ॥ यदिति । किं च अङ्ग हे ब्रह्मन् मम कथा मत्कथा सैवाभ्युदयस्तेनाङ्कितं स्तोत्रं स्तवं चकर्थ मद्विषयकां स्तुतिं कृतवानसि यत्, यद्वा यच्च ते तव तपसि निष्ठा च सः एष मदनुग्रहः । एतत्सर्वं मदनुग्रहेण तव जातमिति भावः ॥ ३८ ॥ सर्वस्तोक्तार्थस्य मदनुग्रहकारितत्वात्तुभ्यमहं प्रसन्न इत्याह । प्रीत इति । गुणमयं कल्याणगुणप्रचुरं निर्गुणं हेयगुणवर्जितं मा माम् अनुवर्णयन् त्वं लोकानां विजयेच्छया सर्गेच्छयैवेत्यर्थः । अस्तौषीत् स्तुतवान् यत् अस्मात्स्तवनात् अहं प्रीतः निरतिशयप्रीत्या युक्तः । जातोऽस्मि, ते तुभ्यं भद्रं कल्याणम् अस्तु भवत्वित्यर्थः ॥ ३९ ॥ अनेनान्येभ्यो यदा प्रसीदेयं तदा तव प्रीत इति किं वक्तव्यमित्याह । य इति । एतेन अनेन भवत्कृतेनेत्यर्थः । स्तोत्रेण यः पुमान् नित्यं स्तुत्वा मां भजेत्, तस्य पुंसोऽपि आशु सर्वे च ते कामाश्च तेषां वरास्तेषामीश्वरः सर्वेषां काम्यमानानामर्थानामधिपतिरित्यर्थः । अहं संप्रसीदेयं प्रसन्नो भवामि । तदा त्वयि प्रसन्नत्वे किं वक्तव्यमित्याशयः ॥ ४० ॥

मत्प्रीतेरधिकमन्यच्छ्रेयो नास्तीत्याह । पूर्तेनेति पूर्त्तेन तडागारामादिना, तपसा कृच्छ्रचान्द्रायणादिना, यज्ञैर्महाध्वरादि-भिर्मखैः, दानैः सत्पात्रेभ्यो भूम्यादिप्रदानैः, योगश्च समाधिश्च, तयोः समाहारस्तेन योगेन यमाद्यष्टाङ्गयोगसंसाधनेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समाधिना चित्तैकाग्र्यविधानेन चेत्यर्थः। राद्धं संसिद्धम्, निःश्रेयसं निःश्रेयसफलकरम्, पुंसां मत्प्रीतिः मत्प्रीणनं यत्तदेव तत्त्वविन्मतं पूर्तादिसाधनैर्यथाहं प्रीतः स्यां तथाकरणमेव पुंसां तत्त्वविन्मतं निःश्रेयसस्य सत्साधनमिति भावः ॥ ४१ ॥ एतदेव सहेतुकमुपपादयति। अहमिति। हे धातः ब्रह्मन् अहम् आत्मनां जीवानाम् आत्मा अन्तः प्रविश्य प्रशासनेन धारकः, अत एव प्रेयसां प्रीतिविषयाणां मध्येऽपि प्रेष्ठः निरतिशयप्रीतिविषयः सन् स्थितः। अतः आत्मत्वात्प्रेष्ठत्वाच्च मय्येव रतिं प्रीतिं गाढानुरागरूपां भक्तिमिति यावत्। कुर्यात्। देहादिः यत्कृते यस्य मम भक्त्यर्थं प्रियः भवति। मद्भक्तिरेव जन्मनो लाभहेतुरित्यर्थः ॥ ४२ ॥ मदनुग्रहविषयतया कृतार्थस्त्वं मदाज्ञातो जगत्सर्गं कुर्वित्याह। सर्ववेदमयेनेति। आत्मनां जीवानामात्मा परमात्मा योनिः कारणं यस्य, तेन उक्तिविधेन मया दत्तेनेत्यर्थः। सर्ववेदमयेन मदुपदिष्टसर्ववेदप्रचुरेणेत्यर्थः। आत्मना ज्ञानेन आत्मशब्दोऽत्र ज्ञानवाची। इदं त्रैलोक्यं याः प्रजाः मयि अनुशेरते उपसंहृताः सत्यस्तिष्ठन्ति, ताः प्रजाश्च यथापूर्वं पूर्वकल्पे यथा तथेत्यर्थः। सृज ॥ ४३ ॥ संवादमुपसंहरति। तस्मै इति। प्रधानपुरुषेश्वरः प्रकृतिपुरुषयोर्नियन्ता कञ्जं जगदात्मकं पद्मं नाभौ यस्य स कञ्जनाभः स उक्तविधो भगवान् जगत्स्रष्ट्रे जगत्स्रष्टुमुद्यते तस्मै ब्रह्मणे एवम् इदं जगन्निर्माणप्रकारादिकं व्यज्य ज्ञापयित्वा स्वेनात्मीयेन रूपेण तिरोदधे। स्वकीयदिव्यमङ्गलविग्रहं तिरोहितमकरोदित्यर्थः ॥ ४४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे नवमोऽध्यायः ॥ ९ ॥

——:※:——

अथ दशमोऽध्यायः

विदुर उवाच

अन्तर्हिते भगवति ब्रह्मा लोकपितामहः। प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः ॥ १ ॥

कालप्रश्नोत्तरं वक्तुं दशमे तु तदुद्भवः। प्रोच्यते दशधा सर्गः प्राकृतादिविभागतः ॥ १ ॥

'यत्र विश्व इमे लोकाः सविकाशं समासते' इत्यादिना कृतप्रश्नोत्तरस्य शुश्रूषया विदुरः पृच्छति। अन्तर्हित इति। अत्र प्रश्नोत्तरयोः क्रमस्त्वविवक्षितः। भगवति षाड्गुण्यपूर्णे परमेश्वरे अन्तर्हिते ब्रह्मागमनुगृह्यान्तर्धानं गते सति, लोकपितामहः विभुर्वशीकृतेन्द्रियः ब्रह्मा दैहिकीर्देहजाताः, मानसीर्मनःसंकल्पजाताश्च प्रजाः कतिधा कतिभिः प्रकारैः ससर्ज सृष्टवान् ॥ १ ॥ ये इति। हे भगवन्मैत्रेय मे मया त्वयि ये अन्य अर्थाः प्रश्नाः पृष्टाः, तान् आनुपूर्व्येण च अनुक्रमेणैव वदस्व। हे बहुवित्तम नोऽस्माकं सर्वसंशयान् छिन्धि। अत्रानुपूर्व्येणेत्येकैकश इति ज्ञेयम्, न तु प्रश्नक्रमानुसारेण, उत्तरेषु तस्यादर्शनात्। ब्रह्मवित्तमेति पाठे स्वाश्रितस्वीयान्यजनसंशयविच्छेदनं ब्रह्मविदस्तव युक्तमिति ब्रह्मवित्तमेति संबुद्ध्यावगम्यते ॥ २ ॥ एवमिति। हे भारत एवमुक्तप्रकारेण तेन क्षत्त्रा विदुरेण संचोदितः उत्तरदाने प्रवर्त्तितः मुनिः कौषारवो मैत्रेयः प्रीतः निरतिशयभगवद्भक्तिसमुत्पादकप्रश्नसंश्रवणेनातिशयितप्रसन्नतां प्राप्तः सन् हृदिस्थितान् स्वस्वान्तावस्थितान् अथकृत्स्नान् तान् प्रश्नान् प्रत्याह प्रत्यभाषत उत्तरयामासेत्यर्थः ॥ ३ ॥ एवमापृष्टो मैत्रेयः संग्रहेणाह। विरिञ्चोपीति षड्भिः। भगवान् षाड्गुण्यपूर्णः अजः जन्मक्षयादिविकारशून्यः स्वयं वैराजो भगवान् यत् आह 'भूयस्त्वं तप आतिष्ठ' इत्यादि यथा जगादेत्यर्थः। तथा तेन प्रकारेणैव विरिञ्चो ब्रह्मापि आत्मनि परमात्मनि आत्मानं मनः आवेश्य स्थिरं कृत्वा, दिव्यं देवमानेन मितं वर्षशतं संवत्सरशतपर्यन्तं तपश्चक्रे ॥ ४ ॥ तदिति। तपसेति। अब्जसंभूतः कमलोत्पन्नः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रह्मा यत् पद्मम् अधिष्ठितः यत्पद्ममधिष्ठायावस्थितः तत्पद्मम् अम्भो जलं च, स एव कालस्तत्कालस्तेन प्रलयकालेन कृतं वीर्यं येन तेन वायुना कम्पितं संजातातिशयितकम्पं विलोक्य एधमानेन यथोत्तरवृद्धिमता तपसा आत्मसंस्थया परमात्मविषयया विद्यया, वा उपासनया च विवृद्धं विज्ञानबलं सृष्टिविषयसामर्थ्यं यस्य स एवंभूतः सन् अम्भसा सह वायुं न्यपात् पीतवान् हि ॥ ५–६ ॥

अथास्य सवाय्वम्भःपानानन्तरं जातवृत्तमाह। तदिति। यदधिष्ठितः यत्पद्ममधिष्ठाय स्थितो ब्रह्मा वियद्व्याप्यन्तरिक्षव्यापि अत्युन्नतमिति यावत्। तत् पुष्करं पद्मं विलोक्य अनेन पुष्करेण प्राक् लीनान् लोकान् कल्पिता अस्मि स्रक्ष्यामि। इतीत्थम् अचिन्तयत् ॥ ७ ॥ पद्मेति। भगवत्कर्मचोदितः स्वयं भगवता कर्त्तव्ये कर्मणि सनियुक्तः सन्नित्यर्थः। ब्रह्मा तत्पूर्वोक्तं पद्मकोशम् आविश्याधिष्ठाय उरुधा बहुविशालतोपेतमित्यर्थः। एकमेकमेव पद्मकोशं त्रिधा भूम्यन्तरिक्षस्वर्गात्मना त्रिप्रकारं भाव्यं भवितुं योग्यं द्विसप्तधा चतुर्दशधापि भाव्यम् इति विज्ञाय तथेति शेषः। व्यभाङ्क्षीत् विभक्तं कृतवान् ॥ ८ ॥ किं बहुना कृत्स्नं जगदेतत्कमलान्तर्भूतमेवेत्याह। एतावानिति। जीवलोकस्य कार्यवर्गस्य जीवानां भोगस्थानस्येति यावत्। संस्थाभेदः संनिवेशविशेषः रचनाविशेष इत्यर्थः। एतावान् पूर्वश्लोकोक्तपरिमाणः उदाहृतः। ननु ब्रह्मणस्तत्स्थानस्य च त्रिलोक्यन्तर्गतत्वात्किमिति प्रत्यहं सृष्टिर्न भवति तत्राह। हि यस्मात् अनिमित्तस्य निष्कामस्य धर्मस्य असौ परमेष्ठी ब्रह्मा विपाकः फलरूपः भवति। परमेष्ठीति परमेष्ठिलोक उपचर्यते। अत्रायं भावः। सकामधर्मफलरूपा त्रिलोक्यस्ति। निष्कामधर्मफलरूपो ब्रह्मलोकः। स च महरादिलोकत्रयस्योपलक्षणम्। परमेष्ठिनो लोकस्य द्विपरार्द्धस्थायित्वोक्तेर्न प्रत्यहं सृष्टिः। तथा च द्वितीये 'यद्वै परार्ध्यं तदु पारमेष्ठ्यम्' इति। नन्वस्तु तस्य तथात्वम्, परं निष्कामाः कथं तद्गच्छन्ति, इति चेद्बेदद्दष्ट्या हिरण्यगर्भोपासकत्वात्तथाविधानां ब्रह्मणा सह मुक्तिः। तथाचोक्तं 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृताः परिमुच्यन्ति सर्वे' इति तृतीये मुण्डके। 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति स्मृतौ च ॥ ९ ॥ एवं जगन्निर्माणप्रकारे समासेनाभिहिते विदुरस्तत्प्रसङ्गे तत्कालकृतवीर्येण कम्पितमिति प्रलयेऽपि कालस्य विद्यमानत्वाभिधानेन तदापि तन्नित्यत्वप्रतीतेस्तन्नित्यत्वजिज्ञासया कालस्वरूपं पृच्छति। यदिति। हे ब्रह्मन् बहुरूपस्य चिदचिदात्मकप्रपञ्चात्मना बहुरूपभाजः अद्भुतकर्मणोऽचिन्त्यव्यापारस्य हरेर्भगवतः संबन्धि यत् कालाख्यं लक्षणं स्वरूपम् आत्थ, तत्कालकृतवीर्येणेत्यादिना कथितवान्। तत्कालाख्यं भगवच्छरीरं हे प्रभो नोऽस्मभ्यं यथा यथावत् वर्णय। तस्य स्थूलं सूक्ष्मं च रूपमित्यादि यथार्थतया संवर्णयेत्यर्थः ॥ १० ॥

एवं विदुरेण पृष्टो मैत्रेयमुनिः कालस्वरूपं वक्तुं प्रथमतः कालकाल्यवस्तुसृष्टिमनुवदति। गुणेत्यादिना यावदध्यायसमाप्ति। तत्र प्रथमं परमात्मन एव कर्तृत्वम्, कारणत्वम्, कार्यतां चाह। गुणैर्व्यतिकरः परिणामो यस्य तद्गुणव्यतिकरं प्रधानम्, तदाकारः शरीरं यस्य स तथोक्तः, निर्विशेषः पृथिव्यादिविशेषरहितः अप्रतिष्ठितः कारणान्तरवर्जितः कार्याणां कारणे प्रतिष्ठा प्रलयः तदभावादप्रतिष्ठितशब्देन कारणान्तरराहित्यं फलितम्। एवंविधः पुरुषः पुरुषशरीरकपरमपुरुषः तत्प्रधानमुपादानमुपादानभूतं यस्य तम्। उपादानभूतप्रधानविशिष्टमित्यर्थः। आत्मानं लीलया असृजत्। आत्मानं प्रधानशरीरतया जगद्रूपेणासृजदित्यर्थः। अनेन चेतनाचेतनयोर्नियन्तुः परमपुरुषस्य निमित्तत्वम्, तदुपादानमित्यनेन प्रकृतिपुरुषकालविशिष्टत्वाकारेणोपादानत्वं चोक्तं भवति। तथा च श्रूयते। 'तदात्मानं स्वयमकुरुत' इति। अस्या अर्थः। तदा सृष्टिमये स्वयंब्रह्मस्वरूपो भगवान् आत्मानम् अकुरुत। निमित्तोपादानभावेन संपादितवान् इति। सूत्रितं च। 'साक्षाच्चोभयाम्नानात्' इति। अस्यार्थः। च नाम ब्रह्मण एव निमित्तत्वमुपादानत्वं चेति कथमेकस्यैवं साक्षात्प्रत्यक्षतया उभयाम्नानात् 'किंस्विद्वनं क उत वृक्ष' इत्यादिश्रुत्योभयथा कथितत्वादिति ॥ ११ ॥ एकस्यैव ब्रह्मणश्चिदचिद्विशिष्टस्यावस्थाभेदेन कार्यकारणभावं प्रतिपादयन् सृष्टेः प्रागवस्थानमाह। विश्वमिति। विश्वं विश्वाकारं ब्रह्म तन्मात्रं प्रकृत्यवस्थामात्रविशिष्टं सत् विष्णुमायया भगवत्संकल्पेन संस्थितं संहारभावं नीतं प्रकृतिमात्रावशेषितं कृतमित्यर्थः। ईश्वरेण ईश्वरशरीरताभाजा अव्यक्ता मूर्त्तिर्यस्य तेन, अव्यक्तमूर्त्तित्वात्केवलमनुमेयेनेत्यर्थः। कालेन परिच्छिन्नं कालेन स्ववशीकृतम् च आसीदिति शेषः। वै प्रलयदशायां सूक्ष्मचिदचिद्विशिष्टं कालपरिच्छिन्नं सदेव ब्रह्मावस्थितमभवदित्यर्थः ॥ १२ ॥ सृष्टिसंहारदशासु सर्वत्र कालस्यानुगतिमाहार्द्धेन। यथेति। इदानीं सृष्टिदशायां यथा सर्वं कालपरिच्छिन्नमिति शेषः। तथा च तथैव अग्रे सृष्टेः प्राक्, प्रलये इत्यर्थः। पश्चादपि भावि प्रलयसृष्ट्योरपि एतज्जगद् ईदृशं कालपरिच्छिन्नमेवेत्यर्थः। न च कालपरिच्छिन्नत्वेनास्यानित्यत्वं शङ्क्यमवस्थानां कालपरिच्छिन्नत्वेऽप्यवस्थावतो द्रव्यस्य नित्यत्वात्। तथा च वैष्णवं वचः। 'तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पवत्' इति। एवं सर्वस्यापि परिच्छेदकः कालः इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सामान्यतः कालस्वरूपमुक्तं भवति। एवं कालकाल्यवस्तुसृष्टिमनूद्याथ तत्सर्गभेदान् प्रलयभेदांश्चानुवदति। सर्ग इत्यादिना दर्शैते विदुरित्यन्तेन। तस्य कालकाल्यवस्तुनः प्राकृतः, वैकृतश्च, यः सर्गः सः नवविधः। यस्तु उभयविधतोपेतः स दशम इति। तत्रायं विवेकः। महत्सर्गादारभ्य वक्ष्यमाणाः षट् प्राकृताः सर्गाः। तदग्रे वक्ष्यमाणाः सप्तमाष्टमनवमाः वैकृताः सर्वेषामेकीकरणे नवसंख्याकाः। दशमं सर्गं 'कौमारस्तूभयात्मकः' इति नवसर्गकथनानन्तरं कथयिष्यतीति ॥ १३ ॥

अथ प्रसङ्गात्प्रलयान्विभजति। कालेत्यर्द्धेन। अस्य सर्गस्य प्रतिसंक्रमः प्रलयः कालद्रव्यगुणैः त्रिविधः। अस्मिन्काले ऽस्य मृतिरिति नियतेन कालेन यः प्रलयः सः कालकृतः, नित्यप्रलय एकः। संकर्षणमुखाग्न्यादिना द्रव्येण यः प्रलयः नैमित्तिकाख्यः, स द्रव्यप्रलयो द्वितीयः। गुणैः सत्त्वादिभिः साम्यावस्थैः सांद्रः जातः, प्राकृताख्यस्तृतीयः प्रलयः। नवविधान् सर्गान् प्रपञ्चयति। आद्य इत्यादिना 'अर्वाक् स्रोतस्तु नवम' इत्यन्तेन। आत्मनः कार्योन्मुखप्रकृति-पुरुषशरीरकात्परमात्मनः सकाशादित्यर्थः। गुणवैषम्यं प्रकृतिस्वरूपगतसत्त्वादिगुणानां विषमीभावः ततः महतो महत्तत्त्वस्य उद्भवः तु आद्यः सर्गः ॥ १४ ॥ द्वितीय इति यत्र यस्मिन्नहंकारे द्रव्यं भूतपञ्चकं च, ज्ञानं ज्ञानेन्द्रियपञ्चकं च, क्रिया कर्मेन्द्रियपञ्चकं च तासामुदयः उत्पत्तिः जायते, तथाविधस्येति शेषः। अहमोऽहंकारस्य सर्गः तु द्वितीयः सर्गः। तन्मात्राणि शब्दादीनि पञ्च, द्रव्याण्याकाशादीनि पञ्च एतान्येव शक्तयोऽस्य सन्तीति तद्वान्। तन्मात्रादीनां शक्तिशब्देनोक्तिर्भगव-च्छरीरत्वात्। 'परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्' इति स्मृतेः। 'यस्य पृथिवी शरीरम्' इत्यादिश्रुतेश्च। भगवच्छरीर-भूततन्मात्रद्रव्यविषयकः भूतसर्गः तु तृतीयः सर्गः ॥ १५ ॥ चतुर्थं इति। ज्ञानक्रियात्मकः। ज्ञानकर्मेन्द्रियविषयः यस्तु ऐन्द्रियः इन्द्रियोत्पत्तिप्रधानः सर्गः चतुर्थः सर्गः। यन्मयं मनः, यस्मान्मनः समुत्पन्नम्, देवसर्ग इन्द्रियाधिष्ठातृदेवानां यस्मात्संभवः तथाभूत इत्यर्थः। वैकारिकः सात्त्विकाहंकारादुत्पन्नः सर्गः स पञ्चमः सर्गः ॥ १६ ॥ षष्ठ इति। प्रभोर्ब्रह्मणः अबुद्धिकृतोऽज्ञानपूर्वं विहितः, स्वकीयं जीवानां वाऽज्ञानमालम्ब्य ब्रह्मणा विहित इत्यर्थः। यः तामसस्तमोगुणसंभूतः सर्गः पञ्चपर्वात्मकाऽविद्यात्मकः स तु षष्ठः सर्गः, इमे षट् सर्गाः तु प्राकृताः। वैकृतान् सर्गानपि मे मत्तः शृणु ॥ १७ ॥ नन्वचिन्त्यविविधविचित्ररचनया ब्रह्मणः श्रमः स्यादित्याशङ्क्य मुनिराह। रजोभाज इति। हरिः संसारहारिणी मेधा यस्य स हरिमेधास्तस्य, यद्विषया मेधा संसारं हरति तस्येत्यर्थः। रजो रजोगुण भाजयति सर्गविधानार्थं ब्रह्माणं गमयतीति रजोभाक् तस्य, भगवतः विधिशरीरकस्य परमात्मनः इयमुक्तविधिसर्गसर्जनरूपा लीला भवति। न ततस्तस्यां क्लेश इति भावः। अथ वैकृतसर्गाननुक्रमिष्यन् प्रक्रान्तपूर्वसर्गापेक्षया स्थावरसर्गस्य सप्तमत्वमाह। सप्तम इति। तस्थुषां स्थावराणां यः मुख्यसर्गः सः सप्तमः, तु स तु षड्विधः। स एव षट्प्रकारश्चेत्यर्थः। अस्य मुख्यत्वं मुखस्येव प्रथमकृतत्वादवगन्तव्यम् ॥ १८ ॥

स्थावराणां षड्विधत्वमेवाह। वनस्पतीति। वनस्पतयश्च, ओषधयश्च, लताश्च, वनस्पत्योषधिलताः तत्र ये पुष्पं विना फलन्ति, ते वनस्पतयः 'फलन्ति ये विना पुष्पैस्तान्वदन्ति वनस्पतीन्' इत्यायुर्वेदोक्तेः। ते च पनसादयः। ओषधयः फलपाकान्ताः ते च व्रीह्यादयः। लता आरोहणापेक्षत्वात्परबलाश्रया राजकोशातक्यादयः (डोडीप्रमुख)। त्वक्साराः वेणुकदलीनडादयः। वीरुधः लता एव काठिन्येनारोहणानपेक्षा वीरुच्छब्देनोच्यन्ते। द्रुमाः ये पुष्पैः फलन्ति, ते आम्रादयः। एतेषां साधारणं लक्षणमाह। उदूर्ध्व स्रोत आहारसंचारो येषां ते। तमःप्राया अव्यक्तचैतन्याः अन्तःस्पर्शाः स्पर्शमेव जानन्ति नान्यत्तदप्यन्तरेव न बहिः। विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवन्तः विशेषिण इति पाठे छेदने सति सपदि शोषवन्तः ॥ १९ ॥ अष्टमं तिर्यक्सर्गं ब्रुवंस्तस्याष्टाविंशद्विधत्वमाह। तिरश्चामिति। तिरश्चां तिर्यग् गच्छतां यः सर्गः सः अष्टमः अष्टाविंशद्विधश्च मतः। तेषां साधारणं लक्षणमाह। अविदः ह्यस्तनाद्यतनस्वश्वस्तनादिज्ञानशून्याः भूरितमसः केवलाहार-निद्रामैथुनभयमात्रनिष्ठाः। घ्राणज्ञाः घ्राणेनैवेष्टमर्थं जानन्ति, इति घ्राणज्ञाः। 'गन्धेन गावः पश्यन्ति' इति वचनात्। हृद्यवेदिनः हृद्गतसुखाद्यनभिज्ञाः न विज्ञातं पश्यन्ति दीर्घानुसंधानरहिता इति भावः। तथाच श्रुतिः अथापरेषां पशूनामशनापिपासे एवाभिविज्ञानं, न विज्ञातं वदन्ति न विदुः श्वस्तनेन लोकालोकौ' इति ॥ २० ॥ अष्टाविंशतिभेदानाह चतुर्भिः। गौरिति। हे सत्तम गौः सुरभिः, अजश्छागः, महिषः सैरिभः, कृष्णः कृष्णमृगः, शूकरो वराहः, गवयः गोसदृशः पशुविशेषः, रुरुर्हरिण-विशेषः, अविर्मेषः, उष्ट्रः क्रमेलकः, इमे नव पशवः द्विशफाः द्विखुराः,। चकारद्वयं पादपूरणार्थम् ॥ २१ ॥ खर इति। हे क्षत्तः खरो लम्बकर्णः,। अश्वः घोटकः, अश्वतरः गर्दभ्यश्वमैथुनजो वामिपर्यायः, गौरो मृगभेदः, शरभः अयमपि मृगभेदः, तथा चमरी चमरोपयोगिपुच्छः पशुविशेषः। एते षट् च एकशफाः। पञ्चनखान् पशून् शृणु ॥ २२ ॥ श्वेति। श्वा भषकः, शृगालः जम्बुकः, वृकः, व्याघ्रः शार्दूलः, मार्जारो बिडालः, शशश्च शल्लकश्च तौ। सिंहः, कपिः, गजः, कूर्मः, गोधा च एते द्वादश पञ्चनखाः। एवं गवादयो गोधान्ता मिलिताः सप्तविंशतिर्भूचराः मकरादयः जलचराः। तैः सहाष्टाविंशतिः ॥ २३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कङ्केति। कङ्कश्च, गृध्रश्च, वटश्च, श्येनश्च, भासश्च, भल्लूकश्च, बर्ही च, ते। हंसश्च, सारसश्च, चक्राह्वश्च, काकश्च, उलूकश्च, आदिर्येषां ते। खगाः खचराः। खचराणामप्येतेषां भूचरैः सहैकीभावेन ग्रहणेऽष्टाविंशतिभेदाः॥ २४॥ अथ नवमं सर्गमाह। अर्वागिति। हे क्षत्तः नृणाम् अर्वाक् अधः स्रोत आहारगतिर्यस्य सः अर्वाक्स्रोतः अत्र ह्रस्वत्वमार्षम्। यः सर्गः स तु नवमः। एकविध एकप्रकारश्च। तत्र नृणां लक्षणमाह रजः रजोगुणः अधिकं प्रचुरं येषु ते, अत एव कर्म क्रियाचरणं परं प्रधानं येषु ते कर्मपराः। न केवलमेतावदेव, किं तु दुःखे सुखमानिनश्चापि॥ २५॥ वैकृता इति। एते त्रयस्तस्थुस्तिर्यङ्मानुषभेदेन त्रिसंख्याकाः सर्गाः वैकृताः एव। न तु कौमारवदुभयात्मका इति भावः। हे सत्तम विदुर यस्तु देवसर्गः सोऽपि वैकृतः। नन्वेवं सत्येकादशसर्गसंभवः स्यादिति चेन्न। प्राकृतसर्गगतदेवानां कारणत्वाद्वैकृते गणितानां कार्यत्वात्कार्यकारणयोरभेदाद्वैकृतोऽप्ययं वैकारिक एव प्रोक्तः। प्राकृतपञ्चमवैकारिकसर्गान्तर्गत एवोक्त इत्यर्थः। प्राकृतसर्गे गणितदेवसर्गत उत्पन्नानामस्मदादीन्द्रियदेवानां वैकृतत्वात्कार्यकारणयोरभिन्नत्वमाश्रित्य, अप्राकृतानामप्येतेषां वैकारिकनाम्ना कथने न बाध इति भावः। वैकृतदेवसर्गान्तर्भूतकौमारसर्गस्योभयात्मकत्वमाह। कौमारः सर्गः तु उभयात्मकः। प्राकृतो वैकृतश्चेत्युभयात्मकः प्राकृतसर्गस्य प्रतिकल्पमनुत्पत्तिः, वैकृतसर्गस्य प्रतिकल्पमुत्पत्तिः। सनकादीनां प्राकृतदेवसर्गे समुत्पन्नत्वेन प्रतिकल्पमुत्पन्नत्वाभावेऽपि प्राक् सिद्धानां तेषां प्रतिकल्पमुत्पन्नत्ववद्गणनादुभयात्मकत्वम्॥ २६॥ अस्य देवसर्गस्याष्टविधत्वं प्रतिजानंस्तद्भेदानाह। देवसर्ग इति सार्द्धेन। विबुधाः, पितरः, एतत् द्वयं मिलित्वा एकः भेदः। असुराः इति द्वितीयो भेदः। गन्धर्वाश्च, अप्सरसश्च, द्वयं मिलित्वा तृतीयो भेदः। सिद्धाः इत्येष चतुर्थो भेदः। यक्षाश्च, रक्षांसि च, यक्षरक्षांसि इति पञ्चमो भेदः। चारणाः इति षष्ठो भेदः। भूतानि च, प्रेताश्च, पिशाचाश्च, ते अयं सप्तमः भेदः। विद्याध्राः किंनरादयश्च इत्यष्टमो भेदः। एवं देवसर्गः अष्टविधः॥ २७॥ अनुक्रान्तान् सर्गान् निगमयति। दशेति। हे विदुर विश्वसृट्कृताः ब्रह्मशरीरकपरमात्मविहिताः एते दश सर्गाः ते तुभ्यम् आख्याताः कथिताः। अतः परं सर्ववस्तुपरिच्छेदककालस्वरूपकथनानन्तरं वंशान् राज्ञामिति शेषः। मन्वन्तराणि च प्रवक्ष्यामि। प्रसङ्गप्राप्ते तत्तत्प्रकरणे कथयिष्यामीत्यर्थः॥ २८॥

एवमिति। हे विदुर एवममुना प्रकारेण कल्पादिषु आदिशब्दो मन्वन्तराख्यावान्तरकल्पसूचकः। स्रष्टा आत्मभूः ब्रह्मशरीरकः अमोघसंकल्पः सत्यसंकल्पः हरिः स्वाश्रितकष्टहरः आत्मा परमात्मा रजःप्लुतः रजोवृतः ब्रह्मद्वारोद्रिक्तरजोगुणः सन्नित्यर्थः। आत्मानम् आत्मनैव सृजति। अनेन 'पुरुषस्तदुपादानमात्मानं लीलयासृजत्' इत्युपक्रान्तमेकस्य हरेरुपादानत्वं निमित्तत्वम्, चोपसंहृतम्। एवमेकस्योपादाननिमित्तत्वे लौकिको मृत्कुलालन्यायो नादर्त्तव्यः। कुलालस्यासर्वशक्तित्वाद्घटोत्पत्तौ नोपादानत्वम्, मृदस्त्वज्ञत्वान्न निमित्तत्वम्। परमात्मनि तु उभयविधतायाः प्रतिपन्नत्वान्न कर्त्रन्तरकर्मान्तरकरणान्तराद्यपेक्षेति भावः॥ २९॥ उक्तनवविधसर्गाणां मध्येऽण्डसृष्टिर्युगपदेव न त्वाकाशादीनामिव क्रमेणेत्याह। गुणव्यत्यय इति। गुणव्यत्यये गुणव्यतिकरात्मके। सृष्टे महदादितत्त्वनिर्मिते एतस्मिन्नण्डे पाठान्तरे गुणव्यत्यये एतस्मिन्नण्डसर्गे सृष्टेः ब्रह्माण्डसर्गस्येति योजना। पौर्वापर्यं पूर्वापरभावं न च नैव इच्छन्ति। क्रमतो महदादितत्त्वे सृष्टेऽपि ब्रह्माण्डसृष्टिस्तु युगपदेवेत्यर्थः। कुत एवं तत्राह। अधीशितुः स्रष्टुरधीशस्य परमात्मनः मायावित्वात् आश्चर्यशक्त्युपेतत्वात् भगवत एवंभूतत्वादण्डसृष्टिर्युगपदेवेत्यर्थः। न चाकाशादिष्वपि यौगपद्यं शङ्क्यम्। 'आकाशाद्वायुः वायोरग्निः' इत्यादिना विरोधात्। युगपदुत्पत्तौ दृष्टान्तमाह। नद्यां भ्रमेः यथा नद्यामावर्त्तबुद्बुदादेर्यथा युगपदेवोत्पत्तिस्तथेत्यर्थः॥ ३०॥ देवेति। हे क्षत्तः अस्मिन् कल्पे ये देवासुरादयः नामरूपाभ्यां प्रकीर्त्तिताः मन्वन्तरान्तरेऽपि कल्पान्तरेऽपि ते एव आसन्॥ ३१॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे दशमोऽध्यायः॥ १०॥

——:❋:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथैकादशोऽध्यायः

मैत्रेय उवाच

चरमः सद्विशेषाणामनेकोऽसंयुतः सदा । परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥

लक्षणैः परमाण्वाद्यैः काल एकादशे ततः । वर्ण्यते कल्पमानाद्यं युगमन्वन्तरादितः ॥ १ ॥

एवं सामान्यतः कालस्योपलक्षणभूतं गुणव्यतिकरं दशविधं निरूप्येदानीं तस्यैव विशेषं निरूपयितुं प्रथमं कालपरिच्छेद्यवस्तु लक्षयति द्वाभ्याम् । चरम इति । सतः कार्यस्य विशेषा अंशास्तेषां सद्विशेषाणां यः चरमः अन्त्योंशः अत्यल्पो भाग इत्यर्थः । यस्मात्‌ परो भागो न स्यात्तथाभूतोऽचक्षुर्ग्राह्यो भाग इति भावः । एनं विशिनष्टि । अनेकः न विद्यते एकोऽन्यो यस्य सः स्वस्मिन्स्वसदृशेतरभागवर्जितः कार्यावस्थामप्राप्त इत्यर्थः । असंयुतः समुदायावस्थां चाप्राप्तः स्वस्मिन स्वसमानद्वितीयतृतीयाद्यभावात् । अत एव सदा कार्यसमुदायावस्थयोरपगमेऽपि विद्यमानः एवं सर्वथैकसंख्यतोपेतः सः परमाणुः विज्ञेयः । नृणां व्यवहर्तॄणां यतः येभ्यः समुदितेभ्यः ऐक्यभ्रमः अवयवीभावमतिः जायते इति शेषः । तथा च पञ्चमस्कन्धे अवयवाभावनिराकरणे वक्ष्यति 'येषां समूहेन कृतो विशेष' इति कार्यानुपपत्त्या कल्प्यते इति भावः ॥ १ ॥ सूक्ष्मतामुक्त्वा स्थूलतामाह । सत इति । सतः परमाणुतारूपकारणावस्थायामसद्वत्प्रतीयमानत्वेऽपि कार्यावस्थायामिन्द्रियग्राह्यतया सद्रूपेण वर्त्तमानस्य प्रलये परमाणुभावापन्नस्य पृथिव्यादेर्वस्तुनः सृष्टिदशायां स्वसमानैः सर्वैस्तदितरपरमाणुभिरेकीकरणेन कार्यावस्थयाऽवस्थितस्येत्यर्थः । स्वरूपावस्थितस्य विकारान्तररहितस्य पदार्थस्य पृथिव्यादेर्वस्तुनः यत्‌ कैवल्यं केवलस्वरूपं स एव परममहान्‌ निरतिशयप्रकर्षः ज्ञेयः । तं विशिनष्टि । अविशेषः पुनर्भाव्यप्रकर्षान्तररहितः । निरन्तरः भेदविवक्षारहितः अग्राह्यावयवभेद इत्यर्थः । अयमस्य श्लोकद्वयस्य भावो दृष्टान्तेन प्रदर्श्यते । शरावपरिमितमृदो गोलकस्य चूर्णे कृते यस्याग्रे चूर्णभावो न स्यात्तथाविधो भागः परमाणुस्थानीयः । स गोलकात्मना प्राग्वर्त्तिन्या मृदोऽन्त्यावयवः । एवंभूतानवयवान्मिथः संयोज्य निर्मितो गोलकात्मकोऽवयवी निगद्यते स परममहत्स्थानीयः । एवं जलादीनामपि बोध्यम् ॥ २ ॥ अनया दिशा सूक्ष्मस्थूलकाललक्षणं ज्ञेयमित्याह । एवमिति । हे सत्तम विदुर एवं सौक्ष्म्ये सूक्ष्मतायां स्थौल्ये स्थूलतायां च कालः अपि अनुमितः परमाणुरूपताभाक्त्वे कालस्य सौक्ष्म्यं संवत्सरादिरूपेण स्थूलतारूपपरममहत्ताभाक्त्वे स्थौल्यं चानुमातव्यमित्यर्थः । एतदेव स्पष्टयति । विभुरतिसमर्थः भगवानयं कालः संस्थानभुक्त्या स्वावच्छेद्यवस्त्वणुत्वमहत्त्वभुक्त्या अव्यक्तः व्यक्तभुक् च जायते इति शेषः । परमाणुपरिच्छेद्यवस्तुभुक्त्या अव्यक्तः परममहत्परिच्छेद्यवस्तुभुक्त्या व्यक्तः । एवं व्यक्तत्वाव्यक्तत्वे ज्ञेये । यद्वा भगवान्‌ भगवदात्मकः अव्यक्तः । स्वयं व्यक्ततारहितः, व्यक्तभुक् व्यक्तवस्तुपरिणामहेतुः, अत एव विभुः समर्थः । स कालः संस्थानभुक्त्या उक्तविधो ज्ञेयः इति शेषः ॥ ३ ॥ एतदेव प्रपञ्चयति । स इति । यः कालः परमाणुतां परमाण्ववस्थारूपं सौक्ष्म्यं भुङ्क्ते भजति, सः कालः वै एव परमाणुः ज्ञेयः । यस्तु कालः सतः कार्यमात्रस्य विशेषभुक् परममहत्तारूपस्थौल्यं भुङ्क्ते इत्यर्थः । सः कालः परमः महान्‌ परममहानितिसंज्ञः ज्ञेयः । अयमर्थः । 'ग्रहर्क्षताराचक्रस्थ' इत्यादिना यत्सूर्यस्य पर्यटनं वक्ष्यते, तत्र सूर्यो यावता परमाणुदेशमतिक्रामति, तावान्‌ कालः परमाणुः । यावता च द्वादशराश्यात्मकं सर्वभुवनकोशमतिक्रामति, स परममहान्‌ संवत्सरात्मकः कालः । तस्यैवावृत्त्या युगमन्वन्तरादिक्रमेण द्विपरार्धान्तत्वमिति । तथा च पञ्चमे सूर्यगत्यैव कालादिविभागं वक्ष्यति ॥ ४ ॥

इदानीं द्व्यणुकादिलक्षणकथनपूर्वकमवान्तरकालस्य मध्यमकालापरपर्यायस्यावस्थां कथयति । अणुरिति । द्वौ परमाणू अणुः स्यात् । द्वाभ्यां परमाणुभ्यामेकोऽणुः स्यादित्यर्थः । त्रिभिः अणुभिः त्रसरेणुः स्मृतः, त्रिभिरणुभिरेकस्त्रसरेणुः स्यादित्यर्थः । जाले जालके येऽर्करश्मयः सूर्यकिरणास्तेषु अवगतः जालकरन्ध्रनिष्क्रान्तादित्यरश्मिषु दृष्ट इत्यर्थः । योऽसौ त्रसरेणुरतिलघुत्वेन खमाकाशम्‌ अनुपतन्‌ सन्नेव अगात्‌ गतः । पाठान्तरे खमनुपतन्नेवावगतो भवेत् । गां पृथ्वीं गतः न, दृश्यो न भवेदित्यर्थः । अयमेव लोकचक्षुर्ग्राह्य इति ॥ ५ ॥ त्रसरेण्विति । त्रसरेणुत्रिकं त्रुटिः, त्रिभिस्त्रसरेणुभिस्त्रुटिर्भवेदित्यर्थः । त्रसरेणुत्रिकं यः भुङ्क्ते, सः कालः अपि त्रुटिः स्मृतः । त्रुटिसंज्ञिक इत्यर्थः । शतं भागास्त्रुटिरूपा यस्मिन्सः वेधः स्यात् । शतसंख्यत्रुटिभिरेको वेधः भवेदित्यर्थः । तैः त्रिभिः वेधैः लवः स्मृतः, वेधत्रयेण लवो भवेदित्यर्थः ॥ ६ ॥ निमेष इति । त्रयः लवाः यस्मिन्सः त्रिलवः निमेषः ज्ञेयः । त्रिभिर्लवैरेको निमेषः ज्ञेय इत्यर्थः । त्रयः ते निमेषाः क्षणः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नातः उक्तः। त्रिभिर्निमेषैः क्षणः कथितोऽस्तीत्यर्थः। पञ्च क्षणान् काष्ठां विदुः, पञ्चभिः क्षणैरेकः काष्ठाख्यः कालः कथितोऽस्तीत्यर्थः। दश पञ्च च ताः काष्ठाः लघु, पञ्चदशभिः काष्ठाभिरेकं लघु जायते इत्यर्थः॥ ७॥ लघ्विति। दश पञ्च च लघूनि नाडिका समाम्नाता। पञ्चदशभिर्लघुभिरेका नाडिका जायते इत्यर्थः। द्वे द्विसंख्याके ते नाडिके मुहूर्त्तः। द्वाभ्यां नाडिकाभ्यां मुहूर्त्तं जायते इत्यर्थः। मुहूर्त्तशब्दः क्लीबपुंसोः। षट् वा सप्त नाडिकाः नृणां यामः प्रहरः, षड्भिः सप्तभिर्वा नाडिकाभिः प्रहरपर्यायो यामा जायते इत्यर्थः। दिनह्रासे षड्घटिकात्मकः, दिनवृद्धौ च सप्तघटिकात्मकः नृणां याम इति ज्ञेयम्॥ ८॥ प्रत्यहं तद्भेदान् गणयितुमशक्यत्वान्नाडिकामानं ज्ञापयितुं नाडिकाया उन्मानमाह। द्वादशार्द्धेति। उन्मीयतेऽनेनेत्युन्मानं पात्रम्, द्वादशार्द्धानि पलानि षट् पलानि तेषामुन्मानं पात्रम्। षट्पलपरिमितताम्रघटितभाजनमित्यर्थः। चतुरङ्गुलैश्चतुरङ्गुल्यायतैः पञ्चगुञ्जो माषः। चतुर्भिः स्वर्णमाषैः कृतं छिद्रं यस्मिंस्तथाभूतं सत् यावद्यावता कालेन प्रस्थजलेन प्लुतं प्रस्थपरिमितजलेन निमज्जितं भवेदिति शेषः। तावान्कालः नाडिका। अस्यायं भावः। षट्पलपरिमितताम्रस्य ताम्रकूटेन प्रस्थजलपूरं पात्रं विधाप्य, तन्मध्यप्रदेशे विंशतिगुञ्जातुलितस्वर्णस्य चतुरङ्गुलायतशलाकां स्वर्णकारेण कारयित्वा तस्या अन्तः प्रवेशो यावता छिद्रेण स्यात्तावच्छिद्रितं च कारयित्वा, पात्रान्तरभृतजलोपरि निधाप्य प्रस्थजलपूर्त्या यावन्निमज्जेत्तावान्कालो नाडिकेति। अत्र पलच्छिद्रयोराधिक्ये शीघ्रं निमज्जेदल्पत्वे च विलम्बेनेति पलशलाकयोर्नियमः॥ ९॥ यामा इति। चत्वारः चत्वारः यामाः मर्त्यानाम् उभे अहनी अहोरात्रम्, हे मानद पञ्चदश अहानि अहोरात्रात्मकानि शुक्लः कृष्णश्च पक्षः। पञ्चदशभिरहोरात्रैः शुक्लः पक्षः। अपरैः पञ्चदशभिरहोरात्रैः कृष्णः पक्ष इत्यर्थः॥ १०॥

तयोरिति। तयोः शुक्लकृष्णयोः पक्षयोः समुच्चयः समुदायः मासः। नृणामिति शेषः। तदुक्तप्रकारो मास इत्यर्थः। पितृणाम् अहर्निशमहोरात्रः कृष्णपक्षः पितृणां दिनम्, शुक्लपक्षस्तेषां रात्रिरित्यर्थः। अयमाशयः। चन्द्रलोकस्थाः पितरः शुक्लपक्षे चन्द्रान्तर्हितं सूर्यं न पश्यन्ति। कृष्णपक्षे तु चन्द्रसूर्याभिमुख्यात्तदाश्रितास्तं पश्यन्तीति। शुक्लकृष्णपक्षौ तेषां क्रमेण रात्र्यहनीति तौ नृमानेन प्रागुक्तौ। द्वौ मासौ ऋतुः। नृणामिति शेषः। षट् षट्संख्याकाः मासाः अयनमयनसंज्ञं कथ्यते इत्यर्थः। तच्च दक्षिणम्, उत्तरम्, इति द्विविधं ज्ञेयम्। द्वितीयस्योत्तरेणान्वयः॥ ११॥ देवानां विशेषमाह। अयने इति। अयने च दक्षिणोत्तरायणेऽपि दिवि स्वर्गे अहनी प्राहुः। देवानामहर्निशमित्यर्थः। अस्याऽयमभिप्रायः। मकरादामिथुनान्तं रविरथाक्षरश्म्योर्ध्रुवेणाकर्षणेऽनुदिनं क्रियमाणे, उत्तराभिमुखः सूर्यो मेरुमूर्द्धस्थानां देवानां दृश्यो भवतीति तेषां तदा दिनम्। कर्काद्यावद्धनुरन्तं तयोरेव रश्म्योर्ध्रुवेण क्रमादुन्मोचने क्रियमाणे दक्षिणाभिमुखः सूर्यो देवानामदृशो भवति, तदा तेषां रात्रिरिति। द्वादश, पूर्वोक्ता द्वादशमासाः वत्सरः स्मृतः। नृणामेकं वर्षं स्मृतमित्यर्थः। संवत्सरशतं नृणां परमायुः निरूपितम्। नातोऽधिको नृणामायुः कालः इत्यर्थः। नृणामित्युपलक्षणं तेनान्येषामपि स्वस्वमानेन शतसंवत्सरात्मक आयुः काल इत्यर्थः॥ १२॥ अनेन क्रमेण सूर्यः नित्यं नृणामायुः क्षपयतीत्याह। ग्रहेति। अनिमिषो नित्यजागरूकः विभुः स्वयं सूर्यः, ग्रहाश्चन्द्रादयश्च, ऋक्षाण्यश्विन्यादीनि च, तारा ध्रुवादयोऽन्ये तारकाश्च, तासां चक्रं मण्डलं तत्र तत्र तिष्ठतीति। ग्रहाद्युपलक्षितकालचक्रावस्थितः सन् इत्यर्थः। जगत् द्वादशराश्यात्मकं भुवनकोशं परमाण्वादिना संवत्सरावसानेन कालेन पर्य्येति अटति परिभ्रमतीत्यर्थः॥ १३॥

उक्तस्यैतस्य सर्वात्मककालचक्रस्य सूर्यादिगतिभेदेन नामभेदमाह। संवत्सर इति। हे विदुर संवत्सरः आदित्यगत्या वर्षमानं संवत्सर इत्यर्थः। परिवत्सरः बृहस्पतिगत्या वर्षमानं परिवत्सर इत्यर्थः। इडावत्सरः त्रिंशद्दिनात्मकमासैरादित्यगतिवशादिडावत्सर इत्यर्थः। एव चेति पादपूरणार्थकम्। अनुवत्सरः वत्सरश्च चान्द्रनक्षत्रगतिभ्यामनुवत्सरवत्सरौ एवं प्रभाष्यते कथ्यते। अनेन सौरबार्हस्पत्यसावनचान्द्रनाक्षत्रमासभेदेन संवत्सरादिभेदः प्रदर्शितः। केचित्पुनरन्यथापि वदन्ति। यदा शुक्लपक्षप्रतिपदि संक्रान्तिर्भवति 'तदा सौरचन्द्रमासयोर्युगपदुपक्रमो भवति, स संवत्सरः। ततः सौरमानेन वर्षे षट् दिनानि वर्द्धन्ते, चान्द्रमानेन वर्षे षट् दिनानि ह्रसन्ति, इति द्वादशदिनव्यवधानादुभयोरप्रपश्चाद्भावो भवति। एवं व्यवधानतारतम्येन पञ्चवर्षाणि गच्छन्ति, तन्मध्ये द्वौ मलमासौ भवतः, पुनः षष्ठः संवत्सरो भवतीति॥ १४॥ एवं सूक्ष्मस्थूलभावेन कालस्वरूपं निरूप्यैवंभूतः कालात्मा सूर्यो नित्यमप्रमत्तैः पूजनीय इत्याह। य इति। यः भूतानि भिनत्तीति भूतभेदः भूतविकारकृत् परमात्मा, काल इति आख्या यस्यास्तया स्वशक्त्या स्वतनुभूतेन कालेनेत्यर्थः। सृज्यानां शक्तिस्ताम् उरुधा बहुप्रकारेण उच्छ्वसयन् परिणामयन् सन्, पुंसो जीवस्य अभ्रमाय भ्रमो मोहस्तन्निवृत्तये तत्तत्कालकर्त्तव्यधर्मसंबन्धिमोहं निवर्त्तयितुमित्यर्थः। क्रतुभिः साध्यमिति शेषः। गुणमयं सत्त्वादिगुणभेदेन त्रिगुणात्मकं फलं वितन्वन् विस्तारयन् दिवि अन्तरिक्षे धावति सूर्यान्तर्वर्त्ती भूत्वा पर्यटति। तस्मै सूर्यशरीरकाय वत्सरपञ्चकाय पूर्वोक्तसंवत्सरादिपञ्चकरूपाय बलिं हरत पूजां कुरुत॥ १५॥ एवं त्रैलोक्यान्तर्वर्त्तिनामेव पितृदेवमनुष्याणामायुः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रमाणं कथितं श्रुतम्। अथ त्रैलोक्याद्बहिर्भूतानां कियदायुः परिमाणमिति बुभुत्सया पृच्छति विदुरः। पित्रिति। पितृदेवमनुष्याणां परम् आयुः इदं स्मृतम्। स्वस्वमानेन वर्षशतपरिमितं स्मृतमित्यर्थः। कल्पात्कल्पावस्थायिनस्त्रैलोक्यात् बहिः महरादिलोकेष्वित्यर्थः। ये विदो ज्ञानिनः स्युः, परेषामुत्तमानां तेषां ज्ञानिनामित्यर्थः। गतिमायुः स्थितिम् आचक्ष्व कथय ॥ १६ ॥

अहं न जानामीति मा वोच इत्याह। भगवानिति। भगवतो भगवदात्मकस्य कालस्य गतिं भाविनीमपि स्थितिं भगवान्पूज्यो भवान् वेद जानाति। ननु हे मैत्रेय धीरा भवादृशा ज्ञानिनः योगराद्धेन योगसिद्धेन चक्षुषा विश्वं जगत् विचक्षते साक्षात्पश्यन्ति। योगिनामप्रत्यक्षं किंचिदपि नास्तीत्यर्थः ॥ १७ ॥ एवमापृष्टो मुनिस्त्रैलोक्याद्बहिरवस्थितानामा-चतुर्मुखात्सर्वेषां युगसाहस्रं दिनपरिमाणमेवंविधषष्ट्युत्तरत्रिशतदिनात्मकवर्षशतमायुःपरिमाणमिति कथयितुं प्रथमतो युगपरिमाणम्, युगांशसंध्यापरिमाणम्, युगस्वरूपम्, युगधर्मानुवृत्तितारतम्यं चाह चतुर्भिः। तत्रादौ द्वाभ्यां युगपरिमाणं कथयति। कृतमिति। कृतं सत्ययुगं, त्रेता त्रेतायुगम्, द्वापरं द्वापरसंज्ञं युगं च, कलिः कलिसंज्ञं युगं च। इत्येवं चतुर्युगं सावधानं अवधीयते इत्यवधानं संध्या चांशश्च तत्सहितमित्यर्थः। दिव्यैर्देवमानमितैः द्वादशभिः द्वादशसहस्रसंख्यातैः वर्षैः निरूपितम्। सहस्रैरित्युत्तरश्लोकसामर्थ्यात् ज्ञातव्यम्। एषां चतुर्णां युगानां समुदायसंख्या। देवानां द्वादश सहस्रवर्षाणि षष्ट्यधिकशतत्रयेण यदा गुण्यते, तदा मनुष्याणां चतुर्युगवर्षप्रमाणमायाति, तत्तु विंशतिसहस्राधिकत्रि-चत्वारिंशल्लक्षवर्षमितं बोध्यम् ॥ १८ ॥ चत्वारीति। कृतादिषु कृतादिचतुर्युग्यां चत्वारि, त्रीणि, द्वे, एकं च यथाक्रमं सहस्राणि संख्यातानि। द्विगुणानि शतानि च संख्यातानि। अयमर्थः। प्रथमतः कृतयुगस्य देवमानेन चत्वारि सहस्राणि, संध्यासंध्यांशयोश्च चत्वारि चत्वारि शतानि, इत्यष्टौ शतानि अष्टशतोत्तरचतुःसहस्रवत्सराः ससंध्यांशस्य कृतयुगस्य परिमाणम्, एवं त्रेतायास्त्रीणि सहस्राणि संध्यासंध्यांशयोश्च त्रीणि त्रीणि शतानीति षट्शतोत्तरत्रिसहस्रवर्षाणि ससंध्यांशस्य त्रेतायुगस्य परिमाणम्। एवमेव द्वापरस्य द्वे सहस्रे संध्यासंध्यांशयोश्च द्वे द्वे शते इति चतुःशतोत्तरे द्वे सहस्रे ससंध्यांशस्य द्वापरयुगस्य परिमाणम्। तथैव कलेरेकं सहस्रं संध्यासंध्यांशयोश्चैकैकं शतमेवं द्विशतोत्तरमेकसहस्रम्, ससंध्यांशस्य कलियुगस्य परिमाणम्। युगस्यादौ संध्या, युगान्ते संध्यांशः। सहस्राणामुपयुक्तानि शतानि क्रमेण तत्संध्यांशयोः परिमाणमित्यवगन्तव्यम् ॥ १९ ॥ ननु ससंध्यांशस्यैव युगत्वमुत ताभ्यामन्तरेण मध्यस्यैवेति संशयं निराकुर्वंश्चतुर्युगेषु तत्तद्वर्णाश्रमधर्माणामवश्यकर्त्तव्यमाह। संध्यांशयोरिति। शतानि संख्या ययोः तयोः शतसंख्ययोः सन्ध्यांशयोः अन्तरेण मध्ये यः कालः तं कालम् एव तज्ज्ञाः युगज्ञाः युगम् आहुः। यत्र युगे धर्मः युगानुगुणः नित्यनैमित्तिककाम्यकर्मभेदेन त्रिविधोऽपि सदाचारः विधीयते। कर्त्तव्यत्वेन बोध्यते इत्यर्थः ॥ २० ॥

कृते चतुष्पदो धर्मस्य सम्यगनुवृत्तिः, त्रेतादिषु तु तत्संकोचं चाह। धर्म इति। कृते कृतयुगे मनुजान् चतुष्पात् धर्मः समनुवर्त्तते। अन्येषु त्रेतादिषु त्रिषु पादेन एकैकेन पादेन वर्द्धता वृद्धिं गच्छता अधर्मेण हेतुना एव स धर्मः व्येति अपगच्छतीत्यर्थः ॥ २१ ॥ अथ त्रैलोक्याद्बहिर्वर्त्तमानानां दिनपरिमाणमाह। त्रैलोक्यादिति। त्रैलोक्यात् बहिः स्थितानामिति शेषः। आब्रह्मणः ब्रह्मपर्यन्तानां सर्वेषामित्यर्थः। युगसाहस्रं चतुर्णां युगानां सहस्रवारमावृत्तिः दिनम् अहः। हे तात विदुर निशा रात्रिः तावती दिनमानपरिमिता एव युगसहस्रपरिमितेत्यर्थः। यद्यस्यां रात्रौ विश्वसृक् ब्रह्मा निमीलति स्वपिति ॥ २२ ॥ तत्र दिनस्थितिमाह। निशावसान इत्यादिनान्तः स तस्मिन्नित्यन्तेन। निशाया रात्रेरवसानमत्ययस्तस्मिन् निशायामपगतायां सत्यामित्यर्थः। आरब्धः, कल्पनं कल्पः सर्गः लोकानां कल्पः लोककल्पः। चतुर्दश मनून् भुञ्जन्व्याप्नुवन्सन् भगवतः ब्रह्मणः यावत् दिनम्, तावत् अनुवर्त्तते। मन्वायुःपरिमाणमाह। स्वं स्वमिति। साधिकां किंचिदधिकाम् एकसप्ततिं युगानामेकाधिकां सप्ततिमित्यर्थः। स्वं स्वं कालं मनुः भुङ्क्तेऽनुभवतीत्यर्थः। 'द्विमनुशर ५१४२ समाः, सपंक्ति १० मासाः, वसु ८ दिवसाः, श्रुतिवह्नि ३४ मानदण्डाः। सहयविधु १७ पलाः प्रपूरणीयाः प्रतिमनुकालमतः पले २ तु शिष्टे'। शेषे द्वे पले भवत इत्यर्थः। अयं साधिकामित्यस्यार्थः। अन्ये तु सार्द्धाष्टदशलक्षवर्षाधिकैकसप्ततिचतुर्युगावसानो मन्वन्तरकाल इत्याहुः ॥ २३ ॥ मन्वन्तर-गतानां स्थितिमाह। मन्वन्तरेष्विति। मनूनामन्तराणि मन्वन्तराणि तेषु पूर्वपूर्वमनुमारभ्योत्तरोत्तरमनुप्राग्वर्त्तिनो ये मध्यगाः कालाः मन्वन्तरसंज्ञा ज्ञेयास्तेष्वित्यर्थः। मनवः तद्वंश्या मनोर्वंशोद्भवपृथिवीपालका राजानः, ऋषयः सप्तर्षिप्रमुखा मुनयः, सुरा देवाः, सुरेशा इन्द्राश्च, तान् अनु पश्चाच्च ये वर्त्तन्ते, गन्धर्वादयः एते सर्वे युगपत् प्रभवन्ति, त्रिलोकीं युगपत्पाल-यन्तीत्यर्थः ॥ २४ ॥ एष इति। त्रैलोक्यस्य वर्त्तनं वृत्तिर्यस्मिन्, सः एषः ब्राह्मो ब्रह्मसंबन्धी दैनंदिनः दिने दिने क्रियमाणः सर्गः ज्ञेयः। यत्र यस्मिन् दैनंदिनसर्गे तिर्यञ्चश्च, नरश्च, पितरश्च, देवाश्च तेषां कर्मभिः पुण्यपापरूपैः संभवः जायते ॥ २५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्वन्तरेष्विति। सत्त्वम्, शुद्धं सत्त्वं बिभ्रद्दधानः भगवान् उदितमाविष्कृतं पौरुषं पुरुषकारो येन, तथाभूतः सन् स्वमूर्त्तिभिः स्वावतारैः मन्वादिभिश्च कृत्वा मन्वन्तरेषु इदं विश्वम् अवति रक्षति ॥ २६ ॥ एवं दिननियतां स्थितिमभिधायाथ रात्रिनियतां स्थितिमाख्यातुमुपक्रमते। तमोमात्रामिति। तमसस्तमोगुणस्य मात्रा लेशस्ताम् उपादाय स्वीकृत्य, वर्त्तमानः प्रतिसंरुद्धो निवृत्तो विक्रमो व्यापारो यस्य सः कालेन अनुगतमनुप्रविष्टमशेषं यस्मिन्सः एवंभूतः सन्, ब्रह्मा दिनात्यये दिनान्ते तूष्णीम आस्ते मौनमुपादाय स्वपिति ॥ २७ ॥ अनुगताशेषत्वं विशदयति। तमेवेति। तमेव ब्रह्मणः स्वापकालमेव अनु पश्चात् अनुप्रवृत्तस्य तस्य कालस्य पृष्ठत इत्यर्थः। निशायां रात्रौ अनुवृत्तायां प्रवर्त्तमानायां सत्यां निर्मुक्तशशिभास्करं चन्द्रसूर्यरहितं यथा भवति तथा भूरादयः त्रयः लोकाः अपिधीयन्ते तिरोहिता भवन्ति। भूरादय इत्यनेन भूम्यन्तःस्थिता अतलादयः सप्तापि। एवं दश लोकास्तिरोभवन्तीति भावः ॥ २८ ॥ पुनस्तमेवापिधानकालमाह। त्रिलोक्यामिति। शक्त्या भगवच्छक्तिरूपेण संकर्षणमुखोद्भूतरुद्रगणरूपाग्निना त्रिलोक्यां दह्यमानायां सत्याम् ऊष्मणा जातघर्मव्यथया अर्दिताः संप्राप्तार्दनाः भृग्वादयः महर्लोकवासिनो भृगुप्रभृतयो मुनयः महर्लोकात्। जनं जनलोकं यान्ति जनलोके गच्छन्तीत्यर्थः ॥ २९ ॥ तावदिति। तावत्तदा कल्पस्यान्तस्तेनैधिताश्च ते सिन्धवः समुद्राश्च ते, उत्कटोऽतितीव्र आटोपः क्षोभो येषाम्, ते च ते चण्डवातास्तैरीरिता उत्पादिता ऊर्मयो येषां तथाभूताः सन्तः, त्रिभुवनं संकर्षणाग्निदग्धत्रैलोक्यमित्यर्थः। सद्यस्तत्क्षणमेव प्लावयन्ति निमज्जयन्ति ॥ ३० ॥ अथैवंविधाम्भसि भगवतोऽवस्थानमाह। अन्तरिति। तस्मिन्नुक्तप्रकारे सलिले एकार्णवोदके अन्तर्मध्ये सः हरिर्वैराजो भगवान्, योगः स्वानुभवरूपो ध्यानयोगः सः एव निद्रा तया मीलिते अक्षिणी यस्य सः। जनालयैर्जनलोकवासिजनैः स्तूयमानः कृतसंस्तवनः, अनन्तः शेषः आसनं यस्य तथाभूतः सन्, आस्ते तिष्ठति ॥ ३१ ॥

एवं त्रैलोक्याद्बहिर्वर्त्तमानानामायुषः परिमाणमभिधाय 'एते वै निरयास्तात स्थानस्य परमात्मनः। इत्युक्तरीत्या ब्रह्मभुवनादेर्हेयत्वमाख्यातुं ब्रह्मायुषोऽप्यपक्षयमाह। एवमिति। कालगत्या परमाण्वादिसंवत्सरान्तरूपया कालस्य। गत्येत्यर्थः। उपलक्षितैः एवंविधैः पूर्वोक्तप्रकारैः अहोरात्रैः परं वर्षशतपरिमितसकलप्राण्यायुषः सकाशादधिकं वयःशतं स्वमानेन संवत्सरशतात्मकमित्यर्थः। अस्य ब्रह्मणः यत् आयुः तदपि अपक्षितमिव अपक्षीणमिव। इवशब्देन किंचिदायुरपक्षीणं किंचिदवशिष्टमपि भवतीति संसूचितम् ॥ ३२ ॥ कियदपक्षीणम्, कियदवशिष्टमस्तीत्यत्राह। यदिति। तस्य ब्रह्मणः यत् आयुषस्तन्मानेन संवत्सरशतात्मकायुःकालस्य अर्द्धं परार्द्धम् अभिधीयते, परार्द्धमिति नाम्ना कथ्यते। तत्र पूर्वः द्विपरार्द्धात्मकायुषो ब्राह्मणः आद्यः परार्द्धः अपक्रान्तोऽपगतः। अपर उत्तरः परार्द्धः अद्याधुना प्रवर्त्तते हि ॥ ३३ ॥ पूर्वस्येति। पूर्वस्य परार्द्धस्य आदौ ब्राह्मः नाम महानत्युत्तमः कल्पः अभूत। कोऽसौ तत्राह। यं ब्रह्माणं शब्दब्रह्म इति विदुः, सः ब्रह्मा यत्र यस्मिन् ब्राह्मकल्पे अभवत् ॥ ३४ ॥ तस्येति। तस्य पूर्वपरार्द्धस्य अन्ते एव यं कल्पं पाद्मम् इति अभिचक्षते, स पाद्माख्यः कल्पः अभूत्। यच्च यत्र कल्पे एव हरेर्वैराजभगवतः नाभिरेव सरः सरोवरं तस्मात् लोकसरोरुहं भुवनकोशात्मकं कमलम् आसीदुदपद्यत ॥ २५ ॥ अयं त्विति। हे भारत अयं कल्पः तु द्वितीयस्य परार्द्धस्यापि आदाविति शेषः। कथितः। यत्र यस्मिन्नेतस्मिन्कल्पे हरिः शूकरो वराहाकृतिः आसीत्। ततः वाराहः इति विख्यातश्च आसीत्। यस्मिन् दिने ब्रह्मणः उत्पत्तिः स कल्पः श्वेतनामा सन्नपि ब्रह्मोत्पत्तिमालम्ब्य ब्राह्म इत्युक्तः। एवं द्वितीयपरार्द्धादिकल्पस्यापि श्वेतसंज्ञत्वेऽपि वराहोत्पत्तेस्तस्मिन्सत्वाद्वाराह इति संज्ञा। एतत द्वितीयस्कन्धे दशमाध्यायान्ते सम्यक् प्रपञ्चितमस्ति, ततो बोध्यम् ॥ ३६ ॥

ननु यथा ब्रह्मादीनां कालकाल्यत्वमुक्तम्, तद्वत्परमात्मनोऽपि किं कालकाल्यत्वमस्ति, न वेत्याशङ्क्य नेत्याह। काल इति। द्विपरार्द्धाख्यः अयं कालः अनादेरनादित्वादकालकाल्यस्य अव्याकृतस्य प्राकृतनामरूपरहितस्य जगदात्मनः सर्वान्तरात्मनः अनन्तस्य गुणविभूत्याद्यन्तवर्जितस्य भगवतः निमेषः अक्षिस्पन्दमात्रम् उपचर्यते हि। निमेषमात्रमिवोपचारमात्रेण कथ्यते इत्यर्थः ॥ ३७ ॥ काल इति। परमाणुरादिर्यस्य सः द्वितीयः परार्द्धो द्विपरार्द्धस्तस्यान्तोऽवसानभूतः योऽयं कालः सः ईश्वरः सन्नपि धाममानिनां देहगेहाद्यभिमानवताम् ईश्वरस्तान्नियन्तुं समर्थोऽस्ति, भूम्नः परिपूर्णस्य ईशितुं परमात्मानं नियन्तुं त्वित्यर्थः। प्रभुः समर्थः नैव ॥ ३८ ॥ भूमत्वमेवाह। विकारैरिति त्रिभिः। विकारैः दशेन्द्रियाणि पञ्च भूतानि मनश्चेत्येवं षोडशविकारैः सहितः युक्तः, युक्तैर्यथोत्तरं संयुक्तैः दशोत्तराधिकैर्दशगुणमुत्तरोत्तरमधिकैः विशेषादिभिः पृथिव्प्तेजोवाय्वाकाशाहंकारमहत्प्रकृतिभिः बहिः आवृतः पञ्चाशत्कोटिविस्तृतः अयं अण्डकोशः ॥ ३९ ॥ दशेति। यत्र यस्मिन् प्रविष्टः सन् परमाणुवत् लक्ष्यते दृश्यते। न केवलमयमेव तत्रैवंविधः, किं तु एवंविधाः अन्ये च कोटिश अपि अण्डराशयः। यत्र अन्तर्गताः प्रविष्टाः सन्तः परमाणुवदेव दृश्यन्ते हि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उभयोरेकान्वयः ॥ ४० ॥ नन्वेवंविधं तत्किमित्यत्राह । तदिति । सर्वेषां कारणानामपि कारणं तत् अक्षरं ब्रह्म आहुः । अहो एवंविधमहिमोपेतमेतत्किं भगवत्स्वरूपं नहि नहि तर्हि किमित्यत्राह । महात्मनो महानुभावस्य पुरुषस्य सर्वदा पुरुषाकृतेः साक्षात्स्वैकान्तिकानां साक्षाद्दृश्यस्य विष्णोः सर्वान्तर्यामिणः श्रीहरेः परं सर्वोत्कृष्टं धाम निवासस्थानम् इति निगमादय आहुरिति शेषः । तत्र कालः कथं प्रभुः स्यादित्यभिप्रायः ॥ ४१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

——:※:——

अथ द्वादशोऽध्यायः

मैत्रेय उवाच

इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः । महिमा वेदगर्भोऽथ यथास्राक्षीन्निबोध मे ॥ १ ॥

कुमारादिमनःसर्गाः नतिवृद्ध्यानुवर्ण्यते । द्वादशे मनुसर्गस्तु कायद्वैधेन योनिजः ॥ १ ॥

एवं कालस्वरूपं सविस्तरमभिधाय प्रकृतमनुसर्गमेव विशेषतः संप्रतिपादयितुमिच्छंस्तमेव वृत्तकथनपूर्वकं प्रतिजानीते । इतीति । हे क्षत्तः परमात्मनः कालाख्यः महिमा ते तुभ्यम् इत्युक्तप्रकारेण वर्णितः, अथ वेदगर्भो ब्रह्मा यथा येन प्रकारेण अस्राक्षीत्, तथा तत्प्रकारं मयानुवर्ण्यमानमिति शेषः । मे मत्तः निबोध शृणु ॥ १ ॥

प्रथममज्ञानजपञ्चपर्वसृष्टिमाह । ससर्जेति । अग्रे व्यष्टिसृष्ट्यादौ आदिकृद्ब्रह्मा अन्धतामिस्रम्, अथ तामिस्रम्, महामोहं च, मोहं च, तमश्च इति अज्ञानवृत्तयः ससर्ज । इमाः पञ्च या अज्ञानवृत्तयस्ताः ससर्जेत्यर्थः । प्रातिलोम्येनैतदर्थाः । तमोनाम स्वस्वरूपाप्रकाशः । मोहो देहाद्यहंबुद्धिः । महामोहो भोगेच्छा । तामिस्रं तत्प्रतिघाते क्रोधः । अन्धतामिस्रं तन्नाशेऽहमेव मृतोऽस्मीति बुद्धिः ॥ २ ॥ दृष्ट्वेति । ब्रह्मा पापीयसीमतिपापरूपां सृष्टिं दृष्ट्वा आत्मानं स्वम्, बहु अतिसमीचीनम्, न अमन्यत । ततः भगवतो ध्यानं तेन मनसा अन्यान् असृजत् ॥ ३ ॥ तानाह । सनकं चेति । आत्मभूर्ब्रह्मा सनकं च, सनन्दम् सनन्दनं च, अथ सनातनं च, सनत्कुमारं च, एतान् निष्क्रियान् निवृत्तिधर्मपरायणान् ऊर्ध्वरेतसः जितेन्द्रियान् मुनीन् शुभाश्रयसंशीलनपरानृषीन् असृजत ॥ ४ ॥ तानिति । स्वभूर्ब्रह्मा हे पुत्रकाः प्रजाः सृजत इति तान् पुत्रान्सनकादीन् बभाषे । अथ मोक्षधर्माणः निवृत्तिधर्मनिष्ठाः, वासुदेवः परमयनं प्राप्यप्रापकाधाररूपो येषां ते तथोक्ताः सन्तः तत्प्रजासर्जनं न ऐच्छन् । पित्रानुज्ञातां सृष्टिं कर्तुं नैवैच्छन्नित्यर्थः ॥ ५ ॥ स इति । स ब्रह्मा प्रत्याख्यातमनङ्गीकृतमनुशासनमाज्ञा यैस्तैः सुतैः पुत्रैः एवमुक्तप्रकारेण अवध्यातः अवज्ञातः सन्, जातं तत्कालोत्पन्नं दुर्विषहं सोढुमशक्यं क्रोधं नियन्तुम् उपचक्रमे उपक्रान्तवान् ॥ ६ ॥ धियेति । धिया बुद्ध्या निगृह्यमाणो विष्टभ्यमानः सन्नपि, स चासौ मन्युश्च तन्मन्युः, स क्रोध इत्यर्थः । प्रजापतेर्ब्रह्मणः भ्रुवोः मध्यात् नीललोहितः कुमारः सन् सद्यः अजायत । निगृह्यमाणोऽपि स क्रोधोऽनिगृहीतं भ्रूमध्यमागत्य तस्मान्नीललोहितकुमाररूपेणजायतेत्यर्थः ॥ ७ ॥

योऽसौ ब्रह्मणो भ्रूमध्याज्जातः स कः किं वाऽकरोदित्यत आह । स इति । देवानां पूर्वजः भगवान् सः भवः सदाशिवः रुरोद जातः सन् रोदनमेव व्यधात् किं वदन् रुरोदेत्यत आह । हे जगद्गुरो हे धातः ब्रह्मन् मे मम नामानि स्थानानि च कुरु, इति ब्रुवन्सन्नेव रुरोद वै ॥ ८ ॥ इतीति । इत्येवंभूतं तस्य भवस्य वचो वचनं प्रतिपालयन्नङ्गीकुर्वन् पाद्मः पद्मोत्पन्नः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगवानैश्वर्यवान्ब्रह्मा हे पुत्र, मा रोदीः रोदनं मा विदध्याः, ते तव तत्प्रार्थितं सर्वं करोमि इति भद्रया शान्तिकारिण्या वाचा अभ्यधात्कुमारं प्रति कथयामास ॥ ९ ॥ नामकरणमेवाह। यदिति। हे सुरश्रेष्ठ सोद्वेगो भयसहितः सन् बालक इव यद्यस्मात् अरोदीः रोदनमकार्षीः, ततः रोदनान्निमित्तात् रुद्रः इति नाम्ना, प्रजाः त्वाम् अभिधास्यन्ति कथयिष्यन्ति ॥ १० ॥ स्थानकरणमाह। हृदिति। हृद् हृदयम्, इन्द्रियाणि दशाप्यक्षाणि, असुः प्राणः, व्योमाकाशः, वायुः पवनः, अग्निर्हुताशनः, जलं तोयम्, मही पृथिवी, सूर्यो मार्त्तण्डः, चन्द्रो हिमांशुः, तपः कृच्छ्रादि च, इति स्थानानि अग्रे प्रथमतः एव मे मया कृतानि सन्तीति शेषः ॥ ११ ॥ एकादशस्थानस्थस्य पुनः स्थानभेदान्नामभेदानाह। मन्युरिति। मन्युः, मनुः, महेशानः, महान्, शिवः, ऋतध्वजः, उग्ररेताः, भवः, कालः, वामदेवः, धृतव्रतः। एतानि नामानि सन्तीति शेषः ॥ १२ ॥ धीरिति। धीः, वृत्तिः, उशना, उमा, नियुत्, सर्पिः, इळा, अम्बिका, इरावती, सुधा, दीक्षा, च हे रुद्र एताः रुद्राण्यः ते तव स्त्रियः सन्तीति शेषः ॥ १३ ॥ गृहाणेति। सयोषिणः सस्त्रीकः सन् एतानि नामानि स्थानानि च गृहाण। एभिः स्थानैः नामभिश्च युक्तः त्वम् आभिः स्त्रीभिः सह बह्वीः प्रजाः सृज। यद्यस्मात्प्रजासर्गात् त्वमपि प्रजानां पतिः असि भवसि भवितेत्यर्थः ॥ १४ ॥

इतीति। गुरुणा पित्रा ब्रह्मणा इत्युक्तप्रकारेण आदिष्ट आज्ञापितः भगवानुत्पत्तिप्रलयादिज्ञानवान् नीललोहितः एवंविधाकृतिः कुमारः, सत्त्वं बलं च, आकृतिर्नीललोहिततारूपा च, स्वभावस्तीक्ष्णता च, तत्समाहारः सत्त्वाकृतिस्वभावं तेन, आत्मना स्वेन समास्तुल्याः प्रजाः ससर्ज सृष्टवान् ॥ १५ ॥ रुद्राणामिति। रुद्रेण नीललोहितेन सृष्टास्तेषाम्, समंतात् परितः जगत् ग्रसतां रुद्राणाम् असंख्यशः यूथान् यूथानि पुंस्त्वमार्षम्। निशाम्य दृष्ट्वा प्रजापतिः अशङ्कत। आशङ्कयाहेत्यभिप्रायः ॥१६॥ अलमिति। हे सुरोत्तम रुद्र ईदृशीभिः स्वतुल्याभिः सृष्टाभिः उल्बणैस्तिग्मैः चक्षुर्भिर्नयनैः मया सह दिशः दहन्तीभिः प्रजाभिः अलमथ मा सृजेत्यर्थः ॥ १७ ॥ तर्ह्यतः परं किं कुर्यामित्यत्राह। तप इति। त्वं सर्वभूतसुखावहं तपः आतिष्ठ अतः परं तपश्चरेत्यर्थः। ते तव भद्रं मङ्गलमस्तु। भवांस्त्वम् इदं विश्वं यथापूर्वं तपसा एव स्रष्टा स्रक्ष्यति ॥ १८ ॥ तपसेति। सर्वेषां भूतानां गुणानां चावासः समाश्रयस्तम्, अधोक्षजमधःकृतेन्द्रियव्यापारं परं ज्योतिरसाधारणतेजोमयं भगवन्तं पुमान् तपसा एव अञ्जसा तत्त्वतः विन्दते प्राप्नोति। अत्राधोक्षजशब्देनाप्राकृतेन्द्रियतद्व्यापारलद्विषयसंपत्तिः सूचिता ॥ १९ ॥ एवमादिष्टो रुद्रः किमकरोदित्यत्राह। एवमिति। आत्मभुवा ब्रह्मणा एवममुना प्रकारेण आदिष्टः नीललोहितः गिरां पतिं ब्रह्माणं परिक्रम्य प्रदक्षिणीकृत्य अमुं बाढमोम् इत्यामन्त्र्य भवदाज्ञामङ्गीकरोमीत्युक्त्वेत्यर्थः। तपसे तपश्चरितुं वनमरण्यं विवेश संविष्टवान् ॥ २० ॥ अथेति। अथ रुद्राज्ञापनानन्तरं सर्गं सर्गविधानम् अभिध्यायतश्चिन्तयतः, भगवतो या शक्तिर्लोकरचनासामर्थ्यं तया युक्तस्य ब्रह्मणः, लोकसंतानहेतवः लोकसंततिवृद्धिकराः दश पुत्राः प्रजज्ञिरे जाताः ॥ २१ ॥

के ते दश पुत्राः इत्याकाङ्क्षायां तान्नाम्ना निर्दिशति। मरीचिरिति। मरीचिः, अत्रिश्च, अङ्गिराश्च तौ, पुलस्त्यः, पुलहः, क्रतुः, भृगुः, वसिष्ठः, दक्षः, तत्र तेषु मध्ये नारदश्च नारदस्तु दशमः ॥ २२ ॥ संख्याप्रातिलोम्येन तदुत्पत्तिभूताङ्गानि ब्रुवंस्तानाह। उत्सङ्गादिति। स्वयंभुवो ब्रह्मणः उत्सङ्गादङ्कात नारदः, अङ्गुष्ठात् दक्षः, जज्ञे उदभूत्। अत्र दक्षशब्द एव स्वजन्म तद्दक्षाङ्गुष्ठतः सूचयति। प्राणात् वसिष्ठः, त्वचि त्वचश्चर्मण इत्यर्थः। भृगुः, करात् क्रतुः संजातः ॥ २३ ॥ पुलह, इति। नाभितो नाभेः सकाशात् पुलहः कर्णयोः कर्णाभ्यां सकाशात् पुलस्त्यः ऋषिः जज्ञे। मुखत आस्यात् अङ्गिराः, अक्ष्णो नेत्रात् अत्रिः, मनसः मरीचिः अभवदुद्भूतः ॥ २४ ॥ धर्म इति। पुनः सर्गं ध्यायत इत्यनुषङ्गः। यत्र धर्मे नारायणः स्वयं स्थितः तथाभूतः धर्मः दक्षिणतः स्तनाद्ब्रह्मणो दक्षिणात्स्तनादित्यर्थः। जात इति शेषः। 'धर्मस्य प्रभुरच्युतः' इति वचनाद्धर्मे नारायणावस्थानम्। यस्माद्यत्राधर्मे इत्यर्थः। लोकभयंकरः मृत्युः स्थितः, स एवंविधः अधर्मः पृष्ठतः ब्रह्मणः पृष्ठप्रदेशात् जज्ञे ॥ २५ ॥ हृदीति। हृदि हृदयात्सकाशादित्यर्थः। कामो मनोभूः, भ्रुवो भ्रूमध्यसकाशादित्यर्थः। क्रोधः, अधरश्चासौ दच्छद ओष्ठस्तस्मात् सकाशात् लोभश्च, आस्यान्मुखतः वाग्वागधिष्ठात्री देवता, मेढ्रात् शिश्नतः सिन्धवः, पायोर्गुदात् अघाश्रयः पापाश्रयः निर्ऋतिः, पापाधिष्ठात्री देवता जज्ञे ॥ २६ ॥ छायाया इति। छायाया ब्रह्मणो देहस्य छायायाः सकाशात् प्रभुरतिसमर्थः देवहूत्याः पतिः कर्दमः मुनिः जज्ञे। अवान्तरकथां प्रस्तोतुमुपसंहरति। एवं विश्वकृतो ब्रह्मणः मनसः, देहतश्च सकाशात इदं जगत् जज्ञे ॥ २७ ॥

आस्याद्वागिति वाक्प्रसङ्गादवान्तरकथां प्रस्तौति। वाचमित्यादिना, तां दिशो जगृहुरित्यन्तेन ग्रन्थेन। हे क्षत्तः स्वयंभूर्ब्रह्मा तन्वीं स्त्रीरूपां दुहितरं स्वसुतां मनः हरन्तीम्, सौन्दर्यातिशयेनेक्षकमानसमोषणं कुर्वाणामित्यर्थः। स्वयम् अकामां वाचं वागधिष्ठात्रीं सरस्वतीं देवतां सकामः सन् चकमे उपभोक्तुमैच्छत्। इति नोऽस्माभिः श्रुतम् अस्तीति शेषः ॥ २८ ॥ तमिति। अधर्मे स्वसुतोपभोगेच्छारूपपापकर्मणि कृतोत्पादिता मतिर्येन तं पितरं ब्रह्माणं विलोक्य, मरीचि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुख्याः मरीचिप्रभृतयः सुताः ऋषयः विस्रम्भात्पितरि विश्वासाधिक्यात् तं प्रत्यबोधयन् पितरं ज्ञापितवन्तः ॥ २९ ॥ प्रत्यवबोधनप्रकारमेवाह । नैतदिति । प्रभुरिन्द्रियनिग्रहसमर्थः त्वम् अङ्गजं कामम् अनिगृह्य दुहितरं गच्छेः, यत् एतत् पूर्वैः पूर्वं ये ब्रह्माणोऽन्ये वाऽभवंस्तैः न कृतम् । अद्य न कुर्वन्ति, अपरे भाविनश्चापि न करिष्यन्ति, तुः अवधारणे ॥ ३० ॥ तेजीयसामस्माकमेतन्न प्रत्यवायकृदित्यत्राह । तेजीयसामिति । हे जगद्गुरो जगन्मर्यादापरिपालक तेजीयसां तेजिष्ठानामपि एतत् कर्म सुश्लोक्यं न श्लाघार्हं न भवति । हि यस्मात् येषां श्रेष्ठानां वृत्तमाचारस्तत् अनुतिष्ठन् लोकः जनः क्षेमाय कुशलाय कल्पते वै । तथा च गीयते । 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते' इति ॥ ३१ ॥ एवं पितरं प्रबोध्य तमधर्मतो निवर्त्तयितुं भगवानेव समर्थ इति तं विज्ञापयांचक्रुरित्याह । तस्मा इति । यो भगवान् आत्मस्थम् आत्मनि विभागानर्हतया सूक्ष्मभावेन स्थितमित्यर्थः । इदं चेतनाचेतनात्मकं जगत् स्वेनात्मीयेन शोचिषा संकल्परूपज्ञानेनेत्यर्थः । व्यञ्जयामास विभक्तनामरूपतया व्यक्तमकरोत् । तस्मै भगवते नमः । स सकलजगत्कारणभूतः परमात्मा, धर्ममधर्मतो निवृत्तिरूपं वृषं, पातुं रक्षितुम् अर्हति ॥ ३२ ॥ पुत्रेष्वेवमुक्तवत्सु पिता किमकरोदित्यत आह । स इति । इत्थमुक्तप्रकारेण पुरोऽग्रे, गृणतः संभाषमाणान् प्रजापतीन् पुत्रान्, दृष्ट्वा प्रजापतीनां मरीच्यादीनां पतिः स ब्रह्मा व्रीडितो लज्जितः सन् ततस्तदा तन्वं स्वतनुं तत्याज त्यक्तवान् । इत्थंभूताकर्मकरणस्य देहान्तं प्रायश्चित्तमिति सर्वेभ्यो बोधयंस्तं देहं सद्यो जहावित्यर्थः । देहत्यागपुनर्देहोपादानबलमस्य भगवदाज्ञप्ततपश्चरणबलाद्बोध्यम् । तां ब्रह्मणा त्यक्तां घोरां तनुं दिशः जगृहुः । कुत एतत् ज्ञायते तत्राह । यद्यां ब्रह्मत्यक्तां तनुमेव नीहारं तमः विदुः, एतदभिज्ञाः कथयन्तीत्यर्थः । केचित्तु तनुत्यागो नाम कामुकत्वभावत्याग एव, तस्या द्वितीयाया उपादानं नाम तद्भावग्रहणमेव । तनुशब्देन निर्देशस्तु तनुवद्विशेषणतया वेदितव्यमित्याहुः ॥ ३३ ॥

तनुत्यागानन्तरं ब्रह्मा किमकरोदित्यत्राह । कदाचिदिति । समवेतान् सुसंगतान् लोकान् यथापुरा पूर्वकल्पे वर्त्तमानानिव कथम् अहं स्रक्ष्यामि, इति कदाचित् ध्यायतः स्रष्टुर्ब्रह्मणः चतुर्मुखात् चतुर्भ्यो मुखेभ्य इत्यर्थः । वेदा ऋगादयः आसन्नाविर्भूता अभूवन् ॥ ३४ ॥ चातुर्होत्रमिति । चतुर्णां हॄतॄणां कर्म चातुर्होत्रं, कर्मतन्त्रं यज्ञविस्तारः, उपवेदा आयुर्वेदादयश्च, नया न्यायाश्च, तैः सह, चत्वारः धर्मस्य पादास्तपःसत्यदयाशौचाख्याः, तथैव आश्रमाश्च, वृत्तयश्च, ताः आसन् इति पूर्वेणान्वयः॥ ३५ ॥ सामान्यतयैवं वेदादिसर्गे गदिते कस्य कस्मादुत्पत्तिरिति बुभुत्सया पृच्छति विदुरः । स वा इति । विश्वसृजां प्रजापतीनाम् ईशः पतिः स ब्रह्मा वेदादीन् मुखतः असृजत् वै इति तु ज्ञातमस्माभिः, परं हे तपोधन मैत्रेय देवो ब्रह्मा येन येन यद्यत् असृजत् तत् मे मह्यं ब्रूहि ॥ ३६ ॥

एवं विदुरेणापृष्टो मुनिः ऋगादीन् यथा सोऽसृजत्तदाह । ऋगिति । ब्रह्मा पूर्वादिभिः मुखैः ऋग्यजुःसामाथर्वाख्यान् वेदान् व्यधात् असृजत् । ऋग्वेदं पूर्वमुखतः, यजुर्वेदं दक्षिणमुखतः, सामवेदं पश्चिममुखतः, अथर्ववेदमुत्तरमुखतः, एवं क्रमादसृजदित्यर्थः । एवं शस्त्रम्, इज्याम्, स्तुतिस्तोमम्, प्रायश्चित्तम्, क्रमात् व्यधात् । तत्र शस्त्रं नामाप्रगीतमन्त्रस्तोत्रम्, तद्धोतुः कर्त्तव्यत्वेन होत्रमित्युच्यते तत्पूर्ववक्त्रात् । इज्या अध्वर्योः कर्म, तद्दक्षिणवक्त्रात् स्तुतिस्तोमं तु स्तुतिः संगीतरूपा, स्तोमं तदर्थमृक्समुदायरूपं तदर्थकमन्त्राः सामवेदगाः 'एवं त्रिवृत्स्तोमो भवति' इत्यादिना विहितं तदुद्गातृप्रयोज्यत्वेनोद्गात्रमित्युच्यते । स्तुतये स्तोममिति चतुर्थी समास इत्यन्ये । तच्च पश्चिमवक्त्रात्, प्रायश्चित्तं ब्रह्मणा प्रयोज्यमाथर्वणम् । तदुत्तरवक्त्रादिति बोध्यम् ॥ ३७ ॥ उपवेदक्रममाह । आयुर्वेदमिति । ब्रह्मा आत्मनः पूर्वादिभिः मुखैः क्रमात् आयुर्वेदम्, धनुर्वेदम्, गान्धर्वं वेदम्, स्थापत्यं वेदं च असृजत् । तत्रायुर्वेदस्तु बाहट इति संज्ञया वैद्यकादिसंज्ञया च प्रसिद्धः । धनुर्वेदः शस्त्रोत्पत्तिबोधनपूर्वं तन्मोचनप्रत्याहरणादिबोधकः । गान्धर्वो भरतशास्त्रसंज्ञया प्रसिद्धः । स्थापत्याख्यः शिल्पशास्त्रतया प्रसिद्धः ॥ ३८ ॥ इतिहासेति । सर्वदर्शनः सर्वज्ञः ईश्वरो ब्रह्मा इतिहासाश्च पुराणानि च तानि मिलित्वा पञ्चमं वेदं सर्वेभ्यः वक्त्रेभ्यः एव ससृजे ॥ ३९ ॥ षोडशीति अथानन्तरं ब्रह्मा षोडश्युक्थ्यौ षोडश्युक्थ्यशब्दौ षोडश्युक्थ्यनामकसंस्थानविशिष्टकर्मपरौ पूर्ववक्त्रात् । पुरीषी च अग्निष्टुच्च तौ, तत्र पुरीषी चयनः अग्निष्टुदग्निष्टोमस्तौ दक्षिणवक्त्रात् । आप्तोर्यामश्चातिरात्रश्च तौ एतौ कर्मविशेषौ पश्चिमवक्त्रात् । गोसवेन सहितं सगोसवं वाजपेयं वाजपेयगोसवौ चोत्तरवक्त्रात् असृजदिति शेषः ॥ ४० ॥ धर्मपादादीनामुत्पत्तिक्रममाह । विद्येति । विद्या, दानम्, तपः सत्यम् इत्येतानि धर्मस्य पदानि च, वृत्तिभिः सह, यथासंख्यम् आश्रमान् ब्रह्मचर्यादींश्च असृजत् । एतच्छ्लोकादावङ्कानुक्रैर्मुखान्येव ज्ञेयानि । ननु 'तपः सत्यं दया शौचम्' इति प्रथमस्कन्धे दयाशौचयोर्धर्मपदत्वं कीर्त्तितम् । अत्र तु विद्यादानयोः पदत्वमुक्तमिति विरोधः । मैवम् 'भूताभयप्रदानस्य कलां नार्हन्ति षोडशीम्' इति वचनात् 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता' इति स्मृतेश्च । एवं सति दयाशौचयोर्विद्यादानकार्यत्वात्कारणशब्दः कार्ये उपचर्यते । विद्याशौचयोर्दानदययोरेकत्वेन निर्देशे न विरोधः ॥ ४१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

का एता वृत्तयो या आश्रमैः सह जाता इत्यपेक्षायां वृत्तीर्वदंस्तासामवान्तरभेदांश्चाह द्वाभ्याम्। सावित्रमिति। सावित्रं च, प्राजापत्यं च, अथ ब्राह्मं, तथा बृहत्। तत्र सावित्रं ब्रह्मचर्यमुपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रं स्त्रीसङ्गविरहादिरूपम्। प्राजापत्यं व्रतान्याचरतः संवत्सरान्तम्। ब्राह्मं वेदग्रहणान्तम्। बृहन्नैष्ठिकम्। एते ब्रह्मचर्याश्रमावान्तरभेदाः। एतदाश्रमवतां सायंप्रातर्गृहिगृहाद्भिक्षाचरणं वृत्तिः। गृहे गृहाश्रमे, वार्त्ता च, संचयश्च, शालीनं च, शिलउञ्छश्च ते एकवचनमार्षम्। समाहारद्वन्द्वे तु पुंस्त्वमार्षम्। इत्येताः वृत्तयः। वृत्तिभेदवत्त्वमेव तदाश्रमावान्तरभेदत्वम्। वार्त्ता अनिषिद्धकृष्यादिवृत्तिः। वार्त्ता यायावरं भैक्षचर्याविशेष इत्यन्ये। संचयो याचनादिवृत्तिः। यावज्जीवनं वृत्तिः संचय इत्यन्ये। असंचय इति पदच्छेदे असंचय एकाहिर्त्वं तत्तद्दिनार्जितव्रीह्यादेस्तद्दिन एव व्यय इत्यर्थः। शालीनमयाचितवृत्तिः। वत्सरपर्यन्तं स्ववृत्तिहेतोः कुसूलमञ्जूषाद्रोण्यादिषु व्रीह्यादिधान्यग्रहणं शालीनमित्यन्ये। शिलं कणिशाद्यर्जनमुञ्छो हट्टादेः कणश आदानमित्युभयमेका वृत्तिः ज्ञेया वै ॥ ४२ ॥ वनस्थानां चातुर्विध्यमाह वैखानसा इति। वैखानसाः, वालखिल्याश्चौदुम्बराश्च ते। फेनपाः एते, वने वननिवासिनामवान्तरभेदाः। तत्र वैखानसा अकृष्टपच्याशिनः। बालखिल्याः नवेऽन्नाद्ये लब्धे पुराणान्नत्यागिनः। औदुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति, तत आहृतैः फलादिभिर्जीवन्तः। फेनपाः स्वयं पतितैः फलादिभिर्जीवन्तः। चतुर्थाश्रमिणामपि चातुर्विध्यमाह। न्यास इति। पूर्वं पूर्वोस्यात्प्रथममुत्पन्नः कुटीचकः, बह्वोदः, हंसश्च, निष्क्रियश्च, तौ। एते चतुर्विधाः न्यासे न्यासाश्रमिणामवान्तरभेदाः। एतेषां गृहिभ्यो वानप्रस्थेभ्यो वा पकान्नभिक्षाचरणं वृत्तिः। तत्र कुटीचकः स्वाश्रमधर्मप्रधानः। बह्वोदः कर्मोपसर्जनीकृत्य ज्ञानप्रधानः। हंसो ज्ञानाभ्यासनिष्ठः। निष्क्रियः परमहंसः, प्राप्ततत्त्व इति यावत्। प्रवृत्तिधर्महीनत्वान्निष्क्रिय इत्युक्तम्, न तु निवृत्तिधर्मनिवृत्तिरप्यनेनोक्ता, विद्याङ्गत्वेन तस्य अवश्यमनुवर्त्तनीयत्वात् ॥ ४३ ॥ नयादीनां पूर्वास्यादिक्रमेणोत्पत्तिमाह। आन्वीक्षिकीति। आन्वीक्षिकी, त्रयी, वार्त्ता, दण्डनीतिश्च तथैव पूर्वादिवक्त्रत एवासन्नित्यर्थः। तत्र आन्वीक्षिकी आत्मानात्मविवेकवती मोक्षफला विद्या। त्रयी स्वर्गादिफला कर्मविद्या। वार्त्ता कृष्यादिरूपा जीवनफला विद्या। दण्डनीतिरर्थफला विद्या। अथ व्याहृतीनां क्रममाह एवमिति एवं पूर्वादिमुखक्रमेणैव व्याहृतयश्च आसन्। तत्र भूः, भुवः, सुवरिति व्यस्तास्तिस्रः। समस्ताश्चतुर्थी व्याहृतिः। तथा चाहाश्वलायनः 'एवं व्याहृतयः प्रोक्ता व्यस्ता समस्ता अपि' इति। यद्वा भूर्भुवःस्वरित्येतास्तिस्रो व्याहृतयस्तासामु ह स्मैतां चतुर्थी माहाचमस्यः प्रवेदयते महः' इति श्रुतेश्चतुर्थी मह इति व्याहृतिः। एवं मुखोत्पन्नानां क्रममभिधायान्येभ्योऽप्यङ्गेभ्योऽन्येषामुत्पत्तिमाह। प्रणव इत्यादिना। हृत्स्वतः हृदयाकाशात् प्रणवः आस बभूव हि ॥ ४४ ॥

तस्येति। विभोः प्रजापतेः तस्य ब्रह्मणः लोमभ्यः उष्णिगेतदाख्यं छन्दः आसीत्। अक्षराणामियत्ता छन्दः। त्वचश्च ब्रह्मणस्त्वचः सकाशादपि गायत्री एतदाख्यं छन्दः। मांसात् त्रिष्टुप् एतदाख्यं छन्दः। स्नुतः स्नायोः अनुष्टुप् एतदाख्यं छन्दः। अस्थ्नः जगती एतदाख्यं छन्दः आसीत् ॥ ४५ ॥ मज्जाया इति। ब्रह्मणः मज्जायाः पङ्क्तिः एतदाख्यं छन्दः, उत्पन्ना। प्राणतोऽस्य प्राणात्सकाशात् बृहती एतदाख्यं छन्दः अभवत्। तस्य ब्रह्मणः जीवः स्पर्शः अभवत्। कारणे कार्योपचारः। अस्य जीवात् स्पर्श उत्पन्नः स च कादिमावसानः। देहः स्वरः उदाहृतः देहात्स्वर उत्पन्न इत्यर्थः। अत्रापि कारणे कार्योपचारः। एकवचनं जात्यभिप्रायम् 'अचः स्वराः' इति तद्बहुत्वोक्तेः। एवं स्पर्शेऽपि ॥ ४६ ॥ ऊष्माण इति। आत्मनो ब्रह्मणः इन्द्रियाणि ऊष्माणः आहुः। इन्द्रियेभ्य ऊष्माण उत्पन्नाः। ते च शषसहवर्णात्मकाः। बलन् अन्तःस्था बलदन्तःस्था उत्पन्ना इत्यर्थः। ते च यरलवाख्या वर्णाः। प्रजापतेः विहारेण क्रीडया सप्त स्वराः। ते च षड्जर्षभगान्धारमध्यपञ्चमधैवतनिषादाः। भवन्ति स्म अभवन्नित्यर्थः ॥ ४७ ॥ एवं वर्णानामुत्पत्तिमभिधायाथ ब्रह्मणः शब्दतनुत्वात्परमेश्वरो नित्यं प्रकाशत इत्याह। शब्दब्रह्मेति। हे तात, व्यक्ता वैखरी वाक्, अव्यक्तः प्रणवः, तदात्मनः अत एव शब्दात्मकं ब्रह्म शब्दब्रह्म आत्माशरीरं यस्य तस्य ब्रह्मणः, ब्रह्म परब्रह्मा परः परमेश्वरः, नानाशक्त्युपबृंहित इन्द्रादिनैकविधशक्तिसमृद्धः। अत एव विततः सर्वान्तरात्मतयावस्थितः अवभाति। सर्वकालं ध्यानविषये संवीक्ष्यो भवति ॥ ४८ ॥ तत इति। हे कौरव विदुर, ततः शब्दब्रह्मात्मकतन्वाः सकाशात् अपरामतिरिक्तां तनुम् उपादाय स्वीकृत्य सर्गाय सृष्टिं विधातुं मनः दधे। मनसा अचिन्तयदित्यर्थः। उक्तार्थगर्भं तावच्चिन्ताप्रकारमाह। भूर्यतिशयितं वीर्यं प्रजननसामर्थ्यं येषां तेषाम् ऋषीणाम् अपि, सर्गम् अविस्तृतम् विस्तारमप्राप्तं ज्ञात्वा, तद्वृद्धये सर्गविवृद्ध्यर्थं भूयोऽतिशयेन पुनः पुनर्वा चिन्तयामास ॥ ४९ ॥ किमित्यत आह। अहो इति नित्यदा सर्वदा व्यापृतस्यापि प्रजासर्गे व्यापारं कुर्वतोऽपीत्यर्थः। मे मम मत्तः सकाशाद्वा प्रजाः न ह्येधन्ते नैव वर्द्धन्ते एतत् अद्भुतम्। अहो अत्याश्चर्यं नूनं खल्वेव। अत्र प्रजावृद्धौ दैवं दिष्टमेव विघातकम्। अत्र विघ्नकृद्दैवमिति प्रतिभातीत्यर्थः ॥ ५० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमिति । एवममुना प्रकारेण । युक्तकृतः उचितचिन्तनरूपं युक्तं कृतवतः तदा दैवं दैवानुकूल्यं च अपेक्षतोऽपेक्षमाणस्य तस्य कस्य ब्रह्मणः रूपं द्वेधा अभूत् । प्राक्तने रूपे विद्यमाने सत्येव द्वितीयं रूपमभूत्ततः प्राक्तनेन सह द्वे रूपे भवत इत्यभिप्रेत्य द्वेधाऽभूदित्युक्तम् । नेदं द्वेधाभावग्रहणमात्रम्, किं तु तस्य शरीरमेव द्वेधा जातमित्यावेदयितुं रूपं विशिनष्टि । यद्रूपं कायं शरीरम् अभिचक्षते व्याहरन्ति ॥ ५१ ॥ ताभ्यामिति । ताभ्यां रूपविभागाभ्यां जाताभ्यां सद्भ्यां द्वितीयाद्रूपविभागादिति शेषः । मिथुनं स्त्रीपुंसात्मकं द्वन्द्वं समपद्यत । द्वितीयं रूपमेव मिथुनीभावं प्राप्यास्थादित्यर्थः । तत्र मिथुने यः पुमान् सः तु स्वराट् चक्रवर्त्ती स्वायंभुवः मनुः अभूत् ॥ ५२ ॥ स्त्रीति । या स्त्री आसीत्, सा महात्मनः महाबुद्धे अस्य स्वायंभुवमनोः महिषी पट्टाङ्गना शतरूपाख्या आसीत् । तदा मनुशतरूपाप्रादुर्भावप्रभृतिकाले मिथुनधर्मेण मैथुनाचरणक्रियया एव धर्मेणेत्यनेन यथर्त्तुगामित्वाद्यपि सूचितम् । प्रजाः एधांबभूविरेऽवर्द्धन्त । हि इति द्वयोः संबन्धः ॥ ५३ ॥ स चापीति । किं च स स्वायंभुवो मनुरपि शतरूपायां स्वभार्यायाम्, पञ्च पञ्चसंख्यानि अपत्यानि अजीजनत् । अपत्यशब्दस्य सामान्यवाचित्वात्तत्र स्त्रीपुंविभागमाह । प्रियव्रतेति । हे भारत हे सत्तम प्रियव्रतश्चोत्तानपादश्च द्वौ पुत्रौ, आकूतिः देवहूतिः प्रसूतिश्च इत्येवंविधसंज्ञाः तिस्रः कन्याश्च अजीजनदित्यनेनान्वयः ॥ ५४ ॥ यस्मै यस्मै ता दत्तास्तदाह । आकूतिमिति । रुचये रुचिनाम्ने मुनये आकूतिमाकूतिसंज्ञां प्रथमात्मजाम्, कर्दमायैतन्नाम्ने मुनये तु मध्यमां देवहूतिम्, दक्षाय दक्षनाम्ने प्रजापतये च प्रसूतिं प्रसूतिसंज्ञाम् अदात् । यतः याभ्यः उत्पन्नाभिः प्रजाभिः जगत्, कृत्स्नं विश्वम् आपूरितम् । बहुसंतानकरास्ता इत्यर्थः ॥ ५५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

——:❀:——

अथ त्रयोदशोऽध्यायः

श्रीशुक उवाच

निशम्य वाचं वदतो मुनेः पुण्यतमां नृप । भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥

सिसृक्षायां मनोर्भूमिं समुद्धर्तुं जलाप्लुताम् । उक्तं त्रयोदशे जातक्रोडाद्दैत्यनिषूदनम् ॥ १ ॥

निशम्येति । हे नृप वदत उक्तप्रकारेण गदतः मुनेर्मैत्रेयस्य पुण्यतमां श्रवणमात्रत एवातिसुकृतं संपादयन्तीं वाचं निशम्य श्रुत्वा, कौरव्यो विदुरः वासुदेवस्य स्वेष्टदेवश्रीकृष्णस्य या कथा तस्यामादृत आदरयुक्तः सन्, कर्त्तरि क्तः । भूयः पुनः पप्रच्छ पृष्टवान् ॥ १ ॥ विदुरकृतप्रश्नप्रकारमाह त्रिभिः । स वा इति । हे मुने मैत्रेय स्वयंभुवो ब्रह्मणः प्रियः पुत्रः, पुत्राणां मध्ये निरतिशयप्रीतिविषयः पुत्र इति भावः । सम्राट् सार्वभौमः सः स्वायंभुवः मनुः, प्रियां प्रेमास्पदीभूतां पत्नीं शतरूपाख्याङ्गनाम्, प्रतिलभ्य संप्राप्य ततस्तदनन्तरं किं चकार अकरोत् वै ॥ २ ॥ प्रकृतमनुसर्गं विहाय किमिति मनुचरित्रं पृच्छसीत्याशङ्कामपनुदन् पृच्छति । चरितमिति । हे सत्तम आदिराजस्य तस्य राजर्षेः चरितं श्रद्दधानाय मे मह्यं ब्रूहि । हि यस्मात् असौ मनुः, विष्वक्सेनो हरिरेवाश्रयो यस्य स तथोक्तः । भगवद्भक्तत्वात्तच्चरितमवश्यं श्रोतव्यमतः प्रष्टव्यमिति भावः ॥ ३ ॥ नन्वेवं तर्हि साक्षाद्भगवच्चरित्रमेव प्रष्टव्यम्, किं तद्धित्वा भागवतचरितानुप्रश्नेनेत्याशङ्क्याह । श्रुतस्येति । सुचिरं श्रमो यस्मिंस्तस्य सुचिरश्रमस्य, चिरकालार्जितस्य पुंसां श्रुतस्याध्ययनस्य, अर्थप्रयोजनं सूरिभिर्विद्वद्भिः अयमेव अञ्जसा तत्त्वतः ईडितः स्तुतः ननु । किं तद्यत्सूरिभिरीडितमित्यत्राह । येषां हृदयेषु मुकुन्दपादारविन्दम् उपास्यमस्तीति शेषः । तेषां भागवतानां गुणानामनुश्रवणं समाकर्णनं यत् तत् । भगवद्भक्तैर्भगवतो भागवतानां वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुणानुश्रवणं यत्क्रियते, अयमेव सुचिरश्रमश्रुतार्थं इति भावः ॥ ४ ॥ एवं विदुरकृतं प्रश्नमाश्रुत्य मुनिरभ्यभाषतेत्याह शुकः। इतीति। इत्युक्तप्रकारेण ब्रुवाणं पृच्छन्तं विनीतं विनयादिसद्गुणसंपन्नम्, सहस्रं शीर्षाणि यस्य तस्य सहस्रशीर्ष्णः परमपुरुषस्य 'सहस्रशीर्षा पुरुषः' इति श्रुतेः। चरणावुपधीयेतेऽस्मिन्निति चरणोपधानं भगवत्पादपीठम्, असौ विदुरो भगवतोऽतिप्रियोऽतस्तस्योत्सङ्गे श्रीकृष्णो भगवान् स्वपादौ प्रसार्य श्रीहरिः सूरभक्तोत्सङ्ग इवावतिष्ठते इति भावः। एवंभूतं विदुरं प्रति भगवत्कथायां प्रणीयमानः भगवत्कथाप्रणयने प्रवर्त्त्यमानः, अत एव प्रहृष्टान्युदञ्चितानि रोमाणि यस्य स तथोक्तः मुनिर्मैत्रेयः अभ्यचष्टाभ्यभाषत ॥ ५ ॥

अभिभाषणप्रकारमाह। यदेत्यादिना। यदा स्वभार्यया शतरूपाख्याङ्गनया साकं सह अयं स्वायंभुवः मनुः जात उत्पन्नः, तदाऽयं मनुः प्रणतः नम्रः भूत्वा प्राञ्जलिः प्रबद्धांजलिः संश्च वेदगर्भं गर्भगचतुर्वेदम् एनं ब्रह्माणम् अभाषत ॥ ६ ॥ त्वमिति। सर्वाणि च तानि भूतानि च तेषाम् एकः त्वमेव पिता। कुतः जन्मकृत् अत एव वृत्तिदः पोषकश्च। अतः यद्यप्यन्यापेक्षा नास्ति, अथापि प्रजानां भवत्संततीनां नोऽस्माकं ते तव शुश्रूषा परिचर्या केन कर्मणा वा भवेत्। तद्विधेहीत्युत्तरेणान्वयः ॥ ७ ॥ तदिति। हे ईड्य स्तुत्य। आत्मशक्तिषु अस्मच्छक्येषु अस्मच्छक्तिविषयेष्वित्यर्थः। कर्मसु मध्ये केन कर्मणा ते परिचर्या भवेदित्यनुषङ्गः। तद्विधेहि इदं कर्त्तव्यमिति कथय। तुभ्यं नमः अस्तु। यत्कर्म कृत्वा यस्मिन्कर्मणि कृते सतीत्यर्थः। इहास्मिन् लोके विष्वक् समंततः, यशः उत्तमा कीर्त्तिः, भवेत्। अमुत्र परलोके च गतिः भवेत्। तत्कथयेत्यर्थः ॥ ८ ॥ एवं मनुना पृष्टो ब्रह्माह। प्रीत इति। हे तात तुभ्यम् अहं प्रीतः अस्मि। हे क्षितीश्वर वां युवाभ्यां स्वस्ति स्तात् भूयात्। कथमेतत्तत्राह। यद्यस्मात् निर्व्यलीकेन निर्दुष्टत्वेन हृदा मनसा मा मां शाध्यनुशिक्षय, इतीत्थम् आत्मना स्वयमेव अर्पितमावेदितम् ॥ ९ ॥ एतावतीति। हे वीर गुरौ पितरि आत्मजैः पुत्रैः एतावती हि एतत्परिमितैव अपचितिः पूजा कार्या कर्त्तव्या। कियतीत्यत्राह। अप्रमत्तैः प्रमत्ततारहितैः, गतो मत्सरो येभ्यस्तैः, सनकादयो न कुर्वन्ति यदि तर्हि वयं किमिति करिष्यामेत्येवंभूतमत्सररहितैः सद्भिः शक्त्या स्वशक्त्यनुरूपतः सादरम्, यथा तथा गृह्येत आज्ञेति शेषः। यथाशक्ति पितुराज्ञा गृह्येत यदेतावत्येव, पुत्रकृता पितृशुश्रूषेत्यर्थः ॥ १० ॥ एवं यदि तदा पितुस्तव का वाञ्छा, या मया कर्त्तव्या तत्राह। स त्वमिति। यः मच्छरीरादुत्पन्नः सः त्वम् अस्यां स्वमहिष्याम् आत्मनस्तव गुणैः सदृशानि अपत्यानि उत्पाद्य गां भूमिं धर्मेण शास अनुशिक्षय। यज्ञैः पुरुषं परमपुरुषं यजाराधय ॥ ११ ॥

मह्यं परं शुश्रूषणं त्विदमेव स्यादनेनावयोर्भगवानपि तुष्यतीत्याह। परमिति। हे नृप प्रजारक्षया मह्यं मम परं सर्वोत्तमं शुश्रूषणं स्यात। हृषीकेशः भगवान्विष्णुरपि प्रजाभर्त्तुः प्रजापालकस्य ते तव तुभ्यमित्यर्थः। अनुतुष्यति संतुष्टोऽपि भविष्यति ॥ १२ ॥ किं भगवत्संतोषेणेत्याह। येषामिति। यज्ञलिङ्गो यज्ञमूर्त्तिः सनातनः भगवान् येषां न तुष्टः स्यात्, तेषां श्रमः धनविद्याद्यर्जनप्रयासः अपार्थाय निष्प्रयोजनाय भवतीत्यर्थः। हि यतो हेतोः आत्मान्तःस्थो भगवान् स्वयं न आदृतः उपेक्षित इत्यर्थः ॥ १३ ॥ एवमुक्तो मनुः किमुवाचेत्यत्राह। आदेश इति। हे अमीवसूदन पापनाशन अहं भगवतस्तव आदेशे आज्ञायां वर्त्तेय वर्त्तिष्ये। किं तु हे प्रभो, प्रजानां मम च इहास्मिन् लोके स्थानं निवासपदम् अनुजानीहि। अत्र स्थातव्यमित्यनुज्ञां देहि ॥ १४ ॥ ननु स्थानमनुजानीहि, इति कथं ब्रूषे, मही एव सर्वभूतानां स्थानं भवतीति चेत्तत्राह। यदीति। सर्वसत्त्वानां सर्वभूतानां यत् ओकः स्थानभूता मही भूमिः महाम्भसि एकार्णवजले मग्नाऽन्तर्गता आसीत्। अतः हे देव ब्रह्मन्, देव्याः अस्याः भूमेः उद्धरणे यत्नः विधीयतां क्रियताम् ॥ १५ ॥ एवमुक्तो ब्रह्मा किमकरोदित्यत्राह। परमेष्ठीति। परमेष्ठी ब्रह्मा तु तदा, अपां मध्ये पूर्वं पाने कृतेऽपि पुनरकाण्डमेवोद्भूतजलमध्ये इत्यर्थः। आसन्नां निमग्नां गां भूमिम् अवेक्ष्य ज्ञात्वा, एनां भूमिं कथं समुन्नेष्ये उद्धरिष्यामि। इतीत्थं धिया स्वमनीषया चिरं बहुवेलं दध्यौ चिन्तयामास ॥ १६ ॥ चिन्तामेव प्रपञ्चयति। पीतमिति द्वाभ्याम्। सर्वं कृत्स्नं जलं प्रालयिकमम्भः मया पीतम्, पृथिवी च निवेशिता स्थापिता। ततः मे मम सृजतः देवासुरादिकाः प्रजाः उत्पादयतः सतः क्षितिर्भूमिः वार्भिरकाण्डोद्भूतजलैः प्लाव्यमाना निमज्जमाना सती रसां रसातलं गता प्राप्ता ॥ १७ ॥

अथेति। अथानन्तरम् अत्र भूम्यानयने, सर्गे योजिताः सर्गयोजितास्तैः सृष्टिविधानप्रयुक्तैरित्यर्थः। अस्माभिः किम् अनुष्ठेयं विधेयम्, विधातुं वयं न प्रभवाम इत्यर्थः। अतः अहं यस्य भगवतः हृदयात् संकल्पात आसं पद्ममध्ये उदभवम्, सः ईशः मे मम विदधातु। ममावश्यतया कर्त्तव्यमिदं कार्यं मत्कारणं स भगवानेव संपादयतादित्यर्थः ॥ १८ ॥ चिन्तां निगमयन्वराहावतारं प्रस्तौति। इतीति। हे अनघ इत्युक्तप्रकारेण अभिध्यायतश्चिन्तयतो ब्रह्मणः नासाविवरात् नासिकाच्छिद्रात् सहसाऽकस्मादेव वराहतोकः क्रोडपोतः। अङ्गुष्ठपरिमाणकः अङ्गुष्ठोर्ध्वपर्वप्रमाणः अङ्गुष्ठपरिमाणत इति पाठे प्रातिपदिकार्थे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तसिः। निरगान्निष्क्रान्तोऽभूत्। न चानेन चतुर्मुख एव वराहरूपोऽभवदिति शङ्क्यम्। 'तर्कयामास चित्रधा' 'किमेतत्सौकर-व्याजम्' इति ब्रह्मणोऽप्यज्ञायमानतया विचारितत्वोक्तेः॥ १६॥ तस्येति। हे भारत तस्य ब्रह्मणः अभिपश्यतः सतः, स्वस्थः अङ्गुष्ठपरिमाणो वराह एवाकाशस्थः सन्, क्षणेन क्षणमात्रकालातिक्रमे सतीत्यर्थः। गजमात्रो गजपरिमाणः प्रववृधे किल। तदेतत अद्भुतम् इव अभवत्। इवशब्देन पश्यतामेवाश्चर्यं न तु भगवतो वराहस्येति सूचितम्। तदद्भुतमभून्महत् इति पाठे, तदेतत् तदुत्पत्तिराकाशारोहणं वृद्धिश्चेत्येतदित्यर्थः। पश्यतां महत् अद्भुतमाश्चर्यम् अभूत्॥ २०॥ मरीचीति। ततः मरीचिः प्रमुखो येषां तैर्मरीचिप्रमुखैः विप्रैः, कुमारैः सनकादिभिः, मनुना स्वायंभुवेन च सह, स ब्रह्मा ह स्फुटं यथा तत् सौकरं वाराहं रूपं दृष्ट्वा चित्रधा बहुधा तर्कयामास॥ २१॥ तर्कं प्रपञ्चयति। किमिति द्वाभ्याम्। दिव्यमप्राकृतवत्प्रतीयमानम् अत एव सत्त्वं शुद्धसत्त्वात्मकम्, अथापि, सौकरः सूकरसंबन्धी व्याजो मिषं यस्य तत्, एतत् अवस्थितं वस्तु, किं किं नु स्यात्। एवंभूतमपीदं मे मम नासाया नासिकायाः सकाशात विनिःसृतम। अहो इत्याश्चर्ये बतेति खेदे। इदं सत्त्वम् आश्चर्यम् आश्चर्यरूपं भाति॥ २२॥ दृष्ट इति। अङ्गुष्ठस्य शिरः ऊर्ध्वपर्व तदेव मात्रा प्रमाणं यस्य सः, प्रथमं दृष्टः। पश्चात् क्षणात् क्षणकालानन्तरमित्यर्थः। गण्डशिलासमः स्थूलपाषाणमात्रः दृष्टः। अतः मे मम मनः खेदयन् खेदयुक्तं कुर्वन्, एषः यज्ञः भगवान् भवेत् अपि स्वित् संभावनायाम्॥ २३॥

तर्कमुपसंहरन्नाह। इतीति। इत्युक्तरीत्या सूनुभिः सह तस्य ब्रह्मणः मीमांसतः मीमांसमानस्य सतः, अगेन्द्रसंनिभः गिरीन्द्रसदृशः भगवान् यज्ञपुरुषः जगर्ज अगर्जत् ॥ २४॥ ब्रह्माणमिति। विभुः हरिः वराहमूर्त्तिर्भगवानित्यर्थः। ककुभो दिशः प्रतिस्वनयता प्रतिध्वनियुक्ताः कुर्वता स्वगर्जितेन ब्रह्माणं तान्पूर्वोक्तान् द्विजोत्तमान् मरीच्यादिमुनींश्च हर्षयामास॥ २५॥ निशम्येति। मायामयसूकरस्य आश्चर्यप्रचुरसूकरतनोः, स्वेषामात्मीयजनानां यः खेदः तं क्षयति तच्छीलम्, आत्मीयदुःख-निरसनस्वभावमित्यर्थः। घर्घरितं तज्जातीयानुकाररूपघर्घरध्वनिं निशम्य, जनो जनलोकश्च, तपस्तपोलोकश्च, सत्यं सत्यलोकश्च, तेषु निवसन्तीति तच्छीलाः। जनस्तप इत्यत्र सुडागम आर्षः। ते प्रसिद्धाः ते मुनयः, त्रिभिः पवित्रैः ऋग्यजुःसामसूक्तैः अगृणन्नस्तुवन् स्म। ते इत्यस्य प्रसिद्धिप्रख्यापनार्थत्वान्न पुनरुक्तिः॥ २६॥ तेषामिति। वेदैर्वितन्यते विस्तार्यते इति वेदवितानो यज्ञः स एव मूर्त्तिर्यस्य सः। यद्वा वेदैर्वितन्यते स्तूयते मूर्त्तिर्यस्य सः भगवान्, तेषां सतां मरीच्यादीनां संबन्धि आत्मनः ये गुणाः कल्याणकारिणो गुणास्ताननुवदतीति आत्मगुणानुवादं तत् ब्रह्म वेदम् अवधार्य श्रुत्वा, भूयः पुनः पुनः विनद्य घर्घरितं कृत्वा, गजेन्द्रस्येव लीला यस्य तथाभूतः सन्, विबुधानां ब्रह्मादीनामुदयः श्रेयोविधानं तस्मै, जलम् आविवेश॥ २७॥ द्वाभ्यां पुनस्तं विशिनष्टि। उत्क्षिप्तवाल इति। उदुच्चैः क्षिप्तः वालः पुच्छं येन सः। खे आकाशे चरतीति खचरोऽन्तरिक्षचारी कठोरः कठिनः। सटाः कन्धरावस्थितकेशान् विधुन्वन्कम्पयन्, खरा रोमशा त्वक् यस्य सः। रोमलोमयोः सावर्ण्यात् रोमशब्दः शप्रत्ययान्तो बोध्यः। स च पामादित्वात् ज्ञेयः। खराणि रोमाणि यस्यां तथाभूता त्वग्यस्य स इति केचित। तत्र वाक्ये रोमशब्दात् शलोपश्चिन्त्यः। खुरैराहतान्यभ्राणि येन सः। सिते धवले दंष्ट्रे यस्य सः। ईक्षा निरीक्षणमेव ज्योतिरालोको यस्य सः। तदा प्रकाशान्तराभावात्प्रकाशमाननेत्र इत्यर्थः। महीध्रः मह्या उद्धर्ता भगवान् बभासेऽशोभत॥ २८॥

घ्राणेनेति। कि च क्रोडापदेशः वराहछद्मा, स्वयम् अध्वराङ्गः सन्नपि घ्राणेन पशुवदवघ्राणविधानमात्रेण, पृथ्व्याः भुवः पदवीं मार्गं विजिघ्रन्नन्वेषयन्, कराले भयंकरे दंष्ट्रे यस्य स तथाभूतः सन्नपि, अकरालदृग्भ्यां सौम्यदृष्टिभ्यां गृणतः स्तोतॄन् विप्रान् उद्वीक्ष्य ऊर्ध्वप्रसारितनयनाभ्यां संवीक्ष्य, कं जलम् अविशत्। अविशदिति प्रागभिहितमस्यथापि विशेषणप्राचुर्याद्विभ्रम-निवारणार्थं पुनरुपात्तं बोध्यम॥ २९॥ तदानींतनं समुद्रध्वनिमुत्प्रेक्षते। स इति। वज्रकूटो वज्रपर्वतस्तद्वदङ्गं यस्य भगवतस्तस्य निपातवेगेन निपतनरंहसा विशीर्णः विलुण्ठितः कुक्षिर्यस्य सः, अत एव आर्त्त इव स्तनयन् शब्दं कुर्वन्, उत्सृष्टाः प्रसारिताः दीर्घा आयता ये ऊर्मय एव भुजास्तैः विशिष्टः, सः उदन्वान् समुद्रः हे यज्ञेश्वर मा मां पाहि, माभिन्धि इत्येवं चुक्रोश उन्ननाद॥ ३०॥ जलं प्रविष्टो भगवान् किमकरोदित्यत्राह। खुरैरिति। त्रीणि परूंपि सवनात्मकानि पर्वाणि नेत्रलोमानीति यावत्, यस्य सः। यद्वा त्रीणि परूंषि रेखाः ककुत्स्थले यस्य, सः भगवान् अग्रे प्रलयसमये, यत्र यास्वप्सु सुषुप्सुः शिशयिषुः सन्, जीवा धीयन्तेऽस्यामिति जीवधानी तां प्राण्याश्रयभूतामित्यर्थः। यां गां भुवं स्वयम् अभ्यधत्त जठरे धृतवान्। तत्र तास्वप्सु तां गाम्, उत्पाराणां पारशून्यानामप्यपां पारमवसानं यथा भवति तथा, तदाप उक्तविधजलानि क्षुरप्रैः क्षुरप्रायैः खुरैः दरयन्विदलयन विलोडयन्सन्नित्यर्थः। रसायां रसातले विषये ददर्श॥ ३१॥ स्वदंष्ट्रयेति। स वराहो भगवान्, निमग्नां जले निमज्जनं प्राप्तां महीं पृथिवीम्, स्वदंष्ट्रया स्वकीयदंष्ट्राग्रेण उद्धृत्य रसायाः रसातलात्सकाशात उत्थित उद्गच्छन्सन् संरुरुचे। एतत्पर्यन्तं श्वेतवराहचरित्रं स्वायंभुवीयेऽन्तरे जातम्, अथ चाक्षुषीये नीलवराहचेष्टितं अप्येवंविधं तदनेनैकीकृत्याह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मैत्रेयः। तत्रापि तस्मिन् जलेऽपि गदया सह आपतन्तं दैत्यं हिरण्याक्षं दष्ट्वेति शेषः। सुनाभं चक्रं तद्वत्संदीपितस्तीव्रो मन्युर्यस्य स तथाभूतः॥ ३२॥ जघानेति। तस्य खेनातिप्रहतस्य दैत्यस्य रक्तं रुधिरं तदेव पङ्कस्तेनाङ्कितौ गण्डतुण्डौ यस्य स तथाभूतः। अत एव जगतीं रक्तधातुमयीं भुवं विभिन्दन्, अत एव तस्या जगत्याः रक्तपङ्कस्ताम्रः कर्दमस्तेनाङ्कितौ गण्डतुण्डौ यस्य स तथाभूतः। गजेन्द्रः यथा तथा शोभमानः स वराहो भगवान्, मृगराट् सिंहः इभं गजमिव अम्भसि जले रुन्धानं प्रतिरोधमाचरन्तम्, असह्यो विक्रमो यस्य तमसुरं लीलया जघान। इति द्वयोरेकसंबन्धः॥ ३३॥

तमालेति। अङ्ग हे विदुर तमालवन्नीलो मेचकवर्णस्तम्, सितश्वासौ दन्तश्च तस्य कोटिरग्रं तया क्ष्मां महीं गजस्य या लीला तया उत्क्षिपन्तमुद्धरन्तम् ईशं वराहभगवन्तं प्रज्ञायालक्ष्य विरिञ्चिमुख्या ब्रह्मप्रभृतयः महरादिलोकवासिनो मुनयः बद्धाञ्जलयः कृतकरसंपुटाः सन्तः अनुवाकैः अनुवाको वेदसूक्तं तत्सदृशैर्वाक्यैः उपतस्थुः तुष्टुवुः॥ ३४॥ उपस्थानप्रकारमाह। जितमित्यादिना। हे अजित ते त्वया जितं जितम् इति संभ्रमे वीप्सा। यज्ञैर्भाव्यते आराध्यते आहूयते वा यज्ञभावनस्तत्सम्बुद्धिः। त्रयीं त्रय्यात्मिकाम्, एकपदत्वे यज्ञान् भावयति पवित्रयतीति यज्ञभावनी सा चासौ त्रयी ताम्, स्वां तनुं मूर्त्ति परिधुन्वते प्रस्फुरयते ते तुभ्यं नमः। ननु बहुषु कल्याणगुणेषु विशेषेण विद्यमानेषु सत्सु किं विशेषेण तनुपरिधूननमेव स्तूयते इत्यत्राह। यस्यां तनौ रोमाणि तेषां गर्त्ता रन्ध्राणि तेषु, अध्वरा यज्ञाः निलिल्युर्लीना बभूवुः। केचित्तु अध्वरा इत्यत्राध्वय इति पठन्ति। तस्मै कारणार्थं पृथिव्युद्धरणार्थं सूकरः धृतसूकरतनुस्तस्मै, ते तुभ्यं नमः। न हि प्राकृतसूकरस्यैत्थंभूतं सामर्थ्यं दृष्टमिति भावः॥ ३५॥ वराहरूपस्याप्राकृतत्वं वदन्नुक्तयज्ञभावनत्वमेव प्रपञ्चयति चतुर्दशभिः। रूपमिति। हे देव अध्वरात्मकं तव यत् एतत् रूपं दुष्कृतात्मनां पापात्मनां दुर्दर्शनं दर्शनाविषयं ननु। प्राकृतरूपं हि प्राकृतजनमनोग्राह्यं भवेदिदं तु 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' इत्यादिश्रुत्युक्तविधया योगमनोग्राह्यत्वादप्राकृतमित्यर्थः। यस्य तव त्वचि छन्दांसि गायत्रीत्रिष्टुबादीनि यज्ञाङ्गानि छन्दांसि। आसन्। छन्दांसि तव त्वक्त्वेन कल्पन्त इत्यर्थः। रोमसु बर्हिः कुशाः आसन्। बर्हींषि तव रोमत्वेन कल्पन्त इत्यर्थः। एवं सर्वत्र बोध्यम्। एकत्वं जात्यभिप्रायम्। रेफलोपे दीर्घाभाव आर्षः। दृशि दृष्टौ आज्यम्, अङ्घ्रिषु पादेषु तु चातुर्होत्रं चतुर्भिर्होतृभिः क्रियमाणं कर्म आसीत्॥ ३६॥ स्रुगिति। हे ईश स्रुक् जुहूः तुण्डे मुखाग्रे आसीत्। स्रुव इतरदर्वी नासिकयोः आसीत्। ईडा हविर्भक्षणपात्रम् उदरे, चमसाः सोमपात्राणि कर्णरन्ध्रे आसन्। प्राशित्रं ब्रह्मभागपात्रम् आस्ये मुखे आसीत्। ग्रहा उलूखलसदृशसोमपात्राणि यद्वा ऐन्द्रवादिपात्राणि, ते तव ग्रस्यतेऽनेनेति ग्रसनं मुखान्तर्वर्त्तिच्छिद्रं तस्मिन् आसन्। हे भगवन् यत् अग्निहोत्रमग्निहोत्रनामकं कर्म तत् ते तव चर्वणं भक्षणम् आसीत्॥ ३७॥

दीक्षेति। दीक्षा दीक्षयणीयेष्टिः, अनुजन्म तव वारंवारमभिव्यक्तिः, उपसदः उपसदाख्या इष्टयः तव शिरोधरं ग्रीवा त्वम्, प्रायणीया आरम्भेष्टिश्च, उदयनीया अवसानेष्टिश्च, ते प्रायणीयोदयनीये दंष्ट्रे यस्य सः एवंभूतोऽसि। प्रवर्ग्यो महावीराख्यः तव जिह्वा आसीत्। सभ्यो होमरहितोऽग्निश्च आवसथ्यमौपासनाग्निश्च ते क्रतोः क्रतुरूपस्य तव शीर्षकं शिरः। चितयः इष्टकाचयनविशेषाः ते तव असवः प्राणा हि॥ ३८॥ सोम इति। सोमः सोमयागः तु तव रेतः शुक्रम्, सवनानि प्रातरादीनि त्रीणि सवनानि अवस्थितिरवस्थानं निश्चलत्वेन गतिनिवर्त्तनमिति यावत्। बाल्याद्यवस्था वेति केचित्। संस्थाविभेदाः, अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त। तव देहधातवस्त्वङ्मांसादयः सप्त धातवः। सर्वाणि समस्तान्यपि सत्राणि बहुयजमानकानि द्वादशाहादीनि कर्माणि शरीरसंधयः। हे हरे त्वं यज्ञा असोमाश्च क्रतवः ससोमाश्च सर्वे ते यस्मिन्सः यज्ञरूपः क्रतुरूपश्च त्वमेवेत्यर्थः। इष्टिर्यजनमनुष्ठानमिति यावत्। तदेव बन्धनं कायमध्यप्रदेशो यस्य सः। इष्टिः प्रतिपत्त्याद्यादिषु क्रियमाणः कर्मविशेषे इत्येके। एवंभूतस्त्वं भवसीत्यर्थः॥ ३९॥ उक्तमेव सपरिकरं कीर्त्तयन्तः प्रणमन्ति। नमो नम इति। क्रिया आत्मा शरीरं यस्य तस्मै अनेन स्मार्त्तदानादिक्रियात्मत्वमुक्तम्। सर्वक्रतवे सर्वक्रतुशरीराय अनेन श्रौतयज्ञात्मत्वमुक्तम्। मन्त्राः द्रव्यदेवताप्रकाशकानि वेदवाक्यानि च, देवता उद्देश्यविशेषा इन्द्रादयश्च, द्रव्याणि आज्यदधिपयःसोमादीनि च, अखिलानि मन्त्रदेवताद्रव्याणि यस्य तस्मै अखिलमन्त्रादिशरीरायेत्यर्थः। ते तुभ्यं नमः नमः। यज्ञादीनां भगवच्छरीरत्वं बृहदारण्यके माध्यन्दिनपाठे 'यस्यात्मा शरीरम्' इत्यारभ्य 'यस्य यज्ञाः शरीरम्' इति श्रुत्यन्तम्। एवं वेदपूर्वभागस्य भगवत्परत्वमुक्तम्। अथोत्तरभागस्य तद्वक्तुं विशिनष्टि। वैराग्यं शब्दादिविषयेष्वनासक्तिश्च, भक्तिः श्रवणकीर्त्तनस्मरणार्चनवन्दनादिरूपा साधनभक्तिश्च, आत्मजयोऽन्तःकरणजयश्च, तैरनुभावितं निष्पादितं ज्ञानं ध्रुवानुस्मृतिरूपोऽवबोधो यस्य तस्मै, विद्यागुरवे न्यासविद्याप्रवर्त्तकाय ते नमः नमः। न्यासविद्याप्रवर्त्तकत्वं भगवतो वराहपुराणरामायणभगवद्गीतादिप्रसिद्धम्। गुणभेदतो नमसोऽत्र पुनरुक्तिः॥ ४०॥

एवं भागद्वयात्मकवेदवेद्यं हरिं नमस्कृत्याथ स्वाभीष्टं विज्ञापयिष्यन्तः प्रकृतावतारचरित्रं तत्सौष्ठवं च विज्ञापयन्ति द्वाभ्याम्। दंष्ट्राग्रेति। हे भगवन् त्वया कर्त्रा दंष्ट्राग्रकोट्या करणेन सभूधरा सपर्वता भूर्मही धृता सती हे भूधर वनाञ्जलात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निःसरतः निर्गच्छतः मतङ्गजेन्द्रस्य दता दन्तेन धृता सपङ्कपद्मिनी यथा तथा विराजते। क्वचित्तु सपत्रपद्मिनीत्यपि पाठो दृश्यते ॥ ४१ ॥ त्रयीमयमिति। हे नाथ ते त्वया दता दन्तेन धृतेन अथ कात्स्न्र्येन भूमण्डलेन इदं त्रयीमयं चापि सौकरं रूपं भूयसा विपुलेन, शृङ्गेण शिखरेणोढो धृतश्चासौ घनो मेघस्तेन, कुलाचलेन्द्रस्य कुलाचलपर्वतोत्तमस्य विभ्रमो विलासः यथा तथा चकास्ति एव ॥ ४२ ॥ स्वाभिप्रेतं विज्ञापयन्तो नमस्कुर्वन्ति। संस्थापयेति। सतस्थुषां स्थावरसहितानां जगतां जङ्गमानां लोकाय स्थापनार्थं पत्नीं तवाङ्गनां जगतां मातरम् एनां भूमिं संस्थापय जलोपरि प्रतिष्ठापय। यतः त्वं जगतां पिता असि पालको जनकश्च भवसीत्यर्थः। जनकस्य पुत्रार्थं भूसंस्थापनमुचितमेवेति भावः। ननु मया तथा कृते भवतां को लाभ इति चेत्तथा सति नस्त्वत्परिचरणमेव लाभ इत्याह। त्वया पित्रा सह अस्यै मात्रे नमसा विधेम नमस्करिष्यामः। चोऽवधारणे। त्वया भूसंस्थापने कृते सति तत्र स्थिताः वयं नमस्कारेण परिचरेमेत्यर्थः। याज्ञिकाः मन्त्रतः अरणौ अग्निमिव यस्यां भूमौ, त्वं स्वतेजः अधाः निहितवानसि। अयं भावः। भूमेर्जलयोगेन द्रवीभावभजनम्, तेजःसंबन्धेन घनीभवनं चापि, तेजस ऊर्ध्वज्वलनं चापि, धर्मस्ततस्त्वयास्यां तेजसि निहितेऽस्याः द्रवीभावराहित्यम्, घनता, जलोपर्यवस्थानं च संगच्छते, तत्त्वया विचार्य कृतमिति ॥ ४३ ॥ एवं स्वाभिप्रेतं विज्ञाप्य स्वकृतार्थतामाविष्कुर्वन्त इदं त्वयातिदुष्करं कृतमित्याहुः। क इति। हे प्रभो अन्यतमस्त्वदितरः कः पुरुषः रसां रसातलं प्रति गतायाः भुवः, तत्र त्वया कृतमित्यर्थः। उद्बिबर्हणमुद्धरणं श्रद्दधीत। इदमहं कुर्यामिति चिन्तयितुमुत्सहेत। अस्य कर्मणोऽत्याश्चर्यावहत्वेन चिन्तयितुं न उत्सहेत तर्हि कर्तुं तु कुतः प्रभवेदित्यर्थः। विश्वे सर्वे विस्मया यस्मिन्विश्वस्य विस्मयो वा यस्मिंस्तस्मिन् त्वयि असौ विस्मयः न। यतः यस्त्वं मायया त्वद्वतेऽन्येषामाश्चर्योत्पादिकया स्वशक्त्या अतिविस्मयमत्याश्चर्यकरम् इदं जगत् ससृजे सृष्टवान्। अचिन्तनीयनानाविधचित्रकरसंनिवेशवज्जगत्सृजतो भवत एकं भुव उद्बिबर्हणं कियदाश्चर्यकरमिति भावः ॥ ४४ ॥

विस्मयं प्रदर्शयन्तः प्रार्थयन्ते द्वाभ्याम्। विधुन्वतेति। हे ईश वेदमयं वेदविबोध्यक्रतुप्रधानं निजमात्मीयं वपुः शरीरं विधुन्वता कम्पयता त्वया कर्त्रा सटानां केसराणां शिखा अग्राणि ताभिः उद्धूता उच्चलिता ये शिवाम्बुबिन्दवस्तैः करणैः, विमृज्यमानाः सिच्यमानाः 'जनस्तपःसत्यनिवासिनः छन्दोभङ्गभयाद्वेदानुकारित्वाद्वा विसर्गान्तम्'। वयं भृशं पाविताः पवित्रीकृताः। वाचा तव गुणगणानां संकीर्त्तनेन, मनसा संस्मरणेनान्तः शुद्धाः, बहिस्तव सटाप्रसमुद्धूतशुद्धजलबिन्दुभिः पाविता वयमतिकृतार्था अभूमेति भावः ॥ ४५ ॥ स वा इति। अपाराणि कर्माणि यस्य तस्य जगत्सर्गाद्यनन्तक्रियावतः तव कर्मणां पारमवधिं यः एषते काङ्क्षति ज्ञातुमिच्छतीत्यर्थः। स वै स तु, भ्रष्टमतिः, यदीयापाराणां कर्मणां पारं जिज्ञासुर्बुद्धिहीन इत्यर्थः। बतेति खेदे। हे भगवन् यस्य तव या योगमाया त्वत्संबन्धिनी विचित्रसर्गकारिणी शक्तिस्तस्या ये गुणाः सत्त्वादयस्तेषां योगः संबन्धस्तेन मोहितं समस्तं विश्वं भवति, ततः शं सुखविशिष्टं यथा भवति तथा विधेहि। यथैते विश्ववर्त्तिनः प्राणिनस्त्वामचिन्त्यानन्तशक्तिं ज्ञात्वा त्वामेव भजेयुस्तथानुगृहाणेत्यर्थः ॥ ४६ ॥ एवं स्तुतः प्रार्थितश्च भगवान् किमकरोदित्यत्राह। इतीति। तैः ब्रह्मवादिभिर्वेदतुल्यवाक्यानि भाषद्भिः मुनिभिर्मरीच्यादिभिः इत्युक्तप्रकारेण उपस्थीयमानः समीपस्थं यथा तथा संस्तूयमानः, अविता रक्षको भगवान्, स्वखुराक्रान्ते सलिले जले, अवनिं भूमिम् उपाधत्त स्थापयामासेत्यर्थः ॥४७॥ वराहावतारकथामुपसंहरति। स इति। प्रजापतिः प्रजानां संरक्षकः, भगवान् पूर्णषाड्गुण्यः, विष्वक्सेनः सर्वत्र सेना पार्षदादिरूपा यस्येत्यर्थः। हरिः स्वाश्रितापद्धरः, स वराहप्रभुः, लीलया क्रीडया रसायाः रसातलात् सकाशात् उन्नीतामुद्धृताम् उर्वीं भूमिम् अप्सु अपामुपरीत्यर्थः। न्यस्य प्रतिष्ठाप्य ययावन्तर्दधे इत्यर्थः ॥ ४८ ॥ एतत्कथाश्रवणफलमाह। य इति। कथनीयानि मायीनि मायावन्ति चरित्राणि यस्य। यद्वा कथनीया वर्णनीया माया आश्चर्यशक्तिर्विद्यतेऽस्येति कथनीयमायी तस्य, हरिर्जगदुपतापहारिणी मेधा यस्य तस्य हरिमेधसः। यद्विषयिणी मेधा संसारं हरति तथाभूतस्येत्यर्थः। हरेर्भगवतः सुभद्रां मङ्गलावहाम् उशतीं कमनीयाम् एतां कथाम् एवमुक्तप्रकारेण यः पुमान् भक्त्या शृण्वीत शृणुयात् श्रवयेत श्रावयेत् वा 'अपि माषं मषं कुर्यात् च्छन्दोभङ्गं न कारयेत्' इत्युक्तेः श्रावयेतेति आर्षं वा लघुत्वम्। अस्य पुरुषस्य हृदि जनार्दनः आशु प्रसीदति प्रसद्य हृदि प्रविशतीत्यर्थः ॥ ४९ ॥

किं तत्प्रसादेनेत्यत आह। तस्मिन्निति। सकलाशिषां सर्वपुरुषार्थानां प्रभौ प्रदातरि तस्मिन् भगवति प्रसन्ने सति दुर्लभं दुष्प्रापं किं किमपि नास्तीत्यर्थः। अतः लवात्मभिः तुच्छाभिरित्यर्थः। ताभिराशीभिः अलम्। यद्यपि भगवद्भक्तानामाशिषः सुलभा एव, तथापि तासां भगवत इतरत्वाद्भक्तौ विघ्नकर्तृत्वात्ता न प्रार्थनीया इति भावः। न च लौकिकाशिषामलाभे त्वद्भजनस्य विफलत्वं शङ्कनीयमित्याह। अनन्यदृष्ट्या एकान्तभक्त्या स्वधर्मज्ञानवैराग्यसप्रेमनवधाभक्तिरूपैकान्तिकधर्मेणेत्यर्थः। भजतां भजनं कुर्वाणानां गुहाशयः हृदयकुहरे निविष्टः परः परमपुरुषः भगवान् स्वयमेव परां निरतिशयां स्वगतिं स्वप्राप्तिं विधत्ते संपादयति ॥ ५० ॥ अतो निरतिशयपुरुषार्थसाधनभूतां कर्णरसायनां पवित्रां कथां शृण्वन्नेतरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विना को नाम तृप्तिं यायादित्याह । क इति लोके पुरुषार्थानां धर्मादीनां सारं वेत्तीति पुरुषार्थसारवित् 'धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते' इति प्रथमस्कन्धोक्तरीत्या पुरुषार्थसाराभिज्ञः को नाम पुराकथानां पूर्ववृत्तान्तानां मध्ये भवापहां संसारनिवृत्तिकर्त्री भगवतः कथैव सुधा तां कर्णाविवाञ्जलयस्तैः आपीय समंततः पीत्वा नरेतरं पशुं विना विरज्येत न कोऽपि नरो विरक्तो भवेदित्यर्थः । अहो इति भगवच्चरित्रस्याश्चर्यत्वद्योतकमव्ययम् ॥ ५१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

——:#:——

अथ चतुर्दशोऽध्यायः

श्रीशुक उवाच

निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः ।
पुनः स पप्रच्छ तमुद्धृताञ्जलिर्न चातितृप्तो विदुरो धृतव्रतः ॥ १ ॥

निदानं तद्वधे वक्तुं तूच्यतेऽत्र चतुर्दशे । कश्यपाद्गर्भसंभूतिः संध्यायां कामतो दितेः ॥ १ ॥

हिरण्याक्षवधवृत्तान्तविस्तरबुभुत्सया विदुरः पुनः पृच्छतीत्याह शुकः । निशम्येति । कौषारविणा मैत्रेयेण उपवर्णितां कारणसूकरात्मनः हरेः कथां निशम्य श्रुत्वा, धृतं व्रतं भगवत्कथाशुश्रूषारूपं येन सः, अत एव न चातितृप्तः संक्षेपतः कथाश्रवणेन तृप्तिमलभमानः, उद्धृतः हस्तद्वयमेकीकृत्योद्धृतः अञ्जलिर्येन सः । सः विदुरः पुनः तं मुनिं पप्रच्छ पृष्टवान् । अञ्जलिविधानं तु 'अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादनी' इति तस्याः क्षिप्रप्रसादनहेतुत्वात् ॥ १ ॥ श्रुतोपजीवनेन प्रश्नं विधातुमुक्तमनुवदति । तेनेति । हे मुनिश्रेष्ठ मैत्रेय येन भूमिरुद्धृता तेनैव यज्ञमूर्तिना यज्ञशरीरेण हरिणा आदिदैत्यः हिरण्याक्षः हतश्च । श्रीमता वराहेण निपातित एव इति अनुशुश्रुमः । त्वत्तः श्रुतवन्तो वयमित्यर्थः । अत्र हिरण्याक्षस्यादिदैत्यत्वं मन्वन्तरापेक्षया न कल्पापेक्षया । चाक्षुषमन्वन्तरे प्राचेतसदक्षपुत्र्यां दित्यामस्य प्रादुर्भावात् ॥ २ ॥ तस्येति । हे ब्रह्मन् स्वदंष्ट्राग्रेण क्षोणीं भूमिं लीलया उद्धरतः तस्य वराहस्य दैत्यराजस्य च मृधो युद्धं कस्माद्धेतोः अभूत् ॥ ३ ॥ एवमापृष्टो मैत्रेयः सविस्तरं तत्कथां प्रस्तोष्यंस्तावत्प्रश्नमभिनन्दति । साध्विति । हे वीर त्वया साधु पृष्टम् । यद्यतः मर्त्यानां मरणशीलानाम्, मृत्युपाशं विशातयति मोचयतीति मृत्युपाशविशातनी तां हरेः अवतारकथां त्वं पृच्छसि ॥ ४ ॥

ययेति । मुनिना नारदेन गीतया यया भगवत्कथया उत्तानपदः पुत्रो अर्भकः ध्रुवः मृत्योः मूर्ध्नि अङ्घ्रिं कृत्वा एव पादं विन्यस्यैवेत्यर्थः । हरेः पदं स्थानम् आरुरोह । यदा ध्रुवं विष्णुपदं प्रति नेतुं सुनन्दादिभिर्विमानमानीतं तदास्य मायिकदेहत्यागोऽपेक्षितः स्यादिति मत्वा मृत्यावासन्नेऽपि देहं न तत्याज, किं तु सोपान इव तस्य मूर्ध्नि पदं दत्त्वा, विमानमारुह्य, विष्णुपदमारूढः । वक्ष्यति हि । 'परीत्याभ्यर्च्य धिष्ण्याग्र्यं कृतस्वस्त्ययनो द्विजैः । इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम्' इति ॥ ५ ॥ एवं विदुरप्रश्नप्रशंसां कृत्वा हिरण्याक्षसमुद्भवं वक्तुं तद्वृत्तान्तस्य सांप्रदायिकत्वमाह । अथेति । अथ सविस्तारककथारम्भे हे विदुर अत्रापि त्वत्पृष्टेऽर्थेऽपि अयम् इतिहासः मे मया श्रुत इत्यर्थः । कुत इत्यपेक्षायामाह । देवानां देवः देवदेवः तेन ब्रह्मणा चतुर्मुखेन अनुपृच्छतां देवानां पुरः इति शेषः । पुरा पूर्वकाले वर्णितः । स एव परंपरया मया श्रुत इत्यर्थः ॥ ६ ॥ तमेवेतिहासं प्रस्तोष्यन् तदुपोद्घातरूपमितिहासं प्रस्तौति । दितिरित्यादिना । हे क्षत्तः दक्षस्यापत्यं स्त्री दाक्षायणी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दितिर्दितिनाम्नी मारीचं मरीचेः पुत्रं कश्यपं पतिं भर्त्तारम्, अपत्यस्य काम इच्छा यस्याः सापत्यकामा। यद्वाऽपत्यं कामयते इत्यपत्यकामा, हृच्छयः कामस्तेनार्दिता संपीडिता अत एव संध्यायां शास्त्रनिषिद्धे प्रदोषकाले इत्यर्थः। चकमे कामितवतीत्यर्थः ॥ ७ ॥

कथंभूतं चकमे इत्यत्राह हुत्वेति। यजुषां यज्ञानां पतिम्, अग्निर्जिह्वा यस्य तं पुरुषं परमपुरुषं पयसा दुग्धेन हुत्वा, अग्निशरीरकपुरुषाय हविरादि दत्त्वेत्यर्थः। अर्के सूर्ये निम्लोचति अस्तं गच्छति सति अग्न्यागारेऽग्निहोत्रशालायाम् आसीनमुपविष्टं समाहितं ध्याननिष्ठं च चकमे ॥ ८ ॥ सा पतिं कामितवती सती यदाह तां तदुक्तिमेवाह। एष इत्यादिना अथ मे कुर्वित्यन्तेन। हे विद्वन् कश्यप, आत्तं शरासनं धनुर्येन सः एषः कामः, त्वत्कृते त्वदर्थं त्वया सह संगत्यर्थमित्यर्थः। दीनां कृपणां मां विक्रम्य, मतङ्गजः मत्तः करी रम्भां कदलीम् इव दुनोति परितापयति पीडयति वा ॥ ९ ॥ तदिति। तत्तस्मात् प्रजावतीनां जातप्रजानां सपत्नीनां समृद्धिभिः दह्यमानायां मयि भवान् अनुग्रहम् आयुङ्क्तां सम्यक् करोतु। ते तुभ्यं भद्रं मङ्गलम् अस्तु ॥ १० ॥ भर्त्तरीति। भवद्विधः भवादृशः पतिर्भर्त्ता यासां मादृशस्त्रीणां प्रजया प्रजारूपेण अनुजायते हि। तासां भर्त्तरि भर्तुः सकाशादित्यर्थः। पञ्चम्यर्थे सप्तमीयमार्षी। आप्तः संप्राप्तः उरुर्बहुः मानो याभिस्तासां स्त्रीणाम्, यशः लोकान् आविशते, लोकेषु विस्तृतं भवतीत्यर्थः। अयमेव तद्बहुमानो यत्स्वभार्यायां पतिः प्रजारूपेण जायते इति भावः ॥ ११ ॥ पुरेति। पुराऽस्मत्पाणिग्रहणकर्मविधानतः पूर्वकाले, दुहितृषु पुत्रीषु वत्सलो वात्सल्यवान् नोऽस्माकं पिता दक्षः भगवान् अस्मद्वाञ्छितविधानाद्यैश्वर्यवान् सन्, हे वत्साः कं वरं वृणीत इति नोऽस्मान्प्रति पृथक् एकैकामाकार्येत्यर्थः। अपृच्छत अपृच्छत ॥ १२ ॥ स इति। संतानं स्वप्रजां भावयति वर्द्धयतीति संतानभावनः, सः दक्षः तासाम् आत्मजानां दुहितॄणां नोऽस्माकं भावं विदित्वा, ते तव शीलम् अनुव्रताः याः वयं ता अस्मान् त्रयोदशापि अददत्। कन्यादानविधिना तुभ्यं विश्राणितवानित्यर्थः। अयं भावः। त्रयोदशानामप्यस्माकं त्वयि भावस्य साम्यत्वात् तव वैषम्याचरणमनुचितमिति ॥१३॥ अथेति। अथ ततो हेतोरित्यर्थः। हे कञ्जविलोचन, हे कल्याण मङ्गलरूप, मे मम काममभिलषितं कुरु संपादय। हे भूमन् महत्तम महीयसि महत्तरे पुरुषे आर्त्तानां दुःखितानामुपसर्पणमनुच्छन्दनम् अमोघं मोघं न भवति हि, इदमेव महीयसां महत्तरत्वमिति भावः ॥ २४ ॥

तयैवमुक्तः कश्यपः किमाहेत्यत्राह। इतीति। वीरमारीचः जितेन्द्रियः कश्यपः इत्युक्तरीत्या बहुभाषिणीम्, प्रवृद्धस्तस्मिन्काले वृद्धिं प्राप्तो योऽनङ्गः कामस्तेन कश्मलो मोहो यस्यास्ताम्, कृपणां दीनां तां दितिं वाचा प्रियगिरा अनुनयन् सान्त्वयन्सन् प्रत्याह उवाच ॥ १५ ॥ उक्तिमेवाह, एष इत्यादिना ब्रह्मादयो यत्कृतसेतुपाला इत्यन्तेन। तत्र संध्याकालातिक्रमाय भार्यां प्रशंसति पञ्चभिः। एष इति। हे भीरु त्वं यत् इच्छसि तत् ते तव प्रियं प्रीत्युत्पादकं कर्म एषः अहं विधास्यामि करिष्यामि। यतो यस्याः पत्न्याः सकाशात् त्रैवर्गिकी धर्मार्थकामरूपा सिद्धिः फलं भवेत् तस्यास्तादृश्या भार्यायाः काममभिलषितं कः न कुर्यात् सर्वोऽपि जनः कुर्यादेवेत्यर्थः ॥ १६ ॥ परंपरया तुरीयपुरुषार्थोऽपि भार्यात एव सिद्ध्यतीत्याह। सर्वाश्रमानिति। कलत्रवान् भार्यावान् द्वितीयाश्रमवानित्यर्थः। स्वाश्रमेण स्वकीयेन द्वितीयाश्रमेण सर्वाश्रमानितरांस्त्रीनाश्रमान् उपादायोपकृत्य, व्यसनमिन्द्रियाणां विषयप्रावण्यरूपं दुःखमेवार्णवस्तम्, जलयानैर्नौभिः अर्णवं समुद्रं यथा तथा अत्येति। इन्द्रियजयादिद्वारा चतुर्थपुरुषार्थसंसाधकोऽपि जायते इत्यर्थः। सर्वाश्रमोपकारको गृहस्थाश्रम इति भावः। तथा च मनुः। 'यथा वायुं समाश्रित्य वर्त्तन्ते सर्वजन्तवः। तथा गृहस्थमाश्रित्य वर्त्तन्ते सर्वं आश्रमाः। यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्। गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही' इति ॥ १७ ॥ यामिति। हे मानिनि श्रेयस्कामस्य स्वर्गापवर्गाख्यश्रेयःसंपादकस्य आत्मनः देहस्य अर्द्धं समानार्द्धरूपां याम् आहुः हि वेदा इति शेषः। 'अर्द्धो वा एष आत्मनो यत्पत्नी' इति श्रुतेः। अनेन स्वर्गापवर्गसाधनेषु धर्मेषु द्वयोः सहाधिकारित्वं सूच्यते। यस्यां पत्न्यां स्वधुरं स्वकीयगृहभारम् अध्यस्य निःक्षिप्य पुमान् गृहस्वामी विज्वरो निश्चिन्तः गृहचिन्तावर्जित इत्यर्थः। चरति, यत्र तत्र प्रयोजनसिद्ध्यै परिभ्रमतीत्यर्थः ॥ १८ ॥ यामिति। यां पत्नीम् आश्रित्य इतराश्रमैर्ब्रह्मचर्याद्याश्रमैः दुर्जयान् जेतुमशक्यान् इन्द्रियाण्येवारातयः शत्रवस्तान् हेलाभिर्लीलाभिः दुर्गपतिः कोट्टस्वामी दस्यून् दुष्टजीवान् चोरप्रभृतिदुर्जनानित्यर्थः। यथा तथा वयं जयेम ॥ १९ ॥

न वयमिति। हे गृहेश्वरि वयं तामुक्तविधयोपकर्त्रीं त्वां कात्स्र्न्येन आयुषा पुरुषायुषापि अनुकर्तुं न प्रभवः समर्था न भवामः। एवम् अन्येऽपि ये गुणकाङ्क्षिणः गुणदर्शिन इति यावत्। तेऽपि पूर्णेनायुषा वाशब्दाज्जन्मान्तरैरपि न प्रभव एव ॥ २० ॥ अथेति। अङ्गने अथापि त्वत्कृतोपकारानुरूपेणोपकर्तुमशक्यत्वेऽपि ते तव प्रजात्यै प्रजननाय पुत्रोत्पत्तये स्यात्तथा करवाण्येव, किं तु मुहूर्त्तं मुहूर्त्तकालं प्रतिपालय प्रतीक्षस्व ॥ २१ ॥ किमर्थं मुहूर्त्तपरीक्षणमित्याशङ्कायां तस्य मुहूर्त्तस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रत्यनुपयुक्ततां कथयति। एषेति। हे स्त्रि एषा वेला घोरतमा उग्रतमा घोराणामपि घोरदर्शना भयंकराणामपि भयोत्पादिकेत्यर्थः। यस्यां संध्यावेलायां भूतेशः शंभुस्तस्यानुचराणि भूतानि ह स्फुटं यथा तथा चरन्ति सर्वतः परिभ्रमन्ति। अस्मिन्काले प्रमथादिभूतसंचरणावसरत्वान्नायं भोगावसर इति भावः॥ २२॥ भूतानि चरन्ति चेत्तत्संचारविषयप्रदेशो वर्जनीयस्तत्राह। एतस्यामिति। हे साध्वि एतस्यां संध्यायां भूतानां सर्वजीवानां भावयति सुखमिति भूतभावनः सर्वजीवसुखप्रदातेत्यर्थः। भगवान् भूतराट् भूतानामधिपती रुद्रः भूतपर्षद्भिः प्रमथादिपरिषद्भूतभूतगणैः परीतः परिवेष्टितः सन् वृषेण स्ववाहनभूतेन वृषभेण नन्दिकेश्वरेणेत्यर्थः। अटति सर्वत्र संचरति॥ २३॥ श्मशानेति। श्मशानेषु यश्चक्रानिलो वात्या तेन या धूलिस्तया धूम्रः विकीर्णो विक्षिप्तः विद्योती द्युतिमान् जटाकलापो जटाजूटो यस्य सः, भस्मना भूत्या अवगुण्ठोऽवलिप्तः अमलो भस्मेतरमलवर्जितः रुक्मवत्क्षालितरूप्यसमानः देहो यस्य सः, ते तव देवरः त्वद्भगिन्याः सत्याः पतिरित्यर्थः। न तु त्वत्पतिभ्राता तस्य भ्रात्रभावात्। न तु ब्रह्मपुत्रत्वतो भ्रातेति चेद्ब्रह्मपुत्रस्तु मरीचिस्त्वत्पतिरहं मरीचेः पुत्रः। यद्वा एकस्य जामातरः परस्परं भ्रातरो व्यवह्रियन्ते, अतो मम भ्रातासौ तव देवर एवं स्वजनत्वादादरणीय इति भावः। तत्रापि देवः स्वयं रुद्रः त्रिभिः सोमार्काग्निरूपैस्त्रिभिर्नेत्रैः पश्यति अस्योत्तरेषु त्रिषु श्लोकेष्वनुषङ्गः अतोऽकाले एतन्नोचितमिति भावः॥ २४॥

यर्हि स्वजनत्वादेतस्यादरणीयत्वम्, तर्हि स्वजनः स्वजनापराधं सहेतेत्यत्राह। नेति। यस्य रुद्रस्य लोके स्वजनः परः अस्वजनो वा न अस्ति। अत्यादृतोऽत्यन्तमादरणीयोऽपि न उत च कश्चित् विगर्ह्यः निन्द्योऽपि न। स्वार्थापेक्षिणः विषयोपभोगैकदृष्टेः प्राकृतस्य जनस्य हि स्वजनादिविभागः संभवत्यस्य तु समदृष्टेरुपेक्षितसांसारिकविभूतेरात्मसुखतृप्तस्य स्वजनादिविभागो नैवास्तीति भावः। बत इत्यामन्त्रणे। हे भीरु वयं स्वस्य तत्त्वदर्शित्वेऽपि संसारिमण्डलमध्यस्थत्वतो वयमित्यभिहितम्। संसारिणोऽस्मद्विधा लोका इत्यर्थः। यस्य रुद्रस्य चरणौ ताभ्यामपविद्धा निर्माल्यवद्दूरतस्त्यक्ता, तां भुक्तभोगां तेन कृतभोगाम् अजां विभूत्यात्मिकां मायां व्रतैर्नानाविधैश्वर्यसाधनैः आशास्महे प्रार्थयामहे॥ २५॥ ननु पिशाचावासश्मशानेषु पिशाचवच्चरतः सर्वदाऽशुचेरस्याकिमेवमाशङ्कसे इत्यत्राह। यस्येति। यस्य रुद्रस्य अनवद्यं निर्दोषं च तदाचरितं च तत्, विषयाशक्तिशून्यं चरित्रमित्यर्थः। मनीषिणो बुद्धिमन्तः अविद्यायाः पटलमावरणं तत् बिभित्सवः भेत्तुमिच्छवः ज्ञानार्थिनः सन्त इत्यर्थः। गृणन्ति कीर्त्तयन्ति 'आरोग्यं भास्करादिच्छेच्छ्रेय इच्छेद्धुताशनात्। शंकराज्ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनात्' इत्युक्तरीत्या फलविशेषलब्ध्यर्थवद्भिरस्योपास्यत्वाभिधानाज्ज्ञानार्थिभिस्तच्चरितमुपादेयमिति न तत्पिशाचचर्यामन्वीक्ष्य स निन्दनीय इति भावः। नन्वेवंभूतमहिमः स यदा भवति, तर्हि किमर्थं पिशाचवच्चरति तत्राह। यः स्वयं साम्यं चातिशयश्च तत्समाहारः निरस्तं साम्यातिशयं यस्मात्तथाभूतोऽपि, सतां गतिः ज्ञानोपायः सन् पिशाचचर्याम् अचरत् आचरति स्म। मत्समज्ञानविरागादिमद्भिः स्वदेहाद्यनादरपूर्वं वर्त्तितव्यमिति ज्ञानिनो बोधयितुमस्य तथाचरणमिति भावः॥ २६॥ एवमन्वयमुखेन तच्चरित्रस्यानवद्यत्वमुक्त्वा व्यतिरेकमुखेनापि वदति। हसन्तीति। स्वात्मन् स्वकीये आत्मनि, रतस्य स्वात्मानुभवैकनिष्ठस्येत्यर्थः। यस्य रुद्रस्य आचरितं दिगम्बरस्य सतोऽपि स्वस्योत्सङ्गेऽङ्गनोपवेशनरूपमाचरणं समीहितं पिशाचवद्वर्त्तनरूपं चेष्टितं न अविदुषः अविद्वांसः आर्षत्वादिभक्तिव्यत्ययः। हसन्ति निन्दन्ति, ते दुर्भगा भाग्यवर्जिता हि। केऽविद्वांसः तच्चरितं हसन्ति तत्राह। यैः कर्तृभिः वस्त्राणि च, माल्यानि च, आभरणानि च, अनुलेपनानि च तैः करणैः। श्वभोजनं केवलं शुनामेव भोज्यं शरीरमित्यर्थः। निष्प्राणशरीरस्य भषकभोज्यत्वादिति भावः। स्वात्मतया स्वात्मनोऽभिन्नत्वेन उपलालित अयं देह एवात्मेति बुद्ध्वा स देहो यैर्वस्त्रादिभिरुपस्क्रियते, तेऽविद्वांसः स्वात्मरतस्याचरितादिकं निन्दन्तीति भावः॥ २७॥

एवमुक्तरीत्या तच्चरित्रमनिन्द्यमित्युक्त्वा तस्यैवंविधस्य पिशाचचर्या विडम्बनमात्रमेवेत्याह। ब्रह्मादय इति। ब्रह्मादयः पुलहादयो नव ब्राह्मणाः। 'नवब्रह्माण इत्येते पुराणे निश्चयं गताः' इति श्लोके तेषां ब्रह्मशब्दवाच्यत्वावगमात्। येन रुद्रेण कृता यत्कृताः ते च ते सेतवो मर्यादास्तान् पालयन्तीति तथाभूताः सन्ति। इदं विश्वं यो रुद्रः कारणं यस्य तत् विश्वैककारणरूपो य इत्यर्थः। माया अहंकृत्यात्मिका प्रकृतिः यस्य रुद्रस्य आज्ञाकरी चैव। विभून्नः महीयसस्तस्य रुद्रस्य पिशाचचर्या पिशाचवद्वर्त्तनरूपं चरित्रं विडम्बनमनुकरणमात्रमेव अहो इत्याश्चर्ये। विभून्नः सतोप्यस्यैवं वर्त्तनमाश्चर्यकरमित्यर्थः। ब्रह्मादय इत्यस्य प्रसिद्धार्थं परित्यज्यान्यथा तद्विधानं तु ब्रह्मणस्तदुत्पत्त्युक्तेस्तद्दत्तनामोक्तेर्वक्ष्यमाणतन्नमस्कार्यत्वोक्तेश्च विरोधनिस्ताराय बोध्यम्॥ २८॥ एवं कश्यपेनोक्ता दितिस्ततः किमकरोदित्यत्राह। सेति। भर्त्रा कश्यपेन एवमुक्तप्रकारेण संवेदिते ज्ञापिते सति मन्मथेन कामेनोन्मथितान्युद्दीपितानीन्द्रियाणि यस्यास्तथाभूता अत एव सा दितिः वृषली वेश्येव गता प्रयाता त्रपा लज्जा यस्याः सा निर्लज्जा सती ब्रह्मर्षेः कश्यपस्य वासो वस्त्रं जग्राह परिहितवस्त्राञ्चलं गृहीत्वा विचकर्षेत्यर्थः॥ २९॥ स इति। सः कश्यपः भार्याया दितेः विकर्मणि निषिद्धकामचरणे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संध्यायां शास्त्रनिषिद्धे रतिकर्मणीत्यर्थः। तं निर्बन्धं वासोग्रहणरूपमुपभोगाग्रहम् अथ कात्स्न्र्येन विदित्वा दृष्ट्वा दिष्टाय दैवरूपायेश्वराय नत्वा नमस्कृत्य, अथाऽनन्तरं तया दित्या भार्यया सह रहस्येकान्ते उपविवेश। उपविवेशेत्यनेन मैथुनं लक्ष्यते। केषांचिन्मते तु नात्र लक्षणा, किं तु शक्तिरेव। 'निर्वेश उपभोगः स्यादुपवेशस्तु मैथुनम्' इत्यभिधानात् ह प्रसिद्धार्थे। प्रत्यारम्भे प्रसिद्धे हेत्यप्यभिधानात् ॥ ३० ॥ अथेति। अथोपवेशनानन्तरं सलिलं जलम् उपस्पृश्य सलिले स्नात्वेत्यर्थः। प्राणान् आयम्य नियम्य प्राणायामं कृत्वेत्यर्थः। वाचि यतो वाग्यतः धृतमौनः विरजं निर्विकारं ज्योतिः भर्गः सनातनं नित्यं ब्रह्म परमात्मस्वरूपं ध्यायंश्चिन्तयन्सन् जजाप। गायत्रीजपं चकारेत्यर्थः। गायत्रीमन्त्रवर्ण्यभर्गोन्तःस्थपरमात्मस्वरूपं ध्यायंस्तन्मन्त्रजपनं चकारेत्यर्थः ॥ ३१ ॥

अथावशिष्टोऽध्यायः दितिकश्यपयोरुत्तरप्रत्युत्तररूपेण प्रवृत्तोऽस्ति, तत्र दितिरुवाचेत्याह मैत्रेयः। दितिरिति। हे भारत भरतकुलोत्पन्न विदुर, तेन कर्मावद्येन कर्मदोषेण व्रीडिता संजातलज्जा दितिः तु उपसंगम्य समीपे आगत्य अधोमुखी सती विप्रर्षिं कश्यपम् अभ्यभाषतोक्तवती ॥ ३२ ॥ तत्कृतभाषणमाह। मेति। हे ब्रह्मन्कश्यप भूतानाम् ऋषभः पतिः रुद्रः, मे मम इमं गर्भं मा वधीत् मा हन्यात्। हि यस्मात् भूतानां पतिः रुद्रः मतः। यस्य रुद्रस्य अंहसमपराधम् अहम् अकरवम् कृतवती। अतः मा वधीदित्यर्थः ॥ ३३ ॥ इत्थं स्वकीयाभिप्रायं स्वपतिमावेद्य यदपराधः स्वयं कृतस्तं प्रणामं विदधती सती प्रसादयति। नम इति द्वाभ्याम्। महते देवाय महादेवायेत्यर्थः। विश्वसंहारादिमहाकर्मकर्तृतया महेन्द्राद्यपेक्षया महत्त्वमनेन विवक्षितम्। उग्राय त्रिनेत्रादिमत्तयोग्ररूपिणे, मीढुषे सकामेषु फलसेचनकर्त्रे, शिवाय निष्कामेषु शिवरूपेण वर्त्तमानाय, न्यस्तस्त्यक्तः दण्डो येन तस्मै, भागवतेषु दण्डमकृतवते इत्यर्थः। धृतः संपादितो दण्डो येन तस्मै अधर्मिषु भगद्विमुखेषु निहितदण्डायेत्यर्थः। मन्यवे साक्षाद्विद्यमानस्यापि भगवत आश्रयं विहाय केवलं संसारासक्तेषु धृतमन्यवे इत्यर्थः। रुद्राय स्वस्य वैष्णवाग्रेसरत्वाद्वैष्णवानां रुत दुःखं द्रावयतीति तस्मै इत्यर्थः। नमः। केचित्तूग्रायानतिलङ्घ्याय, मीढूषे सकामेषु शिवाय, निष्कामेषु स्वतो न्यस्तदण्डाय, दुष्टेषु धृतदण्डाय, संहारे मन्यवे इत्यपि सामान्यतया योजयन्ति ॥ ३४ ॥ स इति। भामः भगिनीभर्त्ता, उरुरनुग्रहो यस्य सः, सतीपतिरुमायाः पतिः। अनेन स्त्रीणां स्वभावं स्वयमपि वेत्तीति सूचितम्। भगवान्महैश्वर्यः देवः स रुद्रः व्याधस्य मृगयोरपि अनुकम्प्यानां दयनीयानां स्त्रीणां नोऽस्माकं प्रसीदतां प्रसन्नः भूयात् ॥ ३५ ॥ एवमाभाषन्तीं पत्नीं कश्यपः प्रत्याहेत्याह मैत्रेयः। स्वगर्भस्येति। स्वगर्भस्य स्वसंतानस्य लोक्यां लोकद्वयार्हाम् आशिषं शुभम् आशासानां प्रार्थयन्तीं प्रवेपतीं परिकम्पतीं भार्यां स्वाङ्गनां दितिम्, निवृत्तः संपूर्णतां प्राप्तः संध्यानियमः संध्याकर्मसंपाद्यो नियमो यस्य सः प्रजापतिः कश्यपः आहोवाच ॥ ३६ ॥ तदुक्तमेवाह चतुर्भिः। अप्रायत्यादिति। हे अङ्गने ते तव आत्मनः चित्तस्य अप्रायत्यादशुद्धिभावात् मौहूर्त्तिकात्संध्याकालसंबन्धिनः दोषात्, उतापि मम नियोग आज्ञा तस्य यो अतिचारोऽतिक्रमस्तेन देवानां रुद्रादीनाम् अतिहेलनादत्यपचाराच्चापि ॥ ३७ ॥

भविष्यत इति। हे अभद्रे अमङ्गलरूपे तव जाठराधमौ, अधमौ त्वदुदरोद्भूतौ पुत्रावित्यर्थः। अभद्रौ लोकानाममङ्गलकरौ भविष्यतः। तौ च चण्डावतिक्रूरौ सन्तौ सपालान् लोकपालैः सहितान् त्रीन् लोकान् भूरादिलोकत्रयवासिनो जनानित्यर्थः। त्रयाणामुपलक्षणत्वात् भूम्यन्तर्गतसप्तलोकवासिनोऽपीति बोध्यम्। मुहुर्भूयो भूयः आक्रन्दयिष्यतः रोदयिष्यत इत्यर्थः। इति द्वयोरेकसंबन्धः ॥ ३८ ॥ प्राणिनामिति। दीनानां कृपणानाम्, न कृतमागोऽपराधो यैस्तेषां प्राणिनां हन्यमानानां हन्तुमारब्धानां सताम्, स्त्रीणां जनसंबन्धिसुरूपाङ्गनानां च निगृह्यमाणानां वन्दीकृतानां सतीनाम्, महात्मसु महापुरुषेषु भगवदेकान्तिकजनेषु इत्यर्थः। कोपितेषु कोपं गमितेषु सत्सु यदोक्तविधं कर्म करिष्यत इत्यर्थः ॥ ३९ ॥ तदेति। तदा तस्मिन्काले लोकान् भावयति सुखयतीति लोकभावनः, अत एव क्रुद्धः स्वाश्रितविश्वगतजनपीडनेक्षणतः कोपं प्राप्तः, विश्वेश्वरो जगदेकनाथः असौ सर्वान्तरात्मतया ख्यातः भगवान् अवतीर्य भूमौ प्रादुर्भावं प्राप्य, शतपर्वधृत् वज्रायुधधर इन्द्र इति यावत्। अद्रीन् पर्वतान् यथा तथा हनिष्यति। वराहनरसिंहावतारौ धृत्वा व्यापादयिष्यतीत्यर्थः। अत्र दृष्टान्तस्तु तयोः शीघ्रव्यापादने कठिनत्वे च बोध्यः। दृष्टान्तस्यैकदेशित्वात्। ततोऽद्रीणां तत्कृतं प्राणवियोजनं न तर्क्यम्। इति द्वयोरेकसंबन्धः ॥ ४० ॥ कश्यपेनैवमुक्ते पुनर्दितिराह द्वाभ्याम्। वधमिति। सुनाभं चक्रं तेनोदारः सुन्दरो बाहुर्भुजो यस्य तेन भगवता, साक्षात्स्वहस्ताभ्यां कृतमित्यर्थः। मह्यं मम पुत्रयोः वधं नाशम् आशासेऽनुमन्ये, किं तु हे प्रभो क्रुद्धात्कुपितात् ब्राह्मणात् मा नैव आशासे 'कोपितेषु महात्मसु च' इत्युक्तत्वात् प्रकुपितब्राह्मणतस्तद्वधमाशङ्कमाना सत्येवं प्रार्थयते क्रुद्धान्मा भूदिति ॥ ४१ ॥ ननु भवतूक्तविधविप्रतो वा, कस्माच्चनान्यतो वा, वधस्तत्र को विशेष इत्यत्राह। नेति। ब्रह्मदण्डदग्धस्य ब्राह्मणशापहतस्य, भूतभयदस्य भूतानां भयदायकस्य च, नारकाश्च नरकवासिनोऽपि नानुगृह्णन्ति अनुगृहं न कुर्वन्ति। नरकवासिनोऽपि सर्वेभ्यो लोकेभ्यो दुःखं मा भूदिति मन्यन्ते तेऽप्येतयोः कृपां नाचरन्ति, ततोऽपि एतावतिपापिनावित्यर्थः। न केवलमेतावदेव, किं तु असौ ब्रह्मदण्डदग्धो लोकभयदश्च यां यां योनिं गतः भवेत्, तत्तद्योनिगा अपि न। नानुगृह्णन्तीत्यर्थः ॥ ४२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथैवमुक्तो मुनिराह। कृतेत्यादिसप्तभिः। कृतस्त्वद्विहितो योऽपराधस्तेन शोकस्तस्माद्योऽनुतापस्तेन सद्यस्तत्क्षणमेव प्रत्यवमर्शनाद्युक्तायुक्तविचारात् भगवति परमपुरुषे उरुमानाच्च स्वपुत्रयोर्भगवद्धस्तमरणानुमननाच्चेत्यर्थः। भवे श्रीरुद्रे मयि चापि आदराद्धेतोः ॥ ४३ ॥ पुत्रस्येति। पुत्रस्य त्वत्सूनोर्हिरण्यकशिपोः एव पुत्राणामनुह्लादादीनां सुतानां मध्ये एकः कनीयान्पुत्रः तु सतां साधूनां मतः संमतः भविता भविष्यति। इति सार्द्धस्यैकसंबन्धः। तमेव वर्णयति। गास्यन्तीत्यादिसार्द्धैः पञ्चभिः। शुद्धम्, यस्य तव पौत्रस्य यशो यद्यशस्तत्, भगवद्यशसा समं सदृशं वा गास्यन्ति। यच्छब्दस्य 'स वा' इत्युत्तरत्रान्वयः ॥ ४४ ॥ योगैरिति। किं च यच्छीलं यस्य त्वत्पौत्रस्य स्वभावम् अनुवर्त्तितुमनुसर्त्तुम्, साधवः सत्पुरुषाः निर्वैरादिभिः गुणैः, आत्मानम्‌न्तःकरणं, योगैः क्षारादिसंयोगैः दुर्वर्णं हीनवर्णं हेम सुवर्णम् इव, भावयिष्यन्ति शोधयिष्यन्ते। स साधुताया निकषाश्मसदृशो भवितेत्यर्थः ॥ ४५ ॥ यदिति। किं च यत्प्रसादाद्यस्य भगवतोऽनुग्रहात् इदं विश्वं प्रसीदति, यदुपरि भगवान्प्रसन्नः स्यात्तदुपरि सकलविश्वं प्रसन्नं भवेदित्यर्थः। अत्र हेतुमाह। तदेतद्विश्वं यदात्मकं भगवदात्मकम् अस्ति। स्वेनैव पश्यतीति स्वदृक्, करणनिरपेक्षं सर्वं साक्षात्कुर्वाण इत्यर्थः। सः भगवान् यस्य त्वत्पौत्रस्य, अनन्यया अव्यभिचारिण्या दृशा भक्त्या तोष्यते, संतोषं प्राप्स्यतीत्यर्थः ॥ ४६ ॥ स वा इति। महाभागवतः निरतिशयभगवद्भक्तः, महानत्युत्तमोऽनुभावो महिमा यस्य सः महात्मा निर्मलान्तःकरणः, महतां माहात्म्यवतां मध्येऽपि वै निश्चयेन महिष्ठो निरतिशयमाहात्म्यवान् सः त्वत्पौत्रः, प्रवृद्धभक्त्या उत्तरोत्तरवृद्धिमद्भक्त्या, अनुभावितः संशोधितश्चासावाशयश्चितं तस्मिन्, भक्तिवृद्धिपरिशुद्धान्तःकरणे इत्यर्थः। वैकुण्ठं भगवन्तं निवेश्यावस्थाप्य, अतद्भगवतो व्यतिरिक्तं यत्किंचिदपि महैश्वर्यादिकम्, विहास्यति त्यक्ष्यति हि ॥ ४७ ॥ महाभागवतत्वमाह। अलम्पट इति। अलम्पटोऽलोलुपः, शीलधरः सुस्वभावः, गुणाकरः गुणानां खनीरूपः, परेषाम् ऋद्धिः समृद्धिस्तया हृष्टः, दुःखितेषु संजातदुःखेषु परेषु सत्सु व्यथितः दुःखितः, अन्यान् दुःखितानि दृष्ट्वा स्वयं संजातदुःखो भवतीत्यर्थः। न भूतो न जातः शत्रुर्यस्य सः। सः निदाघो ग्रीष्मकालस्तत्र भवो नैदाघिकः ग्रीष्मकालसमुत्थ इत्यर्थः। तम्, तापम् उडुराजश्चन्द्रः इव, जगतः शोकं हरतीति शोकहर्त्ता भविता ॥ ४८ ॥

अन्तरिति। किं च तव पौत्रः, श्रीरेव ललनाङ्गना तस्या ललामं भूषणं 'भर्त्ता नाम परं नार्या भूषणादपि भूषणम्' इत्युक्तरीत्या भूषणवच्छोभाकरं लक्ष्म्याः पतिम्, स्फुरती ये कुण्डले ताभ्यां मण्डितं भूषितमाननं मुखं यस्य तम्, कुण्डलयोः श्रोत्रालंकारत्वेन ताभ्यां गण्डस्थलमण्डनमस्तु, कथं ताभ्यामाननशोभेति चेत्तत्प्रतिफलनवशान्मुखस्यापि शोभातिशयः, स्वपूरुषाः स्वभक्तास्तेषामिच्छाया अनु अनुरूपं गृहीतं रूपमप्राकृतदिव्यशरीरं येन तम्, अञ्जनेत्रं कमलनयनम्, अमलं निरस्तहेयगुणम्, इत्थंभूतं श्रीहरिम् अन्तः स्वहृदयकमलमध्ये बहिश्च द्रष्टा द्रक्ष्यति ॥ ४९ ॥ दितिकश्यपयोः प्रश्नोत्तरे निगमयति। श्रुत्वेति। दितिः पौत्रं जनिष्यमाणं स्वपुत्रपुत्रं भागवतं भगवदेकान्तिकभक्तं श्रुत्वा भृशम् अमोदत जहर्ष। कृष्णाद्भगवतः पुत्रयोश्च भाविनोः हिरण्यकशिपुहिरण्याक्षयोरपि सून्वोः वधं विनाशं विदित्वा ज्ञात्वा, महामना हरिणा सह युद्धेन मरणे पुत्रयोः कीर्त्तिः सद्गतिश्च भवेदिति विचार्य महोत्सववच्चित्ता आसीत् ॥ ५० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ पञ्चदशोऽध्यायः

मैत्रेय उवाच

प्राजापत्यं तु तत्तेजः परतेजोहरं दितिः । दधार वर्षाणि शतं शङ्कमाना सुरार्दनात् ॥ १ ॥

विधिः पञ्चदशे प्राह सुरैः पृष्टो हतप्रभैः । विप्रशापादि तद्बीजं वैकुण्ठे भृत्ययोर्हरेः ॥ १ ॥

एवं देवानां ब्रह्मणश्च संवादं वक्ष्यन् तदुपोद्घाताय वृत्तमितिहासं प्रस्तूयेदानीं तं देवब्रह्मसंवादं वक्तुमाह मैत्रेयः । प्राजापत्यमिति । दितिः परेषां तेजः परतेजस्तद्धरतीति परतेजोहरं तत् प्राजापत्यं कश्यपसंबन्धि तेजो वीर्यात्मकज्योतिः तु: सुरार्दनात् शङ्कमाना इन्द्रः कदाचित्किंचित्कुर्यादिति शङ्कमाना सती शतं वर्षाणि दधार । शतवर्षपर्यन्तं गर्भं धृतवतीत्यर्थः ॥ १ ॥ लोक इति । लोकेऽस्मिन् भुवने, तेन गर्भतेजसा हतालोके हतसूर्यादिप्रकाशे सति, हतौजसो हतप्रभाः लोकपालाः दिशां संबन्धिनं ध्वान्तेनान्धतमसेन व्यतिकरो व्यत्यासस्तम्, इयं पूर्वा दिगियं पश्चिमा दिगिति ज्ञानाभावमित्यर्थः । विश्वसृजे ब्रह्मणे न्यवेदयन्, ब्रह्मणः समीपमागत्य विज्ञापयामासुरित्यर्थः ॥ २ ॥ देवकृतं निवेदनमेवाह । त्वमिति । हे विभो यद्यस्मात् वयं भृशमत्यन्तं संविग्ना भीताः एतत्तत्कारणमित्यर्थः त्वम् एव वेत्थ जानासि । नन्वहमपि भवादृश एव भवामि, ततः कथं जानीयामिति चेत्तव परमात्मन आवेशावतारत्वात्परमात्मेव त्वमपि सर्वं जानासीत्यभिप्रेत्याह । कालेनास्पृष्टं वर्त्म ज्ञानं यस्य तस्य भगवतो भगवच्छरीरभूतस्य तव अव्यक्तमविज्ञातं न हि । नैवास्तीत्यर्थः । 'सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते' इत्युक्तेर्ब्रह्मणस्तव कालकृतासंकुचितज्ञानत्वेन सर्ववेदनमिति भावः ॥ ३ ॥

एतदेव विशदयन्ति । देवदेवेति । हे देवदेव इन्द्रादिदेवानामपि देवभूत, हे जगद्धातः जगन्निर्मातः, लोकानां ये नाथाः स्वामिनस्तेषामपि शिखामणिस्तत्संबुद्धौ हे ब्रह्मन्, त्वं परेषामुत्तमानाम्, अपरेषामधमानाम्, अतीतानागतानां वा भूतानां भावविदभिप्रायज्ञः असि । येनाभिप्रायेण दितेर्गर्भोऽन्धकारीकृतसकलभुवनो जातस्तदभिप्रायं त्वं जानासीत्यर्थः ॥४॥ एवं परमात्मावेशावतारत्वेन ब्रह्मशरीरकपरमात्मदृष्ट्या च तस्य सर्वज्ञतामभिधाय पुनस्तद्दृष्ट्या तद्धर्मविशिष्टत्वेन नमस्कुर्वन्ति । नम इति । व्यक्तं कार्यावस्थं जगत्तस्य योनये कारणाय । नाहं व्यक्तयोनिः, किं तु परमात्मेत्यत्राहुः । गृहीतः शरीरत्वेनोपात्तः गुणभेदो रजोगुणो येन सः तस्मै, रजोगुणप्रधानकः परमात्मा यः जगत्स्रष्टा सः त्वमेवेत्यर्थः । परमात्मनस्तव दृश्यमानेनानेन देहेनावस्थानम्, न तत्कर्मायत्तमित्याह । मायया संकल्परूपज्ञानेनैव इदं ब्रह्माख्यशरीरम् उपेयुषे उपगताय, विज्ञानं वीर्यं बलं यस्य तस्मै, ते तुभ्यं नमः नमः ॥ ५ ॥ एवंविधस्य तव प्रजानां त्वन्निदेशवर्त्तिनामस्माकमन्यैः कृतः परिभवोऽनुचित इति सूचयन्तो नमस्कुर्वन्ति त्रिभिः । ये त्वेति । आत्मनो जीवान्देवमनुष्यादिरूपेण भावयति सृजतीत्यात्मभावनः तम्, आत्मनि निजात्मन्येव, प्रोतानि संदर्भितानि भुवनानि येन तम्, अत एव सदसदात्मकं कार्यकारणात्मकवस्तुस्वरूपम्, परं ताभ्यां विलक्षणं त्वा त्वाम्, ये जनाः अनन्येनाव्यभिचारिणा भावेन भक्त्या भावयन्त्युपासते ॥ ६ ॥ तेषामिति । तेषामुक्तविध-जनानां कुतश्चिदपि पराभवः न अस्ति । कथंभूतानां श्वासाः प्राणाश्च, इन्द्रियाणि ज्ञानकर्माख्योभयेन्द्रियाणि चात्मान्तः-करणं च, ते जिताः श्वासादयो यैस्तेषाम्, अत एव सुपक्वः परिपक्वः योगो भक्तियोगो येषां तेषाम्, अतः लब्धः युष्मत्प्रसादो भगवदनुग्रहो यैस्तेषाम् ॥ ७ ॥

यस्येति । यस्य तव वाचा वेदात्मिकया वाण्या यन्त्रिताः संबद्धाः, आयत्तास्त्वदधीनाश्च, सत्यः सर्वाः प्रजाः तन्त्या दामन्या यन्त्रिताः गावो वृषभाः इव मुख्याय श्रेष्ठाय प्राणरूपायेति वा । ते तुभ्यं बलिं पूजां हरन्ति, तस्मै भवते नमो नमनं कुर्मः । अनेन स्वसंबन्धिनां स्वनिदेशवर्तिनामन्यैः परिभवोऽनुचित इति सूचितम् ॥ ८ ॥ एवं नमस्कृत्य स्वाभीप्सितं प्रार्थयते । स त्वमिति । हे भूमन् स उक्तविधः त्वं तमसा ध्वान्तेन अहोरात्रविभागाभावेनेति यावत् । लुप्तानि कर्माणि येषां तेषामस्माकं शं सुखं विधत्स्व कुरु । आपन्नानापद्गतान् नोऽस्मान्, अदभ्राऽनल्पा दया यस्यां तया, दृष्ट्या ईक्षणेन ईक्षितुं द्रष्टुम् अर्हसि ॥ ९ ॥ ननु का वेदानीं भवतामापदुपस्थितेत्यत्राहुः । एष इति । हे देव दितेः अर्पितं निहितम् उदरे इति शेषः । काश्यपं कश्यपसंबन्धि आजो वीर्यं शुक्ररूपम् इत्यर्थः । एषः गर्भः सर्वाः दिशः तिमिरयन्नन्धीकुर्वन्सन्, एधसि काष्ठनिचये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अग्निरिव वर्द्धते एधते ॥ १० ॥ एवं देवैरावेदितो ब्रह्मा तान्प्रत्याहेत्याह मुनिः। स इति। शब्दगोचरो वेदवेद्यः, अत एव भगवान् आत्मभूः स्वयंभूः स ब्रह्मा प्रहस्य हे महाबाहो विदुर, रुचिरया मधुरया गिरा प्रीणन् प्रीणयंस्तर्पयन्नित्यर्थः। देवान् प्रत्याचष्टोक्तवान् ॥ ११ ॥ प्रत्याचष्टेति यदुक्तं तदेवाह मानसा इत्यारभ्याध्यायशेषेण। मानसा इति। हे देवाः युष्मत्पूर्वजाः युष्मदपेक्षया प्रथममुत्पन्नाः मे मम मानसा मनःसंकल्पात्समुत्पन्नाः सुताः सनकादयः लोकेषु विगता स्पृहाभिलाषो येषां तथोक्ताः, सन्तोऽपि विहायसा नभोमार्गेण लोकान् चेरुः संचरितवन्तः ॥ १२ ॥ त इति। ते सनकादयः एकदा एकस्मिन्काले अमलात्मनः दिव्यमङ्गलमूर्त्तेः वैकुण्ठस्याप्रतिहतैश्वर्यस्य भगवतः, सर्वे च लोकाश्च तैर्नमस्कृतस्तं वैकुण्ठनिलयं वैकुण्ठाख्यस्य भगवतो निकायं ययुर्गतवन्तः। तत्रायं वैकुण्ठनिलयस्तु विष्णुलोकस्वर्गोपरितनस्थानमुच्यते, न तु नित्यविभूत्याख्याक्षरपदान्तःस्थः अष्टमस्कन्धे 'वैकुण्ठः कल्पितो येन लोकनमस्कृतः' इति वक्ष्यमाणत्वात्। ब्रह्मणापि समाधिनैव गम्यस्य परमाकाशाख्याक्षरपदगतवैकुण्ठलोकस्य प्राकृतभावयुक्तैर्गन्तुमशक्यत्वात् 'स्वश्चूडामणिमात्मधिष्ण्यम्' इति श्लोकेनास्य स्वर्गलोकचूडामणित्वेन वक्ष्यमाणत्वाच्च कैवल्यमिव मूर्त्तिमदित्यत्रैव पदोपादानेन मुक्तप्राप्यभूमित्वाभावावगमाच्चेति विज्ञेयम् ॥ १३ ॥

भगवत्संबन्धेनास्य परमाकाशस्थवैकुण्ठलोकसदृशत्वात्तत्समतयैनमनुवर्णयति वसन्तीत्यादिद्वादशभिः श्लोकैः वसन्तीति। यत्र वैकुण्ठे अनिमित्तमप्रवर्त्तकं निमित्तं फलं यस्मिन् सः तेन, कामादिनिमित्तरहितेनेत्यर्थः। धर्मेण ये पुरुषाः हरिम् आराधयन्नाराधितवन्तः। सर्वे ते पुरुषाः वैकुण्ठस्य भगवतः मूर्त्तिराकार इवाकारो येषां तथाभूताः सन्तः वसन्ति। 'धर्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः' इत्यादिनैकार्थ्यात्। ननु पूर्वमयं वैकुण्ठलोकोऽण्डान्तर्वर्त्तित्वेन प्रतिपादितः, अत्र तत्र गतानामनिमित्तधर्मतोक्ता अनिमित्तधर्मवतां तु, प्राकृतभाववर्जितेऽक्षरपदगते वैकुण्ठे गतिः श्रूयते, एवं सति विरोधः प्राप्तः। सत्यम्, तेऽनिमित्तनिमित्ततया भक्तिं कुर्वाणाः देशकालक्रियासङ्गादिना जातात्कस्माच्चन प्रतिबन्धात्प्रथमतस्तदप्राप्येमं वैकुण्ठं प्राप्य, तत्र तत्रत्यभगवदनुभवेन निरस्तप्रतिबन्धाः सन्तः, कल्पान्तेऽक्षरपदगं वैकुण्ठलोकं गमिष्यन्तीति न विरोधः। अत्र यत्रेत्यादीनां यच्छब्दानां तद्विश्वगुर्वधिकृतमित्युत्तरत्रान्वयः ॥ १४ ॥ यत्रेति। यत्र च यस्मिन् वैकुण्ठलोके शब्दगोचरः शास्त्रैकप्रमाणकः, भगवान् षाड्गुण्यपूर्णः, आद्यः परमकारणभूतः, वृषः श्रेष्ठः, स्वीयकामपूरको वा पुमान् परमपुरुषः विरजं रजोगुणेनाननुविद्धम्, सत्त्वं शुद्धसत्त्वमयं देहं विष्टभ्य, धृत्वा स्वानामात्मीयानां नोऽस्माकं कर्मणोऽविवक्षायां संबन्धसामान्ये षष्ठी। मृडयन् सुखयन् निजान्नः सुखयितुमित्यर्थः। आस्ते तिष्ठति। विरजमित्यत्रादन्तोऽयं रजःशब्दः। 'रजोऽपि रजसा सह' इति द्विरूपोक्तेः। रजस उपलक्षणत्वात्तमोऽपि तमसा सहेति द्विरूपोक्तेर्वितमसमित्यप्यवगन्तव्यम् ॥ १५ ॥ यत्रेति। यत्र वैकुण्ठलोके नैश्रेयसं नाम नैःश्रेयसाख्यं वनम् अस्ति तद्विशिनष्टि। सर्वे च ते ऋतवश्च तेषां याः श्रियः, पुष्पादिसंपच्छोभास्ता विद्यन्ते येषां तैः, कामदुघैरभीष्टार्थान् वर्षद्भिः, द्रुमैः विभ्राजद्विशेषेण भ्राजमानम् अत एव, मूर्त्तिमत् कैवल्यं ब्रह्म इव स्थितम्, कैवल्यममृतमक्षरं ब्रह्मेति पर्यायशब्दाः ॥ १६ ॥

अनुष्टुभा वनवर्णनापरितोषात्पुनर्वार्त्तिकैर्विशेषतो वर्णयति। वैमानिका इति। अन्तर्जले जलसमीपवर्त्तिनि तटप्रदेशे, अत्रान्तःशब्दः समीपवचनः। अनुविकसन्त्यः मधौ वसन्ते विद्यमाना या माधव्यो वासन्तीलतापुष्पाणि तासां गन्धेन सुगन्धेन, खण्डिता विघ्निता धीर्येषां तथाभूताः अपि, भेदवाचिनाऽपिशब्देन तत्रस्था आमुक्ता मुक्ताश्चेति द्विविधाः। तत्र मुक्तानां तु गन्धवद्वायुना नेन्द्रियक्षोभः। आमुक्तानां क्वचित्संभवेऽपि, ते तमाक्षिपन्ति तद्द्वैधंतु, मुक्ताश्चामुक्तकाश्चेति द्विधा वैकुण्ठलोकगाः 'आमुक्तानां भ्रमः क्वापि न मुक्तानां क्वचिद्भवेत्' इति वचनात्। पाठान्तरे पीडिता अन्तरिता धीर्येषामिति। अनिलं तद्गन्धप्रापकं वायुं क्षिपन्तस्तिरस्कुर्वन्तः सललनाः सस्त्रीकाः वैमानिका विमानान्यधिरुह्य चरन्तः भक्ताः, यत्र नैश्रेयसे वने भर्त्तुः स्वभर्त्तुर्भगवतः लोकानां शमलानि पापानि क्षपयन्ति निरस्यन्तीति तथाभूतानि, चरितानि पुलकिततत्तोपपादकानि चरित्राणि गायन्ति। अनेन तल्लोकस्थानां भगवत्पार्षदानां भोग्यभोगोपकरणभोगस्थानसांनिध्यतया निरतिशयविषयसुखेऽपि भगवद्गुणानुभवजातानन्दासक्तिः संदर्शिता ॥ १७ ॥ किं तु तद्वनस्थानां पुरुषाणां भगवद्गुणानुभवासक्तिरिति यतस्तत्स्थानां तिरश्चामप्यतिशयिता भगवत्परतास्तीत्याह। पारावतेति। पारावताः कलरवाश्च, अन्यभृताः कोकिलाश्च, सारसाः पुष्कराह्वयाश्च, चक्रवाका रथाङ्गाह्वयाश्च, दात्यूहाः कालकण्ठाख्याश्च, हंसाः श्वेतगरुतश्च, शुकाः कीराश्च, तित्तिराः कपोताश्च, बर्हिणो मयूराश्च, तेषां 'कपोतलावतित्तिरा' इति वाचस्पतिः। यः कोलाहलो ध्वनिविशेषः, स तु भृङ्गाधिपे मधुकरश्रेष्ठे हरिकथामिव उच्चैः गायमाने गानं कुर्वति सति, अचिरमात्रं क्षणमात्रं विरमते। तद्वननिवासिनः पारावतप्रभृतयः स्वविहितकोलाहलं प्रसक्ताः सन्तोऽपि भृङ्गध्वनिमाश्रुत्य, किमयं भृङ्गराजो हरिकथां गायतीति वयं तच्छ्रवणं कुर्महे इत्यभिप्रायेण, तं कोलाहलं त्यक्त्वा क्षणमात्रं कथाश्रोतारः पुराणवक्तृध्वनिमिव भृङ्गध्वनिमेवोपश्रृण्वन्तीति भावः ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्वनस्थानां स्थावराणामपि भगवत्परतामाह । मन्दारेति । मन्दारः सुरतरुविशेषश्च, कुन्दोऽतिमुक्ताख्यलताविशेषश्च, कुरबस्तिलकवृक्षविशेषश्च, उत्पलं रात्रिविकाशि जलजं च, चम्पकः हेमपुष्पो द्रुमविशेषश्च, अर्णः पुष्पवृक्षविशेषश्च, पुन्नागः सुरपुन्नागो वृक्षविशेषश्च, नागो नागकेसरश्च, बकुलो वञ्जुलद्रुमश्च, अम्बुजं दिवाविकाशि कमलं च, पारिजातो देवतरुभेदश्च, ते । सुमनसः उक्ततर्वधिदैवत्येन सुगन्धाः सन्तोऽपि, तुलसिकाया आभरणं यस्य तेन आभरणवद्धृतभक्तार्पिततुलसीहारेण भगवतेत्यर्थः । तस्याः तुलस्याः गन्धे अर्चिते संमानिते सति, यस्मिन्वने तपस्तुलस्याः पूर्वोपार्जितं तपः, बहु मानयन्ति, तद्वनस्थाः पारिजातादयो मादृशेषु सुगन्धिपुष्पेषु सत्स्वपि, तुलस्या भक्तैरलंकृतो भगवांस्तुलसीमञ्जरीं जिघ्रंस्तामेव बहु मनुतेऽतोऽस्याः पुराकृतं तपो महदेवेति भगवद्धृततुलसिकाभरणं दृष्ट्वा तां बहु मानयन्तीत्यर्थः । पाठान्तरे ऊर्णं कार्वारपुष्पमिति ॥ १९ ॥ एवं नैश्रेयसवनमुपवर्ण्य, पुनरपि तमेव लोकं वर्णयति । तदिति । तद्वैकुण्ठनिलयम्, हरेर्जनकल्याणार्थं क्षणमात्रमपि स्ववियोगाक्षमभक्तजनेभ्यः सांनिध्यभावेन स्वलीलेक्षाविधापनार्थं च प्रत्यक्षतया भूमौ प्रादुर्भूतस्य भगवतः, पदयोः पादयोर्या आनतिः प्रह्वीभावः सैवानतिमात्रं केवलनमनविधानं तेन दृष्टैः, प्राप्तैरित्यर्थः । वैदूर्यमारकतहेममयैः अन्तर्निचितवैदूर्यमारकतमणिकसुवर्णमयैः विमानैः संकुलं सर्वकालं व्याप्तम्, येषामुक्तविधविमानाधिरूढानां कृष्णे आत्मा मनो येषां तेषाम्, तत्रत्यजनानां मनःस्विति शेषः । बृहन्ति कटितटानि यासां ताः, स्मितेन शोभीनि मुखानि यासाम्, तथाभूताः अपि स्त्रियः, उद्धिकः स्मयः परिहासाद्यो येषाम्, तैर्भावैः रजः रजोगुणसमुद्भवं काममित्यर्थः । न आदधुर्न जनयामासुरित्यर्थः । कृष्णात्मनामिति हेतुगर्भं विशेषणम् । कृष्णे भगवति निहितचित्तेषु तन्नादधुस्तदभावे तु, तास्तदाधानं कुर्युरेवातस्तत्रत्यैरपि कृष्णात्मत्वेनैव आव्यमिति भावः ॥ २० ॥ श्रीरिति । चरणारविन्दं स्वपादपद्मं क्वणयती तत्संचारविधानेन शब्दायन्ती, मुक्तस्त्यक्तो दोषश्चपलतारूपः स्वगुणो यया सा, यस्याः श्रियोऽनुग्रहणं तस्मिन् निमित्ते श्रीरस्मास्वनुग्रहं करोत्विति बुद्ध्येत्यर्थः । अन्येषां ब्रह्मादीनां यत्नः समाराधनरूपः प्रयत्नो भवतीत्यर्थः । एवंभूता रूपिणी मूर्त्तिमती श्रीः संपदाद्यभिमानिनी स्वयं लक्ष्मीः, स्फटिककुड्ये स्फटिकमयभित्त्युपेते, उपेतं शोभार्थं मध्ये तत्र तत्र संयुक्तं हेम सुवर्णं यस्मिंस्तस्मिन् हरिसद्मनि वैकुण्ठलोकस्थे भगवद्वेश्मनि, लीलाम्बुजेन लीलार्थं विधृतकमलेन संमार्जती संमार्जनं कुर्वती इव संलक्ष्यते । मुक्तदोषेति लीलाम्बुजविशेषणे मुक्तः प्रसारितो दोर्भुजो यस्य संबन्धि तेन प्रसारितहस्तधृतेन लीलाकमलेनेति तदार्थः । यद्यपि भगवद्वेश्मनि संमार्जतीति न घटते, यतस्तत्र रजो नास्त्येव, तथापि स्वर्णपट्टिकालाञ्छितस्फटिकमयभित्तिभागेषु हेमचूर्णैरिव लीलापद्मपरागपुञ्जैर्विचित्रीकरणार्थं संमार्जती निरतिशयनिर्मलासु स्फटिकमयभित्तिषु प्रतिफलिता सती तत्रोक्तविधेव लक्ष्यते इति भावः ॥ २१ ॥

वापीष्विति । अङ्ग हे देवाः यत यत्र लोके श्रीर्लक्ष्मीः निजवने स्वकीयक्रीडावने प्रेष्याभिः स्वकीयपरिचारिकाभिः स्त्रीभिः अन्विता, तुलसीभिः पत्रद्वयोपेतवृन्दामञ्जरीभिः, ईशं स्वस्वामिनं भगवन्तम् अभ्यर्चती पूजयन्ती सती, विद्रुममयानि तटानि यासां तासु विद्रुमरत्नबद्धतटासु, अमला निर्मला अमृततुल्या आपो यासु तासु वापीषु दीर्घिकासु, तदुदके प्रतिबिम्बितमिति शेषः । शोभना अलकाश्चूर्णकुन्तला यस्य तत्, उन्नता नासिका यस्य तत्, किंचिदुन्नतनासिकमित्यर्थः । वक्त्रम् ईक्ष्य दृष्ट्वा, वाप्युदकप्रतिबिम्बितस्वमुखे भगवन्मुखमनुसंधायेति शेषः । भगवता स्वपतिना उच्छेषितं चुम्बितम् इति अमत अमन्यत । अहो भगवान्मन्मुखं चुम्बतीति मेने इत्यर्थः । अनेन लक्ष्म्या मौग्ध्यं लक्ष्यते ॥ २२ ॥ यदिति । अघं पापं भिनत्ति निरस्यतीति अघभिद्धरिः तस्मात्, अन्यः विषयो यासां तां, केवलार्थकामादिविषया इत्यर्थः । अत एव रच्यन्ते संपाद्यन्ते स्ववाञ्छितान्यनयेति रचना उपायस्तस्या अनुवादोऽनुकीर्त्तनम्, तस्मात् स्ववाञ्छितसंपादनोपायबोधकदण्डनीतिकामतन्त्राद्यनुकीर्त्तनादित्यर्थः । मतिघ्नीः बुद्धिभ्रंशकराः यास्तु हतभगैर्निर्भाग्यैः नृभिर्नरैः श्रुताः, अत एव आत्तः सारो याभिस्ताः परिवृतश्रोतृपुण्याः सत्यः, तान्, तान् श्रोतृजनान् अशरणेषु निरालम्बेषु तमस्सु नरकेषु क्षिपन्ति पातयन्ति, एवंभूताः कुकथाः ये जनाः शृण्वन्ति, हन्तेति खेदे । ते यद्वैकुण्ठनिलयं न व्रजन्ति नाप्नुवन्ति । केचित्तु अघभिदो हरेः रचना सृष्ट्यादिलीला तस्या अनुवादात् अन्यविषयाः, अत एव कुकथाः, अतः मतिघ्नीरिति योजयन्ति ॥ २३ ॥ प्रसङ्गात्तानेव श्रोतॄन् शोचति । य इति । यत्र च मनुष्यजन्मन्येव सहधर्मं निवृत्तिधर्मसहितं तत्त्वं भगवत्स्वरूपं विषयो यस्य, तत् ज्ञानं जायते । एवंभूतं नोऽस्माकं ब्रह्मादीनामपि अभ्यर्थितां प्रार्थनीयाम्, यद्वा नोऽस्माभिरभ्यर्थितां प्रार्थितां नृगतिं मनुष्यजन्म प्रपन्नाः सन्तः भगवतः आराधनं ये न वितरन्ति, न कुर्वन्ति, ते जनाः विततया विस्तारं गतया अमुष्य भगवतः मायया बतेति खेदे । संमोहिताः भवन्ति चैव ॥ २४ ॥

एवं भगवत्कथादिषु विमुखानां तल्लोकाप्राप्तित्वमभिधाय तांश्चानुशोच्य, तत्कथाश्रवणप्रवणचित्तानां तल्लोकप्राप्यत्वमाह । यच्चेति । ये जनाः अनिमिषां देवानाम् ऋषभस्य स्वामिनो हरेरनुवृत्तिर्निरन्तरसेवा तया हेतुना दूरे यमो येषां ते । दूरीकृतयमलोका इत्यर्थः । अत एव नोऽस्माकम् उपरि अस्मदुपरि वर्त्तमानलोकगामिन इत्यर्थः । अतः स्पृहणीयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सदा सत्पुरुषाणां स्पृहणार्हं शीलं येषां ते भर्तुर्हरेः सुयशसः शोभनकीर्त्तेः चैव मिथः परस्परम्, कथने योऽनुरागस्तस्माद्यद्वैक्लव्यं पारवश्यं तेन या बाष्पकलाऽऽनन्दाश्रुधारा तया, पुलकीकृतान्यङ्गानि येषां ते तथोक्ताः। ते यद्वैकुण्ठभवनं व्रजन्ति हि ॥ २५ ॥ एवं वैकुण्ठनिलयमनुवर्ण्याथानन्तरं कथां प्रस्तौति। तदिति। मुनयः सनकादयः विश्वस्याखिलजगतः गुरुः स्वयं भगवांस्तेनाधिकृतमधिष्ठितम्, अत एव भुवनैर्भुवनस्थजनैः एकं प्राधान्येन वन्द्यं बहुमन्तव्यम्, दिव्यममानुषम्, अपूर्वमदृष्टपूर्वं विबुधाग्र्या देवश्रेष्ठास्तेषां विमानानि विचित्राणि च तानि विबुधाग्र्यविमानानि तेषां तैर्वा शोचिर्दीप्तिर्यस्मिंस्तत्, तत्प्रसिद्धं तदुक्तविधविकुण्ठं वैकुण्ठनिलयं योगमायाबलेन अणिमाद्यैश्वर्यबलेन उपेत्य प्राप्य, अथो सर्वथा परामुत्कृष्टां मुदं संतोषम् आपुः ॥ २६ ॥ मुदमुपेत्य बहिरेवावतिष्ठमानाः उतान्तराऽविशन्, आविश्य च किं चक्रुरित्यत्राह। तस्मिन्निति। तस्मिन्वैकुण्ठे षट् षट्संख्याकाः कक्षाः प्राकारद्वाराणि अतित्यातिक्रम्य, तत्र असज्जमानाः कैश्चिदप्यनिवार्यमाणाः। यद्वा भगवद्दिदृक्षाश्रद्धया तत्रान्तरागततत्तदद्भुतदर्शने आसक्तिमकुर्वाणाः मुनयः सनकादयः, अथ सप्तमकक्षाप्रवेशारम्भे सप्तमायां, कक्षायां समानं वयो ययोस्तौ, गृहीते गदे याभ्यां तौ, केयूरे च, कुण्डले च, किरीटं च, परार्ध्यानि श्रेष्ठानि यानि केयूरकुण्डलकिरीटानि तैः विटङ्कः रुचिरः वेषो ययोस्तौ देवौ देववच्छोभमानौ द्वारपालौ अचक्षत दृष्टवन्तः ॥ २७ ॥ पुनस्तावेव वर्णयति। मत्तेति। असितं नीलवर्णं यद्बाहूनां चतुष्टयं तस्य मध्यम्, तस्मिन्। असीता नीलाः चतुष्टयाश्चतुःसंख्याकाः ये बाहवस्तेषां मध्यं तस्मिन्निति वा वक्ष्यसीत्यर्थः। विन्यस्तया धृतया, मत्ताः द्विरेफा भ्रमरा यस्यां सा चासौ वनमालिका वनमाला तया, निवीतौ कण्ठलम्बिन्या तयालंकृतावित्यर्थः। कुटिलया वक्रीकृतया भ्रुवा स्फुटावुत्फुल्लौ च तौ निर्गमौ श्वासप्रसरणमार्गभूतनासापुटे च ताभ्यां, रक्तं च तदीक्षणं च तेन चैव, रक्ताभ्यां नेत्राभ्यामित्यर्थः। मनाक्प्रभसमीषदुग्रं यथा भवति तथाभूतं वक्त्रं मुखं दधानौ अपश्यन् ॥ २८ ॥

द्वारीति। ये मुनयः सर्वत्र सर्वेष्वपि लोकेषु अविषमया विषमतावर्जितया स्वदृष्ट्या स्वान्तरात्मवर्त्तिभगवद्दृष्ट्या हेतुना, विगता अभितः शङ्का येषां तथाभूताः, अत एव अविहताः कुत्रापि कैश्चिदपि न निवारिताः सन्तः विश्वं चरन्ति विश्वस्मिन्नटन्तीत्यर्थः। ते सनकादयः एते मुनयः एतयोर्देवयोः मिषतोः पश्यतोः सतोः एतावनादृत्येत्यर्थः। अपृष्ट्वा एव, कपाटान्येव कपाटिकाः पुरटेषु पुरटपट्टेषु वज्राणि हीरका यासु ताः तथाभूताः कपाटिका यासु ताः, याः पूर्वाः पूर्वप्रविष्टाः षद्वारः यथा निर्विविशुः, तथा अस्यां सप्तमायां द्वार्यपि निर्विविशुः॥२९॥ तानिति भगवतः परमेश्वरतः प्रतिकूलं शीलं ययोस्तौ तौ देवौ वातरशनान् दिगम्बरान्, वृद्धान् सतोऽपि, दशार्द्धवयसः पञ्चवर्षबालकवदवस्थितान्, अत एव कुमारान् कुमारावस्थावस्थितान्, विदितमात्मतत्त्वं परमात्मयाथात्म्यं यैस्तान् चतुरश्चतुःसंख्याकानपि तान् मुनीन् वीक्ष्य, प्रविशत इति शेषः। तेजस्तेषां प्रभावं विहस्य, अहोऽत्रापि भवतां धाष्टर्यमिति परिहासं कृत्वा, अतदर्हणान्वेत्रकृतस्खलनानर्हान् तान्मुनीन् वेत्रेण यष्ट्या, चकारादाज्ञया च अस्खलयतां प्रवेशप्रतिरोधं चक्रतुः ॥ ३० ॥ ताभ्यामिति। हरेर्वैकुण्ठभगवतः प्रतिहारपाभ्यां द्वारपालपतिभ्यां ताभ्यां, देवाभ्याम् अनिमिषेषु देवेषु मिषत्सु पश्यत्सु सत्सु, स्वर्हत्तमाः स्वयं पूज्या अपि, हि यतः निषिध्यमानाः निवारणेन परिभूताः अत एव सुहृत्तमो भगवांस्तस्य दिदृक्षितं दर्शनेच्छा, तस्य योभङ्गस्तस्मिन्सति ईषत्कामानुजोऽल्पः क्रोधस्तेन सहसाऽकस्मात् उपप्लुतान्याकुलानि अक्षीणि नेत्राणि येषां तथाभूताः सन्तः, ते ऊचुर्जगदुः ॥ ३१ ॥

मुन्युक्तिमेवाह त्रिभिः। क इति। उच्चैर्महत्या, भगवतः साक्षात्परमेश्वरस्य या परिचर्या सेवा तया, इहास्मिन् वैकुण्ठलोके एत्य, इमं वैकुण्ठलोकं प्राप्येत्यर्थः। निवसतां विहितनिवासानां तद्धर्मिणां तत्समानधर्मवतां मध्ये वां युवयोः, अयं विषमः विपरीतः कः स्वभावः। इह वसतां विषमः स्वभावोऽनुपपन्न इत्यर्थः। ननु नूतनप्रवेशप्रतिरोधनपुरातनप्रवेशाप्रतिरोधनरूपो द्वारपालयोरावयोरयं धर्म एव, तदनाचरणे स्वामिकृतदण्डपातापत्तिः स्यादित्याशङ्कामाहुः। प्रशान्ताः उपशमप्रकृतयः पुरुषा यस्मिंस्तस्मिन् गतः सर्वथा निवृत्तः विग्रहः कलहो यस्मात्तस्मिन् यस्मिन्नेतस्मिन् लोके आत्मवत् आवां यथा कुटिलौ भवावस्तथाविधोऽन्योऽपि कुटिलः कश्चिदत्र प्रविशेदित्येवमित्यर्थः। परिशङ्कनीयः कुहकयोः कुटिलतावच्चित्तयोः वां युवयोः, को वा को नु, अस्ति। यदि शङ्कितुं योग्यः भवादृशः कश्चित्कुटिलोऽत्र स्यात्तदा तु वयं परिशङ्कनीया निवारणीयाश्चान्यथा तु प्रभोर्दण्डापातापत्तिश्च। यतः प्राकृतवाक्पारुष्यविवादादिदोषरहितोऽयं देशोऽस्ति, ततोऽत्रेयमाशङ्काऽनुपपन्नेत्यर्थः ॥ ३२ ॥ भयशङ्काबीजं च भेदः, स च कस्याप्यस्मिन्नास्तीत्याहुः। न हीति। समस्तं सकलं विश्वं कुक्षौ यस्य तस्मिन् इहास्मिन् भगवति सर्वाधारेऽस्मिन् परमेश्वरे इत्यर्थः। यद्वा समस्तस्य विश्वस्य कुक्षिर्येया तस्तथान्तर्यामितयावस्थिते इत्यर्थः। अन्तरम् अयमन्तः प्रवेशार्होऽयं नार्ह, इत्येवंभूतं भेदद्योतकं वैषम्यमित्यर्थः। न हि नैवास्ति। समस्तकुक्षाविति भगवद्विशेषणेन भगवता स्वोदरे निवेश्यमानं जगद्भवद्भ्यां किं निवारितम्, येनास्मान्निषेधथेति सूचितम्। भगवत्यन्तराभावमाह। यत्र यस्मिन् आत्मनि परमात्मनि, आत्मानं जीवात्मानं नभसि महाकाशे नभः घटाकाशमिव, धिरा धीमन्तः योगिन इत्यर्थः। पश्यन्ति। अपृथक्सिद्धत्वेनानुसंदधते इत्यर्थः। तस्माज्जीवात्मनः परमात्मानं प्रति शरीरत्वाच्छरीरस्यापृथक्सिद्धत्वैकस्वभावत्वाज्जीवपर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योरवान्तरवैषम्येऽपि ज्ञानैकाकारत्वेन साम्याद्दाविभाग एव नभोदृष्टान्तः। अस्य अस्मिन् हरौ अधिकरणविवक्षायां संबन्धसामान्यविवक्षायां षष्ठी। यतोः हेतो सुरलिङ्गिनोः सुरवेषधारिणोः युवयोः, सुरलिङ्गिभ्यां युवाभ्यामित्यर्थः। उदरभेदि उदरे विकृतिकृत्। भयं व्युत्पादितमास्थापितम्, हि प्रतिशरीरमन्तर्यामित्वेन स्थितस्याभयस्य हरेरस्माद्भयमस्तीति बुद्धिरुत्पादितैवेत्यर्थः। तत् किम्, न किंचियुक्तं कृतमित्यर्थः॥ ३३॥

तदिति। तत्तस्मात् अमुष्य परमस्य परमात्मनः विकुण्ठभर्त्तुः वैकुण्ठनाथस्य हरेरित्यर्थः। मन्दधीभ्यां मन्दबुद्धिभ्यां वां युवां वैकुण्ठनाथसंबन्धिभ्यां मन्दधीभ्यां युवाभ्यामित्यर्थः। इह अपराधे कर्त्तुं यत् प्रकृष्टं युक्तं तत् धीमहि विचारयामः। किं तदिति चेत् एतौ इतोऽस्माल्लोकात्, यत्र येषु लोकेषु, अन्तरस्य भेदस्य भावो विद्यमानत्वं तस्य दृष्टिस्तया हेतुना, अस्य भेदद्रष्टुः पापीयसोऽतिपापरूपाः त्रयः कामक्रोधलोभरूपाः इमे, रिपवः भवन्ति। तान् लोकान् व्रजतं गच्छतम्। यद्यस्मदभिहितभगवदभिप्रायस्य पारमार्थ्येन वयं नापराधिनः, किं तु युवामेवापराधिनौ तदा स्वितो व्रजतमित्याशयः। यतः 'अस्मासु वा य उचितो ध्रियतां स दण्डो येनागसौ वयमयुङ्क्ष्महि किल्बिषेण' इतिवक्ष्यमाणत्वात्। ननु 'स महात्मा सुदुर्लभः। यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम' इति भगवता गीतत्वात्कथं नित्यसिद्धानां शापानुभवो भगवद्धाम्नोऽत्रागमनं च। यतस्ते हि भगवन्महावैकुण्ठधामवासिनः, सदा समस्तहेयरहिता नित्यासंकुचितज्ञानैश्वर्यादिगुणाश्च नित्यज्ञानक्रियैश्वर्यान्विता इति चेत्सत्यम्, तथाविधास्तु परमाकाशवर्त्तिनः पुरुषाः। इमौ तु अक्षरपदपर्यायपरमव्योमगतमहावैकुण्ठनिलयनित्यसिद्धभगवत्परिजनसमानरूपौ सुकृतविशेषादेतदण्डस्थरमावैकुण्ठलब्धद्वारपालत्वौ तद्भिन्नावेव, अन्यथा भगवद्भक्तप्रातिकूल्यायोगात्पुराणान्तरप्रसिद्धलक्ष्म्याः प्रवेशनिवारणायोगाच्च। परमव्योमनिलयस्थयोरेतन्नाम्नोरुक्तयोस्तु निर्दोषभगवत्परिजनत्वान्नित्यज्ञानक्रियैश्वर्यवत्त्ववचनाच्च भगवदभिप्रायानभिज्ञत्वं नोपपद्यते। नन्वेतयोरेवं सदोषत्वे कथं भगवदनुचरता प्राप्तिरिति चेत्सा त्वनुष्ठानविशेषाज्जायते तथा च स्मर्यते 'भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत्' इत्यादिवचनैः। यथा अनन्तवैनतेयव्यतिरेकेण नागसुपर्णजातीया अपि बहवो भगवद्भक्ताः श्रूयन्ते, एवं सुकृतवशाद्भगवत्परिजनतुल्यरूपतामापन्ना बहवः संभवन्ति। किं च 'नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः। कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट्। जयन्तः श्रुतदेवश्च पुष्पदन्तश्च सात्वतः। सर्वे नागायुतप्राणा ह्यजेयाश्च सुरासुरैः' इति। त्रिविक्रमप्रादुर्भावकालेऽभिहितौ जयविजयौ महावैकुण्ठनिवासिनावेताभ्यां भिन्नौ, यतः कृष्णावतारे शापान्मोक्षमाणयोस्तयोर्वामनावतारे पार्षदत्वाऽनुपपत्तेः। अतोऽस्य वैकुण्ठलोकस्य परमाकाशवर्त्तिवैकुण्ठलोकादन्यत्वं पूर्वमेवोपपादितम्। अतः परमाकाशवर्त्तिभगवत्पार्षदतोऽनयोर्व्यतिरिक्तत्वमिति न कश्चिद्विरोधः॥ ३४॥

अथैवं मुनिभिरुक्तौ भगवद्द्वारस्थौ तेषां पादमूले पतितौ विज्ञापयामासतुरित्याह ब्रह्मा। तेषामिति। तेषां मुनीनाम् इत्युक्तप्रकारम् अस्त्रपूगैरस्त्रसमूहैः अनिवारणमनिवारणीयम् ईरितं यद्भाषितं तद्रूपं घोरमतितीव्रं तं ब्रह्मदण्डं ब्रह्मशापरूपदण्डम्, अवधार्य श्रवणपूर्वं निश्चित्य सद्यस्तत्क्षणमेव, हरेः उभौ अनुचरौ भृत्यौ अतिकातरेणातिकातर्येण भयेनेति यावत्। तत्पादग्रहौ तेषां मुनीनां पादग्रहणं कुर्वन्तौ सन्तौ। 'उर्वधिकं यथा तथा बिभ्यतः भयं भावयतः अहो अस्माभिर्निरपराधाभ्यां भगवद्भक्ताभ्यामपराद्धमनेन भागवतापचारेण वयमपि संसरेमेति भयकम्पितान्मुनीन्प्रतीत्यर्थः।' आपततां दण्डवत्प्रणामपूर्वकं विज्ञापयामासतुरित्यर्थः॥३५॥ द्वारपालकृतविज्ञापनमेवाह। भूयादिति। इहास्मिन् अघोन्यपराधवति यः दण्डः उचितः, स दण्डः भगवद्भिर्युष्माभिः अकारि कृतः, नात्र कश्चिद्भवतामपराध इति भावः। अतोऽयं दण्डः नावयोः भूयात्, योऽसौ नौ अशेषम् अपि सुरहेलनं सर्वदेवमयभगवत्तिरस्काररूपं पापं हरेतापत्नुद्याच्च। किं च अधोऽधः मूढासु योनिष्वित्यर्थः। व्रजतोः त्वपि नौ आवयोः भगवत्स्मृतिघ्नः भगवद्विषयकस्मृतिनाशकः मोहः, वो युष्माकम् अनुतापः कृपानिमित्तः परितापस्तस्य कलया लेशेन मा भवेत न भवेत् इति प्रार्थयावेति शेषः। यदि मोहो भवेत्तर्हि सोऽपि भगवत्स्मृतिमेव प्रवहतादित्यनुगृह्णतेति भावः॥ ३६॥ एवमिति। एवमुक्तप्रकारं स्वानामात्मीयपार्षदयोरित्यर्थः। द्वयोरप्यंशांशिविवक्षया बहुत्वात्स्वानामिति बहुवचनम्। सदतिक्रमं महदतिक्रमरूपमपराधं तदैव तत्क्षणमेव विबुध्य ज्ञात्वा, अरविन्दनाभः कमलनाभः आर्याणां स्वैकान्तिकभक्तानां हृद्यो मनोज्ञः भगवान्वैकुण्ठनाथः तस्मिन् यत्र प्रदेशे सनकादयः द्वाःस्थौ च वर्त्तन्ते तत्र देशे सहश्रीर्लक्ष्म्या सहितः, परमहंसा ये महामुनयः सनकादयस्तैरन्वेषणीयौ संशीलनीयौ च तौ चरणौ च तौ चलयंश्चातुर्येण संचारयन्संश्च ययौ जगाम। मच्चरणदर्शनप्रतिघातहेतुकं क्रोधं मच्चरणौ दर्शयित्वा शमयिष्यामीति विचार्य त्वराव्याजेन पद्भ्यामेव चलन्नाययाविति भावः॥ ३७॥

अथागच्छन्तं तं भगवन्तमनुवर्णयति। तमिति। स्वपुम्भिः स्वकीयपार्षदैः प्रतिहृतं प्रत्याहृतमौपयिकं छत्रचामरव्यजनपादुकादि यस्य, तं स्वानां भक्तानां यः समाधिर्ध्यानं तस्य भाग्यं फलरूपम् अक्ष्णोर्विषयम्, यः समाधौ बहुलायसदृश्यः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स एव नयनविषयतां गत एव स्थित इत्यलभ्यलाभोऽनेन सूचितः। हंसवत् श्रीर्ययोस्तयोः व्यजनयोश्चामरयोः, शिवः सुरभित्वात्सुमन्दत्वात्सुखकारी यो वायुस्तेन यल्लोलत् शुभ्रं च आतपत्रं छत्रं तदेव शशी चन्द्रस्तस्य केसराश्छत्रात्म-चन्द्रसंबन्धिनो मुक्तादामविलम्बाः तेभ्यः शीकराम्बूनि ततो गलन्तोऽम्बुकणा यस्मिंस्तम्। हंससदृशचामरसंबन्धिसुरभि-सुमन्दसुखस्पर्शवायुविलोलचन्द्रमण्डलसदृशशुभ्रातपत्रविलम्बिमुक्तादामगलदमृतबिन्दुसंदोहालंकृतमित्यर्थः। आगतमागच्छन्तं तं भगवन्तम्, ते मुनयस्तु अचक्षतापश्यन्। आपश्यमादिदमेव क्रियापदम्।। ३८।। कृत्स्नेति। कृत्स्नप्रसादः द्वारपालमुनि-वृन्दोपरि संपूर्णानुग्रहस्तस्मिन् सुमुखस्तम्, पूर्णमनुग्रहं कुर्वन्तमिव वर्त्तमानमित्यर्थः। स्पृहणीयानां कान्तिसौकुमार्यादि-गुणानां धाम, स्पृहणीयगुणानामाश्रयभूतमित्यर्थः। स्नेहयुक्तो योऽवलोकस्तस्य कला प्रसरणं तया, हृदि संस्पृशन्तं चित्तमपहरन्तमित्यर्थः। पृथौ पाने विशाले वा श्यामे मेचके उरसि वक्षसि शोभितया प्रकाशमानया, श्रिया स्वर्णरेखारूपया लक्ष्म्या, स्वः स्वर्गलोकस्य चूडामणिं मुकुटमणिवद्वर्त्तमानम्, आत्मनः स्वस्य धिष्ण्यमात्मधिष्ण्यं स्वनिवासस्थानं वैकुण्ठलोकं सुभगयन्तं संशोभयन्तमिव स्थितमित्यर्थः। अत्रेवशब्दोऽवधारणे।। ३९।। पीतेति। पृथुश्चासौ नितम्बश्च स आश्रयत्वेन विद्यते यस्य तस्मिन्, पृथुनितम्बोपरि परिहिते इत्यर्थः। पीतं च तदंशुकं च तस्मिन् पीताम्बरे इत्यर्थः। विस्फुरत्या चञ्चन्त्या, काञ्च्या मेखलया पृथुनितम्बोपरि धृतपीताम्बरोपरि विराजमानया काञ्च्येत्यर्थः। अलिभिर्भ्रमरैः विरुतया नादितया वनमालया वनजोत्तमपुष्पस्रजा च युक्तम्, मधुपानमत्तनदद्भ्रमरस्रजोपलक्षितमित्यर्थः। वल्गूनि सुन्दराणि च तानि प्रकोष्ठानि मणिबन्धस्थानानि तेषु वलयानि कटकानि यस्य तम्, विनतायाः सुता गरुडस्तस्यांसे स्कन्धे विन्यस्तो निहितः हस्तो वामकरो येन स तम्। इतरेण दक्षिणहस्तेन अब्जं स्वायुधात्मकसनालकमलं धुनानं लीलया भ्रामयन्तमित्यर्थः।। ४०।।

विद्युदिति। विद्युत्तडित्तां क्षिपती स्वकान्त्या तिरस्कुर्वती ये मकरकुण्डले मत्स्याकृती कर्णवेष्टने तयोर्यन्मण्डनमलं-करणं तस्मिन्नर्हे योग्ये गण्डस्थले यस्मिंस्तच्च तदुन्नससमुद्रनासिकं च मुखं यस्य तम्। मणिमन्मणियुक्तं किरीटं यस्य तम्, दोर्दण्डानां भुजदण्डानां यः खण्डः समूहः तस्य विवरं मध्यं तस्मिन्, स्थितेन, हरता मनोहरेण, परार्ध्यहारेण अनर्घ्य-मुक्तामालया, कन्धरगतेन कण्ठावलम्बिना कौस्तुभेन मणिना च युक्तम्।। ४१।। अत्रेति इन्दिरायाः लक्ष्म्याः इति च अहं निरतिशयसौन्दर्यनिधिरस्मीत्येवंविधमेव 'यत्' उत्स्मितमुत्स्मयः विस्मय इति यावत् 'तत्' अत्र यस्मिन्नेतस्मिन् भगवतो दिव्यदेहसौन्दर्ये, उपसृष्टमन्तर्भूततां प्राप्तम्, तथाभूतं निरतिशयसौन्दर्यवत्या लक्ष्म्याः सकाशतोऽपि निरवधिकातिशय-सुन्दरमित्यर्थः। स्वानां निजभक्तजनानां धिया मनःसंकल्पबुद्ध्या। विरचितं 'निरवयवमहोमयभगवद्देहे कैवल्यार्थिस्मयं भङ्क्तुं भगवांश्चेदमस्मदीक्षितस्वरूपं तन्नयनविषयं कदाचिद्विदध्यात्तदैते स्मयरहिता भवेयुरिति स्वैकान्तिकभृत्यमनोरथप्रपूर्त्त्यै स्वमनसि विचार्य सर्वनयनविषयतां नीतमित्यर्थः'। बहु अतिशयितं च तत्सौष्ठवं सौन्दर्यं च तेनाढ्यं युक्तम्, मह्यं ब्रह्मणो मम, भवस्य रुद्रस्य, भवतां देवानां युष्माकं च, भजन्तं भजनीयं कर्मणि शतृप्रत्यय आर्षत्वात्। अङ्गं शरीरं निरीक्ष्य दृष्ट्वा 'हे देवाः' न वितृप्ता दिदृक्षापर्याप्तिमप्राप्ता दृशोऽक्षीणि येषां ते मुनयः, कैः स्वशिरोभिः मुदा नेमुर्नमश्चक्रुः। ब्रह्मादीनां कृते मूर्त्तिं भजन्तमिति वा।। ४२।। तस्येति। अरविन्दनयनस्य पुण्डरीकाक्षस्य तस्य भगवतः, पदारविन्दयोश्चरणकमलयोः किंजल्का अङ्गुलिरूपाः केसरास्तैर्मिश्रितो यस्तुलसीमकरन्दस्तस्य वायुः स्वविवरेण स्वकीयनासिकारन्ध्रेण अन्तर्गतोऽन्तः प्रविष्टः सन्, अक्षरजुषामात्मनि ब्रह्मानन्दसेविनामपि तेषां मुनीनां चित्ततन्वोः संक्षोभं चकार। तत्र चित्तसंक्षोभ आनन्दपारवश्यम्। तनुक्षोभो रोमाञ्चः।। ४३।।

संक्षोभकृतं संभ्रममाह। त इति। ते मुनयः अमुष्य भगवतः सुन्दरतर आरुण्यातिशयजशोभासंपत्त्याऽतिसुन्दरो योऽधरोऽधरोष्ठस्तस्मिन् कुन्दवन्माध्वपुष्पवदुज्ज्वलो हासो यस्मिंस्तम्। वदनं मुखमेवासितपद्मं तस्य कोशं कुड्मलं नीलपद्मकोश-वच्छोभमानं वदनमित्यर्थः। उद्वीक्ष्य वै, उत्पक्ष्मदृशा विलोक्यैव, लब्धाः संप्राप्ता आशिषो मनोरथा यैस्तथाभूताः सन्तः पुनर्मुखनिरीक्षणानन्तरमित्यर्थः। तदीयं भगवत्संबन्धि, नखा एवारुणमणयस्तेषां श्रयणमाश्रयभूतम् अङ्घ्रिद्वन्द्वम् अवेक्ष्य भूयो भूयः निरीक्ष्य, निदध्युः युगपत्सर्वाङ्गलावण्यग्रहणाशक्तास्तदेव ध्यातवन्त इत्यर्थः।। ४४।। एवं निरतिशयसर्वाङ्गलावण्यमनोहरं भगवन्तं स्वहृदि ध्यात्वाऽथास्तुवन्नित्याह। पुंसामिति। इहास्मिन् लोके योगानां कर्मज्ञानभक्तियोगादीनां ये मार्गाः प्रकारास्तैः, गतिं स्वरूपम्, मृगयतां चिन्तयतां पुंसां ध्यानास्पदं ध्यानविषयभूतम्, बहुमतमत्यादरास्पदम्, अत एव नयनयोरभिरामम्, पौंस्नं पौरुषं वपुः शरीरं दरशयानं दर्शयन्तम्, रस्यस्वरत्वं छान्दसम्। अनन्यसिद्धैः स्वस्मिन्नेवासाधारणैः औत्पत्तिकैः स्वाभाविकैः अष्टभोगैरणिमाद्यष्टविभूतिभिः युतं युक्तं भगवन्तं समगृणन्मुनयोऽस्तुवन्नित्यर्थः।। ४५।। स्तुतिमेवाह यावदध्याय-समाप्ति, तत्र चिरमस्माभिर्हृदये ध्यातोऽतस्त्वमस्मद्भाग्यवशादद्य नयनविषयतां गतोऽसीत्यात्मनः कृतार्थतामाहुः। य इति। हे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनन्त यस्त्वं दुरात्मनामशुभमनस्कानां हृदि गतः अन्तर्यामितया विद्यमानः सन्नपि, अन्तर्हितस्तिरोहितः सः त्वं यर्ह्येव यदैव भगवतः सकाशादुद्भव उत्पत्तिर्यस्य तेन पित्रा अस्मत्पित्रा ब्रह्मणा अनुवर्णितं रहो रहस्यं यस्य सः, एवंविधोऽभूस्तर्ह्येव कर्णविवरेण नोऽस्माकं गुहां हृदयगह्वरं गतः प्रविष्टः। अपि नोऽस्माकं नयनमूलं नेत्रविषयतां तु अद्य सांप्रतमेव राद्धः संप्राप्तः। त्वत्पुत्रास्मत्पितृब्रह्मोपदिष्टरहस्या वयं तत्प्रभृत्येतावन्तं कालं त्वां हृदये ध्यायन्तः सन्तः साक्षाद्दर्शनं स्मरन्तः सन्तो यदात्रागतास्तदानीं त्वमद्यैव नयनमूलं नो गतोऽस्यतोऽस्माद्भवद्दर्शनात्कृतार्था जाता इति भावः ॥ ४६ ॥

ननु भवत्पित्रोपदिष्टात्मतत्त्वात्मको भगवानन्यः, भवन्निरीक्षितोऽहं भगवांश्चान्यस्तत्कथं मद्दर्शनेन कृतार्थतेत्यत्राहुः। तमिति। पर उत्तमः मा नैव विद्यते यस्मात्सः परमः सर्वोत्कृष्टस्तस्य संबोधनं हे सर्वोत्कृष्ट इत्यर्थः। हे भगवन् षाड्गुण्यपूर्ण, सत्त्वेन शुद्धसत्त्वमयदेहेन, एषाम् अत्र वर्त्तमानानामेतेषां भक्तानां संप्रति सांप्रतं रतिं प्रतिक्षणं विवर्द्धमानां सम्यक् प्रीतिं रचयन्तम्, अनुरागविशेषमपि विशेषतो विरचयन्तमित्यर्थः। तं त्वाम् उक्तविधं भवन्तमेवेत्यर्थः। आत्मतत्त्वं पित्रोपदिष्टात्मतत्त्वरूपमित्यर्थः। विदाम प्रत्यभिजानीमः। ननु किं तद्भवत्पित्रोपदिष्टमात्मतत्त्वं यन्मदभिन्नतया जानीथेत्यत्राहुः। अनुतापः संसारनिर्वेदस्तेन विदिता लब्धास्तैः, विदित इति 'विदॢ लाभे' इत्यस्य रूपम्। दृढाश्च ते भक्तियोगाश्च तैः, विरागा विगतशब्दादिविषयाभिलाषाः, उद्ग्रन्थयः निरहंकाराः ते प्रसिद्धाः मुनयः, हृदि यत् आत्मतत्त्वं विदुरुपासीरन् तत्त्वमेवासीत्यर्थः। महानुभावमुन्युपास्यं शुद्धसत्त्वमयविग्रहवदेवात्मतत्त्वमस्मत्पित्राप्यस्मभ्यमुपदिष्टं तदेवैतदिति ज्ञातत्वाद्वयं कृतार्थतोपेता इति भावः ॥ ४७ ॥ ननु कथं मद्दर्शनमात्रेण कृतार्थता, यतः कृतार्थता तु पुरुषार्थसंसिद्ध्या, पुरुषार्थता च धर्मादीनामेवातो धर्माद्येव तदर्थं संसाध्यमित्याशङ्क्य कैमुत्यन्यायेन भगद्दर्शनस्यैव कृतार्थोपादकत्वमित्याहुः। नेति। अङ्ग भगवन् ये तव अङ्घ्रिश्चरण एव शरणं स्वरक्षणोपायो येषां ते भवच्छरणागता इत्यर्थः। त एव कुशलाः पुरुप्रवीणाः, दुष्करोपायेभ्यो निवृत्तत्वात्, कीर्त्तन्यं कीर्त्तनीयं तीर्थं पवित्रं यशो यस्य, तस्य भगवतो भगवतः कथायाः रसज्ञाः रसानुभवपराः सन्तः, ते तव आत्यन्तिकं प्रसादं परमपुरुषार्थरूपं मोक्षाख्यभवदनुग्रहमपीत्यर्थः। न विगणयन्ति, तर्हि ते तव भ्रुवो भ्रुकुट्याः उन्नयैर्विक्षेपैरर्पितं निहितं भयं यस्मिंस्तत् अन्यत् स्वर्गस्वाराज्यादिकम्, किं तु किमु विगणयन्ति न विगणयन्तीत्यर्थः। त्वत्कथाश्रवणमात्रेण स्वात्मनः कृतार्थतां मन्यमानास्त्वच्छरणागताः परमपुरुषार्थं मोक्षमपि यदा नाद्रियन्ते, तदा स्वर्गादीनामनादरसंबन्धिनी वार्ता तु कथनं विनाऽपि तेषां सिद्धैव यदैषामेवं तदा वाङ्मनसागोचरस्वरूपस्वभावस्यापि कृपया साक्षात् प्रादुर्भूतस्योक्तविधकथाधिकरणस्य भवतो दर्शनेनाऽस्माकं तथात्वं कथनं विनापि सिद्धमतो भवद्दर्शनेनास्मत्कृतार्थता जातेति भावः ॥ ४८ ॥

किं बहुना दर्शनस्य कृतार्थतापादकत्वं कथनीयमेतावतैव सर्वेषां कृतार्थता स्यादिति सूचयन्तः पुनस्तदेव प्रार्थयन्तो नमस्कुर्वन्ति द्वाभ्याम्। काममिति। हे भगवन् स्ववृजिनैः स्वेषामस्माकं दुरितैः कामं यथेच्छं नोऽस्माकं निरयेषु निरयप्रायासु नीचयोनिषु भवो जन्म स्यात् तु भवत्वेव। तत्रापि नोऽस्माकं चेतश्चित्तं ते तव पादयोः अलिवत् भृङ्गवत् कमलेष्विति शेषः। रमेत यदि, किं च नोऽस्माकं वाचो गिरः तुलसिवत् ह्रस्वत्वमार्षम्। ते तव अङ्घ्री शोभयन्तीत्यङ्घ्रिशोभाः भवत्स्तुतिपरा इत्यर्थः। स्युः यदि, नः कर्णरन्ध्रः ते तव गुणगणैः पूर्येत। नित्यं त्वद्गुणगणश्रवणपरः स्याद्यदीत्यर्थः। रन्ध्रशब्दे पुंस्त्वमार्षम्। तदा तु तत्र नो जन्म स्यादिति संबन्धः। अत्र स्ववृजिनैरिति पदेन इतः पूर्वमस्माकं वृजिनमेव नाभवदिदानीं यतस्त्वद्भक्तौ शप्तौ, ततः सर्वाण्यपि वृजिनानि जातानि, ततः नो जन्म नूनं निकृष्टस्थाने भविता, तत्र यदि चेतोऽलिवदित्याद्युक्तप्रकारं स्यात्तदा स्यादिति सूचितमिति प्रतिभाति ॥ ४९ ॥ इदं तु लोकदृष्ट्योक्तमथ स्वदृष्ट्या सापराधेषु दण्डस्य तच्छुद्धिहेतुत्वात्तद्विगणय्य भगवद्दर्शनेन स्वकृतार्थतां वदन्तो नमन्ति। प्रादुरिति। हे पुरुहूत बहुस्तुत्य सर्वोपनिषद्वेद्येत्यर्थः। यद्वा पुरुभिः पञ्चभिरुपनिषद्भिर्हूतं वेद्यं प्रतिपाद्यमित्यर्थ इति रूपविशेषणम्। यत् इदं रूपं दिव्यमङ्गलविग्रहमित्यर्थः। प्रादुश्चकर्थ प्रकटीकृतवानसि, तेन रूपेण एवंविधरूपदर्शनेनेत्यर्थः। हे ईश नोऽस्माकं दृशो नेत्राणि निर्वृतिं सुखम् अलं भृशमतिशयेनेति यावत्। अवापुः। एवंविधः यो भगवान् अनात्मनामजितेन्द्रियाणाम् अयोगिनामित्यर्थः। दुरुदयो दुरवगमोऽपि, इत् इत्थं प्रतीतः दृष्टः अस्माभिरिति शेषः। तस्मै भगवते तुभ्यम् इदं नमः विधेम कुर्म इत्यर्थः ॥ ५० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिताय़ामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

———:※:———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ षोडशोऽध्यायः

ब्रह्मोवाच

इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम् । प्रतिनन्द्य जगादेदं विकुण्ठनिलयो विभुः ॥ १ ॥

षोडशेऽसुरभावेऽपि हरिणा सान्त्वितैर्द्विजैः । अनुतप्तैस्तयोरुक्तोऽनुग्रहो विहितः स यः ॥ १ ॥

एवं मुनिभिरावेदितगुणविभूतिस्तत्प्रसादित आश्रितजनसुलभो भगवान्स्वप्रीतिपात्रभूतान् मुनीन्प्रसादयितुमुवाचेत्याह ब्रह्मा । इतीति । मुनीनां शुभाश्रयसंशीलनशीलानाम् , योगो भगवद्भक्तियोग एव धर्मो येषामस्तीति योगधर्मिणस्तेषाम् , इत्युक्तप्रकारेण गृणतां स्तुवताम् , तेषां सनकादीनाम , तदुक्तप्रकारं भाषितं प्रतिनन्द्य शिरसा संश्लाघ्य विकुण्ठं वैकुण्ठाख्यस्थानं निलय आवासस्थानं यस्य सः, विभुर्वैकुण्ठनाथो भगवान् इदं वक्ष्यमाणवचनं जगादोक्तवान् ॥ १ ॥ यदुक्तं तदेवाहैकादशभिः । एताविति । हे मुनयः जयः विजयश्च एतौ मह्यं मम एव पार्षदौ, तौ मां कदर्थीकृत्यावज्ञाय यद्यस्मात् वो युष्मभ्यम्, बहु भृशं यथा तथा अतिक्रममपचारम् अक्रातामकुरुताम् ॥ २ ॥ य इति । तस्मात् हे मुनयः माम् अनुव्रतैः भवद्भिः एतयोः यस्तु यो वा दण्डः धृतः, स एव दण्डः अस्माभिः देवहेलनाद्देवानां युष्माकमवज्ञानान्निमित्तात् अनुमतोऽङ्गीकृतः ॥ ३ ॥ तदिति । तत्तस्मादस्मद्भृत्यकृतभवद्विषयापचरणात् वो युष्मान् अद्याधुना प्रसादयामि क्षमापयामि । ननु सत्यपराधे उत्कृष्टा एव क्षमापयितव्या नापकृष्टा इत्यत्राह । हि यस्मात् ब्रह्म ब्राह्मणाः मे मम परमुत्कृष्टं दैवं देवतारूपाः सन्त्यतः वो युष्मान् प्रसादयामि । ननु किमपराद्धं भवता नो येन प्रसादयामीति भाषस इत्यत्राह । स्वपुम्भिर्मदीयैरेतैः असत्कृताः अवज्ञाताः यत्, तत् आत्मकृतं मया कृतम् इत्येवं मन्ये हि ॥ ४ ॥ भृत्यकृतमागः स्वामिन्येव पर्यवस्यतीत्याह । यदिति । भृत्ये सेवके, कृतं संपादितमागोऽपराधो येन तस्मिंस्तथाभूते सति, यन्नामानि यस्य स्वामिनोऽभिधाः लोको जनः गृह्णाति । अनेन स्वामिना भृत्यद्वारैवमसाधु कृतमतोऽयं दुरात्मेत्यादिनिन्दायुक्तनामानि लोको वदति स च सोऽपि असाधुवादः तत्कीर्त्ति तस्य स्वामिनो यशः, आमयः श्वेतकुष्टादिरोगः त्वचं शारीरं चर्म इव हन्ति नाशयति । श्वेतकुष्टं त्वच्युत्पन्नं सद्यथा तद्गतं सौन्दर्यं हरति, तथाऽसाधुवादः कीर्त्तिमित्यर्थः । भृत्यजनविहितापराधनिमित्तको जनप्रसृतोऽसाधुतावादस्तु स्वामिनि पर्यवस्यंस्तत्कीर्त्ति-मेवाऽऽमूलाद्विनाशयतीति भावः ॥ ५ ॥

तस्मादाश्रितसौलभ्यादिकल्याणगुणगणादिजसुयशःसंपन्नोऽहं निरतिशयप्रियाणां भवतां विरोधकरं ममाङ्गं स्याच्चेत्तदपि लुनामीत्याह । यस्येति । यस्य मम अमलं पवित्रं च तदमृतममृततुल्यं यद्यशस्तस्य श्रवणावगाहः श्रोत्रयोः प्रवेशः, आश्वपचात् श्वपाकपर्यन्तम् , जगद्विश्वं सद्यस्तत्क्षणमेव पुनाति पवित्रयति । सः अहं विकुण्ठः भवद्भ्यो हेतुभ्यः उपलब्धा प्राप्ता सुशोभना तीर्थभूता कीर्त्तिर्येन स, एवंभूतः अस्मि । अतः वो युष्माकं प्रतिकूला वृत्तिर्यस्य तम् , स्वबाहुं निजभुजमपि छिन्द्याम् । युष्मत्प्रति-कूलवृत्तिर्मद्बाहुः स्याच्चेत्तदा तु तमपि लुनीय, तदा तदन्यस्य तु का वार्त्ता इत्यर्थः । केचित्तु स्वबाहुस्थानीयं लोकेश्वरमपि हन्यां कान्यस्य कथेति व्याख्यायन्ते ॥ ६ ॥ एवं स्वस्य स्वभक्तेषु निरतिशयां प्रीतिं तद्विरोधिनां निरसनं च स्वाभिप्रेतमाविष्कृत्य स्वभक्तान्ब्राह्मणान्प्रशंसति । यत्सेवयेत्यादिपञ्चभिः । येषां भवतां ब्राह्मणानां सेवा परिचर्या तया, चरणपद्मयोः पादपद्मयोः स्थितः पवित्रो रेणुर्यस्य तम् । स्वपादरेणूनां पवित्रत्वं मया ब्राह्मणसेवयैव लब्धमिति भावः । अत एव सद्यः क्षतो निरस्तः अखिलस्य लोकस्य मलो येन तम् । यद्वा चरणपद्माद्युष्मत्पादकमलाल्लग्नः पवित्रो रेणुर्यस्मिंस्तम् । अतः सद्यः क्षतोऽखिलो मलो यस्येति विग्रहः । प्रतिलब्धं प्राप्तं शीलं सुस्वभावसद्वृत्तादिकं येन तम् । एते गुणाश्चापि ब्राह्मणसेवयैव मया लब्धा न स्वत इति भावः । यस्याः लक्ष्म्याः प्रेक्षा कटाक्षस्तस्या लवो लेशो लेशमात्रप्रसारणं तस्मै इति तदर्थम् । स्वयं लक्ष्मीरस्मदुपरि कृपाकटाक्षलेशप्रसारणं करोत्वित्येतदर्थमित्यर्थः । इतरे ब्रह्मादयः नियमान् व्रतानि वहन्ति कुर्वन्ति, इत्थंभूता श्रीर्लक्ष्मीः विरक्तं विषयादिषु वैराग्यसं-युतम् अपि, मां न विजहाति । ब्रह्मादिभिरुपास्याप्यसौ लक्ष्मीरनादृतवन्तमपि मां ब्राह्मणसेवाप्रभावेणैव न विजहातीत्यर्थः ॥ ७ ॥ किं च ब्राह्मणो ममैव श्रेष्ठं मुखमस्त्यतो युष्मदवज्ञया मन्मुखतिरस्कार एव कृत इत्याह । नेति । विताने यज्ञे, श्च्योतद्घनधारावत् क्षरच्च तत् घृतमाज्यं तेन प्लुतं विलोडितं यजमानहविः यजमानसंबन्धि हविः, देवतोद्देशेन यजमानेन त्यक्तं चरुपुरोडाशादिरूपं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हविरित्यर्थः। हुतभुङ्मुखेनाग्निमुखेन अदन्नश्नन् अपि अहं तथा न अद्मि नाश्नामि। यद्यथा मयि परमेश्वरे अवहितैरर्पितैः निजकर्मपाकैः स्ववर्णाश्रमोचितस्वकृतकर्मफलैरित्यर्थः। तुष्टस्य निजकर्मफलानि मयि समर्प्य स्वत एव तुष्टस्येत्यर्थः। चरतो भुञ्जानस्य ब्राह्मणस्य मुखतो मुखेन अनुघासं प्रतिकवलम् अद्मि। 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इत्युक्तरीत्या सर्वयज्ञफलप्रदः 'एतदेवाग्निस्तद्वु वायुः' इति श्रुत्युक्तरीत्याऽग्न्याद्यन्तर्यामित्वेन यागीयहविर्भुञ्जानश्च भगवानहं यथा ब्राह्मणमुखेन भुञ्जंस्तुष्यामि, तथा न तुष्यामीत्यर्थः। वस्तुतस्तु फलाभिसंधिरहितयज्ञैर्भगवदाराधनस्य भगवत्संतोषातिशयाधायकत्वमत्रोक्तं भवति ॥ ८ ॥

येषामिति। किं च। अखण्डा अनन्ता विकुण्ठा अप्रतिहता च योगमाया स्वापृथक्सिद्धत्वेन युज्यमानाश्चर्यशक्तिः विभूतिः, कार्यात्मको विभवश्च यस्य सः। यदर्हणाम्भः यस्य मम पादोदकरूपा गङ्गा, चन्द्रः ललाम चिह्नं यस्य शिवस्य तेन सह सहिता लोकास्तान् सद्यः पुनाति। एवंभूतः अहम्, येषां ब्राह्मणानाम् अमलं पवित्रं यदङ्घ्रिरजश्चरणरजः, तत् किरीटैः बिभर्मि। तान् विप्रांस्तु कः न विषहेत। तिरस्कुर्वतोऽपि तान्ब्राह्मणान् को न क्षाम्येतेत्यर्थः। शिवस्य भगवत्पादोदकधारणं तु 'यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्' इत्यनेनाभिहितमस्ति। एवं परमपावनोऽप्यहं त्वत्पादरजो बिभर्मि तर्ह्यन्येषां का वार्त्तेति भावः। किरीटैरिति बहुवचनं स्वधृतनैकावतारकिरीटदृशावगन्तव्यम् ॥ ९ ॥ विप्राणां मत्तनुत्वाद्विप्रद्वेषोऽपि मद्द्वेष एवेति सूचयन्, पुनरपि तन्महिमानमेव भङ्ग्यन्तरेणाह द्वाभ्याम्। ये म इति। मे मम तनूः शरीरभूतान् द्विजवरान् उत्तमब्राह्मणान्, मदीयाः मच्छरीरभूताः दुहतीर्गाश्च, अलब्धशरणानि रक्षकरहितानि भूतानि मच्छरीरभूतरक्षकरहितप्राणिनश्चेत्यर्थः। ये पुरुषाः, अघं पापं तेन क्षता अनुविद्धा दृशो नेत्राणि येषां ते, अत एव अहेः सर्पस्येव मन्युः क्रोधो येषां ते तथाभूताः सन्तः, भेदबुद्ध्या मदात्मत्वविरुद्धधिया द्रक्ष्यन्ति। तान्पुरुषान् मम सन्नियाम्यस्य दण्डनेतुर्यमस्य अधि आधीनाः, गृध्रा अयोमुखा गृध्रसमानदेहा दूता इत्यर्थः। रुषा क्रोधेन कुषन्ति चञ्चुभिश्छिन्दन्ति हि। तन्नेत्रस्फोटमाचरन्तीत्यर्थः ॥ १० ॥

य इति। ये जनाः क्षिपतस्तिरस्कुर्वतोऽपि ब्राह्मणान् मयि धिया मदात्मकबुद्ध्या अर्चयन्तः पूजयन्तः, तुष्यद्धृदः संतुष्टचित्ताः, स्मितं हासस्तदेव सुधामृतं तया उक्षितं सिक्तं पद्मसमानं वक्त्रं येषां ते, तथाभूताः अनुरागेण स्नेहेन कला कलिता युक्तेति यावत् तया वाण्या वाचा आत्मजवत्पुत्रमिव भणन्तो भाषन्तः सन्तः, पाठान्तरेऽप्ययमेवार्थः। स्तुवन्त इति वा। अहमिव भृगुं युष्मान्वाहं यथा, तथा संबोधयन्ति, तैः अहम् उपाहृतः वशीकृतः पाठान्तरे उपकारितः। ते मदनुग्रहविषया इति भावः ॥ ११ ॥ एवं ब्राह्मणप्रशंसां विधायाथ मुनिकृतं स्वपार्षददण्डं स्वयमप्यनुमनुते। तन्म इति। तत्तस्मात् स्वयोरात्मनोर्भर्त्तो तस्य, स्वभर्त्तुः मे मम अवसायमुक्तविधनिश्चयम् अलक्ष्यमाणौ अजानन्तौ एतौ, युष्मासु यो व्यतिक्रमोऽपराधस्तस्य गतिः फलं तां प्रतिपद्य प्राप्य, सद्यः शीघ्रमेव भूयः पुनः मम अन्तिकं समीपम् इतां प्राप्नुताम्। यद्यस्मद्धृतो दण्ड एव भवताऽनुमतश्चेत्तदा तव का भृत्यानुग्रहकारिता इति चेत्तत्राह। भृतयोर्भृत्ययोः अचिरतः आशु, विवासः युष्मद्व्यतिक्रमप्राप्तासुरत्वसमाप्तिः, कल्पतां कल्पते इति यत्तदेतदपि मम अनुग्रहः। महदतिक्रमफलमवाप्य पुनराशु मत्समीपागमनमेव मदनुग्रहः, मदनुग्रहाभावे बलवता ब्राह्मणशापेन कदाप्यसुरयोनिमोक्षो न स्यादिति भावः ॥ १२ ॥ एवं निजाश्रितसुलभत्वसुशीलत्वादिकानेकगुणसंपन्नेन स्वयं परमेश्वरेणोक्तानि 'ब्रह्म दैवं परं हि मे' 'यत्सेवया चरणपद्मपवित्ररेणुं' 'न श्रीर्विरक्तमपि मां विजहाति' 'यदमलाङ्घ्रिरजः किरीटैः'। इत्यादिवचांस्याश्रुत्य मुनयः 'तं देवतानां परमं च दैवतम्' इत्यादिश्रुतिभिः परमदैवतत्वेन कीर्त्तितो भगवान् किमस्मान् प्रतारणायैवं वदति, आहोस्विद्धर्मसंस्थापनाय 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति स्वगीतानुसारेण वदतीति तत्तात्पर्यमजानन्तः सन्तः नूनं नासौ स्वभक्तान्वञ्चयति, किं तु धर्मसंस्थापनार्थायैवैवं वदतीति निश्चिचीषया तदुक्तानि वाक्यानि अन्यतात्पर्यकत्वेन प्रतिपादयिष्यन्तः संप्रत्यूचुरित्याह ब्रह्मा त्रिभिः। अथेति। अथोक्तविधभगवद्वचनश्रवणानन्तरं तस्य भगवतः, ऋषयो निगममन्त्रास्तेषां कुल्यां प्रवाहसजातीयाम् ऋषिकुलयोग्यामिति वा। दैवीममानुषीम् उशतीं कमनीयाम् सरस्वतीं गिरम् आस्वाद्यानुभूय आश्रुत्येति यावत्। मन्युना विषसमानेन क्रोधेन दष्टानां व्याप्तानाम् अपि तेषां मुनीनाम् आत्मान्तःकरणं न अतृप्यत अलमिति नामन्यत। भगवद्वाक्यतात्पर्याज्ञानान्मन्यूरगदष्टत्वाच्च तेषां चित्तं नातिप्रसन्नमभूदित्यर्थः ॥ १३ ॥

सतीमिति। सतीं साध्वीं लघ्वीमल्पाक्षराम्, गुरवो बहुविचारवेद्याश्चतेऽर्थाश्च, तैर्गह्वरां दुर्विज्ञेयाम् अगाधा चासौ गम्भीरा ताम्, अभिप्रायेणागाधामर्थतो गम्भीरामित्यर्थः। सरस्वतीमित्यनुषञ्जनीयम्। शृण्वन्तः सन्तः, विगाह्य अत्यालोडनपूर्वं विचार्यापि, तच्चिकीर्षितं तेन भगवता यत्कर्त्तुमिष्टं तदित्यर्थः। न विदुः। एभिर्वाक्यैः किमस्मानभिनन्दति, निन्दति, वाऽस्मत्कृतदण्डं संकोचयति, वेति नैवाविदन्नित्यर्थः ॥ १४ ॥ ततश्चास्मानभिनन्दतीति तद्वाक्यावगाहनतो ज्ञात्वा प्रहृष्टास्तु ऊचुरित्याह।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

-त इति । योगमायया विचित्रविश्वसर्गकारिण्या प्रकृत्या आरब्धस्य कृतस्य जगतः यत्पारमेष्ठ्यमस्माकं सर्वोत्कृष्टाधिपत्यं तस्य, महानुदयो यस्मात्तं भगवन्तं प्रति, ते विप्राः कुपितास्त्वचो येषां ते संशयावहवाक्यश्रवणेन कोपवत्त्वग्युक्ता इत्यर्थः । प्रहृष्टाः निरतिशयकल्याणगुणगणाकरस्यात्मदैवतस्य भगवतो दर्शनसंभाषणकृपावलोकनादिजनितहर्षयुक्ताश्च एवमुभयविधधर्मसंपन्नाः सन्तोऽपि प्राञ्जलयः सन्तः प्रोचुः ॥ १५ ॥ उक्तिमेवाहुर्दशभिः । नेति । हे भगवन्, हे देव तव चिकीर्षितं त्वया यत्कर्तुमिष्टं तदित्यर्थः । वयं न विद्मः । किं भवानस्माननुजिघृक्षति, उत निजिघृक्षतीति त्वत्तात्पर्यं विशिष्य न जानीमः । किं तु मे मह्यं प्रत्येकाभिप्रायेणैकवचनम् । पाठान्तरे निर्बाधत्वात्सुगम एवार्थः । अनुग्रहश्चानुग्रह एव कृतः इति एवमापाततो विद्म इत्यर्थः । कथमेवं जानीथेत्यत्राहुः यत् यस्मात् अध्यक्षः वाङ्मानसागोचरस्त्वमित्यर्थः । प्रभाषसे । अयं भावः । वाङ्मनसागोचरस्त्वं तत्त्वं परित्यज्य निष्कपटानस्मान् विबुद्ध्य प्रसन्नान्कर्तुं नयनविषयतां गतः सन्कथमस्मान्प्रतारयेरित्यापाततो विद्म इति ॥ १६ ॥ एवं स्वात्मनामापाततस्तदभिप्रायाभिज्ञत्वमावेद्य, तदुक्तीनां तात्पर्यमङ्गीकुर्वन्तो 'ब्रह्म दैवं परं हि मे' इत्याद्युक्तयो धर्ममर्यादायाः प्रवृत्त्यै एव उपपन्ना नान्यथेत्याहुरष्टभिः । ब्रह्मण्यस्येति । हे प्रभो ब्रह्मण्यस्य ब्राह्मणस्य तन्मर्यादायाश्च पालकस्य ते तव, ब्राह्मणाः परं दैवं दैवतं किल । किलेत्यनेन लोकशिक्षा सूचिता । यदि भवान् ब्राह्मणान् परदैवतभावेन नानुवर्त्तयेत तदा त्वत्तोऽवरजनाः ब्राह्मणान् न बहुमन्यन्तः सन्तो, नश्येयुरतो लोकशिक्षार्थमेव 'ब्रह्म दैवं परं हि मे' इत्युक्तमिति भावः । वस्तुतस्तु देवेन देवा देवदेवास्तेषां देवेन त्वयापि, देववन्मानितत्वाद्बहु मन्तव्यानामित्यर्थः । विप्राणां भगवान् षाड्गुण्यपूर्णः परमेश्वरस्त्वमेव, आत्मदैवतम् आत्मवत्प्रेमास्पदम्, दैवतवत्पूज्यश्चेत्यर्थः । आत्मैव दैवतं यस्य तस्य तव, नैव देवतान्तरता संभवतीति भावः । तथा च श्रूयते । 'पतिं विश्वस्यात्मेश्वरम् । यस्मात्परं नापरमस्ति किंचित् । न तस्येशे कश्चन । तस्य नाम महद्यशः । स्वे महिम्नि प्रतिष्ठितम्' इत्यादि ॥ १७ ॥

सांप्रतं ब्राह्मण्यत्वमेव प्रपञ्चयन्ति । त्वत्त इति । सनातनोऽनादिसिद्धः धर्मः चातुर्वर्ण्यचातुराश्रम्यव्यवस्थयावस्थितो वेदोदितः धर्मः, त्वत्तः एव प्रवृत्तः । स च तव तनुभिरवतारैः रक्ष्यते च । धर्मस्येदृशस्य वृषस्य परमः फलस्वरूपः, अत एव गुह्यो गोप्य निर्विकल्पो निर्विकारः भवानेव मतः ज्ञातः । श्रुतिभिरिति शेषः । अत एवंभूतस्य तवेदं लोकशिक्षामात्रमिति भावः ॥ १८ ॥ अतो धर्मसंस्थापनार्थायैव ब्रह्मदैवमित्युक्तमन्यथेदमनुपपन्नमित्याहुः । तरन्तीति । निवृत्ता निवृत्तिधर्मनिष्ठाः योगिनः, मृत्युं संसारं यद्यतो हेतोः यदनुग्रहाद्यस्य तवानुग्रहमात्रतः, अञ्जसा सुखेन तरन्ति हि । तथा च श्रुतिः । 'अमृतस्यैष सेतुः' इति सेतुः प्रापक इति तट्टीका । सः भगवान् भवान् परैरन्यै अनुगृह्येत किं स्वित् । नानुगृह्येतेत्यर्थः । अनुग्राहयते परमिति यदा पाठस्तदा परं ब्राह्मणमनुग्रहकर्त्तारं करोति किमित्यः ॥ १९ ॥ यदुक्तं 'न श्रीर्विरक्तमपि मां विजहाति' इति, तदपि यथाश्रुताभिप्रायकत्वे त्वत्यन्तानुपपन्नमिति मत्वा तत्तात्पर्यं परिष्कुर्वन्त आहुः सार्द्धेन । यमिति । यं त्वाम् अर्थार्थिभिश्चतुर्विधपुरुषार्थार्थिभिः, अन्यैस्त्वद्भक्तेतरैः स्वशिरसा धृतः पादरेणुर्यस्याः सा, तथा चोक्तम् । 'अकिंचनैकशरणाः केचिद्भाग्याधिकाः पुनः । तत्पादाम्भोरुहद्वन्द्वं प्रपद्य प्रीतमानसाः । लक्ष्मीं पुरुषकारेण वृतवन्तो वरानने' इत्येवंभूता विभूतिर्लक्ष्मीः, धन्यैर्भगवद्भक्तैः अर्पितं संपूज्य समर्पितम् अङ्घ्रौ विषये यत्तुलस्याः नवं दाम तद्धाम स्थानं यस्य तस्य, मधुव्रतपतेर्भृङ्गराजस्य, लोकं स्थानं श्रीपतिपदारविन्दमित्यर्थः । कामयाना वाञ्छती इव अनुवेलं वेलासु वेलास्वित्यर्थः । उपयाति वै । तत्तदुचितसेवावसरेषु यथायथं सेवते इति भावः ॥ २० ॥ य इति । तां लक्ष्मीं विविक्तानि परिशुद्धानि च तानि चरितानि च तैः । अत्र चरितशब्दः समर्हणोपयोगिवस्तुपरो ज्ञेयः । अनुवर्त्तमानां सेवमानामपि यो भवान् नात्याद्रियत् नात्यादृतवान् । कुतः यतस्त्वं परमभागवतेषु प्रकृष्टः सङ्गो यस्य तथाभूतः असि । अत्रास्यायं भावः । स्वयं सा लक्ष्मीर्ह्येवममन्यत, स्वभावतः सारग्राही चञ्चलप्रकृतिश्चायं भ्रमरो यदा स्वां प्रकृतिं परित्यज्य, भगवच्चरणाब्जगतायां वृन्दायां रमते, तदा भगवदङ्घ्रिलावण्यमधिकमेव स्यान्ननु, ततोऽहमेकान्तनिवासभूतं संमर्दसापत्न्यवर्जितं वक्षोवासमप्यपास्य भगवदेकान्तिकयोगिजनादिबहुसेवकसंमर्दमङ्गीकृत्यापि तुलस्या सह सापत्न्यमङ्गीकृत्यापि भगवदङ्घ्रिसेवामेव करिष्यामीति विचार्योत्करीत्यौत्सुक्येन तथा चरन्तीमपि तां भवान्नादृतवानिति । यदुक्तं 'यत्सेवया चरणपद्मपवित्ररेणुम्' इति 'येषाममलाङ्घ्रिरजो बिभर्मि' इति च यदभिहितं भवति भगवता तत्तात्पर्यं प्रकटीकुर्वन्त आहुरर्द्धेन । तं धर्ममर्यादायाः प्रतिष्ठातारं श्रीमत्या लक्ष्म्या अपि समाश्रयणीयं लावण्यैकनिधिमित्यर्थः । त्वां द्विजानामनुपथं पथि पथि लग्नम्, यत् पुण्यं रजस्तत् तथा श्रीवत्सलक्ष्म श्रीवत्सचिह्नं च पुनीतः पवित्रीकुरुतः किम् । नैव पवित्रीकुरुतः । यद्येवं तर्हि तल्लक्ष्म किमर्थमगाः । यद्युच्यते शोभार्थमिति तदपि न चारु, यतः त्वं भगभाजनो निरतिशयसौन्दर्याश्रयः असि । यदि शोभार्थं तद्धारणमवश्यं स्वीक्रियते, तदा रजोऽपि तथैव बिभर्षीति शङ्कोत्तरम् ॥ २१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमलंकारायैव रजो बिभर्षीत्यभिधायाथ लोकमर्यादापालकेन भवतावश्यं धर्ममर्यादापालनं कर्त्तव्यमेवाऽन्यथा तदुच्छिन्नं स्यादित्युपपादयन्त आहुः। धर्मस्येति। त्रीणि युगानि युगलान्येव त्रियुगाः भगवच्छब्दवाच्याः षड्गुणाः सन्त्यस्येति त्रियुगस्तत्संबुद्धौ हे त्रियुग। भगवतः धर्मस्य धर्मरूपस्य ते तव त्रिभिः स्वैरसाधारणैः पद्भिस्तपोदानदयात्मकैः। सत्यस्य कलावनुवर्त्तमानत्वात्त्रिभिरित्युक्तम्। द्विजदेवतार्थं द्विजानां देवतानां च संरक्षणार्थम्। तेषां धर्मपादानामभिघाति अभिघातुकं रजः तमश्च, नोऽस्माकं वरदया सत्त्वेन सत्त्वात्मिकया तनुवा तन्वा श्रीमूर्त्येति यावत्। निरस्य रजस्तमः-प्रधानासुरसंपद्युक्तान् शुद्धसत्त्वप्रधानश्रीमूर्त्तिमदवतारेण विनाश्येत्यर्थः। चराचरं चराचरात्मकम् इदं जगत् भृतं रक्षितं नूनम् ॥ २२ ॥ न त्वमिति। आत्मना भवता गोपं गोपनीयमात्मगोपं भगवता त्वयैव रक्षणीयमित्यर्थः। द्विजोत्तम-कुलमुत्तमानां ब्राह्मणानामन्वयम्, ससूनृतेन प्रियवाक्यसहितेन स्वरहणेन स्वहणेन शोभनपूजनेन, वृषः त्वं श्रेष्ठो भवान्, ह स्फुटं यथा तथा गोप्ता रक्षिता न। यदि स्वयं धर्माननुतिष्ठन् लोकांस्तेषु न प्रवर्त्तयेथाश्चेदित्यर्थः। तर्ह्येव तदैव शिवः श्रेयः-संपादकः, तव त्वत्संबन्धी वेदपन्थाः वेदमार्गः पाठान्तरे देवेति संबोधनम्। नङ्क्ष्यति। कर्मोपासनाद्यात्मको निगमाध्वा विनाशं यास्यतीत्यर्थः। हि यस्मात् लोकः ऋषभस्य श्रेष्ठस्य तद्यथाविधमाचरितं तदेवेत्यर्थः। प्रमाणम् अग्रहीष्यत। प्रमाणत्वेन मंस्यतीत्यर्थः। तथा चोक्तं स्वयं भगवतैव। 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनु-वर्त्तते' इति ॥ २३ ॥

'न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंचन। नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि। यदि ह्यहं न वर्त्तेयं जातु कर्मण्य-तन्द्रितः। मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः। उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्। संकरस्य च कर्त्तास्यामु-पहन्यामिमाः प्रजाः' इति त्वयैव गीतत्वात्तथानाचरणेन वेदमार्गनाशनं तवानुचितमेवेत्याहुः। तदिति सत्त्वनिधेः शुद्धसत्त्वै-काधारस्य, अत एव जनाय, क्षेमं विधित्सोः जनानां सुखं कर्त्तुमिच्छत इत्यर्थः। निजशक्तिभिः स्वकीयावतारैः उद्धृता निर्मूलिता अरयो धर्मविरोधिनो येन तस्य, ते तव तद्वेदमार्गनाशनम् अनभीष्टम् इव अनभीष्टमेवेत्यर्थः। हे त्र्यधिपते त्रिलोकैकनाथ पाठान्तरे भगवद्विशेषणम्। विश्वभर्त्तुः जगतो धारकस्य पोषकस्य वा सतोऽपि अवनतस्य ब्राह्मणान् प्रणमतस्तव इदं प्रणत्याचरणं रजोधारणस्याप्युपलक्षणम्। एतावता प्रणत्याचरणरजोधारणमात्रेणेत्यर्थः। तेजः प्रभावः न क्षतं नैव विहतम् किं तु। सः प्रणामाचरणरूपः ते तव विनोदः लोकप्रेरणरूपो लीलाविलासः बत इति विस्मये ॥ २४ ॥ इत्थं स्वमत्यनुसारेण भगवदभिहि-तवाक्यतात्पर्यं परिष्कृत्य तच्चिकीर्षितमजानन्तः स्वापराधानुसारि दण्डधारणं च निवेदयन्त आहुः। यमिति। हे अधीश भवान् अनयोः भृत्ययोः यं नु वा यमेव वा दमम् अस्मद्विहितं ततोऽन्यं वा दण्डं वृत्तिं यथापूर्वमत्र लोके वर्त्तनं वा विधत्ते विधास्यतीत्यर्थः। तत् निर्व्यलीकं सत्यं यथा भवति तथा अनुमन्महि अनुमन्यामहे। अस्मासु वा उचितः स्वापराधानुरूपः यः दण्डः सः ध्रियतां विधीयताम्। भवद्भिः किमपराद्धमिति चेत्तत्राहुः। ये वयं अनागसौ निरपराधिनावतौ किल्बिषेण शापेन अयुङ्क्ष्महि योजितवन्तः। द्वाःस्थयोरपूर्वजननिवारणं स्वाभाविकमित्यभिप्रायेणानागसावित्युक्तम् ॥ २५ ॥ एवं मुनिभिः स्वहार्दे सम्यगावेदिते, मुनीनां स्वभृत्ययोश्चानुग्रहमाशासानो भगवान्मुनीन् प्रत्याह। एताविति। हे विप्राः एतौ पार्षदौ सुरेभ्यो देवेभ्य इतरे सुरेतरा, असुरास्तेषां गतिमासुरं जन्म प्रतिपद्य सद्यः, संरम्भो जन्मप्रभृति क्रोधस्तेन संभृतः संजातः समाधि-रनवरतभावना तेनानुबद्धोऽनुसृतः योगः मत्संबन्धो ययोस्तौ, अत एव आशु शीघ्रमेव भूयः पुनः सकाशं मत्समीपम् उपयास्यत आगमिष्यतः। को युष्माकं यः शापः तत्सः मया एव विहितः भवन्मुखेन कृतः। निर्मित इति पाठे निर्मितः इति अवैताव-गच्छत जानीतेति यावत् ॥ २६ ॥

एवं भगवतोक्ता मुनयस्ततो ययुरिति ब्रह्माह द्वाभ्याम्। अथेति अथानन्तरं नयनयोर्य आनन्दस्तस्य भाजनं विषयं नेत्रोत्सवजनकमित्यर्थः वैकुण्ठं भगवन्तं तस्य वैकुण्ठभवतः अधिष्ठानं स्थानभूतं स्वयंप्रभं स्वप्रकाशं विकुण्ठं विकुण्ठाख्यं लोकं च दृष्ट्वा ते मुनयः ॥ २७ ॥ भगवन्तमिति। भगवन्तं वैकुण्ठनाथं परिक्रम्य प्रदक्षिणीकृत्य प्रणिपत्य प्रणम्य, अनुमान्यानुज्ञाप्य च, वैष्णवीं भागवतीं श्रियं संपदं शंसन्तः प्रमुदिताः संजातप्रकृष्टमुदः सन्तः, प्रतिजग्मुः। द्वयोरेकसंबन्धः ॥ २८ ॥ मुनिगम-नानन्तरं द्वास्थौ सान्त्वयन् भगवानुवाचेत्याह त्रिभिः भगवानिति। भगवान् विकुण्ठनाथः, हे भृत्यौ, यातं गच्छतम्, मा भैष्टं भयं माकुरुतम्, शं सुखं गच्छतोरपि युवयोरिति शेषः। अस्तु। यद्यावयोरनुग्रह एव भवता क्रियते, तर्हि ब्रह्मदण्ड एव किं न निरस्यते इत्यत्राह। ब्रह्मतेजः ब्रह्मदण्डं तेजःकार्यत्वाद्दण्डस्यापि तेजःशब्देन निर्देशः हन्तुं निरसितुं समर्थोऽपि नेच्छे। कुतः हि यस्मात् मे मम मतं संमतं भवति। इत्येवम् अनुगौ स्वभृत्यौ प्रति आह ॥ २९ ॥ न केवलं ममैवेदं ब्रह्मतेजो मतम, किं तु लक्ष्म्या अपीत्याह। एतदिति। एतदितो युवयोर्निर्गमनं पुरा पूर्वकाले क्रुद्धया अनया रमया लक्ष्म्या एव निर्दिष्टं संदर्शितम्। पुरा कदेत्यात्राह। मयि उपारते प्रणयकलहवशात् तूष्णीं शयाने सति, मन्निलयाद्बहिर्निर्गत्य पुनरन्तः प्रविशन्ती

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वारि युवाभ्यां यद्यदा निवारिता, तदा एतत्तु ब्रह्मवैवर्त्तीयश्रीकृष्णजन्मखण्डगतषट्पञ्चाशत्तमाध्यायादेर्बोध्यम् ॥ ३० ॥ मयीति । अतः मयि संरम्भः क्रोधस्तस्य योगोऽनवरतसंबन्धस्तेन, ब्रह्महेलनं ब्रह्मविदपराधजन्यं फलमित्यर्थः । निस्तीर्य निरवशेषमपोह्य, अल्पीयसा अत्यल्पेनैव कालेन पुनर्भूयोऽपि मे मम निकाशं समीपं प्रत्येष्यतं प्रत्यागच्छतम् ॥ ३१ ॥

एवं स्वद्वारपालावादिश्य स्वयं परमेश्वरः स्वस्थानमाविवेशेत्याह । द्वाःस्थाविति । भगवान्वैकुण्ठनाथः, द्वाःस्थौ स्वद्वारपालौ आदिश्याज्ञाप्य, विमानानां श्रेणयः पङ्क्तयः एव भूषणं यस्मिंस्तथाभूतम्, सर्वानतिशेते इति सर्वातिशा तया निरतिशयया इत्यर्थः । लक्ष्म्या संपदा जुष्टम्, स्वमात्मीयं धिष्ण्यं स्थानम् आविशत् । यद्वा जुष्टं स्वातिप्रियं स्वं धिष्ण्यं लक्ष्म्या सह आविशदिति योजना ॥ ३२ ॥ अथ तौ पार्षदौ किमभूतां किमकुर्वातां चेत्यत्राह । ताविति । गीर्वाणऋषभौ पार्षदप्रवरौ, तौ द्वाःस्थौ तु, दुस्तरादन्यथा कर्तुमशक्यात्, ब्रह्मशापाद्ब्रह्मशापतो हेतोः, हरिलोकतः श्रीहरेर्लोके एव, हतश्रियौ भ्रष्टतेजसौ अत एव विगतस्मयौ विगतगर्वौ अभूताम् ॥ ३३ ॥ तदेति । हे पुत्रकाः देवाः तदा विकुण्ठस्य भगवतः धिषणं स्थानं तस्मात्, तयोर्भगवत्पार्षदयोः निपतमानयोः सतोः, विमानाग्र्येषु विमानश्रेष्ठेषु वसतां देवानामित्यर्थः । महानुच्चैः । हाहाकारः आसीत् ॥ ३४ ॥ ताविति । हे देवाः तौ एव हरेः पार्षदप्रवरौ पार्षदश्रेष्ठौ, दितेः जठरनिर्विष्टं कुक्षौ प्रविष्टम्, काश्यपं कश्यपसंबन्धि उल्बणमुग्रं तेजो वीर्यं प्रति अधुना सांप्रतमेव प्राप्तौ भवतः हि ॥ ३५ ॥ तयोरिति । असुरयोरासुरजन्मनोः यमयोः, सहैव गर्भं प्रविश्योत्पत्स्यमानयोः तयोः पार्षदयोः तेजसा, अद्य वो युष्माकं तेजः आक्षिप्तमभिभूतम्, एतर्हि इदानीं भगवान्, तद्भवतां तेजः विधास्यति । हि तौ निहत्य भवत्तेजः यथावस्थितं करिष्यत्येवेत्यर्थः ॥ ३६ ॥ भगवान्कदा विधास्यति, विधातुं स प्रभवेन्न वेति शङ्काद्वयं परिहरन्नितिहासं निगमयति । विश्वस्येति । विश्वस्य जगतः, स्थितिश्च, लयश्च, उद्भवश्च तेषां हेतुः अत एव आद्यः, सृष्टेः प्रागपि निर्विकारत्वेन स्थितः, कथं तथाभूतस्य सृष्ट्यादिहेतुत्वं तत्राह । योगेश्वरैर्योगपरिशुद्धमानसैरपि, दुरत्यया दुर्विवचनीया योगमाया विचित्रसर्गकारिण्यात्मीयशक्तिर्यस्य स एवंभूतः, त्र्यधीशस्त्रिलोकाधिपतिः यः भगवान्, स एव नोऽस्माकं क्षेमं विधास्यति । सत्त्वगुणोत्कर्षकाले करिष्यतीत्यर्थः । तत्र इह तथाभूते एतस्मिन् भगवति, अस्मदीयस्यास्मदिष्टस्य विमृशो विचारस्तेन कियान् अर्थः कियत्प्रयोजनम्, कृत्स्नजगदुदयपालनसंहरणचरित्रस्य अचिन्त्यनानाविधचित्रविरचनासमर्थमायाधीशस्य षाड्गुण्यपूर्णस्य, त्रिलोकाधिपतेः स्वाश्रितास्मदीयश्रेयोविमर्शनमत्यल्पप्रयोजनमिति भावः ॥ ३७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः

मैत्रेय उवाच

निशम्यात्मभुवा गीतं कारणं शङ्कयोज्झिताः । ततः सर्वे न्यवर्त्तन्त त्रिदिवाय दिवौकसः ॥ १ ॥

लोकानां भयकृज्जन्म तयोः सप्तदशे ततः । अद्भुता दिग्जये प्रोक्ता हिरण्याक्षप्रभावता ॥ १ ॥

सांप्रतं हिरण्याक्षजन्मप्रभृतिवृत्तान्तमाह मैत्रेयः निशम्येति । आत्मभुवा ब्रह्मणा गीतं कथितम्, कारणं स्वानुभूयमानव्यसननिमित्तं निशम्य, शङ्कया उज्झिताः क्षेमं विधास्यतीति वचनाच्छङ्कया रहिताः, सर्वे दिवौकसो देवाः, ततो ब्रह्मलोकात् त्रिदिवाय त्रिदिवं प्रतिगन्तुं न्यवर्त्तन्त, स्वर्गं प्रति जग्मुरित्यर्थः ॥ १ ॥ दितिरिति । साध्वी दितिः तु भर्त्तुः कश्यपस्य आदेशात् 'लोकान् सपालांस्त्रींश्चण्डि मुहु राक्रन्दयिष्यतः' इति वाक्यात्, अपत्यपरिशङ्किनी स्वापत्याभ्यां देवोपद्रव-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माशङ्कमाना सती, स्वापत्ययोर्हरेः सकाशान्नाशशङ्कावती सतीति वा। वर्षशते पूर्णे सति यमौ युग्मजातौ पुत्रौ प्रसुषुवे प्रसूतवती ॥ २ ॥ उत्पाता इति । तत्र तज्जन्मदेशे तयोरिति वा । तयोः जायमानयोः सतोः, दिवि स्वर्गे, भुवि पृथिव्याम्, अन्तरिक्षे भुवर्लोके च, बहवः अनेकशः विचित्रा वा, लोकस्योरु अतिशयितं यद्भयं तदावहाः, भयंकरा इत्यर्थः। उत्पाताः निपेतुः पतिताः। उद्बभूवुरित्यर्थः ॥ ३ ॥ तानेव प्रपञ्चयति सहेत्याद्येकादशभिः। सहेति। अचलैः पर्वतैः सह वर्त्तमानाः सहाचलाः भुवो भूभागाः, चेलुश्चलितवत्यः। सर्वाः दिशः प्रजज्वलुः वह्निज्वालायुक्ता बभूवुः। सोल्का उल्कापातसहिताः साङ्गारा इत्यर्थः। अशनयश्च पेतुः। अतीवासह्यकडडरवयुता विद्युतः पेतुरित्यर्थः। आर्त्तिहेतवो लोकपीडासूचकाः, धूमकेत्वादयश्च उद्बभूवुरिति शेषः ॥ ४ ॥ ववाविति । सुतरां दुष्टः स्पर्शो यस्य सः कठिनस्पर्श इत्यर्थः। मुहुः फूत्कारान् फूत्कारानिति वायुशब्दानुकरणम्। 'फट्कारश्चैव फूत्कारस्तथा किलकिलादयः। येऽन्येऽनुकारशब्दास्ते विज्ञेयास्तादृशा बुधैः' इत्यभिधानात्। ईरयन् कुर्वन्, नगपतीन् श्रेष्ठवृक्षान्, उन्मूलयन्मूलत उत्पाटयन्, वात्याश्चक्रवायवस्तासामनीकः समूहो यस्य सः, रज एव ध्वजो यस्य सः। पाठान्तरे वात्याभिरानीतमुद्धृतं रज एव ध्वजो यस्य सः, एवंविधः वायुः ववौ प्रासरत् ॥ ५ ॥

उद्धसदिति। उदुच्चैर्हसन्त्य इव तडितो येषु येषामम्भोदानां मेघानां या घटा समूहस्तया, नष्टो भागणः सूर्यादिप्रभासमूहो यस्मिंस्तस्मिन्, व्योम्नि प्रविष्टं च तत्तमश्च तेन, संप्रविष्टगाढान्धकारेणेत्यर्थः। पदं सूर्यादिग्रहाणां स्थानम्, न व्यादृश्यते स्म ॥ ६ ॥ चुक्रोशेति। वार्द्धिः समुद्रः, विमना दुःखितचित्तः, इषदुल्लसन्तश्च ते ऊर्मयश्च तैः क्षुभितमुदरं यस्य सः, अत्रोदरशब्देनोदरस्था मकरादयो ग्राह्याः। क्षुभितनक्रतिमिङ्गिलादिरित्यर्थः। एवंभूतः सन् चुक्रोश। शुष्काणि पङ्कजानि यासु ताः, उदपानैर्वापीकूपतडागादिभिः सहिताः सोदपानाः, सरितो नद्यश्च चुक्षुभुः ॥ ७ ॥ मुहुरिति। सराह्वो राहुसहितयाः, राहुग्रस्तयोरित्यर्थः। शशिसूर्ययोः मुहुः पुनः पुनः परिधयः परिवेषाः अभूवन्। रथानामिव निर्ह्रादो येषां ते रथध्वनितुल्यध्वनयः निर्घाता, निरभ्रगर्जितानि विवरेभ्यः पर्वतगुहादिभ्यः प्रजज्ञिरे जाताः ॥ ८ ॥ अन्तरिति। अन्तर्ग्रामेषु, ग्राममध्येषु मुखतो मुखैः उल्बणं तीव्रं वह्निमुल्मूकसमानाग्निम्, वमन्त्य उद्गिरन्त्यः, शिवा गोमायवः, शृगालाश्च, तेषां टङ्कारा ध्वनयस्तैः सह अशिवं यथा तथा प्रणेदुर्ध्वनितवत्यः। शिवाः शृगाला अवान्तरजातीयाः। ग्रामेषु यासां ध्वनिमत्यन्तारिष्टसूचकं लोका वदन्ति। केचित्तु शृगालाः पुंप्रकृतयः, शिवास्ता एव स्त्रीप्रकृतय इति वदन्ति ॥ ९ ॥ संगीतवदिति। ग्रामसिंहाः श्वानः, शिरोधरां कंधरां उन्नमय्योद्धृत्य संगीतवन्नाट्यगानवत् रोदनवत् रोदनकर्तृवच्च, विविधा वाचः भाषणानि ततस्ततः तत्र तत्रेत्यर्थः। व्यमुञ्चन्नकुर्वन्नित्यर्थः ॥ १० ॥ खरा इति। हे क्षत्तः खरा गर्दभाश्च कर्कशैः कठिनैः खुरैः, धरातलं भुवस्तलं घ्नन्तस्ताडयन्तः, खार्कारो गर्दभजातिशब्दस्तस्मिन् रभसः संभ्रमस्तेन आमत्ताः, रभसाः मत्ताः इति यदा, तदा रभसः संभ्रमो येषां ते इति वरूथशः संघशः पर्यधावन् ॥ ११ रुदन्त इति। रासभत्रस्ता गर्दभध्वनिभीताः, खगाः पतत्रिणः रुदन्त आपत्कालीनस्वजातिशब्दं कुर्वाणाः सन्तः, नीडात्स्वस्वकुलायेभ्य इत्यर्थः। उदपतन्। किंचिदुड्डीय निपेतुः। घोषे आभीरपल्यां अरण्ये च ये पशवः ते शकृत्पुरीषं मूत्रं च अकुर्वत उत्ससर्जुः ॥ १२ ॥

गाव इति। गावः असृग्दोहा रक्तं दुहन्त्यः, सन्त्यः अत्रसन्नुद्वेजितवत्यः। तोयदा मेघाः पूयवर्षिणः पक्वरुधिरविकृतिजकश्मलवर्षिणः अभूवन्। देवलिङ्गानि देवताप्रतिमाः, व्यरुदन् अश्रूण्यमुञ्चन्। अनिलं वायुं विनान्तरेणापि द्रुमाः पेतुः ॥ १३ ॥ ग्रहानिति। पुण्यतमान् शुभकरान् ग्रहान् गुरुबुधादीन् भगणान्, बहूनि नक्षत्राणि च अन्ये अङ्गारकादयः क्रूरग्रहाः अतिपीडिताः पुण्यग्रहैः संपीडिताः सन्तः, अतिचेरुरतिक्रम्य जग्मुः। वक्रगत्या प्रत्यावृत्त्येति शेषः। परस्परं युयुधुश्च। भगणांश्चापि दीपिता इति पाठे दीपिता बहुलबलाः अन्ये इति योजना ॥ १४ ॥ दृष्ट्वेति। अन्यानुक्तेभ्य इतरांश्च महोत्पातान् दृष्ट्वा, अतत्त्वविदस्तदुत्पातफलमजानन्त्यः, सर्वाः प्रजाः ब्रह्मपुत्रान्सनकादीन्मरीच्यादीन्वा, ऋतेऽन्तरेण भीतास्तीव्रभयं प्राप्ताः सत्यः, विश्वसंप्लवं जगत्संहारं मेनिरेऽमन्यन्त। सनकादीनां स्वविहितशापज्ञानान्मरीच्यादीनां त्रिकालदर्शित्वान्न ते भीता इत्यर्थः ॥ १५ ॥ ताविति। व्यज्यमानं प्रकटतया दृश्यमानमात्मपौरुषं पूर्वसिद्धस्वपराक्रमो ययोस्तौ आदिदैत्यौ प्रथमोद्भावितदैत्यभावौ, तौ द्वौ सहसा जातौ सन्ताविति शेषः। अश्मसारेणायस्तुल्येन कायेन देहेन, अद्रिपती पर्वतश्रेष्ठौ इव ववृधाते ॥ १६ ॥ पुनस्तावेव विशिनष्टि। दिवीति। हेम्नः सुवर्णस्य किरीटौ मुकुटे तयोः कोटयोऽग्राणि तैः, स्वर्णमयमुकुटाग्रभागैरित्यर्थः। बहुत्वं कलाङ्गीबहुत्वसूचनाय। दिविस्पृशौ दिवं स्पृशन्तौ, निरुद्धा व्याप्ताः काष्ठा दिशो याभ्यां तौ, स्फुरन्ति चञ्चन्त्यङ्गदानि केयूराणि येषु ते भुजा बाहवो ययोस्तौ, अङ्गदेत्याबन्तत्त्वमार्षम्। चरणैः पादैः पदे पदे प्रतिपदविन्यासमित्यर्थः। गां भूमिं कम्पयन्तौ चालयन्तौ, सुशोभना काञ्ची यस्यां तया कट्या, अर्कं सूर्यम् अतीत्यातिक्रम्य तस्थतुः स्थितवन्तौ ॥ १७ ॥ प्रजापतिरिति। प्रजापतिः कश्यपः तयोः यमयोर्मध्ये यः स्वदेहात् प्राक् प्रथमम् अजायत, तं हिरण्यकशिपुं यथा प्रजाः विदुः। सा दितिः यम् अग्रतः प्रथमम् असूत, तं हिरण्याक्षं यथा विदुः, तथा नाम नामधेयम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकार्षीत्कृतवान् वै । अयं भावः । यदा हि गर्भाधानसमये योनिपुष्पं विशद्वीर्यं द्विधा विभक्तमादिपश्चाद्भावेन प्रविशति, तदा यमौ भवतः । तयोश्च पितृतः प्रवेशक्रमविपर्ययेण मातृतः प्रसूतिः । 'यदा विशेत् द्विधाभूतं बीजं पुष्पं परिक्षरत् । द्वौ तदा भवतो गर्भौ सूतिर्वेशविपर्ययात्' इति पिण्डसिद्धिस्मरणात् । अतः स्वदेहात्पूर्वं यो जातस्तस्य हिरण्यकशिपुरिति दित्या प्रथमं प्रसूतस्य हिरण्याक्ष इति नाम कृतवानित्यर्थः ॥ १८ ॥

चक्रे इति । हिरण्यकशिपुः दोर्भ्यां निजभुजाभ्यां स्वभुजबलेनेत्यर्थः । उद्धतः सन्, ब्रह्मणो विधातुः वरेण, अकुतोमृत्युः कुतश्चिदपि मृत्युरहितः संश्च, सपालान् लोकपालसहितान् त्रीन् लोकान् वशे चक्रे । स्वाधीनानकार्षीत् ॥ १९ ॥ हिरण्याक्ष इति । तस्य हिरण्यकशिपोः अनुजः, पितृक्रमानुसारतोऽनुजतायुक्तः, प्रियः प्रीतिविषयः अन्वहं प्रीतिकृच्च हिरण्याक्षः, गदापाणौ यस्य सः युयुत्सुर्योद्धुमिच्छुः, अत एव रणं युद्धं मृगयन्, दिवं यातो गतः ॥ २० ॥ तमिति दुःसहो जवो वेगो यस्य तम्, रणन्तौ काञ्चनमयौ नूपुरौ यस्य तम्, वैजयन्त्या पञ्चपल्लवादिनिर्मितस्रग्विशेषो वैजयन्ती तया पञ्चवर्णपुष्पकृतया वा । स्रजा मालया जुष्टमलंकृतम्, अंसे स्कंधे न्यस्ता निहिता महती गुर्वी गदा येन तम् ॥ २१ ॥ मन इति । मनश्च, वीर्यं बलं च, वरो ब्रह्मदत्तो वरश्च तैरुद्रिक्तो गर्वितस्तम् । असृण्यं निरङ्कुशम्, अकुतोभयं कुतश्चिद्भीति-मकुर्वाणम्, एवंभूतं तं वीक्ष्य देवाः भीताः सन्तः, तार्क्ष्याद्गरुत्मतस्त्रस्ताः अहयः सर्पाः इव निलिलियिरेऽन्तर्हिताः इति द्वयोरेकान्वयः ॥ २२ ॥ स वा इति । दैत्यराट् सः हिरण्याक्षः, स्वेनात्मीयेन महसा तेजसा, तिरोहितान् सेन्द्रानिन्द्रसहितान् देवगणान्देवसमूहान् दृष्ट्वा ज्ञात्वा, क्षीबो मत्तः अत एव, नपश्यन् तान् न पश्यन्सन्, क्लीबान-पश्यदिति पाठे क्लीबान्नपुंसकतुल्यान् पौरुषहीनान् अपश्यत् ज्ञातवान् । भृशं व्यनदद्ध्वनत् वै ॥ २३ ॥ तत इति । ततः निवृत्तो दिवः प्रत्यावृत्तः क्रीडिष्यन्निहरिष्यन्, महासत्त्वो महाबलः हिरण्याक्षः, गम्भीरमगाधम्, भामो भयंकरः निस्वनस्तरङ्गजन्यो ध्वनिर्यस्मिंस्तं वार्द्धिं समुद्रम्, मत्तः द्विपः हस्तीव विजगाहे विवेश ॥ २४ ॥ तस्मिन्निति । तस्मिन् हिरण्याक्षे प्रविष्टे सति वार्द्धाविति शेषः । वरुणस्य सैनिकाः यादोगणाः ससाध्वसाः भयसंयुक्ताः सन्नधियः नष्टबुद्धयः दुःखितचित्ताः इति यावत् । अहन्यमाना अपि तेनाताडिताः अपि, तस्यासुरस्य वर्चसा तेजसा प्रधर्षिता अभिभूताः सन्तः दूरतरं प्रदुद्रुवुः पलायितवन्तः ॥ २५ ॥

स इति । महाबलः सः हिरण्याक्षः, वर्षपूगान् बहून्संवत्सरान्, उदधौ समुद्रे चलन् संचरन्सन् श्वसनेन पवने-नेरिता उत्थितास्तान् महोर्मीनुच्चैस्तरङ्गान्, मुहुर्भूयो भूयः, मौर्व्या अयोमय्या गदया अभिजघ्ने प्रजहार । ततः हे तात विदुर तत्र विभावरीं एतत्संज्ञाम्, प्रचेतसः वरुणस्य पुरीं नगरीम्, आसेदिवान् प्राप्तः ॥ २६ ॥ तत्रेति । तत्र तस्यां विभावर्यामपि असुराणां यो लोकः पातालं तस्य पालकस्तम्, यादोगणानां जलजन्तूनाम् । ऋषभमधिपतिं प्रचेतसं वरुणम् उपलभ्य संप्राप्य, स्मयन्नीषद्धसन् प्रलब्धुमुपहसितुं नीचवन्म्लेच्छवत् प्रणिपत्य एकहस्तेन नत्वा, हे अधिराज वरुण मे मह्यं संयुगं युद्धं देहि । इत्थं जगाद । मया सह युध्यस्वेत्युक्तवान् ॥ २७ ॥ ततः युयुत्सोर्तिपपादयिषयाह । त्वमिति । हे प्रभो वरुण त्वं लोकपाला-नामधिपतिः, बृहच्छ्रवा महायशाः, वीरमात्मानं मन्यन्ते ते वीरमानिनः दुर्मदाश्च तेषां वीर्यापहो वीर्यापहर्त्ता, भवसि । कथमहमेवंविधः त्वया युद्धस्तत्राह । यद्यस्मात् पुरा पूर्वं लोके दैत्याश्च, दानवाश्च, अखिलाः सकला दैत्यदानवास्तान् विजित्य, राजसूयेन अयजदिष्टवान् ॥ २८ ॥ स एवमिति । अपां जलानां पतिः भगवान्समर्थः, स वरुणः उद्रिक्तो वृद्धिं प्राप्तो मदो यस्य स तेन, विद्विषा विद्वेषवताऽसुरेण दृढं यथा तथा प्रलब्धः सन्, समुत्थमुत्पत्तिं प्राप्तं रोषं स्वयात्मीयया धिया शमयन् न्यवोचत् उवाच । अङ्ग हे असुर वयम् उपशमं गताः युयुत्सात उपरमं प्राप्ताः ॥ २९ ॥ पश्यामीति । किं च हे असुरर्षभ, पुरातनात्स-नातनात् पुरुषात्परमपुरुषात्, अन्यं रणमार्गेषु युद्धविधानप्रकारेषु कोविदो निपुणस्तं न पश्यामि । यः त्वां संयुगे युद्धे आराध-यिष्यति तोषयिष्यति । अतः तं परमपुरुषम् इहि गच्छ । न च स यादृशस्तादृशः स्यादिति शङ्कनीयः यतः भवादृशाः मनस्विनः स्वैराः, यं परमपुरुषं गृणते स्तुवन्ति । अतस्तत्र युयुत्सापूर्णोचिकीर्षा चेत्तं प्रति गच्छेति भावः ॥ ३० ॥

तमिति । वीरं रणोद्भटं तं परमपुरुषम् आरात्समीपे अभिपद्य गत्वा, विगतः स्मयो यस्य सः विगतगर्व इत्यर्थः । वीरशये रणप्रदेशे श्वभिर्भषकैः वृतः परिवेष्टितः शयिष्यसे । त्वं यथा तथा सोऽपि यदा योद्धुं नायायात्तदा मया किं कार्यमिति चेत्तत्राह । यो भगवान् त्वद्विधानां भवादृशानाम् असतां प्रशान्तये विनाशाय, सतां साधूनामनुग्रहेच्छया, रूपाणि वराहाद्यवतारान् धत्ते बिभर्ति ॥ ३१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

——:❈:——

२९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथाष्टादशोऽध्यायः

मैत्रेय उवाच

तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः ।
हरेर्विदित्वा गतिमङ्ग नारदाद्रसातलं निर्विविशे त्वरान्वितः॥ १ ॥

निर्विशेषं वराहस्य हिरण्याक्षस्य संयुगम् । प्रोक्तमष्टादशे पश्यद्देवविस्मयकारकम् ॥ १ ॥

एवं वरुणेनाभाषितो हिरण्याक्षस्तमेव वराहभगवन्तं गवेषयन् प्रयात इत्याह मैत्रेयः । तमिति । अङ्ग हे विदुर एवमुक्तप्रकारं तत् जलेशभाषितं वरुणेनोक्तं वचनम् आकर्ण्य निशम्य महामनाः सोत्साहमानसः, प्रतियोद्धारं श्रुत्वा प्रहृष्टचित्त इत्यर्थः । अत एव दुर्मदः दुष्टमदो हिरण्याक्षः, शयिष्यसे इति यदुक्तं तत् विगणय्य अगणयित्वा, हरेर्भगवतः गतिं मार्गं नारदात् विदित्वा सम्यक् ज्ञात्वा, त्वरान्वितः रसातलं निर्विविशे प्रविष्टवान् ॥ १ ॥ ददर्शेति । तत्र रसातले धराधरं भूधरं पर्वतवत्प्रतीयमानमिति वा । अग्रदंष्ट्र्या दंष्ट्राग्रेण, प्रोन्नीयमानोर्ध्वं नीयमानाऽवनिर्भूमिर्येन तम्, अरुणा रक्ता श्रीर्यस्य तेन अक्ष्णा नेत्रेण, स्वरुचो हिरण्याक्षतेजांसि मुष्णन्तं हरन्तम्, अम्बुरुहारुणश्रियमिति पाठे अक्ष्णा अम्बुरुहारुणश्रियं रक्तपद्मदलकान्तिं मुष्णन्तमित्यर्थः । अभितः सवतः जयतीति अभिजित्तम् । हरिमित्यर्थः । ददर्श । अहो वनगोचरः मृगः इत्युक्त्वा जहास च । भूमिगतवनवराहास्तु बहवो दृष्टाः, परं तु वनपर्यायजलगोचरो मृगस्त्वयमद्यैव दृश्यते इत्युक्त्वाऽपहसितवानित्यर्थः ॥ २ ॥ आहेति । हे वनमृग एहि आगच्छ, हे अज्ञ महीमिमां पृथ्वीं विमुञ्च, यतः विश्वसृजा ब्रह्मणा इयं मही रसौकसां पातालवासिनां नोऽस्माकम् अर्पिता, अन्यथा पातालावतरणमस्या न घटते इति भावः । हे सुराधम, आसादिता धृता सूकराकृतिः क्रोडरूपं येन तत्संबुद्धौ, मम ईक्षतः पश्यतः सतः, ईक्षतेरात्मनेपदित्वात् शानचो योग्यत्वेऽपि शत्रा योजनमार्षम् । अनया भूम्या सह स्वस्ति मङ्गलं यथा तथा न यास्यसि । एवम् एनं वराहम् आह हिरण्याक्षः कथयामास । अत्रोपासकप्रीत्यर्थः भगवन्निन्दासूचकपदानामन्यथार्थविधानेऽपि ग्रन्थकर्त्तुरनभिप्रेतत्वदृशा तानि न व्याख्यायन्ते । तद्वेदनरुचिमद्भिस्तान्यन्यव्याख्यातृभ्यो ज्ञेयानि ॥ ३ ॥ त्वमिति । यो भवान् परोक्षं यथा तथा जयतीति परोक्षजिच्चौर्यादिच्छद्मनास्मज्जयोद्युक्तः सन्, असुरानस्मान् मायया केवलेन कपटयुद्धेनेत्यर्थः । हन्ति । सः त्वं सपत्नैरस्मच्छत्रुभिः सुरैः नोऽस्माकम् अभवाय नाशाय भृतः भूतः पुष्टीकृतोऽसि किम् । यदि तथा स्यात्तथापि त्वत्तो न बिभेमीति सूचयन्वदति । हे मूढ योगमायाबलं कपटोपायबलवन्तम्, अत एव अल्पपौरुषं त्वां संस्थाप्य हत्वा, सुहृदां शुचः सुहृच्छुचस्ताः, अस्मत्सुहृन्नेत्राश्रूणि इत्यर्थः । प्रमृजे नाशयिष्यामीत्यर्थः ॥ ४ ॥ त्वयीति । अस्माकं यो भुजो हस्तस्तेन च्युता विसृष्टा तया गदया शीर्णं भिन्नं शीर्षं यस्य तस्मिन् भिन्नमूर्द्धनीत्यर्थः । त्वयि संस्थिते हते सति, ये ऋषयः ये देवाश्च, तुभ्यं बलिं पूजां हरन्त्यर्पयन्ति, ते सर्वे चापि स्वयम् एव प्रयत्नमन्तरेणैवेत्यर्थः । अमूलाः सन्तः न भविष्यन्ति । अनाश्रयतया नाशं प्राप्स्यन्तीत्यर्थः ॥ ५ ॥ स इति । स वराहो भगवान्, अरेरसुरस्य या दुरुक्तयस्ता एव तोमराः शस्त्रविशेषास्तैः, तुद्यमानो व्यथमानः, दंष्ट्राग्रगां दंष्ट्राग्रावस्थिताम्, गां भूमिं भीतां भीतिमतीम् उपलभ्योपलक्ष्य, तोदं दुरुक्तिव्यथां मृषन्सहमानः सन्नेव, अम्बुमध्याद्ब्धिजलमध्यतः, ग्राहेण मकरेणाहतः संताडितः सकरेणुर्हस्तिनीसहितः, इभो यथा गज इव निरगान्निर्गतः ॥ ६ ॥ तमिति । सलिलाज्जलात् निःसरन्तं निर्गच्छन्तं तं भगवन्तं द्विरदं गजम्, झषो मकरः यथा तथा अनुद्रुतोऽनुधावन्, हिरण्यकेशः हिरण्याक्षः, कराला भयंकरा दंष्ट्रा यस्य सः, अशनेर्वज्रस्येव निस्वनो यस्य स तथाभूतः सन्, गतह्रियां निर्लज्जानाम् असतामसज्जनानां भवतां किं नु विगर्हितम् अस्ति । निंदाभयाभावात्पलायनं नायुक्तमिति भावः । इति अब्रवीत् ॥ ७ ॥ स इति । स वराहो भगवान् सलिलस्य उदस्तादुपरि वर्त्तमाने, गोचरे व्यवहर्तृणां व्यवहारविधानयोग्ये देशे इत्यर्थः । गां भूमिम्, अरेर्हिरण्याक्षशत्रोः पश्यतः सतः विन्यस्य निधाय, तस्यां गवि स्वसत्त्वं स्वबलरूपामाधारशक्तिम् अदधात् निहितवान् । विश्वसृजा ब्रह्मणा अभिष्टुतः त्वया साधु कृतमित्येवमुक्तः, विबुधैर्देवैः कर्त्तृभिः प्रसूनैः पुष्पैः करणैः आपूर्यमाणो विकीर्यमाणः सन्, तं हिरण्याक्षं बभासे इत्युत्तरश्लोकगतेनान्वयः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परानुषक्तमिति । परा पृष्ठतोऽनुषक्तोऽनुद्रुतस्तं पृष्ठत एवानुलग्नमित्यर्थः । तपनीयं सुवर्णं तन्मयान्युपकल्पानि भूषणानि यस्य स तम्, महती गुर्वी गदा यस्य तम्, काञ्चनमयः सुवर्णप्रधानश्चित्रो विचित्रतायुक्तो दंशो वर्म यस्य तम् । दुरुक्तैर्दुर्वाक्यैः अभीक्ष्णं पुनः पुनः मर्मस्थानानि प्रतुदन्तं व्यथयन्तं तम्, हिरण्याक्षासुरं प्रति प्रचण्ड उत्कटः मन्युः क्रोधो यस्य स भगवान् प्रहसन्सन्, बभाषे उवाच । सोपालम्भमिति शेषः ॥ ९ ॥ यद्बभाषे तदाह । सत्यमिति । भो असुर वयं वनगोचरा मृगाः सत्यं त्वयैवं यदुक्तमस्ति तत्सत्यमेवेत्यर्थः । किं तु युष्मद्विधान् भवादृशान् ग्रामसिंहान् भषकान्, मृगयेऽन्वेषयामि । पाठान्तरे हेतौ शत्रन्तत्वाद्भवादृक्शुनो मृगयितुं मृगो जातोऽस्मीत्यर्थः । मृत्योः पाशात्तैः प्रतिमुक्तस्य बद्धस्य तव अभद्रममङ्गलं विकत्थनं श्लाघनं धीराः शूराः, न गृह्णन्ति नाभिनन्दन्ति ॥ १० ॥ हिरण्याक्षोक्ति विपर्यये पर्यवसाययन्नाह । एत इति । हे हिरण्याक्ष एते वयं रसौकसां रसातलवर्त्तिनां युष्माकं न्यासहराः न्यस्यन्ति निक्षिपन्ति पादावस्मिन्निति न्यास आधारः स च भूरेव तस्याऽऽहर्त्तारो जाता इत्यर्थः । भवतामाधारभूतभुवो हर्त्तारो वयमिति काकुः । तथा सति न ह्रीयं भूमी रसातलवर्त्तिनां वो न्यास इत्यर्थः फलितः । गतह्रियो गतलज्जाः एते वयं ते त्वया कर्त्रा गदया द्राविताः पलायनं कारिताः इत्यपि काकुः । अस्माभिरेव यूयं सांप्रतं द्राविता भवितार इत्यर्थः । फलितः । अथापि त्वया द्राविताः सन्तोऽपि कथंचित्केनापि प्रकारेण, आजौ संग्रामे तिष्ठामहे स्थातुमिच्छामहे एव । बलिना बलवता भवता सह वैरं विरोधम् उत्पाद्य क्व यामः कुत्र गमिष्यामः । अतः स्थेयं यथा तथापि त्वत्पुरः संस्थानं कर्त्तुं योग्यमेवेत्यर्थः । अत्रापि भवदपेक्षया विलक्षणेन प्रकारेणाजौ स्थातुमिच्छामहेऽतो बलिभिरस्माभिर्वैरमुत्पाद्याद्य क्व यास्यसीति विपर्यये पर्यवसानमभिप्रेतम् ॥ ११ ॥

त्वमिति । पद्रथानां पदातीनां यूथपाधिपः पदातिषु महतामधिनाथ इत्यर्थः । त्वं नोऽस्माकम् अस्वस्तये पराभवविधानाय, आशु शीघ्रमेव घटस्व यतस्व । अनूहोऽशङ्को भवान् अस्मान् संस्थाप्य हत्वा, स्वकानां निजजनानाम् अश्रु नेत्रास्रं प्रमृज निवर्त्तय च । यः पुमान् स्वां स्वकीयां प्रतिज्ञां नातिपिपर्त्ति न पूरयति प्रतिज्ञातार्थसंपादनेन न समापयतीत्यर्थः । सः असभ्यः सभायामनर्हः किल ॥ १२ ॥ स इति । भगवता अधिक्षिप्तस्तिरस्कृतः रुषा भृशं प्रलब्धः प्रहसितश्च, सः असुरः उल्बणमतितीव्रं क्रोधम्, क्रीड्यमानः अहिराट् सर्वश्रेष्ठः इव आजहार स्वीकृतवान् चुक्रोधेत्यर्थः ॥ १३ ॥ सृजन्निति । अमर्षितः क्रुद्धः अत एव श्वासान् निश्वासान्, सृजंस्त्यजन् अत एव मन्युना प्रचलितानीन्द्रियाणि यस्य सः दैत्यः, आसाद्य समीपमागत्य, तरसा बलेन गदया हरिम् अभ्यहनत्ताडितवान् ॥ १४ ॥ भगवानिति । भगवांस्तु रिपुणाऽसुरेण उरसि विसृष्टं गदावेगं गदाया रंहः, तिरश्चीनस्तिर्यग्गमनः सन्, योगारूढः निष्पन्नयोगवान्योगी, अन्तकं मृत्युम् इव अवञ्चयत् परिहृतवानित्यर्थः ॥ १५ ॥ पुनरिति । पुनस्तद्गदावञ्चनविधानानन्तरमित्यर्थः । क्रुद्धः हरिः स्वामात्मीयां गदां कौमोदकीम् आदाय, संरम्भात् क्रोधाद्धेतोः दष्टो दच्छदोऽधरोष्ठो येन सः तथाभूतः सन्, अभीक्ष्णशः पुनः पुनः भ्रामयन्तं भगवद्वञ्चितामेव स्वां गदामादाय तामेव विभ्रामयन्तमसुरं प्रति अभ्यधावत् ॥ १६ ॥ तत इति । ततोऽभिधावनानन्तरं प्रभुः श्रीवराहमूर्त्तिर्हरिः, गदया कौमोदक्याख्यस्वगदया, अरातिं शत्रुम्, दक्षिणस्यां भ्रुवि चैव दक्षिणभ्रूभागे इत्यर्थः । आजघ्ने प्रजहार । हे सौम्य विदुर कोविदः गदायुद्धे कुशलः सः असुरस्तु, तां श्रीहरिप्रेषितगदा-प्राप्तां सतीमेव, गदया निजगदया अहनदाजघ्ने ॥ १७ ॥

एवमिति । एवमनुना प्रकारेण हर्यक्षो हिरण्याक्षः, हरिः श्रीवराहो भगवांश्च, सुसंरब्धावतिक्रुद्धौ सन्तौ जिगीषया परस्परं जेतुमिच्छया गुर्वीभ्याम्, महतीभ्यां गदाभ्याम् एव अन्योऽन्यम् अभिजघ्नतुः ॥ १८ ॥ तयोरिति । स्पृधोः परस्परं स्पर्द्धमानयोः, तिग्मे तीक्ष्णे च ते गदे च ताभ्यामाहतानि ताडितानि अङ्गानि ययोस्तौ तयोः, अत एव क्षतादास्रवतीति क्षतास्रवं रुधिरं तस्य घ्राणेनावघ्राणेन विवृद्धः मन्युः क्रोधो ययोस्तौ तयोः । इलायां भूम्यां निमित्तभूतायां सत्यां पृथिव्यर्थमित्यर्थः । जिगीषया परस्परं विजेतुमिच्छया, विचित्रमार्गान् गदायुद्धक्रमणप्रभेदान्, चरतोः तयोर्हरिहिरण्याक्षयोः मृधः संग्रामः, शुष्मिणोर्मत्तवृषभयोरिव व्यभाद्बभौ ॥ १९ ॥ दैत्यस्येति । हे कौरव्य विदुर, मह्यां भूम्यां निमित्तभूतायाम्, द्विषतोर्युध्यमानयोः दैत्यस्य हिरण्याक्षस्य यज्ञावयवस्य यज्ञमूर्त्तेः मायया स्वसंकल्पेन गृहीता वाराहतनुर्येन तस्य, महात्मनः दैत्येऽप्यनुग्रहप्रवणचेतसो भगवतश्च विमर्द्दनं युद्धं दिदृक्षुर्द्रष्टुमिच्छुः, स्वराट् स्वयं ब्रह्मा, ऋषिभिर्मरीच्यादिभिः वृतः परिवेष्टितः सन् आगादाययौ ॥ २० ॥ आसन्नेति । सहस्रं नयतीति सहस्रणीः देवानामृषीणां वा सहस्रस्य नेतेत्यर्थः । भगवान्ब्रह्मा तत्रागतः सन्निति शेषः । आसन्नं प्राप्तं शौण्डीरं मदो येन स तम् । अपेतं निवृत्तं साध्वसं भयं यस्मात्तम्, कृतः संपादितः प्रतीकारः प्रतिप्रहरणरूपा प्रतिक्रिया येन तम्, अहार्योऽसह्यः विक्रमः पराक्रमो यस्य तम् दैत्यं हिरण्याक्षं विलक्ष्य आलक्ष्य, आदिश्यासौ सूकरस्तम्, प्रथममेव धृतक्रोडाकृतिमित्यर्थः । नारायणं जगाद ॥ २१ ॥ एष इति । हे देव नारायण ते तव अङ्घ्रिमूलं पादमूलम् उपेयुषां शरणं गतानां देवानामिन्द्रादिसुराणाम्, विप्राणां मरीच्यादिमुनीनाम् । सौरभेयीणां कामधेन्वादिधेनूनाम् अनागसां निरपराधिनां भूतानां सर्वजीवानामपि च ॥ २२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आगस्कृदिति । आगस्कृन्निर्निमित्तमपराधारोपकः, भयकृत्तत्परिहारप्रवृत्तिमत्सु भयकारकः, दुष्कृतान् भीतान् ज्ञात्वा तदर्थप्राणादिहर्त्ता, अस्मत्तो राद्धः संप्राप्तः वरो येन सः, स्वयं न विद्यते प्रतिरथो यस्य सः, प्रतिपक्षरहित इत्यर्थः । एषः असुरो हिरण्याक्षः, अन्वेषन् अन्वेषयन्, प्रतिरथं मृगयन् सन्नित्यर्थः । कण्टकः सर्वेषां दुःखदः संश्च, लोकान् प्रति अटति चरति इति द्वयोरेकान्वयः ॥ २३ ॥ मैनमिति । हे देव मायाविनं विचित्रचतुरङ्गबलाद्युत्पादिकाश्चर्यशक्तिसंपन्नम्, दृप्तं गर्वितम्, निरङ्कुशं सृणिवर्जितहस्तिवत्स्थितम्, असत्तमं दुरात्मानम् एनं दैत्यम्, उत्थितं सफूत्कारं फणामुन्नमय्य प्रत्युपस्थितम्, आशीविषं सर्पं यथा तथा, बालवत् मा आक्रीड नैव क्रीडय । बालः यथा पुच्छाकर्षणादिना सर्पं क्रीडयति तद्वदेनं मा क्रीडयेत्यर्थः ॥ २४ ॥ न यावदिति । हे अच्युत हे देव, दारुणोऽत्युग्रः एषः दैत्यः यावत्, स्वां स्वबलकरीं वेलां संध्यासमयरूपां प्राप्य न वर्द्धेत, तावदेव स्वामात्मीयां मायां स्वकीययोगमायाबलमित्यर्थः । आस्थायाश्रित्य अघं पापरूपमेनमसुरं जहि ॥ २५ ॥ कासौ वेलाऽऽयास्यति यां प्राप्यायं वर्द्धेतेत्यत्राह । एषेति । हे प्रभो लोकशंबट्करी लोकानां विनाशविधानरूपप्रतिकूलताकर्त्री, घोरतमा भयंकरा एषा संध्या उपसर्पति । आशु आयास्यतीत्यर्थः । अतः हे सर्वात्मन् सुराणां देवानां जयम् आवह संपादय । असुराणां जयावहेति पाठे संध्याविशेषणम् ॥ २६ ॥ अधुनेति । अधुना इदानीम् एषः अभिजिन्नामाभिजिदाख्यः, मौहूर्त्तिकः योगः माध्याह्निकमुहूर्त्तरूपयोगयुक्तः, काल इत्यर्थः । अगादागतः हि । तस्मात् सुहृदां त्वदीयसुहृदां नोऽस्माकं शिवाय स्वस्तये, दुस्तरं दुर्जयं दैत्यं त्वम् आशु निस्तर जहि ॥ २७ ॥ दिष्टयेति । विहितमेतत्पित्रैव दित्यनुग्रहकाले कथितं मृत्युम्, त्वाम् अयम् असुरः स्वयं दिष्टया दैवेनैव आसादितः । एनमसुरं मृधे युद्धे विक्रम्य पदाक्रम्य पराक्रम्य वा हत्वा, लोकान् शर्मणि सुखे आधेहि सुखिनः कुर्वित्यर्थः ॥ २८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥

——:❀:——

अथैकोनविंशोऽध्यायः

मैत्रेय उवाच

अवधार्य विरिञ्चस्य निर्व्यलीकामृतं वचः । प्रहस्य प्रेमगर्भेण तदपाङ्गेन सोऽग्रहीत् ॥ १ ॥

प्रार्थितेन विरिञ्च्याद्यैरूनविंशे महामृधे । हिरण्याक्षवधः श्लाध्यः क्रोडेन कृत ईर्यते ॥ १ ॥

ब्रह्मणैवमभिहितो भगवांस्तद्वचोऽभिनन्द्यासुराणां बलकारिण्यामपि वेलायां स्वपराक्रमं संदर्शयन्नेव पुनर्युयुधे इत्याह मुनिः । अवधार्येति । विरिञ्चस्य ब्रह्मणः निर्व्यलीकं निर्दोषं च तदमृतममृततुल्यं वचः, अवधार्य श्रुत्वा, प्रहस्य कालात्मनः सर्वसंहर्त्तुर्ममापि शत्रुबलाद्भयं ब्रवीति कास्य मतिरिति हासं कृत्वा इत्यर्थः । स वराहो भगवान् प्रेमगर्भेण स्नेहसहितेन, अपाङ्गेन कटाक्षेण, तत् 'विक्रम्यैनं मृधे हत्वा' इति वचः अग्रहीद्गृहीतवान् ॥ १ ॥ तत इति । ततः वचोग्रहणानन्तरम् अकुतोभयं कुतश्चनापि भयवर्जितम्, अत एव मुखतः स्वाभिमुखप्रदेशे एव, चरन्तं सपत्नम् असुरम्, अक्षजः पूर्वं ब्रह्मणो घ्राणेन्द्रियाविर्भूतः भगवान्, उत्पत्योत्प्लुत्य गदया हनौ कपोलस्याधःप्रदेशे जघान ॥ २ ॥ सेति । सा भगवत्प्रयुक्ता गदा तेनासुरेण गदया हता, अत एव भगवत्करात् विहता विच्युता सती, विघूर्णिता विभ्रमणपूर्वं ध्वनयन्ती भूत्वा, अपतदधः पपात । अथापि रेजे तत् अद्भुतं भगवन्तं निरीक्षमाणानामाश्चर्यमिव अभवत् ॥ ३ ॥ स इति । सोऽसुरः तदा लब्धं तीर्थमवकाशो येन तथाभूतः सन्नपि, निरायुधमायुधरहितं विष्वक्सेनं भगवन्तं प्रकोपयन्, पतितां गदां मां नत्वा गृहाणान्यथार्थसिद्धिर्न भवितेत्यादिवाक्यैः कोपमुद्दीपयन्सन्नित्यर्थः । मृधे युद्धे धर्मं संमानयन्, न बबाधे न प्राहरत । मानयन्स मृधे धर्ममिति पाठे तु, सः लब्धतीर्थोऽपि न बबाधे । सः मानयन बभूवेति वाक्यभेदेनान्वयादपौनरुक्त्यं बोध्यम् ॥ ४ ॥ गदायामिति । गदायाम् अपविद्धायां स्वहस्ताद्विगलितायां सत्याम्, हाहाकारे पश्यतामिति शेषः । च विनिर्गते सति विभुर्भगवान्, तद्धर्मं तस्य दैत्यस्य निरायुधाबाधनरूपं धर्मं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मानयामास बह्वमन्यत। सुनाभं स्वकीयचक्रं च अस्मरत्। स्वहस्तगतमकरोदित्यर्थः॥ ५॥ तमिति। व्यग्रं शत्रुहननाय विभ्रमच्चक्रं यस्य तम्। आदौ स्वपार्षदमुख्येन, पश्चात् दितिपुत्राधमेन, प्रथमतः केनचित्सत्कर्मणा भगवत्पार्षदतां प्राप्यापि, कारणगतेन केनचिद्दोषेण सदपराधं विधायाधमासुरयोनिं प्राप्तेन हिरण्याक्षेण सहेति भावः। विषज्जमानं योद्धुं विशेषेण सङ्गं प्राप्नुवन्तं तं वराहभगवन्तं दृष्ट्वेति शेषः। अतद्विदां चक्रप्रभावमविजानतां खेचराणां वैमानिकानां सुराणामित्यर्थः। अमुमसुरं जहि। ते तुभ्यं स्वस्ति अस्तु इत्येवमादिकाः। चित्रा बहुविधाः वाचः तत्र युद्धप्रदेशे आसन् स्म बभूवुः॥ ६॥

स इति। सः असुरः, पद्मस्य पलाशे पत्त्रे इव लोचने यस्य तं कमलदलसमाननयनमित्यर्थः। तं हरिम् आत्तं गृहीतं रथाङ्गं चक्रं येन तम्, निशाम्य दृष्ट्वा अग्रतः स्वपुरःप्रदेशे व्यवस्थितं च विलोक्य, अमर्षेण क्रोधेन परिप्लुतानि विक्षुभितानि इन्द्रियाणि यस्य सः, रुषा क्रोधेन श्वसन् सन्, स्वदन्तच्छदं स्वाधरोष्ठम् आदशत्समंताद्दष्टवान्॥ ७॥ करालेति। करालदंष्ट्रः भयंकरदाढोऽसुरः, चक्षुर्भ्यां स्वनेत्राभ्यां दहन्निव संचक्षाणः पश्यन् सन्, अभिद्रुत्याभिमुखमागत्य, हरिं भगवन्तं हतः असि इति उच्चरन्निति शेषः। स्वगदया आहनत् प्रजघान॥ ८॥ पदेति। हे साधो विदुर यज्ञशूकरः यज्ञमूर्त्तिरादिशूकर इत्यर्थः। भगवान् वातरंहसं वायुसमानवेगां तां स्वमप्राप्तामेव तद्गदाम्, सव्येन पदा वामपादेन शत्रोः मिषतः सतः लीलया प्राहरत्॥ ९॥ आहेति। आयुधम् आदत्स्व गृहाण, घटस्व यतस्व, त्वं जिगीषसि, इति च आह उक्तवान्। उक्त एवमभिहितः सोऽसुरः तया पदा ताडितया पुनर्गृहीतया गदया, भूयः पुनरपि ताडयन्सन् भगवन्तमिति शेषः। भृशं व्यनदन्नादं चकार॥ १०॥ तामिति। तामसुरप्रयुक्तगदाम् आपततीमागच्छन्तीं वीक्ष्य, समवस्थितः यथावदेवावतिष्ठन् भगवान् स वराहः, प्राप्तां स्वसमीपं गतां सतीम्, गरुत्मान् गरुडः पन्नगीं सर्पिणीम् इव लीलया जग्राह॥ ११॥ स्वेति। एवं स्वपौरुषे स्वकीयवीर्ये प्रतिहते विहते सति, हतो विगतो मानो गर्वो यस्य सः, विगता प्रभा यस्य सः विनष्टतेजाः महासुरः, हरिणा दीयमानाम् अपि गदां न ऐच्छत्। ग्रहीतुमिति शेषः॥ १२॥ जग्राहेति। किं तु तिस्रः शिखा अग्रभागा यस्य तत्, ज्वलन् दीप्यन्यो ज्वलनोऽग्निस्तद्वल्लोलुपं स्वकार्यकरणव्यग्रमित्यर्थः। शूलं त्रिशिखशूलयोरेकार्थत्वेऽप्येकत्र योगोऽन्यत्र रूढतास्वीकारे दोषाभावः। धृतं रूपं वराहाकृतिर्येन तस्मै, यज्ञाय यज्ञमूर्त्तये विप्राय ब्रह्मविद्विप्रमुद्दिश्य अभिचरन्मारणयागं कुर्वन् कृत्यामिति शेषः। यथा तथा जग्राह प्राहिणोत॥ १३॥

तदिति। दैत्येषु मध्ये महाभटो महाशूरस्तेनार्पितं प्रयुक्तम्, उदीर्णा उद्गता दीधितयो यस्य तत्, अन्तःखे खस्यान्तः आकाशमध्ये इत्यर्थः। ओजसा दीप्त्या, चकासत्प्रकाशमानं तत्त्रिशूलं निशातनेमिना शितधारेण चक्रेण, हरिरिन्द्रः। उज्झितं तार्क्ष्यपत्त्रम्, यथा गरुडेन त्यक्तं पिच्छमिवेत्यर्थः। विच्छेद। पुरा खलु देवान्विनिर्जित्यामृतकलशं मातृदास्य-विमोचनायानयता गरुडेनेन्द्रप्रयुक्तवज्रस्यामोघस्य मानं दातुं त्यक्तमेकं पिच्छं यथेन्द्रश्चिच्छेदेति भारतीया कथात्रा-नुसंधेया॥ १४॥ वृक्ण इति। अरिणा स्वशत्रुभूतवराहभगवता चक्रेण वा, स्वशूले बहुधा वृक्णे छिन्ने सति, प्रवृद्धो रोषो यस्य सः, सः असुरो हिरण्याक्षः नदन्नादं कुर्वन्सन्, प्रत्येत्य अभिमुखमागत्य कठोरमुष्टिना कठिनतरया स्वमुष्ट्या, विभूतिमत् लक्ष्म्या आश्रयभूतम्, विस्तीर्णं विशालम्, हरेर्वराहभगवतः उरो वक्षः प्रहृत्य, प्रताड्य अन्तरधीयतान्त-र्हितवान्॥ १५॥ तेनेति। हे क्षत्तः विदुर तेनासुरेण इत्थमुक्तप्रकारेण, आहतो मुष्टिना ताडितः भगवान् आदिशूकर आदिवराहः मनागीषदपि, क्वापि शारीरे कस्मिंश्चित्प्रदेशेऽपि, स्रजा पुष्पदाम्ना आहतस्ताडितः द्विपः गजः इव न अकम्पत न चलितवान्॥ १६॥ अथेति। अथान्तर्द्धानानन्तरं योगमायेश्वरे स्वसंबन्ध्याश्चर्यशक्तीनां नेतरि, हरौ भगवति उरुधा बहुप्रकारां मायाम् असृजत् सृष्टवान्। कथंभूताम्? यां मायां विलोक्य, त्रस्ता भीता प्रजाः अस्य विश्वस्य उपसंयमं प्रलयं मेनिरे अमन्यन्त तथाभूताम्॥ १७॥ मायाः प्रपञ्चयति। प्रववुरित्यादिभिश्चतुर्भिः। चण्डास्तीव्रवेगाः वायवः, पांसवं पांसुकृतं तमः ऐरयन् प्रसृतवन्तः सन्तः इत्यर्थः। प्रववुः। ग्रावाणोऽश्मशकलाः दिग्भ्यः क्षेपणैः क्षेपण्याख्ययन्त्रविशेषैः प्रहिताः प्रयुक्ताः इव निपेतुः॥ १८॥ द्यौरिति। पूयं दुर्गन्धिपक्वरुधिरं च, केशा लोमानि च, असृगपक्वरुधिरं च, विट् विष्ठा च, मूत्रं च, अस्थीनि च, तानि असकृत्पुनः पुनः वर्षद्भिः विद्युद्भिः सहितं यथा तथा स्तनयित्नवो ध्वनयन्तस्तैः, अभ्रौघैर्मेघैः, द्यौः नष्टो भगणो नक्षत्रगणो यस्यास्तथाभूता च अभूदिति शेषः। नष्टभगणेत्यनेन चतुर्मुखोक्त-संध्यावेलातिक्रमः सूचितः। अह्नि नक्षत्राणामसंभवादिति भावः॥ १९॥

गिरय इति। हे अनघ विदुर गिरयः पर्वताः, नानायुधमुचो नानाविधान्यायुधानि मुञ्चन्तः प्रत्यदृश्यन्त दृष्टा बभूवुः। दिग्वाससो दिगम्बराः यातुधान्यो यक्षजातीयाङ्गनाः, शूलिन्यस्त्रिशूलधारिण्यः, मुक्ताः प्रसृताः मूर्द्धजाः केशा यासां तथाभूताः सत्यः, प्रत्यदृश्यन्त॥ २०॥ बहुभिरिति। आततायिभिर्हिंसाशीलैः, पत्तयश्च, अश्वाश्च, रथाश्च, कुञ्जराश्च तैः तद्वद्भिरित्यर्थः। बहुभिः यक्षरक्षोभिः उत्सृष्टाः प्रयुक्ताः, अतिवैशसा अतिक्रूराः, हिंस्राश्छिन्धि भिन्धि,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्येवंरूपाः वाचः प्रत्यश्रृण्वन्त अश्वादिशब्दैरश्वाद्यारूढा उच्यन्ते ॥ २१ ॥ प्रादुष्कृतानामिति। प्रादुष्कृतानामसुरेण प्रादुर्भावं कारितानाम्, आसुरीणामसुरसंबन्धिनीनाम्, मायानां विनाशनं विनाशकरं दयितं स्वस्यातिप्रियं सुदर्शनाख्यम्, त्रिपात् सवनात्मकपादत्रययुक्तः, भगवान् प्रायुङ्क्त प्रयुक्तवान् ॥ २२ ॥ तदेति। तदा तस्मिन्काले भर्त्तुः कश्यपस्य, आदेशं 'तदा विश्वेश्वरः क्रुद्धो भगवान् लोकभावनः। हनिष्यत्यवतीर्यासौ, इत्येवंरूपम्, निदेशं स्मरन्त्याः दितेः हृदि सहसाऽकस्मादेव वेपथुः कम्पः, समभवत् समुत्पन्नः। स्तनात्पयोधरात् असृग्रुधिरं च प्रसुस्रुवे ॥ २३ ॥ विनष्टास्विति। स्वमायासु विनष्टासु सतीषु, असुरो हिरण्याक्षः, भूयश्च पुनरपि आव्रज्य अभिमुखमागत्य, रुषा क्रोधेन केशवं वराहभगवन्तम्, उपगूहमानः बाह्वोरन्तरे निधाय संघट्टयन्सन्नपि, अमुं केशवं बहिर्बाहुमध्यतो बहिः प्रदेशे अवस्थितं ददृशे ददर्श ॥ २४ ॥ तमिति। अधः कृतमक्षजमैन्द्रियकं ज्ञानं येन स तथाभूतो हरिः वज्रसारैर्वज्रवद्देवाभेद्यैः, मुष्टिभिः विनिघ्नन्तं ताडयन्तं तमसुरम्, मरुत्पतिरिन्द्रः, त्वाष्ट्रं त्वष्टुः पुत्रं विश्वरूपं वृत्रं वा यथा तथा, करेण चपेटीकृतपाणिना कर्णमूले अहन् जघान ॥ २५ ॥ स इति। विश्वसृजा भगवता अवज्ञया अगणनासूचकापमानेनेत्यर्थः। आहतस्ताडितः, सोऽसुरः परिभ्रमद्गात्रं यस्य सः, उदस्ते बहिर्निर्गते लोचने यस्य सः, बाहू च, अङ्घ्री च शिरोरुहाः केशाश्च विशीर्णा विक्षिप्ता बाह्वङ्घ्रिशिरोरुहा यस्य सः, एवंभूतः सन्, नभस्वता वायुना लुलित उत्पाटितः नगेन्द्रः महाद्रुमः यथा तथा अपतत् हि ॥ २६ ॥

क्षिताविति। क्षितौ भूम्यां शयानम्, तथापि अकुण्ठवर्चसमप्रतिहततेजस्कम्, करालदंष्ट्रं भयंकरदाढम्, परिदष्टदच्छदं परितो दष्टाधरम्, तमसुरम् आगता युद्धनिरीक्षणार्थमायाताः, अजादयो ब्रह्मादयः वीक्ष्य दृष्ट्वा, अहो आश्चर्यं इमामीदृशीं संस्थितिं भगवद्धस्ततो मरणप्राप्तिरूपां कोऽनुलभेत न कोऽपीत्यर्थः। इति शशंसुः ॥ २७ ॥ एतदेव। प्रपञ्चयति द्वाभ्याम्। यमिति। योगिनः, असतोऽचेतनपरिणामात् लिङ्गाद्देहात्, मुमुक्षया मोक्तुमिच्छया संसारनिवृत्तये इत्यर्थः। योगसमाधिना समाधियोगेन, रहः एकान्ते यं भगवन्तं ध्यायन्ति भजन्ति, तस्य भगवत एव पदा पादेन, हतः एषः दैत्यर्षभः दैत्यश्रेष्ठः, मुखं भगवतो वदनकमलम्, प्रपश्यन् तनुम् उत्ससर्ज तत्याज। हेत्याश्चर्ये। वराहपूर्वपदयोः करत्वात् 'करेण कर्णमूलेऽहन्' इत्यविरुद्धम् ॥ २८ ॥ एताविति। ऐतौ हिरण्याक्षहिरण्यकशिपू, अस्य भगवतः पार्षदौ भवतः। तौ शापाद्ब्राह्मणशापतः, असद्गतिमसुरयोनिं यातौ प्राप्तौ, पुनश्च कतिपयैः जन्मभिः स्थानं वैकुण्ठाख्यं भगवत्पदम्, प्रपत्स्येते गमिष्यतः ह स्फुटम् ॥ २९ ॥ एवं तत्संस्थितिं प्रशस्य भगवन्तं प्रणमन्त आहुर्देवाः। नम इति। अखिलयज्ञतन्तवे समस्तयज्ञोत्पत्तिहेतवे, तत्प्रवर्त्तकायेत्यर्थः। स्थितौ जगद्रक्षणे निमित्ते, गृहीता स्वेच्छोपात्ता अमला रजस्तमोभ्यामननुविद्धा, सत्त्वमूर्त्तिः सत्त्वप्रधानाकृतिर्येन तस्मै, ते तुभ्यं नमो नमः। आदराद्द्विरुक्तिः। जगतां लोकानाम् अरुन्तुदो मर्मच्छेत्ता, अयमसुरः हतः। दिष्ट्या मङ्गलं जातम्। हे ईश त्वत्पादभक्त्या त्वदीययोश्चरणकमलयोरुपासनया, वयं निर्वृताः सुखिताः, त्वत्पदाब्जभक्तिरेव सर्वाभिलषितश्रेयःसंसाधनी ह्यस्यत एव वयं निरस्तशत्रवः सन्तः, सुखिनो जाता इति भावः ॥ ३० ॥ इत्थं क्षत्त्रा 'तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्त्तिना' इत्यादिना पृष्टं हिरण्याक्षवधवृत्तान्तं सविस्तरमभिधाय, तन्निगमयति मैत्रेयः श्लोकद्वयेन। एवमिति। असह्यविक्रमं दुर्द्धर्षपराक्रमम्, हिरण्याक्षम् एवमुक्तप्रकारेण सादयित्वा निहत्य, आदिशूकरः सः हरिः, पुष्करं विष्टरं यस्य स आदिर्येषां तैः कमलासनप्रभृतिभिः, समीडितः संस्तुतः सन्, अखण्डितोऽनन्तः उत्सवो यस्मिंस्तम्, स्वं स्वकीयं लोकं वैकुण्ठं जगाम ॥ ३१ ॥

मयेति। हे सुमित्रि विदुर, उदारविक्रमः उरुपराक्रमः हिरण्याक्षः, महामृधे महति संग्रामे, क्रीडनवत् क्रीडनमिव भगवतेति शेषः। यथा निराकृतः तथा कृतो धृतोऽवतारो वराहरूपेण प्रादुर्भावो येन तस्य, हरेः चेष्टितं मया ते तुभ्यं यथानूक्तं गुरूक्तिमनतिक्रम्य, अवादि कथितम् ॥ ३२ ॥ वराहचरित्रप्रश्नोत्तररूपं विदुरमैत्रेयसंवादमुपसंहरति भगवान् शुको यावदध्यायम्। इतीति। हे नृप परीक्षित्, इत्युक्तप्रकारेण कौषारवाख्यातां मैत्रेयकथिताम्, भगवत्कथाम् आश्रुत्याकर्ण्य, महाभागवतः क्षत्ता विदुरः, परमुत्कृष्टम् आनन्दं लेभे ॥ ३३ ॥ एतदेव कैमुत्यन्यायेनाह। अन्येषामिति। पुण्यश्लोकानां पवित्रकीर्त्तिनाम् उद्दामयशसामुत्कृष्टकीर्त्तिमताम्, अन्येषां भगवदितरेषां सतां भागवतानामपि कथाम्, उपश्रुत्याकर्ण्य मोद आनन्दः भवेत्, तदा श्रीवत्साङ्कस्य श्रीवत्सलक्ष्मवतो भगवतः किं पुनः, भगवतः कथामुपश्रुत्य मोदो भवेदिति तु किं पुनर्वक्तव्यमित्यर्थः ॥ ३४ ॥ भगवतः कथां कृतघ्नं विना को न सेवेतेत्याह द्वाभ्याम्। य इति। झषेण मकरेण ग्रस्तः पादे गृहीतस्तम्, चरणाम्बुजं स्वपादपद्मं ध्यायन्तम्, गजेन्द्रं करेणूनां हस्तिनीनाम्, क्रोशन्तीनां रुदन्तीनां सतीनाम्, यो भगवान् कृच्छ्रतः झषग्रसनसंकटात् द्रुतम् अमोचयत्। अनेन भक्तिमात्रेण यः पशूनामपि सुलभोऽन्यथा तु देवानामपि दुर्लभस्तस्य कथाश्रवणेन केषामानन्दो न भवेदिति ज्ञापितमिति भावः ॥ ३५ ॥ तमिति। अनन्यशरणैः रक्षकान्तररहितैः, नृभिर्नरैः ऋजुभिः उपायैरिति शेषः। सुखाराध्यं सुखेनाराधयितुं शक्यम्, असाधुभिः दुराराध्यं पुरुदुःखेनात्याराधयितुमशक्यम्,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तं भगवन्तं कृतज्ञो भगवत्कृतानुगृहाभिज्ञः, कः न सेवेत कृतघ्नानन्तरेण सर्वेऽपि तमेव सेवेरन्नित्यर्थः ॥ ३६ ॥ एवं भगवतः कथा तु सर्वैरपि नृभिरुपादेयेत्युक्त्वा, प्रकृतं हिरण्याक्षवधवृत्तान्तश्रवणकीर्त्तनानुमोदनस्यावान्तरफलम्, प्रधानं फलं चाह द्वाभ्याम्। य इति। महाद्भुतं भृशं विस्मयनीयम्, कारणसूकरात्मनः जगद्रक्षणार्थं धृतशूकरशरीरस्य, भगवतः विक्रीडितं क्रीडारूपम्, हिरण्याक्षवधं यः द्विजः शृणोत्यन्येन कथितमाकर्णयति, गायति चतुरवक्त्रभावे अपि केवलं स्वयमेव कथयति, अनुमोदतेऽभिनन्दति वा। सः अञ्जसाशु ब्रह्मवधात् विमुच्यते वै। 'ब्रह्महत्याश्वमेधाभ्यां नापरं पुण्यपापयोः' इति निरतिशयपापत्वेन कीर्त्तिताद्ब्राह्मणवधादपि विमुच्यत एवेत्यर्थः ॥ ३७ ॥

एतदिति। एतद्धिरण्याक्षवधवृत्तान्तरूपं भगवच्चरित्रम्, महापुण्यसंपादकम्, अत एव अलमत्यन्तं पवित्रं पवित्रतापाददम्, धन्यं धनसंपादकम्, कृतार्थतापादकं वा। यशस्यं यशःसंपादकम्, आयुश्च आशिषश्च तासां पदम् आयुःसंपादकम्, प्रार्थितपुरुषार्थानां संपादकं चेत्यर्थः। युधि युद्धे शौर्यवर्द्धनं प्राणेन्द्रियाणां बलवृद्धिकारकमिति शेषः। एतत्त्ववान्तरफलमुक्तम्। प्रधानफलमाह। अङ्ग हे राजन्, शृण्वतां नृणाम् अन्ते देहान्ते, नारायणः गतिः फलम्, अन्ते नारायणप्राप्तिरेव फलमित्यर्थः ॥ ३८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः

शौनक उवाच

महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः। कान्यन्वतिष्ठद् द्वाराणि मार्गायावरजन्मनाम् ॥ १ ॥

विंशेऽनुस्मार्यते सर्गो वक्तुं प्रस्तुतमन्वयम्। मनोर्वराहजन्मादिव्यवधानात्तिरोहितम् ॥ १ ॥

उक्तावशिष्टान् प्रजासृष्टिभेदान्, प्रकृतं मनुचरित्रं च पृच्छति शौनको नवभिः श्लोकैः। महीमिति। हे सौते सूतस्य रोमहर्षणस्य पुत्र, महीं भूमिं प्रतिष्ठां स्वस्थानभूताम् अध्यस्य प्राप्य, स्वायंभुवः मनुः, अवरमर्वाचीनं जन्म येषां तेषाम्, मार्गाय निर्गमाय कानि द्वाराणि अन्वतिष्ठत् कृतवान्, अर्वाचीनान्प्राणिनः कैरुपायैः सृष्टवानित्यर्थः ॥ १ ॥ विदुरमैत्रेयसंवादेनैवैतत् ज्ञास्यत इति तमेव संवादं प्रष्टुमाह पञ्चभिः। तत्र वैदुरिकप्रश्नपिपृच्छया प्रथमं विदुरं प्रशंसति। क्षत्तेति द्वाभ्याम्। क्षत्ता विदुरः, महाभागवतः निरतिशयभगवद्भक्तियुक्तः, अत एव कृष्णस्य भगवतः, एकान्तिकः असाधारणः, सुहृन्निरतिशयप्रीतिविषयः अस्ति। सुहृत्त्वमेव स्पष्टयति। यः क्षत्ता सापत्यं दुर्योधनाद्यपत्यसहितम्, अग्रजं धृष्टराष्ट्रम्, कृष्णे भगवति अघवान्कृतापराधः इति तत्याज। श्रीकृष्णोक्तमन्वानादरात् धर्ममर्यादानुवर्त्तिषु भगवत्प्रियेषु पाण्डुतनयेषु द्रोहाचरणाच्च कृष्णेऽघवानिति हेतोः परितत्याजेति भावः ॥ २ ॥ द्वैपायनादिति। किं च महित्वे महिम्नि पाठान्तरे माहात्म्य इत्यर्थः। द्वैपायनाद्व्यासात् अनवरोऽन्यूनः। तस्य व्यासस्यैव देहजः विदुरः, कृष्णं भगवन्तं सर्वात्मना सर्वप्रकारेण, आश्रितः तत्परान् भगवत्परांश्च अपि अनुव्रतोऽनुवर्त्तमानः सेवमान इति यावत् ॥ ३ ॥

एवं विदुरं प्रस्तुत्य तत्पृष्टमनुपृच्छति। किमिति। तीर्थसेवया गङ्गादिपुण्यतीर्थानां स्नानादिना निषेवणेन, विरजाः विधूतबाह्याभ्यन्तरमलः, विदुरः कुशावर्त्ते आसीनं हरिद्वारकुशावर्त्तबिल्वकनीलपर्वतकनखलाख्यानि पञ्च तीर्थानि गङ्गाद्वारे सन्ति, तत्र कुशावर्त्ते निषण्णम्, तत्त्वविदग्रेसरं मैत्रेयम् उपगम्य, किम् अन्वपृच्छत अन्यत्किमनुपृष्टवानित्यर्थः ॥ ४ ॥ तयोरिति। हे सूत तयोर्विदुरमैत्रेययोः संवदतोः संवादं कुर्वतोः सतोः, अमलाः शृण्वज्जनपाविन्यः, हरेर्भगवतः कथाः पादाम्बुजप्रसूताः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत एव अघघ्न्यः उपस्पृशतामघनिवर्त्तकाः, गङ्गाः, गङ्गासंबन्धिन्यः आपो जलानीव, प्रवृत्ताः भवेयुः हि ॥ ५ ॥ ता इति। कीर्त्तन्यानि कीर्त्तनीयानि उदाराणि जगद्व्यापारादीनि महान्ति कर्माणि चेष्टितानि यस्य तस्य, भगवतः ताः पूर्वोक्तमहिम्नः कथाः नोऽस्मभ्यं कीर्त्तय कथय। ते तुभ्यं भद्रं मङ्गलम् अस्तु। पुनः भगवत्कथामेव किं पृच्छसीत्यत्राह। रसज्ञः भगवत्कथा-रसज्ञः, हरेर्लीलैवामृतं तत् पिबन्-कः तु तृप्येत, न कोऽपीत्यर्थः। अतोऽतृप्यन्पृच्छामीत्यभिप्रायः ॥ ६ ॥ एवमिति। नैमिषं नैमिषक्षेत्रमयनं स्थानं येषां तैः नैमिषक्षेत्रवासिभिः, ऋषिभिः शौनकादिभिः, एवमुक्तप्रकारेण पृष्टः कृतानुयोगः, उग्रश्रवाः सूतः भगवत्यर्पितं निहितमध्यात्ममन्तःकरणं येन स, तथाभूतः सन्, तान्नैमिषायनान् प्रति श्रूयताम् इति आह ॥ ७ ॥ हरेरिति। स्वमायया स्वसंकल्पेन धृतक्रोडतनोर्विधृतवराहरूपस्य, हरेः लीलां लीलारूपम्, रसातलात् गोः पृथिव्याः उद्धरणम्, अवज्ञयाऽपमानेन चपेटप्रदानरूपेण हतं हिरण्याक्षं च निशम्य श्रुत्वा, संजातहर्षः भारतः विदुरः मुनिं मैत्रेयम् आह ॥ ८ ॥ प्रजापतीति। प्रजापतिपतिः मरीच्यादीनां पतिर्ब्रह्मा, प्रजासर्गे निमित्ते प्रजापतीं सृष्ट्वा किम् आरभत किमकुर्वतेत्यर्थः। तत् हे ब्रह्मन्, मे मह्यं प्रब्रूहि। यतः त्वम्, न व्यज्यते इत्यव्यक्तमतीन्द्रियं तस्य मार्गं स्वरूपं वेत्तीति अव्यक्तमार्गवित् असि। अतस्त्वं प्रवक्तुं समर्थोऽसीत्यर्थः ॥ ९ ॥

य इति। मरीच्यादयः ये विप्राः, यः स्वायंभुवः मनुश्च तुरत्र चार्थे। ते एते ब्रह्मणश्चतुर्मुखस्य आदेशान्निदेशनः, वै एव एतद्विश्वं कथम् अभावयन्नसृजन् ॥ १० ॥ कथमिति स्वाभीष्टमेव मुनिमुखेन निश्चिचीषितुं विकल्पयति। सद्वितीया इति। हे मुने एते सद्वितीया भार्यासहिताः सन्तः, एतत् असृजन् किम्। उताथवा स्वतन्त्राः भार्यानपेक्षाः असृजन्। अथवा कर्मसु प्रजासर्गक्रियासु, सर्वे संहताः सन्तः असृजन्। अहोस्विदथवा इदं जगत्, पृथक् पृथगिति शेषः। समकल्पयन् स्म। तद्ब्रूहीति च शेषः ॥ ११ ॥ एवं विदुरेणापृष्टो मैत्रेयः सर्गभेदप्रतिपिपादयिषया, पूर्वोक्तां महदाद्यविद्यापञ्चपर्वान्तां सृष्टिमनुवदति सप्तभिः। दैवेनेति। दुर्वितर्क्येणाचिन्त्यप्रभावेण, दैवेनेश्वरेण कर्त्रा, परेण प्रकृतिपुरुषतो विलक्षणेन, परमात्मस्वरूपेणेत्यर्थः। अनिमिषेण कालेन हेतुना, जातः कृतः क्षोभः कार्योन्मुखत्वरूपव्यापारो यस्य तस्मात्, भगवतः भगवत्संबन्धिनः भगवच्छरीरभूतादित्यर्थः। गुणत्रयात्सत्त्वादिगुणत्रयात्मकप्रधानात्, महान्महत्तत्त्वम् आसीत् चैव। अत्र भगवतो गुणत्रयादित्यनेन ब्रह्मात्मकप्रधानस्योपा-दानत्वकथनेन ब्रह्मणः सृष्ट्यादिव्यापारे उपकरणान्तरनैरपेक्ष्यम्, अनिमिषेण गुणत्रयादिति द्विकेन कालप्रधानयोः सृष्टेः प्रागपि सद्भावावगमेन, तदा विजातीयवस्तुसत्त्वं दुर्वितर्क्येणेत्यनेन निमित्ततोपयुक्ताचिन्त्यसर्वज्ञत्वसर्वशक्तित्वसत्यकामत्वादिप्रभावत्वा वगमेन स्वगतभेदसत्त्वम्, तयोरुपलक्षणत्वेन सजातीयजीवभेदसत्त्वं चोक्तं भवति ॥ १२ ॥ रज इति। दैवचोदिताद्भगवता प्रेरितात्, रजःप्रधानात्प्रधानीभूतरजोगुणात्, महतः सकाशात्, महत्तत्त्वस्य स्वतः सत्त्वप्रधानत्वेऽपि, कार्योन्मुखदशायां तमःसत्त्वयोरुभयोरपि रजसोऽनुग्राहकत्वेन रजःप्रधानादित्युक्तम्। जात उत्पन्नः, त्रिलिङ्गः पञ्चतन्मात्रामहाभूतज्ञानकर्मेन्द्रिय-देवतात्मकः, भूतादिरहंकारः वियदादीनि आकाशादीनि, आदिशब्देन तन्मात्रकानि ज्ञानकर्मेन्द्रियाणि चोक्तानि। पञ्चशः प्रत्येकं पञ्च पञ्चसंख्यानि ससर्ज ॥ १३ ॥ तानीति। तानि च वियदादीन्यपि, एकैकशः प्रत्येकम्, भौतिकम् अण्डं स्रष्टुम् असमर्थानि अभूवन्। अथ ततः दैवयोगेन संहत्य समेत्य, हैमं प्रकाशबहुलम् अण्डम् असृजन्। ब्रह्माण्डमुत्पादयामा-सुरित्यर्थः ॥ १४ ॥ स इति। निरात्मकोऽधिष्ठातृचेतनरहितः, सः अण्डकोशः सलिले इत्यधिसलिलं जलमध्ये इत्यर्थः। अनेनाण्डसृष्टेः प्रागुदकसृष्टिरर्थसिद्धा। अशयिष्टाध्यवसत्। तमण्डकोशम् ईश्वरो वैराजः, साग्रं संपूर्णं वर्षसाहस्रं संवत्सरसहस्रम्, अन्ववात्सीत् वै। बाह्योदकसंवेष्टितेऽन्तर्जलपूर्णेऽण्डे वैराजो भगवानध्यशेतेत्यर्थः ॥ १५ ॥

यस्येति। यस्याण्डे शयानस्य, भगवतः नाभेः सकाशात् सहस्राणि च तेऽर्काश्च तेषामिवोरवो बहवो दीधितयो यस्य तत्, सहस्रसंख्याकादित्यवदुरुप्रकाशमित्यर्थः। सर्वेषां जीवानां निकायः समूहस्तस्यौको निवासस्थानम्, यत्र स्वराट् ब्रह्मा स्वयम् अभूत्। एवंविधं पद्मम् अभूत् ॥ १६ ॥ स इति। सलिलाशये गर्भोदकस्यान्तः यः शेते। भगवता तेनेश्वरेण, अनुविष्टः संकल्प-रूपज्ञानेनानुप्रविष्टः, स ब्रह्मा यथापूर्वं पूर्वकल्पानुसारेण, लोकसंस्थां लोकानां विन्यासम्, स्वया असाधारणया संस्थया देवप्रभृतिनामरूपादिमकया, देवादिनामरूपादिक्रमेणेत्यर्थः। निर्ममे अकल्पयत् ॥ १७ ॥ ससर्जेति। छायया प्रभाप्रतियोगिन्या बुद्ध्येत्यर्थः। 'यस्त्वबुद्धिकृतः प्रभोः' इत्युक्तत्वात्। यद्वा तमोगुणेनेत्यर्थः। वस्तुतस्तु रात्र्यपरपर्यायया तन्वेति छायापदार्थः। तामिस्रम्, अन्धतामिस्रम्, तमः, मोहः, महातमः इत्येवं पञ्चपर्वाणम् अविद्याम् अग्रतः प्रथमतः ससर्ज। तामिस्रादिरूपं तु पूर्वमेव प्रपञ्चितमस्ति ॥ १८ ॥ एवं साधारणां सृष्टिमनूद्यासाधारणान् सृष्टिभेदानाह। विससर्जेत्यादिना यावदध्यायसमाप्ति। नाभिनन्दंस्तदभिनन्दनमनाचरन्, तमोमयं तमःप्रचुरम्, आत्मनः कायं छायारूपं तनुमित्यर्थः। विससर्ज अत्याक्षीत्। अत्र सर्वत्र तनुत्यागो नाम तत्तद्भावत्यागो विवक्षितः। ग्रहणं च तत्तद्भावापत्तिर्बोध्या। क्षुत्तृषोः क्षुत्पिपासयोः समुद्भवो यस्यां सा, तां रात्रिं रात्र्यात्मकधर्मरूपेण परिणम्यमाणां तां ब्रह्मतनुम्, यक्षाश्च रक्षांसि च तानि जगृहुः ॥ १९ ॥ क्षुदिति। ते यक्षादयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षुत्तृड्भ्याम् उपसृष्टाः पीडिताः सन्तः, तं ब्रह्मणा धृतं द्वितीयं कायम्, जग्धुमत्तुम् अभिदुद्रुवुरभ्यधावन। तेषां मध्ये एके वयं क्षुत्तृड्भ्याम् अर्दिताः, अत एनं पितेति कृपया मा रक्षत इत्यूचुः। अपरे पितरमप्येनं जक्षध्वं भक्षयत इत्यूचुः॥ २०॥ देव इति। देवो ब्रह्मा, संविग्नो भीतः सन्, तान् यक्षादीन्प्रति, हे पुत्राः मां मत्कायं मा जक्षत न भक्षयतेत्यर्थः। किं तु रक्षत इत्याह। अहो हे यक्षरक्षांसि, यूयं मे मम प्रजाः पुत्राः बभूविथ जाता भवथ। तत्र ये जक्षध्वमित्यूचुस्ते यक्षाः, ये तु मा रक्षतेत्यूचुस्ते राक्षसा इति विज्ञेयम्। एतच्च तिर्यगादितामससर्गस्याप्युपलक्षणम्॥ २१॥

देवता इति। प्रभया छायाप्रतियोगिन्या कान्त्या, दीव्यन्प्रकाशमानः ब्रह्मा, याः याः देवताः प्रमुखतः प्राधान्येन असृजत्। ते देवाः देवताः इत्यर्थः। देवता इति स्त्रीत्वेन निर्दिष्टानामप्यर्थमात्रविवक्षया ते इति पुंस्त्वेन निर्देशः। देवयन्तो द्योतमानाः सन्तः, विसृष्टां देवताः सृष्ट्वा परित्यक्तमित्यर्थः। अहः दिवसात्मकधर्मरूपामित्यर्थः। प्रभां प्रभात्मिकां तां तनुम् अहार्षुः हृतवन्तः॥ २२॥ देव इति। देवो ब्रह्मा, जघनतः नाभ्यधोवर्त्तिजघनप्रदेशात्, अतिलोलुपानतीव कामासक्तान्, अदेवानसुरान् सृजति स्म। तेऽदेवाः लोलुपतया अतिलोलुपतावता भावेन, अतिकामासक्ततयेत्यर्थः। मैथुनाय मैथुनं विधातुम्, एनं ब्रह्माणम् अभिपेदिरे अभितः प्राप्ताः॥२३॥ तत इति। ततः भगवान् स ब्रह्मा हसन् सन्, निरपत्रपैर्निर्लज्जैः असुरैः अन्वीयमानोऽभिपद्यमानः, अत एव क्रुद्धः भीतः संश्च, तरसा आशु परापतत्पर्यधावत्॥ २४॥ स इति। स ब्रह्मा भक्तानाम् अनुग्रहाय अनुरूपं तत्तद्भक्तबुद्ध्यनुरूपमात्मानं दर्शयतीति अनुरूपात्मदर्शनस्तम्, प्रपन्नानां शरणं गतानामार्त्तिं हरतीति तम्। स्वशरणागतदुःखनिवर्त्तकमित्यर्थः। वरदमभीष्टार्थप्रदं हरिं भगवन्तम् उपव्रज्य समीपमेत्य, आहेति शेषः॥ २५॥ एतदेवाह द्वाभ्याम्। पाहीति। हे परमात्मन् मां पाहि पालय, हे प्रभो ते तव प्रेक्षणेन संकल्पेन, अहं प्रजाः असृजम्, तास्त्वत्संकल्पेन मया सृष्टाः, पापाः असुररूपाः, इमाः प्रजा यभितुं मैथुनं कर्त्तुम्, माम् उपाक्रामन्ति परितो वेष्टयन्ते॥ २६॥ त्वमिति। हे प्रभो एकः त्वमेव क्लिष्टानां दुःखितानां लोकानाम्, क्लेशनाशनः बाधानिवर्त्तकः, असि किल। तव अनासन्नावनाश्रितौ पादौ यैस्तेषाम्, तेषां तव पादमनाश्रितानां लोकानामित्यर्थः। एकः त्वमेव क्लेशदः क्लेशसंपादकः, भवसि॥ २७॥ स इति। विविक्तमसंदिग्धमध्यात्मदर्शनं परचित्तज्ञानं यस्य सः, सः हरिः अस्य ब्रह्मणः, कार्पण्यं क्लेशम् अवधार्य ज्ञात्वा घोरामतिकालुष्यरूपाम् आत्मतनुं घोरतोपेतमात्मभावम्, विमुञ्च इत्येवं उक्तः भगवताभिहितो ब्रह्मा, विमुमोच तां तनुं विससर्जेत्यर्थः। हेति स्फुटम्॥ २८॥

सा ब्रह्मविसृष्टा तनुः, सायंतनी संध्या बभूव। सा च कामोद्रेकवेलाऽस्ति, असुराश्च राजसत्त्वात् स्त्रीलम्पटाः सन्त्यतस्ते तां संध्यामेव स्त्रियं कल्पयित्वा संमुमुहुरित्याह त्रिभिः। तामिति। तां कामाकुलैः स्त्रीत्वेन कल्पनीयां संध्यारूपेण जातां ब्रह्मतनुम्, क्वणच्चरणाम्भोजां नूपुराभ्यां विध्वनच्चरणकमलाम्, मदेन विह्वले लोचने यस्यास्ताम्, काञ्चीकलापेन मेखलारत्नभूषणेन विलसद्दुकूलं क्षौमं वासस्तेन छन्नं पिहितं रोधो नितम्बप्रदेशो यस्यास्ताम्॥ २९॥ अन्योन्येति। अन्योन्याश्लेषणेन परस्परोपमर्देन, उत्तुङ्गावुन्नतौ, निरन्तरावन्तरा मृणालसूत्रप्रवेशानवकाशतः श्लिष्टौ पयोधरौ यस्यास्ताम्, सुनासां तिलपुष्पतुल्यनासिकाम्, सुद्विजां कुन्दकुड्मलसदृशदन्तपङ्क्तिम्, स्निग्धो हासो यस्मिंस्तल्लीलावलोकनं यस्यास्ताम्॥ ३०॥ गूहन्तीमिति। हे धर्म विदुर व्रीडया लज्जया आत्मानं देहम्, गूहन्तीं वस्त्राञ्चलेनावृण्वतीम्, नीलानां कृष्णानामलकानां चूर्णकुन्तलानां वरूथः समूहो विद्यते यस्यास्ताम्, स्त्रियम् उपलभ्य मत्वा, सर्वे असुराः संमुमुहुः॥ ३१॥ संमोहवशमुपगतानामसुराणां प्रलापमाह पञ्चभिः। अहो इति। अस्याः रूपमाकारः, अहो आश्चर्यकारि। अहो इत्याश्चर्ये सर्वत्र। अस्याः स्थैर्यं लावण्यम् अहो। कामयमानानामस्माकं मध्ये, अकामा इव अकामयमाना इव, विसर्पति गच्छति॥ ३२॥ वितर्कयन्तः इति बहुधा वितर्कयन्तः रूपगुणादिभिरसाधारणमस्या लावण्यादिकमित्यूहयन्त इत्यर्थः। कुमेधसः कुमतयस्तेऽसुराः, प्रमदाकृतिं स्त्रीरूपत्वेन कल्पितां ताम्, संध्याम् अभिसंभाव्य सत्कृत्य, विश्रम्भात्प्रणयात् पर्यपृच्छन्॥ ३३॥ पृच्छामेवाह त्रिभिः। कासीति। कासि किं देवता उत मानुषी उतान्या कास्यसीत्यर्थः। इति जातिप्रश्नः। कस्य कन्या भवसीत्यर्थः। हे रम्भोरु कदलीसमानोरुप्रदेशे हे भामिनि कोपने। अत्रैतेष्वस्मासु मध्ये ते तव को वा अर्थः, केन तव प्रयोजनमस्तीत्यर्थः। रूपमेव द्रविणमनर्घ्यं वस्तु, तदेव पण्यं क्रयार्हं तेन तदसमर्पणेनेत्यर्थः। दुर्भगान् नोऽस्मान् विबाधसे क्लेशयसे॥ ३४॥ येति। किमस्माकं जातिकुलादिप्रश्नेन त्वं या वा काचित् भवसि। अबले दिष्ट्यास्मद्भाग्यवशेन, तव संदर्शनं जातम्, ईक्षमाणानां त्वद्रूपादि समीक्षमाणानां नोऽस्माकम्, मनः कन्दुकक्रीडया उत्सुनोषि हरसि मुष्णासीति यावत्॥ ३५॥

नैकत्रेति। हे शालिनि सुन्दरि, पतत्पतङ्गम् उत्प्लुत्य पतन्तं कन्दुकम्, मुहुर्वारं वारम्, करतलेन घ्नन्त्यास्ताडयन्त्याः, ते तव पादपद्मम् एकत्रैकस्मिन्स्थाने, न जयति न तिष्ठति। बृहन्तौ च तौ स्तनौ च तयोर्यो भारस्तस्माद्भीतं भीत्या कृशतां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राप्तम्, तव मध्यं विषीदति क्लिश्यति श्राम्यति वा। अमला दृष्टिः श्रान्ता इव मन्दं प्रसरतीति शेषः। पाठान्तरेऽप्ययमेवार्थः। सुशिखासमूहः शोभनकेशकलापः, भवतीति शेषः। सुशिखा बधानेति पाठे शोधनकेशान्विकीर्यमाणान् बधानेत्यर्थः। अत्र चास्तं गच्छन्सूर्य एव पतङ्गः, मेघविच्छेदो मध्यभागः, तारकरूपा दृष्टिः, तम एव केशा इत्याद्यूह्यम्॥ ३६॥ इतीति। इत्युक्तरीत्या, प्रमदायतीं स्त्रियमिवाचरन्तीम्, सायंतनीं सायंकालभवाम्, संध्यां प्रलोभयन्तीं मोहमुत्पादयन्तीम्, स्त्रियं मत्वा, मूढधियः मोहितबुद्धयः असुराः। जगृहुरुपाददुः॥ ३७॥ प्रहस्येति। भगवान्ब्रह्मा, भावेनाभिप्रायविशेषेण गम्भीरं यथा तथा प्रहस्य, आत्मानं देहम्, आत्मना स्वयम्, जिघ्रन् आजिघ्रन् सन्, कान्त्या सौन्दर्येण, गन्धर्वांश्चाप्सरसश्च तासाम्, गणान् ससर्ज। प्रहसनं स्वात्मावघ्राणं च सौन्दर्यानुभवाय चातुर्यविकारः॥ ३८॥ विससर्जेति। कान्तिमतीं कान्तिबहुलाम्, प्रियां स्वाभिप्रेतां तनुं विससर्ज वै। ज्योत्स्नां प्रातःसंध्यात्मना प्रतीयमानाम्, तां तनुं विश्वावसुः पुरोगमो मुख्यो येषां ते, ते पूर्वोक्ताः गन्धर्वाप्सरसां गणाः एव प्रीताः सन्तः, आददुश्च॥ ३९॥ सृष्ट्वेति। भगवान् ब्रह्मा आत्मनः स्वस्य, तन्द्रिरालस्यं तया मुखव्यादानादिलक्षणजृम्भणाख्यतन्वात्मकस्वकीयालस्येनेत्यर्थः। आत्मतन्द्र्येति वक्तव्ये आत्मतन्द्रिणेत्यार्षम्। भूतानि च पिशाचाश्च तान्, भूतगणान् पिशाचांश्चेत्यर्थः। चकारात्तत्सजातीयानन्यानपि, सृष्ट्वा एतान्मुक्तकेशान्विकीर्णकेशान्, दिग्वाससो दिगम्बरान्, वीक्ष्य च दृशौ नेत्रे अमीलयन्निमिलितवान्॥ ४०॥ आलस्यजृम्भणनिद्रोन्मादरूपा चतुर्विधा तन्द्रिस्तां निद्रोन्मादयोः स्वरूपं च कथयन् भूतपिशाचानां चतुर्विधतन्द्रिप्रधानत्वमाह। जगृहुरिति सार्धेन हे प्रभो समर्थ विदुर, तेन ब्रह्मणा विसृष्टा तद्विसृष्टा ताम्, ताम् जृम्भणाख्यां तनुम्, जगृहुर्भूतादय उपाददुः। यया जृम्भणाख्यया ब्रह्मतन्वा, इन्द्रियविक्लेद इन्द्रियविरसत्वमिन्द्रियवैक्लव्यमिति यावत्। भूतेषु दृश्यते, तां निद्रां प्रचक्षते। येनेन्द्रियविक्लेदेन उच्छिष्टानपरिशुद्धान्सतः, धर्षयन्ति भूतादयो भ्रान्तान्कुर्वन्ति, तं भूतादिगणकृतम् उन्मादं प्रचक्षते। भूतपिशाचादयोऽपि एतच्चतुर्विधतन्द्रिप्रधाना इति भावः॥ ४१॥

ऊर्जस्वन्तमिति। प्रभुः भगवान्, अजो ब्रह्मा, आत्मानम् ऊर्जस्वन्तं बलवन्तं मन्यमानः सन्, साध्यान् गणान्, साध्यानां गणान्, गणगणिनोर्भेदाविवक्षया सामानाधिकरण्यनिर्देशः। पितॄणां गणास्तान् परोक्षेणादृश्यरूपेण असृजत्॥ ४२॥ तमिति। आत्मनां सर्गं उत्पत्तिर्यस्मात्तम्, साध्यानां पितॄणां च यत उत्पत्तिस्तथाभूतमित्यर्थः। तम् ऊर्जस्वन्तं तत्कायं ब्रह्मदेहम्, पितरः प्रतिपेदिरे। पितर इति साध्यानामुपलक्षणम्। ते ऊर्जस्वन्तोऽभवन्निति भावः। अत ऊर्जस्वत्त्वमिच्छद्भिस्ते इज्यन्ते इत्याह। कवयः कर्मकुशलाः। साध्येभ्यः पितृभ्यश्च यदूर्जस्वद्धव्यकव्यं वितन्वते, यज्ञैर्हव्यार्पणेनाराधयन्ति। चोऽवधारणे 'साध्यान्संसाधको विशां तन्तूंस्तन्वन् पितॄन् यजेत्' इति द्वितीयस्कन्धोक्तरीत्या, दिक्पतित्वसंततिवृद्ध्यादिभिरात्मनो बलसंपादनाय साध्यान् पितॄंश्च यजन्तीत्यर्थः॥ ४३॥ सिद्धानिति। स ब्रह्मा तिरोधानेन स्वेतरैरदृश्यत्वशक्त्या इत्यर्थः। सिद्धान् विद्याधरांश्च असृजत एव। तेभ्यः सिद्धविद्याधरेभ्यः, तम् अन्तर्द्धानाख्यम्, अद्भुतमाश्चर्यजनकम्, आत्मानं कायं ददौ। तेऽन्तर्द्धानशक्तिप्रधाना अभूवन्नित्यर्थः॥ ४४॥ स इति। प्रभुर्ब्रह्मा, आत्मभासमात्मप्रतिबिम्बम्, आत्मना स्वयं विलोकयन् सन्, आत्मानं प्रतिबिम्बरूपं स्वकायं मानयन्बहु सत्कुर्वन् संश्च, प्रत्यात्म्येन स्वप्रतिबिम्बेनैव, सकिंनरान् किंनरैः सहितान्, किंपुरुषान् असृजत्॥ ४५॥ त इति। ते किंनरादयस्तु परमेष्ठिना ब्रह्मणा, यत् रूपं त्यक्तं यः कायः परित्यक्त इत्यर्थः। तत्प्रत्यात्मरूपं प्रतिबिम्बरूपं तं ब्रह्मकायमित्यर्थः। जगृहुः। अत एव मिथुनीभूय, उषसि कर्मभिः तं ब्रह्माणमेव गायन्तः, बभूवुरिति शेषः। किंनराः किंपुरुषाश्च, परस्परं मिथुनीभूय बिम्बप्रतिबिम्बयोर्यादृशोऽभिमानस्तादृशमभिमानं कृत्वा, तं ब्रह्माणमेवोषसि तच्चेष्टितस्तुतिरूपकर्मभिर्गायन्तोऽभवन्नित्यर्थः॥ ४६॥

देहेनेति। सर्गे अनुपचिते, सृष्टौ वृद्धिमनाप्तायां सत्यामित्यर्थः। क्रोधात् क्रोधं संप्राप्येत्यर्थः। बहुचिन्तया, भोगवता सौकुमार्यवता, दैर्घ्यवता वा देहेन, शयानः वै सुप्तः सन्नेव, ब्रह्मेत्यर्थः। तदुक्तविधं वपुः भोगक्रोधचिन्तावत्कायमित्यर्थः। उत्ससर्ज परित्यक्तवान् ह स्फुटम्॥ ४७॥ य इति। अङ्ग हे विदुर, अमुतः भोगवतोऽस्माद्देहात्, ये केशाः अहीयन्त प्रच्युताः, ते केशास्तु अहयः जज्ञिरे। अहयोऽभूवन्नित्यर्थः। प्रसर्पतः, शयानस्य सतोऽपि पादाद्याकुञ्चनैः प्रचलतो ब्रह्मदेहात्, परिच्युताः केशाः सर्पाः जज्ञिरे। ते च न गच्छन्तीत्यगाः अगा न भवन्तीति नागाः अतिवेगाः। क्रूराः क्रोधयुक्तकायजातत्वात्क्रूरस्वभावाश्च, भोगोरुकन्धराश्च जज्ञिरे। बहुचिन्ताक्रान्तभोगवच्छरीरजातत्वात्सुखस्पर्शदेहा, दीर्घाश्च शयानदेहजत्वाद्दीर्घकन्धराश्च बोध्याः। एतेषामवान्तरजातिभेदः सर्पसिद्धान्ते प्रसिद्धः॥ ४८॥ स इति। सः आत्मभूर्ब्रह्मा, यदा आत्मानं कृतकृत्यम् इव मन्यमानः आसीत्, तदा अन्ते साक्षात्स्वकर्तृकसर्गान्ते, मनसा मनःसंकल्पेन लोकभावनान् प्रजास्रष्टॄन्, मनून् ससर्ज असृजत्॥ ४९॥ तेभ्य इति। आत्मवान्स्वस्वरूपाभिज्ञानवान्, स ब्रह्मा, तेभ्यो मनुभ्यः, स्वीयमात्मनः पुरुषं पुरुषाकारम्, पुरं देहम् अत्यसृजत् ददौ। तान्मनूनात्मवत्पुरुषाकारदेहविशिष्टानकरोदित्यर्थः। तान् पुरुषाकारदेहविशिष्टान् मनून्, दृष्ट्वा ये पुरा सृष्टाः, ते प्रजापतिं ब्रह्माणं प्रशशंसुः। पुरुषाकारवता ब्रह्मणा पुरुषाकारा मनवः सृष्टास्तान्वीक्ष्य, देहान्तरेण पूर्वसृष्टास्तत्प्रशंसां चक्रुरित्यर्थः॥ ५०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रशंसामाह । अहो इति । हे जगत्स्रष्टः, ते त्वया कृतं निर्मितम् एतत्पुरुषाकारशरीरम्, अहोऽत्याश्चर्यकारि, अतः सुकृतमति-समीचीनम्, बताऽत्यानन्दोऽनेन जायते । यस्मिन्नेतस्मिन् पौरुषे देहे, क्रियाः स्वर्गापवर्गसाधनभूतानि कर्माणि, प्रतिष्ठिताः । सर्वाः क्रियाः पौरुषशरीरसाध्या इत्यर्थः । अतः अन्नं मनुष्यशरीरवज्जनदत्तं हव्यादि, साकं भवता सह, अदामहे भक्षयामहे । अत्र केचित्तु यस्मिन्मनुसर्गे क्रियाः प्रतिष्ठिताः, अतः यस्मिन् सर्वे वयम् अन्नं हविर्भागादि साकं सह, अदामहे, इति व्याख्यायन्ते । अपरे तु साकं पौरुषशरीरेण सहान्नं भोग्यजातमदामहे इति व्याचख्युः । तत्र 'यावद्बलिं तेऽज हराम काले' इति तत्त्वप्रार्थितानु-सारितयार्थयोजना युक्ता ॥ ५१ ॥

सांप्रतमृषीणां सृष्टिमाह । तपसेति । तपसा तपस्यया, विद्ययोपासनया, योगेनासनादिना सुसमाधिना च, युक्तः । हृषीकेशः स्ववशवर्तीन्द्रियः, ऋषिर्ब्रह्मा, अभिमताः प्रजाः प्रजारूपान् ऋषीन् ससर्ज ॥ ५२ ॥ तेभ्य इति । अजो ब्रह्मा स्वस्य देहस्य, एकैकशः अंशम् एकैकमंशमित्यर्थः । तेभ्यः ऋषिभ्यः, अदाद्दौ चैव । काऽसौ देहः, यस्यैकैकांशमदादित्यत आह । यद्यच्छरीरं समाधिश्च, योगश्च, ऋद्धिरणिमाद्यैश्वर्यं च, तपश्च, विद्या च, विरक्तिर्विषयनिःस्पृहत्वं च, ता विद्यन्ते यस्मिंस्तत् । तददादिति संबन्धः । ब्रह्मा समाध्यादियुक्तं स्वशरीरमृषिभ्यः प्रददावित्यर्थः ॥ ५३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः

विदुर उवाच

स्वायंभुवस्य च मनोर्वंशः परमसंमतः । कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः ॥ १ ॥

विष्णुना तोषितेनैव तपोविद्यादिनोच्यते । विवाहस्तु मनोः पुत्र्याः कर्दमेनैकविंशके ॥ १ ॥

एवमसाधारणान सृष्टिभेदानाकर्ण्य, प्रकृतं स्वायंभुवमनुचरितं तद्वंशं च पृच्छति विदुरः पञ्चभिः । स्वायंभुवस्येति । हे भगवन्मैत्रेय, स्वायंभुवस्य मनोः, परमैः सर्वोत्तमैः, संमतः परमाणां संमत इति वा । वंशः कथ्यताम् । चोऽवधारणार्थे । यत्र स्वायंभुववंशे, प्रजाः मैथुनेन कर्मणा एधिरे एधांचक्रिरे ॥ १ ॥ प्रियव्रतेऽति । स्वायंभुवस्य मनोः, सुतौ प्रियव्रतश्चोत्तानपादश्च तौ, वै निश्चयेनैव सप्तद्वीपवतीं महीम्, यथाधर्मं स्वस्ववर्णाश्रमधर्माननतिक्रम्येत्यर्थः । जुगुपतुः । यथेति शेषः । यथा रक्षितवन्तौ तत्प्रकारः कथ्यतामित्यर्थः ॥ २ ॥ तस्येति । हे ब्रह्मन् हे अनघ, तस्य यस्य पुत्रौ प्रियव्रतोत्तानपादौ तस्य स्वायंभुवमनोः, दुहिता पुत्री देवहूतीति देवहूतिरिति नाम्ना, विख्याता विश्रुता त्वत्त एव मया संश्रुता । सा त्वया कर्दमस्य प्रजापतेः पत्नी उक्ता वै इति चार्थे ॥ ३ ॥ तस्यामिति । योगलक्षणैः शमदमादिभिः, युक्तायां तस्यां देवहूत्याम्, महायोगी परिपक्वभगवदुपासनात्मक-योगनिष्ठः, स कर्दमः कतिधा कतिभिः प्रकारैः, वीर्यं ससर्ज अपत्यान्यजनयदित्यर्थः । तदेतत् शुश्रूषवे मे मह्यं वद । वै निश्चये ॥ ४ ॥

रुचिरिति । हे ब्रह्मन्मैत्रेय, ब्रह्मणः विधेः, सुतः भगवानैश्वर्ययुक्तः यः रुचिः, दक्षो वा दक्षश्च मानवीं मनुपुत्रीमा-कूतिम्, प्रसूतिं च भार्या लब्ध्वा, तत्र रुचिराकूतिं दक्षः प्रसूतिं च संप्राप्येत्यर्थः । भूतान्यपत्यानि यथा ससर्ज तत्प्रकारं मे वदेति पूर्वेणान्वयः ॥ ५ ॥ एवं विदुरापृष्टो मैत्रेयस्तद्यथावन्मनुपुत्रचरित्रं वक्ष्यमाणस्तावद्देवहूत्याख्यभार्यालाभाय कर्दमस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तपश्चर्याप्रकारमाह द्वाभ्याम् । प्रजा इति । ब्रह्मणा विधिना, प्रजाः सृज इत्यमुना प्रकारेण उदितः उक्तः, भगवान् कर्दमः, सरस्वत्यां सरस्वतीसंज्ञायां नद्याम्, सहस्राणां दश समाः दशसहस्रसंवत्सरानित्यर्थः। तपः तेपे चकार। पाकं पचतीतिवन्निर्देशः ॥ ६ ॥ तत इति । ततस्तस्मिंस्तपसीत्यर्थः । कर्दमः समाधिश्चित्तैकाग्र्यं स एव योगस्तेन क्रियायोगेन युक्तेनेति शेषः। चित्तैकाग्रतायुक्तभगवत्प्रसन्नताहेतुक्रियायोगेनेत्यर्थः । भक्त्या ध्रुवानुस्मृतिरूपोपासनया च, प्रपन्नवरदाशुषं शरणागतजनानां वरप्रदातारम्, हरिं संप्रपेदे सिषेवे ॥७॥ तावदिति । हे क्षत्तः विदुर, कृते युगे तावत् दशवर्षसहस्रपर्यन्ततपश्चर्यान्तकाले इत्यर्थः। पुष्कराक्षः कमलनयनः भगवान्, शाब्दं पञ्चोपनिषन्मन्त्रवेद्यं ब्रह्म सौन्दर्यसौकुमार्यलावण्ययौवनाद्यनन्तकल्याणगुणाकरतया बृहदित्यर्थः । वपुर्दिव्यमङ्गलविग्रहम्, दधद्बिभ्रत् प्रसन्नस्तत्तपसा प्रसन्नतां प्राप्तः सन्, तं कर्दमं दर्शयामास । स्वात्मानमिति शेषः । यद्वा । तमिति विग्रहापेक्षया पुल्लिङ्गनिर्देशः । तं विग्रहं दर्शयामासेत्यर्थः ॥ ८ ॥ तमनुवर्णयंस्तं प्रणम्यास्तौषीदित्याह चतुर्भिः । स इति । स कर्दमः, तं भगवन्तं दृष्ट्वा अभ्यगृणन्निति पञ्चमगतेनान्वयः । कथंभूतं तम्, विरजं निर्मलम्, रजःशब्दोऽत्राकारान्तः । अर्कस्य सूर्यस्येवाभा यस्य तम्, सितानां पद्मानामुत्पलानां च स्रजो माला यस्य तम्, स्निग्धा चिक्कणा नीला मेचकाश्च येऽलकाः कुन्तलास्तेषां व्रातो वक्त्राब्जे मुखकमले यस्य तम्, विरजो निर्मलमम्बरं पीताम्बरं यस्य तम् ॥ ९ ॥ किरीटिनमिति । किरीटिनं मुकुटधारिणम्, कुण्डलिनं कर्णवेष्टनधारिणम्, शङ्खचक्रगदाधरम्, पाञ्चजन्यसुदर्शनकौमोदकीधारिणम्, श्वेतोत्पलं धवलपद्मं क्रीडनकं क्रीडासाधनं यस्य तम्, मनःस्पर्शे मनोहरे स्मितेक्षणे मन्दहासावलोकने यस्य तम्, चित्तापहारिहासयुक्तावलोकनयुक्तमित्यर्थः ॥ १० ॥

विन्यस्तेति । गरुत्मतो वैनतेयस्य अंसदेशे स्कन्धप्रदेशे विन्यस्ते निहिते चरणाम्भोजे पादपद्मे येन तम्, वक्षसि श्रीर्यस्य तम्, कौस्तुभो मणिः कन्धरायां यस्य तम्, खे आकाशे अवस्थितं भगवन्तं दृष्ट्वा ॥ ११ ॥ जातेति । जातः हर्षो यस्य सः । लब्धः संप्राप्तः मनोरथो दर्शनलब्धिरूपसंकल्पो येन सः । एवंभूतः सन्; क्षितौ भूम्यां मूर्ध्ना शिरसा अपतद्दण्डवत्प्रणनामेत्यर्थः । प्रीतिः स्वभावो यस्य तथाभूत आत्मा मनो यस्य सः । कृतः अञ्जलिर्येन सः । इत्थंभूतः सन्; गीर्भिस्तत्स्वरूपगुणमाहात्म्यप्रतिपादिकाभिर्वाग्भिः, अभ्यगृणाच्च स्वाभिप्रेतं निवेदयन्नस्तौषीदित्यर्थः ॥१२॥ तदेवाह । नवभिः । जुष्टमिति । हे ईड्य स्तुत्य, अखिलसत्त्वराशेः परिपूर्णशुद्धसत्त्वमयस्येत्यर्थः । तव दर्शनात्, नोऽस्माकम्, अक्ष्णोर्नेत्रयोः, सांसद्धच साफल्यरूपफलम्, अद्य जुष्टं संप्राप्तम् । वतेति हर्षे । यद्दर्शनं यस्य तव समीक्षणम्; योगः रूढो यैस्ते रूढयोगाः । रूढो योगो यैस्ते इति वा । संप्राप्तयोगाः योगिनः, सद्भिः सात्त्विकैः जन्मभिः, आशासते प्रार्थयन्ते । अतस्तदेव निरतिशयसिद्धिफलमित्यर्थः ॥ १३ ॥ ननु धर्मादिष्वन्यतम एव पुरुषार्थः न तु मद्दर्शनमित्यत्राह । हे ईश, ते तव मायया हृतमेधसो मोहितबुद्धयः, ये जनाः, भवः संसार एव सिन्धुः समुद्रस्तस्मिन्पोतं नौकारूपम्, त्वत्पादारविन्दम्, त्वच्चरणारविन्दं कामलवाय काम्यन्ते इति कामाः सुखानि तेषां लवार्थमित्यर्थः । उपासते तेषां कामांस्तान्कामलवानपि, रासि ददासि । ये तु निरयेऽपि निरयप्रायनीचयोनावपि स्युः, अतः सकामतया त्वदुपासनमयुक्तमित्यर्थः । सुमेरुमासाद्य वराटिकाद्यन्वेषणवन्नित्यनिरतिशयानन्दजलधिम्, त्वमासाद्यानन्दलेशमाशासानास्त्वन्मायाहृतबुद्धय एवातो धर्मादिपुरुषार्थदृष्ट्या त्वां भजन्तो मूढा एवेति भावः ॥ १४ ॥ कामकामिनो योऽहं निन्दयामि, सोऽहमपि कामकामीत्याह । तथेति । तथोक्तश्लोकनिन्दितसकामसमानविधः, स भवत्तत्त्वं कुर्वाणः अहं च अहमपि, गृहमेधो गृहाश्रमस्तत्र धेनुस्ताम्, धेनुर्यथा यज्ञे पयोदधिघृतदोग्ध्री तथा गृहाश्रममखे त्रिवर्गदोग्ध्रीम्, समानशीलां मत्समानधर्मादिष्वनुकूलशीलाम्, भार्यामित्यर्थः । परिवोढुकामः परिणेतुमिच्छन्, अत एव दुराशयः दुष्टान्तःकरणः सन्, कामदुघाङ्घ्रिपस्य कल्पवृक्षवदर्थितार्थदस्य तव; अशेषमूलं समग्रपुरुषार्थानां मूलं कारणम्, मूलं त्वदङ्घ्रिम् उपेयिवान् प्राप्तवान् अस्मि ॥ १५ ॥

नन्वेवं हेयोपादेयविभागकुशलस्त्वं कथं कामकामी मामुपेयिवानित्यत्राह । प्रजापतेरिति । हे अधीश, प्रजापतेः प्रजानामेकनाथस्य, ते तव, वचसा वेदात्मकवचोरूपया, तन्त्या दाम्ना, अयं लोकः सांसारिको जनः, कामहतः कामैरभिभूतः, अनुबद्धः पशुवद्बन्धनं प्राप्तः किल । तथा अहं चाहमपि, लोकान् सांसारिकलोकान्; अनुगतः सन्, हे शुक्ल भगवन्, अनिमिषाय कालरूपिणे, तुभ्यं बलिं गृहाश्रमोचितधर्मरूपबलिम्, वहामि चैव । अस्यायं भावः । यद्यप्यहं हेयोपादेयविवेकसंपन्नो भवामि, तथापि त्वन्निदेशानुवर्तिना मत्पित्रा ब्रह्मणा प्रजाः सृजेत्याज्ञप्तोऽहमत एव गृहमेधीयैरेव धर्मैर्भवन्तमाराधयितुं भवन्तमेवार्थयामि इति । अनिमिषायेति हेतुगर्भं विशेषणम् । यस्त्वं कालरूपेण संसारिणां निरर्थकमायुः क्षपयस्ततोऽहं सांसारिकधर्माननुतिष्ठन्कालात्मकात्त्वत्तो भीतः सन्नसदायुषः सद्व्ययं चिकीर्षुः पितृनिदेशं च पालयन्कालरूपाय तुभ्यमेव प्रीणयितुं तव पूजां करोमीत्यभिप्रायः ॥ १६ ॥ त्वद्भक्तानां तु कालाद्भीतिरेव नास्तीत्याह द्वाभ्याम् । लोकानिति । लोकान्कामाभिभूतजनान्, लोकानुगतान् कामाभिभूतजनानुसृतांश्च, पशून् विवेके सत्यपि पुनः कर्मजडतया पशुतुल्यान्मा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दशांश्च, हित्वा त्यक्त्वा, परस्परं मिथः, त्वद्गुणानां भवदीयगुणानाम्, वादः कथनं तदेव सीधु मधुरं पीयूषममृतं तेन निर्वापिता निरस्ता देहधर्मा जरामरणादयो येषां ते, इत्थंभूता ये ते तु, ते तव चरणावेवातपत्रं तापत्रयनिवर्त्तकतया छत्रसमानौ त्वच्चरणावित्यर्थः। आश्रिताः भवन्ति ॥ १७ ॥ नेति। अजरं ब्रह्म तदेवाक्षस्तस्मिन् भ्रमतीति अजराक्षभ्रमिः, चक्रविशेषणत्वेऽप्यस्य नियतलिङ्गत्वात्स्त्रीत्वम्। केचित् भ्रमदिति वक्तव्येऽतिभ्रमणशीलत्वादुपचारेण भ्रमिरित्यभेदनिर्देश इत्याहुस्तन्मते भ्रमिशब्दो भावप्रत्ययान्तः। अधिकमासेन सह त्रयोदशमासा आरा यस्य तत्, त्रिशतं षष्टिश्चाहोरात्राः पर्वाणि यस्य तत्, त्रिशतमित्यत्रानुस्वारलोपाभावश्चार्षः। षट् ऋतवः नेमयश्चक्रप्रान्तदेशा यस्य तत्, अनन्ताः क्षणलवादयश्छदाः पत्राणि पत्राकारा धाराः सन्ति यस्य, त्रीणि चातुर्मास्यानि नाभय आधारभूतानि वलयानि यस्य, करालोऽतितीव्रः स्रोतो वेगो यस्य तत, एवंभूतं यत्कालचक्रम्, जगत् आच्छिद्याकृष्य धावत् अपि, केवलसंसारिणामेव वृथायुराच्छिद्य धावत्सदपि, ते तव एषां भक्तानाम् आयुः आच्छिद्य धावत न भवति। त्वज्जनानामेवंभूतमहिमत्वात्कालचक्रशरीरकस्याश्रितकामपूरकस्य तवैवाहं पादमूलमुपगतोऽस्मीति भावः ॥ १८ ॥

ननु ब्रह्मरुद्रादिषु बहुषु सत्स्वपिताननादृत्य मत्पादमूलमेव किं विशेषेणोपेयते इति चेज्जगत्कारणत्वात्त्वमेवोपेय इति ब्रुवंस्तावत्कारणत्वमेवोपपादयति। एक इति। स्वयं भगवान् त्वम् एकः सन्, नामरूपविभागानर्हसूक्ष्मचिदचित्काल-शरीरतया सृष्टेः प्रागेक एव सन्नित्यर्थः। जगतः सिसृक्षया हेतुना, द्वितीयया स्वरूपतः स्वभावतश्च स्वस्मादत्यन्तभिन्नया, अधियोगमायया स्वशरीरभावेनात्मना स्वीकृतया योगमायया द्वारेण, स्वशरीरभूतमायाद्वारेणेत्यर्थः। स्वीकृताभिरिति शेषः। स्वशक्तिभिः सत्त्वादिभिः, आत्मन् आत्मन्निति लुप्तसप्तम्यन्तम्। स्वात्मन्येवेत्यर्थः। अदः नामरूपविभागार्हं चेतनाचेतनात्मकं जगत्, ऊर्णनाभिर्लूता यथा, सृजसि उत्पादयसि, पासि रक्षसि, पुनः ग्रसिष्यसे संहरसि। तस्माज्जगत्कारणमाश्रितकल्पद्रुमं त्वामेव कामत्कामी लोकाननुसरन् परिवोढुकामस्त्वामुपेयिवानहमिति भावः ॥ १९ ॥ यद्यपि मायिकत्वाद्विषयाणां भक्तेभ्यो विषयसुखं दातुं नेच्छसि, तथापि तदभिप्रेताय मह्यं तदेव तावत्संपादयेत्याह। नैतदिति। बतेति हर्षविषादयोः। हे अधीश, नोऽस्माकं मायया इच्छया आस्माकीमिच्छामाकलय्येत्यर्थः। भूतसूक्ष्मं शब्दादिविषयसुखम्, तनुषे विस्तारयसि यत् एतत् तव ईप्सितं न भवति। अपि तथापि, पदं त्वत्पादपद्मम्, भजतामस्माकमिति शेषः। अनुग्रहाय अस्तु। यर्हि यतः मायया स्वेच्छया, त्वं लसन्ती तुलसी यस्यां तया, तनुवा तन्वा विलक्षितः प्रत्यक्षं दृष्टोऽसि। साक्षात्त्वद्दर्शनस्य भुक्तिमुक्तिप्रदान-समर्थत्वात्साक्षात्त्वद्दर्शनवानहम्, ऋणत्रयापाकरणानन्तरमेवापवर्गाय त्वां भजिष्यामीति भावः ॥ २० ॥ भुक्तिमुक्तिप्रदत्वे हेतुं वदन् स्तुतिमुपसंहरति। तमिति। अनुभूत्या स्वात्मानुभवेन, उपरतः अनपेक्षितः क्रियार्थः जगद्व्यापाररूपक्रियाप्रयोजनं यस्य तम्, एवं सत्यपि स्वमायया लीलाचरणरूपस्वसंकल्पमात्रेण, वर्त्तितं संप्रवर्त्तितं लोकतन्त्वं जगद्व्यापारो येन तम्। नमनीयं सकामैर्निष्कामैश्च नमस्कार्यं पादसरोजं चरणपद्मं यस्य तम्। अल्पीयसि सकामत्वान्निष्कामजनाग्रेऽत्यल्पतावति पुरुषे अपि, कामान्वर्षतीति तथाभूतस्तम्। त्वा त्वाम् उक्तविधं भवन्तमित्यर्थः। अभीक्ष्णं पुनः पुनः नमामि ॥ २१ ॥

एवं कर्दमेन स्तुतः निवेदिताभिप्रायश्च भगवांस्तमुवाचेत्याह मैत्रेयः। इतीति। इतीत्थम्, अव्यलीकं विगतालीकतया सत्यं यथा भवति तथा, प्रणुतः संस्तुतः, सुपर्णपक्षोपरि वैनतयस्कन्धोपरीत्यर्थः। सुपर्णपृष्ठोपरि इति पाठेऽप्ययमेवार्थः। रोचमानः प्रकाशमानः, प्रेम च स्मितं च ते प्रेमस्मिते प्रेमस्मिताभ्यां सह यदुद्वीक्षणं तेन विभ्रमन्ती विलासवती भ्रूर्यस्य सः; अब्जनाभः भगवान्, अमृतेनामृततुल्येन वचसा, तं कर्दमं प्रति आबभाषे उवाच ॥ २२ ॥ यदुवाच तदाह दशभिः। विदित्वेति। हे मुने तव चैत्यं चित्तगतमभिप्रायम्, विदित्वा ज्ञात्वा, मे मया, तत्त्वदभिप्रेतम्, पुरा प्रथमतः एव, समयोजि संघट्टितम्। किं तदित्यत्राह। यदर्थं यस्याः पत्न्या लाभार्थम्, आत्मनः स्वस्य ये नियमाः शमदमादयस्तैः करणैः, त्वया कर्त्रा अहम् एव, समर्चितः सम्यगाराधितः ॥ २३ ॥ नेति। हे प्रजाध्यक्ष, वै निश्चितमेव, मदर्हणं ममाराधनम्, जातु कदाचिदपि, मृषा मिथ्या भूतं न स्यात् एव। एवं सत्यपि मयि, सं सम्यक् गृभितः संगृहीतः एकीकृतः आत्मा मनो यैस्तेषु, भवद्विधेषु भवादृशेषु, अतितरां सुतरां मदर्हणं न मृषेत्यर्थः। यथातथाविधैः कृतमपि मदाराधनं मृषा न जायते, तदा भवादृशैः कृतं मदाराधनं मृषा न स्यादित्यकथि-तमपि सिद्धमेवेति भावः। पाठान्तरे मयि संगृभितात्मनां मदर्हणं न मृषा, भवद्विधेषु तु अतितरामेव मदर्हणं न मृषेति योज्यम् ॥ २४ ॥ प्रजापतिरिति। यः प्रजापतेर्ब्रह्मणः सुतः पुत्रः, सम्राट् सार्वभौमः, विख्यातं मङ्गलमाचारो यस्य सः, श्रौतस्मा-र्त्तसदाचारनिष्ठ इत्यर्थः। मनुः स्वायंभुवः, अधुना ब्रह्मावर्त्तं ब्रह्मावर्त्ताख्यं देशम्, अधिवसन् अधिष्ठाय वसन्सन्, सप्त अर्णवाः समुद्राः यस्याः सा सप्तार्णवा ताम्, महीं पृथिवीं शास्ति धर्मतः पालयति ॥ २५ ॥ स इति। हे विप्र, राजर्षिः स च मनुरपि, शतरूपया शतरूपाख्यया महिष्या पट्टाङ्गनया सह, धर्मेषु कोविदस्तम्। मदाराधनरूपधर्मेषु कुशलमित्यर्थः। त्वां दिदृक्षुर्द्रष्टुमि-च्छन्सन्, परश्वः इह आयास्यति ॥ २६ ॥ स आयातु मम किं तेनेत्यत्राह। आत्मजामिति। हे प्रभो सद्गुणवतां समर्थ,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असितापाङ्गीमतिनीलकनीनिकायुक्तनेत्राम्, वयो यौवनं च, शीलं स्वभावश्च, गुणा जितेन्द्रियत्वादयश्च, तैरन्विता ताम्, पतिं स्वानुरूपं भर्त्तारं मृगयन्तीम्, दूतप्रेषणादिभिः परिशीलयन्तीमित्यर्थः। आत्मजां देवहूत्याख्यां तनयाम्; अनुरूपाय वयः-शीलादिभिरनुरूपाय, ते तुभ्यं दास्यति ॥ २७ ॥

समाहितमिति। हे ब्रह्मन् यत्र यस्यां मनुकन्यायाम्, इमान् परिवत्सरान् यावन्तीमानि वत्सराणि व्यतीतानि तावत्पर्यन्तमित्यर्थः। अत्यन्तसंयोगे द्वितीया। ते तव हृदयं चित्तम्, समाहितमासक्तं भवति। सा नृपवधू राजकन्या, त्वाम् आशु कामं भजिष्यति। त्वया सह बहुवर्षपर्यन्तं कामान् सेवमानापि क्षणमात्रमिवानुभविष्यतीत्यर्थः ॥ २८ ॥ येति। या देवहूतिः, ते त्वया आत्मभृतं स्वस्मिन् धृतं त्वया स्वस्मिन्सिक्तमित्यर्थः। वीर्यं नवधा प्रसविष्यति। त्वदीये वीर्ये त्वदुत्पन्नासु नवसु पुत्रीषु, ऋषयो मरीच्यादयः, अञ्जसा आशु आत्मनः पुत्रान् 'आत्मा वै पुत्रनामासि' इति श्रुतेः। आधास्यन्ति उत्पादयिष्यन्ति ॥ २९ ॥ त्वमिति। त्वं च भवानपि, मे मम निदेशमाज्ञाम्, सम्यक् अनुष्ठाय परिपाल्य, उशत्तमः कमनीयम-दाराधननिष्ठः, मयि तीर्थीकृतः समर्पितः अशेषक्रियार्थः समस्तक्रियाफलं येन सः एवंभूतः सन्, मां प्रपत्स्यसे प्राप्स्यसि ॥ ३० ॥ कृत्वेति। आत्मवान् जितान्तःकरणस्त्वम्, जीवेषु चराचरात्मकभूतेषु, दयां कृत्वा अभयं च दत्त्वा, मयि अन्तः प्रविश्य धारके मयि, जगच्चराचरात्मकं कृत्स्नं विश्वम्, आत्मानं च सहैव द्रक्ष्यसि मया व्याप्यं धार्यं च द्रष्टेत्यर्थः। आत्मनि नया धार्ये स्वात्मनि च, मामपि धारकं व्यापकं चापि, द्रक्ष्यसीत्यर्थः ॥ ३१ ॥ सहेति। हे महामुने, सहते तपश्चर्याजमैश्वर्यं धारयितुं क्षमते इति सहस्तत्संबोधने हे सह, स्वांशकलया स्वांशांशेन, अहमपि त्वद्वीर्येण द्वारभूतेन, तव क्षेत्रे क्षेत्रभूतायां देवहूत्याम्, अवतीर्येति शेषः। तत्त्वसंहितां प्रकृतिपुरुषेश्वरात्मकतत्त्वस्वरूपविवेचनीं संहिताम्, प्रणेष्ये कथयिष्यामि ॥ ३२ ॥ एवं कर्दममाभाष्य स्वस्थानं प्रति भगवान् गत इत्याह मैत्रेयः। एवमिति। एवं प्रत्यक्षु प्रत्याहृतेष्वक्षेष्विन्द्रियेषु जायते आविर्भवतीति प्रत्यगक्षजः, भगवान्, तं कर्दमम्, अनुभाष्याभाष्य, अथानन्तरं सरस्वत्या नद्या परिश्रितात् परिवेष्टितात्, बिन्दुसरसः बिन्दुसरोवरतीरस्थात्कर्दमा-श्रमात्, जगाम ॥ ३३ ॥

कथंभूतो जगामेत्यत्राह। निरीक्षत इति। तस्य कर्दमस्य नीरीक्षतः, पश्यतः सतः, अशेषसिद्धेश्वरैः सर्वयोगीश्वरैः अभिष्टुतः सिद्धः स्वतः सिद्धः मार्गः कल्याणगुणगणज्ञानप्रकारो यस्य सः। यस्य कल्याणगुणगणज्ञानप्रकारः सिद्धैरभिष्टुतस्त-थाविध इत्यर्थः। पत्त्ररथेन्द्रो गरुडस्तस्य पक्षैः पतत्त्रैः उच्चारितम्, उदीर्णे अभिव्यक्ते सामनी बृहद्रथन्तरे यस्मिंस्तम्, साम्नः स्तोमविशेषणत्वेऽपि क्लीबत्वमार्षम्। स्तोमं साम्नामाधारभूतमृक्समुदायम्, 'बृहद्रथन्तरे पक्षौ स्तोम आत्मा' इति श्रुतेः। आकर्णयन् सन्, ययौ जगाम ॥ ३४ ॥ अथेति। अथानन्तरं शुक्ले भगवति, संप्रस्थिते गते सति, भगवान् कर्दमः ऋषिः, तं भगवदभिहितं कालं परिपालयन्प्रतीक्षमाणः सन्, बिन्दुसरसि बिन्दुसरसस्तीरे, आस्ते स्म उपविष्टः ॥ ३५ ॥ मनुरिति। मनुः स्वायंभुवः, शातकौम्भाः सुवर्णमयाः परिच्छदा अलंकारा यस्मिंस्तम्, स्यन्दनं रथम् आस्थाय अधिष्ठाय आरुह्येत्यर्थः। तत्र स्वां दुहितरं पुत्रीम्, आरोप्य, सभार्यः शतरूपया सहितः, महीं पर्यटन् दुहितुः पत्यन्वेषणार्थं परितः संचरन् ॥ ३६ ॥ तस्मिन्निति। हे सुधन्वन् विदुर, भगवान् यदहो यद्दिनम् समादिशन्निर्दिष्टवान् तस्मिन् अहनि शान्तव्रतस्योपशमशीलस्य मुनेः कर्दमस्य तत्प्रसिद्धम् आश्रमपदम् आश्रमस्थानं प्रति उपायादुपागात् इति द्वयोरेकसंबन्धः ॥ ३७ ॥ तत्प्रवेशमात्रेण मनुः परमानन्दं प्राप्त इति दर्शयितुमाश्रमं वर्णयति सप्तभिः। यस्मिन्निति। प्रपन्ने परमप्रेम्णा स्वशरणं प्राप्ते कर्दमे भृशमत्यन्तम् अर्पितया निहितया कृपया दयया संपरीतस्य सम्यक् परितो व्याप्तस्य भगवतः नेत्रात् अश्रुबिन्दवः आनन्दाश्रूणि यस्मिन्सरोवरे अपतन् ॥ ३८ ॥ तदिति। सरस्वत्या नद्या परिश्रितं परितो वलयितम् पुण्यमुपस्पर्शनादिभिः पुण्यसाधनम् शिवमरोगममृतममृततुल्यं जलं यस्मिंस्तत् महान्तश्च ते ऋषयश्च तेषां गणास्तैः सेवितमहरहरुपस्पृश्यमानं तत् सरः बिन्दुसर इति नाम्ना नाम प्रसिद्धम्। वै इदमेव बिन्दुसरःशब्दस्य प्रवृत्तिनिमित्तं यद्धरिहर्षबिन्दुनिपतनं तदित्यर्थः। द्वयोरेकसंबन्धः ॥ ३९ ॥

पुण्येति। कूजन्तः पुण्याः मृगा हरिणाः द्विजाः पक्षिणश्च येषु तैः पुण्यानां द्रुमाणां लतानां च जालानि समूहास्तैः सर्वर्तुषु षट्स्वपि ऋतुषु यानि फलानि पुष्पाणि च तैराढ्या शालिनी या वनराजिर्वनपङ्क्तिस्तस्याः श्रीः शोभा तया अन्वितं युक्तम् ॥ ४० ॥ मत्तेति। मत्ता मदमन्थरा ये द्विजगणा विशिष्टपक्षिसमूहास्तैः घुष्टमाघोषितम् मत्ता मधुपानमत्ता ये भ्रमरास्तेषां विभ्रमो विलासो यस्मिंस्तत् मत्ता बर्हिणो मयूरास्त एव नटास्तेषामाटोपो नृत्यसंभ्रमो यस्मिंस्तत् आह्वयन्तो मिथ आकारयन्तः मत्ताः कोकिला यस्मिंस्तत् ॥ ४१ ॥ कदम्बेति। कदम्बाश्च चम्पकाश्च अशोकाश्च, करञ्जाश्च, बकुलाश्च, असनाश्च, तैः, कुन्दाश्च मन्दाराश्च कुटजाश्च तैः चूतपोतैश्च अलंकृतम् ॥ ४२ ॥ कारण्डवैरिति। कारण्डवैः प्लवैः हंसैः कुररैः जल-कुक्कुटैः सारसैश्च चक्रवाकैः चकोरैश्च वल्गु सुन्दरं यथा तथा कूजितं नादितम् ॥ ४३ ॥ तथेति। तथैव हरिणैर्मृगैः क्रोडैर्वराहैः श्वाविदः शल्यकाश्च गवया वन्या गावश्च कुञ्जरा हस्तिनश्च तैः। गोपुच्छैश्चमरैः हरिभिः सिंहैः मर्कैर्मर्कटैः नकुलैः नाभिभिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कस्तुरीमृगैः वृतम् ॥ ४४ ॥ प्रविश्येति । सहानुगः सभृत्यः आदिराजो मनुः तत् तीर्थवरं तीर्थश्रेष्ठं प्रविश्य तस्मिंस्तीर्थे हुतः हुताशनो येन तम् आसीनमुपविष्टं मुनिं ददर्श ॥ ४५ ॥ अथ मुनिं विशिनष्टि सार्द्धद्वयेन । विद्योतमानमिति । तपसि चिरम् उग्रो युक् योगो यस्य तेन वपुषा विद्योतमानम्, भगवतः स्निग्ध स्नेहयुक्तं यदपाङ्गावलोकनं कटाक्षकरणं तस्मात् तस्य भगवतो व्याहृतं भाषणमेव अमृतकला अमृतमयस्य चन्द्रस्य कला तन्मय यत्पीयूषं तस्य श्रवणेनाकर्णनेन च न अति अत्यन्तं क्षामः कृशस्तम्, तपसा कृशमपि हेतुद्वयेन नातिकृशमित्यर्थः ॥ ४६ ॥ प्रांशुमिति । प्रांशुमुन्नतम्, जटिलं संजातजटम्, पद्मपलाशाक्षं कमलदलसमाननयनम्, चीरवाससं वल्कलवसनम् अर्ह्यतेऽनेनेति अर्हणं महारत्नम् असंस्कृतमनिर्णिक्तं सत् यथा यद्वत् मलिनं दृश्यते तद्वदित्यर्थः । मलिनम् उपसंसृत्य समीपमागत्य ददर्शेति पूर्वेणान्वयः ॥ ४७ ॥

अथेति । अथानन्तरम्, उटजं पर्णशालाम्, उपायातं पुरः पादसमीपे प्रणतं नमस्कुर्वन्तम्, नृदेवं मनुम्, प्रतिनन्द्य आशीर्भिरभिनन्द्य, अनुरूपया योग्यया, सपर्यया पूजया, प्रत्यगृह्णात्कृतवान् ॥ ४८ ॥ गृहीतेति । गृहीतं प्रतिगृहीतमर्हणं पूजनं येन तम्, आसीनमुपविष्टम्, संयतं संयमवन्तम्, मनुं मुनिः कर्दमः, श्लक्ष्णया मधुरया गिरा स्वागतप्रश्नरूपया वाचा, प्रणीयन भगवदादेशं स्मरन् सन् इति वक्ष्यमाणप्रकारेण आह जगाद ॥ ४९ ॥ नूनमिति । हे देव मनो, ते तव चङ्क्रमणं पर्यटनम्, सतां सत्पुरुषाणां रक्षणाय, असतामसत्पुरुषाणां वधाय च भवति नूनम् । यद्यस्मात् त्वं पालिनी जगत्पालनकर्त्री हरेर्भगवतः शक्तिः हि । हरेर्जगत्पालकशक्तियुक्तस्त्वमित्यर्थः ॥ ५० ॥ मनावारोपितं विष्णुं प्रणमति । य इति । यो विष्णुरूपस्त्वम्, अर्कः सूर्यश्च, इन्दुश्चन्द्रश्च, अग्निर्वह्निश्च, वायुः पवनश्च तेषाम् । यमश्च, धर्मश्च, प्रचेता वरुणश्च, तेषाम् । रूपाणि स्थाने तत्तदुचित-जगत्परिपालनावसरे आधत्से बिभर्षि । तस्मै शुक्लाय विष्णवे, ते तुभ्यं नमो नमस्कुर्मः । अर्कस्य रूपं प्रकाशकत्वम्, चन्द्रस्याह्लादकत्वमग्नेरधृष्यत्वमिन्द्रस्यैश्वर्यकरत्वम्, वायोः श्रेष्ठत्वम्, यमस्य दुष्टजनदमने निर्घृणत्वम्, धर्मस्य पुण्यापुण्या विवेकवैशद्यम्, वरुणस्य गाम्भीर्यमित्येवंविधानकादिगुणान्समये त्वं प्रकाशसे, तस्मै विष्णुरूपाय तुभ्यं नमाम इति संदर्भार्थः ॥५१॥ जगद्रक्षणार्थमुत्पन्नत्वात्त्वयि हरेर्विशेषावेशो युक्त इत्यभिप्रेत्य व्यतिरेकमुखेन राजानं प्रशंसति त्रिभिः । न यदेति । हे नृप, त्वं जैत्रं जयशीलम्, मणीनां गणास्तैरर्पितः खचितस्तं रथम्, आस्थायाधिरुह्य, विस्फूर्जन्नादं कुर्वन् चण्डं कोदण्डं धनुर्यस्य सः । पाठान्तरे चण्डं च तत्कोदण्डं च तत् विस्फूर्जन्नित्यर्थः । रथेन अघांश्चोरान्पापिनो विरोधिनो वा त्रासयन्नुद्वेजयन् ॥ ५२ ॥ स्वेति । स्वसैन्यानां चरणैः क्षुण्णं संघाट्टितम्, भुवः पृथिव्याः मण्डलं वेपयन्कम्पयन्, मण्डलं महतीं सेनां विकर्षन्, अंशुमान्सूर्यः इव, न पर्यटसि यदा ॥ ५३ ॥

तदैवेति । हे राजन् तदैव वर्णाश्रमनिबन्धनाः वर्णाश्रमप्रयुक्ताः, भगवद्रचिताः स्वयं भगवतोत्पादिताः, सर्वे सेतवो धर्ममर्यादा, बतेति खेदे । दस्युभिर्धर्मविरोधिभिः, भिद्येरन् नश्येरन् इति त्रयाणामेकान्वयः ॥ ५४ ॥ अधर्म इति । व्यङ्कुशैः, निरङ्कुशैः, लोलुपैः केवलमर्थकामपरायणैः, नृभिः अधर्मश्च समेधेत वर्द्धेत । त्वयि शयाने न्यायान्याशून्ये सति, अयं दृश्यमानः लोकः, दस्युग्रस्तः सन्, विनङ्क्ष्यति नाशं यास्यति ॥ ५५ ॥ ऋषित्वाभिमानभङ्गभयात् किंचिज्जानन्निव कर्दमः कार्यविशेषं पृच्छति । अथापीति । अथापि तव पर्यटनस्योक्तार्थवत्त्वे सत्यपि, हे वीर, यदर्थं त्वम् इह आगतः, तत् त्वां पृच्छे । तद्यद-स्मत्साध्यं किंचित्कार्यं स्यात्तदित्यर्थः । वयं निर्व्यलीकेन निष्कपटेन प्रत्युत हर्षवतेत्यर्थः । हृदा चित्तेन प्रतिपद्यामहे-ऽङ्गीकुर्महे ॥ ५६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

——:❁:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वाविंशोऽध्यायः

मैत्रेय उवाच

एवमाविष्कृताशेषगुणकर्मोदयो मुनिम्। सव्रीड इव तं सम्राडुपारतमुवाच ह ॥ १ ॥

द्वाविंशे विष्णुना यद्वदादिष्टं कर्दमाय वै। देवहूतिं मनुः प्रादात् स्वां सुतामिति वर्ण्यते ॥ १ ॥

एवं कर्दमेनोक्तो मनुस्तमुवाचेत्याह मैत्रेयः। एवमिति। एवं गुणाश्च, कर्माणि च, गुणकर्माणि अशेषाणि निखिलानि च तानि गुणकर्माणि च तेषामुदयः आविष्कृतः प्राकट्यं प्राप्तः अशेषगुणकर्मोदयो यस्य, सः अत एव सव्रीडः स्वकीर्त्तिश्रवणाल्लज्जितः इव, स्थितः, सम्राट् मनुः, उपारतं निवृत्तिधर्मनिष्ठम्, तं मुनिम् उवाच हेति हर्षे ॥ १ ॥ उक्तिमेवाह त्रयोदशभिः। तत्र मदीयेयं कन्या परिणेयेति विज्ञापयिष्यंस्तावद्युष्मदस्मत्संबन्ध ईश्वरेण ब्रह्मणा पूर्वमेव संघटित इत्याह मनुः सार्द्धद्वयेन। ब्रह्म इति छन्दोमयो वेदप्रचुरः ब्रह्मा, स्वमुखतः निजवदनतः, तपः कर्मयोगश्च, विद्या भगवदुपासना च, योगो ज्ञानयोगश्च, तैर्युक्तास्तान् अलंपटान् विषयेष्वलालसान् युष्मान् वेदमयान्ब्राह्मणान्, आत्मपरीप्सया वेदमयस्यात्मनः रिरक्षया असृजत ॥ २ ॥ तदिति। सहस्रपात् सर्वतः पाणिपादादिकार्यकर्त्ता भगवान् दोःसहस्रात् भुजसहस्रात् अस्मान् क्षत्रियान्, तेषां ब्राह्मणानां त्राणं तत्त्राणं तस्मै ब्राह्मणानां संरक्षणायेत्यर्थः। असृजत् चोऽवधारणे। तस्य ब्रह्मणः ब्रह्म ब्रह्मकुलं हृदयम्, क्षत्रं क्षत्रिकुलम् अङ्गं प्रचक्षते हि ॥ ३ ॥

अत इति। अतः वेदपालनाय ब्राह्मणान् ब्राह्मणपालनाय; अस्मांश्च यतः सृष्टवानत इत्यर्थः। ब्रह्म वेदैकाधारोऽङ्गी ब्राह्मणः; क्षत्रं वेदाश्रयब्राह्मणरक्षकोऽङ्गं क्षत्रियश्च; अन्योन्यं मिथः आत्मानं रक्षतः। एवं परस्परं रक्षमाणमुभयमपीति शेषः। सदसदात्मकः कार्यकारणरूपः, एवं सत्यपि अव्ययः कार्यगतविकारैरस्पृष्टः, यः देवः सः रक्षति। स्मेति प्रसिद्धौ। यद्वा सदसदात्मकः चेतनाचेतनशरीरकः, अत एव अव्ययः न हि शरीरगतैर्विकारैः शरीरी स्पृश्यते। अन्यत्समानम् ॥ ४ ॥ तवेति। हे मुने, तव संदर्शनात् एव मे मम सर्वसंशयाः पृष्टव्यार्थविषयाः संदेहा छिन्नाः। यद्यस्मात् भगवानतिशयितैश्वर्ययुक्तः; स्वयं भगवानेव, रिरक्षिषोः प्रजाः पालयितुमिच्छोर्मम धर्मान् प्रीत्या आह 'न यदा रथमास्थाय' इत्यादिनोक्तवान् ॥ ५ ॥ दिष्ट्येति। अकृतात्मनामकृतसुकृतानां दुर्दर्शो द्रष्टुमशक्यः भगवानैश्वर्यसंपन्नः यस्त्वं मे मया दिष्ट्यास्मद्भाग्येन दृष्टः भवतस्तव शिवं मङ्गलकरं पादरजः मे मया; शीर्ष्णा शिरसा स्पृष्टम्। दिष्ट्या भद्रं जातम् ॥ ६ ॥ दिष्ट्येति। अहं त्वया अनुशिष्टः दिष्ट्या त्वयाहमनुशिक्षितो यत्तदपि भद्रमेव जातमित्यर्थः। महान् अनुग्रहश्चापि कृतः। अपावृतैरनावृतैः; कर्णरन्ध्रैः उशतीरुशत्यः कमनीया इत्यर्थः। गिरः भवद्वाचः जुष्टाः सेविताः श्रुता इत्यर्थः। तदपि दिष्ट्या ॥ ७ ॥ इत्थं स्वस्य कृतकृत्यतां निवेद्य तं प्रसन्नीकुर्वन् निजाभिप्रेतं निवेदयति सप्तभिः। स इति। दुहितरि सुतायां यः स्नेहस्तेन परिक्लिष्ट आत्मा मनो यस्य तस्य, अत एव दीनस्य, मम श्रावितं मया विज्ञापितमित्यर्थः। हे मुने स प्रसिद्धः भवांस्त्वं कृपया श्रोतुम् अर्हसि ॥ ८ ॥ किं तत्राह। प्रियव्रतेति। प्रियव्रतश्च उत्तानपादश्च तयोः स्वसा अनेन पुत्रिकाकरणशङ्का निरस्ता। मम मनोः दुहिता अनेन क्षत्रियकन्या तव योग्येति दर्शितम्। इयं देवहूतिः वयश्च शीलं च गुणाश्च ते आदयो येषां तैः युक्तं पतिम् अन्विच्छति अनेन स्वयंवरास्तीति सूचितम् ॥ ९ ॥ तदेव विशयदति। यदा त्विति। यदा तु यर्ह्येव एषा देवहूतिः नारदात् नारदोपदेशात् भवतः शीलं स्वभावश्च श्रुतमध्ययनं च रूपं वयश्च गुणाः शान्तत्वादयश्च उदयोऽभ्युदयश्च तान् अशृणोत् तर्ह्येव त्वयि कृतः निश्चयोऽस्य मुनेरेव भार्याहमिति निश्चयो यया सा आसीत् ॥ १० ॥

तदिति। तत्तस्मात् हे द्विजाग्र्य द्विजश्रेष्ठ मया श्रद्धया उपाहृतां समर्पितां ते तव गृहमेधेषु गार्हस्थ्येषु कर्मसु सर्वात्मना सर्वप्रकारैः अनुरूपामनुकूलाम् इमां मत्कन्यां प्रतिगृहाण ॥ ११ ॥ प्रतिग्रहप्रत्याख्यानशङ्कया तं प्रोत्साहयन्नाह त्रिभिः। उद्यतस्येति। उद्यतस्य हि दैवात्स्वतः प्राप्तस्यैव कामस्य विषयाभिलाषस्य प्रतिवादः प्रत्याख्यानम्, निर्मुक्तसङ्गस्य विषयसङ्गमनिच्छतोऽपि न शस्यत योग्यो न भवतीत्यर्थः। कामरक्तस्य कामासक्तस्य किं पुनः। प्रतिवादो न शस्यते इति किं पुनर्वक्तव्यमित्यर्थः ॥१२॥ प्रतिवादविधाने किं स्यात्तत्राह। य इति—यः पुमान् उद्यतं स्वतः संप्राप्तम्, कामं स्वाभिलाषम् अनादृत्य पश्चात् कीनाशं कृपणम् अभियाचते स्फीतं प्रवृद्धमपि तद्यशः तस्य पुंसो यशः क्षीयते नश्यति। अवज्ञया परकृता परकृतावमानेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मानः बहुमानश्च हृतः विनष्टो भवेत् ॥ १३ ॥ ननु सत्यं त्वदुक्तं सर्वं परिवोढुकामस्याहं तु न तादृश इत्यत्राह। अहमिति। हे विद्वन् अहं त्वा त्वाम् उद्वाहार्थं परिणयनार्थम् समुद्यतं यतमानम् अश्रृणवम्। अतस्तस्माद्धेतोः त्वम् उपकुर्वाणः नैष्ठिकेतरब्रह्मचारी सावधिकब्रह्मचर्यवानिति यावत्। असि। ततः मे मया प्रत्ताम् दत्तां कन्यां प्रतिगृहाण ॥ १४ ॥ एवं मनुना विज्ञापितः कर्दमस्तदुक्तमङ्गीकुर्वन्नाह। बाढमिति षड्भिः। बाढमित्यङ्गीकारे। हे मनो अहम् उद्वोढुकामः अस्मि। तव आत्मजा पुत्री चापि अप्रत्ता कस्मैचिदप्यप्रतिश्रुता च। आवयोः असौ आद्यः ब्राह्मो विवाहः आहूय दीयते शक्त्यलंकृता इत्यादिना याज्ञवल्क्येनोक्तेष्वष्टविधविवाहेष्वाद्यः ब्राह्मसंज्ञिकः वैवाहिकः विवाहसंबन्धी विधिः अस्ति। अतः अनुरूपो योग्य एव अस्तु इति शेषः ॥ १५ ॥ काम इति। हे नरदेव ते तव अस्याः पुत्र्याः यः कामः विवाहः समाम्नायविधौ वेदरूप-भगवच्चोदानायां प्रतीतः प्रख्यातः गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या इत्यादिमन्त्रप्रसिद्धः स कामः भूयात् सम्यक् भवेत्। एवं तद्विज्ञापितमनुमत्य नाहं त्वत्प्रोत्साहनेन प्रतिग्रहीष्याम्यपि त्वस्याः सौन्दर्यवयःशीलादीन् श्रुत्वाऽस्यामेव कृतनिश्चयो भगवदादिष्टश्च प्रतीच्छ इति वदंस्तां वर्णयेति। क इत्यादिना। स्वया आभरणाभिर्विना भूतया एव कान्त्या सौन्दर्येण श्रियं भूषणादिकृतशोभाम् क्षिपतीम् इव स्थिताम् भूषणाङ्गीमित्यर्थः। ते सार्वभौमस्य तव तनयां क एव को नाम नाद्रियेत न मानयेत् ॥ १६ ॥

यामिति। किं च हर्म्यपृष्ठे प्रासादोपरि क्वणतोर्नूपुराभ्यां शब्दं कुर्वतोरङ्घ्र्योः पादयोः शोभा यस्याः ताम् विक्रीडतीं विशेषतः क्रीडामाचरन्तीम् कन्दुके विह्वले चञ्चले अक्षिणी यस्यास्ताम् यां त्वत्कन्यां विलोक्य संमोहेन विमूढं व्याकुलं चेतश्चित्तं यस्य सः विश्वावसुर्नाम कश्चिद्गन्धर्वः स्वात्स्वकीयात् विमानात् न्यपतत् ॥ १७ ॥ तामिति। प्रार्थयन्तीं पतिमिति शेषः। ललनानां ललामं योषितां श्रेष्ठभूषणभूताम् अतिश्रेष्ठामित्यर्थः। असेवितावनुपासितौ श्रिया: लक्ष्म्याश्चरणौ यैस्तैः। अदृष्टां द्रष्टुमप्ययोग्याम् मनोः तव तु वत्सां पुत्रीम् उत्तपदः उत्तानपादाख्यस्त्वत्पुत्रस्य स्वसारं भगिनीम् अभियातां स्वयमेव प्राप्ताम् तामिमां देवहूतिम् बुधः कुशलः कः को नाम जनः नानुमन्येत नाङ्गीकुर्यादित्युभयोरेकसंबन्धः ॥ १८ ॥ अत इति। अत उक्तहेतुभ्यः इयं मे मम तेजो वीर्यम् आत्मनो देहस्य सामर्थ्येनेति शेषः। आत्मनस्तृतीयार्थे षष्ठी वा। यावत् बिभृयात् तावता समयेन कालेन साध्वीमिमां भजिष्ये स्वीकरिष्ये। अपत्यजननावधि स्वीकरिष्ये इत्यर्थः। अतोऽतः परं तु पारमहंस्ये परमहंसाश्रमे मुख्या प्राधान्येनोपादेयास्तान्। शुक्लप्रोक्तान्स्वयं भगवता कथितान् अवहिंस्रान् हिंसारहितान् धर्मान् विवेक-विमोकादीन्सात्त्विकवृषान् बहु मन्ये अनुष्ठास्यामि। अपत्योत्पत्त्यनन्तरं निवृत्तिधर्मनिष्ठोऽहमिमां त्यक्ष्यामीति भावः ॥ १९ ॥ अयं भाषाबन्धो न केवलं मयैव कृतः किं तु समस्तजगदुदयविभवलयलीलेन भगवतैव निर्दिष्ट इत्याह। यत इति। इदं देवतिर्यङ्मनुष्यस्थावरादिभेदेन युक्तम् अत एव विचित्रं विश्वम् यतो भगवतः अभवदुदपद्यत यत्र यस्मिन्कारणभूते भगवति संस्थास्यते संहारं यास्यति यत्र च वा यस्मिन्नन्तः प्रविश्य प्रशासनेन धारके भगवत्येव अवतिष्ठते प्रशासितव्यत्वेन धार्यत्वेन प्रतितिष्ठतीत्यर्थः। स एषः प्रजापतीनां ब्रह्मादीनामपि पतिः। अनन्तः सत्यं ज्ञानमनन्तम् इति श्रुत्युक्तलक्षणः भगवान् मह्यं मम परं केवलं प्रमाणम्। अस्मदुक्तभाषाबन्धे तेनैवाभिहितत्वात्स एव प्रमाणभूत इत्यर्थः ॥ २० ॥ कर्दमोक्तिमुपसंहरति मैत्रेयः। स इति। हे उग्रधन्वन् विदुर स कर्दमः इयदेव एतावदेव आबभाषे उक्तवान्। तदनन्तरम् अरविन्दनाभं भगवन्तम् धिया उपगृह्णन् तूष्णीं जोषं च आसीत् आस्थितवान्। स्मितेन मन्दहासेन शोभितं तेन मुखेन मन्दहासोपेतकर्दमानन-विलोकनेनेत्यर्थः। देवहूत्याः चेतो मनः लुलुभे मोहितमभूत ॥ २१ ॥

स इति। ततः स मनुः महिष्याः शतरूपाख्यस्वभार्यायाः दुहितुः स्वपुत्र्या देवहूत्याश्च व्यवसितं निश्चितं स्फुटं व्यक्तं यथा भवति तथा ज्ञात्वा अनन्तरम् गुणानां गणाः समूहास्तैराढ्यो युक्तस्तस्मै तस्मै कर्दमाय तुल्यां योग्यां कन्यां प्रहर्षितः सन् ददौ दत्तवान् ॥ २२ ॥ शतरूपेति। महाराज्ञी महाराजस्य मनोः पत्नी शतरूपा महाधनान्महामूल्यान् पारिबर्हानुपायनरूपान् भूषा आभरणानि च वासांसि वस्त्राणि च परिच्छदाः क्रीडोपकरणानि च तान् प्रीत्या दम्पत्योः दुहितृजामात्रोः पर्यदात् ॥ २३ ॥ प्रत्तामिति। किं च सदृक्षाय सदृशाय प्रत्तां दत्ताम् दुहितरं सम्राट् मनुः गतव्यथः निरस्त-दुहितृपत्यन्वेषणदुःखः बाहुभ्याम् उपगुह्य आलिङ्ग्य औत्कण्ठ्येन पुत्र्यां प्रेमातिशयेन उन्मथितः क्षुभितः आशयोऽन्तःकरणं यस्य सः ॥ २४ ॥ अशक्नुवन्निति। अत एव तस्याः दुहितुः विरहः विश्लेषस्तम् अशक्नुवन् सोढुमिति शेषः। अत एव मुहुः बाष्पकलाः नेत्राम्बुकणान् मुञ्चन् हे अम्ब हे वत्सेति संबोधयन् संधिरार्षः। नेत्रोदैर्नयनाम्बुभिः दुहितुः शिखाः आसिञ्चन् इति द्वयोरेकसंबन्धः ॥ २५ ॥ आमन्त्र्येति। मुनिवरं तं कर्दमम् आमन्त्र्य साधु याम इति मुन्याज्ञामुपादायेत्यर्थः। अनुज्ञातो मुनिना कृताज्ञः सभार्यः पत्नीसहितः रथम् आरुह्य नृपः मनुः सहानुगः स्वपरिचारकसहितः सन् स्वपुरं प्रति प्रतस्थे गतवान् ॥ २६ ॥ गच्छन्तं मनुं वर्णयति। उभयोरिति द्वाभ्याम्। ऋषिकुल्यायाः ऋषिकुलहितायाः सरस्वत्याः नद्याः उभयोः

३१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरोधसोः शोभनतटयोः उपशान्तानां शमदमादिगुणसंपन्नानाम् ऋषीणाम् आश्रमेषु संपदो भगवदाराधनोपयुक्ततुलसी-पुष्पफलादिसमृद्धीः पश्यन् प्रतस्थे इति पूर्वेणान्वयः ॥ २७ ॥ तमिति । आयान्तमागच्छन्तं तं पतिं मनुम् अभिप्रेत्य ज्ञात्वा प्रजाः प्रहर्षिताः सत्यः ब्रह्मावर्त्तादेशात् गीतसंस्तुतिवादित्रैः संगीतस्तवनमृदङ्गादिवाद्यध्वनिभिः प्रत्युदीयुः प्रत्युज्जग्मुः । पाठान्तरे ब्रह्मावर्त्तान् प्रत्यायान्तं प्रजानां पतिं मनुम् ब्रह्मावर्त्तस्था लोकाः प्रत्युदीयुरित्यन्वयः ॥ २८ ॥

पुरं प्रतस्थे इत्युक्तं कासौ पुरी सापि कुत्रेत्यत्राह । बर्हिष्मतीति । यत्र यज्ञस्यादिवराहस्य अङ्गं शरीरं विधुन्वतः सतः रोमाणि तनूरुहाणि न्यपतन् । तत्र सर्वाभिः संपद्भिरैश्वर्यैः समन्विता युक्ता बर्हिष्मती नाम पुरी बर्हिष्मतीति नाम्ना प्रसिद्धा नगर्यस्तीत्यर्थः ॥ २९ ॥ पतितानि तद्रोमाणि किमासन्नित्यत्राह । कुशा इति । ते एव पतितानि तानि रोमाण्येव विधेयप्राधान्यात्पुंस्त्वनिर्देशः । शश्वत्सदा हरितवर्चसः हरिद्वर्णाः कुशाः काशाश्च आसन्नुत्पन्नाः । कस्तेषामुपयोग इत्यत्राह । यैः कुशैः काशैश्च ऋषयो मुनयः यज्ञघ्नान् यज्ञविरोधिनः राक्षसान् पराभाव्य यज्ञम् ईजिरे कृतवन्तः । पाकं पचतीति-वन्निर्देशः । यद्वा यज्ञं यज्ञमूर्त्तिभगवन्तम् ईजिरे इष्टवन्तः । भगवदाराधनहेतुकयज्ञेषु उपयुक्ततोपेता इत्यर्थः ॥ ३० ॥ कुशेति । कुशादीनामेवंभूतमहिमवत्त्वाद्धेतोः भगवान् परमेश्वरैश्वर्योपेतः मनुः कुशकाशमयं कुशकाशस्वरूपं बर्हिः आस्तीर्य यतो वराहाद्भगवतः भुवः भूसंबन्धि स्थानं प्रतिष्ठाम् लब्धा लब्धवान्सन् तमेव यज्ञपुरुषम् अयजत् यज्ञैराराधितवान् । यत्कुशकाशरूपबर्हिषां युक्तत्वमिदमेव बर्हिष्मतीशब्दस्य प्रवृत्तिनिमित्तमित्युक्तं भवति ॥ ३१ ॥ बर्हिष्मतीमिति । विभुर्मनुः यां बर्हिष्मतीं नाम पुरीम् निर्विश्य पूर्वं समावसत् तस्यां पुर्यां तापत्रयविनाशनमाध्यात्मिकाधिभौतिकाधिदैविकरूपतापत्रय-रहितं भवनं स्वगृहं प्रविष्टः सभार्यः पत्नीसहितः सप्रजः सपुत्रश्च सन् अन्याविरोधतः वर्णाश्रमप्रयुक्तभगवदाराधनरूपधर्मा-विरोधेन कामान् बुभुजे अनुबभूव ॥ ३२ ॥ एतदेव प्रपञ्चयति । संगीयमानेत्यादिषड्भिः । सस्त्रीभिः सुरगायकैः संगीयमाना सती कीर्त्तिर्यस्य सः प्रत्यूषेषु प्रत्युषःसु अनुबद्धेन प्रेमानुबद्धेन हृदा मनसा हरेः कथाः शृण्वन् कामान् बुभुजे इति पूर्वेणान्वयः ॥ ३३ ॥

निष्णातमिति । मुनिं शुभाश्रयसंशीलनपरम् भगवत्परं भगवद्गुणानुचिन्तनपरम् स्वायंभुवं मनुं योगमायासु भगवदाश्चर्यशक्तिकार्येषु कामेषु निष्णातं प्रवीणमपि भोगाः यद्यस्मात् आभ्रंशयितुमीषदपि पातयितुं न शेकुः समर्था नाभूवन् ॥ ३४ ॥ अयातेति । अतः विष्णोः कथाः शृण्वतः ब्रुवतः कथयतः कुर्वतः भगवदाराधनमिति शेषः । ध्यायतः विष्णुमिति शेषः । तस्य मनोः स्वान्तरं मन्वन्तराख्यकालं यापयन्तीति तथाभूताः यामाः कालावयवाः प्रहराः अयातयामाः सफलाः आसन् । यामा इत्यनेनैकस्मिन्नपि यामे भगवदाराधनाऽभावराहित्यं सूचितम् । इति द्वयोरेकसंबन्धः ॥ ३५ ॥ स इति । स मनुः एवममुना प्रकारेण भगवत्कथाश्रवणकीर्त्तनतद्ध्यानतदाराधनादिभिरित्यर्थः । युगानां एकसप्ततिम् एकसप्तति-युगपरिमाणमित्यर्थः । स्वान्तरं स्वकीयान्तरकालम् वासुदेवप्रसङ्गेनभागवति प्रकृष्टासत्त्या परिभूतं गतित्रयं येन सः ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः इति गतित्रयं स्वयं भगवतैव गीतमस्ति । एवंविधः सन् निन्ये यापयामास ॥ ३६ ॥ उक्तार्थमेव विशदयति । शारीरा इति । हे वैयासे व्याससूनो विदुर शारीरा व्याधिरूपाः मानसा आधिरूपाः क्लेशाः एते आध्यात्मिकाः क्लेशाः दिव्या देवकृताः शीतोष्णादिप्रभवाः एते आधिदैविकाः क्लेशाः भौतिकाः शत्रुव्याघ्रचौरसर्पादिभूतप्रभवाः एते आधिभौतिकाः । एतेभ्योऽन्ये च ये सर्वे मानुषा मनुष्यैरनुभाव्याः क्लेशाः ते हरिः संश्रय आश्रयो यस्य तम् कथं बाधन्ते बाधेरन्नित्यर्थः । स्वसमाश्रितक्लेशहरपरमेश्वराश्रयं मनुं न कथंचिदपि बाधेरन्नित्यर्थः ॥ ३७ ॥ हरिसंश्रयमित्यनेन सूचितं तस्य ज्ञानातिशयमाह । य इति । सदा सर्वभूतहितः यो मनुः मुनिभिः पृष्टः सन् वर्णाश्रमाणां वर्णाश्रमवतां नृणां चकारात्संकरजातीनां च नानाविधान् शुभान् स्वर्गापवर्गसाधन-भूतान् धर्मान् प्राह ॥ ३८ ॥ एवं वर्णितं मनुचरितं निगमयंस्तदपत्यचरित्रमवतारयति । एतदिति । वर्णनीयस्य कथनीयकीर्त्तेः आदिराजस्य मनोः अद्भुतं विस्मयनीयम् एतत् चरित्रं ते तुभ्यं वर्णितम् । मयेति शेषः । अथ तस्य मनोरपत्यं देवहूतिस्तस्योदयः प्रभावस्तम् तदुत्कर्षं वा शृणु । मत्त इति शेषः ॥ ३९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायाम-न्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥

—:※:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रयोविंशोऽध्यायः

मैत्रेय उवाच

पितृभ्यां प्रस्थिते साध्वी पतिमिङ्गितकोविदा। नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुम् ॥ १ ॥

विमाने कामगे योगनिर्मिते सर्वसंपदि। त्रयोविंशे तयोश्चित्रा दम्पत्योः कथिता रतिः ॥ १ ॥

तदपत्योदयं शृण्विति प्रतिज्ञातमेव वर्णयितुमारभते मैत्रेयः। पितृभ्यामिति। पितृभ्यां मनुशतरूपाभ्याम्, प्रस्थिते गमने कृते सति साध्वी पतिव्रता इङ्गितकोविदा पत्युरभिप्रायज्ञा देवहूतिः, प्रभुमीश्वरं भवं शिवं भवानी गिरिजा इव पतिं स्वस्वामिनं कर्दमं नित्यं प्रीत्या पर्यचरत् आराधितवती ॥ १ ॥ एतदेव प्रपञ्चयति द्वाभ्याम्। विश्रम्भेणेति। भो विदुर विश्रम्भेण स्वपत्युः सामर्थ्यातिशयविश्वासेन आत्मशौचेनान्तःकरणशुद्ध्या शमेनेत्यर्थः। गौरवेण सर्वातिशयया बुद्ध्या दमेन बाह्येन्द्रियनिग्रहेण शुश्रूषया हिताहितयोः श्रोतुमिच्छया सौहृदेन सौहार्देन मधुरया वाचा च अतोषयच्च प्रीणयामासैवेत्युत्तरेणान्वयः ॥ २ ॥ विसृज्येति। कामं विषयेच्छां दम्भं कापट्यम् आत्मन्यविद्यमानमाहात्म्यप्रकटनमित्यर्थः। द्वेषं स्वाम्याज्ञायामप्रीतिं लोभं कस्यापि वस्तुनो गृध्नुतां अघं पापव्यसनम् मदं गुणरूपादिगर्वं विसृज्य त्यक्त्वा अप्रमत्ता अनवधानतारहिता उद्यता पतिनिदेशाचरणोद्युक्ता च सती तेजीयांसमतितेजःसंपन्नं पतिं नित्यम् अतोषयत् प्रीणयामास ॥ ३ ॥ स इति। देवर्षिवर्यः देवर्षिषु श्रेष्ठः स वै कर्दमस्तु, समनुव्रतामनुवर्त्तमानाम् मानवीं मनोः पुत्रीं दैवात् देवतोऽपि गरीयसः दैवादपिगुरुतरात् दैवमप्यन्यथा कर्त्तुं समर्थादित्यर्थः। पत्युः स्वभर्त्तुः सकाशात् महाशिषः धर्मादिपुरुषार्थचतुष्टयाप्तिरूपाः आशासानां प्रार्थयन्तीम् पाठान्तरे अपत्यप्राप्तिरूपां महतीमाशिषम् आशासानाम् ॥ ४ ॥ कालेनेति। व्रतचर्यया पातिव्रत्येन कर्शितां कृशतां प्राप्ताम् तत्रापि भूयसा बहुना कालेन क्षामामतिकृशाङ्गीं तां देवहूतिं प्रेम्णा स्नेहातिशयेन गद्गदा गद्गदस्वरा तया वाचा गिरा पीडितः मुखात्सम्यगविनिःसृतवाक् सन्नित्यर्थः। कृपया अब्रवीत्। इति द्वयोरेकान्वयः ॥ ५ ॥ यदब्रवीत्तदाह त्रिभिः। तुष्ट इति। हे मानवि मनोः सुते मानिनि इति पाठे हे अङ्गने मानदाया मह्यं बहुमानप्रदात्र्याः तव परमया सर्वोत्तमया शुश्रूषया बहुकालकृतमत्सेवया परयोत्तमया भक्त्या च अद्य अहं तुष्टस्तुभ्यं प्रीतोऽस्मि। कुतः। देहिनाम् अतीव सुहृत् प्रियतमः अयं यः स्वदेहः समुचितः श्लाघ्यः सन्नपि मदर्थे क्षपितुं कर्शितुम्, न अपेक्षितः उपेक्षितः। उचितमपि स्वदेहमनादृत्य स मदर्थं क्षपित इत्यर्थः ॥ ६ ॥

ये इति। स्वधर्मनिरतस्य निजवर्णाश्रमाचारेषु नितरां सक्तस्य मे मम तपः कर्मयोगश्च समाधिश्चित्तैकाग्र्यं च विद्या भगवदुपासना च आत्मयोगः प्रकृतिविविक्तात्मयाथात्म्यता च तैर्विजिता मया लब्धाः। भगवत्प्रसादा भगवत्प्रसादहेतुकाः ये भोग्यभोगोपकरणभोगस्थानादयः तान् एव न विद्यते भयं येषां तान् यावद्भोगाभिलाषं नङ्क्ष्यन्तीति भयवर्जितानित्यर्थः। अत एव अशोकानशोच्यान् मदनुसेवनया मत्सेवया अवरुद्धांस्त्वया वशीकृतान् प्रपश्य। ते तव दृष्टिं दिव्यां दृशम्, वितरामि ददामि यया दृष्ट्या द्रक्ष्यसीति शेषः ॥ ७ ॥ स्वदत्तभोगेभ्य इतरभोगानां तुच्छत्वं वदन्स्वसंपादितानामेव सर्वोत्तमत्वमाह। अन्य इति। उरुक्रमस्य भगवतः भ्रुवो भृकुट्याः उद्विजृम्भो वक्रीभावेन विक्षेपस्तेन विभ्रंशिता विनाशिता अर्थरचनाः प्रयोजनाभिलाषा येषां ते अन्ये मत्प्रदर्शितभोगेभ्य इतरे पुनः किम्। तैः किम्। अतितुच्छास्ते इत्यर्थः। यतः त्वं सिद्धासि। पतिपरायणादिधर्मैर्मदनुग्रहविषयासि यतस्त्वं तत इत्यर्थः। निजधर्मैः पतिपरायणादिभिः दुह्यन्ते प्रपूर्यन्ते साध्यन्ते इति यावत्। तान् दिव्यानमानुषान् नृपाणां सार्वभौमानामपि विक्रिया अश्वमेधाद्या विशिष्टाः क्रियास्ताभिः करणैः नरैस्त्वदितरजनैः कर्तृभिः दुरधिगान् दुःखेनाप्यनधिगम्यान् विभवान् भोगविस्तारान् भुङ्क्ष्व अनुभव ॥ ८ ॥ भर्त्रैवमुक्ता देवहूतिस्तमुवाचेत्याह मैत्रेयः। एवमिति। एवममुना प्रकारेण ब्रुवाणं भाषमाणम्, अखिलाः समग्राः याः योगमाया विचित्रसर्गकारिस्वसंबन्धिसामर्थ्यापरपर्यायाः शक्तयस्तासां विद्या स्वकार्यकरणप्रवर्त्तनानुगुणं ज्ञानम्, तस्मिन्विचक्षणो निपुणस्तं पतिम् अवेक्ष्य अबला देवहूतिः गताधिर्विगतमनोव्यथा आसीत्। ततः संप्रश्रयो विनयश्च प्रणयः प्रेमातिशयश्च ताभ्यां विह्वला गद्गदा तया गिरा वाचा ईषद्व्रीडासहितो योऽवलोकस्तेन विलसद्धसितं यस्मिंस्तदाननं मुखं यस्याः सा एवंभूता सती आहोवाच ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवहूत्युक्तिमेवाह द्वाभ्याम्। राद्धमिति। हे द्विजवृष ब्राह्मणोत्तम अमोघाः सप्रयोजनाः या योगमायाः पूर्वोक्तास्तासामधिपस्तस्मिन् विभौ त्वयि एतत्त्वदुक्तं सर्वं राद्धं सिद्धमेव। इति तत् अवैमि जानामि। बतेति हर्षे। हे भर्त्तः ते त्वया यः सकृदपत्यजननपर्यन्तमङ्गसङ्गो यस्मिंस्तथाभूतः समयः कालः अभ्यधाय्यभिहितः सः भूयात्। यस्मात् गरीयसि पत्यौ सति सतीनां प्रसवः प्रजोदयः गुणः महान् लाभः भवति। पाठान्तरे गुणप्रसवः गुणविस्तारः भवति। अतः पुत्रोत्पत्त्या गुणविस्तारे जाते सति 'दृष्टिं प्रपश्य वितरामि' इति यदुक्तं तत्सव भवत्विति भावः ॥ १० ॥ अङ्गसङ्गार्थमिति कर्तव्यतां च संपादयेत्याह। तत्रेति। हे ईश तत्राङ्गसङ्गे इतिकृत्यमितिकर्त्तव्यतां साधनकलापमिति यावत्। यथोपदेशं कामतन्त्रोक्तानुसारेण उपशिक्ष संपादय। किं तदितिकृत्यं यदुपशिक्षणीयं तत्राह। ते त्वया कृत उत्पादितश्चासौ मनोभवः कामस्तेन धर्षिता तस्याः मे मम अतिरिरंसया भृशं रन्तुमिच्छया कर्शितः कर्शितः अत एव दीनः एषः आत्मा देहः येन अभ्यङ्गभोजनपानादिसाधनात्मकेन कृत्येन सिद्ध्येत रतिसमर्थो भवेत्। कार्श्यदैन्यादिपरिहारेण स्वस्थो भवेत्तदितिकृत्यमुपशिक्षयेत्यर्थः। तत्तत: सदृशमनुरूपं भवनं भोगस्थानम् इदं भोग्यादीनामप्युपलक्षणम्। विचक्ष्व कल्पय ॥ ११ ॥ एवमुक्तः कर्दमो भोग्यादीनसृजदित्याह मैत्रेयः। प्रियाया इति। हे क्षत्तः प्रियाया भार्यायाः प्रियं अन्विच्छन् कर्तुमिति शेषः। कर्दमः योगमुक्तप्रकारां योगमायाम् आश्रितः सन् कामं यथेच्छं गच्छतीति कामगं विमानं तर्ह्येव तत्क्षणमेव आविरचीकरदाविर्भावयामास ॥ १२ ॥ तदेव विमानं वर्णयति नवभिः। सर्वेति। सर्वकामदुघं सर्वाभिलषितपूरकम् दिव्यममानुषम् सर्वाणि च तानि रत्नानि च तैः समन्वितम् सर्वाः सकलाश्च ता ऋद्धयः संपदस्तासामुपचयस्तस्य उदर्कः उत्तरोत्तराभिवृद्धिर्यस्मिंस्तत् मणिस्तम्भैर्मणिमयस्थूणाभिः उपस्कृतमलंकृतम् ॥ १३ ॥ दिव्येति। दिव्यानि कुलालादिरचनारहितानि यानि उपकरणानि भाण्डादिगृहसाधनानि तैरुपेतं युक्तं सर्वेषु कालेषु शीतोष्णवर्षासु सुखमेवावहतीति तथाभूतं विचित्राभिः पट्टिकाभिः अल्पविस्तारपट्टवस्त्रविशेषैः पताकाभिः सविस्तारपट्टवस्त्रविशेषैः अलंकृतं संशोभितम् ॥ १४ ॥

स्रग्भिरिति। विचित्राणि माल्यानि मालानिर्माणयोग्यानि पुष्पाणि यासु ताभिः मञ्जु मधुरं यथा तथा शिञ्जन्तो ध्वनन्तः षडङ्घ्रयो भ्रमरा यासु ताभिः स्रग्भिर्मालाभिः दुकूलानि पार्वतीयोन्दुरुलोमजानि च क्षौमान्यतसिकातन्तुभवानि च कौशेयानि कीटकोशोत्थिततन्तुकृतानि च तैः नानावस्त्रैः विचित्रशिल्पवद्भासोभिः विराजितं संशोभमानम् ॥ १५ ॥ उपरीति। उपर्युपरि उपरिष्टादुपरिष्टाद्विन्यस्ता रचिताश्च ते निलया गृहाणि तेषु पृथक् पृथक् क्षिप्तैरास्थापितैः कशिपुभिः शय्याभिः तथा पर्यङ्कव्यजनासनैश्च कान्तं कमनीयम्। तत्र पर्यङ्काः खट्वाविशेषाः। व्यजनानि वालव्यजनादीनि वातक्षेपसाधनानि। आसनानि सिंहासनप्रभृतीनि ॥ १६ ॥ तत्रेति। तत्र तत्र तासु तासु भित्त्यादिषु विनिक्षिप्तानि यानि नानाविधानि शिल्पानि तैरुपशोभितम्। महान्तो महामूल्याश्च ते मरकता इन्द्रनीलमणयस्तेषां स्थलीभूमिस्तस्याम् विद्रुमवेदिभिः रक्तमणिवेदिकाभिः रचिताभिरिति शेषः। जुष्टं युक्तं पाठान्तरे तया ताभिश्च युक्तमित्यर्थो बोध्यः ॥ १७ ॥ द्वाःस्विति। द्वाःसु द्वारेषु विद्रुमदेहल्या प्रवालमयोदुम्बरेण भातं शोभितम्। वज्रकपाटवत् हीरकनिचितकपाटयुक्तम् इन्द्रनीलेष्विन्द्रनीलमणिमयेषु शिखरेषु शृङ्गेषु हेमकुम्भैः सुवर्णमयकलशैः अधिश्रितं समाश्रितम् ॥ १८ ॥ चक्षुष्मदिति। वज्रभित्तिषु हीरकमयकुड्येषु निर्मितैः रचितैः चक्षुष्मन्तः मेषोन्मेषं कुर्वन्त इव ये पद्मरागाग्र्याः पद्मरागमणिश्रेष्ठाः तैः युक्तम्। तथा विचित्रवैतानैर्नानावर्णोल्लोचसमूहैः महार्हैरनर्घ्यैः हेमतोरणैः सुवर्णमयतोरणैश्च जुष्टम् ॥ १९ ॥ हंसेति। कृत्रिमान् शिल्पक्रियानिर्मितान् हंसादीनपि स्वान् स्वसजातीयान् मन्यमानैः हंसपारावतव्रातैः हंसानां पारावतानां च समूहैः तत्र तत्र अधिरुह्याधिरुह्य च निकूजितम् ॥ २० ॥ विहारेति। यथोपजोषं यथासुखं रचितैः कल्पितैः विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः आत्मनः मायाविनोऽपि स्वस्य विस्मापनं विस्मयजनकमिव अवस्थितम्। आविरचीकरदिति पूर्वेणान्वयः। तत्र विहारस्थानं क्रीडाप्रदेशः विश्रामः शयनगृहम् संवेश उपभोगस्थानम् प्राङ्गणं गृहाद्बहिःप्रदेशः अजिरं गृहबाह्यसंस्कृतभूमिः ॥ २१ ॥

ईदृगेवंविधं तत् गृहं विमानात्मकं सौधम्, नातिप्रीतेन अनतिसंतुष्टेन, चेतसा पश्यन्तीं मलिनदेहत्वात्परिचारिकाभावाच्च उन्मनस्कतया निरीक्ष्यमाणामित्यर्थः। प्रियां देवहूतीं सर्वभूतानामाशयमभिप्रायं जानातीति तथाभूतः कर्दमः प्रावोचत् ॥ २२ ॥ निमज्ज्येति। हे भीरु इदं तीर्थं शुक्लकृतं शुक्लेन भगवता विहितम् आनन्दाश्रुनिपातेन संपादितमस्तीत्यर्थः। नृणाम् आशिषां काङ्क्षितानां प्रापकम् अस्ति अतः अस्मिन् ह्रदे बिन्दुसरसि निमज्ज स्नाहि। इदं विमानं च आरुहाधिरुह ॥२३॥ सेति कुवलयेक्षणा कमलनयना सा देवहूतिः भर्तुः कर्दमस्य तत् वचः समादाय गृहीत्वा सरजं मलिनं वासो वस्त्रम् वेणीभूतान् मूर्द्धजान्केशांश्च बिभ्रती ॥ २४ ॥ अङ्गमिति। मलपङ्केन मलरूपकर्दमेन संछन्नं विच्छुरितम् अत एव शबलौ विवर्णौ स्तनौ अङ्गं शरीरं च बिभ्रती सती शिवानां किर्मलानां जलानामाशयं आश्रयभूतं सरस्वत्याः संबन्धि सरस्वतीमध्यस्थमित्यर्थः। पाठान्तरे सरस्वत्या नद्या परिश्रितमिति शेषः। सरो बिन्दुसरोवरमित्यर्थः। आविवेश प्रवेशं कृतवतीत्यर्थः इत्युभयोरेसबन्धः ॥ २५ ॥ सेति। सा देवहूतिः अन्तःसरसि सरोजलमध्ये निमग्ना सतीति शेषः। वेश्मस्थाः जलान्तःस्थमन्दिरान्तःस्थाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दश शतानि सहस्रपरिमिताः किशोरवयसः षोडशवर्षमितवयसः उत्पलस्य कमलस्येव गन्धो देहपरिमलो यासां ताः ददर्श ॥२६॥ तामिति। तां देवहूतिं दृष्ट्वा स्त्रियः दशशतान्यपि ता अङ्गना इत्यर्थः। सहसा आशु उत्थाय जलस्थवेश्मनो बहिर्निर्गत्येति शेषः। प्राञ्जलयः कृतकरसंपुटाः सत्यः वयं सर्वाः तुभ्यं तव कर्मकरीः किंकरीः कर्मकर्यो भवाम इत्यर्थः। अतः नोऽस्मान् शाधि अनुशिक्षय किं करवाम दास्यमाचराम इत्यर्थः। इति प्रोचुः ॥ २७॥ स्नानेनेति। मनस्विनीं सांप्रतं तु स्नानविधापनं प्रकृतं दास्यमित्येवंभूतमनः संकल्पवतीमित्यर्थः। तां देवहूतिं महार्हेण श्रेष्ठतमत्वद्बहुमूल्येन स्नानेन स्नानयोग्येन सुगन्धितैलादिना तन्मर्दनपूर्वमित्यर्थः। स्नापयित्वा मानदाः देवहूत्यै बहुमानप्रदात्र्यः स्त्रियः अस्यै देवहूत्यै निर्मले मलवर्जिते नूत्ने नवीने दुकूले वाससी च, ददुर्दत्तवत्यः ॥ २८॥

भूषणानीति तथा परार्ध्यानि श्रेष्ठतमानि द्युमन्ति दीप्तिमन्ति वरीयांसि वरीयस्त्वात्तत्प्रियाणि भूषणान्याभरणानि सर्वगुणोपेतं षड्रसोपेतम् अन्नम् अमृतासवममृतवत्स्वादु आसववन्मादकं च पानं पेयपदार्थं समर्पयामासुः एव ॥ २९॥ अथेति अथानन्तरं असौ देवहूतिः स्वं स्वकीयम् आत्मानम् आदर्शे परिचारिकाप्रदर्शितमुकुरे स्रग्विणं नानाविधहारधरं विरजाम्बरं परिधृत-निर्मलवसनं विरजं मलहीनं कृतं स्वस्त्ययनं मङ्गलाचरणं यस्य तं कन्याभिः बहु मानितं संमानितं ददर्शेति शेषः ॥ ३०॥ तं तदात्मानं विशिनष्टि त्रिभिः। स्नातमिति। स्नातमुद्वर्त्तनक्षालितं कृतं शिरःस्नानमभ्यङ्गो यस्य तम् सर्वाणि यान्याभरणानि तैर्भूषितोऽलंकृतम् एतदेव प्रपञ्चयति। निष्कं पदकं ग्रीवायां यस्य तम् वलयानि सन्ति अस्य तम् कूजन्ती काञ्चने स्वर्णमये नूपुरे यस्य तम् ॥ ३१॥ श्रोण्योरिति। श्रोण्योर्नितम्बयोः अध्यस्तया धृतया काञ्चन्या सौवर्ण्या बहूनि रत्नानि यस्यां तया काञ्च्या मेखलया महार्हेण महाधनेन हारेणैकावल्यादिना च रुचकेन कुङ्कुमादिना मङ्गलद्रव्येण च रुचकं मङ्गलद्रव्ये ग्रीवाभरणदन्तयोः' इति विश्वप्रकाशोक्तेः। वृत्ताकारेण कण्ठाभरणेन वा भूषितम् ॥ ३२॥ सुभ्रुवेति। सुभ्रुवा सुशोभनभ्रूयुग्मेन सुदता सुन्दरदन्तपङ्क्त्या श्लक्ष्णो मनोहरः स्निग्धोऽपाङ्गः प्रान्तो यस्मिंस्तेन पद्मकोशस्पृधा कमलकुड्मलस्पर्द्धिना चक्षुषा नेत्रेणच जातावेकवचनम्। तथा नीलैः अलकैश्च लसच्छोभमानं मुखं यस्य तम् ॥ ३३॥ यदेति। एवंभूतमात्मानं दृष्ट्वा ऋषीणाम् ऋषभं श्रेष्ठम्, दयितं प्रियं पतिं भर्त्तारं यदा सस्मार स्मृतवती, तदा यत्र सः प्रजापतिः कर्दमः आस्ते तत्र एव स्वयमपि स्त्रीभिः सह आस्ते। उपविवेशेत्यर्थः ॥ ३४॥ भर्त्तुः स्वस्वामिनः पुरस्तादग्रे स्त्रीसहस्रैः वृतस्तम् आत्मानं निशाम्य दृष्ट्वा तदा तस्मिन्क्षणे तद्योगगतिं स्वस्वामिनो योगप्रभावं प्रति संशयं प्रत्यपद्यत। अहो मद्भर्त्तुः कीदृशीयं योगगतिरिति ससंशयविस्मयं प्राप्तवतीत्यर्थः ॥ ३५॥

स इति। हे अमित्रहन् जितारिषड्वर्गं विदुर सः कर्दमः कृतं मलस्नानं यया ताम् अपूर्ववत् विवाहात्प्राग्यथा तथेत्यर्थः। आत्मनः स्वस्याः रूपं बिभ्रतीम् अत एव विभ्राजन्तीं विशेषेण भ्राजमानाम् संवीतौ कञ्चुकीप्रावृतौ रुचिरौ स्तनौ यस्यास्तां पाठान्तरे रूपविशेषणम् ॥ ३६॥ विद्याधरीति। शोभने वाससी यस्यास्ताम् विद्याधरीसहस्रेण सेव्यमानां तां देवहूतिं प्रति जातः भावः प्रेम यस्य स एवंभूतः सन् तद्विमानम् अरोहयत् अरोहयामास इति द्वयोरेकान्वयः ॥ ३७॥ तस्मिन्निति। अलुप्तमहिमा अलुप्तप्रभावः प्रियया भार्यया अनुषक्तोऽनुसंगतः विद्याधरीभिः उपचीर्णं शुश्रूषितं वपुर्यस्य सः कर्दमः मुनिः तस्मिन् विमाने उत्कचाः प्रफुल्लाः कुमुद्गणाः सन्त्यस्येति उत्कचकुमुद्गणवान् अपीच्यो दर्शनीयः ताराभिः तारकाभिः आवृतः नभस्थः उडुपतिः पूर्णचन्द्रः इव बभ्राजे। पूर्णचन्द्र इव मुनिः नभ इव विमानं तारा इव स्त्रियः कुमुदानीव तासां नेत्राणि इति ज्ञेयम् ॥ ३८॥ तेनेति। तेन विमानेन अनङ्गस्य सखा इत्यनङ्गसख स चासौ मारुतः शीतसुगन्धमन्दानिलस्तेन सौभगं सौन्दर्यं यासु तासु द्युधुनी गङ्गा तस्याः पातेन शिवः स्वनो यासु तासु 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति धुनीशब्दस्य ह्रस्वत्वं कालिदासवत्। अष्टानामष्टसंख्याकानाम् लोकपानां लोकपालानां विहाराः क्रीडास्थानानि यस्मिन्सः तथाभूतो यः कुलाचलेन्द्रो मेरुस्तस्य द्रोण्यो दर्यस्तासु ललनावरूथी स्त्रीरत्नसमूहवान् धनदवत् कुबेर इव सिद्धैः नुतः कृतस्तवः मुनिः चिरं रेमे ॥ ३९॥ वैश्रम्भक इति वैश्रम्भके सुरसने क्वचित्तु सुरवने इत्यप्यत्र पाठोऽस्ति। नन्दने पुष्पभद्रके चैत्ररथ्ये मानसे सरसि च रतः प्रीतः सः मुनिः रामया स्त्रिया सह रेमे ॥ ४०॥

भ्राजिष्णुनेति। स मुनिरिति पूर्वश्लोकादनुषञ्जनीयम्। भ्राजिष्णुना प्रकाशमानेन महीयसातिश्रेष्ठेन कामगेन मनःसंकल्पानु-सारेण गतिमता विमानेन अनिलः यथा वायुरिव सर्वत्राप्रतिहतगत्येत्यर्थः। चरन्सन् वैमानिकान् विमानैश्चरतः लोकान् जनान् अत्यशेत अतिक्रम्य स्थितः ॥ ४१॥ कीदृशोऽयं मुनेः प्रभाव इति न विस्मयनीयमित्याह। किमिति। यैः पुम्भिः तीर्थपदो भगवतः व्यसनात्ययस्तापत्रयनाशनः चरणः पादः आश्रितः उद्दामचेतसां योगपरिशुद्धमनसां तेषां पुंसां दुरापादनं दुष्प्रापम् किं किमपि नास्तीत्यर्थः ॥ ४२॥ प्रेक्षयित्वेति। स्वसंस्थया द्वीपवर्षादिसंमानेन यावान् यत्परिमाणो भूगोलः भवति तावन्तम् बह्वाश्चर्यमतिविस्मयनीयम् भुवः पृथिव्याः गोलं मण्डलम् पत्न्यै स्वभार्यायै तस्यै देवहूत्यै प्रेक्षयित्वा दर्शयित्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महायोगी कर्दमः स्वाश्रमाय न्यवर्त्तत पुनः स्वाश्रमं प्रत्यागतवान् ॥ ४३ ॥ विभज्येति । महायोगी इति कर्त्तृपदं पूर्वश्लोकादनुषञ्जनीयम् । आत्मानं नवधा विभज्य नवधापत्यमुत्पादयिष्यामीति मनसा स्ववीर्यं विभज्येत्यर्थः । सुरते उत्सुकोत्साहवतीं ताम् मानवीं मनोः सुतां रामां निजपत्नीं विरमयन्विशेषेण क्रीडयन्सन् वर्षपूगान्वर्षगणान् मुहूर्त्तवत् रेमे बहुकालं रममाणः सन्नप्यल्पकालं कृतरमणवच्चिक्रीडेत्यर्थः । यद्वा महायोगित्वाद्बहुशरीरग्रहणसमर्थः कर्दमः स्वात्मानं नवधा विभज्य योगशक्त्या नवसंख्याविशिष्टानि शरीराणि गृहीत्वा इत्यर्थः। सुरतोत्सुकां मानुषरतिकामुकीं मानवीं रामां रामामपि तावद्रूपवतीं विधाय विरमयन्वात्स्यायनोक्तविधिना वर्षपूगान्मुहुर्त्तवद्रेमे इत्यन्वयः। सौभरेस्तु योगित्वात्स्वस्य बहुशरीरग्रहणमस्य तु महायोगित्वात्पत्न्या अपि रतिकाले बहुशरीरविधापनमिति ततोऽस्य विशेषः ॥ ४४ ॥ तस्मिन्निति । तस्मिन् विमाने उत्कृष्टां निरतिशयसुखस्पर्शां रतिकरीं रतिवर्द्धिनीं शय्यां श्रिता अपीच्येन सुन्दरेण पत्या भर्त्रा संगता संयुक्ता सती तमनेकवर्षसमूहात्मकं कालं न अबुध्यत च । एतावन्कालो गत इति न ज्ञातवती ॥ ४५ ॥ कियान्कालो गत इत्यत्राह । एवमिति । योगानुभावेन स्वयोगप्रभावेण एवमुक्तप्रकारेण कामलालसयोः कामासक्तिमतोः दम्पत्योः रममाणयोः सतोः शतं शतसंख्याकाः शरदः संवत्सराः मनागीषत्काल इव व्यतीयुरतिक्रान्ताः ॥ ४६ ॥

विभज्य नवधेति सामान्येनोक्तमर्थं किंचिद्विशेषव आह । तस्यामिति । आत्मवित् जीवपरमात्मस्वरूपयाथात्म्यज्ञः, सर्वसंकल्पवित् तस्या बह्वपत्यसंकल्पं जानन् विभुस्तथाकर्त्तुं समर्थः कर्दमः तां स्वाङ्गनाम् आत्मना स्वदेहार्द्धरूपेण भावयन् अभिप्रयन् सन् स्वं रूपं वीर्यम्, नोधा नवधा विधाय विभज्य रेतस्तद्वीर्यम्, तस्यां पत्न्याम् आधत्त निहितवान् ॥ ४७ ॥ अत इति । अतोऽनन्तरम्, सा देवहूतिः सद्यः स्त्रियः प्रजाः पुत्रिकारूपाण्यपत्यानीत्यर्थः । सुषुवे प्रसूतवती । सर्वाः ताः स्त्रियः नवापि ताः कन्यका इत्यर्थः । चारूणि सर्वाणि अङ्गान्यवयवा यासां ताः लोहितोत्पलस्य रक्तोत्पलस्येव गन्धो यासां ताः एवंभूता अभवन्निति शेषः ॥ ४८ ॥ पतिमिति । तदा अपत्योत्पत्त्यनन्तरम्, प्रव्रजिष्यन्तं संन्यासं कर्त्तुमिच्छन्तम्, पतिं कर्दमम् आलक्ष्य वितर्क्य उशती कमनीया सती साध्वी सा देवहूतिः स्मयमाना बहिरीषद्धसमाना विदूयतान्तःखेदवता विक्लवेन व्याकुलतावता हृदयेन चेतसा युक्ता ॥ ४९ ॥ लिखन्तीति । अधः मुखं यस्याः सा नखा एव मणयस्तेषां श्रीः शोभा यस्मिंस्तेन पदा चरणेन भूमिं भुवं लिखन्ती सती अनेन दुरन्ता चिन्ता सूचिता । अश्रुकणान् शनैः निरुन्ध्य ललितां मृद्वीं वाचम्, उवाच इति द्वयोरेकसंबन्धः ॥ ५० ॥ सर्वमिति । हे भगवन् भगवान् पूज्यो भवान् मह्यं यत् प्रतिश्रुतं तत्सर्वं उपोवाहोपावहत् संपादितवानित्यर्थः । अथापि प्रपन्नायाः मे मम अभयं दातुम् अर्हसि । अभयप्रदानं करोषि चेत्कथयामीति भावः ॥ ५१ ॥ एवं चेदों तत्किमित्यत आह । ब्रह्मन्निति । हे ब्रह्मन् दुहितृभिः समाः वयःशीलादिभिस्तुल्याः पतयस्तासां भर्त्तारः तुभ्यं त्वया विभक्तिव्यत्यय आर्षः । विमृग्याः अन्वेषणीयाः । त्वयि वनं प्रव्रजिते सति मे मम विशोकाय कश्चित् स्यात् । स्त्र्यपत्येन ऋणानपाकरणात्कंचित्कालं त्वदवस्थानेन ब्रह्मविदं कंचित्पुत्रमुत्पादयेत्यर्थः ॥ ५२ ॥ एवं स्वाभिप्रायं निवेद्याथ संसारात्स्वनिर्वेदमावेदयन्ती सत्याह यावदध्यायम् । एतावतेति । हे प्रभो इन्द्रियार्थेषु शब्दादिविषयेषु प्रसङ्गः प्रकृष्टः सङ्गस्तेन परित्यक्तोऽनुपासितः परात्मा परमात्मा यया तस्याः मे मम व्यतिक्रान्तेन व्यतीतेन एतावता शतवर्षपरिमितेन कालेन अलं पूर्णम् ॥ ५३ ॥

इन्द्रियार्थेष्विति । इन्द्रियार्थेषु सज्जन्त्याऽऽसक्तिं गतया तव परं भावम् अजानन्त्या मे मया त्वयि प्रसङ्गः कृतः । तथापि त्वत्परं भावमजानन्त्या अपि मे मम अभयाय अस्तु ॥ ५४ ॥ त्वयि कृतः प्रसङ्गोऽनर्थाय मा भूदित्याह । सङ्ग इति । अधिया अज्ञानेन असत्सु असज्जनेषु विहितः कृतः यः सङ्गः सः संसृतेः एव हेतुः कारणरूपः भवति । तथा स सङ्गः साधुषु भवादृशेषु कृतः सन् निःसङ्गत्वाय विरागत्वाय एव कल्पते । अन्ततो वैराग्यमेव जनयतीत्यर्थः ॥ ५५ ॥ नेहेति । इह लोके यत्कर्म यस्य पुंसः स्वभावतः प्रवृत्तमपि कर्मेत्यर्थः । धर्माय न कल्पते । धर्माभिमुखं न भवेदित्यर्थः । तत्रापि विरागाय वैराग्योत्पादनाय न कल्पते । तद्द्वारा च तीर्थपदसेवायै न कल्पते तीर्थपदस्य हरेः सेवार्थं न पर्यवस्येदित्यर्थः । सः जीवन्नेव मृतः हि । जीवन्नपि शवतुल्य एवेत्यर्थः ॥ ५६ ॥ संप्रति स्वात्मानं प्रति निर्विद्यन्त्याह । सेति । सा अहम् इन्द्रियार्थेषु सज्जन्त्यहमित्यर्थः । भगवतः मायया दृढं यथा तथा वञ्चिता नूनम् । याऽहं विमुक्तिदं मुक्तिसाधनज्ञानप्रदं त्वां प्राप्यापि बन्धनात्संसारात् न मुमुक्षेय मोक्तुमिच्छां न कृतवत्यस्मि ॥ ५७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

——:❀:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ चतुर्विंशोऽध्यायः

मैत्रेय उवाच

निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः । दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥ १ ॥

जन्माह कपिलस्यात्रश्चतुर्विंशेऽथ तत्पितुः । ऋणत्रयविमुक्तस्य प्रव्रज्यां तदनुज्ञया ॥ १ ॥

एवं निर्विद्यन्तीं भार्यां प्रत्याह कर्दम इत्याह मैत्रेयः । एवमिति । एवमुक्तप्रकारेण निर्वेदवादिनीं निर्वेदयुक्तवचांसि कथयन्तीं मनोः दुहितरम्, शालिनीं श्लाघ्यां स्वगृहिणीं प्रति मुनिः कर्दमः दयालुः संप्राप्तदयोदयः शुक्लाभिव्याहृतम् 'सहाहं स्वांशकलया त्वद्वीर्येण' इति भगवद्वचनं स्मरन् आह ॥ १ ॥ यदाह तदाह त्रिभिः । मा खिद इति । हे राजपुत्रि हे अनिन्दिते अनघाचारे आत्मानं प्रति इत्थं मा खिदः खेदं मा कार्षीः । अक्षरो निरस्तप्राकृतगुणः भगवाननन्तकल्याणगुणः हरिः अदूरादाशु ते तव गर्भं संप्रपत्स्यते ॥ २ ॥

धृतव्रतेति । तुभ्यं भद्रं मङ्गलमस्तु । धृतं व्रतं भगवदाराधनरूपं व्रतं यया सा एवंविधा असि भवसि । ततस्त्वं दमेन बाह्येन्द्रियनियमेन नियमेनान्तरिन्द्रियनियमनेन । च तपश्च द्रविणदानानि च तैश्च । तत्र तपः पातिव्रत्योचितधर्म-पालनम् । दानानि हिरण्यादीनां श्रद्धया प्रारीप्सिते भगवदाराधने त्वरया च, ईश्वरं भगवन्तं भज ॥ ३ ॥ स इति । त्वया आराधितः सः शुक्लो भगवान् मामकं मदीयम् यशः कीर्त्तिम् वितन्वन्विस्तारयन् औदर्यस्त्वदुदरात्संजातः ब्रह्मभावनः तव ब्रह्मोपदेष्टा भूत्वा ते तव हृदयग्रन्थिं छेत्ता छेत्स्यति ॥ ४ ॥ एवमुक्ता देवहूतिस्तथाकरोदित्याह मैत्रेयः । देवहूतिरिति । देवहूत्यपि देवहूतिरपि आर्षमिदम् । प्रजापतेः कर्दमस्य संदेशमाज्ञां गौरवेण स्वपत्युर्गौरवताऽऽवेदनेन हेतुना सम्यक् श्रद्धाय विश्वस्य कूटस्थं निर्विकारम् गुरुमज्ञाननिवर्त्तकम् पुरुषं परमपुरुषम् अभजत् ॥ ५ ॥ तस्यामिति । बहूनां तिथीनां संख्यापूरणो बहुतिथस्तस्मिन् बहुतरे इत्यर्थः । काले गते सति भगवान् मधुसूदनः तस्यां देवहूत्यां कार्दमं कर्दमसंबन्धि वीर्यम् आपन्नः प्राप्तः सन् दारुण्यरणिकाष्ठे अग्निः इव जज्ञे । कार्दमवीर्यसंश्लिष्टजीवविशेषमाविष्टः सन्नवततारेत्यर्थः । अयमावेशातारो जामदग्न्यवत् । आवेशावतारो नाम जीवान्तरात्मतयावस्थितस्यैव भगवतो जीवद्वारा ज्ञानशक्त्यादिगुणविशेषान्यत-माविर्भावः । तावतैव तस्मिन् जीवे स्वस्यान्येषां चेश्वरत्वाभिमानः ॥ ६ ॥ अवादयन्निति । तदा तदवतरणसमये व्योम्न्याकाशे वादित्राणि शङ्खमृदङ्गदुन्दुभ्यादीनि अवादयन् अध्वनयन् । देवा इति शेषः । घनाघना इत्येकं पदं वर्षन्तो मेघाः अभूवन्निति शेषः । सगन्धर्वाः गन्धर्वैः सहिताः किंनरा इत्यर्थः । गायन्ति स्म अप्सरसः मुदा हर्षेण नृत्यन्ति स्म ॥ ७ ॥ पेतुरिति । खेचरैर्देवैः अपवर्जिता मुक्ताः दिव्याः नन्दनादिदेवारामभवाः सुमनसः पुष्पाणि पेतुः । सर्वाः दिशः च अम्भांसि तडागादिजलानि च मनांसि सर्वेषां चित्तानि च प्रसेदुः प्रसन्नान्यभूवन् ॥ ८ ॥

तदिति सरस्वत्या नद्या परिश्रितं परिवेष्टितं तत् कर्दमाश्रमपदं कर्दमाश्रमस्थानं प्रति स्वयंभूः ब्रह्मा मरीच्यादिभिः ऋषिभिः साकम् अभ्यगादभ्यागच्छत ॥ ९ ॥ भगवन्तमिति । हे शत्रुहन् विदुर अंशेन स्वापृथक्सिद्धविशेषणेन सत्त्वेन नित्यासंकुचितज्ञानगुणेन परं ब्रह्म एव तत्त्वानां प्रकृतिपुरुषेश्वराणाम् संख्यानं याथात्म्यतया कथनं तेन विज्ञप्तिर्ज्ञापनं तस्यै यद्वा तत्त्वानां प्रकृत्यादीनां संख्यानं यस्मिंस्तस्य सांख्यस्य विज्ञप्तिर्विशेषेण ज्ञापनं तस्यै प्रकृत्यादितत्त्वयाथार्थ्यकथनेन तद्याथार्थ्यं लोकं प्रति ग्राहयितुमित्यर्थः । जातमवतीर्णं भगवन्तं विद्वान् जानन् दृष्ट्वा एवेति यावत । स्वराट् अजो ब्रह्मा अत्र ब्रह्मणः स्वराट्त्वं तु भगवदावेशावतारत्वात्तदृष्ट्यैव ततश्चाकर्मवश्यमपि ज्ञेयम् ॥ १० ॥ सभाजयन्निति । तच्चिकीर्षितं तस्यावतीर्णस्य भगवतश्चिकीर्षितम् विशुद्धेन चेतसा मनसा सभाजयन्संमानयन्नभिनन्दयन्निति यावत् । अत एव प्रहृष्यमाणैः असुभिरिन्द्रियैः आनन्दाश्रुपूर्णरोमाञ्चितगद्गदस्वरादियुक्तनेत्रत्वगादीन्द्रियैरुपलक्षितः सन्नित्यर्थः । कर्दमं चकाराद्देवहूतिं च इदं वक्ष्यमाणम् अभ्यधादभ्यभाषत इति द्वयोरेकसंबन्धः ॥ ११ ॥ तत्र त्वयेत्यादिभिः पञ्चभिः कर्दमं प्रत्याह । हे तात पुत्र त्वया मे मम अपचितिः पूजा निर्व्यलीकतः निष्कपटं यथा स्यात्तथा प्रेमातिशयेनेत्यर्थः । कल्पिता विहिता येद्वापचितिस्त्वया प्रोक्ता सा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

का मया कल्पितेत्यत्राह । हे मानद भवान् मे मम वाक्यं वचः मानयन्सन् जगृहे गृहीतवान् इति यत् तदेव ममापचितिविधानमित्यर्थः ॥ १२ ॥ उक्तार्थमेव सप्रपञ्चमाह । एतावतीति । पितरि पुत्रकैः कार्या शुश्रूषा अपचितिस्तु गुरोः पितुः वचो वाक्यं गौरवेण बाढम् इति अनुमन्येत अङ्गीक्रियेत यत् एतावती एव प्रजाः सृजेति मयाभिहितस्त्वं तथैवाकार्षीरतो मदपचितिः कल्पितेति भावः ॥ १३ ॥ इमा इति । हे वत्स सुमध्यमाः शोभनाङ्ग्यः इमाः सत्यः साधुशीलाः तव दुहितरः स्वैः प्रभावैः वंशैः एतं सर्गम् अनेकधा तत्तदपत्यपरंपराभिरित्यर्थः । बृंहयिष्यन्ति वर्द्धयिष्यति ॥ १४ ॥ अत इति । अतः त्वम् ऋषिमुख्येभ्यो विसृज्य एतेभ्यो मरीच्यादिभ्यः आत्मजा दुहितरः यथारुचि तत्तद्दुहितृरुच्यनुसारेण यथाशीलं तत्तच्छीलानतिक्रमेण परिदेहि प्रयच्छ । अथाधुना भुवि यशः विस्तृणीहि वितनुः ॥ १५ ॥

तव पुत्रस्तु साक्षादीश्वर एवेत्याह । वेदेदि । हे मुने, स्वमायया आत्मीयसंकल्पेनेत्यर्थः । अवतीर्णम्, भूतानां शेवधि निधिम्, देहं बिभ्राणं निधिरिवाभीष्टप्रदानाय देहं बिभ्राणमित्यर्थः । कपिलम् आद्यं जगत्कारणम्, पुरुषं परमपुरुषमेव अहं वेद जानामि ॥ १६ ॥ देवहूतिं प्रत्याह । ज्ञानेति । हे मानवि मनुपुत्रि ज्ञानविज्ञानयोगेन जीवपरमात्मयाथात्म्यज्ञानयोगोपदेशेन कर्मणां स्वं सेवमानानां पुंसामनादिपुण्यपापात्मककर्मणामित्यर्थः । जटा मूलानि उद्धरन्नुत्पाटयितुमित्यर्थः । हिरण्यकेशः सुवर्णवत्प्रकाशमानसुकेशसमूह इत्यर्थः । पद्माक्षः पुण्डरीकनयनः पद्माकारा मुद्रा रेखा तद्युक्तं पदाम्बुजं यस्य सः ॥ १७ ॥ एष इति । कैटभार्दनः कैटभारिः एषः भगवान् ते तव गर्भम्, प्रविष्टः तव गर्भद्वारा प्रादुर्भूतः सन्नित्यर्थः । अविद्या देहात्माभिमानश्च संशयोऽब्रह्मात्मकस्वतन्त्रात्माभिमानश्चेत्येवमुभयात्मको यो ग्रन्थिस्तम्, छित्त्वा हृद्गतमज्ञानं निरस्येत्यर्थः । गां भूमिम्, विचरिष्यति । एत्युभयोरेकान्वयः ॥ १८ ॥ अयमिति । अयं त्वत्पुत्रः सिद्धगणानां योगिसमूहानाम् अधीशः ते तव कीर्त्तिवर्द्धनः कीर्त्तिप्रख्यापकः, सांख्याचार्यैः सुसंमतः बुद्ध्यावधारणीयमात्मतत्त्वं सांख्यं तत्प्रतिपादकं शास्त्रमपि सांख्यमेव तस्याचार्याः स्वयमनुष्ठानेनोपदेष्टारस्तैर्बहुमतः सन्नित्यर्थः । लोके कपिलः इत्येवंभूताम् आख्यां नामधेयम् गन्ता गमिष्यति प्राप्स्यतीत्यर्थ ॥ १९ ॥ एवमुक्त्वा स्वलोकं ययावित्याह मैत्रेयः । ताविति । तौ कर्दमं देवहूतिं चेत्यर्थः । आश्वास्य सान्त्वयित्वा मरीच्यादीन्विवाहार्थं तत्र स्थापयित्वेति शेषः । जगत्स्रष्टा हंसो ब्रह्मा कुमारैः नैष्ठिकैः सनकादिभिः सह सहनारदो नारदेन सहितः संश्च हंसेन श्वेतगरुता यानेन वाहनेन त्रिधामपरमं त्रिधाम्नः स्वर्गादुपरि स्थितं सत्यलोकं प्रति ययौ ॥ २० ॥ गत इति । हे क्षत्तः शतधृतौ ब्रह्मणि गते सति तेन ब्रह्मणा चोदित आदिष्टः कर्दमः ततः स्वदुहितॄः स्वकीयपुत्रिकाः विश्वसृजां विश्वसृड्भ्यः यथोचितं यथारूपं प्रादात्प्रायच्छत् ॥ २१ ॥

कस्मै कां प्रादादित्यत्राह । मरीचय इति । मरीचये मरीचिनाम्ने मुनये कलां कलाख्यां स्वसुतां प्रादात । मरीचिना कलामुदवाहयदित्यर्थः । एवमग्रेऽपि व्याख्येयम् । अथानन्तरम् अत्रये मुनये अनुसूयाम् अयच्छत् । अङ्गिरसे मुनये श्रद्धाम् अयच्छत् । पुलस्त्याय मुनये हविर्भुवं हविर्भुसंज्ञाम् अयच्छत ॥ २२ ॥ पुलहायेति । पुलहाय मुनये युक्तां वयआदिभिर्योग्याम् गतिं गत्याख्यां क्रतवे क्रतुसंज्ञमुनये सतीं साध्वीं क्रियां क्रियाख्यां च अयच्छत् । भृगवे भृगुसंज्ञमुनये ख्यातिं ख्यातिसंज्ञां च वसिष्ठाय मुनये अरुन्धतीं स्वयं संध्यावताररूपामरुन्धत्याख्याम् अपि अयच्छत् ॥ २३ ॥ अथर्वण इति । अथर्वणे मुनये यया यज्ञः वितन्यते यत्साहचर्येण मखकृत्यं समृद्धं यथा तथा संपाद्यते तथाभूतामित्यर्थः । शान्तिं शान्त्याख्यां स्वकन्याम् अददात् । अनेन दम्पत्योः सहाधिकारित्वं यज्ञकर्मणि सूचितम् । एवम् कृतोद्वाहान्कृतविवाहान् सदारान् स्त्रीसहितान् विप्रर्षभान्मरीच्यादिद्विजश्रेष्ठान् समलालयद्वैवाहिकवस्त्राभरणादिपारिबर्हप्रदानेन कर्दमः संतोषितवानित्यर्थः ॥ २४ ॥ तत इति । हे क्षत्तः विदुर ततः कृतदारा विहितदारपरिग्रहाः ते ऋषयो मरीच्यादयः तं कर्दममुनिम् निमन्त्र्यानुज्ञाप्य पृष्ट्वेत्यर्थः । नन्दिं हर्षम् आपन्नाः प्राप्ताः सन्तः स्वं स्वम् आश्रममण्डलं स्वस्वाश्रमस्थानमित्यर्थः । प्रातिष्ठन् शीघ्रं प्राविशन्नित्यर्थः ॥ २५ ॥ स इति । स कर्दमश्चापि त्रियुगं षडैश्वर्यसंपन्नं विबुधर्षभं भगवन्तम् अवतीर्णं स्वगृहे प्रादुर्भावं प्राप्तम् आज्ञाय ब्रह्मवचनात्सम्यग्विदित्वा विविक्ते एकान्ते उपसंगम्य समीपमेत्येत्यर्थः । प्रणम्य नत्वा सं सम्यङ्मधुराक्षरं यथा तथा अभाषत ॥ २६ ॥ कर्दमेन यद्भाषितं तत्तद्भाषणमेवाह्नाष्टभिः । तत्र तावत्सामान्येन देवताप्रसादो दुर्लभ इत्याह । अहो इति । स्वैः स्वीयैः अमङ्गलैः दुष्कृतैः निरये निरयतुल्ये इह संसारे पापच्यमानानां भृशं दह्यमानानां जनानां भूयसा बहुना कालेन देवताः प्रसीदन्ति प्रसन्नाः भवन्ति नूनम् । अहो इत्याश्चर्यम् ॥ २७ ॥ वाङ्मनसागोचरस्वरूपस्वभावस्त्वं भक्तेषु स्वसौलभ्यं प्रदर्शयन्नस्मद्भाग्यवशान्नयनविषयतां गतोऽसीत्याह । बह्वित्यादित्रयेण । बहुभिर्जन्मभिर्विपाकं परिपाकदशामापन्नं तेन बहुजन्मानुष्ठितज्ञानकर्मयोगाभ्यामनुगृहीतेनेत्यर्थः । सम्यग्योगो भगवद्भक्तियोगो यस्मिंस्तेन समाधिना चित्तैकाग्र्येण यत्पदं यस्य तव स्वरूपं शून्यागारेषु रागादिरहितेषु हृदयस्थानेषु द्रष्टुं साक्षात्कर्तुं यतयः यतन्ते । अनेन भगवतः प्राकृतमनआद्यगोचरत्वमुक्तम् ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स इति। सः एषः भगवान् भवान्, नोऽस्माकं हेलनम्, अद्य न गणय्य अविगणय्य, समाभ्यधिकतावर्जितोऽहं निरयप्रायेषु ग्राम्याणां गृहेषु कथं जायेयेत्यवज्ञामनादृत्येत्यर्थः। ग्राम्याणामस्माकं गृहेषु जातः गृहपर्याप्रभूतायामस्यां मत्पत्न्यां देवहूत्यामवतीर्ण इत्यर्थः। भक्तजनसुलभस्य भवतस्त्विदमुचितमेवेति भावयन्नाह। य उक्तमोहमस्त्वं स्वानां भक्तानां पक्षं पोषयतीति तथाभूतः भवसि॥ २९॥ स्वीयमिति। स्वीयं वाक्यं 'स चाहं स्वांशकलया' इत्यादिनिजवचनमित्यर्थः। ऋतं सत्यम्, कर्त्तुं विधातुं मे मम गृहे भगवान् त्वम् अवतीर्णः असि। इदं संकल्पितकरणमेवास्मद्भाग्यमेवेति भावः। अवतारप्रयोजनमाह। ज्ञायतेऽनेनेति ज्ञानं ज्ञानसाधनं सांख्यतन्त्वमित्यर्थः। चिकीर्षुस्तत्कर्त्तुमिच्छुः, भक्तानां मानवर्द्धनः, एवंभूतः सन्नवतीर्णोऽसीत्यर्थः। साधून्परित्रातुं लोकोज्जिजीविषया सांख्यतन्त्वं कर्त्तुमवतीर्ण इति भावः॥ ३०॥ पुनरपि भक्तानुग्राहकत्वमेवाह। तान्येवेति। हे भगवन्, अरूपिणः कर्मायत्तदेवमनुष्यादिसमानशरीररहितस्य तव इह लोके यानि यानि रूपाणि चतुर्भुजादिशरीराणि स्वजनानां स्वभक्तजनानां रोचन्ते। तान्येव रूपाणि ते तवापि अभिरूपाणि अभिमतानि, स्वजनाननुग्रहीतुमेव तत्तद्रुच्यनुसारेण स्वीयानि दिव्यान्यपि रूपाणि मानुषाणीव तथा स्युस्तथा बिभर्षीत्यर्थः॥ ३१॥ सांप्रतं कर्दमस्तस्मिन्नात्मनः पुत्रत्वाभिमानं विहायापरोक्षज्ञानवांस्तं पुत्रमीश्वरं विजानन्ननन्यसाधारणैर्लक्षणैः स्तौति। तमिति। सूरिभिः सुधीभिः अद्धा यथार्थतया तत्त्वबुभुत्सया प्रकृतिपुरुषेश्वरयाथात्म्यं बोद्धुमिच्छया, सदा सर्वकालम् अभिवादार्हणमभिवादनयोग्यं पादपीठं यस्य तम् ऐश्वर्यं च वैराग्यं च यशश्च, अवबोधश्च वीर्यं च श्रीश्च तासां पूर्त्तैमैश्वर्यादिभिः पूर्णमित्यर्थः। तत्रैश्वर्यं षाड्गुण्यं वैराग्यं स्वेतरस्य समस्तस्यासारतादर्शनं यशः कीर्त्तिः अवबोधो ज्ञानं वीर्यं प्रभावः श्रीस्तेजः संपद्वा एवंभूतगुणविशिष्टं तं त्वाम् अहं प्रपद्ये शरणं व्रजे कचित्त्वामिति पाठान्तरम्॥ ३२॥ ऐश्वर्यादिकं विवृणोति। परमिति। परं प्रकृतिपुरुषविलक्षणं प्रधानं प्रकृतिशरीरकं, पुरुषं जीवशरीरकं कालं कालशरीरम् अनेन कारणावस्थप्रकृतिपुरुषकालशरीरकत्वमुक्तम्। महान्तं महच्छरीरकं त्रयाणां सत्त्वरजस्तमसां वृद्धत्तेनं यस्मिन् कार्यावस्थे जीवे तं कार्यावस्थजीवशरीरकमित्यर्थः। शरीरवाचकः शब्दः शरीरिपर्यन्ततामभिधत्ते' इत्यत्रोपपत्तिः पूर्वमेवासकृदुक्तास्ति। अनेन भगवतः कार्यावस्थकारणावस्थचिदचिदन्तरात्मत्वकथनेन कारणत्वमुक्तम्। एतदुपयोगार्हसर्वसत्त्वादिगुणयोगमाह। कविं सर्वज्ञं स्वच्छन्दशक्तिं स्वायत्तसर्वशक्तित्वादियुक्तम्, अथास्य पालकत्वमाह। लोकं चिदचिदात्मकप्रपञ्चं पालयतीति तम्, आत्मनः स्वस्यानुभूत्या, संहाराद्युपयुक्तज्ञानशक्त्या, अनुगतः स्वस्मिन् लीनः, प्रपञ्चो यस्य तम् आत्मानुभूत्येति पूर्वत्राप्यन्वेति काकाक्षिन्यायात्। ततश्च जगत्पालनोपयुक्तस्वकीयज्ञानशक्त्या लोकपालमित्यर्थः। एवंविधं कपिलं त्वां प्रपद्ये॥ ३३॥

एवं भगवन्तं प्रस्तुत्याभिप्रेतमावेदयति। आ स्मेति। प्रजानां पतिमधिपतिं त्वाम् अहम् आभिपृच्छे आ ईषदर्किंचिदभिपृच्छामीत्यर्थः। स्मेति पादपूरणे किं तदित्यत्राह। त्वया प्रजारूपेण भवता अवतीर्णमवतारितम् ऋणम् ऋणत्रयं येन उताथ च आप्तोऽनुभूतः कामः सांसारिको भोगो येन एवंभूतः सोऽहम् अद्येदानीं त्वामेव हृदि युञ्जन् ध्यायन् अत एव विशोषेण गतः शोकस्तापत्रयजनितदुःखं यस्य सः पाठान्तरे त्वामित्यस्य विशेषणम्। परिव्रजतां तुर्याश्रमिणां पदवी मार्गस्तां संन्यासधर्ममित्यर्थः। आस्थित आश्रितः सन् चरिष्ये संचरिष्यामि॥ ३४॥ कर्दमेनैवमुक्तो भगवान् कपिलः स्वचिकीर्षितसांख्यतन्त्वस्य प्रामाण्यं तावन्निदर्शनेन प्रदर्शयन्नवतारप्रयोजनं च कथयन्नभिप्रेतार्थं स्वपितरमादिशति षड्भिः श्लोकैः। मयेति। सत्यं वैदिकं च लौकिकं व्यावहारिकं च तयोः समाहारः सत्यलौकिकं तस्मिन् वैदिके लौकिके च कर्मणीत्यर्थः। मया प्रोक्तं यत् तत् लोकस्य प्रमाणं हि। अथाऽतः हे मुने तुभ्यं तव अवोचं 'त्वत्पुत्रोऽहं भविष्यामि' इति यद्ब्रुवं तन्मदुक्तम् ऋतं सत्यं यथा भवति तथा मया अजनि जन्म स्वीकृतम्। अनेन वक्ष्यमाणस्वसांख्यतन्त्वस्य स्वयमेव प्रमाणमित्यपि सूचितम्। ऋतसत्यपुण्यानां पर्यायत्वात्पुण्यस्य कर्मोपासनाभेदेन द्वैविध्यमस्ति तदत्र वैदिकशब्देनाभिहितम्। लोक्यते इति लोकः फलं तत्साधनं लौकिकं तदपि स्वर्गापवर्गसाध्यकर्मोपासनं चेति द्विविधम्। एतस्मिन्विषये यन्मया प्रोक्तं सांख्यं तत्प्रमाणमिति ज्ञापितम्। तत्र भगवद्भक्त्युपेतं कर्मोपासनात्मकं पुण्यं मोक्षहेतुकम्। तद्वर्जितं स्वर्गापवर्गलब्ध्यादिकमपि परमार्थत्वाभावान्न किंचित्। तत्र वक्ष्यमाणे हि सांख्ये भगवद्भक्तियोगनिष्ठानामचिरादिगत्या भगवत्प्राप्तिर्वक्ष्यते निवृत्तिधर्मनिरता इत्यारभ्य सूर्यद्वारेण ते यान्ति इत्यनेन। अथ यो गृहमेधीयान धर्मान् इत्यारभ्य गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति इति स्वर्गासक्तमनसां पितृयानगत्या संसृतिश्च वक्ष्यते। एवं कैवल्यात्मकब्रह्मसुषुप्त्यात्मकापवर्गोऽपि भगवत्सेवाप्त्यपवर्गाग्रे न किंचित्। ततो भूय इव ते तमोऽभियन्ति य उ विद्यायां रताः इति श्रुतेः॥ ३५॥ अवतारप्रयोजनमाह। एतदिति। दुष्ट आशयोऽन्तःकरणं यस्मिंस्तस्मात् दुराशयात् आत्मत्त्वेनानुसंहितादेहादित्यर्थः। मुमुक्षूणां मोक्तुमिच्छतां संसृतिमनिच्छतामित्यर्थः। आत्मदर्शने प्रकृतिविविक्तजीवात्मपरमात्मविज्ञाने संमतायाभिमतायोपयुक्तायेति यावत्। तत्त्वानां प्रकृतिपुरुषेश्वरयाथात्म्यरूपतत्त्वानां प्रसंख्यानाय प्रकथनाय विवेचनायेति यावत्। अस्मिन् लोके मे मम एतत् जन्म जातमस्तीति शेषः॥ ३६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु पूर्वमेवाविच्छिन्नतत्तच्छ्रोतृवक्तृपरंपराभिस्त्वयोक्त आत्मपथोऽविफल एवावस्थाता किमिदानीं त्वदवतार-साध्यमित्यत्राह । एष इति । एषः आत्मपथः आत्ममार्गः आत्मतत्त्वमिति यावत् । अव्यक्तः सूक्ष्मः । अत्यन्तं दुर्ज्ञेय इत्यर्थः । अत एव मयैव पूर्वमुपदिष्टः सन्नपीति शेषः । भूयसा बहुतरेण कालेन कालकृतविलम्बेन नष्टः परिभ्रष्टतां प्राप्तः । तमेवात्मपथं प्रवर्त्तयितुं भूयस्तत्प्रवृत्तिं विधातुमित्यर्थः । मया इमं देहं धृतं विद्धि ॥ ३७ ॥ एवं स्वावतारप्रयोजनं स्वपित्रेऽभिधाय तं च प्रव्रज्यायै समादिशति । गच्छेति । मया आपृष्ट आदिष्टः कामं यथेच्छं गच्छ याहि । मयि संन्यस्तकर्मणा समर्पितेन कर्मणा अनभिसंहितफलेन मदाराधनैकप्रवणतयानुष्ठितेन कर्मणेति यावत् । सुदुर्जयमुपायान्तरैर्जेतुमशक्यं मृत्युं ज्ञानोत्पत्तिविरोधि-पुण्यपापरूपप्राचीनं कर्म जित्वाऽपोह्य अमृतत्वाय मत्प्राप्तिरूपामृतत्वविरोधिप्राचीनकर्मनिरसनायेत्यर्थः । मां भज ॥ ३८ ॥ मामिति । आत्मानं जीवानामन्तरात्मानं स्वयंज्योतिः स्वयंप्रकाशं सर्वाणि च तानि भूतानि च तेषां गुहा हृदयकुहरं तस्यां शयानस्त्वं न विद्यते भयं यस्मात्तं माम आत्मनि स्वात्मन्येव आत्मना मनसा अन्वीक्षन्साक्षात्कुर्वन् विशोकः शोकवर्जितः सन् ऋच्छसि मामेव प्राप्स्यसीत्यर्थः ॥ ३९ ॥ मयि गते सति किं भवान्करिष्यतीत्यत्राह । मात्रे इति । असौ मम माता यया च ययैव विद्यया मदुपदिष्टया ययैव ब्रह्मविद्ययेति यावत् । भयं मृत्युम् अतितरिष्यति । आध्यात्मिकीं सर्वकर्मणां शमनीं च पूर्वोत्तराघविनाशनीं चेत्यर्थः । तां विद्यां मात्रे वितरिष्ये उपदेक्ष्यामीत्यर्थः ॥ ४० ॥ एवं कपिलेनोक्तः कर्दमस्तदुक्तमेवाकरो-दित्याह मैत्रेयः । एवमिति । एवं तेन कपिलेन समुदितः प्रजापतिः कर्दमः तं कपिलं प्रदक्षिणीकृत्य प्रक्रम्य प्रीतस्तुष्टः सन् वनम् एव वनं प्रत्येव जगाम । ह स्फुटमेवैतत् । यद्वा हेत्यनेन सर्वसंपत्समृद्धस्वगृहत्यागो विस्मीयते ॥ ४१ ॥ आस्थित इति । सः कर्दमः तत्र मौनं व्रतम् आस्थित आश्रितः । आत्मा परमात्मा एकं शरणमुपायो रक्षकश्च यस्य सः मुनिः शुभाश्रयसंशीलनपरः निःसङ्गः इन्द्रियार्थेष्वासक्तिरहितः संसारिजनसङ्गरहितो वा । अनग्निः गृहाश्रमपरित्यागादाहवनीयाग्निरहितः अनिकेतनः नियतावसथरहितः सन् क्षोणीं व्यचरत् ॥ ४२ ॥

मुनिं विशिनष्टि । मन इति त्रिभिः । सदसतः चिदचिद्भ्यां परं विलक्षणं यत् गुणैरवभासो यस्य तस्मिन् गुणावभासे मङ्गलगुणावभासित इत्यर्थः । विगुणे हेयगुणरहिते एकभक्त्या एकान्तिकभक्तिमात्रेण अनुभाविते अनुभवगोचरतां नीते तत्तस्मिन् ब्रह्मणि मनः युञ्जानः एकाग्रीकुर्वन् ॥ ४३ ॥ निरहमिति । निरहंकृतिर्देहात्माभिमानरहितः निर्ममः देहापत्यकलत्रादिषु स्वीयत्वबुद्धिरहितः निर्द्वन्द्वः शीतोष्णादिदेहधर्मैरनाकुलः समदृक् समलोष्टाश्मकाञ्चनः स्वदृक् प्रकृतिविलक्षणब्रह्मात्मस्वात्मदर्शी प्रत्यग् ब्रह्मात्मके जीवात्मनि प्रशान्ता धीर्यस्य सः धीरः । ब्रह्मात्मकस्वात्मानुभवपरश्च प्रशान्तोर्मिः निस्तरङ्गितः उदधिः इव प्रशान्तोर्मिः अशनायापिपासाशोकमोहजरामृत्य्वाख्योर्मिषट्करहितः इत्यर्थः ॥ ४४ ॥ वासुदेव इति । सर्वज्ञे सर्वविदि प्रत्यञ्चो जीवस्यात्मनि अन्तः प्रविश्य नियन्तरि भगवति षाड्गुण्यपूर्णे वासुदेवे सर्वभूतधारकपरमपुरुषे परेण निरतिशयप्रीतिदशापन्नेन भक्तिभावेन भक्तियोगेन लब्धात्मा लब्धमतिः मुक्तबन्धनोऽज्ञानबन्धनान्मुक्त इत्यर्थः ॥ ४५ ॥ आत्मानमिति । सर्वभूतेषु भगवद्धार्येषु सर्वभूतेषु अवस्थितं भगवन्तम् आत्मानम् आत्मवर्गधारकम् अपश्यत् । धारके आत्मनि परमात्मनि भगवति चा सर्वभूतानि अपि धार्याणि अपश्यत् । पूर्वोत्तरार्द्धाभ्यां भगवतो व्याप्तिर्धारकत्वं चोच्यते ॥ ४६ ॥ इच्छेति । इच्छाद्वेषाभ्या प्राकृतगुणाभ्यां विहीनः रहितस्तेन सर्वत्र सर्वेषु भूतेषु समचेतसा भगवति या भक्तिस्तया युक्तस्तेन कर्दमेन भागवती गतिर्मुक्तिः प्राप्ता । पाठान्तरे स एव भागवतीं गतिं गत इत्यर्थो ज्ञेयः ॥ ४७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

——:※:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ पञ्चविंशोऽध्यायः

शौनक उवाच

कपिलस्तत्त्वसंख्याता भगवानात्ममायया । जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥ १ ॥

स्वामिनारायणेत्येकः षडर्णोऽस्ति महामनुः । तज्जपात्मतरीस्थोऽहं भवाब्धि वेद्मि गोष्पदम् ॥ १ ॥
संयुक्ता गूढभावेन योगादिभृतपेटिका । कार्द्मेनार्पिता मात्रेऽपूर्वतालकयन्त्रिता ॥ २ ॥
अपूर्वतालकाऽप्येषाऽपूर्वकुञ्चिकया मया । श्रीहरीक्षाख्यया शक्योद्घाटयितुं न संशयः ॥ ३ ॥
बन्धमोचनमापृष्टो जनन्या पञ्चविंशके । आहादौ परमं भक्तेर्लक्षणं मातरं हरिः ॥ ४ ॥

उक्तरीत्या संश्रुतमनुतदपत्यचरित्रः शौनकः कपिलभगवदुक्तसांख्यशुश्रूषुरुक्तार्थानुवादपूर्वकं सूतं पृच्छति त्रिभिः । कपिल इति । अजः कर्मायत्तजन्मरहितः भगवानैश्वर्योपेतः नृणाम् आत्मप्रज्ञप्तये आत्मपरमात्मयाथात्म्यविशदीकरणाय तत्त्वसंख्याता तत्त्वानां गणकः सांख्यप्रवर्त्तक इत्यर्थः । कपिलः कपिलाख्यः साक्षात्स्वयं भगवानेव आत्ममायया स्वेच्छया जातोऽवतीर्णः ॥ १ ॥ न हीति । पुंसां मध्ये वर्ष्मगः श्रेष्ठस्य सर्वयोगिनां मध्ये वरिम्णः वरिष्ठस्य अस्य कपिलस्य भगवतः विश्रुतौ कीर्त्तिसंश्रवणे इत्यर्थः । श्रुतो देवः स्वयं कपिलो भगवान् येन तस्य मे मम असव इन्द्रियाणि भूरि भृशं न तृप्यन्ति हि ॥ २ ॥ यदिति । स्वछन्दात्मा स्वेच्छोपात्तशरीरः भगवान् कपिलः आत्ममायया स्वसंकल्पेन यत् यत् चरितं विधत्ते करोति । अकरोदित्यर्थः । कीर्त्तन्यानि संकीर्त्तनीयानि तानि कपिलभगवच्चरितानि श्रद्धानस्य शुश्रूषात्वरान्वितस्य मे मम मह्यमित्यर्थः । अनुकीर्त्तय संश्रावयेत्यर्थः ॥ ३ ॥ एवं शौनकेनापृष्टः सूतः विदुरेणैवमेव पृष्टो मैत्रेय उक्तवानित्याह । द्वैपायनेति । द्वैपायनस्य सखा इति द्वैपायनसखः भगवान् मैत्रेयस्तु एवं यथा त्वं मां प्रचोदयसीत्येवमित्यर्थः । आन्वीक्षिक्यां तत्त्वनिरूपणे प्रचोदितः प्रवर्त्तितः अत एव प्रीतः सन् विदुरं प्रति इदं वक्ष्यमाणं तथा त्वत्प्रश्नानुसारेण प्राहोवाच ॥ ४ ॥ यत्प्राह तदेवाह । पितरीति । पितरि कर्दमे अरण्यं प्रस्थिते सति भगवान्कपिलः मातुर्देवहूत्याः प्रियचिकीर्षया प्रियं कर्त्तुमिच्छया तस्मिन् बिन्दुसरोवरतटे हि एव अवात्सीत् उषितवान् किल ॥ ५ ॥ तमिति । आसीनं बिन्दुसरस्तीर एव निषण्णं तत्त्वमार्गस्याग्रं पारं दर्शयतीति तम् अकर्माणं निष्क्रियं स्वसुतं तं कपिलं प्रति देवहूति देवहूतिः । देवहूतिशब्दे विभक्त्यभाव आर्षः । तत्त्वे विसर्गलोपः संधिश्च आर्षः । धातुर्ब्रह्मणः वचः 'एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः । अविद्यासशयग्रन्थिं छित्त्वा गां विचरिष्यति' इति ब्रह्मवाक्यं यद्वा धातुः स्वपोषकस्य कर्दमस्य छेत्ता ते हृदयग्रन्थिमौदर्यो ब्रह्मभावनः इति वाक्यं संस्मरन्ती आह ॥ ६ ॥

निर्विण्णेति । हे भूमन् सर्वगुणगरिष्ठ असन्ति प्रकृतिपरिणामरूपत्वादसत्प्रायाणि यानीन्द्रियाणि तेषां तर्पणं तस्मात् नितरामत्यन्तं निर्विण्णा खिन्ना श्रान्तेति यावत् । इन्द्रियतर्पणतस्तु मोदवद्भिरेव भवितव्यं कथं निर्विण्णेति वदसि तत्र वच्मि । हे प्रभो संभाव्यमानेन संपाद्यमानेन येनेन्द्रियतर्पणेन अन्धं करोतीत्यन्धयतीत्यन्धं तमोऽज्ञानं प्रपन्ना प्रविष्टा असीति शेषः । अतो निर्विण्णेति वच्मि ॥ ७ ॥ तस्येति । दुष्पारस्यापारस्य अन्धस्यान्धतापादकस्य तस्य तमसोऽज्ञानस्य पारं गमयतीति पारगं त्वं त्वद्रूपं सदत्युत्तमत्वाच्छ्रेष्ठं चक्षुः जन्मनां बहुजनुषाम् अन्ते त्वदनुग्रहात् भवतः प्रसादात् मे मया अद्य सांप्रतमेव लब्धम् । भवतीति शेषः ॥ ८ ॥ एतदेव प्रपञ्चयति । य इति । पुंसां जीवानाम् ईश्वरो नियन्ता आद्यः जगत्कारणभूतः यः भगवान् सः भवान् वै । तमसा अन्धस्य लोकस्य चक्षुः चक्षुरिन्द्रियाधिष्ठाता सूर्यः इव उदित उदयं प्राप्तो भवतीत्यर्थः । किल ॥ ९ ॥ अपीति । हे देव एतस्मिन्देहे अहं मम इत्येवंरूपः यः अवग्रहोऽभिमानः त्वया एव योजितः मे मम तमवग्रहात्मकं संमोहम् उदितः सूर्यस्तिमिरमिवेति शेषः । अपाक्रष्टुमपनेतुम् अपि त्वमेव अर्हसि । अप्येतदर्थसंभावनायाम् । त्वत्संकल्पादेवोत्पन्नो मोहस्त्वयैव निवर्त्तितव्य इत्यर्थः । यो बन्धकः स्याच्च स एव मोचकः इति न्यायादिति भावः ॥ १० ॥ तमिति । तमुक्तप्रकारं स्वभृत्या निजभक्तास्तेषां यः संसारतरुः संसाररूपो वृक्षस्तस्य कुठारं परशुरूपं सद्धर्मविदां निवृत्तिधर्मज्ञानां मध्ये वरिष्ठं श्रेष्ठं शरण्यं शरणार्हं त्वा त्वाम् अहं प्रकृतेः पुरुषस्य च इदं परमात्मनोऽप्युपलक्षणम् । तत्त्वत्रयस्येत्यर्थः । जिज्ञासया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञातुमिच्छया शरणं संसृतेः सकाशाद्रक्षितारं समाश्रयं वा । गता सती नमामि ॥ ११ ॥ एवमुक्तः कपिलस्तां बभाषे इत्याह मैत्रेयः । इतीति । आत्मवतां निगृहीतमनसां सतां सत्पुरुषाणां गतिर्मुक्त्युपायभूतः कपिलः पुंसाम् अपवर्गवर्द्धनं मोक्षरुचिकरं निरवद्यं निर्दोषं स्वमातुर्देवहूत्याः ईप्सितमभिप्रेतम् इत्येवं निशम्य श्रुत्वा धिया मनसा अभिनन्द्य प्रशंसां कृत्वा ईषत्स्मितेन मन्दहासेन शोभितमाननं मुखं यस्य स एवंभूतः सन् बभाषे स्वमातरं कथयामास ॥ १२ ॥

तत्र ज्ञानकर्मयोगादिभिरनुगृहीतभगवद्भक्तियोगस्यैव साक्षान्मुक्त्युपायत्वमुत्तराध्यायेषु विस्तरेण प्रतिपादयिष्यमाणमत्र संग्रहेण प्रतिपादयंस्तावत् ज्ञानयोगमवतारयति । योग इति द्वाभ्याम् । आध्यात्मिकः प्रकृतिविविक्तात्मयाथात्म्यज्ञानरूपः, योगः पुंसां मुमुक्षूणां निःश्रेयसाय मोक्षाय, मे मया, मतः इष्टः । ज्ञानयोगो मुमुक्षूणां मोक्षसाधनमिति मन्मतमित्यर्थः । आत्मज्ञानयोगं प्रशंसन्नाह । यत्र यस्मिन्नाध्यात्मिके योगे निष्पन्ने सति, दुःखस्य, सुखस्य च वैषयिकसुखदुःखयोरित्यर्थः । अत्यन्तोपरतिरत्यन्तं विनाशः, भवतीति शेषः । चोऽवधारणे । आत्मनीत्यध्यात्मं तत्र भवो हि आध्यात्मिकः, जीवब्रह्मपरमेश्वराणां स्वरूपबोधकः, यः सांख्ययोगोऽष्टाङ्गयोगो भक्तियोगश्चेत्येवं त्रिविधो योगो, निःश्रेयसाय पुंसां भवतीत्यन्ये ॥ १३ ॥ तमिति । हे अनघे मातः, यमात्मयोगं, श्रोतुकामानाम् ऋषीणां सनकादीनां पुरः, पुरा पूर्वकाले, अहम् अवोचं हंसरूपेण उक्तवानस्मियम् इममात्मयोगं, उरुभिर्बहुभिरङ्गैः शमदमादिभिः नैपुणं यथा भवति तथा, ते तुभ्यं, प्रवक्ष्यामि । सर्वाङ्गनैपुणमिति पाठे सर्वेषामङ्गानां यमादीनां नैपुणं यस्मिन्नित्यर्थः ॥ १४ ॥ एवमध्यात्मयोगमवतार्य तत्र प्रकृतिविविक्तात्मस्वरूपग्रहयोग्यमनसः स्वरूपं कथयिष्यंस्तावन्मनस एव बन्धमोक्षकारणत्वमाह । चेत इति । अस्यात्मनो जीवस्य, बन्धाय मुक्तये मोक्षाय च, चेतश्चित्तमेव, कारणमिति शेषः । मतं खलु । कीदृशं चेतो बन्धाय कीदृशं च तन्मुक्तये भवेदित्यत्राह । गुणेषु गुणकार्येषु, शब्दादिविषयेषु सक्तमासक्तिं प्राप्तं चेतः, बन्धाय भवति । पुंसीश्वरे, रतं वा आसक्तं सत्तु, मुक्तये संसृतिबन्धविनाशाय भवतीति विवेकः ॥ १५ ॥ प्रकृतिविविक्तात्मस्वरूपग्रहणयोग्यमनःस्वरूपमाह अहमित्यादित्रिभिः । अहमिति । तदिति ज्ञानेति । अहं च मम च तौ यावभिमानौ ताभ्यामुत्थास्तैः, द्वन्द्वान्ते श्रूयमाणोऽभिमानोऽहमा ममशब्देन च संबध्यते । तत्रानात्मनि देहे आत्माभिमानः अहमभिमानः, अस्वीये स्वीयताभिमानो ममाभिमानस्ताभ्यामुत्पन्नैरित्यर्थः । तथाच स्मृतिः 'अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति याः मतिः । अविद्यातरुसंभूतं बीजमेतद्द्विधा स्थितम्' इति । कामश्च लोभश्च तावादी येषां तैः मलैः, वीतं रहितम् अत एव, शुद्धम्, अत एव अदुःखम्, असुखम्, ऐन्द्रियकसुखदुःखैरनभिभूतमित्यर्थः । मनः, यदा सममेकरूपं यथा भवति तथाविधं, जायते तदा पुरुष उक्तविधमनस्कः पुमान्, ज्ञानं, च वैराग्यं ताभ्यां युक्तस्तेन ज्ञानं शास्त्रजन्यमात्मस्वरूपयाथात्म्यावगाहि, वैराग्यं विषयेष्वनासक्तिः भक्तियुक्तेन विशेष्यभूतभगवद्भक्तियुक्तेन च आत्मना मनसा, प्रकृतेः प्रकृतिकार्यशरीरेन्द्रियमनःप्राणादिभ्य इत्यर्थः । परं स्वरूपतः स्वभावतश्चात्यन्तिकलक्षणम्, अत एव केवलं सत्त्वादिगुणरहितं प्रकृतिपरिणामागतदेवमनुष्यादिभावरहितमित्यर्थः । अत एव निरन्तरं प्रतिशरीरं भिन्नमपि सर्वत्र ज्ञानैकाकारतया वैषम्यरहितम् अत एव अखण्डितं खण्डनानर्हं, स्वयंज्योतिः स्वयंप्रकाशम्, उदासीनं निर्व्यापारम्, आत्मानं प्रत्यगात्मानं हतमोजो बलं यस्यास्तां संसारयितृत्वरूपबलहीनामित्यर्थः । प्रकृतिं च, पश्यति । इति त्रयाणामेकान्वयः अत्र कैश्चिदन्तर्गतैः कैश्चिच्छेषोपलक्षणादिलब्धपदैः भगवद्गीतोक्तमात्मस्वरूपं स्मारितमस्ति ॥ १६–१८ ॥

एवमात्मनः स्वरूपग्रहणयोग्यमनसः स्वरूपस्य शिक्षा कृता आत्मयाथात्म्यस्य च शिक्षा कृता । अथात्र भगवद्भक्तियुक्तेनात्मना 'पश्यत्यात्मानम्' इति यदुक्तं, तेन केवलप्रकृतिविलक्षणतया यदात्मस्वरूपचिन्तनमुक्तं तन्मात्रेण प्रत्यगात्मसाक्षात्कारो न भवेदेव, किं तु ब्रह्मात्मकप्रत्यगात्मानुसंधानेनैव प्रत्यगात्मसाक्षात्कारोऽपि, इति संसूचितम् । अथ ब्रह्मात्मकत्वमेवोक्तस्वरूपप्रत्यगात्मनः स्वाभाविकं स्वरूपं तत्र विशेष्यभूतब्रह्मणोऽननुसंधाने विशेषणभूतप्रत्यगात्मानुसंधानासंभव एव । न हि व्यक्तिगुणादीन्विना जातिगुणादयः पृथगुपलभ्यन्ते । तस्मात्प्रकृतिविलक्षणप्रत्यगात्मचिन्तनमपि ब्रह्मशरीरतयैव कार्यम् । एवंविधं चिन्तनमेव विशेष्यभूतभगवद्भक्तिरूपापन्नं सन्मुक्तिसाधनं न केवलमित्याह । नेति । अखिलात्मनि अखिलानां जीवानामात्मभूते भगवति युज्यमानया भक्त्या सदृशः ब्रह्मसिद्धये ब्रह्मशब्दोऽत्र भावप्रधानः । द्व्येकयोरित्यादिवत् । ब्रह्मत्वं ब्रह्मप्रकारः तत्सिद्धये ब्रह्मवदपहतपाप्मत्वादिगुणाष्टकाविर्भावसिद्धये इत्यर्थः । योगिनां शिवः अन्यानपेक्षः, पन्था उपायः न अस्ति ब्रह्मात्मकप्रत्यगात्मानुसंधानपूर्वकप्रत्यगात्मशरीरकभगवद्भक्तिसदृशो मुक्त्युपाय कश्चिदन्यो नास्तीत्यर्थः ॥ १९ ॥ एवमनभिसंहितफलस्वधर्मसंपालननिरस्तकामादिदोषविशुद्धान्तःकरणानुसंहितब्रह्मात्मकप्रत्यगात्मयाथात्म्यज्ञानयोगपूर्वका भगवद्भक्तिर्मोक्षसाधनमित्युक्तम् । अथास्य सर्वस्य निवृत्तिधर्मस्य रुचिजनने सत्संगतिरेव प्रथमं कारणमसत्संगतिः संसृतिहेतुरिति वदन् सतां स्वरूपं चाह । प्रसङ्गमिति पञ्चभिः । प्रसङ्गमसत्स्विन्द्रियार्थेषु तत्परायणेषु च प्रकृष्टासक्तिम्, आत्मनो जीवस्य अजरमशिथिलं पाशं बन्धं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कवयः विदुः। सुधियो वदन्तीत्यर्थः। स उक्तविधः प्रसङ्ग एव स इत्यनेनासद्रूपविषयपरिहारेण प्रसङ्गमात्रस्यैव परामर्शः। साधुषु कृतश्चेत् अपावृतं निरावरणम् अविघ्नोपहतमिति यावत्। मोक्षद्वारं मोक्षोपायः साधव एव मोक्षप्राप्त्युपायरूपाः सन्तीति भावः॥ २०॥

के ते साधव इत्यत्राह। तितिक्षव इति। तितिक्षवः विहितारम्भापराधेष्वतिमूर्खेष्वपि क्षितिवत्सहनशीलाः कारुणिकाः स्वार्थनिरपेक्षतापूर्वं परदुःखनिराचिकीर्षवः अत एव सर्वदेहिनां सुहृदः मित्राणि अत एव अजाता अविद्यमानाः शत्रवो येषां ते शान्ताः अन्तःकरणशमोपेताः इदं दमादीनामप्युपलक्षणम्। शमदमादिसद्गुणैरुपपन्ना इत्यर्थः। साधवः परकार्यसाधकाः शास्त्रसिद्धार्थानुवर्तिन इति वा। साधुषु शीलं तदेव भूषणं येषां ते, ते साधव इति शेषः। यद्वा तितिक्ष्वादिसाधुभूषणान्तषट्लक्षणवन्तः ये एते साधव इत्येतद्विशेष्यम्॥ २१॥ मयीति। कपिलस्यावेशावतारत्वेऽपि तज्जीवशक्तेरभिभूततापूर्वं भगवच्छक्तेरधिकतयोद्भूतत्वान्मयीति व्यपदेशः। मयीश्वरे अनन्येनाव्यभिचारेण भावेनान्तःकरणेन अभिप्रायविशेषेण वा। ये जनाः दृढामविचाल्यां भक्तिं कुर्वन्ति। मत्कृते मदर्थं त्यक्तानि कर्माणि यैस्ते परित्यक्तमदाराधनविरोधिप्रवृत्तिधर्मा इत्यर्थः। तथा त्यक्ताः स्वजनबान्धवा मद्भक्तिभक्तविरोधकारिणः स्वजनबान्धवा यैस्ते ते साधवः॥ २२॥ मदिति। अहमेवाश्रयो विषयो यासां ताभिः कथाभिः हृष्टाः सन्तः ताः शृण्वन्ति स्नेहेनाकर्णयन्ति कथयन्ति गायन्ति च। मदाश्रयकथाश्रवणादिभिरन्तरत्यन्तहृष्टाः इत्यर्थः। पाठान्तरे मदाश्रयकथास्वेव मृष्टा अतिशयितस्वादोपेताः मय्येव गतं न्यस्तं चेतो यैस्ते अत एव एतान् विविधा नानाविधाः तापा आध्यात्मिकादयः न तपन्ति। न क्लेशयन्तीत्यर्थः॥ २३॥ त इति। हे साध्वि ते उक्तलक्षणाः एते सर्वसङ्गैर्विषयासङ्गैर्विवर्जिता विरहिताः साधवः ज्ञेयाः। तेष्वेतेषु साधुषु सङ्गः ते त्वया अथ प्रथमतः प्रार्थ्यः प्रार्थनीयः। हि यस्मात् ते साधवः सङ्गदोषहराः इन्द्रियार्थप्रसङ्गहेतुकानादिपुण्यपापरूपदोषहरा इत्यर्थः॥ २४॥ कथं सतां प्रसङ्गान्निवृत्तिधर्माभिरुचिरुत्पद्यत इत्यत्राह। सतामिति। सतां साधूनां प्रसङ्गात् मम वीर्यसंविदः वीर्याणि संवेदयन्तीति तथाभूताः णिजर्थगर्भमिदम्। यद्वा वीर्याणां संवित्संवेदनं यासु ताः संविदिति भावक्विबन्तम्। कथाः हृच्च कर्णश्च तयोः रसायनाः अमृतवद्रुचिकराः सत्यः भवन्ति प्रवर्त्तन्ते। तज्जोषणात्तासां कथानां सेवनात् आशु सद्य एव अपवर्गस्य मोक्षस्य वर्त्म द्वारभूतं तस्मिन् भगवदुपसदने इति शेषः। श्रद्धा प्रथमं त्वरा ततः रतिर्हरौ प्रीतिः ततः भक्तिः अनुक्रमिष्यति अनुक्रमेण भविष्यतीत्यर्थः। अत्र भक्तिः फलरूपा साधनरूपा च तत्र प्रथमं साधनरूपा ततः फलरूपा इत्यपि क्रमः॥ २५॥

सत्सङ्गादिप्रणाल्या भगवत्प्रीतिरूपभक्तावुत्पन्नायां तत्रैव चित्तं सावधानतया नियम्यमित्याह। भक्त्येति। मम रचनाः सृष्ट्यादिव्यापारास्तासामनुचिन्ता यस्यां तया भक्त्या दृष्टश्रुतात् दृष्टमैहिकं धनपृथ्व्यन्नपशुपुत्रादिकं च श्रुतमामुष्मिकं स्वर्गतदुद्यानाप्सरोविमानामृतहारादिकं च तयोः समाहारस्तस्मात् ऐन्द्रियादिन्द्रियोपभोग्यसुखात् जात उत्पन्नो विरागो वैराग्यं यस्य सः तन्नश्वरत्वं समीक्ष्योद्भूतवैराग्य इत्यर्थः। पुमान् योगयुक्तः अनभिसंहितफलकर्मयोगज्ञानयोगाभ्यां युक्तः सन् ऋजुभिः भगवत्स्वरूपे चित्तैकाग्रतासंपादकैः योगस्य भक्तियोगस्य मार्गैः साधनैः चित्तस्य ग्रहणे भगवन्मूर्तौ नियमने इत्यर्थः। यत्तः प्रमादरहितः सन् यतिष्यते यत्नं कुर्यादित्यर्थः॥ २६॥ योगमार्गेणैव दर्शयन्ननयैव भक्त्या पुमान्मां प्राप्नोतीत्याह। असेवयेति। प्रकृतेर्मायायाः गुणानां शब्दादिविषयाणाम् असेवया संसेवनवर्जनेन वैराग्येण विजृम्भितं विवर्द्धितं तेन ज्ञानेन योगेन यमाद्यष्टाङ्गसंसाधनरूपेण योगेन मयि अर्पितया भक्त्या मत्प्रीणनाय विहितया साधनभक्त्या च अयं जनः इहास्मिन्नेव जन्मनि देहस्थे स्वात्मनि वा। प्रत्यगात्मानं साक्षिरूपेणावस्थितम्, माम् अवरुन्धे साक्षात्करोति॥ २७॥ एवं ज्ञानयोगानुगृहीतभगवद्भक्तियोगस्यैव मुक्त्युपायत्वं संग्रहेणाश्रुत्य पुनस्तद्विस्तरबुभुत्सया पृच्छति त्रिभिः। काचेति। उचिता मुक्तिं साधयितुं योग्या त्वयि भक्तिः का च इति भक्तिस्वरूपप्रश्नः। काचित्काश्विदित्यपि पाठान्तरं तदाप्ययमेवार्थः। तत्रापि मम स्त्रियाः कीदृशी गोचरा योग्या। अनेन अधिकारानुसार्यवान्तरतद्भेदप्रश्नः। यया भक्त्या अहं तापत्रयातुरोऽहम्, ते तव निर्वाणं निरतिशयसुखं पदं स्थानम् अञ्जसा सुखेन अन्वश्नवै अनुप्राप्नुवानि अत्राहमित्युपासकप्रश्नः। ते पदमित्यनेन प्राप्यप्रश्नः। निर्वाणमिति प्राप्तिफलप्रश्नः॥ २८॥ य इति। हे निर्वाणात्मन् सुखमूर्त्ते, भगवद्बाणः बाणवद्भगवन्तमेव यो लक्ष्याकरोति तथाविध इत्यर्थः। यः योगः त्वया उदितः कथितः सः कीदृशः किंप्रकारः तस्य अङ्गानि च कति कतिसंख्यानि। यतो येभ्योऽङ्गेभ्यः अवबुध्यतेऽनेनेत्यवबोधनं तत्त्वस्यात्मतत्त्वस्य अवबोधनं साक्षात्कारसाधनमुपासनं निवर्त्त्यते कीदृश इत्यत्र प्रकारप्रश्नः। कति चाङ्गानीत्यङ्गगणनप्रश्नः। एवमर्थपञ्चकप्रश्नो बोध्यः॥ २९॥

तदेतदिति। हे हरे। दुर्बोधं दुर्ज्ञेयम्, तत् एतत् प्रश्नपञ्चकोत्तरमित्यर्थः। योषा स्त्रीजातिः अत एव मन्दधीः अहम्, भवदनुग्रहात् सुखं यथा बुध्येयं जानीयां तथा मे मह्यं विजानीहि ज्ञापय॥ ३०॥ एवं स्वमात्रा पृष्टः कपिलः भगवद्भक्तियोगमवतारयामासेत्याह। विदित्वेति। कपिलः इत्थमुक्तप्रकारेण मातुर्देवहूत्याः अर्थं भक्तियोगादिसंबन्धि यच्छुश्रूषितं तत्स्वरूप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मित्यर्थः। विदित्वा यत्र यस्यां मातरि तन्वा देहेन अभिजातः। अतः जातस्नेहः सन् तत्त्वान्याम्नायन्ते अनुक्रम्यन्ते यस्मिन्नेवंभूतं यत् सांख्यं तत्त्वसंख्यानेनात्मस्वरूपप्रकाशकं शास्त्रमित्यर्थः। प्रवदन्ति तत् प्रोवाच। भक्तिवितानयोगं भक्तिविस्ताररूपं योगं च प्रोवाच वै निश्चितमेव ॥ ३१ ॥ सविस्तारं भक्तियोगं सम्प्रविशाध्यायेन बोधयिष्यन् भजनीयस्य परस्य ब्रह्मणो माहात्म्यसूचनाय भगवतो जगत्सृष्ट्यादिलीलाः षड्विंशेन कथयिष्यन्संश्चात्र तावद्भक्तियोगं संग्रहेण तत्स्वरूपकथनपूर्वकं प्रशंसति। देवानामिति। गुणाः शब्दादयो विषयाः लिङ्ग्यन्ते ज्ञायन्ते यैस्तेषां गुणलिङ्गानां गुणज्ञापकानां देवानां देवाधिष्ठितानां ज्ञानेन्द्रियाणामित्यर्थः। गुरुमनुसृत्य तदुच्चारणमन्वविच्छिन्नपाठपरंपरया श्रूयते इत्यनुश्रवो वेदस्तद्विहितमानुश्राविकं कर्म येषां ते शास्त्रप्रसिद्धव्यापारानुष्ठानपराणां कर्मेन्द्रियाणामित्यर्थः। वेदोदिते वर्णाश्रमधर्मयुक्ते कर्मणि वर्त्तमानानामिति भावः। एवमुभयविधेन्द्रियाणाम् एक मनसस्तु एकाग्रतायुक्तमनसश्च सत्त्वे शुद्धसत्त्वमये भगवद्विग्रहे एव स्वाभाविकी साहजिकी अनिमित्ता फलाभिसंधिरहिता च या- वृत्तिर्व्यापारः ॥ ३२ ॥ अनिमित्तेति। सा उक्तप्रकारा भागवती भगवत्संबंधिनी भक्तिः सिद्धेरैश्वर्यकैवल्यादिसिद्धेः सकाशात् गरीयसी श्रेष्ठा निरतिशयानन्दरूपभगवदनुभवफलसाधनभावादुत्तमेत्यर्थः। या एवंविधा भागवती भक्तिः कोशं लिङ्गशरीरम्, अनादिपुण्यपापरूपकर्मवासनात्मकसूक्ष्मशरीरमित्यर्थः। निगीर्णं भुक्तमन्नपानादिकम् अनलः जाठराग्निः यथा तथा आशु शीघ्रं जरयति जीर्णं करोति नाशयतीति यावत्। द्वयोरेकाऽन्वयः ॥ ३३ ॥

पुनर्भक्तियोगमेव प्रस्तोतुं निरतिशयानन्दरूपभगवदनुभवात्मकभक्तियोगनिष्ठास्तत्साधर्म्यरूपमुक्तिमपि नेच्छन्तीत्याह। नैकात्मतामिति। हे मातः मम पादौ तयोः सेवा तस्यामभिरता आसक्ताः मय्येव ईहा सर्वेन्द्रियचेष्टा येषां ते इत्थंभूताः ये केचित् भागवताः सन्ति ते तु अन्योन्यतः परस्परं मिलित्वेति शेषः। मम पौरुषाणि कल्याणगुणप्रकाशकानि सुचेष्टितानि प्रसज्य प्रसूय, सभाजयन्तस्तानि सम्यगनुमोदयन्तः, पौरुषप्रसङ्गजनितानन्दसंप्लुताः सन्त इत्यर्थः। मे मम, एकात्मतामेकस्वभावतां मम समानगुणकतामिति यावत्। 'मम साधर्म्यमागताः' इत्युक्तेः। न स्पृहयन्ति नेच्छन्ति ॥ ३४ ॥ पश्यन्तीति। किं तु हे अम्ब मातः, ते सन्तः, मे मम, रुचिराण्यतिसुन्दराणि प्रसन्नानि वक्त्राणि अरुणानि लोचनानि च येषु तानि दिव्यान्यमानुषाणि वरप्रदानि अभिमतार्थप्रदानि वराकेभ्य इति शेषः। रूपाणि दिव्यमङ्गलशरीराणि पश्यन्ति ध्यायन्ति। साकं तैर्मद्रूपैः सह, स्पृहणीयां सुक्तानां सरस्वत्या वापि स्पृहाविधानार्हां वाचं, वदन्ति। भगवता साकं वार्त्ताः कृत्वा ततः मया साकं भगवतैवं वार्त्ताः कृताः तच्छ्रुत्वान्यो वदति मया साकमपि हरिणैवं वार्त्ता कृतेति ते परस्परं कथयन्तीति भावः ॥ ३५ ॥ यद्यप्येवं- विधैस्तैर्मद्भक्तैर्मुक्तिर्न प्रार्थ्यते तथापि तेषामवश्यं सा भवित्रीत्याह द्वाभ्याम्। तैरिति। दर्शनीया मनोहरा अवयवा मुखनेत्रादयो येषु तैः, विलासो लीला च हासो मन्दहसनं तद्युक्तमीक्षणमवलोकनं च वामसूक्तं मधुरभाषणं च उदाराणि सुन्दराणि विलासा- दिसूक्तान्तानि येषु तैः तैर्मद्रूपैः हृत आत्मा मनो येषां तान् हृताः प्राणाः ज्ञानकर्मेन्द्रियाणि येषां तान् अनिच्छतो मुक्तिमप्य- प्रार्थ्यमानांस्तान् भक्तिः पूर्वोक्ता मद्भक्तिरेव अण्वीं सूक्ष्मां, गतिं मुक्तिं प्रयुङ्क्ते प्रापयति। चोऽवधारणे। वस्तुतस्तु ते मत्पार्षद- तामेव गच्छन्तीत्यर्थः ॥ ३६ ॥ अथो इति। अथो अविद्यानिवृत्तिपूर्वकमुक्त्यात्मकगतिप्राप्त्यनंतरं, मायाविनो योगमायास्वामिन- मम तां प्रसिद्धां, विभूतिमाब्रह्मलोकपर्यन्तां संपदं, मम मायाविसृष्टामितिपाठे मन्मायादत्तां विभूतिमित्यर्थः। तथा अनुप्रवृत्तः भक्तियोगमनुसृत्य प्रवृत्तिं प्राप्तम्, अष्टाङ्गमणिमामहिमालघिमागरिमेशित्ववशीत्वप्राप्तिप्राकाम्यरूपाष्टप्रकारं ऐश्वर्यं भद्रां मङ्गलरूपां भागवतीं श्रियं, ब्रह्माण्डान्तर्गतवैकुण्ठादिदिव्यलोकगतसंपत्तिं च, अस्पृहयन्ति न इच्छन्ति। तदपि ते भक्ताः तु परस्परः प्रकृतिपुरुषविलक्षणस्य मे मम लोके अक्षरब्रह्मनित्यविभूतिपरमव्योमादिसंज्ञिके मद्धाम्नीत्यर्थः। अश्नुवते प्राप्नुवन्ति। क्षयिष्णु- सातिशयसुखान् लोकान्नाप्नुवन्ति किं तु निरतिशयसुखं मल्लोकं प्राप्य तत्राक्षयं तत्रत्यं यत्किंचित्तदनिच्छवोऽपि मदिच्छया ते प्राप्नुवन्तीत्यर्थः ॥ ३७ ॥

ननु लोकत्वाविशेषात्स्वर्गादिवद्लोक्तृभोग्यभोगोपकारणानां नाशः स्यात् तत्राह। नेति। शान्तरूपे शुद्धसत्त्वमयात्मके मल्लोके मत्पराः मदनुभवपराः कर्हिचित्कदाचिदपि न नङ्क्ष्यन्ति मदनुभवहीना न भवन्तीत्यर्थः। अनिमिषः मे मम हेति मदीयं कालचक्रमित्यर्थः। नो लेढि न ग्रसति। तत्र हेतुः। येषामिति। येषाम् अहं प्रियो निरतिशयप्रीतिविषयः आत्मा आत्मवत्प्रीतिभाजनमित्यर्थः। सुतश्च सुत इव स्नेहविषयः। सखा सखेव विश्वासास्पदमित्यर्थः। गुरुः गुरुरिव हितोपदेष्टेत्यर्थः। सुहृदः सुहृद इव हितकारीत्यर्थ। इष्टं दैवम् इष्टदेवः सन् पूज्योऽप्यहमेवेत्यर्थः। एवं सर्वभावेन मां ये भजन्ति तान्मदीयं कालचक्रं न ग्रसतीति भावः। एवं सर्वभावेनोपासीनानहरहरनुष्ठीयमानवर्णाश्रमधर्मानुगृहीतमदुपासनरूपमत्स- माराधनप्रीतोऽहं मद्याथात्म्यानुभवरूपानन्दं प्रापय्य पुनर्नावर्तयामीति भगवतोऽभिप्रायः। तथा च भगवता स्वयमेवोक्तं मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्। नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः। आब्रह्मभवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते इति च। श्रुतिरपि। स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्त्तते इत्यादिका ॥ ३८ ॥ एवंभूतां मुक्तिमहमेकान्तिकेभ्यो मद्भक्तेभ्यो ददामीत्याह। इममिति द्वाभ्याम्। हे मातः इमं लोकं तथैव अमुं लोकं परलोकं च विसृज्य उभावपि लोकौ हेयाविति निश्चित्येत्यर्थः। उभौ लोकौ यात्यनेनेति उभयायी तम् आत्मानम् उभयलौकिकधर्मसाधनं देहमित्यर्थः। विसृज्य उक्तविधे तस्मिन्देहे आत्माभिमानं परित्यज्येत्यर्थः। तथा आत्मानं देहम् अनु ये देहानुबन्धिनः पुत्रकलत्रादयः इत्यर्थः। ये च इह रायो धनानि पशवः गृहाश्च तान् ॥ ३९ ॥ विसृज्येति। अन्यांश्च सर्वान् परिग्रहादीन् विसृज्य तेषु ममतामपोह्येत्यर्थः। विश्वतोमुखं सर्वज्ञं माम् एवं सुतादिभावेन अनन्यया विषयान्तरवितृष्णया भक्त्या भजन्त्याराधयन्ति तान् मृत्योः संसारात् अतिपारये अत्यन्तं पारं नयामि पुनर्न संसारयामीत्यर्थः। द्वयोरेकसंबन्धः ॥ ४० ॥ अनन्येत्यनेन सूचितं देवतान्तरभक्तेरमुक्तिसाधनत्वं वक्तुं देवतान्तराणां क्षेत्रज्ञत्वात्कर्मवश्यत्वान्मन्निदेशानुवर्त्तित्वान्न तद्भजनान्मुक्तिरित्याह। नान्यत्रेति। सर्वभूतानाम् आत्मनः धारकात् अनेन सर्वभूतानां धार्यत्वेन शरीरत्वमुक्तम्। प्रधानं च पुरुषश्च तयोरीश्वरस्तस्मात् सर्वावस्थावस्थिताचेतनसचेतनयोरन्तः प्रविश्य नियन्तुः। अनेन कर्मायत्तसर्वावस्थावस्थितप्रधानपुरुषयोर्नियाम्यत्वमुक्तम्। अहं चासौ भगवांश्च मद्भगवांस्तस्मात् पूर्णषाड्गुण्यान्मत्त इत्यर्थः। अनेन स्वस्यैव मुक्तिप्रदत्वमितरेषां दुर्भगत्वेनानुत्तारकत्वं च सूचितम्। अन्यत्र ऽन्यस्मिन् सेव्यमान इति शेषः। तीव्रं दुःसहं भयं गर्भजन्मजरामरणादिसांसारिकभयं न निवर्त्तते ॥४१॥ प्रधानपुरुषेश्वरादित्यनेन सूचितमितरेषामाब्रह्मपर्यन्तक्षेत्रज्ञानां स्वनियाम्यत्वमाह। मद्भयादिति। अयं वातः पवनः मद्भयात् वाति सूर्यः मद्भयात् तपति इन्द्रः पर्जन्यात्मा शक्रः मद्भयात् वर्षति जलमिति प्रसिद्धेः कर्माविवक्षा। अग्निः मद्भयात् दहति। दाह्यमिति शेषः। मृत्युः मद्भयात् चरति। मरणीयमारणार्थमिति शेषः। वाय्वादयो मन्निर्दिष्टव्यापाराकरणे मत्संजातमहाभयनिमित्तदण्डनमुद्भावयन्तः स्वव्यापारेषु जागरूकास्तिष्ठन्तीत्यर्थः। एतदर्थाश्रुतिः भीषास्माद्वातः पवते इत्यादिका ज्ञेया ॥ ४२ ॥ मद्भजनादेव मोक्ष इत्यत्र सदाचारं प्रमाणयति। ज्ञानेति। तस्मादिति शेषः। योगिनो मदुपासकाः ज्ञानं च वैराग्यं च ताभ्यां युक्तस्तेन भक्तियोगेन मद्भक्तियोगेन क्षेमाय नित्यनिवृत्तनिरतिशयानन्दरूपमदनुभवात्मकक्षेमाय अकुतोभयं कुतश्चिद्भयरहितं मे मम पादमूलमेव प्रविशन्ति भजन्ते प्राप्नुवन्तीति वा ॥ ४३ ॥ आलोड्य सर्वशास्त्राणि इति न्यायेनोक्तं वक्ष्यमाणं च कृत्स्नं शास्त्रार्थं सुखग्रहणाय संगृह्य निर्दिशति। एतावानिति। तीव्रेणान्तरायानुपहतेन भक्तियोगेन मनश्चित्तं मयि अर्पितं सत् तत्रैव स्थिरं निश्चलं भवति। एतावान् एव अस्मिन् लोके लोकात्मके प्रकृतिमण्डले पुंसां बद्धजीवानां निःश्रेयसोदयः परमपुरुषार्थोत्कर्षः भवतीति शेषः ॥ ४४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे पञ्चविंशोऽध्यायः ॥ २५ ॥

अथ षड्विंशोऽध्यायः

श्रीभगवानुवाच

अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्। यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ॥ १ ॥

पुंप्रकृत्योर्विवेकाय षड्विंशे तूपवर्ण्यते। सांख्यतः सर्वभावानां जन्म लक्षणभेदतः ॥ १ ॥
प्रोक्तं पुत्राय यद्धात्रा क्षत्त्रे मित्रात्मजेन यत्। प्राहाध्यात्मं स तन्मात्रे सांख्यं प्राधान्यतो हरिः ॥ २ ॥

तत्त्वाम्नायं यत्प्रवदन्ति सांख्यम् इत्यत्र सांख्यं भक्तियोगश्चेति द्वयमुपक्षिप्तं तत्र भक्तिमुक्त्वेदानीं सांख्यं ब्रुवन्प्रकृतिपुरुषादिशोधनमन्तरेण सृष्ट्यादिकारणत्वकथनायोगात्प्रथमं प्रकृत्यादिशरीरशोधनं तद्विवेकस्य मुक्त्युपायत्वकथनपूर्वकं प्रतिजानीते। अथेति। हे मातः अथ भक्तिनिरूपणानन्तरं तत्त्वानां प्रकृतिपुरुषकालादीनां लक्षणं पृथग् भिन्नभिन्नतयेत्यर्थः। ते तुभ्यं संप्रवक्ष्यामि। यत्पुरुषार्थोपयोगि तदेव वक्तव्यं किं तत्त्वानां लक्षणज्ञानेनेति तत्राह। यत्प्रकृत्यादितत्त्वानां लक्षणं तत् विदित्वा पुरुषो मुमुक्षुः प्राकृतैः प्रकृतिसंबन्धिभिः गुणैः सत्त्वादिभिः सत्त्वादिगुणकार्यभूतानादिबन्धकपुण्यपापरूपदुरितैरित्यर्थः। विमुच्येत। प्रकृत्यादिविवेकहेतुकहेयोपादेयविवेकेन भगवदुपासनद्वारा विमुच्यते इति भावः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्साक्षान्मुक्त्युपायभूतं ज्ञानं तदपि वक्ष्यामीत्याह। ज्ञानमिति। आत्मा परमपुरुषः दृश्यते साक्षात् क्रियतेऽनेनेत्यात्मदर्शनं यत् ज्ञानं पुरुषस्य मुमुक्षोः निःश्रेयसार्थाय मोक्षाय आहुः। वेदान्तास्तज्ज्ञातारश्चेति शेषः। हृदयग्रन्थिभेदनगज्ञाननिवर्त्तकं तत् ज्ञानम्, ते तुभ्यं वर्णये वर्णयामि ॥ २ ॥ तत्रादौ प्रकृतिविलक्षणमात्मस्वरूपं शोधयति। अनादिरिति द्वाभ्याम्। पुरुषो जीवः अनादिरादिभाववर्जितः स्वयंज्योतिः स्वयंप्रकाशः प्रत्यक् स्वस्मै प्रकाशमानं धाम स्वरूपं यस्य स प्रत्यग्धामा प्रकृतेः प्रकृतिपरिणामरूपाच्छरीरेन्द्रियमनःप्राणादेः परः स्वरूपतः स्वभावतश्चात्यन्तविलक्षणः अत एव निर्गुणः प्राकृतसत्त्वादिगुणरहितः तथापि आत्मा शरीरान्तःप्रवेशेन तद्धारकः येनात्मस्वरूपेण विश्वमात्रह्मास्तम्बपर्यन्तस्थूलसूक्ष्मशरीरात्मकविश्वम्, समन्वितं व्याप्तम् एकवचननिर्देशस्तु 'एको व्रीहिः सुसंपन्नः सुपुष्टाः कुरुते प्रजाः' इति वज्जात्यभिप्रायकृतः। अनेन देवादिशरीराणां व्याप्यत्वमात्मनो व्यापकत्वं निरतिशयसूक्ष्मत्वं चोक्तम्। अत्र स्वयंज्योतिः प्रत्यग्धामेति विशेषणद्वयेन पुरुषशब्दवाच्यजीवस्य स्वरूपं निरूपितम्। यः स्वात्मानमन्यांश्च प्रकाशयति तत् स्वयंज्योतिरित्युच्यते यथा दीपादिः तर्हि दीपो यथा जडस्तथात्मा जडस्वरूप इत्यागतं तन्निवारणं प्रत्यग्धामपदेन कृतम्। तत्र दीपादौ पराग्धामत्वमस्ति आत्मनि प्रत्यग्धामत्वमिति दीपादेर्विशेषः। स्वस्मै भासमानत्वं प्रत्यक्त्वं परस्मै भासमानत्वं पराक्त्वं तदेव जडत्वम् एवं पराग्धामदीपादिजडेभ्यो वैलक्षण्येनात्मनो ज्ञानस्वरूपत्वं सिद्धम्। किं च स्वयंज्योतिरित्यनेन ज्ञानगुणकत्वसिद्धिस्तेन स्वपरप्रकाशकत्वमुच्यते। तत्र यथा दीपादिश्चतुरङ्गुलपरिमितस्तेजोरूपैकदेशस्थस्वापृथक्सिद्धधर्मभूतया प्रभया प्रकाशयति स्वधर्मभूतप्रभामनपेक्ष्यैव स्वयमपि प्रकाशते तद्वदात्मापि स्वधर्मभूतज्ञानेनान्यान्प्रकाशयति। स्वधर्मभूतज्ञाननिरपेक्षमेव स्वयमपि प्रकाशते इति ह्युच्यते। तत्रैतावांस्तु विशेषः। पराग्धामा दीपादिः स्वमात्मानमन्यांश्च परस्मै प्रकाशयति। आत्मा तु प्रत्यक्त्वेन स्वात्मानमन्यांश्च स्वस्मै एव प्रकाशयति। प्रकाशो नाम व्यवहारानुगुण्यापादनमेवं च स्वयंप्रकाशत्वं दीपादिष्वात्मनि चाविशिष्टं प्रत्यग्धामत्वं त्वात्मन्येवासाधारणमिति ज्ञानगुणकं ज्ञानस्वरूपं चेति जडाद्विलक्षणमात्मस्वरूपमिति फलितम् ॥ ३ ॥ नेति। अत एव देही उक्तविध आत्मा देहाद्युपाधिभिः देहाद्युपाधिरूपोत्पत्तिविनाशादिभिः सह न जायते व्यापकत्वान्निरतिशयसूक्ष्मत्वादनादित्वाद्देहादिविलक्षणत्वाच्च तैः सह नोत्पद्यते इत्यर्थः। न। म्रियते न नश्यति। ननु देवोऽहं देवोऽयं मनुष्योऽहं मनुष्योऽयं स्थूलोऽहं स्थूलोऽयमिति स्वस्य परेषां च देहात्मनाभेदेनैव प्रतीतेः कथं देहादिभिः सह न जननादिरात्मन इत्यत्राह। निमित्तैः पुण्यपापरूपैः देहात्मा देवोऽहमित्याद्यात्मन्यारोपितदेहधर्मा अस्ति। अतो न देहादिभिः सहाऽऽत्मनो जननादिरित्यर्थः। एतदेव दृष्टान्तेन स्पष्टयति। यथा स्वप्नद्रष्टा स्वाप्नपदार्थनाशे सत्यपि न नश्यति। एवमात्मा जागराद्यवस्थानाशे देहादिनाशे च सत्यपि न नश्यतीति भावः ॥ ४ ॥

एवं प्रकृतिविलक्षणमात्मस्वरूपं विशोध्यैवंविधस्य तस्य कथं कर्तृत्वभोक्तृत्वादिकमित्याशङ्कायामस्य प्रकृतिसंसर्गकृतं कर्तृत्वादिवैशिष्ट्यमुत्तरग्रन्थेक्षया प्रतीयतेऽतस्तद्बोधायास्य प्रकृतिसंसर्गप्रकारमाह। स इति। सः एष उक्तलक्षणः विभुर्निरतिशयसूक्ष्मत्वेन सर्वान्तर्व्यापनसमर्थः प्रत्यगात्मा। सूक्ष्मां नामरूपविभागानर्हनिरतिशयसूक्ष्मदशापन्नामित्यर्थः। अनेन जगदादाविति प्रसङ्गसामर्थ्याल्लभ्यते तदा प्रकृतेः सूक्ष्मदशापन्नत्वात् दैवीं देवस्य विष्णोर्लीलार्थाम् अत एव लीलया देवसंबन्धिपरमार्थलीलया हेतुभूतया पराभिध्यानेनेति वक्ष्यमाणत्वाद्दैवीमित्युक्तत्वाच्च। यदृच्छया एव उपगतां प्राप्ताम् अनादिकालतः कारणाङ्गविशिष्टत्वेऽपि बुद्धीन्द्रियमनःप्राणानित्युक्तस्थूलसूक्ष्मशरीरात्मकप्रकृतिसंबन्धस्य जीवे सहजत्वाभावादीश्वरेच्छातः कादाचित्कामित्यर्थः। गुणमयीं सत्त्वादिगुणप्रचुरां प्रकृतिं स्थूलसूक्ष्मशरीरात्मिकां मायाम् अभ्यपद्यत प्राप्तवान्। स्थूलसूक्ष्मशरीरयोरेव सत्त्वादिगुणकार्यदर्शनादेवमुक्तम्। किं च 'लिङ्गं व्यपोहेत्कुशलोऽहमाख्यं लिङ्गभङ्गश्च योगिनाम्' इत्यादौ शरीरद्वयाभिमानत्यागो लिङ्गभङ्ग इति ज्ञायते। एवं सति लिङ्गभङ्गसाधनसंजातज्ञानेन सांख्यविचारेण च जातपरमेश्वरकृपया सृष्टिकालेश्वरप्रापितशरीरद्वयस्य एतत्प्राप्तिहेतुकारणाङ्गस्य च ज्ञानं लब्ध्वा तेषां मायामयत्वज्ञानं च बुद्ध्वा कृतया परमेश्वरोपासनया जीवः शरीरत्रयविमुक्तो भवेत्। तथा च हरिवाक्यसुधासिन्धोः शताधिकाष्टतमतरङ्गे। ततः प्रीतस्तृतीयाङ्गविवेकं स्वयमाह तान्। वपूंषि त्रीणि जीवस्य स्थूलं सूक्ष्मं च कारणम्। जीवस्य बन्धनान्येव तानि मायामयानि वै। तत्र कारणमेवान्त्यं लभते स्थूलसूक्ष्मताम्। पृथक्त्वेन न तज्जीवाद्धेतुं शक्यं मुमुक्षुभिः। तमोमयं च दुर्भेद्यं कठिनं वज्रसारवत्। यदा मुमुक्षुः सत्सङ्गं कृत्वा साक्षाद्धरिं हृदि। दृढं निश्चित्य रहसि प्रेम्णा ध्यायति निश्चलः। हृदि तस्य च वाक्यानि धत्ते तं चानुवर्त्तते। तदा तु तत्प्रतापेन भवत्यात्मा ततः पृथक्। चिञ्चाबीजस्य त्वग्गर्भविकत्वेन स्थितावपि। अग्नितापेन भिन्नौ स्तो यथा तेन तथैव तौ। नास्ति कारणमायाया जीवस्यास्य पृथक्स्थितौ। एनं विना ह्युपायोऽन्य इति जानीत निश्चितम् इति। अत्र केचिदावरणविक्षेपशक्तिभेदेन प्रकृतिं द्विधा विभज्य पुरुषमपि जीवेश्वररूपेण द्विधा विभज्य एकस्य प्रकृत्यविवेकेन संसारः। इतरस्य प्रकृतिं स्ववशीकुर्वतः सृष्ट्यादिव्यापारस्तत्र प्रकृत्यविवेकाद्यावरणशक्त्या तिरोहितस्तस्य संसारप्रकारः अनेन श्लोकेनोच्यते इति व्याचक्षते तदयुक्तम्। नित्यमविद्याप्रत्यनीकस्वप्रकाशस्वरूपस्येश्वरस्य प्रकृत्यविवेकानुपपत्तेः। निखिलहेयप्रत्यनीकानन्तकल्याणगुणगणमहोदधेरीश्वरस्य लीलोपकरणभूतया स्वनियाम्यया मायया तन्नियाम्यस्य तच्छरीरभूतस्यानादित्वाद्युक्तधर्मस्य तस्माद्विलक्षणस्य प्रत्यगात्मनः ईश्वरेच्छागतस्थूलसूक्ष्मशरीरहेतुप्रकृतिसंबन्धोऽनेन श्लोकेन प्रतिपाद्यते इत्यभ्युपगन्तव्यम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकृत्यभिपत्तिहेतुकमोहनिमित्तकर्तृत्वादिकमस्येति वक्तुं प्रकृतेः सूक्ष्मावस्थाप्रतिसंबन्धिनीं स्थूलावस्थां वदन् तया प्रकृत्या प्रत्यगात्मनः स्वरूपतिरोधानेन मोहमाह। गुणैरिति। सः जीवाख्यपुरुषः इह कार्यदशायां विचित्राः देवमनुष्यादिरूपेण बहुविधाः सरूपाः सर्वासां प्रकृतिपरिणामरूपत्वेनैकरूपाः प्रजाः गुणैः सत्त्वादिभिः सृजतीं प्रकृतिं विलोक्य ज्ञानगूहया ज्ञानतिरोधायिन्या तया प्रकृत्या सद्यः मुमुहे। तस्यां स्वानन्यताबुद्धिमकरोदित्यर्थः ॥ ६ ॥ एवमिति। एवमित्थं, पराभिध्यानेन प्रकृत्या तिरोहित-स्वस्वरूपविस्मरणपूर्वकप्रकृतिचिन्तनेन, पुमान् जीवः प्रकृतेः गुणैः कर्मसु क्रियमाणेषु सत्सु कर्तृत्वं गुणकृतकर्मकर्तृत्वम् आत्मनि मन्यते तानि स्वकर्तृकाणीति मन्यते इत्यर्थः। सांसारिकप्रवृत्तिनिष्ठस्य कर्तृता सत्त्वरजस्तमोगुणसंसर्गकृता न स्वरूपप्रयुक्तेति भावः॥७॥ स्वरूपप्रयुक्तकर्तृत्वाभावमेव विशदयितुं तस्य जनिष्यमाणमुक्तावस्थायामवस्थितं प्रकृतिवियुक्तं स्वरूपं विशिनष्टि। तदिति। अकर्तुर्गमनागमनादिसांसारिकप्रवृत्तिरहितस्येत्यर्थः। तत्र हेतुः। ईशस्याकर्मवश्यस्य साक्षिणः ज्ञानाश्रयस्य ज्ञानगुणकस्येत्यर्थः। साक्षद्द्रष्टृत्वमेव हि साक्षित्वं, 'साक्षाद्द्रष्टरि संज्ञायाम्' इत्यनुशासनानुरोधात्। अनेन ज्ञानगुणकत्वमुक्तं ज्ञानस्वरूपत्वमाह। निर्वृतात्मन आनन्दरूपस्य अस्य जीवस्य तत्तस्मात्सत्त्वरजस्तमोगुणसंसर्गकृतकर्तृत्वात्, संसृतिः संसारः बन्धः संसृतिहेतुरनादि-कालतः कर्मजन्यो बन्धः पारतन्त्र्यं कर्मवश्यत्वं च इत्येतत् तत्कृतं कर्तृत्वप्रयुक्तमेव भवति न तु स्वरूपप्रयुक्तमिति भावः। अयं भावः। जीवात्मानः स्वरूपतः स्वयमसंकुचितापरिच्छिन्ननिर्मलज्ञानस्वरूपाः सन्तः कर्मरूपानाद्यविद्यावेष्टितास्तत्तत्कर्मानुरूप-धर्मात्मकज्ञानसंकोचमापन्ना ब्रह्मादिस्तम्बपर्यन्तविचित्रदेहेषु प्रविष्टास्तत्तद्देहोचितज्ञानप्रसरास्तत्तद्देहात्माभिमानिनस्तदुचितकर्माणि कुर्वाणास्तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यन्ते ॥ ८ ॥ एतत्सांसारिकप्रवृत्तिषु कर्तृत्वं प्रकृतिसंसर्गकृतं न स्वरूप-कृतमिति विशदयन्सांसारिकप्रवृत्तिष्वपि स्वशरीरात्मकप्रकृतिकृतसुखदुःखाश्रयत्वमात्मन एवेत्याह। कार्येति। कार्यं शरीरं च, कारणानि समनस्कानीन्द्रियाणि च, तेषां कर्तृत्वं तस्मिन् बहिर्गमनागमनादिक्रियाकारित्वे प्रकृतिं पुरुषाधिष्ठितां शरीराकारेण परिणतां प्रकृतिमित्यर्थः। कारणं हेतुं विदुः। पुरुषाधिष्ठितशरीराकारपरिणतप्रकृत्याश्रया भोगसाधनभूताः क्रिया इत्यर्थः। सुखदुःखानां पुरुषाधिष्ठितशरीराकारप्रकृतिहेतुकव्यापारजन्यसुखदुःखानामित्यर्थः। भोक्तृत्वे प्रकृतेः शरीरात् परं तदधिष्ठातारं पुरुषमात्मानं कारणं विदुः ॥ ९ ॥

एवं प्रकृतिविलक्षणं तत्संसृष्टं चात्मस्वरूपमभिहितं कार्यकारणभावेनावस्थितं प्रकृतिस्वरूपं चाभिहितं तद्विचार्याथ संसृष्टयोस्तयोः प्रकृतिपुरुषयोः कार्यावस्थाः शुश्रूषती पृच्छति देवहूतिः। प्रकृतेरिति। हे पुरुषोत्तम सत्कार्यम् असत्कारणं च, यदात्मकं प्रकृतिपुरुषात्मकं तथाभूतयोः अस्य जगतः कारणयोः कार्यावस्थायाः पूर्वं कृत्स्नजगत्कारणेन नामरूपविभागा-नर्हसूक्ष्मदशापन्नया तच्छरीरत्वेनावस्थितयोरित्यर्थः। प्रकृतेः कार्यावस्थाप्रधानस्य तथा पुरुषस्य कार्यावस्थब्रह्मात्मक-पुरुषस्यापि एवं द्वयोः लक्षणं ब्रूहि। ब्रह्मात्मकयोः प्रकृतिपुरुषयोः कार्यभेदान्कथयेत्यर्थः ॥ १० ॥ एवं स्वमात्रा पृष्टः कपिलो ब्रह्मात्मप्रकृतिपुरुषकार्यावस्थाः सप्रपञ्चमुपपादयिष्यंस्तावत्प्रकृतेः कारणावस्थां कार्यावस्थां च संग्रहेणाह। यदिति। अविशेषं कारणावस्थायां पृथिव्यादिविशेषरहितम् अत एव अव्यक्तं नामरूपविभागानर्हम्, त्रिगुणं सत्त्वादिगुणत्रयात्मकं तथा नित्यं कारणत्वेन अविनाशि त्रिगुणमित्यनेन जीवपरमात्मवैलक्षण्यमुक्तम्, नित्यमित्यनेन महदाद्यवस्थानामनित्यत्वेऽपि अवस्थावतो द्रव्यस्य नित्यत्वमुक्तम्। एवं प्रकृतेः कारणावस्थोक्ता अथ कार्यावस्थामाह। विशेषवत् विशेषावस्थायां पृथिव्यादिविशेषवत् सदसदात्मकं महदादिपृथिव्यन्तकारणरूपेण ब्रह्मादिस्तम्बपर्यन्तानां शरीरात्मककार्यरूपेण च कार्यकारणात्मकमित्यर्थः। यत् प्रधानं तत् एव प्रकृतिं प्राहुः ॥ ११ ॥ एवमवस्थाद्वयमभिधाय तस्यैव प्रधानस्य कार्याणां महदादीनां सृष्टिमनुक्रमिष्यंस्ताव-त्कार्याणि सुखग्रहणाय गणयति। पञ्चभिरिति। पञ्चभिः भूतैः पञ्चभिः तन्मात्रैः चतुर्भिर्मनोबुद्ध्यहंकारचित्तैः तथा दशभिः ज्ञानकर्मोभयेन्द्रियैः इत्येवं संस्थाभेदेन एतत् एतं चतुरधिका विंशतिर्यस्मिंस्तं ब्रह्म ब्रह्मात्मकं गणं प्राधानिकं प्रधानकार्यात्मकं विदुः ॥ १२ ॥ एतद्विवृणोति त्रिभिः। महाभूतानीति। महाभूतान्याकाशादीनि पञ्च एव। एवकारोऽधिकसंख्याव्यवच्छेदार्थः। तानि गणयति। भूः पृथ्वी आपो जलानि अग्निस्तेजःशब्दवाच्यः मरुद्वायुः नभ आकाशम् इति गन्ध आदिर्येषां तानि गन्धादीनि तन्मात्राणि च। गन्धादयो हि पृथिव्यादीनामवस्थाविशेषाः। तावन्ति पञ्चैव मे मया मतानि ज्ञातानि। इदं भगवतो मम मतमित्यर्थः। एवमनेन तेजोऽबन्नात्मकं भूतानां त्रितयमेवेति केषांचिन्मतं तद्व्यावृत्तिः कृता ॥ १३ ॥ इन्द्रियाणि गणयति। इन्द्रियाणीति। श्रोत्रं त्वक् च दृक् चक्षुश्च रसनं रसनेन्द्रियं च नासिका घ्राणेन्द्रियं च ताः। वाक् करौ चरणौ मेढ्रं दशमः पायुर्गुदम् उच्यते इत्येतानि दश इन्द्रियाणि उच्यन्ते ॥ १४ ॥

अन्तःकरणं विभजति। मन इति। अन्तरात्मकमन्तःकरणं लक्षणरूपया चिह्नभूतया वृत्त्या, संकल्पाध्यवसाया-भिमानचिन्तारूपस्वगुणवृत्त्या, मनः, बुद्धिः अहंकारः चित्तम् इति चतुर्धा भेदः भेदवत् लक्ष्यते न स्वत इति शेषः ॥ १५ ॥ एतावानिति। सगुणस्य सत्त्वादिगुणकस्य ब्रह्मणः प्रधानस्य संनिवेशोऽवस्थाविशेषः यः मया प्रोक्तः एतावानेव चतुर्विंशति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संख्याक एव संख्यातो गणितः। तत्त्वज्ञैरिति शेषः। हि प्रधानस्य ब्रह्मशब्दवाच्यत्वं 'तु तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' इति। द्वे ब्रह्मणी वेदितव्ये इत्यादिश्रुतौ मम योनिर्महद्ब्रह्म इत्यादिस्मृतावुक्तं वेदितव्यम्। सत्त्वादित्रिगुणात्मप्रधानस्य चतुर्विंशतितत्त्वात्मना संनिवेशस्य कालहेतुकत्वात्तद्बोधाय चतुर्विंशतितत्त्वेभ्यः पञ्चविंशं तत्त्वं स इत्याह। यः कालः सः पञ्चविंशकः। अस्य चतुर्विंशतिभिः सह गणनात्पञ्चविंश इत्युक्तेश्च पञ्चविंशं तत्त्वमेवायमिति भावः॥ १६॥ ननु कालस्य प्रधानक्षोभात्पूर्ववर्तित्वेन तत्त्वान्तरमिति वक्तुमयुक्तमतः कालोऽयं पौरुषीयः प्रभाव एव न तत्त्वान्तरमिति मतान्तरमुपन्यस्यति। प्रभावमिति। पौरुषं परमपुरुषसंबन्धिनं प्रभावम् एव कालम् एके आहुः। कोऽसौ पुरुषप्रभाव इत्यत्राह। यतः पौरुषभावरूपकालात् भयं जगतः सर्गसंहारादिरूपं संसारभयं भवतीत्यर्थः। सर्गसंहारादिषु जगन्नियमनं परमपुरुषस्य सामर्थ्यं कालः न तु तत्त्वान्तरमित्यर्थः। एक इत्युक्त्या मतान्तरं गम्यते। स्वमतमाहाहंकारेति सार्द्धेन। अहंकारोऽनात्मन्यात्माभिमानस्तेन विमूढस्तस्य तिरोहितस्वस्वरूपस्य प्रकृतिं तमःशब्दवाच्यां मायाम् ईयुषः संसारदशायां प्राप्तस्य कर्तुर्जीवस्य॥ १७॥ प्रकृतेरिति। तथा हे मानवि गुणसाम्यस्य निर्विशेषस्य नामरूपादिविशेषशून्यस्य प्रकृतेः प्रधानस्य नामरूपादिपरिहारेण संहारदशायां साम्यावस्थापन्नगुणत्रयस्य प्रधानस्य चेत्यर्थः। यतः चेष्टा व्यापारो भवति सः कालः, भगवान् भगवदात्मकः इति उपलक्षितः। संहारकाले नामरूपविभागानर्हनिरतिशयसूक्ष्मावस्थापन्नयोः परमात्मात्मकयोस्तस्मिन्नेव लीनयोः प्रकृतिपुरुषयोः पुनः सृष्टिदशायां जगदाकारेण परिणामरूपो यो व्यापारस्तद्धेतुभूतो यः कालः स भगवदात्मक इत्यर्थः॥ १८॥ एवं प्रकृतिपुरुषकालस्वरूपं शोधितं ते त्रयोऽपि भगवद्रूपाणि प्रधानपुरुषव्यक्तकालस्तु प्रविभागशः रूपाणि इत्युक्तेः। तेषु त्रिषु मध्ये भूमिरापोऽनल इत्यादिनोक्तायाः पृथिव्यादिप्रकृतेः स्थूलरूपेण परिणतत्वात्प्रायेण प्रकृतिः स्फुटस्वरूपा पुरुषकालयोस्तु तादृशस्थूलरूपेण परिणामाभावात्तयोः प्रतीयमानत्वं युक्त्या प्रदर्शयंस्तयोः शास्त्रैकसमधिगम्यं भगवदात्मकत्वमन्तरिति श्लोकेनाह। यः एषः आत्ममायया स्वसंकल्पेन सत्त्वानां पृथिव्यादिसंघातरूपदेहवताम् अन्तः पुरुषरूपेण बहिः कालरूपेण च, समन्वेति अवभासते सः भगवान् कालः। तत्र इच्छामि द्वेष्मि सुखः दुःखः इतीच्छाद्वेषसुखदुःखाद्याश्रयजीवान्तः प्रविश्य भवत्यभूद्भविष्यतीति संकल्पविधापनेन बहिः कालाख्यरूपेण च समन्वेति स भगवान्काल इत्यर्थः॥ १९॥ इदानीं तत्त्वानामुत्पत्तिपूर्वकं लक्षणान्याह। दैवादित्यादिना एतान्यसंहत्येत्यतः प्राक्तनेन ग्रन्थेन। परः पुमान् परमपुरुषः दैवाद्भगवत्संकल्पात् क्षुभितधर्मिण्यां 'रजस्तमश्चाभिभूय सत्त्वं भवति भारत। रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा' इत्युक्तरीत्या क्षुभितसत्त्वादिगुणायामित्यर्थः। स्वस्यां स्वीयायां योनौ जगद्योनिरूपायां प्रकृतौ वीर्यं महदादिप्रपञ्चसृष्टिसामर्थ्यं जनसमष्टिं वा आधत्त अयुङ्क्त। ततः सा जगद्योनिः प्रकृतिः हिरण्मयं बहुप्रकाशयुक्तं महत्तत्त्वम् असूत प्रसूतवती। क्षुभितधर्मिण्यामित्यनेनोक्तः सत्त्वादिगुणक्षोभो नाम गुणानां साम्यावस्थाप्रहाणेनान्यतमगुणाभिभवपूर्वकमन्यतमगुणाविर्भावः॥ २०॥ तत्र महत्तत्त्वसृष्टिः कस्याभिभवादित्यत्राह। विश्वमिति। जगदङ्कुरस्थानीयं यस्य स जगदङ्कुरः जगत्कारणभूत इत्यर्थः। कूटस्थोऽङ्कुरको निर्विकारी महानित्यर्थः। आत्मगतं 'सोऽभिध्याय शरीरात्स्वात्' इत्युक्तप्रकारेण स्वशरीरभूतप्रकृतिलीनमित्यर्थः। विश्वं व्यञ्जन् व्यञ्जयन् व्यञ्जयितुं स्वतेजसा स्वसंकल्परूपज्ञानेन आत्मप्रस्वापनं जीवानां ज्ञानधर्मसंकोचकरं तीव्रं तमः प्राकृतं तमः अपिबत् अभिभूतमकरोदित्यर्थः। प्राकृततमोऽभिभवान्महत्तत्त्वसृष्टिरिति भावः॥ २१॥ महतः लक्षणं तत्र वासुदेवाधिष्ठितत्वं चाह। यत्तदिति। यत् भगवतः पदं 'तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्' इत्युक्तरीत्या सत्त्वस्य प्रकाशकत्वात्तद्गुणकस्य चित्तस्य भगवदुपलम्भनस्थानत्वमित्यर्थः। शान्तमभिभूततमस्त्वाद्रागादिरहितम् अत एव स्वच्छं वैशद्यात् प्रकाशकं सत्त्वगुणं सत्त्वगुणकं यच्च वासुदेवाख्यं भगवद्व्यूहगतवासुदेवाधिष्ठितं यत् चित्तं तत् महदात्मकं महत्तत्त्वात्मनावस्थितम् आहुः॥ २२॥

महत्तत्त्वात्मकचेतसो लक्षणमाह। स्वच्छत्वमिति। स्वच्छत्वं भगवद्बिम्बग्राहकत्वम् अविकारित्वं विक्षेपादिराहित्यं शान्तत्वं रजस्तमोभ्यामनभिभूतत्वम् इत्युक्तरूपैः स्वच्छत्वादिभिः वृत्तिभिः चेतसश्चित्तस्य अपामम्भसां परा प्रकृतिरनारोपितस्वस्वभावः यथा लक्षणं तथा लक्षणं प्रोक्तम्। यथा अपां स्वभावतः फेनतरङ्गादिरहितत्वं विकाररहितत्वं शीतलत्वं परमं लक्षणं तथा। यदा स्वच्छत्वादिगुणकं मनो जायते तदा वृत्तिभिश्चेतोलक्षणं ज्ञेयमित्यर्थः॥ २३॥ अथाहंकारोत्पत्तिमाह। महत्तत्त्वादिति। वैकारिक इति। भगवतः परमेश्वरस्य वीर्यं संकल्परूपज्ञानं तेन नोदितं प्रेरितं तस्मात् अत एव विकुर्वाणात् महत्तत्त्वात् वैकारिकः सात्त्विकः तैजसः राजसश्च तामसश्च इत्येवं त्रिविधः त्रिप्रकारः क्रियाशक्तिः रजोगुणोद्रिक्तः अहंकारः समपद्यत उदभूदित्यर्थः। कोऽसावहंकार इत्यत्राह। यतस्त्रिविधाहंकारात् मनसः इन्द्रियाणां ज्ञानकर्माख्योभयेन्द्रियाणां महतां भूतानामाकाशादीनाम् अपिशब्दात् शब्दादितन्मात्राणां च भवः उत्पत्तिः भवति। मनआदीनां कारणमित्यर्थः। इति द्वयोरेकान्वयः॥ २४-२५॥ तस्याहंकारस्य संकर्षणाधिष्ठितत्वमाह। सहस्रशिरसमिति। सहस्रशिरसं सहस्रफणं साक्षात् संकर्षणाख्यं पुरुषं भगवद्व्यूहपुरुषं यं अनन्तमनन्तशब्दवाच्यं भगवन्तं भूतेन्द्रियमनोमयं भूतेन्द्रियाद्यधिष्ठानभूताहंकारात्मकम्, प्रचक्षते। अहंकारमुक्तविधसंकर्षणाधिष्ठितं कथयन्तीत्यर्थः॥ २६॥ अहंकारस्य लक्षणमाह। कर्तृत्वमिति। कर्तृत्वं देवतादि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपेण, करणत्वमिन्द्रियरूपेण, कार्यत्वं भूतरूपेण च इति इत्येव अहंकृतेः लक्षणं स्यात्। वाऽथवा शान्तत्वं प्रकाशकत्वं घोरमूढत्वं घोरत्वं विक्षिप्तत्वं मूढत्वं जडत्वं इत्येतत् अहंकृतेः लक्षणं स्यात्॥ २७॥ अथ मनस उत्पत्तिपूर्वकं तल्लक्षणमाह। वैकारिकादिति। विकुर्वाणाद्विकारमुपगच्छतः वैकारिकात्सात्त्विकाहंकारान् मनः तत्त्वम् अजायत। यन्मनः संकल्पविकल्पाभ्यां वर्त्तते। समित्येकीकारे तेन कल्पनं चिन्तनं संकल्पः। देहादिभिरात्मनोऽपृथक्त्वेन चिन्तनं संकल्प इत्यर्थः। विकल्पो विषयाचिन्तनं यदान्तःकरणे तैजसाहंकारोद्रेकात्संकल्पविकल्पौ भवतस्तदा तथाविधं तदन्तःकरणं मन इति जानीयादित्यर्थः। यदास्य संकल्पविकल्पाधिक्यं तदा तत्रेति शेषः। कामसंभवः जायते॥ २८॥

मनसोऽनिरुद्धाऽधिष्ठितत्वमाह। यदिति। यत् यन्मनः प्रति यस्मिन्मनसीत्यर्थः। हृषीकाणामिन्द्रियाणाम् अधीश्वरं नियन्तारं शरदि भवं शारदं तच्च तदिन्दीवरं च तद्वच्छ्यामस्तम। योगिभिर्मुनिभिः शनैः संराध्यं सम्यगाराधनीयम अनिरुद्धाख्यम् अनिरुद्धनामानं भगवन्तं विदुः। हि मनसोऽनिरुद्धाधिष्ठितत्वात्तत्र तं ध्येयं वदन्तीत्यर्थः॥ २९॥ बुद्धेरुत्पत्तिपूर्वकं लक्षणमाह द्वाभ्याम्। तैजसादिति। हे सति विकुर्वाणाद्विकारमुपगच्छतः तैजसाद्राजसाहंकारात्तु इन्द्रियाणाम् अनुग्रहः इन्द्रियानुग्रहो यतो भवति तथाभूतमित्यर्थः। द्रव्याणां पदार्थानां स्फुरणरूपं विज्ञानं यस्मिंस्तथाभूतं बुद्धितत्त्वम् अभूत॥ ३०॥ संशय इति। यत्र संशयः विकल्पज्ञानम् अथ विपर्यासः विपर्यासोऽन्यथाज्ञानविपरीतज्ञाने धर्मान्तरे धर्मान्तरप्रतीतिरन्यथाज्ञानं धर्म्यन्तरे धर्म्यन्तरत्वेन प्रतीतिर्विपरीतज्ञानम। शङ्खः पीत इत्यन्यथाज्ञानं शुक्तिशकले रजतनिश्चयो विपरीतज्ञानम्। निश्चयः प्रमाणरूपज्ञानम्। स्मृतिरनुभूतवस्तुविषयं ज्ञानं च स्वापो निद्रा संशयादिस्वापान्ताभिः वृत्तितो वृत्तिभिः पृथगसंकरेण बुद्धेर्बुद्ध्याख्यतत्त्वस्य लक्षणम इत्युक्तप्रकारम एव उच्यते। अत्रानुक्तमपि बुद्धेःप्रद्युम्नाधिष्ठितत्वं बोध्यम्। एवमुक्तश्लोकेषु अन्तःकरणवाच्यचित्ताहंकारबुद्धिमनस्सु वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्याश्चतस्रो मूर्त्तयो जीवकृतोपासनास्वीकाराय स्थिताः सन्तीत्यप्युक्तम्। अत्राधिभूतत्वादिकल्पनायां तु अन्तःकरणमधिष्ठानं चित्तमध्यात्मं क्षेत्रज्ञोऽधिदैवं चिन्तनमधिभूतं वासुदेवोऽत्रोपास्यः। अन्तःकरणमधिष्ठानम् अहंकारोऽध्यात्मं रुद्रोऽधिदैवतम् अभिमानोऽधिभूतं संकर्षण उपास्यः। अन्तःकरणमधिष्ठानं मनोऽध्यात्मं चन्द्रोऽधिदैवतं मन्तव्यम् अधिभूतम् अनिरुद्ध उपास्यः। अन्तःकरणमधिष्ठानं बुद्धिरध्यात्मं ब्रह्माधिदैवतं बोद्धव्यम अधिभूतं प्रद्युम्न उपास्यः। अत्रान्तःकरणशब्देन हृदयं बोध्यम्॥ ३१॥ उभयविधेन्द्रियाणामुत्पत्तिं लक्षणं चाह। तैजसानीति। क्रियाज्ञानविभागशः कर्मेन्द्रियज्ञानेन्द्रियविभागेनोभयविधानीत्यर्थः। इन्द्रियाणि तैजसानि एव। हि यस्मात् प्राणस्य क्रियाशक्तिः बुद्धेः विज्ञानशक्तिता। अतः प्राणस्य तैजसत्वात्तत्क्रियाशक्तिमतामिन्द्रियाणां तैजसत्वम्। तथा बुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामपीन्द्रियाणां तैजसत्वमित्यर्थः॥ ३२॥

अथ तन्मात्रोत्पत्तिपूर्वकमाकाशादिमहाभूतोत्पत्तिं तयोः कार्यापरपर्यायं लक्षणं चाह। तामसादिति पञ्चदशभिः। भगवतो वीर्यं संकल्पस्तेन चोदितं प्रेरितं तस्मात् अत एव विकुर्वाणात् तामसात् अहंकारात् चापि शब्दमात्रं शब्दतन्मात्रम् अभूदुदभूत। तस्माच्छब्दमात्रात् नभ आकाशम् अभूत्। स शब्दः केन गृह्यते इत्यत्राह। श्रोत्रं श्रोत्रेन्द्रियं तु शब्दं गच्छति प्राप्नोतीति शब्दगं शब्दतन्मात्रज्ञापकम्। एतदादिभिर्विषयोत्पत्त्यनन्तरं तत्संबन्धमात्रं कथ्यते न तूत्पत्तिः प्रागेवोत्पन्नत्वात्॥ ३३॥ किं तच्छब्दतन्मात्रं कीदृशं च नभ इत्यपेक्षायां तयोः कार्यमुखेन स्वरूपं शोधयति द्वाभ्याम्। अर्थाश्रयत्वमिति। अर्थाश्रयत्वमर्थवाचकत्वं द्रष्टुः लिङ्गत्वं कुड्याद्यन्तरितस्य वक्तुर्ज्ञापकत्वं च। तदुक्तं द्वितीये लिङ्गं यद्द्रष्टृदृश्ययोः इति। यद्वा द्रष्टुः सर्वज्ञस्य परमात्मनः लिङ्गत्वं प्रमाणभूतत्वं भगवतः शास्त्रयोनित्वात्। नभस आकाशस्य एवं तन्मात्रत्वं सूक्ष्मत्वं च। असाधारणगुणत्वं वा। शब्दस्य लक्षणं कार्यं कवयः विदुः॥ ३४॥ नभसो लक्षणमाह। भूतानामिति। भूतानां ब्रह्मादिस्तम्बपर्यन्तानां भूतानां छिद्रदातृत्वमवकाशप्रदातृत्वं बहिः अन्तरं च बहिरन्तर्व्यवहारास्पदत्वम् एवापि प्राणाश्च इन्द्रियाणि च, आत्मा मनश्च, तेषां धिष्ण्यत्वं स्थानत्वम्। एतन्नाड्यादिच्छिद्ररूपेण ज्ञेयम। नभस आकाशस्य, वृत्तिश्छिद्रदातृत्वादिकार्यं तदेव लक्षणमित्यर्थः। एवमुत्तरत्रापि एकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः, द्वितीयेन तन्मात्रलक्षणम्। तृतीयेन महाभूतलक्षणं, एवमनुसंधेयम्॥ ३५॥ नभस इति। शब्दस्तन्मात्रमसाधारणगुणो यस्य तत् शब्दतन्मात्रं तस्मात्, कालगत्या कालशरीरकभवत्संकल्पेन विकुर्वतो विक्रियमाणात् नभस आकाशात् स्पर्शः स्पर्शतन्मात्रम् अभवत्। ततः स्पर्शात् वायुश्च वायुरपि अभवत्। त्वक् त्वगिन्द्रियं स्पर्शस्य संग्रहः सम्यग्ग्राहकः भवति। सम्यक् ग्रहो यया सा त्वगिति वक्तव्ये पुंस्त्वं नियतलिङ्गत्वात्॥ ३६॥ मृदुत्वमिति। मृदुत्वं काठिन्यं च शैत्यं शीतलता उष्णत्वमुष्णभावः, नभस्वतो वायोः तन्मात्रत्वमसाधारणगुणत्वं च एतत् एव स्पर्शस्य स्पर्शत्वं लक्षणमित्यर्थः॥ ३७॥

चालनमिति। चालनं वृक्षशाखादेः। व्यूहनं पृथक्स्थिततृणादीनामेकीकरणं प्राप्तिश्चलितयोः संयोजकत्वं द्रव्यं च शब्दश्च तयोः, नेतृत्वं देशान्तरप्रापकत्वं तत्र गन्धवतो द्रव्यस्य घ्राणं प्रति शैत्यादिमतः स्पर्शनं प्रति दूरस्थशब्दस्य श्रोत्रं प्रति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्राह्यत्वकरणं सर्वाणि यानीन्द्रियाणि तेषाम्, आत्मत्वमुपोद्बलकत्वं संजीवनविधानत्वमिति यावत् सर्वेन्द्रियाणाम् आत्मत्वं धारकत्वं वा । वायोः, कर्माभिलक्षणं कर्मात्मना स्वरूपलक्षणम् ॥ ३८ ॥ वायोरिति । स्पर्शस्तन्मात्रमसाधारणगुणो यस्य तस्मात् । दैवेरितात् वायोः सकाशात् चोप्यर्थे । रूपं रूपतन्मात्रम् अभूत् । ततो रूपात् तेजः समुत्थितमुत्पन्नमभूत् । चक्षुश्चक्षुरिन्द्रियं, रूपोपलम्भनं रूपग्राहकं भवति ॥ ३९ ॥ द्रव्येति । हे साध्वि द्रव्याकृतित्वं द्रव्यस्य भूतान्तरव्यावर्त्तकत्वं द्रव्यस्याकारसमर्पकत्वं वा । गुणता नित्यं द्रव्याश्रयत्वम् । द्रव्योपसर्जनप्रतीतिरित्यर्थः । शब्दस्य स्वातन्त्र्येणैव प्रतीतिः अप्रत्यक्षद्रव्यत्वस्य स्पर्शादेरपि स्वातन्त्र्येणैव प्रतीतिः । रूपस्य तु नैवमिति तस्यायं विशेष उक्तः । व्यक्तिसंस्थात्वं द्रव्यस्य या संस्था संनिवेशः सैव संस्था यस्य तस्य भावस्तत्त्वम् । तत्परिणामतया स्थितिरित्यर्थः । तेजसः तेजस्त्वमसाधारणगुणत्वं च रूपमात्रस्य रूपतन्मात्रस्य वृत्तयो लक्षणानि एव ॥ ४० ॥ द्योतनमिति । द्योतनं प्रकाशनं, पचनं तण्डुलादेः पाककरणं, क्षुदशनेच्छा तृट् तद्द्वारेण अदनमन्नादेः पानं जलादेश्च हिममर्शनं हिमाभिभवः शोषणं च इत्येतास्तु एव तेजसः वृत्तयः स्वभावलक्षणानि । कार्याणीति यावत् ॥ ४१ ॥ रूपमात्रादिति । दैवनोदिताद्दैवेन प्रेरितात् विकुर्वाणात् रूपं मात्रं तन्मात्रं यस्य तस्मात् तेजसः सकाशात् रसमात्रं रसमात्रं रसमतन्मात्रकम्, अभूत् तस्माद्रसमात्रात् अम्भः जलम् अभूत् । जिह्वा रसनेन्द्रियं, रसग्रहः रसस्य ग्राहिका ॥ ४२ ॥ कषाय इति । कषायस्तुवरः दाडिमादेस्त्वग्रसः, मधुरः शर्करादेः तिक्तो मरिच्यादेः कटुः कारवेल्लादेः अम्लश्चिञ्चादेः अत्रानुक्तोऽपि लवणो ग्राह्यः । कटूवित्यत्र विभक्तिलोप आर्षं कटुयुक्तोऽम्लः कट्वम्ल इति वा भौतिकानां सांसर्गिकद्रव्याणां, विकारेण एकः एव रसः इत्युक्तप्रकारेण नैकधा विभिद्यते अनेकधा विभिद्यते ॥ ४३ ॥

क्लेदनमिति । क्लेदनमार्द्रीकरणं पिण्डनं मृदादेः पिण्डीकरणं तृप्तिस्तृप्तिदातृत्वम् अलंबुद्धिजनकत्वमित्यर्थः । प्राणनं च आप्यायनं च, ओदनं च तत्समाहारः । तत्र प्राणनं जीवनम् 'आपोमयः प्राणः' इति श्रुतेः । आप्यायनं तृड्वैक्लव्यनिवर्त्तनम् ओदनं मृदूकरणं तापापनोदस्तापनिवारणत्वं भूयस्त्वं कूपादावुद्धृतस्यापि पुनः पुनरुद्भवः पाञ्चभौतिकेष्वपि जलांशस्य भूयस्त्वं वा । इमाः तु अम्भसः वृत्तयः ॥ ४४ ॥ गन्धपृथिव्योरुत्पत्तिमाह । रसमात्रादिति । दैवनोदितात् विकुर्वाणात् रसमात्रात् रसतन्मात्रकात् अम्भसो जलात्सकाशात् गन्धमात्रम् अभूत् । तस्माद्गन्धमात्रात् पृथ्वी अभूत् । घ्राणः घ्राणेन्द्रियं तु गन्धगः गन्धग्राहकः ॥ ४५ ॥ करम्भेति । एकः गन्धः द्रव्याणां सांसर्गिकद्रव्याणां येऽवयवास्तेषां वैषम्यं तस्मात् संसर्गिद्रव्यावयवविकारादित्यर्थः । करम्भश्च पूतिश्च सौरभ्यं च शान्तश्च उग्रश्च अम्लश्च ते आदिर्येषां तैः पृथक् विभिद्यते । तत्र करम्भो मिश्रगन्धः यथा व्यञ्जनादीनां हिङ्ग्वादिसंस्कारैः । पूतिर्दुर्गन्धः सौरभ्यं कर्पूरादेः शान्तः शतपत्रादेः उग्रो लशुनादेः अम्लः पर्य्युषितभक्तान्नादेः ॥ ४६ ॥ पृथ्वीलक्षणमाह । भावनमिति । ब्रह्मणः भावनं प्रतिमादिरूपेण साकारतापादनम् । यथा प्रतिमाऽवयववती तथा भगवानप्यवयवोपेततयाऽवयवी भवतीति प्रतिमादिरूपेण भगवदाकारविश्वासविधापनमित्यर्थः । स्थानं जलादिविलक्षणतया तन्नैरपेक्ष्येण स्थितिः यद्वा भावनं यतो घटादेर्निष्पादनं ब्रह्मणो ब्रह्मकुलस्य स्थानम् । ब्रह्मनशब्दश्चराचरोपलक्षणार्थः । तेन ब्राह्मणादिसर्वेषामाधारत्वमित्यर्थः । पाठान्तरेऽप्ययमेवार्थः । धारणं जलाद्याधारत्वं सद्विशेषणं सतामाकाशादीनां विशेषणं विभागकर्तृत्वं सतां कार्याणां विशेषात्मकत्वं वा । व्रीह्यादिकार्याणां देशभेदेन सारासारवत्त्वदर्शनात् । भूतत्रयमपेक्ष्य विशेषेण व्यक्तत्वमित्यन्ये । सर्वसत्त्वगुणोद्भेदः सर्वेषां सत्त्वानां प्राणिनां तद्गुणानां च पुंस्त्वादीनामुद्भेदः परिणामविशेषैः प्रकटीकरणम् । एतत् पृथिवीवृत्तिलक्षणं पृथिव्याः वृत्तिभिः लक्षणमित्यर्थः । ज्ञेयम् ॥ ४७ ॥ श्रोत्रादीनां शब्दादिग्राहकत्वं प्रोक्तं यत्तदेव तेषां लक्षणं चेति स्फुटबोधाय पुनराह पञ्चभिरर्द्धैः । नभ इति । नभस आकाशस्य गुणविशेषः शब्दः यस्य अर्थो विषयः ग्राह्य इति यावत् । तच्छ्रोत्रम् उच्यते । आकाशाऽसाधारणगुणशब्दग्राहकत्वमेव श्रोत्रमित्यर्थः । वायोः गुणविशेषः स्पर्शः सः यस्य अर्थो विषयः तत् स्पर्शनं त्वगिन्द्रियं विदुः ॥ ४८ ॥

तेज इति । तेजसो गुणविशेषो रूपं सः यस्य अर्थः विषयः तत् चक्षुः उच्यते । अम्भसो जलस्य गुणविशेषो रसः सः यस्य अर्थो विषयः तत् रसनं जिह्वा उच्यते । भूमेः गुणविशेषो गन्धः यस्य अर्थो विषयः सः घ्राणः उच्यते ॥ ४९ ॥ आकाशादिषु गुणविशेषं दर्शयति । परस्येति । हि यस्मात् परस्य कारणस्य आकाशादेः धर्मः शब्दादिः अपरस्मिन्कार्ये वाय्वादावित्यर्थः । समन्वयात्समवायात् दृश्यते । अतः भावानामाकाशादीनां विशेषः शब्दादिः भूमौ पृथिव्याम् एव उपलक्ष्यते दृश्यते । भूमौ सर्वेषामन्वयात् जलादिषु यथान्वयमेव न सर्वः । आकाशेऽन्यान्वयाभावादेकः शब्द एवेति द्रष्टव्यम् ॥ ५० ॥ एवं महदादिपृथिव्यन्तभूतसृष्टिमभिधाय तेभ्योऽण्डोत्पत्तिमभिधास्यन् 'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना' इत्युक्तरीत्या ईश्वरानुप्रवेशमन्तरेण कार्यासामर्थ्यं वदंस्तेष्वीश्वरानुप्रवेशमाह । एतानीति । एतानि महदादीनि महदादिपृथिव्यन्तानीत्यर्थः । सप्त सप्तसंख्याकानि तत्त्वानि यदा असंहत्यामिलित्वा स्थितानीति शेषः । तदा कालश्च कर्मादृष्टं च गुणः सत्त्वादिश्च तैरुपेतो युक्तः जगदादिरीश्वरः तानि महदादितत्त्वानीति शेषः । उपाविशत्प्रविवेश वै । सप्तेति तु प्राधान्येनोक्तं प्रवेशस्तु सर्वेष्वपि तत्त्वेषु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विवक्षित एव ॥ ५१ ॥ संहतिपर्यायं मेलनं संहतत्वसमागमत्वभेदेन द्विविधं तत्र संहतत्वं नाम कारणात्मना पृथक्स्थित्यर्हसंयोगमात्रं समागतत्वं नाम कार्यात्मना पृथक्स्थित्यनर्हः संश्लेषविशेषः तत्त्वेष्वेतद्द्वयाभावात्। सृष्ट्यसमर्थानि समवस्थितानि तत ईश्वरानुप्रवेशादुभयं प्राप्तेभ्योऽण्डसृष्टिमाह। तत इति। तत ईश्वरानुप्रवेशानन्तरं तेनेश्वरानुप्रवेशेन हेतुना युक्तेभ्यः संहतेभ्य अनुविद्धेभ्यः समागतेभ्यः तेभ्यस्तत्त्वेभ्यः अचेतनं पृथ्वीतत्त्वप्रधानत्वाच्चेतनावर्जितं यस्मादण्डात् असौ विराट्पुरुषः समष्ट्यात्मकपुरुष इत्यर्थः। उदतिष्ठत्समभवत् तदण्डम् उत्थितमुत्पन्नमभवत् ॥ ५२ ॥ पुनरण्डमेव विशिनष्टि। एतदिति। विशेषाख्यं पृथ्वीसंज्ञिकम् एतत् अण्डं बहिः प्रधानेन प्रधानप्रक्रया आवृतैः क्रमवृद्धैः क्रमश उत्तरोत्तरमधिकैः दशोत्तरैर्दशगुणितोत्तरैः उत्तरोत्तरं दशदशगुणाधिकैरित्यर्थः। तोयादिभिर्जलप्रभृतिभिः परिवृतं परितो वेष्टितम् अभूत। यत्र यस्मिन् अण्डे अयं लोकवितानः देवमनुष्यादिलोकविस्तारः भवति। तत् भगवतः हरेः रूपं शरीरम् अस्ति ॥ ५३ ॥

एवं महदादिविराडन्तां सृष्टिमुक्त्वाथसमष्टिभूतविराट्शरीरस्य तत्तदवयवानिन्द्रियतत्स्थानतदभिमानिदेवतानां विभागं च विवक्षुराह। हिरण्मयादिति। सलिलेशयाज्जले समुषितात्, अलुक्समासः। हिरण्मयात्प्रकाशबहुलात्, अण्डकोशात् उत्थाय औदासीन्यपरित्यागपूर्वं विराट्पुरुषं ततः पृथक् कृत्वेत्यर्थः। महादेवः श्रीहरिः, तं विराट्पुरुषम्, आविश्याधिष्ठाय, खं मुखविवरादीन्द्रियस्थानं बहुधा नैकधा निर्बिभेद समष्टिभूतवैराजशरीरस्थमिन्द्रियगणमनेकधा विभक्तमकरोदित्यर्थः ॥५४॥ विभागमाह। निरभिद्यतेत्यष्टभिः। अस्य विराजः, प्रथममादितः, मुखं निरभिद्यत। मुखं विभक्तमभूदित्यर्थः। ततः, तत्र वाणी अभवत्। वाण्या सह, वह्निः अभवत् प्राविशत्। अथ यस्य नासे घ्राणेन्द्रियाधिष्ठाने नासाबिले, निरभिद्यताम्। एतयोर्नासाबिलयोः, प्राणोतः प्राणेन उतः अनुस्यूतः, प्राणः अभवत्, ॥ ५५ ॥ घ्राणादिति। घ्राणात्, वायुः अभवत्। ततः अस्य अक्षिणी अभिद्येताम्। एतयोः चक्षुः अभवत्। पूर्वश्लोकोक्तं प्राणोत इति सर्वेन्द्रियेष्वपि द्रष्टव्यम्। तस्माच्चक्षुषः, सूर्यः चक्षुषोऽधिष्ठाता, अभवत्। अथ अस्य, कर्णौ श्रोत्रेन्द्रियाधिष्ठाने, अन्वभिद्येताम्। तयोः श्रोत्रम् अभवत्। ततः दिशः अभिव्यज्यन्त ॥ ५६ ॥ निर्बिभेदेति। विराजः, त्वक् निर्बिभेद। ततः रोमश्मश्र्वादयः आदिना केशाः, ततः ओषधयश्च आसन्। ततः शिश्नं निर्बिभिदे ॥ ५७ ॥ रेत इति। तस्मात् रेतो वीर्यम् आसीत्। तस्मात् आपः, आसन्। ततः अस्य गुदं निरभिद्यत वै। गुदात् अपानः, अपानाच्च लोकभयंकरः, मृत्युः आसीत ॥ ५८ ॥ हस्ताविति। किं च अस्य हस्तौ निरभिद्येताम्। ताभ्यां बलम् अभवत्। ततः स्वराट् इन्द्रः, अभवत्। किं च अस्य पादौ निरभिद्येताम्। ताभ्यां गतिः अभवत्। ततः हरिर्विष्णुरुपेन्द्र इति यावत्। प्राविशत् ॥ ५९ ॥ नाड्य इति। अस्य नाड्यः, निरभिद्यन्त। ताभ्यः लोहितं रक्तमिन्द्रियस्थानीयम्, आसृतमुत्पन्नम्। ततः नद्यः देवतास्थानीयाः, समभवन्। ततः उदरमधिष्ठानं निरभिद्यत ॥ ६० ॥

क्षुदिति। ततः क्षुत्पिपासे इन्द्रियस्थानीये, अभूताम्। एतयोः तु समुद्रः अधिदेवता, अभूत्। अथ अस्य हृदयं हृत्पद्ममधिष्ठानं भिन्नं जातम्। हृदयात् मनः, उत्थितम् ॥ ६१ ॥ मनस इति। इन्द्रियान्मनसः सकाशात्, चन्द्रमा अधिदेवता, जातः। ततः बुद्धिः जाता। बुद्धेः, गिरां पतिः ब्रह्मा, जातः। अथ अहंकारः जातः। ततः रुद्रः अथ चित्तं जातम्। ततः चैत्यः क्षेत्रज्ञः, अभवत्। मनआदीनां हृदयमेवाधिष्ठानं चन्द्रादयोऽधिष्ठातारः, मनआदीनीन्द्रियाणि, संकल्पादयो विषयाः ॥ ६२ ॥ अथान्वयव्यतिरेकाभ्यां क्षेत्रज्ञं विवेक्तुं सर्वेषां पुनः प्रवेशमाह नवभिः। एत इति। अभ्युदिथता विराजमुत्थापयितुमुद्युक्ताः, एते देवाः, अस्य विराजः, उत्थापने न च नैव, अशकन्। हि संभूयोद्युक्ताः सन्तोऽपि, यदा समर्था नाभूवन्नित्यर्थः। तदा, तं विराजम् उत्थापयितुं पुनः क्रमात् खानि पूर्वोक्तानि तानि छिद्राणि, आविविशुः ॥ ६३ ॥ का देवता केनेन्द्रियेण कुत्र प्रविष्टोत्थापनाशक्ताभूदित्यत्राह। वह्निरित्यादिभिः सप्तभिः। वह्निरधिदेवता, वाचा वागिन्द्रियेण सह, मुखं भेजे आविशत्। तदापि, असौ विराट्, न उदतिष्ठत्प्रवृत्त्युन्मुखो नाभूत्। एवमधिदेवतेन्द्रियाधिष्ठानानि प्रथमात्तृतीयाद्द्वितीयाभिर्द्रष्टव्यानि। वायुः, प्राणेन नासिके भेजे। तदा विराट् न उदतिष्ठत् ॥ ६४ ॥ अक्षिणी इति। आदित्यः, चक्षुषा अक्षिणी भेजे। तदा विराट् न उदतिष्ठत। दिशः श्रोत्रेण कर्णौ च भेजिरे तदा विराट् न उदतिष्ठत ॥ ६५ ॥ त्वचमिति। ओषध्यः, रोमभिः त्वचं भेजिरे। तदा विराट् न उदतिष्ठत। आपस्तु, रेतसा शिश्नं भेजिरे। तदा विराट् न उदतिष्ठत ॥ ६६ ॥ गुदमिति। मृत्युः, अपानेन गुदं भेजे। तदा विराट् न उदतिष्ठत्। इन्द्रः बलेन एव, हस्तौ भेजे तदा विराट् न उदतिष्ठत ॥ ६७ ॥ विष्णुरिति। विष्णुः गत्या एव, चरणौ भेजे। तदा विराट् न उदतिष्ठत्। नद्यः लोहितेन नाडीः भेजिरे। तदा विराट् न उदतिष्ठत् ॥ ६८ ॥

क्षुदिति। सिन्धुः, क्षुत्तृड्भ्याम् उदरं भेजे। तदा विराट् न उदतिष्ठत। चन्द्रः मनसा हृदयं भेजे, तदा विराट् न उदतिष्ठत् ॥ ६९ ॥ बुद्ध्येति। ब्रह्मा अपि, बुद्ध्या हृदयं भेजे, तदा विराट् न उदतिष्ठत्। रुद्रः अभिमत्या, हृदयं भेजे तदा विराट् न उदतिष्ठत् ॥ ७० ॥ चित्तेनेति। चैत्यः चित्ताधिदैवः, क्षेत्रज्ञः वासुदेवः, चित्तेनेन्द्रियेण सह, हृदयमधिष्ठानं यदा प्राविशदभजत्, तदैव विराट् पुरुषः सलिलात् गर्भोदकात्, उदतिष्ठत्। प्रवृत्तिक्षमोऽभूदित्यर्थः ॥ ७१ ॥ एतदेव सदृष्टान्तमाह।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथेति । प्राणश्च इन्द्रियाणि च मनश्च धीश्च ताः, प्रसुप्तं पुरुषं जीवात्मानं येन क्षेत्रज्ञेन विना, यदिच्छामन्तरेणेत्यर्थः । यथा ओजसा स्वबलेन, उत्थापयितुं न प्रभवन्ति समर्था न भवन्ति, तथा उक्तविधा देवा अपीन्द्रियैः सह प्रविश्यापि, क्षेत्रज्ञप्रवेशमन्तरोत्थापनसमर्था नैवाभवन्नित्यर्थः ॥ ७२ ॥ अत्रान्वयव्यतिरेकाभ्यामन्तराविष्टवासुदेवस्य विराट्क्षेत्रज्ञे यथा प्राधान्यमुक्तं तद्दृष्टान्तेन वासुदेवाविष्टे क्षेत्रज्ञेऽपि ज्ञेयमेवमन्वयव्यतिरेकतया वासुदेवस्यैवानुचिन्तनं भगवद्भक्तियोगाङ्गत्वेन कार्यमित्याह । तमिति । तं प्रत्यगात्मानं वासुदेवं तत्त्वतः पृथक्त्वेन, ज्ञातपरिशुद्धस्वरूपं वासुदेवमित्यर्थः । योगेन प्रवृत्ता तया, वासुदेवक्षेत्रज्ञयोर्यथावद्विवेचनरूपयोगेन प्रवृत्तयेत्यर्थः । धिया, अस्मिन्देहे, विविच्य शरीरबुद्धीन्द्रियप्राणादिमत आत्मनोऽपि पृथक्कृत्य भक्त्या, वासुदेवभक्त्या, विरक्त्या कामानभिष्वङ्गेन, ज्ञानेन वासुदेवाख्यब्रह्मज्ञानेन च, आत्मनि मनसि, चिन्तयेत् । यद्वा प्रत्यगात्मानं धिया विविच्य, तस्मिन्प्रत्यगात्मनि परमात्मानं वासुदेवं, चिन्तयेत् ॥ ७३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे षड्विंशोऽध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः

कपिल उवाच

प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः । अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ॥ १ ॥

बहुसाधनयोगेन पुंप्रकृत्योर्विवेकतः । सप्तविंशे ततो मोक्षरीतिः सम्यक् निरूप्यते ॥ १ ॥

एवमत्र षड्विंशेऽध्याये वासुदेवेच्छया पुरुषस्य कारणप्रकृत्या योग उक्तस्तयोः स्वरूपे चोक्ते तत्त्वस्वरूपलक्षणानि चोक्तानि, पुरुषरूपेण विराट्पुरुषे वासुदेवस्य प्रवेशश्चोक्तः, इदानीमस्मिन्सप्तविंशेऽध्याये प्रकृतिकार्यभूतायामनादिबद्धजीवस्थानाद्यविद्यानिवृत्तिसाधनान्युच्यन्ते । तत्रादौ प्रत्यगात्मनो जाग्रदाद्यवस्थासु विशदतरमेवावभासं कथयिष्यंस्तस्यैव स्वात्मनः प्रकृतिसंसर्गकृतमेव जाग्रदाद्यवस्थारूपसांसारिकप्रवृत्तिषु कर्तृत्वं तदायत्तसुखदुःखभोक्तृत्वं च न स्वस्वरूपप्रयुक्तमिति पूर्वोक्तमनुवदति । प्रकृतिस्थ इति । पुरुषो जीवः, प्रकृतिस्थोऽपि, प्रकृत्यात्मकदेहावस्थितः सन्नपि, प्राकृतैः प्रकृतिधर्मभूतैः, गुणैर्देवत्वमनुष्यत्वादिभिः, सत्त्वादिहेतुकसुखदुःखादिभिश्च, न अज्यते स्वरूपतो न स्पृश्यते, न लिप्यते इति यावत् । कुतः अविकारात् स्वतो देवमनुष्यादिरूपेण परिणामभाक्त्वाभावात् । अकर्तृत्वाद्गमनादिबाह्यसांसारिकव्यापाराश्रयत्वाभावात् , निर्गुणत्वात्सत्त्वादिगुणरहितत्वाच्च, जलार्कवत् । यथा जलगतः सूर्यो जलदोषैः कम्पभेदादिभिर्न संबद्ध्यते, तथा प्रकृतेऽपीत्यर्थः । अस्यायं भावः । यथा जले प्रतिबिम्बितः सूर्यः जलगतैर्धर्मैर्विशिष्टत्वेन परमार्थतो न प्रतीयते तेषां जलगतत्वात् । एवंप्रकृतिधर्मैर्विशिष्टत्वेनात्मापि परमार्थतो न प्रतीयते तेषां प्रकृत्याकारत्वेनात्माकारत्वाभावात्तेषामात्मगतत्वेन प्रतीतिर्भ्रान्तिरूपेत्यर्थः ॥ १ ॥ इत्थंप्रकारस्यात्मनः कथं देवमनुष्यत्वादियोगः, कथं वा सांसारिकप्रवृत्तिषु कर्तृत्वं कथं वा सुखदुःखानुभवश्चेत्याशङ्कायां सकलमिदं देहात्माभिमानकृतमित्याह । स इति । स उक्तविधः, एषः प्रकृतिविलक्षणोऽप्यात्मा अहंक्रियाविमूढात्मा अहंक्रियाऽनात्मनि देहे आत्माभिमानस्तया विमूढस्तिरोहित आत्मात्मस्वरूपं यस्य सः, तथाभूतः सन् , यर्हि यदा, प्रकृतेः गुणेषु शब्दादिषु अभिविषज्जते शब्दादिविषयप्रवणः स्यात् , यदा च कर्त्ता अस्मीति स्वतन्त्रः कर्त्ताऽस्मीति अभिमन्यते, अनेन स्वतन्त्रत्वाभिमानोऽपि बन्धहेतुरित्युक्तम् ॥ २ ॥ तेनेति । तदा तेन स्वतन्त्रकर्त्ताऽस्मीत्यभिमानेन, अवशः कर्मपरतन्त्रः, अत एव अनिर्वृतः कर्मायत्तसुखदुःखोपभोगेन नितरां सुखमलभमानः सन् , प्रासङ्गिकैः प्रकृतिसंसर्गकृतैः, कर्मदोषैः पुण्यापुण्यरूपैर्दोषैः, सदसन्मिश्रयोनिषु उत्तमाधममध्यमभूतेषु, देवतिर्यङ्नरादिषु इति यावत् । संसारपदवीम् अभ्येति । संसरणमार्गं प्राप्नोतीत्यर्थः । इति द्वयोरेकसंबन्धः ॥ ३ ॥ ननु देवादीनामाकृतीनामात्मनि साहजिकतयाऽविद्यमानत्वात्ताभिरात्मनः को न्वनर्थ इत्यत्राह ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्थेति। अर्थे देवमनुष्यत्वाद्याकारे, अविद्यमाने आत्मनि स्वतोऽविद्यमाने सत्यपि, अस्यात्मनः, विषयान् शब्दादीन्, ध्यायतश्चिन्तयतः सतः, संसृतिः न निवर्त्तते हि। संसाररूपोऽनर्थो निवृत्तिं न यात्येव। कथमिव स्वप्ने अनर्थागमः यथा, यथा स्वप्नशरीराणामात्माकारत्वाभावेऽपि सहजतया विषयचिन्तनद्वारा सुखदुःखरूपानर्थहेतुत्वं तद्वज्जागरेऽपि देहाद्याकाराणामात्माकारत्वाभावेऽपि विषयप्रवणताजननद्वाराऽनर्थरूपं बन्धहेतुत्वमित्यर्थः ॥ ४ ॥

यतो विषयध्यानमनर्थहेतुरस्यत एव मनो नियन्तव्यमित्याह। अत एवेति। यत एवं मनसो विषयेषु सङ्गः संसारहेतुरत एव असतां प्रकृतिपरिणामरूपतयाऽसद्रूपाणामिन्द्रियाणां पथि शब्दादिविषयेषु प्रसक्तं नितरामासक्तिं प्राप्तं चित्तं तीव्रेणान्तरायानुपहतेन भक्तियोगेन भगवद्भक्तियोगेन विरक्त्या कामानभिष्वङ्गेण च शनैः वशं नयेन। स्ववशं कुर्यादित्यर्थः। विरक्तिपदं विवेकादिसाधनसप्तकोपलक्षणम्। वैराग्यानुगृहीतभगवद्भक्त्या स्वसमीहितभगवदनुचिन्तनपरं कुर्यादेवं सति बन्धो निवर्त्तते इति भावः ॥ ५ ॥ भक्तियोगानुग्राहकाण्येव साधनानि वर्णयन् भक्त्या मोक्षप्रकारमाह षड्भिः। यमादिभिरिति। श्रद्धया मनोनियमनविषयया त्वरया अन्वितः युक्तः सन् यमादिभिः यमप्रभृतिभिः योगपथैरष्टाङ्गयोगमार्गैः, अभ्यसन् अभ्यासमाचरन् अभ्यासविधानेन वासुदेवमूर्त्तौ चित्तैकाग्रतां कुर्वन्नित्यर्थः। इत्येकं साधनम्, मयीश्वरे सत्येन निष्कपटेन, भावेन प्रीत्या युक्त इति शेषः। इति द्वितीयं साधनम्। किं च मत्कथाश्रवणेन सादरं मत्कथाकर्णनेन, युक्तः इति तृतीयं साधनम् ॥ ६ ॥ सर्वेति। सर्वभूतसमत्वेन सर्वभूतशरीराणां पाञ्चभौतिकत्वस्य परिणामितयाऽसत्यत्वस्य, आत्मनः सत्यत्वस्य चैतन्यत्वस्य च वेदनेनेत्यर्थः। युक्तः इति चतुर्थं साधनम्। निर्वैरेण केनचिदपि वैरानाचरणत्वेन, युक्तः इति पञ्चमं साधनम्। अप्रसङ्गतः अप्रसङ्गेन, बन्धनकारिणां पुत्रकलत्रादीनां स्वापतेयादिपदार्थानां च सङ्गत्यागेन वर्त्तनम्। इति षष्ठं साधनम्। ब्रह्मचर्येण अष्टधा स्त्रीवर्जनम्, युक्तः इति सप्तमं साधनम्। मौनेन ग्राम्यकथात्यागेन, युक्तः इत्यष्टमं साधनम्। महीयसाऽतिमहता, स्वधर्मेण भगवत्प्रसन्नतार्थं सम्यक् संशीलितस्वधर्मेणेत्यर्थः। युक्तः इति नवमं साधनम्। ॥ ७ ॥ यदृच्छयेति। यदृच्छया ईश्वरेच्छया, उपलब्धेन प्रारब्धानुसारसंप्राप्तान्नवस्त्रादिना, संतुष्टः संतोषवान्, इति दशमं साधनम्। मितभुक् अल्पाहारः, प्रमादाद्यविधायकाल्पाहाराचरणमित्यर्थः। इत्येकादशं साधनम्। मुनिः आत्मानात्मविचारयुक्तः, इति द्वादशं साधनम्। विविक्तं शरणं यस्य सः, सर्वोपद्रववर्जितपवित्रस्थानावस्थानाः, इति त्रयोदशं साधनम्। शान्तः कामक्रोधलोभादिजातमनःक्षोभादिकमनाप्नुवन्, इति चतुर्दशं साधनम्। मैत्रः सर्वेषां प्राणिनां मित्रवद्धितविधानप्रसक्तः, इति पञ्चदशं साधनम्। करुणः सर्वप्राणिषु दयोपेतः, इति षोडशं साधनम्। आत्मवान् परिपक्वात्मनिष्ठोपेतः, इति सप्तदशं साधनम् ॥ ८ ॥

सानुबन्ध इति। सानुबन्धे स्त्रीपुत्रादिसहिते अस्मिन् देहे, च असदाग्रहमहंममतां, अकुर्वन् इत्यष्टादशं साधनम्। प्रकृतेः पुरुषस्य च, दृष्टं तत्त्वं येन तेन, ज्ञानेन युक्तः, जगत्कारणयोः प्रकृतिपुरुषयोर्दृष्टं लक्षणेन यथार्थस्वरूपज्ञानं यस्मिंस्तथाविधेन ज्ञानेन युक्त इत्यर्थः। इत्येकोनविंशं लक्षणम् ॥ ९ ॥ निवृत्तेति। निवृत्तानि उक्तविधसाधनैर्वेशवदचित्तत्वान्निवृत्तिं प्राप्तानि बुद्ध्यवस्थानानि जाग्रदादीनि यस्य सः, अत एव दूरीभूतमन्यदर्शनमात्मेक्षणेतरदेहादिसमीक्षणं यस्य सः, स्वकीयजीवसत्तातः, स्थूलादिदेहत्रयादिकं पृथक्कया संपश्यन् योगी चक्षुषा अर्कम् इव आत्मना आत्मानम् उपलभ्य आत्मदृक् जायते इति शेषः। अस्यायं भावः। देहत्रयं स्वजीवसत्तातः पृथक् पश्यन्योगी यथा चक्षुष्यवस्थितसूर्येणाकाशस्थं सूर्यं समुपगच्छति तथा देहेन्द्रियान्तःकरणे सामान्यसत्तावस्थितात्मना विशेषतः कारणशरीरावस्थितजीवं कारणासंबन्धबोधेन शुद्धस्वरूपं संप्राप्यात्मदर्शी भवतीति ॥ १० ॥ शुद्धजीवस्वरूपं विशेषयति। मुक्तलिङ्गमिति। उक्तविध आत्मदर्शी योगी मुक्तलिङ्गं देहत्रयरूपोपाधिरहितम् असत्यसद्रूपे देहाद्यहंकारे सदाभासं सद्रूपेण भासमानं प्रतिपदा युतस्तं सदसद्विवेकवत्बुद्धियुक्तमित्यर्थः। सतोऽविद्याया बन्धुं प्रवर्त्तकम् असतो देहेन्द्रियादेश्चक्षुः प्रकाशकं, सर्वानुस्यूतं देहेन्द्रियादिस्वकार्यसहिताविद्यायां व्यापकतयानुस्यूतम् अन्वयमविनाशिनम् एवंभूतं शुद्धं जीवं यमादिसाधनैः प्रतिपद्यते इति भावः ॥ ११ ॥ इदानीं यया बुद्धियुक्त्या शुद्धं स्वात्मानं योगी प्राप्नोति तद्दृष्टान्तेनाह। यथेति। यथा जलस्थः आभासः प्रतिबिम्बः, स्थलस्थेनाभासेन अवदृश्यते तथा च। जलस्थेन स्वाभासेन, यथा दिवि स्थितः सूर्यः दृश्यते। अस्यायं भावः। हे मातः यथा कांस्याद्युज्ज्वलपात्रभृतजले गृहपटलच्छिद्रद्वारा पतितसूर्यप्रतिबिम्बः सुसुधालिप्तचञ्चद्भित्तिपतितः भवेत् तदा भित्तिपतितप्रतिबिम्बं दृष्ट्वा अयं प्रतिबिम्बः स्थालपतितसूर्यप्रतिबिम्बस्यास्तीति विचारा जायते, ततोऽयमपि पटलच्छिद्रद्वारा पतिताकाशस्थसूर्यस्य भवतीति विचारा जायते इति ॥१२॥ एवमिति। एवं कारणदेहे विशेषसत्तारूपेण वर्त्तमानः शुद्धो जीव इति शेषः। भूतेन्द्रियमनोमयैः स्वाभासैः देहेन्द्रिमनोभिरवच्छिन्नैरात्मप्रतिबिम्बैरित्यर्थः। त्रिवृत् त्रिगुणः, अहंकारः, लक्षितः। सतः परमात्मनः, आभासो यस्मिंस्तेन, अनेनाहंकारेण सत्यदृक् परमार्थदृगात्मा, लक्षितः। अस्यायं भावः। उक्तरीत्या कारणदेहे विशेषसत्तया वर्त्तमानः शुद्धो जीवात्मा त्वाकाशस्थसूर्यस्थानीयः, त्रिगुणात्मकाहंकारपतितः शुद्धजीवप्रतिबिम्बः कांस्यस्थालजलस्थसूर्यप्रतिबिम्बस्थानीयः देहेन्द्रिमनःस्वापतितः अहंकारस्थ आत्मप्रतिबिम्बः भित्तिस्थप्रति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बिम्बस्थानीयः। एवं सति संप्राप्तशुद्धात्मस्वरूपो योगी प्रथमतो देहेन्द्रियमनोऽवस्थिताभासं गच्छति तेनाभासेन च स्वाहंकारावस्थितमाभासं गच्छति ततः, सद्रूपाहंकारावस्थिताभासेन कारणदेहावस्थितं शुद्धं स्वात्मानमुपगच्छतीति ॥ १३ ॥

इत्थं योग्यनुभूयमानकारणस्थशुद्धक्षेत्रज्ञस्वरूपं वदति। भूतसूक्ष्मेति त्रिभिः। भूतसूक्ष्माणि शब्दादीनि च इन्द्रियाणि च मनश्च बुद्धिश्च ता आदयो येषां चित्ताहंकारादीनां तेषु असति असत्तुल्येऽव्याकृतेऽविद्यात्मकाऽज्ञाने इत्यर्थः। निद्रया लीनेषु सत्सु, इहास्मिन्देहे तत्र तदा योऽयमात्मा सः विनिद्रः निरहंक्रियश्च सन् तिष्ठतीति शेषः॥ १४ ॥ ननु यदि तदाऽसौ विनिद्रोऽस्ति तर्हि जाग्रत्स्वप्नयोरिव स्फुटं किं नावभासते तत्राह। मन्यमान इति। द्रष्टा सुषुप्तेः प्राक् जाग्रति देहादेर्द्रष्टृत्वेन सविकल्पतया स्फुटं प्रतीयमानः स्वयमात्मा तदा देहाद्यनात्मवर्गाऽभिमानरूपाहंकारस्य, यदा सुषुप्तौ लयो जातस्तस्मिन्काले, अहंकरणेऽहंकारे नष्टे सति अनष्टः अपि मृषा एव। आत्मानं नष्टवत् विनष्ट इव मन्यमानः सन् आतुरो विवशः जायते। अन्यस्य नाशेऽन्यस्य नष्टतुल्यत्वे दृष्टान्तः। नष्टवित्तः इव विनष्टद्रविणः जनः यथातुरः सन्नष्टवद्भवति तथेत्यर्थः॥ १५ ॥ ननु सुषुप्तौ तु न किंचिदनुभूयते 'नाहं खल्वयमेवं संप्रत्यात्मानं जानाम्ययमहम्' इत्यादिश्रुतेरिति चेन्मैवम्, 'सुखमहमस्वाप्सं न किंचिदवेदिषम्' इति विशेषज्ञानं विनापि केवलस्यात्मनः तत्र प्रतिसंधानादित्याह। एवमिति। एवं प्रत्यवमृश्य, 'सुखमहमस्वाप्सम्' इत्यादिजाग्रत्यहमादिसाधनयोगेन वक्तुरात्मनस्तदापि विद्यमानबोधकतारूपपूर्वोक्तवृत्तिं विचार्येत्यर्थः। असौ प्रकृतिविविक्तात्मस्वरूपजिज्ञासुर्योगी आत्मानं प्रकृतिविविक्तं शुद्धं प्रत्यगात्मानम्, प्रतिपद्यते यथावज्जानीयात्। अनाद्यविद्यारूपप्रकृतिविमुक्तो भवतीत्यर्थः। ननु प्रतिसंधाने साहंकारस्य प्रतीतेः कथं निरहंक्रियत्वं तत्राह। यः साहंकारस्याहंकारादिसंहितस्य द्रव्यस्य देहेन्द्रियादिकस्य कार्यकारणसंघातस्येत्यर्थः। अवतिष्ठत्यनेनेत्यवस्थानमवस्थापकः आश्रयभूत इति यावत्। आत्मविश्लेषे देहस्य विशीर्णस्वभावत्वात्। अनुग्रहः देहस्य प्रवृत्तिहेतुत्वेन प्रकाशकः भवति। तमात्मानं प्रतिपद्यते इति संबन्धः॥ १६ ॥ अत्रैवंविधप्रत्यगात्मस्वरूपानुचिन्तनं भगवद्भक्तियोगानुग्रहद्वारा मोक्षसाधनमिति पुत्रस्य विवक्षामालक्ष्यान्तरा प्रकृतिपुरुषयोरनादित्वात्तयोर्मिथः संबन्धस्याप्यनादित्वात्कथमुभयोर्विश्लेष इति मुक्त्यसंभावनामुद्भावयन्ती पृच्छति देवहूतिश्चतुर्भिः। पुरुषमिति। हे ब्रह्मन् पुरुषं जीवम्, प्रकृतिः स्वनिष्ठानाद्यज्ञानरूपाविद्यापरपर्याया माया कर्हिचिदपि न विमुञ्चति न त्यजति अस्मिन्नर्थे हेतुमाह। हे प्रभो अनयोः प्रकृतिपुरुषाख्ययोरनाद्यविद्याजीवयोः अन्योऽन्यापाश्रयत्वात् परस्परं दृढतरं संबद्धत्वात् शरीरं विना पुरुषस्य चेष्टाविधानाभावः पुरुषमन्तरेणाचेतनत्वेन प्रकृतेः कार्यशरीरस्य तथात्वमेवमितरेतरोपकारित्वादिति भावः। न चान्यतरविनाशेनाऽपि विश्लेषः संभाव्येत यतः नित्यत्वाच्च पृथगवस्थानं न संभवतीति प्रश्नाभिप्रायः॥ १७ ॥

इदमेवैतयोः पृथगनवस्थानं दृष्टान्तेन दृढीकरोति। यथेति। यथा भूमेः पृथ्व्याः गन्धस्य तदपृथक्सिद्धस्य गन्धगुणस्य च व्यतिरेकतः, भावः पृथग्भावेनावस्थानम् न संभवति। गन्धस्यापि क्वचिदपक्षयदर्शनाद्दृष्टान्तान्तरमाहापामिति। अपां रसस्य च न, रसगुणस्याद्भ्यः पृथग्भावो नास्ति। तथा बुद्धेः प्रकृतेः ततः परस्यात्मनश्च पृथग्भावः नास्ति। यद्वा बुद्धेः परस्य बोद्धुरात्मनः चकारात्प्रकृतेरपि प्रकृतेरित्यध्याहारेण वा योजना॥ १८ ॥ अकर्तुरिति। किं च अकर्तुः स्वतः सांसारिकगमनागमनादिप्रवृत्त्यनाश्रयस्य पुरुषस्यात्मनः अयं कर्मबन्धः यदाश्रयः ये प्रकृतिगुणा आश्रयो यस्य तथाभूतो भवति। तेषु प्रकृतेः गुणेषु सत्सु पुरुषस्य अतः एभ्यः प्रकृतेर्गुणेभ्य इत्यर्थः। कैवल्यं विमोक्षणं कथम्, प्रकृतिगुणानिवृत्त्या तत्कृतसंसारबन्धानिवृत्तेरित्यर्थः॥ १९ ॥ तत्त्वज्ञानेन प्रकृतिरात्मानं विमुञ्चतीति चेत्तत्राह। क्वचिदिति। उल्बणमतितीव्रम्, भयं पुनः पुनः संसरणरूपा भीतिः क्वचित् तत्त्वावमर्शेन तत्त्वालोचनेन पूर्वोक्तात्मावमर्शेनेत्यर्थः। निवृत्तं निवृत्तप्रायमपि अनिवृत्तं निमित्तं यस्य तस्य भावस्तत्त्वं तस्मात् अनिवृत्तप्रकृतिसंबन्धत्वादित्यर्थः। पुनः प्रत्यवतिष्ठते उपस्थितं जायते॥ २० ॥ हे मातः सत्यमेवं तथापि बह्वङ्गोपकृतभक्तियोगसमाराधितपरमपुरुषप्रसादादात्मानं विमुञ्चति प्रकृतिः क्वचित्तदुद्भववस्तु साधनवैकल्यादित्याह कपिलस्त्रिभिः। अनिमित्तेति। न निमित्तं फलम् निमित्तं प्रवर्तकं यस्मिंस्तेन फलाभिसंधिरहितेनेत्यर्थः। स्वधर्मेण स्ववर्णाश्रमोचितधर्मेण 'धर्मेण पापमपनुदति' इति श्रुतेः। अमलात्मना विशुद्धान्तःकरणेन चिरं श्रुतसंभृतया मत्कथाश्रवणेन वृद्धिं गतया तीव्रया विधातानुपहतया मयि भक्त्या च अनभिसंहितफलकर्मयोगाचरणपरिशुद्धान्तःकरणनिष्पाद्यया मत्कथाश्रवणादिभिरुपकृतया निश्छद्ममद्भक्त्येत्यर्थः॥ २१ ॥ अन्यान्यपि भक्तियोगाङ्गान्याह। ज्ञानेनेति। दृष्टं तत्त्वं प्रकृतिपुरुषयोर्याथात्म्यं हेयोपादेयत्वरूपं यस्मिंस्तेन ज्ञानेन बलीयसा बलवत्तरेण वैराग्येण इहामुत्रफलभोगविरागेण तपोयुक्तेन देहालालनादितपोयुक्तेन योगेन प्रकृतिविविक्तात्मचिन्तनेन तीव्रेण आत्मसमाधिना चित्तैकाग्र्येण, उपकृतया मद्भक्त्या चेति पूर्वेण संबन्धः॥ २२ ॥

प्रकृतिरिति। इह जीवलोके, अहर्निशं तु रात्रिंदिवम् एव दह्यमाना पीड्यमाना, पुरुषस्य प्रकृतिः, अनादिकालतोऽप्यात्मबन्धनकरी प्रकृतिः, शनकैः तिरोभवित्री निःशेषं निवर्तिष्यते,। अत्रार्थे दृष्टान्तमाह। अग्नेः योनिः अग्न्याविर्भावहेतुरपि अरणिः इव, अग्निना दह्यते, तथा ससाधनभक्त्युद्भवहेतुभूतापि प्रकृतिस्तया दह्यते इत्यर्थः। यद्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अग्नितिरोधायिकाऽरणिरिवात्मतिरोधायिका प्रकृतिर्दह्यते इत्यर्थः। तथा च पाद्मे 'तण्डुलस्य यथा चर्म यथा ताम्रस्य कालिमा। नश्येत क्रियया राजंस्तथा पुंसो मलग्रहः' इति ॥२३॥ एवं सति न पुनः संसारयत्यात्मानं प्रकृतिरित्याह। भुक्तभोगेति। भुक्तः भोगो यस्याः सा, नित्यशः दृष्टो दोषो यस्याः सा च, अत एव परित्यक्ता सती, प्रकृतिः ईश्वरस्याकर्मवश्यस्य, स्वे महिम्नि अच्छेद्या-दाह्याक्लेद्यादिरूपे स्वमहिम्नि, स्थितस्यात्मनः, अशुभं संसारं न धत्ते न संपादयत्येवेत्यर्थः। चोऽवधारणे ॥ २४ ॥ अज्ञस्य प्रकृतिसंबन्ध ज्ञानवतस्तु न तत्सम्बन्ध इत्यत्र दृष्टान्तमाह। यथेति॥ यथा अप्रतिबुद्धस्य निद्रामुपगतस्य पुंसः प्रस्वापः स्वप्नः, बह्वनर्थकृत् स्वशिरच्छेदादिबह्वनर्थकारी, जायते। हि स एव प्रस्वापः, प्रतिबुद्धस्य जाग्रतः, मोहायानर्थाय, न कल्पते न समर्थो भवेत् वै। अनर्थस्यास्थिरत्वाय स्वप्नदृष्टान्तः॥२५॥ एवमिति। एवं विदिततत्त्वस्य विदितप्रकृतिपुरुषेश्वरतत्त्वत्रयस्य, मयि, मानसं युञ्जतः, आत्मारामस्य आत्मन्येव परं रममाणस्य, प्रकृतिविलक्षणस्वात्मपरमात्मानुभवपरस्य, योगिन इत्यर्थः। कर्हिचित्कदाचिदपि, प्रकृतिः, न अपकुरुते न बन्धं करोतीत्यर्थः ॥ २६ ॥ उक्तमुपसंहरति। यदेति। मुनिर्योगी, यदा, एवमुक्तरीत्या, अध्यात्मरतः आत्मारामः; बहूनि जन्मानि यस्मिंस्तेन, कालेन प्रतिबुद्धार्थः विदितात्मतत्त्वः, आब्रह्मभुवनात्, सर्वत्र सत्यलोकपर्यन्तेषु लोकेष्वित्यर्थः। जातवैराग्यः। सातिशयत्वक्षयिष्णुत्वबुद्ध्या भोग्यताबुद्धिरहित इत्यर्थः॥ २७ ॥ मद्भक्तः इति। मद्भक्तः निरतिशयप्रीतिरूपमद्भक्तियुक्तः सन्, भूयसा सातिशयेन, मत्प्रसादेन निश्रेयसं पुरुषार्थरूपं कैवल्याख्यं मदाश्रयं स्वसंस्थानं मद्धाम ॥ २८ ॥

प्राप्नोतीति। इहास्मिन्देहे विद्यमाने सत्यपि अञ्जसा, प्राप्नोति, उपासनादशायामेव सुखेन साक्षात्करोतीत्यर्थः। ततः स्वदशा भगवदात्मकस्वात्मसाक्षात्कारेण, छिन्नसंशयः विगतदेहात्माभिमानः, धीरः योगी, मद्भक्तियोगनिष्ठः, लिङ्गात्, विनिर्गमे प्रारब्धावसाने, यत्स्थानं गत्वा प्राप्य न निवर्त्तेत न पुनरावर्त्तेत। तत्परमं स्थानं प्राप्नोतीति। त्रयाणामेकसंबन्धः॥ २९ ॥ पूर्वश्लोकोक्तसाक्षात्कारवतोऽणिमादयः सिद्धयोऽन्तरायरूपा उपतिष्ठन्ते तास्वपि वितृष्णस्य भगवत्प्राप्तिमाह। यदेति। हे अम्ब मातः, यदा तु योगेनोपचितास्तासु योगेन समृद्धासु नास्ति अन्यो योगादपरो हेतुर्यासां तासु, केवलेन योगेनैवोद्भूतास्वित्यर्थः। मायास्वणिमादिसिद्धिषु सिद्धस्य योगिनः, चेतः न विषज्जते आसक्तं न जायते। अथ तदा त्वित्यर्थः। अन्तमतिक्रान्तोऽद्दमत्यन्त स्तस्येयमात्यन्तिकी, मे मत्संबन्धिनी गतिर्मत्प्राप्तिः, स्यात्। अत्र यस्यां मद्गतौ मृत्योः हासो हसनं जायते। विषक्तो सत्यां तु सिद्धोऽपि मया वशीकृत इति हासविधानपूर्वो गर्वो भवतीत्यर्थः। यद्वा अम्ब हे मातः, सिद्धस्य पुंसः चेतः योगोपचितासु अनन्यहेतुषु मायासु विषज्जते। तदा तु मृत्योः संसारस्य हासः नाशः न यदा तासु न विषज्जते अथ तदा आत्यन्तिकी मे गतिर्मत्प्राप्तिः, स्यात् ॥ ३० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायाम-न्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे सप्तविंशोऽध्यायः॥ २७॥

——:※:——

अथाष्टाविंशोऽध्यायः

श्रीकपिल उवाच

योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे। मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥ १ ॥

ध्यानसंशोभिनाष्टाङ्गयोगेनाथ समीर्यते। मुक्तोपायैः स्वरूपस्याष्टाविंशे वयुनं मुनेः॥ १ ॥

उक्त्वा संक्षेपतो भक्तिं सांख्यं प्रोच्य सविस्तरम्। वैष्णवं योगमष्टाङ्गमथाह कपिलः प्रभुः॥ २ ॥

पूर्वस्मिन्नध्याये स्वधर्मभक्तियोगविरक्तिपुंप्रकृतिस्वरूपावबोधप्रभृतितीव्रसाधनेनात्मानं स्वप्रकृतेर्विमोच्य ब्रह्मरूपः सन्नात्यन्तिकीं गतिमेतीत्युक्तम्, सांप्रतमस्मिन्नध्याये सबीजयोगशास्त्रोक्तवासुदेवभगवद्ध्यानेन योगी ब्रह्मभूतः सन्नात्यन्तिकीं गतिमेतीति वदति कपिलः। योगस्येति। हे नृपात्मजे मनुपुत्रि सबीजस्य बीजं विष्णुस्तेन सहितः सबीजस्तस्य श्रीवासुदेवमूर्त्ति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यानरूपबीजावलम्बनवत इत्यर्थः 'सबीजो वैष्णवो योगो निर्बीजस्त्वन्यदैवतः। बीजं विष्णुर्हि जगतः शाखाद्या अन्यदेवताः' इत्यभियुक्तोक्तेः। योगस्याष्टाङ्गयोगस्य लक्षणं वक्ष्ये कथयिष्यामि। विधीयते इति विधिस्तेन विहितेनेत्यर्थः। कर्मण्युपसर्गे धान्वः किः। येन योगेन मनः प्रसन्नं रागाद्यकलुषितं सत् सत्पथं शुभाश्रयं याति एव तत्रैव स्थिरं भवतीत्यर्थः ॥ १ ॥

तत्र प्रथमं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसविकल्पसमाधिसंज्ञानि निर्विकल्पसमाधेरष्टावङ्गानि विवक्षुर्यमनियमानाह। स्वधर्मेति त्रिभिरक्षरद्वयाधिकैः। शक्त्या स्वसामर्थ्येन स्वधर्माचरणं यावत्स्वदेहस्वास्थ्यं तावत्स्वधर्मस्याशैथिल्यापादनमित्यर्थः। विधर्मात् धर्मवदाभासमानोऽपि सच्छास्त्रनिषिद्धोऽधर्मो विधर्मस्तस्माद्विधर्माद् निवर्त्तनं च दैवं स्वादृष्टप्रेरको भगवांस्तस्मात् लब्धेन प्राप्तेन संतोषोऽलंबुद्धिः आत्मविदात्मतत्त्वज्ञस्तस्य चरणार्चनं पादभजनम् ॥ २ ॥ ग्राम्यधर्मेति। ग्राम्यधर्मस्त्रैवर्गिको धर्मस्तस्मान्निवृत्तिः तथा मोक्षधर्मेषु रतिः प्रीतिश्च मितं च तन्मेध्यं पवित्रं तस्यादनं भक्षणम्। तत्र मितं नाम 'द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत। मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्' इति स्मृतिप्रसिद्धम्। शश्वत्सदा विविक्तं च क्षेमं च तयोः सेवनम्, विजननिर्बाधस्थानपरिसेवनमित्यर्थः ॥ ३ ॥ अहिंसेति। अहिंसा मनोवचःकायैः परपीडाविवर्जनम्। सत्यं जीवहिंसा यथा न भवेत्तथा यथार्थभाषणम्। अस्तेयं मनोवचःकर्मभिरपि परद्रव्यादेः प्रत्यक्षं परोक्षं वा चौर्यानाचरणम्। यावदर्थपरिग्रहः यावता पदार्थेन स्वदेहनिर्वाहः स्यात्तावत एव तस्य संग्रहविधानम्। ब्रह्मचर्यं स्वस्वयोग्यतानुसारेण स्त्रीसंबन्धवर्जनम्। तपः इन्द्रियनिग्रहः कृच्छ्रचान्द्रायणाद्याचरणं वा। शौचं बाह्याभ्यन्तरशुद्धिः। स्वाध्यायो वेदाध्ययनादिः। पुरुषार्चनं पुरुषस्य श्रीनारायणस्य वेदोक्तेन तन्त्रोक्तेन वा विधिनाऽर्चनम्। मौनं ग्राम्यवार्त्तानाचरणम्। केचित्तत्र विवेकविमोकाभ्यासक्रियाकल्याणानवसादाऽनुद्धर्षाख्यसाधनसप्तकमन्तर्गतं वदन्ति, तत्र स्वधर्माचरणमित्यारभ्य मोक्षधर्मरतिस्तथेत्यन्तेन साधनसप्तकान्तर्भूता क्रियोक्तेति संप्रोच्य, तेषु तान्यवतारयन्ति ॥ ४ ॥ आसनादीन्यङ्गान्याह। मौनमिति त्रिभिः। तत्र मौनं पूर्वमन्वयितं सत् सर्वासनेषु सरलत्वात्समीचीनं च तदासनं च तस्य जयेन स्थैर्यम्। स्वस्तिकासनस्थिरताविधानमित्यर्थः। सदा आसनजयेन स्थिरता वा। अथ प्राणायाममाह। शनैः प्राणजयः प्राणवायोः स्ववशीकरणं च, अथ प्रत्याहारमाह। इन्द्रियाणां मनसा विषयात् विषयेभ्यः एकवचनं जात्यभिप्रायम्। हृदि प्रत्याहारः मनसेन्द्रियाणि विषयेभ्यः प्रत्याहृत्य हृद्यवस्थापनमित्यर्थः ॥ ५ ॥ अथ धारणामाह। स्वधिष्ण्यानामिति। स्वधिष्ण्यानां प्राणापानादिस्थानभूतानां मूलाधारादीनां मध्ये; एकदेशे एकस्मिन्देशे, मनसा सह, प्राणधारणम्; अथ ध्यानमाह। वैकुण्ठस्य हरेः लीलानां जगत्सृष्ट्यादिव्यापाररूपाणां लीलानामभिध्यानं चिन्तनम्। अथ समाधिमाह। तथा आत्मनो मनसः समाधानं भगवतः श्रीमूर्त्तावेकाग्रीकरणम् ॥ ६ ॥

एतैरिति। एतैरुक्तैः स्वधर्माचरणादिभिः अन्यैर्व्रतदानादिभिश्च पथिभिरुपायैः दुष्टं सर्वथा सदोषम् अत एव असत्सु पन्था गमनमार्गो यस्य तत्। इन्द्रियार्थद्रुतप्रचरणमित्यर्थः। मनः बुद्ध्या जितप्राणः अतन्द्रितस्तन्द्रारहितश्च सन् शनकैः युञ्जीत शुभाश्रयप्रवणं कुर्यात् हि ॥ ७ ॥ एवं समासेन योगाङ्गान्युक्त्वा भूयोऽप्यासनादीनि प्रपञ्चयति। शुचाविति। विजितमासनं येन सः चिरमुपविशन्नपि क्लमरहित इत्यर्थः। शुचौ देशे आसनं चैलाजिनकुशोत्तरमास्तरणम्, प्रतिष्ठाप्य, तस्मिन्नासने, स्वस्तिकः स्वस्तिकासनेनेत्यर्थः। आसीनः, ऋजुकायोऽकुटिलदेहेनासीनः सन् समभ्यसेत् प्राणमिति शेषः। 'ऊरुजङ्घान्तराधाय पादाग्रे जानुमध्यगे। योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः' इति स्वस्तिकासनलक्षणम् ॥ ८ ॥ प्राणस्येति। पूरः पूरकश्च कुम्भकश्च रेचकश्च तैः। बाह्यवायोरन्तःप्रवेशः पूरः। प्रवेशितस्य वायोर्धारणं कुम्भकः। धृतस्य बहिर्निःसारणं रेचकः। प्रतिकूलेन रेचककुम्भकपूरकैरिति वा। इडयापूर्य पिङ्गलया रेचनं पिङ्गलयापूर्येडया रेचनं वेति प्रतिकूलेन, चित्तं स्थिरं सत्, अचञ्चलं यथा स्यात् तथा प्राणस्य मार्गं शोधयेत्। प्राणे स्ववशे तद्बन्धनं मनोऽपि स्ववशं भवेत्। तथा च श्रूयते छान्दोग्ये। 'यथा शकुनिः सूत्रेण प्रतिबद्धो दिशं पतित्वान्यत्रापतनमलब्ध्वा बन्धनमेवोपश्रयते एवं मनोऽपीत्यारभ्य प्राणमेवाश्रयते प्राणबन्धनं सौम्य मनः' इति ॥ ९ ॥ मन इति। जितश्वासस्य जितप्राणस्य योगिनः, मनः, अचिरादाशु विरजं विगतरजोगुणम्, स्यात्। यथा वायुश्चाग्निश्च ताभ्यां ध्मातं संतप्तं सत्, लोहं स्वर्णादिकम्, मलं त्यजति तथा मनः विरजं स्यादिति भावः ॥१०॥ प्राणायामादीनां समाधावुपयोगिनामवान्तरकार्याण्याह प्राणायामैरिति। प्राणायामैः प्राणनियमनैः, दोषान्वातपित्तश्लेष्मादीन्, दहेत्। धारणाभिश्च, किल्बिषान् पापानि, दहेत्। प्रत्याहारेण, संसर्गान् शब्दादिविषयसंसर्गान्, दहेत्। ध्यानेन अनीश्वरान् गुणान् क्लेशादीन् दहेत्। मनसः शुभाश्रयेऽवस्थापनं धारणम्। धृतस्य मनसो वृत्तिसंततिर्ध्यानम्। संततेः प्रत्ययान्तराव्यवहितत्वं समाधिरिति भेदः। केचित्तु वायुना सह मनसः स्थिरीकरणं धारणा स्थिरस्य वृत्तिसंततिर्ध्यानम्। वृत्तिनिरोधः समाधिरिति भेदमाहुः ॥ ११ ॥ अथ धारणापूर्वकं ध्यानमाह। यदेति। यदा स्वं स्वीयम्, मनः योगेन प्राणायामादिना, विरजं रजोवर्जितम्, सुसमाहितं सम्यक् शुभाश्रये निहितं स्यात्, तदा स्वनासाग्रावलोकनः स्वनासाग्रारोपितदृष्टिः सन्, भगवतः काष्ठां विग्रहम्, ध्यायेत् ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्येयं विग्रहमेव विशिनष्टि। प्रसन्नेति सप्तभिः। प्रसन्नं वदनाम्भोजं यस्य तम्, एतदादिवक्ष्यमाणद्वितीयान्तानां ध्यायेदिति षष्ठश्लोकगतेनान्वयः। पद्मगर्भवदरुणे नेत्रे यस्य तं नीलं च तस्य दलवच्छ्यामस्तं शङ्खश्च चक्रं च गदा च अः अब्जं च तेषां धरस्तम्, अकारेणाब्जोपादानमाभाकादिवन्नामैकदेशेन नामग्रहणस्य शिष्टसंमतत्वात् ॥ १३ ॥ लसदिति। लसन् दीप्यमानो यः, पङ्कजकिञ्जल्कस्तद्वत्पीते कौशेयवाससी यस्य तं श्रीवत्सो वक्षसि यस्य तं श्रीवत्सलाञ्छनमित्यर्थः। श्रीवत्सो दक्षिणस्तनोपरि रोमावर्त्तः, श्रीवत्सो भक्तविशेषो लक्ष्मभावेन भगवद्वक्षसि स्थितोऽस्तीति ब्राह्मीसंहितातोऽवगन्तव्यम्। भ्राजन् शोभमानो यः कौस्तुभस्तेनाऽऽमुक्ता संश्लिष्टा कंधरा यस्य तम् ॥ १४ ॥ मत्तेति। मत्तद्विरेफाणां कलो मधुरध्वनिर्यस्यां तया वनमालया परीतं व्याप्तम्। हार एकावल्यादिश्च वलये कटके च किरीटं मुकुटं च अङ्गदे केयूरे च नुपूरौ मञ्जीरे च परार्ध्या बहुमूल्या हारादयो यस्य तम् ॥ १५ ॥ काञ्चीति। काञ्चीगुणेन हिरण्मयमेखलासूत्रेण उल्लसन्ती श्रोणी यस्य तं हृदयाम्भोजं भक्तहृत्पद्ममेव विष्टरमासनं यस्य तं दर्शनीयतममतिशयेन दर्शनार्हं शान्ताकारं भक्तानां मनोनयनानि वर्द्धयति हर्षयतीति तम् ॥ १६ ॥ अपीच्येति। अपीच्यमतिसुन्दरं भक्तिविषयं दर्शनं यस्य तं शश्वत् सर्वै च ते लोकाश्च तैर्नमस्कृतस्तं कैशोरे तारुण्ये, वयसि सन्तं सर्वदावस्थितं, भृत्यानामनुग्रहे कातरो व्यग्रस्तम् ॥ १७ ॥ कीर्त्तन्येति। कीर्त्तन्यं कीर्तनार्हं तीर्थं तीर्थवत्पवित्रतापादकं यशो यस्य तं, पुण्यश्लोका बलिभीष्मोत्तमनृपादयस्तेषां यशस्करस्तं, एवमेवंभूतं हरिं, समग्राणि अङ्गानि यस्मिन्यथा भवति तथा यावद्यथा, मनः, न च्यवते न चलति, तावत्तथा ध्यायेत्। सर्वाङ्गध्यानासक्तं यथा स्यात्तथा ध्यायेदित्यर्थः ॥ १८ ॥ स्थितमिति। स्थितं श्रितपरिरम्भणार्थमूर्ध्वमवस्थितं वा इव। अत्र सर्वत्र इवार्थे वा योजनीयः। व्रजन्तं श्रितपरित्राणार्थं गच्छन्तम्, आसीनं श्रितार्पितपूजोपहारादानाय सिंहासने उपविष्टं, शयानं श्रितकृतपादसंवाहनादिसेवाङ्गीकाराय विहितपर्यङ्कशयनं गुहाशयं स्वीयहृदयकुहरकृतावासं प्रेक्षणीयमीहितं यस्य तं भक्तजनसमीक्षणीमसुभगलीलमित्यर्थः। एवंभूतं भगवन्तं शुद्धो रागाद्यकलुषितो भावो वृत्तिर्यस्य तेन चेतसा ध्यायेत् ॥ १९ ॥

एवं ध्येयरूपसमुदाय उक्तोऽथ दिव्याङ्गेष्वेकैकोपासना कार्येत्याह। तस्मिन्निति। तस्मिन्नुक्तविधभगवद्विग्रहे लब्धं पदं स्थितिर्येन तत्, सर्वे च तेऽवयवाश्च तेषु सम्यक् स्थितं संप्राप्तस्थैर्यं चित्तं, विशेषेण लक्षीकृत्य, मुनिर्ध्यानावस्थितो भक्तयोगी भगवतः एकत्रैकस्मिन्नङ्गे संयुञ्ज्यात्संयोजयेत् ॥ २० ॥ एतदेव पादादिक्रमेण प्रपञ्चयति। संचिन्तयेदिति त्रयोदशभिः। वज्रं कुलिशं च अङ्कुशः सृणिश्च ध्वजः केतुश्च सरोरुहं पद्मं च तानि यानि लाञ्छनानि रेखात्मकलक्ष्माणि तैराढ्यं, युक्तम्, उत्तुङ्गा मध्यतः किंचिदुन्नताश्च रक्ताः शोणवर्णाश्च विलसन्तश्चञ्चन्तो ये नखास्तेषां चक्रवालं मण्डलं तस्य ज्योत्स्नाः चन्द्रिकास्ताभिराहतो महतां ध्यातृणां हृदयान्धकारो हृद्गतं ध्वान्तं येन तत्, महदित्यन्धकारविशेषणं वा। एवंभूतं, भगवतः चरणारविन्दं संचिन्तयेत्सन्यगभिध्यायेत्। एतच्च सर्वमुपादेयविशेषणं ध्येयत्वेनोच्यते ॥ २१ ॥ यदिति। किं च तीर्थेन संसारतारकेण, मूर्ध्नि मस्तके, अधिकृतेन सम्यग्विधृतेन, यस्य चरणारविन्दस्य शौचं प्रक्षालनजलं तेन निःसृता संप्रवृत्ता या सरित्प्रवरा गङ्गा तस्या उदकं जलं तेन, शिवः अपि, शिवः मङ्गलसंयुक्तः, अभूत् ध्यातुः श्रीहरिमूर्त्तिसंचिन्तकस्य; मनसि यः शमलशैलः पापपर्वतस्तस्मिन्निसृष्टं निक्षिप्तं वज्रं वज्रवद्वर्त्तमानं यद्वा शमलशैले निसृष्टं स्वलाञ्छनरूपं वज्रं येन तत्, भगवतः चरणारविन्दं, चिरं बहुवेलम्; ध्यायेत् ॥ २२ ॥ जानुद्वयमिति। अखिलस्य जनन्या सकलजगन्मात्रा, 'नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी' इति विष्णुपुराणोक्तेः। सुरवन्दितया ब्रह्मादिभिराराधितया, जलजे इव लोचने यस्यास्तया, लक्ष्म्या रमया ऊर्वोः स्वकीयसक्थ्नोः, निधायावस्थाप्य, करावेव पल्लवौ किसलये तयो रोचितेन प्रकाशमानकरपल्लवेनेत्यर्थः। यत् संलालितं स्पर्शनचातुर्येण संसेवितं संसारित्ववरसंप्राप्तप्रतीतिं वारयति अभवस्येति अभवस्येतरवद्भववर्जितस्य, विधातुर्जगत्कर्त्तुः, विभोरखिलहेयप्रत्यनीकस्य भगवतः, तत् जानुद्वयं जानुपर्यन्तजङ्घाद्वयं हृदि कुर्यात् योगी ध्यायेत्। केचित्तु अखिलस्य, विधातुर्ब्रह्मणः, जनन्या लक्ष्म्या संलालितमिति योजयन्ति ॥ २३ ॥

ऊरू इति। सुपर्णभुजयोर्वैनतेयस्कन्धयोः, अध्युपरि, शोभमानावतिसुन्दरौ, स्कन्धशोभाजनकतापूर्वं स्वयं विराजमानावित्यर्थः। ओजसः बलस्य औज्ज्वल्यस्य वा निधी आश्रयौ। अतसिकाकुसुमवदवभासौ, कान्त्या संशोभमानौ, ऊरू हृदि कुर्यात्। व्यालम्बि आगुल्फं लम्बमानं यत्पीतं वरं वासस्तस्मिन्, वर्त्तमानः समवस्थितश्चासौ काञ्चीकलापस्तेन परिरम्भः संश्लेषो विद्यते यस्य तत्, नितम्बबिम्बं हृदि कुर्यादिति पूर्वेणैवान्वयः। अत्र कलापशब्दो बहुसरपरो बोध्यः ॥ २४ ॥ नाभिह्रदमिति। अमुष्य भगवतः, भुवनानां कोशस्य समूहस्य गुहाधिष्ठानं यदुदरं तत्र तिष्ठतीति तम्। यत्र नाभिह्रदे, आत्मयोनेर्ब्रह्मणः धिषणं धिष्ण्यमखिललोकात्मकं पद्मं व्यूढमुत्थितं तं नाभिह्रदं ध्यायेत्। तथा विशदश्चासौ हारश्च तस्य, मयूखास्तैर्गौरं श्वेतं हरिन्मणिवृषौ मरकतमणिश्रेष्ठौ इव यौ स्तनौ तयोः, द्वयं युगलं ध्यायेत ॥ २५ ॥ वक्ष इति। महाविभूतेर्लक्ष्म्याः, अधिवासं निवासस्थानं पुंसां ध्यातृणां मनोनयनयोर्निर्वृत्तिरानन्दरूपाम् आदधानं कुर्वाणम् ऋषभस्य श्रेष्ठस्य, भगवतः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चक्षुः ध्यायेत्। तथा अखिलाश्च ते लोकाश्च तैर्नमस्कृतः सेवितस्तस्य भगवतः, कुं भुवं स्तुभ्नाति परितो वेष्टयतीति कुस्तुभोऽब्धिस्तत्र भवः कौस्तुभः स चासौ मणिर्यो भूषणार्थं धृतस्तस्य, अध्यधिकं भूषणमर्थः प्रयोजनं यस्य तं कौस्तुभमणिमेव स्वयमलंकुर्वाणमित्यर्थः। कण्ठं च मनसि कुर्याद्भावयेत् ॥ २६ ॥ बाहूनिति। मन्दरगिरेर्मन्दराचलस्य परिवर्त्तनं मन्थनकालीनं परिभ्रमणं तेन, निर्णिक्तान्युज्ज्वलीकृतानि बाहुवलयान्यङ्गदानि येषु तान्, अध्यधिश्रिता लोकपाला येषु तान्, बाहून् संचिन्तयेत्। तथा, च, तथैव। दशशतारं सहस्रारं न सह्यं तेजो यस्य तच्चक्रं तस्य भगवतः कर एव सरोरुहं तस्य राजहंसमिव स्थितं शङ्खं च संचिन्तयेत् ॥ २७ ॥ कौमोदकीमिति। तथा भगवतः दयितां प्रियाम् अरातयः शत्रुभूता ये भटा योद्धारस्तेषां शोणितमेव कर्दमः पङ्कस्तेन, दिग्धां लिप्तां मोदयति प्रीणाति जनानिति मोदकः कोः पृथिव्या मोदकः कुमोदको विष्णुस्तस्येयं कौमोदकी तां गदां स्मरेत। तथा अस्य भगवतः, कण्ठे गले, मधुव्रता भ्रमरास्तेषां वरूथः संघस्तस्य गीर्वाक् तया, उपघुष्टां नादितां मालां चैत्यस्य जीवस्य, अमलं तत्त्वं जीवस्वरूपाधिष्ठातृदेवतारूपमित्यर्थः। मणिं कौस्तुभं च स्मरेत। तदुक्तं विष्णुपुराणे। "आत्मानमस्य जगतो निर्लेपमगुणालयम्। बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः इति ॥ २८ ॥

भृत्येति। भृत्येषु स्वैकान्तिकोपासकेषु अनुकम्पिता कृतानुकम्पा या धीस्तया, इह अस्मिँल्लोके गृहीता मूर्त्तिर्येन तस्य भक्तानुग्रहाय स्वेच्छोपात्ततनोरित्यर्थः। भगवतः, विस्फुरन्ती ये मकराकृतिकर्णवेष्टने तयोर्वल्गितेन प्रचलनेन, विद्योतितावमलौ कपोलौ यस्मिंस्तत्, उदारोन्नता नासा यस्मिंस्तत्, एवंभूतं यत् वदनारविन्दं तच्च, संचिन्तयेत् ॥ २९ ॥ यदिति। अलिभिः षडङ्घ्रिभिः परिसेव्यमानं मीनद्वयाश्रयम् उभयतो मीनद्वयेनाश्रितं च, श्रीनिकेतं लक्ष्म्या नित्यनिवासभूतं पद्मं स्वया निजया भूत्या विभूत्या शोभयेति यावत। अधिक्षिपदतिवर्त्तयत्, तत्र कुन्तलैरलीनामधिक्षेपः, नेत्रद्वयेन मीनयुगलस्येति द्रष्टव्यम्। अब्जे इव नेत्रे यस्मिंस्तत। कुटिलाश्च ते कुन्तला बालाश्च तेषां वृन्दानि तैर्जुष्टम्। उल्लसन्त्यौ भ्रुवौ यस्मिंस्तत्, मनोमयं योगपरिशुद्धमनोग्राह्यं यत्, तद्वदनारविन्दम् अतन्द्रितोऽबहिर्मनाः सन्, ध्यायेत् ॥ ३० ॥ तस्येति। अधिकमित्यर्थं कृपया अक्ष्णोरक्षिभ्यामित्यर्थः। करणत्वाविवक्षायां संबन्धसामान्ये षष्ठी। अतिघोरा अतिदुःसहा ये तापास्तेषां त्रयमाध्यात्मादित्रिकं तस्योपशमनमुपशान्तिस्तस्मै, निसृष्टं प्रयुक्तं स्निग्धं च तस्स्मितं च तेनानुगुणितं संवृतं विपुलो बहुलः प्रसादो भक्तेष्वनुकम्पारूपो यस्मिंस्तत्, तस्य भगवतः, अवलोकमवलोकनं यत्तत्, गुहायां हृदि, विततभावनया विस्तृया भावनया, चिरं ध्यायेत् ॥ ३१ ॥ हासमिति। अवनताः प्रणमन्तो येऽखिललोकास्तेषां तीव्रशोकेन याम्यश्रूणि तेषां सागरस्तं विशोषयतीति तथाभूतं हरेः हासं ध्यायेत्। एतदुत्तरश्लोकादत्रानुषञ्जनीयम्। तथा मुनिकृते, कृते इति चतुर्थ्यर्थेऽव्ययम्। मुनीन् संमोहयितुमित्यर्थः। प्रवृत्तस्येति शेषः। मकरध्वजस्य कामस्य, संमोहनाय, निजमाययाऽऽत्मीयसंकल्पेन, रचितं सौन्दर्यातिशयवत्तया परिगृहीतम् अस्य हरेः, अत्युदारं संमोहनादिक्रियास्वतिदक्षिणं भ्रूमण्डलं ध्यायेत् ॥ ३२ ॥

एवं मन्दहासध्यानमुक्त्वा स्पष्टहासध्यानमाह। ध्यानायनमिति। ध्यानायनमतिसुन्दरतोपेततया प्रयत्नं विनैव ध्यानविषयभूतं बहुलयात्यधिकयाऽधरोष्ठस्य भासा अरुणायिता अरुणोभूताः तनवः सूक्ष्माः द्विजा दन्ता एव कुन्दानि माध्यमुकुलानि तेषां पङ्क्तिर्यस्मिंस्तत् विष्णोः प्रहसितमुच्चैः प्रहसनं ध्यायेत्। एवं ध्यानमुक्त्वा समाधिमाह। स्वदेहकुहरे हृदयविवरे, अवसितस्य ध्यातस्य विष्णोः आर्द्रया प्रेमरसेनार्द्रतावत्या, भक्त्या, अर्पितमनास्तस्मिन्नेव समर्पितमानसः सन्, पृथक् व्यतिरिक्तं भगवद्विग्रहव्यतिरिक्तमित्यर्थः। न दिदृक्षेत् विजातीयप्रत्ययं न कुर्यादित्यर्थः ॥ ३३ ॥ एवं दिव्यविग्रहभगवच्चिन्तावसाने तच्छरीरकत्वेन प्रत्यगात्मचिन्ता कार्येत्याह। एवमिति द्वाभ्याम्। एवमुक्तप्रकारेण, भगवति, हरौ प्रतिलब्धः समधिगतः भावः प्रेमातिशयो येन सः, भक्त्या द्रवद्धृदयं यस्य सः, प्रमोदात् उद्गतानि अभ्युत्थितानि पुलकानि यस्य सः, औत्कण्ठ्येन या बाष्पकला तया औत्कठ्यप्रवृत्ताश्रुकलयेत्यर्थः। मुहुः अर्द्यमानः आनन्दसंप्लवे निमज्जमान इत्यर्थः। योगी चित्तं बडिशमिवेति चित्तबडिशं बडिशं यथा मत्स्यग्रहणोपायभूतं तथा चितमपि भगवन्मूर्त्तिग्राहकं भवतीत्यर्थः। तच्चापि भगवन्मूर्त्तिग्राहकचित्तमपि, शनकैः नियुङ्क्ते ध्येयाद्वियुक्तं कुर्यात। भगवन्मूर्त्तीक्षणे चित्तस्याप्यन्तरावरकत्वहेतुत्वात्तस्य शनैर्विसर्जनपूर्वं निवातस्थानस्थदीपशिखावदनवच्छिन्नतैलधारावदात्मानं भगवन्मूर्त्त्यैकेक्षकं कुर्यादित्यर्थः ॥ ३४ ॥ पूर्वश्लोकीयचतुर्थचरणार्थं स्फुटयन्वक्ति। मुक्ताश्रयमिति। मनश्चेतः, अर्चिः यथा निर्धूमदीपशिखेव, विरक्तं शब्दाद्यप्रवणम् अत एव, निर्विषयं विषयादिसंकल्पशून्यं सत्, यर्हि यदा मुक्ताश्रयं परित्यक्तदेहत्रयसंकल्पाद्याधारं जायते, तदा निर्वाणं बाह्यान्तर्व्यापारोपरतिं सहसा ऋच्छति प्राप्नोति एवंभूतमनाः पुरुषः प्रतिनिवृत्तगुणप्रवाहः अपगतदेहाहमाभिमानस्वतन्त्रत्वाभिमानः सन्, अत्र परमात्मनि अव्यवधानं साक्षात्तदात्मकतया संबद्धम् अत एव एकमेकाग्रतोपेतम् आत्मानं शुद्धरूपभाजं स्वम् अन्वीक्षते। परमात्मतादात्म्येनात्मस्वरूपं चिन्तयेदित्यर्थः ॥ ३५ ॥ एवं सप्रपञ्चं भक्तियोगमुपपाद्याथाऽऽदेहान्तमनुवृत्तयाऽनया भक्त्या कृत्वा प्रारब्धावसाने परमात्मानं प्राप्तस्य न पुनः संसार इत्याह। सोऽपीति। सोऽपि उक्तविधो योगी अपि, चरमया प्रत्याहाराद्यनपेक्षया, मनसः, मनः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संबन्धिनी, निर्निर्गता वृत्तिः, शब्दादिविषयसंकल्परूपा यस्यां तया, अलुक्समासः। मनसः संकल्पविकल्परूपेण वर्त्तनं यस्यां न भवति तथाभूतयेत्यर्थः। एतया भक्त्या, उपलब्धा परात्मनः काष्ठा स्वरूपं येन सः, अत एव, सुखदुःखबाह्ये तस्मिन्, महिम्नि स्वस्वरूपप्राप्तिरूपे महत्त्वे, अवसितो वर्त्तमानः सन्, स्वात्मन् स्वात्मनि, दुःखयोः सुखदुःखयोः, हेतुत्वम् अपि यत्, सुखदुःखयोर्हेतुर्यः देहात्माभिमानः स्वतन्त्राभिमानादिस्तद्भावं पूर्वमात्मन्यमन्यत यत्, तन्मननमपीत्यर्थः। कर्त्तरि गमनादिबाह्यव्यापाराश्रये, असति परिणामिनि देहे विधत्ते पश्यति। देहादेर्मिथ्यात्वात्तदभिमानादिकं पुनर्नात्मनि भजतीति भावः॥ ३६॥

एवमपरोक्षज्ञानिनो देहपोषणादावपि प्रयत्नो नास्ति सच्चिदानन्दात्मकनारायणसंदर्शनसुधासमुद्रमग्नत्वादित्याह। देहमिति। सिद्धः सिद्धदशां प्राप्तः, चरमो भगवन्मूर्तौ मनस आत्यन्तिकलयरूपां स्थितिं प्राप्तः योगी यतः स्वरूपयति प्रकाशयतीति स्वरूपः परमात्मा तम् आनन्दरूपाविर्भूतगुणाष्टकं स्वस्वरूपं वा। अध्यगमत् प्राप्तवान्। ततः तं पूर्वोक्तं देहं स्थितम् उत्थितं वा न विपश्यति। चकारादन्यदपि तत्संबन्धि किंचन न पश्यति न स्मरतीत्यर्थः। सतोऽप्यननुसंधानं दृष्टान्तेन द्रढयति। मदिरामदान्धः सुरामदपरवशः, परिकृतं परिधृतं वासो वस्त्रं दैववशात्, अपेतम् अथ दैवात् उपेतमपि, यथा न विपश्यति। दृष्टान्तविशेषणे दार्ष्टान्तिकेऽपि योजनीये दार्ष्टान्तिकविशेषणे दृष्टान्ते चापि योजनीये। एवं सति, मदिरामदान्धः यथा स्वदेहमासनादुत्थितमुत्थाय तत्रैवावस्थितं वासश्च दैववशात्स्थानादपेतं दैवात्स्वस्थानमुपेतं वा न स्मरति। एवमुक्तविधो योगी अपि, स्वं देहं वासश्चापि न स्मरति, तर्हि कुतः सुखदुःखे इति। अत्र पाठान्तरे येन देहेन स्वयं सिद्धोऽभूत्स सिद्धस्तं चरमं देहं न पश्यति। मदीयोऽयमिति नानुसंधत्ते, किं तु कपालमुक्तनालिकेरफलवद्देहात्मनोर्विविक्तत्वाद्धरिमेव पश्यतीति भावः॥ ३७॥ एवंविधस्य ज्ञानियोगिनो देहः ज्ञानोदयसमय एव पतति, उत किंचित्कालं जीवति इति संशये प्रारब्धकर्मक्षये एव पतति इत्याशयेनाह। देहोऽपीति। अस्य योगिन इति शेषः। देहः अपि, दैववशगः स्वपूर्वसंस्कारवशेन निर्वहन्सन् खल्वेव यावत् स्वारम्भकं कर्म अस्ति, तावत्, सासुः सेन्द्रियः, एव प्रतिसमीक्षते स्वारब्धकर्मेति शेषः। स्वकायप्रारब्धभोगावसाने एव पततीत्यर्थः। ननु तर्हि तत्सत्त्वे पुनस्तत्र सङ्गः स्यात्तत्राह। अधिरूढ आरूढः समाधियोगो येन सः, सम्यक्संप्राप्तनिर्विकल्पसमाधिरित्यर्थः। अत एव, प्रतिबुद्धं विज्ञातं वस्तु स्वात्मपरमात्मस्वरूपं येन सः, योगी, सप्रपञ्चं पुत्रकलत्रादिसहितं तं देहं स्वाप्नं स्वप्नदेहं यथा तथा, पुनः न भजते। स्वप्नोत्थितः सप्रपञ्चं स्वाप्नं देहं यथा तथाऽहंभावेन पुनर्नाभिमन्यते इत्यर्थः॥ ३८॥

एवं 'का च त्वय्युचिता भक्तिः कीदृशी मम गोचरा' इत्यस्योत्तरमुक्तमथ 'पुरुषं प्रकृतिर्ब्रह्मन्न विमुञ्चति' इति प्रश्नस्य प्रकृतिविलक्षणात्मस्वरूपचिन्तनपूर्वकस्ववर्णाश्रमधर्माद्यनुगृहीतभगवद्भक्तियोगात्प्रकृतिसंबन्धराहित्यरूपकैवल्यसिद्धिरिति यदुत्तरमुक्तं तदुपसंहर्तुं पूर्वोक्तमेव प्रकृतिपुरुषेश्वराणां मिथो वैलक्षण्यं सदृष्टान्तमनुवदति यथेति पञ्चभिः। तत्रादावेकेन देहात्मनोर्वैलक्षण्यम्, ततो द्वाभ्यां प्रकृतिपुरुषाभ्यां परमात्मनो वैलक्षण्यम्, तत एकेन जीवानां परस्परसाम्यं तत एकेन जीवानां देहकृतो देवादिभेदो, न स्वत इत्युच्यते इति विवेकः। यथा पुत्रादतिप्रीतिविषयादात्मजात्, वित्ताद्वहिः प्राणात्मकाद्धनाच्च, मर्त्यैः पृथग्भिन्न एव, प्रतीयते, तथा आत्मत्वेनात्यन्तप्रियत्वेन अभिमतात्स्वाभिन्नत्वेन संमतात्, देहादेरपि, पुरुषः प्रत्यगात्मा पृथगेवेत्यर्थः। अनेन देहात्मनोर्वैलक्षण्यमुक्तम्॥ ३९॥ यथेति। आत्मत्वेन, अभिमतात् अत्यन्ताविवेकेनाप्यभिन्नत्वेनाभिमतात्, क्वचित्त्वप्यात्मत्वेनाभिमतादिति पाठो दृश्यते। स्वसंभवादग्नेरेवोत्पन्नात् धूमात्, उल्मुकात् अपि, विस्फुलिङ्गात् वापि, तदग्निः स दाहकश्चासावग्निश्च तदग्निः दाहको वह्निरित्यर्थः। यथा पृथक् उच्यते॥ ४०॥ भूतेति। तथा भूतेन्द्रियान्तःकरणात् प्रधानात् भूतादिरूपेण परिणतायाः प्रकृतेरित्यर्थः। जीवसंज्ञिकात् चेत्रज्ञाच्च, आत्मान्तः प्रविश्य प्रशासनेन धारकः द्रष्टा सर्वज्ञः, भगवान् षाड्गुण्यपूर्णः ब्रह्मसंज्ञितः साक्षाद्ब्रह्मपदवाच्यः परमात्मा पृथगेव अत्र प्रधानं धूमस्थानीयम्, जीवसंज्ञितो विस्फुलिङ्गादिस्थानीयः। जीवः स्फुलिङ्गस्थानीय इत्यत्र 'यथाग्नेः क्षुद्रा विस्फुलिङ्गाः' इति श्रुतिः प्रमाणम्। न चानेन दृष्टान्तेन जीवानां ब्रह्मांशत्वं बोद्धव्यमग्नेर्जडत्वेन च्यवनधर्मत्वात्तत्र तथात्वमस्तु, ब्रह्मणस्तु अच्युतत्वाच्छ्रुतिर्यथायथं तदैश्वर्यावेशं वदति न तु तत्त्वम्। एवमनेन श्लोकद्वयेन प्रकृतिपुरुषाभ्यां परमात्मनो वैलक्षण्यमुक्तं विज्ञेयम्॥ ४१॥ सर्वभूतेष्विति। सर्वभूतेषु देवादिचतुर्विधशरीरेषु, आत्मानं तेष्वन्तः प्रविश्य धारकत्वेनावस्थितं जीवात्मानम्, अनन्यभावेन सर्वत्र ज्ञानैकाकारत्वाणुत्वाद्येकरूपेण, ईक्षेत पश्येत्। एकवचननिर्देश एको व्रीहिरित्यादिवज्जात्यभिप्रायकः। च तथा आत्मनि च सर्वभूतानि धार्यतयावस्थितानि चतुर्विधभूतानि अनन्यभावेन कर्मायत्तावान्तरवैचित्र्यं परित्यज्य प्रकृतिपरिणामरूपत्वेनैकरूपेण ईक्षेत पश्येत्। भूतेषु अपिशब्दाज्जीवेष्वपि तदात्मतां परमात्मात्मकत्वम् ईक्षेत। अनेन जीवानां परस्परसाम्यमुक्तम्॥ ४२॥ स्वयोनिष्विति। स्वयोनिषु तृणदार्वादिषु, एकमेव ज्योतिरग्निः योनीनां गुणवैषम्यात् तृणदार्वादिगतह्रस्वत्वदीर्घत्वकुटिलत्वादिगुणकृतवैषम्यात्, यथा नाना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतीयते; तथा प्रकृतौ देवादिशरीरे स्थितः आत्मा प्रत्यगात्मापि, देवादिदेहकृतभेदेन नाना प्रतीयते। वस्तुतस्तु सर्वत्र ज्ञानैकाकारतया एकरूप एवेत्यर्थः। अनेनात्मनां देहकृतो देवादिभेदो न स्वत इत्युक्तम् ॥ ४३ ॥ पुरुषं प्रकृतिरिति प्रश्नोत्तरमुपसंहरति। तस्मादिति। तस्मात्तत्त्वत्रयस्येत्थंभावाद्धेतोः, योगी दैवीं देवस्य विष्णोः, संबन्धिनीम्, सदसदात्मिकां कार्यकारणरूपेणावस्थितां दुर्विभाव्यां दुरत्ययाम्, इमाम्; स्वां स्वसंबन्धिनीम्, प्रकृतिम्, पराभाव्य उक्तविधभगवद्भक्तियोगेन तिरोभाव्य स्वरूपेण भगवद्भक्त्युद्भूतगुणाष्टकविशिष्टस्वरूपेण, अवतिष्ठेत। न पुनः संसरतीत्यर्थः ॥ ४४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धेऽष्टाविंशोऽध्यायः ॥ २८ ॥

—:*:—

अथैकोनत्रिंशोऽध्यायः

देवहूतिरुवाच

लक्षणं महदादीनां प्रकृतेः पुरुषस्य च। स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकम् ॥ १ ॥

बहुधा भक्तियोगो वा ऊनत्रिंशे निगद्यते। बलं कालस्य घोरा च संसृतिश्च विरक्तये ॥ १ ॥

एवं साङ्गं मोक्षसाधनभूतं भक्तियोगं सप्रपञ्चमुपपादितमाश्रुत्य पुनरुक्तानुवादपूर्वकं तस्यैव भक्तियोगस्य भेदान् भक्तियोगाङ्गभूतवैराग्यस्य समुत्पत्तेर्हेतुभूतां जीवस्य स्वर्गनरकगमनादिरूपां संसृतिं कालस्य स्वरूपं च पृच्छति देवहूतिः। लक्षणमिति। प्रकृतेर्मूलप्रकृतेः महदादीनां प्रकृतिकार्यभूतानां महत्तत्त्वादीनाम्, पुरुषस्य प्रत्यगात्मनश्चकारात्परमात्मनश्च, इत्यमीषाम्, पारमार्थिकमबाधितम्, स्वरूपम्, येन लक्ष्यते तल्लक्षणं त्वयेति शेषः। कथितमित्युत्तरश्लोकादनुषञ्जनीयम् ॥ १ ॥ यथेति। सांख्येषु तत्प्रकृत्यादीनां लक्षणं यन्मूलं यस्य भक्तियोगस्य मूलम्, प्रचक्षते। हे प्रभो इदानीं तस्येति शेषः। भक्तियोगस्य मार्गं मे मह्यं यथा यथावत् विस्तरतः ब्रूहि कथय ॥ २ ॥ विराग इति। हे भगवन् येन लोकसंसृतिवर्णनेन पुरुषो मुमुक्षुः सर्वतः सर्वत्र इहामुत्र चेत्यर्थः। विरागो रागवर्जितः भवेत् ताः जीवलोकस्य विविधाः संसृतीः मम आचक्ष्व कथय ॥ ३ ॥

कालस्येति। तथा ईश्वररूपस्येश्वरशरीरकस्य, परेषां ब्रह्मादीनामपि, परस्य प्रभोरित्यर्थः। ते त्वदात्मकस्य, कालस्य स्वरूपं च वद कथय। यद्धेतोर्यस्मात्कालकृताद्भयाद्धेतोः, जनाः कुशलं सुकृतं पुण्यमिति यावत। कुर्वन्ति। यद्धेतुकजन्ममरणादिसांसारिकधर्मनिवृत्तये जनाः, कुशलकर्माचरणं कुर्वन्ति तस्य स्वरूपं कथयेत्यर्थः ॥ ४ ॥ एवं प्रष्टव्यं पृष्ट्वा पुत्रं प्रसादयति। लोकस्येति। मिथ्या मिथ्याभूता अभिमतिरभिमानो यस्य तस्य, मिथ्याभूतदेहात्माभिमानवतः, स्वतन्त्रताभिमानवतश्चेत्यर्थः। अत एव अचक्षुषः स्वात्मपरमात्मयाथात्म्यज्ञानरहितस्य, अत एव कर्मसु स्वर्गनरकादिसाधनेषु कर्मसु, अनुविद्धयात्यासक्तया, धिया अविवेकवत्या मत्या, श्रान्तस्य अत एव अनाश्रयेऽपारे, तमसि संसारे, चिरं बहुकालतः, लोकस्य प्रसुप्तस्य प्रबोधायेति शेषः। योगभास्करः ज्ञानयोगादित्यः, त्वम् आविरासीराविर्भूतोऽसि किल ॥ ५ ॥ एवं स्वमात्रा पृष्टः कपिलः भक्तियोगमार्गादीन्कथयितुमाबभाषे इत्याह मैत्रेयः। इतीति। हे कुरुश्रेष्ठ विदुर इत्युक्तप्रकारं श्लक्ष्णं, सुन्दरं, मातुः वचः प्रतिनन्द्य महामुनिः कपिलः, प्रीतः, समीचीनप्रश्नश्रवणजातानन्दः करुणार्दितः स्वमातृसंजातदयापरिप्लुतः सन् तां स्वमातरं प्रति आबभाषे ॥ ६ ॥ यदाबभाषे तदेवाह। भक्तियोग इति हे भामिनि पुंसां, स्वभावगुणमार्गेण स्वभावभूतसत्त्वादिगुणवृत्तिवशेन, मार्गैः भक्तियोगः बहुविधो बहुधा भाव्यते। यतः भावः पुंसां मनोवृत्तिः, विभिद्यते। यतो भिद्यते ततस्तदधीनोऽपि भक्तियोगस्तामससात्त्विकादिभेदेन भिद्यते इत्यर्थः ॥ ७ ॥ तानेव भेदानाह। अभिसंधायेति। हिंसाम्, दम्भं मात्सर्यं च अभिसंधाय हिंसादीनां मध्येऽन्यतममेकं द्वयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रितयं वा संकल्प्येत्यर्थः। संरम्भी क्रोधयुक्तः भिन्नदृक् अब्रह्मात्मकस्वतन्त्रवस्तुदर्शी सन्नेव, मयि परमेश्वरे, भावं भक्तिं, यः पुमान्, कुर्यात, स त्रिविधोऽपि तामसः तामसभक्तियोगवान्, उक्तः। तत्रापि हिंसादम्भमात्सर्यादिभिरधममध्यमोत्तमत्वं बोध्यमेवमग्रेऽपि ज्ञेयम्॥ ८॥

विषयानिति। विषयान् शब्दादिविषयलाभं, यशो जगति स्वकीर्तिं ऐश्वर्यमिन्द्रादिलोकभोगैश्वर्यं वा अत्राप्येषामन्यतमं द्वयं यथारुचि त्रयं वा अभिसंधाय। पृथग्भावः, परमात्मनः स्वात्मशरीरत्वमज्ञात्वा देवतामात्रबुद्धित्वं पृथग्भावत्वम्। एवंविधः सन्नेव अर्चादौ प्रतिमादौ, मां, यः, अर्चयेत् स पुमान् राजसः स्मृत इति शेषः॥ ९॥ कर्मेति। कर्मनिर्हारं पापक्षयं परस्मिन् परमपुरुषे, तदर्पणं कर्मसमर्पणं, वा यष्टव्यम् इति अकरणे भगवदाज्ञोल्लङ्घने निग्रहार्हः स्यामिति हेतोरेव मया यष्टव्यमितीत्यर्थः। उद्दिश्य अभिसंधाय, अपृथग्भावः स्वात्मनो ब्रह्मशरीरत्वं जानन्सन्, यो वा मां यजेत्, स भक्तः, सात्त्विकः स्मृतः। अत्र पृथग्भाव इति छित्वा भेददर्शित्वं त्रिष्वपि समानमिति केचिद्योजयन्ति, तत्र सात्त्विकत्वमसंगतं सत्त्वस्य यथावस्थितवस्तुप्रकाशकत्वात् 'सत्त्वात्संजायते ज्ञानं' 'तत्र सत्त्वं निर्मलत्वात्प्रकाशकम्' इति भगवता गीतत्वेन पृथग्भावस्य सत्त्वकार्यत्वाभावाच्चातोऽपृथग्भाव इत्येव छेदः। अयमपि सात्त्विकः कर्मनिर्हाराद्यभिसंधिभेदादधममध्यमोत्तमभेदेन त्रिविधः। तदेवं तामसादिभक्तिषु त्रयस्त्रयो भेदाः, तासु यथोत्तरं श्रैष्ठ्यम्, एवं च श्रवणकीर्तनादयो नवापि प्रत्येकं नव नव भेदाः, तदेवं सगुणा भक्तिरेकाशीतिभेदा ज्ञेयाः। अत्र हि हिंसादम्भमात्सर्यादीनां सांकर्ये सत्यन्येऽपि भेदा भवन्ति। तद्यथा हिंसादम्भमात्सर्यादीनां सांकर्ये एको भेदः। हिंसादम्भयोः सांकर्येऽन्यो भेद एवं परस्परं सांकर्ये बहवो भेदा भवन्तीति ज्ञेयम्॥ १०॥ निर्गुणा भक्तिस्त्वेकविधैव तामाह। मद्गुणश्रुतिमात्रेणेति द्वाभ्याम्। हे मातः, सर्वगुहाशये सर्वान्तर्यामिणि पुरुषोत्तमे, मयि गुणा मदवतारचरित्राणि तेषां श्रुतिः श्रद्धयाकर्णनं तदेव तन्मात्रं तेन, गङ्गाम्भसो गङ्गाजलस्य, गतिः अम्बुधौ समुद्रे यथा तथा अविच्छिन्ना मनोवृत्तेः प्रवृत्तिः, या॥ ११॥ लक्षणमिति। सा भक्तिः, ज्ञेयेति शेषः। सा च, अहैतुकी फलानुसंधानशून्या, अव्यवहिता ऐश्वर्यादिप्राप्तिरूपान्तरायरहिता चेत्, इदं निर्गुणस्य मुक्तिसाधनस्येत्यर्थः। भक्तियोगस्य लक्षणम् उदाहृतं हि। द्वयोरप्येकाऽन्वयः॥ १२॥

अहैतुकीत्यनेनोक्तं निर्गुणभक्तियोगनिष्ठानां फलकामनाराहित्यं द्रढयन् मुक्तिभेदानाह। सालोक्येति। जनाः मदीया निर्गुणभक्तिमन्तो जनाः, मत्सेवनं विना दीयमानं मया विश्राण्यमानं सालोक्यं च सार्ष्टिः च सामीप्यं च सारूप्यं च एकत्वं च तत्समाहारम् अपि न गृह्णन्ति। उत तर्हि सांसारिकफलं तु किमुत, न गृह्णन्त्येवेत्यर्थः। तत्र सालोक्यं नाम मया सहैकस्मिन् लोके निवसनम्। सार्ष्टिर्नाम समानैश्वर्यम्। समानर्द्धिता इति यावत्। सामीप्यं निकटवर्तित्वम्। सारूप्यं समानरूपताम्। एकत्वं नाम सायुज्यम्। गुणाष्टकाविर्भावरूपः समानगुणयोग इत्यर्थः। युज्यते इति युग्, धर्मः, धर्मो हि धर्मिणा युज्यते समानः युक् यस्य सः सयुक्, सयुजो भावः सायुज्यं साधर्म्यम्। ननु 'मत्सेवया प्रतीतं च सालोक्यादि चतुष्टयम्। नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतम्' इति दुर्वाससं प्रति समभिहिते भगवद्वाक्ये एकत्वपर्यायसायुज्यानुक्तेरत्रोक्तेश्च भगवद्द्वयवाक्यविरोधः कथं समाधेयस्तत्र वच्मः। मुक्तिरेकविधा चतुर्विधा च। तत्र भगवत्साधर्म्यमाम्नानानामेकत्वपर्यायभूता साधर्म्यरूपैव तत्र सालोक्यादीनामन्तर्भावः। साधर्म्यवर्जितानां सालोक्यादिचतूरूपेति न विरोधः। कचित्तु सार्ष्टिपरिहारेणैतच्चातुर्विध्यमुक्तमस्ति 'लोकेषु विष्णोर्निवसन्ति केचित्सामीप्यमृच्छन्ति च केचिदन्ये। अन्ये तु रूपं सदृशं भजन्ते सायुज्यमेके तु स मोक्ष उक्तः' इति॥ १३॥ प्रोक्तभक्तियोगलक्षणमुपसंहरति। स एवेति। येन भक्तियोगेन, त्रिगुणं सत्त्वादींस्त्रीन् गुणान्, अतिव्रज्यातिक्रम्य, प्रकृतिसंबन्धं निर्मुच्येत्यर्थः। मद्भावाय मत्स्वभावाय मत्साम्यापत्तये इत्यर्थः। उपपद्यते योग्यो भवति। स एव भक्तियोगाख्यः, भक्तियोग इत्यर्थः। आत्यन्तिकः परमकाष्ठां गतः, इति उदाहृत उक्तः। मत्स्वभावापत्तिरूपफलाव्यवहितदशैव निर्गुणभक्तियोगस्वरूपमुदाहृतमित्यर्थः॥ १४॥ उक्तविधभक्तियोगस्य साधनान्याह पञ्चभिः। निषेवितेनेति। नित्यशः निषेवितेन प्रतिदिनं सम्यगनुष्ठितेनेत्यर्थः। अनिमित्तेन फलाभिसंधिरहितेन, महीयसा भक्त्यङ्गानां मध्ये बलवत्तरेण, स्वधर्मेण स्ववर्णाश्रमोचितधर्मेण, नातिहिंस्रेण परपीडाविवर्जितेन, शस्तेन सर्वथातिप्रशस्तेन, क्रियायोगेन पञ्चरात्राद्युक्तपूजायोगेन॥ १५॥

मद्धिष्ण्येति। मद्धिष्ण्यं मत्प्रतिमायतनादिस्तस्य दर्शनं च, स्पर्शश्च पूजा च स्तुतिश्च अभिवन्दनं च तैः। भूतेषु मद्भावनया सदात्मकत्वबुद्ध्या, सत्त्वेन धैर्येण, असङ्गमेन वैराग्येण च॥ १६॥ महतामिति। महतां स्वाधिकानां बहुमानेन दीनानां स्वापेक्षयाऽधमानाम् अनुकम्पया च, विषयाविवक्षायां षष्ठी। आत्मतुल्येषु मैत्र्या एव, तथा च वक्ष्यति। 'गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात। मैत्रीं समानादन्विच्छेन्न तापैः परिभूयते' इति। यमेन 'अहिंसासत्यास्तेयासङ्गलज्जासंचयास्तिक्यब्रह्मचर्यमौनस्थैर्यक्षमाभयेति द्वादशधा भिन्नेन योगाद्यङ्गेन, नियमेन बाह्यशौचाभ्यन्तरशौचजपतपोहोमश्रद्धातिथ्यभगवत्पूजातीर्थाटनपरार्थक्रतिसंतोषाचार्यसेवेति द्वादशधा भिन्नेन योगद्वितीयाङ्गेन च, एतद्द्वयमासनादीनामप्युपलक्षणम्॥ १७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आध्यात्मिकेति। आध्यात्मिकस्य वेदान्तशास्त्रस्यानुश्रवणं तस्मात्, मे मम, नामसंकीर्त्तनाच्च, आर्जवेन मनोवाक्कायानाम्-कौटिल्येन, आर्यसङ्गेन, सश्रद्धं स्वधर्मनिष्ठसत्सङ्गेन, तथा निरहंक्रियया देहात्माभिमानराहित्येन ॥ १८ ॥ मद्धर्मिण इति। एतैः गुणैः, मद्धर्मिणः भगवद्धर्मिणः, तप्तमुद्रासचन्द्रकोर्ध्वपुण्ड्रधारणादिभगवद्धर्मानुष्ठातुरित्यर्थः। पुरुषस्य परिसंशुद्धः निर्मलः, आशयश्चित्तं श्रुतमात्रो गुणो यस्य तं माम् अञ्जसाऽप्रयत्नेन, अभ्येति हि। मद्गुणश्रवणमात्रेण मय्यासक्तो भवतीत्यर्थः ॥ १९ ॥ अञ्जसाभ्येनीत्यत्र दृष्टान्तः। यथेति। यथा वातो वायुः रथः प्रापको यस्य सः, गन्धः, आशयात् आश्रयात्पुष्पादेः सकाशात्, घ्राणं घ्राणेन्द्रियम् आवृङ्क्ते प्रयत्नेन विनैव प्राप्नोति। एवं योग एव रथो यस्य तत्, अत एव अविकारि यत्, चेतः तत आत्मानं माम् आवृङ्क्ते आत्मसात्करोतीत्यर्थः ॥ २० ॥ इत्थं साङ्गस्य निर्गुणभक्तियोगस्य स्वरूपमभिधाय तमेव प्रस्तोष्यंस्ताम-सादिभक्तियोगान्निन्दति। अहमिति षड्भिः। भूतात्मा यः अहं सः सदा, सर्वेषु भूतेषु अवस्थितोऽन्तरात्मतयावस्थितः, अस्मि। मर्त्यः, तं माम् अवज्ञाय, अर्चाविडम्बनमनर्च्यर्चेऽर्चनविडम्बनं कुरुते। अनर्च्यार्चांसमीक्ष्येहेश्वरत्वं पुष्कलमस्तीति विबुद्ध्य, ज्ञानरहितानामर्चनं विडम्बनमित्युच्यते, न त्वर्चावतारप्रभावतिरस्कार इह क्रियते ॥ २१ ॥

एतदेव स्पष्टयति। य इति। यः सर्वेषु, भूतेषु आत्मानं सन्तम्, अन्तरात्मतयावस्थितमित्यर्थः। ईश्वरं मां, हित्वा त्यक्त्वा अज्ञात्वेत्यर्थः। मौढ्यात् ज्ञान्यज्ञान्यविवेकात् अर्चां भजते केवलानामनीश्वराणामज्ञानिनामेवार्चनं करोतीत्यर्थः। सः, भस्मन्येव जुहोति। नात्रार्चावतारापकर्षे तात्पर्यं तथात्वे मद्धिष्ण्यदर्शनस्पर्शेति 'पश्यन्ति ते मे रुचिराण्यम्ब सन्तः' इति प्राक्तग्रन्थेन विरोधात् ॥ २२ ॥ द्विषत इति। मानिनो देहात्माभिमानिनः, अतः एव परकाये, स्थितमिति शेषः। मां द्विषतः भिन्नदर्शिनः अच्चर्येषु जात्यादिभेदसमीक्षकस्य भूतेषु बद्धवैरस्य मनः शान्तिं न ऋच्छति न प्राप्नोति ॥ २३ ॥ अहमिति। हे अनघे, उच्चावचैरुत्कृष्टापकृष्टैः, द्रव्यैः उत्पन्नयानुष्ठितया, क्रियया, पूजया, अर्चायाम् अर्चितः अपि अहं भूतसमूहापमानकर्त्तुः, नैव तुष्ये तुष्टो न भवाम्येवेत्यर्थः ॥ २४ ॥ अर्चादाविति। अत एव सर्वभूतेषु अवस्थितम् ईश्वरं मां यावत् स्वहृदि, न वेद तावत् स्वकर्मकृत् स्वधर्मनिष्ठः, स्वकर्मकृदिति पाठेऽपि स एवार्थः। सन्, अर्चादौ अर्चयेत्। अर्चादावर्चनं हृत्पद्मे साक्षात्कारसाधन-मतस्तत्सिद्धितः प्रागर्चायामर्चनविच्छेदो न कर्त्तव्य इत्यर्थः ॥ २५ ॥ आत्मन इति। यः, आत्मनः स्वात्मनः, परस्य परमात्मनश्च, अपि, अन्तरा मध्ये, उदरं भेदं पृथक्त्वेन स्थितमित्यर्थः। करोति मन्यते। भिन्नदृशः स्वस्वतन्त्रतामननपूर्वं स्वमब्रह्मात्मकत्वेन मन्यमानस्येत्यर्थः। तस्य पुंसः, मृत्युः कालशरीरकोऽहम् उल्बणं भयं संसारं विदधे विस्तारयामि। नैवंविधमुद्धरामीति भावः। यद्वा आत्मनः स्वस्य, परस्यान्यचेतनस्य, अल्पमपि भेदं नानाकारलक्षणपृथग्भावं करोति। भिन्नदृशो विषमाकारज्ञानवतः, स्वतन्त्रत्वेन वर्तमानस्याब्रह्मात्मकत्वेन मन्यमानस्येत्यर्थः। शेषं पूर्ववत् ॥ २६ ॥ निर्गुणभक्तियोगस्या-नुष्ठानप्रकारमाह। अथेति। अथातः, सर्वाणि यानि भूतानि तेषु, कृतालयं कृतनिवासम् अत एव भूतात्मानं भूतशब्दो देवादि-देहविशिष्टजीवपर्यन्तस्तस्य तत्रैव स्वारस्यात्। तेषामन्तर्यामिणमित्यर्थः। माम् अभिन्नेन समेन, चक्षुषा ज्ञानेन, मैत्र्या दान-मानाभ्यां च, अर्हयेत् स्वाधिकेषु बहुमानः, समेषु मैत्री, अधमेषु दानं सर्वेषु ज्ञानैकाकारत्वब्रह्मात्मकत्वानुसंधानमविशेषेण कर्त्तव्यमित्यर्थः। मामर्हयेदित्यनेन मदात्मकत्वबुद्ध्या भूतेषु कृतं दानादिकं मत्संतोषकरमित्युक्तं भवति ॥ २७ ॥

अथ भूतेषु यथोत्तरं दानमानाद्यतिशयः कर्त्तव्य इति वक्तुं निर्गुणभक्तस्य सर्वोत्तमत्वं वक्तुं च, भूतानां तारतम्यमाह सार्द्धैः षड्भिः। जीवा इति। जीवन्तीति जीवाः सर्गप्रलयकालपर्यन्तजीवशब्दवाच्यसूक्ष्मशरीरभाजः शरीरिणः, अजीवानां श्रेष्ठाः हि पृथिव्याद्यचेतनेभ्यः श्रेष्ठा एवेत्यर्थः। अजीवानामित्यपादानस्य शेषत्वविवक्षया षष्ठी। ततस्तेभ्योऽपि प्राणभृतः प्राणवृत्तिमन्तः श्रेष्ठाः। हे शुभे ततस्तेभ्यः सकाशात्, सचित्ताः ज्ञानवन्तः, प्रवराः श्रेष्ठाः। ततश्च, तेभ्योऽपि इन्द्रियाणां वृत्तयो येषु ते इन्द्रियवृत्तयः वृक्षादयः प्रवराः, वृक्षाणां सूक्ष्मा इन्द्रियवृत्तयः सन्तीत्युक्तमस्ति, महाभारते। तथाहि 'तस्मात्पश्यन्ति पादपाः। तस्माज्जिघ्रन्ति पादपाः' इति ॥ २८ ॥ तत्रापीति। तत्रापि सामान्येन्द्रियवृत्तिमद्वृक्षादीनां मध्येऽपि, स्पर्शवेदिनः लज्जालुदद्रुघ्नादयः, प्रवरा इति शेषः। स्पर्शवेदिभ्यः प्रभूतस्पर्शनेन्द्रियवृत्तिमद्भ्यः, रसवेदिनः रसनेन्द्रियवृत्तिमन्तो मत्स्यादयः, प्रवराः श्रेष्ठाः। तेभ्यः रसवेदिमत्स्यादिभ्योऽपि गन्धविदो भ्रमरादयः, श्रेष्ठाः। ततस्तेभ्यः सकाशादपि, शब्दविदः सर्पादयः, वराः श्रेष्ठाः ॥ २९ ॥ रूपेति। तत्र तेभ्य इत्यर्थः। रूपभेदविदः काकादयः, श्रेष्ठाः। ततश्च तेभ्योऽपि, उभयतोदतः दन्ता येषां ते अश्वादयः, श्रेष्ठाः। तेषां तेभ्योऽपीत्यर्थः। बहुपदाः शरभादयः, श्रेष्ठाः। ततस्तेभ्योऽपि, चतुष्पादो गवादयः, श्रेष्ठाः। ततः द्विपान्मनुष्यः, श्रेष्ठः ॥ ३० ॥ तत इति। ततश्च तेषां मध्येऽपि, चत्वारः वर्णा ब्राह्मणादयः, श्रेष्ठाः। तेषां वर्णानां मध्येऽपि, ब्राह्मणः उत्तमः श्रेष्ठः। ब्राह्मणेष्वपि, वेदज्ञः श्रेष्ठः। ततो वेदज्ञादपि, अर्थज्ञः अभ्यधिकः हि ॥ ३१ ॥ अर्थज्ञादिति। अर्थज्ञादपि, संशयच्छेत्ता मीमांसकः, श्रेयान्। ततः स्वकर्मकृत् श्रेयान्। ततः मुक्तसङ्गः भूयान् श्रेष्ठः। यतः सः, आत्मनः धर्मम् अदोग्धा न दुह्यति। निष्काम इत्यर्थः। अनेन मुक्तसङ्गलक्षणमुक्तम् ॥ ३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मादिति । तस्मान्निष्कामादुक्तविधादपि मयि अर्पिताः अशेषाः सर्वाः क्रिया अर्थास्तत्फलानि आत्मा देहः स्वात्मा च येन सः 'ओमित्यात्मानं युञ्जीत' इतिश्रुत्युक्तरीत्या न्यस्तात्मरक्षाभर इत्यर्थः । अत एव निरन्तरः भेदरहितः ज्ञानीति यावत् । श्रेष्ठ इति शेषः 'ज्ञानी त्वात्मैव मे मतम्' इत्युक्तरीत्या ममात्मत्वेनाभिमतो ज्ञानवान् श्रेष्ठ इत्यर्थः । एतस्मात्कश्चिन्नाधिकोऽस्तीत्याह । मयीति । मयि शेषिणि रक्षकेऽन्तर्यामिणि, अर्पितात्मनो न्यस्तात्मरक्षाभरात् मयि प्रयोजककर्त्तरि क्रियाफलप्रदे संन्यस्तं कर्म येन तस्मात्, 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा' इत्युक्तरीत्या सर्वेषामात्मनामात्मभूते सर्वक्रियाप्रवर्त्तके मय्येवानुसंहितक्रियाकर्तृत्वादित्यर्थः । अत एव अकर्त्तुः स्वस्मिन्कर्तृत्वाभिमानरहितात् समदर्शनात्समदर्शिनः, चेतनाचेतनात्मकं कृत्स्नं जगद्ब्रह्मात्मकमित्येवंविधज्ञानात् पुंसः सकाशात् परमुत्कृष्टं भूतं न पश्यामि ॥ ३३ ॥ समदर्शित्वमेव स्पष्टयन्नाह । मनसेति । ईश्वरः भगवान्, कलनं कला अन्तःप्रवेशनम्, जीवानां कला जीवान्तर्यामिना तया प्रविष्टः इत्येवं मनसा बुद्ध्या एतानि चराचराणि भूतानि, बहु मानयन्सन् प्रणमेत् ॥ ३४ ॥ भक्तियोग इति । हे मानवि मनोः सुते, चकार एवमित्यर्थे । एवं साङ्ग इति शेषः । साङ्गोऽवान्तरभेदसहित इति तदर्थः । भक्तियोगः योगः तदङ्गभूतप्रकृतिविविक्तब्रह्मात्मकप्रत्यगात्मानुचिन्तनरूपो ज्ञानयोगश्च मया उदीरितः कथितः । उभयविधयोगस्य लक्षणं प्रतिपादितमित्यर्थः । ययोः भक्तियोगज्ञानयोगयोर्मध्ये, एकतरेणान्यतरेण एव, पुरुषो ब्रह्मप्रेप्सुः पुरुषं परमपुरुषम्, व्रजेत्प्राप्नुयात् ॥ ३५ ॥ अथ 'आचक्ष्व जीवलोकस्य विविधा मम संसृतीः' इति प्रश्नस्योत्तराध्यायत्रयेणोत्तरं विवक्षुः सन्नपि जीवसंसृत्युक्तेर्बाहुल्यात्तदुल्लङ्घ्य सूचीकटाहन्यायेनादौ कालस्येश्वररूपस्येति प्रश्नस्योत्तरमाह यावदध्यायपरिसमाप्ति । एतदिति । रूपेति । प्रधानं प्रकृतिः पुरुषं जीवं प्रधानं पुरुषमित्यार्षत्वाद्व्यत्ययेन पञ्चम्यर्थे द्वितीया । प्रकृतेः पुरुषाच्चेत्यर्थः । परं दैवमीश्वरसंकल्पात्मकं कर्मणो विचेष्टितं संसृतिलक्षणं यस्मात्तत्, कालाद्गुणव्यतिकर इति 'गुणव्यतिकरः कालः' इति चोक्तेः । रूपाणां पूर्वावस्थावस्थितानां वस्तूनां भेदः स्वरूपान्तरेणावस्थान्तरप्राप्तिस्तस्यास्पदमाश्रयं हेतुरिति यावत् । दिव्यमलौकिकमत्याश्चर्यजनकमित्यर्थः । एवं सर्वनियन्तृ इत्यर्थः । एतत् भगवतः ब्रह्मणः परमात्मनः रूपं कालः इतीत्थम् अभिधीयते । यतः कालात् भिन्नदृशां सर्वत्र ज्ञानैकाकारे आत्मनि देवमनुष्यादिवैचित्र्यं पश्यतां देहात्माभिमानिनामित्यर्थः । महदादीनां तत्पर्यन्तानामित्यर्थः । भूतानां भयं भवति । शरीरिणां जन्ममरणादिभयं जायते इति भावः । इति द्वयोरेकान्वयः ॥ ३६-३७ ॥

य इति । यः कालरूपी भगवान् अन्तः प्रविश्य भूतैः एव भूतानि अत्ति अभिसंहरति । यः असौ कालः अखिलाश्रयः अखिलविश्वाधारः सः विष्ण्वाख्यः भगवान् शरीरशरीरिभावनिबन्धनमिदं सामानाधिकरण्यम् अधियज्ञो यज्ञात्मकः यज्ञफलदातेति यावत् । कलयतां सर्वं वशीकुर्वतां ब्रह्मादीनामपि प्रभुः स्ववशीकर्त्ता अस्तीति शेषः ॥ ३८ ॥ न चेति । अस्य कालात्मनो भगवतः कश्चिदपि दयितः प्रियः न । द्वेष्यो द्वेष्टुं योग्यश्च न । बान्धवश्च न विद्यते इति शेषः । अप्रमत्तः असौ कालः कालात्मको भगवानित्यर्थः । प्रमत्तं जनम् अन्तकृत् संहर्त्ता सन् आविशति परिच्छिनत्ति ॥ ३९ ॥ यद्भयादिति । यद्भयात् यस्य कालात्मनो भगवतो भयात् वातो वायुः वाति प्रसरति । यद्भयात् अयं सूर्यः तपति । यद्भयात् देवः पर्जन्यः वर्षते । जलमिति शेषः । यद्भयात् भगणो नक्षत्रगणः भाति । अनेन 'भीषाऽस्माद्वातः पवते' इति श्रुत्यर्थोऽभिहितः ॥ ४० ॥ यदिति । यद्यस्मात्कालरूपाद्भगवतः सकाशात् भीताः सत्यः लताः वनस्पतयश्च ओषधिभिः सह स्वे स्वे काले वसन्तादौ पुष्पाणि फलानि च अभिगृह्णन्ति । चकारोऽवधारणार्थः ॥ ४१ ॥ स्रवन्तीति । यतः कालात्मनो भगवतः भीताः सरितो नद्यः स्रवन्ति स्यन्दन्ते । यतः भीतः उदधिः समुद्रः न उत्सर्पति वेलामतीत्य न गच्छति । यतः भीतः अग्निः इन्धने ज्वलति । यद्भयात् सगिरिभिः पर्वतैः सह वर्त्तमानापि भूः पृथ्वी न मज्जति । जले इति शेषः ॥ ४२ ॥ नभ इति । अदः नभ आकाशम्, यन्नियमाद्यतो भीतेः श्वसतां प्राणिनां पदं स्थानं ददाति । मार्गमिति पाठे मार्गमवकाशमित्यर्थः । महान् महतामपि महत्तमः कालात्मको भगवान् सप्तभिः पृथिव्यादिसप्तावरणैः आवृतं स्वदेहं स्वशरीरभूतं लोकं ब्रह्माण्डं तनुते विस्तारयति । अष्टममावरणं तु महाप्रकृतेस्तस्य त्वनन्तकोटिब्रह्माण्डाधारत्वात् सप्तेत्युक्तम् ॥ ४३ ॥ गुणेति । गुणाभिमानिनः सत्त्वादित्रिगुणप्रधानाः देवा ब्रह्मादयः अस्य विश्वस्य सर्गादिषु अनुयुगं प्रतिकल्पं यद्भयात् वर्त्तन्ते । कथंभूता देवाः । येषां देवानां वशे एतत् चराचरं चराचरात्मकं जगत् वर्त्तते । तथाभूताः चराचरात्मकं जगद्वशीकुर्वन्तोऽपि ब्रह्मादयः कालात्मनो भगवतो भयात्स्वस्वव्यापारेषु जागरूका वर्त्तन्ते इत्यर्थः ॥ ४४ ॥

स इति । स उक्तप्रकारः, काल कालात्मा भगवान् स्वयं तु अनन्तोऽविनाशी अन्येनापरिच्छिन्नो वा, अन्तकरः, अन्येषामन्तकरः स्वयं तु अनादिः अजन्मा अन्येषामिति शेषः । आदिकृत् उत्पादकः, जनेन पित्रादिना, जनं पुत्रादिकं, जनयन् अन्तकं यममपि मृत्युना मृत्य्वात्मकस्वशरीरभूतकालेन, मारयन्, अव्ययः अखण्डः भवतीत्यर्थः ॥ ४५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रिंशोऽध्यायः

श्रीकपिल उवाच

तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमम्। काल्यमानोऽपि बलिनो वायोरिव घनावलिः ॥ १ ॥

कामिनां कायकान्तादिलालनासक्तचेतसाम्। पापादधोगतिस्त्रिंशे तेषां तामस्युदीर्यते ॥ १ ॥

एवं कालस्येश्वररूपत्वेति प्रश्नस्योत्तरमुक्तमिदानीं कालमहिमसंवर्णनपूर्वकं सर्वेषां सर्वथाप्राप्यभूतपरब्रह्मणो व्यतिरिक्तेषु वस्तुषु वैतृष्ण्यरूपवैराग्यस्योपासनारम्भरूपाभ्यर्हितोपायस्य च सिद्ध्यर्थमिहामुत्र संसरतो जीवस्य गर्भजन्मबाल्यकौमारपौगण्ड-यौवनजरामरणजाग्रत्स्वप्नसुषुप्तिमूर्च्छादिषु क्लेशान् 'आचक्ष्व जीवलोकस्य विविधा मम संसृतीः,' इति पृष्टानेवाध्यायत्रयेण प्रपञ्चयति कपिलः। तत्र जीवास्त्रिविधाः तत्र केचन इष्टापूर्त्तदानाद्यकारिणः, केवलपापकर्माणो बद्धाः। अन्ये पुनरिष्टादिकारिणः पुण्यकर्माणः, अपरे त्विष्टादिपूर्वकब्रह्मोपासकाः, तत्र धूमादिगत्या चन्द्रमसः स्थानं प्राप्तानां केवलेष्टकारिणाम् अर्चिरादिगतिद्वारा भगवल्लोकं प्राप्तानां भगवदुपासकानां च तत्र तत्रार्हो भोगानुभवः। तत्र भगवन्तं प्राप्तानामपुनरावृत्तिः, चन्द्रमसः स्थानं प्राप्तानां तु पुनरावृत्तिरिति द्वात्रिंशेनाध्यायेन कथयिष्यन्ननिष्टादिकारिणां केवलपापकारिणां यावद्देहमधर्मेण देहकलत्रपुत्रादिपोषणरति-तद्धेतुकक्लेशात् मृतानां यमयातनानुभवप्रकारं, पुनर्गर्भे जन्मादिक्लेशानुभवप्रकारं चोपपादयत्यध्यायद्वयेन। तस्येति। तस्य भगवदात्मकस्य, एतस्य प्रकृतस्य बलिनः कालस्य उरुविक्रमम्, अयं जनः, काल्यमानोऽपि स्वयं तेन परिच्छिद्यमानोऽपि, न वेद नूनम्। कस्य कं क इव। वायोः विक्रमं घनावलिर्मेघपङ्क्तिरिव, तद्वत् ॥ १ ॥ विक्रममेवाह यं यमिति। पुमान् दुःखेन प्रयासेन, सुखहेतवे सुखार्थम्, यं यम् अर्थम् उपादत्ते संपादयति, तं तमर्थं भगवान् कालात्मक ईश्वरः, धुनोति विनाशयति। यत्कृते यस्यार्थस्यार्थे, शोचति। मदर्थो नष्टोऽभूदिति शोकं करोति ॥ २ ॥ शोके हेतुमाह। यदिति। यद्यस्मात्, सानुबन्धस्य कलत्रादिसहितस्य, अध्रुवस्यास्थिरस्य, देहस्य संबन्धीनि गृहक्षेत्रवसूनि दुर्मतिरयं जनः, मोहाच्च केवलमोहत एव, ध्रुवाणि मन्यते। अतस्तद्विहतौ शोचतीत्यर्थः ॥ ३ ॥

दुर्मतित्वं दर्शयन् यौवनजरयोः शोकं प्रपञ्चयति जन्तुरित्यादिचतुर्दशभिः। एतस्मिन् भवे संसारे जन्तुरयं जीवः, यां योनिं, देवमनुष्यादिकां योनिम् अनुव्रजेत्प्राप्नुयात्, तस्यां तस्यां योनौ सः जीवः, निर्वृतिं सुखं न लभते वै एव, तथापि न विरज्यते वैराग्यभाग् न भवतीत्यर्थः ॥ ४ ॥ नरकस्थोऽपीति। नरकस्थः अपि, पुमान् देवमायाविमोहितः भगवन्मायया विमोहं प्राप्तः सन् नारक्यां नरकाहारादिभिर्जातायां, निर्वृतौ सत्यां, देहं वै नारकदेहमपि, त्यक्तुं न इच्छति ॥ ५ ॥ आत्मेति। आत्मा देहश्च जाया स्त्री च सुतः पुत्रश्च अगारं गृहं च पशवो गवादयश्च द्रविणं धनं च बन्धवः कुटुम्बिनश्च तेषु निरूढमूलं प्रसृतमनोरथं हृदयं यस्य सः, एवंभूतः सन् आत्मानं स्वं बहु यथा तथा, मन्यते। मादृशः कश्चित्सुखी नास्तीति श्लाघते इत्यर्थः ॥ ६ ॥ संदह्येति। एषामात्मादीनाम्, उद्वहनाधिना पोषणचिंतया, संदह्यमानानि परितप्यमानानि सर्वाण्यङ्गानि यस्य सः अत एव मूढः दुराशयः दुष्टचित्तः सन् अविरतं निरन्तरं दुरितानि पापान्येव करोति ॥ ७ ॥ दुराशयत्वमाह। आक्षिप्तेति असतीनां पुंश्चलीनामपि, स्त्रीणां स्त्रीभिरित्यर्थः। रहोरचितया मायया, रहसि संभोगादिरूपरचितया माययेत्यर्थः। कलभाषिणां मधुरभाषिणां शिशूनाम् आलापैश्च, आक्षिप्तान्यासक्तानि आत्मेन्द्रियाणि समनस्कानीन्द्रियाणि यस्य सः ॥ ८ ॥ गृहेष्विति। गृही गृहाश्रमी, कूटा विचाल्या धर्मा येषु तेषु, दुःखं तन्त्रं प्रधानं येषु तेषु गृहेषु अतन्द्रितः दुःखप्रतीकारं दुःखनिवृत्तिकरमिव किंचित्कर्म, कुर्वन् तत् सुखवत् सुखमिव मन्यते इति द्वयोरेकसम्बन्धः ॥ ९ ॥ अर्थैरिति। इतस्ततो यतस्ततश्च, गुर्व्या बहुलया, हिंसया हिंसादिनेत्यर्थः। आपादितैरुत्पादितैः, अर्थैर्वित्तादिभिः, तान्पुत्रकलत्रादीन्, पुष्णाति। येषां पुत्रादीनां पोषेण शेषभुक् तत्पोषणोपयुक्तावशिष्टमनुभवन्, सुखलेशोऽपि तस्य दुर्लभतर इति भावः। स्वयं पुमान्, अधः याति निरये पततीत्यर्थः ॥ १० ॥ वार्त्तायामिति। वार्त्तायां जीविकायां, पुनः पुनः आरब्धायां, समारब्धायां सत्यामपि, लुप्यमानायां दैवेन निहतायां सत्यां, लोभेनाभिभूतो व्याप्तः, निःसत्त्वोऽशक्तः सन् परार्थे परस्वे, स्पृहां कुरुते ॥ ११ ॥ कुटुम्बेति। कुटुम्बस्य भरणं तत्राकल्पोऽसमर्थः, मन्दभाग्यः भाग्यहीनः, अत एव वृथोद्यमः व्यर्थप्रयत्नः क्रियाविहीनः सत्क्रियावर्जितः, कृपणो दीनः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूढधीः मूढबुद्धिर्जनः ध्यायन् वृथा चिन्तयन्सन श्वसिति निःश्वासान्मुञ्चति ॥ १२ ॥ एवमिति । एवममुना प्रकारेण, स्वानां भरणं पोषणं तत्राकल्पो विकलस्तम्, तत्कलत्रादयः पूर्वं यथा कुटुम्बपोषणदशायां यद्वत् आद्रियन्ते स्म । तथा तद्वत् कीनाशाः कृषीवलाः गोजरं वृद्धबलीवर्दमिव न आद्रियन्ते । आदरं नैव कुर्वन्तीत्यर्थः ॥ १३ ॥ तत्रेति । तत्रापि तत्कृतात्यनादरे सत्यपि अजातनिर्वेदोऽनुत्पन्नपरितापः स्वयमात्मना पूर्वं भृतैः पुष्टैः भ्रियमाणः पुष्यमाणः जरया उपात्तमुत्पादितं वैरूप्यं पलितवलितादि यस्य सः मरणाभिमुखः सन्मुखमरणः सन् गृहे आस्ते इत्युत्तरश्लोकादपकृष्यते ॥ १४ ॥ आस्ते इति । अवमत्याऽवमानेन उपन्यस्तं परिभवपूर्वकमग्रे पातितमन्नादिकं गृहपालः श्वा इव आहरन्नदन् आमयावी रोगी अप्रदीप्ताग्निरप्रदीप्तजाठरानलः अत एव अल्पाहारः अत एव अल्पं चेष्टितं व्यापारो यस्य सः ॥१५॥ वायुनेति । कफेन श्लेष्मणा संरुद्धा नाड्यो यस्य सः, उन्क्रमता ऊर्ध्वं गच्छता वायुना कफनिरुद्धनाडीरूपमार्गगवायुना, उन्नेत्राभ्यां बहिर्गते तारे कनीनिके यस्य सः कासश्च श्वासश्च ताभ्यां कृत आयासो यस्य सः एवंभूतः सन् कण्ठे घुरघुरायते घुरघुरशब्दं करोति द्वयोरेकसंबन्धः ॥ १६ ॥ शयान इति । शयानः परिशोचद्भिः परितः शोकं कुर्वाणैः स्वबन्धुभिः स्वजनैः परिवीतः परिवेष्टितः सन् वाच्यमानोऽपि संबोध्य तात तातेति समाहूतोऽपि न ब्रूते । किंचिदपि न वक्ति । कुतः कालपाशवशं मृत्युपाशवशंवदत्वं गतः प्राप्तः ॥ १७ ॥ एवं यौवनजरावस्थयोः क्लेशा उक्ताः । अथ मरणक्लेशानाह द्वाभ्याम् । एवमिति । एवमुक्तप्रकारेण कुटुम्बभरणे व्यापृता व्यापारिताः, आत्मानो देहेन्द्रियाणि येन सः अत एव अजितेन्द्रियः उरुवेदनया बहुलया मरणवेदनया अस्ता नष्टा धीर्मतिर्यस्य स तथाभूतः सन् स्वानां बन्धूनां रुदतां सतां म्रियते ॥ १८ ॥ यमदूताविति । तदा मरणसमये प्राप्तौ सरभसं सक्रोधमीक्षणं दर्शनं ययोस्तौ, भीमौ भयंकरौ यमदूतौ यमराजकिंकरौ, दृष्ट्वा स म्रियमाणः शरीरी, त्रस्तं त्रासोपेतं हृदयं मानसं यस्यः सः एवंविधः सं॰ शकृन्मलं मूत्रं च विमुञ्चति ॥ १९ ॥

मृतस्य पुण्यपापाभ्यां मध्ये पापगतिमाह यावदध्यायसमाप्ति । यातनेति । यमदूतौ, यातनादेहे नरकदुःखभोगाय क्लृप्ते देहे आवृत्य प्रावेश्य बलात् गले कण्ठे पाशैः बध्वा दीर्घम् अध्वानं प्रति राजभटाः राजभृत्याः दण्ड्यं दण्डनार्हं यथा तद्वत् नयतः । अतिदूरपन्थानं गमयत इत्यर्थः ॥ २० ॥ तयोरिति । तयोर्यमदूतयोः यमदूताभ्यां कृतैरित्यर्थः । तर्जनैः निर्भिन्नं हृदयं यस्य सः अत एव जातः वेपथुर्यस्य सः संजाताङ्गकम्पः पथि मार्गे श्वभिः श्वानैः भक्ष्यमाणः अतः आर्त्तः सन् स्वं स्वकृतम् अघं पापम् अनुस्मरन्सन चलतीति द्वितीयेनान्वयः ॥ २१ ॥ क्षुदिति । क्षुत्क्षुधा च तृट् तृषा च ताभ्यां परीतो व्याप्तः आश्रयो विश्रामस्थानं च उदकं जलं च निर्गते आश्रयोदके यस्मिंस्तस्मिन् विश्रामस्थानपानीयरहिते इत्यर्थः । अर्कः सूर्यश्च दवानलो दावाग्निश्च अनिलो वायुश्च तैः सूर्यरश्म्यग्न्यर्चिभ्यां संतप्तेनानिलेनेत्यर्थः । तप्ताः वालुका यस्मिंस्तस्मिन् पथि मार्गे संतप्यमानः पृष्ठे कशया चर्ममय्या रज्ज्वा च ताडितः अत एव अशक्तः गन्तुमसमर्थः सन्नपि कृच्छ्रेणातिप्रयासेन चलति ॥ २२ ॥ तत्रेति । तत्र तत्र तथा तथाविधे पथि, श्रान्तः अत एव पतन् मूर्च्छितः । एवं निपत्य मूर्च्छामनुभूय च पुनः उत्थितश्च जन्तुः पापीयसा अतिपापेन हेतुना तमसा तमःप्रचुरेण तामसकर्मप्राप्येण वा । पथा मार्गेण यमसादनं यमसंनिधि नीतः प्रापितः भवति ॥ २३ ॥ तत्रैव विशेषमाह । योजनानामिति । अध्वनः संबधिनां योजनानां नवतिं नव च सहस्राणि त्रिभिः मुहूर्तैः पापाधिक्ये द्वाभ्यां मुहूर्त्ताभ्यां वा नीतो गमितः सन् यातनाः प्राप्नोति ॥ २४ ॥ यातनाः संक्षेपतो दर्शयति चतुर्भिः । आदीपनमिति । उल्मुकादिभिः प्रज्वलत्काष्ठप्रभृतिभिः वेष्टयित्वा यथा न पलायेत्तथा संवेष्ट्य स्वगात्राणां स्वाङ्गानाम् आदीपनं प्रज्वालनं तथा स्वकृत्तं स्वेन छिन्नं परतो वापि अन्येन कृत्तं वापि यत आत्मनः मांसं तस्य अदनं भक्षणं तच्च क्वापि प्राप्नोति ॥ २५ ॥ जीवत इति । सदनमेव सादनं यमस्य सादनं तस्मिन् यमभवने यमपुरभोग्यनरकेष्वित्यर्थः । श्वगृध्रैः जीवतः सत एव स्वान्त्राभ्युद्धारो निजान्त्राणां बहिर्निष्कासनं तमिति शेषः । सर्पाश्च वृश्चिकाश्च दंशाश्च ते आद्या येषां तैः दशद्भिः सद्भिः आत्मवैशसमात्मपीडां च प्राप्नोति ॥ २६ ॥

कृन्तनमिति । अवयवश एकैकावयवानामित्यर्थः । कृन्तनं छेदनं च गजादिभ्यः भिदापनं भेदप्रापणं गिरिशृङ्गेभ्यः पातनम् अम्बुगर्तयोरम्बुनि गर्ते चेत्यर्थः । रोधनं च इत्येवंरूपा यातनाः प्राप्नोतीत्यर्थः ॥ २७ ॥ या इति । याश्च तामिस्रान्धतामिस्राः, रौरवाद्याश्च पञ्चमस्कन्धे विस्तरेण वक्ष्यमाणाः यातनाः, ताश्च नरः वा नारी, भुङ्क्ते । वाऽवधारणे, तास्ताभ्यां केन कर्मणा निर्मितास्तत्राह । मिथः सङ्गेन निर्मिताः अशास्त्रीयकर्मणा विहितान्योन्यसङ्गेनेत्यर्थः ॥ २८ ॥ न चैतदसंभावितमिति मन्तव्यमत्रापि दृश्यमानत्वादित्याह । अत्रैवेति । हे मातः स्वर्गः नरकश्च इत्येतद्द्वयम् अत्र लोके एव वर्त्तते । इतीत्थं प्रचक्षते । या वै या एव, नारक्यः यातनाः, ताः इहात्र लोकेऽपि, उपलक्षिताः दृष्टाः ॥ २९ ॥ एवमिति । एवममुना प्रकारेण कुटुम्बं बिभर्ति पोषयतीति कुटुम्बभरणः कुटुम्बपोषणमात्रपरः, उदरंभरः स्वदेहपोषणमात्रपरो वा जन्तुः, उभयं कुटुम्बं स्वदेहं च, इह लोके विसृज्य प्रेत्य परलोकं प्राप्य ईदृशमुक्तविधं तत्फलं केवलकुटुम्बपोषणादिफलं भुङ्क्ते ॥ ३० ॥ पापार्जितं धनं बहवः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भुञ्जन्ते नरकानेकः कत्तैव यातीत्याह । एक इति । भूतद्रोहेण यत् भृतं पुष्टं तत् स्वमात्मीयम् इदं कलेवरं हित्वा इहैव परित्यज्य, कुशलात्पुण्यादितरत् पापं तदेव पाथेयं शंबलवद्भोग्यं यस्य स एवंभूतः सन् अध्वानं निरयमार्गम् एकः एव प्रपद्यते ॥ ३१ ॥ ननु पापमप्यत्र विहाय गच्छतु तत्राह । दैवेनेति । तस्य कुटुम्बपोषस्य दैवेन कर्मफलप्रदात्रेश्वरेण आसादितं प्रापितं शमलं पापं हृतवित्तः इव आतुरः सन्, पुमान् निरये नरके भुङ्क्ते ॥ ३२ ॥ ननु कुटुम्बपोषणं विहितमेव तत्राह । केवलेनेति । केवलेनेषदपि धर्मलेशरहितेन अधर्मेण कुटुम्बभरणोत्सुकः स्वकुटुम्बभरणासक्तः जीवः तमसो नरकस्य चरममन्तिमं पदं स्थानम् अन्धतामिस्रमन्धतामिस्राख्यं नरकं याति हि ॥ ३३ ॥ पुनर्मनुष्यशरीरप्राप्तिमाह । अधस्तादिति । नरलोकस्य मनुष्यदेहप्राप्तेः अधस्तादर्वाक् यावतीर्यावत्यः यातनादयः आदिशब्देन श्वशूकरादयो या योनयश्च ताः सर्वाः क्रमशः क्रमेण समनुक्रम्य संप्राप्य शुचिः भोगेन कर्मक्षयाच्छुद्धः सन् अत्र पुनः आव्रजेत् । नरत्वं प्राप्नोतीत्यर्थः ॥ ३४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे कर्मयातनाकथनं नाम त्रिंशोऽध्यायः ॥ ३० ॥

——:※:——

अथैकत्रिंशोऽध्यायः

श्रीभगवानुवाच

कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये । स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः ॥ १ ॥

पुण्यपापैर्विमिश्रैस्तु नृजन्मेहाप्यते जनैः । गतिः सा राजसीत्यत्र वर्ण्यते हि समासतः ॥ १ ॥

एवं यौवनजरामरणानन्तरक्लेशा उक्ताः । अथ गर्भजन्मादिक्लेशानाह भगवान्कपिलः । तत्र पुनरत्राव्रजेदित्युक्तं तदेव विशेषतो दर्शयति । कर्मणेति । दैवमीश्वरः स एव नेत्रं नेतृ प्रवर्त्तकं यस्य तेन पूर्वकृतेनेति शेषः । कर्मणा जन्तुर्जीवः देहोपपत्तये मनुष्यदेहप्राप्तये पुंसः कस्यचित्पुरुषस्य रेतःकणाश्रयः रेतःकणमाश्रितः सन् स्त्रियाः उदरं प्रविष्टः भवति ॥ १ ॥ कललमिति । जीवेनाश्रितं रेतः स्त्रियाः उदरं प्रविष्टं सदिति शेषः । एकरात्रेण तु कललं शुक्रशोणितमिश्रतोपेतं भवति । पञ्चरात्रेण बुद्बुदं वर्त्तुलाकारं भवति दशाहेन तु कर्कन्धुः बदरीफलाकारं किंचित्कठिनं भवति । ततः परं पेशीमांसपिण्डाकारं पक्ष्याद्यण्डजेषु, अण्डं वा योन्यन्तरे भवतीति शेषः ॥ २ ॥ मासेनेति । तु इति तत इत्यर्थे । ततः मासेन शिरः द्वाभ्यां मासाभ्यां बाह्वङ्घ्र्याद्यङ्गानां विग्रहो विभागः भवति । ततः त्रिभिर्मासैः नखलोमास्थिचर्माणि नखाः लोमानि अस्थीनि चर्माणि च भवन्ति । लिङ्गं च छिद्राणि च तेषामुद्भवः भवति । इदं स्त्रीचिह्नस्याप्युपलक्षणम् ॥ ३ ॥ चतुर्भिरिति । तत इति शेषः । ततः चतुर्भिः मासैः सप्त धातवः ततः पञ्चभिः क्षुत्तृडुद्भवः क्षुत्तृषोरुत्पत्तिर्भवति । ततः षड्भिः मासैः जरायुणा गर्भवेष्टनेन वीतः प्रावृतः सन् दक्षिणे कुक्षौ भ्राम्यति । सर्वत्र पञ्चरात्रदशरात्रमासादिसंख्योदरप्रवेशकालमारभ्यैव न त्वन्यथेति बोध्यम् ॥ ४ ॥ मातुरिति । मातुर्मात्रेत्यर्थः । जग्धान्नपानाद्यैः मात्रशितपीतान्नजलादिभिरित्यर्थः । एधा वर्द्धमानाः सप्त धातवो यस्य सः, सः जन्तुर्जीवः जन्तूनां संभवो यस्मिंस्तस्मिन् , असंमते असतामपि संमत्यनर्हे विण्मूत्रयोः गर्ते शेते । अत्र पूर्वार्द्धोक्तार्थे मार्कण्डेयपुराणोक्तिर्यथा नाडी चाप्यायनी नाम नाभ्यां तस्य निबध्यते । स्त्रीणां तथान्त्रसुषिरे सा निबद्धोपजायते क्रमन्ते भुक्तपीतानि स्त्रीणां गर्भोदरे तथा । तैराप्यायितदेहोऽसौ जन्तुर्वृद्धिमुपैति वै' इति ॥ ५ ॥

कृमिभिरिति । तत्रत्यैस्तत्रभवैः क्षुधितैः पुनः पुनः क्षुधाविष्टैः कृमिभिः क्षतानि सर्वाण्यङ्गानि यस्य सः जन्तुः सौकुमार्यात् उरुरधिकः क्लेशो यस्य तथाभूतः सन् प्रतिक्षणं मुहुः मूर्च्छाम् आप्नोति ॥ ६ ॥ कट्विति । उल्बणैर्दुःसहैः मातृभुक्तैर्गर्भगजन्तुमात्रा भक्षितैः कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिः उपस्पृष्टः अत एव सर्वेष्वङ्गेषूत्थिता वेदना यस्य सः आस्ते इत्युत्तरेणान्वयः । तत्रोक्तं कटु कारवेल्लशाकादि तीक्ष्णं मरीचादि उष्णमुष्णतोपेतम्, लवणं प्रसिद्धं रूक्षं श्यामाककोद्रवादि अम्लं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुक्तपर्युषितादि आदिशब्देनेष्टिकाशकलादि बोध्यम् ॥ ७ ॥ उल्बेनेति । तस्मिन्मातुरुदरे उल्बेन जरायुणा संवृतः अन्तरिति शेषः । बहिः अन्त्रैः आवृतः भुग्नं कुटिलीभूतं पृष्ठं शिरोधरा ग्रीवा च यस्य स एवंभूतः सन् शिरः कुक्षौ कृत्वा निधाय आ ते शेते इत्यर्थः ॥ ८ ॥ अकल्प इति । स्वाङ्गानां चेष्टा तस्यां परिवर्त्तनादौ व्यापारे इत्यर्थः । पञ्जरे निबद्ध इति शेषः । शकुन्तः इव अकल्पः असमर्थः सन् आस्ते । तत्र गर्भे दैवात्पूर्वकर्मवशात लब्धा स्मृतिर्येन सः जन्मशतोद्भवं बहुजन्मसंचितं कर्म स्मरन् दीर्घं दूरतरम् अनुच्छ्वासं यथा भवति तथा स्थितः सन्निति शेषः । नाम किंचिदपि शर्म सुखं विन्दते लभते किम् । न किंचिदित्यर्थः ॥ ९ ॥ आरभ्येति । सप्तमात् मासात् आरभ्य लब्धः बोधः सुखदुःखादिज्ञानं येन सः सूतिवातैः सूतिहेतुभिर्वायुभिः, अतिवेपितः अतिकम्पितः सोदरः समानोदरजन्मा विष्ठाभूः क्रमिरिव एकत्र न आस्ते ॥ १० ॥ नाथमान इति । नाथमानो याचमानः उपतप्यमान इति वा, ऋषिर्जीवः सप्तवध्रयो बन्धनभूता धातवो यस्य सः भीतः उक्तविधगर्भवासादिभयाद्भीतः येन उदरे अर्पितः तं भगवन्तं कृताञ्जलिः सन् विक्लवया वाचा स्तुवीत स्तौति ॥ ११ ॥

स्तुतिमाह तस्येति दशभिः । उपसन्नं स्वेनैव सृष्टं जगत्, अवितुं संरक्षितुम् इच्छया निजेच्छयैव आत्ता गृहीता नाना तनवो मूर्त्तयो येन तस्य असतोऽसाधोः मे मम अनुरूपा योग्या ईदृश्येवंविधगर्भवासदुःखानुभावनरूपा गतिः स्थितिः येन भगवता अदर्शि दर्शिता तस्य भगवतः भुवि पृथिव्यां चलन् अकुतोभयं कुतश्चनापि भयवर्जितं चरणारविन्दं सः स्वकर्मणा गर्भवाससंस्थितः अहं शरणं व्रजामि, हि । भुवि चलदिति तात्कालिकभगवदवताराभिप्रायेणोक्तम् । तेन च स्वसद्धर्मनिष्ठाचार्यानुग्रहाभावात्स्वधर्मस्थितिपूर्वं हरिभक्त्याचरणरूपपुरुषकारसंपादनाभावात्प्राकत्स्यमाकूनराकृतिभगवदवबोधपूर्वं तच्छरणग्रहणाभावाच्च जीवानां गर्भवासदुःखं जायते इत्यनेन सूचितम् ॥ १२ ॥ त्वं यं शरणं व्रजसि कोऽसौ को वा तस्य तव च विशेषः येन तस्य शरण्यत्वं तव च शरणगन्तृत्वमित्याकाङ्क्षायामाह । य इति । अत्र मातुर्देहे भूतेन्द्रियाशयमयीं भूतादिमयदेहरूपेण परिणतां मायाम् अवलम्ब्य धृत्वा कर्मभिः आवृतात्मा कर्मरूपानाद्यविद्यातिरोहितस्वस्वरूपः अत एव बद्धः जीवः, भवति । स इव जीवो यथा तथैवेत्यर्थः । यस्तु स्वयमन्तर्याम्यपीत्यर्थः । आस्ते । उभयोरविनाभावादिति भावः । अनादिबद्धजीवेन सह प्रकृतौ वसतीत्यर्थः । एवं जीवेन सह वसन्तमपि । विशुद्धं प्रकृतिगतदोषैरस्पृष्टम् । अनेनापहतपाप्मत्वमुक्तम् । अविकारं जरामृत्युशोकाशनायापिपासादिविकाररहितम् । अनेन हेयगुणराहित्यमुक्तम् । अखण्डबोधं नित्यासंकुचितज्ञानगुणं ज्ञानस्वरूपं च, अनेन कल्याणगुणवृन्दवत्त्वमुक्तम् । आतप्यमानहृदये अवसितं परितापवत्यपि मद्धृदये प्रतीततामापन्नं तं भवन्तमित्यर्थः । नमामि । कर्मवश्यो जीव इव तेन सह स्वयमप्यशुचिदेहे वसन्नपि तद्गतदोषैरसंस्पृष्टो यस्तं नमामीत्यर्थः ॥ १३ ॥ एतदेव वैलक्षण्यं स्पष्टयन्नमस्करोति । य इति । पञ्चभूतरचिते पञ्चभिराकाशादिभूतैरारब्धे शरीरे यथा अहम्, छन्न आवृतः तथा छन्नोऽपीति शेषः । यो भगवान् रहितः शरीरसंबन्धायत्तदोषैरसंस्पृष्टः तत्र हेतुः । इन्द्रियाणि ज्ञानकर्मात्मकोभयेन्द्रियाणि च गुणार्था गुणपरिणामरूपाः शब्दादयः ते च । यद्वा । गुणाः सत्त्वादयश्च अर्थाः शब्दादयश्च चिज्जीवश्च एते आत्मानः शरीररूपा यस्य सः चिदचिन्नियन्तृत्वेनावस्थितो न तु अहमिव कर्मसंकुचितस्वभावः प्रकृतिपारवश्येन नियम्यतया वावस्थित इत्यर्थः । तेन शरीरेण छन्नत्वेऽपीति शेषः । अविकुण्ठो महिमा यस्य तं नित्यासंकुचितज्ञानमित्यर्थः । एनमासमंतत इनः स्वामी तं सर्वेश्वरमित्यर्थः । ऋषिं सर्वज्ञं प्रकृतिपूरुषयोः परं प्रकृतिपुरुषाभ्यां विलक्षणमित्यर्थः । तन्नियन्तारमिति भावः । पुमांसं परमपुरुषं तं भवन्तं वन्दे । संसृतिनिवृत्तिकामः शरणं व्रजामीत्यर्थः ॥ १४ ॥

कथं नु मम शरणस्य वरणेन संसृतिनिवृत्तिर्भविष्यते इत्यपेक्षायां य एव बन्धकः स एव मोचक इति न्यायेन त्वत्संकल्पाधीनावेव बन्धमोक्षावित्याह । यन्माययेति । अयं जीवः, यन्मायया यस्य भगवतः संकल्परूपज्ञानेनेत्यर्थः । इच्छयेति भावः । उरूणि बहूनि यानि गुणकर्माणि सत्त्वादिगुणनिमित्तकानि कर्माणि तानि निबन्धनानि बन्धनसाधनानि यस्मिंस्तस्मिन् अस्मिन् सांसारिके संसारसंबन्धिनि, पथि प्रवृत्तिमार्गे, चरन् तदभिश्रमेण तत्र संचारसंभूतक्लेशेन नष्टस्मृतिर्विनष्टजीवपरयाथात्म्यज्ञानः सन् पुनः महदनुग्रहमन्तरेण महतो भगवतोऽनुग्रहं विना कया युक्त्या केनोपायेन लोकं भगवत्कृपोद्भूतगुणाष्टकं स्वस्वरूपं प्रवृणीत प्राप्नुयात् । यद्वा । लोकं स्वपरयाथात्म्यज्ञानस्वरूपं मुक्त्युपायं प्राप्नुयादित्यर्थः ॥ १५ ॥ भगवानेवैको ज्ञानप्रदानद्वारा संसृतेर्मोचको न ब्रह्मादिष्वन्यतमो यतः स्वयं गिलितोऽन्यान्निगिलितान्नैव मोचयेत् इति वदन्नाह । ज्ञानमिति । यत् एतत् त्रैकालिकं त्रिष्वपि उत्पत्त्यादिषु जाग्रदादिषु वा कालेष्वसंकुचितं ज्ञानं जीवपरयाथात्म्यवेदनं महान्तमस्मास्वनुग्रहं कृत्वेति शेषः । कतमः अदधाद्व्यधात् । एकः इति शेषः । स प्रसिद्धगुणगणः देवो भगवान् एव व्यधात् । नन्वन्यः प्रकृष्टः कश्चिज्जीवो विदधातु नेत्याह । जीवानां यानि कर्माणि संसृतिकराणि तेषां पदवी परंपरा ताम् अनुवर्त्तमानाः वयं भवामः कर्मरूपाद्यविद्यातिरोहितज्ञाना वयमतस्तद्व्यतिरेकेण न केऽपि ज्ञानोत्पादनसमर्था इत्यर्थः । अन्यस्यात्रासंभवमुक्त्वा तस्य संभवमाह । स्थिरचरेषु स्थावरजङ्गमात्मकेषु शरीरेष्वित्यर्थः । अनुवर्तितोऽन्तरात्मतयान्वावेशितः अंशोंऽशभूतो जीवो येन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स एवंभूतो यो भगवान् तं तापत्रयोपशमनाय त्रिविधतापनिवृत्तये वयमिति शेषः। भजेम। अनेन जीवान्तरात्मतयावस्थितस्य सर्वज्ञस्य भगवतो ज्ञानप्रदानद्वारा मोचकत्वात्तस्यैव भजनीयत्वं न त्वन्येषामित्युक्तम्॥ १६॥ अथ विज्ञापयन्नाह। देहीति। हे भगवन् अन्यदेहविवरे मातुरुदरकुहरे असृग्रुधिरं च विट् विष्ठा च मूत्रं च तस्य कूपस्तस्मिन् पतितः तत्र जठराग्निना भृशं तप्तो देहो यस्य सः अत एव कृपणधीः इतोऽस्माद्विवरात् गर्भवासादित्यर्थः। विवीसितुं निर्गन्तुम् इच्छन् स्वमासान्सप्ताद्यादीन् गणयन् दशमे मासि जायते इति वचनात्तत्संख्यां कुर्वन् देही असौ जीवः कदा नु कदा वा निर्वास्यते बहिर्निष्कास्यते। निर्गमिष्यतीत्यर्थः॥ १७॥

एवं स्वदैन्यमावेद्य ज्ञानप्रदानरूपं भगवत्कृतं महोपकारं स्मरन्नस्य प्रत्युपकृतिमाह। येनेति। हे ईश भवादृशेन त्वत्समेन निरुपमेनेत्यर्थः। पुरुदयेन निरतिशयदयोपेतेन येन त्वया दशमास्यः दशमासपरिमितः असौ जीवः ईदृशीं गतिं विवेकमित्यर्थः। संग्राहितः सम्यक् प्रापितः अत एव दीननाथः स भगवान् स्वेनैव कृतेन स्वकृतेनैवोपकारेण तुष्यतु। अञ्जलिमञ्जलिविधानं विना अस्य त्वत्कृतोपकारस्य प्रति प्रतिनिधिरूपं तत् प्रत्युपकरणं को नाम को नु पुमान् कुर्यात्॥ १८॥ एवं भगवत एव विवेकादिसंपत्तिस्तस्य महोपकर्तृत्वं चोक्तं तत्राद्यां तस्य तां विवेकिजननिदर्शनेन स्वस्मिन्नपि प्रार्थयते। पश्यतीति। स्वदेहे वर्त्तमानोऽपीति शेषः। अपरः शरीराद्भिन्नः सप्तवध्रिः सप्तत्वग्वेष्टितदेहधारी अयं दमशरीरी शमदमादियुक्तो जीवः योगीति यावत्। यत्सृष्टया येनेश्वरेण दत्तया धिषणया उपासनात्मिकया बुद्ध्या शारीरः परमपुरुषस्तत्संबन्धि शारीरकं तस्मिन् परपुरुषातिप्रिये ब्रह्मपुर इत्यर्थः। स्थितं यं भगवन्तमिति शेषः। पश्यति साक्षात्करोति ननु। तं चैत्यं योगपरिशुद्धचित्तग्राह्यं पुराणं पुरुषं स दमशरीरी इव अहमपि यत्सृष्टया धिषणया बहिः हृदि च प्रतीतं पश्ये पश्यामि साक्षात्करोमीति यावत्। तथा विधेहीति प्रार्थयामीति शेषः॥ १९॥ किमिति विशेषेण मदुपासनातो मत्साक्षात्कारं प्रार्थयसे यथापूर्वं गर्भान्निर्गत्य प्रवृत्तिधर्मं नेच्छसीति चेद्गर्भान्निर्गतस्य ममानर्थः स्यादिति वदन्नुपसंहरति। स इति द्वाभ्याम्। हे विभो बहूनां दुःखानां वासो वसतिर्यस्मिन् कर्मणि यथा तथा, वसन्नपि, बहुदुःखास्पदं गर्भे प्रति निवसन्नपीत्यर्थः। स गर्भदुःखभाक् अहं गर्भात् बहिः न निर्जिगमिषे निर्गन्तुं नेच्छामि कुतः यत्र यतो गर्भाद्बहिर्वर्त्तमाने इत्यर्थः। अन्धकूपे अन्धकूपवत्स्वपर-याथात्म्यज्ञानतिरोधायके गार्हधर्मे इत्यर्थः। उपयातम् उपगतं वर्त्तमानमिति यावत्। देवमाया देवस्य भगवतः संबन्धिनी माया दैवी ह्येषा गुणमयी इति भगवदुक्तविधा देहात्माभिमानस्वतन्त्रात्माभिमानकारिणी मायेत्यर्थः। उपसर्पति समागच्छति यदनु यस्या मायायाः पश्चात् मिथ्यामतिः देहात्माभिमानरूपमिथ्याभिमानः तत्प्रयुक्तसुखदुःखानुभवः पुनर्गर्भवासादिश्च भवतीति शेषः। एतत् एवंविधं संसृतिचक्रं चक्रवत्परिवर्त्तमानं संसरणम् उपयाति॥ २०॥ तस्मादिति। तस्मात् विगतविक्लवः विगतधाष्टर्यः। अनेकरन्ध्रं नानागर्भवासरूपम् एतत् व्यसनं भूयः पुनः यथा मे मम मां भविष्यत्। तथा उपसादितौ शरणं प्राप्तौ विष्णोः पादौ येन तथाभूतः अहम् आत्मानं सुहृदात्मना सर्वभूतसुहृदा आत्मनान्तर्यामिणा च त्वयैव हेतुभूतेन तमसः संसृतेः सकाशात् आशु उद्धरिष्ये अहमत्र स्थित्वैव भवतश्चरणौ सम्यगाश्रित्य संसृतेर्विमोक्ष्यामीति भावः॥ २१॥

एवं सप्तमान्मासादारभ्यादशममासान्तं गर्भस्थजीवनिर्वेदमभिधायानन्तरावस्थामाह। एवमिति। एवमुक्तरीत्या गर्भे कृतमतिं विहितनिश्चयं दशमास्यं दशमासपरिमितं ऋषिं जीवं सपदि तदा सद्यस्तत्क्षणमेव अर्वाचीनमवाङ्मुखं यथा भवति तथा प्रसूत्यै प्रसूत्यर्थं प्रवृद्ध इत्यर्थः। प्रसूतिकालवायुः क्षिपति प्रेरयति। बहिर्निःसारयितुं चालयतीत्यर्थः॥ २२॥ तेनेति। तेन सूतिवायुना अवसृष्टः स्वस्थानाच्चालितः अतः सहसाकस्मादेव शिरः अर्वागधः कृत्वा आतुरो दुःखितः निरुच्छ्वास उच्छ्वासरहितः अत एव हतस्मृतिः विनष्टगर्भस्थदशास्मृतिः सन् कृच्छ्रेणातिसंकटेन विनिष्क्रामति॥ २३॥ पतित इति। असृग्दिग्धो रुधिरेण लिप्तः भुवि पतितः सन् विष्ठाभूः कृमिरिव चेष्टते ज्ञाने गर्भवासकालिकाबबोधे गते विनष्टे सति, विपरीतां गतिं गतः सन् रोरूयति भृशं रोदिति॥ २४॥ परेति। परच्छन्दं शिशोरभिप्रायं अविदुषा अजानता जनेन मात्रादिना स शिशुः पुष्यमाणः सन्नपि अनभिप्रेतम् आपन्नः स्तन्यार्थं रोदने उदरव्यथां प्रकल्प्य निम्बरसपानमुदरव्यथया रोदने स्तनपान-मित्यादि स्वारोचकमाप्तः सन्नपि प्रत्याख्यातुं सम्यक् तन्निषेधं कर्तुम् अनीश्वरः॥ २५॥ शायित इति। जन्तवः दंशमशकमक्षि-कादयः स्वेदजा मत्कुणादयश्च तैर्दूषितस्तस्मिन् अशुचिपर्यङ्केऽपवित्रखट्वायां शायितः शयनं कारितः अङ्गानां कण्डूयने खर्जने आसनं च उत्थानं च चेष्टनं च तत्समाहृतौ नेशोऽसमर्थः सन् रोरूयतीत्यनुषज्जनीयम्॥ २६॥ तुदन्तीति। विगतं ज्ञानं गर्भवासावबोधो यस्य तम् अत एव रुदन्तम् आमा कोमला त्वग्यस्य तं दंशाः मशका मत्कुणादयश्च कृमयः कृमिकं यथा तथा तुदन्ति व्यथयन्ति॥ २७॥

इतीति। इत्येवमनेन प्रकारेण शैशवं पञ्चवर्षपरिमितं वयः शिशुत्वं तत्संबन्धि दुःखं भुक्त्वा ततः पौगण्डं च दुःखं यौवनात्प्रागवस्था पौगण्डं तद्दुःखमित्यर्थः। भुक्त्वा एव विग्रहं करोतीत्युत्तरादनुषज्जनीयम्। तत्र पौगण्डदुःखमाह।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अलब्धमभीप्सितं येन सः अज्ञानाद्धेतोः इद्धः प्रवृद्धः मन्युः क्रोधो यस्य सः शुचा अर्पितः व्याप्तः भवतीति शेषः ॥ २८ ॥ यौवनदुःखमाह । सहेति । देहेन सह वर्द्धमानेन मानेनाभिमानेन मन्युना क्रोधेन च आत्मनः स्वस्य अन्ताय नाशाय कामी सन् कामिषु विग्रहं विरोधं करोति । स्वयं कामी स्वकामविरोधिषु महिष्यासक्तो महिषोऽपरेषु तद्विरोधकेषु महिषेष्विव विग्रहं करोतीत्यर्थः ॥ २९ ॥ यौवनावस्थामेव प्रपञ्चयति । भूतैरिति । पञ्चभिः भूतैः आरब्धे संभूते देहे अबुधः अज्ञः देही शरीरी कुमतिः सन् असकृद्वारं वारम् अहं मम इति असद्ग्राहां सर्वथाऽसदाग्रहवतीं मतिं कुरुते ॥ ३० ॥ तदर्थमिति । अविद्या च कर्म च ताभ्यां बध्यते इति अविद्याकर्मबन्धनः । यः देहः क्लेशमेव ददन सन् अनुयाति । प्रतिजन्म पुनः पुनर्देहिनमनुवर्त्तते इत्यर्थः । यद्बद्धो येन देहजेन कर्मणा बद्धः देही संसृतिं संसरणक्लेशं याति । तदर्थं तथाभूतदेहार्थं कर्म दुःखदं पापात्मकं कर्म कुरुते । ततो भूयो भूयः संसृतिं यातीति भावः ॥ ३१ ॥ यदीति एवंविधदुःखसंबन्धो देहेनैवास्तीति विस्मृत्येति शेषः । शिश्नोदरकृतोद्यमैः शिश्नोदरपोषणार्थं कृतोद्योगैः असद्भिर्दारादिभिः आस्थितः संपृक्तः सन् पुनः तेषां पथि यदि रमते तर्हि स जन्तुः पूर्ववत् यातनादेह आवृत्येत्यादिपूर्वोक्तप्रकारेण तमः विशति । नरकान् प्राप्नोतीत्यर्थः ॥ ३२ ॥ असत्सङ्गं निदन्ति । सत्यमिति त्रिभिः । यत्सङ्गाद्येषामसतां प्रसङ्गतः सत्यं यथादृष्टश्रुतार्थस्य हिंसावर्जं यथार्थभाषणं शौचं द्विविधशौचाचरणं दया निष्कारणकृपा मौनं यथोचितभाषणं बुद्धिर्जीवहितकर्त्री मतिः ह्रीरकर्मलज्जा श्रीः सद्गुणादिजा शोभा लक्ष्मीर्वा । यशः कीर्त्तिः क्षमा सापराधेषु तत्सहनशीलता शमोऽन्तःकरणनिग्रहः दमो बाह्येन्द्रियनिग्रहः भगश्च देशाधिपत्याद्यैश्वर्यं च इत्येतानि संक्षयं याति यान्तीत्यर्थः ॥ ३३ ॥ तेष्विति । अशान्तेषु विषयवैतृष्ण्यरहितेषु खण्डितात्मसु देहात्मबुद्धिषु अत एव मूढेषु योषितां क्रीडामृगास्तेषु खेलनार्थं मृगवत्स्त्र्यधीनेषु अत एव शोच्येषु विवेकिभिरिति शेषः । तेष्वेवंविधेषु असाधुषु सङ्गं न कुर्यात् च ॥ ३४ ॥

नेति । योषितां सङ्गस्तस्मात् तथा तत्सङ्गिसङ्गतः परयोषित्सङ्गिसंगतेश्च यथा अस्य पुंसः मोहः बन्धश्च भवेत् तथा अन्यप्रसङ्गतः न भवेत् । मोहादिर्न स्यादित्यर्थः ॥ ३५ ॥ योषित्सङ्गस्यानर्थहेतुतां प्रपञ्चयति । प्रजापतिरिति । प्रजापतिर्ब्रह्मा, स्वामात्मीयां दुहितरं सरस्वत्याख्यां पुत्रीं दृष्ट्वा तस्याः रूपं तेन तदीयशरीरसौन्दर्येणेत्यर्थः । धर्षितो मोहितः सन् रोहिद्भूतां मृगीभूतां ताम् ऋष्यरूपी सः स्वयमपि विधृतमृगरूपः सन् हतत्रपो गतलज्जश्च सन् अन्वधावदन्ववर्तत भोगार्थमनुद्रुतवानित्यर्थः ॥ ३६ ॥ तदिति । तेन ब्रह्मणा सृष्टा मरीच्यादयः तैः सृष्टाः कश्यपादयः तैः सृष्टा देवमनुष्यादयस्तेषु मध्ये कः पुमान् नारायणम् ऋषिम् ऋते विना योषिन्मय्या स्त्रीरूपया मायया भगवतो मायाख्यशक्त्या इह लोके अखण्डितधीरनाकृष्टमनाः भवति नु । सर्वोऽपि निश्चितं खण्डितधीरेव विद्यते इति भावः ॥ ३७ ॥ बलमिति । स्त्रीमय्याः स्त्रीरूपायाः मे मम मायायाः बलं मोहकत्वरूपं सामर्थ्यं पश्य । या स्त्री केवलं भ्रूविजृम्भेण भ्रूविक्षेपमात्रेणैव दिशां जयिनः शूरानपि पदा स्वैकपादेन क्रान्तानतिलङ्घितान् स्वाधीनानिति यावत् करोति ॥ ३८ ॥ सङ्गमिति । अत इति शेषः । योगस्य परं पारमन्तं भक्तियोगफलभूतं मत्पदमित्यर्थः । आरुरुक्षुरारोढुमिच्छुर्योगी मम सेवा तया प्रतिलब्धः संप्राप्तः आत्मबोधः प्रकृतिविलक्षणात्मयाथात्म्यज्ञानं येन सः पाठान्तरेऽप्ययमेवार्थः । प्रमदासु दर्शनमात्रान्मदोत्पादकासु नारीषु जातु कदाचिदपि सङ्गं प्रसङ्गं न कुर्यात् । याः प्रमदाः अस्य मुमुक्षोः निरयद्वारं नरकद्वारं वदन्ति । अतस्तासु सङ्गं न कुर्यादित्यर्थः ॥ ३९ ॥ येति । योगिनः समीपे इति शेषः । देवेन भगवता निर्मिता देवनिर्मिता योषित् स्त्रीरूपा या माया शनैः शुश्रूषादिव्याजेन मन्दं मन्दमित्यर्थः । उपयाति । तां सेवामिषेणाप्यन्तिकागतां योषितं तृणैः आवृतं कूपम् इव आत्मनः स्वस्य मृत्युं मृत्युवदनर्थकरीम् ईक्षेत ॥ ४० ॥ एवं मुमुक्षुणा पुरुषेण स्त्रीप्रसङ्गो न कार्य इत्युक्तमथ स्त्रिया अपि मुमुक्षोः पुरुषसङ्गोऽनर्थावह इत्याह यामिति द्वाभ्याम् । येति शेषः । या स्त्री ऋषभायन्तीं पुरुषवदाचरन्तीं यां यन्मायां भगवतो मम मायां मोहान् पतिं मन्यते तथापि वस्तुतः सा स्त्री न स पुमानित्यर्थः । पतित्वेन प्रतीयमानोऽप्येतदात्मा न पुरुषः स्त्रीत्वेन प्रतीयमानस्त्र्यात्मा स्त्री न भवतीति भावः । किं तु आत्मा स्त्रीसङ्गतः वित्तापत्यगृहप्रदं स्त्रीत्वं प्राप्तः भवतीति शेषः ॥ ४१ ॥

तमिति । 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः' इति वाक्यादन्ते स्त्रियं स्मरन् स्त्रीत्वं प्राप्ता स्त्री, यथा मृगयोर्व्याधस्य गायनं मृगस्य मृत्युकरं तथा वित्तापत्यगृहात्मकं वित्ताद्याश्रयं तं पतिं दैवोपसादितं दैवेन प्रापितम् आत्मनः मृत्युं विजानीयात् ॥ ४२ ॥ एवं गर्भजन्मादियौवनान्ताः क्लेशा उक्ताः जरामरणादिक्लेशास्तु पूर्वस्मिन्नध्याये प्रपञ्चिताः । तत्र नित्यस्यात्मनः कथं जन्ममरणे संभवतः संभवे वा तयोः स्वरूपं किं भोगेन सर्वकर्मक्षये सति कथं शरीराच्छरीरान्तरगमनं तत्संभवेऽपि किं प्राक्तनैर्भूतसूक्ष्मैः संपरिष्वक्तो गच्छति उत तानि विहाय गच्छति इतीमां शङ्कां निराकुर्वन् वैराग्यसिद्ध्यर्थं देहस्यानात्मत्वप्रतिपादनाय तदेकदेशस्येन्द्रियस्यानात्मत्वमाह । देहेनेत्यादिचतुर्भिः । पुमान् जीवः जीवभूतेन जीवाभिन्नत्वेनाभिमतेन देहेन भूतसूक्ष्मेन्द्रियमनआत्मकेन सूक्ष्मशरीरेण लोकात् सूक्ष्मपरिणामरूपात्स्थूलाच्छरीरात्, लोकं लोकान्तरं सूक्ष्मपरिणामरूपं देहान्तरमिति यावत् । अनुव्रजन् कर्माणि प्राक्तनस्थूलशरीरनिष्पादितकर्मफलानि भुञ्जानः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्नेव अविरतमविच्छेदेन करोति पुनरुत्तरशरीरारम्भकाणि तानि विदधाति। अत्राविरतं कर्माणि करोतीत्यनेन कर्मणामसमाप्तिरुक्ता अभ्युपगतप्रारब्धानां भोगेन विनाशे पुनरभ्युपगतप्रारब्धानामविनष्टत्वात् ॥ ४३ ॥ कुत एतद्देहेन लोकाल्लोकान्तरगमनं जायते इत्यत्राह। जीव इति। जीवः जीवत्वेनाभिमतः भूतेन्द्रियमनोमयः भूतसूक्ष्मेन्द्रियमनआत्मकः देहः सूक्ष्मदेहः अस्यात्मनः अनुगः हि। नन्वेवमपि कथं नित्यस्यात्मनः जन्ममरणे संभवत इत्यत्राह। तन्निरोध इति। तस्मिन्निरोधस्तन्निरोधः सूक्ष्मे शरीरे स्थूलशरीरस्य संहार इत्यर्थः। स्थूलावस्थां परित्यज्य सूक्ष्मावस्थाप्राप्तिरिति भावः। एतदेव अस्य जीवस्य मरणम्। आविर्भावस्तु सूक्ष्मावस्थाप्रहाणेन स्थूलावस्थाप्राप्तिरेव संभवोऽस्य जन्मेत्युच्यते। देहद्वारके उत्पत्तिमरणे न स्वत इत्यर्थः ॥ ४४ ॥

एतदेवोपपादयन् जन्ममरणस्वरूपमाह। द्रव्येति। द्रव्याणां चक्षुरादीन्द्रियग्राह्यपदार्थानामुपलब्धिस्तत्तदिन्द्रियैरनुभवनं तस्य स्थानमधिष्ठानं तस्य देहस्येत्यर्थः। यदा द्रव्येक्षाऽयोग्यता पार्थिवाप्यतैजसादिद्रव्यांशनिरीक्षणाऽयोग्यता सूक्ष्मावस्थेत्यर्थः। पुंसो द्रव्येक्षाऽयोग्यता यदा भवतीति भावः। तत पञ्चत्वं तदेवास्य मरणम्। अहंमानात् द्रव्यदर्शनम् उत्पत्तिः। अहमित्यभिमानेन पदार्थेक्षणमेवास्य देहस्योत्पत्तिः। अभिमानपूर्वं या द्रव्यादीक्षा सैव पुंस उत्पत्तिरित्यर्थः। अत्रेदमवधेयम् 'तदेतदक्षयं नित्यं जगत्स्थावरजङ्गमम्। प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि इत्युक्तरीत्या प्रकृतिपुरुषयोरुभयोरपि नित्यत्वान्नोत्पत्तिविनाशौ यद्यपि संभवतस्तथापि तदुक्तिर्या क्वापि दृश्यते तद्विचार एवं विधेयः। आत्मनोऽपरिणामित्वान्न साक्षादुत्पत्त्यादिसंभवः, किं तु प्रकृतिद्वारास्योत्पत्त्यादिकं संभवत्येव। प्रकृतेस्तु साक्षादुत्पत्त्यादयः संभवन्त्येव तथा दर्शनात्। न चैवं तस्या अनित्यताशङ्का कार्या तद्द्रव्यस्य नित्यत्वात्। उत्पत्तिविनाशादयो हि सतो द्रव्यस्यावस्थाविशेषाः भवन्ति, तन्तुप्रभृतीनि हि द्रव्याणि सन्त्येव तानि रचनाविशेषयुक्तानि सन्ति पटादीन्युच्यन्ते असत्कार्यवादिना चापि ह्येतदेवोपलभ्यते। न हि तत्र तन्तुसंतानविशेषातिरेकेणान्यत् पदार्थान्तरं प्रतीयते। कारकव्यापारनामान्तरभजनव्यापारविशेषाणामेतावतैवोपपत्तेः। न द्रव्यान्तरकल्पनात्र युक्ता। अत उत्पत्तिविनाशादयः सतो द्रव्यस्यावस्थाविशेषाः। उत्पत्त्याख्यामवस्थामुपयातस्य द्रव्यस्य तद्विरोध्यवस्थान्तरापत्तिर्विनाश इत्युच्यते। मृद्द्रव्यस्य पिण्डत्वघटत्वकपालत्वचूर्णत्वादिवत्परिणामिद्रव्यस्य परिणामपरंपराऽवर्जनीयेति ॥ ४५ ॥ इदमेव दृष्टान्तयति। यथेति। यथा अक्ष्णोश्चक्षुषोः, द्रव्यस्यावयवः शौक्ल्यादिरूपं तस्य दर्शनं तस्मिन्नयोग्यता काचकामलादिदोषदुष्टतयाऽसामर्थ्यं स्यात् तदा एव, चक्षुषः सकाशात्, द्रष्टुरात्मनः, द्रष्टृत्वं नेति शेषः। यदा अनयोश्चक्षुषोः योग्यता अस्तीति शेषः। तदा चक्षुषः सकाशाद्द्रष्टृत्वं प्रतीयते। एवमुभयोर्दृष्टान्तदार्ष्टान्तिकत्वमवधेयम् ॥ ४६ ॥ उपसंहरति। तस्मादिति। तस्मात्साक्षाज्जन्ममरणादिभाजो देहस्यानात्मत्वात् संत्रासः देहप्रयुक्तागामिजन्ममरणादिदुःखविषयज्ञानरूपभयम्, न कार्यः। कार्पण्यं दैन्यम्, अतीतपुत्रमरणादिनिमित्तकं दीनत्वं न कार्यम्। संभ्रमः जीवनार्थं प्रयत्नः, न कार्यः। किं तु धीरः सुखदुःखसमः सन् जीवगतिं ब्रह्मात्मकप्रकृतिविलक्षणात्मरूपम्, बुद्ध्वा मुक्तसङ्गः देहापत्यकलत्रादिष्वनासक्तः संश्च इह लोके चरेत् ॥ ४७ ॥ ननु सर्वथा मुक्तसङ्गत्वे कथं जीवनमत आह। सम्यगिति। तथा सम्यगबाधितं दर्शनं शास्त्रजन्यं ज्ञानं यस्यास्तया, योगो भक्तियोगश्च वैराग्यं विषयविरक्तिश्च ताभ्यां युक्ता तया, बुद्ध्या मायाविरचिते लोके, कलेवरं न्यस्य त्यक्त्वा, कलेवरे आसक्तिमकृत्वेत्यर्थः। चरेत्। निवृत्तिधर्ममिति शेषः ॥ ४८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे एकत्रिंशोऽध्यायः ॥ ३१ ॥

—:❀:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वात्रिंशोऽध्यायः

श्रीकपिल उवाच

अथ यो गृहमेधीयान् धर्मानेवावसन् गृहे । काममर्थं च धर्मांश्च दोग्धि भूयः पिपर्त्ति तान् ॥ १ ॥

धर्मैर्हि सात्त्विकैरूर्ध्वं गतिर्द्वात्रिंश ईरिता । हीनस्य तत्त्वज्ञानेन ततस्तु पुनरागतिः ॥ १ ॥

एवमतीताध्यायद्वयेन वैराग्यसिद्ध्यर्थं गर्भजन्मजरामरणादिक्लेशा अनिष्टादिकारिणां गतिश्चोपपादिता । अथेष्टादिकारिणां परब्रह्मोपासकानां च गतिं ब्रुवंस्तत्रेष्टादिकारिणां तावद्गतिमाह । अथेति चतुर्भिः । अथ ननु, यः गृहे एव आवसन्, गृहमेधीयान् गृहमेधो गृहाश्रमस्तत्प्रयुक्तान् धर्मान् एव अनुतिष्ठन्सन्निति शेषः । एवकारेण निवृत्तिधर्मव्यावृत्तिः । धर्मानावसन्कुर्वन्निति वा । पुनश्च तान् धर्मांस्तेभ्यो धर्मेभ्य इत्यर्थः । कामम् अर्थं च दोग्धि प्रपूरयति । दुहेर्द्विकर्मकत्वात् 'अकथितं च' इत्यनेनापादानत्वाविवक्षायां धर्मानित्यप्रधाने कर्मणि द्वितीया । भूयः पुनरपि तान् दुग्धान् धर्मान् पिपर्ति पूरयति । धर्माननुतिष्ठन्कामार्थौ लभते इत्यर्थः ॥ १ ॥ एवकारसूचितमर्थमाह । स चापि केवलगृहमेधीयधर्मा पुमांश्चापि कामेन विषयासङ्गेन मूढः, अत एव भगवद्धर्मात् पराङ्मुखः प्रतिनिवृत्तः, श्रद्धया प्रवृत्तिधर्माचरणत्वरया अन्वितः युक्तश्च सन् क्रतुभिः देवान् पितॄंश्च यजते । उभयोरेकसंबन्धः ॥ २ ॥ तदिति । तच्छ्रद्धया पितृदेवयजनश्रद्धया, आक्रान्ता मतिर्यस्य सः, पितरश्च देवाश्च तदर्थं व्रतं नियमो यस्य सः, सोमपाः सोमयाजी पुमान्, चान्द्रमसं चन्द्रमसः संबन्धिनमित्यर्थः । लोकं गत्वा धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेणारुह्येत्यर्थः । पुनः एष्यति । चन्द्रमसः स्थानादाकाशवायुधूमाभ्रक्रमेणावरोहमाप्स्यतीत्यर्थः ॥ ३ ॥ लोके तिष्ठत्यपि पुण्यक्षयात्तद्गतानां ततः पातमुक्त्वा तेषां लोकानामपि लयमाह । यदा चेति । यदा च कल्पान्ते इतिशेषः । अनन्तासनः शेषासनः हरिः, अहीन्द्रः शेषः स एव शय्या तस्यां शेते । तदा ये गृहमेधिनां प्राप्या लोका इति शेषः । ते एते लोका लयं नाशं यान्ति ॥ ४ ॥ अथ परब्रह्मोपासकानां गतिमाह । ये इति । ये धीराः कुशाग्रधियो भगवदुपासकाः कामार्थहेतवे कामप्रयोजनायार्थप्रयोजनाय च स्वधर्मान् न दुह्यन्ति न दुहन्तीत्यर्थः । निःसङ्गा अनासक्ताः कर्मफलसङ्गरहिता इत्यर्थः । न्यस्तानि भगवति समर्पितानि कर्माणि स्ववर्णाश्रमोचितकर्मकलापो यैस्ते । प्रशान्ताः शमदमादिसंपन्नाः शुद्धचेतसः स्वधर्मानुष्ठानेन निर्मलान्तःकरणाः, एवंविधाः सूर्यद्वारेण यान्तीति तृतीयश्लोकेनान्वयः ॥ ५ ॥

निवृत्तीति । निवृत्तिधर्मा भगवद्गुणश्रवणकीर्त्तनादयः तेषु निरताः सत्त्वेन कर्मफलत्यागवत्तया सत्त्वात्मकेनेत्यर्थः । स्वधर्माख्येन स्वधर्मेणेत्यर्थः । परिशुद्धेन भगवत्प्रवणेन चेतसा निर्मलाः निरहंकृताः अहंकारममकाररहिताः ॥ ६ ॥ सूर्यद्वारेणेति । ते उक्तविधाः सूर्यद्वारेण एतदर्चिरादीनामुपलक्षणम् । अर्चिरहः सितपक्षोदगयनाब्दमरुदर्केन्दुविद्युद्वरुणेन्द्रधातृक्रमेणेत्यर्थः । अस्य विश्वस्य प्रकृतिं बन्धमोक्षकारणम् उत्पत्त्यन्तभावनमुत्पत्तिस्थितिलयान्कुर्वाणं विश्वतोमुखं सर्वज्ञं परे ब्रह्मादयोऽवरे यस्मात्स चासावीशश्च तं पुरुषं परमपुरुषं मां यान्ति उपयान्ति । अपुनरावर्त्तयितृत्वसूचनाय पुरुषविशेषणानीमान्युक्तानि । तेनानेन विशेषणजालेन स्वसंकल्पकृतजगदुदयविभवलयमोक्षलीलत्वानिरतिशयप्रीतिविषयान्स्वभक्तान् स्वपदं प्रापय्य पुनरावर्त्तयितुं समर्थो यो भगवांस्तं प्रयान्तीत्युक्तं भवति । अत्र सूर्यद्वारेणेत्यनेन सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः पुरुषो ह्यव्ययात्मा इति श्रुत्यर्थ उक्तः ॥ ७ ॥ एवं धूमार्चिरादिमार्गद्वयमुक्तमथ उत्तरो देवमार्गस्तु योगियानस्तु मध्यमः दक्षिणः । पितृयानस्तु तत्रत्या नागवीथिका इति वाक्यात् । योगियानेन चतुर्मुखलोकगतानामपि ब्रह्मणा सह महाप्रलयदशायां मुक्तिरुच्यते । द्विपरार्द्धेत्यादिना । द्वयोः परार्द्धयोः पूर्वोत्तराख्ययोरवसानमन्तो यस्मिन्सः द्विपरार्द्धावसानरूप इत्यर्थः । यः ब्रह्मणः प्रलयः तावत् तदवधिः परस्य परमात्मनः परिचिन्तकाः ये योगिनः इति शेषः । ते तु, लोकं ब्रह्मणो लोकं लोके इत्यर्थः । अधिशीङ्स्थासां कर्म इत्याधारस्यैव कर्मसंज्ञायां द्वितीया । अध्यासते अनेन निष्कामकर्मणामपि पुष्कलज्ञानोत्पत्तेः प्रागेव मरणे ब्रह्मलोकप्राप्तिपूर्वं तत्र ज्ञानाभ्यास उक्तः ॥ ८ ॥ क्ष्माम्भ इति । क्ष्मा पृथिवी च अम्भ आपश्च अनलस्तेजश्च अनिलो वायुश्च वियदाकाशं च मनश्च इन्द्रियाणि च अर्थाः शब्दादयश्च भूतादिस्तामसाहंकारश्च तैः परिवृतं युक्तं ब्रह्माण्डमिति शेषः । प्रतिसंजिहीर्षुः संहर्त्तुमिच्छुः गुणाः सत्त्वादयस्तेषां त्रयं सत्त्वादित्रिगुणात्मकं जगदात्मा शरीरं यस्य सः स्थूलचिदचिदात्मक-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शरीरविशिष्ट इत्यर्थः । गुणत्रयस्यात्मेति वा । स उक्तमहिमः भगवान् यर्हि यदा अव्याकृतं विशति । नामरूपविभागानर्हं-निरतिशयसूक्ष्मचिदचिद्विशिष्टत्वावस्थां प्राप्नोतीत्यर्थः । तदा पर इन्द्रादिभ्य उत्कृष्टः स्वयंभूर्ब्रह्मा पराख्यं द्विपरार्द्धाख्यं कालम् अनुभूय पुराणं पुरुषम् उपयातीति वचनविपरिणामेनोत्तरत्रान्वयः ॥ ९ ॥

एवमिति । एवम् अत्रैवमिति तदेत्यर्थे । परेत्य योगेन देहान्विसृज्य ये योगिनः भगवन्तं हिरण्यगर्भमीश्वरम् अनुप्रविष्टाः प्राप्ताः तेऽपि तत्रेति शेषः । हिरण्यगर्भलोके इति तदर्थः । जितमरुन्मनसः जितप्राणेन्द्रियाः विरागाः संप्राप्य परब्रह्मव्यतिरिक्ताणिमाद्यैश्वर्यवैतृष्ण्ययुक्ताः गताभिमाना विगतदेहात्माभिमानस्वतन्त्वाभिमानाः सन्तः, तेन साकं ब्रह्मणा सहैव, प्रधानं सर्वोत्कृष्टं ब्रह्म स्वरूपतो गुणतश्च निरतिशयबृहत् पुराणं पुरापि नवम् अमृतं परमानन्दरूपं पुरुषं परमपुरुषम् उपयान्ति । अत्र संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे । 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इत्यादि श्रुतिस्मृत्यर्थ उक्तः ॥ १० ॥ एवमत्र सम्यग-परिनिष्पन्नभगवद्भक्तियोगानां केषांचिद्धिरण्यगर्भलोकप्राप्तिपूर्वकं भगवद्भक्तिनिष्पादनेन भगवत्प्राप्तिरुक्ता अथात्रैव सम्यक् पूर्णतापन्नभक्तियोगानामविलम्बेनार्चिरादिगत्या भगवत्प्राप्तिर्जायतेऽतस्त्वमपि पूर्णभगवद्भक्तियोगं निवर्त्तयेत्याह । अथेति । हे भामिनि अथ तस्माद्धेतोः सर्वभूतानां हृत्पद्मेषु हृदयकमलेषु कृतालयं कृतावासं श्रुतोऽनुभावो महिमा यस्य तं संश्रुतपरम-प्रभावं तं भगवन्तं भावेन प्रेम्णा शरणं व्रज । पूर्वं साङ्गः सपरिकरो भक्तियोग उक्तः अत्र तदङ्गभूता शरणागतिरुक्ता एवं सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज इति चरमश्लोकोक्तरीत्या शरण्यो भगवान् भक्तियोगविरोधीनि पापानि निरस्य भक्तियोगं निवर्त्तयतीत्येतद्धृदयम् ॥ ११ ॥ 'ब्रह्म प्रधानमुपयान्ति गताभिमानाः' इति ब्रह्मलोकवासिनामपि देहात्माभिमानस्वतन्त्र-त्वाभिमानरहितानामेव भगवत्प्राप्तिरुक्ता । अथ केनचित्सुकृतविशेषेण ब्रह्मलोकं प्राप्ताः फलासक्तिरहितकर्माणः सन्तोऽपि देहात्माभिमानादियुक्ताः स्युश्चेत्तदैते पुनः संसरेयुस्तर्ह्यन्ये पुनरतथाविधाः साभिमानाः संसरन्तीति किमु वक्तव्यं ब्रह्मापि यदि साभिमानश्चेत्सोऽपि सह सनकादिभिः संसरेदित्याह । आद्य इति चतुर्भिः । स्थिरचराणाम् आद्यः यः कारणभूतः स्रष्टेत्यर्थः । सः वेदगर्भः, पुरुषो ब्रह्मापि, योगेश्वरैः कुमाराद्यैः सनत्कुमारादिभिः ऋषिभिर्मरीच्यादिभिः, तथा योगप्रवर्त्तकैरन्यैश्च सिद्धैः सह ॥ १२ ॥ भेदेति । भेददृष्ट्या अब्रह्मात्मकस्वतन्त्रवस्तुबोधरूपया, अभिमानेन शरीरात्माभिमानेन, निःसङ्गेन फलाभि-सन्धिरहितेन, कर्मणा अपि, सगुणं साम्यावस्थापन्नगुणत्रयविशिष्टं ब्रह्म सूक्ष्मचिदचिद्विशिष्टब्रह्मात्मकं पुरुषर्षभं पुरुषं प्राप्नुयात् । सूक्ष्मचिदचिद्विशिष्टब्रह्मात्मकपुरुषे लीनो भवेदित्यर्थः । कुतः । कर्तृत्वात् भेददृष्ट्याभिमानपूर्वकं निःसङ्गं कर्मकर्तृत्वात् ॥ १३ ॥

स इति । स ऋष्यादिसंहितो ब्रह्मा संसृत्य सूक्ष्मचिदचिद्विशिष्टे ब्रह्मणि संसर्गं प्राप्येत्यर्थः । पुनर्भूयः ईश्वरमूर्त्तिना, कालेन काले सृष्टिभवनावसरे 'तदैक्षत बहु स्याम्' इति बहुभवनसंकल्पदशायामित्यर्थः । गुणव्यतिकरे जाते सति गुणवैषम्ये जाते सति इत्यर्थः । भगवतः पुनरपि सृष्टिविरचनबुद्धौ जातायां सत्यामिति भावः । यथापूर्व पूर्ववत् प्रजायते गुणमयशरीरप्राप्तिपूर्वं पुनः स्वस्वाधिकारं प्राप्नुवन्तीति भावः ॥ १४ ॥ ऐश्वर्यमिति । कर्मविनिर्मितं कर्मभिः संप्राप्तं पारमेष्ठ्यं परमेष्ठिलोकसंबन्धि, ऐश्वर्यं निषेव्य चानुभूयाऽपि ये ब्रह्मणा सह तदा सगुणपुरुषे लीना आसन्निति शेषः । तेऽपि गुणव्यतिकरे सति पुनः आयान्ति । 'स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरञ्चतामेति' इत्युक्तेः पारमेष्ठ्यमैश्वर्यं कर्मायत्तमेवातस्तेऽपि तन्निषेव्यब्रह्मणा सह सगुणपुरुषे लीना अपि तेन सहैव पुनर्गुणव्यतिकरे सति स्वस्वाधिकारान्प्राप्नुवन्तीति भावः ॥ १५ ॥ एवं निष्कामकर्मणामपि साभिमानानां पुनः संसार उक्तस्तर्हि साभिमानाः सकामकर्माणः संसरेयुरत्र किं वक्तव्यमिति वक्ष्यंस्तान्निन्दति । ये त्विति चतुर्भिः । ये तु इह प्राकृतसुखे आसक्तमनसः सर्वथासक्तचित्ताः कर्मसु एतत्साधनभूतेषु कर्मस्वेव श्रद्धया त्वरया अन्विता युक्ताः सन्तः अप्रति-षिद्धानि काम्यानीत्यर्थः । कृत्स्नशः सकलानि नित्यान्यकरणे प्रत्यवायसाधनानि च कर्माणि अपि कुर्वन्ति । स्वर्गाद्यर्थितयाऽऽच-रन्तीत्यर्थः ॥ १६ ॥ रजसेति । रजसा रजोगुणेन कुण्ठमनसः विक्षिप्तमनसः कामात्मानः कामासक्तचित्ताः अजितेन्द्रियाः अत एव गृहेषु दारेषु अभिरताशया आसक्तान्तःकरणाः, 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते' इति स्मृतेर्गृहशब्दोऽत्र रुच्यर्थवाचकः । एवंभूताः सन्तः अनुदिनं पितॄन् यजन्ति ॥ १७ ॥ त्रैवर्गिका इति । कथनीया उरवो विक्रमाश्चरित्राणि यस्य स तस्य, कथनीयनिरतिशयकीर्त्तेरित्यर्थः । हरिमेधसः संसृतिविनाशकोपासनात्मकमेधाविषयस्य मधुद्विषः भगवतः कथायां विमुखाः सन्तः त्रैवर्गिकाः धर्मार्थकामपरायणाः ते नूनं दैवेन विहता इत्यनुषज्जनीयम् ॥ १८ ॥ नूनमिति । ये च अच्युतकथासुधां हित्वा विड्भुजः शूकरादयः पुरीषम् इव असद्गाथाः कामिसेव्या गाथाः शृण्वन्ति ते च नूनं दैवेन विहताः ॥ १९ ॥

ननु यद्येते त्वेवंविधास्तर्हि तेषां का गतिरित्यत्राह । दक्षिणेनेति । ते उक्तविधास्तु, अर्यम्णः अर्यमाख्यपितृसंबन्धिना दक्षिणेन पथा दक्षिणायनमार्गेण धूमादिमार्गेणेत्यर्थः । पितृलोकं व्रजन्ति । किं तत्रैव तेषां नित्यो निवास इत्यत्राह । ततः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्मशानान्तक्रियाकृतः श्मशानान्तसंस्कारकर्त्तारः प्रजाम् अनु प्रजायन्ते। पितृलोकात्पुनरिहायान्तः सन्तो हि स्वप्रजादिषु जायन्त इत्यर्थः ॥ २० ॥ ते यथा प्रजायन्ते तत्प्रकारमाह। तत इति। हे सति ततः स्वर्गात् ते गर्भाधानादिश्मशानान्तसंस्कारवन्तः, क्षीणसुकृताः निवृत्तपुण्या जाताः अत एव देवैस्तत्रत्यैः सुरैः सद्य एव, विभ्रंशित उदयो येषां ते देवविनाशितभोगोत्कर्षा इत्यर्थः। विवशाः कर्मवश्याः सन्तः पुनः इमं लोकं प्रति पतन्ति आयान्ति ॥ २१ ॥ एवं काम्यकर्मणां गतिमभिधाय मातुः पूर्वोक्तभगवद्भक्तियोगश्रद्धाविवृद्धये प्रोत्साहयति। तस्मादिति। तस्मात्सकामकर्मणां गतेरेवंविधत्वात् त्वं परमेष्ठिनं परमव्योमाधिपति भजनीयं सुखाराध्यं पादाम्बुजं यस्य तं भगवन्तं सर्वभावेन 'येषामहं प्रिय आत्मा सुहृच्च' इत्यादिनोक्तसर्वभावेनेत्यर्थः। स भगवांश्च गुणा ज्ञानशक्तिबलादयश्च त एवाश्रयो विषयो यस्यां तया भगवत्स्वरूपभगवद्गुणविषयेत्यर्थः। भक्त्या प्रेमपूर्वानुध्यानात्मिकया च, भजस्व ॥ २२ ॥ भक्तियोगारम्भस्याभ्यर्हितोपायभूतं वैराग्यं विना मम भक्तियोगारम्भः कथमित्यत्राह। वासुदेव इति। भगवति वासुदेवे प्रयोजितः भक्तियोगः यद्यस्मात् ब्रह्मदर्शनं ब्रह्मसाक्षात्कारोपायभूतं ज्ञानं जनयति तस्मात् तत् ज्ञानम् आशु वैराग्यं जनयति। समारब्धो भक्तियोग एव वैराग्यस्याप्युत्पादक इति भावः ॥ २३ ॥ तथारब्धोऽयं भक्तियोगः कदा ब्रह्म साक्षात्कुर्यादित्यत्राह। यदेति। अस्योपासकस्य चित्तं यदा इन्द्रियवृत्तिभिः समेषु समानेषु सर्वेषु वा अर्थेषु शब्दादिविषयेषु प्रियम् उतथवा अप्रियम् इत्येवंरूपं वैषम्यं न विगृह्णाति। अनुकूलप्रतिकूलशब्दादिविषयान्प्राप्य विकृतं सदनुकूलादिविषयसंम्बन्धकृतं प्रियाप्रियरूपं वैषम्यम्, नोपाददातीत्यर्थः ॥ २४ ॥ स इति। यदा चास्य चित्तमिति शेषः। निःसङ्गं शब्दादिविषयासङ्गरहितम् अत एव हेयोपादेयरहितं द्वेष्याद्वेष्यभावरहितमित्यर्थः। समं दर्शनं यस्य तत् परब्रह्मात्मकत्वानुसंधानपरं सदित्यर्थः। पदं शुभाश्रयं प्रति आरूढं लग्नं भवति। तदा सः, आत्मनोक्तविधेन चित्तेन आत्मानमीश्वरम् ईक्षते साक्षात्करोति। इति द्वयोरेकसंबन्धः ॥ २५ ॥

समदर्शनमित्यनेन सर्वस्य जगतो ब्रह्मात्मकत्वेनानुसंधानमुक्तमथ कथं विश्वस्य ब्रह्मात्मकत्वमित्यत्राह। ज्ञानमात्रमिति। ज्ञानमात्रं न कदापि जडमित्यर्थः। परं ब्रह्म परमात्मा ईश्वरः पुमान्, एवंविधशब्दैर्वाच्यः, एकः भगवान् दृश्यादिभिः पृथिव्यादिभिः, पृथग्भावैः परस्परविलक्षणधर्मैः, ईयते प्रतीयते। भगवानेक एव पृथिव्यादिपञ्चभूतसंघातात्मकदेवादिरूपभेदेन प्रतीयतेऽतः सर्वं जगद्भगवदात्मकमित्यर्थः ॥ २६ ॥ किमस्य भक्तियोगस्य फलमित्यत्राह। एतावानिति। योगिनः समग्रेण साङ्गेन, योगेन भक्तियोगेन अभिमतः अर्थः पुरुषार्थः इह एतावान् एव युज्यते प्राप्यते हि, तमाह। कृत्स्नशः तु कार्त्स्न्येनैव, असङ्गः यत् प्रकृतिसंबन्धराहित्यं यदेतावानिति संबन्धः। अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिप्रियो निरतिशयसुखरूपः परमपुरुषार्थरूपोऽपहतपाप्मत्वादिगुणाष्टकविशिष्टस्वरूप आत्मा भवति, यदेतावान्समग्रयोगाभिमतं भक्तियोगफलमिति भावः ॥ २७ ॥ दृश्यादिभिः पृथग्भावैरित्यनेन परमात्मनः पृथिव्यादिविशिष्टत्वमुक्तमेवं जीवस्यापि तद्विशिष्टत्वात्तयोः को वा विशेष इत्याशङ्कायां विशेषमाह। ज्ञानमिति। निर्गुणं सत्त्वादिगुणरहितम् एकं ज्ञानं ज्ञानस्वरूपं ब्रह्म जीवः 'ब्रह्मणो हि प्रतिष्ठाहम्' इति जीवेऽपि क्वचिद्ब्रह्मशब्दप्रयोगादत्र ब्रह्मशब्दो जीवपर्यायो ज्ञेयः। पराचीनैर्बाह्यविषयप्रवृत्तैः इन्द्रियैः शब्दादिधर्मिणा अर्थरूपेण, शब्दादिधर्मकाकाशादिपञ्चभूतारब्धदेवादिरूपेणेत्यर्थः। भ्रान्त्या अवभाति। परमात्मनः सर्वविशिष्टस्यापि सर्वज्ञत्वान्न भ्रान्तिः। जीवस्य तु ज्ञानस्वरूपस्य सत्त्वेऽपि धर्मात्मकज्ञानतिरोभावादनाद्यविद्यावशतया देहात्ममननं भ्रान्तिरित्यर्थः। अत्र ज्ञत्वाज्ञत्वमेवोभयोर्विशेषगमकमिति भावः ॥ २८ ॥ परमप्रस्तुतं सर्वस्य ब्रह्मात्मकत्वमुपपादयति। यथेति। महान्महत्तत्त्वम् अहंरूपोऽहंकारः, स च त्रिवृद्वैकारिकादिभेदेन त्रिधा वर्त्तमानः, पुनश्च पञ्चविधः भूतरूपेण पञ्चप्रकारः एकादशविधः दशेन्द्रियैकमनोरूपेणैकादशविधः एवमेतत्तत्त्वात्मकं यत् अण्डं स्वराट् तदन्तर्गतो ब्रह्मा च, यतः उत्पन्नं तस्य एव एतत्सर्वं जगत् वपुः शरीरं स एव यथा यथावत्परमार्थरूप इत्यर्थः ॥ २९ ॥ केनोपायेनायं सर्वात्मकत्वेन ब्रह्म साक्षात्कुर्यादित्यत आह। एतदिति। श्रद्धया भक्त्या, नित्यशः योगाभ्यासेन विरक्त्या च समाहितात्मा वशीकृतचित्तः योगी, निःसङ्गः सन् एतद्ब्रह्म परिपश्यति वै। साक्षात्कुर्यादित्यर्थः ॥ ३० ॥

अथाष्टाध्याय्या प्रतिपादितमर्थमुपसंहर्तुं सुखप्रतिपत्तये संक्षेपेणानुवदति। इतीति। हे गुर्वि पूज्ये, येन ज्ञानेन, प्रकृतेः पुरुषस्य परमपुरुषस्य च, तत्त्वं याथात्म्यम् अवबुध्यते ब्रह्मदर्शनं ब्रह्मदर्शनोपायभूतं तत् एतत् ज्ञानं मया तुभ्यम् इत्युक्तरीत्या कथितम् अत्र प्रकृतेरिति यदुक्तं तेन द्विविधापि प्रकृतिरुक्तास्तीति ज्ञेयम्। द्विविधा सोक्तास्ति गीतायाम् 'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मेऽपराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत् इति। तत्राद्या भूम्यादिरूपाऽचेतना, जीवरूपा द्वितीया चेतनात्मिका ॥ ३१ ॥ ज्ञानेति। तथा ज्ञानयोगः, प्रकृतिविलक्षणब्रह्मात्मतया विभावितप्रत्यगात्मना भगवदुपासनरूपो ज्ञानयोग इत्यर्थः। नैर्गुण्यः सत्त्वादिगुणत्रयराहित्यसंपादकः, मन्निष्ठो मद्विषयः, भक्तिलक्षणः भक्तिरूपो योगश्च, कथित इतिशेषः। द्वयोर्ज्ञानयोगभक्तियोगयोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि भगवच्छब्दो लक्षणं यस्य सः, भगवच्छब्दवाच्यपरमपुरुष एव सर्वथोपास्य इत्येवंरूपः, एक एव, अर्थः फलमस्तीत्यर्थः 'ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः' इति भगवदुक्तेः ॥ ३२ ॥ ननु ज्ञानयोगस्य भगवच्छरीरभूतात्मज्ञानं लाभः भक्तियोगस्य तु भजनीयेश्वरप्राप्तिरेव लाभोऽतः कथं तयोरेकार्थत्वं येनोभाभ्यां भगवान्प्राप्यः स्यादित्यत्राह। यथेति। पृथग्भिन्नानि द्वाराणि स्वस्वविषयभूतरूपरसादिग्रहणद्वाराणि येषां तैः, इन्द्रियैश्चक्षुरादिभिरक्षैः, बहूनां गुणानां रूपरसादीनामाश्रयः, अर्थः क्षीरगुडादिरूपः, एकः एव नाना नैकविधः ईयते प्रतीयते। चक्षुषा शुक्ल इति, रसनेन मधुर इति, स्पर्शनेन शीत इति गृह्यते। तद्वत्तथा, भगवानेक एव शास्त्रवर्त्मभिः, नाना ईर्यते। तत्तच्छास्त्रोक्तोपासनामार्गविशेषैराराध्याकारेण भिद्यते इत्यर्थः ॥ ३३ ॥ शास्त्रीयमार्गविशेषान्प्रपञ्चयति त्रिभिः। क्रिययेति। क्रियया पञ्चरात्रोदितपूजाकलापेन, क्रतुभिर्वेदपूर्वभागोदितयज्ञैः, दानैः पात्रे गोभूवितरणादिभिः, तपश्च स्वाध्यायश्च मर्शनं च तैः, तत्र तपः कृच्छ्रचान्द्रायणादिकम्। स्वाध्यायो वेदादिसच्छास्त्राध्ययनम्। मर्शनं वेदार्थविचारः। आत्मा चेन्द्रियाणि च तेषां जयः तेन अपि तत्रात्मजयः शमः, इन्द्रियजयो दमः, कर्मणां संन्यासेन च कर्मणां फलासङ्गराहित्येनानुष्ठानेनेत्यर्थः ॥ ३४ ॥ योगेनेति। विविधान्यङ्गानि यस्य तेन, बह्वङ्गोपकृतेनेत्यर्थः। भक्तियोगेन भगवद्भक्तियोगेन, योगेन प्रकृतिविविक्तात्मयाथात्म्यज्ञानयोगेन च उभयचिह्नेन सकामनिष्कामलक्षणेन, धर्मेण, कथंभूतो धर्मः। यः प्रवृत्तिनिवृत्तिमान्, प्रवृत्तनिवृत्तताभाजा सकामनिष्कामतारूपोभयविधधर्मेणेत्यर्थः ॥ ३५ ॥

आत्मेति। आत्मतत्त्वावबोधेन आत्मयाथात्म्यज्ञानयोगेन दृढेन वैराग्येण च एभिः सर्वैः साधनैः सगुणः मङ्गलगुणगणकः निर्गुणः हेयगुणरहितः स्वदृक् स्वप्रकाशः भगवान् एव ईयते प्राप्यते हि। तत्र क्रत्वादिभिरिन्द्रादिरूपेणाराध्यमानोऽन्तवत्फलप्रदः साक्षात् ज्ञानयोगभक्तियोगादिभिराराधितस्तु निरतिशयमोक्षाख्यफलप्रद इति भावः इति त्रयाणामेकान्वयः ॥ ३६ ॥ अन्यदपि पूर्वोक्तमनुवदति। प्रावोचमिति। तथा भक्तियोगस्य चतुर्विधं तामसादि गुणत्रयभेदवत्तया त्रिप्रकारं निर्गुणं रूपं चेत्येवं चतुर्विधस्वरूपं ते तुभ्यं प्रावोचम्। यः जन्तुषु अन्तः धावति। तस्य अव्यक्तगतेः कालस्य स्वरूपं च प्रावोचम् ॥ ३७ ॥ जीवस्येति। तथा हे अम्ब मातः आत्मा जीवः यासु गतिषु प्रविशन्सन् आत्मनः गतिं प्रकारं याथात्म्यमित्यर्थः। न वेद ताः अविद्याकर्मनिर्मिताः अविद्याख्यकर्मसृष्टाः जीवस्य बह्वीः संसृतीश्चापि प्रावोचमिति पूर्वश्लोकादाकर्षणीयम् ॥ ३८ ॥ मयोक्तमिदं सर्ववेदान्तार्थरूपमतिगोप्यमस्त्यतोऽधिकारिणे एवोपदेष्टव्यं नानधिकारिणे इति वदन्नेतच्छ्रवणस्य कीर्त्तनादेश्च फलं दर्शयन्नुपसंहरति। नैतदिति। हे मातः एतन्मदुक्तम्, कर्हिचित् खलाय परोद्वेजकाय न उपदिशेत्। अविनीताय विनयवर्जिताय, नोपदिशेत्। स्तब्धायानम्राय मूर्खायेति यावत्। नोपदिशेत्। भिन्नाय दुराचाराय नोपदिशेत्। धर्मध्वजाय दाम्भिकाय चापि नैव उपदिशेत् ॥ ३९ ॥ नेति। लोलुपाय विषयव्याकुलाय न उपदिशेत्। गृहारूढचेतसे नोपदिशेत्। मे मम अभक्ताय चकारस्त्वर्थे। जातु कदाचिदपि नोपदिशेत्। मद्भक्तद्विषामपि मद्भक्तद्विड्भ्योऽपि इत्यर्थः। नोपदिशेत् ॥ ४० ॥ अधिकारिणमाह। श्रद्दधानाय भक्ताय विनीताय अनसूयवेऽसूयावर्जिताय भूतेषु कृतमैत्राय शुश्रूषाभिरताय च उपदिशेदिति पौर्वश्लोकीयमत्रानुषञ्जनीयम् ॥ ४१ ॥ बहिरिति। बहिः स्वर्गादौ जातविरागाय शान्तचित्ताय निर्मत्सराय परोत्कर्षासहनं मत्सरस्तद्वर्जिताय, शुचये बाह्याभ्यन्तरशुद्धिमते यस्य अहं प्रेयसां प्रियः प्रीतिविषयाणां वस्तूनां मध्ये निरतिशयप्रीतिविषयोऽहं स्यां तस्मै च दीयते। तत्र न बाधः उभयोरेकसंबन्धः ॥ ४२ ॥

य इति। हे अम्ब इदं मदुक्तमष्टाध्यायात्मकमेतच्छास्त्रमित्यर्थः। यः पुरुषः श्रद्धया सकृदेकवारमपि शृणुयात्। मच्चित्तः सन् यो वा अभिधत्तेऽन्यस्मै कथयति स च सोऽपि मे मम पदवीं मार्गं मुक्तिमित्यर्थः। एति प्राप्नोति। मच्चित्त इति जातवैराग्यस्य मदुपासननिष्ठस्योपलक्षणम्। हि निश्चितमेव ॥ ४३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रयस्त्रिंशोऽध्यायः

मैत्रेय उवाच

एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ।
विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयाङ्कितसिद्धभूमिम् ॥ १ ॥

कपिलस्योपदेशेन त्रयस्त्रिंशे सुतस्य वै । तन्मातुर्ज्ञानभावेन संसृतेर्मुक्तिरीर्यते ॥ १ ॥

एवं श्रुततत्त्वा विश्रुतात्महिता विदितपरमपुरुषार्था च देवहूतिः किमकरोदित्यत्राह मैत्रेयः । एवमिति । एवमुक्तरीत्या कर्दमस्य दयिता भार्या, कपिलस्य जनित्री माता देवहूतिः कपिलस्य वचः निशम्य श्रुत्वा विस्रस्तं ध्वस्तं मोहपटलमज्ञानरूपावरणं यस्याः सा तथाभूता सती तत्त्वानि प्रकृतिपुरुषेश्वररूपाणि विषयो यस्य तत् ज्ञानं तेनाङ्किताः प्रसिद्धाः सिद्धा योगिनस्तेषां भूमिराश्रयस्तं तं कपिलम् अभिप्रणम्य तुष्टाव स्तुतवती किल ॥ १ ॥ स्तुतिमेवाह । अथेति । स्तुत्यारम्भे हे भगवन् यस्य तव जठराब्जं नाभिकमलं तस्माज्जातः स्वयम् अजो ब्रह्मा अपि अन्तःसलिले सलिलस्य मध्ये शयानं भूतानि पृथिव्यादीनि च इन्द्रियाणि श्रोत्रादीन्येकादशेन्द्रियाणि च अर्थाः शब्दादयश्च आत्मानो जीवाश्च तन्मयं तत्प्रचुरं जठरगतचिदचित्समुदायमित्यर्थः । अत एव अशेषस्य कार्यजातस्य बीजं कारणं गुणानां ज्ञानादिगुणानां प्रवाहो यस्मात्तत् सत् त्रिष्वपि कालेष्वविनाशित्वात् सत्यम् इत्थंभूतं ते तव वपुः दध्यौ साक्षात्कृतवान् ॥ २ ॥ स एवेति । गुणप्रवाहेण ब्रह्मादिषु रजआदिगुणोन्मेषेण विभक्तं वीर्यं येन सः ब्रह्मादिषु रजआदिगुणानुरूपं प्रविभक्तसर्गादिशक्तिरित्यर्थः । अनीहो निर्व्यापारः सन्नपि अवितथाभिसंधिः सत्यसंकल्पः संकल्पमात्रसंविहितजगदुदयादिलील इत्यर्थः । आत्मेश्वरः स्वयमीश्वरान्तररहितः 'पतिं विश्वस्यात्मेश्वरम्' इति श्रुतेः । अतर्क्या अचिन्त्याः सहस्राणि अनन्ताः शक्तयो यस्य सः स भगवान् भवान् एव विश्वस्य अस्य जगतः सर्गादिसृष्ट्यादीन् विधत्ते ॥ ३ ॥

स त्वमिति । हे नाथ, युगान्ते कल्पान्ते, एतत् विश्वं, यस्य उदरे, आसील्लीनमभवत् यो भवान् वटपत्रे, एकः मायाशिशुः स्वसंकल्पेन शिशुभावं प्राप्तः, अङ्घ्रिं पादाङ्गुष्ठं पिबतीति अङ्घ्रिपानः सन् शेते स्म । स एवंभूतः त्वं मे मया जठरेणोदरेण, कथं नु भृतः । तत्र कारणं न विद्मः । किं त्वेतन्मम भाग्यमेवेति भावः ॥ ४ ॥ इदं तु प्रसिद्धं सर्वावतारसाधारणं जानीम इत्याह । त्वमिति । हे विभो पाप्मनां दुष्कृतिनां प्रशमाय, विनाशाय, निदेशभाजां भवदाज्ञानुवर्त्तिनां, विभूतये परित्राणाय च त्वं देहतन्त्वः परिगृहीतदेहः, असि । यथा अन्ये तव सूकरादयः अवताराः, अभवन् । तथा अयमवतारोऽपि आत्मपथोपलब्धये साधूनामात्ममार्गज्ञापनाय, अभवत् इति विद्म इत्यर्थः ॥ ५ ॥ अहं तु अस्य तवावतारस्य दर्शनादेव कृतार्थास्मीति कैमुत्यन्यायेनाह । यदिति । कचित् अपि यन्नामधेयश्रवणानुकीर्त्तनाद्यस्य तव नामधेयस्य यच्छ्रवणमनुकोर्त्तनं च तस्मात् यद्यस्य तव प्रह्वणात्प्रणामात्, यत्स्मरणाद्यस्य तव स्मरणाच्चापि, श्वादः श्वपचोऽपि, सद्यस्तत्क्षणमेव, सवनाय त्वत्परिग्रहावसराय यागायेति वा । कल्पते योग्यो भवति । नु निश्चये । तर्हि, हे भगवन् ते तव दर्शनात् कृतार्थाहम् इति कुतः पुनः । किं पुनर्वक्तव्यमित्यर्थः । एवंविधेन नामस्मरणादिना पापिनोऽपि कृतार्थताप्रतिपादकानि वचनान्यन्तिमस्मरणविषयाणि द्रष्टव्यानि । तथा चोक्तं पुरस्तात् । 'यस्यावतारगुणकर्मविडम्बनानि नामानि येऽसुविगमे विवशा गृणन्ति' इति ॥ ६ ॥ एतदेव देहावसाने भगवन्नामधेयग्रहणं सर्वेषां तपआदीनां बहुजन्मोपार्जितानां फलमित्याह । अहो इति । अहो इत्याश्चर्ये । बतेति हर्षे अतः एवंभूतभगवन्नाममाहात्म्याद्धेतोः तुभ्यं तव, नाम यस्य जिह्वाग्रे वर्त्तते सः श्वपचोऽपि गरीयान् । कुत इत्यत आह । ये ते तव, नाम गृणन्ति, अन्तकाले इति शेषः । ते जनाः, आर्याः श्रेष्ठाः सन्तः, तपः तेपुश्चक्रुः । जुहुवुः होमं कृतवन्तः । सस्नुस्तीर्थे स्नाताः । ब्रह्म वेदम् अनूचुः कथितवन्तः । अन्तकाले भगवन्नामकीर्त्तनं महाभाग्योदयादेव भवतीति भावः । प्रबलप्रतिबन्धवशाच्छ्वपचादिजन्मप्राप्तावपि पूर्वजन्मोपार्जितसुतपआदिभिर्भगवन्तमाराधितवन्त इति मन्यामहे इति भावः ॥ ७ ॥

स्तुतिमुपसंहरति । तमिति । प्रत्यक्स्रोतसि प्रत्यक्प्रकाशे स्वस्मै प्रकाशमाने इति यावत् । आत्मनि जीवे, संविभाव्यं चिन्तनीयं ब्रह्म बृहत्त्वबृंहणत्वादिगुणयुक्तं, स्वप्रकाशेन ध्वस्तः गुणानां सत्त्वादीनां प्रवाहः संसारो यस्य तं वेदाः गर्भे यस्य तं,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कपिलं कपिलाख्यं, विष्णुं व्यापकं परं पुमांसं परपुरुषमित्यर्थः। तं मत्पुत्रतया भासमानं त्वाम् अहं वन्दे नमस्करोमि ॥ ८ ॥ ईडित इति। कपिलाख्यः भगवानैश्वर्यैकाधारः, अतः परः पुमान् परमेश्वरः, एवममुना प्रकारेण, ईडितो मात्रा संस्तुतः, मातृवत्सलो मातृपित्रोः वत्सलतोपेतः सन् मातरम् अविक्लवया गम्भीरया वाचा इति वक्ष्यमाणप्रकारेण, आह उवाच ॥ ९ ॥ मार्गेणेति। हे मातः, मया, उदितेन कथितेन सुसेव्येन सुखानुष्ठेयेन, अनेन मार्गेण, ते त्वया, आस्थितेनानुष्ठितेन सता, अचिरादाशु, वरां काष्ठां फलरूपपर्यन्तदशां मुक्तिमिति यावत्। अवरोत्स्यसि प्राप्स्यसि ॥ १० ॥ श्रद्धत्स्वेति। हे मातः, ब्रह्मवादिभिर्ब्रह्मोपदेष्टृभिः यन्मतं जुष्टं पुनः पुनः संशीलितं, एतत् मह्यं मम मतं श्रद्धत्स्व। एतस्मिन्मन्मते श्रद्धां कुर्वित्यर्थः। येन मन्मतपरिशीलनेन, अभयं मां, यायाः। अतद्विदो मन्मतस्य येऽनभिज्ञास्ते तु, मृत्युं संसारम् ऋच्छन्ति प्राप्नुवन्ति ॥ ११ ॥ इतीति। इत्येवं, भगवान्कपिलः, आत्मनः सतीम्, उशतीं कमनीयामिति यावत्। तां गतिं प्रदर्श्य, स्वमात्रे उपदिश्येत्यर्थः। ब्रह्मवादिन्या स्वमात्रा, अनुमतोऽनुज्ञातः सन् ययौ गतवान् ॥ १२ ॥ सेति। सा चापि देवहूतिश्चापि, तनयोक्तेन स्वपुत्रोपदिष्टेन, योगादेशेन योगानुशासनेन तस्मिन्नेव सरस्वत्याः आपीडेऽलंकारभूते आश्रमे योगयुक् योगेन युक्ता सती, समाहितैकाग्रचित्ता, अभूदिति शेषः ॥ १३ ॥ कथंभूता सती समाहितेत्यत्राह। अभीक्ष्णेति। अभीक्ष्णं त्रिषवणमवगाहः स्नानं तेन कपिशाः पिशङ्गास्तान्, जटिलान्, स्वत एव कुटिलाश्च तान्, बिभ्रती उग्रतपसा कृशं चीरिणं वल्कलधारिणं च आत्मानं बिभ्रती ॥ १४ ॥

प्रजापतेरिति। कर्दमस्य प्रजापतेः, तपश्च योगश्च ताभ्यां विजृम्भितमतिशयितं वैमानिकैर्विमानचरैर्देवैरपि, प्रार्थ्यम् अत एव अनौपम्यमुपमानवर्जितं स्वगार्हस्थ्यं गृहाश्रमोपयोगिपदार्थभृतगृहम्। हित्वा परित्यज्य, पुत्रविश्लेषणातुरा सती वदनं किंचिच्चकारेति षष्ठेनान्वयः ॥ १५ ॥ गार्हस्थ्यं विशिनष्टि पञ्चभिः। पय इति। यत्र गार्हस्थ्ये पयःफेननिभाः क्षीरफेनवन्मृदुलाः, दान्ता गजदन्तनिमितत्वाच्छुभ्रवर्णाः, रुक्मपरिच्छदाः स्वर्णमयपरिकरोपेताश्च, शय्याः। यत्र सुस्पर्शानि सुखकरस्पर्शवन्ति आस्तरणानि येषु तानि, हैमानि सुवर्णमयानि आसनानि च ॥ १६ ॥ स्वच्छेति। यत्र महान्त्यनर्घ्याणि मारकतानि इन्द्रनीलान्यलंकारार्थं संयुक्तानि येषु तेषु, स्वच्छस्फटिककुड्येषु, स्वच्छस्फटिकमणिमयभित्तिमत्प्रदेशेषु, ललनाः प्रतिबिम्बितसाभरणवनिताः एव रत्नानि तैः संयुताः, रत्नप्रदीपाः पद्मरागमणिमयाः प्रदीपाः आभान्ति। स्वच्छस्फटिकादिमणिमयकुड्येषु प्रतिबिम्बितस्त्रीरत्नहस्तन्यस्तरत्नदीपाः दीपार्चिषीव भान्तीत्यर्थः ॥ १७ ॥ गृहोद्यानमिति। यत्र गृहोद्यानं कुसुमितैः संजातकुसुमैः, बहुभिः अमरद्रुमैः, रम्यम्। कूजन्ति विहङ्गमिथुनानि यस्मिंस्तत्, गायन्तो मत्ताः मधुव्रताः यस्मिंस्तत्। एवंभूतं सद्भातीत्यर्थः ॥ १८ ॥ यत्रेति। यत्र गृहोद्याने, उत्पलगन्धिन्यामुत्पलसुगन्धवत्याम् वाप्यां प्रविष्टं कर्दमेन उपलालितम् आत्मानं विबुधानुचराः जगुः ॥ १९ ॥ हित्वेति। आखण्डलयोषितामिन्द्रस्त्रीणाम् अपि, ईप्सिततममत्यर्थकमनीयं तद्गार्हस्थ्यम् हित्वा तत्राभिमानं त्यक्त्वा, स्वदेहेऽहंतां च त्यक्त्वेति शेषः। पुत्रविश्लेषणातुरा पुत्रवियोगदुःखिता सती, वदनं किंचिच्चकार शोकव्याकुलमकरोदित्यर्थः ॥ २० ॥ सुहृद्भ्यां पतिपुत्राभ्यां यो वियोगस्तस्य दुःसहतामाह। वनमिति। पत्यौ कर्दमे, वनं प्रव्रजिते संन्यस्य गते सति, अपत्यविरहातुरा निजपुत्रविश्लेषखिन्ना देवहूतिः, ज्ञातं तत्त्वं चिदचिद्याथात्म्यं यया सा एवंभूता सत्यपि, वत्से नष्टे सति, वत्सला पुत्रस्नेहवती, गौः इव अभूत् ॥ २१ ॥ तमेवेति। हरिं भगवदवतारं देवं देववत्सुरूपम् अपत्यं स्वपुत्रं तं कपिलम् एव, ध्यायती सती, हे वत्स विदुर अचिरतः स्वल्पकालेन, तादृशे उक्तविधे गृहे, निःस्पृहा वगतस्पृहा बभूव ॥ २२ ॥

ध्यायतीति। सुतः कपिलो भगवान् ध्यानगोचरं ध्यानयोग्यं यत भगवतः रूपम् आह 'प्रसन्नवदनाम्भोजं' इत्यादिना कथितवान् तदेव प्रसन्नवदनं प्रसन्नवदनादियुक्तं भगवद्रूपं समस्तव्यस्तचिन्तया कार्त्स्न्येनावयवशश्च, ध्यायती चिन्तयन्ती वंभूता सत्यात्मानं न सस्मारेति पञ्चमेनान्वयः ॥ २३ ॥ भक्तीति। बलीयसा बलवत्तरेण, वैराग्येण युक्तानुष्ठानजातेन स्वोचितपूजादिरूपकर्मानुष्ठानोद्भूतेन, ब्रह्महेतुना ब्रह्मप्राप्तिहेतुकेन, ज्ञानेन ज्ञानयोगेन, अनुग्रहं प्राप्तेनेति शेषः। भक्तेर्यः प्रवाहः प्रवृत्तिः स एव योगस्तेन, एवं ब्रह्मप्राप्तिहेतुना ज्ञानयोगकर्मयोगवैराग्यादिभिरनुगृहीतेन, मुक्त्युपायभूतेन भक्तियोगेनेत्यर्थः ॥ २४ ॥ विशुद्धेनेति। विशुद्धेन, आत्मना मनसा, विश्वतोमुखं सर्वज्ञं स्वानुभूत्या स्वप्रकाशेन तिरोभूतानि तिरोहितानि मायागुणाः सत्त्वादयस्तेषां विशेषणानि शोकमोहादीनि यस्य तम्। अशनायाद्यूर्मिषट्करहितमित्यर्थः। स चासौ आत्मा च तदात्मा तम् स्वात्मभूतं परमपुरुषमित्यर्थः। ध्यायती ॥ २५ ॥ ब्रह्मणीति। आत्मसंश्रये जीवानामाश्रयभूते, भगवति ब्रह्मणि, अवस्थिता मतिर्यस्याः सा, निवृत्ता जीवापत्तिर्जीवत्वमालम्ब्य प्राप्तव्या क्लेशाद्यापत्तिर्यस्यास्तस्या भावस्तत्त्वं तस्मात, निवृत्तप्रायप्रकृतिसंबन्धत्वाद्धेतोरित्यर्थः। वीतक्लेशा विगतशीतोष्णादिक्लेशा, आप्ता निर्वृतिः परमात्मानुभवानन्दो यया सा ॥ २६ ॥ नित्येति। नित्यमारूढः समाधिर्यया तस्या भावस्तत्त्वं तस्मात, नित्यं प्रकृतिविलक्षणप्रत्यगात्मशरीरकपरमात्मनि समाहितत्वादित्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परावृत्तो निवृत्तः गुणभ्रमः प्रकृतिगुणकृता भ्रान्तिर्यस्याः सा, विनिवृत्ततमआदिप्रकृतिगुणकार्यदेहात्माभिमानादिविपरीतताभ्रमेत्यर्थः। एवंभूता सती, तदा स्वप्ने स्वप्नावस्थायां दृष्टं स्वप्ने निरीक्षितं वस्तुजातम् उत्थितः स्वप्नादुत्थितः पुमान्, इव, आत्मानं शरीरं न सस्मार। यथा स्वप्नादुत्थितः पुमान् स्वाप्नं सुखदुःखाद्यनित्यमिति निश्चित्य स्वाप्नवस्त्वायत्तसुखदुःखादिभिरनाकुलः स्यादेवं देहानुबन्धिसर्वकर्मायत्तमस्थिरमिति मत्वा तत्पोषणादिनिमित्तसुखदुःखैरनभिभूता सती, देहः पुष्टः कृश इति वा न सस्मारेत्यर्थः॥ २७॥ तद्देह इति। अत एव, तद्देहस्तस्या देहः, परतः परैः पोष्योऽपि परायत्तपोषणः सन्नपि, स्वाध्यसंभवात् पोषणाभावप्रयुक्तमनःपीडाया असंभवात् अकृशः। मलैः अवच्छन्नः अभ्यङ्गोद्वर्त्तनाभावान्मलैः संयुक्तः सन्नपि, सधूमः पावकोऽग्निरिव बभौ॥ २८॥

स्वाङ्गमिति। तपोयोगमयं तपोयोगप्रचुरं मुक्तकेशं विकीर्णशिरोरुहं गताम्बरं विगतवस्त्रमपि दैवगुप्तं दैवेन रक्षितं स्वाङ्गं निजदेहं वासुदेवे भगवति प्रविष्टा धीर्यस्यास्तथाभूता सती, न बुबुधे भगवदनुभवजनितानन्दसंप्लवे मग्नत्वाद्देहं नावजगामेत्यर्थः॥ २९॥ एवमिति। एवं सा देवहूतिः कपिलोक्तेन स्वसुतकपिलभगवदुपदिष्टेन मार्गेण अचिरतः आश्वेव, परमक्षरादपि परं निर्वाणं मूर्त्तमोक्षरूपं ब्रह्म निरतिशयानन्दरूपम् आत्मानं स्वात्मन्यवस्थितम् भगवन्तम् अवाप। हेति शास्त्रप्रसिद्धम्। विस्मये वा हेति॥ ३०॥ तदिति। हे वीर विदुर, यत्र सा देवहूतिः, संसिद्धिं मुक्तिम् उपेयुषी मुक्तिमवापेत्यर्थः। तत् पुण्यतममतिपवित्रं नाम्ना सिद्धपदं त्रैलोक्यविश्रुतं त्रिषु लोकेषु प्रथितं क्षेत्रम् आसीत। एतस्याः सिद्धिप्राप्तिस्थानत्वाल्लोके एतत्क्षेत्रं सिद्धाश्रमसिद्धपदादिसंज्ञया प्रथितमभवदित्यर्थः॥ ३१॥ तस्या इति। हे सौम्य विदुर, योगेन विधुता विनाशिता मर्त्याः पलितवलितादयो देहधर्मा यस्मिंस्तत्, तद्देवहूत्या त्यक्तम् तस्या देवहूत्याः, मर्त्यं शरीरम्। सिद्धिदा सकलसिद्धिप्रदात्री, सिद्धैः सेविता स्रोतसामन्यासां नदीनां मध्ये, प्रवरोत्तमा सरिन्नदी अभूत्। सा द्रवरूपेण प्रावहदित्यर्थः॥३२॥ 'कपिलोऽनुमतो ययौ' इति उक्तं ततः स क ययावित्यत्राह। कपिल इति। हे विदुर, महायोगी भगवान् कपिलोऽपि, मातरं देवहूतिं समनुज्ञाप्य मातुराज्ञां गृहीत्वेत्यर्थः। पितुः आश्रमात्सकाशात् प्रागुदीचीं पूर्वोत्तरमध्यवर्त्तिनीम् दिशम् ईशानदिशमित्यर्थः। ययौ ईशानदिशं प्रति जगामेत्यर्थः॥ ३३॥ सिद्धेति। सिद्धचारणगन्धर्वैः, मुनिभिः, अप्सरोगणैश्च स्तूयमानः समुद्रेण दत्तमर्हणं निकेतनं निवासस्थानं च यस्य सः, एवंभूतः सन्नास्ते इत्युत्तरस्मादनुषञ्जनीयम्॥ ३४॥

आस्ते इति। सांख्याचार्यैः कपिलोक्तसांख्यप्रवर्त्तकयोगिभिः अभिष्टुतः त्रयाणां लोकानाम् उपशान्त्यै क्षेमाय समाहितः समाहितमनाः सन् अपि, स्वयमपि योगं समास्थाय आस्ते अध्यास्ते स्म॥ ३५॥ 'स्वायंभुवस्य च मनोर्वंश' इत्यादिना कृतस्य प्रश्नस्य यदुत्तरमुक्तं तदुपसंहरति। एतदिति। हे अनघ विदुर, त्वया यत् अहं पृष्टः हे तात, एतत् ते निगदितम्। तत्र कपिलस्य देवहूत्याश्च पावनः श्रोतृवक्तृलोकपावनः, संवादः निगदितः, चकारोऽत्रधारणार्थः॥ ३६॥ कपिलदेवहूतिसंवादश्रवणकीर्त्तनादिफलमाह। य इति। कपिलेन पूर्वं फलमुक्तमत्र तु मैत्रेयेणेति वक्तृभेदान्न पौनरुक्त्यम्। इदम् आत्मयोगगुह्यमात्मयोगेषु गुह्यं कपिलमुनेः मतम् यः अनुशृणोति, वक्तरि सति, यः अभिधत्ते श्रावयति। श्रोतृषु सत्सु, सः पुमान्, सुपर्णकेतौ गरुडध्वजे, भगवति, कृतधीर्निष्पन्नभक्तियोगो भूत्वा, भगवत्पदारविन्दम् उपलभते प्राप्नोति॥ ३७॥

श्रीमद्भागवते तृतीयजलधौ मुक्तार्थरत्नाभृता पेटा कर्दमसूनुना कठिनतासत्तालसंयन्त्रिता।
तातात्कुञ्चिकया मयाधिगतया बुद्ध्या समुद्घाटिता तस्मात्तानि यथायथं मुनिगणाः प्रादाय तुष्यन्त्वलम्॥ १॥
सत्प्रीत्यै विवृतिमिमां कृतां मयैवं प्रेक्षन्तां गतमदमत्सरा हि सन्तः।
एतस्यां किमपि भवेदनन्वितं यत् क्षन्तव्यं मयि दययाऽखिलं हि वैस्तत्॥ २॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः॥ ३३॥

इति तृतीयः स्कन्धः समाप्तः॥

——:ஃ:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीस्वामिनारायणाय नमः ।

अथ चतुर्थः स्कन्धः

अथ प्रथमोऽध्यायः

मैत्रेय उवाच

मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे । आकूतिर्देवहूतिश्च प्रसूतिरिति सुव्रत ॥ १ ॥

निगमगदितकीर्त्तिरार्त्तिहन्ता पुरुकरुणामृतपूर्णनेत्रपद्मः । मम हृदि वसतात्सदाश्रितानां वृषतनयश्च दृगग्रतः सदीशः ॥ १ ॥
वृषकुलकमलप्रफुल्लताकृन्मयि निजधर्मधुरापंकः पिता मे । वितरतु रघुवीरनामधेयो मतिममलां सकलाश्च साधवोऽपि ॥ २ ॥

इहैकत्रिंशता तुर्येऽध्यायैरुक्तो विसर्गकः । यः कृतो ब्रह्ममन्वाद्यैरीश्वराधीनवृत्तिभिः ॥ ३ ॥
मनुकन्यान्वयाः प्रोक्ताः पृथगेकेन तत्र तु । दक्षकन्यान्वयं षड्भिस्ततो दक्षकथोदिता ॥ ४ ॥
पञ्चभिर्ध्रुवचर्यैकादशभिः पार्थिवी कथा । प्रचेतसामथाष्टाभिस्तन्मध्ये पञ्चभिः पितुः ॥ ५ ॥
एवं चतुर्थस्कन्धस्य कथास्ति परमाद्भुता । प्रथमे वर्ण्यते तत्र मनुकन्यान्वयाः पृथक् ॥ ६ ॥

तृतीयस्कन्धे 'स्वायंभुवस्य च मनोर्वंशः परमसंमतः' इत्यादिना स्वायंभुवचरित्रं तत्संततिश्च पृष्टा तत्र स्वायंभुवचरितमुक्त्वा 'एतत्ते आदिराजस्य मनोश्चरितमद्भुतम् । वर्णितं वर्णनीयस्य तदपत्योदयं शृणु' इति तत्संततिकथनं प्रतिज्ञाय देवहूतिसंततिं प्रक्रम्य कलानसूयादयो नव पुत्रिकाः कपिलाख्यः पुत्रस्तच्चरित्रं चेत्येतानि कथितानि । अथेदानीमस्मिंश्चतुर्थस्कन्धे मनुपुत्रस्योत्तानपदः संततिं विस्तारेण कथयिष्यन्नादौ आकूतिप्रसूत्योर्वंशं देवहूतिपुत्रीणां संततिं चाह मैत्रेयः । मनोस्त्विति । हे सुव्रत हे विदुर मनोस्तु स्वायंभुवस्य तु शतरूपाख्यायां मनुपत्न्यामित्यर्थः । तिस्रः कन्याः जज्ञिरे । चकारात् द्वौ पुत्रौ च जज्ञाते इत्यर्थः । ता नाम्ना निर्दिशति । आकूतिः, देवहूतिः, प्रसूतिश्च । इत्येवं विश्रुता इति शेषः । कचित्तु विश्रुता इत्येव पाठः । तदा संबोधनं शेषतोऽवगन्तव्यम् ॥ १ ॥ मनोस्त्विति तु शब्देन मनोरन्योऽपि पुत्रोऽस्तीति सूचितं तद्दर्शयितुमाह । आकूतिमिति । नृपो मनुः भ्रातृमतीं प्रियव्रतोत्तानपादाख्यभ्रातृद्वयवतीम् अपि आकूतिमाकूत्याख्यां स्वदुहितरं रुचये रुचिनाम्ने प्रजापतये शतरूपानुमोदितः शतरूपया कृतानुमोदनः सन् पुत्रिकाधर्मम् आश्रित्य 'अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भवेत्' इति भाषाबन्धनपूर्वं कन्याप्रदानं पुत्रिकाधर्मः स चाभ्रातृकायां कन्यायां पुत्रार्थिन एव प्रसिद्धस्तथापि पुत्रबाहुल्यकामो भाषाबन्धनं कृत्वेत्यर्थः । प्रादाद्दत्तवान् । वस्तुतस्तु मनुना राज्यार्थं पुत्राभावाच्च नेदं कृतमस्ति । किं तु पुत्र्याः पुत्रः साक्षाद्भगवान् भवितेति जानताऽस्य पितृत्वे ज्ञानातिशयवान् मुक्तौ सुखातिशयवान् स्यामिति विचार्यैवं कृतमस्तीति प्रतिभाति ॥ २ ॥ प्रजापतिरिति । भगवानैश्वर्यसंपन्नः रुचिः रुचिनामा सः प्रसिद्धः प्रजापतिः ब्रह्मवर्चस्वी ब्रह्मतेजोयुक्तः सन् । परमेण समाधिना चित्तैकाग्रतापूर्वकेश्वरध्यानेन तस्यामाकूत्यां पत्न्यां मिथुनं पुत्रपुत्रीरूपयुग्मम् अजीजनदुत्पादयामास ॥ ३ ॥ य इति । तयोरपत्ययोर्मध्ये यः पुरुषः सः, यज्ञाः क्रतवः एव स्वं स्वीयं रूपं शरीरं तद्बिभर्त्तीति तथाभूतः, साक्षात् विष्णुः । 'यज्ञो वै विष्णुः' इति श्रुतेः । या स्त्री सा नाम्ना दक्षिणा । भूतेर्लक्ष्म्याः अंशभूता अत एव अनपायिनी सदा सहचारिणीत्यर्थः । अतस्तयोर्वक्ष्यमाणो मिथो विवाहो न विरुद्ध इति भावः ॥ ४ ॥ आनिन्ये इति । स्वायंभुवः मनुः मुदा हर्षेण युक्तः मिथुनजन्मनिमित्तहर्षयुक्तः सन् स्वपुत्र्या आकूत्याः विततरोचिषं विस्तृततेजस्कं पुत्रं स्वगृहम् आनिन्ये आनीतवान् । रुचिः प्रजापतिः दक्षिणं जग्राह । पुत्रिकामेव पुत्रत्वेनापालयदित्यर्थः ॥ ५ ॥ तामिति । कामयानां पतिं कामयमानां तां दक्षिणां यजुषां यज्ञानां पतिः भगवान् उवाह । सः तुष्टायां स्वस्मिन् प्रीतियुक्तायां दक्षिणायां तोषम् आपन्नः सन् द्वादश आत्मजान् पुत्रान् अजनयत् । अत्र 'तुष्टयोरभवन्देवा द्वादशैते सुता बलाः' इति पाठान्तरं तदा तुष्टयोः परस्परं संतोषयुक्तयोः यज्ञदक्षिणयोः द्वादश सुता आत्मजाः अभवन् । एते बलाः महाबलाः सर्वार्थकुशला इत्यर्थः । देवाः अभवन् ॥ ६ ॥ तानाह । तोष इति । तोषः, प्रतोषः, संतोषः, शान्तिः, शुचिः, इडस्पतिः, इध्मः, कविः, विभुः, स्वह्नः, अस्य स्थाने कचित्स्वह्न इत्यपि पाठो दृश्यते, सुदेवः । रोचनः । इत्येते द्विषट् द्वादशसंख्याकाः ॥ ७ ॥ प्रसङ्गात् स्वायंभुव-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मवन्तरगतं षट्कमाह। तुषिता इति द्वाभ्याम्। स्वायंभुवे अन्तरे मन्वन्तरे ते तुषिताः नाम, परस्परं संतुष्टपितृजातत्वात् तुषिताख्यसंज्ञका इत्यर्थः। देवा आसन्। मरीचिमिश्रा मरीचिप्रभृतयः ऋषयः, यज्ञः सुरगणेश्वरो देवेन्द्रः अनेन स्वायंभुवमन्वन्तरगतं षट्कं कथितम्। तद्यथा 'मन्वन्तरं मनुर्देवा मनुपुत्रा महौजसः। ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते' इति हि वक्ष्यति। तत्रात्र स्वायंभुवो मनुः, तुषिता देवाः, मरीचिमुख्याः ऋषयः। यज्ञो हरेरवतारः। स एव तदा सुरगणेश्वरः इन्द्रः, विश्वजिन्नाम्न इन्द्रस्य तन्मन्वन्तरगतस्य हिंस्रयज्ञात्मकवेदप्रतिपादनेन पूर्वकल्पीयमहर्षिकोपादिन्द्रपदात्पतितत्वात्तन्मन्वन्तरे यज्ञेन कार्यद्वयविधानात्तदन्तरं पञ्चकयुतमेवेति स्कान्दादवगन्तव्यम्॥ ८॥

प्रियव्रतेति। महौजसौ महाबलौ प्रियव्रतश्च उत्तानपादश्च तौ मनुपुत्रौ मनुपुत्रत्वात्पृथ्वीपालकावभूतामित्यर्थः। तयोः प्रियव्रतोत्तानपदोः पुत्रौ आग्निध्रध्रुवौ च पौत्रौ नाभिवत्सरौ च नप्तारो ऋषभपुष्पार्णादयश्च तेषां वंशैरिति शेषः। तदन्तरं स्वायंभुवान्तरम् अनुवृत्तं व्याप्तं पालितमिति यावत्। अभूत॥ ९॥ एवमाकूतिसंततिः कथिता। अथ देवहूतिदुहितृसंततिं कथयिष्यन् देवहूतिचरित्रं तु विस्तरेण तृतीये त्वया श्रुतमित्याह। देवहूतिमिति। हे तात अनुकम्प्य, मनुः देवहूतिम् आत्मजां पुत्रीं कर्दमाय मुनये अदात्। तत्संबन्धि देवहूतिसंबन्धि चरितं गदतः कथयतः मम मत्तः भवता श्रुतप्रायं बाहुल्येन श्रुतत्वात्प्रायोग्रहणम्॥ १०॥ प्रसूत्याः संततिस्तु तत्प्रसंङ्गानुप्रसङ्गे एव महता प्रबन्धेन कथनीयमिति सापि पश्चाद्वक्ष्यते इत्यभिप्रायेणात्र संगृह्णाति। दक्षायेति। भगवान् ऐश्वर्यसंपन्नः मनुः प्रसूतिं प्रसूतिसंज्ञां स्वदुहितरं ब्रह्मपुत्राय दक्षाय प्रायच्छत्। यत्कृतः दक्षप्रसूतिभ्यां कृतः, सर्गः महान्सन् त्रिलोक्यां विततः आसीत्। आकूत्यादिसंतत्यपेक्षया प्रसूतिसंततेर्वैपुल्यमनेन कथितम्॥ ११॥ अथ देवहूतिदुहितृसंततिरुच्यते इत्याह। या इति। हे क्षत्तः विदुर याः कर्दमसुताः कलादयः ब्रह्मर्षिपत्न्यः मरीच्याद्यषिपत्न्यः प्रोक्ताः तृतीये कथिताः तासां कर्दमसुतानां प्रसूतिप्रसवं पुत्रपौत्रादिसंतानविस्तारं मे मया प्रोच्यमानं निबोध॥ १२॥ तदेवाह। पत्नीति। कर्दमात्मजा कर्दमस्य सुता, मरीचेः तु पत्नी कला कलानाम्नी, कश्यपनामानं पूर्णिमानं पूर्णिमनामानं च इति पुत्रद्वयं सुषुवे। ययोः कश्यपपूर्णिम्नोः वंशजैरिति शेषः। जगत् आपूरितं व्याप्तम्॥ १३॥ पूर्णिमेति। हे परंतप पूर्णिमा पूर्णिमनाममरीचिपुत्रः स्वपत्न्यामिति शेषः। विरजं विरजनामानं विश्वगं विश्वगनामानं च पुत्रं, देवकुल्यां देवकुल्याख्यां कन्यां च असूत उत्पादयामास। देवकुल्यां विशिनष्टि। या देवकुल्या हरेस्त्रिविक्रमभगवतः पादशौचात् पादप्रक्षालनात् दिवः सरित् गङ्गा अभूत्। स्वर्गङ्गाभिमानिनी देवता बभूवेत्यर्थः॥ १४॥ अत्रेरिति। अत्रेः पत्नी अनसूया अनसूयाख्या या कर्दमदुहिता सा सुयशसः निर्मलकीर्त्तिसंपन्नान् त्रीन् सुतान् जज्ञे। तानाह दत्तमित्यादिना। आत्मेशब्रह्मसंभवान् विष्णुरुद्रविध्यंशतः संभूतान्। दत्तम्, दुर्वाससम्, सोमम्। इत्येतान् जज्ञे इति संबन्धः॥ १५॥

एवं दत्तादीनां विष्ण्वाद्यंशावतारत्वं प्रोक्तं तत्र निमित्तं विना विष्ण्वादीनामवतरणासंभवात्तदवतरणकारणं पृच्छति विदुरः। अत्रेरिति। हे गुरो मैत्रेय स्थितिश्चोत्पत्तिश्चान्तश्च तेषां हेतवः कारणभूताः सुरश्रेष्ठा विष्ण्वादयः अत्रेर्मुनेः गृहे अत्रेर्भार्यायामनसूयायामित्यर्थः। किं स्वित्किं नु चिकीर्षवः कर्त्तुमिच्छवः जाताः। एतत्तज्जननप्रयोजनमित्यर्थः। मे मह्यम् आख्याहि कथय॥ १६॥ तत्र तन्निमित्तं कथयन्नाह। ब्रह्मणेति। ब्रह्मणा चतुर्मुखेन सृष्टौ निमित्तभूतायां सृष्ट्यर्थमित्यर्थः। नोदितः प्रेरितः आदिष्ट इति यावत्। ब्रह्मविदां वरः ब्रह्मविदग्रेसरः अत्रिः पत्न्या अनसूयया सह ऋक्षम् ऋक्षाख्यं कुलाद्रिं ययौ। तत्र गत्वेति शेषः। तपसे तपश्चर्तुं स्थित आस्थितः॥ १७॥ इतो द्वयोरेकसंबन्धः। तस्मिन्निति। मुनिः सोऽत्रिर्ब्रह्मर्षिः तस्मिन्कुलाद्रौ निर्विन्ध्याया निर्विन्ध्याख्यायाः नद्याः स्रवद्भिः स्यन्दमानैः वार्भिर्जलैः समंततः उद्घुष्टे नादिते, प्रसूनानां स्तबका येषु ते च ते पलाशाः किंशुकाश्च, अशोका वञ्जुलाश्च, तेषां काननं तस्मिन्॥ १८॥ प्राणायामेनेति। प्राणायामेन संयम्य मनः नियम्य ततः वर्षशतं शतसंवत्सरपर्यन्तं निर्द्वन्द्वः शीतोष्णादिसहः अनिलभोजनः वायुभक्षकः सन् एकपादेन भुवमवष्टभ्य तपः इति शेषः। आतिष्ठत्॥ १९॥ तस्यात्रेरभिसंधिमाह। शरणमिति। यः एव 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतिप्रसिद्धः एव जगदीश्वरो जगत्सृष्टिस्थितिलयप्रवर्त्तकः। अस्तीति शेषः। तम् अहं शरणं प्रपद्ये। सः मह्यम् आत्मसमां स्वतुल्यां प्रजां प्रयच्छतु। इत्येवं चिन्तयन् आतिष्ठदिति पूर्वेणान्वयः॥ २०॥ तप्यमानमिति। प्राणायाम एधो दारुनिचयो यस्य तेन, मुनेरत्रेः मूर्द्ध्नः निर्गतेन अग्निना तपःप्रकर्षोद्भूतवह्निना तप्यमानं संप्राप्तसंतापं त्रिभुवनं त्रैलोक्यं समीक्ष्य, प्रभवो जगदुत्पत्तिस्थित्यन्तहेतवः त्रयो ब्रह्मविष्णुशिवाः॥ २१॥ अप्सरस इति। अप्सरसश्च, मुनयश्च, गन्धर्वाश्च, सिद्धाश्च, विद्याधराश्च, उरगाश्च, तैः वितायमानयशसः प्रस्तूयमानकीर्त्तयः सन्तः तदाश्रमपदमत्रेराश्रमस्थानं ययुराजग्मुः द्वयोरेकसंबन्धः॥ २२॥

तदिति। तेषामात्मेशब्रह्मणां प्रादुर्भावः प्राकट्यं तस्य संयोगः सांनिध्यं तेन विद्योतितं मनो यस्य सः। एकपादेन उत्तिष्ठन्स्थितः मुनिरत्रिः विबुधर्षभान् देवश्रेष्ठात्मेशब्रह्मणः ददर्श॥ २३॥ प्रणम्येति। ततः भूमौ दण्डवत् प्रणम्य, अर्हते पूज्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनेनेत्यर्हणं पुष्पादिकमञ्जलौ यस्य स एवंभूतः सन् उपतस्थे समीपे स्थितवान्। उक्तमेवार्थं प्रपञ्चयति सार्द्धद्वाभ्याम्। वृषः ककुद्मांश्च, हंसो मरालश्च, सुपर्णो गरुडश्च तेषु स्था उपविष्टास्तान् स्वैः स्वैर्निजनिजैः चिह्नैस्त्रिशूलकमण्डलुचक्रादिभिरङ्कैश्च लक्षितान् अङ्कितान् क्वचिदत्र चिह्नितानिति पाठस्तत्राप्ययमेवार्थः॥ २४॥ कृपेति। कृपया अवलोको यस्मिन् तेन हसद्य तद्वदनं च तेन उपलम्भिताः प्रसन्नत्वेन ज्ञापितास्तान् सर्वलोकगरीयसः सर्वलोकेभ्योऽतिश्रेष्ठांस्तान्विबुधर्षभान् तेषां त्रयाणां रोचिषा दीप्त्या प्रतिहते प्रतिबद्धदर्शनशक्तिनी अक्षिणी निमील्य मुनिः॥ २५॥ चेत इति। चेतश्चित्तं तत्प्रवणं विबुधर्षभासक्तं युञ्जन् कुर्वन् संहताञ्जलिः संबद्धाञ्जलिः सन् श्लक्ष्णया मधुरया सूक्तया शोभनोक्तिमत्या वाचा अस्तावीत् स्तुतवान्। सार्द्धद्वयोरेकान्वयः॥२६॥ तामेव स्तुतिमाह। विश्वेति। विश्वस्य ये उद्भवस्थितिलयास्तेषु निमित्तभूतेषु विश्वसर्गाद्यर्थमित्यर्थः। अनुयुगं प्रतिकल्पं विभज्यमानैः पृथक् पृथक् क्रियमाणैः मायागुणैः रजःसत्त्वतमोभिः प्रगृहीताः देहा यैस्ते ये ब्रह्मविष्णुगिरिशाः ते यूयं भवथेति शेषः। अतः तेभ्यः वो युष्मभ्यं अहं प्रणतः अस्मि। मया तु यः एकः एव जगदीश्वरः भगवान् इह उपहूतः 'शरणं तं प्रपद्येऽहम्' इत्येकस्यैव निर्दिष्टत्वात्। सः क एव युष्मासु मध्ये कतम एव। स युष्माभिरेव कथनीय इत्यर्थः॥ २७॥ उक्तार्थमेव प्रपञ्चयति। एक इति। प्रधानः सर्वोत्कृष्टः एकः एव भगवान् विविधैरुपचारैः मया इह प्रजननाय पुत्रोत्पत्त्यै सर्वेश्वरतुल्यपुत्रलाभायेत्यर्थः। चित्तीकृतः चित्तविषयीकृतः उपासित इति यावत्। अतः तनुभृतां देहिनां मनसोऽपि मनःसकाशादपि दूराद्दूरे वर्त्तमानाः मनसापि गृहीतुमशक्या इत्यर्थः। यूयं त्रयोऽपि कथं तु अत्र आगताः ब्रूत। त्रयाणामागमने कारणं कथयत। प्रसीदत मह्यं प्रसन्ना भवत। इहास्मिन् युष्मत्त्रिकागमने मे मम महान् विस्मयः वर्त्तते। अत्राद्यचरणे नैकधापाठः। तत्र विविधैः प्रधानैरिति पाठे विविधैर्नानाविधैः प्रधानैरुपचारैरित्यर्थः। विबुधप्रधान इति पाठे विबुधेषु देवेषु प्रधान इति भगवद्विशेषणम्॥ २८॥ इतीति। हे प्रभो वश्येन्द्रिय विदुर इत्येवंविधं तस्यात्रिमुनेः वचो वचनं श्रुत्वा विबुधर्षभाः देवश्रेष्ठाः ते त्रयो ब्रह्मविष्णुशिवाः प्रहस्य श्लक्ष्णया गम्भीरया वाचा तम् ऋषिं प्रति आहुः॥ २९॥

उक्तमेवाह। यथेति। हे मुने ते त्वया यथा संकल्पः कृतः तेन संकल्पेन तथैव भाव्यम्। अन्यथा न। यतः सत्संकल्पस्य ते संकल्पः सत्यः एव। ततः हे ब्रह्मन् त्वं यत् एकं जगदीश्वराख्यं तत्त्वं ध्यायसि तत् वयं वै, गुणालम्बने त्रिधा प्रतीयमानमप्यस्मदात्मकं तत्तत्त्वमेकमेवास्ति। त्वया च मूर्तिविशेषनिर्द्धारणमन्तरेण जगत्सृष्टिस्थितिलयहेतुरीश्वर इति हि त्वत्संकल्पस्ते च वयं त्रयोऽपीति। त्रयोऽपि वयमागता इत्यभिप्रायः॥ ३०॥ यद्येवं यूयं त्रयोऽप्येकतत्त्वात्मकाः स्थ, तर्हि मत्तपःप्रीताः सन्तो मत्संकल्पानुरूपाः प्रजा दत्तेत्यत्रेर्जिह्वासंचलनावकाशमाददाना आहुः। अथेति। अङ्ग हे मुने अथ यतो वयमेकतत्त्वात्मका भवामस्ततो हेतोरित्यर्थः। अस्मदंशभूता अस्माकमंशेनोत्पन्नाः ते तव आत्मजाः सुताः लोकविश्रुतास्त्रिषु लोकेषु विख्याताः भवितारो भविष्यन्ति। ते तव यशश्चापि विस्रप्स्यन्ति विस्तृतं करिष्यन्ति। अन्तर्भूतणिजर्थस्य 'सृप्लृ गतौ' इत्यस्य रूपम्। ते तव भद्रं मङ्गलं चास्तु॥ ३१॥ एवमिति। एवं कामवरमत्यभीष्टं वरं दत्त्वा दंपतीभ्यां विश्राणय समाजिताः सम्यक् पूजिताः ते सुरेश्वरा ब्रह्मादयः तयोः दंपत्योरत्र्यनसूययोः सम्यक् मिषतोः पश्यतोः सतोः ततः स्थानात् प्रतिजग्मुः॥ ३२॥ सोम इति। ततः ब्रह्मणः अंशेन सोमश्चन्द्रः अभूत्। विष्णोः अंशेन तु योगवित् दत्तो दत्तात्रेयः अभूत्। शंकरस्य अंशः दुर्वासाः अभूत्। अथ अङ्गिरसः ऋषेः प्रजाः निबोध शृणु॥ ३३॥ श्रद्धेति। अङ्गिरसः मुनेः पत्नी श्रद्धा श्रद्धाख्या कर्दमस्य दुहिता तु चतसश्चतुःसंख्याकाः कन्यकाः असूत सूतवती। ता नाम्ना निर्दिशति। सिनीवाली, कुहूः, राका तथा चतुर्थी अनुमतिः एताश्चतस्रो लक्षणभिन्नचतुस्तिथ्यभिमानिन्यः। 'सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः'। सामावास्या 'कलाहीने सानुमतिः पूर्णे राका निशाकरे' इत्यमरः। सा पूर्णिमा॥ ३४॥

तत्पुत्राविति। अपरौ कन्याभ्यः सकाशादितरावपि तत्पुत्रावङ्गिरसः सुतौ भगवान् उतथ्यः ब्रह्मिष्ठो ब्रह्मवेत्ता साक्षात् बृहस्पतिश्च इति नामानौ, स्वारोचिषेऽन्तरे स्वारोचिषमन्वन्तरे ख्यातौ प्रसिद्धौ आस्तां बभूवतुः। केचित्तु भगवान् ब्रह्मिष्ठ इति उभयोर्विशेषणे इत्याहुः। चकारात्तृतीयः संवर्त्तनामाप्यङ्गिरसः सुतो बोध्यः 'संवर्त्तोऽयाजयद्यं वै महायोग्यङ्गिरःसुतः' इति नवमस्कन्धे उक्तेः॥ ३५॥ पुलस्त्य इति। किं च पुलस्त्यः मुनिः पत्न्यां स्वभार्यायां हविर्भुवि हविर्भूर्नाम्न्यायां कर्दमस्य पुत्र्याम् अगस्त्यमेतन्नामानं पुत्रम् अजनयत्। तं विशिनष्टि। सः अन्यजन्मनि दहाग्निर्जाठराग्निः अभूत्। तथा महातपाः विश्रवाश्चापि पुलस्त्यसुत इति शेषः॥ ३६॥ तस्येति। तस्य विश्रवसः इलविलासुतः इलविलायां जातः पुत्रः कुबेरः एतन्नामा स तु यक्षपतिः यक्षाणां स्वामी, देवः देववन्मनोज्ञः अभूत्। तथा अन्यस्यां केशिनीसंज्ञायामपरभार्यायां रावणः कुम्भकर्णः विभीषणश्च। इत्येते त्रयो जाताः। महाभारते वनपर्वणि द्विशताधिकचतुःसप्ततितमेऽध्याये विश्रवसः पुष्पोत्कटायां पत्न्यां रावणकुम्भकर्णौ। मालिन्यां विभीषणः, राकायां खरः, शूर्पणखा चेत्युक्तमस्ति। तत्कल्पभेदेन बोध्यम्॥ ३७॥ पुलहस्येति। हे महामते पुलहस्य भार्या सती पतिव्रता गतिः गत्याख्या कर्दमस्य दुहिता त्रीन् सुतान् असूत तान्नाम्ना निर्दिशति। कर्मश्रेष्ठं वरीयांसम्, सहिष्णुं चेति॥ ३८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रतोरिति । क्रतोः क्रत्वाख्यस्य मुनेरपि भार्या पत्नी क्रिया क्रियाख्या कर्दमस्य सुता ब्रह्मतेजसा ज्वलतः प्रकाशमानान् षष्टिसहस्राणि बालखिल्यान् वानप्रस्थान् ऋषीन् असूयत ॥३९॥ ऊर्जायामिति । हे परंतप वसिष्ठस्य भार्यायाम् ऊर्जायाम् अरुन्धत्या एव ऊर्जेति नामान्तरं चित्रकेतुप्रधानाः अमला निर्मलाचाराः ते, मन्वन्तरे नामान्तरैः सप्तर्षिषु प्रसिद्धाः । सप्त ब्रह्मर्षयः पुत्राः जज्ञिरे ॥४०॥ तान्नाम्ना निर्दिशति । चित्रकेतुरिति । चित्रकेतुः, सुरोचिश्च, विरजाः, मित्रश्च, उल्वणः, वसुभृद्यानः, इत्येकमेव नाम। द्युमान्, एते तु सप्त एव । अपरे शक्त्यादयः अन्यस्यां भार्यायां जाता इति शेषः ॥ ४१ ॥

चित्तिरिति । अथर्वणः पत्नी चित्तिः तु 'शान्तिस्त्वथर्वणः पत्नी' इति पाठे शान्तिरेव चित्त्याख्या बोध्या । धृतं व्रतं येन तं दध्यञ्चम् अश्वशिरसं च लेभे । लब्धवती । अत्र केचित्तु धृतव्रतमश्वशिरसं चेति विशेषणद्वयोपेतं दध्यञ्चमित्येकं वदन्ति । अथ भृगोः वंशं मे मत्तः निबोध शृणु ॥ ४२ ॥ भृगुरिति । महाभागः भृगुः पाठान्तरे संबोधनम् । ख्यात्यां पत्न्यां धातारं विधातारं च भगवत्परां भगवदेकाश्रयां श्रियं च पुत्रौ च पुत्री चेति पुत्रास्तान् 'स्त्रिया सहोक्तौ पुमान् शिष्यते' इति त्रित्वाद्बहुवचनम् । केचित्तु बहुवचनमार्षमिति वदन्ति अजीजनत् ॥ ४३ ॥ आयतिमिति । मेरुरेतत्संज्ञः प्रजापतिः सुते स्वपुत्र्यौ आयतिं नियतिं चेति द्वे । तयोर्धातृविधात्रोः अदात् दत्तवान् । ताभ्यां धातृविधातृभ्यां सकाशात् तयोर्मेरुदुहित्रोरायतिनियत्योः एव यथाक्रमं मृकण्डुः प्राणश्च इत्युभौ अभवताम्, एव ॥ ४४ ॥ मार्कण्डेय इति । मृकण्डोः मार्कण्डेयः प्राणात् वेदशिरोनामा मुनिः अभवदिति शेषः । पुनर्भृगुवंशं स्मृत्वा वदति । कविश्च कविसंज्ञोऽपि भार्गवो भृगोरेव पुत्रः । यस्य कवेः सुतः उशनाः शुक्रः तु भगवान्महैश्वर्यसंपन्नः 'भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः' इत्यादिपर्ववचनात् ॥ ४५ ॥ देवहूतिदुहितृसंततिमुपसंहरति । नवेति । हे क्षत्तः एते नव मुनयो मरीच्यादयः सर्गैः स्ववंश्यैः लोकान् अभावयन्नुत्पादयामासुः । एषः कर्दमदौहित्रः कर्दमदुहितृसंबन्धी, संतानः मया तव कथितः श्रद्दधानस्य शृण्वतः श्रद्धापूर्वं श्रवणकारकस्येत्यर्थः । सद्यः तत्क्षणमेव पापहरः पापनिवर्त्तकः अत एव परः सर्वोत्तमो भवति ॥ ४६ ॥ अथ मनोस्तृतीयायाः प्रसूतेः संतानमाह । प्रसूतिमिति । अजात्मजः ब्रह्मपुत्रः दक्षः मानवीं स्वायंभुवमनुदुहितरं प्रसूतिं प्रसूतिसंज्ञाम् उपयेमे उवाह । सः तस्यां प्रसूत्याम् अमललोचनाः षोडश दुहितॄः ससर्जोत्पादितवान् हि ॥ ४७ ॥ त्रयोदशेति । विभुः दुहित्रभिप्रायविज्ञानसमर्थो दक्षः तासु दुहितृषु मध्ये त्रयोदश दुहितॄः धर्माय अदात् । तथा एकाम् अग्नये अदात् । एकां युक्तेभ्यो मिलितेभ्यः पितृभ्यः अदात् । एकामन्यां भवच्छिदे भवाय अदान । अत्रास्य भवच्छित्त्वोक्तिर्ज्ञानप्रदत्वाद्विवक्षिता 'ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेदधोक्षजात्' इति स्कान्दोक्तेः ॥ ४८ ॥

तत्र त्रयोदशापि दक्षस्य दुहितॄः धर्मस्य पत्नीर्नाम्ना निर्दिशति । श्रद्धेति । श्रद्धा, मैत्री, दया, शान्तिः, तुष्टि, पुष्टिः, क्रिया, उन्नतिः, बुद्धिः मेधा, तितिक्षा, ह्रीः, मूर्त्तिश्च, धर्मस्य पत्नयो धर्माङ्गनाः ॥ ४९ ॥ तासां प्रत्येकं संततिमाह । श्रद्धेति । श्रद्धा शुभम् असूत । अत्र श्रद्धादीनामासां श्रद्धादिनामत्वं, तदपत्यानां शुभादिनामत्वं च श्रद्धादिधर्मयुक्तत्वे श्रद्धादिकार्यशुभादिधर्मयुक्तत्वेन च बोध्यम् । नाम्नामन्वर्थत्वात् । यद्वा । श्रद्धाशुभाद्यभिमानिदेवतात्वादासां तेषां च तन्नामत्वम् । मैत्री प्रसादम् असूत । दया अभयम् असूत । शान्तिः सुखम् असूत । तुष्टिः मुदम् असूत । पुष्टीः स्मयम् असूयत ॥५०॥ योगमिति । क्रिया योगम् असूयत । उन्नतिः दर्पम् असूयत । बुद्धिः अर्थम् असूयत । मेधा स्मृतिम् असूयत । तितिक्षा तु क्षेमम् असूयत ह्रीः प्रश्रयं सुदम् असूयत । यद्यप्यत्र यौ स्मयदर्पौ तावसुरसंपदि गणितौ स्तः, तथापि भागवतयोरेतयोर्दैवसंपत्त्वान्न बाधः शङ्क्यः । यथाहं भागवतो न ममेदं युक्तमेवंविधदर्पस्य योग्यत्वात् ॥ ५१ ॥ मूर्त्तिरिति । सर्वेषां गुणानां कल्याणकारिगुणानामुत्पत्तिरभिव्यक्तिर्यस्यां सा मूर्त्तिः, पाठान्तरे सर्वगुणानामुत्पत्तिर्ययोस्तौ, ऋषी ऋषिमूर्त्तिधरौ नरनारायणौ भगवदवतारभूतौ असूतेति शेषः । ययोर्नरनारायणयोः जन्मनि जन्मकाले अदः एतत् विश्वं सुनिर्वृतं सुखितं सत् अभ्यनन्दत् । अत्र ऋषी इति विशेषणोपादानस्यायं भावः । 'नारायणो हि विश्वात्मा चतुर्मूर्त्तिः सनातनः । धर्मात्मजः संबभूव पितैवं मेऽभ्यभाषत । कृते युगे महाराज पुरा स्वायंभुवेऽन्तरे । नरो नारायणश्चैव हरिः कृष्णः स्वयंभुवः । तेषां नारायणनरौ तपस्तेपतुरव्ययौ । बदर्याश्रममासाद्य' इति नारायणीयाख्याने 'शास्त्रेऽन्यौ हरिकृष्णाख्यावनयोः सोदरौ स्मृतौ एभिरेकोऽवतारः स्याच्चतुर्भिः सनकादिवत्' इति लघुभागवतामृते चोक्तेर्धर्मात्मजाश्चत्वारोपि बन्धवस्तत्र द्वौ नैष्ठिकधर्माश्रितावत्र ऋषिशब्देनाभिहितौ । लघुभागवतामृतीयोक्तश्लोकव्याख्याने 'हरिकृष्णौ गृहिणौ बभूवतुः' इत्युक्तमस्ति । इति हेतोर्गृहिणः सकाशात्त्यागिनोः श्रेष्ठत्वादत्र गृह्यपोहपूर्वं त्यागिनोरेवोपादानं कृतमिति ॥ ५२ ॥ मनांसीति । मनांसि भगवज्जनचेतांसि । ककुभो दिशः वाता वायवः । सरितो नद्यः । अग्नयोऽग्निहोत्रिणां वह्नयश्च प्रसेदुः, संप्रसन्ना अभवन् । दिवि तूर्याणि अवाद्यन्त । देवैरिति शेषः । कुसुमवृष्टयः पेतुः । विद्याधरहस्तमुक्ता इति शेषः ॥ ५३ ॥

मुनय इति । तुष्टाः प्रसन्नतां प्राप्ता मुनयः तुष्टुवुरस्तुवन् । गन्धर्वाश्च, किन्नराश्च ते जगुर्विष्णुपद्यान्यगायन्त । देव्यो देवानां संबन्धिन्यः स्त्रियोऽप्सरसः नृत्यन्ति स्मानृत्यन् । एवं परममङ्गलम् आसीत् । देवा ब्रह्मेन्द्रादयः, ब्रह्मर्षयश्च एते सर्वे अभिष्टवैः स्तवनैः उपतस्थुः । अवतीर्णौ नरनारायणौ परमेश्वरौ ज्ञात्वा तद्दर्शनकामाः सर्वे ब्रह्मादयस्तत्रागत्य समीपे स्थित्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्तोत्रैस्तुष्टुवुरिति समुदायार्थः ॥ ५४ ॥ स्तुतिमेवाह द्वाभ्याम् । य इति । निजया आत्मीयया मायया स्वसंकल्पेन आत्मनि सर्वाधारभूते स्वात्मनि, खे आकाशे रूपभेदं सितनीलादिरूपभेदम् इव यत् इदं विश्वं विरचितम् । भवतीति शेषः । तस्य विश्वस्य प्रतिचक्षणं प्रतिबोधनं तस्मै ज्ञापयितुमित्यर्थः । ऋषेरिव मूर्त्तिर्यस्य तेन, एतेन रूपेण अद्य धर्मस्य सदनं तस्मिन् यो भगवान् प्रादुर्भूतः तस्मै परस्मै पुरुषाय नमः । यद्वा निजया मायया स्वसंकल्पेन आत्मनि जीवे एकवचनं जात्यभिप्रायम् । खे रूपभेदमिव मेघादिकृतो नीलादिरूपो भेद इवेत्यर्थः । इदं देवादिरूपं विरचितम् । अस्तीति शेषः । वस्तुतस्तु स यथा आकाशादतिरिक्तः सन्नपि भ्रान्तदृष्टीनामाकाशाभिन्नत्वे प्रतीतो जायते । तद्वद्देवादिरूपभेदाद्विलक्षणे जीवस्वरूपे तदभिन्नत्वेनैव भ्रान्तिदृष्टीनां प्रतीयमानो देवादिरूपभेदः । तथा चोक्तं 'सितनीलादिभेदेन यथेदं दृश्यते नभः । भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक्' इति । अस्मिन् पक्षे भगवत्संकल्पादेव जीवस्य बन्धस्तत्प्रतिचक्षणाय । मत्संकल्पात्तवैवंभूतदेवादिशरीरादात्मभावो जातोऽस्तीति बोधयितुमित्यर्थः । देवादिविलक्षणब्रह्मात्मकात्मस्वरूपबोधकपूर्वं संसारमोचनायेति भावः । एतेनेत्याद्यन्यत् पूर्ववत् ॥ ५५ ॥ सोऽयमिति । सः स्वसंकल्पविहितजगद्बन्धनमोक्षः । अनुनेयतत्त्वः शास्त्रैकवेद्यविचित्रशक्तिसत्यस्वरूपः अयं भगवान् स्थितिः पालनं च, व्यतिकरः सृष्टिश्च, उपशमः संहारश्च, तत्समाहारस्तस्मै सत्त्वेन सत्त्वगुणेन सृष्टान् नोऽस्मान् सुरगणान्, यत् श्रियो यस्या लक्ष्म्या निकेतं स्थानम् अमलं विरजसम् अरविन्दं रक्तोत्पलं तत् क्षिपता तिरस्कुर्वता अदभ्रकरुणेनानल्पदयायुक्तेन विलोकनेन दृश्यात् । आशीर्लिङ् आर्द्धधातुकत्वात्पश्यादेशाभावः । पाठान्तरे तु दृश्यान् कृपावलोकनविषयत्वयोग्यानस्मान्पश्यत्वित्यर्थः ॥ ५६ ॥

एवमिति । हे तात एवमुक्तप्रकारेण लब्धः कृपावलोको यैस्तैः सुरगणैः अभिष्टुतौ अर्चितौ भगवन्तौ परमेश्वरौ स्वयं नरनारायणौ गन्धमादनं गन्धमादनाख्यं हिमाद्रिशिखरं ययतुः गतवन्तौ ॥ ५७ ॥ ताविति । भगवतः हरेः पुरुषोत्तमस्य अंशावंशावतारभूतौ तौ इमो नरनारायणौ कर्त्तारौ, इहास्मिन् द्वापरान्ते भुवः पृथिव्याः भारव्ययाय भारस्य नाशाय चोऽवधारणे । यदुकुरूद्वहौ यदुकुरुकुलश्रेष्ठौ कृष्णौ कृष्णनामभाजौ श्रीकृष्णार्जुनौ कर्मभूतौ आगतौ प्राप्तावाविष्टावित्यर्थः । वै । अत्र लघुभागवतामृते यथा । ताविति । तौ हरेरंशौ नरनारायणौ कर्त्तारौ इह द्वापरान्ते कृष्णौ कर्मभूतौ आगतौ प्रवृष्टौ वासुदेवे नारायणोऽर्जुने नरः प्राविशदित्यर्थः । नन्वत्रैवमर्थे कृते 'धर्मपुत्रौ हरेरंशौ नरनारायणाभिधौ । चन्द्रवंशमनुप्राप्य जातौ कृष्णार्जुनावुभौ' इति स्कान्दवाक्यस्य का गतिरिति चेत्तदप्युक्तं तत्रैव 'कृष्णस्य यत्स्वयं रूपत्वमुक्तं तदसहिष्णून् अनुवदंस्तन्मतं निरस्यति' । एवमुक्त्वोत्तरत्रैतद्वाक्यमुक्त्वा तस्य वास्तवमर्थं वदति । 'कृष्णार्जुनौ कर्त्तारौ धर्मपुत्रौ नरनारायणौ प्राप्यात्मसात्कृत्य चन्द्रवंशमनुजातौ' इति । स्वयं भगवत्यवतीर्णे तदंशास्तस्मिन् प्रविशन्तीति निर्णयादिति । नरनारायणयोर्हरेरंशत्वं स्कान्दवाक्य एवाभिहितं 'कृष्णस्तु भगवान्स्वयम्' इत्येवं त्वत्र प्रथमस्कन्धे एवाभिहितमस्ति । लघुभागवतामृतार्थे शङ्कातत्समाधानपूर्वं द्विधाक्तार्थस्यैवं भावः । चक्रवर्त्तिनि भूपाले स्वदेशागते खण्डमण्डलाधिपः सम्राजं मिलित्वा साधनीयं साधयतीति । चक्रवर्त्तिनृपो वा स्वकार्यसिद्ध्यै खण्डमण्डलाधिपदेशे व्रजंस्तं पुरस्कृत्य तद्द्वारा स्वार्थं साधयतीति प्रोक्तार्थे न बाधः ॥ ५८ ॥ एवं दक्षदुहितॄणां त्रयोदशानां धर्मपत्नीनां संततिः कथिता । अथाग्नये दत्तायाः स्वाहाख्याया दक्षसुतायाश्चतुर्दश्याः संतानमाह । स्वाहेति । अभिमानिनः भार्यामत्यन्तानुकूलां मन्यमानादित्यर्थः । अग्नेः पत्नी स्वाहा चापि त्रीन् आत्मजान् पुत्रान् अजीजनत् प्रसूतवती । अभिमानिन इत्यात्मजविशेषणं वा । तदा त्रेताग्न्यभिमानिनो देवानित्यर्थः । तन्नामानि दर्शयति । पावकं पवमानं च शुचिं च हुतभोजनमिति त्रयाणां विशेषणम् । हुतं देवतोद्देशेन त्यक्तं चरुपुरोडाशादिकं भुङ्क्ते इति हुतभोजनस्तम् ॥ ५९ ॥

तेभ्य इति । तेभ्यः पावकादित्रिभ्यः चत्वारिंशत् पञ्च च अग्नयः समभवन् । एकैकस्मात्पञ्चदश पञ्चदशेत्येवं पञ्चचत्वारिंशदित्यर्थः । द्वितीयश्चकारोऽवधारणार्थः । ते पञ्चचत्वारिंशदग्नयः, पितरः पावकादयस्त्रयश्च, पितामहः पावकादिपिता च, तैः साकम् एव एकोनपञ्चाशत् जाताः ॥ ६० ॥ तानग्नीन्विशिनष्टि । वैतानिक इति । यन्नामभिर्येषामग्नीनां संज्ञाभिः वैतानिके वैदिके कर्मणि तथा यज्ञे । यद्वा । यज्ञे यज्ञरूपे वैतानिके कर्मणि आग्नेय्य अग्निदेवताकाः इष्टयो यागाः ब्रह्मवादिभिः वेदविद्भिः निरूप्यन्ते । ते तु अग्नयः त एवैतेऽग्नय इत्यर्थः ॥ ६१ ॥ अथ पञ्चदश्या दक्षदुहितुः पितृपत्न्याः स्वधायाः संततिं वक्ष्यन् स्वधास्वामिनः पितॄन्विभजति । अग्निष्वात्ता इति । अग्निष्वात्ताः, बर्हिषदः, इति पितरः द्विविधाः । तत्राद्याः सौम्याः सोमपाः । अन्ये आज्यपाः, पुनः साग्नयः अनग्नयः, अग्नौकरणवन्तः साग्नयः । येषामग्नौकरणं नास्ति तेऽनग्नयः । तत्राद्या अयज्वानः, अन्ये यज्वानः । तथा च श्रुतिः 'ये वै यज्वानस्ते वै पितरो बर्हिषदः । ये वा अयज्वानो गृहमेधिनस्तेऽपि पितरोऽग्निष्वात्ताः । इति । तेषामुभयविधानां पितॄणां पत्नी दाक्षायणी दक्षदुहिता स्वधा स्वधाख्या आसीत् ॥ ६२ ॥ तेभ्य इति । स्वधा, तेभ्यः पितृभ्यः मेधां वैतरणीं च इति द्वे कन्ये दधार प्रसूतवतीत्यर्थः । ते उभे ब्रह्मवादिन्यौ वेदविचार-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विचक्षणे, ब्रह्मोपदेष्ट्र्यावित्यर्थः। ज्ञानं शास्त्रविचारजोऽवबोधश्च, विज्ञानं विवेकादिजन्योऽवबोधश्च, तयोः पारगे अन्तं गतवत्यौ। सनकादिवदूर्ध्वरेतस्के ते इति भावः। अभूताम्। केचित्त्वत्र 'मेनां वैहारिणीं स्वधा' इति पठन्ति। अन्ये 'वयुनां धारणीं तथा' इति पठन्ति 'मेनां वै धारणीं तथा' इति विष्णुपुराणे ॥ ६३ ॥ भवस्येति। भवस्य शिवस्य पत्नी सतीनाम्नी षोडशी दक्षसुता सा गुणशीलतः गुणशीलादिभिरित्यर्थः। आत्मनः स्वस्याः सदृशं देवं भवं शिवम् अनुव्रता सेवमाना सत्यपि पुत्रं न लेभे ॥ ६४ ॥

पितरीति। स्वे आत्मीये पितरि दक्षे, अनागसे निरपराधिने भवाय शिवाय रुषा क्रोधेन अप्रतिरूपे असदृशे प्रतिकूले इति यावत्। जाते सतीति शेषः। आत्मना स्वयमेव आत्मानं देहम् अप्रौढा बाला सती एव योगसंयुता योगेनाग्निमुत्पाद्यै-वेत्यर्थः। अजहात्तत्याज। योगाग्निना देहं ददाहेत्यर्थः ॥ ६५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः

विदुर उवाच

भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः। विद्वेषमकरोत् कस्मादनादृत्यात्मजां सतीम् ॥ १ ॥

प्रथमाध्यायसंप्रोक्ते विद्वेषे भवदक्षयोः। द्वितीये वर्ण्यते हेतुर्विश्वसृट्क्रतुसंभवः ॥ १ ॥

संग्रहोक्तमर्थं विस्तरतो बुभुत्सया पृच्छति विदुरः। भव इति त्रिभिः। शीलवतां निर्वैरत्वसमदर्शनत्वादिरूप-स्वभाववतां मध्ये श्रेष्ठे उत्कृष्टे भवे शिवे, दुहितृषु वत्सलः दक्षः सतीं सतीनाम्नीम् आत्मजां पुत्रीम् अनादृत्य कस्माद्धेतोः विद्वेषम् अकरोत्। न च दुहितृजामातरौ विद्वेषार्हाविति भावः ॥ १ ॥ किं चेतोऽपि न भवो विद्वेषार्ह इत्याह। क इति। को दक्षः चराचराणां गुरुस्तं ज्ञानोपदेष्टारमित्यर्थः। अचराणामपि ज्ञानसंपादने समर्थः किमुत चराणामिति कैमुत्यन्यायद्योतना-याचरपदं प्रयुक्तम्। जगतः जिज्ञासोर्लोकस्य, महद्दैवतमाराध्यं 'रुद्रस्तारकं ब्रह्म' व्याचष्टे 'शंकराज्ज्ञानमन्विच्छेत्' इति श्रुतिस्मृतिभ्यां ज्ञानार्थजिज्ञासुभिराराध्यमिति भावः। आत्मारामं सर्वभूतान्तरात्मभूतपरमपुरुषस्वरूपविहितारामभित्यर्थः। अत एव शान्तविग्रहम् अतो निर्वैरं तं भवं कथं द्वेष्टि। अनेनास्य द्वेषाचरणमयुक्तमिति भावः। यद्वा। य उक्तविशेषणविशिष्टः शिवस्तं को वा द्वेष्टि न कोऽपीति भावः ॥ १ ॥ एतदिति। हे ब्रह्मन् जामातुर्भवस्य श्वशुरस्य दक्षस्य च तु यतो हेतोस्त्वित्यर्थः। विद्वेषः अभवदिति शेषः। यतो विद्वेषात् सती सत्याख्या दक्षदुहिता दुस्त्यजान् प्राणान् तत्यजे तत्याज। एतत् मे मह्यम् आख्याहि ॥ ३ ॥ इत्थं विदुरेणापृष्टो मैत्रेयो भवदक्षयोर्मिथो विद्वेषनिमित्तं तन्निमित्तं सतीदेहत्यागं च सप्रपञ्चमुप-पादयिषुरौपोद्घातिकीं कथां प्रस्तौति। पुरेति। पुरा पूर्वं विश्वसृजां मरीच्यादिप्रजापतीनां सत्रे बहुयजमानकर्तृको यागः सत्रं तस्मिन्नित्यर्थः। परमर्षयः न केवलमेत एव, किं तु मुनयः सर्वेऽपि मुनिगणाः तथा सानुगाः सभृत्याः सर्वे अमरगणा इन्द्रादयो देवगणाः अग्नयोऽग्न्यभिमानिन्यो देवताश्च समेताः संघीभूताः आसन् ॥ ४ ॥

तत्रागच्छन्तं दक्षं वीक्ष्य सदःस्था अभ्युत्थिता इति युग्मेनाह। तत्रेति। तत् महत् सदः वितिमिरं कुर्वन्तं रोचिषा स्वदीप्त्या भ्राजमानम् अत एव अर्कम् इव तत्र सदसि प्रविष्टं दक्षमिति शेषः। दृष्ट्वा ॥ ५ ॥ उदिति। तस्य दक्षस्य या भाः कान्तिस्तया आक्षिप्तमभिभूतं तेजो येषां ते तथोक्ताः ऋषयः सहाग्नयोऽग्न्यभिमानिदेवतासहिताः, ते सदस्याः सभासाधवो जनाः विरिञ्च्यं ब्रह्माणं शिवं च ऋते विना स्वधिष्ण्येभ्यः स्वस्वासनेभ्यः। उदतिष्ठन् उत्थितवन्तः ॥ ६ ॥ स इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः भगवानैश्वर्यसंपन्नः सः दक्षः सदस्पतिभिः सभासज्जनमुख्यैः साधु सम्यग्यथा तथा सत्कृतः पूजितः संमानितो वा सन्। लोकानां गुरुत्तम् अजं ब्रह्माणं नत्वा प्रणम्य तदाज्ञया ब्रह्मणो निदेशेन निषसादोपविष्टवान् ॥ ७ ॥ प्रागिति । प्राक्स्वोपवेशात्पूर्वमेवागत्य निषण्णमुपविष्टं मृडं शिवं दृष्ट्वा तदनादृतः तेन मृडेन प्रत्युत्थानादिभिरसत्कृतो दक्षः नामृष्यत्तदसत्करणं न सेहे। वामं वक्रं यथा चक्षुर्भ्यां स्वनयनाभ्याम् अभिवीक्ष्य दहन्निव शिवं भस्मसात्करिष्यन्निव उवाच ॥ ८ ॥ उक्तिमेवाह । श्रूयतामित्यादिना यज्ञभागं न लभतामित्यन्तेन ग्रन्थेन । श्रूयतामिति । सहदेवा देवैः सहिताः, सहाग्नयोऽग्निभिः सहिताः, हे ब्रह्मर्षयो महर्षयः साधूनां वृत्तमाचारं ब्रुवतः कथयतः मे मम वक्ष्यमाणं वच इति शेषः । श्रूयतां युष्माभिरिति शेषः । तदेतच्च अज्ञानात् न, मत्सराच्च न नैव कथयिष्यामीत्यर्थः ॥ ९ ॥ अयमिति । नाम्ना निर्देशमसहमानोऽयमिति सर्वनाम्ना निर्दिष्टवान् । अयं शिवः लोकपालानां मध्ये निविष्टोऽपि तेषामिति शेषः । यशोघ्नः यशोनाशकः, निरपत्रपः तु मर्यादाभञ्जनजन्यलज्जाशून्यश्चास्तीत्यर्थः । स्तब्धेनोचितक्रियाशून्येन, ध्वस्तेनेति पाठे भ्रष्टेन येनानेन शिवेन सद्भिः सत्पुरुषैः आचरितोऽनुष्ठितः पन्था वैदिकाचारः दूषितः, दोषं प्रापितः । विनाशित इति यावत् ॥ १० ॥

स्तब्धतामेव प्रपञ्चयति । एष इति द्वाभ्याम् । एषः शिवः यद्यस्मात् विप्राग्निमुखतः विप्राणामग्नेश्च समक्षतः विप्राग्निसाक्षिकं यथा भवति तथेत्यर्थः । सावित्र्या इव सावित्रतुल्यायाः मे मम दुहितुः पाणिं साधुवत्साधुताभाग्यथा भवति तथा वस्तुतस्त्वसाधुरेव अग्रहीत । ततः मे मम शिष्यतां प्राप्तः ॥ ११ ॥ गृहीत्वेति । मर्कटस्येव लोचने यस्य सोऽयं मृगशावस्य हरिणबालकस्याक्षिणी इव अक्षिणी यस्यास्तस्या मत्पुत्र्याः पाणिं गृहीत्वा ऊढ्वेत्यर्थः । मच्छिष्यः सन्निति शेषः । प्रत्युत्थानाभिवादार्हे मयि वाचा वाङ्मात्रेणापि उचितं मामुद्दिश्य कर्तुं योग्यं सत्कारं न अकृत न कृतवान् ॥ १२ ॥ अनर्हाय कन्यां दत्तवानहमित्यनुतप्यमान आह । लुप्तक्रियायेति सार्द्धैश्चतुर्भिः । लुप्ताः क्रियाः सदाचारा येन तस्मै अत एव अशुचयेऽपवित्राय मानिने दुरहंकारिणे, भिन्नाः सेतुर्धर्ममर्यादा येन तस्मै, अनिच्छन्नपि दातुमिति शेषः । अहं बालां कन्यां, शूद्राय उशतीं दोषवर्जितत्वात्कमनीयां गिरं वेदवाचम् इव, अदां दत्तवान् ॥ १३ ॥ प्रेतेति । योऽयं घोरेषु स्वत एव भयंकरेषु प्रेतावासेषु श्मशानेषु, प्रेतैः भूतगणैश्च वृतः घोरैरिति पाठे घोरैर्विकृतैर्भूतगणैरिति योजना । नग्नो विवसनः व्युप्तकेशो विकीर्णशिरोरुहः सन् , उन्मत्तवत् रोगविक्षिप्तचित्तजन इव हसन्नट्टहासमाचरन् रुदन्नश्रुविमोचनं कुर्वन्सन् अटति इतस्ततोऽटनमाचरति ॥ १४ ॥ चितेति । चितायाश्चितेर्यद्भस्म श्मशानिकविभूतिस्तेन कृतं स्नानं येन सः । प्रेतानां स्रजो माला यस्य सः । अलंकृतप्रेताङ्गादुत्तार्याधोनिःक्षिप्तपुष्पमालाः कण्ठे दधान इत्यर्थः । नृणामस्थीनि भूषणानि यस्य सः, स्वयं च अशिवोऽमङ्गलः सन्नपि शिवापदेशः शिव इति लोकप्रतारणाय व्यवहरणमात्रं यस्य सः, स्वयं च मत्तः, मत्ताश्च ते जनाश्च तेषां प्रियः, मत्ता जनाः प्रियाः यस्येति वा । ह्यवधारणे । तमोमात्रात्मकः केवलतमोरूपः आत्मा स्वभावो येषां तेषां प्रमथभूतानां प्रमथाख्यभूतविशेषाणां पतिः ॥ १५ ॥

तस्मा इति । उन्मादानां भूतविशेषाणां नाथस्तस्मै दुहृदे दुष्टचित्ताय नष्टशौचाय आचारहीनाय तस्मै शिवाय बतेति खेदे । साध्वी सती कन्या, परमेष्ठिना ब्रह्मणा चोदितश्चोदितेनेत्यर्थः । आर्षत्वात्तद्वत्प्रत्ययेनेन तृतीयार्थे प्रथमा । मया दत्ता । केचित्तु चोदिते इति सप्तम्यन्तं पठित्वा, परमेष्ठिना प्रेरिते सतीत्यपि व्याख्यां कुर्वन्ति । केचिदत्र लुप्तक्रियायाशुचये इत्यादिग्रन्थं रुद्रनिन्दापरं यथाश्रुतं व्याख्याय वास्तवस्त्वयमर्थ इत्युपक्रम्य, लुप्ताः क्रिया यस्मिन् , परब्रह्मत्वात् । अत एव नास्ति शुचिर्यस्मात् , अमानिने अभिन्नसेतवे इति च छेदः । तस्य परमेश्वरस्य मदीया मानुषी कन्या कथं योग्या स्यादिति लज्जादिना दातुमनिच्छन्नपि तत्संबन्धलोभेन दत्तवान् । शूद्रायेत्यतदर्हत्वमात्रे दृष्टान्तः न हीनत्वे । पूर्वापरस्ववचनविरोधापत्तेः । यथा कश्चिच्छूद्राय वेदमर्थलोभेन ददाति, तद्वत् प्रेतावासेष्वित्यादिसर्वं विडम्बनमात्रमिति स्वयमेवाह उन्मत्तवदिति । अन्यथा उन्मत्त इत्येवावक्ष्यत् । अशिवः नास्ति शिवो यस्मात् , अमत्तः अमत्तजनप्रिय इति च छेदः । पतिः प्रमथभूतानामिति भक्तवात्सल्यमाह । तामसानपि दोषमपनीय पातीति, नष्टानामपि शौचं शुद्धिर्यस्मात् , दुष्टेष्वप्येते मयानुकम्प्या इति हृन्मनो यस्य स दुर्हृत्तस्मै । बतेति हर्षे । ब्रह्मणो वाक्याल्लज्जाभयादिकं परित्यज्य दत्तेत्यर्थः । इति रुद्रस्य प्रशंसापरत्वेन व्याचक्षते, तान् पृच्छामः । तत्रायं वास्तवोऽर्थ इति यदुक्तं स किं दक्षस्याभिमतः, उतैतत्पुराणकर्तुः, उतान्यस्य भवादृशस्य कस्यचित् । नाद्यः 'साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात्' इति वास्तविकत्वमुपक्रम्य 'लोकपालानां यशोघ्नो निरपत्रपः येन स्तब्धेन दूषितः, एष मे शिष्यतां प्राप्तः' इत्यादिना निन्दयतोऽभिप्रेतत्वासंभवात निन्दायामेव तस्य तात्पर्यातिशयावगमात् । अत एव 'दक्षो गिरित्राय विसृज्य शापं तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम' इति निन्दापूर्वकशापकरणत्वविवृद्धकोपत्वविनिष्क्रमणत्वादयो वक्ष्यमाणा उपपन्नाः । न द्वितीयः । वेदान्तार्थोपबृंहणरूपत्वादस्य पुराणस्य वेदान्तेषु च 'अपहतपाप्मा वा अहमस्मि' । 'नारायणाद्रुद्रो जायते' इत्यादिषु शिवस्य कर्मवश्यत्वकार्यत्वादिश्रवणात्तद्विरुद्धार्थानामत्र निबन्धनस्यायुक्तत्वेनैतत्पुराणकर्त्रे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विचक्षणे, ब्रह्मोपदेष्ट्र्यावित्यर्थः। ज्ञानं शास्त्रविचारजोऽवबोधश्च, विज्ञानं विवेकादिजन्योऽवबोधश्च, तयोः पारगे अन्तं गतवत्यौ। सनकादिवदूर्ध्वरेतस्के ते इति भावः। अभूताम्। केचित्त्वत्र 'मेनां वैहारिणीं स्वधा' इति पठन्ति। अन्ये 'वयुनां धारणीं तथा' इति पठन्ति 'मेनां वै धारणीं तथा' इति विष्णुपुराणे ॥ ६३ ॥ भवस्येति। भवस्य शिवस्य पत्नी सतीनाम्नी षोडशी दक्षसुता सा गुणशीलतः गुणशीलादिभिरित्यर्थः। आत्मनः स्वस्याः सदृशं देवं भवं शिवम् अनुव्रता सेवमाना सत्यपि पुत्रं न लेभे ॥ ६४ ॥

पितरीति। स्वे आत्मीये पितरि दक्षे, अनागसे निरपराधिने भवाय शिवाय रुषा क्रोधेन अप्रतिरूपे असदृशे प्रतिकूले इति यावत्। जाते सतीति शेषः। आत्मना स्वयमेव आत्मानं देहम् अप्रौढा बाला सती एव योगसंयुता योगेनाग्निमुत्पाद्यै-वेत्यर्थः। अजहात्तत्याज। योगाग्निना देहं ददाहेत्यर्थः ॥ ६५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिताया-मन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः

विदुर उवाच

भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः। विद्वेषमकरोत् कस्मादनादृत्यात्मजां सतीम् ॥ १ ॥

प्रथमाध्यायसंप्रोक्ते विद्वेषे भवदक्षयोः। द्वितीये वर्ण्यते हेतुर्विश्वसृट्क्रतुसंभवः ॥ १ ॥

संग्रहोक्तमर्थं विस्तरतो बुभुत्सया पृच्छति विदुरः। भव इति त्रिभिः। शीलवतां निर्वैरत्वसमदर्शनत्वादिरूप-स्वभाववतां मध्ये श्रेष्ठे उत्कृष्टे भवे शिवे, दुहितृषु वत्सलः दक्षः सतीं सतीनाम्नीम् आत्मजां पुत्रीम् अनादृत्य कस्माद्धेतोः विद्वेषम् अकरोत्। न च दुहितृजामातरौ विद्वेषार्हाविति भावः ॥ १ ॥ किं चेतोऽपि न भवो विद्वेषार्ह इत्याह। क इति। को दक्षः चराचराणां गुरुस्तं ज्ञानोपदेष्टारमित्यर्थः। अचराणामपि ज्ञानसंपादने समर्थः किमुत चराणामिति कैमुत्यन्यायद्योतना-याचरपदं प्रयुक्तम्। जगतः जिज्ञासोर्लोकस्य, महद्दैवतमाराध्यं 'रुद्रस्तारकं ब्रह्म' व्याचष्टे 'शंकराज्ज्ञानमन्विच्छेत्' इति श्रुतिस्मृतिभ्यां ज्ञानार्थजिज्ञासुभिराराध्यमिति भावः। आत्मारामं सर्वभूतान्तरात्मभूतपरमपुरुषस्वरूपविहितारामामित्यर्थः। अत एव शान्तविग्रहम् अतो निर्वैरं तं भवं कथं द्वेष्टि। अनेनास्य द्वेषाचरणमयुक्तमिति भावः। यद्वा। य उक्तविशेषणविशिष्टः शिवस्तं को वा द्वेष्टि न कोऽपीति भावः ॥ १ ॥ एतदिति। हे ब्रह्मन् जामातुर्भवस्य श्वशुरस्य दक्षस्य च तु यतो हेतोस्त्वित्यर्थः। विद्वेषः अभवदिति शेषः। यतो विद्वेषात् सती सत्याख्या दक्षदुहिता दुस्त्यजान् प्राणान् तत्यजे तत्याज। एतत् मे मह्यम् आख्याहि ॥ ३ ॥ इत्थं विदुरेणापृष्टो मैत्रेयो भवदक्षयोर्मिथो विद्वेषनिमित्तं तन्निमित्तं सतीदेहत्यागं च सप्रपञ्चमुप-पादयिषुरौपोद्घातिकीं कथां प्रस्तौति। पुरेति। पुरा पूर्वं विश्वसृजां मरीच्यादिप्रजापतीनां सत्त्रे बहुयजमानकर्तृको यागः सत्त्रं तस्मिन्नित्यर्थः। परमर्षयः न केवलमेत एव, किं तु मुनयः सर्वेऽपि मुनिगणाः तथा सानुगाः सभृत्याः सर्वे अमरगणा इन्द्रादयो देवगणाः अग्नयोऽग्न्यभिमानिन्यो देवताश्च समेताः संघीभूताः आसन् ॥ ४ ॥

तत्रागच्छन्तं दक्षं वीक्ष्य सदःस्था अभ्युत्थिता इति युग्मेनाह। तत्रेति। तत् महत् सदः वितिमिरं कुर्वन्तं रोचिषा स्वदीप्त्या भ्राजमानम् अत एव अर्कम् इव तत्र सदसि प्रविष्टं दक्षमिति शेषः। दृष्ट्वा ॥ ५ ॥ उदिति। तस्य दक्षस्य या भाः कान्तिस्तया आक्षिप्तमभिभूतं तेजो येषां ते तथोक्ताः ऋषयः सहाग्नयोऽग्न्यभिमानिदेवतासहिताः, ते सदस्याः सभासाधवो जनाः विरिञ्च्यं ब्रह्माणं शिवं च ऋते विना स्वधिष्ण्येभ्यः स्वस्वासनेभ्यः। उदतिष्ठन् उत्थितवन्तः ॥ ६ ॥ स इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः भगवानैश्वर्यसंपन्नः सः दक्षः सदस्पतिभिः सभासज्जनमुख्यैः साधु सम्यग्यथा तथा सत्कृतः पूजितः संमानितो वा सन् । लोकानां गुरुस्तम् अजं ब्रह्माणं नत्वा प्रणम्य तदाज्ञया ब्रह्मणो निदेशेन निषसादोपविष्टवान् ॥ ७ ॥ प्रागिति । प्राक्स्वोपवेशात्पूर्वमेवागत्य निषण्णमुपविष्टं मृडं शिवं दृष्ट्वा तदनादृतः तेन मृडेन प्रत्युत्थानादिभिरसत्कृतो दक्षः नामृष्यत्तदसत्करणं न सेहे । वामं वक्रं यथा चक्षुर्भ्यां स्वनयनाभ्याम् अभिवीक्ष्य दहन्निव शिवं भस्मसात्करिष्यन्निव उवाच ॥ ८ ॥ उक्तिमेवाह । श्रूयतामित्यादिना यज्ञभागं न लभतामित्यन्तेन ग्रन्थेन । श्रूयतामिति । सहदेवा देवैः सहिताः, सहाग्नयोऽग्निभिः सहिताः, हे ब्रह्मर्षयो महर्षयः साधूनां वृत्तमाचारं ब्रुवतः कथयतः मे मम वक्ष्यमाणं वच इति शेषः । श्रूयतां युष्माभिरिति शेषः । तदेतच्च अज्ञानात् न, मत्सराच्च न नैव कथयिष्यामीत्यर्थः ॥ ९ ॥ अयमिति । नाम्ना निर्देशमसहमानोऽयमिति सर्वनाम्ना निर्दिष्टवान् । अयं शिवः लोकपालानां मध्ये निविष्टोऽपि तेषामिति शेषः । यशोघ्नः यशोनाशकः, निरपत्रपः तु मर्यादाभञ्जनजन्यलज्जाशून्यश्चास्तीत्यर्थः । स्तब्धेनोचितक्रियाशून्येन, ध्वस्तेनेति पाठे भ्रष्टेन येनानेन शिवेन सद्भिः सत्पुरुषैः आचरितोऽनुष्ठितः पन्था वैदिकाचारः दूषितः, दोषं प्रापितः । विनाशित इति यावत ॥ १० ॥

स्तब्धतामेव प्रपञ्चयति । एष इति द्वाभ्याम् । एषः शिवः यद्यस्मात् विप्राग्निमुखतः विप्राणामग्नेश्च समक्षतः विप्राग्निसाक्षिकं यथा भवति तथेत्यर्थः । सावित्र्या इव सावित्रतुल्यायाः मे मम दुहितुः पाणिं साधुवत्साधुताभाग्यथा भवति तथा वस्तुतस्त्वसाधुरेव अग्रहीत । ततः मे मम शिष्यतां प्राप्तः ॥ ११ ॥ गृहीत्वेति । मर्कटस्येव लोचने यस्य सोऽयं मृगशावस्य हरिणबालकस्याक्षिणी इव अक्षिणी यस्यास्तस्या मत्पुत्र्याः पाणिं गृहीत्वा ऊढ्वेत्यर्थः । मच्छिष्यः सन्निति शेषः । प्रत्युत्थानाभिवादार्हे मयि वाचा वाङ्मात्रेणापि उचितं मामुद्दिश्य कर्तुं योग्यं सत्कारं न अकृत न कृतवान् ॥ १२ ॥ अनर्हाय कन्यां दत्तवानहमित्यनुतप्यमान आह । लुप्तक्रियायेति सार्द्धैश्चतुर्भिः । लुप्ताः क्रियाः सदाचारा येन तस्मै अत एव अशुचयेऽपवित्राय मानिने दुरहंकारिणे, भिन्नः सेतुर्धर्ममर्यादा येन तस्मै, अनिच्छन्नपि दातुमिति शेषः । अहं बालां कन्यां, शूद्राय उशतीं दोषवर्जितत्वात्कमनीयां गिरं वेदवाचम् इव, अदां दत्तवान् ॥ १३ ॥ प्रेतेति । योऽयं घोरेषु स्वत एव भयंकरेषु प्रेतावासेषु श्मशानेषु, प्रेतैः भूतगणैश्च वृतः घोरैरिति पाठे घोरैर्विकृतैर्भूतगणैरिति योजना । नग्नो विवसनः व्युप्तकेशो विकीर्णशिरोरुहः सन् , उन्मत्तवत् रोगविक्षिप्तचित्तजन इव हसन्नट्टहासमाचरन् रुदन्नश्रुविमोचनं कुर्वन्सन् अटति इनस्ततोऽटनमाचरति ॥ १४ ॥ चितेति । चितायाश्चितेर्यद्भस्म श्मशानिकविभूतिस्तेन कृतं स्नानं येन सः । प्रेतानां स्रजो माला यस्य सः । अलंकृतप्रेताङ्गादुत्तार्याधोनिःक्षिप्तपुष्पमालाः कण्ठे दधान इत्यर्थः । नृणामस्थीनि भूषणानि यस्य सः, स्वयं च अशिवोऽमङ्गलः सन्नपि शिवापदेशः शिव इति लोकप्रतारणाय व्यवहरणमात्रं यस्य सः, स्वयं च मत्तः, मत्ताश्च ते जनाश्च तेषां प्रियः, मत्ता जनाः प्रियाः यस्येति वा । ह्यवधारणे । तमोमात्रात्मकः केवलतमोरूपः आत्मा स्वभावो येषां तेषां प्रमथभूतानां प्रमथाख्यभूतविशेषाणां पतिः ॥ १५ ॥

तस्मा इति । उन्मादानां भूतविशेषाणां नाथस्तस्मै दुर्हृदे दुष्टचित्ताय नष्टशौचाय आचारहीनाय तस्मै शिवाय बतेति खेदे । साध्वी सती कन्या, परमेष्ठिना ब्रह्मणा चोदितश्चोदितेनेत्यर्थः । आर्षत्वात्तद्वृत्यनेन तृतीयार्थे प्रथमा । मया दत्ता । केचित्तु चोदिते इति सप्तम्यन्तं पठित्वा, परमेष्ठिना प्रेरिते सतीत्यपि व्याख्यां कुर्वन्ति । केचिदत्र लुप्तक्रियायाशुचये इत्यादिग्रन्थं रुद्रनिन्दापरं यथाश्रुतं व्याख्याय वास्तवस्त्वयमर्थ इत्युपक्रम्य, लुप्ताः क्रिया यस्मिन् , परब्रह्मत्वात । अत एव नास्ति शुचिर्यस्मात् , अमानिने अभिन्नसेतवे इति च छेदः । तस्य परमेश्वरस्य मदीया मानुषी कन्या कथं योग्या स्यादिति लज्जादिना दातुमनिच्छन्नपि तत्संबन्धलोभेन दत्तवान् । शूद्रायेत्यतदर्हत्वमात्रे दृष्टान्तः न हीनत्वे । पूर्वापरस्ववचनविरोधापत्तेः । यथा कश्चिच्छूद्राय वेदमर्थलोभेन ददाति, तद्वत् प्रेतावासेष्वित्यादिसर्वं विडम्बनमात्रमिति स्वयमेवाह उन्मत्तवदिति । अन्यथा उन्मत्त इत्येवावक्ष्यत् । अशिवः नास्ति शिवो यस्मात् , अमत्तः अमत्तजनप्रिय इति च छेदः । पतिः प्रमथभूतानामिति भक्तवात्सल्यमाह । तामसानपि दोषमपनीय पातीति, नष्टानामपि शौचं शुद्धिर्यस्मात् , दुष्टेष्वप्येते मयानुकम्प्या इति हृन्मनो यस्य स दुर्हृत्तस्मै । बतेति हर्षे । ब्रह्मणो वाक्याल्लज्जाभयादिकं परित्यज्य दत्तेत्यर्थः । इति रुद्रस्य प्रशंसापरत्वेन व्याचक्षते, तान् पृच्छामः । तत्रायं वास्तवोऽर्थ इति यदुक्तं स किं दक्षस्याभिमतः, उतैतत्पुराणकर्तुः, उतान्यस्य भवादृशस्य कस्यचित् । नाद्यः 'साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात्' इति वास्तविकत्वमुपक्रम्य 'लोकपालानां यशोघ्नो निरपत्रपः येन स्तब्धेन दूषितः, एष मे शिष्यतां प्राप्तः' इत्यादिना निन्दयतोऽभिप्रेतत्वासंभवात निन्दायामेव तस्य तात्पर्यातिशयावगमात् । अत एव 'दक्षो गिरित्राय विसृज्य शापं तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम' इति निन्दापूर्वकशापकरणत्वविवृद्धकोपत्वविनिष्क्रमणत्वादयो वक्ष्यमाणा उपपन्नाः । न द्वितीयः । वेदान्तार्थोपबृंहणरूपत्वादस्य पुराणस्य वेदान्तेषु च 'अपहतपाप्मा वा अहमस्मि' । 'नारायणाद्रुद्रो जायते' इत्यादिषु शिवस्य कर्मवश्यत्वकार्यत्वादिश्रवणात्तद्विरुद्धार्थानामत्र निबन्धनस्यायुक्तत्वेनैतत्पुराणकर्त्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भिप्रेतत्वासंभवात् । अत एव हि 'सद्योऽजायत तन्मन्युः कुमारो नीललोहितः । स वै रुरोद देवानां पूर्वजो भगवानजः । नामानि मम हे धातः स्थानानि च जगत्पते' इति वेदान्तार्थानुसारेणैव कार्यत्वकर्मवश्यत्वचतुर्मुखकृतनामस्थानादिमत्त्वमुपबृंहितम् । अयमर्थः श्रीभाष्याद्वेदार्थसंग्रहाच्च सप्रपञ्चमवगन्तव्यः । न च तृतीयः । आग्रहमूलकत्वान्निन्दापरग्रन्थस्य यथाकथंचिद्विपरीतार्थपर्यवसानकरणैः स्तुतिनिन्दयोर्व्यवस्थानुपपत्तेश्च । यदुक्तं लुप्ता क्रिया यस्मिन् परब्रह्मत्वादिति तदप्ययुक्तम् । रामकृष्णाद्यवताराणां परब्रह्मत्वेऽपि तेषु क्रियावत्त्वदर्शनेन हेतोर्व्यभिचारात् । अमानिने अभिन्नसेतवे इति पदच्छेद इत्यप्ययुक्तम् ; 'सद्भिराचरितः पन्था येन स्तब्धेन दूषितः' इति । 'यज्ञे भागं न लभतां देवैर्देवगणाधमः' इति पूर्वोत्तरव्याघातात् । तस्य परमेश्वरस्य मदीया मानुषी कन्या इत्याद्यपि अयुक्तं भवदक्षयोरुभयोरपि ब्रह्माङ्गप्रसूतत्वेन दक्षकन्याया मानुषीत्वासंभवात् । 'मनोर्जातावभ्यतो युक् च' इति हि मानुषशब्दो व्युत्पादितः । तामसानपि दोषमशेषमपनीय पातीत्याद्यपि मन्दं 'तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' इति तामसानां निग्राह्यत्वगानात् । तस्माद्यथोक्त एवार्थो निर्बाधः ॥ १६ ॥

विनिन्द्येति । सः दक्षः अप्रतीपमप्रतीपं यथा भवति तथा अवस्थितमपि गिरिशं शिवम् एवमुक्तप्रकारेण विनिन्द्य, अथ ततः अपो जलानि उपस्पृश्याचम्य । क्रुद्धः सन् शप्तुं शापं दातुं प्रचक्रमे उपक्रान्तवान् ॥ १७ ॥ अयमिति । अयं भवः शिवः तुर्हेतौ यतो हेतोरित्यर्थः । देवगणाधमः सर्वेभ्यो देवेभ्योऽधमः इत्यर्थः । अस्तीति शेषः । ततः इन्द्रश्च, उपेन्द्रस्त्रिविक्रमश्च, तावादी येषां तैः देवैः सह, देवयजने देवोद्देश्यकयागे भागं यज्ञभागं न लभताम् ॥ १८ ॥ निषिद्ध्यमान इति । हे कौरव्य विदुर सः दक्षः सदस्यमुख्यैः सभ्यजनश्रेष्ठैः निषिद्ध्यमानो निवार्यमाणः सन्नपि यतः विवृद्धोऽतिवृद्धिं प्राप्तो मन्युः क्रोधो यस्य सः । ततः गिरित्राय शिवाय शापं यज्ञभागानर्हतारूपं शापं विसृज्य दत्त्वा तस्मात्सन्नदेशात् विनिष्क्रम्य बहिर्निर्गत्य निजं स्वकीयं निकेतनं गृहं जगाम ॥ १९ ॥ विज्ञायेति । गिरिशः शिवस्तस्यानुगः पार्षदास्तेषामग्रणीर्मुख्यः नन्दीश्वरः शापं दक्षविसृष्टं शापं विज्ञाय ज्ञात्वा, रोषः क्रोधस्तेन कषायो नेत्रारुणता तेन दूषितो व्याप्तः आरक्तनेत्रः सन्नित्यर्थः । पाठान्तरे रोषरूपकषायेण रूषित इत्यर्थः । दक्षाय दारुणं भयावहं शापं विससर्ज । तथा ये च द्विजाः, तस्य गिरिशस्यावाच्यतां वचनानर्हतां निन्द्यतामित्यर्थः । अन्वमोदन्नभ्यनन्दन्, तेभ्योऽपि शापं विससर्जेत्यर्थः ॥ २० ॥ तत्रादौ दक्षं शपति सार्द्धैस्त्रिभिः । य इति । यः दक्षः, अज्ञः देहादिविलक्षणात्मज्ञानरहितः अत एव पृथग्दृष्टिरब्रह्मात्मकस्वतन्त्रवस्तुदर्शी सन् । अप्रतिद्रुहि प्रतिद्रोहमकुर्वति भगवति भगवदंशावताररूपे शिवे, मर्त्ये उद्दिश्य मरणादिधर्मभावत्वमनुसंधाय केवलनिकृष्टं मत्वेत्यर्थः । द्रुह्यत्यपकरोति, एतदेतस्मात्कारणात् स दक्षः तत्त्वतः प्रकृतिपुरुषेश्वरयाथात्म्यज्ञानात् विमुखः पराङ्मुखः भवेत् । भूयात् । तत्त्वत्रयज्ञानरूपपरमार्थावगमरहितो भवेदित्यर्थः । अयं प्रथमः शापः पाठान्तरे एतं भवं मर्त्यमुद्दिश्य मर्त्यत्वेन ज्ञात्वेत्यर्थः । अन्यत्तूक्तप्रकारमेव ॥ २१ ॥

एवं तत्त्ववैमुख्यरूपं शापं विसृज्य तत्कार्यरूपमतात्त्विकलोककर्माभिरुचिरूपं शापं विसृजति । गृहेष्विति । कूटधर्मेषु कपटधर्मवत्सु गृहेषु गेहेषु कपटधर्मवतीषु गृहिणीषु वा । ग्राम्यसुखेच्छया वैषयिकसुखभोगवाञ्छया सक्तो व्यासक्तः । अत एव वेदवादैर्वेदोक्तार्थवादैर्विपन्ना विनष्टा धीर्बुद्धिर्यस्य तथाभूतः सन् , कर्मतन्त्रं कर्मकलापं वितनुताम् । अल्पास्थिरफलसाधनकर्माणि कुरुतादित्यर्थः । अर्थवादो नामाल्पास्थिरफलसाधनानि कर्माणि कृतवतां तेषु अनन्तस्थिरफलसाधनत्वेन रुच्युत्पादनं तद्यथा 'अपाम सोमममृता अभूम' इत्यादि 'अक्षय्यं ह वै चातुर्मास्ययाजिनां सुकृतं भवति' इत्यादि । अयमपि प्रथमशापस्यान्तर्गतो बोध्यः स चास्याज्ञत्वगमक एवातो न प्रथमशापतः पृथक् ज्ञेयः ॥ २२ ॥ बुद्ध्येति । परो देहादिस्तमेवात्मत्वेनाभिध्यातुं शीलमस्यास्त्यास्तया बुद्ध्या विस्मृता विस्मृतिं प्राप्ता आत्मगतिर्जीवात्मपरमात्मयाथात्म्यावगमो यस्य सः अत एव पशुः पशुतुल्यः सः दक्षः अतितरां नितरां स्त्रीकामः अस्तु । इति द्वितीयः शापः । सः दक्षः अचिरादाशु बस्तमुखः मेषमुखसमानमुखः अस्तु भवतात् इति तृतीयः शापः ॥ २३ ॥ अयं च शापोऽस्यानुरूप एवेत्याह । विद्येति । तथा कर्ममय्यां कर्मात्मिकायाम् अविद्यायाम् , विद्या इयमेव तत्त्वविद्येति बुद्धिर्यस्य सः, अत एव असौ दक्षः जडः एव । अज इति पाठे अजः पशुतुल्यः अस्तु । पशुप्रायत्वोक्तेरयं शापोऽपि तृतीयशापान्तर्गत एव । एवं दक्षं प्रकारत्रयेण शप्त्वा शिवावमानिनो दक्षानुकूलान् द्विजान् शपति । संसरन्त्विति सार्द्धद्वाभ्याम् । शर्वं शिवमवमन्यते इति शर्वावमानी तम् अमुं दक्षम् अन्वनुसृत्य ये अवर्त्तन्त ते चापि, ये दक्षकृतशापाभिनन्दिनस्तेऽपीत्यर्थः । इह लोके संसरन्तु । जन्ममरणाद्यनुभवन्तु इत्येकः शापः ॥ २४ ॥ गिर इति । ये हरद्विषः ते, पुष्पिण्याः पुष्पमात्रफलायाः आपातरमणीयाया इत्यर्थः । यद्वा । पुष्पवन्मनः क्षोभकत्वादर्थवादाः पुष्पशब्देन विवक्षिताः । अत एव पुष्पिण्या अर्थवादबहुलाया इत्यर्थः । अथवा पुष्पगन्धो यथा क्षणकालमात्रोपभोग्यस्तथा क्षणमात्रोप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भोग्यस्वर्गादिसुखप्रकाशिकायाः श्रुतायाः वेदपूर्वकभागरूपाया इत्यर्थः । गिरः, मथ्ना मनः क्षोभकेण, भूरिगा सातिशयेन मधुगन्धेन मधुगन्धवद्रुच्युत्पादकेन अर्थवादेनेति शेषः । उन्मथितः क्षोभित आत्मा मनो येषां तथाभूता सन्तः संमुह्यन्तु मोहं प्राप्नुवन्तु । नित्यानित्यधर्माधर्मादिषु सर्वत्र विपरीतज्ञाना भवन्त्वित्यर्थः । केवलकर्मस्वेवासक्ता भवन्त्विति भावः । चोऽवधारणे अयं द्वितीयः शापः ॥ २५ ॥

सर्वभक्षा इति । द्विजाः सर्वभक्षाः भक्ष्याभक्ष्यविचारशून्याः भवन्तु, वृत्त्यै केवलशरीरापत्यकलत्रादिपोषणार्थमेव धृतानि विद्यातपोव्रतानि यैस्ते एवंभूता भवन्तु । वित्तं धनं च, देहः शरीरं च, इन्द्रियाणि चक्षुरादीनि च, तेष्वेवारामो रतिर्येषां ते तथाभूताः भवन्तु । याचकाः सन्तः इह विचरन्तु । इति चतुःशापसमाहृत्यैकत्वेन गणने तृतीयः शापः पृथक्तया गणने शापषट्कमेव ज्ञेयम् ॥ २६ ॥ एवं शपन्तं नन्दीश्वरमालक्ष्य भृगुः प्रत्यशपदित्याह मैत्रेयः । तस्येति । तस्य नन्दीश्वरस्य ब्रह्मकुलाय एवमुक्तरीत्या शापं वदतो ब्रुवतः सतः तं शापं श्रुत्वा भृगुः दुरत्ययं दुरतिक्रमं ब्रह्मदण्डं ब्रह्मदण्डरूपं शापं प्रत्यसृजदत्यदात् वै ॥ २७ ॥ तमेवाह । भवव्रतेति । ये च भवस्य शिवस्य व्रतं पिशाचचर्यादिकं तस्य धरा धर्त्तारः, भवस्य शिवस्य व्रतं सार्वकालिकं श्मशानवासभस्मोद्धूलनकपालमालाधारणादिकं तस्य धरा इति तु शतानन्दचरणाः । ये च तान् भवव्रतधरान् समनुव्रताः अनुसृताः ते सर्वे पाषण्डिनः वेदविरुद्धकर्मनिष्ठाः सच्छास्त्राणां भगवदुपासनाप्रतिपादकानां वेदानुसृतानां शास्त्राणां पञ्चरात्रादीनां परिपन्थिनः प्रतिकूलाः भवेयुः । इत्येकः शापः ॥ २८ ॥ पाषण्डित्वं विशदयन् शापान्तरं वक्ति । नष्टेति । नष्टशौचा वेदशास्त्रोदितशौचाचाररहिताः मूढधियः परावरतत्त्वज्ञानरहिताः जटाश्च, भस्म च, अस्थीनि च तानि धरन्तीत्येवंशीलाः एवंभूताः सन्तः शिवदीक्षायां विशन्तु । उक्तविधशिवदीक्षावन्तो भवन्तु इति द्वितीयः शापः । वेदोक्तमार्गेण शिवोपासनायां न शापशङ्केति स्पष्टयितुं स शापदीक्षां विशिनष्टि । यत्र यस्यां शिवदीक्षायां सुरा गौडी, पैष्टी, माध्वी, च आसवस्तालादिसंभूतैकादशविधं मद्यं च तत् समाहारः । दैवं पूज्यं देवतावदादरणीयं वा भवतीति शेषः । 'मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः । भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति' इत्याद्युक्तविधा शिवदीक्षा बोध्या । इयं शैवागमतः स्पष्टं बोध्या ॥ २९ ॥ भवतामयं शापोऽनुरूप एवेति वदंस्तमेव प्रथयति । ब्रह्मेति । यतः यूयं पाषण्डं पाषण्डधर्मम् आश्रिताः । यद्यस्माच्च पुंसां वर्णाश्रमवतां जनानां सेतुं स्वर्गापवर्गसाधनयज्ञोपासनादिप्रकाशनेन पुरुषार्थप्रापकं मर्यादारूपं वा । विशेषेण धारयत्याश्रितानिति विधारणं मातापितृसहस्रप्रदत्तोपदेशसमानतया विशेषधारकप्रवर्त्तकमिति यावत् । एवंभूतं ब्रह्म वेदं च ब्राह्मणांस्तद्धारकान्विप्रांश्च परिनिन्दथ परिनिन्दितवन्तः । अतः ततः एव विगर्ह्यमतिनिन्द्यं पाषण्डं यात एव इत्युत्तरेणान्वयः । केचित्त्वेतं तृतीयं शापं वदन्ति ॥ ३० ॥

वेदस्य सेतुत्वविधारणत्वे प्रपञ्चयति । एष इति । एषः वेद एव लोकानां वर्णाश्रमवतां शिवः सुखकरः पन्था मार्गः स्वप्रकाश्ययज्ञोपासनादिद्वारा स्वर्गापवर्गोपायभूतोऽस्तीत्यर्थः । सनातनोऽनादिनिधनः हि 'अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा' इत्युक्तत्वात् । यं वेदं तदुक्तयज्ञोपासनादिरूपधर्ममित्यर्थः । पूर्वे पूर्वकालवर्त्तिनः सात्विका ब्रह्मर्षयः । चकारादाधुनिकाः सात्त्विकास्ते च अनुसंतस्थुरनुष्ठितवन्तः । अनेन शिष्टपरिग्रहकथनेन शैवागमानां तद्वैपरीत्यमावेदितं जनार्दनः भगवान् यद्वेदाख्यं ब्रह्म प्रमाणं यस्य सः । आर्षत्वात् क्लीबत्वम् ॥ ३१ ॥ तदिति । तत्तस्मात् परमं निरतिशयश्रेयःसाधनप्रकाशकत्वेन सर्वोत्कृष्टं शुद्धमपौरुषेयम्, सनातनं सतां वर्त्म सज्जनाधिगम्यमार्गरूपमित्यर्थः । ब्रह्म वेदं विगर्ह्य विगर्हणविधानाद्धेतोरित्यर्थः । पाषण्डं यात गच्छत । पाषण्ड एव निष्ठावन्तो भवतेत्यर्थः । यत्र पाषण्डे वो युष्माकं भूतानां तामसानां राट पतिः रुद्रः दैवं देवतावत्पूज्यः । केचित्तु भूतराट् भैरव इति वदन्ति ॥ ३२ ॥ अथ शापप्रतिशापौ निगमयन्ननन्तरकथां प्रस्तौति मैत्रेयः । तस्येति । हे साधो तस्य भृगोः एवं शापं ददतः सतः भगवान् सः भवः शिवः सानुगः सभृत्यः किंचित् विमनाः इव इवशब्देन वस्तुतः वैमनस्याभावः सूच्यते । तेनान्योऽन्यशापेनोभयोर्विनाशाद्विमनस्त्वेऽतीव कर्त्तव्येऽपि भविष्यद्धर्मात्मजनारायणमुन्याख्यभगवदवतारविधेयस्वाश्रिततच्छापनिराकरणस्मृत्या प्राप्तौत्कण्ठ्यः संस्तत्त्याजेति द्योत्यते । ततो यज्ञभूमेः सकाशात् निश्चक्राम निष्क्रान्तवान् ॥ ३३ ॥ तेऽपीति । हे महेष्वास विदुर यत्र यस्मिन् सत्रे ऋषभः सर्वश्रेष्ठः हरिः इज्यः आराधनीयः । तत् विश्वसृजां सत्रमिति शेषः । सहस्रपरिवत्सरान् सहस्रपरिवत्सरपर्यन्तं संविधायानुष्ठाय ते विश्वसृजः अपि भृग्वादयोऽपीत्यर्थः ॥ ३४ ॥

आप्लुत्येति । तत्र स्थाने यमुनया अन्विता गङ्गा अस्ति तत्र प्रयागे अवभृथः प्रधानकर्मसमाप्तौ क्रियमाण इष्टिविशेषस्तत्संपादनं यथा स्यात्तथा आप्लुत्य स्नात्वा विरजेन आत्मना युताः शुद्धाशया इत्यर्थः । सर्वेऽपि ततः स्थानात् स्वं स्वं धाम स्थानं ययुः ॥ ३५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

—:*:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तृतीयोऽध्यायः

मैत्रेय उवाच

सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः । जामातुः श्वशुरस्यापि सुमहानतिचक्रमे ॥ १ ॥

तातयज्ञोत्सवं द्रष्टुं गमिष्यन्ती तृतीयके । सती निवारिता पत्या शिवेन नीतिहेतुभिः ॥ १ ॥

दक्षो दुहितृवत्सलः विद्वेषमकरोत्कस्मात्' इति पृष्टं विद्वेषनिमित्तं तूक्तम् । अथ 'यतः प्राणान् तत्याज दुस्त्यजान् सती' इति पृष्टं प्राणत्यागनिमित्तं तत्प्रकारश्चोच्यते । तत्र प्राणत्यागनिमित्तमरौद्रयागारम्भः, स च गर्वात्, गर्वश्च प्राजापत्यादधिकारादिति वक्ष्यन् तावद्दक्षभवयोर्विद्विषतोः सतोर्महान् कालोऽतीत इत्याह । सदेति । एवमुक्तरीत्या सदा विद्विषतोः मिथो द्वेषं कुर्वतोः जामातुः शिवस्य श्वशुरस्य दक्षस्य च ध्रियमाणयोरवतिष्ठमानयोः सतोः सुमहान् भूयान् कालः अपि अतिचक्रमे व्यतीतः वै ॥१॥ यदेति । यदा दक्षः परमेष्ठिना ब्रह्मणा सर्वेषां प्रजापतीनाम् आधिपत्ये अभिषिक्तः तदा तुरवधारणे । तस्मिन्काल एवेत्यर्थः । तस्य स्मयः मदविशेषः अभवत् ॥ २ ॥ स्मयाच्चारौद्रभागयागमारेभे इत्याह । इष्ट्वेति । स दक्षः ब्रह्मिष्ठान् ब्रह्मनिष्ठशिवमित्यर्थः । मान्यत्वाद्बहुवचनम् । अभिभूय तिरस्कृत्य तस्मै यज्ञभागं न दास्यामीति संकल्प्येत्यर्थः । चोऽवधारणे । वाजपेयेन इष्ट्वा वाजपेयाख्ययागं कृत्वेत्यर्थः । बृहस्पतिसवं नाम क्रतूत्तमं समारेभे आरब्धवान् । 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति श्रुतेः ॥ ३ ॥ तस्मिन्निति । तस्मिन् बृहस्पतिसवे समारब्धे सतीति शेषः । सर्वे ब्रह्मर्षयः देवर्षयश्च, पितरश्च देवताश्च ताः तथा तत्पत्न्यस्तेषामङ्गनाश्च कृतस्वस्त्ययनाः विहितमङ्गलाः सर्वालंकारभूषिताश्च सत्यः, सभर्तृकाः स्वस्वपतिभिः सहिताः सत्यश्च, आसंस्तत्रागत्योपविविशुरित्यर्थः । सभर्तृका इत्यनेन भर्तृसांनिध्यादानन्दातिशयः सूच्यते ॥ ४ ॥ तदिति । तत्तदा नभस्याकाशे विमानान्यधिरुह्य दक्षयज्ञे व्रजतामिति शेषः । देवचराणां देवानां प्रजल्पतां 'तत्र गत्वैवं चरिष्याम' इत्यादि वदतां सतां देवी अमानुषैश्वर्येण द्योतमाना दाक्षायणी दक्षस्य कनिष्ठा पुत्री सतीनाम्ना पितुः स्वजनकसंबन्धिनं यज्ञमहोत्सवम् उपश्रुत्य सम्यगाकर्ण्य ॥ ५ ॥ व्रजन्तीरिति । तत्र सर्वतः सर्वाभ्यः दिग्भ्यो दिशाभ्यः व्रजन्तीः प्रयान्तीः उपदेवा गन्धर्वास्तेषां वरस्त्रिय उत्तमाङ्गनास्ताः । विमानयानाः विमानान्यधिष्ठाय प्रयान्तीरित्यर्थः । सप्रेष्ठाः प्रियैः सहिताः, निष्ककण्ठ्यः स्वाङ्गपरिहितसकलाभरणाः सुवाससः परिधृतविचित्रोत्तमवसनाः ॥ ६ ॥

दृष्ट्वेति । लोलाक्षीश्चपलनयनाः मृष्टकुण्डला मार्जितत्वादुज्ज्वलश्रवणाभरणाः तथाभूताः स्वनिलयाभ्याशे स्वभवनान्तिके दृष्ट्वा औत्सुक्यादत्यौत्सुक्यं प्राप्य देवं लोकोत्तरैश्वर्यवत्तया देदीप्यमानं भूतपतिं सकलजनैकनाथं पतिं स्वस्वामिनम् अभ्यभाषत । वक्ष्यमाणप्रकारेणोवाचेति त्रयाणामेकसंबन्धः ॥ ७ ॥ प्रजापतेरिति । हे वाम शंभो ते तव श्वशुरस्य प्रजापतेर्दक्षस्य । कर्त्तरि षष्ठी । यज्ञमहोत्सवो यज्ञात्मको महानुत्सवः सांप्रतं संप्रति निर्यापितः प्रवर्त्तितः किल । इत्थंभूता किंवदन्ती प्रवर्त्तते इत्यर्थः । तत्र च अमी विबुधाः व्रजन्ति । अनेन नाद्यापि यागो निवृत्त इति ज्ञापितम् । अतः ते तव यदि अर्थिता अर्थिनो भावः यदीच्छा वर्त्तत इत्यर्थः । तर्हि वयं च सपरिचारकौ आवामपि इत्यर्थः । अभिसराम तत्र गच्छामः । हि निश्चितमेव ॥ ८ ॥ तत्र गमनौत्सुक्यं प्रकटयन्ती निमित्तान्तरमप्याह षड्भिः । तस्मिन्निति । तस्मिन् यज्ञमहोत्सवे मम भगिन्यः स्वसारः स्वकैरात्मीयैः भर्तृभिः पतिभिः सह सुहृत्संदर्शनेच्छावत्यः सत्यः ध्रुवं गमिष्यन्त्यागमिष्यन्ति । सुहृदस्तु भगिनीमातापित्रादयो ज्ञेयाः । आयान्तु तास्तत्र तव तत्र गमनेन किमित्यत्राह । अहं चाहमपि तस्मिन्नुत्सवे भवता सह साकम् उपनीतमस्मन्मातृपित्रादिभिरतिप्रीत्या समर्पितं परिबर्हं वस्त्राभरणादि वरवध्वोर्देयमुपायनम् अर्हितुं च ग्रहीतुमेव कामये इच्छामि ॥ ९ ॥ न केवलमुक्तमेव प्रयोजनमर्थान्तरमप्यस्तीत्याह । तत्रेति । हे मृड तत्र यज्ञे भर्तृसंमितास्तत्तत्पत्या सहिताः मे मम स्वसृर्भगिनीः तथा मातृस्वसॄर्मम मातृभगिनीः तथा क्लिन्नधियं मद्दर्शनालाभेन खिन्नचित्तां मयि प्रेमार्द्रचित्तां वा मातरं मम जननीं च चिरोत्कण्ठमना बहुकालत औत्सुक्ययुक्तमनाः अहं द्रक्ष्ये द्रक्ष्यामि । किं च । महर्षिभिः उन्नीयमानमूर्ध्वीक्रियमाणम् अध्वरध्वजमध्वरे ध्वजदृश्यं यूपं च द्रक्ष्ये ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं बहुविधालापैरप्यविकृतेन्द्रियं पतिं दृष्ट्वा तन्माहात्म्यविज्ञापनपूर्वं स्वाभीष्टमर्थं प्रकाशयति। त्वयीति। अजोऽकर्मायत्तजन्मादिश्चासावात्मा विष्णुस्तस्य मायासंकल्पस्तया विनिर्मितं समुद्भूतं गुणत्रयात्मकं प्रकृतिगुणसत्त्वादिपरिणामात्मकम् एतत् विविधविचित्रसंनिवेशात्मकं जगदित्यर्थः। त्वयि आश्चर्यमाश्चर्यकरं भाति। विविधविचित्रसंनिवेशवज्जगद्वीक्ष्य भगवता कीदृशमेतद्रचितमित्येतदेव ज्ञानिनस्तत्र ह्याश्चर्यबुद्धिजनकमस्ति, न ततोऽन्यदाश्चर्यकरं किंचिदित्यर्थः। ज्ञानिनो हि भगवन्माहात्म्यविचारकाले विचित्रतां जगतो दृष्ट्वा आश्चर्यं प्राप्नुवन्तीति भावः। अथापि तथापि तवाश्चर्यैकस्थानस्य वस्तुनोऽभावेऽपीति यावत्। अहं योषित् ते तव अतत्त्वविच्च योषिद्भावान्नानावस्त्वीक्षायां चञ्चलस्वभावा परावरतत्त्वमजानन्तीत्यर्थः। अतः दीना जातजवस्त्वीक्षायां कृपणा सती, हे भव शिव मे मम भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ॥ ११ ॥ दिदृक्षामेव कैमुत्यन्यायेन व्यनक्ति। पश्येति द्वाभ्याम्। पश्येति। हे अभव अजन्मन् अनेन सुहृद्वियोगदुःखं त्वया नास्वादितमस्तीति सूचितम्। अन्याश्च ता योषितश्च ताः अपि मत्पितृसंबन्धरहिता अपीतरयोषित इत्यर्थः। कान्तसखाः स्वस्वभर्तृसहिताः अलंकृताः विचित्रवस्त्राभरणपरिधानतोऽत्यन्तं शोभमानाः वरूथशः संघशः प्रयान्तीः पश्य। हे शितिकण्ठ अनेन येन त्वया स्वभक्तप्रियविधानाय गरलं पीत्वा कण्ठश्यामलिमापि स्वीकृता, स त्वं मत्प्रियं कर्त्तास्येवेत्यपि सूचितम्। यासां स्त्रीणां व्रजद्भिः कलहंसवत्पाण्डुराणि शुभ्राणि तैः विमानैर्देवयानैः नभो नभःस्थलं मण्डितं शोभमानं जातमस्ति, तदपि पश्येति योजनीयम् ॥१२॥ पुनरपि युक्त्या तत्र गन्तव्यतामेव पुष्टीकरोति। कथमिति। हे सुरवर्य सुरश्रेष्ठ पितृगेहकौतुकं स्वपितृगेहे जायमानं विवाहयज्ञाद्युत्सवं निशम्याकर्ण्य सुतायास्तद्दुहितुः देहः शरीरं कथं न इङ्गते न प्रचलति। तत्र गमनाय चञ्चलो भवेदेवेत्यर्थः। यदि ब्रूयास्तेन मङ्गलपत्रिकाप्रेषणपूर्वकं नावाह्वानं कृतं भवेत्तदा तु युक्तं गमनम्, अनाहूतौ सन्तावावां तत्र कथं गच्छाव इति चेत्तत्र वच्मीत्याह। अनाहुता इति। अनाहुताः नाकारिताः सन्तोऽपि, सौहृदं सुहृदः संबन्धि, भर्तुः स्वामिनः संबन्धि गुरोः संबन्धि देहकृतः पितुश्चापि केतनं निकेतनं प्रति अभियन्ति सज्जना गच्छन्तीत्यर्थः। अनाहुता इत्यत्र ह्रस्वत्वमार्षम् ॥ १३ ॥

उपसंहरति। तदिति। बतेति हर्षे हे अमर्त्य, अमर्त्यत्वात्स्वाश्रितार्थसंपादनं युक्तमेवास्तीति सूचितम्। तत्तस्मात मम तत्र गमनत्वरायाः सत्त्वादुक्तयुक्त्या योगत्वाच्च हेतोरित्यर्थः। प्रसीद इदं मे मम वाञ्छितं कारुणिको दयालुः भवान् कर्तुम् अर्हति। कारुणिकत्वमेवाह। अदभ्रचक्षुषा अनल्पज्ञानेनापि अनल्पदयादृष्टिमता वा त्वया आत्मनः स्वदेहस्य अर्द्धे समेंऽशे अहं निरूपिता धृता अस्मि। यतोऽर्द्धनारीश्वर इति प्रख्यातोऽसि, अतः मया याचितः त्वं मा माम् अनुगृहाण। मद्वाञ्छितसंपादनरूपमनुग्रहं विधेहीत्यर्थः ॥ १४ ॥ एवमाभाषितो भवः प्रत्यभाषतेत्याह मैत्रेयः। एवमिति। एवमुक्तरीत्या प्रिययाङ्गनया सत्याख्ययाङ्गनयेत्यर्थः। अभिभाषितः प्रियः प्रीतिपात्रं, सुहृन्मित्ररूपः। यद्वा। सुहृदिव प्रिया यस्येत्येकं पदं प्रहसन् गिरिं कैलासं त्रायते इति गिरित्रः शिवः, कः दक्षः विश्वसृजां प्रजापतीनां समक्षतः तेषां शृण्वतां सतामित्यर्थः। मर्मभिदो मर्मस्थानभेदकान् मर्मच्छिद इति पाठे स एवार्थः। यान् कुत्सितवाग्रूपान् बाणान् आह। तान् संस्मारितः। निवृत्तप्रेषणात्स्मरतेर्वा णिजन्तात्कर्तरि क्तः। संस्मरन्नित्यर्थः। तां सतीं प्रति अभ्यधत्त अभ्यभाषत ॥ १५ ॥ प्रियोक्तमननूद्य प्रत्युत्तरयति भवः यावदध्यायसमाप्ति। त्वयोदितमिति। हे शोभने 'अनाहुताः अपि बन्धुषु अभियन्ति' इति त्वया यत् उदितमुक्तं तत् शोभनं समीचीनम् एव। तु। ते बन्धवः बलीयसा बलवत्तरेण, अनात्म्यं देहात्माभिमानस्तत्कृतो यो मदस्तेन, मन्युना क्रोधेन, च यदि अनुत्पादिता नोद्भाविता गुणेषु सत्स्वपि दोषेष्विव दृष्टिर्यैस्ते तथाभूताः स्युश्चेत् तर्ह्यनाहुता अप्यभियन्तीति शोभनमेवेत्यर्थः ॥ १६ ॥ ननु विद्यादिसद्गुणसंपन्नो दक्षस्त्वादृशेषु महत्सु कथमुत्पादितदोषदृष्टिः स्यात्तत्राह। विद्येति। सतां सत्पुरुषाणां गुणैः सत्पुरुषेषु गुणरूपतां प्राप्तैरित्यर्थः। असत्तमेष्वसाधुषु इतरैर्दोषरूपतां प्राप्तैः षड्भिः विद्या च तपश्च, वित्तं च वपुश्च, कुलं च, तैः विद्यादिषट्कमाश्रयभेदेन गुणदोषसंज्ञाभाक् जायते इति भावः। स्मृतौ विवेकज्ञाने हतायां नाशं प्राप्ते सति भृतः पुष्टश्चासौ मानोऽहं विद्वानहं तापस इत्यादि गर्वस्तेन दुर्दुश्च दृग् दृष्टिर्येषां ते तथाभूताः, स्तब्धाः भूयसां महत्तमानां धाम यथावस्थितं तेजः न पश्यन्ति। हीत्येतदसत्सूक्तार्थप्रसिद्धिं द्योतयति ॥ १७ ॥

नेति। तस्मात् एतादृशानाम् अनवस्थितात्मनामव्यवस्थितचित्तानां गृहान् स्वजनव्यपेक्षया स्वजन इतिबुद्ध्या न प्रतीयात्। तदनवस्थितत्वमेवाह। येऽनवस्थितात्मानो भवन्ति। ते वक्रधिया कुटिलबुद्ध्या वक्रदृष्ट्येति पाठे कुटिलया दृशेत्यर्थः। आरोपिता उत्तम्भिता भ्रूर्येषां तैः, कुटिलीकृतभ्रूमण्डलैरित्यर्थः। ह्रस्वत्वाभावश्छान्दसः। अमर्षणानि सक्रोधानि यान्यक्षीणि तैः क्रोधापूर्णनयनैरित्यर्थः। अभ्यागतान् स्वगृहागताभ्यागतजनान् अभिचक्षते पश्यन्ति ॥ १८ ॥ नन्वेवं ते पश्यन्त्वथापि तत्कृतावमानं सोढ्वा गन्तव्यमेव बन्धुभि तत्राह। तथेति। अरिभिः शत्रुभिः शिलीमुखैर्बाणैः अर्दिताङ्गो भिन्नगात्रोऽपि तथा न व्यथते। यतः शेते स्वपिति गाढनिद्रासुखमनुभवतीत्यर्थः। यथा वक्रधियां कुटिलमतिमतां स्वानां संबन्धिजनानां दुरुक्तिभिर्दुर्वचनैः मर्मसु मर्मस्थानेषु ताडितः कृतसंप्रहारः सन् दूयताऽत्यन्तव्यथमानेन हृदयेन दिवानिशं रात्रिंदिवं तप्यति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वचनसंस्मरणजातपरितापाद्रात्रिंदिवं व्यथते, न च शेतेऽतः शिलीमुखप्रहारतोऽपि स्वजनकृतवाक्प्रहारोऽतिदुःसह इत्यर्थः। स्वीयकृततदुरुक्तीनामेवं सोढुमशक्यत्वान्न तद्गृहान्प्रति गन्तव्यमिति भावः ॥ १९ ॥ एवं चेन्मास्तु तत्र त्वद्गमनमहमेकैव व्रजिष्यामीति चेन्मामनादृत्य गतायास्तवापि पितृकृतः पराभवः प्राणविपत्तये भवितेत्याह यावदध्यायसमाप्ति। व्यक्तमिति। हे सुभ्रु यद्यपि त्वम् उत्कृष्टा गतिः प्राजापत्याधिकाररूपा स्थितिर्यस्य तस्य प्रजापतेर्दक्षस्य आत्मजानां दुहितॄणां मध्ये प्रिया प्रीतिविषया इत्थं मे मम मता असि, तत् व्यक्तम्, मया स्फुटमेवज्ञातासीत्यर्थः। अथापि तथापि त्वं पितुः सकाशात् मानं सन्मानं न प्रपत्स्यसे न लप्स्यसे। यतः मदाश्रयात्तव मदाश्रयणसंबन्धाद्धेतोः को दक्षः परितप्यते क्लिश्यति ॥ २० ॥ ननु कुतस्त्वया दक्षस्तिरस्कृतः यतोऽसौ त्वां द्वेष्टि तत्राह। पापच्यमानेनेति। पूरुषो जीवः बुद्धिर्महान् ते साक्षात्पश्यन्तीति तथा तेषाम्, ब्रह्मात्मकत्वेन प्रकृतिपुरुषयाथात्म्यविदामित्यर्थः। यद्वा। पूरुषो जीवस्तस्य बुद्धिश्चित्तं तत्साक्षिणां निरहंकाराणामित्यर्थः। समृद्धिभिः पुण्यकीर्त्यादिभिः एषां पुरुषबुद्धिसाक्षिणां पदं स्थानमैश्वर्यमधिकारं वा अञ्जसा तत्त्वतः अधिरोढुं प्राप्तुम् अकल्पोऽसमर्थः। अत एव पापच्यमानेन भृशं तप्यमानेन हृदा हृदयेन आतुरेन्द्रियः दुःखितेन्द्रियः सन् तान् परं केवलम् असुराः हरिं यथा द्विषन्ति तथा परं केवलं द्वेष्टि। स्वयं मूढोऽज्ञो दुर्भगश्च जनः महद्भिः साम्यमलभमानः संस्तान्केवलं द्वेष्टि तथेत्यर्थः। 'दह्यमानाः सुतीव्रेण नीचाः परयशोऽग्निना। अशक्तास्तत्पदं गन्तुं ततो द्वेषं प्रकुर्वते। इत्यभियुक्तोक्तिरप्यनुकूलार्था ॥ २१ ॥ ननु भवद्गुरुभूतो दक्षस्त्वयादावेवानभ्युत्थानाप्रणामाचरणादिनाऽसत्कृतस्ततस्त्वां द्वेष्टि तत्राह। प्रत्युद्गमेति। हे सुमध्यमे प्राज्ञैस्तत्त्ववेदिभिः मनोवाक्कायैरिति शेषः। प्रत्युद्गमः प्रत्युत्थानं च, प्रश्रयणमनुनयश्च, अभिवादनं नमस्कारश्च तत्समाहारः मिथः परस्परं साधु विधीयते। प्राज्ञाऽज्ञसंनिपाते त्विति शेषः। परस्मै पुरुषाय श्रीवासुदेवाय गुहाशयायाऽन्तर्यामिणे चेतसा एव विधीयते। न तु देहाभिमानिने। अयं भावः। प्राज्ञानां परस्परमेलने प्रत्युद्गमादिकरणत्रयेण विधेयं देहाभिमानिसंनिपाते त्वन्तर्यामिणे चेतसैव विधेयमतस्तत्त्वन्तर्याम्युद्देशेन मया मानसिकं प्रत्युद्गमनादिकमस्मै देहाभिमानिने दक्षाय विहितमेवेति भावः ॥ २२ ॥

किं च मया न केवलमभ्यागतेष्वेव वासुदेवदृष्ट्या नमनं क्रियते किं तु नित्यमेव मनसि वासुदेवश्चिन्त्यत इत्याह। सत्त्वमिति। विशुद्धं रजस्तमोभ्यामनभिभूतं सत्त्वं सत्त्वप्रधानं चित्तं सत्त्वगुणो वा वसुदेवशब्दितं वसुदेवशब्दवाच्यं कुतः। यद्यस्मात् तत्र सत्त्वे पुमान्वासुदेवः अपगतमावृतमावरणं यस्मात्स तथाभूतः ईयते प्रतीयते प्रकाश्यते इति यावत्। इदमेव वसुदेवशब्दप्रवृत्तिनिमित्तं वसुदेवे शुद्धान्तःकरणे दीव्यते प्रकाशते इति वासुदेवः 'शेषे' इत्यण्। इति व्याख्यासुधायाम्। तस्मिन् सत्त्वे सत्त्वाख्ये चित्ते, अधः कृतेषु अक्षेषु इन्द्रियेषु जायते आविर्भवतीत्यधोक्षजः। इन्द्रियान्तरागोचरत्वात्केवलपरिशुद्धचेतसैव ग्राह्य इत्यर्थः। भगवान् वासुदेवः मे मया नमसा विधीयते नमस्क्रियत इत्यर्थः। हि। चोऽवधारणे। पाठान्तरे मनसा स्वान्तेन विधीयते विशेषेण चिन्त्यते इत्यर्थः ॥ २३ ॥ तदिति। यत्तस्मात् ते त्वया पितापि देहकृदपि मम द्विट् द्वेषी दक्षः न निरीक्ष्यः, पालकपितृत्वादिव्यावृत्त्यर्थं देहकृदित्युक्तम्। तथा ये तदनुव्रतास्तमनुसृत्य वर्त्तमानाश्च तेऽपि न निरीक्ष्याः। अनिरीक्षणे हेतुं दर्शयति। हे वरोरु यो दक्षः विश्वसृजां यज्ञस्तत्र गतस्तं विश्वसृजां सत्रे गतमित्यर्थः। अनागसं निरपराधं मां दुर्वचसा दुरुक्त्या तिरः अकरोत्तिरस्कृतवान् ॥ २४ ॥

विपक्षे दोषमाह। यदीति। यदि मद्वचः अतिहायातिक्रम्य व्रजिष्यसि तद्गृहान्प्रति यास्यसि ततस्तर्हि भवत्यास्तव भद्रं संमानः न भविष्यति। प्रत्युत पराभव एव स्यादिति भावः। संभावितस्य सुप्रतिष्ठितस्य सर्वत्र संमानितस्येति यावत्। स्वजनात् यदा पराभवः जायते तदा स पराभवः सद्यस्तत्क्षणमेव मरणाय कल्पते मरणमेव निष्पादयतीत्यर्थः ॥ २५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

—:※:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ चतुर्थोऽध्यायः

मैत्रेय उवाच

एतावदुक्त्वा विरराम शंकरः पत्न्यङ्गनाशं ह्युभयत्र चिन्तयन् ।
सुहृद्दिदृक्षुः परिशङ्किता भवान्निष्क्रामती निर्विशती द्विधाऽऽस सा ॥ १ ॥

सती हित्वा पतिं तुर्ये पित्रा याताऽवमानिता । क्रुद्धा निर्भर्त्स्य यज्ञे तं जहौ देहमितीरितम् ॥ १ ॥

भवोक्तमर्द्धेनोपसंहरन् भवान्याः स्वाभिप्रेतार्थलाभनिमित्तं शोकं तन्निमित्तं भर्त्तरि क्रोधं भर्त्तारमनादृत्याध्वरे गमनं चाह । एतावदिति । शंकरः शिवः एतावदेतत्परिमितम् उक्त्वा अभिधाय उभयत्र पत्न्यास्तत्र गमनेऽगमने च अनुज्ञादाने बलान्निवारणे वा पत्न्यङ्गनाशं हि स्वाङ्गनाशरीरविनाशमेव चिन्तयन् विरराम तूष्णीमास । सा सती सुहृद्दिदृक्षुः मातृपित्रादीन् द्रष्टुमिच्छती सती निष्क्रामति गृहाद्बहिर्निर्गच्छती प्रयातुमिति शेषः । पुनः भवात् शिवात् परिशङ्किता भर्तृवचोऽतिक्रमे महती हानिरिति संजातशङ्का च सती निविशतीति गृहे प्रवेशं कुर्वती इत्थं तदा द्विधा आस दोलासाम्यभाग्बभूव ॥ १ ॥ सुहृदिति । सुहृदां स्वसुहृज्जनानां या दिदृक्षा द्रष्टुमिच्छा तस्याः प्रतिघातो निरोधस्तेन दुर्मना दुःखितचित्ता स्नेहाद्बन्धुषु प्रेमातिशयत्वतः रुदन्ती अश्रूणां कलाभिर्लेशैरतिविह्वला व्याकुला भवानी भवपत्नी सती अप्रतिपूरुषं समदर्शित्वेन प्रतिपक्षरहितं भवं शिवं रुषा क्रोधेन जातवेपथुः संजातशरीरकम्पा सती प्रधक्षती भस्मीकुर्वन्ती इव ऐक्षत अपश्यत ॥ २ ॥ तत इति । ततः सती विनिःश्वस्य दीर्घं निःश्वासं विमुच्य सतां जिज्ञासूनां प्रियः यश्च प्रेम्णा आत्मनो देहस्य अर्द्धम् अदादृत्तवान् अनेन त्यागानर्हत्वमुक्तम् । तमेवंभूतं शिवं विहाय परित्यज्य स्त्रैणं स्त्रीस्वभावस्तेन विमूढा नष्टा धीर्मतिर्यस्यास्तथाभूता शोकेन बन्धुदर्शनासंभावनानिमित्तजातशोकेन रोषेण दिदृक्षाप्रतिघातनिमित्तक्रोधेन च पुनः दूयता भर्तृवचोऽतिक्रमनिमित्तानर्थसंभावनया परितप्तेन हृदा युक्ता सती पित्रोः गृहान् अगात् प्रत्यगात् ॥ ३ ॥

तामिति । द्रुतविक्रमां सुशीघ्रतया पादविक्षेपान्कुर्वन्तीम् एकामसहायां तां सतीम् अनु पश्चात् सहस्रशः त्रिनेत्रानुचराः शिवस्यानुगाः पार्षदैर्यक्षैश्च सहिताः सपार्षदयक्षाः मणिमांश्च, मदश्च, तावादी येषां ते आगतव्यथा इदमयुक्तं जायते इति संप्राप्तव्यथाः । यद्वा । गतव्यथा निर्भयाः सन्तः पुरः पुरो गतः वृषेन्द्रो येषां तथाभूताः सन्तश्च तरसा बलात् अगच्छन् । शिवाज्ञया सत्या निवारिताः सन्तोऽपि बलादनुययुरित्यर्थः ॥ ४ ॥ तामिति ! तां सतीं वृषेन्द्रम् आरोप्य नन्दीश्वरे उपावेश्येत्यर्थः । सारिका क्रीडाशुकी च, कन्दुकाः गेन्दुकाश्च, दर्पण आदर्शश्चाम्बुजं क्रीडापद्मं च, तैः । सारिका पठननिपुणः पक्षिविशेष इत्यन्ये । एतैः क्रीडोपकरणैः श्वेतातपत्रं च, व्यजनं च, स्रजश्च, ता आदयो येषां तैः राजचिह्नैः गीतायनैर्गीताश्रयैर्विपाञ्चिकोर्ध्वाङ्क्यादिभिः दुन्दुभिरानकैश्च, शङ्खाश्च, वेणवो वंशवाद्यविशेषाश्च तैः विटङ्किता अलंकृताः सन्तः तां सतीं ययुः पश्चाज्जग्मुः ॥ ५ ॥ आब्रह्मेति । आसमन्ताद्यो ब्रह्मघोषः वेदध्वनिस्तेनोर्जितमतिशयितं यज्ञवैशसं परस्परस्पर्द्धा यस्मिंस्तत् विप्रर्षिजुष्टं ब्रह्मर्षिसेवितं तथा सर्वतः विबुधैर्देवैश्च जुष्टं मृन्मृत्तिका च, दारूणि काष्ठानि च, अयो लोहं च, कांचनं सुवर्णं च, दर्भा बर्हिषश्च, चर्माणि अजिनानि च, तैः निसृष्टानि निर्मितानि भाण्डानि पात्राणि यस्मिंस्तत् यजनं यागस्थानं समाविशत् देवीति शेषः ॥ ६ ॥ तामिति । तत्र तस्मिन्यजने आगतां तां सतीं जननीं प्रसूतिं स्वसॄर्भगिनीश्च ऋते विना कश्चन कोऽपि जनः यज्ञकृतो दक्षात् भयात् न आद्रियत्त नादृतवान् । विमानितां दक्षेण कृतावमानामपि सतीं सादरा आदरसहितास्तज्जनन्यादयस्तु प्रेमाश्रुकण्ठ्यः प्रेमाश्रुनिरुद्धकण्ठ्यः सत्यः मुदा परिषस्वजुरालिङ्गितवत्यः ॥ ७ ॥

सौदर्येति । सा सती पित्रा दक्षेण अप्रतिनन्दिता च अनादृता एव । अतः मात्रा स्वजनन्या प्रसूत्या मातृष्वसृभिः मातृभगिनीभिश्च बहुवचनं भगिनीनामुपलक्षणं मातृष्वस्रोर्द्वित्वेन बहुवचनायोगात् । सादरं यथा तथा दत्तां सपर्यां पूजां परमासनमुरुकृष्टमानं च सौदर्येण सोदरत्वेन संप्रश्नो भगिनीकृत आरोग्यादिशुभप्रश्नस्तत्र समर्था योग्या या वार्त्ता तया सह न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आदत्त। मात्रादिदीयमानमासनं वस्त्रालंकारपूजनं भगिनीसंपृष्टकुशलप्रश्नं च न स्वीकृतवतीत्यर्थः ॥८॥ अरुद्रेति। न विद्यते रुद्रस्य भागो यस्मिंस्तं तं स्वपितृसंबन्धिनम् अध्वरं यागं विभौ विभावैश्वर्यातिशयवति देवे शिवे पित्रा दक्षेण कृतं हेलनमाह्वानाद्यकरणरूपामवज्ञां च अवेक्ष्य तथा ईश्वरं सर्वेश्वरं शिवमधिकृत्य वर्त्तमानत्वादधीश्वरी सर्वाध्यक्षा स्वयं चापि यज्ञसदसि पित्रा अनादृता अतः रुषा रोषेण लोकान् धक्ष्यती भस्मीकुर्वाणा इव चुकोप ॥ ९ ॥ जगर्हेति। देवी रौद्ररसावेशद्योतमाना सा सती समुत्थितान् रुद्रावहेलनादिना दक्षं हन्तुं समुद्यतान् उद्युक्तानिति यावत। भूतगणान्मणिमन्मदादीन् स्वतेजसा स्वबलेन निगृह्य निवार्य अमर्षेण कोपेन विपन्ना अव्यक्ता तया गिरा वाचा, धूमपथेषु धूमादिमार्गप्रदकर्मसु श्रमः अभ्यासस्तेन स्मयो गर्वो यस्य तं शिवं द्वेष्टीति शिवद्विट् तम् दक्षं जगतः अभिशृण्वतः सतः, जगर्ह निन्दितवती निन्दावाक्यान्युवाचेत्यर्थः ॥ १० ॥ तान्येवाह। न यस्येति त्रयोदशभिः। प्रियः निरतिशयप्रीतिविषयः आत्मा परमपुरुषो यस्य स तस्य। 'प्रियो हि ज्ञानिनोऽत्यर्थमहम्' इति भगवदुक्तेः। यस्य रुद्रस्य लोके भुवने देहभृतां मध्ये अतिशायनोऽतिशयितः प्रियः प्रीतिविषयः तथा अप्रियोऽप्रीतिविषयो वा न अस्ति। सर्वान्तरात्मानं परमात्मानमेव निरतिशयप्रीतिरूपापन्नया भक्त्या भजते। निजात्मानं ब्रह्मरूपं देहत्रयविलक्षणतयाऽनुसंदधतस्तस्य प्रियाप्रियादिविभागो नास्तीत्यर्थः। मुक्तवैरके सर्वथा त्यक्तविरोधे सर्वभूतसुहृदीत्यर्थः। समस्तात्मनि सर्वात्मनि वैष्णवराजत्वात्समस्तवैष्णवानामात्मवत्प्रिये, यद्वा। समस्ते आत्मा ब्रह्म पूर्णमिति चित्तं यस्य तस्मिन् 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यः कक्षीवानृषिर्विप्रश्च' इत्यादिश्रुतिपूक्तविधया सर्वात्मकं ब्रह्म स्वस्मिन् साक्षात्कुर्वन्ति इत्यर्थः। योऽहं मच्छरीरकः परमात्मा स एव मन्वादिशरीरक इति श्रुत्यर्थः। यद्वा शिवस्य परब्रह्मावेशावतारत्वात्तद्दृष्टया समस्तात्मनीत्युक्तं बोध्यम्। तस्मिन्नेवंविधे शिवे भवन्तम् ऋते त्वां विनेत्यर्थः। कतमः को वा प्रतिपयेत्प्रतिकूलमाचरेत् ॥ ११ ॥

एवं ब्रह्मविदग्रेसरस्य रुद्रस्य प्रतीपाचरणायोग्यत्वमुक्त्वा अथैतस्मिन्साधौ ब्रह्मविदि विहितापराधाद्दुर्जनात्त्वत्त उत्पन्नमिदं शरीरं त्यक्ष्यामीति वक्ष्यमाणा प्रथमं साधुस्वरूपं विभजति। दोषानिति। हे द्विज हे पितरिति पितृशब्देनाऽसंबोधनं तदधिक्षेपायैव। भवादृशाः केचित् त्वादृशाः केचन दुर्जना इत्यर्थः। परेषां स्वापेक्षयेतरेषां गुणेषु गुणगणेषु सत्स्वपीत्यर्थः। दोषान् हि एव गृह्णन्ति, यत्र तत्र तद्दोषानेवोद्घाटयन्ति, न गुणान् ते असाधवः। ये पुनः शिवादयोऽन्यदोषान्न गृह्णन्ति इति शेषः। किं तु फल्गून् अल्पमात्रानपि गुणांश्च, गुणानेव बहुलीकरिष्णवः वितनोतुमिच्छवो भवन्तीत्यर्थः। ते महत्तमाः तेषु महत्तमेषु भवान् अधमपराधम् अविदल्लब्धवान् कृतवानित्यर्थः। गुणेषु साधव इति पाठे तु द्रोग्धृपुरुषचातुर्विध्यं बोध्यम्। तद्यथा हे द्विज भवादृशाः असूयकाः परेषां गुणेषु दोषानेव गृह्णन्ति, न तु गुणान्। केचिन्मध्यमस्थाः गुणेषु दोषान्न गृह्णन्ति, किं तु यथास्थितान् गुणदोषान् विवेकेन गृह्णन्ति, ते तु महान्तः उच्यन्ते। साधवस्तु केवलं गुणानेव गृह्णन्ति, न दोषांस्ते महत्तरा उच्यन्ते। ये तु दोषान् न गृह्णन्त्येव, प्रत्युत फल्गूंस्तुच्छानपि गुणान् बहुलीकुर्वन्ति, ते तु महत्तमाः। तेषु भवान् अघम् अविदत्कल्पितवान्, तच्च ब्राह्मिष्ठानभिभूयेत्यनेन सूचितम् ॥ १२ ॥ असतां त्वादृशामिदं महत्स्वपचरणं युक्तमेवेत्याह। नाश्चर्यमिति। कुणपं शवप्रायं शरीरम् एव आत्मेति ये वदन्ति, तेषु कुणपात्मवादिषु भवादृशेष्विति शेषः। असत्सु असाधुषु सर्वदा सर्वकालम् ईर्ष्या अक्षमा तया सहितं यथा भवति तथेति सेर्ष्यम् महतां विनिन्दा महत्तमविषयं निन्दनम् इति यत् एतत् आश्चर्यं न भवति, प्रत्युत महापुरुषस्य पादौ तयोः पांसवो रेणवस्तैर्महत्तमाङ्घ्रिरजोभिः निरस्तं तेजः प्रभावो येषां तेषु त्वादृशेषु तन्महद्विनिन्दनम् एव शोभनमुचितम्। यद्यपि महान्तः स्वनिन्दां सहन्ते, तथापि तत्पादरेणवस्तदसहमानास्तेषां तेजो निरस्यन्तेऽतोऽसत्सु विनिन्दनमेवोचितमित्यर्थः ॥ १३ ॥ कोऽसावपचारो महत्सु मया कृतस्तत्राह। यदिति। यद्यस्य रुद्रस्य द्व्यक्षरं शिव इत्यक्षरद्वयात्मकं नाम नामधेयं प्रसङ्गात् सकृदपि गिरा वागिन्द्रियेण ईरितमुच्चरितं सत् नृणाम् अघम् पापम् आशु द्राक् हन्ति निवर्त्तयति। शिवस्य सच्छब्दवाच्यवैष्णवोत्तमत्वात्तन्नामोच्चारणस्य भगवन्नामोच्चारणवदघनिवर्त्तकत्वादिति भावः। अलङ्घ्यमनतिक्रमणीयं शासनमाज्ञा यस्य तम्, पवित्रा पवित्रतापादिका कीर्त्तिर्यस्य तं, तं शिवं शिवेतरोऽशिवोऽमङ्गल इत्यर्थः। भवान् द्वेष्टि यत्, तत् अहो कष्टम् अमङ्गलो भवान् द्वेष्टीत्यनेन तद्द्वेषाद्भवतोऽमङ्गलमनन्तरभावीति भावः ॥ १४ ॥

नामोच्चारणमात्रः पापहरत्वमुक्त्वा भुक्तिमुक्तिप्रदत्वेन शिवं वर्णयन्नाह। यत्पादपद्ममिति। किं च। यत्पाद्मं यस्य शिवस्य चरणकमलं ब्रह्मरसो ब्रह्मानन्दः स एवासवो मकरन्दस्तदर्थिभिः ब्रह्मानन्दानुभवमधुलिप्सुभिरित्यर्थः। महतां महज्जनानां मनांसि मानसानि एवालयो भ्रमराः तैः निषेवित 'ईश्वरात् ज्ञानमन्विच्छेत्' इति ज्ञानप्रदत्वादिति भावः। यद्यत्पादपद्मम् अर्थिनोऽर्थार्थिनः लोकस्य स्वप्रेष्ठाऽर्थान् याचमानजनस्येत्यर्थः। आशिषः अभिष्टार्थान् वर्षति ददाति। वाऽवधारणे। विश्वबन्धवे सकलविश्वजनानुकूलाय तस्मै प्रोक्तमहिमवते शिवाय भवान् द्रुह्यति अपकरोति। 'क्रुधद्रुह' इति चतुर्थी ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नन्वमङ्गलाचारत्वात्तन्नामापि न स्मर्त्तव्यमेव तत्राह। किं वेति। यः शिवः श्मशाने पितृकानने जटाः संलग्नकचान् अवकीर्य विक्षिप्य, तस्य श्मशानस्य माल्यानि च, भस्मानि च नृकपालानि च भूषणत्वेन सन्त्यस्येति तन्माल्यभस्मनृकपाली, श्मशानक्षिप्तशवालंकरणपुष्पहारभस्मनरकपालवान् सन्नित्यर्थः पिशाचैः सह अवसत। तमेवंविधं शिवाख्यं शिव अशिवममङ्गलरूपं त्वदन्ये त्वत्त इतरे ये ब्रह्मादयो देवाः किं वा न विदुः। यदि ब्रूयाः विदुरेवेति चेत् तच्चरणावसृष्टं तस्य शिवस्य चरणस्पर्शं प्राप्य भूसंस्थं रज इत्यर्थः। मूर्द्धभिरनर्घ्यकुमुटयुताशिरोभिः कथमिति शेषः। दधति धारयन्ति। ब्रह्मादय इत्यतद्गुणसंविज्ञानो बहुव्रीहिः। सुपर्णशेषप्राणेशब्रह्माविष्णून् श्रियं गिरम्। ऋते नमति नो रुद्रं क एव पुरुषार्थभाक्' इति स्कन्दवाक्येन विरोधात्। अस्यामङ्गलाचारस्त्वनुकरणमात्रमिति भावः। अनेन 'शिवापदेशो ह्यशिव' इति यदुक्तम् यच्च प्रेतावासेष्वित्यादि यदुक्तम् तत्सर्वं समाक्षिप्तम्॥ १६॥ भवतु मया बहुधा भवोऽभिभूतस्तथापि किं भवत्या भवितव्यं देहत्यागवत्येति ब्रुवती धर्मतत्त्वमाह। कर्णाविति। धर्माविति। धर्मावितरि धर्मरक्षके ईशे स्वामिनि ईश्वरांशभूते महत्तमे वो असृणिभिर्निरंकुशैः तथात्वाद्गिनयेन कृतमपि तन्निवारणममन्यमानैरित्यर्थः। नृभिर्दुर्जनैः अस्यमाने अधिक्षिप्यमाणे सति यदि तत्कृताधिक्षेपश्रवणकरः सुजन इति शेषः। अकल्पो विनिन्दकदुर्जनशिक्षाचरणेऽसमर्थः स्यात, तर्हि सः कर्णौ श्रोत्रे पिधाय आच्छाद्य ततः निरयान्निर्गच्छेदित्यर्थः। यद्यपि प्रभुः समर्थः चेत् असतां रुशतीं परुषभाषित्वात् दुष्टां जिह्वां तद्रसनां प्रसह्य बलात् छिन्द्यात्। तथा प्रभुत्वासंभवे स्वयम् असून्प्राणान् अपि वा विसृजेत्त्यजेत्। सः धर्मः॥ १७॥

अत इति। अतः शितिकण्ठगर्हिणः शंकरद्वेषिणः तव अपादानस्यैव शेषत्वविवक्षया षष्ठी। उत्पन्नं त्वत्तः प्रादुर्भावं प्राप्तम् इदं कलेवरं मदीयमिदं शरीरमित्यर्थः। न धारयिष्ये। प्रमादादापन्नस्यापवित्रस्य त्यागं विना न शुद्धिरिति दृष्टान्तेनाह। मोहात् जग्धस्य भक्षितस्य जुगुप्सितस्य दुष्टस्य अन्धसोऽन्नस्य उद्धरणं वमनं हि एव विशुद्धि शुद्धिकरं प्रचक्षते कथयन्ति॥ १८॥ ननु किमेवमाग्रहं करोषि, यतोऽसावमङ्गलो रुद्रः समीचीनं वैदिकं पन्थानमुल्लङ्घ्य वर्त्ततेऽतो वैदिकमार्गानुवर्त्तिनां श्रेष्ठेन मया क्षिप्यते इत्यत्राह। न वेदेति। स्वे स्वात्मनि वर्त्तमाने इति शेषः। लोक्यते परिशुद्धमनसा दृश्यते इति लोकः परं ब्रह्म तस्मिन्, स्वान्तर्यामितया वर्त्तमाने परब्रह्मणि इत्यर्थः। रमतो रममाणस्य महामुनेः शिवस्य मतिर्बुद्धिः वेदवादान् 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' 'अपाम सोमममृता अभूम' इत्यादीन्कर्मप्ररोचनार्थकार्थवादान् न अनुवर्त्तते। अर्थवादेष्वासक्ता न भवति। निवृत्तिमार्गनिष्ठस्य प्रवृत्त्यध्वनि रुच्यनुदयाद्वेदोक्तेऽपि तत्राननुवर्त्तनमधिकारभेदादिति भावः। अनयोः प्रवृत्तिनिवृत्तिधर्मनिष्ठयोरधिकारभेदेनाचारभेदे दृष्टान्तः। यथा देवश्च मनुष्यश्च तयोः गतिः पृथग्भिन्नभिन्नैव दृश्यते। देवानां गतिराकाश एव, मनुष्याणां गतिः पृथिव्यामेव, तद्वद्विरक्तत्वाविरक्तत्वोपाधिमत्तयोरुभयोराचारभेदादिति शेषः। स्वे स्वकीये एव धर्मे प्रवृत्तिलक्षणे निवृत्तिलक्षणे चाचारे इत्यर्थः। स्थितः सन् परमन्यं धर्मं पुरुषं वा न क्षिपेत् न निन्देत्। व्यवस्थिताधिकारत्वेनोभयोः समत्वान्नान्योन्याक्षेपः समुचित इति भावः॥ १९॥ पुनरेतदेवोपपादयन्त्याह। कर्मेति। प्रवृत्तं स्वर्गादिफलोद्देशेन वर्त्तमानमग्निहोत्रादिकम्, निवृत्तं मोक्षफलोद्देशेन वर्त्तमानं शमदमादिरूपं कर्म चापि वेदे ऋतं सत्यमेवाभिहितं तच्च उभयलिङ्गं रागवैराग्यलक्षणचिह्नम् आश्रितं सत् विविच्य व्यवस्थां प्राप्येत्यर्थः। असांकर्येण स्थितमस्तीति शेषः। ननु 'यावज्जीवमग्निहोत्रं जुहोति शान्तो दान्तः' इत्यादौ नैवं व्यवस्था प्रतीयते इति चेत्सत्यम्, तथाप्युभयोरेकाधिकारविरोधात्तथा पर्यवस्यतीत्याह। तत द्वयं प्रवृत्तिनिवृत्तिभेदेन वर्त्तमानं द्विविधं कर्मेत्यर्थः। यौगपद्युगपत् एककालमित्यर्थः। एकश्चासौ कर्त्ता च तस्मिन् विरोधि एकस्मिन्नधिकारिणि परस्परविरोधवदेवदिति भावः। एतत्त्वनीश्वरविषयम् ईश्वरे तु द्वयमपि कस्याप्यर्थस्य साधनतां न प्राप्नोतीत्याह। ब्रह्मणि ब्रह्मात्मनि शिवे तु तथा अनीश्वरवत् द्वयं कर्म प्रवृत्तनिवृत्तात्मकं द्विविधमपि कर्मेत्यर्थः। न ऋच्छति साधनतामिति शेषः। यदा कथंचिदानुगुण्यं स्वीक्रियते, तर्हि केवलं निवृत्तं कर्मैवात्मारामाणां ज्ञानयोगानुगुणं न तूभयमपि, तथा सति निवृत्तकर्म तु शिवेनेश्वरेण सतापि क्रियत एवेति भावः। अनेन यथा प्रवृत्तनिवृत्तधर्मनिष्ठयोः परस्परधर्माकरणे न दोषस्तथेश्वर एतदुभयधर्माकरणेऽपीति सूचितम्॥ २०॥

यत एवमुभयविधं कर्माधिकारिभेदेन व्यवस्थितमस्त्यथापि लोकसंग्रहार्थमस्मदनुष्ठितनिवृत्तिधर्मसाध्याणिमादयः सिद्धयः, प्रवृत्तिधर्मपरायणानां भवतां न सन्तीत्याह। मा व इति। हे पितः अस्मदाश्रिताः अस्माभिः परिगृहीताः पदव्योऽणिमादिसिद्धिसमृद्धिरूपाः वो युष्माकं मा न सन्तीत्यर्थः। तर्हि वोऽस्त्वेवं परमस्माकं सिद्धयो रुद्रस्याऽपि न सन्तीति चेत्तत्राह। या भवदीयाः स्वर्गादिपदव्यः सन्ति। तास्तु अनुधूमवर्त्मभिः धूमादिमार्गप्रदयज्ञादिकर्मानुयायिभिः तदन्नतृप्तैः यज्ञीयकुत्सितान्नेन तृप्तैः असुभृद्भिः प्राणिभिः पाठान्तरे कदन्नतृप्तैः पशुमांसलक्षणेनान्नेनालंबुद्धिं गतैः। असुहृद्भिः पशुप्राणहारिभिः पुरुषैरित्यर्थः। यज्ञशालास्वेव ईडिताः स्तुताः यावद्भोजनकालं प्रशंसीकृता इत्यर्थः। अस्मदाश्रितास्ताः पदव्यस्त्विति शेषः। सव्यक्तलिङ्गाः दुरवगमचिह्नाः दुर्विभाव्या इत्यर्थः। अवधूतसेविताः निरस्तनिखिलजरामरणादिसांसारिकधर्मैः संसेविताः परिगृहीताः सन्तीति यावत। अतोऽहमाढ्यो, रुद्रो दरिद्र इति गर्वं मा कृथा इत्यभिप्रायः। प्रवृत्तिनिवृत्तिधर्मयोः फलतोऽनुष्ठानतश्च यतो महदेव वैलक्षण्यमस्त्यतो महत्तमानां न प्रवृत्तिधर्मे रुचिरुत्पद्यत इति भावः॥ २१॥ किं बहुना स्वदेहं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्यक्ष्याम्येवेत्याह । नेति द्वाभ्याम् । हरे रुद्रे कृतागसः कृतापराधस्य तव देहोद्भवेन त्वद्देहादुत्पन्नेनेत्यर्थः । आर्षत्वात्सापेक्षस्यापि समासः । अतः कुजन्मना कुत्सितेन एतेन देहेन अनेन मदीयेन शरीरेणेत्यर्थः । न, प्रयोजनं न भवत्येवेत्यर्थः । किं तु अलमलम् अज्ञानत एतावत्कालपर्यन्तं रक्षितेन पूर्णमित्यर्थः । ननु श्लाघ्यमिमं देहं कथं त्यक्ष्यसीत्यत्राह । कुजनप्रसङ्गतः कुत्सितजनस्य तव संबन्धात् मम व्रीडा लज्जा अभूत् । अतः महतां यः अवद्यकृद्विप्रियकर्ता तज्जन्म तस्माद्यज्जन्मधारणं तदित्यर्थः । धिक् । त्वत्संबन्धादश्लाघ्यमित्यर्थः ॥ २२ ॥ गोत्रमिति । किं च भगवान् वृषध्वजो रुद्रः परिहासादिषु नर्मोक्तिष्विति शेषः । मां दाक्षायणि एहि इति संबोधयन्नित्यर्थः । त्वदीयं त्वत्संबन्धबोधकं गोत्रं नाम यदा आह गृह्णीयादित्यर्थः । तदा अहं व्यपेतं नर्म स्मितं च यथा भवत्येवम् आशु सुदुर्मनाः अतिदुःखितचित्ता भवेयमिति शेषः । तत्तस्मात् हि निश्चितमेव त्वदङ्गजं त्वदङ्गाज्जातम् एतत् कुणपं त्वद्देहोत्पन्नमिदं कलेवरमित्यर्थः । व्युत्स्रक्ष्ये त्यक्ष्यामि ॥ २३ ॥

इतीति । हे शत्रुहन् विदुर इत्युक्तप्रकारेण अध्वरे यज्ञे दक्षम् अनूद्य दक्षोदितशिवनिन्दावचनप्रत्याख्यानं कृत्वेत्यर्थः । शान्तवाक् गृहीतमौना स्वयं सती उदीचीम् उत्तरदिशमुद्दिश्येत्यर्थः । क्षितौ निषसाद । तत्र जलं स्पृष्ट्वा आचम्य पीतं पीतवर्णं यद्दुकूलं वस्त्रं तेन संवृता सती दृक् दृशम् आर्षत्वात् द्वितीयायाः स्थाने दृगिति प्रथमा । निमील्य दृशोर्निमीलनं कृत्वा योगपथं योगिनां देहत्यागमार्गं समाविशत आश्रितवती ॥ २४ ॥ योगपथाश्रयणमाह । कृत्वेति । जितमासनं यया सा क्रमरहिता अनिन्दिता निर्दोषा सा सती अनिलौ प्राणापानौ समानौ ऊर्ध्वाधोवृत्तिनिरोधेन समानवृत्ती एकरूपावित्यर्थः । नाभिचक्रतः नाभिचक्रस्थाने कृत्वा प्रथमं रेचकपूरके कृत्वा प्राणापानावनिलौ ऊर्ध्वाधोवृत्तिपरित्याजनेन नाभिचक्रे एवैकविषयगतिकौ विधायेत्यर्थः । ततः उदानमुदानवायुम् उत्थाप्य च ऊर्ध्वमुखं कृत्वैव धिया सह शनैः हृदि स्थाप्य स्थापयित्वा उरसि स्थित-मुदानवायुं कण्ठात्कण्ठमार्गेणेत्यर्थः । भ्रुवोः मध्यम् अनयत् ॥ २५ ॥ एवमिति । महत्तां महीयसा महत्तमेन शिवेनेत्यर्थः । आदरात् मुहुः पुनः पुनः अङ्कमुत्सङ्गं समारोपितं प्रत्यारोपितं स्वदेहम् एवमुक्तप्रकारेण दक्षरुषा दक्षोपरि जातक्रोधेन जिहासती त्यक्तुमिच्छन्ती मनस्विनी स्वतन्त्रा स्वतन्त्रमरणेत्यर्थः । सती गात्रेष्वङ्गेषु अनिलेन युक्तोऽग्निस्तस्य धारणा तां दधार चकार ॥ २६ ॥ तत इति । ततः जगतां जिज्ञासूनां गुरुर्ज्ञानप्रदस्तस्य स्वभर्तुः शिवस्य चरणाम्बुजासवं शिवचरणध्यानोत्पन्नानन्दलक्षणं मधु चिन्तयत्यनुभवन्ती अत एव हतकल्मषा भर्त्राज्ञोल्लङ्घनादिपापरहिता सती अपरं भर्तुः सकाशादन्यत्किंचित् न च नैव ददर्श चिन्तितवतीत्यर्थः । देहस्तस्याः शरीरं तु सद्यस्तत्क्षणमेव समाधिजो योऽग्निस्तेन प्रजज्वाल प्रज्वलितोऽभूत् ॥ २७ ॥ तदिति । तत् महत् अद्भुतमाश्चर्यं पश्यतां भुवि पृथिव्यां खे आकाशे च सुमहानुच्चैः हा हा इत्येवंविधः वादः घोषः अजायत अभूत् । तदेवाह । हन्तेति विषादे । दैवतमस्य देवश्रेष्ठस्य शिवस्य देवी प्रिया सती केन दक्षेण प्रकोपिता कोपं प्रापिता सती असून् प्राणान् जहावत्यजत् ॥ २८ ॥

अहो इति । अहो अस्य प्रजापतेर्दक्षस्य महत् अनात्म्यं दौर्जन्यं पश्यत । चराचरं विश्वं यस्य शिवस्य प्रजाः, प्रजावत्प्रीतिविषयं विश्वसुहृद इत्यर्थः । तस्य रुद्रस्य सती भार्या आत्मजा दक्षस्यैव पुत्री तत्रापि मनस्विनी प्रशस्तमनस्त्वादि-गुणवती अत एव अभीक्ष्णं मानं सत्कृतिम् अर्हति । सा विमता दक्षेणापमानिता यत् ततः असून्प्राणान् जहौ । अतो नेयं विमाननयोग्येत्यनेन सूचितम् ॥ २९ ॥ सोऽयमिति । दुर्मर्षं कस्याप्युत्कर्षाद्यसहनकरं हृदयं यस्य सः ब्रह्मबन्धुर्ब्राह्मणापसदः ब्रह्मध्रुगिति पाठे ब्रह्मात्मकरुद्रद्वेषीत्यर्थः । पुरुषद्विट्, भगवद्भक्तद्रोहस्य भगवतो द्रोहादप्यधिकत्वाद्वैष्णवराजशिवद्वेषकर्तृतया भगवत एव द्वेषकारश्च, स मान्यप्रेसरतया जगत्प्रसिद्धः, अयं दक्षः लोके महतीमतिशयिताम् असतीमिति पाठेऽतिनिकृष्टा-मित्यर्थः । अपकीर्त्तिम् अवाप्स्यति । चशब्दान्नरकमपि । यद्यतः स्वामात्मीयाम् अङ्गजां पुत्रीम् अपराधतः स्वकृतावज्ञयेत्यर्थः । मृतये मरणाय उद्यतामुद्युक्तां न प्रत्यषेधन्न न्यवारयत् ॥ ३० ॥ वदतीति । सत्या दाक्षायण्याः अद्भुतमाश्चर्यकरम् असुत्यागं प्राणत्यागं दृष्ट्वा जने लोके एवमुक्तप्रकारेण वदति सति तत्पार्षदाः रुद्रस्य पारिषदाः दक्षं हन्तुम् उदायुधानि आयुधानि यैस्तथा-भूताः सन्तः उदतिष्ठन् उत्थितवन्तः ॥ ३१ ॥ तेषामिति । आपततां समंततः समागच्छतां तेषां पार्षदानां वेगं निशाम्य दृष्ट्वा भगवान् भृगुः यज्ञघ्नान् हन्तीति यज्ञघ्नघ्नं तेन यजुषा 'अपहतं रक्ष' इत्यादिना । 'अपहता असुरा रक्षांसि' इत्यादिनेत्यन्ये । 'ये नो रयिं दुस्तरितासो य दृन्मतासो अनृतं वयन्तस्तेषां वपूंष्यर्चिषा जातवेदः शुष्कं न वृक्षमुत संदहस्व' इत्यादिनेत्यपरे । दक्षिणाग्नौ जुहाव हेति विस्मये ॥ ३२ ॥ अध्वर्युणेति । अध्वर्युणा भृगुणा ओजसा हूयमाने सति ये तपसा तीव्रं तपो विधायेत्यर्थः । सोमं प्राप्ताः ते ऋभवः नाम सहस्रशः देवा उत्पेतुरुत्थिताः ॥ ३३ ॥ तैरिति । ब्रह्मतेजसा उशद्भिर्दीप्यमानैः अलातान्येवायुधानि येषां तैः, तैर्ऋभुभिः हन्यमानाः ताड्यमानाः । पाठान्तरे परितप्यमानाः सहगुह्यका गुह्यकैः सह वर्त्तमानाः सर्वे प्रमथाः रुद्रपार्षदाः दिशः भेजुः । पलायितवन्त इत्यर्थः ॥ ३४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ पञ्चमोऽध्यायः

मैत्रेय उवाच

भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात् ।
स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे ॥ १ ॥

शंकरस्त्यागमाकर्ण्य सत्या देहस्य पञ्चमे । वीरभद्रं क्रुधोद्भाव्य दक्षं तेन व्यनाशयत् ॥ १ ॥

एवं सत्याः प्राणत्यागनिमित्तं त्यागप्रकारं च सप्रपञ्चमुक्त्वाऽथ तत्प्रसङ्गात्प्रसक्तं दक्षाध्वरविनाशं पुनस्तत्संधानं च सप्रपञ्चमाह त्रिभिरध्यायैस्तत्राद्येनाध्वरविनाशप्रकारमाह मैत्रेयः । भव इति । भवः शिवः प्रजापतेर्दक्षस्य । कर्त्तरि षष्ठी । प्रजापतिनेत्यर्थः । असत्कृतायाः भवान्याः सत्याः निधनं तथा तस्य दक्षस्य योऽध्वरस्तस्मिन् ये ऋभवो भृगूत्पादिता देवास्तैः विद्रावितं पलायितं स्वपार्षदानां सैन्यं च नारदान्मुनेः अवगम्य श्रुत्वा अपारं क्रोधम् आदधे कृतवानित्यर्थः ॥ १ ॥ क्रुद्ध इति । ततः क्रुद्धः अत एव सुतरां दष्टः ओष्ठपुटो येन सः, धूर्जटि अग्रे जटा यस्य सः । स रुद्रः शिवः, वडितां वह्नीनां च सटा ज्वालास्तद्वदुग्रं रोचिर्यस्यास्तां जटाम् उत्कृत्योत्पाट्य सहसा उत्थितः, गम्भीरः नादो यस्य सः । हसन्नट्टहासं कुर्वन् सन्, भुवि तामुद्धृतां जटां विससर्ज अपातयत् । भूमावास्फालयदित्यर्थः ॥ २ ॥ तत इति । ततस्तस्या जटायाः सकाशात् अत्यतिशयितः कायो देहो यस्य सः, वीरभद्रः जात इति शेषः । तं विशिनष्टि । तनुवा तन्वा देहेनेत्यर्थः । दिवं द्युलोकं स्पृशन्नत्युच्च इत्यर्थः । सहस्रं बाहवो यस्य सः । घनरुक् कृष्णवर्णः । तिस्रः सूर्यसदृशाः दृशो यस्य सः । करालास्तुङ्गा उग्रा वा दंष्ट्रा यस्य सः । ज्वलन्नग्निरिव मूर्द्धजा यस्य सः । कपालानां नृकपालानां मालाः सन्त्यस्येति तथाविधः, विविधान्युद्यतान्यायुधानि येन सः ॥ ३ ॥ तमिति । किं करोमि, हे शंभो भवदीयं किं करवाणि । इत्येवं गृणन्तं भाषन्तं बद्धाञ्जलिं कृतकरसंपुटं तं वीरभद्रं भूतनाथः भगवान् रुद्रः आहोवाच । हे रुद्र हे भट युद्धकुशल मद्भटानां त्वम् अग्रणीर्नायकः, मे मम अंशकोंऽशभूतः असि । अत एव सयज्ञं यज्ञसहितं दक्षं जहि विनाशय । ब्राह्मं तेजो मम दुर्जयमिति मा मंस्थाः मदंशत्वादिति भावः ॥ ४ ॥

आज्ञप्त इति । भो तात कुपितेन संजातातिकोपेन मन्युना रुद्रेण एवमुक्तप्रकारेण आज्ञप्तः स वीरभद्रः देवदेवं विभुं शिवं परिचक्रमे प्रदक्षिणीचकार । तदा असङ्गरंहसा प्रतिघातरहितवेगेन महीयसां बलीयसामपि सहः सहिष्णुं बलसहनसमर्थम् आत्मानं मेनेऽमन्यत । क्वचित्तु असह्यरंहसेति, महःसहिष्णुमिति च पाठौ दृश्येते तत्रापि विचारत उक्तपाठार्थ एव प्रतिभाति ॥ ५ ॥ अन्वीयमान इति । स वीरभद्रः, भृशं त्वत्यन्तमेव नदद्भिर्ध्वनद्भिः रुद्रपार्षदैः अन्वीयमानः परिवेष्टितः सुभैरवमतिभयंकरं यथा भवति तथा व्यनदत् ननाद । ततः स वीरभद्रः जगदन्तको मृत्युस्तस्याप्यन्तकं संहर्तृ शूलं त्रिशिखम् उद्यम्य, घोषणानि ध्वनन्ति भूषणानि नूपुरादीनि ययोस्तावङ्घ्री यस्य एवंभूतः सन् संप्राद्रवत दक्षाध्वरं प्रत्यतिवेगमगात् ॥ ६ ॥ अथेति । अथ ततः ऋत्विजो दक्षाध्वरगता ऋत्विजः, यजमानः दक्षः, तथा सदस्याः सभ्याः, द्विजाः द्विजपत्न्यश्च उदीच्यामुत्तरस्यां ककुभि दिशि रेणुं रजःपुंजं प्रसमीक्ष्य एतत् तमः किं, तमः स्यात्किमेतदित्यर्थः । दिवाहेतुना ध्वान्तं तु न भवतीति वितर्क्य तर्हि किमेतदिति चेत्तत्राहुः । रजः धूसरत्वादिगुणवदेतद्रजः एवेत्यर्थः । इति निश्चित्येति शेषः । एतत् कुतः अभूत् इति दध्युश्चिन्तयामासुः ॥ ७ ॥ हेत्वन्तरासंभवेनौत्पातिकं कल्पयन्त आहुः । वाता इति । वाताश्चण्डा वायवः, न वान्ति नैव प्रसरन्ति । दस्यवश्चोरादयः न सन्ति । तत्र हेतुः । हि यस्मात् उग्रः दण्डः प्रशासनं यस्य सः, उग्रेषु दण्डोऽस्येति वा प्राचीनबर्हिस्तदानींतनो राजा, ह स्फुटं जीवति तस्मिन् जीवति न दस्यवः संभवन्तीति भावः । तज्जीवनलक्ष्म दर्शयति । गावः न काल्यन्ते शीघ्रं न नीयन्ते दस्युभिरिति शेषः । अतः इदं रजः कुतः उत्थितम् अधुना लोकः प्रलयाय नाशाय कल्पते किम्, संभाव्यते किन्त्वित्यर्थः ॥ ८ ॥ प्रसूतीति । प्रसूतिमिश्राः दक्षपत्नीसहिताः स्त्रियः उद्विग्नं भीतं चित्तं यासां ताः सभयमानसाः सत्य ऊचुः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परस्परं कथयांचक्रुः तस्य दक्षस्य संबन्धिनः वृजिनस्य पापस्य एषः विपाकः उत्पन्न इति शेषः। यद्यस्मात् प्रजेशो दक्ष दुर्हृतॄणां पश्यन्तीनां सतीनाम् अनेन तस्याः दुःखाधिक्यं सूचितम् अनागसं निरपराधां भवानीं सतीं सुतां स्वात्मजाम् अवदध्यावज्ञातवान् ॥ ९ ॥

असह्यपराक्रमं रुद्रं कोपयतो दक्षस्यामङ्गलमवश्यं भावीत्याहुर्द्वाभ्याम्। यस्त्विति। यः रुद्रस्तु अन्तकाले प्रलयकाले व्युप्तो विकीर्णो जटाकलापो यस्य सः स्वस्य यच्छूलं तस्य सूच्यग्रं तया तस्यां वा अर्पिताः प्रोता दिग्गजेन्द्रा दिक्करिणो येन सः उदितान्युन्नमितानि अस्त्राणि यैस्ते च ते दोषो बाहव एव ध्वजास्तान् वितत्य प्रसार्य उच्चश्वासावट्टहासश्च स एव स्तनयित्नुर्गर्जितं तेन भिन्ना विदीर्णा दिशो येन तथाभूतः सन् हर्षेणेति शेषः। नृत्यति ॥ १० ॥ अमर्षयित्वेति। असह्यं सोढुमशक्यं तेजो यस्य तम्, मन्युना क्रोधेन प्लुतो व्याप्तस्तम् अत एव भ्रुकुट्या कुटिलिकृतभ्रुवा दुर्विषहं दुर्निरीक्ष्य, तदानीं द्रष्टुमशक्यमित्यर्थः। करालाश्च ता दंष्ट्राश्च ताभिः उदस्त उत्क्षिप्तो भागणो नक्षत्रसंघो येन तम्, तमेवंविधं शिवम् अमर्षयित्वा असहनतायुक्तं कृत्वा कोपयतः विधातुर्ब्रह्मणोऽपि स्वस्ति सुखं स्यात्किं विधातुरप्येवं यदा तदान्यस्य का कथेत्यर्थः ॥ ११ ॥ बह्विति। उद्विग्ना प्रचलिता दृग्यस्य तेन जनेन बहु बहुधा यथा भवति तथा एवमुक्तप्रकारेण उच्यमाने कथ्यमाने सति सहस्रशः उत्पाततमा महोत्पाताः महात्मनः स्थिरचित्तस्यापि दक्षस्य मुहुः भयावहाः सन्तः भूमौ पृथिव्यां दिव्यन्तरिक्षे च पर्यक् परितश्च उत्पेतुः उत्थिताः। प्रादुरभवन्नित्यर्थः ॥ १२ ॥ तावदिति। हे विदुर तावद्यावदेवमुत्पाता अभूवंस्तस्मिन्काले, नाना विचित्राण्यायुधानि येषां तैः, उदायुधैरुद्यतायुधैः वानकैः खर्वैः, पिङ्गैः कपिलैः, पिशङ्गैः पितैः मकरस्येवोदरमाननं च येषां तैः, पर्यद्रवद्भिः, रुद्रानुचरैः सः महान् मखो यागः, अन्वरुध्यत प्रत्यवरुध्यत विनाशित इति यावत् ॥ १२ ॥ मखान्वरोधमेव प्रपञ्चयति। केचिदिति। केचिद्रुद्रपार्षदाः प्राग्वंशं यज्ञशालायाः पूर्वपश्चिमस्तम्भयोरर्पितं काष्ठं प्राग्वंशस्तं बभञ्जुः त्रुटितवन्तः। अथ च अपरे पत्नीशालां यज्ञशालायाः पश्चिमतो वर्त्तमानां पत्नीशालां बभञ्जुः। तथा एके, सदः यज्ञशालायाः पूर्वतः स्थितं मण्डलम्, सदसः पुरतो हविर्धानम्, तस्योत्तरत आग्नीध्रशाला तां बभञ्जुः। तद्विहारं यजमानगृहं बभञ्जुः। महानसं पाकशालां भोजनशालां चापि बभञ्जुः ॥ १४ ॥

रुरुजुरिति। केचित् यज्ञपात्राणि रुरुजुर्बभञ्जुः। तथा केचित् अग्नीन् अशान्तयन्ननाशयन् एव। केचित् कुण्डेषु अमूत्रयन् मूत्रोत्सर्गं कृतवन्तः। केचित् वेदिमेखलाः उत्तरवेद्याः सीमासूत्राणि बिभिदुः ॥ १५ ॥ अबाधन्तेति। अन्ये मुनीन् अबाधन्त बबाधिरे, एके पत्नीः अतर्जयन् भीषयामासुः। अपरे पलायितान् कृतपलायनान् प्राप्तासन्नान् पलायितेष्वप्यनुधावनेन समीपं प्राप्तान् देवान् जगृहुर्गृहीतवन्तः ॥ १६ ॥ भृगुमिति। मणिमान् रुद्रानुचराग्र्यः भृगुं बबन्ध। वीरभद्रः प्रजापतिं दक्षं बबन्ध। चण्डीशः पूषणं देवं पूषणाख्यममरमित्यर्थः। अग्रहीत्। नन्दीश्वरः भगं भगनामानं देवम् अग्रहीत् ॥ १७ ॥ सर्व एवेति। सदिवौकसः देवैः सहिताः सर्वे सदस्याः सभ्याः ऋत्विजः, तैः रुद्रानुचरैः ग्रावभिरश्मशकलैः सुभृशम् अर्द्यमानान् भृग्वादीन् दृष्ट्वा नैकधा अनेकधा एव अद्रवन् दुद्रुवुः ॥ १८ ॥ जुह्वत इति। स्रुवो होमसाधनं हस्ते यस्य तस्य जुह्वतो होमं कुर्वतः भृगोः श्मश्रूणि भगवान् समर्थः भवो वीरभद्रः लुलुञ्चे उत्पाटितवान्। विशेषतः श्मश्रूत्पाटने हेतुमाह। यो भृगुः सदसि श्मश्रूणि दर्शयन् अहसत् शिवं परिहसितवान् एवमुत्तरत्रापि ॥ १९ ॥ भगस्येति। भगवान् वीरभद्रः रुषा क्रोधेन भुवि भूमौ पातितस्य भगस्य नेत्रे उज्जहार उद्धृतवान्। अत्र हेतुमाह। यो भगः सदःस्थः सभायामवस्थितः सन् शपन्तं शिवनिन्दां कुर्वन्तं दक्षमित्यर्थः। अक्ष्णा नेत्रेण अससूचत् सूचितवान् प्रेरितवानित्यर्थः ॥ २० ॥ पूष्ण इति। कलिङ्गस्य कलिङ्गदेशराजस्य बलो बलभद्रः यथा तथा पूष्ण एतन्नामो देवस्य दन्तान् अपातयत् पातितवान्। तत्र हेतुमाह। यः पूषा गरिमणि गुरुतरे रुद्रे शप्यमाने सति दतः दन्तान् दर्शयन् अहसत्। पुष्णोश्चापातयद्दन्तानिति पाठे द्विवचनम् 'ऐन्द्रापौष्णश्चरुर्भवति' इत्यत्रान्येनेन्द्रेण सहितस्यापि पूष्णो दन्तपातवर्चा सूचयति। ननु 'पूषा प्रपिष्टभागोऽदन्तको हि तं देवा अब्रुवन्' अस्यां श्रुतौ विहिते तत्पोषणे द्विदैवत्यादर्शनादिन्द्रेण साहित्ये तस्य सदन्तता प्रतीता स्यादित्याशङ्क्य इन्द्रेण सहावस्थानेऽपि तस्य दन्तपातवत्ता द्विवचनेन ज्ञाप्यतेऽत एव पुष्णोऽनुग्रहं द्वेधा वक्ष्यति 'पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक्' इति केवलश्चेत्पिष्टभुक् भविष्यति, अन्येनेन्द्रेण सहितश्चेद्यजमानस्य दद्भिर्भक्षयिष्यतीत्यर्थः ॥ २१ ॥

वीरभद्रो दक्षं बध्वा किमकरोदिति तत्राह। आक्रम्येति। तदा यस्मिन्काले दक्षो बद्धस्तस्मिन्काले त्रीण्यम्बकानि नेत्राणि यस्य सः वीरभद्रः दक्षस्य प्रजापतेः उरसि आक्रम्य पादं विन्यस्य शितधारेण निशितधारावता हेतिना खड्गेन छिन्दन्नपि तच्छिरः उद्धर्तुं कण्ठाद्वियोजयितुमित्यर्थः। न अशक्नोत् समर्थो नाभवत् ॥ २२ ॥ शस्त्रैरिति। पशुपतिः हरो वीरभद्रः अस्त्रान्वितैर्मन्त्रसहितैःशस्त्रैः एनं दक्षम् अनिर्भिन्नत्वचं दृष्ट्वेति शेषः। परं विस्मयम् आपन्नः प्राप्तः सन् चिरं दध्यौ। तच्छिरस उद्धरणोपायं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चिन्तितवान् ॥ २३ ॥ दृष्ट्वेति । पशूनां पतिः स वीरभद्रः मखे अध्वरे संज्ञपनं मारणसंबन्धिनं योगमुपायं कण्ठनिष्पीडनादिरूपं दृष्ट्वा निश्चित्य तेनैव योगेन यजमानपशोः कस्य दक्षस्य कायात् देहात् शिरः अहरत् सद्य उद्धृतवान् ॥ २४ ॥ साध्विति । तदा तस्य वीरभद्रस्य तद्दक्षशिरश्छेदनरूपं कर्म शंसतां स्तुवतां तेषां भूतप्रेतपिशाचानां साधुवादः समीचीनं कृतमित्येवं भाषणमित्यर्थः । अभवत । अन्येषां ब्राह्मणादीनां तद्विपर्ययोऽसाधुवादः अभवत् ॥ २५ ॥ जुहावेति । अमर्षितः संक्रुद्धो वीरभद्रः एतच्छिरो दक्षस्य शिरः तस्मिन्नध्वरसंबन्धिनीत्यर्थः । दक्षिणाग्नौ जुहाव । एवं तद्देवयजनं यस्मिन् भृगुः ऋभून्‌त्यर्थमजोहवीत्त-द्देवयजनस्थानमित्यर्थः । दग्ध्वा गुह्यकालयं कैलासं प्रातिष्ठत् प्रययौ ॥ २६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

—:❋:—

अथ षष्ठोऽध्यायः

मैत्रेय उवाच

अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः । शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥

विधिर्गत्वा भवं देवसंघेन सह प्रभुके । दक्षादिजीवितायर्थं सान्त्वयामास चादरात् ॥ १ ॥

एवं दक्षाध्वरविनाश उक्तोऽथ पुनस्तत्संधानप्रकारं विवक्षुस्तदुपोद्घातरूपं देवकृतरुद्रप्रसादनं वक्ष्यंस्तावद्देवानां रुद्रपारिषददाडितानां स्वयंभुवे विज्ञापनं वदंस्तेन सह देवा रुद्रसंनिधिं गता इत्याह मैत्रेयः । अथेति । संच्छिन्नेति । अथ दक्षयज्ञविनाशानन्तरं रुद्रानीकैः रुद्रसैन्यैः कर्तृभिः पराजिताः पराजयं गमिताः शूलं च पट्टिशं च, निस्त्रिंशश्च, गदा च, परिघश्च, मुद्गरश्च तैः साधनैः संछिन्नानि त्रुटितानि भिन्नानि विदीर्णानि सर्वाण्यङ्गानि येषां ते अत एव भयाकुलाः ऋत्विजश्च सभ्याश्च तैः सहिताः सर्त्विक्सभ्याः सर्वे देवगणाः स्वयंभुवं प्राप्येति शेषः । तस्मै स्वयंभुवे नमस्कृत्य एतद्वृत्तं कार्त्स्न्येन न्यवेदयन् विज्ञापितवन्तः ॥ १-२ ॥

ननु स्वयंभुवे विज्ञापितवन्त इति किमित्युच्यते । ब्रह्मापि दक्षाध्वरे आगतः स्यादेव ततस्तद्वृत्तं च ज्ञातं स्यादेवेत्यत आह । उपलभ्येति । अब्जाल्लोकपद्मात्संभवो यस्य सः भगवान्स्वयं ब्रह्मा, विश्वात्मा सर्वान्तरात्मा नारायणश्च पुरा प्रथमतः एव एतद्वृत्तम् उपलभ्य भावि दक्षाध्वरविनाशनं ज्ञात्वा, कस्य अध्वरं दक्षाध्वरं प्रति न ईयतुर्नागतवन्तौ ॥ ३ ॥ तदिति । विभुर्ब्रह्मा तद्देवैर्निवेदितं यद्वृत्तं तदित्यर्थः । आकर्ण्य श्रुत्वा हे देवाः तेजीयसि अतितेजस्विनि रुद्रे कृतमागोऽपराधो येन तथाभूते सत्यपि तत्र, बुभूषतामपराधं कर्त्तुमिच्छताम् , सा तथा बुभूषेति शेषः । प्रायेण प्रायशः भूयसे क्षेमाय न भूयात् । असत्कृतस्तेजीयान् पश्चात्प्रसाद्यमानोऽपि क्षेमकृन्न स्यादित्यर्थः । इति प्राहोवाच । प्रायेणेति लोकोक्तिः ॥ ४ ॥ अथापीति । यद्यप्येवमथापि ये भवन्तः, बर्हिषो यज्ञस्य भागं भजतीति भागभाक् तं परादुः बहिष्कृतवन्तः । अत एव भवे शिवे कृतकिल्बिषाः ते यूयं परिशुद्धचेतसा निष्कपटचित्तेन प्रगृहीते अङ्घ्रिपद्मे यस्य तं पादावुपसंगृह्येत्यर्थः । क्षिप्रप्रसादं पादग्रहणस्यानतिक्रमणीयतामालोच्याश्वनुग्रहकारिणमित्यर्थः । एवंभूतं शिवं प्रसादयध्वम् । तस्य पादोपसंग्रहमात्रेण प्रसन्नीभवनरूपसहजस्वभाववत्त्वादिति भावः ॥ ५ ॥ आशासाना इति । यस्मिन् शिवे कुपिते सति सपालः दिक्पालसहितः लोकः न भवेत् नश्येदित्यर्थः । एवंभूतं दुरुक्तैर्दक्षादीनां दुर्वाक्यैः हृदिः हृदये विद्धं ताडितं एतत्तु पूर्वं वृत्तम्, अधुना च प्रियया भार्यया विहीनं स्त्रीवियोगं प्राप्तमित्यर्थः । तं देवं शिवम् अध्वरस्य यज्ञस्य जीवितं पुनः संधानम् आशासानाः प्रार्थयमानाः यूयम् , आशु शीघ्रं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षमापयध्वं प्रसादयध्वम् ॥ ६ ॥ वयं तत्र गन्तुं बिभीमस्त्वमेव कंचिदुपायं चिन्तयेत्यत्र शिवं प्रस्तौति । नाहमिति । यस्य रुद्रस्य तत्त्वं स्वरूपयाथात्म्यं बलवीर्ययोः शारीरसामर्थ्यपराक्रमयोः प्रमाणमियत्तां च अहं न विद्याम् । यज्ञ इन्द्रः न विद्यात्, यूयं च यूयमपि न विद्यास्त, मुनयः न विद्युः, अन्ये ये देहभाजः अतीन्द्रियार्थदर्शिनो देहधारिणः न विदुर्वा, नाविदन्नेव । आत्मा परमेश्वरस्तन्त्रं प्रधानीभूतो यस्य तस्य, तस्य परमात्मावेशावतारभूतशिवस्य उपायं कः विधित्सेत् । न कोऽपि विधातुमिष्यादित्यर्थः । भवत्कृतपादोपसंग्रहणमन्तरेणान्यं कं तत्क्षमापनोपायमहमपि न विधित्सेयमिति भावः । पाठान्तरे पापमपराधं क उ को वा, विधित्सेदिति योजना ॥ ७ ॥ स इति । अजोऽजन्मा स ब्रह्मा सुरान्देवान्प्रति इत्थमुक्तप्रकारेण आदिश्याज्ञाप्य तैर्देवैः सप्रजेशैः सप्रजापतिभिः पितृभिस्तु पितृभिश्च अन्वितः सहैव स्वधिष्ण्यात् निजस्थानात् पुरद्विषः पुरारेः प्रभोः शिवस्य प्रियं निलयं स्थानभूतम् अद्रिप्रवरं गिरिश्रेष्ठं कैलासं प्रति ययौ ॥ ८ ॥ कैलासं वर्णयति जन्मौषधीत्यादिभिश्चतुर्दशभिः । जन्मेति । जन्म च, ओषधयश्च, तपश्च, मन्त्रश्च, योगश्च तैः सिद्धास्तैः । तत्र जन्मना सिद्धास्तु ओषध्यदनानपेक्षमेव सृष्टिवेलायामेव देवत्वेन सृष्टाः । ओषध्या सिद्धास्तु देवत्वसंपादकौषध्यदनेन सिद्धतां प्राप्ताः । तपसा सिद्धास्तु कृच्छ्रचान्द्रायणाचरणापूर्वमष्टाङ्गयोगसंसाधनेन सिद्धतां प्राप्ताः । मन्त्रसिद्धास्तु यावज्जीवं शिवपञ्चाक्षर्यादिमन्त्रावृत्तिविधानेन सिद्धतां प्राप्ताः योगो रुद्रोपासनारूपस्तेन सिद्धभावं प्राप्ताः । एतदादिसिद्धैः नरेतरैर्देवयोनिविशेषैः, किंनराश्च गन्धर्वाश्च तैः जुष्टं सेवितम्, तथा च अप्सरोभिः सदा वृतम् ॥ ९ ॥

नानेति । नानामणिमयैः नानाधातुभिः विचित्रितानि तैः, द्रुमा वृक्षाश्च, लताः प्रतानिन्यश्च, गुल्मानि च, नानाविधानि द्रुमलतागुल्मानि येषु तैः, नानाविधा ये मृगगणास्तैरावृतानि तैः ॥ १० ॥ नानेति । नाना नानाविधानि अमलानि स्वच्छानि प्रस्रवणानि स्रोतांसि येषु तैः । नानाकन्दराः सानूनि च येषु तैः शृङ्गैः करणैः, प्रियैः सह विहरन्तीनां सिद्धयोषितां रमणं रतिप्रदं द्वयोरेकाऽन्वयः ॥ ११ ॥ मयूरेति । मयूराणां शिखण्डिनां केकाभिः स्वनैरभितः सर्वतः रुतो नादितस्तं, मदेन मकरन्दपानजनितहर्षेणान्धा येऽलयो भृङ्गास्तैर्विमूर्च्छितो मूर्च्छनाख्यरागगीतिविशेषेण व्याप्तस्तम्, रक्तकण्ठानां कोकिलानां साविर्तैस्त्रिमात्रशब्दैः । तथा पतत्त्रिणामन्येषां पक्षिणां च कूजितैः ॥ १२ ॥ आह्वयन्तमिति । उद्धस्तैरुन्नतशाखैः कामदुघैर्वाञ्छितप्रदैः द्रुमैर्वृक्षैः, द्विजान् ज्ञानार्थिनो विप्रान् आह्वयन्तमाकारयन्तमिव स्थितम्, लोके हि हस्तमुत्क्षिप्योच्चैः स्वरेणाह्वानमर्थिनां कुर्वन्ति । तद्वदद्रिश्चाप्युत्क्षिप्तमहस्ताकारैर्द्रुमैः पतत्त्रिणां स्वनैश्च ज्ञानार्थिनो द्विजानाकारयन्निव लक्ष्यत इत्यर्थः । सार्द्धस्यैकसंबन्धः । मातङ्गैः व्रजद्भिरिति शेषः । व्रजन्तमिव निर्झराणां ध्वनिभिः गृणन्तं भाषमाणम् इव स्थितम् ॥ १३ ॥

मन्दारैरिति । मन्दारैः मन्दारा देवतरुविशेषाः कटुपारिभद्रा वा । पारिजाता मिष्टपारिभद्रास्तैश्च । सरलैर्देवदारुभिश्च । तमालैस्तिक्तपत्त्रैस्तापिच्छैरित्यर्थः । शालैः सहितास्तालास्तैश्च । शालाः सर्जतरवः । तालास्तृणराजाः । कोविदाराः काञ्चनारकाश्च । असनाः पिशङ्गपुष्पाश्च । अर्जुनाः ककुभाश्च तैः उपशोभितमतिशोभमानम् ॥ १४ ॥ चूतैरिति । चूतैराम्रैः, कदम्बाश्च नीपाश्च तैश्च । उभयेऽपि कदम्बावान्तरभेदभिन्नाः । नगा नागकेसराश्च पुन्नागाः सुरवल्लभाश्च चम्पका हेमपुष्पकाश्च तैः, पाटलाः पाटलितरवश्च अशोका वञ्जुलतरवश्च बकुलाः केसराश्च तैः, कुन्दैर्मुकुन्दतरुभिः कुरबकैस्तिलकैरपि उपशोभितमिति पूर्वेण संबन्धः ॥ १५ ॥ स्वर्णेति । स्वर्णार्णशतपत्त्रैः सुवर्णवर्णैः कुशेशयैः, वेणवो वंशाश्च रेणुकश्च जातयश्च ताभिः । वरवेणुकजातिभिरिति पाठे, वरवेणुकाश्च जातयश्च ताभिश्च । सुवर्णशतपत्त्रैश्च वीररेणुकजातिभिरिति पाठे, सुवर्णाः कृतमालाश्च शतपत्रा आमलकीतरवश्च तैः । वीराः करवीराश्च, रेणुकानि केतकीतरवश्च, जातयोऽश्मन्तिकतरवश्च तैः । कुब्जकैः कुङ्कुमतरुभिः, मल्लिका विचक्षणास्ताभिश्च, माधव्यो वासन्तिकाश्च ताभिश्चापि मण्डितम् ॥ १६ ॥ पनसेति । पनसाः कण्टकिफलाश्च, उदुम्बरा जन्तुफलाश्च, अश्वत्थाः पिप्पलद्रुमाश्च, सक्षाः जटिद्रुमाश्च, न्यग्रोधा वटतरवश्च, हिङ्गवो रामठद्रुमाश्च तैः । भूर्जैर्भूर्जपत्त्रैः ओषधिभिर्जनवृक्षैः पूगैः क्रमुकतरुभिः राजपूगैः पूगभेदद्रुमैः जम्बूभिः जम्बूद्रुमैश्च, । राजितमित्युत्तरश्लोकादनुयोजनीयम् ॥ १७ ॥ खर्जूरेति । खर्जूरास्तृणद्रुमविशेषाश्च, आम्रातका त्रिदुलाश्च, आम्रा जिह्वारसकराः श्रावणपाकिफलाश्च ते आद्या येषां तैः । प्रियाला राजादनानि च, मधुका मद्यहेतुकुसुमाश्च, इङ्गुदास्तापसतरवश्च तैः । वेणवः स्थूलोन्नतवंशाश्च, कीचकाः सच्छिद्रवंशास्तैर्द्रुमजातिभिस्तरुसामान्यैरन्यैस्तदितरैश्च, राजितं मण्डितम् ॥ १८ ॥ कुमुदेति । कुमुदानि रात्रिविकाशिजलजानि च उत्पलानि दिवाविकाशिपद्मानि च, कह्लाराः शतपत्त्रजातिविशेषाश्च शतपत्त्राणि अरूणवर्णपद्मानि च, तेषां वनानाम् ऋद्धयः संपदस्ताभिः राजितं नलिनीषु सरस्सु कलं मधुरं यथा भवति तथा कूजन्ति यानि खगवृन्दानि पक्षिसंघास्तैरुपशोभितस्तम् ॥ १९ ॥

मृगैरिति । मृगैर्हरिणैः शाखामृगैर्वानरैः क्रोडैः शूकरैः मृगेन्द्रैः सिंहैः ऋक्षाश्च शल्यकाश्च तैः । तत्र ऋक्षा भल्लूकाः शल्यकाः श्वाविधः । गवयैर्गोसदृशमृगविशेषैः नाभिभिः कस्तूरीमृगैः व्याघ्रैः शार्दूलैः महिषा वनलुलाया आदयो येषां तैः । निर्जुष्टं नितरां सेवितम् ॥ २० ॥ कदलीति । कदलीनां रम्भातरूणां षण्डाः संघातास्तैः संरुद्धान्यावृतानि नलिनीनां कमलाकराणां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुलिनानि तैः श्रीः शोभा यस्मिंस्तं स्नानेन पुण्यकरं पुण्यसंपादकमुदमुदकं यस्यास्तया सत्या निर्मलया। पाठान्तरे सत्याः भवान्याः स्नानेन पुण्यतरमतिसुगन्धमुदमुदकं यस्यां तयेति योजना। नन्दया नन्दापरसंज्ञया गङ्गया पर्यस्तं परिवेष्टितम् ॥ २१ ॥ विलोकयेति। विबुधा देवाः भूतेशस्य रुद्रस्य गिरिरुक्तविधः कैलासस्तं विलोक्य विस्मयं ययुः। ततः ते देवाः तस्य शिवस्य रम्यामतिरमणीयाम् अलकां नाम अलकेति संज्ञया प्रसिद्धामित्यर्थः। पुरीं नगरीं ददृशुः वै ॥ २२ ॥ वनमिति। सौगन्धिकं सौगन्धिकाख्यं वनं चापि ददृशुः। सौगन्धिकनाम्नोऽन्वर्थतामाह। यत्र वने तन्नाम सौगन्धिकसंज्ञं पङ्कजं भवति। जातावेकवचनम्। अथ पुरीं वर्णयति। नन्दा चेति चतुर्भिः। पुरः पुर्याः सकाशात् बाह्यतः बाह्यप्रदेशे नन्दा अलकनन्दा चेति द्वे सरितौ भवतः चैव ॥ २३ ॥ सरितौ विशिनष्टि। तीर्थपादेति सार्द्धद्वयेन। तीर्थपादस्य हरेः पादावेवाम्भोजो पादपद्मे तयोः रजसेन अतीव पावनेऽत्यन्तपवित्रतापादके भवतः। हे क्षत्तः विदुर सुरस्त्रियो देवाङ्गनाः स्वधिष्ण्यतः स्वविमानेभ्यः अवरुह्य ययोः सरितोः ॥ २४ ॥ क्रीडन्तीति। रतिकर्शिता विहारश्रान्ताः सत्यः विगाह्य ययोरन्तः प्रविश्य पुंसः स्वप्रियान् सिञ्चन्त्यः सत्यश्च, क्रीडन्ति जलक्रीडां कुर्वन्ति। ययोः सरितोः अम्भो जलं वितृषो विगतजलपानतृष्णाः अपि गजाः तासां सुरस्त्रीणां स्नानेन भ्रष्टं गलितं यन्नवकुङ्कुमं तेन पिञ्जरं पीतवर्णम् अत एव गजीः करिणीः पाययन्तः सन्तः पिबन्ति। अनेन गजानां कामित्वातिशयः सूचितः ॥ २५ ॥ पुनः पुरीं विशिनष्टि। तारेति। तारैः रजतैर्मौक्तिकैर्वा हेमभिः सुवर्णैः महारत्नैर्माणिक्यादिभिरलंकृतानां विमानानां शतैः संकुला नद्धा तां तडितो विद्युतश्च, घना मेघाश्च तैः सह वर्तते इति सतडिद्घनं खमाकाशं यथा तथा, पुण्यजनस्त्रीभिः यातुधानैस्तदङ्गनाभिश्च जुष्टां तत्र खमिव विमानानि मेघा इव पुण्यजनाः। तडित इव तत्स्त्रियः। यदा पुण्यजनानृते केवलं तत्स्त्रीमात्रोपादानं तदा तडिद्भिः स्त्रीणां घनैर्विमानानां खेन पुर्याः सादृश्यम् ॥ २६ ॥

हित्वेति। यक्षेश्वरपुरीमुक्तप्रकारामलकाख्यां कुबेरनगरीं हित्वाऽतिक्रम्य तत्प्रसिद्धं सौगन्धिकं सौगन्धिकाख्यं वनं च दृष्ट्वा ते देवाः आराद्दूरात् वटं ददृशुरिति चतुर्थेनान्वयः। कथंभूतं वनम्? चित्राणि विचित्राणि माल्यानि मालायोग्यानि पुष्पाणि, फलानि छदाः पत्राणि च येषु तैः कामदुघैः कामान्वर्षद्भिः द्रुमैर्वृक्षैः हृद्यं मनोहरम् ॥ २७ ॥ रक्तकण्ठेति। रक्तकण्ठाश्च ते खगाः कोकिलाख्यपक्षिणस्तेषामनीकं समूहस्तस्य स्वरास्तैर्मण्डिताः षट्पदा यस्मिंस्तत् कलहंसानां यत्कुलं तस्य प्रेष्ठं खरदण्डानि पद्मानि तैर्युक्ता जलाशया यस्मिंस्तत् ॥ २८ ॥ वनेति। वनकुञ्जरा वनगजास्तैः संघृष्टा ये हरिचन्दनद्रुमास्तेषां संबन्धी यो वायुस्तेन पुण्यजनस्त्रीणां यक्षाङ्गनानां मनः अध्यधिकं यथा स्यात्तथा मुहुः उन्मदयत् परवशीकुर्वत् ॥ २९ ॥ वैदूर्येति। वैदूर्यैर्वैदूर्यमणिभिः कृतानि सोपानानि यासु तास्ताः, उत्पलानां मालाः पङ्क्तयो यासु तास्ताः किंपुरुषैः व्याप्ताः वापीः तथाविधं वनं चेति शेषः। दृष्ट्वा आरात्समीपे वटं ते देवाः ददृशुः ॥ ३० ॥ स इति। स वटः योजनशतमुत्सेध उच्छ्रायो यस्य सः पादोनैः सर्वतः पञ्चसप्ततियोजनप्रमाणैर्विटपैः शाखाभिरायतो विस्तृतः पर्यक् परितः कृता अचला निश्चला छाया येन सः। निर्गतं नीडं कुलायं यस्मात् तापेन सूर्यातपेन वर्जितो रहितः ॥ ३१ ॥ तस्मिन्निति। महायोगो भगवदुपासनायोगस्तत्प्रचुरो महायोगमयस्तस्मिन् महायोगनिष्ठपुरुषप्राचुर्यात्तत्स्थानस्य महायोगमयत्वं मुमुक्षुशरणे मुमुक्षुजनाश्रयभूते तस्मिन्वटे वटाधस्तनवर्त्ति तदङ्घ्र्यन्तिकवर्त्तिप्रदेशे इत्यर्थः। आसीनमुपविष्टं त्यक्तामर्षम् अन्तकम् इव त्यक्तक्रोधान्तकतुल्यमित्यर्थः। शिवं सुरा देवाः ददृशुः ॥ ३२ ॥

शिवं विशिनष्टि। सनन्दनाद्यैरिति पञ्चभिः। महासिद्धैः शान्तैः सनन्दनाद्यैः। गुह्यका यक्षाश्च, रक्षांसि राक्षसाश्च, तेषां भर्त्रा प्रभुणा सख्या कुबेरेण च उपास्यमानं संसेव्यमानं संशान्तो विग्रहो देहो यस्य तं निर्वैरं कृतापराधेषु देवेष्वपि कृपालुमित्यर्थः ॥ ३३ ॥ विद्येति। विद्या ज्ञानयोगश्च तपः कर्मयोगश्च ताभ्यां युक्तो योगपथो भगवद्भक्तिमार्गस्तम् आस्थितं ज्ञानकर्मयोगानुगृहीतभगवद्भक्तियोगनिष्ठमित्यर्थः। अत एव तं भगवद्भक्त्यतिशयिततया वैष्णवराजत्वेन प्रसिद्धम् अधीश्वरम्, जितेन्द्रियं विश्वसुहृदं चराचराणि सर्वाणि भूतानि भगवद्वपुः अतस्तदानुकूल्यं मे स्यादित्युक्तरीत्या विश्वानुकूलम् अत एव वात्सल्यात् लोकमङ्गलं सकलजनक्षेममेव चरन्तं कुर्वन्तम् ॥ ३४ ॥ लिङ्गमिति। संध्याभ्ररुचा रक्तवर्णेन अङ्गेन तापसाभीष्टं तपस्विजनप्रियं भस्म भस्माङ्गरागश्च दण्डो यष्टिविशेषश्च जटाः संयतकचाश्च अजिनं गजाजिनं च तत्समाहाररूपं लिङ्गं च वेषमपि चन्द्रलेखां चन्द्रकलां च बिभ्रतं दधतम् ॥ ३५ ॥ उपविष्टमिति। दर्भमय्यां दर्भग्रथितायां बृष्यां व्रतिनामासनविशेषरूपायाम्। वर्षति सुखं वा। 'बृषु सेचने' 'इगुपध' इति कः। गौरादिः मूर्द्धन्यान्तः। उपविष्टं पृच्छते नारदाय नारदं प्रतीत्यर्थः। सतां शृण्वताम् अन्येषां सनन्दनादीनां मुनीनामाकर्णयतां सतामित्यर्थः। सनातनमनादिसिद्धं ब्रह्म परमात्मानं प्रणवं वा। प्रवोचन्तं कथयन्तम् ॥ ३६ ॥ कृत्वेति। सव्यं पादपद्मं दक्षिणे ऊरौ कृत्वा विन्यस्य जानुनि सव्याजानुदेशे बाहुं सव्यबाहुं कृत्वा उत्तानितदक्षिणजानूपरि दक्षिणबाहुकूर्परं निधायेति शेषः। प्रकोष्ठे मणिबन्धस्थाने अक्षमालां रुद्राक्षमणिमालिकां धृत्वेति शेषः। तर्कमुद्रया दक्षिणहस्तकृततर्कमुद्रयोपलक्षितं यथा स्यात्तथेत्यर्थः। आसीनमुपविष्टम् 'एकं पादमथैकस्मिन्विन्यस्येदूरुसंस्थितम्। इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतम्' इति योगशास्त्रेऽभिधानात्। 'तर्जन्यङ्गुष्ठयोरग्रे मिथः संयोज्य चाङ्गुलीः। प्रसार्य बन्धनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राहुस्तर्कमुद्रेति मान्त्रिकाः' इति तर्कमुद्रालक्षणम् ॥ ३७ ॥ तमिति । ब्रह्माणि परमात्मस्वरूपविषये यः निर्वाणसमाधिः शरीराभिमानत्यागपूर्वकं तद्दर्शनानन्दानुभवगमका चित्तैकाग्रता तम् आश्रितं संप्राप्तं योगकक्षां योगपट्टिकां व्यपाश्रितं वामजानुदृढीकरणार्थं विशेषेणोपाश्रितं मुनीनाम् आद्यं मुख्यं मुनिं पाठान्तरे मननशीला मनवस्तेषाम् आद्यं मुख्यं मनुं तं गिरिशं शिवं सलोकपालाः लोकपालैः सहिताः मुनयः प्राञ्जलयः प्रबद्धाञ्जलयः सन्तः प्रणेमुर्नमस्कृतवन्तः ॥ ३८ ॥

स त्विति । स तु स शिवस्त्वित्यर्थः । सुरा देवाश्च असुरा दैत्याश्च, तेषामीशैः देवेन्द्रबाणासुराद्यैः अभिवन्दिताबङ्घ्री यस्य तं पाठान्तरे शिवविशेषणम् । आगतं स्वान्तिके समायातम् आत्मयोनिं ब्रह्माणम् उपलभ्य ज्ञात्वा उत्थाय स्वासनादुत्थानं कृत्वा महत्तमः भगवदवतारत्वादतिमहान् विष्णुर्वामनरूपो हरिः कस्य कश्यपप्रजापतेः यथा तथा वै एव शिरसा अभिवन्दनं चक्रे । पाठान्तरे अर्हत्तमोऽतिपूज्यो विष्णुरित्यर्थः ॥ ३९ ॥ तथेति । तथा नीललोहितं शिवम् अनु पश्चात् समंतात् परितः, अपरे अन्ये ये सिद्धगणाः स्थिताः तैरिति शेषः । महर्षिभिः सह नमस्कृतः आत्मभूर्ब्रह्मा प्रहसन्निव कृतप्रणाममादावात्मने कृतनमस्कारं शशाङ्कशेखरं शिवं प्राह । पाठान्तरेऽपि रुद्रेन्द्रेण कृतप्रणतिः प्राह ॥ ४० ॥ शिवस्य भगवदात्मकत्वाद्भगवतारत्वाच्च ब्रह्मशब्दवाच्यभगवत्सामानाधिकरण्येन निर्दिशन्ब्रह्मणो यदसाधारणं प्रकृतिपुरुषशरीरकत्वं जगत्कारणत्वं धर्ममर्यादास्थापकत्वं सर्वानुग्रहीतृत्वम्, निग्रहीतृत्वादि च, तत्सर्वं शिवप्रशंसायै शिवे आरोप्य तदन्तर्यामितयाऽवस्थितब्रह्मण एवाह । जाने त्वामित्यादिभिश्चतुर्भिः । हे ईश शिव विश्वस्य कृत्स्नस्य जगतः चिदचिदात्मकप्रपञ्चस्य योनिबीजयोः योनिजभूतयोः क्षेत्रबीजवत्प्रकृतौ पुरुषस्य मिलितत्वात्तयोर्योनिबीजशब्दाभ्यां निर्देशः । शक्तेः मातृस्थानीयस्य च परं प्रकृतिपुरुषाभ्यां स्वरूपतः, स्वभावतश्च, विलक्षणमित्यर्थः । निरन्तरं निर्भेदं यत् ब्रह्म तत् त्वां जाने इत्यन्वयः । इदं च ब्रह्मशब्दवाच्यभगवता सामानाधिकरण्येन वर्णनं तच्छरीरशरीरिभावनिबन्धनमावेशावतारत्वनिबन्धनं च न तु तादात्म्यनिबन्धनं एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधसंभवौ । मया दर्शितपन्थानौ, सृष्टिसंहारकारकौ' । इति वैष्णवे 'नारायणाद्रुद्रो जायते' इत्यादि श्रुतिषु चास्य कार्यत्वकर्मवश्यत्वाभिधानेन तादात्म्यासंभवात् । अत एव 'भवांस्तु पुंसः परमस्य मायया दुरन्तयाऽस्पृष्टमतिः समस्तदृक्' इति नारायणव्यतिरेकेणैनं निर्देक्ष्यति ॥ ४१ ॥

एवं ब्रह्मसामानाधिकरण्येन रुद्रं निर्दिश्य तदन्तर्यामिब्रह्मदृष्ट्या तस्य चिदचिच्छरीरकत्वं सृष्ट्यादिकर्तृत्वं चाह । त्वमिति । हे भगवन् स्वरूपयोः स्वांशयोः तव अंशभूतयोरित्यर्थः । शिवशक्त्योः प्रकृतिपुरुषयोः विकाररूपमिति शेषः । एतज्जगत् त्वं एव 'सर्वं खल्विदं ब्रह्म' इति वदिदं सामानाधिकरण्यं शरीरात्मनिबन्धनमेव । एवं कृत्स्नचिदात्मकप्रपञ्चशरीरकस्त्वं, ऊर्णपटः ऊर्णनाभिः यथा तथा क्रीडन्सन्नेव विश्वं सृजसि पासि अत्सि संहरसि, क्रीडन्नित्यनेन जगद्व्यापारो भगवतो लीलेत्युक्तं भवति । ऊर्णनाभिदृष्टान्तः 'यथोर्णनाभिः सृजते गृह्यते च' इति श्रुतिप्रसिद्धः ॥ ४२ ॥ एवं परब्रह्मदृष्ट्या चिदचिच्छरीरकत्वं सृष्ट्यादिकारणत्वं चाभिधाय पुनस्तद्दृष्ट्या प्रकृताध्वरसंविधित्सोत्पादनाय पुरुषार्थावबोधिशास्त्रप्रवर्त्तकत्वं धर्ममर्यादापालकत्वं चाह । त्वमेवेति । धर्मार्थौ दाग्धि इति धर्मार्थदुघा या त्रयी तस्या अभिपत्तिः समन्ततो रक्षणं तस्यै इत्येकं पदं, 'दुहः कप् घश्च' इति कामदुघावत् । धर्मार्थदुघेति संबोधनं वा । तदा अभिपत्तये धर्मादिप्राप्तये इति योजना । दक्षेण समर्थेन सूत्रेण शास्त्रेणेत्यर्थः । अध्वरं क्रतुं त्वम् एव ससर्जिथ सृष्टवानसि । पुरुषार्थभूतधर्मार्थसंपादनोपायावबोधिशास्त्रप्रवर्त्तकत्वमेव भवसीत्यर्थः । सेतवश्च, वर्णाश्रमधर्ममर्यादा अपि लोके त्वया एव अवसिता निबद्धाः भवन्ति । के ते सेतवो येऽवसिता इत्यत्राह । यान् सेतून् धृतव्रता व्रतनिष्ठाः सन्तः ब्राह्मणाः श्रद्दधते श्रद्धापूर्वकमनुतिष्ठन्ति ॥४३॥ पुनर्ब्रह्मदृष्ट्यैव सर्वकर्मकारयिता तत्फलप्रदश्च, त्वमेवासीत्याह । त्वमिति । हे मङ्गल शिव त्वं लोके मङ्गलानां कुशलानां कर्मणां कर्त्तुः कर्त्रे इत्यर्थः । स्वः स्वर्गम्, परं मोक्षं वा तनुषे प्रददासि स्मेति स्फुटम् । अभिसंहितफलकर्मणां कर्त्तुः स्वर्गमनभिसंहितफलकर्मणां कर्त्तुस्तु मोक्षं तनुषे इत्यर्थः । अमङ्गलानामकुशलानां कर्मणां कर्त्तुः उल्बणमतितीव्रं तमिस्रं निरयं नरकमित्यर्थः । तनुषे एवं सति कस्यचित् विपर्ययः अमङ्गलानां कर्मणां कर्त्तुः कस्यचिदपि स्वर्गमोक्षप्राप्तिरूपो व्यत्यास इत्यर्थः । केन हेतुना भवेत् न केनापीत्यर्थः । अतः तदेव तत्कृतं फलमेव भवति न तद्विपर्यय इत्यर्थः । यद्वा त्वयि यथाकर्मफलप्रदातरि सति तत्र केन हेतुना तदेव तस्मिन्नेव कस्यचित् विपर्ययः फलविनिमयो भवति यथा शुभकर्मकर्त्तुर्दक्षस्येयं दशेति भावः ॥ ४४ ॥

एवं ब्रह्मदृष्ट्या रुद्रं प्रस्तूय तस्य प्रसादोत्पिपादयिषया सतां रोषो न युक्त इति कैमुत्यनयेनाहुः । न वा इति । त्वच्चरणयोरर्पितं आत्मा चित्तं यैस्तेषां सर्वेषु अपि भूतेषु तव त्वामित्यर्थः । द्वितीयार्थे षष्ठी । पश्यताम् अत्र त्वां त्वदिति पदद्वयस्य ब्रह्मपर्यन्तत्वाद्भगवच्चरणारविन्दसमर्पितचित्तानां भगवन्तं पश्यतामित्यर्थः । भूतानि च आत्मानि त्वयि अपृथक् दिदृक्षतां सर्वाणि भूतानि भगवदात्मतया पश्यतामित्यर्थः । एवंभूतानां सताम् अत्रापि द्वितीयार्थे षष्ठी । सत इत्यर्थः । वै अनर्थकारित्वेन प्रसिद्धः रोषः क्रोधः पशुं यथा मूर्खजनमिवेत्यर्थः । प्रायेण बहुधा न अभिभवेत् अभिभूतान्न कुर्यादित्यर्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतस्तव रोषो न युक्त इति किमु वक्तव्यमिति भावः ॥ ४५ ॥ कृतापराधेष्वपि महान्तः कृपावन्तो भवन्त्यतः कृतापराधमपि दक्षमनुगृहीतुमर्हसीत्याह त्रिभिः। पृथग्धिय इति। पृथग्धियोऽब्रह्मात्मकस्वतन्त्रवस्तुबुद्धयः देवमनुष्यदेहात्माभिमानभिन्नधियो वा। कर्मण्येव दृग्दृष्टिर्येषां ते, दुर्दुष्ट आशयोऽन्तःकरणं येषां ते। अनिशं निरन्तरं परेषामुदयस्तेन परसंपदा अपिता निहिता हृदि हृदये रुग्व्यथा येषां ते, अरुंतुदा मर्मच्छेत्तारः दुरुक्तैः दुर्वचनैः परान् वितुदन्ति संव्यथयन्ति तान् दैवेनैव बधो येषां तान्, दैवहतानिति पाठे दैवेनैव हतप्रायीकृतान् भवद्विधो निरुपमकरुणः मा बधीन्मा हन्यात ॥ ४६ ॥ प्रत्युत साधूनां वृत्तमालोच्यानुग्रहमेव कर्त्तुमर्हसीत्याह। यस्मिन्निति। यस्मिन्देशे यदा यस्मिन्काले दुर्लङ्घ्यया दुरतिक्रमणीयया पुष्करनाभमायया पद्मनाभस्य मायया स्पृष्टधियः मोहितचित्ताः पृथग्दृशः भवन्ति। ज्ञानैकाकारतयैकरूपेऽप्यात्मनि देवमनुष्यादिभेददर्शिनस्तथाऽब्रह्मात्मकदर्शिनश्च भवन्तीत्यर्थः। तत्र तथाविधापराधिषु साधवः अनुकम्पया तत्कृतमहदपराधभाव्यमहादुःखसंदर्शनानन्तरमेव परदुःखासहिष्णुतास्वभाववत्ताजातचित्तप्रकम्पेनेत्यर्थः। कृपां कुर्वन्ति हि। न तु अक्रममप्रियं कुतः दैवबलात्कृते पूर्वदिष्टबलतो जातेऽर्थे इत्यर्थः। स्वदिष्टेरितदुःखकर्त्तुर्दुःखोत्पादनरूपप्रतीकाराचरणमसमंजसमिति शेषः। दैवमेवैवंभूतं कोऽत्रान्येषामपराध इति मत्वाऽपराधिष्वपि कृपामेव कुर्वन्तीत्यर्थः ॥ ४७ ॥

भवानिति। अतः भवांस्तु परमस्य पुंसः परमपुरुषस्येत्यर्थः। दुरन्तयाऽपरया मायया अस्पृष्टमतिः भगवत्सुदृढप्रपत्त्याऽमोहितबुद्धिः अत एव समस्तदृक् सर्वार्थदर्शी भवति। ततः तया मायया हृतात्मसु मोहितेषु अनुकर्मचेतःसु कर्मानुगुणचित्तवृत्तिषु इह सापराधजनेषु इत्यर्थः। हे प्रभो अनुग्रहं कर्त्तुम् अर्हसि ॥ ४८ ॥ एवं सामान्येनोक्त्वा प्रस्तुतमाह। कुर्विति त्रिभिः। भो मनो हे रुद्र त्वया हतस्य अत एव असमाप्तस्य प्रजापतेर्दक्षस्य अध्वरस्य उद्धरणं पुनरुद्धारं कुरु कुर्याः। यत्र दक्षाध्वरे कुयज्विनः कुत्सिता याज्ञिकाः भागिनः भागार्हस्यापि तव भागं न ददुः। येन त्वया हेतुना मखः यज्ञः न नीयते न समाप्यते। पाठान्तरे किमर्थमध्वरोद्धरणाय मां प्रार्थयसे इत्यत्राह। येन भागार्हत्वे सत्यप्यलब्धभागेन त्वया हेतुना निनीयते समाप्यते यदपचारान्मखो विनष्टः पुनस्तस्यैव भवतोऽनुग्रहान्मखः समापनीय इति भावः ॥ ४९ ॥ यजमानसद्भावे यागोद्धारः संभवति, स तु मृतोऽस्ति, नेत्राद्यवयववतां स्वभागनिरीक्षणं भवति, ते तद्विहीनाः, होमाङ्गभूता ऋत्विजो भग्नगात्राः सन्त्यतः कथं तदुद्धार इति चेत्त्वदनुग्रहसुधासमुद्रमग्नास्ते सर्वसंपन्ना भवन्त्वित्याह। जीवतादित्यादिना। अयं यजमानो दक्षः जीवतात्। भगः अक्षिणी प्रपद्येत प्राप्नुयात। भृगोः श्मश्रूणि, पूष्णः दन्ताश्च, पूर्ववत् रोहन्तु ॥ ५० ॥ देवानामिति। हे मन्यो शिव आयुधानि चाश्मनश्च तैः भग्नगात्राणाम् ऋत्विजां देवानां च भवता अनुगृहीतानां सताम् आशु अनातुरमारोग्यं अस्तु ॥ ५१ ॥ भागश्च तवास्त्वित्याह। एष इति। हे रुद्र यदिति यावदित्यर्थेऽव्ययम्, अध्वरस्य यत् उच्छिष्टः यज्ञे कृते यावानवशिष्टोऽर्थः तावान। एषः सर्वोऽप्यवशिष्टार्थः ते तव भागः अस्तु। हे यज्ञहन् हे रुद्र अद्याधुना ते तव भागेन यज्ञः कल्प्यतां संपाद्यताम्। तथा च श्रुतिः। 'यदग्नये स्विष्टकृते समवद्यति भागधेयेनैव तद्रुद्रं समर्द्धयति सकृत्सकृदवद्यति सकृदिव हि रुद्र उत्तरार्द्धादवद्यत्येषा वै रुद्रस्य दिक् स्वायामेव दिशि रुद्रं निरवद्यते' इति ॥ ५२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

——:※:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सप्तमोऽध्यायः

मैत्रेय उवाच

इत्यजेनानुनीतेन भवेन परितुष्यता । अभ्यधायि महाबाहो प्रहस्य श्रूयतामिति ॥ १ ॥

उद्भूतः सप्तमे विष्णुर्दक्षरुद्रादिभिः स्तुतः । प्रवर्त्तयांचकारोति दक्षेण क्रतुमुच्यते ॥ १ ॥

एवं ब्रह्मणा प्रसादितो भवो देवाननुगृह्णंस्तद्विज्ञापितमङ्गीचकारेत्याह मैत्रेयः । इतीति । हे महाबाहो विदुर अजेन ब्रह्मणा अनुनीतेन प्रार्थितेन अत एव परितुष्यता भवेन प्रहस्य श्रूयताम् इत्येवम् आमन्त्र्य अभ्यधायि अभ्यभाषि ॥ १ ॥ यदभ्यधायि तदाह । नाघमिति । परेषामस्मदादीनामीशः प्रभुस्तत्संबुद्धिः हे परेश देवमायाभिभूतानां बालानां मूर्खाणाम् अघमपराधं न वर्णये । दुर्जनैरेभिरेवमेवमपचरितमिति न कथयामीत्यर्थः । न अनुचिन्तये न स्मरामि; किं तु तत्र तदपराधाचरणदशा मया दण्डः धृतः दण्डनमात्रं कृतमित्यर्थः ॥ २ ॥ तदनुग्रहप्रकारमेवाह । प्रजापतेरित्यादिभिस्त्रिभिः । दग्धशीर्ष्णः दक्षिणाग्नौ दग्धशिरस इत्यर्थः । प्रजापतेर्दक्षस्य शिरः अजस्य मुखं यस्मिंस्तत् कण्ठादुपर्य्यस्त्विति शेषः । भवतु । भगश्च, बर्हिषो यज्ञसंबन्धिनं स्वमात्मीयं भागं मित्रस्य मित्रनाम्नो देवस्य चक्षुषा ईक्षेत संपश्यतु । केचित्तु पूर्वं मित्रस्य शिरोभङ्गं वीरभद्रकृतं संभाव्य प्रजापतेर्मित्रस्य चाजमुखं शिरो भवतु, 'भगो देवो बर्हिषः स्वं भागं चक्षुषेक्षेत भगस्य नेत्रे उत्पद्यताम्' इत्यर्थ इत्येव व्याख्यायन्ते ॥ ३ ॥ पूषा त्विति । पूषा देवस्तु केवलश्चेदिति शेषः । पिष्टभुक् स्तात् अन्येनेन्द्रेण सहितश्चेदिति शेषः । यजमानस्य दद्भिः जक्षतु । इति द्वेधानुग्रहं कृतवान् । ये देवाः मे मह्यम् उच्छेषणं यज्ञावशिष्टं ददुर्दत्तवन्तः ते सर्वे देवाः प्रकृतानि प्रकर्षेण लग्नान्यङ्गानि येषां ते तथाभूताः भवन्तु ॥ ४ ॥ बाहुभ्यामिति । येषां बाहुहस्तादीन्यङ्गानि नष्टानि तथाभूता इति शेषः । ये अध्वर्यवः ये चान्ये ऋत्विजश्च ते तु अश्विनोः बाहुभ्यां कृतबाहवः उत्पादितबाहवः पूष्णः हस्ताभ्यां कृतहस्ताश्च, भवन्त्वित्यन्वयः । भृगुः बस्तस्य मेषस्य श्मश्रूणि यस्य तथाभूतः भवेत् ॥ ५ ॥ एवं रुद्रेणानुगृहीता देवाः किमकुर्वतेत्यत्राह मैत्रेयः । तदेति । तदा हे तात विदुर, मेहति प्रणतजनाभीष्टं वर्षतीति मीढ्वान् अतिशयेन मीढ्वान् मीढुष्टमः शिवस्तेनोदितं कथितं श्रुत्वा, अथ सर्वाणि भूतानि परितुष्टात्मभिः परितुष्टचित्तैः साधु साधु इतीत्थम् अब्रुवन्नूचुः ॥ ६ ॥

तत इति । ततः मीढ्वांसं रुद्रम् आमन्त्र्य त्वया आगत्य सर्वं संप्रार्थ्य सुनासीरा इन्द्रोपलक्षिता देवाः ऋभुभिः भृगुहूयमानदक्षिणाग्निप्रभवैः ऋभ्वाख्यैर्देवैः सह मीढ्वान् शिवश्च, वेधा ब्रह्मा च, ताभ्यां सह वर्त्तन्ते इति समीढ्वद्वेधसः सन्तः भूयः पुनः ते देवाः इज्यन्तेऽस्मिन्निति तद्देवयजनं यागदेशं ययुः जग्मुः ॥ ७ ॥ विधायेति । भगवान् भवः शिवः यत् आह 'प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः' इत्यादिनोक्तवान्, तथा कार्त्स्न्येन विधाय च हस्तबाह्वादिकं संपाद्यैव । सवनीयपशोरजस्य संबन्धि शिरः कस्य दक्षस्य कायेन शरीरेण संदधुः । देवा इति शेषः ॥ ८ ॥ संधीयमान इति । एतस्मिन्सवनीयपशोः शिरसि संधीयमाने सति रुद्राभिवीक्षितः स्वयं शिवेन संवीक्षितो दक्षः सुप्तः इव सद्यः उत्तस्थौ उदतिष्ठत् । उत्थितः संश्च अग्रतः पुरतः मृडं शिवं ददृशे ॥ ९ ॥ तदेति । तदा पूर्वमिति शेषः । वृषध्वजः शिवस्तस्मिन् यो द्वेषस्तेन कलिलः कलुषीकृतः आत्मा यस्य सः प्रजापतिर्दक्षः शिवावलोकात् शरद्ध्रदः शरत्कालीनः ह्रदः इव अमलः अभवत् ॥ १० ॥ भवेति । भवस्य शिवस्य स्तवः स्तवनं तस्मै कृतधीः कृतमनाः सन्नपि संपरेतां परलोकगतां सुतां सतीं पुत्रीम् अनुरागतः स्मरन् अत एव औत्कण्ठ्यात् बाष्पकला नेत्रोद्भूतजललेशस्तया नाशक्नोन्न समर्थोऽभूत् ॥ ११ ॥ कृच्छ्रादिति । प्रेमविह्वलितः स्नेहेन विह्वलचित्तः अत एव कृच्छ्रात्प्रयासेनेत्यर्थः । मनः संस्तभ्य च, स्ववशं कृत्वैव सुधीः स्तुतिसमर्थबुद्धिमान् प्रजापतिर्दक्षः ईशं दिवं निर्व्यलीकेन प्रीतियुक्तेन भावेन अभिप्रायविशेषेण शशंस तुष्टाव ॥ १२ ॥ भूयानिति । हे भगवन् यद्यपि यद्यपि मया भवानिति शेषः । प्रलब्धः पराभूतः तथापि त्वया मयि दण्डः धृतः, केवलं शिक्षैव कृतेत्यर्थः । न तूपेक्षितोऽस्मीति भावः । अतः भवता मे मम भूयानतिमहान् अनुग्रहः कृतः । अहो अत्याश्चर्यम् एतत्तव युक्तमेवेत्याह । ब्रह्मबन्धुषु च ब्राह्मणाभासेष्वप्यस्मासु तुभ्यं तव हरेर्विष्णोश्च, इति वां युवयोः अवज्ञा उपेक्षा न अस्ति, धृतव्रतेषु स्ववर्णाश्रमधर्मनिष्ठेषु ब्राह्मणेषु कुतः एव अवज्ञा स्यात् न कुतश्चित्स्यादित्यर्थः ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र हेतुं वदन् परमात्मदृष्ट्या स्तौति । विद्येति । त्वं चतुर्मुखरूपी भवान् प्रथमं कल्पस्यादौ, ब्रह्म वेदम् आत्मतत्त्वं जीवपरयाथात्म्यं च, अवितुं स्वानुभवोपदेशाभ्यां रक्षितुं, विद्या शास्त्रजन्यं ज्ञानं च, तपः शमदमादिकं च, व्रतं कृच्छ्रचान्द्रायणादि च, येषां धरास्तान् विप्रान् मुखतः अस्राक् सृष्टवानसि । तत्तस्मात् हे परम हे विभो ब्राह्मणान् सर्वविपत्सु, प्रगृहीतदण्डः पालो गोपालः पशून् गोप्रभृतीनिव, प्रगृहीतदण्डः सापराधेषु कृतशिक्षः सन् पासि रक्षसि ॥ १४ ॥ भवान् कृपासमुद्रोऽहं निर्घृणो दुष्ट इत्येवं स्वदौर्जन्यं निवेदयन् क्षमापयति । योऽसाविति । अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन मया सभायां दुरुक्तय एव विशिखा बाणास्तैः क्षिप्तस्ताडितः सन्नपि तत् अविगणय्य तृणीकृत्य विस्मृत्य यः असौ भवान् अर्हत्तमस्य निन्दया पूज्यतमस्य भवतः कुत्सया अर्वाक् पतन्तम् अधोलोकान् गच्छन्तं माम् आर्द्रया दृष्ट्या अपात् अरक्षत् । भगवान्महैश्वर्यसंपन्नः स त्वं स्वकृतेनोपकारेण क्षमाप्य तुष्येत् । न मया तत्प्रतिकर्त्तुं शक्यमित्यर्थः ॥ १५ ॥ क्षमाप्येति । स दक्षः मीढ्वांसं शिवं एवममुना प्रकारेण क्षमाप्य प्रसाद्य, ब्रह्मणा चतुर्मुखेन चकाराद्रुद्रेणापि अनुमन्त्रितः अनुज्ञातः, ऋत्विजश्चाग्नयश्च ऋत्विगग्नयः उपाध्यायेन सहिताः सोपाध्यायास्ते च ते ऋत्विगग्नयश्च तैः कर्माध्वरसंबन्धिनीं क्रियां संतानयामास अनुवर्त्तयामास । पाठान्तरे संतारयामास समापयामास ॥ १६ ॥ किं कृत्वा कर्म संतानितवानित्यत्राह । वैष्णवमिति । द्विजोत्तमाः । यज्ञसंतत्यै यज्ञविभेदपरिहाराय वीरसंसर्गशुद्धये प्रथमसंसर्गकृतदोषविशुद्धये वीरभद्रसंसर्गशुद्धये वा । वैष्णवं विष्णुदेवताकं त्रिकपालं त्रिषु कपालेषु संस्कृतं पुरोडाशं निरवपन् ॥ १७ ॥ अध्वर्युणेति । हे विशां पते विदुर आत्तहविषो उपात्तहविषा अध्वर्युणा सह यजमानो दक्षः विशुद्धया निर्मलया धिया बुद्ध्या दध्यौ भगवन्तं ध्यातवान् । तदा तदैव हरिः प्रादुरभूत् आविर्बभूव । पाठान्तरे यथा येन प्रकारेण दध्यौ, तथा तं प्रकारमनतिक्रम्य प्रादुर्बभूवेत्यर्थः ॥ १८ ॥

तदेति । तदा तस्मिन्काले दश दिशः द्योतयन्त्या आत्मप्रभया स्वशरीरकान्त्या तेषां सदस्यानां तेजः मुष्णंस्तिरःकुर्वन् हरिः स्तोत्रे बृहद्रथन्तरे एव वाजौ पक्षौ स्तोऽस्य तेन 'बृहद्रथन्तरे पक्षौ' इति श्रुतेः । तार्क्ष्येण गरुडेन उपानीतः समीपं प्रापितः ॥ १९ ॥ आविर्भूतं भगवन्तं वर्णयति । श्याम इति द्वाभ्याम् । श्यामः स्वतो नवीनजलदवर्णः हिरण्यस्य रशना यस्य विधृतस्वर्णकटिमेखलः केवलायास्तस्या धारणानर्हत्वादनेन समानवर्णपीतवस्त्रं लक्ष्यते । परिहितपीताम्बरोपरि निबद्धकनकमेखल इत्यर्थः । अर्ककिरीटेन सूर्यसमानमुकुटेन जुष्टं नीलालका एव भ्रमरास्तैर्मण्डितं, कुण्डले स्तोऽस्मिन्निति कुण्डलम् आस्यं यस्य सः । सूर्यसदृशकिरीटसंसेवितनीलालकरूपभ्रमरसंशोभितकुण्डलद्वयोपेतवदनाम्बुज इत्यर्थः । कम्बुः शङ्खश्च, अब्जं कमलं च, चक्रं सुदर्शनं च, शराः बाणाश्च, चापः शार्ङ्गं च, गदा कौमोदकी च, असिः खड्गश्च, चर्म शतचन्द्रश्च तैर्व्यग्राः भृत्यरक्षणार्थं सत्वरास्तैः हिरण्मयभुजैः अङ्गदादिभूषणप्राचुर्याद्धिरण्मयैरिव स्थितैर्भुजैः कर्णिकारः इव शोभमानः पुष्पितैः शाखाविशेषैराख्यधतरुरिवातिशोभमान इत्यर्थः ॥ २० ॥ वक्षसीति । वक्षसि वक्षःप्रदेशे अधिश्रिता वधूः श्रीर्यस्य सः, वनमाला अस्यास्तीति वनमाली उदारश्चासौ हासश्च तेन युक्तो योऽवलोकस्तस्य कला तया । अपाङ्गेन विश्वं रमयन् पार्श्वयोरुभयपक्षयोर्भ्रमती व्यजनचामरे एव राजहंसौ यस्य सः । श्वेतं शुभ्रं यदातपत्रं छत्रं तदेव शशी तेन उपरि रज्यमानः शोभातिशयं नीयमानश्च ॥ २१ ॥ तमिति । उपागतं समीपं प्राप्तं तं भगवन्तम् आलक्ष्य दृष्ट्वा ब्रह्मा च, इन्द्रश्च, त्र्यक्षः शिवश्च, ते नायका मुख्या येषां ते सर्वे सुरगणादयः सहसा त्वरया उत्थाय प्रणेमुर्नमश्चक्रुः ॥ २२ ॥ तदिति । तस्य भगवतस्तेजो महस्तेन हतरुचस्तिरस्कृतप्रभाः सन्नजिह्वाः गद्गदवाचः ससाध्वसास्तन्महिम्ना क्षुभितचित्ताः मूर्ध्ना धृता अञ्जलिपुटा यैस्ते, मुर्द्धसु विधृताञ्जलिपुटा इत्यर्थः । एवंभूताः सन्तः अधोक्षजम् उपतस्थुस्तुष्टुवुः ॥ २३ ॥ अपीति । यस्य भगवतः महिमानं प्रति अर्वागधस्तादेव वृत्तयो येषां ते कार्त्स्न्येन तन्महिमानमवगन्तुमनर्हमनोवृत्तयः सन्तः भवादयः शिवप्रभृतयः अपि कृतः प्रकटीकृतः अनुग्रहार्थं भक्तानामनुग्रहार्थं विग्रहो येन तम्, भक्तानुग्रहैकप्रयोजनविधृतसन्मूर्त्तिं भगवन्तमित्यर्थः । यथामति गृणन्ति स्म अस्तुवन् ॥ २४ ॥

तत्र तावद्दक्षकृतभगवत्प्रपत्तिप्रकारमाह । दक्ष इति । अर्ह्यते पूज्यतेऽनेनेत्यर्हणमर्हणसाधनं गन्धपुष्पादिकम् । गृहीतमर्हणं येन सः साधनेषूत्तमः पुरुषार्थप्रापककरणानां मध्येऽत्युत्तम इत्यर्थः । स चासौ स च तं, पाठान्तरे गृहीतमर्हणसाधनोत्तर उत्तमे पात्रे समासाद्यार्हणेषु समर्पितेषु प्रीत्या सार्हणपात्रं येन स्वयमेव गृहीतं तथाभूतमित्यर्थः । यज्ञेश्वरं यज्ञानां भोक्तारं तत्फलप्रदं चेत्यर्थः । यथा भगवता गीतम् । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इति । विश्वसृजां मरीच्यादीनां पतिं पालयितारं' गुरुं हितोपदेष्टारं पाठान्तरे विश्वसृजां परं गुरुम, सुनन्दनन्दाद्यनुगैः सुनन्दनन्दप्रभृतिभिर्भृत्यात्मकदेवैः वृतं परिवेष्टितम् एवंभूतं भगवन्तं कृताञ्जलिर्निबद्धाञ्जलिर्दक्षः मुदा गृणन्, स्तुवन् प्रयतः समाहितचित्तः सन् प्रपेदे शरणं गतः ॥ २५ ॥ स दक्षः प्रकृतिपुरुषविलक्षणं परमात्मस्वरूपं सर्वशक्तिमद्यथा तथा विशोध्य तमनुसंदधानः प्रपद्यते । शुद्धमिति । शुद्धं कर्मरूपोपाधिरहितमकर्मवश्यमिति यावत् । अत एव स्वधाम्नि स्वस्वरूपे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मायां प्रतिषिध्य निरस्य वर्त्तमानमिति शेषः। स्वेन रूपेणास्पृष्टप्रकृतिजन्यदोषमित्यर्थः। शुद्धत्वे हेतुः। उपरताः शश्वन्निवृत्ताः अखिलाः सर्वाः बुद्ध्यवस्था मनोवृत्तयो यस्य तत्। नित्यनिवृत्तप्रकृतिपरिणामरूपान्तर्बाह्येन्द्रियसर्ववृत्ति इत्यर्थः। किमेवंविधस्वरूपं जडमिति चेन्नेत्याह। चिन्मात्रं ज्ञानैकरसरूपत्वादजडम् अभयं यदुपासनतो भयजनकजन्ममरणप्रवाहरूप संसारनिवृत्तिस्तथाविधत्वादभयम् एकमनन्यमसमाधिकत्वादनुपममित्यर्थः। एवंविधं स्वस्वरूपं प्रति इति शेषः। तिष्ठन् उक्तविधस्वस्वरूपानुभवमत्यजन्सन्नित्यर्थः। तयैव स्वेच्छाशक्तिरूपप्रसिद्धमाययैवेत्यर्थः। पुरुषत्वं सर्वजननयनगोचरतारूपपुरुषाकारतामित्यर्थः। उपेत्य तस्यां पुरुषाकारप्रदर्शनरूपमायायां रामकृष्णनारायणमुन्याद्यवताररूपेण वर्त्तमानः सन्नपीति शेषः। भवान् आत्मतन्त्रः स्वतन्त्र एव सन् अपरिशुद्धः इव कर्मवश्यजीवसमान इव आस्ते। अतो महदिदं तव सर्वशक्तिमत्त्वमिति भावः ॥ २६ ॥ अथर्त्विजः परमात्मतत्त्वानभिज्ञतामात्मीयामावेदयन्तः स्वापराधं परिहारयन्तः सन्तस्तं सर्वयज्ञाराध्यत्वेन स्तुवन्ति। तत्त्वमिति। हे अनञ्जन निरञ्जन पुण्यापुण्यरूपमलरहितेति यावत्। वयं सर्वे ऋत्विजः रुद्रशापात् नन्दिकेश्वरस्य शापात् नन्दिकेश्वरशापजातधीजाड्यत इत्यर्थः। कर्मण्येव अवग्रहधियो दुराग्रहचित्ताः सन्तः ते तव तत्त्वं याथात्म्यं न विदामो न जानीमः। किं तु हे भगवन् षाड्गुण्यमूर्त्ते। वृदिति भावे क्विबन्तम्। त्रयाणां सत्त्वादीनां गुणानां वृद्वर्त्तनं यस्मिंस्तत्, त्रिभिर्गुणैर्वर्त्तत इति वा। 'त्रैगुण्यविषया वेदा' इत्युक्तरीत्या तत्तद्गुणानुसारेण निगमाभिहितमित्यर्थः। उपलक्ष्यतेऽनेनेत्युपलक्षणं धर्मस्योपलक्षणं क्रियाजन्यापूर्वस्य देवताप्रसादात्मकस्यापूर्वस्य वा उत्पादकमित्यर्थः। इदम् अध्वराख्यमध्वरसंज्ञिकं तव रूपमित्यर्थः। ज्ञातम् अस्ति। अस्माभिरिति शेषः। यदर्थं यस्य सिद्धये अदः एतत् दैवमिन्द्रादिदेवताभावम् अधि अधिष्ठायेत्यर्थः। व्यवस्थाः, अत्रेयमेव देवता नान्येत्येवंभूता नियमा इत्यर्थः। वर्त्तन्ते अनेनेन्द्रादिरूपेण सर्वयज्ञाराध्यस्तत्तत्फलप्रदश्च त्वमेव भवसीत्युक्तं भवति ॥ २७ ॥ सदस्यास्तु निरीश्वरेऽपि दक्षाध्वरे धनलोभेन स्वप्रवृत्तिमनुचिन्त्य ततस्तप्ताः सांसारिकतापत्रयार्त्ताः जननपदव्या हेयताविष्कारपूर्वमात्मीयां विरक्तिमत्तां ज्ञापयन्तो भगवच्चरणारविन्दशरणागतिमाशासानाः स्तुवन्ति। उत्पत्तीति। हे शरणदाश्रयप्रद शरण्येति यावत्। उरुत्र्यध्वनि संसारमार्गे वर्त्तमान इति शेषः। अज्ञसार्थोऽज्ञजनसमूहः कामोपसृष्टः कामेन संपीडितः सन् ते तव पादौ कः त्वच्चरणारविन्दरूपं विश्रान्तिस्थानमित्यर्थः। कदा याति कस्मिन्काले आगमिष्यतीत्यर्थः। कथंभूतेऽध्वनीत्याकाङ्क्षायां तं विशिनष्टि। अशरणे विश्रामस्थानशून्ये, उरवो नैकविधाः सन्तो ये बहवः क्लेशा त एव दुर्गा दुर्गमस्थानानि यस्मिंस्तस्मिन्, अन्तक एवोग्रो व्याधस्तेनान्विष्टो लक्ष्मीकृतस्तस्मिन्, विषयरूपा मृगतृष्णा च, आत्मा आत्माभिमानास्पदं शरीरं च, गेहं ममत्वास्पदं गृहं च, गान्येव उरुरतिशयितो भारो यस्मिंस्तस्मिन्, पाठान्तरेऽज्ञसार्थविशेषणम्। द्वन्द्वानि सुखदुःखान्येव श्वभ्राणि गर्त्ता यस्मिंस्तस्मिन्, खला दुर्जना एव मृगा व्याघ्रादयस्तेभ्यो भयं यस्मिंस्तस्मिन्, शोक एव दावो वनवह्निर्यस्मिंस्तस्मिन् ॥ २८ ॥ रुद्रस्तु पूर्वं मम निन्दा दुःसहासीदिदानीं तु तां न गणयामीत्याह। तवेति। हे वरद इहास्मिन् लोके आशिषा कामेन अखिलार्च्ये सकलजनैराराधनीये, तथा असक्तैर्विषयासक्तिरहितैः मुमुक्षुभिर्मुनिभिर्मुक्तैश्च आदरेण अर्हणीये पूजनीये तव वराङ्घ्रौ निरतिशयसुकुमारत्वसुगन्धत्वताम्रत्वादियुक्ते चरणारविन्दे रचितधियं न्यस्तचित्तं मा माम् अविद्ययानाद्यज्ञानेन युक्तो अविद्यो लोकः, यद्वा आविद्यः स चासौ लोकोऽज्ञलोकः यदि यद्यपि अपविद्धमाचारहीनं जपति, तथापि तव परो यः अनुग्रहस्तेन त्वत्पराणां योऽनुग्रहस्तेन वा तज्जल्पनमज्ञजनकृतं मन्निन्दनमिति यावत्। न गणये न गणयामि। निन्दकजनकृतं मन्निन्दनं हृदि न गृह्णामीत्यर्थः। तव परानुग्रहैकचित्तत्वात्त्वच्चरणारविन्दासक्तचित्तानामस्माकमपि परानुग्रह एवोचित इति भावः ॥ २९ ॥

भृगुरत्वविद्यातिरोहितस्वरूपत्वेन देहपरवशत्वात् सर्वे ब्रह्मादयोऽपराधैकपरास्त्वं त्वपराधसहनैकशीलोऽसीति प्रकृतोऽपराधस्त्वया क्षन्तव्य इत्याह। यन्माययेति। ब्रह्मादयो विधिमुख्याः तनुभृतः सर्वे देहिनः सकला जीवा इति यावत्। गहनया दुरत्यया यन्मायया यस्य तव वशंगतया मायया अपहृतस्तिरोहित आत्मबोध आत्मनो धर्मभूतं ज्ञानं येषां ते अत एव तमसि तमःशब्दवाच्यसूक्ष्मप्रकृतिपरिणामरूपशरीरे स्वपन्तः शयानाः कृतशयनवद्वर्त्तमानाः सन्तः इत्यर्थः। यद्वा। तमसि तमःकार्यजन्मजरामरणादिरूपे संसारे शयानाः, आत्मन्नात्मनि श्रितं जीवान्तरात्मतयाधिष्ठितं तव तत्त्वं स्वरूपयाथात्म्यं अधुनापि एतावत्कालपर्यन्तमपि न विदन्ति, सम्यक्तया नैव जानन्ति, स उक्तविधमहिमः अयमस्मन्नयनविषयतां प्राप्तः। प्रणतानां शरणागतिपूर्वं कृतप्रणामानामात्मबन्धुः आत्मवन्निरतिशयप्रीतिविषयः भवान् प्रसीदतु अस्माननुगृह्णातु ॥ ३० ॥ अथ 'ब्रह्मा नात्मन् श्रितं तव विदन्त्यधुनापि तत्त्वम्' इति भगवत्तत्त्वस्यावेद्यत्वं यद्गुणोक्तं तदेव प्रपञ्चयन्नाह। नैतदिति। भवतो भगवतस्तवेत्यर्थः। एतत् वाङ्मनसागोचरं स्वरूपम् असौ पुरुषो जीवः, पदार्थानां यो भेदः स्वासाधारणो धर्मस्तं गृह्णन्तीति पदार्थभेदग्रहाः पदार्थभेदो गृह्यते एभिरिति वा। तैः रूपस्पर्शादिग्राहकैश्चक्षुरादिभिरिन्द्रियैरित्यर्थः। नेक्षेत न साक्षात्करोतीत्यर्थः। परस्मैपदमार्षम्। कुतः यावद्यत इत्यर्थः। असौ पुरुषः ज्ञायतेऽनेनेति ज्ञानमिन्द्रियवर्गस्तस्य अर्थस्य शब्दादेर्विषयस्य च गुणस्य ज्ञानार्थयोः कारणस्य सत्त्वादिगुणस्य च आश्रयः भवति। त्वं तु मायामयात् मायापरिणामरूपात् असतो देहादेः देहादिसंस्पृष्टा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवादित्यर्थः। व्यतिरिक्तः अत्यन्तं विलक्षणः। प्राकृतं हि चक्षुरादीन्द्रियं प्राकृतमेव गृह्णीयान्न त्वप्राकृतं त्वत्स्वरूपमिति भावः॥ ३१॥ इन्द्रस्तु चक्षुरादीन्द्रियग्राह्यं सर्वं मिथ्येति ब्रह्मोक्तं संश्रुत्यास्मन्नयनविषयतां प्राप्तः योऽस्माभिः स्तूयते स भगवानपि किं मिथ्येति नैतद्युज्यते इति विचार्य तदुक्तमसहमानो धर्मादिस्थापनार्थंजातभगवदवतारचक्षुर्ग्राह्यतामनुसंदधान आह। इदमिति। हे अच्युत इदं तव वपुः शरीरं विश्वं भावयति स्वदर्शनदानादिना सुखितं करोतीति विश्वभावनम् अत एव मनोदृशां जनानां मनसां दृशां चेत्यर्थः। आनन्दं करोतीत्यानन्दकरं भवतीति शेषः। अस्य रूपस्य न केवलमानन्दमात्रकर्तृत्वं किं तु धर्मादिसंस्थापनार्थत्वात्तस्य चाधर्मनिवर्त्तनपूर्वकत्वादधार्मिकविरत्युपयुक्तमप्यस्ति इत्याह। सुरविद्विडित्यादिना। सुराणां विद्विषोऽसुरास्तान् क्षपयन्तीति सुरविद्विट्क्षपणास्तैः उद्दुद्धृतान्यायुधानि यैस्तैः अष्टभिः भुजदण्डैः दण्डवद्दीर्घैर्भुजैरित्यर्थः। उपपन्नं युक्तमपि भवति। अत्र यद्यपि भगवत्स्वरूपग्राह्यत्वाग्राह्यत्वबोधिकाः श्रुतयो बह्व्यः सन्ति, तत्राभक्तानां भगवत्स्वरूपस्याचक्षुर्ग्राह्यत्वं ब्रह्ममतेन भक्तानां चक्षुर्ग्राह्यत्वमिन्द्रमतेनेति न विरोधः। एतदर्थविचारः श्रीशतानन्दमुनिप्रणीतहरिवाक्यसुधासिन्धोः सप्तनवतितमात्कार्याथनीयाद्यतरङ्गाद्विशेषतोऽवगन्तव्यः॥ ३२॥

ऋत्विक्पत्न्यस्तु भवदाराधनत्वेनोपक्रान्तं विच्छिन्नमप्येतमध्वरं कृपादृष्ट्या पवित्रीकुर्वित्याहुः। यज्ञ इति। अयं यज्ञः तव यजनायाराधनाय केन दक्षेण पूर्वं सृष्ट आरब्धः। स च अद्येदानीं पशुपतिना रुद्रेण दक्षकोपादक्षे संजातक्रोधात् विध्वस्तः खण्डितः अतः यज्ञ आत्मा मूर्त्तिर्यस्य तत्संबुद्धौ हे यज्ञात्मन् शवाः शेरते यस्मिन्निति शवशयनं श्मशानं तद्वदाभा प्रतीतिर्यस्य सः, शान्त उपरतो मेधो गृहिद्विजविधेयमिष्टान्नाशनाद्युत्सवो यस्य सः स चासौ स च तं नोऽस्माकं तं यज्ञं त्वं नलिनरुचा कमलसमानकान्त्या दृशा नेत्रेण पुनीहि पवित्रं कुरु॥ ३३॥ ऋषयस्तु परमात्मनो यदसाधारणमपहतपाप्मादित्वं देवमनुष्यादिभावभाक्त्वात्पुण्यसजातीयचेष्टितभाक्त्वेऽपि तत्फलाननुभवितृत्वादि‹ं› च तदनुसंधानः सन्तः परिपूर्णत्वेन स्तुवन्ति। अनन्वितमिति। हे भगवन् ते तव अत्र तवेति पठिते छन्दोऽनुरोधाऽस्त्येवाथापि ते इति छन्दोभङ्गं यत्पठितं तदार्षम्। इदं विचेष्टितं अनन्वितमघटमानं विस्मयनीयमित्यर्थः। किं तदित्यत्राह। ह स्फुटं यथा भवति तथा आत्मना स्वयं कर्म चरसि। पुण्यापुण्यसजातीयां क्रियामनुतिष्ठसि इत्यर्थः। अथापि न अज्यसे इति यत्तत् स्वकृतसुकृतदुष्कृतेन न सज्यसे इत्यर्थः। इदमन्यदप्यनन्वितमित्याह। यतः यस्यै विभूतये यां विभूतिं प्राप्तुमित्यर्थः। यत इति चतुर्थ्यर्थे तसिल्। तस्य सार्वविभक्तिकत्वात्। ईश्वरीं लक्ष्मीम् उपसेदुः भेजुः। ब्रह्मादय इति शेषः। यद्वा द्वितीयार्थे तसिलि तु ब्रह्मादयो विभूतये यामीश्वरीमुपसेदुरित्यन्वयः। स्वयम् अनुवर्त्तिनीं स्वत एवानुवर्त्तमानां तामित्यर्थः। भवान न मन्यते नाद्रियते प्रत्युतोपेक्षसे त्वमित्यर्थः। अनेन परिपूर्णत्वमुक्तम्॥ ३४॥ सिद्धास्तु तत्कथासुखमभिनन्दन्तः स्तुवन्ति। अयमिति। अयं नोऽस्माकं मनोवारणः मनोरूपो मत्तो मतङ्गजः क्लेशा आध्यात्मिकादयस्तापा एव दावाग्नयो वनवह्नयस्तैर्दग्धः अत एव तृषार्त्तः शब्दादिविषयासक्त्या संपीडितः अत एव तव कथैव मृष्टं शुद्धं पीयूषं तस्य नदी तन्मयी या स्रोतस्विनी तस्याम् अवगाढः प्रविष्टः सन् ब्रह्मसंपन्नवन्निजात्मानं ब्रह्मरूपं विभाव्य भगवद्ध्यानस्थमुक्तवद्दावं दावाग्नितुल्यसांसारिकाध्यात्मादितापं न सस्मार न स्मरतीत्यर्थः। न निष्क्रामति न च ततो निर्गच्छति किं तु परमात्मसंबन्धिनमानन्दमनुभवंस्तत्र सुखितः सन्नेवावतिष्ठत इत्यर्थः॥ ३५॥

यजमानी दक्षपत्नी स्तौति स्वागतमिति। हे ईश ते तव स्वागतं भद्रमागमनं जातम्। हे श्रीनिवास प्रसीद प्रसन्नो भव अस्माकमिति शेषः। तुभ्यं नमः। हे अधीश यथा शीर्षहीनः शिरसा हीनः कबन्धः कबन्धमात्रः पूरुषः अङ्गैः शोभनैरपि करचरणाद्यवयवैः न शोभते प्रत्युत भयंकर इव भासते। तथा त्वाम् ऋते त्वया विनेत्यर्थः। अयं मखः अङ्गैः प्रयाजादिभिरङ्गैः सहितः सन्नपि न शोभते अतः कान्तया त्वत्पत्न्या श्रिया लक्ष्म्या सह नोऽस्मान् त्राहि त्रायस्व पालयेत्यर्थः॥ ३६॥ लोकपालास्तु भगवतस्तवेदं नो दर्शनसौलभ्यं यत्तत्त्वन्मायावैभवमित्यनुसंदधानाः स्तुवन्ति। दृष्ट इति। हे भूमन् त्वं वाङ्मनसागोचरस्वरूपस्वभावो भवान् नोऽस्माकं दृग्भिश्चर्मचक्षुर्भिः किं दृष्टः कथं नु दृष्ट इत्यर्थः। स्वस्य वाङ्मनसाऽवेद्यस्वरूपस्वभावत्वे सत्यखिलजननयनतागतस्वरूपो यस्त्वत्संकल्पस्तज्जं यत्सौलभ्यं तेनैव दृष्ट इति भावः। एषा अदृग्विषयस्यापि दृग्विषयभवनरूपैषा इत्यर्थः। भवदीया माया हि। अन्यदपीदं तव मायाकार्यमेवेत्याह। असति यो ग्रह आग्रहो देहतदनुबन्धिनोरहंममताभिमान इत्यर्थः। सोऽस्त्येषां तैः देहाद्यात्माभिमानिभिरित्यर्थः। दृश्यं शरीरं येन कारणेन प्रत्यग्दृष्ट्या आत्मत्वेन दृश्यते अभिमन्यते, एषापि माया जीवानां स्वस्वदेहस्यात्मत्वेन मानिताविधापनरूपापि विचित्रशक्तिमती भवदीया मायैवेत्यर्थः। एतेन देहिनां देहात्मभ्रमोऽपि भगवन्मायामूलोऽस्तीत्यप्युक्तं भवति। अथैवं जीवेशैक्यभ्रमोऽपि भगवतस्तव मायामूल एवेत्याहुः। यस्त्वं प्रकृतिपुरुषविलक्षणो भवान् वस्तुतः सप्तमः सन्नपीति शेषः। पञ्चभिः भूतैः पृथिव्यादिभिः सह जीवस्य गणनयेति शेषः। षष्ठः भासि। अत्र भूतशब्दश्चतुर्विंशतिसंख्यानामपि तत्त्वानां ज्ञापकः। सांख्यमते तत्त्वात्मकप्रकृतेः परः पुरुष इति सिद्धान्तः। अत्र सर्वेषां तत्त्वानां पञ्चभूतेष्वन्तर्द्धानं कृत्वा षट्तत्त्वपक्ष उपात्तस्तदा जीवस्य तत्त्वैः सह परिद्दृत्या षष्ठो भगवानेव। वस्तुतस्तु चिज्जडयोरतादात्म्यात् षष्ठो जीवस्तत्स्थाने त्वत्प्रतीतिरूपाप्येषा भवदीया मायैवेति भावः। हिशब्दो भ्रमप्रसिद्धिद्योतकः॥ ३७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोकपालैर्भगवतः सौलभ्यत्वस्य मायावैभवत्वं यदभिहितं तदादिकमसहमानाः पातञ्जलमतानुसरणमाचरन्तो योगेश्वरा जीवानां भगवतश्च शरीरशरीरिभावं शेषशेषिभावमनुसंधायैकत्वं पृथक्त्वं चाविष्कुर्वन्तो वात्सल्यगुणविशिष्टत्वेन भगवन्तं स्तुवन्ति । प्रेयानिति । हे प्रभो विश्वात्मनि विश्वस्य प्रपञ्चस्यात्मा धारकस्तस्मिन् चिदचिदात्मकप्रपञ्चस्यान्तः प्रविश्य स्वयमपरित्यक्तस्वरूपस्वभावः सन्नेव प्रकाशात्मना यस्तद्धारकस्तथाभूत इत्यर्थः । अनेन विश्वस्य शरीरत्वं भगवतः शरीरित्वं जीवानां तरपरतन्त्रत्वं वस्तुतो जीवानां भगवतश्च पृथक्त्वमभिहितम् । त्वयि यः पुमान् आत्मनः स्वस्य पृथक् पृथक् सिद्धत्वं स्वस्यात्रह्मात्मकत्वमित्यर्थः । नेचेत् न पश्येत् स्वात्मानं परमात्मशरीरत्वेनापृथक्सिद्धत्वेनाब्रह्मात्मकत्वेनानुपश्येदित्यर्थः । अमुतोऽमुष्मात्तत्त्वदर्शिनः सकाशात् ते तव अन्यः प्रेयान्प्रीतिविषयः न अस्ति । 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति हि भगवतापि गीतमस्तीति भावः । शास्त्रसिद्धशरीरात्मभावादिज्ञानशून्यत्वेऽपि केवलस्वस्वामिभावज्ञानवान् यः सोऽपि वात्सल्यवता त्वयाऽनुग्राह्य एवेत्याहुरथापीति । अथापि आत्मनोऽपृथक्त्वं न पश्यति लोकसिद्धं स्वामिभृत्यभावमेव पश्यति । तथापीत्यर्थः । हे वत्सल दोषवति भृत्येऽपि गुणबुद्धिमन् भृत्येशतया भृत्यस्वामिभावेन उपधावतां त्वां सेवमानानाम् अनन्यवृत्त्या अनुग्रहेक्षदृष्ट्या अनुगृहाण प्रसीद । यथा मातुः पुत्रे वात्सल्यतयाऽनुग्रह उचितस्तथा सदोषेऽपि भृत्ये प्रभोस्तेऽनुग्रह उचित इति भावः ॥ ३८ ॥

ननु भगवतो विश्वात्मकत्वे विश्वगतदोषाणां परमात्मन्यापत्तिस्ततः सुखदुःखाद्यनुभवश्च जीववदापतितस्तन्निरासाय वेदान्तमतमाश्रित्य पुनराहुर्जगदिति । उद्भव उत्पत्तिश्च स्थितिः पालनं च लयः प्रलयश्च जगतां ये उद्भवादयस्तेषु निमित्तभूतेषु जगदुद्भवाद्यर्थमित्यर्थः । देव एव दैवो भगवांस्तस्मादिति दैवतः । भगवत्संबन्धिनः संकल्पादित्यर्थः । बहु बहुधा भिद्यमाना ब्रह्मरुद्रादिरूपेण परिणम्यमानाः गुणाः सत्त्वादयो गुणा यस्यास्तया आत्ममायाया साधनभूतया रचिता आत्मनि जीवे यो भेदो देवत्रमनुष्यत्वादिरूपस्तद्विषया मतिर्बुद्धिर्येन तस्मै । स्वसंस्थयाऽखण्डस्वस्वरूपस्थित्या विशेषेण निवर्तिता नित्यं निवर्तिताः भ्रमाः अन्यथाज्ञानविपरीतज्ञानादिरूपाः गुणास्तद्धेतवो रजस्तमआदयः आत्मनि येन तस्मै स्वेनैव प्रकाशेन नित्यनिवर्तितहेयायेत्यर्थः । अनेन विश्वगतदोषापत्तिः परिहृता । एवंभूताय नमः । केवलं नमस्कुर्मो न तु त्वद्गुणान्वर्णयितुं शक्नुम इति भावः ॥ ३९ ॥

योगेश्वरैर्निरस्तनिखिलहेयत्वेन भगवति स्तुते स भगवान् किं निर्गुण इत्याशङ्कायां निरस्तनिखिलहेयगुणः स्वशरीरवदात्मनि नित्यस्थितसमस्तकल्याणगुणश्च स भवतीति पञ्चरात्रमतमाश्रित्य शब्दब्रह्म स्तुवन्नमस्करोति । नम इति । निर्गुणाय निर्गताः सत्त्वरजस्तमआदयो हेयगुणा यस्मात्तस्मै निरस्तनिखिलदोषायेत्यर्थः । कल्याणगुणत्वमाह । श्रितसत्त्वायेति । श्रितं स्वीकृतं सत्त्वं शुद्धः सत्त्वगुणो येन तस्मै, सर्वस्वभक्तवाञ्छितविधानार्थं स्वीकृतशुद्धसत्त्वगुणायेत्यर्थः । धर्मादिप्रसूतिरित्याह । धर्मादीनां धर्मार्थादीनां प्रकृष्टा सूतिर्यस्मात्तस्य प्रसूतिस्तस्मै च प्रसवित्रे इत्यर्थः । धर्मादिप्रसवितृत्वं धर्मादिप्रशासकवेदसर्जनद्वारा तथा च श्रुतिः 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इति 'यो ब्रह्माणं विदधाति पूर्वं वेदांश्च प्रहिणोति तस्मै' इति । स्मृतिश्च । अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतयः' इति ते तुभ्यं नमः' अनेन सर्वकारणत्वसर्वदामनोहरमूर्त्तित्वतद्गतसर्वज्ञत्वसर्वशक्तित्वहितोपदेष्टृत्ववात्सल्यार्णवत्त्वं भगवतो विवक्षितं तर्हि कत्यस्य कल्याणगुणा इत्यत्र तेषामानन्त्यमाह । तेषां स्वरूपगुणविभूतीनां काष्ठा उत्कर्षः अवधिरिति यावत्ताम् अहं शब्दब्रह्म न वेद जानामि । अपरे ब्रह्मादयोऽपि न विदुः । चकारादहमेव न जानामि तर्हि कुतोऽपरे मदायत्तसूक्ष्मदर्शिनो जानीयुरिति कैमुत्यनयो ज्ञेयः । अत्र ज्ञेयत्वनिषेधो न स्वरूपगुणादिविषयः । किं तु तदियत्ताविधः तथा च, श्रूयते 'यस्यामतं तस्य मतं मतं यस्य न वेद सः' । 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह' । 'आनन्दं ब्रह्मणो विद्वान्' 'अविज्ञातं विजानतां विज्ञातमविजानतां' परिच्छिन्नत्वेन जानतो न मतमपरिच्छिन्नत्वेन जानतस्तु मतमित्यर्थः । एवं श्लोकचतुष्टयेन सांख्यपातञ्जलवेदान्तपञ्चरात्रमतोपन्यासेन शास्त्रचतुष्टयबोधेनैव यथार्थतया परमेश्वरस्वरूपस्य यथार्थागमो द्योतितः । चतुर्णां परस्परसाकाङ्क्षत्वात् । एतदर्थस्य यथार्थतयावगमस्तु श्रीहरिवाक्यसुधासिन्धोर्द्विपञ्चाशत्तमतरङ्गादवगन्तव्यः । 'सांख्येन योगेन च यः स्वरूपं राधिकापतेः । वेदान्तपञ्चरात्राभ्यां विद्यात्पूर्णः स नान्यथा । शास्त्रैश्चतुर्भिरेतैस्तत्स्वरूपं परमात्मनः । निश्चेतव्यं प्रयत्नेन स्यात्पूर्णज्ञानवान् यतः' इत्यादिनैतदर्थस्य तत्र प्रपञ्चितत्वादलमतिपल्लवनेन ॥ ४० ॥

एवं शब्दब्रह्माणि निरस्तनिखिलहेयत्वेन समस्तकल्याणगुणविशिष्टत्वेन भगवन्तं स्तुवति । तदभिन्नाग्निः सर्वतेजसामाच्छादकत्वसर्वतेजःप्रकाशापादकत्वादिकल्याणगुणान्तरविशिष्टत्वेन स्तुवन्नमस्करोति । यत्तेजसेति । यस्य भगवतस्तेजः प्रकाशस्तेन सुसमिद्धं प्रदीप्तं तेजो यस्य सः अहम् अध्वरे यज्ञे आज्यसिक्तं हव्यं हविः वहे वहामि । उद्देश्यामिन्द्रादिदेवतां प्रति नयामीत्यर्थः । तं यज्ञियं यज्ञाय हितं यज्ञोद्देश्येन्द्रादिदेवतामूर्त्तिमित्यर्थः । पञ्चविधं त्रेतासभ्यावसथ्यरूपेण पञ्चविधामिशरीरिणं पञ्चभिः यजुभिः 'ओं श्रावय' इति चतुरक्षरम् । 'अस्तु श्रौषट्' 'यज' इति द्व्यक्षरम् । 'ये यजामहे' इतिपञ्चाक्षरम् । द्व्यक्षरो वषट्कारः स्विष्टं सुष्टु पूजितम् । तथा चोक्तम् चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु' इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यज्ञं यज्ञमूर्तिं भवन्तं प्रणतः अस्मि ॥ ४१ ॥ जगत्कारणस्य तवेदं सर्वमुपपन्नमिति मन्वाना देवाः सौलभ्यादिकल्याणगुणान्तर-विशिष्टत्वेन स्तुवन्ति । पुरेति । आद्यः पुमान् सर्वोपादानभूतः पुरुषो भवान् पुरा अग्रे, सृष्टेः प्रागित्यर्थः । कल्पापाये प्राक्तन-कल्पान्ते स्वकृतं स्वसृष्टं विकृतं कार्यवर्गम् उदरीकृत्य उदरे निःक्षिप्य संगृह्येति यावत् । उरगेन्द्रः शेषः स एवाधिशयनं शय्या यस्मिंस्तस्मिन् । तस्मिन् सलिले जले शेषे शयितवान् । सिद्धैर्जनलोकवासिभिः हृदि स्वमानसे विमृशिता विचिन्तिता अध्यात्म-पदवी आत्मज्ञानमार्गो यस्य सः । योगपरिशुद्धमनोग्राह्य इत्यर्थः । एवंभूतोऽपि यः त्वं स एव अद्याधुना नोऽस्माकं अक्ष्णोर्नयनयोः पथि मार्गे चरसि । अस्माकं नयनविषयो जातोऽसीत्यर्थः । वाङ्मनसागोचरस्य तव सौलभ्यं कृपातिरेकादिति भावः । अतः भृत्यान् तव दासान् नोऽस्मान् अवसि पालयसि एव । अनेन भगवतो भृत्यानुग्रहकातरत्वं संसूचितम् ॥ ४२ ॥ गन्धर्वाप्स-रसस्तु तत्कार्यभूतमिदं कृत्स्नं जगत्त्वल्लीलोपकरणमिति स्तुवन्तो नमस्कुर्वन्ति । अंशांशा इति । हे विभूमन् कृत्स्नं जगदन्तर्बहिश्च व्याप्य वर्त्तमान, हे देव द्योतमान, मरीचिरादिर्मुख्यो येषां ते ब्रह्मा चेन्द्रश्च तावाद्यौ मुख्यौ येषां ते रुद्रः पुरोगो मुख्यो येषां ते, एते देवगणाः ते तव अंशांशाः अन्योंऽशांशाः । तत्र ब्रह्मरुद्रादयोंऽशाः । तत्र ब्रह्मादयः सृष्ट्यधिकारिणः, इन्द्रादयः पालनाधिकारिणः, रुद्रादयः संहाराधिकारिणः । एतेषामेतदर्थं विषयज्ञानशक्तिबलादिकं भगवद्गुणलेशाभिव्यक्तिकृतमिति वेदितव्यम् । विशिष्टवस्त्वे-कदेशरूपांशत्वं तु सर्वजीवेषु साधारणमिति विशेषं परिहृत्य वदति । इदं विश्वं यस्य तव क्रीडाभाण्डे क्रीडापरिकररूपं भवति, हे नाथ तस्मै ते तुभ्यं नमः करवाम ते कैंकर्यमिति शेषः ॥ ४३ ॥

विद्याधरास्तु विद्यादिभिः केवलं संपदः प्राप्यन्तेऽहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं विना न जायते इत्याहुः । त्वन्माययेति । त्वन्मायया त्वत्संकल्पेन अर्थं पुरुषार्थसाधनभूतं कलेवरम् अभिपद्य, अस्मिन् कलेवरे तदनुबन्धिनि च मम अहम् इति देहेऽहंता, दैहिके ममता चेत्येवंभूतामित्यर्थः । दुर्मतिं दुर्बुद्धिं कृत्वा वर्त्तमानः उत्पथैर्लोकवेदमर्यादोल्लङ्घिभिः स्वैः पुत्रादिभिः क्षिप्तो मुहुर्मुहुस्तिरस्कृतः अपि, असद्विषयेषु प्रकृतिपरिणामरूपशब्दादिविषयेषु लालस आसक्तः एवंभूतोऽपि पुमानिति शेषः । यदि युष्मत्कथामृतनिषेवकः भवदीयकथारूपामृतसंसेवनपरः स्यात् । सेवनमत्र श्रवणादिरूपं विवक्षितं भवति, तर्हि आत्ममोह-महंकारं ममकाररूपं स्वकीयमोहम् उद्व्युदस्येत् परित्यजेत्, मुक्तो भवेदिति भावः ॥४४॥ ब्राह्मणास्तु आस्तां तावदेवंविधं त्वत्कथा-मृतमाहात्म्यमिदं त्वन्नाममाहात्म्यं त्वत्यद्भुतमिति कथयिष्यन्तः प्रकृतयज्ञनिवृत्त्यभिकाङ्क्षया यज्ञसाधनमूर्त्तित्वेन स्तुवन्तस्तत्प्रसादं प्रार्थयन्ते । त्वमिति त्रिभिः । हे हरे क्रतुर्यज्ञः त्वं हविः पुरोडाशादिः त्वं, हुताशस्त्रेताग्निः त्वं, मन्त्रः स्वयं त्वं हि, समिधश्च, दर्भाश्च, पात्राणि च, समिद्दर्भपात्राणि त्वं च, समिदादिरूपोऽपि भवानेवेत्यर्थः । सदस्याश्च ऋत्विजश्च ते त्वमेव, दंपती यजमान-स्तत्पत्नी च त्वमेव देवता इन्द्रादिरूपाः त्वमेव अग्निहोत्रमग्निहोत्राख्यं कर्मापि त्वं सोमः त्वम् आज्यं त्वं पशुश्चापि त्वमेव अत्र क्रतुरित्यनेन यागात्मकत्वमुक्तं, अग्निहोत्रमित्यनेन होमात्मकत्वमुक्तं देवतोद्देशेन द्रव्यत्यागात्मको यागः स एव प्रक्षेपादिको होमः सर्वत्र सामानाधिकरण्यं शरीरात्मनिबन्धनम् ॥ ४५ ॥ यज्ञानां पृथिव्युपरि विधेयत्वाद्यज्ञवराहस्त्वमेव तां रसातला-दानीय, जलोपर्यास्थापितवानित्याहुः । त्वमिति । हे त्रयीगात्र वेदमूर्त्ते यज्ञो यागः क्रतुराराधनरूपं कर्म यस्य सः, त्वं पुरा कल्पादौ महाशूकरः श्वेतवराहरूपः सन् वारणेन्द्रो गजश्रेष्ठः पद्मिनीं कमलिनीं यथा तथा रसाया रसातलात्सकाशात् गां पृथिवीं दंष्ट्रया लीलया नुदन्नुत्पाट्यानयन् योगिभिः स्तूयमानः संश्च व्युज्जहर्थ विशेषेणोधृतवानसि ॥ ४६ ॥

स इति । स उक्तविधः त्वं परिभ्रष्टं सत्कर्म वैदिकत्वादाराधनरूपयागाख्यक्रिया येषां ते अत एव तद्भ्रंशपरिहारायेति शेषः । दर्शनं त्वत्समीक्षणम् आकाङ्क्षतां कामयमानानाम् अस्माकं प्रसीद सुप्रसन्नो भव । हे यज्ञेश यस्य ते तव नाम्नि नृभिर्नरैः कीर्त्त्यमाने सति यज्ञविघ्नाः क्रत्वन्तरायाः क्षयं नाशं यान्ति तस्मै ते नमः 'दक्षश्चर्त्विक्सदस्या गिरिशभृगुविधीन्द्राङ्गनाश्चर्षिसिद्धा दक्षस्त्री चातिनम्रा नतिनिपुणतरा लोकपालाश्च सर्वे । योगिगत्रह्माग्निदेवा हरिमुरुजगतामीश्वरं श्रीनिधानं गन्धर्वाश्चैव विद्याधर-निकरयुजो ब्राह्मणाश्चास्तुवंस्तम्' ॥ ४७ ॥ दक्षादीनां स्तुतिमुपसंहरंस्तैः स्तुतो भगवांस्ताननुगृह्णन्नाबभाष इत्याह मैत्रेयः । इतीति द्वाभ्याम् । हे भद्र विदुर इत्यनेन प्रकारेण विश्वभावने विश्वैककारणे हृषीकेशे कीर्त्त्यमाने, कविः कर्मकुशलः दक्षः रुद्राभिमर्शितं शिवेन विहतं यज्ञं संनिन्ये प्रवर्त्तयामास । रुद्राभिमर्शितं रुद्रेण संस्पृष्टमिति वा । पूर्वं रौद्रीयभागाभावाद्रुद्राभिमर्शितो रुद्रेण विहितः । सांप्रतं तु तद्भागप्रदानात्तेन संस्पृष्टमित्यवगन्तव्यम् ॥ ४८ ॥ भगवानिति । हे अनघ । सर्वात्मा सर्वस्यात्मा सर्वभागभुक् सर्वात्मतया सर्वभागभोक्तापि भगवान् स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाणः प्रसन्नतां प्राप्त इव दक्षं आभाष्या-भिमुखीकृत्य बभाषे ॥ ४९ ॥ तत्र हितोपदेष्टा भगवान्कार्यकारणरूपेणावस्थितप्रकृतिपुरुषशरीरकोऽहमेक एव मच्छरीरभूतब्रह्मरुद्र-योरनुप्रवेशविधानपूर्वं ब्रह्मरूपेण जगत्सृजामि रुद्ररूपेण च संहरामि मदवतारविष्णुरूपेण च पालयाम्यतो मत्तः मच्छरीरभूताच्च व्यतिरिक्तं वस्तु नास्तीत्यब्रह्मात्मकस्वतन्त्रवस्तुदृष्टिर्देहात्मभ्रान्तिमूला, न तु तात्त्विकी । सर्वस्य ब्रह्मात्मकत्वात्स्वतन्त्रत्वदृष्टिस्तु तात्त्विकी । अतः सामुक्त्युपायभूतेत्याह । अहमिति पञ्चभिः । अहं निरस्तनिखिलहेयत्वेन समस्तकल्याणगुणात्मकत्वेन च भवद्भिः स्तुतः समाभ्यधिकरहितो मदात्मको विष्णुरित्यर्थः । ब्रह्मा मदनुप्रविष्टो मत्सृज्यो मदायत्तसृष्ट्याद्युपयुक्तज्ञानो विधिश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शर्वः मदनुप्रविष्टो मत्सृज्यो मदायत्तसंहाराद्युपयुक्तज्ञानः शिवश्च एते त्रयः जगतः परं कारणं तत्र त्रयाणामपि परमकारणरूपोऽहं त्विति शेषः। आत्मा सर्वान्तरभूतः अत एव ईश्वरः अन्तः प्रविश्य नियन्तृत्वेनावस्थितः उपद्रष्टा साक्षी स्वयंदृक् नित्याविर्भूतासंकुचितज्ञानः। अविशेषणः शरीरभूतचिदचिच्छरीरित्वेऽपि हेयगुणरहितः। भवामीति शेषः॥ ५०॥ आत्मेति। हे द्विज दक्ष यः सुक्ष्मप्रकृतिपुरुषशरीरकः निरस्तनिखिलहेयः समस्तकल्याणगुणात्मकः सोऽहं गुणमयीं त्रिगुणात्मिकाम् आत्ममायां निजप्रकृतिं समाविश्य संकल्पपूर्वं जीवद्वारानुप्रविश्य विश्वं जगत् सृजन् ब्रह्मद्वारा सृष्टिं कुर्वन्नित्यर्थः। रक्षन् मदवतारविष्णुद्वारा पालयन् हरन् रुद्रद्वारा संहरन् सन् क्रियोचितां सर्गादिक्रियानुरूपां संज्ञां ब्रह्मविष्णुशिवात्मिकां संज्ञां दध्रे बिभर्मि। प्रकृत्यादिशरीरकत्वेन कारणरूपेणावस्थितोऽहमेक एवेति न मद्व्यतिरिक्तं वस्त्वस्तीति भावः॥ ५१॥

एवं हि सर्वस्वरूपात्मकत्वान्मद्व्यतिरिक्तस्वतन्त्रवस्त्वभावादमदात्मकस्वतन्त्रवस्तुदृष्टिर्देहात्मभ्रान्तिमूलेत्याह। तस्मिन्निति। तस्मिन्कार्यावस्थकारणावस्थप्रकृतिपुरुषयोर्नियन्तरीत्यर्थः। किं राजादिवन्नियन्ता नेत्याह। परमात्मनि प्रकृतिपुरुषयोरन्तः प्रविश्य तद्गतदोषास्पर्शनपूर्वं प्रशासके। किमेवंभूतः कश्चित्त्वदन्योऽस्ति नेत्याह अद्वितीये स्वसमानद्वितीयवस्त्वन्तररहितः इत्यर्थः। केवले निरस्तनिखिलहेये, ब्रह्मणि स्वरूपेण गुणैश्च निरतिशयबृहति, अनन्तकल्याणगुणस्वरूपे इत्यर्थः। एवंभूते मयि ब्रह्मरुद्रौ, भूतानि च, अज्ञः सर्वेषां मदात्मकत्वज्ञानरहितः देहात्मबुद्धिश्च पुमान्, भेदेन मत्पृथक्सिद्धत्वेन स्वतन्त्रत्वेन चेत्यर्थः। अनुपश्यति॥ ५२॥ सर्वेषां मदात्मकत्वज्ञानवन्तस्तु भूतानि भेदेन न पश्यन्तीति सदृष्टान्तमाह। यथेति। यथा पुमान् देहात्मभ्रान्तिमानपि पुरुषः स्वाङ्गेषु स्वपृथक्स्थित्यनर्हशिरःपाण्याद्यवयवेषु मध्ये इत्यर्थः। क्वचित्कस्मिंश्चिदप्यवयवे परस्येदं परकं तस्य भावः पारक्यं तेन या बुद्धिस्तां न कुरुते। एवं मत्परः मदासक्तचित्तः, सर्वस्य मदात्मकत्वज्ञानसंपन्न इत्यर्थः। भूतेषु मत्पृथक्स्थित्यर्हबुद्धिं न कुरुते इत्यर्थः॥ ५३॥ एवं कृत्स्नस्य जगतः ब्रह्मरुद्रयोरपि स्वात्मकत्वेन स्वपृथक्स्थित्यविशेषणत्वेन स्वप्रकारतामुपपाद्य सर्वेषां मदायत्तसत्तादिमत्त्वेन मत्प्रकारत्वज्ञानं मनःप्रशान्तिद्वारा मुक्तिसाधनमित्याह। त्रयाणामिति। हे ब्रह्मन् दक्ष, यः एकस्मिन्मयि भावो येषां ते एकभावास्तेषां सर्वेषु भूतेषु आत्मा सर्जनपालनसंहरणस्वभावो येषां तेषाम्। आत्मशब्दः स्वभावार्थः। त्रयाणां ब्रह्मविष्णुरुद्ररूपाणां मध्ये भिदां न पश्यति मदात्मतया भेदं न निरीक्षते, सः शान्तिम् अधिगच्छति वै। शान्त्यधिगमद्वारा मुक्तो भवेदित्यर्थः॥ ५४॥ दक्षाध्वरप्रसङ्गमुपसंहरति मैत्रेयः। एवमिति। भगवता एवम् आदिष्टः प्रजापतीनां पतिः प्रजापतिर्ब्रह्मा पतिर्यस्येति वा। दक्षः स्वेन स्वकर्तृकेन क्रतुना हरिम् अर्चित्वा उभयतः दिव्यवस्थितान् भूमाववस्थितांश्चेत्यर्थः। देवान् भूदेवान् स्वर्देवांश्चेति भावः अयजत् स्वस्वभागादिभिर्यथायोग्यमाराधितवानित्यर्थः॥ ५५॥ रुद्रमिति। तथा समाहितः समाहितचित्तः सन् रुद्रं शिवं च स्वेन भागेन उच्छेषणरूपेण भागेन उपाधावदन्ववर्त्तत अयजदित्यर्थः। हि उदवस्यते समाप्यतेऽनेनेत्युदवसानं तेन कर्मणा कर्मसमाप्तेर्हेतोरित्यर्थः। इतरानुक्तभिन्नान् सोमपान्देवान् अपि उपाधावत्ततः ऋत्विग्भिः सह उदवस्य कर्म समाप्य अवभृथं भवति तथा सस्नौ स्नातवान्॥ ५६॥

तस्मा इति। स्वेन एव अनुभावेन महिम्ना अवाप्तराधसे प्राप्तसिद्धये तस्मै दक्षायापि धर्मे एव मतिं दत्त्वा अस्य मतिर्धर्मासक्ता स्यादित्यनुगृह्येत्यर्थः। ते त्रिदशा देवाः दिवं ययुः॥ ५७॥ प्रकृतमर्थं परमप्रकृतार्थेन संगमयति। एवमिति। एवमुक्तरीत्या दाक्षायणी दक्षपुत्री सती पूर्वकलेवरं सतीसंज्ञं पूर्वशरीरं हित्वा परित्यज्य, हिमवतो हिमाचलस्य क्षेत्रे क्षेत्रभूतायां मेनायां जज्ञे उद्भूव इत्येवं शुश्रुम। पराशरादिभ्य इति शेषः। अनेन स्वोक्तेः प्रामाण्यं सूचितम्॥ ५८॥ तमेवेति। भूयो द्वितीये जन्मनि अम्बिका पार्वती, न विद्यते अन्यस्मिन् भावो यस्याः सा एवंभूता सती, एका अम्बिका एव गतिः प्रवृत्त्युपायो यस्य तं, तामेव चिन्तयन्तमित्यर्थः। अत एव दयितं प्रीतिविषयं तं रुद्रमेव, सुप्ता प्रलयकाले निर्व्यापारा शक्तिः पूरुषम् परमपूरुषम् इव सृष्टिदशायामिति शेषः। आवृङ्क्ते भजति स्म॥५९॥ उक्तकथायाः सांप्रदायिकत्वमाह। एतदिति। दक्षाध्वरद्रुहः दक्षाध्वरविनाशिनः भगवतः शम्भोः एतत कर्म चरितं बृहस्पतेः शिष्यात् भागवतात् उद्धवात् मे मया श्रुतम् अस्तीति शेषः॥ ६०॥ उक्तायाः कथायाः श्रवणश्रावणादिफलमाह। इदमिति। हे कौरव विदुर, पर उत्कृष्टः मा न विद्यते यस्मात्स परमो भगवान् स एवेश इष्टदेवो यस्य तस्य रुद्रस्य चेष्टितं, परा मा लक्ष्मीर्यस्य स परमो भगवांश्च इष्टे इतीशः शिवश्च तयोश्चेष्टितमिति वा। परमेशचेष्टितरूपमित्यर्थः। पवित्रं श्रोतृश्रावयितृपवित्रतापादकं यशस्यं यशस्करम् आयुष्यमायुष्करम् अघौघमर्षणं पापचयविनिवर्त्तकम् इदमाख्यानं यः नरः पुमान् आकर्ण्य अनुकीर्त्तयेत श्रावयेत्, नित्यदा सर्वदा भक्तिं भावयतीति भक्तिभावनः भगवद्भक्तिनिष्ठः सन्, पाठान्तरे चेष्टितविशेषणम्। अघं पापं धुनोति क्षिपति नाशयतीति यावत्॥ ६१॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे सप्तमोऽध्यायः॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथाष्टमोऽध्यायः

मैत्रेय उवाच

सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः । नैते गृहान् ब्रह्मसुताह्यावसन्नूर्ध्वरेतसः ॥ १ ॥

दक्षयज्ञकथा प्रोक्ता प्राप्ता दक्षसुतान्वये । पञ्चभिर्ध्रुवचर्याऽथ मनोरन्वयसंगता ॥ १ ॥
गुरुदारोक्तिरोषोत्थमत्सरादष्टमे पुरात् । ध्रुवेण निर्गतेनाह तोषं तपसा हरेः ॥ २ ॥

एवमत्र तावन्मनुकन्यान्वयोक्त्यैव मरीच्यादीनां ब्रह्मसुतानां वंशा वर्णिताः । अथाग्रे मन्वन्वयं वक्तुकामोऽनुऽसर्गकथनेऽवशिष्टं किंचिदाह । सनकाद्या इति । सनकाद्याः, नारदः, ऋभुः, हंसः अरुणिश्च यतिरिति प्रत्येकमनुषञ्जनीयम् । सनकादिभिर्योजने वचनविपरिणामः । केचित्तु यतिरित्यरुणिविशेषणं कुर्वन्ति । अन्ये तु यतिरिति कस्यचन संज्ञेत्याहुः । एते ब्रह्मसुताः यतः ऊर्ध्वरेतसः नैष्ठिकाः अतः गृहान् गृहाश्रमान् न आवसन् हि । अतस्तेषां वंशो नास्तीति सूचितम् ॥ १ ॥ अधर्मोऽपि ब्रह्मण एव पुत्रस्ततस्तस्यापि वंशमाह । मृषेति चतुर्भिः । हे शत्रुहन् विदुर अधर्मस्य भार्या मृषा मृषासंज्ञा आसीत् । दम्भः परप्रतारणं तन्नामानं, मायां तदुचितचेष्टां, तत्संज्ञं च मिथुनं स्त्रीपुंसात्मकयुगलम् असून प्रसूतवती । तच्च मिथुनम् अप्रजः निर्ऋतिरेतत्संज्ञः जगृहे अपत्यत्वेन स्वीचकार । तत्रापि दम्भे पुत्राभिमानं मायायां स्नुषाभिमानमपि कृतवानिति बोध्यम् । सोदरयोरपि मायादम्भयोर्दांपत्यमधर्मांशतया एवमुपर्यपि द्रष्टव्यम् ॥ २ ॥ तयोरिति । हे महामते तयोर्मायादम्भयोः लोभः निकृतिश्च, ताभ्यां निकृतिलोभाभ्यां क्रोधः हिंसा च समभवदित्यनुषङ्गः । यद्याभ्यां क्रोधहिंसाभ्यां कलिः स्वसा कलेर्भगिनी दुरुक्तिश्च समभवत् ॥ ३ ॥ दुरुक्ताविति । हे सत्तम दुरुक्तौ भार्यायां कलिः भियं भीतिं मृत्युं च आधत्त उत्पादयामास तथा तयोश्च ताभ्यां भीमृत्युभ्यामपीत्यर्थः । यातना स्त्री, निरयः पुमान् एतदुभयात्मकमिति शेषः । मिथुनं जज्ञे ॥ ४ ॥ अधर्मवंशमुपसंहरन् संसृतिहेतुत्वाद्बुभूषुभिस्तस्यासेव्यतामाह । अधर्मेति । अधर्मान्वयसंभूताः एते संसृतिहेतवः सन्तीति शेषः । हि अतः श्रेयस्कामः स्वर्गापवर्गकामः उत्तम आश्रयो यस्येत्याश्रयोत्तमश्चतुर्थाश्रमी । आहिताग्न्यादित्वात्पूर्वनिपातः । नितरां न सेवेत अधर्मवंश्यानिति शेषः ॥ ५ ॥ अथाधर्मवंशस्य प्रतिसर्गान्तर्भावं वदंस्तच्छ्रवणफलमाह । संग्रहेणेति । हे अनघ तव तुभ्यं प्रतिसर्गः संग्रहेण समासेन मया आख्यातः । प्रलयहेतुत्वादधर्मवंशस्य प्रतिसर्गत्वं पुण्यं, वर्जनद्वारा पुण्यहेतुत्वात् । एतमधर्मवंशं त्रिः त्रिवारं कालत्रये इत्यर्थः । श्रुत्वा पुमान् आत्मनः स्वस्य मलं पापं विधुनोति ॥ ६ ॥

एवं मनुकन्यान्वयमभिधायाथ मनुपुत्रान्वयं वक्तुमुपक्रमते । अथात इति । हे कुरूद्वह अथ मनोस्तु शतरूपायां तिस्रः कन्याः प्रजज्ञिरे । इत्युपक्रान्तमनुकन्यान्वयकथनानन्तरम् अत उपक्रान्तस्य वृत्तत्वाद्धेतोः पुण्या शुश्रूषतां पवित्रतापादिका कीर्त्तिर्यस्य तस्य हरेः स्मरणमात्रेण दुरितहारिणो भगवतः अंशो ब्रह्मा तस्यांशाच्छरीराज्जन्म तस्य स्वायंभुवस्य मनोरपि वंशं कीर्त्तये । हर्यंशांशसंभूतत्वाद्धरिभक्तत्वाच्च हरिचरित्रवन्मनुपुत्रान्वयकथनश्रवणादिकमपि दुरितविनाशनद्वारा पुण्यसंपादकमिति तत्कथनमिति भावः ॥ ७ ॥ प्रतिज्ञातं मनुवंशं वर्णयति । प्रियव्रतोत्तानपादावित्यादिनाऽऽभूगोलवर्णनात् । प्रियव्रतेति । प्रियं भगवत्प्रीतिकरं व्रतं यस्य सः प्रियव्रतः, स च उत्तानावुन्नतौ पादौ यस्य सः उत्तानपादः स च, तौ शतरूपापतेर्मनोः सुतौ । वासुदेवस्य कलया सर्वोत्तरभगवद्गुणविशेषाविर्भावेन जगतः रक्षायां स्थितौ आस्तामिति शेषः ॥ ८ ॥ जाय इति । तयोः मध्ये उत्तानपादस्य सुनीतिः सुरुचिश्च जाये भार्ये अभवतामिति शेषः । तत्र सुरुचिः पत्युरुत्तानपादस्य प्रेयसी नितरां प्रीतिविषया आसीदिति शेषः । यत्सुतः यस्याः सुनीतेः पुत्रः ध्रुवः । तथाभूता इतरा सुनीतिस्तु न प्रेयसी नैव प्रिया आसीत् ॥ ९ ॥ तत्र सुनीत्या अप्रेयस्त्वमेव प्रपञ्चयंस्तत्सुतध्रुवचरितम् हैकदेत्यादिना । एकदा कदाचित् राजा उत्तानपादः सुरुचेः पुत्रम् उत्तममुत्तमसंज्ञकम् अङ्कम् आरोप्य लालयन् अवर्त्तत । तदा तं दृष्ट्वेति शेषः । आरुरुक्षन्तं भ्रातृवत्स्वपितुरुत्सङ्गमारोढुमिच्छन्तं ध्रुवं न अभ्यनन्दत नाद्दतवान् ॥ १० ॥ तथेति । सुरुचिः राज्ञोऽभिप्रायज्ञोत्तमप्रसूः । तथोत्तमवत् चिकीर्षमाणं स्वपित्रङ्कारोहणं कर्त्तुमिच्छन्तं सपत्न्याः सुनीतेः तनयं पुत्रं तं ध्रुवं प्रति राज्ञ उत्तानपादस्य शृण्वतः सतः अतिगर्विता सती

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सेर्ष्यमक्षमासहितं यथा आहोवाच ॥ ११ ॥ गर्वोक्तिमाह। न वत्सेति त्रिभिः। हे वत्स नृपतेः धिष्ण्यमङ्कासनं सिंहासनं वा आरोढुं भवान् न अर्हति। नृपात्मजोऽहमारोढुमर्हे एव तत्राह। त्वं नृपात्मजः सन्नपि यद्यस्मात् मया कुक्षौ न गृहीतः न धृतः। यतो मद्गर्भज एव नृपासनार्हं इत्यभिप्रायः॥ १२॥

त्वं मया कुक्षौ न गृहीत इति केवलमहमेव न वेद्मि, किं तु भवानपि वेदेत्याह। बालोऽपीति। भवान् बालः सन्नपि आत्मानम् अन्यस्त्रीगर्भसंभृतं मत्सपत्नीगर्भधृतं न वेद किम् अपि तु वेदेत्यर्थः। नूनमिति निश्चये। यस्य एवं जानतोऽपि तव दुर्लभे लब्धुमयोग्ये अर्थे नृपासनारोहणरूपेऽर्थे मनोरथः। कथमासीदिति शेषः॥१३॥ यदि दुर्लभोऽर्थो मया साध्य इति तवाग्रहस्तर्ह्येवं साधयेत्याह। तपसेति। हे ध्रुव यदि त्वं नृपासनम् इच्छसि तर्हि तपसा पुरुषं परमपुरुषम् आराध्य तस्याराधितस्य परमपुरुषस्य अनुग्रहेण एव मम गर्भे आत्मानं साधय तवोत्पत्ति मद्गर्भे संसाधयेत्यर्थः॥१४॥ मातुरिति। मातुः सपत्न्याः दुरुक्तेन दुर्वचसा भावे क्तः। विद्धस्ताडितः स ध्रुवः दण्डहतः दण्डेनाघट्टितः अहिः सर्पः यथा तथा रुषा क्रोधेन श्वसन् निःश्वासान्मुञ्चन् मिषन्तं पश्यन्तं सन्नवाचं कुण्ठितवाचं पितरमुत्तानपादं हित्वा प्ररुदन्नितरामश्रूणि विमुञ्चन् सन् मातुर्जनन्याः सुनीतेरिति यावत्। सकाशं समीपं जगाम॥१५॥ तमिति। तं स्वसकाशमागतं निःश्वसन्तं निरतिशयितश्वासान्विमुञ्चन्तं, स्फुरितः अधरोष्ठो यस्य तं बालं सा ध्रुवमाता सुनीतिः उत्सङ्गम् उदुह्य उन्नयनपूर्वमङ्कमारोप्येत्यर्थः। तत्तदीयवृत्तं पौरमुखादेतद्वृत्तान्तकथकान्तःपुरीयजनात्स्वतः निशम्य यच्छ्रुतं तत् सपत्न्या गदितं विदित्वेति शेषः। नितान्तमतिशयेन विव्यथे व्यथितवती॥ १६॥ सेति सा सुनीतिः धैर्यम् उत्सृज्य हित्वा विललाप। शोक एव दावाग्निर्वनवह्निस्तेन दावलता दवप्रदग्धा वीरुद् इव स्थिता बाला सुनीतिः सपत्न्याः वाक्यं स्मरती सती, सरोजस्य कमलस्य श्रीरिव श्रीः शोभा यस्यास्तया दृशा बाष्पकलामश्रुकणिकाम् उवाह दधार॥१७॥ दीर्घमिति। दीर्घम् यथा तथा श्वसन्तीसपत्नीगदितवचनस्मृतिजातान्तर्व्यथया मुहुर्निःश्वासान्विमुञ्चती वृजिनस्य दुःखस्य व्यसनस्येति पाठेऽप्ययमेवार्थः। पारमवधिम् अपश्यती अपारदुःखाक्रान्तेत्यर्थः। बाला सुनीतिः बालकम् अल्पोऽल्पवया बालो बालकस्तं पञ्चवर्षवयस्कं ध्रुवमित्यर्थः। आह हे तात अनुकम्प्य, परेष्वजनेषु अमङ्गलमपराधं मा मंस्था मा स्मार्षीः। यद्यस्मात् जनः परदुःखदः परेभ्यो दुःखप्रदो यो जनः स इत्यर्थः। तत्स्वकृतदुःखमेव भुङ्क्तेऽनुभवति॥ १८॥

सुरुच्याभिहितं सोपालम्भमनुवदन्त्यात्मजं तपसे प्रेरयति। सत्यमिति। हे तात इडस्पतिर्भूमिपतिः यां मां भार्या मदीयेयमङ्गना इति वाशब्दाद्दासीत्यपि वोढुं स्वीकर्तुं विलज्जते, तस्याः दुर्भगाया भाग्यहीनायाः मे मम उदरे भवान् गृहीतः, दुर्भगया मया स्वोदरे त्वं गृहीत इत्यर्थः। तस्या एव ममेति शेषः। स्तन्येन स्तनभवदुग्धेन वृद्धः वृद्धिं प्राप्तः, अतः सुरुच्या यत् अभिहितं बालोऽपि वतेत्यादि तपसाराध्येत्यादि यत्कथितं तदित्यर्थः। सत्यं सत्यमेवाभिहितमित्यर्थः। इडा भूमिस्तस्याः पतिः डलयोरभेदात्पारस्कारादित्वात्सुड्ह्रस्वौ॥ १९॥ आतिष्ठेति। हे तात तस्मात् त्वं विमत्सरो विगतमत्सरः सन् पितृभार्यात्वेन समाना माता समाता तथापि तव मातुर्मम सपत्न्यापीत्यर्थः। यत् उक्तं तपसाराध्यं पुरुषमित्यादि तत् अव्यलीकं निष्कपटं यथा तथा मत्त्वेति शेषः। आतिष्ठ अनुतिष्ठ। उत्तमः यथा तथा त्वमपि अध्यासनं नृपासनं यदि इच्छसे तर्हि अधोक्षजपादपद्मम् आराधय परिचर॥ २०॥ अधोक्षजपादपद्ममाराध्य स्वाभिलषिताध्यासनादि किं कश्चिदवापेत्यत्र ब्रह्माणं मनुं च निर्दिशति। यस्येतिद्वाभ्याम्। विश्वविभावनाय विश्वस्य पालनाय गुणानां कल्याणगुणानामभिपत्तिर्वित्तिर्यस्यां सा गुणाभिपत्तिरात्ता स्वीकृता गुणाभिपत्तिर्दिव्यमङ्गलमूर्त्तिर्येन तस्य स्वकीकृतकल्याणगुणाश्रयदिव्यमङ्गलमूर्त्तेरित्यर्थः। यस्याधोक्षजस्य जित आत्मा मनः श्वसनः प्राणवायुर्यैस्तैरभिवन्द्यम् अङ्घ्रिपद्मं परिचर्य्य समाराध्य अजो ब्रह्मा पारमेष्ठ्यं पदं चतुर्दशभुवनानां मध्ये उत्कृष्टतया सर्वोपरि वर्त्तमानं सत्यलोकरूपं स्थानमित्यर्थः। अध्यतिष्ठदधिष्ठितवान् खलु निश्चितमेव॥ २१॥ तथेति तथा तेन प्रकारेणैव वो युष्माकं पितामहः पितुः पिता भगवान्पूज्यः मनुरपि एकमत्या अव्यभिचरितभक्त्येत्यर्थः। पुरुदक्षिणैः द्विजविश्राणितपुष्कलदक्षिणावद्भिरित्यर्थः। मखैर्यज्ञैः यं भगवन्तम् इष्ट्वा आराध्य अन्यतस्तदितरैः दुःरवापं दुःखेन प्राप्तुमप्यशक्यं दिव्यं दिवि भवं सुखं स्वर्गभोग्यं सुखमित्यर्थः। भौमं भूमिगतं साम्राज्यं सुखम् अथ च आपवर्ग्यं मोक्षसुखं चेत्यर्थः। अभिपेदे अनेनाधोक्षधजस्य कुलदैवतत्वमुक्तम्॥ २२॥

भजन्तमपि मां स्वविभूतिभूतराजद्वेषायसद्गुणदृष्ट्योपेक्षेत चेत्तदा मम का गतिरित्यत्राह। तमिति। हे वत्स भृत्येषु भक्तेषु वत्सलो भृत्यवत्सलस्तं सत्स्वपि दोषेषुताननादृत्य मदीयोऽयमिति बुद्ध्या तत्प्रवणत्वभाक्त्वं वात्सल्यं तद्वान् भगवांस्त्वद्दोषान्न गणयिष्यतीति भावः। अतः मुमुक्षुभिः संसारबन्धनान्मोक्षमिच्छद्भिः मृग्या अन्वेषणीया चिन्तनीयेति यावत् पदाब्जयोः पद्धतिर्मार्गो यस्य तं स्वाश्रितजनमुक्तिप्रदमिति भावः। तमेव आश्रय। अनेनास्याश्रयार्हरमणीयगुणसंपत्तिरुक्ता। कथमाश्रयाणीत्यत्र स्ववर्णाश्रमधर्मानुगृहीतभक्तियोगेनाश्रयेत्याह। न विद्यतेऽन्यस्मिन् भावो यस्य तस्मिन् विजातीयभावान्तराव्यवहिते इत्यर्थः। निजधर्मेण स्वधर्मपालनेन भावितं संशोधितं तस्मिन् मनसि अवस्थाप्य आधाय विषयीकृत्येत्यर्थः। पूरुषं पुरभिमानि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवान्तःप्रविश्य स्थितत्वात्पुरुषसंज्ञं परमपुरुषमित्यर्थः। भजस्व भक्त्या तत्संसेवनं कुर्वित्यर्थः। तैलधारावदविच्छिन्नस्मृतिसंतानरूपे मनोव्यापारे जाते सति विजातीयप्रत्ययान्तराव्यवहितनिवाततदीपशिखावदविच्छिन्नस्मृतिरूपा भक्तिस्तथाभावेन भजनं परमार्थभजनमिति भावः ॥ २३ ॥ नान्यमिति। हे अङ्ग पुत्र यो भगवान् इतरैर्ब्रह्मेन्द्रादिभिः विमृग्यमाणया अन्विष्यया हस्ते गृहीतं पद्मं यया सा तया श्रिया लक्ष्म्या मृग्यते अन्विष्यते एवंभूतो भवतीति भावः। पद्मपलाशलोचनात्कमलदलसमाननेत्रात् ततो भगवतः सकाशात् अन्यं कंचन इतरं कमपीत्यर्थः। ते तव दुःखच्छिदं कष्टविनाशकरं न मृगयामि न पश्यामीत्यर्थः ॥ २४ ॥ मुनीत्युक्तमुपसंहरन् ध्रुवस्य चेष्टामाह मुनिः। एवमिति। एवं संजल्पितं विलापपूर्वमुक्तमपि सम्यक् कथितम् अर्थस्य स्वाभिवाञ्छितार्थस्य आगमः प्राप्तिर्यस्मात्तथाभूतं मातुः वचः आकर्ण्य श्रुत्वा आत्मना स्वेनैव आत्मानं मनः संनियम्य समाधाय पितुरुत्तानपादस्य पुरात् निश्चक्राम निर्गतः ॥ २५ ॥ नारद इति। नारदः त्रैकालिकज्ञानवान् ब्रह्मपुत्रो नारदर्षिः तत् ध्रुवस्य पुरान्निष्क्रमणम् उपाकर्ण्य आश्रुत्य अस्य ध्रुवस्य चिकीर्षितं ज्ञात्वा च आगत्येति शेषः। अघघ्नेन दुरितहारिणा पाणिना मूर्द्धनि शिरसि स्पृष्ट्वा संस्पृश्य विस्मितः सन् प्राह ॥२६॥ विस्मित इत्युक्तं तदेवाह। अहो इति। मानभङ्गमभिमानविहतिम् असूयतामसहमानानां क्षत्रियाणां तेजः प्रभावः अहो विस्मयनीयम्। यद्यस्मात् अयं ध्रुवः बालः पञ्चवर्षवयाः सन्नपि समातुर्मातुः सपत्न्याः असद्वचः दुर्वाक्यं हृदा हृदयेन धत्ते मनसि सम्यक् स्थापयतीत्यर्थः ॥ २७ ॥

एवं विचार्य नारदो यदाह तदाह। नाधुनेति। हे पुत्रक कुमारस्य अत एव क्रीडनादिषु सक्तस्य प्रसक्तस्य अपि ते तव अधुना बाल्यदशायाम् अवमानं सन्मानं चापि न लक्षयामि न पश्यामीत्यर्थः। बालो हि मानावमानावनादृत्य परं क्रीडासक्तः स्यादतस्त्वापि मानावमानौ नार्हाविति भावः ॥ २८ ॥ यदि ब्रूया अहं वयसा बालो न बुद्ध्येति तत्राह। विकल्प इति। विकल्पे मानावमानविवेके विद्यमाने सत्यपि पुंसां मोहम् ऋते मोहं विनेत्यर्थः। भिन्ना व्यतिरिक्ताः असंतोषहेतवः नहि न सन्त्येव किं तु। मोहकल्पितात्ततो मोह एवासंतोषहेतुरित्यर्थः। लोके यत्सुखं दुःखं वा तत् निजकर्मभिः एव भवति ॥ २९ ॥ उपशमोपदेशेन निवर्त्तयति। परितुष्येदिति। हे तात ततः देहात्मभ्रमस्यैवासंतोषहेतुत्वात् बुधः देहविलक्षणात्मज्ञानवान् पूरुषः ईश्वरगतिं वीक्ष्य ईश्वरानुकूलतां विना नोद्यमाः फलहेतव इति ज्ञात्वा यावत् दैवोपसादितं दैवेन संप्रापितं सुखं तावन्मात्रेण परितुष्येत् नाधिकं लिप्सेत्। अतोऽधिकसुखार्थं नोद्यमः कार्य इति भावः ॥ ३० ॥ दुष्करश्च तवायमुद्यम इत्याह। अथेति द्वाभ्याम्। अथ ननु मात्रा जनन्या उपदिष्टेन संप्रोक्तेन योगेन भक्तियोगेन यत्प्रसादं यस्य भगवतः प्रसन्नताम् अवरुरुत्ससि अवरोद्धुं संप्राप्तुं वाञ्छसि स भगवान् वै निश्चितमेव पुंसां दुराराध्यः दुःखेनाप्याराधयितुमशक्यः इति मम मया मतः ज्ञातः ॥ ३१ ॥ मुनय इति। निःसङ्गेन देहतदनुबन्धिसङ्गान्निर्गतेन। तीव्रयोगो विघ्नानुपहतो ज्ञानयोगः कर्मयोगश्च तद्युक्तो यः समाधिस्तेन यस्य भगवतः पदवीं मार्गं मृगयन्तोऽन्वेषणं कुर्वन्तः सन्तोऽपि मुनयः उरुजन्मभिर्बहुजन्मादिभिरपि न विदुर्नैवाविदन्। स मम दुराराध्यो मत इति पूर्वेण संबन्धः ॥ ३२ ॥ अत इति। अतः देवस्यापि दुराराध्यत्वाद्धेतोः भवान् निवर्त्ततां भवान् गृहान् प्रति यातु। तव एषः निर्बन्धः उद्यमरूप आग्रहः निष्फलः। अयतमानस्य मम कथं श्रेयः प्राप्तिरित्याशङ्कमानं प्रत्याह। यतिष्यतीति। श्रेयसां काले समुपस्थिते दैवात्प्राप्तवति सति भवान् यतिष्यति यत्नं करिष्यति। अधुना तूद्यमो निष्फल इति भावः ॥ ३३ ॥

यस्येति। किं च। यस्य पुंसः यत् सुखं दुःखं वा दैवविहितं भवेत्, सः पुमान् सुखदुःखयोः दैवविहितसुखदुःखयोर्मध्ये तेन दैवविहितेन सुखेन दुःखेन वा आत्मानं तोषयन्, सुखे सति पुण्यं क्षीयते दुःखे सति पापं क्षीयतेऽतः पुण्यापुण्यक्षयेण संसृतेर्मोक्ष्यामीत्यात्मानं तोषयन्नित्यर्थः। देही देहवान् तमसः पारं प्रकृतिमण्डलातीतं विष्णोः पदम् ऋच्छति याति ॥ ३४ ॥ गुणाधिकादिति। अपि च यः गुणैः अधिकः स्वापेक्षयाऽधिकगुणस्तस्मात् ल्यब्लोपे पञ्चमी। गुणाधिकं दृष्ट्वा इत्यर्थः। मुदं लिप्सेत् लब्धुमिच्छेत् प्रीतिं कुर्यादित्यर्थः। न त्वसूयामिति भावः। गुणाधमात् गुणाधमं वीक्ष्य अनुक्रोशं कृपां लिप्सेत्। न तु तिरस्कारं, समानात् समानगुणं वीक्ष्य मैत्रीम् अन्विच्छेत्, न तु स्पर्धाम्, सः तापैराध्यात्मिकादिसंतापैः न अभिभूयते तापत्रयाभिभूतो न भवतीत्यर्थः ॥ ३५ ॥ नारदेनैवं बोधितोऽपि ध्रुवस्तं मार्गं प्रशस्य स्वहार्दं विज्ञापयति। सोऽयमिति चतुर्भिः। भगवता त्वया सुखदुःखाभ्यां हतः पराभूत आत्मा येषां पुंसां मादृग्जनानां सोऽयं शमः मनःप्रशान्त्युपाय इत्यर्थः। कृपया दर्शितः ज्ञापितः च। परं तु योऽयं शमो दर्शितः, स तु अस्मद्विधैर्मादृशैर्जनैः दुर्दर्शः द्रष्टुमशक्यः ज्ञातुमशक्य इत्यर्थः ॥ ३६ ॥ अथापीति। अथापि कृपया त्वयोपदिष्टशमस्यापि घोरं क्षात्रम् उपेयुषः प्राप्तवतः, अत एव अविनीतस्य मे मम, सुरुच्याः दुर्वचांस्येव बाणास्तैर्भिन्नं विदीर्णं तस्मिन् हृदि न श्रयते शम इति। सच्छिद्रे घटे जलमिव वाग्बाणभिन्ने मद्धृदि शमो न तिष्ठतीत्यर्थः ॥ ३७ ॥ अतो मन्मनीषानुसारेणैव मामनुगृह्य मनीषितोपायप्रकारं ब्रूहीत्याह। पदमिति। हे ब्रह्मन् अस्मत्पितृभिः, तेभ्यः अन्यैः अपि, अनधिष्ठितं त्रिभुवनोत्कृष्टं पदं स्थानं जिगीषोर्जेतुमिच्छोः मे मम साधु समीचीनं वर्त्म मार्गं ब्रूहि ॥ ३८ ॥ स्वोपदेशोल्लङ्घनान्मां निगृह्यादित्याशङ्क्य तं प्रसादयति। नूनमिति। यः भवान् भगवतो जगत्सं-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाद्यैश्वर्यवतः परमेष्ठिनो ब्रह्मणः जगद्धितकारिणो विधातुरित्यर्थः। अङ्गजो देहजः पाठान्तरे अङ्कजः विधातुरुत्सङ्गाज्जात इत्यर्थः। वीणां बृहतीं विरुदन् ध्वनयन् वादयन्निति यावत्। जगतः हिताय अर्कवत्सूर्यो यथा तथेत्यर्थः। अटते चरति नूनम् अतो मन्मनीषितापादनमेव जगद्धितकारिणस्तवोचितमिति भावः॥ ३९॥

एवं दृढसंकल्पस्य ध्रुवस्य वच आश्रुत्य तमनुगृह्णन्नाह नारद इत्याह मैत्रेयः। इतीति। इत्युक्तप्रकारेण उदीरितं ध्रुवेण कथितं वाक्यमित्यर्थः। आकर्ण्य श्रुत्वा भगवान् नारदः, प्रीतस्तदीयसुदृढसंकल्पदर्शनेन नितरां प्रसन्नतां प्राप्तः सन्, तदा तं बालं प्रति अनुकम्पया कृपया सद्वाक्यम् आह। तं प्रति हितवचनं कथयामासेत्यर्थः ॥ ४०॥ उक्तमेवाह। जनन्या इत्यादिना विरक्तश्चेन्द्रियरतावित्यन्तेन। तत्र तावद्भगवानेव भक्त्या प्रसन्नो धर्मादिपुरुषार्थचतुष्टयप्रदस्ततस्तद्भक्तिरेव कार्येति वदन्नुपासनोपयुक्तं देशमाचारं, भगवतो ध्यानप्रकारं जप्यं मन्त्रं, भगवत्पूजाप्रकारमाहारनियमं च कथयन्नेवमाराधितो भगवांस्तवस्समीहितमभिनिवर्त्तयिष्यतीत्याह। जनन्या सुनीत्या अभिहित उक्तः पन्था यः उपाय इत्यर्थः। स वै स एव ते तव निश्चितं श्रेयः निःश्रेयसं तस्मै निःश्रेयसस्येति पाठे निःश्रेयसस्याभिप्रेतार्थस्य पन्था इत्यन्वयः। जनन्यभिहितोपाय एव त्वदभिप्रेतार्थसाधनमित्यर्थः। कोऽसौ जनन्यभिहितः पन्थास्तत्राह। भगवान् वासुदेवः एव सर्वोत्तमोऽयमेव त्वद-भिप्रेतार्थसंपादनोपायरूपोऽस्तीति भावः। अतः तत्प्रवणात्मना भगवत्प्रवणचित्तेन तं भगवन्तं भज ॥ ४१॥ वासुदेव एव इत्येतदेव प्रपञ्चयति। धर्मेति। यः पुमान् धर्मश्च, कामश्च, मोक्षश्च ते आख्या यस्य तत्, श्रेयः आत्मनः स्वस्य इच्छेत्। तत्र हरेः एकं पादसेवनम् एव कारणमुपायः॥ ४२॥ तदिति। तत्तस्मात् भगवत्पादसेवनस्यैव धर्मादिसाधनत्वादित्यर्थः। हे तात शुचि शुद्धं पुण्यं पुण्यावहं यत्र नित्यदा हरेर्भगवतः सांनिध्यम् अस्ति, तथाभूतं मधुवनं मधुवनाख्यं यमुनायाः तटं तीरं गच्छ ते तव भद्रं मङ्गलम् अस्तु॥ ४३॥ स्नात्वेति। कालिन्द्या यमुनायाः शिवे मङ्गले सलिले जले अनुसवनं त्रिकालं स्नात्वा तस्मिन् वने आत्मनः स्वस्य उचितानि योग्यानि देवतानमस्कारादीनि कृत्वा, अनेन यमनियमा उक्ताः। कल्पितं कुशादिभिः स्वस्तिकादिभिश्च संपादितमासनं येन सः, निवसन् तत्र ऋजुकायतया उपाविशन् अनेन आसनमुक्तम्॥ ४४॥

प्राणायामेनेति। त्रयाणां रेचकपूरककुम्भकानां वृद्वत्तनं यस्मिंस्तेन, प्राणायामेन, प्राणाश्च, इन्द्रियाणि च, मनश्च तेषां मलस्तं तत्र प्राणानामवश्यत्वं मलः, इन्द्रियाणां विषयाभिमुखत्वं मलः, मनसोऽनवस्थितित्वं मलः, एवंविधां त्रयाणां मलापरसंज्ञां चञ्चलतामित्यर्थः। शनैः व्युदस्य अपोह्य, अनेन प्राणायामप्रत्याहारावुक्तौ। गुरुणा श्रेष्ठेन धीरेण वा। वस्तुतस्तु प्राणायामनिर्मलेनेत्यर्थः। मनसा गुरुं श्रीहरिम् अभिध्यायेत्। अनेन ध्यानमुक्तं, ध्यानस्य धारणापूर्वकत्वाद्धार-णाप्यनेनैवोक्ता ज्ञेया इति द्वयोः संबन्धः॥ ४५॥ ध्येयं विशिनष्टि। प्रसादेति सप्तभिः। शश्वत्सदा प्रसादे अनुग्रहे अभिमुखस्तं प्रसन्ने वदनं च ईक्षणं च ते यस्य तं, सुशोभना नासा नासिका यस्य तं, सुशोभने भ्रुवौ यस्य तं, चारू सुन्दरौ कपोलौ यस्य तं, सुरेषु सुन्दरस्तम्॥ ४६॥ तरुणमिति। तरुणं षोडशवर्षात्मकतरुणवयस्स्ववस्थितं, रमणीयान्यङ्गानि यस्य तम् अधरोष्ठश्च ईक्षणे नयने च तान्यरुणानि नवकमलदलाताम्राणि यस्य तं, यदा अरुणोष्ठेक्षणाधरमिति पाठान्तरं, तदा अरुणान्योष्ठेक्षणानि आधारयतीति तं, प्रणतैर्भक्तैराश्रयण आश्रणीयस्तं, नृम्णं सुखरूपं सुखकरं वा। यद्वा नृम्णं धनं सर्वपुरुषार्थनिधिमित्यर्थः। शरण्यं शरणसाधुं शरणागतप्रतिपालकमिति यावत्। करुणार्णवं दयासागरं, च, दयानिधिमितिपाठे दयानिधानमित्यर्थः॥४७॥ श्रीवत्साङ्कमिति। श्रीवत्समङ्कश्चिह्नं यस्य तं, घनवत् श्यामं नीलाम्बुदमेचकवर्णं, पुरुषं पुरुषलक्षणयुक्तं वनमाला अस्यातीति तं, शङ्खश्च, चक्रं च, गदा च, पद्मं च, तैः अभ्यभिव्यक्ताश्चत्वारः भुजाः यस्य तम्॥ ४८॥ किरीटिनमिति। किरीटमस्या-स्तीति तं, कुण्डलेऽस्य स्त इति तं, केयूरवलयान्वितं केयूराभ्यां वलयाभ्यां च युक्तं, कौस्तुभाख्यमाभरणं ग्रीवायां यस्य तं, पीते कौशेये वाससी वस्त्रे यस्य तम्॥ ४९॥

काञ्चीति। काञ्चीकलापेन काञ्च्याख्यभूषणेन पर्यस्तो वेष्टितस्तं, लसती काञ्चने नूपुरे यस्य तं, दर्शनीयतमम् अतिशयेन द्रष्टुं योग्यं, शान्तं शान्ताकारम् अनुग्रममित्यर्थः। मनश्च नयने च तेषां वर्द्धनो हर्षकरस्तं ध्यातॄणामिति शेषः॥५०॥ पद्मचामिति। नखा एव मणयस्तेषां श्रेणी पङ्क्ती ताभ्यां विलसन्तौ ताभ्यां, पद्भ्यां समर्चतां पूजनं कुर्वाणानां, हृत्पद्मं हृदयकमलं तस्य कर्णिका मध्यं तदेव धिष्ण्यं स्थानं, तत् आक्रम्य आत्मनि समर्चकजनमनसि अवस्थितम्॥ ५१॥ स्मयमानमिति। स्मयमानमीषद्धसन्तं, सानुरागमनुरागयुक्तमवलोकनं यस्य तं, पुरुषोत्तमं नियतेन विजातीयप्रत्ययरहितेन धारणातिशयसुस्थिरेण वा। एकभूतेन मनसा अभिध्यायेत् अभितः पादादिशिरःप्रभृति ध्यायेदित्यर्थः॥ ५२॥ एवं ध्येयं भगवदाकारमभिधायेदृशशुभाश्रयसुखितं मनस्ततस्तूर्णं न निवर्त्तयेदित्याह। एवमिति। एवं परया निर्वृत्या संपन्नं ध्यायतः मनः, तूर्णं यथा न निवर्त्तते तथा भगवतः सुभद्रं रूपं ध्यायेदिति शेषः। अनेन समाधिरुक्तः॥ ५३॥ एवमष्टाङ्गयोगयुक्तं भक्तियोग-मभिधाय तदनुग्राहिकां द्रव्यमयीं सपर्यामभिधास्यंस्तदुपयुक्तं जप्यमन्त्रप्रभावमाह। जप्य इति। हे नृपात्मज परमः निरतिशयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वोत्तम इत्यर्थः। अत एव गुह्यो गोपनीयश्च जप्यः मन्त्रः मे मत्तः श्रूयतां, यं मन्त्रं पुमान् सप्तरात्रं प्रपठन् जपन् खेचरान् पश्यति ॥ ५४ ॥ कोऽसौ मन्त्र इत्यत आह। ओमिति। अयं वासुदेवद्वादशाक्षरमन्त्रः एतन्मन्त्रपठनपूर्वं कार्यां द्रव्यमयीमर्चामाह। मन्त्रेणेति। बुधः पूजाप्रकारविदर्चकः देवस्य भगवतः अनेन मन्त्रेण विविधैर्नानाविधैः द्रव्यैः द्रव्यमयीं द्रव्यप्रचुरां सपर्यां पूजां देशकालविभागवित् सन् कुर्यात्। सपर्योपयुक्तो देशश्चण्डालपतितयवनाद्यसेवितः तथाभूतः। कालस्तु प्रातर्मध्यन्दिनसायाह्नादिरूपः। तदितरौ देशकालौ पूजाकर्मानुपयुक्तौ ॥ ५५ ॥ द्रव्याण्याह। सलिलैरिति। शुचिभिः शुद्धैः सलिलैर्माल्यैः पुष्पैः, वन्यैर्वने भवैः मूलफलादिभिः। अङ्कुराश्च, अंशुकानि च, शस्तानि यानि अङ्कुरांशुकानि तैः प्रशस्तैर्दूर्वाद्यङ्कुरैः प्रशस्तैर्भूर्जत्वगादिभिरंशुकैरित्यर्थः। प्रियया भगवतः प्रीतिविषयया तुलस्या च प्रभुं श्रीहरिम् अर्चेदाराधयेत् ॥ ५६ ॥

यत्र पूजा विधेया तत्स्थानात्मकमधिष्ठानमाह। लब्ध्वेति। एवं द्रव्यमयीम् अर्चां लब्ध्वा सलिलादिद्रव्यात्मिकां पूजासामग्रीं संपाद्येत्यर्थः। क्षित्यम्ब्वादिषु चक्राब्जमण्डलादिभिरलंकृतायां क्षितौ अम्बुनि गङ्गाजले आदिशब्दाद्विप्रसाध्वादित्यमण्डलादिषु चेत्यर्थः। अर्चयेत् हरिमिति शेषः। चकारोऽवधारणे। यद्वा द्रव्यमयीमर्चां शिलादिप्रतिमाम् 'अर्चा तु प्रतिमा प्रोक्ता' इत्यभिधानात्। लब्ध्वा तस्यांक्षित्यम्ब्वादिषु च अर्चयेत्। पूजासाद्गुण्यहेतूनाह सार्द्धद्वाभ्याम्। आदृतात्मा आदृतचित्तः पाठान्तरे धृतचित्तः, मुनिर्मननशीलः ध्यानानुपयुक्तदशायां शुभाश्रयसंशीलनपर इत्यर्थः। शान्तः जितेन्द्रियः, यतवाक् मितभाषणः मितं यथा भवति तथा वन्यं वनभवं कन्दमूलादि भुङ्क्ते इति तथाविधः सन्नर्चयेदिति संबन्धः ॥ ५७ ॥ स्वेच्छेति। स्वेच्छया निजेच्छया स्वभक्तजनेच्छया वा उपात्ता गृहीता ये अवतारा वराहादयस्तेषां चरितानि व्यापारास्तैः, निजमायया आत्मीयसंकल्पेन च। उत्तमश्लोको भगवान्, अचिन्त्यं यत् कर्म देवमनुष्यसजातीयत्वेन चिन्तयितुमशक्यं साधुपरित्राणदुष्कृतिविनाशनादिकं कर्मेत्यर्थः। करोति हृदयंगमं मनोहरं तत्कर्म ध्यायेत् 'करिष्यत्युत्तमश्लोक, इति पाठे तदानीमवतारप्राचुर्याभावात् करिष्यतीति भविष्यन्निर्देशः ॥ ५८ ॥ परिचर्येति। यावत्यः भगवतः परिचर्याः सेवाः, पूर्वसेविताः पूर्वाचार्यैः सेवनं कारिताः कार्यत्वेन विवक्षिता इत्यर्थः। ताः सर्वाः मन्त्रहृदयेन द्वादशाक्षरमन्त्रानुसंधानयुक्तमनसैव, मन्त्रो मूर्त्तिर्विग्रहो यस्य तस्मै भगवते प्रयुञ्ज्यात्। भगवन्तं प्रीणयितुं प्रकल्पयेदित्यर्थः। यथा बाह्योपचारैर्मन्त्रेण मूर्त्तौ भगवानर्च्यते, एवं मानसपूजनेऽपि मनःकल्पितैरान्तरोपचारैर्मन्त्रोच्चारपूर्वं पूजां कल्पयेदिति भावः ॥ ५९ ॥ एवमाराधितो भगवानाराधकानां समीहितधर्मादिश्रेयो दिशतीत्याह। एवमिति द्वाभ्याम्। अमायिनां वञ्चकतावर्जितानाम् अत एव सम्यक् भजतां देहिनां कर्मायत्तदेहभृतां पुंसां भाववर्द्धनः प्रेमवर्द्धनः भगवान् एवमुक्तप्रकारेण कायेन देहेन, मनसा मानसेन, वचसा वचनेन च, भक्तिमती प्रेमसहिता या परिचर्या सेवा तया परिचर्यमाणः सन् मनोगतं मनस्यवस्थितं धर्मादिषु पुरुषार्थचतुष्टये यत् श्रेयः अभिमतमाप्तुमिष्टं तत् दिशति ददाति इत्युभयोरेकान्वयः ॥ ६०-६१ ॥

एवं धर्मादिसाधारण्येन तत्प्रीणनसाधनभूता भक्तिरभिहिता। तत्र मुक्तिसाधनभूतायां भक्त्यां विशेषं वदन्नुपसंहरति। विरक्त इति। इन्द्रियरतौ इन्द्रियसाध्यक्रीडायां विरक्तः चोऽवधारणे। निरन्तरभावेन व्यवधानवर्जितप्रेम्णा युक्तेन भूयसा आप्रयाणादनुवर्त्तमानेन, भक्तियोगेन गाढप्रेमात्मकानुध्यानरूपेण भक्तियोगेनेत्यर्थः। 'प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते' इति स्मृतेः। विमुक्तये तं भगवन्तम् अद्धा साक्षात् भजेत ॥ ६२ ॥ एवमुपदिष्टभगवद्ध्यानप्रकारो ध्रुवो मधुवनं गतवानिति तदन्तरा नारदोत्तानपादयोः संवादमाह। इतीत्यादिना। इत्युक्तरीत्या उक्तः नारदेनाभिहितः नृपार्भकः ध्रुवः तं नारदं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य च हरेर्भगवतः चरणचर्चितं चरणाभ्यां संचारितम् अत एव पुण्यं मधुवनं ययौ ॥ ६३ ॥ तपोवनमिति। तस्मिन् ध्रुवे तपोवनं गते याते सति मुनिर्नारदः अन्तःपुरं नृपतेरुत्तानपादस्यान्तःपुरमित्यर्थः। प्रविष्टः राज्ञोत्तानपादेन, अभ्यर्हितं सत्कृत्य समर्पितमर्हणमर्घ्यादिकं यस्मै सः सुखासीनः सुखावहे आसने यथासुखमासीनः सन् ह स्फुटं यथा तथा उवाच ॥ ६४ ॥ राजन्निति। हे राजन् परिशुष्यता मुखेन दीर्घं किं ध्यायसे। अर्थेन संयुतः सहितः धर्मः कामश्च, न रिष्यते न हिंस्यते किं वा, इति सवितर्कः प्रश्नः ॥ ६५ ॥ एवं नारदेनोक्तो राजाह। सुत इति। हे ब्रह्मन् स्त्रैणेन स्त्रप्रयोगेन स्त्रीवशीकृतेनेति यावत्। अत एव अकरुण आत्मा यस्य तेन करुणारहितचित्तेनेत्यर्थः। मे मया मे ममेति वा। सुतः पुत्रः, सुत इत्यनेनापरित्यागतोक्ता। पञ्चवर्षः पञ्चहायनः बालक एव मात्रा सह निर्वासितः। तस्या अपि अनादृतत्वान्निर्वासितप्रायत्वात्तत्सहोक्तिः। तथा च भार्यापुत्रयोरपरित्याज्यतोक्ता स्मृतौ 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्' इति। ननु 'त्यजेदेकं कुलस्यार्थे' इत्युक्तरीत्या उत्पथश्चेत्सुतोऽपि त्याज्य एव तत्राह। अयं तु महान् विनयादिगुणसंपन्नः, कविर्बुद्धिमांश्च, एवंभूतोऽपि निर्वासित इति संबन्धः ॥ ६६ ॥ अपीति। हे ब्रह्मन् वने क्षुधितं श्रान्तम् अत एव परितः म्लानं मुखाम्बुजं यस्य तम् अत एव शयानम् अर्भकम् अनाथं रक्षकहीनं वृकाः मा स्माऽदन्नपि, मा खादन्ति किं स्विदित्यर्थः ॥ ६७ ॥

आत्मानं निन्दति। अहो इति। अहो महदिदमाश्चर्यं स्त्रीजितस्य स्त्रीपरतन्त्रस्य मे मम दौरात्म्यम् उपधारय निश्चिनु। बतेति खेदे। योऽहं असत्तमः सन् अङ्कमुत्सङ्गं प्रेम्णा स्नेहेन आरुरुक्षन्तम् आरोढुमिच्छन्तं सुतं नाभ्यनन्दं नाभिनन्दितवानस्मि ॥६८॥ एवमुक्तो नारदस्तमाश्वासयन्नाह। मेति। हे दिशां पते दिक्पते दैवगुप्तं इत्येतद्धेतुगर्भम्। दैवेनेश्वरेण रक्षितत्वात्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वतनयं प्रति तत्प्रभावं तनयस्य महिमातिशयम् अविज्ञाय अज्ञात्वा मा मा शुचः मा शोचस्वेत्यर्थः। प्रभावं विवृणोति यद्यशः यस्य तव पुत्रस्य कीर्तिः जगत् प्रावृङ्क्ते। सर्वस्मिन् जगति व्याप्तं भविष्यति इत्यर्थः। अविज्ञायेत्यत्र क्त्वान्तस्य वीत्युपसर्गेण समासे क्त्वो ल्यबादेशे च पश्चान्नञ्समासः। 'अनञ्पूर्वे' इति न ल्यबृनिषेधः। मा मा शुच इत्यत्र वीप्सातात्पर्येण माङो द्विरुक्तस्य प्रयोगः॥ ६९॥ सुदुष्करमिति। हे राजन् प्रभुर्जितेन्द्रियो ध्रुवः लोकपालैरिन्द्रादिभिरपि सुदुष्करं कर्त्तुमशक्यं कर्म; तपसा भगवत्तोषणपूर्वकसर्वोत्कृष्टपदसंपादनरूपं कर्मेत्यर्थः। कृत्वा तव यशः विपुलयन् विस्तारयन्सन् अचिरत आशु एष्यत्यागमिष्यति। एतच्च नारदेनास्य पौर्वदैहिकवृत्तं स्वोपदिष्टमन्त्रस्य प्रभावातिशयं च विचार्योक्तं बोध्यम्। पञ्चवर्षवयस्कोऽपि ध्रुवस्यैवंविधतायां पूर्वजन्मसामर्थ्यं विष्णुपुराणोक्तभगवद्वाक्यतः प्रदर्शितम्। तद्यथा। 'यत्त्वया प्रार्थितं स्थानमेतत्प्राप्स्यति वै भवान्' त्वयाहं तोषितः पूर्वमन्यजन्मनि बालक। त्वमासीर्ब्राह्मणः पूर्वं मत्स्येवाग्रमतिः सदा। मातापित्रोश्च शुश्रूषुर्निजधर्मानुपालकः। कालेन गच्छतो मृत्युं राजपुत्रस्तवाभवत्। यौवनेऽखिलभोगाढ्यो दर्शनीयोज्ज्वलाकृतिः। तत्सङ्गात्तस्य तामृद्धिमवलोक्यातिदुर्लभाम्। भवेयं राजपुत्रोऽहमिति वाञ्छा त्वया कृता। ततो यथाभिलषिता प्राप्ता ते राजपुत्रता। उत्तानपादस्य गृहे जातोऽसि ध्रुव दुर्लभे' इति। एतट्टीका। राजपुत्रो राजकुमारः। तवाभवत् तवान्तिके आगतोऽभूदित्यर्थः। यौवन वर्तमानः इति॥ ७०॥ एवं नारदेनाभाषितो राजा पुत्रमेवानुचिन्तयन्नासीदित्याह मैत्रेयः। इतीति। इत्यमुना प्रकारेण देवर्षिणा नारदेन प्रोक्तं विमृश्य विचार्य जगतीपतिरुत्तानपादः राज्यलक्ष्मीम् अनादृत्य पुत्रं ध्रुवम् एव अन्वचिन्तयत्॥ ७१॥ ध्रुवो मधुवनं प्राप्य तत्र किमकरोदित्यत्राह। तत्रेत्यादिना। ध्रुवः तत्र मधुवने अभिषिक्तः स्नातः यमुनायामिति शेषः। विभावरीं यस्यां रात्रौ प्राप्तो मधुवनं तां रात्रिम् उपोष्य प्रयतो नियमतत्परः समाहितः एकाग्रचित्तः सन् दिष्टादेशेन नारदोपदिष्टमार्गेण पूरुषं परमपुरुषं पर्यचरत्परिपूजितवान्। विभावरीमित्यत्यन्तसंयोगे द्वितीया। उपवसतेरभुक्त्यर्थस्याधारस्तु वनं तत्र तत्रेति सप्तमी बोध्या॥ ७२॥

त्रिरात्रान्त इति। त्रिरात्रान्ते त्रिरात्रान्ते तिसृणां रात्रीणां समाहारस्त्रिरात्रं तस्यान्तस्तस्मिन्। त्रिरात्रमुपोष्य चतुर्थे चतुर्थे दिने इत्यर्थः। कपित्थानि च बदराणि च, अशनं यस्य सः कपित्थबदरशब्दाभ्यां वृक्षवाचकाभ्यां फलार्थप्रत्ययस्य लुकः सत्त्वात्तयोः फलानि बोध्यानि। एवंभूतः सन् आत्मनो देहस्य या वृत्तिः स्थितिस्तदनुसारेण देहधारणमात्रोपयुक्ताहारेणेत्यर्थः। हरिम् अर्चयन् मासं निन्ये अतिचक्रमे॥ ७३॥ द्वितीयमिति। अर्भको ध्रुवः तथा तद्वदेव षष्ठे षष्ठे दिने जीर्णैः तृणपर्णादिभिः कृतमन्नमशनं येन तथाभूतः भूत्वा हरिम् अर्चयन् सन् द्वितीयं मासं चापि निन्ये इत्यनुषङ्गः॥ ७४॥ तृतीयमिति। ध्रुवः नवमे नवमे अहनि अब्भक्षः अप एव भक्षयन् सन् तृतीयं मासं चापि आनयन् ईषदिव नयन् उत्तमश्लोकं भगवन्तं समाधिना उपाधावत् आराधितवानित्यर्थः॥ ७५॥ चतुर्थमिति। ध्रुवः चतुर्थं मासं प्राप्य अपि द्वादशे अहनि वायुभक्ष वायुमेव भक्षयन् जितः श्वासो येन सः जितप्राण इत्यर्थः। देवं भगवन्तं ध्यायन् अधारयत् धारणां कृतवान् वै प्रतिमासमाहारसंकोचं तपोऽतिरेकं च कुर्वन् धारणां द्रढयामासेत्यर्थः॥ ७६॥ पञ्चम इति। पञ्चमे मासि अनुप्राप्ते सति तु जितश्वासो जितप्राणः नृपात्मजो राजसुतः ब्रह्म भगवन्तं ध्यायन् एकेन पदा चरणेन स्थाणुः इव अचलो निश्चलः भूत्वा तस्थौ स्थितवान्॥ ७७॥ सर्वत इति। भूतानि भूतसूक्ष्माणि शब्दादीनि च, इन्द्रियाणि शब्दादिविषयप्रवणानि, श्रोत्रादीन्यक्षाणि च तान्याशेरते यस्मिंस्तथाभूतम् आशयमत्र निर्व्यापारता। अव्यापारितश्रोत्रादीन्द्रियवदित्यर्थः। मनः सर्वतः संकल्पविकल्पत इत्यर्थः। आकृष्य निवर्त्य हृदि हृदयपुण्डरीके भगवतः रूपं ध्यायन् अपरं भगवद्रूपतोऽन्यत् किंचन किंचिदपि न अद्राक्षीत् नापश्यत्॥ ७८॥

एतत्प्रपञ्चयिष्यंस्तावत्तत्प्रभावमाह। आधारमिति त्रिभिः। महदादीनां महदादिपृथिव्यन्तभूतानां तत्संसृष्टानां चेत्यर्थः। आधारं धारकं, अनेन स्थूलचिदचिच्छरीरकत्वमुक्तं, प्रधानं सूक्ष्ममचित्तत्त्वं च, पुरुषास्तत्संसृष्टाश्चेतनाश्च तेषामीश्वर 'अन्तः प्रविष्टः शास्ता' इति श्रुतेः। अनेन सूक्ष्मचिदचिच्छरीरकत्वमुक्तम्। एवंभूतं ब्रह्म बृहद्गुणविशिष्टं भगवन्तं धार्यमाणस्य सतः, तत्तेजः सोढुमशक्नुवन्त इति शेषः। त्रयो लोकाः चकम्पिरे अतिशयेन कम्पिता बभूवुरित्यर्थ॥ ७९॥ यदेति। पार्थिवार्भकः नृपतेः पुत्रः स ध्रुवः यदा एकपादेन तस्थौ, तत्र तदा तस्य ध्रुवस्य योऽङ्गुष्ठस्तेन निपीडिता नितरां संजातपीडा सती, मही भूमिः इभेन्द्रेण गजश्रेष्ठेन धिष्ठिता समाश्रिता तरी नौः इव, पदे पदे प्रतिपदं सव्येतरतः सव्यतोऽवामतश्च नमति, तद्वत् अर्द्धं ननाम प्रह्वीबभूव। अर्द्धशब्दस्यात्र समांशत्वाचित्वाभावेऽपि विधेयनमनक्रियाविशेषणत्वाभिप्रायेण क्लीबत्वनिर्देशः॥ ८०॥ अन्यदपि तदानींतनमाश्चर्यमाह। तस्मिन्निति। किं च तस्मिन् ध्रुवे आत्मनः स्वस्य विश्वं सर्वं द्वारं, अत्र द्वारशब्दः श्रोत्रादीन्द्रियपरः। सर्वाणीन्द्रियाणीत्यर्थः। असुं प्राणं च निरुद्ध्य, अनन्यया विषयान्तरप्रवृत्तिरहितया धिया अभिध्यायति सति भवन्तमिति शेषः। शेषग्रहणाभावे विश्वं विष्णुमभिध्यायति सतीत्यन्वेतव्यम्। विश्वशब्दो महाभारते भगवत्परः प्रसिद्ध एवास्ति 'विष्णोर्नाम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सहस्रम्' इत्युपक्रम्य 'विश्वं विष्णुः' इत्युक्तत्वात्। विश्वात्मकत्वाद्वा विश्वो विष्णुर्बोध्यः। सलोकपाला इन्द्रादिलोकपालसहिताः लोकाः भृशं नितरां निरुच्छ्वासाभावेन निपीडिताः सन्तः हरिं शरणं ययुः। अत्र ध्रुवेण स्वप्राणनिरोधे कृते विश्वस्य प्राणनिरोधो जातस्तेन लोकोपेता लोकपाला हरिं शरणं प्रापुरिति भावः ॥ ८१ ॥

शरणप्राप्तिं प्रपञ्चयति। नैवमिति। हे भगवन् एवमेवंविधं चराचरस्य प्राणरोधं प्राणनिरोधं न विदामः। कदाचिदपि न जानीमः। अत्राचरग्रहणं दृष्टान्तार्थं तेषामुच्छ्वासयोरभावात्। यथा अचरस्य उच्छ्वासादिर्नास्ति, तथा चरस्यापि प्राप्त इति। तत्तस्मात् अखिलसत्त्वधाम्नश्चिदचिच्छरीरकस्य तव, नः त्वत्संबन्धिनामस्माकं, वृजिनात् प्राणनिरोधरूपादुःखात् विमोक्षं विधेहि कुरु। वयं, शरण्यं शरणागतजनपरित्राणसाधुं त्वां शरणं प्राप्ताः ॥ ८२ ॥ एवंभूतं तद्वचः श्रुत्वा भगवानाह। मा भैष्टेति। हे देवाः मा भैष्ट भयं मा कुरुत। तपसा दुरत्ययमनुल्लङ्घ्यं बालं निवर्त्तयिष्ये हि। एतमेतत्समीहितेन संयोजयिष्याम्येवेत्यर्थः। उभयत्र पाठान्तरे दुरत्ययात्तपस एनं निवर्त्तयिष्यामीति योजना। अतः यूयं स्वधाम स्वस्थानं प्रति यात गच्छत। कथमेकेन विहितात्प्राणनिरोधाद्विश्वप्राणनिरोध इत्यत आह। यतः मदीयप्राणनिरोधाद्धेतोः वो युष्माकं प्राणनिरोधः आसीत्। स औत्तानपादिरुत्तानपादस्य पुत्रो बालो ध्रुवः, मयि विश्वप्राणप्राणनहेतुभूते मयि, संगतः आत्मान्तःकरणं यस्य स तथाभूतोऽभूत्। विश्वप्राणिप्राणनहेतुभूतस्य मम प्राणेन स्वप्राणैक्यं विधाय तन्निरोधविधानात्सर्वप्राणनिरोधोऽभूदिति भावः ॥ ८३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः

मैत्रेय उवाच

त एवमुत्सन्नभया उरुक्रमे कृतप्रणामाः प्रययुस्त्रिविष्टपम्।
सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः ॥ १ ॥

ध्रुवः स्तुत्वा हरिं लब्ध्वा वरांस्तस्मात्पुरं पुनः। समेत्य नवमे राज्यं पित्र्यं चक्रे तदीरितम् ॥ १ ॥

एवं भगवताभिहितेषु देवेषु स्वधाम प्रतियातेषु भगवान् स्वभक्तानुजिघृक्षया मधुवनं प्रति जगामेत्याह मैत्रेयः। त इति। एवमुक्तरीत्याभिहितभगवद्वाक्यश्रवणेन उत्सन्नभया निवृत्तभीतयः ते देवाः, उरुक्रमे विषये कृतः प्रणामो यैस्तथाभूताः सन्तः, त्रिविष्टपं सुरलोकं प्रययुर्जग्मुः। ततः सहस्रशीर्षा पृश्निगर्भो भगवान् अपि भृत्यदिदृक्षया स्वभृत्यदर्शनेच्छया गरुत्मता स्ववाहनभूतेन गरुडेन सह मधोर्वनं गतः जगामेत्यर्थः ॥ १ ॥ स वा इति। स ध्रुवः योगस्य ध्यानयोगस्य विपाकः दार्ढ्यम्, तेन तीव्रा तया धिया विजातीयप्रत्ययान्तराव्यवहितया मत्या, मृत्पद्मकोशे हृदयकमलकुड्मले स्फुरितं प्रथमं साक्षाद्भावं प्राप्तं, सहसा अकस्मादेव तिरोहितं, अत एव तडित्प्रभं तं पुनः तदवस्थं यादृशमन्तरे स्फुरितं तादृशं बहिः स्थितम् उपलक्ष्य प्रत्यभिज्ञाय ददर्श साक्षात्कृतवान् वै ॥ २ ॥

तदिति। तद्दर्शनेन तस्य भगवतः साक्षादकाण्डं संजातसमीक्षणेन आगतसाध्वसः संजातसंभ्रमः अर्भकः ध्रुवः, अङ्गं शरीरं क्षितौ भूमौ दण्डवत् विनमय्य नतं कृत्वा अवन्दत नमस्कृतवान्। ससाध्वसतामेवाह। दृग्भ्यां प्रपिबन्निव, आस्येन चुम्बन्निव भुजैरिति बहुवचनमार्षम् प्रपश्यन्सन् तस्थाविति शेषः ॥ ३ ॥ स तमिति। विवक्षन्तं तद्गुणान्वक्तुमिच्छन्तं बालम् अतद्विदं बालत्वात् स्तोतुमजानन्तं कृताञ्जलिं तं ध्रुवं, अस्य ध्रुवस्य सर्वस्य लोकस्य च हृदि हृदये अवस्थितः। हेतुगर्भ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मिदम्। हृद्यवस्थितत्वात् ज्ञात्वेत्यर्थः। स श्रीहरिः ब्रह्ममयेन ब्रह्म प्रणवो वेदो वा। तत्प्रचुरेण प्रणवात्मकेन वेदात्मकेनैवेत्यर्थः। कम्बुना शङ्खेन कपोले गण्डे कृपया पस्पर्श ममार्ज ॥ ४ ॥ स वा इति। सः ध्रुवः दैवीं देवसंबन्धिनीं देवेन भगवताविर्भावितामित्यर्थः। तां वेदार्थप्रचुरां गिरं वाचं तदैव कम्बुस्पर्शोत्तरकालमेव प्रतिपद्य सम्यग्लब्ध्वा, वै परिज्ञातः कार्त्स्न्येन विदितः परात्मजीवात्मनोः निर्णयो याथात्म्यं येन सः। अतः एव भक्त्यात्मको भावोऽभिप्रायो यस्य सः ध्रुवा स्थिरा शाश्वतीति यावत्। क्षितिः स्थानं यस्य, अथ भाविनिर्देशः। असत्वरः त्वरारहितः सन् परिश्रुतं सर्वतो विख्यातम् उरु निरवधिकं श्रवः कीर्त्तिर्यस्य तम्। भगवन्तं अभ्यगृणात् अस्तौषीत् ॥ ५ ॥ 'हर्यनुग्रहसंयातेन्द्रियपाटववान् ध्रुवः। श्लोकैर्द्वादशासूर्याभैरस्तौद्वागिन्द्रियसंजीवयितृत्वेन स्वस्मै निदर्शितं ज्ञानप्रदत्वं निश्चिन्वन्नमस्करोति। य इति। यो भगवान् प्रसुप्तां स्तोतुं प्रवृत्तामपि स्वकार्याक्षमां मे स्तोतुकामस्यापि मम इमां वाचं वाणीं वागिन्द्रियमित्यर्थः। अन्तः प्रविश्य अन्तर्यामितया पूर्वमेवानुप्रविष्टत्वादत्रान्तः प्रवेशो नाम संकल्परूपज्ञानेनानुप्रवेश उच्यते। अखिलानां शक्तीनां धरो धर्त्ता। अत एव संजीवयति। अघटितघटनादिसर्वशक्तेस्तवेदमुपपन्नमिति भावः। तथा स्वधाम्नः स्वधामभूतान् निजशरीरभूतानिति यावत्। पाठान्तरे स्वधाम्ना स्वकीयसंकल्परूपेण ज्ञानेनान्तः प्रविश्येत्यन्वयः। हस्तचरणश्रवणत्वगादीन् हस्तचरणग्रहणं पायूपस्थयोरुपलक्षणम्। श्रवणत्वग्ग्रहणमवशिष्टज्ञानेन्द्रियाणामुपलक्षणम्। आदिशब्देनान्तःकरणचतुष्टयाधिष्ठातृदेवतासंग्रहः। अन्यान् प्राणांश्च संजीवयति। तस्मै भगवते पूर्णषाड्गुण्यमूर्त्तये पुरुषाय पुरुषान्तर्यामिणे पूर्वमचिदन्तर्यामित्वकथनादनेन पुरुषान्तर्यामित्वमुक्तम्। तुभ्यं नमः। कृत्स्नचिदचिदात्मत्वेन ज्ञानप्रदत्वं त्वय्येवोपपन्नमिति भावः ॥ ६ ॥

ननु 'तत्सृष्ट्वा तदेवानुप्राविशत्' अनेन जीवेनात्मनानुप्रविश्य 'नामरूपे व्याकरवाणि' इति जगत्स्रष्टुरेवानुप्रवेशश्रवणान्नाहं चिदचिदात्मेत्यत्र जगत्स्रष्टापि त्वमेवेत्याह। एक इति। हे भगवन् इदं संदृश्यमानं महदादिसमष्टिव्यष्ट्यात्मकम् अशेषं सकलमपि जगत् उरुगुणया विविधपरिणामक्षमसत्त्वादिगुणात्मिकया आत्मशक्त्या स्वसंबन्धिन्या कार्योपयोगिन्याऽपृथक्सिद्धविशेषणभूतया शक्त्यपरपर्यायया मायाख्यया प्रकृत्येत्यर्थः। सृष्ट्वा सदसद्गुणेषु कार्यकारणभूतेषु सत्त्वादिगुणमयपदार्थेषु पुरुषः पुरुषशब्दवाच्यजीवशरीरकः सन् अनुविश्य पश्चात्प्रवेशं कृत्वा त्वम् एकः एव सन् दारुषु ह्रस्वदीर्घऋजुवक्रादिभेदभिन्नेषु काष्ठेषु विभावसुवसुवदग्निवत् नाना इव बहुविध इव विभासि। अत्र विभावसुदृष्टान्तेन स्वशरीरभूतचिदचिद्गतगुणास्पर्शो विवक्षितः। एवशब्देन वस्तुत एकत्वं देवमनुष्यादिशरीरसंसृष्टजीवान्तरात्मत्वकृत बहुत्वमपि विवक्षितम् ॥ ७ ॥ इत्थं सकलजगदेककारणत्वेन कृत्स्नचिदन्तरात्मत्वेन निरस्तनिखिलदोषत्वेन स्ववागादीन्द्रियसंजीवयितृत्वे च तस्यैव ज्ञानप्रदत्वमुक्तं तदेव निदर्शयंस्तस्यैव निरतिशयपुरुषार्थसाधनत्वेन भजनीयतामाह। त्वद्दत्तयेति। हे नाथ त्वया दत्ता तया 'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ददामि बुद्धियोगं तं येन मामुपयान्ति ते' इति वदता त्वया एवास्मभ्यं विश्राणितेनेत्यर्थः। वयुनया ज्ञानेन स्वीत्वमार्षम्। भवत्प्रपन्नः शरणागतवत्सलं भवन्तमेव संप्राप्त इत्यर्थः। ब्रह्मा इति शेषः। पूर्वं सुप्त पश्चात्प्रबुद्ध इति सुप्तप्रबुद्धः इव इदं विश्वम् अचष्ट अपश्यत्। विश्वसर्जनोपयोगिज्ञानविधुरः स्वयं विधिरपि त्वत्प्रपत्त्या त्वद्दत्तज्ञानेन सर्वं बुद्ध्वा विश्वमसृजदित्यर्थः। नात्राचष्टेति भूतार्थविवक्षा सांप्रतमप्यस्य तथात्वात्। हे आर्त्तबन्धो तापत्रयातुराणां बन्धुवद्रक्षक इत्यर्थः। अपवर्गशरणं मुक्त्युपायभूतम्। पाठान्तरे स्वार्थे ष्यञ्। अपवर्गे भवमापवर्ग्यं सुखं तत्साधनभूतमिति वा तस्य तव पादमूलं कृतविदा सर्वेन्द्रियोपजीवनेन ज्ञानप्रदत्वाद्युपकारज्ञेन कथं विस्मर्यते। एवं महोपकारिणं त्वामभजन्तः कृतघ्ना एवेति भावः ॥८॥

किं च त्वां भजन्तोऽपि मादृशाः सकामत्वान्मन्दभाग्या एवेत्याह। नूनमिति। कल्पकतरुं कल्पतरुतुल्यं स्वाश्रितजनवाञ्छितार्थप्रदत्वेन कल्पतरुतुल्यतोक्ता, सांप्रतं ततोऽपि निरतिशयगुणवत्तामाह। भवो जन्म च, अप्ययो मरणं च तयोर्विमोक्षणं विमोचनं यस्मात्तं, भवाप्ययौ विमोक्षयतीति तं वा, ण्यन्तात्कर्त्तरि बाहुलकाल्ल्युट्। मुक्तिप्रदमित्यर्थः। एवंभूतं त्वां ये मादृशा जना इत्यर्थः। अन्यहेतोः त्रिवर्गकारणात्, अर्चन्ति भजन्ति, ते जनाः तव मायया विमुष्टमतयः अपहृतज्ञानाः नूनं, कुतस्ते विमुष्टमतय इत्यत्राह। यद्यस्मात्। स्पर्शजं विषयेन्द्रियसंबन्धजं, नरके निरयप्राये संसारे अपि, वर्त्तमानमिति शेषः। नृणां, कुणपेन शवतुल्यशरीरेण उपभोग्यमनुभवनीयम्, सुखमिति शेषः। इच्छन्ति। संसारे वर्त्तमानस्य स्वर्गादिसुखस्यापि निरयत्वमुक्तं मोक्षधर्मे 'एते वै निरयास्तात स्थानस्य परमात्मनः' इति। यद्वा यन्नृणां स्पर्शजं सुखं तत्तु नरकेऽपि भवति, तदर्थं त्वां येऽर्चन्ति, ते नूनं मायया विमुष्टमतय एव ॥ ९ ॥ ननु स्वर्गस्यापि सुखत्वप्रतिपत्तेः किं तदर्थं भजमानान् निन्दित्वा निष्कामान् प्रशंससीत्याशङ्कायां स्पर्शजन्यसुखस्याल्पास्थिरत्वान्निन्दयामीत्यभिप्रेत्य, निष्कामभक्तिसाध्यस्यापवर्गिकसुखस्य निरवधिकत्वान्न तेन स्पर्शजसुखस्य साम्यं, त्वच्चरणध्यानत्वद्भक्तजनकथाश्रवणजन्यसुखस्य तु, निरवधिकातिशयत्वात्कैवल्यसुखमपि न तत्समानमिति कैमुत्यनयेनाह। येति। हे नाथ, तनुभृतां देहिनां तव पादपद्मध्यानात्त्वच्चरणकमलचिन्तनात्, भवज्जना भागवतास्तेषां कथायाः श्रवणं तेन वा या निर्वृतिः सुखं स्यात्, सा निर्वृतिः स्वमहिमनि त्वत्कृपाप्तगुणाष्टकरूप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महिमवति, ब्रह्मणि गुणवियुक्तशुद्धात्मनि अपि, सर्वकालं शुद्धात्मस्वरूपेऽनुभूयमाने सत्यपीत्यर्थः। मा भूत्। नास्तीत्यर्थः। तर्हि अन्तकासिलुलितादन्तकाखड्गशस्त्रक्षतात्, विमानात् पततां स्वर्गिणां तु निर्वृतिः किम्। स्यादिति शेषः। न स्यादेवेत्यर्थः ॥ १० ॥ इत्थं सनातननिरवधिकातिशयानन्दसाधनभूतं भवन्तं क्षयिष्णुसातिशयसुखसाधनत्वेन भजन्तो मादृशा जना मन्दभाग्या एवेत्युक्त्वा, स्वस्य सत्संगतिश्रवणादिपरिपाट्याऽहैतुकीं भक्तिं प्रार्थयते। भक्तिमिति। हे अनन्त देशकालपरिच्छेदरहित, त्वयि निरस्तनिखिलदोषे सार्वज्ञनिरतिशयानन्दत्वाद्यपरिमितोदारगुणसागरे भवतीत्यर्थः। मुहुः पुनः पुनः निरन्तरमित्यर्थः। भक्तिं प्रवहतां सातत्येन कुर्वताम् अमलो निर्मल आशयोऽन्तःकरणं येषां महतां प्रसङ्गः, प्रकृष्टः सङ्गः मे मया भूयात् स्यात्। येन महत्सङ्गेन अञ्जसा अयत्नतः, भवतो या गुणकथा सैवामृतं तस्य पानं तेन मत्तः तृप्तः निरस्ततापत्रयोऽहमित्यर्थः। उरूणि व्यसनानि यस्मिस्तम् अतिशयितदुःखगर्भमित्यर्थः। अत एव उल्बणं दुःसहं, भवाब्धिं संसारसमुद्रं, नेष्ये तरिष्यामि। भवाम्बुधिपारं गमिष्यामीत्यर्थः ॥ ११ ॥ कथामृतपानस्य मादकत्वमाह। ते इति। हे ईश मर्त्यं मरणशीलमपि, अतितरां नितरां प्रियं शरीरमिति शेषः। अतितरां प्रियं मर्त्यं शरीरमिति वा। ये च अदः शरीरम् अनु अनुसृत्य वर्त्तमानाः, सुताश्च, सुहृदश्च, गृहं च, वित्तं च, दाराश्च तान् इति शेषः। ते जनाः। तु न स्मरन्ति न विचिन्तयन्ते इत्यर्थः। ये न स्मरन्ति, ते के इत्यत्राह। हे अब्जनाभ ये जनाः भवत इमे भवदीये ये पदारविन्दे, तयोर्यत्सौगन्ध्यं तेन तस्मिन्वा लुब्धं हृदयं येषां तेषु, कृतः प्रसङ्गो यैस्ते ॥ १२ ॥ अब्जनाभेत्यनेन सर्वातिशायि सौरभ्यवदप्राकृतातिसुन्दरातिशुभशरीरवैशिष्ट्यमुक्तं, 'महदाद्यशेषं सृष्ट्वानुविश्य पुरुष' इत्यनेन प्रकृतिपुरुषशरीरकत्वोक्त्या स्थूलसूक्ष्मशरीरद्वयमुक्तम्। अनन्तेत्यनेन सत्यज्ञानानन्तलक्षणं, दिव्यात्मस्वरूपमेतत्त्रितयमेव यथावद्विवेचयन् शरणं गच्छति तिर्यगित्यादिभिश्चतुर्भिः। तत्राद्येन स्थूलरूपं प्रपञ्चयति। तिर्यगिति। हे परम स्थूलसूक्ष्मरूपाभ्यां विलक्षणत्वात्समाभ्मधिकरहित, हे अज स्थूलरूपगतोत्पत्तिविनाशवर्जित्त, तिर्यञ्चः पशुमृगादयश्च, नगाः स्थावराणि च, द्विजा अण्डजाश्च, तिर्यक्त्वैषां संग्रहे सिद्धेऽपि गोबलिवर्दन्यायेन पृथग्ग्रहणम्। सरीसृपाः सर्पाश्च, आदिशब्देन स्वेदजोद्भिज्जसंग्रहः। देवाश्च, दैत्याश्च, मर्त्याश्च, तदादिभिः परिचितं परितो व्याप्तम्। सदसच्चिदचिदात्मकम्। विशेषः पृथिवी सोऽस्यास्तीति विशेषं विशेषपर्यन्तमीत्यर्थः। अर्शआदेराकृतिगणत्वादच्। महदादि महत्तत्त्वप्रभृतिकम् अनेकं विविधं विचित्रसंनिवेशमित्यर्थः। स्थविष्ठं स्थूलं ब्रह्माण्डात्मकमिति यावत्। ते तव रूपं वेद्मि त्वच्छरीरत्वेन जानामीत्यर्थः। अतः स्थूलरूपात्, परं विलक्षणं दिव्यमङ्गलविग्रहात्मकं सूक्ष्मं यद्रूपमित्यर्थः। तदपि न वेद्मि इति न, किं तु त्वत्प्रसादाद्वेद्म्येवेत्यर्थः। परं रूपं विशिनष्टि। यत्र यस्मिन्स्वरूपविषये, वादः प्राकृतत्वाप्राकृतत्ववादः, अवर्त्ततेति वादिप्रतिवादिनामिति च शेषः। यत्र वादः शब्दव्यापारो नास्ति तद्ब्रह्मस्वरूपं वेद्मीति व्याख्यानं त्वयुक्तम्। 'सर्वे वेदा यत्पदमामनन्ति' 'शास्त्रयोनित्वात्'। 'वचसां वाच्यमुत्तमम्'। 'नताः स्म यत्र वचसां प्रतिष्ठा यत्र शाश्वती। वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिश्रुतिसूत्रस्मृतिभिः शास्त्रैकवेद्यत्वाभिधानात् ॥ १२ ॥

कल्पान्त इति। किं च यः पुमान् अखिलम् एतच्चिदचिदात्मकं जगत्, कल्पान्ते प्रलये, जठरेण गृह्णन्कुक्षौ निवेशयन्नित्यर्थः। स्वदृक् स्वानुभवैकशील इत्यर्थः। अनन्तसखः शेषसहायः सन्, तदङ्के अनन्तभोगशय्यायामित्यर्थः। शेते योगनिद्रारूढो भवतीत्यर्थः। यस्य पुंसो नाभिरेव सिन्धुस्तस्मिन् रुहमुद्भूतं काञ्चनं काञ्चनमयं यल्लोकं लोकात्मकं पद्मं तस्य गर्भो मध्यं तस्मिन् द्युमांस्तेजस्वी ब्रह्मा भवतीति शेषः। तस्मै भगवते प्रणतः अस्मि ॥ १४ ॥ ननूक्तरीत्या कर्मायत्तजीववन्मयि स्थूलसूक्ष्मशरीरवत्त्वे तेभ्यः को विशेष इत्यत्राह। त्वमिति। त्वं स्वधाम्नि नित्यमुक्तसंसेविताङ्घ्रिः सत्यस्वरूपो भवान्, स्थितौ स्थितिनिमित्तं, जगत्पालनार्थमित्यर्थः। अधिमखः आस्से, यज्ञाराध्ययज्ञफलप्रदवैराजरूपेण तिष्ठसे इत्यर्थः। व्यतिरिक्तः वस्तुतो विलक्षणश्चापि, आस्से। शुद्धस्वरूपो भवानेवाकर्मायत्तस्वेच्छोपात्ताकृतिर्दिव्यमङ्गलगुणाधारोऽतिसुन्दरदेहवैराजरूपेण स्थित्यर्थं तिष्ठसि, व्यतिरिक्तोऽपि तिष्ठसि, ततो न त्वं जीववत्कर्मायत्त इति भावः। ननु मम वैराजत्वे त्वनन्तविचित्रस्थिरचरात्मकस्य जगतो धारणं पोषणं यत्प्राप्तं तच्च कथमेकाकिना मया युगपत्कर्त्तुं शक्यमित्यत्राह। यद्बुद्ध्यवस्थितं यस्य तव बुद्ध्यात्मकसंकल्परूपज्ञानावस्थितं कृत्स्नं जगदित्यर्थः। अखण्डितया असंकुचितया, स्वदृष्ट्या स्वसंकल्परूपज्ञानेन, द्रष्टा साक्षात्कर्त्तासि। द्रष्टेति तृन्प्रत्ययान्तं तद्योगे निषेधान्न षष्ठी। सकलास्ववस्थासु अनिष्टनिरसनेष्टप्रापणात्मकपरिपालनोपयोग्यसंकुचितस्वसंकल्परूपज्ञानात्मना जगदाश्रयो भवसीत्यर्थः। त्वं नित्यमुक्तः व्याप्यवस्तुगतदोषास्पृष्टः। जीवस्तु देवादिशरीरेषु व्याप्तः परमार्थतस्तद्गतदोषैरस्पृष्टोऽपि, अहंममाभिमानाभ्यां युक्तः सन्, क्लिश्यतीत्यनित्यमुक्तः। त्वं तु नित्यमुक्त इति भावः। परिबुद्धः त्वं त्वसंकुचितज्ञान इत्यर्थः। जीवस्तु कर्मायत्तसंकोचविकाशभाक् ज्ञानाश्रयत्वान्न परिबुद्ध इति भावः। परिशुद्ध पाठे त्वं परिशुद्धः जीवस्तु मलिन इत्यर्थः। विशुद्धः त्वम् अकर्मवश्यः, जीवः कर्मवश्यः। विबुद्ध इति पाठे, त्वं विबुद्धः ज्ञः, जीवोऽज्ञः। नित्यमुक्तादीनां कर्मधारयः। कूटस्थः त्वं, स्वरूपस्वभावतो निर्विकारः, जीवस्तु स्वरूपतो विकारी,। ननु नित्यमुक्तत्वपरिबुद्धत्वविशुद्धत्वानि नित्यसिद्धेषु नित्यमुक्तेष्वप्यतिव्याप्तानि तत्राह। आत्मा, तेष्वन्तः प्रविश्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धारकः, न ते तथाभूताः । कुतः । आदिपुरुषः त्वं जगत्कारणभूतः पुरुषः, न ते तथाभूता इत्यर्थः । जगत्कारणत्वं च न मुक्तेषूपपन्नं जगद्व्यापारवर्जं प्रकारणादसंनिहितत्वाच्च भोगमात्रसाम्यलिङ्गाच्चेति मुक्तेषु जगद्व्यापाराभावस्य सूत्रितत्वात् । भगवान् समग्रषाड्गुण्यपरिपूर्ण इत्यर्थः । त्र्यधीशः सर्वेषां त्रिकाणामधिपतिः असि ॥ १५ ॥

एवं परब्रह्मस्वरूपेण ज्ञानं तं नमस्करोति । यस्मिन्निति । विरुद्धाः गतयः स्वभावा यासां ताः, विद्यादयः ज्ञानादयः, विविधाश्च ताः शक्तयश्च विविधशक्तयः । शक्तयो ह्यत्र कार्योपयोग्यपृथक्सिद्धविशेषणरूपाः । यस्मिन् परब्रह्मणि त्वयि, अनिशं सदा पतन्ति अकस्मादविरोधेनोद्भवन्ति, आनुपूर्व्यादनुक्रमेणाप्युद्भवन्ति हि । ब्रह्माक्षरब्रह्मशरीरकम् । तत्परमात्मस्वरूपम् अहं प्रपद्ये शरणं व्रजामि । एतदेव विशिनष्टि । विश्वभवं विश्वोत्पत्तिकारणम् । एकं निमित्तोपादानकारणभूतम् । अविकारं विकारवर्जितत्वात्सत्यस्वरूपम् । आनन्दमात्रं ज्ञानस्वरूपम् । अनन्तमन्तवर्जितम् । आद्यं स्वयमनादीत्यर्थः । एवंभूतं तदहं प्रपद्ये इति संबन्धः । तत्र विश्वभवमित्यनेन 'यतो वा इमानि भूतानि इति वाक्यं स्मारितम् । अविकारमानन्दमात्रमनन्तमिति पदत्रयेण 'सत्यं ज्ञानमनन्तं ब्रह्म' इति वाक्यं स्मारितम् । तत्राविकारमित्यनेन सत्यपदमानन्दमात्रमित्यनेन दुःखासंभिन्नज्ञानपदम् , अनन्तमित्यनेन देशकालवस्तुपरिच्छेदराहित्यं विवक्षितम् । विविधशक्तय इत्यनेन 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, इत्यादि स्मारितम् ॥ १६ ॥ एवं ब्रह्मस्वरूपगुणान्विशोध्य, तं प्रपद्ये इत्यनेन भगवत्प्रपत्तेरेव मुक्तिकारणत्वमुक्त्वा, प्रपत्तिपूर्वकभगवद्भजनमपि निष्कामं सर्वोत्तममिति ब्रुवन्वात्सल्यनिधेस्तस्य भक्ताभिमतार्थादप्यतिशयितपुरुषार्थप्रदत्वमाह । सत्याशिष इति । हे भगवन् हे आर्य स्वामिन् , आशिषः सत्याः येनेति सत्याशीस्तस्य सत्याशिषः वाहिताग्न्यादिः । पुरुषार्था मूर्त्तौ यस्य तस्य, स्वत एव पुरुषार्थभूतस्वरूपस्य, तव पादपद्मं यथा आशीः तथा इच्छानुरूपमित्यर्थः । अनुभजतः भजमानान् अत एव दीनान् त्रिवर्गनिष्ठत्वाद्वराकान् , एवमपि एवंभूतानपि अस्मान् अनुग्रहकातरः अनुग्रहैकवशः, भगवान् षाड्गुण्यपूर्णः परमेश्वरस्त्वं, वास्रा नवप्रसूता धेनुः, वत्सकम् अल्पं स्ववत्समिव, परिपाति हि । अभिमतार्थप्रदानपूर्वं संसारभयाद्रक्षस्येव, यथा नवप्रसूता धेनुर्वत्सं क्षीरं पाययति, वृकादिभ्यो रक्षसि च तद्वदिति भावः ॥ १७ ॥ स्तुतिमुपसंहरति । अथेति । सत्संकल्पेन, दृढसंकल्पेन धीमता, भगवदधिगतमतिमता ध्रुवेण एवमुक्तप्रकारेण, अभिष्टुतः संस्तुतः, वै । अथानन्तरं भृत्यानुरक्तः स्वभक्ते निरतिशयप्रीतिमान् भगवान् , पृश्निगर्भो हरिः, प्रतिनन्द्य ध्रुवकृतस्तुतिप्रशंसां कृत्वेत्यर्थः । इदं वक्ष्यमाणम् अब्रवीत् ॥ १८ ॥

यदब्रवीत्तदाह । वेदेति । हे राजन्यबालक, ते त्वया, हृदि व्यवसितम् अभिमतविषयत्वेन निश्चितमस्ति तदित्यर्थः । अहं वेद जानामि । हे सुव्रत यत्त्वया व्यवसितमस्ति, तत् दुरापमपीतरैर्दुर्लभं यद्यप्यस्ति, तथापि ते तुभ्यं प्रयच्छामि ददामि । ते तव भद्रं स्तादिति शेषः ॥ १९ ॥ व्यवसितमेव प्रपञ्चयति । नान्यैरिति सार्द्धद्वयेन । हे भद्र, ध्रुवा शाश्वती क्षितिर्वासो यस्मिंस्तत् भ्राजिष्णु दीप्तिमत्, अन्यैः न अधिष्ठितं यत्र स्थाने ज्योतिषां ज्योतीरूपाणां ग्रहर्क्षताराणां चक्रं मण्डलं धान्याक्रमणाय भ्राम्यमाणानां पशूनां बन्धनस्तम्भो मेढी, तस्यां गोचक्रवत् बलीवर्दसमूहवत् आहितमर्पितमस्ति । ग्रहाः सूर्यशुक्रादयः, ऋक्षाण्यश्विन्यादिनक्षत्राणि, ताराः सामान्या अन्ये तारागणाः किं च यत् कल्पवासिनामवान्तरकल्पपर्यन्तं कृतवासानां परस्तात्तद्विनाशानन्तरमपि स्थास्नु स्थितिशीलम् । लोकत्रयविनाशेऽप्यनश्वरमित्यर्थः ॥ २० ॥ धर्म इति । धर्मः, अग्निः, कश्यपः, शक्र इन्द्रः, धर्मादयश्चत्वार एते नक्षत्ररूपाः, तथा वनौकसो वानप्रस्थाश्रमिणः, मुनयः सप्तर्षयः सतारकास्तारागणसहिताः सन्तः, यत्स्थानं दक्षिणीकृत्य प्रदक्षिणं विधाय, भ्रमन्तोऽहर्निशं बम्भ्रम्यमाणाः सन्तः चरन्ति वै ॥ २१ ॥ तदेतत्स्थानमपि राज्यभोगादनन्तरमेव प्राप्स्यसीत्याह । प्रस्थित इति । तुभ्यमिति शेषः । गां पृथिवीं दत्त्वा त्वां राज्ये निवेश्येत्यर्थः । पित्रा उत्तानपादेन, वनं प्रस्थिते तु, भावेक्तः । वनं प्रति दीर्घगमने कृते सति त्वित्यर्थः । धर्मसंश्रयः वर्णाश्रमधर्मपरिपालको भवान् षट्त्रिंशद्वर्षसाहस्रं षडधिकत्रिंशत्संख्याकवर्षसहस्रपर्यन्तमित्यर्थः । अव्याहतेन्द्रियः अविहतेन्द्रियसुखः सन् रक्षिता रक्षिष्यति । गामित्यनुषङ्गः । भुवो मण्डलमिति शेषो वा ॥ २२ ॥ त्वया संकल्पेन कृतेऽपि मद्भक्तस्य तव द्रोहादेवं भविष्यतीत्याह । त्वद्भ्रातरीति । उत्तमे उत्तमाख्ये त्वद्भ्रातरि तवापरमातृजे बन्धौ, मृगयायां नष्टे सति तु, तस्मिन्नुत्तमे मनो यस्याः सा, सा माता सुरुच्याख्योत्तमप्रसूः, वनं प्रविश्येति शेषः । अन्वेषन्ती स्वपुत्रं गवेषमाणा सती दावाग्नि दववह्निं प्रवेक्ष्यति वनवह्निना भस्मसाद्भविष्यतीत्यर्थः ॥ २३ ॥

इष्ट्वेति । किं च यज्ञो हृदयं प्रिया मूर्त्तिर्यस्य तम् । यद्वा । यज्ञस्य हृदयं तात्पर्यभूमिं यज्ञाराध्यमित्यर्थः । मां पुष्कलदक्षिणैः समग्रदक्षिणैः, यज्ञैः, इष्ट्वा आराध्य, इह राज्ये सत्याः दृढसंकल्पजाः आशिषः वाञ्छितविषयान् भुक्त्वानुभूय, अन्ते भोगानन्तरं मां च मामपि संस्मरिष्यसि ॥ २४ ॥ तत इति । यतः ऋषिभ्यः सप्तर्षिमण्डलादित्यर्थः । उपरिष्टात् स्थितम् । ततः सर्वे च ते लोकाश्च तैः सप्तर्षिपर्यन्तैः, नमस्कृतं यतिः प्रयतनशीलः यतः सकाशात न आवर्त्तते यद्गत्वा नार्वागवरोहति, एवंभूतं मत्स्थानं त्वं गन्तासि मदनुग्रहात्प्राप्स्यसि ॥ २५ ॥ भगवदुक्तिमुपसंहरन् भगवांस्तिरोधादित्याह मुनिः । इतीति । इत्युक्तप्रकारेण अर्चित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आराधितः गरुडध्वजः गरुडवाहनस्तदङ्कितध्वजश्च सः भगवान् पृश्निगर्भो हरिः आत्मनः स्वस्य पदं स्थानम् अतिदिश्य दत्त्वा, अन्ते प्राप्यतया विश्राण्येत्यर्थः। बालस्य ध्रुवस्य पश्यतः सतः स्वं निजं धाम वैकुण्ठाख्यं पदम् अगात् प्रत्यपद्यत ॥ २६ ॥ सोऽपीति। स ध्रुवोऽपि विष्णोर्भगवतः पादसेवया उपसादितं प्रापितम्, संकल्पजं तपश्चर्यारम्भकृतसंकल्पात् जातं संकल्पस्य निर्वाणं समाप्तिर्यस्मिन्नेवंभूतं स्ववाञ्छितं प्राप्यापि नातिप्रीतः नितरामहृष्टचित्तः सन् पुरम् अभ्यगात् ॥ २७ ॥ अनतिप्रीतेः कारणं पृच्छति विदुरः। सुदुर्लभमिति। मायाविनः मायाधिपतेः संबन्धि, तेन दत्तमित्यर्थः। सुदुर्लभमितरैरतिदुःखेनाप्यलभ्यं यद्वा। मायाविनः सकामस्य सुदुर्लभं तस्य श्रीहरेश्चरणौ तयोरर्चनं तेनार्जितं संपादितं यत् हरेः परमं पदं तत् एकं यत् जन्म तेनैव लब्ध्वापि अर्थवित् पुरुषार्थविदसन्नपि, स्वमात्मीयम् आत्मानम् असिद्धार्थम् इव अपरिपूर्णार्थमिव अप्राप्तमनोरथवदित्यर्थः। कथम् अमन्यत ॥ २८ ॥

मुक्तिप्राप्त्यर्थं परमेश्वरानाराधनमेवाप्रीतिकारणमिति वदंस्तस्य परितापमाह मैत्रेयः। मातुः सपत्न्याः सुरुचेः, वाग्बाणैः शरैः, हृदि विद्धः शरविद्धवज्जातव्यथ इत्यर्थः। अत एव तान् स्मरन्, तान्वाग्बाणान् हृद्यनुसंदधानः सन्नित्यर्थः। मुक्तिप्रदात्तु संसृतिबन्धविमोचकाद्भगवतः सकाशादपि, मुक्तिं न ऐच्छत्। तस्मात् पश्चात्तापम् उपेयिवान् प्राप्तः ॥ २९ ॥ पश्चात्तापविषयां ध्रुवोक्तिमाह। समाधिनेति सार्द्धैः षड्भिः। ऊर्ध्वरेतसः जितेन्द्रियाः, सनन्दादयः सनन्दनप्रभृतय', नलोप आर्षः। मुनय इति शेषः। नैके अनेके भवा यस्मिंस्तेन, बहुजन्माभ्यस्तेनेत्यर्थः। समाधिना ध्यानयोगेन, यत्पदं यस्य भगवतः स्वरूपं विदुः। साक्षादकुर्वन्नित्यर्थः। अमुष्य भगवतः, पादयोः छायाम् अहं षड्भिः मासैः उपेत्य प्राप्य, प्रणामस्तुत्यादिसमये गरुडाधिरूढस्य हरेः, पादयोश्छायायां स्थित्वापीत्यर्थः। पृथङ्मतिः देहात्माभिमानग्रस्तः सन्, अपगतः भगवत्पादच्छायायाः सकाशाद्दूरीभूतो जात इत्यर्थः ॥ ३० ॥ स्वस्याल्पास्थिरसांसारिकभोगयाञ्चाकारणं निश्चिनोति। अहो इति। यद्यस्मात्कारणात् भवच्छिदः गर्भजन्मजरामरणाद्यात्मकसंसारभयनिवर्त्तकस्य, भगवतः पादमूलं गत्वा साक्षात्कृत्य, अन्तवदन्ते विनाशयुक्तं, फलम् अयाचे याचितवान्। न तु नित्यनिरतिशयानन्तापहतपाप्मत्वादिगुणाष्टकाविर्भावपूर्वकब्रह्मानुभवात्मकानन्दमिति भावः। ततः बतेति खेदे। अहो इत्याश्चर्ये। मन्दभाग्यस्य मम, अनात्मा देहस्तस्य कर्मानात्म्यम्। दौर्जन्योपेतमज्ञत्वं त्वित्यर्थः। पश्यत ॥ ३१। अज्ञत्वे कारणं संभावयति। मतिरिति। पतद्भिः स्वसुकृतभोगान्ते स्वर्गतः पतनशीलैः, अत एव असहिष्णुभिः मदपेक्षयाऽधोवृत्तिपदप्राप्तिमत्तया परस्य मम समृद्धमसहमानैः देवैः, मतिर्मद्बुद्धिः विदूषिता सांसारिकभोगलौल्यसंपादनेन दोषं प्रापिता। एवं देवेषु दोषमारोप्याथो स्वदौर्जन्यमेव व्यञ्जयन् परितपति। योऽहं सः असत्तमः दुर्जनः, अत एव नारदवचः 'नाधुनाऽप्यवमानं ते' इत्यादिनोक्तं नारदवचनं तथ्यमपि, न अग्राहिषं न गृहीतवान्। तस्य मे मतिर्विदूषितेति संबन्धः ॥ ३२ ॥

दैवीमिति। किं च देवस्येश्वरस्येयं दैवी तां, मायाम् उपाश्रित्य, प्रसुप्तः इव सुप्तः यथा, असत्यानपि स्वप्नान् पश्यति तद्वद्वर्त्तमानोऽहमित्यर्थः। द्वितीये असति अपि अब्रह्मात्मकान्यवस्त्वसद्भावे सत्यपीत्यर्थः। भिन्ना दृक् ज्ञानं यस्य स तथाभूतः सन्, भ्राता एव भ्रातृव्यः, शत्रुरिति दृष्ट्या या हृद्रुक् हृदयगतःशोकस्तया, तप्ये तापमनुभवामि ॥ ३३ ॥ मयेति। किं च तपसा दुष्प्रसादनं अन्यैर्दुश्चरतपश्चरणैरपि प्रसादयितुमशक्यमित्यर्थः। जगदात्मानं जगदन्तरात्मानं भगवन्तमित्यर्थः। प्रसाद्याल्पकालेन प्रसन्नं कृत्वा, गतायुषि समाप्तायुष्काले, जने चिकित्सा जीवनौषधप्रदानमिव, मया यदेतत्प्रार्थितं व्यर्थं, न किंचिदित्यर्थः ॥ ३४ ॥ एतदेवाह। भवच्छिदमिति। भाग्यविवर्जितः अहं, भवच्छिदमपि भवम् एव अयाचे संसारनिवर्त्तकान्मया पुनः संसार एवाभियाचित इत्यर्थः। स्वेन राजते इति स्वराडकर्मवश्यस्तस्य भावः स्वाराज्यम्। 'स स्वराड् भवति' इति 'सर्वेषु लोकेषु कामचारो भवति' इत्यादिना श्रुत्युक्तं मुक्तैश्वर्यं स्वस्वरूपानन्दमित्यर्थः। यच्छतो ददतो भगवतः सकाशात्, बतेति खेदे। क्षीणं पुण्यं यस्य तेन, मे मया मानः केवलोऽभिमान इत्यर्थः। भिक्षितः याचितः। कथमिव अधनो निर्द्धनः, क्षीणपुण्येन हेतुना ईश्वरात्सार्वभौमनृपतेः सकाशात्, फलीकारान् सतुषतण्डुलकणान् इव, मानयाचनं केवलं बन्धुषूत्कर्षप्रदमतो भगवतो मुक्तियाचनमेव सर्वार्थसिद्धिप्रदमिति भावः ॥ ३५ ॥ भगवद्भक्तस्यास्यैवं मानप्राप्त्या परितापाचरणं सांसारिकसुखनिःस्पृहत्वं युक्तमित्याह मैत्रेयः। न वा इति। हे तात विदुर, मुकुन्दस्य मुक्तिप्रदस्य भगवतः, पदारविन्दयोः यद्रजः परागस्तज्जुषः सेवमानाः,। भगवच्चरणसरोरुहरजसां सर्वकालं संसेवने प्रसक्ता इत्यर्थः। भवादृशाः जनाः, तद्दास्यं तदीयदासभावम् ऋते विना, अन्यम् अर्थम् आत्मनः स्वस्य न वै नैव वाञ्छन्ति। यतः ते जनाः यदृच्छया भगवदिच्छया। लब्धा मनःसमृद्धिर्मनोऽभीष्टा सर्वसंपद्यैस्ते, तथाविधा एव भवन्तीत्यर्थः ॥ ३६ ॥ अथ प्रस्तुतमाह। आकर्ण्येति। राजोत्तानपादः आत्मजं ध्रुवम् आयान्तमागच्छन्तम् आकर्ण्य श्रुत्वाऽपि, संपरेत्य मृत्वा आगतं यथा पुनरागतमिवेत्यर्थः। तथा न श्रद्दधे न विश्वस्तवान् 'संपरेत्य यथागतम्' इत्यागमनदौर्लभ्यमुच्यते। एतच्च स्वभाग्यहीनत्वद्योतनेन व्यनक्ति। अभद्रस्य भाग्यहीनस्य, मम भद्रं पुत्रप्रत्यागमनरूपं मङ्गलं, कुतो हेतोः स्यात्। इत्यभिप्रायेण न श्रद्दधे इत्यन्वयः ॥ ३७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रद्धायेति। तत: देवर्षेर्नारदस्य वाक्यम् 'पृथ्व्यत्यचिरतो राजन् यशो विपुलयंस्तव इति वाक्यं श्रद्धाय विश्वस्य, हर्षवेगेन हर्षोद्रेकेण धर्षित: विवशीकृत: उद्रिक्तानन्द इति यावत्। अतिप्रीत: एवंभूत: सन् वार्त्ताहर्त्रु: पुत्रागमनवार्त्ताया: कथयितु: महाधनं बहुमूल्यं हारं मुक्तामणिमयीं स्रजं प्रादात्॥ ३८॥ सदश्वमिति। सन्तोऽश्वा यस्य तं कार्त्तस्वरस्य सुवर्णस्य परिच्छदा उपकरणानि यस्मिंस्तं रथम् आरुह्य ब्राह्मणै: कुलवृद्धै: अमात्याश्च बन्धवश्च तैश्च पर्यस्त: परिवृत:॥ ३९॥ शङ्खेति। शङ्खा: कम्बवश्च दुन्दुभयो भेर्यश्च तेषां नादस्तेन भूयसातिशयितेन ब्रह्मघोषेण स्वस्तिवाचनात्मकनादेन युक्त: सन्निति शेष:। आत्मजस्य पुत्रस्यावेक्षणं निरीक्षणं तत्रोत्सुक उत्कण्ठतोपेत: संश्च पुरात्सकाशात् तूर्णं निश्चक्राम निष्क्रान्तवान्॥ ४०॥ सुनीतिरिति। अस्य राज्ञ: महिष्यौ भार्ये सुनीति: सुरुचिश्च इत्युभे रुक्मभूषिते स्वर्णालंकृते सत्यौ उत्तमेन सार्द्धं सह शिबिकाम् आरुह्य मध्ये उत्तममुपावेश्योभे अपि एकामेव शिबिकामध्यास्येत्यर्थ: आभिजग्मतु:॥ ४१॥ नृपौत्सुक्यं दर्शयति युग्मेन। तमिति। परिरेभे इति। दीर्घकालं या उत्कण्ठा तद्युतं मनो यस्य स:। प्रेमविह्वल: स्नेहातिशयाप्लुत: नृप: उपवनाभ्याशे उपवनसमीपे आयान्तं तं ध्रुवं दृष्ट्वा तरसा वेगेन रथात् अवरुह्योत्तीर्य तूर्णम् आसाद्य सुतं संप्राप्य श्वसन् सन् विष्वक्सेनस्य भगवतोऽङ्घ्रिसंस्पर्शेन हतमशेषमघमघात्मकं बन्धनं संसृतिकरणं यस्य तम् अङ्गजं पुत्रं दोर्भ्यां भुजाभ्यां परिरेभे॥ ४२-४३॥ अथेति अथानन्तरं जात: उद्दामो महान् मनोरथो यस्य स राजा पाठान्तरे तनयविशेषणं कर्त्तुरध्याहार:। तनयं मूर्ध्नि मुहु: आजिघ्रन् शीतैर्हर्षोद्भूतत्वाच्छीतलै: नयनवारिभि: अश्रुभि: स्नापयामास॥ ४४॥

अभीति। सज्जनाग्रणीर्ध्रुव: प्रथमं पितु: पादौ अभिवन्द्य अस्थात्। तदा पित्रा आशीर्भि: अभिमन्त्रित: योजित: सत्कृत: संमानित: संश्च शीर्ष्णा मातरौ उभे अपि जनन्यौ ननाम सममेव नमश्चकार। अनेन शीर्ष्णा नमनकथनेन पितु: सकाशान्मातुर्गुरुत्वाधिक्यं सूचितम्। दशाचार्यसमो भ्राता शतभ्रातृसम: पिता। पितुर्दशशतं माता गौरवेणातिरिच्यते' इति स्मृते:। सुरुच्या मुख्यमातृत्वाभावेऽपि सत्स्वभावत्वेन भेदबुद्धिर्न कृतेति च ज्ञापितम्॥ ४५॥ ध्रुवेण प्रणामे कृते सुरुच्या द्वेषं विहाय किमभ्यधायीत्यत्राह। सुरुचिरिति। सुरुचि: पादावनतं प्रणामविधानाय पादयो: पतितमित्यर्थ:। अर्भकं बालं तं ध्रुवं समुत्थाप्य परिष्वज्यालिङ्ग्य बाष्पगद्गदया बाष्पातिशयतो गद्गदस्वरयुक्तया गिरा वाचा जीव इति आह 'जीवेतीत्यत्र भद्रं ते' इति पाठे ते तव भद्रम् अस्त्वित्यर्थ:॥ ४६॥ सुरुचि: स्वस्या: प्रीतेरसंभावनां निरस्यती सत्याह। यस्येति। मैत्र्यादिभि: गुणै: भगवान् हरि: यस्य प्रसन्न: तस्मै भूतानि नमन्ति। कथमिव आप: स्वयं निम्नं प्रति आप: स्वयमेवावतरन्ति तद्वदित्यर्थ:॥ ४७॥ उत्तम इति। उत्तम: ध्रुवश्च उभौ भ्रातरौ प्रेमविह्वलौ अङ्गसङ्गात्परस्पराङ्गसङ्गं प्राप्य उत्पुलकौ रोमाञ्चितगात्रौ च सन्तौ अन्योऽन्यम् अस्रौघमानन्दाश्रुकणसमूहं मुहु: पुन: पुन: ऊहतुर्मुमुचतु:॥ ४८॥ सुनीतिरिति। अस्य ध्रुवस्य जननी सुनीति: प्राणेभ्य:, अपि प्रियं सुतम् उपगुह्यालिङ्ग्य तस्य सुतस्य यदङ्गं तस्य य: संस्पर्शस्तेन निर्वृता सुखिता सती आधिं मन:पीडां जहौ तत्याज॥४९॥ पय इति। हे वीर विदुर तदा वीरसुव: वीरस्य ध्रुवस्य जनन्या: सुनीत्या: शिवैर्हर्षजन्यत्वाच्छीतै: नेत्रजै: सलिलैर्जलै: अभिषिच्यमानाभ्यां स्तनाभ्यां पय: मुहु: सुस्राव॥ ५०॥ तामिति। तां सुनीतिं जना: शशंसु:। प्रशंसामाह हे राज्ञि आर्त्तिहा तव दु:खापहर्त्ता पुत्र: चिरं नष्ट: बहुदिनं दर्शनमप्राप्त: इदानीं दिष्ट्या भाग्येन ते त्वया प्रतिलब्ध: संप्राप्त: अयं भुव: मण्डलं रक्षिता रक्षिष्यति 'तं शशंसुर्जना राजन्' इति पाठे नृपपरतया योजना॥ ५१॥ अभ्यर्चित इति। प्रणतार्त्तिहा प्रणतजनदु:खापहर्त्ता भगवान् त्वया नूनम् अभ्यर्चित: जन्मान्तरे संपूजित: यस्य भगवतोऽनुध्यायिनो ध्यातार: वीरा: सुदुर्जयं संसारं जिग्युर्जितवन्त:॥ ५२॥

लाल्यमानमिति। एवमुक्तप्रकारेण जनै: लाल्यमानं मातृप्रशंसाद्वारा कृतलालनं सभ्रातरं सोत्तमं ध्रुवं करिणीम् आरोप्य हृष्ट: नृप: स्तूयमान: जनै: कृतप्रशंसन: सन् पुरीम् अविशत्॥ ५३॥ पुरीं वर्णयति। तत्र तत्रेति चतुर्भि:। तत्र तत्र तेषु तेषु स्थलेषु उपसंक्लृप्तै: समीपे सम्यक्कृतै: मरकतमणितोरणै: मरकतशब्दे तलोप: आर्ष:। सवृन्दै: संहतिमद्भि: कदलीस्तम्भै: सवृन्दै: फलमञ्जरीयुक्तैरित्यन्ये। तद्विधै: सवृन्दै: पूगपोतैर्वालै: पूगवृक्षै: लसच्छोभमानम्। पाठान्तरे सवृन्तै: पुष्पबन्धनसहितै: तद्विधै: पुष्पबन्धनसहितैरिति व्याख्यायन्ते॥ ५४॥ चूतेति। चूतपल्लवाश्च वासांसि च स्रजश्च मुक्तादामानि च तेषां विशिष्टं लम्बनमस्ति येषु तै:। सदीपकै: प्रदीपसहितै:। अपां जलानां कुम्भैर्घटै: जलसंभृतै: कलशैरित्यर्थ:। प्रतिद्वारम् उपस्कृतमलंकृतम्॥ ५५॥ प्राकारैरिति। प्राकारैर्दुर्गै: शातकुम्भा: स्वर्णमया: परिच्छदा परिकरा येषु तै:। श्रीमन्ति यानि विमानानि तेषामिव शिखरेषु वा शिखरैर्युक्तैर्येषां तै:। गोपुरद्वाराणि पुरद्वाराणि गृहाणि च तै: सर्वत: अलंकृतम्॥ ५६॥ मृष्टेति। मृष्टा: संमार्जिता: चत्वराश्चतुष्पथाश्च रथ्या रथेभ्यो हिता राजमार्गाश्च अट्टा: पण्यमार्गाश्च मार्गा अवान्तरपन्थानश्च यस्मिंस्तत्। अट्ट उच्चस्य प्राकारस्योपरि निर्मिता भूमिकेति केचित्। चन्दनचर्चितं चन्दनाम्बुभि: संसिक्तम्। लाजाश्चाक्षताश्च तै: लाजा भर्जितधान्यानि अक्षता आर्द्रतण्डुला: तै:। पुष्पाणि च तै:। तण्डुलै: सकुङ्कुमाक्षतै: बलिभिर्ग्रामदेवानां पुरतोऽर्पितैरुपहारै: युतम्॥ ५७॥ एवं पुरं संवर्ण्य पुरजनार्पितोपहारस्य ध्रुवस्य पितृभवनप्रवेशमाह द्वाभ्याम्। ध्रुवायेति। पुरस्त्रिय: तत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र पथि दृष्टाय ध्रुवाय सिद्धार्थाः श्वेतसर्षपाश्च अक्षताश्च दधि च अम्बु स्थलपद्मजलं च दूर्वाश्च पुष्पाणि च फलानि च तानि चापि ॥ ५८ ॥ उपजह्रुरिति । सतीः आशिषः वात्सल्यात् प्रयुञ्जानाः सत्यः उपजह्रुः व्यकिरन् । तासां पुरस्त्रीणां वल्गूनि अतिमनोहराणि च तानि गीतानि च तानि शृण्वन्सन् पितुः भवनं प्राविशत् एवं द्वयोरेकः संबन्धः ॥ ५९ ॥ महेति । स ध्रुवः महामणिव्रातमये अनर्घ्यमणिसमूहमये भवनोत्तमे भवनश्रेष्ठे तस्मिन् पितृभवने पित्रा नितरां लालितः सन् दिवि स्वर्गे देववत् न्यवसत् ॥ ६० ॥

भवनं वर्णयति । पय इति । यत्र भवने दान्ता हस्तिदन्तनिर्मिताः पयःफेननिभाः क्षीरफेनवच्छुभ्रा निर्मलाश्च रुक्मपरिच्छदाः सुवर्णमयपरिकराः शय्याः महार्हाणि महामूल्यानि आसनानि रौक्माः सौवर्णाः उपस्कराः पात्राद्युपकरणानि ॥ ६१॥ यत्रेति । यत्र भवने महामारकतेषु अन्तर्निचिन्द्रनीलमणिषु स्फटिककुड्येषु स्फटिकमयभित्तिकासु ललनारत्नसंयुताः प्रतिफलितस्त्रीरत्नसहिताः मणिप्रदीपाश्चाऽपि उपमितसमासः । आभान्ति ॥ ६२ ॥ उद्यानानीति । यत्र विचित्रैः कूजन्ति विहङ्गानां मिथुनानि येषु तैः गायन्तः मत्ता मधुपानोन्मत्ताः मधुव्रता भ्रमरा येषु तैः अमरद्रुमैः संतानपारिजातादिभिर्देवतरुभिर्युक्तानि इति शेषः । रम्याणि मनोहराणि उद्यानानि च सन्तीत्यनुषङ्गः ॥ ६३ ॥ वाप्य इति । यत्र वैदूर्यसोपानाः वैदूर्यमणिमयसोपानवत्यः पद्मानि च उत्पलानि च मुकुन्दि कुमुदानि च तानि विद्यन्ते यासु ताः । विभक्तिव्यत्यय आर्षः । कुमुद् त्रिषु स्यात्कृपणे कैरवे तु नपुंसकम् इति मेदिनी हंसाश्च कारण्डवाश्च तेषां कुलानि तैः चक्राह्वाश्च सारसाश्च तैः जुष्टाः वाप्यश्च सन्ति । तथाभूते भवने न्यवसदित्यन्वयः ॥ ६४ ॥ उत्तानपाद इति । राजर्षिः उत्तानपादः तनयस्य ध्रुवस्य तं प्रसिद्धं प्रभावं श्रुत्वा अद्भुततमं तं दृष्ट्वा च परं विस्मयं प्रपेदे ॥ ६५ ॥ वीक्ष्येति । चकारोऽनन्तरार्थः । राजा उत्तानपादः ऊढवयसं प्राप्तयौवनं प्रकृतानां मन्त्र्यादीनां संमतं अनुरक्ताः अनुरागयुक्ताः प्रजा यस्मिंस्तं च पुत्रं वीक्ष्य भुवः पतिं चक्रे । राज्याभिषिक्तमकरोदित्यर्थः ॥ ६६ ॥ आत्मानमिति । किं च आत्मानं प्रवयसं वृद्धम् आकलय्यालोच्य विशां पतिर्नरेशः आत्मनः स्वस्य गतिं मुक्त्युपायं विमृशन्विचारयन् अत एव विरक्तः सन् वनं प्रातिष्ठत् प्राविशत् ॥ ६७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे नवमोऽध्यायः ॥ ९ ॥

—:❋:—

अथ दशमोऽध्यायः

मैत्रेय उवाच

प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः । उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥ १ ॥

यक्षाणां भ्रातृहन्तॄणामकरोद्दशमे वधम् । गत्वैवैकोऽलकामेवमुच्यते तस्य विक्रमः ॥ १ ॥

न केवलं मोक्ष एव भगवत्प्रसादायत्तः, किं तु बाह्याभ्यन्तरशत्रुजयोऽपीति तन्माहात्म्यं वर्णयिष्यन्नादौ ध्रुवविवाहादिप्रकारमाह मैत्रेयः । प्रजापतेरिति । ध्रुवः शिशुमारस्य शिशुमाराख्यस्य, प्रजापतेः दुहितरं भ्रमिं नाम भ्रमीति संज्ञया प्रसिद्धामित्यर्थः । उपयेमे उदवाह वै । तत्सुतौ तयोर्ध्रुवभ्रम्योः सुतौ, कल्पवत्सरौ कल्पवत्सरनामानौ अभूतामिति शेषः ॥ १ ॥ इडायामिति । महाबलः ध्रुवः, वायोः पुत्र्याम् इडायामिडाख्यायां भार्यायाम् अपि, योषिद्रत्नं योषितां रत्नमिवातिमनोहरम् उत्कलनामानं पुत्रम् अजीजनत् उत्पादयामास । केचित्तु उत्कलनामानं पुत्रं योषिद्रत्नं रत्नसमानां कन्यां चाजीजनदिति व्याख्यायन्ते ॥ २ ॥ उत्तम इति । उत्तमः अकृतोद्वाहः तुरवधारणार्थः । अपरिणीत एवेत्यर्थः । कदाचिन् मृगयायां बलीयसाति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बलवता, पुण्यजनेन यक्षेण, अद्रौ हिमवति आजावित पाठे युद्धे हतो निपातितः। तन्माता तस्योत्तमस्य जननी, सुरुचिः अस्योत्तमस्य गतिं गता। मरणं प्रापेत्यर्थः ॥ ३ ॥ ध्रुव इति। ध्रुवः भ्रातृवधं श्रुत्वा, कोपश्च, अमर्षश्च, शुक् शोकश्च, तत्समाहारस्तेन अर्पितो व्याप्तः सन् जैत्रं जयशीलम्, स्यन्दनं रथम् आस्थायाधिरुह्य, पुण्यजनालयमलकां कुबेरपुरीमित्यर्थः। गतः प्राप्तः ॥ ४ ॥ गत्वेति। राजा ध्रुवः, उदीचीं दिशं गत्वा, पुण्यजनालयोत्तरदिग्भागं प्राप्येत्यर्थः। रुद्रानुचरा भूतादयस्तैः सेवितां गुह्यकैर्यक्षैः संकुलां व्याप्तां पुरीमलकां हिमवतो या द्रोणी गुहा तस्यां ददर्श ॥ ५ ॥ दध्माविति। हे क्षत्तः बृहन्तावाजान्वायतौ बाहू यस्य सः, ध्रुवः खमन्तरिक्षं दिशो दशाप्याशाश्च अनुनादयन्प्रतिध्वनयन्सन् शङ्खं दध्मौ नादितवान्। येन ध्रुवध्मातशङ्खनिनादश्रवणेन उद्विग्नाश्चलिता दृशो यासां ताः उपदेव्यो यक्षयोषितः भृशं नितराम् अत्रसन् भीतवत्यः ॥ ६ ॥ तत इति। ततः बलिनो महाबलवन्तः उपदेवाश्च ते महाभटाश्च ते निष्क्रम्य अलकाया बहिर्निष्क्रमणं विधाय तं ध्रुवध्मातशङ्खसंबन्धिनं निनादम् असहन्तः निनादश्रवणमसहमानाः, अत एव उदायुधा उद्यतास्त्रशस्त्राः सन्तः, अभिपेतुरभ्यागच्छन्। उदतिष्ठन्निति वा पाठः ॥ ७ ॥ स इति। उग्रं भीमं धनुर्यस्य सः, महारथो महारथसंज्ञः, स ध्रुवः आपततोऽभ्यागच्छतः सर्वान् तान् वीरान्, पाठान्तरे वीरः इति नृपविशेषणम्, लक्ष्यीकृत्येति शेषः। एकैकं प्रत्येकमित्यर्थः। युगपदेव त्रिभिः त्रिभिः बाणैः अहन्। त्रयोदशायुतमितानपि तान्समकालं त्रिभिस्त्रिभिर्बाणैर्निजघानेत्यर्थः ॥ ८ ॥

ते वा इति। ललाटलग्नैः तैस्त्रिभिस्त्रिभिः इषुभिः, आत्मानं निरस्तं पराजितं मत्वा सर्वे ते यक्षाः तस्य ध्रुवस्य तत् कर्म आशंसन् वै। हि एवेत्यवधारणद्वयमसंभावनां तथार्थवादतां निषेधात ॥ ९ ॥ तेऽपीति। ते यक्षाश्चापि, उरगाः सर्पाः, पादस्पर्शं पादाहतिम् इव, अमुं ध्रुवम् अमृष्यन्तोऽसहमानाः, द्विगुणं यथा भवति तथा प्रचिकीर्षवः प्रतिकर्त्तुमिच्छन्तः सन्तः, शरैः षड्भिः षड्भिर्बाणैः युगपदेककालमेव अविध्यन्निजघ्नुः ॥ १० ॥ तत इति। ततः शरप्रहरणविधानानन्तरम्, परिघाश्च निस्त्रिंशाश्च तैः पाशाश्च, शूलानि च, परश्वधाश्च तैः। शक्तयश्च ऋष्टयश्च, ताभिः। भुशुण्डीभिः चित्रवाजैर्विचित्रपक्षैः शरैरपि ॥ ११ ॥ अभ्यवर्षन्निति। अयुतानां त्रयोदश त्रयोदशायुतसंख्याका इत्यर्थः। प्रकुपिता अतिकोपं प्राप्ताः ते यक्षाः, सरथं रथसहितं सहसारथिं सारथिसहितं ध्रुवं प्रतीकर्त्तुम् इच्छन्तः सन्तः, तत्तदानीम् अभ्यवर्षन्। उक्तास्त्रप्रवर्षणं चक्रुरित्यर्थः। इत्युभयोरेकसंबन्धः ॥ १२ ॥ औत्तानपादिरिति। तदा तस्मिन्काले, औत्तानपादिरुत्तानपादपुत्रः स ध्रुवः, भूयसातिशयितेन शस्त्रवर्षेण यक्षकृतातितीव्रायुधप्रवर्षणेन, छन्न आवृतः सन् आसारेण धारावर्षेण गिरिः यथा पर्वत इव, न एव उपादृश्यत नैव ददृशे ॥ १३ ॥ हाहाकार इति। तदा तस्मिन् काले एव, दिवि पश्यतां आकाशे स्थित्वा तद्युद्धं निरीक्षमाणानामित्यर्थः। सिद्धानां हाहाकारः महान्हाहेति ध्वनिरित्यर्थः। आसीत्। अयं मानवो मनुवंशसंभूतः, सूर्यः सूर्यसदृशोऽयं ध्रुव इत्यर्थः। पुण्यजनार्णवे यक्षाम्बुनिधौ, मग्नः हन्त हा महत्कष्टमित्यर्थः। एवंरूपहाहाकार आसीदिति संबन्धः ॥ १४ ॥ नदत्स्विति। अथो अथानन्तरं मृधे युद्धे यातुधानेषु राक्षसेषु, नदत्सु जयकाशिषु जितमस्माभिरिति जयप्रकाशकेषु च सत्सु, नीहारात् भास्करः सूर्यः इव, तस्माद्यक्षकृतशरवर्षात् रथाद्रथे आस्थाय ल्यब्लोपे पञ्चमी। रथावस्थितः सन्नेवेत्यर्थः। पाठान्तरे ध्रुवाधिष्ठितो रथ इत्यर्थः। उदतिष्ठदुत्थितः ॥ १५ ॥

धनुरिति। दिव्यमतिसुन्दरम् अत्रोग्रमिति पाठे उत्कटं, धनुः विस्फूर्जयन् ज्याघातं कुर्वन्नित्यर्थः। द्विषतां पुण्यजनानां खेदम् उद्वहन् बाणैर्नाराचैः, अस्त्रौघं द्विषत्प्रयुक्तमस्त्रसमूहम् अनिलो वायुः घनानीकं मेघश्रेणिम् इव व्यधमच्चूर्णयामास ॥ १६ ॥ तस्येति। तस्य ध्रुवस्य चापाद्धनुषो निर्मुक्ताश्चलिताः, तिग्मास्तीक्ष्णाः ते बाणाः, अशनयः वज्राणि, गिरीन् पर्वतान् यथा, रक्षसां वर्माणि कवचानि, भित्त्वा छित्त्वा कायान्देहान्, आविविशुः समंतात्प्राविशन् ॥ १७ ॥ भल्लैरिति। भल्लैः स्नुहीदलफलबाणविशेषैः। संछिद्यमानानां रक्षसामिति शेषः। चारूणि सुन्दराणि कुण्डलानि कर्णवेष्टनानि येषु तैः, शिरोभिर्मूर्द्धभिः, हेमतालाभैः स्वर्णमयतालवृक्षसदृशैः। ऊरुभिः सक्थिभिश्च, वलयवल्गुभिः कटकसुन्दरैः, दोर्भिर्बाहुभिः ॥ १८ ॥ हारेति। महाधनैरनर्घ्यैः हाराश्च, केयूराणि च, मुकुटानि च, तैः। उष्णीषैः शिरोवेष्टनैश्च, आस्तृताश्छन्नाः, ताः रणभुवः वीरमनोहरा वीराणां मनोहारिण्यः सत्यः रेजुः विबभुः। इत्युभयोरेकसंबन्धः ॥ १९ ॥ हतावशिष्टा इति। हतावशिष्टाः हतेभ्यः अवशिष्टाः, इतरे रक्षोगणाः, क्षत्रियवर्यसायकैः क्षत्रियोत्तमध्रुवबाणैः, प्रायो बाहुल्येन, विवृक्णाः संछिन्ना अवयवा येषां तथाभूताः सन्तः, रणाजिरात्सङ्ग्रामभूम्यङ्गणतः, रणभूमेरित्यर्थः। मृगेन्द्रेण सिंहेन विक्रीडिताः ये यूथपा गजास्ते इव, विदुद्रुवुः पलायितवन्तः ॥ २० ॥ अपश्यमान इति। तदा मानवोत्तमः मानवश्रेष्ठः, स ध्रुवः महामृधे महति युद्धे, कंचन आततायिनम् अपश्यमानः, पुरीमलकां दिदृक्षन् द्रष्टुकामः सन् अपि, मायिनां मायावतां, द्विषां स्वशत्रुभूतपुण्यजनानां, चिकीर्षितं जनः न वेद। इति बुद्ध्यालम्बनं कृत्वेति शेषः। न अविशत्। न प्रविष्टवान् ॥ २१ ॥ इतीति। चित्ररथ आश्चर्यकररथावस्थितः, स ध्रुवः सारथिं प्रति इति 'न मायिनां वेद चिकीर्षितं जनः' इत्येवं ब्रुवन्वदन्सन्, परेषां विद्विषां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतियोगः पुनरुद्योगस्तस्मात् शङ्कितः शङ्कमानः अत एव यत्तः यत्नवान्सन् , जलदैर्घनैः ईरितमुच्चारितम् इव । शब्दं जातमिति शेषः, शुश्राव तत्समनन्तरमेवेति शेषः । दिक्षु दिशासु, नभस्वता वायुना सह रजः, अन्वदृश्यत । वायुहेतुको धूलिपुञ्जो नयनविषयतां प्राप्त इत्यर्थः ॥ २२ ॥

क्षणेनेति । तदा क्षणेन क्षणमात्रेण, विस्फुरन्त्यस्तडितो यस्मिंस्तेन, त्रासयन्तः स्तनयित्नवोऽशनयो यस्मिंस्तेन, घनानिकेन मेघानां समूहेन, सर्वतः दिक्षु व्योमान्तरिक्षम् आच्छादितम् अभूदिति शेषः ॥ २३ ॥ ववृषुरिति । हे अनघ विदुर, रुधिरौघाश्च, असृञ्जि श्लेष्मादीनि च, पूयं पकासृग्विकारश्च, विट् पुरीषं च, मूत्रं प्रस्रावश्च, मेदो मांसस्नेहश्च, ते ववृषुः । तत्र न सृजति न त्यजति शरीरमिति व्युत्पत्त्याऽसृगिह श्लेष्मादिरुक्तः । रुधिरस्य पृथगुपादानात् । मेदःशब्दे पुंस्त्वमार्षम् । 'हृन्मेदस्तु वपो वसा' इत्यमरेऽस्य क्लीबत्वदर्शनात् । कबन्धानि शिरोहीनशरीराणि, अस्य ध्रुवस्य अग्रतः गगनात् निपेतुः ॥ २४ ॥ तत इति । ततः खे गिरिः अदृश्यत । एकवचनं जात्यभिप्रायम् । ततः गिरयोऽदृश्यन्तेत्यर्थः । सर्वतो दिशं सर्वासु दिक्षु, साश्मवर्षिणः अश्मसहितं यद्वर्षणं तद्वन्त इत्यर्थः । गदाश्च, परिघाश्च, निस्त्रिंशाश्च, मुसलाश्च, ते । मुसलोऽस्त्रियाम् । निपेतुः ॥ २५ ॥ अहय इति । अशनिवन्निःश्वासो येषां ते, रुषा अक्षिभिः अग्निं वमन्त उद्गिरन्तः, अतिक्रुद्धा इति यावत् । अहयः सर्पाः, मत्ताः गजाः कुञ्जराः, यूथशः संघशः सिंहाः व्याघ्राश्च, अभ्यधावन् । तूर्णमभिमुखमागतवन्त इत्यर्थः ॥ २६ ॥ समुद्र इति । ऊर्मिभिस्तरङ्गैः भीमो भयंकरः, समुद्रः सर्वतः समंतात् , भुवं स्रावयन् सन् , कल्पान्ते प्रलयकाले इव महाह्रादः अत एव भीषणः संश्च, आससाद ध्रुवं प्राप्तः ॥ २७ ॥ एवंविधानीति । एवंविधान्युक्तप्रकाराणि, अनेकानि अमनस्विनामज्ञानां त्रासनानि भयंकराणि, मायाचेष्टितानि तिग्मगतयः क्रूरप्रकृतयः असुराः, आसुर्या असुरसंबन्धिन्या, मायया ससृजुः । अत्रासुरराक्षसादिशब्दैर्दूरान्तरत्वेन यक्षा एवोच्यन्ते ॥ २८ ॥ ध्रुव इति । असुरैः ध्रुवे प्रयुक्ताम् अतिदुस्तरां तां मायां निशाम्य दृष्ट्वा, समागता युद्धनिरीक्षणार्थं समायाताः मुनयः सर्वेऽपि ऋषयः । तस्य ध्रुवस्य शं मङ्गलम् आशंसन्प्रार्थितवन्तः ॥ २९ ॥

आशंसामेव विवृणोति । औत्तानपाद इति । अङ्गेति संबोधने । हे औत्तानपादे ध्रुव, अवनतार्तिहरः भृत्यदुःखापहर्त्ता शार्ङ्गधन्वा भगवान् देवः, तव विपक्षान् शत्रून् क्षिणोतु नाशयतु । विपक्षविनाशनसामर्थ्यद्योतनाय भगवन्तं विशिनष्टि । यन्नामधेयं यस्य भगवतो नाम अभिधायोच्चार्य, निशम्य श्रुत्वा च, लोकः अद्धा साक्षात् अञ्जसा सुखेनैव, दुस्तरं मृत्युं तरति एवंभूतः ॥ ३० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे दशमोऽध्यायः ॥ १० ॥

——:※:——

अथैकादशोऽध्यायः

मैत्रेय उवाच

निशम्य गदतामेवमृषीणां धनुषि ध्रुवः । संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम् ॥ १ ॥

मनुः स्वयं क्षयं दृष्ट्वा यक्षाणामेत्य तत्र तु । ध्रुवं निवारयामासैकादशे तत्त्वबोधनात् ॥ १ ॥

निशम्येति । एवमुक्तप्रकारेण गदतां कथयताम् ऋषीणां निशम्य श्रुत्वा, वच इति शेषः । ध्रुवः उपस्पृश्य आचम्य, अप इति शेषः । यत् नारायणनिर्मितम् अस्त्रं तत् धनुषि संदधे । नारायणास्त्रं धनुषि संधारयामासेत्यर्थः ॥ १ ॥ संधीयमान इति । हे विदुर, ध्रुवेणेति शेषः । एतस्मिन्नुक्तविधे नारायणास्त्रे, संधीयमाने संप्रयुज्यमाने सति, गुह्यकनिर्मिताः यक्षैः संसृष्टाः, मायाः ज्ञानोदये सति, क्लेशाः यथा रागद्वेषादय इवेत्यर्थः । क्षिप्रमाशु निनेशुर्नाशं प्राप्ताः ॥ २ ॥ तस्येति । ऋषेर्नारायणस्येदमार्षं नारायणादुद्भूतमित्यर्थः । तच्च तदस्त्रं च तत् धनुषि चापोत्तमे, तस्य ध्रुवस्य प्रयुञ्जतः संदधतः सतः, सुवर्णपुङ्खाः स्वर्णमयकर्त्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युपेताः, कलहंसानां वासांसि पक्षा येषां ते, शरा इति शेषः। विनिःसृताः धनुषो विनिर्गताः सन्तः, भीमो भयंकरो रवो ध्वनिर्येषां ते, शिखण्डिनो मयूराः वनं यथा, वने यथा प्रविशन्ति, तद्वदित्यर्थः। द्विषद्बलं शत्रुसैन्यम् इत्यर्थः। आविविशुराविष्टवन्तः। भीमरवा इति दार्ष्टान्तिकेऽप्यन्वेतव्यम् ॥ ३ ॥ तैरिति। प्रधने संग्रामे, तिग्मधारैस्तीक्ष्णाग्रैः, क्षुरप्रैरिति यावत्। तैः पूर्वोक्तैः, शिलीमुखैर्ध्रुवप्रयुक्तबाणैः उपद्रुतास्ताड्यमानाः, पुण्यजनाः, सर्वेऽपि ते यक्षाः, इतस्ततो यतस्ततः, संभूयेति शेषः। कुपिताः प्रकोपं प्राप्ताः उदायुधाः उद्धृतशस्त्राः सन्तः, उन्नद्धा उच्छ्रिताः फणा येषां ते अहयः सर्पाः, सुपर्णं गरुडम् इव, तं ध्रुवं अभ्यधावन् ॥ ४ ॥

स इति। स ध्रुवः मृधे युद्धे, अभ्यभिमुखं यथा तथा, धावतः शीघ्रमागच्छतः, पृषत्कैर्बाणैः निकृत्तं बाहूरुशिरोधरोदरं येषां तान् प्राण्यङ्गत्वादेकवचनेन समासः। निकृत्तशब्दस्य बाह्वादिना प्रत्येकं संबन्धः। तान् पुण्यजनान्, ऊर्ध्वरेतसः संन्यासिनः अर्कमण्डलं निर्भिद्य यं लोकं व्रजन्ति, तं परं लोकं निनाय। अभिमुखं मृतत्वात्ते तं लोकं प्रापुः। 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ। परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः' इति स्मृतेः। केचित्तु ध्रुव एव स्वमहिम्ना संयोजितनारायणास्त्रप्रतापेन वार्कमण्डलभेदनपूर्वं तांस्तं लोकमनयदित्याहुः ॥ ५ ॥ किमेवं ध्रुवः सर्वांस्ताननवशिष्टानकरोदित्याकाङ्क्षोत्तरोपयोगिकथान्तरमाह। तानिति। अनागसः निरपराधान्, चित्ररथेन ध्रुवेण, हन्यमानान् पीड्यमानान्, भूरिशो बहुशः, तान् गुह्यकान् अभिवीक्ष्य पितामहः स्वपितुः पिता मनुः, ऋषिभिः सह, कृपया उपगतः तत्रायातः सन् औत्तानपादिं ध्रुवं जगाद ॥ ६ ॥ स यज्जगाद तदाह। अलमित्यादिना। हे वत्स पुत्र, तमोद्वारेण नरकनगरगोपुररूपेण, संमोहनात्मकाज्ञानहेतुनेत्यर्थः 'क्रोधाद्भवति संमोहः' इति स्मरणात्। पाप्मना पापहेतुना, अतिरोषेण अलम्। येनातिशायितरोषेण अनागसो निरपराधानपि, एतान् पुण्यजनान् त्वम् अवधीर्हतवानसि ॥ ७ ॥ नेति। हे तात, सद्भिर्गर्हितं सत्पुरुषैर्विनिन्दितम् अत एव एतत् कर्म, अस्मत्कुलोचितं न भवति। तत्किमित्यत्राह। अकृतैनसाम् उपदेवानां यक्षाणां ते त्वया वधः आरब्धः, यत् एतदिति संबन्धः ॥ ८ ॥ ननु मद्भ्रातृहन्तार एते उपदेवाः कथमनागसस्तत्राह। नन्विति। हे अङ्ग, हे भ्रातृवत्सल भ्रातुरुत्तमस्य वधाभितप्तेन यक्षकृतत्वद्भ्रातृवधजातपरितापवतेत्यर्थः। त्वया, एकस्य यक्षस्य, अपराधेन तत्सङ्गात्तस्यापराधिनः संबन्धाद्धेतोः, बहवः यक्षाः हताः घातिताः ननु ॥ ९ ॥ नायमिति। आत्मानं मनः, असंगृह्यानियम्य, परागृह्येति पाठे पराकृत्य परागभूतं देहं स्वात्मभावेन गृहीत्वेत्यर्थः। पशुवत् भूतवैशसं यत् पशवो यथा देहाभिमानेनान्योन्यं घ्नन्ति, तथा भूतानां हिंसेति यदित्यर्थः। अयं हृषीकेशानुवर्त्तिनां भगवद्भक्तानां साधूनां मार्गः न भवति हि ॥ १० ॥

सत्यं भगवद्भक्तानामयं मार्गो न भवतीति मम तूचितमित्यत्राह। सर्वेति। भवान्, आवसन्त्यस्मिन्नित्यावासः आवसतीति वा आवासः भूतानामावासो धारकस्त्वम् अन्तरात्मानं च, दुराराध्यम् इतरैरब्रह्मात्मकस्वतन्त्रवस्तुदर्शिभिर्दुःखेनाप्याराधयितुमशक्यं हरिं पृश्निगर्भं भगवन्तं सर्वभूतात्मभावेन सर्वभूतान्तरात्मभावेन, आराध्योपास्य, परमं सर्वोत्कृष्टं, तत्सकलशास्त्रप्रसिद्धं, विष्णोः पदं लोकम् आप प्राप्तवान्। इतः पूर्वमप्राप्तमपि भगवता दत्तत्वात्प्राप्तप्रायमिति मत्वाऽऽपेत्युक्तम्। स त्वमिति ॥ ११ ॥ स हरिभक्तः त्वं तु, हरेः अनुध्यानाद्भजनात्, भगवद्भक्तत्वादित्यर्थः। तत्पुंसां हरिभक्तानाम् अपि, संमतः भागवतोत्तमत्वेन संमानितो भवसीत्यर्थः। सतां साधूनां व्रतम् अनुशिक्षन्, अनुशिक्षयन्, लोकस्येति शेषः। कथम् अवद्यं वक्तुमप्यनर्हं पापमित्यर्थः। कृतवान् भगवद्भक्तस्य नितरामेतदनुचितमित्यर्थः। श्लोकद्वयस्यायं भावः। यदुक्तं 'नायं मार्गो हि साधूनाम्' इत्यनेन, भूतवैशसं साधूनां नोचितं मम तूचितमिति त्वया कदापि न वाच्यं, भगवद्भक्ततया त्वयि साधुत्वात्साधवो भगवद्भक्ता इति शास्त्रप्रसिद्धत्वात्पञ्चवार्षिकबालभाव एव भगवदुपासनविधानजसाधुत्ववतो न तवेदमुचितमिति ॥ १२ ॥ भूतद्रोहेण भगवद्भक्तौ क्रियमाणायां को विरोध इत्यत्राह। तितिक्षयेति। तितिक्षया अपराध्यपराधसहनेन करुणया परदुःखासहिष्णुत्वेन अखिलजन्तुषु तरतमभावेन व्यवस्थितेषु सकलप्राणिषु, मैत्र्या स्वसाम्यबुद्धिकृतहिताचरणेन च, समत्वेन देहान् प्रकृतिपरिणामत्वेन, जीवान् ज्ञानैकाकारत्वेन, परमात्मानं तु सर्वान्तरात्मत्वेनैवेवंरूपसमत्वेन च, सर्वात्मा सर्वान्तर्यामी भगवान्, संप्रसीदति। सर्वात्मेति हेतुगर्भम्। श्रुत्युदिते भगवतः सर्वात्मत्ववादे तस्य सर्वान्तरात्मतया देवमनुष्यादिष्ववस्थितत्वात्सर्वेषामीश्वरत्वे नश्वरस्य शरीरित्वेन शरीरद्रोहः शरीरिणि भगवति पर्यवस्यतीति भूतद्रोहतो भगवान्न प्रसीदतीति भावः। केचित्तु महत्सु तितिक्षया, नीचेषु करुणया, समेषु मैत्र्याऽखिलेषु समत्वेन चेति योजयन्ति ॥१३॥ भगवत्प्रसादफलमाह। सुप्रसन्न इति। पुरुषः सर्वात्मतया भगवदुपासनपरः पुमान्, भगवति सुप्रसन्ने तितिक्षादिभिः परमेश्वरे प्रसन्नतां प्राप्ते सतीत्यर्थः। जीवदशायामिति शेषः। प्राकृतैः प्रकृत्युत्पन्नैर्गुणैः कामक्रोधादिभिः विमुक्तः सन् अन्ते इति शेषः। जीवन्मुक्तः यथा स्वस्य जीवभावस्तस्याः प्रकृतेर्नितरां मुक्तः सन्, निर्वाणं निरतिशयानन्दरूपं ब्रह्म बृहद्गुणोपेतं परमेश्वरपदमित्यर्थः। ऋच्छति प्राप्नोति ॥ १४ ॥ एवं सर्वभूतसुहृत्त्ववादीन् भगवत्प्रसन्नताहेतून् प्रसादफलभूतां ब्रह्मप्राप्तिं चाभिधाय,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्त्वोपदेशं विना भ्रातृमरणदुःखितस्यास्य मनः, प्रशान्तिं न प्राप्स्यतीत्यन्तरे निधाय यक्षाणां न त्वद्भ्रातृहननकर्तृत्वं, न च तवापि यक्षहननकर्तृत्वं, किं त्वेतस्मिन्नुभयविधत्वे दैवमेव कारणमिति वक्तुं भ्रात्रादिशरीराणामुत्पत्तिमरणादिकं यथावद्विवेचयंस्तदुपयुक्तमीश्वरस्यानन्तविधशक्तिमत्त्वमाह। भूतैरिति। हे ध्रुव, पञ्चभिः भूतैः पृथिव्यादिभिः, आरब्धः देवमनुष्यादिशरीररूपेण परिणतः, योषित्स्त्री, पुरुषः पुमान् इत्ययं द्विविधो जनः प्रसिद्ध इति शेषः। एव इह लोके तयोः योषित्पुरुषयोः, व्यवायादन्योन्यं मैथुनात, योषित्पुरुषयोः संभूतिः हि। इत्थं प्राणिजातमुत्पद्यते एव इत्यर्थः। पञ्चभूतपरिणामरूपस्त्रीपुरुषशरीरद्वयसंबन्धादुद्भूतमपि प्राणिजातं पञ्चभूतात्मकमस्त्येवेति भावः॥ १५॥

एवमिति। हे राजन्, एवं यथा स्त्रीपुरुषद्वारा जनसंभवः इत्थं परमात्मनः मायायाः परमात्माधिष्ठितायास्तच्छरीरभूताया मायाया इत्यर्थः। गुणव्यतिकरात्सत्त्वादिगुणक्षोभहेतोः, सर्गः सृष्टिः, स्थितिः, संयमः संहारश्चापि, प्रवर्त्तते एव। तत्र रजसो वृद्धावितरयोर्ह्रासे च सर्गः। सत्त्वस्य वृद्धावितरयोर्ह्रासे च स्थितिः। तमसो वृद्धावितरयोर्ह्रासे संयमः। त्रयाणां साम्ये त्रितयाभावः॥ १६॥ ननु स्त्रीपुरुषात्मकशरीराणां वैषम्येण संबद्धानां गुणानां वा जडत्वेन प्रवृत्तिशून्यानां व्यष्टिसमष्ट्यात्मनां कथं परिणामसामर्थ्यं, सामर्थ्ये सत्यपि कथं देवमनुष्यादिवैचित्र्यं, सुखदुःखतारतम्यं चेत्यत्राह। निमित्तमात्रमिति। तत्र गुणानां महदाद्याकारेण परिणामे देवादिवैचित्र्ये सुखदुःखयोश्च निर्गुणः सत्त्वादिगुणत्रयरहितः, पुरुषर्षभः परमेश्वरः, निमित्तमात्रं निमित्तमेव निमित्तमात्रं न त्वनिमित्तमित्यर्थः। निमित्तत्वमेव दृष्टान्तत्वेन विशदयति। यत्र यस्मिन् परमात्मनि निमित्तभूते सतीत्यर्थः। लोहवत् अयस्कान्तसंनिधाविति शेषः। अयस्कान्तसंनिधिं प्राप्य लोहं यथा तथेत्यर्थः। व्यक्ताव्यक्तम् इदं विश्वं भ्रमति प्रवर्त्तते। व्यक्तं महदादिकार्यमव्यक्तं प्रधानादितत्कारणं, तदात्मकं विश्वं संप्रवर्त्तते इत्यर्थः॥ १७॥ स इति। भगवान् हेयप्रतिभटपूर्णषाड्गुण्यः, कालशक्त्या कालात्मिका या स्वशक्तिस्तया, गुणक्षोभहेतुभूतयेति शेषः। गुणप्रवाहेण कालशक्तिनिमित्तसंक्षुभितसत्त्वादिगुणप्रवाहरूपसर्गेण विभक्तवीर्यः विभक्तसृष्ट्यादिविषयशक्तिः स ईश्वरः, इदं स्वशक्त्यात्मकं जगत्, करोति सृजति खलु। गुणक्षोभनिमित्तकालप्रकृतिपुरुषशरीरकोऽहं जगत्सृष्ट्वानन्तविविधविचित्रस्थितिस्वरूपः स्याम्, इति संकल्पेनेदं जगत्सृजतीत्यर्थः। 'एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्' इति स्मृतेः। तथापि अकर्त्तैव ब्रह्मादिद्वारा सर्गविधापनादिति भावः। अहन्ता सन्नेव निहन्ति, शिवादिद्वारा प्रलयविधापनादिति भावः। 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः। तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम्' इति स्मृतेः। 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते' इति श्रुतेश्च। नन्वेकस्मिन्कर्तृत्वमकर्तृत्वं च कथमुपपद्यतेऽघटमानत्वात्तत्राह। विभूम्नः भगवतः, चेष्टा दुर्विभाव्या अप्रतर्क्या खलु॥ १८॥

उक्तरीत्या प्रयोज्यप्रयोजकभावेन हरेः कर्तृत्वाकर्तृत्वे अभिहिते सांप्रतं प्रयोजयितृत्वमेव विशदयति। स इति। कालः कालशरीरकः स परमेश्वरः जनेन पित्रादिना प्रयोज्यकर्त्रा, जनम् उत्पत्त्युन्मुखं पुत्रादिजनं जनयन्नुत्पादयन् आदिकृत प्रथमः कर्त्ता प्रयोजकः भवतीत्यर्थः। अन्तकं विनाशोन्मुखं जनं मृत्युना प्रयोज्यकर्त्रा मारयन् सन्नपि स्वयं तु अनादिरुत्पत्तिरहितः अव्ययः नाशरहितः अनन्तोऽन्तवर्जितः सन्नेव अन्तकरः। पित्रादिद्वारा जनकः मृत्य्वादिद्वारा अन्तकरः न तु साक्षादतः साक्षादकर्तृत्वमन्यद्वारकं कर्तृत्वं चैकस्मिन्विविधविचित्रानन्तशक्तिमतीश्वरे उपपन्नमिति भावः॥ १९॥ ननु प्रयोजयितृत्वमपि कथमीश्वरस्योपपन्नं वैषम्यनैर्घृण्यादिप्रसङ्गादित्याशङ्कायां तत्तत्कर्मानुरूपत्वतस्तथात्वात्प्रयोजयितुः पक्षपाताभावादुपपन्नमेव प्रयोजयितृत्वमित्याह। न वा इति। मृत्योः संसारात्, परस्य अस्पृष्टसंसारस्येत्यर्थः। यद्वा मृत्योर्मृत्युशरीरकस्य 'यो मृत्युमन्तरे संचरन् यस्य मृत्युः शरीरम्' इति श्रुतेः। परस्य परमात्मनः समं यथा भवति तथा, प्रजाः कर्मभूताः, विशतः तत्तत्कर्मानुरूपनियमनार्थमन्तरात्मतया प्रविशतः, अस्य भगवतः, स्वपक्षः स्वकीयः न वै न एव। विपक्षो वा परकीयोपि न एव। पक्षपाताभावं दृष्टान्तेनोपपादयति—तमिति। यथा रजांसि धावमानम् अनिलम्, अनु अनुसृत्य धावन्ति, तथा अनीशाः कर्माधीनाः, कर्मानुरूपं नियाम्या इत्यर्थः। भूतसंघाः, धावमानं तं हरिम् अनुधावन्ति, कर्मानुरूपं भगवन्नियम्या भूतसंघास्तत्तत्कर्मानुसारं धावमानं नियन्तारं परमात्मानमनुसृत्य प्रवर्त्तन्ते, कथमिव रजांसि धावमानमनिलमनुसृत्य यथा धावन्ति तथेत्यर्थः। अस्यायं भावः। यथा हर्म्यतलश्वभ्रादिषु रजांस्यनुनेतुर्वायोर्न वैषम्यमस्त्येवंभूतानि कर्मानुरूपं देवमनुष्यादिषु नयतः परमात्मनोऽपीति॥ २०॥ तत्तत्कर्मानुरूपनियमनमेवोपपादयति। आयुष इति। विभुः सर्वान्तरात्मा, असौ भगवान्, दुःस्थस्य कर्मवश्यस्य कर्मायत्तसुखदुःखादिभाज इत्यर्थः। जन्तोः आयुषः अपचयं ह्रासम्, तथैव उपचयं वृद्धिं च, स्वयम् उभाभ्यामपचयोपचयाभ्यां रहितः, अत एव स्वस्थः, हेयप्रतिभटतया स्वस्वभावेनैव वर्त्तमानः सन्, विदधाति, करोति। एवमुत्पत्तिमरणयोर्देहादिवैचित्र्ये सुखदुःखयोश्च, कारणं तत्तत्कर्मैव, ईश्वरस्तु प्रयोजयितृकारणमित्युक्तं भवति॥ २१॥ एवं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकलप्राणिवर्गान्तरात्मानं कालात्मतया कृतजगदुदयविभवलयं सर्वज्ञत्वसर्वशक्तित्वाद्यपरिमितोदारगुणां बुद्धिं तत्तत्कर्मानुगुणं जगन्नियन्तारम्, सर्वभूतसुहृदं परमात्मानमविदित्वा, एतमेव कालकर्मादिरूपेण विवदन्ते केचनेत्याह। केचिदिति। हे नृप एनमुक्तप्रकारेण सुखदुःखादिहेतुमीश्वरम्, केचित् कर्म पुण्यपापात्मककर्मरूपं वदन्ति। अपरे स्वभावं परिणामहेतुम्, तत्र प्रकृतिपुरुषयोर्मध्ये प्रकृतेः स्वरूपान्यथाभावरूपः परिणामस्तं वदन्ति। एके केचन कालं सत्त्वादिप्रकृतिगुणक्षोभहेतुककालम्, वदन्ति परे दैवं विधिम्, अपरे उत अपरे पुनरित्यर्थः। पुंसः परमपुरुषस्य, कामं संकल्पं वदन्ति। अयमेव पक्षः श्रेयान् पुण्यापुण्यरूपस्य कर्मणस्तज्जन्यादृष्टस्यापि भगवन्निग्रहानुग्रहरूपत्वेन तत्संकल्पानतिरिक्तत्वात्। कालस्वभावयोरपि तत्संकल्पाधीनत्वात्। केचित्त्वत्र पुंसो जीवस्य काम इतिव्याख्यानं कुर्वन्ति तत्त्वयुक्तम्, दुःखविषयस्वकामानुपपत्तेः। अत्र केचिन् मीमांसकाः, अपरे चार्वाकादयः, परे मौहूर्त्तिकाः, अपरे वात्स्यायनादय इत्युक्त्वा व्याख्यायन्ते ततोऽपि यथोक्तार्थ एव साधुः॥ २२॥

पूर्वश्लोकोक्तचरमपक्षार्थस्यैव साधुत्वं ज्ञापयन्कामस्य दुर्ज्ञेयत्वमाह। अव्यक्तस्येति। हे तात, व्यक्तैरिन्द्रियैर्न व्यज्यते इत्यव्यक्तस्तस्य, अत एव अप्रमेयस्य देशादिभिरपरिच्छिन्नस्य, ऐन्द्रियकं हि सर्वं देशकालादिभिः परिच्छिद्य गृह्यतेऽयं तु न तथाभूत इति भावः। अनेन विशेषणद्वयेन प्रकृतिपुरुषवैलक्षण्यसिद्धिः। प्रकृतेर्व्यक्तत्वात्पुरुषस्याणुत्वेन प्रमेयत्वात्। उभयवैलक्षण्यापादकं विशेषणान्तरमाह। नानाशक्तीनां विविधशक्तीनामुदयोऽभिव्यक्तिर्यस्मात्तस्य च 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतेः। एवंभूतस्य भगवतः, चिकीर्षितं कर्तुमिष्टं, स्वस्य लोकस्य यः संभव उद्भवस्तम्। संहारादीनामपीदमुपलक्षणम्। अद्धा तत्त्वतः, कः वेद वै। लोके इति शेषः। कोऽपि न जानात्येवेत्यर्थः। प्रकृतिपुरुषविलक्षणस्यानन्तविविधशक्तेः परमपुरुषस्य जगदुत्पत्तिस्थितिसंहारादिकर्त्तव्यतासंकल्पविषयो व्यापार एवंविध इति तत्त्वतः कोऽपि न जानातीत्यतस्तत्त्वज्ञानाभावाद्विशेषांशे विवाद इत्यर्थः। तथा च श्रुतिः। 'को अद्धा वेद क इह प्रावोचत् कुत आ जाताः कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेऽनाथाः को वेद यत आ बभूव' इत्यादिः॥ २३॥ उक्तार्थमुपसंहरति। न चैत इति। हे पुत्रक एते धनदानुगाः कुबेरस्य भृत्याः, भ्रातुः त्वद्भ्रातुः, हन्तारः न च नैव भवन्ति। किं तु हे तात, पुंसः कर्मवश्यस्य जनस्य, विसर्गादानयोरुत्पत्तिमरणयोः, दैवमीश्वर एव, कारणं हि॥ २४॥ नन्वीश्वरश्चेदुत्पत्त्यादिकारणं तर्हि जीववत्सोऽपि सत्त्वादिगुणविशिष्टत्वात्तत्प्रयुक्तजगद्व्यापाररूपक्रियाश्रयत्वाच्च गुणकर्मभिर्बध्येतैव तत्राह। स एवेति। यद्यपि अजः स ईश्वरः एव, विश्वं सृजति, स एव अवति रक्षति, स एव हन्ति च। तथापि निरहंकाराद्धेतोः, देहात्मनोस्तादात्म्याभिमानोऽहंकारस्तदभावाद्धेतोरित्यर्थः। गुणकर्मभिः गुणानां सत्त्वादीनां कर्मभिः कार्यभूतैः कर्मभिः, न अज्यते नैव बध्यते। यद्यपि जगदुत्पत्त्यादीन् गुणकार्यभूतान् व्यापारानीश्वरः करोति, तथापि स्वशरीरभूतप्रकृतिपुरुषात्मकेषु देवादिपदार्थेषु स्वसंकल्पकृतोत्पत्तिस्थितिलयेषु तादात्म्याभावात् स्वयमजहत्स्वस्वभावत्वाच्च, न कर्मभिर्बध्यते। जीवस्तु कर्मणा संकुचितज्ञानत्वेन जहत्स्वभावत्वाद्देवादिशरीरेषु स्वतादात्म्याभिमानाच्च बध्यते इत्यर्थः॥ २५॥

अथ य एवंभूतो भगवांस्तमेव रागद्वेषादिभिर्विमुक्तस्त्वं सर्वात्मना भजस्वेत्याह। एष इत्यादिना। एषः य एवंविधो भगवानभिहितः, सोऽसावित्यर्थः। भूतानां देवमनुष्यादीनां भूतसंघानामात्मा, तर्हि स किं जीवः, न भूतेश ईश्वरः 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इत्युक्तरीत्या चिदचिदात्मकभूतानामन्तः प्रविश्य तत्तत्कर्मानुरूपं नियन्ता इत्यर्थः। न केवलं भूतेश एव, अपि तु तत्तत्कारणं चेत्याह। भूतानि भावयत्युत्पादयतीति भूतभावनः। यद्वा भूतानि भावयति सृष्ट्यादौ सत्तादिमन्ति करोतीति तथाभूतः। भूतानां सत्तास्थितिप्रवृत्तिहेतुरित्यर्थः। हेतुत्वमपि न निकृष्टस्वरूपेण, अपि तु विशिष्टस्वरूपेणेत्याह। स्वशक्त्या कार्योपयोगिस्वापृथक्सिद्धविशेषणभूतया मायया, युक्तः सन्, भूतानि सृजति, अत्ति संहरति। पाति रक्षति च॥ २६॥ तमिति। हे तात, मृत्युमभजतां बन्धकम् अमृतं भजतां तु मोचकं, दैवं स्वतेजसैव विद्योतमानं, जगतां परमयनमाधारम्। जगतां प्राप्यं प्रापकमाधारं चेत्यर्थः। तमेवंविधं भगवन्तं सर्वात्मना सर्वप्रकारेण मनोवाक्कायैरित्यर्थः। सर्वात्मकब्रह्मभावेनेति वा। उपेहि शरणं गच्छ। ब्रह्मादीव्यस्यैतस्य शरणमेव सर्वेषां युक्तमिति सूचयन्नस्य ब्रह्मादीव्यत्वमाह। नसि नासिकायां दामभिः सूत्ररज्जुभिर्यन्त्रिता बद्धाः गावो बलीवर्दाः, यथा तथा विश्वसृजो विश्वस्रष्टारश्चतुर्मुखमरीच्यादयः यस्मै भगवते, बलिं हरन्ति वै। तं पूजयन्तः सन्तस्तत्कारितं कर्म कुर्वन्तीत्यर्थः। अनेन भगवतः सर्वस्य वशित्वं सिद्धम्। 'यस्य वशे सर्वं वर्त्तते स सर्ववशीत्युच्यते। तथा च श्रूयते। 'सर्वस्य वशी सर्वस्येशानः एष भूताधिपतिः एष भूतपालः' इत्यादिना॥ ७२॥ तव तु विशेषतस्तद्भजनमेव युक्तमाबाल्यं तस्यैवाभ्यस्तत्वादित्याह। य इति। यः त्वं भवान् पञ्च वर्षाणि यस्येति पञ्चवर्षः पञ्चवर्षवयाः सन् सपत्न्याः मातुः वचसा भिन्नमर्मा विभिन्नहृदयश्च सन् जननीं सुनीतिं विहाय वनमरण्यं गतः प्रविष्टः। तत्र प्रत्यगक्षं प्रत्यञ्चि अक्षाणीन्द्रियाणि यस्मिंस्तं भगवन्तम् आराध्य त्रिलोक्याः मूर्ध्नि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपरिष्टात् पदं स्थानं लेभे लब्धवान् ॥ २८ ॥ तमिति । अङ्ग हे ध्रुव आत्मदृक् तच्छरीरभूतजीवात्मदर्शी त्वं यस्मिन् जीवात्मनि भेदं भेदात्मकम् इदं विश्वम् असत् प्रतीयते । अविद्यमानमेव प्रतीयते । स्वतो जीवे देवमनुष्याद्यात्मक विश्वम-विद्यमानमपि पुण्यापुण्यरूपानादिकर्मणा प्रतीयते इत्यर्थः । मुक्तविग्रहे निरवयवे तस्मिन् आत्मनि जीवे व्यपाश्रितं व्यवस्थितं निर्गुणं निरस्तहेयगुणम् एकं निःसमाभ्यधिकम् अक्षरं निर्विकारं विमुक्तं नित्यमुक्तं तम् आत्मानं परमात्मानम् एवमुक्तवक्ष्य-माणप्रकारेण अन्विच्छ अनुवर्त्तस्व । देवमनुष्यादिरूपं सततपरिणामं वस्तु अत्रासच्छब्दवाच्यं बोध्यं सततपरिणामिनो वस्तुन उत्तरोत्तरावस्थाप्राप्तौ पूर्वपूर्वावस्थापरित्यागात्सर्वदा सदिति व्यपदेष्टुमनर्हत्वादसदिति व्यवहरन्ति । तदुक्तं श्रीविष्णुपुराणे 'मही घटत्वं घटतः कपालिका चूर्णं रजः परमाणुस्ततोऽणुः' इत्यादिना ॥ २९ ॥

ननूपासित एव भगवान्मया बाल्ये किमधुना भजस्वेत्युच्यते इत्याशङ्कायामनिरस्ताहंममाभिमानेन त्रिवर्गलिप्सुना त्वया तत्र भगवानुपासितस्ततः प्रकृतिकार्यब्रह्माण्डांतर्गतत्वाद्यत्प्राकृतं स्थानं तदगाः इदानीं निर्हेतुकभक्तिं विधाय प्राकृत-भावविमुक्तोऽप्राकृतं तद्धामाक्षरं प्राप्य विमोक्ष्यसीत्याह । त्वमिनि । प्रत्यक् जीवस्तस्यात्मन्यन्तर्यामिणि यद्वा प्रत्यक् जीव आत्मा शरीरं यस्य तस्मिन्, भगवति पूर्णषाड्गुण्ये अनन्ते कालादिपरिच्छेदरहिते आनन्दमात्रे आनन्दैकरसे न तु जडे इत्यर्थः । उपपन्नसमस्तशक्तौ उपगताशेषज्ञानबलक्रियादिशक्तौ, परमपुरुषे त्वं परमामहैतुक्यव्यवहितेत्युक्तविधां भक्तिं शनकैः समाहितचित्तः सन् विधाय तदा ममाहमिति प्ररूढम् अहंममाभिमानाभ्याम् रूढमूलमित्यर्थः । अविद्याग्रन्थिमविद्यात्मकं ग्रन्थिं विभेत्स्यसि । विशेषेण निर्मूलं छेत्स्यसीत्यर्थः ॥ ३० ॥ यदर्थं तत्त्वोपदेशस्तमाह । संयच्छेति । हे राजन् श्रेयसां पुरुषार्थानां परं केवलं प्रतीपं प्रतिकूलं रोषं क्रोधं भूयसाऽतिशयितेन श्रुतेन तत्त्वश्रवणेन अगदेनौषधेन आमयं रोगं यथा तथा संयच्छ उपसंहर ते तुभ्यं भद्रमस्तु ॥ ३१ ॥ रोषस्य श्रेयःप्रतीपत्वं प्रपञ्चयति । येनेति । येन रोषेण उपसृष्टाद्व्याप्तात् पुरुषात् लोकः भृशं नितराम् उद्विजते बिभेति । आत्मनः स्वस्य अभयं निःश्रेयसम् इच्छन् बुधः विद्वान् तद्वशं रोषवशत्वं न गच्छेत् न प्राप्नुयात् रोषविहिताधर्मात्पुरुषार्थनाश उत्पद्यते इत्यर्थः ॥ ३२ ॥ हेलनमिति । किं च गिरिशभ्रातुः शिवसखस्य, धनदस्य कुबेरस्य, हेलनमवमानं त्वया कृतं यत् यतः भ्रातृघ्नान् इति बुद्ध्या एते मद्भ्रातृहन्तार इति मतिं स्वीकृत्येत्यर्थः । अमर्षितः संजातामर्षः सन् पुण्यजनान् यक्षान् जघ्निवान् ॥ ३३ ॥ तमिति । हे वत्स तं धनदं संनत्या प्रणत्याचरणेन प्रश्रयोक्तिभि-र्विनयवाग्भिश्च आशु शीघ्रमेव प्रसादय प्रसन्नं कारय । महतां धनदादीनां, तेजः नोऽस्माकं कुलं यावत् न अभिभविष्यति, ततः पूर्वमेव प्रसादयेत्यर्थः ॥ ३४ ॥

मनूक्तिमुपसंहरति । एवमिति । स्वायंभुवः मनुः, पौत्रं ध्रुवम् एवमुक्तप्रकारेण, अनुशास्यादिश्य, तेन ध्रुवेण अभि-नन्दितोऽभिमतः सन्, ऋषिभिः साकं स्वपुरं ययौ ॥ ३५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वादशोऽध्यायः

मैत्रेय उवाच

ध्रुवं निवृत्तं प्रतिबुद्ध्य वैशसादपेतमन्युं भगवान् धनेश्वरः ।
तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानोऽभ्यवदत् कृताञ्जलिम् ॥ १ ॥

द्वादशे पुरमायातो धनदेनाभिनन्दितः । आरुरोह हरेः स्थानं यज्ञैरिष्ट्वेति कीर्त्यते ॥ १ ॥

एवं पितामहानुशिष्टो ध्रुवः पुण्यजनवधतो निवृत्तः कुबेरप्राप्तवरः स्वधर्माराधितगोविन्दो गुप्ताखिलक्षितिमण्डलो लब्धध्रुवक्षितिर्बभूवेत्याह मुनिः ध्रुवमित्यादिना । ध्रुवमिति । अपेतमन्युं मनूपदेशेनापगतक्रोधम् अत एव वैशसाद्यक्षाणां वधात् निवृत्तं ध्रुवं प्रतिबुद्ध्य ज्ञात्वा, भगवान् वरप्रदानाद्यैश्वर्यवान धनेश्वरो निधिपतिः कुबेरः, तत्र ध्रुवसंनिधौ आगतः । चारणाश्च यक्षाश्च, किंनराश्च, तैः संस्तूयमानः सन् कृताञ्जलिं बद्धाञ्जलिं ध्रुवम् अभ्यवदद्दुवाच ॥ १ ॥ यदुवाच तदाह । भो भो इति षड्भिः । भो भो इति संबोधने । हे क्षत्रियदायाद क्षत्रियपुत्र, ध्रुव क्रोधत्यागनिमित्तहर्षातिरेकात् द्विरुक्तिः । हे अनघ यक्षवधनिमित्तपापरहित, ते तुभ्यं परितुष्टः अस्मि । कुतः यद्यस्मात् त्वं पितामहादेशात् स्वायंभुवमनोरुपदेशात् दुस्त्यजमपि वैरम् अत्यजः त्यक्तवान् असि ॥ २ ॥ ननु नैवाहमनघः पुण्यजनहननिमित्तपापसंबन्धात्तत्राह । नेति । भवान् यक्षान् न अवधीन्न हतवान् । यक्षाः तव भ्रातरं न हतवन्तः । कुतः हि यस्मात्, भूतानाम् अप्ययभावयोः मरणोत्पत्त्योः, कालः कालशरीरकः परमेश्वरः, एव प्रभुः समर्थः कारणमित्यर्थः ॥ ३ ॥ ननु हन्तृत्वं तत्प्रयुक्तखेदश्रमादिकं च, मया यक्षैश्चापरोक्षं समनुभूयमानम्, समपहृत्येश्वर एव हन्तेत्येवं कथमुच्यते तत्राह । अहं त्वमिति । पुरुषस्य हन्तुरिति शेषः । अज्ञानात् देहविलक्षणात्मयाथात्म्यज्ञानाभावात् अतद्देहस्तस्य ध्यानं तस्मात् । असद्ध्यानादिति पाठेऽप्ययमेवार्थः । देवादिदेहेष्विति शेषः । अहं त्वम् इति अहं हन्ता त्वं हन्ता इत्येवंरूपा, अत एव अपार्था अर्थशून्या । अन्यथाज्ञानविपरीतज्ञानरूपेति यावत । धीर्बुद्धिः, स्वाप्नी इव स्वप्नसंबन्धिनी धीर्यथा तथेत्यर्थः । आभाति । धर्म्यन्तरे धर्मान्तरप्रतीतिरन्यथाज्ञानं यथा पीतः शङ्ख इति शुक्ले पीततातप्रतीतिः । धर्म्यन्तरस्य धर्म्यन्तरत्वेन प्रतीतिर्विपरीतज्ञानं शुक्तौ यथेदं रजतमिति प्रतीतिः । देहात्मबुद्धिः स्वाप्नधीवन्न तावत्कालिकसुखदुःखादिमात्रहेतुरपि तूत्तरोत्तरजन्ममरणादिरूपसंसृतिहेतुत्वेन महानर्थकारिणी चेत्याह । यया अहं त्वमिति बुद्ध्या, बन्धश्च, विपर्ययश्च, तौ भवतः । तत्र बन्धो जन्ममरणादिरूपः संसारः । विपर्ययः स्वाभाविकापहतपाप्मत्वाकारविपरीततानपहतपाप्मत्वाद्याकारभावनाभूतः । अत्रायं भावः । यद्यप्यपरोक्षं यथा तथा त्वया यक्षैश्च, हन्तृत्वादिकमनुभूयते, तत्प्रयुक्तं खेदश्रमादिकं च, तथापि देहविशिष्टात्मनोऽपि हन्तृत्वादिबुद्धेरज्ञानमूलत्वप्रतिपादनात् । 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' इत्यादिभिरीश्वरस्यैव कालशरीरकस्य हन्तृत्वप्रतिपादनाच्च न बाधः ॥ ४ ॥

तदिति । भजस्वेति । हे ध्रुव, तत्तस्मात् कालशरीरकस्य भगवत एवोत्पत्तिमरणादिहेतुत्वात् सर्वाणि च तानि भूतानि च सर्वभूतानि तानि च, आत्मा जीवश्च तौ, विग्रहः शरीरं यस्य, तम् अधोक्षजम् इन्द्रियागोचरमित्यर्थः । नन्वयमधोक्षजश्चेत्कथं भजनीयस्तत्राह । भजनीयावङ्घ्री चरणौ यस्य तम् इन्द्रियागोचरत्वेऽपि योगयुञ्जनसा ध्येयचरणमित्यर्थः । भवं संसारं छिनत्तीति तं न केवलं स्वयमसंसार्येवापितु भजतामपि भवच्छिदमित्यर्थः । ननु सर्वभूतात्मविग्रहमिति विशेषणेनास्य जीववत्प्रकृतिसंबन्धाभिधानात्कथं भवच्छिदत्त्वं तत्राह । गुणमय्या सत्त्वादिगुणप्रधानया, शक्त्या कार्योपयुक्तस्वापृथक्सिद्धविशेषणभूतया, आत्ममायया स्वसंबन्धिन्या प्रकृत्या, युक्तं नियन्तृत्वेन तत्सहितं विरहितं विशेषेण तावदधीन्यतया तद्विरहितमित्यर्थः । जीवो मायया परवश इति संसारी, परमेश्वरस्तु तस्याः प्रभुरित्यसंसारीति भावः । भगवन्तं सर्वभूतात्मभावेन चिदचिच्छरीरकत्वेन अभवाय भजस्व । ते तुभ्यं भद्रं मङ्गलम् अस्तु । गच्छ याहि । गृहान्प्रतीति शेषः । इत्युभयोरेकान्वयः ॥ ५-६ ॥ एवं परमपुरुषार्थलक्षणमोक्षसाधनत्वेन प्रकृतिपुरुषशरीरकस्यामृतेश्वरस्य भगवतो भक्तिं विधेहीत्युपदिश्य तन्मनःपरिशीलनाय त्रिवर्गे तं प्रलोभयति । वृणीहीति । हे औत्तानपादे उत्तानपादपुत्र, हे नृप यत् मनोगतं मनीषितं तत् काममसंकोचेन, अविशङ्कितः सन् त्वं मत्तः वृणीहि वरय । धर्मादीनां त्रयाणां मध्ये यत्तवेप्सितं तद्वृणीहीत्यर्थः । त्रिवर्गवरणं च तवानुचितमिति व्यञ्जयन्विशिनष्टि । अङ्ग हे ध्रुव वयं त्वां परं केवलं परैर्ब्रह्मादिभिरप्यर्ह्येते पूज्येते इति परार्हौ तथाभूतौ, यावम्बुजनाभस्य भगवतः पादौ, तयोः अनन्तरमव्यवहिततयाऽचिन्त्यमित्यर्थः । शुश्रुम ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं त्रिवर्गे प्रलोभितो ध्रुवस्त्रिवर्गमनादृत्य भगवच्चरणारविन्दभक्तिदार्ढ्यमेव वृणीतवानित्याह मुनिः। स इति। राजराजेन कुबेरेण वराय वरवरणाय चोदितः संप्रेरितः महाभागवतः महामतिः धर्मादिष्वल्पास्थिरमतिः स शास्त्रप्रसिद्धः सः ध्रुवः यया स्मृत्या यत इति पाठे यतोऽचलितायाः स्मृतेः दुरत्ययं दुरतिक्रमणीयमपि तमस्तमःकार्यं संसारात्मकं बन्धम् अयत्नेन तरति व्यपोहति। तथाभूतां हरौ भगवति अचलितां सुदृढां स्मृतिं वव्रे ॥ ८ ॥ तस्येति। ऐलविलः कुबेरः प्रीतेन तुष्टेन मनसा तां भगवत्पदस्मृतिं दत्त्वा तस्य ध्रुवस्य पश्यतः सतः ततः स्थानात् अन्तर्दधे अन्तर्हितवान्। स ध्रुवः अपि स्वपुरं प्रत्यपद्यत अगात् ॥ ९ ॥ अथेति। अथानन्तरं भूरिदक्षिणैः समग्रदक्षिणैः, द्रव्यं पुरोडाशादिकं च, क्रिया ऋत्विग्व्यापारश्च देवता इन्द्रादिश्च, तासां संबन्धमात्रे षष्ठी। द्रव्यादिसंबन्धिभिः द्रव्यादिसमवायरूपैरिति यावत्। क्रतुभिर्यज्ञैः, कर्म कर्मसाध्यं कर्मभिराराध्यमिति यावत्। न केवलं कर्मैव अपि तु कर्मफलप्रदं यज्ञेशं यज्ञानामीशं, प्रयोजयितारं चेत्यर्थः। अयजत यष्टवान् ॥ १० ॥ न केवलं यज्ञैरेवायजतापि तु, पितामहप्रभृतीनामुपदेशानुसारेण सर्वात्मकत्वेन भगवन्तमभजत चेत्याह। सर्वात्मनीति। सर्वात्मनि सर्वेषामात्मभूते अन्तः प्रविश्य प्रशासनेन धारके इत्यर्थः। अत एव सर्वे सर्वशब्दवाच्ये, पाठान्तरे शुद्धसत्त्वमयदिव्यमङ्गलविग्रहविशिष्टे इत्यर्थः। असत्त्वे इति छेदविधाने तु प्राकृतसत्त्वादिगुणरहिते इत्यर्थः। अच्युते आश्रितव्रातरक्षैकदीक्षे भगवति तीव्रौघामविच्छिन्नप्रसरां भक्तिम् उद्वहन् कुर्वन् आत्मनि स्वस्मिन् भूतेषु सर्वेषु भूतेषु च, अवस्थितमात्मत्वेनावस्थितं विभुं सर्वेश्वरं तं भगवन्तमेव ददर्श साक्षात्कृतवान् ॥ ११ ॥ तमिति। प्रजाः शीलसंपन्नं सुस्वभावसद्वृत्त्यादियुक्तं ब्रह्मण्यं ब्राह्मणसेवापरायणं दीनेषु वत्सलः स्निग्धस्तं दीनदोषानिरीक्षणपूर्वं सर्वथा रक्षकमित्यर्थः। धर्मसेतूनां धर्ममर्यादानां गोप्तारं रक्षकं पालकमिति यावत्। तं ध्रुवमेव पितरं मेनिरे पितरमिवामन्यन्तेत्यर्थः ॥ १२ ॥ षट्त्रिंशदिति। भोगैः सुखानुभवैः पुण्यक्षयम्, अभोगैर्दुःखानुभवैः अशुभक्षयं पापक्षयं च, कुर्वन् पुण्यपापयोरुभयोरपि स्वफल-जननद्वारा ब्रह्मप्राप्तिविरोधित्वादनुभवेनैव पुण्यपापे विधुन्वन्नित्यर्थः। षड्त्रिंशद्वर्षसाहस्रं षडधिकत्रिंशतिसहस्रसंख्याकवर्षपर्यन्त-मित्यर्थः। क्षितिमण्डलं शशास अनुशिष्टवान् ॥ १३ ॥ एवमिति। एवं बह्वः सवाः संवत्सरा यस्मिंस्तं त्रिवर्गौपयिकं त्रिवर्ग-साधनं कालम् अविकलेन्द्रियः अव्याहतेन्द्रियः महात्मा ध्रुवः नीत्वातिवाह्य पुत्राय नृपासनम् अदात् ॥ १४ ॥

मन्यमान इति। ततः इदं देवमनुष्याद्यात्मकं विश्वम् आत्मनि जीवे, मायारचितसंसर्गकृतं तदपि अविद्यारचितं प्रकृतिपरिणामरूपं स्वप्नगन्धर्वनगरोपमं स्वप्नानुभूतगन्धर्वनगरमिव स्थितं मन्यमानः। केचित्तु स्वप्नमिव गन्धर्वनगरमिव चेत्याहुः ॥ १५ ॥ आत्मेति। तथा आत्मा देहश्च स्त्रियो दाराश्च अपत्यानि पुत्रादयश्च सुहृदो मित्राणि च तान् बलं चतुरङ्गयुक्तं सैन्यम् ऋद्धं समृद्धं कोशं धनम् अन्तःपुरं रम्या रमणीयाः परिविहारभुवः परितो वर्त्तमानानि विहारस्थानानीत्यर्थः। जलधिमेखला यस्य तत् भूमण्डलं जम्बूद्वीपात्मकं भूवलयं च, कालोपसृष्टं कालेनोपद्रुतमस्थिरमिति यावत्। इतीत्थम् आकलय्य विचार्य, स ध्रुवः विशालां बदरिकाश्रमं प्रययौ ॥ १५ ॥ तत्र तत्कृतमष्टाङ्गयोगमाह। तस्यामिति। तस्यां विशालायां शिववाः निर्मलं पवित्रं च वारि विगाह्य प्रविश्य, अनेन स्नानादिनियमा उक्ताः। विशुद्धकरणः विशुद्धेन्द्रियः। अनेन शमदमादयो यमा उक्ताः। बद्धानि आसनानि स्वस्तिकादीनि येन सः, अनेनासनानि स्फुटमुदितानि। जितो मरुत्प्राणो येन सः, अनेन प्राणायामोऽपि स्फुटमेवाभिहितः। मनसा आहृतानि प्रत्याहृतानि अक्षाणि श्रोत्रादीनीन्द्रियाणि येन सः, अनेन प्रत्याहारोऽपि स्फुटमेवाभिहितः। एवंभूतः सन् स्थूले स्थूलतावति, भगवत्प्रतिरूपे भगवद्दिव्यविग्रहे, दधार। मन इति शेषः। अनेन धारणोक्ता। एतद्भगवत्प्रतिरूपम् अव्यवहितः विजातीयप्रत्ययान्तररहितः सन्, ध्यायन् ध्रुवः तद्दिव्यात्मस्वरूपं समाधौ व्यसृजदनुसंहितवान्। अनेन पदद्वयेन ध्यानसमाधिस्वरूपेऽभिहिते। तत्र शुभाश्रये भगवति, मनोनिवेशनमात्रं धारणा। शुभाश्रयभगवत्स्वरूपगतसौकुमार्यादिगुणचिन्तनं ध्यानम्। तज्जनितानन्दातिशयात्पारवश्यं संप्रज्ञातसमाधि-रिति भेदः ॥ १७ ॥

भक्तिमिति। एवम् अजस्रं नित्यं भगवति हरौ, भक्तिं प्रवहन् प्रकर्षेण कुर्वन्, मुक्तिलिङ्गः त्यक्तदेहात्माभिमानः, आनन्दबाष्पकलया आनन्दजनिताश्रुप्रवाहेण, मुहुः अर्द्यमानः अभिभूयमानः, विक्लिद्यमानं द्रवत् हृदयं यस्य सः, पुलकैराचितं व्याप्तमङ्गं यस्य सः ध्रुवः, असौ अहम् इति आत्मानं न अस्मरत् ॥ १८ ॥ स इति। स ध्रुवः, उद्यतमुदितं राकापतिं पौर्णिमाचन्द्रमिव, दश दिशः विभ्राजयत्, नभस आकाशात्। अवतरत् अवरोहत्, विमानाग्र्यं विमानश्रेष्ठं ददर्श ॥ १९ ॥ तत्रेति। अनु अनन्तरं तत्र विमानाग्र्ये, चतुर्भुजौ श्यामौ श्यामवर्णौ, भगवत्सारूप्यभाक्त्वात् किशोरौ यौवनारम्भजुषौ, अरुणाम्बुजेक्षणौ रक्तकमलच्छदनयनौ, किरीटं च, हाराश्च, अङ्गदे च, तैः सहिते चारुणी कुण्डले ययोस्तौ, सुशोभनानि वासांसि ययोस्तौ, गदाम् अवष्टभ्य गदावष्टम्भं विधाय स्थितौ, देवप्रवरौ ददर्शेत्यनुषङ्गः ॥ २० ॥ विज्ञायेति। तौ देवप्रवरौ उत्तमगायः पुण्यश्लोको भगवांस्तस्य किंकरौ, तत्रापि मधुद्विषः भगवतः, पर्षत्प्रधानौ परिषन्मुख्यौ, इत्येवं विज्ञाय, अभ्युत्थितः संहताञ्जलिः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साध्वसेन भगवत्पार्षदविलोकनजातसंभ्रमेण, विस्मृतः क्रमः पूजाक्रमो यस्य तथाभूतः ध्रुवः, केवलं नामानि गृह्णन् हे हरे स्वामिन्नाराध्ण कृष्ण घनश्याम सहजानन्देति संबुद्ध्योच्चारयन् नाम। बद्धाञ्जलिर्नमश्चकारेत्यर्थः ॥ २१ ॥ तमिति। कृष्णस्य पादयोः अभिनिविष्टमारोपितं चेतश्चित्तं येन तं प्रश्रयेण विनयेन नम्रा प्रह्वीभूता कंधरा यस्य तं बद्धाञ्जलिं तं ध्रुवम् उपसृत्य समीपमागत्य, पुष्करनाभस्य पद्मनाभस्य भगवतः, संमतौ भृत्यौ सुनन्दनन्दौ, सस्मितं स्मितेन सहितं यथा तथा, प्रत्यूचतुध्रुवं प्रति कथयामासतुः। पाठान्तरे प्रीतिपूर्वकमित्यर्थः। ऊचतुः ॥ २२ ॥ भो भो इति। भो भो राजन् ते तव सुभद्रं सुतरां भद्रम्। अस्त्विति शेषः। अवहित एकाग्रमनाः सन् नोऽस्माकं वाचं शृणु। यः भवान् पञ्चवर्षः पञ्चवर्षवयाः सन् तपसा देवं भगवन्तम् अतीतृपत् तर्पितवान ॥ २३ ॥ तस्येति। अखिलजगद्धातुः निखिलजगन्निर्माणचतुरस्य देवस्य, निरवधिकातिशयैश्वर्यद्योतमानस्य, शार्ङ्गिणः शार्ङ्गधनुर्धरस्य, तस्य भगवतः पार्षदौ आवां त्वां भगवत्पदं भगवतो वैकुण्ठनाथस्य स्थानं प्रति, नेतुं गमयितुम् इह संप्राप्तौ भवावः ॥ २४ ॥

सुदुर्जयमिति। सुदुर्जयं त्वदितरैर्दुःखेनाप्यसाध्यं विष्णुपदं वैष्णवं स्थानं त्वया जितं संसाधितम्। अस्य सुदुर्जयत्वमाह। सूरयः सर्वेषामुपरिष्टादवस्थिताः सप्तर्षिप्रभृतयः, यत्पदम् अप्राप्यैव, परं केवलं विचक्षते अधः स्थिताः सन्तः पश्यन्ति। तथा यत् चन्द्रश्च दिवाकरश्च तावादी येषां ते, ग्रहाश्च ऋक्षाणि च ताराश्च ते, दक्षिणं प्रदक्षिणं यथा भवति तथा, परियन्ति परितो भ्रमन्ति। तत्पदम् आतिष्ठ अधितिष्ठ॥ २५ ॥ पुनरपि तदेव विशेषयन्नुक्तार्थं स्फुटमाह। अनास्थितमिति। अङ्ग हे ध्रुव यत् कर्हिचित्कदाचिदपि ते तव पितृभिर्मन्वादिभिः, तथा अन्यैः कैश्चिदपि अनास्थितमनधिष्ठितम् अत एव जगतां वन्द्यं एवं सर्वथाऽप्युत्तममित्यर्थः। विष्णोः संबन्धि परमं तत् पदम् आतिष्ठ। बाल्य एव त्वया भगवद्भक्त्या जितमस्तीति तदधुनाऽधितिष्ठेत्यर्थः ॥ २६ ॥ एतदिति। हे आयुष्मन् उत्तमश्लोकमुख्येन भगवता एतत विमानप्रवरं देवयानोत्तमम् उपस्थापितं प्रेषितमस्ति अतः अधिरोढुमेतदारोहणं कर्तुं त्वम् अर्हसि योग्यो भवसि ॥२७॥ निशम्येति। वैकुण्ठनियोज्यमुख्ययोर्भगवत्पार्षदप्रवरयोः मधु च्यवते स्रवतीति मधुच्युत्ताममृतस्राविणीं पाठान्तरे मधु च्युतं यस्यास्तां वाचं निशम्य उरुक्रमो भगवान्प्रियो, यस्य सः भगवत्प्रियो ध्रुवः कृताभिषेकः कृतमङ्गलस्नानः कृतं नित्यं नित्यकर्म मङ्गलमलंकरणं च येन स तथाभूतः सन् मुनीन् प्रणम्य तेभ्यः आशिषम् अभ्यवादयत वाचयामास ॥२८॥ परीत्येति। धिष्ण्याग्र्यं विमानश्रेष्ठम् अभ्यर्च्यादौ संपूज्य ततः परीत्य परिक्रम्य पार्षदौ च अभिवन्द्य एतत्तदर्चनस्याप्युपलक्षणम्। रूपं तदेव स्वस्वरूपं हिरण्मयं प्रकाशबहुलं ज्योतिर्मयमित्यर्थः। बिभ्रत् सन् तद्विमानाग्र्यम् अधिष्ठातुम् इयेषैच्छत ॥ २९ ॥ तदेति। तदा विमानाधिरोहणसमये, मृदङ्गपणवादयः दुन्दुभयः नेदुः गन्धर्वमुख्याः प्रजगुः कुसुमवृष्टयश्च पेतुः ॥ ३० ॥

स चेति। स विमानाग्र्यमधिरूढो ध्रुवः चापि स्वर्लोकं ध्रुवपदम् आरोक्ष्यन् अहं दीनां सुनीति जननीं मातरं हित्वा परित्यज्य अगम् अभगवद्भक्तैर्दुर्गमं त्रिविष्टपं यास्ये इति अन्वस्मरत्स्वमातरमस्मार्षीत् ॥ ३१ ॥ इतीति इत्येवंभूतं तस्य ध्रुवस्य व्यवसितमभिप्रायं व्यवसीय ज्ञात्वा सुरोत्तमौ सुनन्दनन्दौ देवयानेन विमानेन पुरः इति शेषः। गच्छतीं देवीं द्योतमानां सुनीत्याख्यध्रुवमातरं दर्शयामासतुः ॥ ३२ ॥ तत्र तत्रेति। तत्र तत्र पथि वैमानिकैः प्रशंसद्भिः सुरैः कुसुमैः अवकीर्यमाणः ध्रुवः क्रमशः पञ्चमस्कन्धोक्तग्रहस्थितिमनतिक्रम्येत्यर्थः। ग्रहान् ददृशे। आदित्यादिस्थानानि क्रमशो दृष्टवानित्यर्थः ॥ ३३ ॥ त्रिलोकीमिति। सः ध्रुवः देवयानेन सुनन्दनन्दाख्यदेवप्रवरोपस्थापितविमानेन त्रिलोकीं मुनीन् सप्तर्षीनपि अतिव्रज्यातिक्रम्य अथ परस्तात्ततः परस्ताद्वर्तमानं यत विष्णोः पदं तत् ध्रुवा शाश्वती गतिर्यस्य तथाभूतः सन् अध्यगात प्राप्तवान। आकल्पस्थायित्वादस्या गतेर्ध्रुवत्वम् ॥ ३४ ॥ विष्णोः पदं विशिनष्टि। यदिति। यत्पदं स्वरुचा स्वकीयदीप्त्या एव भ्राजमानं भवतीति शेषः। एते त्रयः लोकाः अनु यदनुसृत्य सर्वतः समंततः विभ्राजन्ते हि जन्तुषु भूतेषु ये अननुग्रहा निष्कृपाः ते यत् न अव्रजन् न गतवन्तः ये च जन्तुषु भद्राणि सुहृत्त्वादीनि अनिशं चरन्ति ते तत् व्रजन्ति। तथाभूतं तत्पदं सोऽध्यगादिति पूर्वेण संबन्धः। ध्रुवस्थानं प्राप्तानामपि सत्यलोकगतानामिव प्रायेण पुनरावृत्त्यभावात् कल्पान्ते मोक्षमाणत्वाच्च भूतसुहृत्त्वादीनामेव मुक्तिहेतुत्वाच्चैवमुक्तम् ॥ ३५ ॥ शान्ता इति। किं च यदच्युतपदं अच्युतः प्रियो येषां भागवतानां ते बान्धवा तेषां ते शान्ताः शमदमादियुक्ताः समदृशः देहात्मेश्वराणां प्रकृतिपरिणामरूपत्वज्ञानैकाकारत्वसर्वान्तरात्मत्वादिरूपेण समदर्शिनः अत एव सर्वभूतानि यथायोग्यं दानमानादिभिरनुरञ्जयन्ति प्रीतानि कुर्वन्तीति सर्वभूतानुरञ्जनाः सिद्धाः सिद्धप्राया जनाः न तु नितरां सिद्धा यतस्तेषामर्चिरादिगत्या ब्रह्मलोकाप्राप्तेः। अञ्जसा सुखेन यान्ति। तत्पदं ध्रुवोऽध्यगादिति पूर्वतरेणान्वयः। अस्यायं भावः। शमदमादिभिः सर्वभूतसुहृत्त्वादिभिश्च परब्रह्मोपासनानिष्ठाः सन्तोऽपि केचन प्रारब्धवशाद्बुभुक्षावशाद्वान्तरायविहताः सत्यलोकगतवद्ध्रुवलोकं गतास्ते तत्रत्यभोगभोगोत्तरं परिपूर्णयोगः सन्तो मुच्यन्ते इति ॥ ३६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इतीति । इत्युक्तप्रकारेण कृष्णः स्वयं श्रीकृष्णे भगवान् परमयनं प्राप्यप्रापकमाधारश्च यस्य सः उत्तानपदः उत्तानपादनृपतेः पुत्रः ध्रुवः त्रयाणां लोकानाम् अमलः चूडामणिः इव अभूत् । अमल इति दृष्टान्तदार्ष्टान्तिकयोरुभयोरपि विशेषणम् ॥३७॥ गम्भीरेति । हे कौरव्य विदुर मेढ्यां धान्याक्रमणाय बलीवर्दबन्धनस्तम्भविशेषे गम्भीरवेगः गवां गणः बलीवर्दसमूह इव ज्योतिषा सूर्यादिज्योतिर्गणानां चक्रं मण्डलं यस्मिन् ध्रुवे अर्पितम् आहितं सत् अनिमिषमनलसं भ्रमसि ॥३८॥ महिमानमिति । अस्य ध्रुवस्य महिमानं विलोक्य भगवान् नारदः ऋषिः आतोद्यं वीणां वितुदन्वादयन् सन् प्रचेतसां सत्रे ब्रह्मसत्रे श्लोकान् ध्रुवमहिमप्रतिपादनपराणि त्रीणि पद्यानि भगवन्माहात्म्यप्रसङ्गेनेति शेषः अगायत ॥ ३९ ॥ तान् दर्शयति नारदः । नूनमिति । परिदेवतायाः पतिव्रतायाः सुनीतेः सुतस्य ध्रुवस्य यस्तपःप्रभावस्तस्य तां फलभूतां गतिम् अभ्युपायान् गतिसाधनभूतान् भगवदाराधनरूपानुपायानपि दृष्ट्वा वेदवादिनः ऋषयोऽपि अधिगन्तुं प्राप्तुं नैव प्रभवन्ति न समर्था भवन्ति नूनं किं नृपा न प्रभवन्तीति किमु वक्तव्यमित्यर्थः ॥ ४० ॥ य इति । गुरुदाराः पितृपत्नी सुरुचिस्तेषां ये वाग्रूपाः शरा बाणास्तैः भिन्नेन अत एव दूयता तप्तेन हृदयेन युक्तः यो ध्रुवः पञ्चवर्षः पञ्चवर्षवयाः सन्नेव वनं यातो गतः । महादेशकरः मदाज्ञावशवर्त्ती सन् अजितम् अपि तद्भक्तगुणैस्तैः प्रसिद्धैर्भक्तानां मैत्र्यादिभिर्गुणैः पराजितं वशं गतं 'अहं भक्तपराधीन' इति भगवदुक्तेर्भक्तजनपराधीनमित्यर्थः । प्रभुं भगवन्तं जिगाय वशीकृतवानित्यर्थः ॥ ४१ ॥ य इति । तस्य ध्रुवस्य अधिरूढं तेन ध्रुवेण संप्राप्तं पदमित्यर्थः । भुवि पृथिव्यां यः क्षत्रबन्धुः क्षत्रियाभासः भवेत् सः अनु तं पश्चात् वर्षपूगैर्वर्षसमूहैः अपि आरुरुक्षेत् आरोढुमिच्छां कुर्यात्किम् । तत्संकल्पोऽप्यशक्यस्तदा दूरत एव तदारोहणमित्यर्थः । कथंभूतं पदं पञ्च वर्षाणि यस्य सः तथाभूतः यः अल्पैः एव अहोभिर्दिनैः वैकुण्ठं भगवन्तं प्रसन्नं कृत्वा यत् तत्पदं तस्य भगवतः पदम् अवाप प्राप्तवान् ॥ ४२ ॥

अथ ध्रुवचरितं निगमयंस्तच्छ्रवणश्रावणादिफलमाह मुनिः । एतदिति । हे विदुर । त्वया अहम् इह यत् पृष्टः, एतत् सर्वं ते तुभ्यम् अभिहितं मया कथितम् । किं तत्तत्राह । उद्दामयशस उद्दामकीर्त्तेः, ध्रुवस्य सतां हरिभक्तानां संमतं यच्चरितं तत् ॥ ४३ ॥ कथंभूतं तदित्यत्राह । धन्यमिति । धन्यं धनेच्छया शृण्वतां श्रावयतां च धनसंपादकम् । तथा यशस्यं यशस्करम् आयुष्यमायुष्करं पुण्यं पवित्रतापादकं स्वस्त्ययनं मङ्गलकरं महत् पूज्यतापादकं स्वर्ग्यं स्वर्गप्राप्तिसंपादकं ध्रौव्यं ध्रुवस्थानप्रापकं सौमनस्यं मनःपीडाविनाशकं प्रशस्यं प्राशस्त्यसंपादकम् अघमर्षणं पापनिरासकम् ॥ ४४ ॥ श्रुत्वेति । एतत् अच्युतः प्रियो यस्य तस्य अच्युतस्य यः प्रियस्तस्येति वा । तथाभूतस्य ध्रुवस्य चेष्टितं भगवत्प्रेमास्पदीभूतध्रुवचरित्रमित्यर्थः । अभीक्ष्णं पौनःपुन्येन श्रद्धया श्रुत्वा यः वर्त्तते तस्य इति शेषः । भगवति भक्तिः भवेत् । भक्तिफलमाह । यया भक्त्या क्लेशसंक्षयः आध्यात्मिकादित्रिविधतापविनाश इत्यर्थः । स्यात् ॥ ४५ ॥ महत्त्वमिति । महत्त्वं सर्वोत्कृष्टत्वम् इच्छतां कामयमानानां तीर्थं महत्त्वप्राप्त्युपायभूतं भवेदित्यनुषङ्गः । तथा श्रोतुः शीलादयः गुणाः भवेयुरिति शेषः । यत्र यस्मिन् ध्रुवचरिते श्रूयमाणे इति शेषः । तदिच्छूनां तेज इच्छतां तेजः भवेत् । तेजसो विधेयत्वेन बुद्धिस्थत्वात्संनिहितत्वात्प्रकृतत्वात्तच्छब्देन परामर्शादुद्देश्यविशेषणत्वोपपत्तिः । तथा यत्र यस्मिंश्चरिते श्रूयमाणे, मनस्विनां 'प्रशंसायां नित्ययोगे वा विनिः' । मानः भगवति मनःप्रवेशप्राशस्त्यं भवेत् ॥ ४६ ॥ प्रयत इति । द्विजन्मनां ब्राह्मणादीनां समवाये सभायां प्रयतः सन् प्रातः सायं च पुण्यश्लोकस्य ध्रुवस्य महत् चरितं कीर्त्तयेत ॥ ४७ ॥ पौर्णमास्यामिति । पौर्णमास्यां पूर्णिमायां सिनीवाल्यां दृष्टेन्दुकलायाममावास्यायां द्वादश्यां तथा श्रवणे श्रवणनक्षत्रयुक्ते दिने दिनक्षयेऽवमदिने व्यतीपाते । संक्रमे सूर्यस्य मेषादिराशिसंक्रमणे अर्कदिने भानुवासरेऽपि वाशब्दात्सप्तमी भानुवासरयोगादौ च । कीर्त्तयेदिति संबन्धः ॥४८॥ श्रावयेदिति । तीर्थपादपदाश्रयः कृतभगवच्चरणारविन्दैकाश्रयो भागवतः श्रद्दधानानां श्रावयेत् । श्रद्धायुक्तजनानिदं संश्रावयेदित्यर्थः । एवं सार्द्धद्वयश्लोके विध्यर्थलकारेण भगवदनुग्रहार्थं भगवद्भक्तस्य नितरामेतत्कीर्त्तनश्रावणे योग्ये इति बोधितमिति भावः । तत्र श्रावणकीर्त्तनयोः नेच्छन्निष्कामः आत्मना स्वयमेव, आत्मानं श्रावयित्वा, संतुष्टः स्यात् । श्रोत्रभावेन भगवदनुग्रहबुद्ध्यात्मने श्रवणाद्धेतोर्भगवदनुग्रहेण ससंतोषः स्यादिति भावः । इति हेतोः सिद्ध्यति संप्राप्तभगवत्सुखो भवतीत्यर्थः ॥ ४९ ॥ न केवलं निष्कामतया श्रावयितारं भगवानेवानुगृह्णात्यपि तु सर्वे देवा अपि अनुगृह्णन्त इत्याह । ज्ञानमिति । अज्ञातं तत्त्वं भगवद्याथात्म्यं येन तस्मै, सत्पथे सतां मार्गे भगवन्मार्गे इति यावत् । वर्त्तमानमिति शेषः । अमृतं परमानन्दस्वरूपभूतं ज्ञानं, यः दद्यात् । कृपालोः, अत एव दीननाथस्य तस्य, देवाः अनुगृह्णते कुर्वन्ति ॥ ५० ॥ इदमिति । हे कुरूद्वह, विख्यातं प्रसिद्धं विशुद्धं शृण्वतामप्यघशोधनं कर्म चेष्टितं यस्य तस्य ध्रुवस्य, इदं चरितं मया ते तुभ्यम् अभिहितं कथितं, यो ध्रुवः अर्भकः, सन्नेव, मातुः गृहं, क्रीडनकानि क्रीडासाधनानि च, हित्वा त्यक्त्वा विष्णुं भगवन्तं शरणं जगाम ॥ ५१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

—:※:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रयोदशोऽध्यायः

श्रीशुक उवाच

निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुण्ठपदाधिरोहणम् ।
प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥ १ ॥

वर्णिता ध्रुवचर्येत्थमध्यायैः पञ्चभिः स्फुटम् । उच्यते पृथुचारित्रमथैकादशभिः शुभम् ॥ १ ॥
ध्रुवान्वये पृथोर्जन्म वक्तुं तत्र त्रयोदशे । पुत्रक्रौर्याद्गतो वेनपिताङ्गो वनमीर्यते ॥ २ ॥

एवं कार्त्स्न्येन विश्रुतध्रुवचरित्रो विदुरः, 'महिमानं विलोक्यास्य नारदो भगवानृषिः । अतोद्यं वितुदन् श्लोकान् सत्रेऽगायत्प्रचेतसाम्' इत्युक्तप्रचेतसस्तद्ब्रह्मसत्रं च तत्र संभावितभगवत्कथाबुभुत्सयाऽपृच्छदित्याह शुकः । निशम्येति । कौषारविणा मैत्रेयेण, उपवर्णितं ध्रुवस्य वैकुण्ठपदाधिरोहणं, निशम्य, अधोक्षजे भगवति, प्ररूढः प्रवृद्धो भावो भक्तिर्यस्य तथाभूतः विदुरः, तं कौषारविं पुनः प्रष्टुम् अन्यं प्रश्नं विधातुमित्यर्थः । प्रचक्रमे उपक्रान्तवान ॥ १ ॥ प्रश्नमाह । के त इति । ते 'सत्रेऽगायत्प्रचेतसाम्' इत्यत्र ये उक्तास्ते प्रचेतसः, के नाम अनेन जातिविषयः प्रश्नः । हे सुव्रत मैत्रेय, कस्य अपत्यानि पुत्राः, अनेन योनिसंबन्धनिबन्धनः प्रश्नः । कस्य अन्ववाये प्रख्याताः, अनेन वंशनिबन्धनः प्रश्नो ज्ञापितः । कुत्र वा कस्मिन् स्थाने नु सत्रम् आसते । अनेन सत्रदेशविषयः प्रश्नो ज्ञापितः ॥ २ ॥

नारदेन वर्णिताः प्रचेतसां कथाः प्रष्टुं तन्महिमानमाह । अन्य इति । देवो भगवांस्तस्य दर्शनं येन सः, यत्कृतेन गूढतत्त्वोपदेशेन भगवत्साक्षात्कारो भूयात्तथाभूत इत्यर्थः । देवस्य दर्शनं साक्षात्कारो यस्येति वा तम् । अत एव नारदं महाभागवतं मन्ये । तमेव विशिनष्टि । येन नारदेन हरेः परिचर्याविधिः पूजाप्रकाररूपः, क्रियायोगः प्रोक्तः । पञ्चरात्राद्युपदेशेन कथितः । तमित्यन्वयः ॥ ३ ॥ क्रियायोगमेव विशिंषन्नारदं प्रस्तौति । स्वधर्मेति । भक्तिमता निरतिशयभगवद्भक्तिमता नारदेन यज्ञपुरुषः यज्ञानां भोक्ता प्रभुश्चेत्यर्थः । भगवान् स्वधर्मशीलैः स्वस्ववर्णाश्रमोचितभगवदाराधनरूपपञ्चमहायज्ञाद्यनुष्ठानपरैः पुरुषैः, इज्यमान आराध्यमानः, ईरितः कथितः किल । भगवदाराधनरूपपञ्चमहायज्ञाद्यनुष्ठानपरैः पुरुषैः, सर्वयज्ञाराध्यभगवत्परिचर्यारूपत्वेन स्ववर्णाश्रमोचितधर्मा अनुष्ठेया इति पञ्चरात्रादौ नारदेन कथितमित्यर्थः । केचित्तु स्वधर्मशीलैः पुरुषैः प्रचेतोभिः इज्यमानः यज्ञपुरुषः भगवान् नारदेन ईरितः किलेति व्याख्यातम् ॥ ४ ॥ एवं नारदं प्रस्तुत्य प्रचेतोभ्यस्तदुपदिष्टकथाः पृच्छति । या इति । हे ब्रह्मन् देवर्षिणा नारदेन तत्र प्रचेतसां ब्रह्मसत्त्रे याः भगवत्कथाः वर्णिताः ताः शुश्रूषवे मह्यं कार्त्स्न्येन आचष्टुं वक्तुम् अर्हसि ॥ ५ ॥ एवं क्षत्त्रा पृष्टो मुनिः कस्यान्ववाये प्रचेतसः प्रख्याताः इत्यस्योत्तरं कुर्वंस्ते ध्रुववंशे जाता इति वक्ष्यन् ध्रुववंशमनुश्रावयति । ध्रुवस्येति । ध्रुवस्य उत्कल उत्कलाख्यः पुत्रः पितरि वनं प्रस्थिते वनं प्रति गच्छति सति, सार्वभौमश्रियं पितुः अधिराजासनं च, नैच्छत् ॥ ६ ॥ अधिराजासनानिच्छायां किं कारणमित्यपेक्षायां बहुजन्मसंसिद्धीकृतयोगप्रत्यक्षितस्वात्मयाथात्म्यानुभवतृप्तत्वादन्यपुरुषार्थजातं नैच्छदिति वदंस्तस्य स्वात्मानन्दानुभवप्रकारोक्तिपूर्वं वर्त्तनं चतुर्भिराह । स इति । स उत्कलः, जन्मनाऽऽजन्मप्रभृति, उपशान्तो रागादिभिरकलुषित आत्मा मनो यस्य सः, अत एव निःसङ्गः रागिसङ्गमकुर्वन् समदर्शनः संश्च, लोक्यते इति लोकः शरीरं तस्मिन् विततं व्याप्तम् आत्मानम् आत्मनि लोकं च ददर्श । लोके विततमात्मानमिति लोकशब्दवाच्यशरीरे आत्मनो व्यापकत्वेनात्मनि लोकमित्यनेनात्मनस्तद्धारकत्वं चोक्तमत्र ॥ ७ ॥

आत्मानमिति । अव्यवच्छिन्नेति । ब्रह्मधर्मभूतज्ञानबृहत्तया ब्रह्मशब्दवाच्यं निर्वाणं सुखस्वरूपं प्रत्यस्तमितो दूरीभूतः विग्रहो भौतिकदेहो यस्मात्तं प्रत्यस्तमितविग्रहं देहभावविनिर्मुक्तम् अशरीरं शरीरेष्वनवस्थितम् इति श्रुतेः । अवबोध एव रसो ज्ञानरसः स एवैकात्म्यमेकस्वभावत्वं यस्य तं क्वचिदप्यंशे जाड्यरहितमित्यर्थः । आनन्दं धर्मभूतानन्दगुणविशिष्टं 'गुणवचनेभ्यो मतुपो लुग्वक्तव्यः' इत्यनुशासनात् । अतिसंततं नित्यं क्वचित्त्वनुसंततमित्यपि पाठस्तदाप्ययमेवार्थः । आत्मानं प्रत्यगात्मानं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरूपं स्वस्वरूपभूतम् अवरुन्धानः अनुसंधानः अत एव अव्यवच्छिन्नो निरन्तरो यो योग आत्मयाथात्म्यज्ञानयोगः स एवाग्निस्तेन दग्धं कर्मरूपं मलं यस्य तथाभूत आशयोऽन्तःकरणं यस्येति बहुव्रीहिगर्भो बहुव्रीहिः। एवंभूतः सन् तदा आत्मनः अन्यत् न ऐक्षत स्वस्वरूपादितरद्यदपुरुषार्थभूतदेहतदनुबन्ध्यादि ततो विलक्षणः सन् तत्रापश्यदिति भावः॥ ८-९॥ जडेति। जडो मन्दश्चान्धोऽक्षिविकलश्च बधिरः श्रवणेन्द्रियहीनश्च उन्मत्तो रोगादिना विक्षिप्तचित्तश्च मूको वागिन्द्रियवर्जितश्च, तेषां तुल्याकृतिर्वेषो यस्य तथाभूतोऽपि, अतन्मतिर्जडादितुल्यमतिरहितः, प्रशान्तानि अर्चीषि ज्वाला यस्य सः, अनलोऽग्निरिव स्थितोऽपि बालानां पथि, लक्षितः अवर्त्ततेति शेषः। स्वमाहात्म्यानाविष्करणपूर्वं स्वचेष्टितस्य बालचेष्टितवत्प्रदर्शनेन जनाः स्वं यथा बालचेष्टितं लक्षयीकुर्युस्तथाऽवर्त्ततेति भावः॥ १०॥ मत्वेति। तमुत्कलं समन्त्रिगो मन्त्रिभिः सहिताः, कुलवृद्धाः सर्वे जनाः, जडम् उन्मत्तं च, नत्वा ज्ञात्वा तं विहायेत्यर्थः। यवीयांसमुत्कलात्कनिष्ठमपि भ्रमेः सुतं वत्सरं वत्सरनामानं, भूपतिं राजानं चक्रुः॥ ११॥ स्वर्वीथिरिति। वत्सरस्य इष्टा शीलरूपगुणादिभिर्नितरामनुकूला, स्वर्वीथिरेतदाख्या भार्या, पुष्पार्णं, तिग्मकेतुम् इषम् ऊर्ज्जं, वसुं जयं च इत्यभिधानान्। षट् षट्संख्याकान् आत्मजान् पुत्रान् असूत॥ १२॥ पुष्पार्णस्येति। षण्णां मध्ये इति शेषः। पुष्पार्णस्य स्वर्वीथ्या ज्येष्ठपुत्रस्य, प्रभा भार्या, दोषा भार्या च इत्येवं द्वे भार्ये बभूवतुः। तत्र प्रभासुताः प्रभाख्यभार्यायाः पुत्राः, प्रातः, मध्यंदिनं, सायम् इत्येवं प्रातराद्युक्तकालत्रयाभिमानित्वेन प्रातरादिनामान· इत्यर्थः। आसन् हि॥ १३॥

प्रदोष इति। दोषासुताः पुष्पार्णस्य दोषाख्यकनिष्ठपत्न्याः सुताः। प्रदोषः, निशिथो निशीथः, व्युष्टः, इत्येवं प्रदोषादिनामभाजः त्रयः सुताः आसन्। एतेऽपि प्रदोषादिकालत्रयाभिमानिनो बोध्याः। तत्र व्युष्टः दोषाख्यायाः कनिष्ठपुत्रः पुष्करिण्यां पत्न्यां सर्वतेजसं सर्वतेजोनामानं सुतम् आदधे जनयामास॥ १४॥ स इति। स सर्वतेजाः आकूत्यामाकूतिनाम्न्यां पत्न्यां चक्षुः चक्षुःसंज्ञं भाव्यं मनुं सुतम् अवाप। ह स्फुटं पुराणेष्वेतत्। मनोः मनुत्वभाजः सर्वतेजःसुतस्य चक्षुषः नड्वला एतदभिधाना महिषी भार्या विरजान् शुद्धान् अत्र रजःशब्दोऽकारान्तः। सुतान् पुरुप्रमुखान् दश पुत्रान् असूत॥ १५॥ दशापि तान्नाम्ना निर्दिशति। पुर्विति। पुरुकुत्सं १, त्रितं २, द्युम्नं ३, सत्यवन्तं ४, ऋतव्रतं ५, अग्निष्टोमं ६, अतिरात्रं ७, प्रद्युम्नं ८, शिबिं ९, उल्मुकं १०, केचित्तु पुरुं कुत्समिति द्वे नामनी उक्त्वैकादश सुतानाहुः। तत्राप्यन्ये त्रितं द्युम्नमित्यत्र शितं द्युम्नमिति पठन्ति तत्तेषां मतिभ्रमविलसितं बोध्यम्॥ १६॥ उल्मुक इति। तत्रेति शेषस्तन्मध्य इति तदर्थः। उल्मुकः पुष्करिण्यां भार्यायाम् अङ्गं सुमनसं ख्यातिं क्रतुम् अङ्गिरसं गयम् इत्यभिधानान् उत्तमान् षट् पुत्रान् सुतान् अजनयत्॥ १७॥ सुनीथेति। तत्र अङ्गस्य या सुनीथाख्या पत्नी सा उल्बणमतिक्रूरं वेनं सुतं सुषुवे। राजर्षिः सः अङ्गाख्यः यस्य वेनस्य दौःशील्यं दुःस्वभाववत्त्वं तस्मात् निर्विण्णः संसारान्निर्विण्णतां प्राप्तः सन् पुरात् निरगात्। पुरं त्यक्त्वा पच्छन्नं वनमगादित्यर्थः॥ १८॥ यमिति। अङ्ग हे विदुर यं वेनं कुपिताः वेनेन कोपं प्रापिताः अत एव वागेव वज्रं येषां ते मुनयः शेपुः किल। गतासोः शापाद्गतप्राणस्य तस्य वेनस्य दक्षिणं करं हस्तं दक्षिणकरो वामकरस्याप्युपलक्षणं ततः पाणिद्वयं बोध्यम्। ते मुनयः आदावूरुनिर्मन्थनजातकुपुरुषवीक्षाम्लानाः सन्त इति शेषः। भूयः पुनः ममन्थुः मथितवन्तः॥ १९॥ तत्कृततत्करमथने हेतुमाह। अराज इति। तदा शापानन्तरमित्यर्थः। लोके अराजके राज्ञा रहिते सति, प्रजाः दस्युभिः पीडिताः बभूवुः। तदा पृथुः पृथुनामा आद्यः पुरग्रामादीनां तेन रचितत्वात्तदपेक्षयाऽऽदिम् इत्यर्थः। क्षितीश्वरः राजा नारायणांशेन जातः॥ २०॥

पृथ्वाख्यानस्य श्रवणमङ्गलत्वात्सामान्यतः कथितं तच्चरितं विशेषतः श्रोतुकामो विदुरः पृच्छति। तस्येति। शीलनिधेः साधोः ब्रह्मण्यस्य महात्मनः तस्य राज्ञोऽङ्गस्य प्रजा दुष्टा कथम् अभूत्। यद्यतो दुष्प्रजत्वनो हेतोः विमना दुःखितमनाः सन् ययौ पुरान्निर्गतः॥ २१॥ किं चेति। दण्डोऽसाधुनिग्रहरूपः दण्डः स एव व्रतं तद्धरतीति तस्मिन् राज्ञि राजकर्मनिष्ठे वेने धर्मकोविदाः मुनयः किं च किं नु अंहोऽपराधम् उद्दिश्यालक्ष्य वेनं ब्रह्मदण्डं प्रति, अयूयुजन् ब्रह्मशापेन संयुक्तं कृतवन्तः। प्रजापालननिष्ठे राज्ञि शापकरणं मुनीनामनुचितमिति भावः॥ २२॥ एतदेव स्पष्टमाह। नेति। अघवानपराध्यपि प्रजापालः राजा प्रजाभिः न अवध्येयोऽवज्ञेयो न भवति। यद्यस्मात्। असौ प्रजापालः लोकपालानाम् ओजः सामर्थ्यं स्वतेजसा बिभर्त्ति॥ २३॥ एतदिति। हे ब्रह्मन् एतत् सुनीथाया आत्मजो वेनस्तस्य चेष्टितमाचरितं श्रद्दधानाय शुश्रूषात्वरायुक्ताय भक्ताय अनेन श्रवणे योग्यतोक्ता मे मह्यं परः परमात्मा अपरः प्रकृतिपुरुषादिस्तद्वित्तमस्तद्विदां मध्येऽतिश्रेष्ठः त्वम् अनेन श्रावणे योग्यतोक्ता आख्याहि कथय॥ २४॥ काम्यकर्मणा बलादापादितोऽपि पुत्रः न सुखाय भवेदिति द्योतयन्नङ्गस्य पुत्रोत्पत्तिक्रममाह। अङ्ग इत्यादिना। राजा चासौ ऋषिः राजर्षिः अङ्गः क्रतूत्तमं क्रतूनां मध्ये उत्तमम् अश्वमेधम् आजहारारब्धवान्, तस्मिन्नश्वमेधे सत्क्रतौ ब्रह्मवादिभिः श्रुताध्ययनादिसंपन्नैर्ऋत्विग्भिः आहूताः सत्योऽपि देवताः न आजग्मुर्नागतवत्यः॥ २५॥ तमिति। अथ हे तात ऋत्विजो यज्ञे वृतास्ते ऋत्विजो विप्राः विस्मिताः सन्तः यजमानं तमङ्गनृपतिम् ऊचुः। ते यदूचुस्तदाह।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे नृप ते त्वया, त्वत्संबन्धीनीत्यर्थः। हूयमानानि देवतोद्देशेन प्रक्षेपपूर्वं त्यक्तानि हवींषि पुरोडाशादीनि, देवताः न गृह्णन्ति ॥ २६ ॥ राजन्निति। हे राजन् हवींषि हुतद्रव्याण्यपि अदुष्टानि ते त्वया श्रद्धया आसादितानि संपादितानि, तथा छन्दांसि क्रत्वङ्गभूता मन्त्राः अयातयामानि अगतवीर्याणि सारवन्तीत्यर्थः। स्वरवर्णादिसंभावनपूर्वं समुच्चारणाच्छन्दसामप्यगतवीर्यतास्तीति भावः। दृढं व्रतं स्वरवर्णादियुक्ततया। मन्त्रोच्चारणरूपं येषां तैर्ऋत्विग्भिः याजितानि प्रयुक्तानि भवन्ति ॥ २७ ॥

नेति। एवं यथावदनुष्ठीयमानेऽपीति शेषः। इहास्मिन् महायज्ञे अण्वणुमात्रमपि देवानां मखेज्यसुपर्वणां हेलनमपराधं वयं न विदाम सम्यग्विचारे कृतेऽपि न जानीमः। यद्यतो देवहेलनात् ये कर्मसाक्षिणः कर्मणि गुणदोषद्रष्टारः देवाः स्वान स्वकीयान् भागान न गृह्णन्ति। अतोऽवश्यं केनचिद्देवहेलनेन भवितव्यं परं तु तद्वयं न विदाम इत्यर्थः ॥ २८ ॥ एवमृत्विग्भिरुक्तोऽङ्गः सदस्यानाहेत्याह मुनिः। अङ्गेति। यजमानः अङ्गः द्विजवचः ऋत्विग्ब्राह्मणवचनं श्रुत्वा सुदुर्मनाः सुतरां दुःखितमानसः अत एव यज्ञे गृहीतमौनः सन्नपीति शेषः। सदस्यान् सदसि सभास्तारत्वेन स्थितान प्रति तदनुज्ञया तत्प्रष्टुं वाचं व्यसृजत। परित्यक्तमौनव्रतस्तद्देवतानामनागमनकारणं प्रष्टुं वाग्व्यापारमकरोदित्यर्थः ॥ २९ ॥ वाग्विसर्गमेवाह। नागच्छन्तीति। हे सदसस्पतयः इह क्रतौ आहूता देवा देवताः न आगच्छन्ति ग्रहान्सोमपात्राणि, न गृह्णन्ति। मया किम अवद्यं देवानां हेलनं कृतं तत यूयं ब्रूत ॥३०॥ नरदेवेति। हे नरदेव इह जन्मनि तावत् अस्मिन् जन्मनि तु भवतः अघं मनागीषदपि न स्थितं किं तु एकं प्राक्तनं पूर्वजन्मकृतम् अघम् अस्ति यद्यस्मादघाद् ईदृगेवंविधगुणाधिकोऽपि त्वम् इह जन्मनि अप्रजः प्रजारहितः बभूविथ ॥ ३१ ॥ तथेति। हे नृप अतः तथा यथा देवा हवींषि गृह्णीयुस्तथेत्यर्थः। आत्मानं सप्रजं सपुत्रं साधय। ते तव भद्रम् अस्तु। कथमात्मानं सप्रजं साधयेयं तत्राहुरिष्ट इति। यज्ञभुग्भगवान् पुत्रकामस्य पुत्रोत्पत्तिं कामयमानस्य ते तव त्वयेत्यर्थः। इष्टः इज्यमानः सन् पुत्रं दास्यति ॥ ३२ ॥ तथेति। तथा तथासतीत्यर्थः। दिवौकसो देवाः स्वभागधेयानि स्वभागान् भागशब्दात्स्वार्थे धेयप्रत्ययः। ग्रहीष्यन्ति। यद्यतो हेतोः साक्षात यज्ञपुरुषः हरिः अपत्याय पुत्रार्थं वृत्तः स्यात अतस्तेन सह सर्वे देवाः आगमिष्यन्तीत्यर्थः ॥ ३३ ॥ नन्वतितुच्छान् कामान् हरिः कथं दद्यात्तत्राहुः। तांस्तानिति जनो भगवदाराधकः पुमान यान् यान् कामान् कामयते प्रार्थयते तस्मै हरिः तांस्तान्कामान् दद्यात्। एष हरिः यथा येन प्रकारेण एव जनैः आराधितः भवेत् पुंसां तेषां जनानां तथा तत्तत्कामानुसारेणैव फलोदयः फलावाप्तिः भवति ॥ ३४ ॥

इतीति। इत्यमुना प्रकारेण व्यवसिता निश्चिन्वानाः प्रिया ऋत्विजः तस्याङ्गस्य राज्ञः प्रजातये प्रजोत्पत्त्यै शिपिविष्टाय शिपिभिः रश्मिभिः विष्ट आविष्टः शिपिविष्टस्तस्मै शैत्याच्छ्यनयोगाच्च शीति वारि प्रचक्षते। पावनाद्रक्षणाच्चैव शिपयो रश्मयो मताः। तेषु प्रवेशाद्विश्वेशः शिपिविष्ट इहोच्यते इति। विष्णवे पुरोडाशं निरवपन् ॥ ३५ ॥ तस्मादिति। तस्मादुक्तरीत्या हुतादग्नेरित्यर्थः। अर्थसामर्थ्योद्देशकोऽयमर्थः हेम्नो मालास्त्यस्येति अमलान्यम्बराणि यस्य सः पुरुषः हिरण्मयेन पात्रेण सिद्धं सम्यक् पक्वं पायसं पायसान्नम आदाय गृहीत्वा उत्तस्थौ उत्थितवान् ॥ ३६ ॥ स इति। सः उदारधीः प्रशस्तमतिमान् राजाङ्गनृपतिः विप्रानुमतो विप्रैरभ्यनुज्ञातः सन् औदनं पायसान्नभाजनम् अञ्जलिना गृहीत्वा अवघ्राय मुदा युक्तः हर्षेण संयुतः सन् पत्न्यै प्रादात् ॥ ३७ ॥ सेति। राज्ञी सा सुनीथा पुमांसं सूतेऽनेनेति पुंसवनं तत्पायसं प्राश्य भुक्त्वा पत्युः सकाशात् गर्भम् आदधे धृतवती। अप्रजा सत्यपि एवं गर्भं धृत्वेति शेषः। काले उपावृत्ते अतीते सती यद्वा प्रसूतिकाले प्राप्ते सति कुमारं सुषुवे वै ॥ ३८ ॥ स इति। बालः कुमारः एव सः पुरुषः स कुमारो बाल्यात्प्रभृतीत्यर्थः। अधर्मांशोद्भवं मातामहं मृत्युं सुनीथा मृत्योः पुत्री प्रसिद्धा। अनुव्रतोऽनुसृतोऽभूत। तेन मातामहानुसरणेन अधार्मिकः अभवत ॥ ३९ ॥ अधार्मिकत्वमेव प्रपञ्चयति। स इति। शरासनं धनुः उद्यम्य धनुष्यारोपितशर इत्यर्थः। मृगयुर्लुब्धकः अत एव वनगोचरः असाधुः सः वेनः दीनान् मृगान् हन्ति। स्मेत्यध्याहार्यम् अवधीदित्यर्थः। असौ वेनः आगच्छति इति श्रुत्वा सर्वः जनः अरौचुक्रोश ॥ ४० ॥ आक्रीड इति। अतिदारुणः क्रूरः अत एव निरनुक्रोशः कृपावर्जितः वेनः आक्रीडे क्रीडास्थाने क्रीडतः वयस्यान् बालान् प्रसह्य पशुमारम् अमारयत्। पशूनिवामारयदित्यर्थः ॥ ४१ ॥

तमिति। नृपोऽङ्गः तं पुत्रं खलं दुरात्मानं विचक्ष्य विविधैर्नानाविधैः शासनैः समाद्युपायैः यद्यदा शासयितुं कल्पः समर्थः न आसीत तदा भृशं सुदुर्मना दुःखितमानसः आसीत् ॥ ४२ ॥ दुर्मनसस्तस्य कुपुत्रनिन्दावाक्यान्याह। प्राय इति। ये गृहमेधिनः गृहाश्रमिणः अप्रजाः अपुत्राः ये कदपत्यकृतं कुत्सितापत्यजातं दुर्भरं धारयितुमशक्यं दुःखं न विन्दन्ति, न लभन्ते तैरुभयविधैर्जनैः देवः परमेश्वरः प्रायेण अभ्यर्चितः। केचित्तु ये अप्रजाः गृहमेधिनः ते कदपत्येन भृतं धृतं दुर्भरं दुःखं न विन्दन्ति अतः प्रायेण तैः देवः अभ्यर्चितः इति व्याख्यां कुर्वन्ति ते द्वितीयं यच्छब्दं विचारयन्तु ॥ ४३ ॥ यत इति। यतः कदपत्यात् नृणां पापीयसी कीर्त्तिः अपकीर्त्तिः महान् अधर्मश्च भवेत्। तथा यतः कदपत्यात् सर्वेषां विरोधः यतः अनन्तकोऽपारः आधिर्मानसी व्यथा च जायते ॥ ४४ ॥ क इति। तं प्रजापदेशं पुत्रनाममात्रमपि वै स्फुटम् आत्मनः मोहबन्धनं मोहेन बन्धनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कः पण्डितः बहु मन्येत। यदर्थाः यत्पुत्रापदेशनिमित्ताः गृहाः क्लेशदाः क्लेशसंपादकाः भवन्ति ॥ ४५ ॥ इदानीं निर्वेदहेतुत्वेन कुत्सितापत्यमेवाभिनन्दति। कदपत्यमिति। शुचां पदात् शोकानां स्थानात् उत्तरोत्तरगृहासक्तिजननद्वारा संसारदुःखहेतुत्वादिति भावः। सदपत्यात् कदपत्यं वरं श्रेष्ठं मन्ये। वरत्वे हेतुः। मर्त्यः गृहात् निर्विंद्येत। यद्यतः कदपत्यात् गृहाः क्लेशनिवहाः शोकावहाः भवन्ति ॥ ४६ ॥ एवमिति। एवमुक्तप्रकारेण निर्विण्णमनाः सः अङ्गः नृपः महतामुदयानां विभूतीनामुदयः समृद्धिर्यस्मिंस्तस्मात् गृहात् निशीथे उत्थाय, अलब्धनिद्रः परित्यक्तनिद्रः प्रसुप्तां वेनसुवं वेनस्य मातरं सुनीथां हित्वा नृभिः अनुपलक्षितो जनैरविदितः सन् वनं गतः प्रतीति शेषः ॥ ४७ ॥

विज्ञायेति। पुरोहितश्च अमात्यश्च सुहृद्गणाश्च ते आदयो यासां ताः प्रजाः, पतिं राजानं निर्विद्य गतं निर्वेदं प्राप्य प्रयातं विज्ञाय अतिशोकक्कातराः सत्यः उर्व्यां पृथिव्यां विचिक्युरन्वेषयांचक्रुः। तं तु तत्रैव सन्तमपि नापश्यन्निति दृष्टान्तेनाह। निरूढं हृदये वसन्तमपि तिरोहितं पुरुषं परमपुरुषं यथा कुयोगिनः अन्वेषयन्ति तथेति ॥ ४८ ॥ अलक्षयन्त इति। प्रजापतेरङ्गनृपतेः पदवीं मार्गम् अलक्षयन्तोऽजानन्तः अत एव हतोद्यमाः हतप्रयत्नाः ते पुरोहितादयः पुरीं प्रति उपसृत्यागत्य हे पौरव विदुर साश्रवः शोकाश्रुसहिताः सन्तः समेतान्संघीभूतान् ऋषीन् अभिवन्द्य प्रणम्य भर्तृविप्लवं भर्तृनाशं स्वभर्त्रदर्शनमित्यर्थः। न्यवेदयन् तेषां पुरो निवेदितवन्तः ॥ ४९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

——:※:——

अथ चतुर्दशोऽध्यायः

मैत्रेय उवाच

भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः। गोप्तर्यसति वै नृणां पश्यन्तः पशुसात्मताम् ॥ १ ॥

दुष्पुत्रस्य भयादङ्गे गते विप्रैश्चतुर्दशे। वेनस्य स्वाभिषिक्तस्योच्यते रोषाद्वधस्तु तैः ॥ १ ॥

भृग्वादय इति। लोकानां क्षेमदर्शिनः क्षेमचिन्तकाः, ब्रह्मवादिनो वेदवादिनः ते विज्ञापिताः भृग्वादयः भृगुप्रभृतयः मुनयः नृणां गोप्तरि त्रातरि, असत्यविद्यमाने सति वै स्पष्टं पशुसात्मतां पशुसमानरूपतां पश्यन्तः सन्तः ॥ १ ॥ वीरमातरमिति। वीरमातरं वीरस्य वेनस्य मातरं सुनीथाम् आहूय तस्यै विज्ञाप्येत्यर्थः। प्रकृतीनाममात्यादीनाम् असंमतम् अपि वेनं भुवः पतिम् अभ्यषिञ्चन्। भुवः पतिं चक्रुरित्यर्थः। उभयोरेकान्वयः ॥ २ ॥ श्रुत्वेति। अत्युग्रशासनम् अत्युग्रदण्डं वेनं नृपासनगतं राजासने प्रतिष्ठितं श्रुत्वा दस्यवश्चौरादयः सर्पत्रस्ताः सर्पतो भीताः आखवः मूषकाः इव सद्यः निलिल्युः लीना बभूवुः ॥ ३ ॥ स इति। स वेनः आरूढं नृपस्थानं राजासनं येन सः अष्टविभूतिभिरष्टलोकपालैश्वर्यैः अणिमादिभिरष्टैश्वर्यैर्वा। मन्त्र्यमात्यदूतराज्यकोशदुर्गजनपदपुरोहिताख्यैर्वा उन्नद्धो गर्वितः अत एव स्तब्धोऽनम्रः महत्सूत्थानाद्याचारविवेकशून्यो वा। स्वतः संभावितः स्वमुखेनैव स्वश्लाघामाचरन्नित्यर्थः। न त्वितरैः कृतप्रशंस इति भावः। एवंभूतः सन् महाभागान् अवमेनेऽवजज्ञे ॥ ४ ॥

एवमिति। एवममुना प्रकारेण मदान्ध ऐश्वर्यमदेन प्राप्तान्ध्यः अतः निरङ्कुशः द्विपो गजः इव उत्सिक्त उत्पथः वेनः रथम् आस्थायाधिरुह्य रोदसी द्यावापृथिव्यौ कम्पयन्निव पर्यटत् परित आट ॥ ५ ॥ न यष्टव्यमिति। हे द्विजाः कचित न होतव्यमग्नौ हविः प्रक्षेपो न कर्त्तव्यः। न दातव्यं पात्रतोपेतविप्रेभ्योऽपि दानं न कर्त्तव्यमित्यर्थः। न यष्टव्यं यागो न कर्त्तव्यः एवमित्थं धर्मं धर्माभासं स्वमतिकल्पितं धर्ममित्यर्थः। भेरीघोषेण सर्वतः सर्वास्वपि दिक्षु न्यवादयत। पाठान्तरे भेरीघोषेण सर्वतः धर्मं यागादिरूपं सदाचारं न्यवारयत वारयामासेति योजना ॥ ६ ॥ वेनस्येति। सत्रिणो याज्ञिकाः मुनयो भृग्वादयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुर्वृत्तस्य दुराचरणरतस्य वेनस्य विचेष्टितं दुराचरणम् अवेक्ष्य लोकानां व्यसनं तन्निमित्तं दुःखं विमृश्य कृपयान्तःसमुत्थितया दयया मिलिताः सन्त इति शेषः। ऊचुः। स्मेति प्रसिद्धौ ॥ ७ ॥ यदूचुस्तदाह। अहो इति। अहो दारुणि काष्ठे उभयतः मूलतोऽग्रतश्च दीप्ते प्रज्वलिते तन्मध्यवर्त्तिनां पिपीलिकादीनाम् इव तस्करपालयोः संबन्धि लोकस्य महत् व्यसनं उभयतः तस्करपालकाभ्यां सकाशात् प्राप्तम् ॥ ८ ॥ एतदेवाहुः। अराजकेति। अतदर्हणः राज्यपदानर्हः अपि एषः वेनः अराजकभयात् राजा कृतः ततः राज्ञः सकाशादपि अद्य तु भयं आसीत। देहिनां स्वस्ति कथं स्यात्। देहिनः केन प्रकारेण सुखिनः स्युरित्यर्थः ॥ ९ ॥ न केवलमेवं सति प्रजानामेवानिष्टं किन्त्वस्माकमप्यनिष्टं जातमित्याहुः। अहेरिति। अहेः सर्पस्य पयः पोषः इव क्षीरेण सर्पस्य परिपोषणं यथा पोषकस्यापि अनर्थंकृत् तथा सः वेनः सुनीथागर्भसंभवः मृत्युसुतायाः सुनीथाया अङ्गात् संभूतः अयं तत्र प्रथमो दोषः। प्रकृत्या स्वभावेनैव खलो दुरात्मा अयं च तत्र द्वितीयो दोषः ॥ १० ॥ निरूपित इति। स एवं द्विविधदोषयुतोऽपि वेनः अस्माभिः प्रजापालः निरूपितः नियुक्तः वै। सः एव प्रजाः जिघांसति हन्तुमिच्छति तथापि उक्तरीत्यास्य घातुकत्वे सत्यपि अमुं वेनं सान्त्वयेम उपपत्तिभिः प्रार्थयिष्यामः। ततः तत्पातकं तस्याघम् अस्मान् न स्पृशेत् ॥११॥ निषेधस्य प्रसक्तिपूर्वकत्वात्तामाहुः। तदिति। तद्विद्वद्भिः तस्य तथाविधं दौरात्म्यं जानद्भिः अपि अस्माभिः असद्वृत्तो दुराचारः वेनः नृपः कृतः। अस्माभिर्नृपीकरणाद्धेतोरयं भूतानि दुह्यति अतोऽस्माभिः सान्त्वितश्चेन्न भूतद्रोहकृतं पापमस्मान् स्पृशतीत्यर्थः। सान्त्वनेनाप्रसन्ने सति कृत्यमाहुः। सान्त्वितः प्रार्थितः अधर्मकृत् अयं वेनः अस्माकं याच्ञां न ग्रहीष्यति यदि तर्हि लोकानां धिक्कारेण निन्दया संदग्धं तं स्वतेजसा स्वेषामस्माकं तपोबलेन दहिष्यामः ॥ १२ ॥

एवमिति। एवममुना प्रकारेण अध्यवसाय निश्चित्य गूढो मन्युः क्रोधो येषां ते मुनयो भृग्वादयः एनम् वेनम् उपव्रज्य समीपमुपगत्य सामभिः प्रियोक्तिभिः सान्त्वयित्वा अथानन्तरं अब्रुवन् प्रार्थनापूर्वकमूचुरित्यर्थः ॥ १३ ॥ नृपेति। भो इति संबोधने। हे नृपवर्य वयं ते तुभ्यं यत् विज्ञापयाम एतत् निबोध सावधानचित्त आधत्स्व कथंभूतं तत्। हे तात तव आयुर्जीवितं च श्रीर्लक्ष्मीश्च बलं शरीरादिसामर्थ्यं च कीर्त्तियशश्च तासां विवर्द्धनं विवर्द्धकं भवति ॥ १४ ॥ किं तदित्यत्राहुः। धर्म इत्यादिभिरष्टभिः पुंसां वाक् च मनश्च कायश्च बुद्धिश्च ताभिः वृत्तिभिरिति पाठे तेषां वृत्तयो व्यापारास्ताभिः आचरितोऽनुष्ठितो धर्मः ईश्वराराधनरूपो वृषः विशोकान् निर्दुःखान् लोकान् वितरति कुरुते। अथ असङ्गिनां विरक्तानां धर्मं सम्यगासेव्यापि तज्जन्यफलासक्तिरहितानामित्यर्थः। आनन्त्यं मोक्षम् अपि वितरति ॥ १५ ॥ स इति। हे वीर ते तव प्रजानां क्षेमलक्षणः लोकसुखस्य मोक्षसुखस्य च कर्त्तेत्यर्थः। स धर्मः मा विनशेत् मा विनश्यतु। यस्मिन्नुक्तधर्मे विनष्टे सति नृपतिः पार्थिवः ऐश्वर्यात् अवरोहति भ्रश्यति ॥ १६ ॥ राजन्निति। हे राजन् असाधवश्च ते येऽमात्यास्तेभ्यः चोरादिभ्यश्च यथा यथाशास्त्रं प्रजाः रक्षन् पालयन् सन् ताभ्यः बलिं पूजां करमिति यावत्। गृह्णन् स्वीकुर्वन् नृपः इह लोके प्रेत्य परलोकं प्राप्य च मोदते सुखीभवति ॥ १७ ॥ यस्येति। यस्य राज्ञः राष्ट्रे जनपदे पुरे च वर्णाश्रमात्मकैश्चातुर्वर्ण्यचातुराश्रम्यरूपतया व्यवस्थितैः जनैः यज्ञपुरुषः यज्ञानां भोक्ता प्रभुश्च भगवान् स्वेन धर्मेण पञ्चमहायज्ञादिरूपेण इज्यते आराध्यते ॥ १८ ॥

तस्येति। हे महाभाग, निजं स्वकीयं यच्छासनं शास्त्रविहितं प्रजापालनादिरूपं कर्म तस्मिन्, तिष्ठतः, तस्य राज्ञः, विश्वात्मा सर्वात्मा भूतानि भावयत्युत्पादयतीति भूतभावनः जगत्कारणभूतः भगवान् परितुष्यति ॥ १९ ॥ परितुष्यति भगवान् किं तेन तत्राह। तस्मिन्निति। जगतां ईश्वरेश्वरे जगदीश्वराणां ब्रह्मादीनामपीश्वरे, तस्मिन् भगवति, तुष्टे सति, अप्राप्यं किम् अस्ति। न किमपि। हि यतः सपालाः पालकैः सहिताः लोकाः आदृत्ता आदरेण युक्ताः सन्तः एतस्मै परितुष्टभगवते राज्ञे बलिं हरन्ति प्रापयन्ति ॥ २० ॥ तमिति। सर्वलोकाश्च अमराः तत्पतयो देवाश्च यज्ञा अमरत्वप्रापका मखाश्च तान् संगृह्णाति नियच्छतीति तथा तं त्रयीमयं धर्मादिबाधकत्रयीप्रचुरं वेदैकप्रमाणकत्वेन तत्प्राचुर्यं विवक्षितं त्रय्या भागद्वयात्मकत्वात्किंरूपं पूर्वभागप्राचुर्यं किंरूपं चोपरितनभागप्राचुर्यमित्यत्र तद्विवेचयन्विशिनष्टि। यज्ञमयं यज्ञप्रचुरं तपोमयं तपांस्युपासनानि तत्प्रचुरं तत्र पूर्वभागोदितैर्यज्ञैराराधनत्वेन यज्ञप्राचुर्यं विवक्षितम आराधनप्रकारप्रकाशकत्वेन पूर्वभागस्य तस्मिन्प्रामाण्यमिति भावः। अत्र 'सर्वे वेदा यत्पदमामनन्ति। तपांसि सर्वाणि च यद्वदन्ति। वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिकं प्रमाणमनुसंधेयम्। तपःशब्दवाच्योपासनाप्राचुर्यंतस्तपोमयम् आराध्यवस्तुनः स्वरूपगुणादिप्रकाशकत्वेनोपरितनभागस्य प्रामाण्यमिति भावः। तमेवं भागद्वयात्मकवेदेन यज्ञमयत्वेन तपोमयत्वेन च प्रमाणितं भगवन्तमित्यर्थः। विचित्रैर्द्रव्यदेवतादिभिर्नानाविधतावद्भिरित्यर्थः। यज्ञैः ते तव अभवाय मुक्तये भवायेति छेदे तव सर्वसमृद्धये इत्यर्थः। यजतः पूजयतः स्वदेशान् स्वदेशवासिनो वर्णाश्रमत्वावस्थितजनान् अनुरोद्धुमनुकूलीकर्त्तुम् अर्हसि। पाठान्तरेऽनिरोद्धुमनिवर्त्तितुमित्यर्थः ॥ २१ ॥ यस्य राज्ञो देशवासिभिर्जनैर्भगवानिज्यते स नृपोऽपि मुच्यते इत्यभिप्रायेण यत्ते भवायेत्युक्तं तदेव प्रपञ्चयति। यज्ञेनेति। युष्मद्विषये तव देशे द्विजातिभिस्त्रैवर्णिकैः वितायमानेन निरन्तरं क्रियमाणेन यज्ञेन हरेर्भगवतः कलाः शरीरभूताः सुरा इन्द्रादयो देवाः स्विष्टाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथाशास्त्रमिज्यमानाः अत एव संतुष्टाः सन्तः वाञ्छितं त्वदभिलषितमर्थं प्रदिशन्ति प्रयच्छन्ति। हे वीर तद्धेलनं तेषां देवानामवज्ञां चेष्टितुं कर्तुं न अर्हसि भवान् योग्यो न भवतीत्यर्थः ॥ २२ ॥ एवं मुनिभिर्विज्ञापितो वेन आहेत्याह। बालिशा इति। हे मुनयः बतेति खेदे। यूयं बालिशा अज्ञाः वै नूनमेव कुतः यतः अधर्मे धर्ममानिनः धर्ममन्वानाः, भवथ। ललनाः वृत्तिदमन्नादिप्रदं पतिं हित्वा जारं पतिम् उपासते तथा ये भवन्तः वृत्तिदं प्रभुं मां हित्वाऽन्यं प्रभुं मंस्यन्ति ॥ २३ ॥

अवेति। मूढाः। अमी ये जनाः नृपरूपिणं नृपतिरूपेणावस्थितम् ईश्वरम् अवजानन्ति अवज्ञायुतं कुर्वन्ति ते जनाः इहास्मिन् लोके परत्र परस्मिन् लोके च, भद्रं कल्याणं नानुविन्दन्ति न प्राप्नुवन्ति किं तु दुःखिनः भवन्तीत्यर्थः ॥२४॥ क इति। भर्तृस्नेहे विघातो यासां तासां विदूर इति पाठे भर्तुः स्नेहो विदूरे यासां तासां कुयोषितां निन्दितस्त्रीणां यथा जारे जारपुरुषे भक्तिः तथा वो युष्माकं यत्र यज्ञपुरुषे ईदृशी भक्तिः अस्ति। सः यज्ञपुरुषो नाम कः को नाम किंशब्दः कुत्सायाम-संभावनायां वा ॥ २५ ॥ विष्णुरिति। विष्णुः विरिञ्चो ब्रह्मा गिरिशः शिवः इन्द्रः शक्रः वायुः यमः रविः पर्जन्यः धनदः कुबेरः सोमश्चन्द्रः क्षितिर्भूः अग्निः अपां पतिर्वरुणः ॥ २६ ॥ एत इति। वरश्च शापश्च तयोरनुग्रहनिग्रहयोः प्रभवः समर्थाः एते विष्णवादयः अन्ये च ये विबुधा देवाः ते नृपतेः राज्ञः देहे वसन्ति। चोऽवधारणे। अतः नृपः सर्वदेवमयः सर्वदेवताप्रचुरः भवति। अतो नृपतिरेवेश्वर इतरे तदंशा इति भावः। द्वयोरेकसबन्धः ॥ २७ ॥ तस्मादिति। हे विप्राः तस्मान्नृपस्य सर्वदेवता-मयत्वात् गतमत्सराः मत्सरवर्जिताः सन्तः कर्मभिः मामेव यजध्वम्। बलिं स्वामिग्राह्यभागादिरूपं करं च, मह्यं हरत समर्पयत : मत्तः अन्यः अग्रभुगाराध्यः कः पुमान् अस्ति, न कोपीत्यर्थः ॥ २८ ॥ इत्थमिति। इत्थं विपर्ययमतिविपरीतबुद्धिः पापीयानतिपापकर्मनिष्ठः उत्पथं दुर्मार्गं गतः प्राप्तः स वेनः यतः भ्रष्टमङ्गलः अतः अनुनीयमानः संप्रार्थ्यमानः सन्नपि तद्याञ्चां तेषां मुनीनां याञ्चां न चक्रे न स्वीकृतवान् ॥ २९ ॥ इतीति। इतीत्थं पण्डितमानिना पण्डितमात्मानं मन्वानेन तेन वेनेन असत्कृता अवज्ञाताः ते द्विजा मुनयः भव्ययाञ्चायां लोकशुभावहयाञ्चायां भग्नायां सत्यां हे विदुर तस्मै चुक्रुधुः कुपितवन्तः ॥ ३० ॥

तत्क्रोधं प्रपञ्चयति। हन्यतामिति। प्रकृतिदारुणः स्वभावत एव क्रूरः घातुक इति यावत्। पापः पापीयान् एषः वेनः हन्यतां हन्यतां कोपाद्विरुक्तिः। यतः जीवन् असौ जगत् भस्मसात् भस्मभूतं ध्रुवम् आशु कुरुते कर्त्तेत्यर्थः ॥ ३१ ॥ नायमिति। असद्वृत्तो दुराचारः अयं वेनः नरदेववरासनं राजासनं प्रति न अर्हति योग्यो न भवतीत्यर्थः। यस्मात् यो वेनः अनपत्रपः निर्लज्जः सन् अधियज्ञपतिं सर्वयज्ञैकनाथं विष्णुं विनिन्दति ॥ ३२ ॥ क इति। अशुभमशुभाचारम् एकं वेनम् ऋते कः वा को नु पुमान् यदनुग्रहभाजनः यस्य विष्णोरनुग्रहाश्रयः सन् ईदृशम् ऐश्वर्यं प्राप्तः संश्च एनं विष्णुं परिचक्षीत विष्णुं विनिन्देत्। एषैवैतस्य कृतघ्नतेति भावः ॥ ३३ ॥ इत्थमिति। इत्थं हन्तुं व्यवसिता निश्चिन्वानाः ऋषयः रूढमन्यवः पूर्वं गूढमन्यवः सन्तोऽपीदानीं प्रकटीकृतक्रोधाः सन्तः अच्युतनिन्दया हतं भगवन्निन्दाविधानेन प्रथमत एव हतप्रायं जातमपि वेनं हुंकृतैः निजघ्नुः ॥ ३४ ॥ ऋषिभिरिति। ऋषिभिश्चापि आश्रमपदं गते सति एवं हुंकारैरेव वेनं निहत्य मुनयो यदा स्वस्वाश्रमपदानि प्रयातास्तदनन्तरमित्यर्थः। शोचती पुत्रशोकं विदधाना सुनीथा पुत्रकलेवरं मृतस्यापि स्वपुत्रस्य शरीरं विद्यायोगेन मन्त्रसहितया युक्त्या पालयामास ॥ ३५ ॥ तदनन्तरं किं वृत्तमित्यत्राह। एकदेति। एकदा एकस्मिन् समये ते मुनयः तु सरस्वत्सलिलाप्लुताः सरस्वत्याः सलिले कृतस्नानाः पुंवद्भाव आर्षः। अग्निं हुत्वा प्रातराहुतिप्रदानप्रमुखमग्निकार्यं कृत्वेत्यर्थः। सरित्तटे सरस्वत्याः नद्यास्तटे उपविष्टाः सन्तः सत्कथा भगवत्कथाः चक्रुः ॥ ३६ ॥ वीक्ष्येति। तदा उत्थितान् महोत्पातान् वीक्ष्य तैरुत्पातैर्जं संजातं यल्लोकानां भयं तेनातुरा दुःखिताः मुनयः अनाथायाः भुवः दस्युभ्यश्चौरादिभ्यः अभद्रमसुखं न भवेत्। अपि इति आहुः। सांप्रतमनाथा भूमिश्चौरादिभिरभद्रतावत्यस्ति किमित्याहुरित्यर्थः ॥ ३७ ॥ एवमिति। ऋषिषु एवं ब्रुवत्सु सत्सु संध्यभाव आर्षः। सर्वतो दिशं सर्वासु दिक्षु धावताम् अभिलुम्पतां धनवद्धनादिमालक्ष्य तद्धठाद्धरतां चोराणां संबन्धी भूरिर्बहुलः पांसुः समुत्थितः अभूत्। अत्र नैकविधाः पाठाः सन्ति, ते त्वप्रयोजनत्वादुपेक्षिताः ॥ ३८ ॥ तदिति। भर्त्तरि तस्मिन्राज्ञि उपरते नष्टे सति लोकस्य वसु धनं लुम्पतां लुण्ठतां चोराणां तथा अन्योन्यं जिघांसतां स्वार्थसिद्ध्यै हन्तुमिच्छतां लोकानां च, तत्तथाविधं उपद्रवम् आज्ञाय विदित्वा ॥ ३९ ॥

चौरप्रायमिति। तथा जनपदं राष्ट्रं, चौरप्रायं प्रचुरचौरयुतम् अराजकं राजहीनं हीनसत्त्वं सत्त्वहीनं, प्रचुरप्राणि-वर्जितमित्यर्थः। आज्ञाय ज्ञात्वा च, शक्ताः अपि, वेनमिव हुंकारेणैव चौरान्निहन्तुं समर्थाः सन्तोऽपीत्यर्थः। ऋषयः तस्माच्चोरादिहननाद्यो दोषः पापं तद्दर्शिनः अत एव लोकान् नाऽवारयन्न निवारितवन्तः। केचित्तु तद्दोषदर्शिनः आवरणे दोषदर्शिनोऽपि लुम्पतो लोकान्नावारयन्नित्याहुः। द्वयोरेकसंबन्धः ॥ ४० ॥ शक्तानामृषीणां चोरोपद्रुतदीनलोकोपेक्षायां तु तपोनाशप्रसङ्गः स्यादित्याह। ब्राह्मण इति। समदृक् सर्वस्य ब्रह्मात्मकत्वदर्शी शान्तः उक्तार्थोपयोगिशमादिसंपन्नः अपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्राह्मणः यदि दीनानां समुपेक्षकः भवेत् तर्हि तस्यापि ब्रह्म तपः भिन्नभाण्डात् स्फुटितामत्रात् पयो जलं यथा तथा स्रवते गच्छति ॥ ४१ ॥ शापप्रदानेन दुर्जनविनाशनपूर्वं लोकत्राणेऽपि तपोहानिरुपेक्षायां च तपोनाशस्तर्हि शक्तैः विप्रैः किं कार्यमित्याशङ्क्य स्वतपसो नाशाभावार्थं राजान्तरं संपाद्य तद्द्वारा दीनपरित्राणं कार्यमिति संशयं कृत्वा राजान्तरसर्जनाय वेनोरुमन्थनं कार्यमिति निश्चित्य पुनराहुः। नाङ्गस्येति। राजर्षेः अङ्गस्य एषः वंशः संस्थातुं नाशं यातुं न अर्हति। हि यस्मात् अस्मिन् वंशे नृपाः केशवाश्रयाः अमोघवीर्याः आसन्निति शेषः ॥ ४८ ॥ विनिश्चित्येति। ऋषयो भृग्वादयस्ते मुनयः एवमित्थं विनिश्चित्य, विपन्नस्य विपत्तिं प्राप्तस्य मृतस्येत्यर्थः। महीपतेर्वेनस्य ऊरुं वामोरुं वामोरुप्रदेशं तरसा बलेन ममन्थुर्मथितवन्तः। तत्र समन्त्रं मथिते तदूरौ बाहुकनामा नरः, आसीदुद्बभूव ॥ ४३ ॥ तं बाहुकं विशिनष्टि। काकेति। काककृष्णः काक इव कृष्णवर्णः अतिह्रस्वाङ्गः ह्रस्वौ बाहू यस्य सः महान्तौ हनू कपोलप्रान्तौ यस्य सः ह्रस्वा वाग्यस्य सः निम्नं नासाग्रं यस्य सः रक्ते अक्षिणी यस्य सः ताम्राः पाटलवर्णाः मूर्द्धजाः केशाः यस्य सः ॥ ४४ ॥

तं त्विति। तं बाहुकं दीनं किं करोमि इति वादिनम् अवनतं प्रणतिं कुर्वन्तमपि राज्यानर्हमित्यभिप्रेत्येति शेषः। ते मुनयः तु हे तातानुकम्प्य बाल निषीद इत्येवम् अब्रुवन् कथयामासुः। ततः निषीदेति मुनिवचनात् स बाहुकः निषादः अभवत्। निषादजातीयोऽभवदित्यर्थः। उभयोरेकसंबन्धः ॥ ४५ ॥ तस्येति। तस्य बाहुकस्य वंश्या वंशे भवा जनाः तु गिरेः काननं गोचर आश्रयो न तु पुरादिप्रवेशो येषां तथाविधाः नैषादाः अभवन्। तत्र हेतुः। येन कारणेन असौ बाहुकः जायमानः सन् उल्बणमुत्कटं वेनकल्मषं वेनस्य पापम् अहरत्। ततस्तस्य वंश्यास्तथाभूता अभवन्नित्यर्थः ॥ ४६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः

अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥ १ ॥

विप्रैः पञ्चदशे मथ्यमानाद्वेनस्य बाहुतः। पृथोर्जातस्य संप्रोक्तमभिषेकादिकं शुभम् ॥ १ ॥

अथेति। अथानन्तरम् अपुत्रस्य महीपतेः तस्य वेनस्य बाहुभ्यां विप्रैः पुनर्भूयोऽपि मथ्यमानाभ्यां सद्भ्यां मिथुनं स्त्रीपुंसात्मकं युगलमित्यर्थः। समपद्यतोद्बभूव ॥ १ ॥ तदिति। जातं प्रादुर्भावं प्राप्तं तत् मिथुनं दृष्ट्वा तच्च भगवत्कलां भगवदंशभूतं विदित्वा परमसंतुष्टा अतिप्रसन्नतां प्राप्ताः ब्रह्मवादिनो वेदविदः ऋषयः भृग्वादयस्ते मुनयः ऊचुः ॥ २ ॥ किमूचुरित्यत आह। एष इति चतुर्भिः। एषः पुमान् भगवतः विष्णोः भुवनपालिनी कला अस्ति। भुवनपालनार्थं कलयावतीर्ण इत्यर्थः। पुरुषस्य भगवतः अनपायिनी पुरुषं विहाय क्षणमपि स्थातुमनर्हा इयं स्त्री च लक्ष्म्याः संभूतिः लक्ष्म्याः कलैव भवतीत्यर्थः। पुरुषमविहाय जाता स्वयं लक्ष्मीरेवेति भावः 'राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि। अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी, इति वचनार्थोऽत्रानुसंधेयः ॥ ३ ॥ अयं त्विति। पुमानस्मिन्मिथुने यः पुरुषः अयं तु प्रथमो मुख्यः राजा यतः यशः राजेत्येवंभूतां कीर्त्तिं प्रथयिता विस्तारयिता। अतः पृथुश्रवाः पृथुकीर्त्तिसंपन्नः पृथुः नाम पृथ्विति नाम्ना विख्यातः महाराजः भविष्यति। अत्र नामशब्दः प्रसिद्धौ। प्रथयति यश इति पृथुरिति योगरूढिभ्यां प्रख्यातो राजाधिराजो भविष्यतीत्यर्थः ॥ ४ ॥

इयमिति। अस्मिन्मिथुने वर्त्तमानेति शेषः। इयं स्त्री च देवी द्योतमाना सुदती शोभनदन्तवती गुणाश्च भूषणानि च तानि भूषयतीति गुणभूषणभूषणा वरारोहा अतः अर्चिः नाम अर्च्यते पूज्यते पतिव्रताग्रेसरत्वात्ताभिरित्यर्चिः 'अर्चिसृपिच्छादिच्छर्दिभ्य' इति सिः। केचित्तु अर्चते उज्ज्वलतीत्यर्चिरित्याहुः उभयथापि योगरूढिभ्यां प्रख्यातेत्यर्थः। पृथुमेव अवरुन्धती पतित्वेन स्वीकुर्वाणा भविष्यतीत्यर्थः ॥ ५ ॥ एष इति। रक्षितुमिच्छा रिरक्षा लोकस्य रिरक्षा तया साक्षात् हरेः अंशः एषः पृथुः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जातः। तत्परा तदनन्यार्हा अत एव अनपायिनी अर्चिर्लक्ष्मीः इयम् अनुजज्ञे। लक्ष्म्यंशभूता जातेत्यर्थः॥ ६॥ प्रशंसन्तीति। तदानीं तं पृथुं विप्राः प्रशंसन्ति स्म। गन्धर्वप्रवराः गन्धर्वश्रेष्ठाः जगुः गानं कृतवन्तः। सिद्धाः सुमनोधाराः पुष्पवृष्टीः मुमुचुः। स्वःस्त्रियोऽप्सरसः नृत्यन्ति स्म ननृतुः॥ ७॥ शङ्खेति। शङ्खाश्च तूर्याणि च मृदङ्गाश्च ते आद्या येषां ते दुन्दुभयः दिवि नेदुः। तत्र पृथोः समीपे देवाश्च ऋषयश्च पितरश्च तेषां सर्वे गणाः उपाजग्मुः॥ ८॥ ब्रह्मेति। जगद्गुरुः जगतां पिता हितोपदेष्टा च ब्रह्मा चतुर्मुखः वेदैः सुरेश्वरैर्देवेन्द्रादिभिश्च सह तत्र आसृत्यागत्य वैन्यस्य वेनापत्यस्य पृथोः दक्षिणे हस्ते गदाभृतः भगवतः चिह्नं चक्रादिरेखात्मकं लक्ष्म॥ ९॥ पादयोरिति। तथा पादयोः अरविन्दं च रेखात्मकं कमलचिह्नं च दृष्ट्वा तं पृथुं हरेः कलामंशं मेने। यस्य चक्रं चक्राकृतिरेखात्मकचिह्नम् अप्रतिहतं रेखान्तरैरसंभिन्नं भवेत् सः परमेष्ठिनः अंशः स परमपुरुषस्यांश इत्यर्थः। बोध्य इति शेषः। वै उभयोरेकान्वयः॥ १०॥ तस्येति। ब्रह्मवादिभिः ब्राह्मणैः ततः तस्य अभिषेकः आरब्धः। अस्मै यानि आभिषेचनिकान्यभिषेकसाधनानि तानि जनाः सर्वतः सर्वाभ्यो दिग्भ्यः आजह्रुः॥ ११॥ सरिदिति। सरिद्भिः सहिताः समुद्राः सरित्समुद्राः सरितः समुद्राश्चेत्यर्थः। गिरयः पर्वताः हिमाद्रिप्रभृतयः, नागाः सर्पाः, गावो धेनवः खगाः पक्षिणः मृगाः, द्यौः, क्षितिः सर्वभूतानि उपायनं सन्मानार्हं वस्तुजातं समाजह्रुः॥ १२॥

स इति। महाराजः स पृथुः अभिषिक्तः विप्रैरिति शेषः। अतः सुवासाः परिधारितशोभनवसनः साधु यथा तथा अलंकृतः परिधापितशोभनालंकारः सन् अलंकृतया वस्त्राभरणधारणसंशोभितया। अर्चिषा पत्न्या सह अपरोऽन्यः अग्निरिव, विरेजे रराज॥ १३॥ सर्वभूतानि समाजह्रुरुपायनमित्येतत्प्रपञ्चयति। तस्मा इति। हे वीर तस्मै पृथवे धनदः कुबेरः हैमं हिरण्मयं वरासनमतिश्रेष्ठं सिंहासनं जहारार्पयामास। तथा वरुणः, शशिप्रभं चन्द्रबिम्बसमानं सलिलस्रावं जलपृषत्स्रावसहितम् आतपत्रं जहार॥ १४॥ वायुरिति। वायुश्चापि वालव्यजने जहारेति सर्वत्रानुषञ्जनीयम्। धर्मः कीर्तिमयीं स्रजम् इन्द्रः उत्कृष्टं किरीटं यमः संयमनं सर्वशिक्षासंपादकं दण्डम्॥ १५॥ ब्रह्मेति। ब्रह्मा विधिः ब्रह्ममयं वेदमयं वर्म कवचम्। भारती सरस्वती उत्तमं हारं हरिः सुदर्शनं चक्रं तत्पत्नी लक्ष्मीः अव्याहतामनश्वरां श्रियं संपत्तिम्॥ १६॥ दशेति। रुद्रः दश चन्द्राश्चन्द्राकाराणि बिम्बानि कोशे यस्य तम् असिं खड्गं तथा अम्बिका रुद्रपत्नी शतचन्द्रं शतपरिमित-चन्द्राकारबिम्बसहितं चर्म इति शेषः। सोमश्चन्द्रः अमृतमयानमृतस्राविणः यच्छरीरेभ्यः स्वेदोदकस्थानेऽमृतक्षरणं जायतेऽ-तस्तत्प्राचुर्ययुक्तम् अश्वान्। त्वष्टा, रूपाश्रयं सकलशोभैकाधारत्वादतिसुन्दरं रथम्॥ १७॥ अग्निरिति। अग्निः आजगवम् अजस्य गोश्च शृङ्गाभ्यां निर्मितत्वादुक्तसंज्ञं चापं धनुः, सूर्यः, रश्मिमयाम् रश्मिवत्सर्वत्र प्रवेशसमर्थान् इषून्बाणान् भूः योगमय्यावऽणि-मादियोगरूपधने, पादस्पर्शमात्रेणाभीष्टदेशप्रापके वा पादुके द्यौः अन्वहं पुष्पावलिं पुष्पं बलिमन्वहमितिपाठे बलिं पूजार्हं पुष्पम्॥ १८॥ नाट्यमिति। खेचराः सिद्धसाध्यगन्धर्वादयः, नाट्यं सुगीतं वादित्रम् अन्तर्द्धानं च। ऋषयः, सत्याः आशिषश्च, आजह्रुः। समुद्रः आत्मजं स्वस्मादुद्भूतं शङ्खम्॥ १९॥ सिन्धव इति। सिन्धवो नदाः, नद्यश्च, पर्वताः, महात्मनः पृथोः रथवीथीः रथमार्गान् ददुः। ततः सूतः मागधः, अथ, बन्दी, तं पृथुं स्तोतुम्, उपतस्थिरे समीपे स्थितवन्त इत्यर्थः॥ २०॥

स्तावकानिति। प्रतापवान्महाप्रतापोपेतः, वैन्यो वेनपुत्रः पृथुः तान् सूतादीन् स्तावकान् स्तोतुमुद्युक्तान् अभिप्रेत्य तदिङ्गितदर्शनेन ज्ञात्वा मेघनिर्ह्रादया मेघगर्जनवद्गम्भीरया, वाचा, प्रहसन्सन् इदम् अब्रवीत॥ २१॥ यदब्रवीत्तदेवाह। भो सूतेति। हे सौम्य शोभनगुणोपेत, भो सूत हे मागध, हे बन्दिन् लोके अधुना अस्पष्टगुणस्य सतः मे मम स्तवो युष्माभिः करिष्यमाणा स्तुतिस्तु, स्यात्। परं तु एषः मे मम, स्तवः किमाश्रयः योऽयताम्। लोके प्रख्याता गुणा हि स्तोत्रविषया अतोऽप्रख्यातगुणस्य मे स्तवो मत्कृतचरित्ररूपविषयाभावाद्वितथः सन् प्रत्युत मल्लाघवाय स्यादिति भावः। अतः वो युष्माकं गिरः मयि विषये, वितथाः, मा, अभूवन्। मिथ्या प्रशंसनविधापनतो मम मिथ्याश्लाघाविधापकतारूपा भवतामनृत-भाषितरूपा चानिष्टापत्तिः स्यात्ततः करिष्यमाणमद्गुणाभूतपूर्वत्वे सति वर्णनीया इति भावः॥ २२॥ एतदेव स्फुटमाह। तस्मादिति। तस्मात् हे अपीच्यवाचः मधुरवाचः सूतादयः परोक्षे कालान्तरे विधानानन्तरमस्मद्गुणेषु स्पष्टतां यातेषु सत्स्वित्यर्थः। अस्मदुपश्रुतानि अस्मानाश्रित्योद्भवं प्राप्तानि यशांसि प्रति स्तोत्रम् अलमतिशयेन करिष्यथ। अनवसरे समीरितानां मधुरगिरां शोभा नोपपद्यते इति भावः। किं च सभ्यैः प्रेरिता वयं त्वामेवं स्तुम इति चेत्तत्राह। उत्तमश्लोकस्य भगवतो यो गुणानुवादस्तस्मिन्कर्त्तव्ये सति जुगुप्सितमनुत्तमश्लोकगुणानुवादं सभ्याः न स्तवयन्ति। सभ्या भगवद्-गुणगायनं प्रोज्झ्य माद्दग्गुणस्तुतिं न कारयन्तीत्यर्थः॥ २३॥ ननु भवद्गुणानामधुना त्वस्पष्टत्वेऽपि भविष्यद्गुणैरस्मानं स्तावयत्विति चेत्तत्राह। महद्गुणानिति। असतः सांप्रतमसतोऽपि महद्गुणान् महतां गुणान् आत्मनि स्वस्मिन् कर्त्तुं संपादयितुम् ईशः शक्तः सन्नपि, कः जनः, तान् आदावेव स्तावकैः स्तोतृभिः स्तावयते, स्तुतिं कारयते न कोऽपीत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदि कश्चित् ते गुणाः, अस्य, अभविष्यन्, इति बुद्ध्याऽऽत्मानं स्तावयते, सः कुमतिः, विप्रलब्धोऽधिक्षिप्तः सन्नपि, जनावहासं जनकृतं परिहासं, न वेद। यद्ययं शास्त्राभ्यासादिकमकरिष्यत्तर्ह्यस्य ते विद्यादयो गुणा अभविष्यन्निति क्रियानिष्पत्त्या मम विप्रलम्भोऽयं कृत इति प्रसिद्धमवहासं न जानातीत्येवेत्यर्थः॥ २४॥

सुमतयस्तु स्वपुरोऽन्यकृतां स्तुतिं निन्दन्तीत्याह। प्रभव इति। परमोदारा निरतिशयशौर्यप्रभृतिगुणसंपन्नाः प्रभवः अपि सद्गुणानात्मनि संपादयितुं शक्ता अपीत्यर्थः। विश्रुताः प्रख्याताः अपि ह्रीमन्तः लज्जायुक्ताः सन्तः आत्मनः स्वस्य विगर्हितं पौरुषं वा ब्राह्मणवधादिनिन्दितपराक्रममित्यर्थः। स्तोत्रं शोभनमपि समक्षं स्तोत्रं जुगुप्सन्ति निन्दन्ति उचितामपि स्तुतिं समक्षं न सहन्ते इति भावः॥ २५॥ वयमिति। हे सूताद्याः सूतप्रभृतयः वयं तु लोके अविदिताः अप्रख्याताः विवरीमभिः अत्यन्तं श्रेष्ठैः। दीर्घत्वमार्षम्। कर्मभिः आत्मानं बालवत् कथं गापयिष्याम। सूताद्यापि वरीमभिरिति पाठान्तरे सूतेति जात्यभिप्रायमेकवचनं तच्च मागधादीनामप्युपलक्षणं ततः हे सूत हे सूतादय इत्यर्थः। अद्यापि अधुनापि वरीमभिः वरिष्ठकर्मभिः लोके अविदिताः वयं कथं बालवदित्यादिपूर्ववत्॥ २६॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे पञ्चदशोऽध्यायः॥ १५॥

—:❀:—

अथ षोडशोऽध्यायः

मैत्रेय उवाच

इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः। तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया॥ १॥

षोडशे भार्यया युक्तं लोकेशैः सत्कृतं पृथुम्। स्तुवन्ति स्मेरिता विप्रैः सूताद्या इति कथ्यते॥ १॥

इतीति। गायकाः सूतादयः पृथुना वारिता अपीति शेषः। मुनिनोदिताः भगवदंशभूतस्य पृथोरविकत्थयितृत्वादिकल्याणगुणगणाभिज्ञमुनिमण्डलसंप्रेरिता इत्यर्थः। तस्य पृथोः वागेवामृतं तस्य सेवा तया, तुष्टमनसः संप्रीतमानसाः सन्तः, इत्युक्तप्रकारेण ब्रुवाणमपि, नृपतिं तुष्टुवुः॥ १॥ तत्र गायकाः पृथोः कल्याणगुणानुवर्णनात्मकस्तुतावात्मनामसामर्थ्यमावेदयन्तः पुनर्मुन्यनुगृहीताः सन्तस्तत्सामर्थ्यमाहुर्नालमिति द्वाभ्याम्। हे पृथो ते तव महिमानुवर्णने वयं न अलं न समर्थाः। कुतः देवदेवः सद्गुणैर्दीव्यमानानां ब्रह्मादीनामपि देवः निरतिशयानन्तकल्याणगुणजातेन दीव्यमानः यः भवान् मायया आत्मीयसंकल्परूपज्ञानेन मायावयुनं ज्ञानमिति मायाशब्दस्य ज्ञानपर्यायत्वात्। अवततारावतीर्णः। अनन्तकल्याणगुणाकरो भगवानेव त्वद्रूपेणावतीर्ण इत्यर्थः। अतः कथमनन्तानां त्वद्गुणानां वर्णने वयं प्रभवः इति भावः। ननु सत्यमनन्तानां भगवद्गुणानां वर्णने यूयमसमर्था इति परमहं तु मानुषस्तत्कथं मद्गुणानुवर्णने यूयमप्रभव इत्यत्राहुः। वेनस्य यदङ्गं तस्माज्जातः अजहदनन्तकल्याणगुणतयाऽवतीर्णस्तस्य ते भगवदंशभूतस्य तव पौरुषाणि चरित्राणि प्रति वाचस्पतीनां ब्रह्मादीनामपि धियो बुद्धयः बभ्रमुः। चोऽवधारणे। अप्रतर्क्यत्वान्मुमुहुरेव। किमु वक्तव्यं वयमसमर्था इति 'किं तत्र परमाणुर्वै यत्र मज्जति मन्दरः' इति भावः॥ २॥

अथापीति। अथापि यद्यपि त्वन्महिमानुवर्णने वयं नालं तथापीत्यर्थः। उदारश्रवसो विपुलकीर्तेः हरेः कलावतारस्यांशावतारभूतस्य 'कलास्याद्दंशशिल्पयोः' इति कोशात्कलाशब्दोऽत्रांशपर्यायः। पृथोः कथैवामृतं तत्राद्दताः सादराः वयं यथोपदेशमुपदेशं योगबलेन हृदि प्रकाशनमनतिक्रम्य मुनिभिः प्रचोदिताः प्रेरिताः सन्तः श्लाघ्यान्यनवद्यानि कर्माणि वितन्महि विस्तारयामः॥ ३॥ विस्तारमेव प्रपञ्चयति। एष इति। एषः पृथुः धर्मभृतां वर्णाश्रमानुबन्धिधर्मानुष्ठातॄनराणां मध्ये श्रेष्ठः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते' इत्युक्तरीत्या स्वयं लोकसंग्रहार्थं नितरां स्ववर्णाश्रमोचितधर्ममाचरंस्तद्वज्जनमध्ये श्रेष्ठ एवासीदित्यर्थः। अत एव लोकमकृत्स्नविज्जनं धर्मे अनुवर्त्तयन् सम्यगनुवर्त्तयिता धर्मः सेतुः 'सेतुर्यथा परतीरं प्रापयति, तथा संसाराब्धिपरपारप्रापको' येषां तेषां साधूनां गोप्ता तत्परिपन्थिनां धर्मविरोधिनामसाधूनां च शास्ता भविष्यतीति शेषः ॥ ४ ॥ एष इति। एषः पृथुः एकः स्वयमेक एव लोकपालानां सूर्येन्द्रादीनां तनूः तनौ स्वमूर्त्तौ उभयोः लोकयोः हितं यथा भवति तथा काले काले यथाभागं पालनपोषणानुरञ्जनादिकार्यानुसारेण बिभर्त्ति वै। तत्र हितं तु यज्ञादिप्रवर्त्तनेन स्वर्गस्य वृष्ट्यादिना च, भूर्लोकस्येत्येवं बोध्यम् ॥ ५ ॥ तत्र सूर्यादितनुधारणमाहुरष्टभिः। वस्विति। विभुः समर्थः अयं पृथुः सर्वेषु भूतेषु समोऽपि सूर्यवत् प्रतपन् सन् काले करादानकाले वसु धनम् उपादत्ते स्वीकरोति। काले दुर्भिक्षावसरे च विमुञ्चति। अत्र वर्त्तमाननिर्देशो 'वर्तमानसामीप्ये वर्त्तमानवद्वा' इति भूतवत् द्रष्टव्यः। अष्टौ मासान् सूर्यो यथा जलमादत्ते वर्षासु विमुञ्चति तद्वदिति भावः ॥ ६ ॥ तितिक्षतीति। क्षितिर्भूमिस्तस्या वृत्तिः क्षमा सास्त्यस्येति क्षितिवृत्तिमान करुणः करुणावान् वैन्यः पृथुः उपरि मस्तके आक्रमतां पादक्षेपादिनाऽऽक्रममाणानाम् अपि आर्त्तानां भूतानाम् अक्रममतिक्रमं शश्वत् तितिक्षति सहिष्यते ॥ ७ ॥ देव इति। नरदेववपुः हरिः अतः एषः सर्वहितेच्छुः असौ देवः पृथुनृपः देवे पर्जन्ये अवर्षति सति कृच्छ्रं गताः कृच्छ्रगतास्तथाभूताः प्राणाः यासां ताः प्रजाः इन्द्रवत् अञ्जसा रक्षिष्यति हि। स्वयं वृष्टिं कृत्वेति शेषः ॥ ८ ॥

आप्याययतीति। असौ पृथुः, अनुरागसहितोऽवलोको यस्मिंस्तेन, विशदं यत्स्मितं तेन चारुः सुन्दरस्तेन वदनमेवामृतमूर्त्तिश्चन्द्रस्तेन लोकम् आप्याययति वर्द्धयति ॥ ९ ॥ अव्यक्तेति। अव्यक्तं प्रवेशनिर्गमयोरविज्ञातं वर्त्म मार्गो यस्य सः, निगूढं निष्पत्तेः प्रागविज्ञातं कार्यं यस्य सः, गम्भीरवेदी किमर्थमयमेवं कृतवानित्यन्यैरज्ञाताभिशयः उपगुप्तं सुरक्षितं वित्तं यस्य सः, अनन्तं माहात्म्यं यस्य तस्माद्धेतोः, गुणानामेकधाम मुख्य आश्रयः पाठान्तरे कृतबहुव्रीह्योर्द्वयोः पदयोर्विशेषणसमासः। एषः पृथुः प्रचेता वरुणः इव, संवृतात्मा वरुणो यथा सप्तसमुद्रसंवेष्टितस्तथायं सप्तप्रकृतिसंयुतः भविष्यतीत्यर्थः ॥१०॥ दुरासद इति। दुरासदः शत्रोर्मनसापि प्राप्तुमशक्यः दुर्विषहः शत्रुभिः सोढुमशक्यः आसन्नः संनिहितः सन्नपि, विदूरवत् पौरुषेणाभिभवितुमशक्यः एवंविधः वेन एवारणिस्तस्मादुत्थितः अनलः पृथ्वग्निः अभिभवितुं नैव शक्यः ॥ ११ ॥ अन्तरिति। देहिनाम् अध्यक्षः देहधारणे प्रधानहेतुभूतः वायुः सूत्रात्मवायुरिव, आत्मा सकलजनपालनपोषणहेतुः पृथुः चारणैर्गूढपुरुषैः, भूतानां, कर्माणि, अन्तः, बहिश्च, पश्यन् अपि, उदासीनः इव, स्वस्तुतिनिन्दादाविति शेषः। वर्त्तिष्यते सर्वेषां स्वस्वप्राणवत्प्रिय इति भावः ॥ १२ ॥ नेति , एषः पृथुः, आत्मद्विषां शत्रूणाम् अपि, सुतम् अदण्ड्यं न दण्डयति। सुतग्रहणं स्वात्मजसाम्यार्थं दण्ड्यं दण्डार्हम् आत्मजं स्वसुतमपि, दण्डयति। यतः धर्मपथे, स्थितः, यमस्य वृत्ते वर्त्तमान इत्यर्थः ॥ १३ ॥ अस्येति। अस्य पृथोः चक्रमाज्ञा रथचक्रं च अप्रतिहतं सत् आमानसाचलात् मानसाचलमभिव्याप्य, मानसाचलादपि परस्तादित्यर्थः। अभिविधा वाङ्, वर्त्तते। एवं चेत्ततः परस्तात्किंपर्यन्तमित्यत्राह। भगवानैश्वर्यसंपन्न अर्कः सूर्यः गोगणैः किरणसमूहैः, यावद्यावत्पर्यन्तं तपति तावद्वर्त्तते ॥ १४ ॥ राजशब्दप्रवृत्तिनिमित्तं प्रजारञ्जनरूपमस्मिन्नेव पुष्कलमित्याहुः रञ्जयिष्यतीति। अयं पृथुः आत्मनः स्वस्य विचेष्टितानि व्यापारास्तैः, यद्यतः लोकं, रञ्जयिष्यति। अथ ततः मनोरञ्जनकैः प्रजामनोरञ्जनविधानैर्हेतुभिः, प्रजाः, अमुं पृथुं राजानम् आहुः ॥ १५ ॥

दृढव्रत इति। अयं पृथुरिति कर्त्ता तृतीयश्लोकादनुषञ्जनीयः। दृढव्रतोऽप्रतिहतसंकल्पः तस्य संकल्पोऽपि नासमीचीनविषय इत्याह। सत्यसंधः सत्यं समीचीनं संधत्ते संकल्पते इति सत्यसंधः। ब्रह्मण्यो ब्राह्मणेषु साधुः, वृद्धसेवकः वृद्धानामेव संसेवनप्रसक्तः, सर्वभूतानां शरण्यः रक्षकत्वेन विश्वसनीयः मानदः सन्मानकरश्च दीनेषु वत्सलः स्निग्धः ॥ १६ ॥ मातृभक्तिरिति। परस्त्रीषु परदारेषु मातरीव भक्तिर्भजनं यस्य सः, आत्मनो देहस्य अर्द्धेऽर्धभागे इव पत्न्यां प्रीतिमान प्रजासु पितृवत् स्निग्धः दोषानवेक्षणेन प्रीतिपूर्वकमनुवर्त्तनशील इत्यर्थः। ब्रह्मवादिनां ब्रह्मविदां किंकरो दासः ॥ १७ ॥ देहिनामिति। देहिनां प्राणिनाम् आत्मवत् प्रेष्ठः निरतिशयप्रीतिविषय इत्यर्थः। सुहृदां स्वसुहृज्जनानां नन्दिमानन्दं वर्द्धयति इति तथाभूतः मुक्तसङ्गेषु वीतरागसाधुजनेषु प्रसङ्गो यस्य सः, असाधुषु साध्वाभासासज्जनेषु दण्डपाणिः इव भवितेति शेषः। त्रयाणामेकसंबन्धः। दण्डपाणिरित्यनेनापराधानुपेक्षणमुच्यते। नादण्ड्यमित्यत्र पक्षपाताभाव उक्त इत्यपौनरुक्त्यम् ॥ १८ ॥ ओजसेति। एषः पृथुः यतः महावीरः अतः ओजसात्मबलेन गतिं सकलजनैकाधारां गां भूमिं ओषधीः दोग्धा भूमेरोषधीर्धोक्ष्यतीत्यर्थः 'अकथितं च' इति भूमेः कर्मत्वम्। किं च इमां भूमिं स्वधनुष्कोट्या परि परितः समां चापि करिष्यति ॥ १९ ॥ किं बहुनायं सद्गुणानामाश्रय इति यतोऽसावनन्तकल्याणगुणनिधिर्भगवानिहावतीर्ण इत्याहुः। अयं त्विति। अयं तु अनेन समाभ्यधिकरहितत्वमभिप्रेतं तत्र हेतुः। साक्षात्प्रत्यक्षः भगवान् भगवच्छब्दप्रवृत्तिनिमित्तभूतज्ञानादिषाड्गुण्यपूर्णः अनेन हेयगुणराहित्यमुक्तम्। अत एव कूटस्थो निर्विकारः त्र्यधीशः त्रिलोकेशः आत्मा स्वयं परमात्मैव कलया स्वांशेन अवतीर्णः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथ्वाख्योपलक्षितः प्रादुर्बभूवेत्यर्थः। किंविधोऽयं पृथुः यद्द्वारा असाववतीर्णस्तत्राह। यस्मिन्पृथौ, अविद्यारचितम् अविद्यारचितवत् प्रतीतं प्रतीतिविषयतां गच्छत् अपि नानात्वं मनुष्यवद्भासमानतारूपं भेदं निरर्थकमवास्तविकं पश्यन्ति। तत्त्वदर्शिन इति शेषः। पृथोर्भगवदंशावतारत्वादिति भावः॥ २०॥ अयमिति। एकवीरः स्वसमानाभ्यधिकवीरान्तरशून्यः नरलोकनाथः अयं पृथुः उदयाद्रेः आ उदयाद्रिपर्यन्तं भुवः मण्डलं गोप्ता रक्षिष्यति। किं च जैत्रं जयनशीलं रथम् आस्थायाधिष्ठाय आत्तश्चापो धनुर्येन तथाभूतः सन् अर्कः यथा सूर्य इव, दक्षिणतः। पर्यस्यते मेरोः परितो वर्त्तमानं भूगोलं प्रदक्षिणीकरिष्यतीत्यर्थः॥ २१॥

असौ इति। असै उक्तरीत्या भूप्रदक्षिणां कुर्वते पृथवे लोकपालैरिन्द्रादिभिः सहिताः सलोकपालाः नृपाला राजानः तत्र तत्र यत्र यत्रायं गन्ता तस्मिंस्तस्मिन् स्थाने इत्यर्थः। बलिमुपायनं हरिष्यन्ति समर्पयिष्यन्ति किल। एषां नरलोकपालानां स्त्रियः, तद्यशः पृथोः कीर्तिम् उच्चरन्त्यः कथयन्त्यः सत्यः आदिराजं पृथुं चक्रायुधं भगवन्तं मंस्यन्ते ज्ञास्यन्ति॥ २२॥ तद्यशःकथनरूपं स्त्रीणां वाक्यमाहुः। अयमित्यादिभिश्चतुर्भिः। अधिराजः एकनृपतिः प्रजापतिः प्रजापालनाधिकृतः प्रजानां वृत्तिकरः जीवनोपायसंपादकः अयं पृथुः गां गोरूपधरां महीं दुदुहे। योऽयं पृथुः इन्द्रः यथा इन्द्र इव स्वस्य यत् शराऽयं धनुःश्रेष्ठं तस्य कोटिरग्रभागस्तया अत्र शरशब्दो धनुष्परः धनुष्कोट्येति पूर्वमुक्तत्वात्। केचित्तु स्वशरासकोट्येत्येव पठन्ति लीलया अद्रीन् भिन्दन् गां भूमिं समाम् अकरोत्। अयमित्यादिकं न सूतादिवाक्यम्। 'एष दोग्धा महावीरो गां सतीम्' इत्यनेन पौनरुक्त्यापत्तेः। सूतादिवाक्याभावाद्दुदुहेऽकरोत् अचरत्। निलिल्युरित्यादिभूतनिर्देशोपपत्तिः॥ २३॥ विस्फूर्जयन्निति। लाङ्गूलं पुच्छम् उद्यम्योन्नमय्य यथा मृगेन्द्रः सिंहः चरति तथा अविषह्यं शत्रुभिः सोढुमशक्यम् आजगवं धनुः आजौ संग्रामे विस्फूर्जयन् स्वयं यदा क्ष्माम् अचरत्। तदा असन्तो धर्मविरोधिनः दिशि दिशि निलिल्युर्लीना बभूवुः॥ २४॥ एष इति। एषः पृथुः सरस्वती सरस्वत्याख्या महानदी यत्र यस्मिन्ब्रह्मावर्त्ते प्रादुरभावि प्रादुरभूत्। कर्मकर्त्तरि चिण्। तत्र देशे शतम् अश्वमेधान् आजहाराकरोत्। शतक्रतोः क्रतुशतविधानसंकल्पाननुतिष्ठतः यस्य पृथोः चरमे शततमे क्रतौ वर्त्तमाने प्रवर्त्तमाने सति पुरंदर इन्द्रः हयमश्वम् अहार्षीत् परिहृतवान्॥ २५॥ एष इति। एषः पृथुः स्वसद्मनः स्वगृहस्योपसमीपे यद्वनं तत् समेत्य तत्र एकमसहायं भगवन्तं सनत्कुमारं भक्त्या आराध्य यतो ज्ञानात् परं ब्रह्म विदन्ति तत् अमलं ज्ञानम् अलभत॥ २६॥ तत्रेति। विश्रुता विख्याता विक्रमाः पराक्रमजयशांसि यस्य सः पृथुर्विस्तृतः पराक्रमो यस्य सः पृथुः यत्र यत्र गमिष्यति तत्र तत्र इत्युक्तप्रकाराः आत्माश्रिताः स्वविषयाः ताः ताः गाथाः प्रबन्धरूपा गिरः श्रोष्यति॥ २७॥ दिश इति। स्वतेजसा स्वबलेन उत्पाटितानि निर्मूलितानि लोकशल्यानि लोकानां शल्यसदृशा दुरात्मानो येन सः अत एव अप्रतिरुद्धचक्रः अप्रतिहताज्ञः दिशः विजित्य वर्त्तमान इति शेषः। सुराश्चासुराश्च तेषु ये इन्द्रास्तैः अनुगीयमानः महान् अनुभावो यस्य सः एवंभूतः भुवः पतिः भविता॥ २८॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे षोडशोऽध्यायः॥ १६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सप्तदशोऽध्यायः

मैत्रेय उवाच

एवं स भगवान् वैन्यः ख्यापितो गुणकर्मभिः । छन्दयामास तान् कामैः प्रतिपूज्याभिनन्द्य च ॥ १ ॥

ततो लोकक्षुधाः सप्तदशे प्रशमयन् पृथुः । यत्तो हन्तुं महीं ग्रस्तबीजां भीत्या स्तुतस्तया ॥ १ ॥

एवमिति । भगवानुक्तविधैश्वर्यवान् सः वैन्यः पृथुः एवं गुणकर्मभिः गुणैः कर्मभिश्चेत्यर्थः । ख्यापितः सूतादिभिः स्तुतः सन् तान् सूतादीन् कामैस्तत्तदिच्छाविषयैर्वस्त्रादिभिः प्रतिपूज्य सत्कृत्य अभिनन्द्य तेषां प्रशंसां विधाय च छन्दयामास संतोषितवान् ॥ १ ॥ ब्राह्मणेति । ब्राह्मणप्रमुखान् वर्णान् ब्राह्मणप्रभृतिचतुरोऽपि वर्णानित्यर्थः । भृत्यामात्यपुरोधसः, स्वभृत्यानमात्यान्पुरोहितांश्चेत्यर्थः । तथा श्रेणीस्तैलिकताम्बूलिकादीन् , पौरान्पुरवासिनः, जानपदान् देशवासिनः जनान् प्रकृतीः नियोगिनः, समपूजयत् सम्यक् पूजितवान् ॥ २ ॥ एवं सूतादिकृतस्तुतिकथनव्याजेन समासतः संश्रावितपृथुचरितं मुनिं पुनस्तच्चरितशुश्रूषया क्षत्ता पृच्छति । कस्मादिति । हे मैत्रेय बहुरूपिणी कामरूपधारिणी, धरित्री कस्माद्धेतोः, गोरूपं दधार । यां गोरूपधरां, पृथुः, दुदोह । तत्र तत्कृतदोहनावसरे, वत्सः कः दोहनसाधनं पात्रं, च किम् , आसीदिति शेषः ॥ ३ ॥ प्रकृत्येति । प्रकृत्या स्वभावेन, विषमा पर्वतादिभिर्निम्नोन्नतवती, देवी मही, तेन पृथुना, समा समाना, कथं केन प्रकारेण, कृता तस्य पृथोः, मेध्यं यज्ञार्हं, हयमश्वं, देव इन्द्रः, कस्य हेतोः, कस्मात्कारणात् अपाहरत ॥ ४ ॥ सनत्कुमारादिति । हे भगवन्मैत्रेय ब्रह्मवित्सूत्तमस्तस्मात् , ब्रह्मविदां मध्येऽत्युत्कृष्टादित्यर्थः । सनत्कुमारात् ब्रह्म ब्रह्मविषयकं सविज्ञानमुपासनात्मकज्ञानसहितं ज्ञानं लब्ध्वा राजर्षिः पृथुः, कां, गतिं, गतः संप्राप्तः ॥ ५ ॥

यच्चेति । हे ब्रह्मन् सुश्रवसः शोभनकीर्त्तेः प्रभोः सर्वं विधातुं समर्थस्य भगवतः षाड्गुण्यपूर्णस्य कृष्णस्य पूर्वः प्रथमो यो देहोऽवतारः पृथुस्तस्य या कथा तदाश्रयं तत्प्रतिपाद्यं पुण्यं शृण्वतां पुण्यसंपादकं श्रवो यशश्चरित्रमित्यर्थः । यच्च अन्यदपृष्टमपि श्रवणार्हमितरत् तत् सर्वम् अत्र कृष्णस्य पूर्वदेहकथाश्रयमिति यदभिहितं तद्दशमस्कन्धे श्रीकृष्णनामकरणप्रसङ्गे गर्गः नन्दं प्रति । 'पुरानेन व्रजपते साधवो दस्युपीडिताः । अराजके रक्ष्यमाणा' इत्यनेन स्फुटीकरिष्यति ॥ ६ ॥ भक्तायेति । हे मैत्रेय तव, अधोक्षजस्य च भक्ताय अनुरक्तायोभयोरप्यनुरागवते चोऽवधारणे । मे मह्यं वक्तुम् अर्हसि कोऽसावधोक्षजो यस्य भक्तायेत्युक्तं तत्राह । योऽधोक्षजः वैन्यरूपेण पृथुरूपेण अवतीर्णः सन्निति शेषः । इमां गां पृथ्वीम् अदुह्यत् दुग्धवान् तस्येति द्वयोरेकसंबन्धः ॥ ७ ॥ अत्र केचित्सूत उवाचेति केचिच्छुक उवाचेत्यपि पठन्ति तत्र शुक उवाचेत्येव न्याय्यं प्रतिभाति । चोदित इति । विदुरेण एवं वासुदेवकथां प्रति पृथुकथासंश्रावणं प्रति चोदितः संप्रेरितः मैत्रेयः प्रीतमनाः सन् तं विदुरं प्रशंस्य प्रस्तूय प्रत्यभाषत ॥ ८ ॥ यदेति । अङ्ग हे विदुर विप्रैः यदा पृथुः अभिषिक्तः राज्याभिषेकं गमितः जनतायाः जनसमूहस्य पालो रक्षकः इति आमन्त्रितः त्वं प्रजाः पालयेत्युक्त्वा राज्यासने नियुक्तश्चेत्यर्थः । तदा क्षितिपृष्ठे भूतले निरन्ने अन्नरहिते सति क्षुधा क्षुधया क्षामाः क्षीणाः देहा यासां ताः प्रजाः एत्य समीपमागत्य पतिं पृथुम् अभ्यवोचन्नब्रुवन् ॥ ९ ॥ वयमिति । हे राजन् यथा कोटरस्थेन कोटरगतेन अग्निना वह्निना वृक्षाः अभितप्ताः भवन्ति । तथा वयं जाठरेण जठरगतवैश्वानराग्निना अभितप्ताः सन्तः यो भवान् नोऽस्माकं वृत्तिकरो जीवनसंपादकः पतिः साधितः विप्रैर्मथनेन संपादितः त्वां तथाविधं तं भवन्तं शरण्यं शरणे साधुं ज्ञात्वा अद्याधुना शरणं याताः प्राप्ताः स्मः ॥ १० ॥ तदिति । तत्तस्माद्धेतोः हे नरदेवदेव राजराज वयम् उज्झिताः संत्यक्ता ऊर्जाः अन्नानि यैस्ते परिहृतान्नाशनाः सत्य इत्यर्थः । 'ऊर्जस्तु कार्त्तिकोत्साहबलेषु प्राणनेऽपि च' इति मेदिनी । यावत् न नङ्क्ष्यामहे नाशं न यास्यामः । तावत् क्षुधार्दितानां नोऽस्माकम् अन्नं रातवे दातुं भवान् ईहतु यत्नं करोतु । यतः त्वं वार्त्ताया अस्मज्जीविकायाः पतिः रक्षिता अतः लोकपालश्च भवसि किल । रातुमिति तुमुनो मकारं लुप्त्वोकारान्तं छान्दसं प्रातिपदिकं प्रकल्प्य चतुर्थ्येकवचनं प्रातिपदिकत्वं च पितुं मे पाहीतिवद्बोध्यम् ॥ ११ ॥

पृथुरिति । हे कुरुश्रेष्ठ विदुर पृथुः प्रजानां करुणं दीनं परिदेवितं विलपनं निशम्य श्रुत्वा दीर्घं चिरं दध्यौ चिन्तितवान् । ततः स पृथुः निमित्तं लोकस्य निरन्नत्वे कारणम अन्वपद्यत ज्ञातवान् ॥ १२ ॥ इतीति । बुद्ध्या इति व्यवसितः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथिव्या औषधिबीजानि ग्रस्तानि इत्येवं स्वमत्या निश्चिन्वान इत्यर्थः। भूमेर्भूम्यै क्रुद्धः संप्राप्तकोपः अत एव प्रगृहीतं शरासनं धनुर्येन सः पृथुः त्रिपुरहा त्रिपुरहन्ता रुद्रः यथा तथा विशिखं बाणं संदधे धनुषि योजितवान् ॥ १३ ॥ प्रवेपमानेति। धरणी पृथ्वी पृथिव्यधिष्ठात्री देवतेति यावत्। तं पृथुम् उदायुधमुद्यतशरासनसंधितबाणं निशम्य दृष्ट्वा भीता भयं प्राप्ता प्रवेपमाना तत्क्रोधातिशयेक्षातः कम्पमानगात्रा गौः सती मृगयुद्रुता व्याधेनानुगता मृगी हरिणी इव अपाद्रवत् पलायितवती ॥ १४ ॥ तामिति। वैन्य पृथुः कुपितः संजातक्रोधः अत एव अत्यरुणे अतिरक्ते ईक्षणे नयने यस्य सः सन् शरं धनुषि संधाय सा पृथ्वी यत्र यत्र पलायते तत्र तत्र तां गोरूपां धरणीमेव अन्वद्रवदनुसृत्य गतवान् ॥ १५ ॥ सेति। देवी देवतारूपा सा पृथ्वी दिशः प्राच्यादिकाः विदिशः आग्नेयकादिकाः रोदसी द्यावापृथिव्यौ तयोर्द्यावापृथिव्योः अन्तरमन्तरिक्षं च प्रति धावन्ती धावमाना सती तत्र तत्र दिक्षु विदिक्षु च अनु पृष्ठत उद्यतमायुधं येन तम् एनं पृथुमेव ददर्श ॥ १६ ॥ लोके इति। मृत्योः भीताः प्रजाः इव वैन्यात्पृथोः त्रस्ता सती भूः लोके त्राणं स्वत्रातारं न अविन्दत नैवालभत। तदा विदूयता नितरामुपतप्तेन हृदयेन निववृते न्यवर्त्तत ॥ १७ ॥ उवाच चेति। उवाच च। यदुक्तं तदाह। हे महाभाग महाबुद्धिमन् परेङ्गितज्ञेत्यर्थः। हे धर्मज्ञ स्त्रीवधानर्हतारूपधर्माभिज्ञ हे आपन्नवत्सल आपत्तियुक्तजनविषयकृपायुक्त भूतानां पालने अवस्थितः भवान् मामपि त्राहि भूतेष्वन्तर्भूतां मामपि रक्षणविषयां विधेहि इत्यर्थः ॥ १८ ॥

स त्वमिति। यो भवान् धर्मज्ञः इति मतः स त्वम् अकृतकिल्बिषां निरपराधां दीनां मा मां कस्मात् कथं जिघांससे। यदि तदप्यमणयित्वा हन्ता चेदिति शेषः। तर्हि योषां स्त्रियं कथम् अहनिष्यत् हनिष्यसि ॥ १९ ॥ ननु सापराधस्त्रीप्रहरणे को बाध इत्यत्राह। प्रहरन्तीति। हे राजन् जन्तवः सामान्या जना अपि कृतागःसु विहितापराधास्वपि स्त्रीषु न प्रहरन्ति। वै तर्हि त्वद्विधा भवादृशाः दीनवत्सलाः करुणाः प्रहरन्ति किमुत न प्रहरन्त्येव ॥ २० ॥ मामिति किं च। यत्र मयि विश्वं प्रतिष्ठितं ताम् अजरां दृढां नावं नौरूपां मां विपाट्य विभिद्य आत्मानं त्वां च इमाः प्रजाश्च अम्भसि गर्भोदके कथं धास्यसि धारयिष्यसि ॥ २१ ॥ धरित्र्यैवमुक्तः पृथुस्तदुक्तीः प्रतिवक्ष्यन्नाह। वसुध इति। हे वसुधे मच्छासनपराङ्मुखीं मदाज्ञातिवर्त्तिनीं त्वां वधिष्यामि सापराधत्वाद्राज्ञो ममाज्ञातिलङ्घनमेव भवत्याः प्रथमोऽपराध इति भावः। किं च बर्हिषि यज्ञे या त्वं भागं वृङ्क्ते देवतारूपेण भागं भजते नोऽस्मभ्यं वसु धान्यादिकं न तनोषि नैव ददासि। उपकारानभिज्ञायास्तवायं द्वितीयोऽपराध इति भावः ॥ २२ ॥ ननु सापराधाया अपि गोरूपाया मम वधोऽनुचित एवेत्यत्राह। यवसमिति। येति शेषः। गोरूपा या भवती अनुदिनं यवसं तृणं जग्धि अत्ति औधसमूधसि संभूतं पयो दुग्धं तु नैव दोग्धि न प्रपूरयति। एवं दुष्टायां तस्यां भवत्यां गवि दण्डः हि उचित एव अन्यत्रादुष्टायां गवि दण्डः न शस्यते नैवोचितः अतो मया यदिदं विधीयते स धर्म एवास्तीति भावः ॥ २३ ॥ त्वमिति। स्वयंभुवा ब्रह्मणा भूतानां जीवनार्थत्वेनेति शेषः। प्राक् कल्पादौ सृष्टानि औषधिबीजानि आत्मरुद्धानि स्वात्मनि ग्रस्तानि सन्तीत्यर्थः। तानि मां भूतपालनाधिकृतमेव माम् अवज्ञाय पराभूय अत एव मन्दधीः त्वं न मुञ्चसि खलु। यद्येवं न चेत् कथं न मुञ्चिथा अतस्त्वद्वध एवोचित इति भावः ॥ २४ ॥ तर्हि मद्वधे सर्वथाऽन्नं न स्यादित्यत्राह। अमूषामिति। क्षुत्परीतानां क्षुधया समन्ततो व्याप्तानामतिशयितक्षुज्जन्यपीडावतीनामिति यावत्। अत एव आर्त्तानाम् अमूषां प्रजानां परिदेवितमाक्रन्दनं मद्बाणैः भिन्नायाः विदारितायाः तव मेदसा मांसेन शमयिष्यामि ॥ २५ ॥ यदप्युक्तम् अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः इत्यत्राह। पुमानिति। पुमान् योषित उत क्लीबः नपुंसको वेत्यर्थः। आत्मसंभावित आत्मनैव संभावितः स्वयं स्वमुखेनैव कृतश्लाघः न तु परैः अत एव अधमः भूतेषु निरनुक्रोशः निष्कृपः स्यात्तर्हि पुंसादिविभागमनादृत्येति शेषः। नृपाणां तद्वधः अवधः एव। नृपाणां तथाविधवध उचित एवेति भावः ॥ २६ ॥

यच्चोक्तं 'मां विपाट्याजरां नावं' इत्यादिना तत्राह। त्वमिति। मायागां मायया धृतगोरूपां दुर्मदां मदभावे कथमम्भसि प्रजा धास्यसीत्येवंरूपदुर्मदविशिष्टामित्यर्थः। स्तब्धामुचितक्रियाशून्यां त्वां शरैर्मद्बाणैः तिलशः तिलतिलप्रमाणकृतशकलरूपावस्थामित्यर्थः। नीत्वा प्रापय्य आत्मयोगबलेन मदीययोगसामर्थ्येन अहं इमाः प्रजाः आत्मानं च धारयिष्यामि ॥ २७ ॥ एवमिति। एवमुक्तप्रकारां मन्युमयीं क्रोधप्रचुरां मूर्त्तिं देहं बिभ्रतम् अत एव कृतान्तमिव मृत्युर्यथा सकोपः स्थितो भवेत्तथा पुरुक्रोधं धृत्वा स्थितं पृथुमित्यर्थः। मही प्रणता प्रह्वीभूता प्राञ्जलिः संजातवेपथुः संजाताङ्गकम्पा सती प्राह ॥२८॥ पृथुनृपतिनैवमभिहिता पृथ्वी साक्षाद्भगवदवतारभूतोऽयं पृथुः सर्वज्ञः सर्वशक्तिर्न मया वञ्चयितुं शक्य इत्यालोच्य स्वयमोषधीबीजनिर्गमोपायं वीक्षन्ती क्रोधादयं मां नूनं हन्ता स्वोपदिष्टोपायां सतीं न निहन्तेत्याशङ्क्य तावत्क्रोधोपशमनायात्मनो दैन्यमाकिंचन्यं च निवेदयन्ती चिदचिच्छरीरत्वेन जगत्सृष्ट्यादिकारणत्वेन धर्मपरित्राणनिमित्तावतारविशिष्टत्वेन च स्तौति। नम इति। मायया प्रकृत्या स्वापृथक्सिद्धविशेषणभूतयाऽजयेत्यर्थः। विन्यस्तनानातनवे निष्पादितदेवमनुष्यादिव्यष्टिक्षेत्रज्ञशरीराय अनेन प्रकृतिपुरुषशरीरत्वं चोक्तं भवति। गुणात्मने प्रकृतेर्गुणविशिष्टत्वात्तद्द्वारा सत्त्वादिगुणस्वभावाय यथा 'काठिन्यं वा यो बिभर्त्ति तस्मै

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूम्यात्मने नम इति' वाक्यान्तरे भूमिद्वारास्य काठिन्यवत्त्वं न तु स्वरूपतो गुणात्मकत्वं निर्गुणश्रुतिविरोधात्तथात्रापि। एवं प्रकृतिपुरुषशरीरकत्वेऽपि तद्वैलक्षण्येन स्थितिमाह। परस्मै प्रकृतिपुरुषविलक्षणाय पुरुषाय सर्वदा पुरुषा कृतये स्वरूपानुभवेन सर्वकालं स्व॰ रूपानुभूत्या प्रकृतिपुरुषेश्वरस्वरूपानुभूत्या च द्रव्याणि च क्रियाश्च कारकाणि च तेषां विभ्रमश्च तत्प्रयुक्ता ऊर्मयोऽशनायापिपासादयः निर्धुताः द्रव्यक्रियाकारकविभ्रमो यस्य यस्मिन्वा तस्मै नमो नमः। अत्र विभ्रमशब्दस्य द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकं संबन्धः। तत्र द्रव्यभ्रमो नाम पृथिव्यात्मकद्रव्यारब्धेषु आत्मभ्रमः गच्छामि इच्छामि द्वेष्मीति देहगतक्रियाणामात्मनि भ्रमः। क्रियाभ्रमः कारकभ्रमः कर्तृत्वभ्रमः स च 'अधिष्ठानं तथा कर्ता' इति गीतावचने आत्मगतत्वेनैव प्रतीतिरूपः। एते त्रयो भ्रमाः तत्प्रयुक्ता ऊर्मयोऽशनायापिपासाशोकमोहजरामृत्य्वाख्याः अत्र भगवतो जगत्कारणत्वकथनेन तदुपयुक्तसार्वज्ञसर्वशक्तित्वादिमत्त्वस्याप्यभिप्रेतत्वाद्विश्वरचनासमर्थत्वमभिप्रेतं तत उक्तविधगुणभास्करस्त्वं क्व त्वत्पुरः खद्योतायमानाहं केत्यसाम्योक्तिगर्भमनेन स्वस्य आकिंचन्यमप्युक्तम् ॥ २९ ॥

एतदेव विशदयत्याह। येनेति। दधाति सृजतीति धाता तेन येन त्वया, आत्मनां व्यष्टिजीवानामायतनं स्थानभूता यतो यस्यां मयि अयं गुणसर्गसंग्रहः गुणमयप्रकृतिपरिणामात्मकः देवमनुष्यादिरूपः सर्वः प्रपञ्चः वर्त्तते तथाभूता अहं भूमिः विनिर्मिता सृष्टा सः धाता एव भवान् उदायुध उद्यतायुधः स्वराट् स्वतन्त्रः सन् अनेन नान्यस्तव निवारकोऽस्तीत्यभिप्रेतं मां स्वसृष्टां भूमिं हन्तुम् उपस्थितः तदा अन्यं कं शरणं रक्षणोपायभूतम् आश्रये त्वदपरो मद्रक्षको नास्त्येवेति भावः ॥ ३० ॥ ननु य एव स्रष्टा स एव हन्ति चेत्किं त्वया विधेयं सत्यं स्रष्टुरपि हन्तृरूपधारणकाले एव हनने प्रवृत्तिरुचिता न त्ववितृरूपधारिण इत्याह। य एतदिति। यो भवान् आदौ चराचरं चराचरात्मकम् एतज्जगत् आत्माश्रयया त्वदेकाश्रयया अवितर्क्यया इयमेवंविधास्तीति चिन्तयितुमशक्यया, स्वमायया स्वापृथक्सिद्धविशेषणभूतया स्वप्रकृत्या, 'माया वयुनं ज्ञानम्' इति निघण्टौ मायाशब्दः संकल्परूपज्ञानपरोऽप्यस्ति तदुपादानपक्षे अवितर्क्यस्वसंकल्पेनेत्यर्थः। असृजत् किल। सः अयं स एव भवानित्यर्थः। तयैव मायापर्यायसंकल्पेनैव गोप्तुं चराचरात्मकं जगद्रक्षितुम् उद्यत उद्युक्तः न तु कालाग्निरुद्राद्यवतारेण हन्तुमेव प्रवृत्त इत्यर्थः। अतः धर्मपरः प्रजापालनरूपधर्मे प्रवृत्तः सन् मां प्रजानां भोग्यभोगोपकरणभोगस्थानरूपां धरामित्यर्थः। कथं नु जिघांसति हन्तुमिच्छति ॥ ३१ ॥ विचित्रानन्तशक्तेस्तव चिकीर्षितं त्वतिदुर्ज्ञेयमित्याह। नूनमिति। अकृतात्मभिरवशीकृतचित्तैः त्वामप्रपन्नैरित्यर्थः। दुर्जयया जेतुमशक्यया त्वन्मायया हेतुभूतया ईशस्य तव समीहितं जनैः बत न लक्ष्यते, नूनम्। यद्वा दुर्जयया त्वन्मायया अकृतात्मभिर्मोहितचित्तैः मादृशैः जनैः ईशस्य समीहितं बत न लक्ष्यते नूनम्। कोऽसावीश्वर इत्यत्राह। यः ईश्वरः एकः स्वत एकः सन् तु अप्यर्थे अकरोत्। महदादिपृथिव्यन्तजगत्सृष्टिं कृतवानित्यर्थः। यो भगवान् परतः परैरिति परतः सार्वविभक्तिकस्तसिल्। ब्रह्मरुद्रादिरूपस्वशरीरभेदैः अनेकः संश्च अकारयत्। ब्रह्मादिभिर्व्यष्टिसृष्टिं व्यधापयत्। स ईश्वरस्तु त्वमेवेति भावः ॥ ३२ ॥ अतोऽचिन्त्यशक्तये तुभ्यं केवलं नम इत्याह। सर्गादीति। यो भवान् अस्य जगतः सर्गादि सृष्ट्यादिकं द्रव्यं च क्रिया च, कारकश्च चेतनं च तान्यात्मा स्वरूपं यासां ताभिः शक्तिभिः स्वशक्तिभिः अनुरुणद्धि अनुवर्त्तते करोतीति यावत्। तत्र द्रव्यं प्रधानात्मकमचित् द्रव्यं क्रिया जीवादृष्टाख्यं कर्म करोति गुणक्षोभमिति कारकः कालः चेतनं जीवः। केचित्तु द्रव्यादिपञ्चानां द्वन्द्वं कृत्वा द्रव्याणि महाभूतानि क्रिया इन्द्रियाणि कारका देवाः, चेतना बुद्धिः आत्माहंकारः तैः स्वशक्तिभिरित्याहुः। तस्मै, समुन्नद्धाः कार्योन्मुखाः विरुद्धाः परस्परविरुद्धाः शक्तयो यस्य तस्मै। सृष्टिस्थितिसंहाराणां युगपद्विरुद्धत्वात्तद्द्वारा तदुपयुक्तशक्तीनामन्योन्यं विरोधः। युगपत्सृष्ट्यादिशक्तीनां मिथो विरुद्धत्वेऽपि कालभेदादुपपन्नत्वेन सृष्ट्याद्युपयुक्तशक्तिमत्त्वं भगवत्युपपन्नमेव वेधसे कारणभूताय, परस्मै प्रकृतिपुरुषविलक्षणाय, पुरुषाय नमः ॥ ३३ ॥

तव समुन्नद्धविरुद्धशक्तिमत्त्वं न मानान्तरवेदनीयमपि त्वपरोक्षं मयैवानुभूतमित्याह। स वा इति। हे विभो हे अज कर्मायत्तोत्पत्तिशून्य आत्मविनिर्मितमात्मनि आत्मना वा विनिर्मितं भूतानि पृथिव्यादीनि च इन्द्रियाणि श्रोत्रादीनि च अन्तःकरणं मनआदिचतुष्कात्मकं च एतदात्मा स्वरूपं यस्य तत् जगत् संस्थापयिष्यन्मय्यारोपयिष्यन्, स प्रसिद्धः, भवान् आदिसूकरः स्वेच्छोपात्ताप्राकृतश्वेतसुन्दरवराहावतारो भूत्वा मां त्वन्निर्मितजगदाधारभूतां मामित्यर्थः। अम्भसः अम्भसि प्रविश्य ल्यब्लोपे पञ्चमी। रसातलात, अभ्युज्जहारोद्धृतवान् वै ॥३४॥ अपामिति। धराधरः जलादुन्मज्जनकाले दंष्ट्राग्रे धरां मामादधानः य आदिवराहः अपां जलानाम् उपस्थे उपरिभागे नावि नौकावदाधारभूतायां मयि, अवस्थिताः सांप्रतं वर्त्तमानाः प्रजाः रिरक्षिषुः रक्षितुमिच्छुः सन् समभूद्धवद्रूपेणावतीर्णः। स आदिवराहः भवान् अद्य अधुना, वीरमूर्त्तिः विधृतोग्ररूपः उग्रः तीक्ष्णः शरो यस्य तथाभूतः सन्, पयसि निमित्ते, मां विधृतानुकम्प्यगोरूपां जिघांससि हन्तुमिच्छसि किल। एतत्ते विरुद्धशक्तिमत्त्वं मयैवोपलब्धमिति भावः ॥ ३५ ॥ एवमचिन्त्यविविधशक्तियुक्तत्वेन भगवन्तं स्तुत्वा तस्मिन्नेव सर्वावतारधरत्व-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनुसंदधाना सर्वावतारान्नमस्करोति । नूनमिति । ईश्वराणामीश्वरावताराणाम् ईहितं चिकीर्षितं, तस्येश्वरस्य संबन्धिगुणाः सत्त्वादयस्तेषां सर्गः कार्यप्रपञ्चस्तद्रूपा या माया तया, मोहितं यच्चित्तं तदेव वर्त्म येषां तैः पाठान्तरे मोहिताश्चित्तवृत्तयो येषां तैः अस्मद्विधैर्मादृशैः, जनैः न, ज्ञायते नूनम् । अतः वीराणां हिरण्याक्षादीनां यशो भगवता स्वयं युद्धे निहता इत्येवंरूपां कीर्त्तिं कुर्वन्ति संपादयन्तीति तेभ्यः, तेभ्यः, विधृतवराहाद्यवतारेभ्यो भवद्भ्यः नमः ॥ ३६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः

मैत्रेय उवाच

इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम् । पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥ १ ॥

पृथ्वादिभिर्महीवाक्याद्दोग्धृवत्सादिभेदतः । अष्टादशे पयः स्वं स्वं सा दुग्धेति निगद्यते ॥ १ ॥

एवं सर्वावतारधरत्वेन विचित्रशक्तिमत्त्वेन च पृथुं प्रस्तूय तदभिमतौषधिबीजनिर्गमोपायं विवक्षती तं विश्वासयन्ती प्रसादयन्ती च महीत्याहेत्याह मुनिः । इत्थमिति । रुषा रोषेण प्रस्फुरितः अधरो यस्य तं पृथुम् इत्थम् अभिष्टूय अवनिः भीता सत्यपि आत्मना बुद्ध्या आत्मानं चित्तं संस्तभ्य निर्भयं कृत्वा पुनः आह ॥ १ ॥ संनियच्छेति । भो इति संबोधने हे देव अभिनिर्भयता यथा भवति तथा मन्युं क्रोधं संनियच्छ उपसंहर । मे मम श्रावितं विज्ञापितं च, निबोध, न मद्वाक्येऽनादरः कर्त्तव्य इत्याह । बुधः सारासारविभागज्ञः पुरुषः मधुकरो भ्रमरः यथा तथा सर्वतः सर्ववस्तुभ्यः सारम् आदत्ते ॥ २ ॥ मया गीर्णा औषधीरुपायेन गृहाणेति वक्तुमुपायेन सर्वं सिद्ध्यति नान्यथेत्याह । अस्मिन्निति त्रिभिः । पुंसां कामार्थिनां श्रेयसः पुरुषार्थस्य प्रसिद्धये प्रकर्षेण निष्पत्तये, तत्त्वदर्शिभिः, मुनिभिः, अस्मिन् लोके अथवा अमुष्मिन् परलोके योगा उपायाः दृष्टाः निर्णीताः प्रयुक्ता अनुष्ठिताश्च तत्रास्मिन् लोके कृषिगोरक्षवाणिज्यादयो जीवनोपायाः परलोके स्वर्गसाधनभूता अग्निहोत्रादय उपाया दृष्टाः प्रयुक्ताश्चेत्यर्थः ॥ ३ ॥ तानिति । पूर्वदर्शितान् पूर्वैर्मुनिभिः प्रदर्शितान् तान् उपायान् अवरस्तदर्वाचीनः यो जनः सम्यक् श्रद्धया आदरपूर्वत्वरया उपेतो युक्तः सन् आतिष्ठति सम्यगनुतिष्ठति । सः एव अञ्जसा सुखेन उपायानुपायैः प्राप्तुं योग्यानर्थान् विन्दते लभते ॥ ४ ॥ अन्यस्तु न विन्दते इति विपक्षे फलमाह । तानिति । यो विद्वानविद्वान्वा जनः तान्पूर्वदर्शितानुपायान् अनादृत्यावमत्य स्वयं केवलं स्वबुद्धिमात्रेणेत्यर्थः । अर्थान् पुरुषार्थसाधनत्वेनावधारणीयानर्थान् आरभते । तस्य पुरुषस्य अर्थाः, पुनः पुनः आरब्धाश्च पुनः पुनरनुष्ठिताः सन्तोऽपीत्यर्थः । व्यभिचरन्ति अन्तरायप्राचुर्यतया फलजनका न भवन्तीत्यर्थः ॥ ५ ॥ नन्वस्त्वेवं कोऽसावोषधिनिर्गमोपायः किमर्थं च तास्त्वमग्रस इत्यत्राह । पुरेति । हे विशां पते ब्रह्मणा पुरा याः ओषधयः सृष्टाः इह जीवनार्थत्वेन परत्र यज्ञानुष्ठानद्वारा स्वर्गाद्यर्थत्वेन च विसृष्टा इत्यर्थः । ता एवंभूता ओषधयः अधृतव्रतैः लोकपालनयज्ञानुष्ठानात्मकव्रतरहितैः, अत एव असद्भिः, भुज्यमानाः, मया, दृष्टाः, हि । असद्भिर्भुज्यमाना इमा ओषधयः समूला नश्येयुरित्यालोचिता इत्यर्थः ॥ ६ ॥

अपालितेति । अहं च भवद्भिर्भवादृशैरित्यर्थः । लोकपालकैः अपालिता अनादृता च सती । लोके सर्वस्मिन् जने चोरीभूते चोरप्राये जाते सति च यज्ञार्थे यज्ञनिमित्तं ओषधीः अग्रसम् असद्भिर्भुज्यमाना न रोक्ष्यन्ति ततश्च यज्ञादयो न सिद्ध्येरन्नित्यालोच्याग्रसमित्यर्थः । उभयोरेकसंबन्धः ॥ ७ ॥ नूनमिति । ता मया गीर्णाः वीरुध ओषधयः भूयसा महता कालेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मयि क्षीणाः जीर्णाः नूनं तत्र जीर्णानां पुनर्निर्गमे दृष्टेन निश्चितेन योगेनोपायेन भवान् आदातुं संग्रहीतुम् अर्हति ॥ ८ ॥ कोऽसौ दृष्टो योगस्तत्राह । वत्समिति त्रिभिः । वत्समिति । दोग्धारमिति । हे वीर हे महाबाहो हे भूतभावन यदि भगवान् भूतानाम ऊर्जस्वद्बलप्रदम् ईप्सितं वाञ्छितं च अन्नं वाञ्छते तर्हि मे गोरूपाया मम अनुरूपं वत्सं दुहन्त्यस्मिन्निति दोहनं पात्रं दोग्धारं च कल्पय संपादय । येन वत्सादिसामग्रीसंपादनेन अहं तव वत्सला त्वद्विषये वात्सल्यवती सती क्षीरमयान् क्षीरविकारान् मत्क्षीरप्रकृतिकानिति यावत् । काम्यन्ते इति कामास्तानौषधीछन्दःसामेव वीर्यौजोबलासवादीन् धाक्ष्ये प्रपूरयिष्यामि ॥९–१०॥ समामिति । किंच । हे विभो हे राजन् देववृष्टं वर्षासु पर्जन्येन संवृष्टं पया जलम् अपत्तौवपि वर्षेत्वपगमेपि यथा मे मम उपावर्त्तेत मत्पृष्ठे यथा सर्वतो वर्त्तेत तथा मां पर्वतादभिनिम्नोन्नतां मां पृथ्वीं समां कुरु । समीकरणाभावे कापि मयि जलं न तिष्ठेदतस्तदर्थं समाहं कर्त्तव्या इत्यर्थः । ते तुभ्यं भद्रं दोहनसमीकरणाभ्यां मम तव च भद्रं भूयादित्यर्थः ॥ ११ ॥ एवं धरित्र्याभिहितः पृथुस्तथैवाकरोदित्याह मुनिः । इतीति । इत्युक्तविधं प्रियं प्रीतिजनकं हितं हितकारकं च भुवो भूमेः वाक्यम् आदायोमित्यनुमन्य मनुं स्वायंभुवं वत्सं कृत्वा पाणौ हस्तरूपे दोहनपात्रे भूपतिः स्वयं पृथुर्दोग्धा भूत्वा सकलौषधीः अदुहत् । सकलौषधिप्रकृतिभूतं क्षीरं प्रदुह्य धरित्र्यां तद्विकिरन्नौषधीः प्रादुर्भावयामासेत्यर्थः । एवमग्रेऽपि बोध्यम् ॥ १२ ॥ तथेति । यथा पृथुरदुहत्तथा अपरे च बुधाः सारासारविवेककुशलाः सर्वत्र सर्वेषु पदार्थेषु सारम् आददते । गोरूपायाः धरित्र्या क्षीरं प्रदुह्य सर्ववस्तुषु सारं निहितवन्त इत्यर्थः । एतदेव पुनःस्फुटमाह । ततस्तदनन्तरं ततः पृथोः सकाशाद्वा अन्ये ऋषिप्रभृतयश्च पृथुभावितां पृथुना वशीकृतां भूमिमिति शेषः । यथाकामं स्वस्वकामानुरूपं दुदुहुः ॥ १३ ॥

के के किं किमदुहंस्तत्राह । ऋषय इति । हे सत्तम विदुर ऋषयो वसिष्ठादयः बृहस्पतिं वत्सं कृत्वा देवीं धरित्रीं इन्द्रियेषु पात्रेषु वाङ्मनःश्रवणैर्वेदग्रहणादिन्द्रियाणां पात्रत्वं शुचि पवित्रं छन्दोमयं वेदात्मकं पयः क्षीरम् अथ कार्त्स्न्येन दुदुहुः । यज्ञप्रवृत्तेर्वेदाध्ययनपूर्वत्वाद्यज्ञविधानस्य वेनेन निषिद्धत्वात्पृथुमभिलक्ष्य प्रीता भूर्बृहस्पतिमुद्दिश्य मुनीन्वेदाध्ययने यज्ञप्रवृत्त्यर्थं प्रवर्त्तयांचकारेति भावः ॥ १४ ॥ कृत्वेति । सुरगणाः इन्द्रं वत्सं कृत्वा हिरण्मयेन पात्रेण वीर्यं मनः शक्तिः ओज इन्द्रियशक्तिः बलं देहशक्तिः एतत्रिकसंपादकमित्यर्थः । सोमममृतं पयः अदूदुहन् । वेनराज्ये यज्ञप्रवृत्त्यभावादलब्धवीर्यादिशक्तिप्रदसोमभागादेवेन्द्रादयः भुवः कृपया स्वानुद्दिश्य मुनिभिर्यज्ञे दत्तं हव्यात्मकं सोममुपाददुरितिभावः ॥१५॥ दैतेया इति । दैतेया दितेरपत्यान्वयजाः दानवा दनोरपत्यान्वयजाः असुरर्षभमसुरश्रेष्ठं प्राह्लादिं प्रह्लादपुत्रं विरोचनं वत्सं विधाय कृत्वा अयःपात्रे सुरा च आसवश्च तत्समाहाररूपं क्षीरम् अदूदुहन् दुदुहुः । तत्र सुरा गौडी पैष्टी माध्वीति त्रिविधा आसवस्तालादिकैकादशविधतरुद्रवरूपं मद्यम् । अत्र प्रह्लादमिति पाठः वैष्णवामर्षतया शाक्तप्रवर्त्तितः बोध्यः । महाभारते द्रोणपर्वणि एकोनसप्ततितमेऽध्याये 'असुरा दुदुहुर्मद्यमामे पात्रे तु ते तदा । दोग्धा द्विमूर्द्धा तत्रासीद्वत्सश्चासीद्विरोचनः' इत्यनेन विरोधात् । किं च पृथोर्विजिताश्वस्तस्य हविर्धानस्तस्य हाविर्धानिस्तस्य प्राचीनबर्हिस्तस्य प्रचेतसस्तेषां दक्षस्तत्पुत्री दितिस्तस्याः कश्यपाद्धिरण्यकशिपुस्तस्य प्रह्लादस्तस्य विरोचनः । एवमेते दैतेया उक्तदक्षपुत्र्या दनोः कश्यपाद्दानवा एतेषां पृथुकालेऽसंभवात्तत्कृतं दोहनं तदानीं न संगच्छते ततः पृथुना प्रजाकामपूरणायाज्ञप्ता भूमिर्यस्मिन्काले येषां यदपेक्षितं स्यात्ते तदवसरे पृथिव्या यदुपरि स्निग्धता स्यात्तादृशं स्वकीयं जनं मुख्यं वत्सस्थानीयं विभाव्य स्वस्वेप्सितमुपाददुस्तच्च पृथुकाले उपचर्य सहैव कथालंकारायात्रैव कथितमिति नः प्रतिभाति यद्यन्यदत्र प्रतिभायात्तर्हि तदपि प्रकाश्य विद्वद्भिः सुखेन विरोधसमाधानं विधेयमिदमित्थमेवेति नो नाग्रहः ॥१६॥ गन्धर्वा इति । गन्धर्वाप्सरसः गन्धर्वाश्च अप्सरसश्च उभयविधा दोग्धारः विश्वावसुं वत्सं कृत्वा पद्ममये पद्मात्मके पात्रे गान्धर्वसंबन्धि गाननृत्यादिकं मधु वाचां माधुर्यं सौभगं सौन्दर्यं च पयः अधुक्षन ॥ १७ ॥

वत्सेनेति । हे महाभाग विदुर श्राद्धदेवताः श्राद्धकर्मणां दैवतरूपाः पितरः पितृगणाः अर्यम्णा वत्सेन अर्यमाणं वत्सं कृत्वेत्यर्थः । आमपात्रे अपक्के मृन्मये भाजने श्रद्धया कव्यं पितृणामन्नात्मकं क्षीरम् अधुक्षत दुदुहुः । आर्षत्वाददादेशः ॥ १८ ॥ प्रकल्प्येति । सिद्धाः कपिलं कर्दमात्मजकपिलमुनिं वत्सं प्रकल्प्य नभस्याकाशात्मके पात्रे संकल्पनामयीमणिमादेः संकल्पनानुसारित्वात्संकल्पनामयीमित्युक्तम् । सिद्धिमणिमादिसिद्धिरूपं पय इत्यर्थः । अधुक्षत । ये च विद्याधरादयो दोग्धारः ते चापि तमेव वत्सं प्रकल्प्येति शेषः । नभसि खेचरत्वादिरूपामिति शेषः । विद्याम् अधुक्षतेति पूर्वेण सहान्वयः ॥१९॥ अन्ये चेति । अन्ये च मायिनः आश्चर्यरूपधारिणः किंपुरुषादयो दोग्धारः वत्सत्वे वत्सभावे मयं प्रकल्प्य मयनामानमसुरं वत्सं कृत्वेत्यर्थः । धारणामयीं धारणाप्रचुरां मनोव्यापारविशेषधारणाख्ययोगानुसारित्वाद्धारणामयीमित्युक्तम् । एतच्चैकादशस्कन्धे स्फुटीभविष्यति । अन्तर्द्धानाद्भुतात्मिकामन्तर्द्धानमद्भुतरूपं चेत्येतदुभयाकारित्वेन तदात्मिकां मायां विचित्ररूपसर्गकारिणीं शक्तिं दुदुहुः बुद्धाविति शेषः ॥ २० ॥ यक्षेति । पिशिताशनाः मांसभक्षकाः यज्ञरक्षांसि भूतानि पिशाचाः यक्षादयो दोग्धार इत्यर्थः । भूतेशो रुद्रो वत्सो येषां ते भूतेशवत्साः भूतेशं वत्सं विधायेत्यर्थः । कपाले करोट्यात्मकभाजने क्षतजं रुधिरं तदेवासवस्तम् आसववन्मादकत्वात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षतजस्यासवत्वमुक्तम्। दुदुहुः॥ २१॥ तथेति। तथा अहयः निष्फणाः दंदशूकाः दंशनस्वभावाः सर्पाः सफणाः नागाः कद्रूसंततिजाताश्च एते अह्यादयो दोग्धारः तक्षकं वत्सं विधाय बिलपात्रे बिलरूपभाजने विषं पयः दुदुहुः॥ २२॥ पशव इति। पशवो दोग्धारश्च गोवृषं वृषभश्रेष्ठं रुद्रवाहनवृषभं वत्सं कृत्वा अरण्यपात्रे चापि यवसं क्षीरं तृणात्मकं पय इत्यर्थः। अधुक्षन्। चोऽवधारणे। मृगेन्द्रेणेत्यादिपदानामुत्तरश्लोकेनान्वयः॥ २३॥ क्रव्यादा इति। क्रव्यादा मांसाशिनः दंष्ट्रिणो व्याघ्रादयः प्राणिनश्च दोग्धारः मृगेन्द्रेण सिंहेन वत्सेन स्वकलेवरे पात्रे क्रव्यं मांसं दुदुहुः। सुपर्णो गरुडः वत्सो येषां ते सुपर्णवत्साः विहगाः पक्षिणः दोग्धारः स्वकलेवरे चापि चरं कीटादिकम् अचरं फलादिकं वा पयः दुदुहुः एव। उभयोरेकसंबन्धः॥ २४॥

वटेति। वनस्पतयः वृक्षाः दोग्धारः, वटो वत्सो येषां तथाभूताः सन्तः, स्वकलेवरे इति शेषः। पृथग्रसमयं कट्वम्ल-मधुरादिविभिन्नरसप्रचुरम् अनेकविधरसरूपमिति यावत्। पयः, दुदुहुः, गिरयः पर्वता दोग्धारः हिमवान्वत्सो येषां तथाभूताः सन्तः स्वसानुषु, पात्रभूतेषु, नानाधातून् गैरिकादीन् दुदुहुः॥ २५॥ अनुक्तसंग्रहार्थमाह। सर्वे इति। सर्वे उक्तेतरे सकला अपि स्वस्मिन्स्वजातौ यो मुख्यः स एव वत्सस्तेन स्वे स्वे स्वस्वार्हे पात्रे सर्वान्कामान्दोग्धीति तां सर्वकामदुघां पृथुभावितां पृथुना सर्वेभ्यो दोहनायाभ्यनुज्ञातां पृथ्वीं पृथक् स्वस्वार्हं पयः दुदुहुः॥ २६॥ उपसंहरति। एवमिति। हे कुरूद्वह, एवममुना प्रकारेण अन्नादाः स्वस्वार्हान्नाभिकाङ्क्षिणः, पृथ्वादयः आत्मनः स्वस्य, स्वन्नं स्वाभीष्टमन्नं, क्षीरभेदं स्वप्रियान्नरूपं भिन्नभिन्नक्षीरमित्यर्थः। दोहवत्सादिभेदेन पात्रवत्सादिभेदेन पृथ्वीं पृथ्व्याः सकाशात् दुदुहुरिति शेषः॥ २७॥ तत इति। ततः, महीपतिः पृथुः, प्रीतः सन् सर्वकामदुघाम् इमां पृथ्वीं, प्रेम्णा दुहितृत्वे चकार। दुहितरममन्यतेत्यर्थः। यतः दुहितृवत्सलः॥ २८॥ चूर्णयन्निति। तत इति शेषः। राजराट् राज्ञां राजा, विभुः समर्थः, वैन्यः पृथुः स्वधनुः कोट्या निजधनुषोऽग्रेण, गिरिकूटानि पर्वतशृङ्गाणि, चूर्णयन् इदं भूमण्डलं प्रायः प्रायशः समं चक्रे प्रायोग्रहणात्तेन क्वचिदसमीकृतमपि दृश्यते इत्यभिप्रेतम्॥ २९॥ अथेति। अथ दोहनसमीकरणानन्तरं प्रजानां वृत्तिदः जीविकाप्रदः पिता पितृवद्रक्षकश्च भगवान्, वैन्यः पृथुः, अस्मिन् भूमण्डले यथार्हतः यथायोग्यं, तत्र तत्र यत्र घटते तत्रेत्यर्थः। प्रजानां निवासान् कल्पयांचक्रे॥ ३०॥ तत्कल्पिताः के ते निवासास्तत्राह। ग्रामानिति। ग्रामा हट्टादिशून्यास्तान् पुरो हट्टादिमत्यस्ताः, ता एव महतीः पत्तनानि विविधानि औदकपार्वतवार्क्षादिभेदभिन्नानि दुर्गाणि कोट्टांश्च घोषानाभीराणां निवासान्, व्रजान् गवां निवासस्थानानि, शिबिरान्सेनानिवेशस्थानानि च, आकरान् स्वर्णाद्युत्पत्तिस्थानानि, खेटान्कृषिवलग्रामान्, खेटैन सहिताः खर्वटा इति विग्रहः। खर्वटान पर्वतप्रांतग्रामान्, कल्पयांचक्रे इत्यन्वेतव्यम्॥ ३१॥ पृथोः प्राक् ग्रामादयो नाभूवन्नित्याह। प्रागिति। इह भूमण्डले, पृथोः प्राक् पृथुप्रादुर्भावात्पूर्वमित्यर्थः। एषा, पुरग्रामादिकल्पना, नैव नाभवदेवेत्यर्थः। तत्र तत्र पृथुकल्पितग्रामादिषु नास्ति कुतोऽपि भयं यासां ताः प्रजाः, यथासुखं स्वस्वसुखानुसारेणेत्यर्थः। वसन्ति स्मावसन्॥ ३२॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे अष्टादशोऽध्यायः॥ १८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथैकोनविंशोऽध्यायः

मैत्रेय उवाच

अथादीक्षत राजर्षिर्हयमेधशतेन सः। ब्रह्मावर्त्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥ १ ॥

अश्वमेघे पृथोरश्वहरणादूनविंशके। हन्तुमिन्द्रं प्रवृत्तोऽपि पृथुर्धात्रा निवारितः ॥ १ ॥

अथेति। अथ दोहनसमीकरणप्रजानिवासकरणानन्तरं सः, राजर्षिः पृथुः, हयमेधशतेन निमित्तेन, अदीक्षत दीक्षितोऽभूत्। शताश्वमेधविधानसंकल्पमकरोदित्यर्थः। कुत्रेत्यत्राह मनोः स्वायंभुवस्य, क्षेत्रे ब्रह्मावर्त्ते तत्रापि यत्र सरस्वती नदी प्राची प्राङ्मुखी प्रवहते इति शेषः। तत्र ब्रह्मावर्त्तं तु 'सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते' इत्युक्तलक्षणं बोध्यम् ॥ १ ॥ तदिति। भगवानाकूतिसूनुः स्वयं यज्ञनामधर ईश्वराख्य इत्यर्थः। शतक्रतुरिन्द्रः तत्पृथुसंकल्पितं कर्म आत्मनः स्वस्य कर्म अतिशेते इति कर्मातिशयम् अभिप्रेत्य ज्ञात्वा शतक्रतुत्वरूपमत्कर्माभिभूष्णुरयं स्यादिति विचार्येत्यर्थः। आत्मन इति पञ्चमी वा तदा आत्मनः सकाशादित्यर्थो बोध्यः। पृथोः यज्ञमहोत्सवं न ममृषे न सेहे ॥ २ ॥ कर्मातिशयं प्रपञ्चयन्ब्रह्मावर्त्तं प्रस्तौति यत्रेति सप्तभिः। यत्र महोत्सवप्रदेशे ईश्वरः सर्वात्मा सर्वभूतान्तरात्मा भगवान् षाड्गुण्यपूर्णः सर्वलोकगुरुः सर्वेषां लोकानां हितोपदेष्टा प्रभुः कर्त्तुमकर्त्तुमन्यथाकर्त्तुं शक्यः यज्ञपतिर्यज्ञैराराध्यस्तत्फलप्रदश्च हरिः साक्षात् प्रत्यक्षः अन्वभूयत सर्वजननयनविषयतां प्राप्तो यथा भवत्तथैवागतोऽभूदित्यर्थः ॥ ३ ॥ कथंभूतोऽन्वभूयत तत्राह। अन्वित इति। ब्रह्मा च शर्वो रुद्रश्च ताभ्यां सहानुगैः सभृत्यैः लोकपालैरिन्द्रादिदिक्पालैः, अन्वितो युक्तः, गन्धर्वैः, मुनिभिः अप्सरोगणैश्च उपगीयमानः इत्थंभूतोऽन्वभूयत ॥ ४ ॥

सिद्धादयश्चापि तमन्वायन्नित्याह। सिद्धेति। सिद्धैः सहिता विद्याधराः सिद्धविद्याधरा दैत्या दैत्यप्रकृतयः दानवा दनुसुतप्रकृतयः तदानीं दैत्यदानवयोरनुत्पत्तेरेवमर्थः। यद्वा प्रागुक्तार्थवत्त्वेऽपि वैष्णवत्वस्वीकृत्यनन्तरमतथाभावा यद्यपि तथापि तत्कालीनसंज्ञयोपदिष्टाः प्रह्लादनारदपराशरेत्यादिना चैतेषां नित्यसाहचर्योक्तेरत्रैतेषां भगवदन्वगागमनोक्तिर्बोध्या गुह्यकादयश्च सुनन्दनन्दौ प्रमुखौ येषां ते हरेः ये पार्षदप्रवराः ते ॥ ५ ॥ कपिल इति। कपिलः नारदः दत्तः ये च सनकादयः योगेशाः कपिलादयस्तत्र चत्वारोऽपि भगवदवतारत्वेन प्रसिद्धाः तत्सेवनोत्सुकाः सर्वकालं केवलभगवत्प्रकृष्टपरिचर्यानुरक्ताः ये भागवताः ते चापि तं भगवन्तम् अन्वीयुः इत्युभयोरेकसंबन्धः ॥ ६ ॥ यत्रेति। हे भारत यत्र ब्रह्मावर्त्ते धर्मदुघा घृतादिहविर्दोग्ध्री भूमिः सर्वकामदुघा सती यजमानस्य पृथोः अभीप्सितान् अर्थान् दोग्धि स्म दुदुहे ॥ ७ ॥ ऊहुरिति। नद्यः सर्वरसान् इक्षुद्राक्षादिरसान् क्षीरं दुग्धं च दधि क्षीरविकृतिश्च अन्नं पाकादि च गोरसो घृततक्रादिकं च तत्समाहारान् ऊहुर्वहन्ति स्म। तरवो वृक्षाः भूरीणि विस्तृतानि वर्ष्माणि शरीराणि येषां तथाभूताः सन्तः मधुच्युतः मधुस्राविणः सन्तश्च प्रासूयन्त पुष्पफलादिकं भावयांचक्रुरित्यर्थः ॥ ८ ॥ सिन्धव इति। सिन्धवः समुद्राः रत्ननिकरान् तत्पुरो निदधुरिति योग्यक्रियाध्याहारः। गिरयः पर्वताः चतुर्विधं भक्ष्यभोज्यचोष्यलेह्यभेदेन चतुःप्रकारम् अन्नम् उपाजह्रुः प्रददुः। सपालकाः राजभिः सहिताः सर्वे लोकाः उपायनं यथायोग्यं सूपदाः सान्मानिकानीति यावत्। उपाजह्रुः समर्पितवन्तः ॥ ९ ॥ इति चेति। अधोक्षजो भगवानीशो यस्य तस्य पृथोः इत्युक्तविधं परमः सर्वोत्तम उदयो वृद्धिर्यस्मिंस्तत्। कर्मेति शेषः। असूयन्नसहमानः भगवान्स्वयं भगवदवतारः सन्नपि इन्द्रः तु प्रतिघातं विघ्नम् अचीकरदकरोत्। भगवदवतारस्यापि पृथोरधोक्षजेशत्वोक्तिरवतारावतातारिणोः पृथक्त्वबोधनाय। केचित्तु भगवदवतारभूतस्यापि पृथोरावेशावतारत्वाज्जीवाभिप्रायेणाधोक्षजेशस्येत्युक्तमित्यूचुस्तत्तेषां न वक्तुं युक्तं यतस्ते कृष्णं पूर्णावतारं ब्रुवाणाः पृथुं च कृष्णपूर्वावतारत्वं ब्रुवंतोऽत्र जीवत्वं भाषन्ते ततस्तेषां तथा व्याख्यावचः प्रलपितवदेवेति नान्येषां ग्रहणायालम् ॥ १० ॥

तत्प्रतिघातकरणं प्रपञ्चयति। चरमेणेत्यादिना। यजुष्पतिं भगवन्तं चरमेण शततमेन अश्वमेधेन वैन्ये पृथौ यजमाने आराधयति सति स्पर्द्धेन स्पर्द्धमानः इन्द्रः तिरोहितः सन् यज्ञपशुमश्वम् अपोवाहापहृतवानित्यर्थः। भगवतस्त्रयीमयत्वेऽपि प्रकृतस्याश्वमेधस्य यजुर्वेदविधेयत्वाद्यजुष्पतिमिति समभिहितम् ॥ ११ ॥ तमिति। विहायसा आकाशेन पथा त्वरमाणं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धावन्तम् अश्वं गृहीत्वेति शेषः। तमिन्द्रं भगवानैश्वर्योपेतः अत्रिर्मुनिः ऐक्षत् ऐक्षत। कथंभूतं यः पाषण्डः अधर्मे धर्मविभ्रमः जटिलत्वाद्याकारवत्तया धर्मभ्रान्तिकरः तं पाषण्डम् आमुक्तं कवचमिव, कवचमिव पाषण्डवेषं गृहीतवन्तमित्यर्थः। जटिलत्वादिना भिक्षुसमानवेषं विधायाश्वमपहृत्य नभोमार्गेण गच्छन्तमिन्द्रं केवलमत्रिरेवापश्यदित्यर्थः ॥ १२ ॥ अत्रिणेति। अत्रिणा मुनिना सूचितो ज्ञापितः। महारथो महारथसंज्ञया प्रसिद्धः पृथोः पुत्रः संक्रुद्धः सन् हन्तुं तं व्यापादयितुम् अन्वधावत तमनुधावतिस्म तिष्ठ तिष्ठ, इति च अब्रवीत ॥ १३ ॥ तमिति। तादृशाकृतिं विधृतपाषण्डसमानाकारं तमश्वहर्तारमिन्द्रम्, जटिलं मूर्ध्नि जटाधारिणम्, भस्मना छन्नं स्वाङ्गविच्छुरितपुष्कलश्वेतभस्मानमित्यर्थः। वीक्ष्य, शरीरिणं धर्मं मेने, जटिलत्वाद्भस्मच्छन्नत्वान्मूर्त्तं धर्ममेव तमविददित्यर्थः। अतः, तस्मै बाणं न मुञ्चति स्मेत्यध्याहार्यम्। तमश्वहर्तारं हन्तुं बाणं नामुञ्चदित्यर्थः ॥ १४ ॥ वधादिति। वधादश्वहर्त्तुः वधात्, निवृत्तं तं पृथुपुत्रं हन्तवे तादृशमिन्द्रं हन्तुमित्यर्थः। हन्तवे इति छान्दसम्। अत्रिः, भूयः पुनः अचोदयत् प्रेरयामास। हे तात यज्ञहनं यज्ञविघ्नकारिम्, अत एव विबुधाधमं विबुधाराधनरूपस्य यज्ञस्य हन्तृत्वात्तेष्वधममित्यर्थः। महेन्द्रं जहि संहर ॥ १५ ॥ एवमिति। एवममुना प्रकारेण प्रोक्तोऽत्रिणा समभिहितः, वैन्यस्य पृथोः सुतः पुत्रः, विहायसाऽऽकाशमार्गेण, त्वरमाणं धावन्तमिन्द्रमित्यर्थः। वारणं गजं मृगराट् सिंह इव, रावणं गृध्रराडिवेति पाठे गृध्रराट् जटायुः अभिक्रुद्धः अत्यन्तं कुपितः सन्, अन्वद्रवत् पृष्ठतोऽधावदित्यर्थः ॥ १६ ॥

स इति। स्वराट् स्वर्गपतिः स इन्द्रः तत्तदा रूपं स्वविधृतपाषण्डरूपम् अश्वं च हित्वा अन्तर्हितः तस्थौ। वीरः पृथुपुत्रः स्वपशुं निजयज्ञीयाश्वम् आदाय गृहीत्वा, पितुः पृथोः, यज्ञम् उपेयिवान् संप्राप्तवान् ॥ १७ ॥ तदिति। हे प्रभो, विदुर तस्य च पृथुपुत्रस्यापि तदिन्द्रात्स्वाश्वानयनरूपम् अद्भुतं विस्मयनीयं कर्म चरितं विचक्ष्य वीक्ष्य, परमर्षयोऽत्र्यादयः सर्वे मुनयः तस्मै पृथुपुत्राय विजिताश्वः इन्द्रं विजित्याश्वनयनाद्विजिताश्वः इत्यन्वर्थं नामधेयं ददुश्चक्रुः ॥ १८ ॥ उपसृत्येति। विभुः हरिरिन्द्रः पुनर्भूयोऽपि तीव्रं निबिडं तमो ध्वान्तम् उपसृज्य सृष्ट्वा छन्नस्तेन तमसाच्छन्नविग्रहः सन् चषालो यूपाग्रे निक्षिप्तः काष्ठकटकस्तद्युक्तायूपतः यूपात् हिरण्यस्य रशना यस्य तं हिरण्यनिर्मितरश्मिमित्यर्थः। अश्वं जहार रशनाया दृढत्वेन छेदाशक्त्या रशनासहितमेवोद्धृत्य यूपामान्नीतवानित्यर्थः ॥ १९ ॥ अत्रिरिति। विहायसा त्वरमाणं तम् अत्रिः संदर्शयामास वीरः अत्रिसंदर्शिताश्वहरो विजिताश्वाह्वयो महावीर इत्यर्थः। एनमिन्द्रं कपालखट्वाङ्गधरं बुद्ध्वा न अबाधत। कपालखट्वाङ्गधरोऽयं कश्चियोगी भवतीति विबुध्य तं न प्राहरदित्यर्थः ॥ २० ॥ अत्रिणेति। अत्रिणा चोदितः पूर्ववदश्वहर्त्ता स एवायमिन्द्रोऽस्ति जह्येनमित्यत्रिसंनोदितो विजिताश्व इत्यर्थः। रुषा तस्मै इन्द्राय तमिन्द्रं हन्तुमित्यर्थः। विशिखं बाणं संदधे। स्वराट् स इंद्रः, अश्वं तद्रूपं च, हित्वा अन्तर्हितः, तस्थौ ॥ २१ ॥ वीर इति। अथानन्तरं वीरो विजिताश्वः चापि अश्वम् उपादाय पितृयज्ञम् अव्रजत्। तत्प्रभृति जगति पाषण्डमार्गः प्रवृत्त इत्याह तदवद्यमिति सार्द्धैस्त्रिभिः। हरेरिन्द्रस्य अवद्यमतिनिन्द्यं तत् रूपं ज्ञानदुर्बला ज्ञानहीना जनाः, जगृहुः मोक्षहेतुं मत्वोपाददुरित्यर्थः ॥ २२ ॥ एतदेवोपपादयति। यानीति। इन्द्रः हयजिहीर्षयाऽश्वस्य महीतुमिच्छया यानि रूपाणि यान् यान् पाषण्डवेषानित्यर्थः। जगृहे तानि रूपाणि पापस्य षण्डानि पापषण्डशब्दः पाकारोत्तरस्थपकारलोपं प्राप्य निरुक्तोक्ति, षण्डशब्दनिरुक्तिमाह इह षण्डं लिङ्गं चिह्नम् उच्यते पापित्वज्ञापकः पाषण्डशब्दः ॥ २३ ॥ एवमिति। एवं वैन्ययज्ञजिघांसया पृथोर्यज्ञे विघ्नं कर्त्तुमिच्छयेत्यर्थः। अश्वम् इन्द्रे हरति सति तद्गृहीतविसृष्टेषु तेनेन्द्रेण पुनः पुनरुपादाय परित्यक्तेषु पाषण्डेषु उपधर्मात्मकपाषण्डमार्गेषु, नृणां मतिर्धर्मे एवायमिति बुद्धिरभवदितिशेषः ॥ २४ ॥

एतदेव स्फुटमाह। धर्म इति। उपधर्मेषु धर्माभासेषु अत एव, पेशलेषु मृदुलेषु वाग्मिषु भितमिव सम्यगिव वादिषु च, नग्नरक्तपटादिषु भावप्रधानोऽत्र निर्देशः। ततः नग्नत्वरक्तपटादित्ववत्सु पाषण्डेषु रूपेष्वित्यर्थः। नृणां मतिरिति शेषः। धर्मः, इति भ्रान्त्या अयमपि शुद्धो धर्म एवास्ति नाधर्म इति संभ्रमेणेत्यर्थः। प्रायेण सज्जते आसक्तो भवति ॥ २५ ॥ तदिति। तदिन्द्रकृतं क्रतुविघ्नम् अभिज्ञाय विदित्वा पृथुपराक्रमः अपरिमितपराक्रमः भगवान् पृथुः कुपितः सकोपः उद्यतं कार्मुकं धनुर्येन तथाभूतः सन् इन्द्राय इन्द्रं हन्तुं बाणं शरम् आदत्त गृहीतवान् ॥ २६ ॥ तमिति। ऋत्विजोऽत्र्यादयो मुनयः शक्र इन्द्रस्तस्य वधो हननं तत्र अभिसंधितः कृताभिप्रायस्तम् अत एव दुष्प्रेक्ष्यं क्रोधातिशयव्याप्त्या दुर्निरीक्ष्यम् असह्यं परैः सोढुमशक्यं रंहो बलं वेगश्च यस्य तं तं पृथुं विचक्ष्य विबुध्य निवारयामासुः। अहो महामते प्रचोदितादश्वमेधमखे निगमेन विधेयतयाभिहितादश्वालम्भनात् अन्यस्य वधः तु अत्र यज्ञे न युज्यते। तव कर्त्तुं योग्यो न भवतीत्यर्थः ॥ २७ ॥ तद्वधं तु वयं करिष्याम इत्याहुः। वयमिति। इह यज्ञे अर्थनाशनं यज्ञनाशकं त्वद्यशसा त्वत्कीर्त्यैव हतत्विषं हतप्रभं मरुत्वन्तमिन्द्रं वयं न याताः यामो येषां तेऽगतवीर्या इत्यर्थः। एवंभूता ये उपहवा आह्वानमन्त्रास्तैः ह्वयामहे आह्वयामहे। हे राजन् तदनन्तरमितिशेषः। ते तव अहितं शत्रुं तमिन्द्रं प्रसह्य मन्त्रबलेनेत्यर्थः। अग्नये जुहवाम। पशुपुरोडाशमिव वह्नौ होष्याम इत्यर्थः ॥ २८ ॥ इतीति। हे विदुर इत्यमुना प्रकारेण क्रतुपतिं पृथुम् आमन्त्र्य विज्ञाप्य अस्य पृथोः स्रुक् हस्ते येषां तान् रुषा क्रोधेन जुह्वत, इन्द्रस्यैव होमं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुर्वाणान् ऋत्विजः यज्ञकर्मवृतमुनीन् स्वयंभूर्ब्रह्मा अभ्येत्य शीघ्रमागत्य प्रत्यषेधत निवारयामास ॥ २९ ॥ न वध्य इति । यमिन्द्रं यज्ञेन जिघांसथ हन्तुमिच्छथ सः इन्द्रः भवतामार्त्विज्ये कर्मण्यधिकृतानां युष्माकं वध्यो हन्तुं योग्यः न नैव भवति कुतः यद्यस्मात् यज्ञो यज्ञनामाऽयमिन्द्रः भगवत्तनुः भगवदवतारभूतः अस्ति । सुराः क्रतौ भवद्भिरिज्या देवाः यस्य यज्ञभगवतः इष्टाः निरतिशय-प्रीतिविषयाः तनवः यामादयो येऽत्रेज्या देवास्ते तु 'आत्मा वै पुत्रनाम' इति श्रुत्युक्तरीत्या तस्य शरीरभूताः सन्ति तत्कथं जिघांसथेत्यर्थः । यदीन्द्रहननं भवेत्तदा यज्ञभगवन्मूर्त्तिहननं तथात्वे यज्ञेज्यदेवानां पितापि यज्ञो भगवान् भवति ततो यज्ञेज्यसुर-द्रोहोऽपि प्रसज्ज्येतातो नैव तद्धननं युक्तमितिभावः ॥ ३० ॥

तदिति । हे द्विजाः राज्ञः । पृथोः एतद्धर्मरूपं कर्म जिघांसना नाशयितुमिच्छता इन्द्रेण अनुष्ठितं धर्मस्य व्यतिकरः संकरो यस्मिंस्तत् तदिदं पाषण्डात्मकं महदतिशयम् अन्याय्यं जातं पश्यत हि ॥ ३१ ॥ पृथुकीर्त्तेरिति । तर्हि तथाचेत् पृथुकीर्त्तेर्वि-पुलकीर्त्तेः पृथोः एकोनशतं यस्मिंस्तथाभूतश्चासौ क्रतुश्चैकोनशतक्रतुः भूयात् । पृथोः क्रतुप्रयोग एकेनोनो भूयादित्यर्थः । एकोनशतक्रतुरपि पृथुर्महेन्द्रात् पृथकीर्त्तिर्भवत्विति भावः । अथ पृथुं सान्त्वयति हे नृप ते त्वया स्विष्टैः सम्यगनुष्ठितैः एतावद्भिरिति शेषः । क्रतुभिः अलम् । यद्यस्मात भवान् मोक्षधर्मवित्न भवति । मुमुक्षोः रागाद्यपेतमेव कर्मानुष्ठानं युक्तमिति भावः ॥३२॥ नैवेति । हे पृथो त्वम् आत्मना मनसा महेन्द्राय रोषं रक्षितुम् आहर्त्तुं न अर्हसि एवं मनसि महेन्द्रोपरिरोपं रक्षितुं योग्यो न भवस्येवेत्यर्थः । हि यस्मात् त्वं महेन्द्रश्चेत्युभावपि उत्तमश्लोकस्य भगवतः विग्रहाववतारभूतौ भवतः अतो नान्योन्यं विरोधो युक्त इति भावः । ते तुभ्यं भद्रं भूयात् ॥३३॥ तथापि क्रतुसमाप्तिमेव ध्यायन्तं प्रत्याह । मास्मिन्निति । हे महाभाग आदृतात्मा अवहितमनाः सन् अस्मद्वचः अस्माकं वचनं निशामय शृणु अस्मिन् यज्ञविघ्ने चिंतां मा स्म कृथाः । यद्यस्मात दैवहतं कार्यं कर्त्तुं ध्यायतः पुरुषस्य मनः तु निश्चितम् अतिरुष्टं सत् अन्धं तमः मोहं विशते न तु शान्तिं लभते इति भावः ॥३४॥ क्रतुरिति । अतः एष भवान् क्रतुश्च विरमतां नन्विन्द्रः किमिति न वार्यते तत्राह । यतः देवेषु दुरवग्रहो दुराग्रहः भवति यत्र क्रवौ इन्द्रनिर्मित्तैः पाषण्डैः धर्मव्यतिकरः अधर्मे धर्मबुद्ध्या धर्मनाशरूपः अभवत् ॥३५॥ इन्द्रदुराग्रहकृतमनर्थं पश्येत्याह । एभिरिति । यः ते तव यज्ञध्रुक् यज्ञस्य नाशकः अश्वं मुष्णातीति अश्वमुट् क्रत्वङ्गभूताश्वापहारकः तेन इन्द्रेणोपसंसृष्टैः हारिभिश्चित्तापकर्षकैः एभिः पाषण्डैः ह्रियमाणं स्ववशीक्रियमाणं एनं जनं विचक्ष्व पश्य ॥ ३६ ॥

ततो मम किमिति चेत्तत्राह । भवानिति द्वाभ्याम् । वेनापचाराद्वेनकृतान्यायात् अवलुप्तं नानासमयानुरूपं सांख्ययोगादि नानाविधसिद्धान्तानुगुणं धर्मं परित्रातुम् अद्याधुना तद्देहतः वेनस्यैव शरीरात् इह लोके भवान् अवतीर्णः । वैन्यः वेनपुत्रः सन्नपि त्वं विष्णोः कला विष्णोरंशभूतः असि ॥ ३७ ॥ स इति । सः विष्णुकलाभूतः त्वम् अस्य जगतः भवमुत्पत्तिं विमृश्य विचार्य हे प्रजापते विश्वसृजां संकल्पनं संकल्पं पिपीपृहि पूरय । आर्षोऽयं प्रयोगः । येभ्यो विश्वसृड्भ्योऽस्य जगत उत्पत्तिस्तेषां प्रजापालनरूपं संकल्पं पूरयेत्यर्थः । प्रजापालनाधिकृतस्य तवेदं युक्तमित्यभिप्रायेण प्रजापते इति संबोधनम् । तच्च प्रजापालनविधानेन सफलं समाचरेति गूढोऽभिप्रायः । हे प्रभो अस्मदुक्तरीत्या विधातुं समर्थः प्रचण्डो यः पाषण्डपथस्तं तद्रूपाम् उपधर्मस्य पाषण्ड-धर्मस्य माता जननी ताम् ऐन्द्रीमिन्द्रसंबन्धिनीं मायां जहि निवारय चोऽवधारणे ॥ ३८ ॥ उपसंहरतीत्थमिति पञ्चभिः । इत्थमेवं लोकगुरुणा ब्रह्मणा समादिष्टः सम्यगुपदिष्टः विशां पतिर्मनुजेश्वरः स पृथुः मघोना इन्द्रेण सह तथा च ब्रह्मोक्तरीत्यैव सख्यं कृतवान् । क्वचित्तु तथा च कृत्वा वात्सल्यमिति पाठो दृश्यते तत्राप्युक्तार्थ एव । तेन मघोना संदधे चापि संधिमपि कृतवानेवेत्यर्थः ॥ ३९ ॥ कृतेति । तद्बर्हिषि तस्य पृथोर्यज्ञे ये देवाः तर्पिताः वरदाः ते देवाः कृतमवभृथसंबन्धिस्नानं येन स तस्मै भूरिकर्मणे विपुलव्यापाराय पृथवे वरान् ददुः ॥ ४० ॥ विप्रा इति । हे क्षत्तः विदुर सत्याः फलाविनाभूताः आशिषः आशीर्वादा येषां ते तथाभूताः विप्राः श्रद्धया लब्धदक्षिणाः स्ववाञ्छिताधिकावाप्तदक्षिणाः सत्कृताः अत एव तुष्टाः संतः आदिराजाय पृथवे आशिषः युयुजुः कृतवन्तः ॥ ४१ ॥ त्वयेति । हे महाबाहो पृथो तत्र यज्ञे येऽन्ये इति शेषः । पितृदेवर्षि-मानवाः समागताः ते सर्वे अपि वयं त्वया आदृताः प्रीतिविषयीकृताः दानमानाभ्यां पूजिताश्च एव । अतो भवत्श्लाघाविधानेन किं भवान् भवानेवेति भावः । तुष्टानामिदं वाक्यम ॥ ४२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ विंशोऽध्यायः

मैत्रेय उवाच

भगवानपि वैकुण्ठः साकं मघवता विभुः। यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक् तमभाषत ॥ १ ॥

विंशेऽनुशासनं यज्ञे पृथोः साक्षात्तु विष्णुना। प्रीतिः परस्परं प्रोक्ता वरदानप्रसङ्गतः ॥ १ ॥

भगवानिति। भगवान् षाड्गुण्यपूर्णः यज्ञपतिर्यज्ञरक्षकः यज्ञभुक् सर्वयज्ञाराध्य इत्यर्थः। विभुः सर्वान्तरात्मा, वैकुण्ठः परमपुरुषः अपि यज्ञैः पृथ्वनुष्ठितमखैः इष्टः सम्यगाराधितः त्वत एव मघवता साकं सहवर्त्तमानं तं पृथुम् अभाषत ॥ १ ॥ एष इति। हे पृथो एष इन्द्रः ते तव हयमेधशतस्य शताश्वमेधविधानसंकल्पस्य हि यस्माद्धेतोः भङ्गम् अकारषीत् अकार्षीत। अतः आत्मानं त्वां क्षमापयते स्वकृतापराधक्षमां कारयते, अतः, अमुष्य इन्द्रस्य क्षन्तुम् अर्हसि। इन्द्रविषये क्षमां कर्त्तुं त्वं योग्यो भवसीत्यर्थः ॥ २ ॥ कथं दुःसहोऽपराधः क्षन्तुं शक्यस्तत्राह। सुधिय इति। हे नरदेव लोके नरोत्तमाः सुधियः देहात्मयाथार्थ्यविदः साधवः परोपकारपराः भूतेभ्यः स्वापराधकर्तृभ्योऽपि भूतेभ्यः न अभिद्रुह्यन्ति, कुतः यर्हि यस्मात्कारणात् कलेवरः शरीरम् अनात्मा आत्मेतरः कदाप्यात्मा न भवतीत्यर्थः। अतस्तदभिमानेन सज्जना भूतेभ्यो न द्रुह्यन्तीति भावः ॥ ३ ॥ एवमन्वयमुखेन सुधियां भूतद्रोहाकारणमभिधाय व्यतिरेकमुखेनाह। पुरुषा इति। यदि त्वादृशाः सुधियः पुरुषाः, देवमायया ईश्वरमायया मुह्यन्ति देहे आत्माभिमानरूपं मोहं प्राप्य देहप्रयुक्तभूतद्रोहादिकं कुर्वन्तीत्यर्थः। तर्हि, दीर्घया चिरकालकृतया, वृद्धसेवया यथाविधिविहितमहत्परिचर्यया, परं केवलं श्रम एव, जातः। अत एवं संपादितश्रमास्ते केवलं दुर्धिय एवेति भावः ॥ ४ ॥ अत इति। अतः सुधियां देहात्माभिमानप्रयुक्तभूतद्रोहादेरभावादन्यथात्वे दुर्धीत्वादिप्रसङ्गाद्धेतोरित्यर्थः। इमं कायं देहम् अविद्यास्वरूपाज्ञानं च कामः अविद्यामूलकः शब्दादिविषयेष्विच्छाविशेषश्च कर्म काममूलं पुण्यापुण्यरूपं च तैः आरब्ध उत्पादितः इत्येवं विद्वान् जानन् अत एव प्रतिबुद्धः चिदचिदीशयाथात्म्यज्ञः जनः अस्मिन् देहे नैव अनुषज्जते एवकारेण नितरामात्मतया देहेऽस्य प्रसक्त्यभावः सूचितः ॥ ५ ॥ ननु देह एवास्यात्मताया अभावेन तत्र तथात्वमस्तु तथापि पुत्रादिषु ममत्वेन तन्निमित्तभूतद्रोहेण च सङ्गो भवेदिति चेद्देह एवानासक्तः कथं तदनुबन्धिषु प्रसक्तः स्यादित्याह। असंसक्त इति। अस्मिन् शरीरे असंसक्तः आत्मना सह देहमेकीकृत्य तस्मिन्नासक्तिवर्जितः कः वा बुधः अमुना शरीरेण उत्पादिते संपादिते गृहे अपत्ये पुत्रादौ, द्रविणे वित्ते चापि, ममतां कुर्यात् यदि कुर्यात्तर्हि सोऽज्ञ इत्यर्थः। अतो बुधः देहार्थं देहानुबन्ध्यर्थं वा भूतद्रोहादिकं न कुर्यादिति भावः ॥ ६ ॥

बुध इत्यनेन चिदचिदीशयाथात्म्यज्ञानवत्त्वमुपक्षिप्तं तत्कीदृशमित्यपेक्षायां प्रतिबोधक्रमं विवृण्वन् देहेऽनुषङ्गाभावमाह। एक इति द्वाभ्याम्। असौ आत्मा आत्मनो देहात् परो भिन्नः, तत्रात्मानात्मनोर्नवधा वैलक्षण्येन भेदं साधयति एक इत्यादिभिर्नवभिः पदैः एकः ज्ञानैकाकारतया नानाकारेषु देवमनुष्यादिशरीरेषु समवस्थितोऽप्येकस्वरूपः देहस्तु बाल्ययुवत्वादिभेदादनेकः अथवा देवमनुष्यपशुपादपतदवान्तरभेदादनेकविधः। शुद्धो विचारिते स्वरूपतो निर्मलः, देहस्तु मलिनः। स्वयंज्योतिः स्वयंप्रकाशः ज्ञानगुणकश्चिद्रूपः देहस्तु जडः। निर्गुणः रागद्वेषादिरहितः देहस्तु दोषभाजनतया सगुणः। गुणाश्रयः ज्ञानानन्दाद्यमायिकगुणाश्रयः, देहस्तु स्वकारणभूतप्राकृतगुणाश्रयः। सर्वगः अणुस्वरूपत्वेऽपि धर्मभूतज्ञानेन सर्वव्यापी, न वस्तुतः परिच्छिन्नः करिपिपीलिकादिषु तथा दर्शनात् देहस्तु परिच्छिन्नः। अनावृतः गृहादिभिरनावृतः देहस्तु गृहादिभिरावृतः। साक्षी देहेन्द्रियादीनामपरोक्षद्रष्टा, देहस्तु दृश्यः। निरात्मा निश्चित आत्मा अपरिणामी, देहस्तु परिणामी। एवमनेनात्मानात्मनोर्भेदं प्रदर्श्यैतैर्विशेषणैरात्मपरमात्मनोर्भेदः प्रदर्श्यते। एकः स्वसमाभ्यधिकद्वितीयवस्त्वंतररहितः, जीवस्तु नैकः समानाकाराणां तेषां बहुत्वात् 'नित्यो नित्यानाम्' इति श्रुतेः 'न त्वेवाहं जातु नासम्' इत्यादि स्मृतेश्च। शुद्धोऽपापविद्धः जीवस्तु बद्धदशायां देहद्वारा तद्विद्धः। स्वयंज्योतिः निरुपाधिकस्वयंप्रकाशः, जीवस्वरूपं च तथा सदपि तत्स्वरूपसत्ताप्रवृत्त्यादेः परमात्मेच्छायत्तत्वान्न तथा। 'इत्थं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया' इति स्मरणात्। निर्गुणः प्रकृतिपुरुषयोः स्वशरीरभूतयोः स्वस्य शरीरित्वेऽपि तद्गताज्ञत्वदुःखित्वादिहेयगुणरहितः, देहद्वारा जीवस्तु तद्युक्तः। गुणाश्रयः अनन्तकल्याणदिव्यगुणगणाश्रयः जीवस्तु देहसंबन्धेन हेयगुणाश्रयः। सर्वगः स्वरूपतः स्वभावतश्च सर्वान्तरात्मत्वाद्विभुः, जीवस्तु अणुत्वान्न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा। यद्यपि 'एषोऽणुरात्मा आराग्रमात्रो ह्यवरोऽपि' इति श्रुतौ जीवस्य यथाणुत्वं तथा परमात्मनोऽपि, 'अणोरणीयान्' इत्यादिनाणुत्वमुक्तमस्त्येवेति चेद्भगवतस्त्वग्रे 'महतो महीयान्' इति महत्त्वायुक्तं तन्नैतत्साम्यं जीवस्य। अनावृतः आवरणवर्जितः जीवस्तु अनाद्यज्ञानावृतः। साक्षी कर्मफलप्रदः जीवस्तु कर्मफलादी 'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति' इति श्रुतेः। निरात्मा न कश्चिदस्यान्तरात्मा जीव स्तु सात्मा। 'य आत्मनि तिष्ठन्' इति श्रुतेः। एवंभूतः असौ आत्मा परमात्मा आत्मनो जीवात्, परः॥ ७॥ य इति। एवमुक्तप्रकारेण सन्तं वस्तुतया विद्यमानम् आत्मानं प्रत्यगात्मानम् आत्मस्थमुक्तविध-प्रत्यगात्मन्यन्तर्यामितया स्थितं परमात्मानमपि यः पुरुषः वेद पूर्वश्लोकोक्तैकादिविशेषणैरात्मानात्मनोरात्मपरमात्मनोश्चापि विलक्षणं विद्यादित्यर्थः। स मयि सर्वान्तर्यामिणि स्थितः अतः प्रकृतिस्थोऽपि देहस्थः सन्नपि तद्गुणैः प्रकृतिगुणैः न अज्यते योगं न प्राप्नुयात् किं तु मुक्तो भवेदित्यर्थः। एवमुभयथा जीवस्वरूपविदुक्तरीत्या परमात्मस्वरूपविच्च प्राकृतगुणैर्न लिप्यते इति संदर्भार्थः। अत्र जीवस्य सदोषत्वनिर्दोषत्वोक्तिर्बद्धमुक्तदशाविषया बोध्या। उभयोरेकसंबन्धः॥ ८॥

इयमुक्तविधावस्था कस्योत्पद्यते इत्यपेक्षायामाह। य इति। यः पुमान् स्वधर्मेण स्ववर्णाश्रमोचितपञ्चमहायज्ञादिनित्यनैमित्तिकादिधर्मेण निराशीः स्वधर्मसाध्यफलेष्वाशारहितः सन् मां सर्वकर्माराध्यमिन्द्रादिसर्वदेवताशरीरं सर्वकर्मफलप्रदं मामित्यर्थः। नित्यं श्रद्धया कर्त्तव्येषु कर्मसु त्वरया अन्वितः सन् भजते। हे राजन् पृथो तस्य ज्ञानकर्मयोगाभ्यामनुगृहीतभगवद्भक्तियोगनिष्ठस्य मनः शनकैः प्रसीदति दारादिभिरकलुषितं भवतीत्यर्थः॥ ९॥ परित्यक्तगुण इति। एवं परित्यक्तगुणः कात्स्न्र्येन सर्वथा त्यक्त-रागादिगुणः अत एव विशदाशयो निर्मलान्तःकरणः अत एव सम्यग्दर्शनः उक्तविधात्मस्वरूपतद्विलक्षणपरमात्मस्वरूपसम्यग्द्रष्टा पुमान् शान्तम् अशनायाद्यूर्मिषट्करहितं मे मम समवस्थानं सम्यगावासभूतत्वात् मच्छरीरभूतमित्यर्थः। ब्रह्म गुणादितो बृहत्त्वाद्ब्रह्मशब्दवाच्यं कैवल्यं प्रकृतिवियुक्तमाविर्भूतापहतपाप्मत्वादिगुणकमात्मस्वरूपम् अश्नुते प्राप्नोति। ब्रह्मात्मकाविर्भूत-गुणाष्टकस्वस्वरूपेण संपन्नतया मुक्तो भवतीत्यर्थः॥ १०॥ एवं तत्त्वत्रयविमर्शनपूर्वं ज्ञानकर्मयोगानुगृहीतभगवद्भक्तियोगस्यात्म-तत्त्वप्राप्त्युपायतामभिधायैवंविधस्य पुंसो जीवदवस्थायामवस्थानप्रकारमाह। उदासीनमिति। द्रव्यं पृथिव्यादिभूतानि च ज्ञानं श्रोत्रादिज्ञानेन्द्रियाणि च क्रिया वागादिकर्मेन्द्रियाणि च आत्मा मनश्च तेषाम् अध्यक्षमधिपं कूटस्थं स्वरूपतो निर्विकारम् इमम् आत्मानं उदासीनम् इव स्थितं यः वेद द्रव्याद्यध्यक्षत्वं तु प्रकृतिसंबन्धकृतं परमार्थतस्तु कूटस्थत्वमुदासीनत्वं चेत्येवं स्वात्मानं यो विद्यादित्यर्थः। सः शोभनम् आप्नोति। जीवद्दशायामपि सुखमेवानुभवतीत्यर्थः॥११॥ ननु विप्रतिषिद्धमेतदुच्यते द्रव्याद्यध्यक्षत्वं कूटस्थत्वमुदासीनत्वं चेति। करणप्रवर्त्तकत्वमेव हि करणाधिपत्वं तच्च विकारस्तथा सति कथं शोभनत्वासिद्धिस्तत्राह। भिन्नस्येति। द्रव्यं पृथिव्यादि च क्रियाकारकाणि कर्मेन्द्रियाणि च चेतना ज्ञानेन्द्रियजातं च तदात्मा यस्य तस्य द्रव्याद्यात्मकस्येत्यर्थः। अत एव भिन्नस्य देवमनुष्यादिभावेन भिन्नस्य लिङ्गस्य शरीरस्य गुणप्रवाहः गुणपरिणामात्मकः संसारो भवति। अयं भावः। यद्यपि द्रव्याद्यध्य-क्षत्वरूपविकार आत्मन्यस्त्यथापि सविकारो धर्मभूतज्ञानगतो न स्वरूपगत इति स्वरूपतः कूटस्थत्वमुदासीनत्वं च देवादिरूपेण परिणामस्तु द्रव्यादिसंघातस्यैवेति। ततः दृष्टासु प्राप्तासु संपत्सु विपत्सु च सूरयः तत्त्वत्रयविवेकचतुराः मयि बद्धसौहृदाः न विक्रियन्ते। विजातीयप्रत्ययान्तराव्यवहितमद्विषयनिरतिशयप्रीतिरूपभक्त्या विस्मृतदेहधर्माः सूरयो हर्षशोकाभ्यां न युज्यन्त इति भावः। त्वं च सूरिरेव॥ १२॥

सम इति। अतः सुखे दुःखे च समः समाना उत्तममध्यमाधमा यस्य सः तिर्यङ्मनुजदेवादिषु देहातिरिक्तसर्वात्म-साम्यानुसंधानपर इत्यर्थः। जितानीन्द्रियाणि आशयोऽन्तःकरणं च येन सः मयेश्वरेण उपक्लृप्ताः संपादिता येऽखिललोका अमात्यादयस्तैः संयुतः सन् हे वीर त्वम् अखिललोकरक्षणं विधत्स्व अत्र मयोपक्लृप्तेति विशेषणेन कथमेकेन मयाऽखिललोक-संरक्षणं कर्त्तुं शक्यमित्याशङ्काप्यपास्ता॥ १३॥ ननु मम तु मुमुक्षुत्वैव रुचिकरास्ति तामनुत्पाद्य दण्डादिसापेक्षे लोकरक्षणकर्मणि कथं नियोजयसीत्यत्राह। श्रेय इति। राज्ञः प्रजापालनं प्रजानां संरक्षणमेव श्रेयः निःश्रेयःसाधनं समीहितपुरुषार्थसाधनमित्यर्थः। कुतः यद्यस्मात् सम्यक् प्रजापालनादिति यावत्। सांपराये देहवियोगानन्तरजाते परलोके सुकृतात्प्रजाकृतधर्मात् षष्ठम् अंशं भागं हर्त्ता हरति अन्यथा सर्वप्रजानां रक्षणकरणाभावेऽपि करहारः प्रजाभ्यः सकाशात्स्वामिग्राह्यभागस्य हर्त्ता नृपः यतः प्रजानाम् अरक्षिता रक्षणमकृत्वा प्रत्युत पीडनं कृत्वापि करहारकः इति हेतोरित्यर्थः। हृतपुण्यः प्रजाभिरेव परिहृतसुकृतः सन् अघं प्रजाकृतशमलम् अत्ति॥ १४॥ एवं सति मोक्षोऽप्यनायासेन भविष्यतीत्याह। एवमिति। द्विजाग्र्याणामनुमतश्चासावनुवृत्तः परंपराप्राप्तश्च यो धर्मः स प्रधानं यस्य सः अनभिसंहितफलस्ववर्णाश्रमोचितधर्मप्रधान इत्यर्थः। अर्थकामौ त्वस्यानुषङ्गिकाविति नोक्तमपि तत्प्रधानत्वं बोध्यम्। अन्यतमः स्वस्मिन्स्वातन्त्र्यमनारोप्य प्रजानां मध्येऽन्यतम इव वर्तमान इत्यर्थः। पाठान्तरे धर्मप्रधाना-वन्यतमावर्थकामौ यस्य तथाभूत इत्यर्थः। अस्याः पृथ्व्याः अविता रक्षकः अत एव अनुरक्ताः स्वस्मिन्ननुरागयुक्ताः लोका यस्य तथाभूतस्त्वं ह्रस्वेन अल्पेन कालेन गृहोपयातान् स्वत एव त्वद्गृहान् प्रत्युपगतान् सिद्धान्सनकादीन् द्रष्टासि द्रक्ष्यसि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तैरुपदिष्टतत्त्वोऽमृतत्वं यास्यसीत्यर्थः ॥ ९५ ॥ वरमिति । किं च । हे मानवेन्द्र मनुजाधिपते मन्मत्तः सकाशात् कंचन यं कंचिदपि वरं वृणीष्व यः अहं समं चित्तं येषां तेष्वेव वर्त्तितुं शीलं यस्य सः भवामि सः अहं मखैर्यागैः तपोभिः कृच्छ्रचान्द्रायणादिभिः योगेनाष्टाङ्गयोगसंसाधनेन वापि सुलभः सुप्रापः न तथापि ते तव गुणाः शमादयः शीलं निर्मत्सरादिस्वभावश्च तैः यन्वितः वशीकृतः जातोऽस्मीति शेषः । वै यतोऽहं समचित्तानुवर्त्त्यस्मि ततो ममान्यापेक्षाभावेऽपि तव शमादिगुणवश्यो जातोऽस्मि शमादिरहितैस्तु मखादिभिरपि नैवाहं सुलभ इति भावः ॥ १६ ॥

स इति । विश्वजित् स पृथुः लोकगुरुणा विष्वक्सेनेन भगवता इत्थमनेन प्रकारेण अनुशासितोऽनुशिष्टः सन् हरेः आदेशमाज्ञां शिरसा जगृहे अतीवादृतवानित्यर्थः ॥१७॥ स्पृशन्तमिति । ततः क्षमापयितुमितिशेषः । पादयोः स्पृशन्तं पादयोः शिरो निधाय विहितातिभवदीयापराधोऽस्मीति दीनतामालम्ब्य ब्रुवाणमित्यर्थः । स्वेन स्वीयेन कर्मणा अश्वहरणादिना व्रीडितं लज्जितं शतक्रतुमिन्द्रं प्रेम्णानुरागेण परिष्वज्यालिङ्ग्य विद्वेषं द्वेषभावं तस्मिन्नितिशेषः । विससर्ज अत्याक्षीत् । हेति विस्मये । विस्मयत्वाद्राधपराधर्जनितावद्वेषस्य तत्क्षणमेव परित्यागो यः स बोध्यः ॥ १८ ॥ भगवानिति । ततः विश्वात्मा सर्वान्तर्यामी भगवान् अपि पृथुना उपहृतं समर्पितमर्हणमर्घ्यादिकं यस्य सः गृहीतप्रस्थानकालविधेयार्हणादिः सन्नपीत्यर्थः । समुज्जिहानया समुद्रिक्तया भक्त्या गृहीते चरणाम्बुजे यस्य सः आसीदितिशेषः ॥ १९ ॥ प्रस्थानेति । पृथुप्रेमरज्जुयन्त्रितपदारविन्दः स भगवान् प्रस्थानाभिमुखः स्वलोकं प्रति प्रयाणायाभ्युत्थानं कर्त्तुं विहितदृढसंकल्पः सन् अपि अनुग्रहविलम्बितः पृथ्वनुग्रहविधानसंजातविलम्बः सतां भक्तानां सुहृत् निरतिशयप्रीतिमान् एनं पृथुं पश्यन् पद्मपलाशवत्पद्मदलवद्विशाले अक्षिणी यस्य सः पद्मपत्रविशालाभ्यामक्षिभ्यां संपश्यन्सन्निति भावः । न प्रतस्थे न ययौ ॥ २० ॥ एवं भगवतः पृथौ कृपातिरेक उक्तोऽथ पृथोर्भगवति भक्त्युद्रेकमाह । स इति द्वाभ्याम् । आदिराजः सः पृथुः रचिताञ्जलिः बद्धाञ्जलिः अश्रुलोचनः आनन्दाश्रुपूर्णनयनः अत एव हरिं विलोकयितुं न अशकत् । सः बाष्पविक्लवः गद्गदकण्ठः सन् किंचन न उवाच । अमुमेकं हरिमेव हृदा उपगुह्यालिङ्ग्य अवस्थितः सन् अधात् धृतवान् । हरिमेव हृदा ध्यायन्नस्थादित्यर्थः ॥ २१ ॥ अथेति । अथानन्तरम् अश्रुकलाः नयनवारिकणान् अपमृज्य हस्तेन प्रमृज्य अतृप्ते च ते दृशौ च तयोर्गोचरो विषयभूतस्तं पदा चरणेन क्षितिं भूमिं स्पृशन्तम् अयं भावः न खलु देवाः पदा भुवं स्पृशन्ति तथापि कृपापरवशो हरिर्देवः सन्नपि नूनं स्वात्मानं विस्मृतवानिवेति । अत एव स्खलनपरिहारायेवेतिशेषः । उरंगविद्विषो वैनतेयस्य उन्नते अंसे स्कन्धे विन्यस्तं हस्ताग्रं येन तं पुरुषं परमपूरुषं विलोकयन्सन् आहोवाच ॥ २२ ॥

तत्र यदुक्तं वरं वृणीष्वेति तदसहमान आह । वरानिति । हे विभो वरदानां ब्रह्मादीनामीश्वरस्तस्मात् त्वत्त्वत्तः सकाशात् बुधः पण्डितः अर्थकामादीनां सातिशयत्वं नश्वरत्वं च विद्वानित्यर्थः । वरान्कथं वृणीते । कीदृशान्वरान् ये वराः गुणविक्रियात्मनां गुणैः सत्त्वादिभिर्या विक्रिया गुणानुसारेण यो विकारः स आत्मनि स्वभावे येषां स आत्मा स्वभावो वा येषां तेषां नारकाणां संसारिणामपि देहिनां सन्ति तेषामपि भोग्या वर्त्तन्ते इत्यर्थः । तस्मात् हे कैवल्यपते मुक्त्यधिपते मुक्तिप्रदेत्यर्थः । हे ईश सर्वान्तर्यामिन् तान् क्षुद्रवरान् न च वृणे न त्वत्तः प्राप्तुमिच्छामीत्यर्थः ॥ २३ ॥ कैवल्यपते इति संबुद्धिप्रवर्त्तनात्कैवल्यमस्यापेक्षितं भवेदतस्तदेव वरिष्यतीत्यपि मा शंकीरित्याह । नेति । हे नाथ महत्तमानां भागवतानां यदन्तर्हृदयं तस्मात् मुखच्युतः मुखद्वारेण निर्गतः युष्मच्चरणाम्बुजासवः युष्मत्पादपद्ममकरन्दः भवद्यशःश्रवणादिसुखमित्यर्थः । यत्र न तदपि तादृशं कैवल्यं भवेच्चेत्तदपीत्यर्थः । क्वचित् कदाचिदपि अहं न कामये नैव वृणे । तर्हि किं कामयसे तत्राह । त्वद्गुणश्रवणायेति शेषः । मे मह्यं कर्णायुतं श्रवणानामयुतं दशसहस्रपरिमितान्कर्णानित्यर्थः । यद्वा । अयुतशब्दोऽत्रानन्त्यपरः । तथा सति भवद्गुणानामानन्त्यादनन्तगुणश्रवणार्थमनन्तश्रोत्राणि इत्यर्थः । विधत्स्व देहि । एष एव मे मम वरोऽभिहितो वरः ॥ २४ ॥ किं तु मद्गुणश्रवणसाध्यं यदर्थं कर्णायुतं प्रार्थयसे तत्राह । स इति । हे उत्तमश्लोक महतां त्वद्भक्तानां यन्मुखं तस्माच्च्युतः सः प्रसिद्धः भवतः पदाम्भोजयोर्या सुधा तस्या यः कणो लेशस्तत्संबन्धी योऽनिलो वायुः दूरादपि किंचिद्यशसः श्रवणमात्रमित्यर्थः । विस्मृतं तत्त्ववर्त्म तत्त्वमार्गो यैस्तेषां कुयोगिनां नोऽस्माकं पुनर्भूयः स्मृतिं भवद्विषयां स्मृतिं सम्यक् त्वत्संस्मरणलक्षणां भक्तिमित्यर्थः । वितरति ददाति अतः वरैः पुरुषार्थान्तरसाधनभूतैर्वरैः अलं त्वद्भक्तावेव चतुर्वर्गसर्वसुखान्तर्भावादिति भावः ॥ २५ ॥ त्वद्गुणश्रवणस्य त्वद्विषयकभक्तिसंवर्द्धकत्वाद्यदृच्छयापि त्वद्गुणानेव शृणुयामित्याह । यश इति । हे सुश्रवः शोभनकीर्त्ते भगवन् आर्यसंगमे त्वदेकान्तिकसाधुसमागमे सति ते तव शिवं सर्वथा मङ्गलकरं यशः कीर्त्ति सकृदेकवारमपि यदृच्छया चापि यः उपशृणोति केवलं यशःश्रवणमात्रं करोतीत्यर्थः । सः गुणज्ञः भगवत्कथासारग्राही स्याच्चेत् इत्यर्थः । पशुं कर्मजडं विना ऋते कथं विरमेत् गुणानुश्रवणादितिशेषः । अगुणज्ञः पशुश्चेत्तदा तु त्वद्यशः सकृदाश्रुत्य ततो विरमेदितिभावः । गुणज्ञस्य भगवत्कथाश्रवणेऽविरामं सदृष्टान्तमुपपादयति । यद्यस्मात् श्रीर्लक्ष्मीः गुणानां भवदीयकल्याणगुणगणानां संग्रहेच्छयातिशयेन संस्मरणेच्छया प्रवव्रे त्वामितिशेषः । यद्वा । गुणानां सर्वपुरुषार्थानां संग्रहः स्वस्मिन्समाहारस्तदिच्छया त्वद्यशो नितरां वृतवतीति ॥ २६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतो लक्ष्मीरिवान्यपरित्यागेन त्वामेवाहं भजामीत्याह । अथेति । अथातो हेतोः हे भगवन् अखिलाः समग्रा ये पुरुषा बद्धमुक्तास्तेभ्य उत्तमस्तम् अनेन जीवानां सर्वथा भगवत एव भजनीयत्वमुक्तम्। भगवतोऽखिलपुरुषोत्तमत्वे हेतुः। गुणालयं बद्धमुक्त-नित्यमुक्तेति त्रिविधेष्वपि चेतनेष्वसंभावितनित्यनिरुपाधिकानन्याधीनसर्वज्ञत्वसर्वशक्तित्वसर्वकारणत्वसत्यत्वज्ञानत्वानन्तत्वादि-कल्याणगुणगणाश्रयमित्यर्थः। त्वा त्वामेव पद्मकरेव लक्ष्मीवत् लालसः सन् आभजे भजेयमित्यर्थः। ननु द्वयोरपि मां भजमानयो-रिन्द्रेण सहैव भवतोः कलहः स्यात्तत्राह । एकस्मिन् पतौ स्पृत् स्पर्द्धा ययोस्तयोरेकपतिस्पृधोः एकस्मिन् पतावभिकाङ्क्षावतोः एकभर्तृ-श्रद्धावतोरपीति यावत्। कुतः त्वच्चरणयोरेकतानो मनस ऐकाग्र्येण वृत्तिर्ययोस्तयोः आवयोः अपि लक्ष्म्याः मम च अपि कलिः कलहः न स्यात्। असंभावितत्वादित्यर्थः। एकतानस्यापरिच्छिन्नत्वादितिभावः ॥ २७ ॥ यद्युच्यते एकक्रियत्वात्कलिर्भवित्रैव तर्हि भवतु नाम कलिस्तथापि भजेयमेवेत्याह । जगदिति । हे जगदीश जगज्जनन्यां जगन्मातरि लक्ष्म्यां वैशसं विरोधः स्यादेव । तत्र हेतुः। यत्कर्मणि यस्या लक्ष्म्याः क्रियायां नोऽस्माकं समीहितमिच्छा भवति तथापि इन्द्रविरोधे इवात्रापि मत्पक्षपात एव स्यादित्याह । फल्गु तुच्छमपि उरु करोषि बहु करोषि यतः दीनवत्सलः रङ्केष्वेव करुणावान् असि करुणावत्त्वेऽपि स्वाङ्गनापक्षपातः स्यादेवेति चेदेतदन्येष्वस्तु नास्मिंस्त्वयीत्याह । स्वे धिष्ण्ये स्वस्वरूप एवेत्यर्थः। अभिरतस्य तव तया किं प्रयोजनमिति शेषः। इतरे कामाद्यासक्तास्त्वयि तदभावान्मामनादृत्य तां नाद्रियसे इत्यर्थः ॥ २८ ॥ अस्मिन्नर्थे साधुसंमतिरूपं प्रमाणमाह । भजन्तीति । हे भगवन् यतस्त्वं दीनवत्सलोऽस्यत एव साधवो निष्कामाः अथ ज्ञानानन्तरमपि मायागुणानां विभ्रमो विलासस्तस्योदयः कार्यं स व्युदस्तो निरस्तो यस्मिंस्तं त्वामेव भजन्ति । ननु स्वात्मज्ञानादिप्राप्त्यर्थं सकामा मां भजन्तु प्राप्यं प्राप्तानां तेषामग्रे प्राप्याभावात्ते निष्कामाः किमर्थं भजन्ति तत्राह । हे भगवन् सतां निष्कामानां साधूनां भवत्पदानुस्मरणात् ऋते अन्यत् निमित्तं फलं न विद्महे नित्यनिरतिशयानन्तानन्दानुभवयुक्तत्वच्चरणस्मरणसमुद्रविप्रुडनुभवाग्रे केवलस्वात्मानुभवस्त्वतितुच्छस्ततस्तत्प्राप्तये तेषां तदस्त्विति भावः ॥ २९ ॥

अस्त्वेवं त्वन्महिमवार्त्ता प्रथमतस्तु कृपालोस्तव वरैः प्रलोभनमेवानुचितमित्याशयेनाह । मन्य इति । हे भगवन् भजन्तं त्वद्भजनं कुर्वन्तं मां वरं वृणीष्व इति यत् आत्थ अवोचः तां ते तव गिरं वाचं जगतां विमोहिनीं विषमिश्रपयः-पानप्रलोभनवाक्यतुल्यां मन्ये । त्वदभजनात्संप्राप्तसंसाराणां दैवजातजन्मान्तरीयसुकृतफलप्रदानोन्मुखान्तरात्मत्वत्कृपाप्राप्त-त्वदेकान्तिकसाधुसमागमसमारब्धे त्वद्भजने सति वरप्रलोभनैस्तेषां पुनः संसारहेतुमेवापादयसि यत्तद्भक्तानुग्रहैकशीलस्य दयालोस्तव नोचितमिति भावः। नु अहो ते तव तन्त्या दामतुल्यया बन्धकया वाचा, अपाम सोमममृता अभूम, 'अक्षय्यं ह वै चातुर्मास्ययाजिनां सुकृतं भवति, इत्यादिकया वेदादिमकया वाण्येत्यर्थः। जनः सर्वो लोकः यदि असितः अबद्धः स्यात् तर्हि पुनः पुनः फलैः मोहितः सन् कथं कर्म प्रवृत्तधर्मं करोति । यदि करोति तर्हि स सित एवातो वरप्रलोभनं बद्धस्य प्रचुरबन्धन-विधानवदेवेति भावः ॥ ३० ॥ त्वन्मायामोहितस्य पुनस्त्वया वरप्रदानेन यन्मोहनं विधीयते तत्तव नोचितं किं तु तद्धितं यथा स्यात्तथा त्वया चेष्टितव्यमित्याह । त्वन्माययेति । हे ईश त्वन्मायया अबुधः स्वात्मपरमात्मयाथात्म्यज्ञानविधुरः जनो लोकः दैवात्त्वां भजन्सन्निति शेषः। ऋतात्मनः सत्यात्मनः सत्यात्मनस्त्वत्तः यद्यदि अन्यदर्थकामादिकम् आशास्ते तर्हि अद्धा निश्चितमेव खण्डितस्त्वत्तः पृथक्कृतः दूरीकृत एव स्यादित्यर्थः। अतः स्वयं पुत्रेणाविज्ञापितः सन्नेव पिता यथा बालहितम् अनभिज्ञस्वसुतहितं चरेत् सम्यक्कुर्यात् । तथा नोऽस्माकं समीहितं समीचीनमेव हितं कर्तुं त्वमेव अर्हसि ॥ ३१ ॥ इतीति । इत्यमुना प्रकारेण आदिराजेन पृथुना, नुतः स्तुतः, विश्वदृक्, स भगवान्, तं पृथुम् आह, हे राजन्, ते तव, मयि, भक्तिः, अस्तु वर्द्धतामित्यर्थः। हे राजन्, यया मयि कृतया धिया, दुस्त्यजाम्, अपि मदीयां, मायां, तरति स्म अतरदित्यर्थः। भवानितिशेषः। ईदृशी, धीः, ते त्वया, मयि, कृता, दिष्ट्या अतीव भद्रं जातम् ॥ ३२ ॥ तदिति । तत् यस्मादेवं तस्मादित्यर्थः। हे प्रजापते पृथो, त्वं प्रजाः धर्मे स्थापयितुमिच्छसि चेदित्यर्थः। मया, उद्दिष्टं त्वां प्रति मया यदादिष्टमित्यर्थः। अप्रमत्तः, अवहितमनाः सन्नित्यर्थः। कुरु । सुखदुःखयोः सिद्ध्यसिद्ध्योर्जयपराजययोः सतो रागद्वेषाद्यक्षुभितचित्तोऽनुतिष्ठेतिभावः। तथात्वे फलमाह, मदादेशकरः मदाज्ञानुसारेण वर्त्तमानः लोको जनः, सर्वत्र इहामुत्र च, शोभनं सुखातिशयम्, आप्नोति लभते ॥ ३३ ॥

उक्तार्थमुपसंहरति मुनिः। इतीति । इत्यमुना प्रकारेण वैन्यस्य राजर्षेः, अर्थवत् वचः प्रतिनन्द्य बहु मानयित्वा पूजितः कृतप्रयाणकालिकशुभार्चनः अच्युतो भगवान् एनं वैन्यम् अनुगृहीत्वा अनुगृह्य गन्तुं स्वधाम प्रति यातुं मतिं चक्रे। गमने मतिं व्यधादित्यर्थः ॥ ३४ ॥ देवेति । तदा देवाश्च ऋषयश्च पितरश्च गन्धर्वाश्च सिद्धाश्च चारणाश्च पन्नगाः सर्पाश्च ते, किंनराश्च अप्सरसश्च ताः, मर्त्त्याः, खगाः, अनेकशः भूतानि ॥ ३५ ॥ यज्ञेश्वरेति । सर्वे, राज्ञा पृथुना, यज्ञेश्वरधिया भगवदा-त्मकबुद्ध्या वाग्वित्ताञ्जलिभक्तितः वाचा वित्तेन अञ्जलिभिः भक्त्या च, यथायोग्यमितिशेषः। सभाजिताः सन्तः, ततः, ययुः, वैकुण्ठानुगताः भगवन्तमनुसृत्यागताः ये पार्षदास्तेऽपि, ययुः द्वयोरेकसंबन्धः ॥ ३६ ॥ भगवानिति । सोपाध्यायस्य, राजर्षेः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथुराज्ञः, पश्यतः सत इतिशेषः। अमुष्य राज्ञः मनः हरन्निव, प्रभुः अच्युतः, भगवांश्चापि, स्वधाम, प्रत्यगात् ॥ ३७ ॥ अदृष्टायेति। नृपः पृथुः, अदृष्टाय चक्षुविषयतामप्राप्ताय, संदर्शितस्तिरोधानात्प्राक्करुणया चक्षुर्विषयतां नीत आत्मा येन तस्मै, देवानां ब्रह्मादीनामपि, देवाय, वासुदेवाय, 'वसन्ति यत्र भूतानि भूतात्मनि महामते। दीव्यन्ति सर्वदा तेन वासुदेवः स उच्यते' इति वासुदेवपदवाच्याय भगवते, नमस्कृत्य, स्वपुरं ययौ। यज्ञशालातो नगरं प्रत्यगच्छदित्यर्थः ॥ ३८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः

मैत्रेय उवाच

मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः। महासुरभिभिर्धूपैर्मण्डितं तत्र तत्र वै ॥ १ ॥

पृथुना स्वप्रजानां यदेकविंशेऽनुशासनम्। वर्ण्यते तत्सुरादीनां महासत्रे सदोऽन्तरे ॥ १ ॥

यत्पूर्वाध्यायान्ते पुरं ययावित्युक्तं तत्पुरमनुवर्णयति। मौक्तिकैरिति त्रिभिः। मौक्तिकैर्मुक्तादामभिः, कुसुमस्रग्भिर्नाना-विधपुष्पमालाभिः दुकूलैर्महावस्त्रैः स्वर्णतोरणैः सुवर्णसूत्रमयवासस्तोरणैः, महासुरभिभिः, धूपैः, तत्र तत्र तेषु तेषु देवालयेभ्यभुव-नादिषु मण्डितमतिशोभमानं वै ॥ १ ॥ चन्दनेति। चन्दनागरुयुक्तानि यानि तोयानि जलानि तैः आर्द्रा ये रथ्याचत्वरमार्गास्ते सन्त्यस्मिन्नेवंभूतं तथा पुष्पाणि सुमनांसि च अक्षता यवा अभग्नतण्डुला वा ते च फलानि पक्वजम्बीरादीनि च तैः, तोक्मैर्हरित-यवाङ्कुरैः, लाजैर्भर्जितव्रीहिभिः, अर्चिर्भिः प्रदीपप्रभाभिश्च अर्चितं सशोभावत्कृतम् ॥ २ ॥ सवृन्दैरिति। सवृन्दैः सशिलीन्ध्रैः, कदलीस्तम्भैः, पूगपोतैर्बालपूगैः, परिष्कृतमलङ्कृतं केचित्तु पूगपोतैः क्रमुकपुष्पैरिति व्याख्यायन्ते। तथा तरूणां पल्लवास्तेषां मालास्ताभिः सर्वतः, समलंकृतं संशोभितम् ॥ ३ ॥ प्रजा इति। संभृतानि पूजार्थं संकलीकृतानि यान्यशेषाणि मङ्गलानि दध्यादीनि मङ्गलद्रव्याणि तैः, सह, दीपावलिभिश्च, सह, प्रजाः तं पृथुम अभिजग्मुः। मृष्टान्युज्ज्वलानि च तानि कुण्डलानि च तैर्मण्डिताः मृष्टाः स्नानालंकारादिधृत्योज्ज्वलाः कन्याश्च, अभिजग्मुः। तत्र प्रजाः पूजार्थं कन्याः शकुनविधापनार्थमभिजग्मुरिति बोध्यम् ॥ ४ ॥ शङ्खेति। शङ्खाश्च दुन्दुभयश्च तेषां घोषस्तेन ऋत्विजामृत्विग्ब्राह्मणानां ब्रह्मघोषेण यथाविध्युच्चारितवेदध्वनिना चकाराद्बन्दिजनैश्च स्तूयमानः अपि, गतः स्मयो यस्य सः निरहंकारः वीरः पृथुः, भवनं विवेश ॥ ५ ॥ यज्ञशालातः पुरगोपुर-प्रवेशानन्तरजं भवनप्रवेशात प्राग्भवं च नृपवृत्तान्तमाह। पूजित इति। तत्र तत्र तासु तासु पुरगतासु रथ्यादिषु पूजितः पौरैर्जा-नपदैर्जनैः सत्कृतः, अत एव, महायशाः विपुलकीर्त्तिः, प्रीतः प्रसन्नतां प्राप्तः प्रियाश्च ते वराश्च ताम्प्रददातीति तथाविधः पृथुः, तान् तान् पौरान् जानपदांश्च, पूजयामास यथायोग्यं सत्कृतवान् ॥ ६ ॥ प्रश्नोद्भावनायेममर्थं निगमयति। स इति। महान् गुणैर्महान् अत एव महत्तमः पूज्यतमः, अत एव, अनवद्यानि चेष्टितानि यस्य सः, निर्दुष्टतोदारव्यापार इत्यर्थः। सः पृथुः, एवमादीनि भूमिदोहनप्रभृतीनि, भूयांसि बहूनि बहुप्रकाराणि वा, कर्माणि, कुर्वन्सन्, अवनिमण्डलं भूवलयं शशास। इहलोके इति शेषः। स्फीतं विपुलं यशः निधाय, परं पदं वैकुण्ठलोकम् आरुरुहे अधिरूढवान् ॥ ७ ॥ एवश्रुतपृथुचरित्रः विदुरः एवमादिशब्दाभिहितस्योक्तेतरस्य तदुदारचेष्टितस्य शुश्रूषया पुनः प्राहेत्याह सूतः। श्रुत्वेति। अशेषैः गुणैः विजृम्भितमूर्जितं गुणवत्सभाजितं गुणवज्जनसत्कृतम् आदिराजस्य पृथोः यशः, श्रुत्वा, महाभागवतः क्षत्ता विदुरः, हे सदस्पते शौनक, गृणन्तं स्वं प्रति भगवत्कथां सम्यक्कथयन्तं कौषारविं मैत्रेयम् अर्चयन् साधु साध्विति संमानयन् प्राह ॥ ८ ॥

पुनरुक्तकथाप्रकरणोद्भावनायोक्तार्थं पुनरप्याह। स इति द्वाभ्याम्। विप्रैर्ब्रह्मर्षिभिः अभिषिक्तः अभिषेकविधानपूर्वं राज्ये आस्थापितः लब्धमशेषाणां सुराणामिन्द्रादीनामर्हणं येन सः, वैष्णवं विष्णुसंबन्धि तेजः वीर्यं च बाह्वोः बिभ्रत् दधानः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

याभ्यां वैष्णवतेजःशालिभ्यां बाहुभ्यां गां भूमिरूपां धेनुं दुदोह । एवंभूतः सः पृथुः ततः किमकरोदितिशेषः ॥ ९ ॥ सांप्रतं विदुरः पृथुकथाश्रवणे स्वौत्सुक्यमाविष्कुर्वन् प्रार्थयते । को न्विति । अस्य पृथोः कीर्तिम् अभिज्ञ तन्महिमाभिज्ञता चेत् को नु को वा न शृणोति कथंभूतस्यास्य यस्य पृथोर्विक्रमः पृथ्वीदोहनादिरूपस्तस्य यदुच्छिष्टमुच्छिष्टतुल्यं, कामम् अद्यापि अशेषभूपाः, सपाला लोकपालैः सहिताः लोकाश्च उपजीवन्ति आसेव्य स्वनिर्वाहं कुर्वन्तीत्यर्थः । कामोऽत्र भोग्यः पदार्थः । यथा धनाढ्योच्छिष्टेनाल्पसारेणोत्क-रक्षिप्तेन दीना जना जीवन्ति तद्वदितिभावः । शुद्धं निरवद्यं तत्तस्य, कर्म तदीयं चरितमित्यर्थः । मे मह्यं वद ॥ १० ॥ एवं विदुरोक्तो मुनिराह । गङ्गेति । गङ्गायमुनयोः, नद्योः, अन्तरा मध्ये क्षेत्रं ब्रह्मावर्ताख्यं क्षेत्रं स्थितमितिशेषः । आवसन् आधारस्यात्र कर्मसंज्ञा 'उपान्वध्याङ्वसः' इत्यनुशासनात् । पृथुः आरब्धान्प्राचीनकर्मायत्तानेव भोगान् न स्वपूर्वसाधनानुष्ठानारब्धान् तत्र हेतुः । पुण्यक्षपणेच्छया बुभुजे । मुमुक्षोः पापवत्पुण्यस्यापि स्वफलजननद्वारा मोक्षविरोधित्वेन पुण्यस्यापि जिहासितव्यता बुद्धिमतः पुण्यजिहासया मोक्षविरोधिभोगसाधनत्वेन कर्मानुष्ठानासंभवादिति भावः ॥११॥ सर्वत्रेति । सर्वत्र अस्खलितोऽप्रतिहत आदेश आज्ञा यस्य सः सप्तसु द्वीपेषु एक एव दण्ड बिभर्तीति पाठान्तरे धारयतीति स्वसमानराजान्तररहित इत्यर्थः । अनेन क्रियमाणं दण्डधारणं किं सर्वत्र नेत्याह । ब्राह्मणकुलात् अन्यत्र ब्राह्मणकुले दण्डं नाधारयदित्यर्थः । तदन्यत्र सर्वत्रापि किमित्यत्राह अच्युत-गोत्रतश्चाप्यन्यत्र जात्यन्तरेषु वर्त्तमानादपि भागवतकुलादन्यत्रेत्यर्थः । अच्युतो गोत्रप्रवर्त्तको येषां वैष्णवानां तेभ्य इतरत्रेति तदर्थः ॥ १२ ॥ एकदेति । हे सत्तम विदुर । एकदा एकस्मिन्नवसरे, तस्य पृथोरिति शेषः । महासत्रदीक्षा आसीत महासत्रसंकल्पं कृत्वा तत्र दीक्षितोऽभूदित्यर्थः । तत्र महासत्रे दिवौकसां देवानां ब्रह्मर्षीणां मरीच्यादीनामृषीणां देवर्षीणां नारदादीनामृषीणां च समाजः सभा आसीत् चैत्र ॥ १३ ॥

तस्मिन्निति । तस्मिन्समाजे अर्हत्सु पूज्येषु सर्वेषु यथार्हतः यथायोग्यं स्वर्चितेषु पूजितेषु सत्सु स्वेनेतिशेषः । सदसः मध्ये पृथुः उत्थितः सन् समंततः समैक्षतेति षष्ठेनान्वयः । तं विशिनष्टि । ताराणाम् उडुराट् चन्द्र इव स्थितः ॥१४॥ प्रांशुरिति । प्रांशुरुन्नतः पीनौ सुपुष्टावायतौ दीर्घौ भुजौ यस्य सः गौरो गौरवर्णः कंजवत्कमलवदरुणे ईक्षणे यस्य सः सुशोभना नासा नासिका यस्य सः सुष्ठु मुखं यस्य सः सुशोभना द्विजा दन्ता यस्मिं तथाभूतं स्मितं यस्येति बहुव्रीहिगर्भो बहुव्रीहिः पीनौ पुष्टावंसौ यस्य सः सौम्यः स्वभाव-सुन्दरः ॥ १५ ॥ व्यूढेति । व्यूढं विस्तीर्णं वक्षो यस्य सः बृहन्त्यौ पीने श्रोणी नितम्बौ यस्य सः बलिभिस्त्रिभिः वल्गु सुन्दरं दलवदधोभ्रमश्वत्थपत्रमिवोपरि विस्तृतमधस्तात्संकुचितमुदरं यस्य सः आवर्त्तो जलभ्रमस्तद्वन्निम्ना नाभिर्यस्य सः ओजस्वीन्द्रिय-शक्तिमान् काञ्चनवदुज्ज्वलावूरू यस्य सः उदग्रावुन्नतौ पादौ यस्य सः ॥१६॥ सूक्ष्मेति । सूक्ष्मा अणवश्च ते वक्राः कुटिलाश्चासिता मेचकाश्च स्निग्धास्तैलत्वेपादिवचिक्कणतोपेताश्च मूर्द्धजाः शिरोरुहा यस्य सः कम्बुवत्त्रिरेखाङ्किता कंधरा कण्ठो यस्य सः महाधने अनर्घ्ये दुकूलाग्र्ये दुकूलश्रेष्ठे परिधाय वसित्वा उपवीयोत्तरीयं कृत्वा च वर्त्तमान इति शेषः ॥ १७ ॥ व्यञ्जितेति । नियमे निमित्ते न्यस्तानि त्यक्तानि भूषणानि सकलाभरणानि येन सः तैरनावृतत्वादितिशेषः । व्यञ्जिता अशेषेषु गात्रेष्ववयवेषु श्रीः शोभा येन सः श्रीमान् समुदायकान्तिमान् कृष्णाजिनधरः विधृतकृष्णमृगचर्मा कुशपाणिः पवित्रयुक्तकरः कृतान्युचितानि स्वार्हकर्माणि येन सः ॥१८॥ शिशिरेति । शिशिरे संतापहरे स्निग्धे च तारे ययोस्ते अक्षिणी यस्य सः एवंभूत उर्वीशः सदः सभावस्थितजनान् संहर्षयन् इव कचित्तु सदस्यान्हर्षयन्निवेत्यपि पाठः । तत्राप्ययमेवार्थः । इदं वक्ष्यमाणं वाक्यम् उक्तवान् । वाक्यं विशिनष्टि । चारु श्रोत्रप्रियं चित्राणि विचित्रतावन्त्याश्चर्यकराणि वा पदानि यस्मिंस्तत् श्लक्ष्णं प्रशस्तं मृष्टं शुद्धम् अनपशब्दितमित्यर्थः । गूढं गम्भीरागाधार्थम् अविक्लवमव्याकुलम् ॥ १९ ॥

अयमस्मान्प्रति सर्वज्ञ इव धर्मानुपदेष्टुमुत्सहते इति बुद्ध्या सभ्या मा क्रुद्धेयुरिति मनीषया स्ववाक्यश्रावणाय सभ्यान्प्रार्थयते । सभ्या इति । हे सभ्याः सभायामुपविष्टा जनाः, वः भद्रं भवतु इह सत्रभूमौ, ये, आगताः, साधवः, तेपि यूयं च शृणुत, नाहं ज्ञः किं तु जिज्ञासुरतो जिज्ञासितव्यं विज्ञापयामि इत्यभिप्रायेणाह । धर्मं जिज्ञासुभिः, स्वमनीषितं सत्सु सतां समीपे, आवेद्यं विज्ञापनीयं तद्विज्ञापयामीति शेषः । प्रजानुशासनव्याजेन जिज्ञासैव क्रियते न तु युष्मान् प्रति धर्मो मयोप-दिश्यत इति भावः ॥ २० ॥ इदानीं प्रजारक्षणशिक्षणादिकं ममाप्यावश्यकमिति प्रजाः शिक्षयिष्यन्नाह । अहमिति त्रिभिः । धात्रा भगवता प्रजानां दण्डधरः दण्डधरत्वेनेत्यर्थः । अहम् इह लोके, योजितो नियुक्तः, न केवलं दण्डधर एव किं तु, रक्षिता रक्षितृ-त्वेनेत्यर्थः । वृत्तिदः, आजीविकाप्रदत्वेनेत्यर्थः । स्वेषु स्वस्ववर्णाश्रमोचितेषु, सेतुषु धर्ममर्यादासु पृथगसंकरेण स्थापिता स्थापयितृत्वेन च योजितः ॥ २१ ॥ नन्वेवं प्रयाससाध्यप्रजारक्षणविधानादिना साध्यं तव किं फलं तत्राह । तस्येति । ब्रह्मवादिनः वेदार्थतत्त्वस्य स्वानुष्ठानेनोपदेष्टारः यान्, आहुः प्रजारक्षणादिना राज्ञः यान्पुण्यलोकान् प्राप्यत्वेनाहुरित्यर्थः । लोकास्ते एव लोकाः तस्य प्रजारक्षणादिनिष्ठस्य मे मम तदनुष्ठानात् प्रजारक्षणाद्यनुष्ठानात् कामसंदोहाः कामानां सम्यक् दोहः प्रपूरणं येषु तथाभूताः मत्समीहितकामान् पूर्णीकुर्वाणाः, स्युः संभावनायां लिङ् । स्वस्य मुमुक्षुत्वेनामुमुक्षुप्राप्यप्राकृतलोकस्य प्राप्यत्वाभावात् स्वाहार्दमाह । यस्य प्रजारक्षणादिनिष्ठस्य मम, दिष्टदृक् प्रजारक्षणादिकृतकर्मसाक्षीश्वरः, तुष्यति । तस्मिंस्तुष्टे सति तु मुक्तिरपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ममानायासेनैव सुलभेति भावः ॥ २२ ॥ अन्यथा त्वनिष्टं स्यादित्याह । य इति । यः राजा, धर्मेषु प्रजाः, अशिक्षयन्सन् करं स्वामिग्राह्यभागम् उद्धरेत, रक्षणमविधाय करमात्रं गृह्णीयादित्यर्थः । तर्हि सः राजा प्रजानां शमलं पापमेव, भुङ्क्ते । न केवलमेतावदेव किं तु स्वं स्वीयं भगं ज्ञानशक्त्यादिकं च, जहाति ॥ २३ ॥ तदिति । तत्तस्मात् हे प्रजाः, भर्त्तुः सर्वासां भवतीनां पोषकत्वात्पितृस्थानीयस्य मम पिण्डार्थं पिण्डदानवत् परलोकहितार्थं स्वार्थं स्वप्रयोजनसिद्ध्यर्थं चापि, अनसूयवोऽसूयारहिताः, अधोक्षजधियो भगवद्विषयकबुद्धियुक्ताः, भगवदर्पणबुद्धियुक्ताः सत्य इति यावत् स्वधर्ममितिशेषः । स्वार्थात्मकस्वस्ववर्णाश्रमोचित-धर्ममेवेत्यर्थः । कुरुत अनुतिष्ठत । तर्हि, मे मम, अनुग्रहः, कृतः, भवेत् 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्' इतिं भगवदुक्तं सर्वाभिः प्रजाभिः राज्ञि पितृभावः कार्यः 'स पिता यस्तु पोषकः' इति स्मृतेः । पितेव यतोऽसौ पोषकः, यतोऽसौ पोषकतया पिता, ततः पित्रे इव राज्ञेऽपि पिण्डो देयः स पिण्डस्त्वत्र स्वस्ववर्णाश्रमधर्मानति-क्रमणपूर्वं सच्छास्त्रीयधर्मानुरोधकृतायां तदाज्ञायामवस्थानं तेनेहामुत्र सुखावाप्तिरिति भावः ॥ २४ ॥

सभ्यानुदिश्याह । यूयमिति । हे अमलाः, पितृदेवर्षयः, यूयं तत्प्रजाभिः स्वधर्माचरणं कार्यमित्येतत् मदनुशासनम् अनुमोदध्वम् । किमस्मदनुमोदनमात्रसाध्यं तत्राह । यद्यस्मात् कर्त्तुः प्रयोज्यस्य, शास्तुः प्रयोजकस्य, अनुज्ञातुरनुमन्तुः तत्राप्रवृत्तस्य प्रवर्त्तकत्वं प्रयोजकत्वं प्रवृत्तस्य प्रवर्त्तकत्वमनुमन्तृत्वमिति विवेकः । प्रेत्येति कृदन्तयोगात्कृद्योगलक्षणा कर्त्तरि षष्ठी । कर्त्रादिभिः प्रेत्य परलोकं प्राप्य, तत्फलं तुल्यम् अनुभूयते इति शेषः ॥ २५ ॥ अत्र 'यस्य तुष्यति दिष्टदृक्' 'कुरुताधोक्षजधियः' इति कर्मणां भगवदाराधनरूपत्वं कर्मभिराराधिताद्भगवतः फलप्राप्तिरवगम्यते तत् निरीश्वरवादिनां केषांचिन्मते सर्वथानुपपन्नमीश्वरानङ्गीकारादिति किंचित्तन्मतमुद्भाव्येश्वरसिसाधयिषया तावत्तत्सद्भावं प्रतिजानन् निरीश्वरसिद्धान्तान् वेनमतवादिनो जनान् शनैः-संबोधयन्नाह । अस्तीति । हे अर्हसत्तमाः, केषांचिदास्तिकानां मते इति शेषः । यज्ञपतिः नाम, यज्ञाराध्यस्तत्फलप्रदश्चेश्वराख्यः कश्चित्प्रसिद्धोऽस्तीत्यर्थः । किमत्र प्रमाणमित्याकाङ्क्षायां तावद्विचित्रसृष्टयन्यथानुपपत्तिं प्रमाणयति, इहामुत्र चेति । इह लोके, अमुत्र अमुष्मिन् परलोके चापि, क्वचित् ज्योत्स्नावत्यः प्रकाशबहुलाः भुवः विचित्राः भोगभूमयः विचित्रशरीरास्तद्भोक्तारश्चापि दृश्यन्ते । क्वचित्तु लक्ष्यन्ते इत्यपि पाठस्तत्राप्ययमेवार्थः । लक्षधातोर्दर्शनार्थत्वात् । एतद्दर्शनं त्वीश्वरमन्तरेण नोपपद्यते इति भावः ॥ २६ ॥ यद्यपीदं निरीश्वरवादिनां मतेऽपि कर्मवैचित्र्यात्सेत्स्यत्येव तथापि विद्वदनुभवेनेश्वरसिद्धिरित्याह । मनोरिति त्रिभिः । मनोः प्रथमराज्ञः स्वायंभुवस्य, महीपतेः, उत्तानपादस्य ध्रुवस्यापि अस्मत्पितुः पितुरङ्गस्य राजर्षेः प्रियव्रतस्य ॥ २७ ॥ ईदृशानामिति । ईदृशानामेवंविधानाम् अन्येषां नृपाणाम् अथ अजस्य ब्रह्मणश्च भवस्य शिवस्य च प्रह्लादस्य बलेश्चापि गदाभृता ईश्वरेण कृत्यम् अस्ति अतोऽवश्यं कर्मफलप्रदात्रेश्वरेण भवितव्यमिति तेषां मतमित्यर्थः । इति द्वयोः संबन्धः ॥ २८ ॥

नन्वचेतनस्य क्षणभाविनः कर्मणः फलप्रदत्वासंभवेऽपि अपूर्वाख्यशक्तिकल्पनाद्द्वारा कर्मण एव फलसाधनत्वं स्यात् । ततः कल्पितया विध्युद्देशगतदेवतया कल्पितेनेश्वरेण च किं प्रयोजनमित्याशङ्कां परिहरन् दर्शयतीश्वरसत्यत्वं दौहित्रादीनिति । वर्गो धर्मादिस्त्रिवर्गश्च स्वर्गो धर्मफलं च अपवर्गो मोक्षश्च तेषां, प्रायेण प्रायशः, एक आत्मा स्वरूपं येषां ते एकात्मानस्तेषां भाव ऐकात्म्यं, वर्गादित्रयाणामेकेनैव प्रदेयत्वरूपमेकात्मत्वं तदेव हेतुस्तेन वर्गादीनामेकेनैव प्रदेयत्वश्रवण-स्मरणरूपहेतुना हीश्वरोऽभ्युपगतो मन्वादिभिरित्यर्थः । तदीक्षयाऽपूर्वस्येतरदेवताया वा भगवन्तं विहाय न फलप्रदान-शक्तत्वमितिभावः । एतन्नास्तिकानृते सत्यमित्याह दौहित्रादीनिति । धर्मविमोहितान् धर्मस्वरूपतदनुष्ठानतत्साधनतत्फल-साधनादिकमजानतः, अत एव शोच्यान्, मृत्योः, दौहित्रादीन्, वेनादीन्, ऋते विना, आदिशब्दः प्रकारे । तत्सदृशा-नित्यर्थः । वेनसदृशान्विना सर्वेषां मते ईश्वरोऽस्तीति भावः ॥ २९ ॥ एवं केवलकर्मणां तन्मूलकापूर्वस्य कर्माराध्यदेवतायाश्च कर्मफलसाधनत्वाभावः परमपुरुषस्यैव साध्यसाधनभावश्चोपपादितः । इदानीं तद्द्रढिम्ने भगवत्पदारविन्दस्यैवानर्थनिरासकत्वं पुरुषार्थोपादकत्वं चाह । यत्पादेति । तप आध्यात्मिकादिः संतापः, स विद्यते येषां ते तपस्विनस्तेषां, त्रिविधतापातुराणा-मित्यर्थः । यस्य भगवतः पादयोर्या सेवा भक्तिस्तस्यामभिरुचिः प्रीतिः, अन्वहरहः एधती प्रवर्द्धमाना सती, अशेषाण्यनेकानि यानि जन्मानि तैरुपचितं संवर्द्धितं, धियो मनसः मलं, तस्य हरेरितिशेषः । पादस्य योऽङ्गुष्ठस्तस्माद्विनिःसृता, सरिद्गङ्गा, यथा तथा सद्यः क्षिणोति, तमेव भजतेति तृतीयेनान्वयः ॥ ३० ॥ किं मलक्षयेण साध्यं तत्राह । विनिर्धुतेति । विनिर्धुता निरस्ता अशेषा मनोमला यस्य सः, असङ्गो वैराग्यं च विज्ञानं प्रकृतिविविक्तात्मयाथात्म्यवेदनं च ताभ्यां विशिष्यते इति विशेषः । अङ्गभूतज्ञानवैराग्यकृतोपकारः स एव वीर्यं बलं यस्य भक्तियोगस्य सोऽस्यास्तीति, यस्य भगवतोऽङ्घ्रिमूले कृतं केतनं स्थानं येन सः, तदेकनिरत इत्यर्थः । अनेन भक्तियोगस्य विजातीयप्रत्ययान्तराव्यवहितत्वं विवक्षितम् । पुमानीदृशः पुरुषः, क्लेशवहां जन्मजरामरणादिक्लेशकारिणीं संसृतिं पुनः न प्रपद्यते । अत्रासङ्गशब्दो विवेकादिसाधनसप्तकस्योपलक्षणं तानि तु विवेकविमो-काभ्यासक्रियाकल्याणानवसादानुद्धर्षसंज्ञानि एतदर्थस्तु श्रीभाष्यादवगन्तव्यः ॥ ३१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तमेवेति। तस्मात् स्वकर्मभिः वर्णाश्रमोचितपञ्चमहायज्ञादिनिजकर्मभिः, आत्मवृत्तिभिः शमदमतपःशौचक्षान्त्यार्जवादिभिः, अध्यापनादिरूपाभिर्वा, मनोवचःकायगुणैः ध्यानस्तुतिपरिचर्यादिभिः: अमायिनो निष्कपटाः सन्तः, यथाधिकारं यस्य यादृगधिकारस्तमनतिक्रम्य स्वस्वसमीहितफलमनतिक्रम्येति वाऽवसिता निश्चिता अर्थसिद्धिः फलसिद्धिर्येषां ते स्वसमीहितार्थानुसारेण फलसिद्धिर्भाविनीत्येवं निश्चितबुद्धयः इत्यर्थः। एवंविधाः सन्तश्च कामं समीहितमर्थं दोग्धि प्रपूरयतीति कामदुघम् अङ्घ्रिपङ्कजं यस्य तं तमुक्तविधं भगवन्तं, एव यूयं भजत। अलौकिकैवंविधगुणालयो मदाराध्योऽयं शास्त्रप्रामाण्यात्परमेश्वर एवानयोपासनयैतन्मद्वाञ्छितं नूनमेव स्यादिति निश्चयं दृढं कृत्वा भजत। निश्चयस्यैवानुष्ठानोपयोगित्वात्संशयस्यानर्थावहत्वात् 'न सुखं संशयात्मनः' 'संशयात्मा विनश्यति' इति स्मरणाच्चेति भावः॥ ३२॥ ननु प्रतिकर्मद्रव्यदेवतादिभेदादेव कर्मणां भेदः अन्यथा कर्मैकत्वमेव स्यात्तथा सति प्रतिकर्म प्रतिनियततया साधनप्रयासोऽपि व्यर्थः स्यात् तत्कथमेकदेवतोद्देशेन सर्वकर्मानुष्ठानं कुरुतेत्युच्यते तत्राह। असाविति। स्वरूपतः स्वरूपेण विशुद्धविज्ञानघनः विशुद्धविज्ञानैकस्वरूपः अगुणः निरस्तहेयगुणः हेयगुणरहित इत्यर्थः। अनेकगुणः अनन्तकल्याणगुणगणः असौ य एषः परमात्मा स एवेति शेषः। इह कर्ममार्गे पृथग्विधद्रव्यगुणक्रियोक्तिभिः पृथग्विधत्वं द्रव्यादिष्वन्वेतव्यम्। तत्र द्रव्याणि व्रीह्याज्यादीनि गुणाः शुक्लादयः क्रिया अवघातादयः उक्तयो मन्त्राः पृथग्विधद्रव्यादिभिरित्यर्थः। अर्थोऽर्थसाध्य उपहारश्च, आशयः संकल्पश्च लिङ्गं पदार्थानां शक्तिश्च नाम ज्योतिष्टोमादिकं च तैः अध्वरः अध्वरापरसंज्ञयज्ञनामा संपद्यते। अध्वरस्य द्रव्यादिसंघातरूपत्वात् द्रव्यादीनां भगवच्छरीरत्वात् अध्वररूपो जायत इत्यर्थः। 'यज्ञो वै विष्णुस्तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' इत्याद्यग्नीन्द्रादिद्वारभेदेन द्रव्यादिभेदेन च कर्मणां भेदः। अन्त्याद्यन्तरात्मतयावसितस्य परमपुरुषस्यैकस्यैवाराध्यत्वफलदत्वाद्युपपत्तिस्वारस्यत एकदेवताराधनत्वमप्युपपन्नमिति भावः॥३३॥ एवं कर्म तदाराध्यदेवतारूपत्वं चोक्तमथ कर्मभोक्तृजीवरूपत्वं तत्फलरूपत्वं चाह। प्रधानेति। एष भगवान् प्रधानं प्रकृतिश्च कालस्तद्गुणक्षोभकश्च आशयो वासना च कर्म अदृष्टं च एभिः संगृह्यते उत्पाद्यते इति प्रधानकालाशयकर्मसंग्रहं तस्मिन् शरीरे चेतनां शब्दाद्यनुभवरूपं ज्ञानं प्रतिपद्य जीवद्वारेतिशेषः। विभुः जीवान्तरात्मतया स्थातुं समर्थः। अत एव क्रियाफलत्वेन स्वर्गादिरूपतया विभाव्यते निश्चीयते एवं कर्म तदाराध्यतत्फलभोक्तृतत्फलरूपत्वमुक्तम्। तत्र कर्मादिगतदोषस्पर्शमाशङ्क्य तन्नेत्यभिप्रायेण दृष्टान्तमाह यथेति। दारुषु काष्ठेषु अनलोऽग्निः यथा तद्गुणात्मकः दारुगतदैर्घ्यवक्रत्वादिमान् प्रतीयते तद्वत्। वस्तुत एकरूपोऽप्यनलोऽधिष्ठानवैचित्र्याद्विचित्र इव प्रतीयते तथा भगवानपि सामानाधिकरण्येन व्यपदिश्यते इत्यर्थः॥ ३४॥

एवमप्रवृत्तान् भगवद्भजने प्रवर्त्य स्वतः प्रवृत्तानां प्रवृत्तिं तदभिनन्दनेन प्रथयति। अहो इति। ये क्षोणितले भूतले मामकाः मद्विषयवासिनो जनाः दृढव्रताः दृढसंकल्पाः सन्तः स्वधर्मयोगेन स्ववर्णाश्रमधर्मयोगे यज्ञभुजामिन्द्रादीनाम् अधीश्वरमन्तरात्मानं गुरुं हितोपदेष्टारं हरिं निरन्तरं नित्यं यजन्ति भजन्ति ते अमी जनाः मम अनुग्रहं वितरन्ति कुर्वन्ति। अहो इति हर्षे॥३५॥ इदानीं भगवद्भक्तिदार्ढ्याय ब्राह्मणभक्तिं विधत्ते मा जात्वित्यष्टभिः। तत्र तावद्ब्राह्मणकुलस्य राजकुलतो निग्रहाविषयत्वं प्रार्थयते। महत्यश्च ता ऋद्धयस्ताभिः राजकुलात् राजकुलं प्राप्य स्थितं यत् तेजः तत् समृद्धिभिर्विनापि स्वयमेव तितिक्षया क्षमया द्वन्द्वसहनेनेत्यर्थः। तपसा तपः संपदा कृच्छ्रचान्द्रायणादिनेत्यर्थः। आतिथ्यया अतिथ्याराधनया क्वचिदत्र विद्यया चेत्यपि पाठो दृश्यते। तत्पक्षे विद्योपासना चकाराच्छमदमादिसंग्रहः। एभिः देदीप्यमाने द्विजानां कुले अजितो भगवान् देवता येषां वैष्णवानां तेषां कुले च जातु कदाचिदपि मा प्रभवेत्। प्रभावं न करोत्वित्यर्थः॥३६॥ ब्राह्मणान् स्तुवन्नाह। ब्रह्मण्येति ब्रह्मसु ब्राह्मणेषु साधवो ब्रह्मण्या मन्वादयस्तेषामपि देवः ब्रह्माणि ब्राह्मणा देवा अस्येति ब्रह्मण्यः स चासौ देवश्चेति वा। पुरातनः पुराणः पुरुषः सर्वदा पुरुषाकृतिः हरिः नित्यं येषां ब्राह्मणानां चरणौ तयोरभिवन्दनं तस्मात् हेतोः अनपायिनीमनपगामिनीं लक्ष्मीम् अवाप। जगत्पवित्रं यशश्च अवाप। महत्तमानामग्रणीरग्रण्यश्च जात इति शेषः॥ ३७॥ यत्सेवयेति। यत्सेवया येषां ब्राह्मणानां परिचर्यया अशेषगुहाशयः सर्वान्तरात्मा स्वराट् स्वतन्त्रः अकर्मवश्य इति यावत्। एवंभूतः सन्नपि विप्रप्रियो विप्राधीनः ईश्वरः भगवान् कामं तुष्यति। अतः तद्धर्मपरैर्भागवतधर्मनिष्ठैः विनीतैर्विनयवद्भिर्भवद्भिः तदेवोक्तविधमाहात्म्यवदेव ब्रह्मकुलं ब्राह्मणकुलं सर्वात्मना सर्वथा निषेव्यताम्। एवं द्वयोरेकसंबन्धः। अत्र ब्राह्मणोत्कर्षताभानं भगवदपकर्षताभानं च भासते ततः सत्प्रसक्तयेऽन्यथा व्याख्या युक्तातः सापि प्रदृश्यते ब्रह्मण्येति 'अर्कमर्कटमण्डूकविष्णुवासववायवः। तुरङ्गसिंहशीतांशुयमाश्च हरयो दश' इति निगदाद्धरिशब्दोऽत्र शक्रपर्यायः हरिरिन्द्रः यच्चरणाभिवन्दनात् यस्य श्रीनारायणस्याङ्घ्रिद्वयसंशीलनात् अनपायिनीं लक्ष्मीम् अवाप। जगत्पवित्रं यशश्च अवाप। महान्त इन्द्रादयः अतिशयेन महान्तो महत्तमा ब्रह्मादयस्तेषामप्यग्रणीरग्रगण्यः पुरातनः पुरुषो भगवान् सोऽपि नित्यं ब्रह्मण्यदेवः ब्राह्मणान् देववन्मानयतीत्यर्थः। इति प्रथमश्लोकार्थः। यत्सेवयेति तु यथा व्याख्यातस्तथैव तत्रैतावान्विशेषः 'प्रसादे सर्वदुःखानां हानिरस्योपजायते। प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते' इत्युक्तरीत्या मनःप्रसत्तिपूर्वो भगवत्प्रसादस्तस्य विप्रसेवा द्वारं ततो विप्रसेवाद्वारा विष्णुं प्रसादयतो मोक्षोऽपि करस्थ एव ततो ब्रह्मकुलं सेव्यमिति भाव इति॥ ३८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु ब्रह्मकुले एव नित्यं सेव्यमाने सर्वदेवतामुखभूतेऽग्नौ यज्ञाद्यनुष्ठानं न स्यात् न च तेन विना चित्तशुद्धिः न च तया विना मोक्षः स्यादित्याशङ्क्याह । पुमानिति द्वाभ्याम् । यस्य ब्रह्मकुलस्य नित्यं प्रतिदिनं संबन्धेन सातत्येन या निषेवा तया पुमान् स्वयं प्रयत्नमन्तरेणैवेत्यर्थः । अनतिवेलं शीघ्रं स्वतः प्रसीदतः आत्मनो मनसः अत्यन्तशमं शान्ति लभेत । अत्रास्मिँल्लोके ततः ब्राह्मणकुलादन्यत् परं श्रेष्ठं हविर्भुजां देवानां मुखम् अस्ति किं ब्राह्मण एव देवतानां श्रेष्ठं मुखमित्यर्थः । ब्राह्मणसेवयैव तन्मुखानां हविर्भुजामपि सेवा कृता स्यात् तया तदन्तरात्मतयावस्थितः परमात्मा तुष्यतीति ब्राह्मणा एवान्नादिभिराराध्या इति भावः ॥ ३९ ॥ ननु 'अग्निमुखा वै देवाः' इति श्रुतेर्देवानामग्निमुखत्वश्रवणादग्नौ हुतमेव हविर्भुगन्तरात्मभूतपरमात्मप्रीतये भविष्यतीति चेत् 'ब्राह्मणोऽस्य मुखमासीत्' इति श्रुतेर्ब्राह्मणानां साक्षात्तन्मुखत्वश्रवणादचेतनमुखतश्चेतनमुखस्योत्कृष्टत्वाद्ब्राह्मणमुखहुतमीशः सम्यगश्नातीत्याह । अश्नातीति । तत्त्वकोविदैः ब्राह्मणानां भगवन्मुखत्वं जानद्भिः कर्तृभिः इज्यनामभिराराध्येन्द्रादिनामभिः करणैः यन्मुखे यस्य ब्राह्मणस्य मुखे श्रद्धया हुतं हविः अनन्तः भगवान् यथा अश्नाति खलु तथा परमहंसा भगवदुपासकाः तेषां भावः कर्म वा पारमहंस्यं ज्ञाननिष्ठा तद्विद्यते येषां ते पारमहंस्याः यद्वा । परमहंसा एव पारमहंस्याः तान् परिपरित्यज्य न गाते न गच्छतीति पारमहंस्यपर्यगुः नञ्पूर्वात् 'गाङ्गतौ' इत्यस्मान्मृगय्वादेराकृतिगणत्वात्कुः प्रत्ययः । परमहंसानत्यादरेणावेक्षमाणो भगवान् इत्यर्थः । चेतनया बहिष्कृते रहिते हुताशनेऽग्नौ हुतं न अश्नाति वै । ब्राह्मणेष्वपि भागवतपरमहंसा भगवतोऽतिप्रियास्तन्मुखन्यस्तं साक्षात्स्वमुखे न्यस्तमिव भुङ्क्ते इति भावः ॥४०॥ ब्राह्मणानां न केवलं चेतनत्वेन हुताशनाद्विशेषः किं तु वेदतदर्थज्ञानानुष्ठानादिनापीत्याह । यदिति । यद्य ब्राह्मणाः विरजं रजोगुणनिवृत्तितात्पर्यकं सनातनमनादि यत्र वेदे इदं विश्वं आदर्शे इव अवभासते प्रकाशते । एवंविधं यत् ब्रह्म वेदाख्यं तत श्रद्धा च तपश्च मङ्गलं च मौनं च संयमश्च तैः तत्र श्रद्धा ग्रन्थाध्ययनाध्यापनपारायणादिविषयत्वरा तपः कृच्छ्रादिरूपं मङ्गलं विशुद्धाचारः मौनं वाङ्नियमः संयमः शमदमादिः । समाधिना ध्यानेन च अर्थद्रष्टये तत्त्वसाक्षात्काराय ह स्फुटं नित्यं बिभ्रति उक्तविधवेदार्थं विचारयति ॥ ४१ ॥

तेषामिति । हे आर्याः अहं तेषां ब्राह्मणानां पादसरोजरेणुम् आ आयुर्यावज्जीवम् अधिकिरीटं मुकुटोपरीत्यर्थः । वहेय प्रार्थनायां लिङ् । किं तद्वहनसाध्यं तत्राह, यं ब्राह्मणपादसरोजरेणुं नित्यदा, बिभ्रतो वहतः, पुरुषस्य, पापम् आशु नश्यति । अमुं तच्चरणरेणुं वहन्तं पुरुषं सर्वगुणाः कल्याणगुणगणाः भजन्ति आश्रयन्ते ॥ ४२ ॥ न केवलं गुणा एव भजन्ति किं तु तत्फलभूताः संपदोऽपीत्याह । गुणालयमिति । गुणालयं शुभगुणाश्रयं शीलमेव धनं यस्य तं कृतज्ञं कृतोपकारज्ञं वृद्धाश्रयं विहितज्ञानादिवृद्धाश्रयम् एवंविधपुरुषं संपदः अनु मुहुर्मुहुरित्यर्थः । संवृणुते सम्यक् भजन्ते । तद्ब्रह्मकुलं गवां कुलं च, सानुचरः स्वभक्तसहितः जनार्दनो भगवांश्च मह्यं प्रसीदताम् ॥ ४३ ॥ इतीति । इति, ब्रुवाणमेवं वदन्तं नृपतिं पृथुं पितरश्च देवाश्च द्विजातयश्च ते, साधवो गुणज्ञा जनाश्च हृष्टमनसः सन्तः, साधुवादेन साधु साध्विति वागुच्चारणेन तुष्टुवुः ॥ ४४ ॥ स्तुतिमेवाह । पुत्रेणेति । पुत्रेण लोकान् पुण्यलोकान् पिता जयते साधयति, इत्येवंविधा श्रुतिर्जनश्रुतिः सत्यवती अबाधिता भवति । यद्यस्मात् ब्रह्मदण्डहतः विप्रशापमृतः, अतः, पापः पापरूपः, वेनः अपि तमो नरकम् अतरत् । ततः श्रुतिः सत्यवतीति संबन्धः ॥ ४५ ॥ न केवलमयमेव पुत्रेण नरकमतरत्किं तु हिरण्यकशिपुरपीत्याह । हिरण्यकशिपुरिति । तथा च हिरण्यकशिपुः, अपि भगवन्निन्दया, तमो नरकं विविक्षुः प्रविशन्सन् सूनोः, प्रह्लादस्य, अनुभावतः प्रभावात् अत्यगात् नरकमतिक्रम्य भगवन्तमगादित्यर्थः । कथेक्षया भाव्यपीदं वक्तुर्दृष्ट्या भूतवन्निर्दिष्टम् ॥ ४६ ॥ वीर इति । हे वीरवर्य, हे पृथ्व्याः पितः, त्वं शाश्वतीः, समाः संवत्सरान् संजीव, यस्य तव, सर्वलोकैकभर्तरि सर्वेषां लोकानामद्वितीये पोषणकारके, अच्युते परमेश्वरे, ईदृशी भक्तिः अस्तीतिशेषः ॥ ४७ ॥ अहो इति । हे पवित्रकीर्ते, अद्य, वयं नाथेन, त्वया, एव मुकुन्दनाथाः, स्म । त्वन्नाथत्वमेवास्माकं मुकुन्दनाथत्वे पर्यवसितमित्यर्थः । यो भवान्, ब्रह्मण्यदेवस्य, उत्तमश्लोकतमस्य, विष्णोः अहो इत्यत्याश्चर्यरूपां कथां व्यनक्ति विशदयति ॥ ४८ ॥

नेति । हे नाथ । तव, आजीव्यानुशासनं त्वत्सेवकानामस्माकमनुशासनं यत् तत् इदम् अत्यतिशयितम् अद्भुतं न, यतः करुणात्मनां कृपास्वभावानां महतां प्रजानुरागः स्वप्रजासु प्रीतिः, प्रकृतिः स्वभावः ॥ ४९ ॥ अद्येति । हे प्रभो, दैवसंज्ञितैः दैवनामभाग्भिः, कर्मभिः भ्रमतां संसरताम् अत एव नष्टदृष्टीनां नोऽस्माकम् अद्य, त्वया, तमसो नरकस्य, पारः उपासादितः संप्रापितः ॥ ५० ॥ ईश्वरदृष्ट्या विप्रादयोऽपि प्रणमन्ति । नम इति । विवृद्धसत्त्वाय रजस्तमोभ्यामनभिभूतसत्त्वप्रचुराय, अत एव महीयसे पुरुषाय परमपुरुषविभूतिभूताय, तुभ्यं नमः । यः, ब्रह्म ब्राह्मणजातिम् आविश्य अधिष्ठाय, स्वतेजसा, क्षत्रं बिभर्ति । क्षत्रम् आविश्य ब्रह्म, बिभर्ति । उभयमाविश्य, इदं विश्वं बिभर्ति तस्मै नम इति संबन्धः ॥ ५१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

——:❀:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वाविंशोऽध्यायः

मैत्रेय उवाच

जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम् । तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥ १ ॥

सनत्कुमारः पृथवे द्वाविंशे विष्णुशासनात् । उपादिशत्परं ज्ञानमित्येवं स्फुटमीरितम् ॥ १ ॥

यदुक्तं भगवता 'ह्रस्वेन कालेन गृहोपयातान् द्रष्टासि सिद्धान्' इति कुमारागमनं तैश्च तत्त्वोपदेश इति तद्विस्तरेण वर्णयितुं कुमारागमनमाह मुनिः । जनेष्विति । पृथुलविक्रमं पृथुलपराक्रमं पृथुं प्रति एवमुक्तप्रकारेण, जनेषु प्रगृणत्सु सत्सु सम्यक्कथयत्सु सत्स्वित्यर्थः । सूर्यस्येव वर्चस्तेजो येषां ते सूर्यवर्चसः, चत्वारः, मुनयः, तत्र उपजग्मुः ॥ १ ॥ तानिति । लोकान् अपापान् कुर्वन्त्या अर्चिषा, लक्षितान् इमे सनकादय इति लक्षितान्, व्योम्न आकाशात्, अवतरतोऽवरोहतः, तांस्तु सानुगः सभृत्यः, राजा सिद्धेश्वरान् अचष्ट अज्ञासीत् ॥ २ ॥ तदिति । तेषां मुनीनां दर्शनं तेनोद्गता ऊर्ध्वं प्रयाता ये प्राणा असवस्तान् प्रत्यादित्सुः पुनः संप्राप्तुमिच्छुरिव, वैन्यः पृथुः ससदस्यानुगः सदस्यैरनुगैश्च सहितः सन् इन्द्रियेशः क्षेत्रज्ञः, गुणान् शब्दादीन् इव शब्दादीन्प्रति यथोद्गच्छति तथा उत्थितः । औत्सुक्यमात्रेऽयं दृष्टान्तः 'ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति । प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते' इति श्रुतेर्नायमर्थ उत्प्रेक्षात्मकः । प्राणिप्राणा आगच्छतां महतां तेजसाक्षिप्ताः प्रत्युद्गच्छन्ति अतः स्वयमननुगच्छतः प्राणहानिः स्यादिति भयादिव महतः प्रत्यभ्युत्थानमितिभावः ॥ ३ ॥

गौरवादिति । गौरवात्तेषां गुरुत्वात्, यन्त्रितः, तेषां गुरुत्वेन वशीकृत इत्यर्थः । सभ्यः सभावस्थितः प्रश्रयेण विनयेनानता कंधरा ग्रीवा यस्य सः, नृपः, अध्यर्हणमर्घ्यं च आसनं च ते गृहीते यैस्तान्मुनीन्, विधिवद्यथाविधि पूजयांश्चक्रे ॥ ४ ॥ तदिति । तत्पादानां शौचानि यानि सलिलानि तैः, मार्जितं क्षालितम् अलकबंधनं केशबन्धनं येन सः नृपः, तत्र सदसि, शीलवतां, वृत्तं, मानयन्, इव स्वयम् आचरत् ॥ ५ ॥ हाटकेति । हाटकासने सुवर्णासने, आसीनान्, अत एव स्वधिष्ण्येषु वेदिकासु, आसीनान्, पावकान्, इव स्थितान्, भवाग्रजान्, रुद्रात्पूर्वजातान्, भवतोऽग्रजत्वेन मान्यान्सनकादीनित्यर्थः । श्रद्धा च संयमश्च ताभ्यां तद्वाक्यश्रवणत्वरातदुपयुक्तकरणनियमनाभ्यां संयुक्तः नृपः प्रीतः सन् प्राह ॥ ६ ॥ प्रीतः प्राहेति यदुक्तं तदेवाह । अहो इति दशभिः । मङ्गलमयनं प्रापकं येषां तत्संबोधने हे मङ्गलायनाः, अहो आश्चर्यं, मे मया, किं मङ्गलं पुण्यम् आचरितं कृतं स्यात् । यतः, यस्य मे, योगिभिः, चापि दुर्दर्शानां दुःखेनापि द्रष्टुमशक्यानां वो युष्माकं दर्शनम् आसीत् । हि । सुकृतं विना मद्विधानां युष्मद्दर्शनं न संभाव्यते इत्यर्थः ॥ ७ ॥ ननु ते किमस्मद्दर्शनसाध्यमित्यत्राह । किमिति । यस्य पुंसः, विप्रा भवादृशा ब्राह्मणाः शिवो रुद्रः, यद्वा शिवो मङ्गलमूर्त्तिः, सानुगः स्वपार्षदादिभक्तजनसहितः, विष्णुश्च; प्रसीदन्ति, तस्य, इहास्मिन् लोके परत्र परस्मिन् लोके च, दुर्लभतरमतिशयेन दुष्प्रापं किम् अस्ति, सर्वं सुलभमेवास्तीत्यर्थः ॥ ८ ॥ दुर्दर्शत्वमेवाह । नैवेति । लोकान् पर्यटतः अपि, यान् युष्मान् लोकः नैव लक्षयते न पश्यत्येव यथा अस्य विश्वस्य, हेतवः हेतुभूताः ये ब्रह्मादयः, ते सर्वेऽपि सर्वदृशं सर्वज्ञम् आत्मानं न लक्षयन्ति । तथेति ॥ ९ ॥ तद्दर्शनेन स्वस्य धन्यतां साधुतां चाविष्करोति । अधनेति । यद्गृहाः, येषां गृहमेधिसाधूनां भवनानीत्यर्थः । अर्हाणां त्यागिसाधूनां वर्याः स्वीकार्याः अम्बु जलं तृणानि घासादीनि भूमिर्गृहभूः ईश्वरो गृहस्वामी अवराः तत्परिचारकादयः, येषां ते तथाभूताः यदा स्युः तदा अधनाः निर्धनाः अपि ते गृहमेधिनः, धन्याः । साधवः गृहमेधिसाधुसंज्ञाश्च स्युः । अर्हवर्याम्ब्वादित्वमेव गृहमेधिनां साधुत्वलक्षणं साधवो द्विविधाः गृहमेधिनस्त्यागिनश्च । तत्र येषां गृहमेधिनां जलादिगृहोपकरणानि स्वसद्धर्मनिष्ठत्यागिसाधूपयोगभाञ्जि स्युस्तदा तु ते गृहमेधिसाधुसंज्ञाभाजो निर्धनाः सन्तोऽपि धन्या एवेति भावः ॥ १० ॥ एवमन्वयमुखेन गृहमेधिधन्यतामाविष्कृत्य व्यतिरेकमुखेन तस्य तदभावमाह । व्यालेति । -रिक्ताः पूर्णाः अखिलाः संपदो येषु ते तादृशा अपि, यद्गृहा येषां गृहमेधिनां गृहाः यदि तीर्थं पादयोर्यस्य स तीर्थपाद्भगवांस्तत्संबन्धिनस्तीर्थपादीयास्त्यागिसंज्ञिका भागवतास्तेषां यत्पादशौचं पादतीर्थसंज्ञमङ्घ्रिक्षालनजलं तेन विवर्जिताः तर्हि एते तद्गृहाः, व्यालालयद्रुमाः सविषकृष्णसर्पैविहितावासचन्दनद्रुमसमानाः ज्ञेयाः । सर्वसंपत्समृद्धेष्वपि यद्गृहेषु भोजनकालविधेयत्यागिसंबन्धिपञ्चाद्रेतानिमित्तकपादक्षालनोदकसंबन्धो नैव भवति सर्वथाऽसाधूनां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेषां गृहाः ससर्पचन्दनद्रुमसमाना एवेति भावः ॥ ११ ॥ एवमन्वयव्यतिरेकाभ्यां तदागमनेन स्वस्य धन्यतामभिधाय तेषां स्वागतप्रश्नपूर्वकं स्वाभाविकीं धन्यतामाह । स्वागतमिति । हे द्विजश्रेष्ठाः । वो युष्माभिः स्वागतं युष्माकं कुशलं यथा स्यात्तथागमनं जातमित्यर्थः । यद्यस्मात् बालाः एव भवन्तः, मुमुक्षवः अत एव धीराः जितेन्द्रियाः सन्तः, श्रद्धया बृहन्ति, व्रतानि चरन्ति वै । यद्वा । येषां वो व्रतानि, मुमुक्षवो बाला धीराः सन्तश्चरन्ति ॥ १२ ॥

काका तत्स्थकुशलभावं व्यञ्जयितुं स्वस्य तावत्कुशलभावं व्यनक्ति । कच्चिदिति । हे नाथाः, इन्द्रियार्थाः शब्दादयस्तानेवार्थान् पुरुषार्थरूपान् विदन्तीति तेषाम् एतस्मिन् आसमन्तादुप्यन्ते बीजानि यस्मिन् स आवापः क्षेत्रं व्यसनानामावापः क्षेत्रभूतः संसारस्तस्मिन् स्वकर्मभिः, पतितानां नोऽस्माकं कुशलं कच्चित् अस्माकं कुशलमस्ति किमित्यर्थः ॥ १३ ॥ ननु अभ्यागतानां कुशलं पृच्छ्यते लोके न स्वात्मनस्तां लोकरीतिमतिक्रम्यास्मान्प्रति त्वत्कुशलं किं पृच्छसे तत्राह । भवत्स्विति । आत्मारामेषु ब्रह्मात्मकस्वात्मानुभवैकपरेषु भवत्सु कुशलप्रश्नः नेष्यते । आत्मारामाणामपि कदाचिदकुशलसंभावनया कुशलप्रश्न इष्यतां तत्राह । यत्र येष्वात्मारामेषु, कुशलाकुशलाः कुशलरूपा अकुशलरूपाश्च मतिवृत्तयः, न सन्ति, कुशलाकुशलविषयचिन्तनेन तथाविधवृत्तिसङ्गस्ततः कामादिजननद्वारा ताः सुखदुःखादिहेतवस्तासां तेष्वभावात्कुतो भवत्सु तत्संभावना । तथोक्तं भगवद्गीतायाम् । 'ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते । सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते । क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति' इति ॥ १४ ॥ तदिति । तत्तस्मात् अहं कृतविश्रम्भो विहितविश्वासः सन् तपस्विनां तापत्रयातुराणामस्माकं सुहृदः वो युष्मान् एतस्मिन् भवे संसारे, वर्त्तमानस्य ममेति शेषः । क्षेमः सुखं मोक्ष इति यावत् । अञ्जसा सुखेन, केन भवेत् इति संपृच्छे ॥ १५ ॥

न खल्वन्ययोगितुल्या यूयं किं तु स्वभक्तान्मादृशाननुग्रहीतुं भगवानेव भवादृशरूपेण चरतीत्याह । व्यक्तमिति । आत्मवतां प्रशस्तचित्तानां ज्ञानिनाम् आत्मा निरतिशयप्रीतिविषयः प्रीतिमांश्च आत्मनो जीवान् भावयति स्वविषयज्ञानप्रदानादिना सत्तावतः करोतीत्यात्मभावनः स्वपरयाथात्म्यज्ञानरहिता हि जीवाः स्थावरपर्यन्तजन्मभिरसत्पायास्तानात्मज्ञानोद्भावनतया सत्तावतः कुर्वन्नित्यर्थः । अजः भगवान् सिद्धरूपी भवादृशसिद्धस्वरूपः सन् स्वानामात्मभक्तानाम् अनुग्रहाय स्वाननुग्रहीतुमित्यर्थः । व्यक्तं निश्चितमेव । इमां पृथिवीं चरति ॥ १६ ॥ पृथोरिति । पृथोः तदेवंविधमित्यर्थः । सारं न्याय्यं सुष्ठु गम्भीरार्थमितमल्पाक्षरं मधु श्रोत्रप्रियं सूक्तं शोभनवचनम् आकर्ण्य श्रुत्वा प्रीत्या स्मयमानः इव कुमारः ह स्फुटमेव प्रत्युवाच ॥ १७ ॥ तत्र सत्सङ्गसम्यग्विधानाध्वविहितोत्तरोत्तरप्रतिदिनविधेयसाधनातिशयानुगृहीतामरणानुवृत्तप्रीत्यतिशयप्रत्यक्षतापन्नपरमभक्त्यपरपर्यायनिर्गुणभक्तियोग एव क्षेमहेतुरिति विवक्षुस्तावत्सनत्कुमारः प्रश्नमभिनन्दति । साध्विति । हे महाराज सर्वेषां भूतानां यद्धितं तत्रात्मा यस्य तेन सर्वभूतहितसंपादकबुद्धियुक्तेन विदुषा तत्त्वतो विदितपुरुषार्थेन भवता सर्वभूतहितार्थमेवेति शेषः । पृच्छ्यते यत्तत् साधु पृष्टम् । परोपकारार्थं तवायं प्रश्नो न तु स्वयं वेत्तुं भवतः स्वत एव ज्ञानित्वादिति भावः । नात्राश्चर्यं यतः साधूनां गतिः प्रवृत्तिः अपि ईदृशी चैव । सर्वभूतहिताचरणमेव साधूनां स्वभाव इति भावः ॥ १८ ॥ ईदृशभूतहिताचरणपूर्वा सत्संगतिरेव भोगापवर्गसंसाधनमूलकारणमस्तीत्याह । संगम इति । साधूनां संगमः खलु उभयेषां बुभुक्षूणां चेत्यर्थः । संमतः स्वसमीहितभोगमोक्षादेः प्रथमं साधनं साधूनां समागम एव संमतोऽस्तीति भावः । सत्संगमस्य भोगमोक्षसाधनत्वमुपपादयति । येषां साधूनां संभाषणसहितः संप्रश्नः यत्संभाषणसंप्रश्नः शाकपार्थिवादित्वादुत्तरपदलोपिसमासः । सर्वेषां शं स्वर्गापवर्गसुखं वितनोति । सति संप्रश्ने साधुभिर्भोगमोक्षसाधने उपदिश्येते इति हेतोः साधून्प्रति यः संप्रश्नः स प्रश्नकर्तृसमपेक्षितं शं वितनोतीति भावः ॥ १९ ॥

एवं सत्सङ्गस्य भोगमोक्षकारणत्वमुक्तं तत्र सत्सङ्गस्य भोगसाधनरीतिस्तु प्रथमं सत्सङ्गः ततः सम्भाषणं ततः प्रश्नः ततः सतां तत्साधनाद्युपदेशस्ततस्तदुक्तरीत्या यागाद्यनुष्ठानं ततो भोग इति । एवं सत्सङ्गस्य भोगसाधनत्वे सत्यपि मुमुक्षाधिकृतस्यानया प्रणाल्या भोगसंपादनं न योग्यं यतः कर्मणां फलस्याल्पास्थिरत्वनिर्णयात् । अतः सद्भिः सान्तास्थिरफलभोगसाधनोपदेशः न कार्यः । पुरुषस्य तत्र स्वभावरक्तत्वादिति तमनादृत्य सत्संगतेर्मोक्षसाधनत्वं तत्प्रणाल्योपपादयिषुस्तावन्मुमुक्षोरादौ सत्संगतिस्ततः संभाषणं ततः प्रश्नः ततो भगवद्गुणानुश्रवणं ततस्तत्रानुराग इत्येतत्पञ्चकं तावत्त्वयि सिद्धमेवास्तीत्याह । अस्त्येवेति । हे राजन् भवतस्तत्र मधुद्विषः पादारविन्दस्य पदारबिन्दयोः ये गुणास्तेषामनुवादनमनुश्रवणं तस्मिन् सदा रतिः अस्त्येव । अनेन तत्पूर्वभावि संगत्यादिचतुष्टयमप्यस्तीत्यर्थादुक्तं भवति । तेन विना रत्यसंभवात् । नैष्ठिकी अव्यभिचरिता या रतिः भगवद्गुणानुवादनरूपा भगवति प्रीतिरित्यर्थः । अन्तरात्मनो मनसः मलं मलरूपं कषायं धातुरागवदनिवर्त्यमित्यर्थः । कामं विधुनोति क्षपयति ॥ २० ॥ रत्यनन्तरभाविनोऽनादिजीवज्ञानावरककोशदहनस्य साधनजातं विवक्षुः साक्षान्मोक्षसाधनभूतोक्तविधा भक्तिरेवेत्याह । शास्त्रेष्विति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नृणां मुमुक्षुजनानां क्षेमस्य मोक्षस्य साक्षान्निरपेक्षः हेतुः साधनं सम्यक् समीचीनः विमृशो येषु तेषु शास्त्रेषु इयानेतावानेव सुनिश्चितः कोऽसौ तत्राह। निर्गुणे सत्त्वादिगुणत्रयरहिते ब्रह्मणि स्वरूपगुणादिभिरत्यन्तमहति आत्मनि परमात्मनि दृढा निश्चला चाञ्चल्यरहिता इति यावत्। तच्च मध्ये मध्ये विषयान्तरानुचिन्तनरूपं ज्ञेयम्। या रतिः भगवति प्रीत्यतिशयरूपा परमभक्तिः यश्च आत्मव्यतिरिक्ते असङ्गः विरागश्चेति इयानेवेत्यर्थः। अत्र विषयान्तरानुचिन्तनं यत्तच्च विषयान्तरासक्तिजननद्वारा भक्तिवियोजकमिति निषिद्धम् ॥ २१ ॥ एवं विजातीयार्थसंस्फूर्तिव्यवधानवर्जितप्रीत्यतिशयरूपा परमभक्तिः साक्षात्क्षेमहेतुरित्युक्तं सांप्रतमेवंभूता परमभक्तिः कथं निष्पद्यते इति जिज्ञासायां तत्साधनानि समुपदिषति। सेति चतुर्भिः। निर्गुणे सत्त्वादिगुणत्रयरहिते ब्रह्मणि या रतिः सदसति संनिहितताऽसंनिहिततावति अनात्मनि आत्मव्यतिरिक्ते शब्दादिविषये असङ्गश्च श्रद्धादिभिः साधनैः स्यादिति चतुर्थेनान्वयः। सा रतिः श्रद्धया विधेयार्थविषयया त्वरया भगवद्धर्मचर्यया भगवत्प्रसन्नताहेतुधर्मानुष्ठानेन जिज्ञासया तत्त्वरूपस्वहितकरपुरुषार्थविवित्सया आध्यात्मिकयोगनिष्ठया आचार्योपदिष्टभगवदुपासनात्मकयोगे या मननात्मकनिष्ठा तया। नित्यं योगेश्वरोपासनया भागवतानां छन्दानुवृत्तिपूर्विकया सेवया च ततः पुण्यया पवित्रतापादिकया पुण्यश्रवसो भगवतः कथया च भगवतः पवित्रतापादककथाश्रवणेनेत्यर्थः ॥ २२ ॥ अर्थेति। अर्थारामा अर्थपरायणाश्च इन्द्रियारामाः कामपरायणाश्च तैः सह या गोष्ठी तस्यां या अतृष्णा अनासक्तिस्तया तेषामर्थेन्द्रियारामाणां संमता मान्या ये अर्थाः कामाश्च तेषामपरिग्रहोऽस्वीकरणं तेन विविक्ते विजने या रुचिः तया हरेर्भगवतः गुणपीयूषं गुणानुश्रवणस्मरणरूपममृतं तस्य पानं तस्मात् विना आत्मनि परितोषः तेन भगवद्गुणानुवादे प्रवर्त्तमाने तु विविक्तरुचिरात्मनि संतोषश्च न कार्य इति भावः ॥ २३ ॥

अहिंसयेति। अहिंसया परेषामपीडनेन सर्वभूतसुहृत्त्वेनेति यावत्। पारमहंस्यचर्यया उपशमादिप्रधानया वृत्त्या, स्मृत्या भोजनाद्ययुक्तदशास्वपि शुभाश्रयसंशीलनरूपया स्मृत्या, भोजनोत्तरदशासु मुकुन्दस्याचरितानि चेष्टितानि तान्येवाग्र्यं श्रेष्ठं सीधु अमृतं तेन भगवच्चरित्रश्रवणश्रावणस्मरणरूपामृतपानसुखेनेत्यर्थः। यमैर्बाह्येन्द्रियनिग्रहैः, दमैरित्यर्थः। अकामैरन्तरिन्द्रियनिग्रहैः शमैरित्यर्थः। नियमैः शौचाचारादिभिश्च, अनिन्दया इतरसाध्यसाधनादीनां निन्दाया अविधानेन, अपि तन्निन्दायां चित्तस्य तत्प्रावण्यप्रयुक्तचाञ्चल्यं स्यादिति भावः। निरीहया योगक्षेमार्थकचिन्ताराहित्येन, द्वन्द्वानां शीतोष्णादीनां तितिक्षा सहिष्णुता तया च ॥ २४ ॥ हरेरिति। हरेर्भगवतः, तत्परा भागवताः तेषां कर्णपूराः कर्णालंकारभूता ये गुणास्तेषामभिधानं तेन, मुहुः विजृम्भमाणया, वर्द्धमानया, भक्त्या, निर्गुणे, ब्रह्मणि रतिः सदसति, अनात्मनि च असङ्गश्च अञ्जसा स्यात् हि। व्याख्यातमपि संबन्धद्योतनाय पुनरभिहितम्। अत्रैतानि साधनान्यननुक्रमतोऽभिहितानि ॥ २५ ॥ एवं भगवद्विषयरतेरुत्पत्तये तत्साधनान्यभिधाय तत्संसिद्धौ यज्जायते तदाह। यदेति। यदा, ब्रह्मणि परमात्मनि, नैष्ठिकी दृढा, रतिः, जायते तदा आचार्यवानाचार्यानुग्रहविषयः, पुमान् जीवात्मा, ज्ञानविरागरंहसा विरागसहकृतरत्यात्मकज्ञानवेगेन, अत्युद्रिक्तया रत्येत्यर्थः। हृदयं हृत्स्थानं प्राप्नुवन् चित्तैकाग्रं गच्छन्सन्निति यावत। 'हृद्ययमात्मा' इति श्रुतौ हृदयस्य जीवस्थानत्वमुक्तमस्ति। पञ्चात्मकं पञ्चभूतात्मकं जीवकोशं शरीरमित्यर्थः। उत्थितः ज्वलितः, अग्निः, योनिमरणीम् इव अवीर्यं प्रभिन्नाज्ञानमूलं यथा तथा दहति। अबीजमिति पाठेऽप्ययमेवार्थः। अज्ञानकृतपुण्यपापमूलो हि देहसंबन्धस्तन्निमित्तं कर्म निःशेषं दहतीत्यर्थः। एवं रतिः क्षेमसाधनमिति भावः ॥ २६ ॥ एवं देहसंबन्धनिमित्तकं पुण्यपापरूपं कर्म निःशेषं दहन्त्या रत्या युक्तस्य न पुनः पञ्चात्मकजीवकोशसंबन्ध इत्याह। दग्धेति। दग्धाशयः दग्धशरीरोपाधिः मुक्ताः समस्ताः सर्वेऽपि तद्गुणा देहगुणा रागादयो येन सः, एवंभूतः सन् पुरुषः, आत्मनः जीवस्य, पुरस्तात्संसृतिदशायां परात्मनोर्जीवपरयोः यत व्यवधानं व्यवधायकं संबन्धज्ञानच्यावकं भवति। तथाभूतं बहिर्बहिर्भूतं शरीरम् अन्तरन्तर्भूतं रागादिदोषजातं च, तद्विनाशे देहभावविनाशे न एव विचष्टे नैव पश्यति। न पुनर्देहादिसंबन्धमभियातीत्यर्थः। आत्मनो ज्ञाननिवृत्तिकरं शरीरं तज्जन्यरागद्वेषादिकं च नालोचयतीति भावः। स्वप्ने यथेति दृष्टान्तः। स्वप्ने, यथा राजादिदेहं तज्जन्यरागादिकं पश्यति, स्वप्नविनाशे न पश्यति तद्वदित्यर्थः। देहादेरस्थिरत्वस्येश्वरस्येष्टत्वस्य च ज्ञापनाय स्वप्नदृष्टान्तः ॥ २७ ॥

कुतो न पश्यति तत्राह। आत्मानमिति। आत्मानं देहम् इन्द्रियार्थं शब्दादिकं च उभयोर्देहेन्द्रियार्थयोः यत् परम् अपि देहेन्द्रियार्थाभ्यामन्यत् भोगोपकरणभोगस्थानादिकं चेत्यर्थः। तत्सर्वमिति शेषः। आशये वासनाख्ये उपाधौ सति, पुमान् पश्यति अन्यदान्यथा, न पश्यति वै। वासना नाम करणकलेवरभोग्यभोगस्थानभोगोपकरणादिषु प्रावण्यं तद्विनाशान्न पश्यतीति भावः ॥ २८ ॥ संसृतावुपाधिसद्भावाज्जीवपरसंबन्धज्ञानाभावमाह। निमित्त इति। पुरुषः, सर्वत्र सर्वस्मिन् डलयोरभेदाज्जलं जडं शरीरं तदादि यस्य तस्मिन् निमित्ते सति जडप्रकृतिशरीराद्युपाधौ विद्यमाने सतीत्यर्थः। अपिरत्रावधारणार्थे। निपातानामनेकार्थत्वात्। आत्मनः स्वस्य, परस्य परमात्मनश्च, अपि भिदां संबन्धविरहं पश्यति, अन्यदा अन्यथा, उपाध्यभावरूपायां मुक्तावित्यर्थः। न पश्यति ॥ २९ ॥ अत्र यदा रतिर्ब्रह्मणि नैष्ठिकीत्यनेन भगवति सुदृढरतिविधानमुक्तं तेनान्तरा विषयानुचिन्तनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्विरोधीत्यपि ज्ञापितं विषयानुचिन्तनस्य तद्विरोधित्वं तत्सङ्गविधानद्वारेति हेतोस्तत्संङ्गः प्रतिषिद्धः असङ्ग आत्मव्यतिरिक्त इत्यादिना। अतः सांप्रतं तदेव स्फुटमुपपादयति। इन्द्रियैरित्यादिना। ध्यायतां विषयचिन्तनं कुर्वतां जनानां विषयाकृष्टैः इन्द्रियैः बिषयैराकृष्टैरिन्द्रियवर्गैरित्यर्थः। मनः आक्षिप्तमाकृष्टं भवति। तच्च मन इन्द्रियाकृष्टं सत् बुद्धेः पुरुषार्थतत्सुसाधनसंपादननिश्चयात्मिकाया बुद्धेः चेतनां पुरुषार्थतत्साधनसंपादनसंबन्धिज्ञानरूपतद्वृत्तिं हरते, कथमिव स्तम्बः जलाशयतीरजातः कुशादिस्तम्वः, ह्रदात् तोयं जलम् इव। अयं भावः। आदौ विषयसंबन्धे जाते गुणारोपेणताननुस्मरतां पुंसामिन्द्रियाणि स्मृतैस्तैर्विषयैराकृष्यन्ते तैरिन्द्रियैश्च मन आकृष्यते तन्मनोऽपि बुद्धेः सकाशाद्बुद्धिधर्मभूतविचारसामर्थ्यरूपां चेतनां हरते, तच्चाविवेकिनां बोद्धुमशक्यत्वात्तीरजः कुशादिस्तम्बो यथा मूलैस्तोयं ह्रदादपहरति तथेदं दृष्टान्तेन प्रदर्शितमिति ॥ ३० ॥ भ्रश्यतीति। चित्तं चेतनाम अनु पश्चात, चेतनापहारभवनानन्तरमित्यर्थः। स्मृतिः मया भगवदुपासना विधेयेति निर्द्धारितविचारस्मरणं भ्रश्यति नश्यति। स्मृतिक्षये उपासनास्मृतिनिवृत्तौ सत्यामित्यर्थः। ज्ञानभ्रंशः स्वपरयाथात्म्यज्ञानविभ्रंशः, भवति। तद्रोधं ज्ञानविभ्रंशं कवयः सूरयः, आत्मनः स्वतो हेतोरेव आत्मापह्नवमात्मनस्तिरोधानं प्राहुः। अनेन श्लोकद्वयेन 'ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते' इत्यादि भगवद्गीतोक्तार्थः सूचितः ॥ ३१ ॥

एवंभूतो नाशो भवतु ततः किमित्यत आह। नात इति। आत्मनः हेतोः, स्वेनैवेत्यर्थः। स्वव्यतिक्रमात् स्वस्वरूपातिलङ्घनात् स्वस्वरूपं विहायेत्यर्थः। अन्यस्यात्मन इतरस्य प्रेयस्त्वं यत् अस्ति, शब्दादिविषयप्रेयस्त्वं यद्भवतीत्यर्थः; अतः परतरः लोके, पुंसः स्वार्थव्यतिक्रमः स्वपुरुषार्थविरहः न अस्ति। अनेन 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणा' इति स्मृत्युक्तार्थः सूचितः ॥ ३२ ॥ विषयध्यानतत्संयोगयोरनर्थकारित्वमुपसंहरति। अर्थेन्द्रियेति द्वाभ्याम्। अर्थः शब्दादिविषयश्च, इन्द्रियार्थः कामश्च तयोरभिध्यानम् अर्थेन्द्रियार्थाभिध्यानमिति पाठे तु अर्थेति तस्मादित्यर्थे। नृणां सर्वार्थापह्नवः सर्वार्थनाशः, सर्वपुरुषार्थविरोधीत्यर्थः। येन शब्दादिविषयाभिध्यानेन, ज्ञानविज्ञानात् ज्ञानं शास्त्रजन्यं परोक्षं विज्ञानं तूपासनात्मकमपरोक्षं तत्समाहारस्तस्मात् भ्रंशितः सन् मुख्यतां स्थावरताम् आविशति प्राप्नोति ॥ ३३ ॥ न कुर्यादिति। तत्रमनर्थकारित्वादतितीक्ष्णं तमोऽज्ञानं तितीरिषुस्तितीर्षुस्तरितुमिच्छुः, पुमान् यद्वस्तु धर्मार्थकाममोक्षाणाम् अत्यन्तविघातकं स्यात्। तस्येति शेषः। सङ्गं कर्हिचित् न कुर्यात् ॥ ३४ ॥ धर्मादिभिः साकं मोक्षस्य तुल्यवन्निर्देशात् धर्मादित्रिषु केषांचिन्मोक्षसाम्यताज्ञानं स्यादतो मोक्षस्येतरपुरुषार्थसाम्यं वारयति। तत्रापीति। तत्रापि धर्मादिपुरुषार्थचतुष्टयमध्येऽपि मोक्षो मोक्षरूप एव अर्थः पुरुषार्थः आत्यन्तिकतया परमार्थसत्यतया इष्यते यतः, त्रिवर्ग एव त्रैवर्ग्यः धर्मादित्रिवर्गरूपः, अर्थः त्रिवर्गात्मकः पुरुषार्थः नित्यं कृतान्तभयसंयुतः कालकृतभयसहितोऽस्त्यतोऽनित्यः, यथा राजकीयः पुरुषो राजेति राजसंबन्धादुच्यते तद्वद्राजस्थानीयमोक्षाख्यपुरुषार्थसंबन्धात्तदुपयोगिनो धर्मादयोऽपि पुरुषार्थशब्देनोदाह्रियन्ते ॥ ३५ ॥ कृतान्तभयसंयुततया यत्तदनित्यत्वं तदाह। परेऽवरे इति। परेऽवरे च उत्कृष्टापकृष्टरूपाः, ये भावाः पदार्थाः, आब्रह्मस्तम्बपर्यन्तानि वस्तुजातानीत्यर्थः। गुणव्यतिकराद्गुणवैषम्यरूपसृष्टेः, अनु पश्चात् भवन्ति। न तु प्रलये इत्यर्थात्सिद्धम्। अतः ईशेन कालरूपेण परमात्मना विध्वंसिता आशिषो येषां तेषां भावानां क्षेमः रक्षणं स्थिरत्वमित्यर्थः। न विद्यते ॥ ३६ ॥ एवमचिद्विकाराणामनित्यत्वमुक्तमथ पारमहंस्यचर्ययेत्यनेनाभिहितं प्रकृतितज्जभावविलक्षणस्य नित्यस्यात्मरूपस्य भगवदात्मकत्वेनानुसंधानं यत्तदाह। तदिति। हे नरेन्द्र, तत्तस्माद्धेतोः, देहः शरीरं च इन्द्रियाणि च असवः प्राणाश्च धिषणात्मा मनश्च तैः, आवृतानाम् अत्र धिषणात्मशब्देन ज्ञानद्वारभूतं मन एव ग्राह्यं देहाद्यात्मकानामित्यर्थः। तस्थुषां स्थावराणाम् अथ जगतां जङ्गमानां च क्षेत्रविदः क्षेत्रज्ञाः स्थावरजङ्गमान्तःस्था जीवा इत्यर्थः। तान् तपति अन्तर्यामितया नियच्छतीति क्षेत्राविक्तपस्तस्य भावस्तत्ता तया जीवजातान्तरात्मतयेत्यर्थः। हृदि स्थित इति शेषः। प्रत्यक् स्वान्तःस्थतया स्वस्मै भासमानः, अनेन पराचोऽचेतनाद्वैलक्षण्यमुक्तम्। विष्वक् सर्वतः, आविः प्रकाशमानः, स्वरूपेण गुणैश्च व्यापक इत्यर्थः। अनेन चेतनाज्जीवतो वैलक्षण्यमुक्तम्। भगवान् पूर्णषाड्गुण्यः, अनेनोभयवैलक्षण्यमुक्तम्। एवंभूतः यः, चकास्ति क्षेत्रज्ञेभ्यः कर्मफलं नियच्छन्नवभासते, सः अस्मि अहम् अस्मीत्यहमर्थेऽव्ययम्। अस्मीति शेषः। इत्थं तं भगवन्तं त्वम् अवेहि भगवदात्मकोऽहमस्मीति बुद्ध्यस्वेत्यर्थः ॥ ३७ ॥ ननु भगवतः क्षेत्रज्ञशरीरितयावस्थितेः क्षेत्रज्ञस्य शरीरगतदोषाणामिव क्षेत्रज्ञक्षेत्रज्ञे क्षेत्रज्ञगतदोषप्रसक्तिः प्राप्नोति चेन्मैवमित्याह। यस्मिन्निति। यस्मिन् भगवदात्मकताबोधवति क्षेत्रज्ञस्वरूपे, मायायाः सकाशाद्यः विवेको जीवपरयोः पृथक्तयावगमरूपो विवेकस्तस्य विधुतिः विधूननहेतुः, विवेकज्ञानविरोधि, इत्यर्थः। सदसदात्मतया कार्यकारणरूपेण वर्त्तमानमिति शेषः। इदं देवमनुष्यादिनानाविधरूपजातं स्रजि मालायाम् अहिबुद्धिः वा सर्पबुद्धिरिव विभाति जीवतादात्म्येन प्रतीयते इत्यर्थः। इति ज्ञानवन्तमिति शेषः। नित्यमुक्तः प्रकृतिसंबन्धरहितश्चासौ परिशुद्धः कर्मरहितः स चासौ विशुद्धतत्त्वः स्वप्रकाशरूपस्तं तथापि प्रत्यूढमनादितया रूढमूलं यत्कर्म तेन कलिला मिश्रा प्रकृतिर्यस्य तं तमात्मानं प्रपद्ये अनुसंदधे, भगवच्छरीरतया विभावयेत्यर्थः। यथा 'नृसिंहो भगवान् श्वेतः' इत्यत्र नृसिंहमूर्तेर्भगवतः श्वेतत्वं शरीरद्वारकम् एवं क्षेत्रज्ञक्षेत्रज्ञस्य भगवतः जीवगतकर्मसंबन्धज्ञानादिकं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षेत्रज्ञद्वारा एव, न त्वव्यवधानेनेत्यर्थः ॥ ३८ ॥ एवं क्षेत्रज्ञशरीरत्वेन भगवतोऽवस्थानं निर्दिपित्वं चोक्तं सांप्रतं तुभ्यं मया योऽयं भक्तियोग उपदिष्टस्तमेव सर्वमुमुक्षवोऽनुतिष्ठन्ति ततस्त्वमप्येनमेवानुतिष्ठेत्याह । यत्पादेति । रिक्तेषु भगवद्व्यतिरिक्तेषु मतिः रिक्तमतिः, यद्वा रिक्तमतिरभगवदात्मकत्वबुद्धिः, न विद्यते रिक्तमतिर्येषां ते न रिक्तमतयः जगतोऽब्रह्मात्मकताज्ञानं परित्यज्य ब्रह्मात्मकत्वज्ञानमेव मन्वाना इत्यर्थः । निरुद्धः विषयेभ्यः प्रत्याहृतः स्रोतोगण इन्द्रियवर्गो यैस्ते एवंविधाः सन्तः, यतयः साधवः यस्य भगवतः पादपङ्कजे चरणकमले तयोः पलाशाश्छदवद्वर्त्तमाना या अङ्गुलयस्तेषां विलासः कान्तिस्तस्य भक्तिः सेवा तया, ग्रथितमनादिकालतः संबन्धयुतं कर्म च आशयो वासना च तत्समाहारम् अहंग्रन्थिमित्यर्थः । उद्ग्रथयन्ति मोचयन्ति तद्वत् त्वम् अपि तं वासुदेवमेव अरणं स्वभक्तेभ्यः स्वात्मप्रापकं भज भगवद्भक्तिमन्तरा संसारार्णवोत्तरणं दुस्तरमिति भावः ॥ ३९ ॥

अतस्तमेव भजस्वेत्युपसंहरति । कृच्छ्र इति । ये न विद्यते सवस्तरणहेतुरीश ईश्वरो येषां ते असवेशा ईश्वराख्यसव-रहिताः सन्तः षड्वर्गनक्रं षडिन्द्रियवर्गग्रावं इह असुखेन दुःखेन तितीरपन्ति तीतीर्षन्ति तरितुमिच्छन्ति तेषामिति शेषः । इह महान् कृच्छ्रः क्लेशः तत्तस्मात् त्वं हरेः स्वाश्रितसंसृतिहरणशीलस्य भगवतः भजनीयं सुखाराध्यमित्यर्थः । अङ्घ्रि उडुपं सवं कृत्वा व्यसनं दुःखात्मकं दुस्तरार्णं कर्त्तुमशक्यं भवार्णवम् उत्तर पारं गच्छ ॥ ४० ॥ स इति । आत्ममेधसा ब्रह्मविदा ब्रह्मपुत्रेण कुमारेण सनत्कुमारेण एवमुक्तप्रकारेण दर्शिता आत्मनो गतिस्तत्त्वं यस्य सः सः नृपः पृथुः सम्यक् प्रशस्य प्रशंसां कृत्वा तं सनत्कुमारम् उवाच ॥ ४१ ॥ कृता इति । आर्त्तानुकम्पिना तापत्रयातुरजनकृतदयेन हरिणा पूर्वं मे मम अनुग्रहः कृतः । हे भगवन् हे ब्रह्मन् तमनुग्रहम् आपादयितुं यूयम् आगताः ॥ ४२ ॥ निष्पादित इति । किं च कृपालुभिः भवद्भिः कार्त्स्न्येन निष्पादितः स अनुग्रह इति शेषः । पाठान्तरे भवदागमनफलमिति शेषः । निष्पादितं तत्कार्त्स्न्येनेति पाठे तु तच्छब्देनैवागमनफलबोधः सुगम एव । इत्थं ब्रह्मोपदेष्ट्रे तुभ्यं मदीयं किं देयमस्तीत्याह । आत्मना देहेन सह मे मम सर्वं साधूच्छिष्टं हि साधुभिः स्वीयं मतं सत् मह्यं प्रसादरूपेण दत्तं भवति खल्वित्यर्थः । अतः मम तत्र स्वत्वभावादिति शेषः । किं ददे गुरुदक्षिणार्थं किं दद्याम् अनुग्राहयित्रा दत्तं पुनस्तस्मै कैश्चिदपि न दीयते इत्यर्थः ॥ ४३ ॥ ननु प्रसादरूपेण दत्ते तव स्वत्वं संपन्नमेवेति चेत्तदपि दानरूपेण दातु न शक्नोमि यथा पित्रा दत्तं मोदकादि पुनः पित्रे दानरूपेण न निवेद्यते निवेदनं तु तदीयस्यैव तस्मै समर्पणं यथा भृत्येन राज्ञ सेवारूपेण ताम्बूलादि समर्प्यते तथापि भवतीति चेत्तथा तु मयापि सर्वं भवद्भ्यो निवेदितं स्वीकुरुतेत्याह । प्राणा इति । ब्रह्मन् प्राणाः दाराः सुताः सपरिच्छदा उपकरणसहिताः गृहाश्च राज्यं बलं सैन्यं मही पृथ्वी कोशः संचितधनम् इत्येतत् सर्वं निवेदितं तदङ्गीक्रियतामिति शेषः ॥ ४४ ॥ ननु मद्योग्यमेव मह्यं समर्पणीयं तत्राह । सेनापत्यमिति । सेनापत्यं सेनानायकत्वं राज्यं दण्डनेतृत्वं दण्डनायकत्वं सर्वलोकाधिपत्यं च । द्वितीयश्चोऽप्यर्थे । वेदशास्त्रवित् यः स एव अर्हति । चकारद्वय-मुक्तार्थदार्ढ्यार्थम् । न भवादृशोऽन्यो वेदशास्त्रविदस्त्यतो भवानेव स्वीक्रियतामिति भावः ॥ ४५ ॥

अतः स्वत्वपूर्वः सर्वभोगो ब्राह्मणः स्वमेवेति भुङ्क्ते अन्नादिकमिति शेषः । स्वं स्वकीयमेव वस्ते परिधत्ते वस्त्रादिकमिति शेषः । स्वं स्वकीयमेव ददाति च क्षत्रियादिभ्य इति शेषः । तस्य ब्राह्मणस्य अनुग्रहेणैव लब्धमिति शेषः । अन्नम् एतद्भोग्यपदार्थो-पलक्षणं क्षत्रियादयः भुञ्जते । अन्नभोजनमात्रे तदधिकारो न दानादाविति भावः ॥ ४६ ॥ यद्यपि कुत्रापि मम स्वत्वं तु नास्त्येव तत्कथंचित्स्थाप्यते तथापि सर्वस्वार्पणादिगुणेनापि प्रत्युपकर्तुं शक्यता यथा स्यात्तथाविधो मयि न कश्चिद्-गुणोऽस्तीत्याह । यैरिति । आत्मवादे अध्यात्मविचारे एकान्ततो निश्चयेन निगमिभिर्निगमानुसारिभिः यैर्युष्माभिः ईदृशी दुस्तरमहाव्यसनात्मकसंसारार्णवनिस्तरणोपायभूता भगवतः गतिः प्राप्तिः तत्त्वं वा नः अस्मभ्यं प्रतिपादिता तेन हेतुना अदभ्र-करुणाः यूयं स्वकृतेन आर्त्तोद्धरणकर्मणा तुष्यन्तु । तत् प्रतिकृतमुपकारं प्रति को नाम स्वयम् उदपात्रमञ्जलिबन्धनं विना करोति उपकरोति । अञ्जलिबन्धनमेव तस्य प्रत्युपकार इत्यर्थः । अतो मयायमञ्जलिरेव तेभ्यो भवद्भ्यः बद्ध इत्यर्थः । यद्वा प्रत्युपकारा-चरणोद्योगोऽस्माकं यः स विनोदपात्रम् उपहासास्पदम् उपकर्त्तारं प्रति प्रत्युपकारे प्रवृत्तो जनानामुपहासास्पदं भवेदित्यर्थः ॥४७॥ त इति । आत्मयोगमध्यात्मयोगं पान्ति अनुष्ठानानुष्ठापनाभ्यामिति आत्मयोगपतयः ते सनकादयः आदिराजेन पृथुना पूजिताः सन्तः तदीयं पृथोः संबन्धि शीलं सुस्वभावसद्वृत्तादिकं शंसन्तः प्रशंसन्तः सन्तश्च नृणां मिषतां पश्यतां सतां खे अभूवन् आकाशमार्गेणोद्गता इत्यर्थः ॥ ४८ ॥ वैन्य इति । धुर्यः श्रेष्ठः वैन्यः पृथुस्तु महतां सनत्कुमारादीनां संबन्धिन्या अध्यात्मशिक्षया आत्मज्ञानानुशासनसंजातया आत्मनि संस्थित्या निष्ठया अवस्थितः सन् आत्मानम् आप्तकामम् इव अवाप्तसमस्तकाममिवेत्यर्थः । मेने ॥४०॥ कर्माणीति । कर्माणि च यथादेशं यथाकालं देशकालावनतिक्रम्य यथोचितं यथाबलं स्वोचिततां स्वबलं चानतिक्रम्य यथावित्तं स्ववित्तानुसारेण ब्रह्मसात्कृतं ब्रह्मण्यर्पितं यथा भवति तथा परमात्मोपासनाङ्गत्वेनेत्यर्थः । अकरोत् ॥ ५० ॥

एवमुपासनाङ्गत्वेन कर्मयोगमकरोदित्युक्तं तं च कर्मयोगं फलसङ्गकर्तृत्वत्यागात्मयाथात्म्यानुभवपूर्वकम-करोदित्याह । फलमिति । ब्रह्मणि परमात्मनि, फलं विन्यस्य संन्यस्य, फलस्य ब्रह्मायत्ततामनुसंधाय, न तु स्वानुष्ठीयमान-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्मायत्ततामित्यर्थः। निर्विषङ्गः ममेदं कर्मेति मतिरहितः, अनेन सङ्गत्याग उक्तः। समाहितः स्वात्मन्यखण्डं परमात्मानु-संधानपरः, कर्माध्यक्षं कर्मसु कर्तृत्वाभिमानिनम् आत्मानं प्रत्यगात्मानं प्रकृतेः परं मन्वानः, चोऽवधारणे। कर्तृत्वाभिमानः प्रकृतिसंसर्गकृतो न तु स्वभावत इत्येवं मन्वान इत्यर्थः। कर्माण्यकरोदिति पूर्वेणान्वयः ॥ ५१ ॥ गृहेष्विति। सः पृथुः गृहेषु भोगस्थानेषु वर्त्तमानः अपि साम्राज्यश्रिया, अन्वितः अपि संनिहितभोग्यभोगोपकरणोऽपीत्यर्थः। निरहंमतिर्देहात्म-भ्रमरहितः, अत एव इन्द्रियार्थेषु अर्कवत् न असज्जत आसक्तो नाभूत्। सूर्यो यथा स्वप्रभया पङ्कादिषु व्याप्नुवन्नपि तैर्न लिप्यते तथेत्यर्थः ॥ ५२ ॥ एवमिति। अध्यात्मयोगेन भगवद्भक्तियोगेन, अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया अध्यात्म-य गार्थमित्यर्थः। कर्माणि अनुदेशकालानुसारेण समाचरन्, प्रकृतिविविक्तात्मयाथात्म्यज्ञानपूर्वकं देशकालावनुसृत्य कर्माणि समाचरन्नित्यर्थः। अर्चिषि अर्चिर्नाम्न्यां भार्यायां, आत्मसंमितान् आत्मतुल्यान्, पाठान्तरे आत्मानुकूलानित्यर्थः पञ्चपुत्रान्, उत्पादयामास। विजिताश्वस्य पूर्वमुक्तत्वात्पुत्रोत्पादनस्य पूर्ववर्त्तित्वेऽपि तत्र विशेषानुक्तेरत्र प्रकरणात्कथनं न तु सनकादितिरोधानानन्तरमिति रहस्यम् ॥ ५३ ॥ पुत्रान् प्रति निर्दिशति। विजिताश्वमित्यर्द्धेन। विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम्, इति पञ्च पुत्रानिति पूर्वेण संबन्धः। अच्युते आत्मा मनो यस्य सः, एकः पृथुः, जगत्सृष्टेः, गोपीथाय रक्षणार्थं स्वे स्वे काले तत्तदवसरे, सर्वेषां लोकपालानां गुणान्, पृथक् दधार ॥ ५४ ॥ मन इति। मनोवाङ्मूर्त्तिभिः मनोवाकायैः, सौम्यैः सर्वशान्तिकारकैः, गुणैः, प्रजाः, संरञ्जयन्, अपरः, सोमराजः, इव राजा इति नाधेयम् अधाद्धार ॥ ५५ ॥

लोकपालानामसाधारणान् गुणान् उचितेषु कालेषु एक एव अधादिति यदुक्तं तदेव सम्यग्बोधायेदानीमुप-पादयति। सूर्यवदित्यादिना यावदध्यायसमाप्ति। भुवः, वसु धनं, गृह्णन् विसृजंश्च, पृथुः सूर्यवत् सूर्य इव, राज्ञः प्रतपन्, अभवदिति शेषः। तेजसा, अग्निः इव दुर्धर्षः परैरभिभवितुमशक्यः। महेन्द्रः इव दुर्जयः दुःखेनापि जेतुमशक्यः ॥ ५६ ॥ तितिक्षयेति। तितिक्षया अपराधसहनेन, धरित्री इव, अपराधतितिक्षासमये धरित्रीतुल्यः। द्यौः स्वर्गः इव नृणाम् अभीष्टदः, नृणामभीष्टदानावसरे द्यौरिव नृणां कामानिति शेषः। पर्जन्यः मेघः इव तर्पयन् यथाकामं वर्षति स्म ॥ ६७ ॥ समुद्र इति। समुद्रः इव, दुर्बोधोऽपरिच्छेद्यः, सत्त्वेन गुणेन अचलराट् इव मेरुतुल्यः, शिक्षायां धर्मराट् इव, यमवदपक्षपातेन शिक्षाकारकः, ऐश्वर्ये हिमवान् इव, हिमवान् यथा रत्नाद्यैः संपन्नस्तथायमपीत्यर्थः। आश्चर्ये हिमवानिवेति पाठे हिमगिरि-वत्सकलाश्चर्यकरवस्तुसंभृत इत्यर्थः ॥ ५८ ॥ कुबेर इवेति। कुबेरः इव कोशाढ्यः धनौघपतिः, वरुणः यथा गुप्तार्थः गुप्तधनः, मातरिश्वा वायुः इव, सर्वात्मा सर्वतः संचारशक्तिः, बलेन शरीरसामर्थ्येन, सहसा इन्द्रियबलेन, ओजसा मानसेन बलेन चापि मातरिश्वा इवेत्यर्थः ॥ ५९ ॥ अविषह्येति। अविषह्यतया, देवः भगवान्, भूतराट् रुद्रः इव। सौन्दर्ये कन्दर्पः कामः इव। मृगराट् सिंहः इव मनस्वी ॥ ६० ॥ वात्सल्येति। नृणां, वात्सल्ये मनुवत्स्वायम्भुव इव। प्रभुत्वे, भगवान् अजः ब्रह्मा, इवेति शेषः। ब्रह्मवादे वेदवादे, बृहस्पतिः इव। आत्मवत्त्वे स्वाधीनत्वे जितेन्द्रियत्वे इति वा। परमात्मतत्त्वज्ञाने इत्यन्ये। स्वयं हरिः ॥ ६१ ॥ भक्त्येति। गावश्च, गुरवश्च, विप्राश्च, तेषु, विष्वक्सेनानुवर्त्तिषु भगवद्भक्तेषु भक्त्या। ह्रिया, प्रश्रयशीलाभ्यां, परोद्यमे परार्थोद्यमे च, आत्मतुल्यः निरूपमः ॥ ६२ ॥ कीर्त्त्येति। त्रैलोक्ये, तत्र तत्र ह स्फुटं यथा तथा पुंभिः पुरग्रामवासिभिः पुरुषैः, उच्चैरुच्चस्वरेण गीतया, कीर्त्तितया, कीर्त्या। स्त्रीणां, कर्णरन्ध्रेषु प्रविष्टः, अतः सतां कर्णरन्ध्रेषु, प्रविष्टः रामः सीतापतिः इव, अभवदिति शेषः ॥ ६३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रयोविंशोऽध्यायः

मैत्रेय उवाच

दृष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्मवान् । आत्मना वर्द्धिताशेषस्वानुसर्गः प्रजापतिः ॥ १ ॥

त्रयोविंशे सदा ध्यानवतोऽरण्ये निवासिनः । निर्मानित्वं समास्थाय वैकुण्ठे यानमुच्यते ॥ १ ॥

एवं सर्वगुणसंपन्नः संपालिताखिललोकः पृथुरासीदित्युक्तमथात्मजेष्वारोपितराज्यभारः भार्यया सह तपोवनं प्रविष्टः कुमारोपदिष्टरीत्याध्यात्मयोगनिष्ठः स्वात्मसंप्राप्तपरमपुरुषाधिगतमहासुखः आसीत् । तत्पत्नी च तल्लोकमगादिति पृथुवृत्तान्त-मुपसंहरति । दृष्ट्वेति । आत्मवान् स्वर्गस्वाराज्यादीनामल्पास्थिरत्वज्ञानवान्, वैन्यः, एकदा आत्मानं प्रवयसं वृद्धं दृष्ट्वा, आत्मना स्वयं, वर्द्धिताः अशेषाः स्वस्य स्वकृता अनुसर्गा अन्नादिसर्गाः पुरग्रामादिसर्गाश्च येन सः, अत एव प्रजापतिः सन् ॥ १ ॥ जगत इति । जगतो जङ्गमस्य, तस्थुषः स्थावरस्य चापि, वृत्तिदः, सतां धर्मभृत्, धर्मविदिति पाठे सतां धर्मं वेत्तीति तथाभूतः । निष्पादितः संपादितः ईश्वरादेशः परमेश्वराज्ञा येन सः, यदर्थं यल्लोकपालनार्थम् इह भुवि, जज्ञिवान् तत्सर्वं कृत्वेति शेषः ॥ २ ॥ आत्मजेष्विति । आत्मजेषु पुत्रेषु, विरहात्स्वविश्लेषात् रुदतीम् इव स्थिताम् आत्मजां पुत्रीकृतां भूमिं, न्यस्य, पुत्रेषु भुवो राज्यं दत्त्वेत्यर्थः । प्रजासु विमनःसु चिन्तातुरासु सतीषु, सदारः सभार्यः, एकोऽसहायः सन्, तपोवनम्, अगात् । त्रयाणामेकसंबन्धः ॥ ३ ॥ तत्रेति । तत्र तपोवने अपि आत्ताः स्वीकृता आत्मनियमाः शमदमादयो येन सः, अक्षोभ्यनियम इति पाठे अक्षोभ्या विघ्नैर्नाशयितुमशक्या नियमा यस्य सः । अदाभ्यनियम इति पाठेऽपि पूर्वोक्तपाठार्थ एव । वैखानसानां वानप्रस्थानां सुतरां संमतं तस्मिन्, उग्रे कठिने, तपसि, आरब्धः प्रवृत्तः, कर्त्तरि क्तः । कथमिव । यथा पुरा, स्वविजये स्वकृतधरामण्डलस्य विजये, महता यत्नेन प्रवृत्तस्तद्वत् ॥ ४ ॥ तदुग्रं तपो वर्णयति । कन्दमूलेति त्रिभिः । कन्दः सूरणशार्करकन्दादिश्च मूलं रक्ताल्वादिकं च फलं प्रियालकपित्थादिकं च तेषामाहारो यस्य सः, यद्वा । कन्दादिकं वनवासिजनप्रसिद्धं ग्राह्यं क्वचित्, तृणानि च पर्णानि च तान्यश्नातीति तथाभूतः, क्वचिद्दूर्वादितृणाशनः, क्वचिज्जीवन्त्यादिपर्णमात्राशन इत्यर्थः । क्वचित्तु, शुष्कपर्णाशनः क्वचिदित्यपि पाठः । कतिचित् अब्भक्षः, क्वचित्तु कतिचित् मासानित्यपि पाठः, ततः, परं वायुभक्षः, आसीदिति शेषः ॥ ५ ॥

ग्रीष्म इति । ग्रीष्मे ग्रीष्मर्त्तौ पञ्चतपाः चतुर्दिक्षु चत्वारोऽग्नय उपरि सूर्य इति पञ्चाग्निविहिततया इत्यर्थः । वर्षासु ऋतौ, आसारं धारासंपातं सहते इत्यासारषाट्, मुनिः शुभाश्रयसंशीलनपरः शिशिरे ऋतौ उदके आकण्ठमग्नः, यतः वीरस्ततः स्थण्डिले शेते इति स्थण्डिलेशयः सर्वदा विहिताकृत्रिमभूमिशयनः आसीत् ॥ ६ ॥ तितिक्षुरिति । तितिक्षुः शीतोष्णादिसहः, यतवाक् मौनव्रतः, दान्तो दमयुक्तः, ऊर्ध्वरेताः शान्तः, जितानिलः जितप्राणः, एवंभूतः पृथुः, कृष्णम् आरिराधयिषुः सन्, उत्तमं तपः अचरत् ॥ ७ ॥ तेनेति । क्रमानुरुद्धेन शनैः शनैः प्राप्तेन अनुक्रमेण, संवर्द्धितेनेति यावत् । क्वचित्तु क्रमानुसिद्धेनेति पाठः । कुत्रचित्तु क्रमानुराद्धेनेत्यपि पाठः । सर्वेषु पाठेषूक्त एवार्थः । तेन तपसा, ध्वस्तानि कर्माणि यस्य सः, प्राणायामैः अमल आशयोऽन्तःकरणं यस्य सः, संनिरुद्धः प्रत्याहृतः षड्वर्गः षडिन्द्रियवर्गो येन सः भिन्नानि छिन्नानि बन्धनानि वासना यस्य सः ॥ ८ ॥ सनत्कुमार इति । पुरुषर्षभः पुरुषश्रेष्ठः पृथुः, सनत्कुमारः भगवान् यत् यं, परमुत्कृष्टम् आध्यात्मिकं योगम् आह तेन योगेनैव पुरुषं परमपुरुषम् अभजत् द्वयोरेकसंबन्धः ॥ ९ ॥ भगवदिति । भगवद्धर्मिणः भगवद्धर्माः सन्त्यस्य तस्य, श्रद्धया सदा यततः स्वहिताय यत्नं कुर्वतः साधोः पृथोः भगवति पूर्णषाड्गुण्ये ब्रह्मणि परमपुरुषे, अनन्यविषया अव्यभिचारिणी भक्तिः अभवत् ॥ १० ॥ तस्येति । परिकर्मणा परिचर्यया शुद्धसत्त्वः शुद्धसत्त्वगुणयुक्त आत्मा यस्य स तस्य, तस्य पृथोः, अनयोक्तविधया, तस्य भगवतोऽनुसंस्मरणं मुहुः संस्मृतिस्तस्यानुपूर्त्तिः परिपूर्णता तया निशितेन येन ज्ञानेन संशयपदं संशयस्थानं निश्चेतुमशक्यस्वरूपमित्यर्थः । निजजीवकोशं स्वप्रकाशिततत्त्वम् अनाद्यज्ञानरूपाधि-मित्यर्थः । चिच्छेद स्वस्मिन्नसंबद्धमकरोत् । तादृशं विरक्तिमत् ज्ञानम् अभूत् उदपद्यत् ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छिन्नेति । छिन्ना प्राप्ता अन्यधीः प्रकृतिधीर्यस्य सः देहात्मबुद्धिरहित इत्यर्थः । अधिगता संप्राप्ता आत्मगतिरात्मस्वरूपं येन सः अत एव निरीहो निर्व्यापारः प्राप्तासु सिद्धिषु निःस्पृहः इत्यर्थः । एवंभूतः पृथुः येन वयुनेन ज्ञानेन इदं प्रकृतिसंबंधरूपसंशयपदम् अच्छिनत् चिच्छेद । तत्तथाविधमपि ज्ञानं तत्यजे त्यक्तवान् । तत्प्रयत्नादुपरराेमेत्यर्थः । शरीरमनित्यं जडमनुसंधाय तदन्योऽहमस्मीति हि विवेकज्ञानमादावुदेति तत्र शरीरमपि प्रतिसंबन्धितया बुद्धिस्थं स्यात् पक्वयोगकाष्ठायां ब्रह्मात्मस्वात्मनि साक्षात्कृते देहे प्रतिसंबन्धितया ज्ञानाभावात्तत्यजे इत्युक्तम् । तस्यैवंविधैकाग्रतायां हेतुमाह । यतिः गदाग्रजकथासु भगवत्कथासु । यावत् रतिं न कुर्यात् तावत् योगगतिभिः अप्रमत्तः न स्यात् अतो योगिनां योगसिद्धिषु निःस्पृहत्वमेव युक्तं तत्र संततभगवत्कथाश्रवणेनैव निष्प्रत्यूहभगवत्कथानां प्रमादो भवेदेवास्य तु निरन्तरं भगवत्कथाश्रवणरतित्वान्न प्रमादो जात इति भावः ॥ १२ ॥ एवमिति । वीरप्रवरो वीरश्रेष्ठः सः पृथुः आत्मानम् आत्मनि परमात्मनि दृढं यथा तथा संयोज्य ब्रह्मभूतः सन् काले स्वं कलेवरं तत्याज ब्रह्मप्राप्तेः कलेवरत्यागानन्तरभावित्वेऽपि सिद्धवदभिप्रायकृतः पूर्वकालनिर्देशः ॥ १३ ॥ कलेवरत्यागपूर्वकं ब्रह्मभावप्राप्तिप्रकारमेवोपपादयति । संपीड्येति । पायुं गुदं पार्ष्णिभ्यां संपीड्य गुल्फाभ्यामित्यपि पाठः क्वचिद्दृश्यते । अनेन युक्तासनेनावस्थानमस्य तदाभवदिति सूचितम् । ततः वायुं शनैः मूलाधारात् उत्तारयन् नाभ्याम् अवस्थाप्य ततः हृदुरः कण्ठशीर्षणि हृदादिषु प्राण्यङ्गत्वादेकवद्भावः । हृदादिष्वित्यर्थः । कोष्ठेषु अवस्थाप्य । तत्र शीर्षं भ्रूमध्यं भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्' इति श्रुतेः ॥ १४ ॥ उत्सर्पयन्निति । तं च ततः मूर्ध्नि ब्रह्मरन्ध्रे उत्सर्पयन् नेष्यन् क्रमेण ब्रह्मरन्ध्रे इति शेषः । आवेश्य निस्स्पृहः अणिमाद्यैश्वर्यकैवल्यादिषु स्पृहारहितः पृथुः वायुं स्वदेहस्थं वायुं वायौ महाभूतात्मके वायौ कायं देहरूपां पृथिवीं क्षितौ महाभूतात्मकपृथिव्यां तेजः देहस्थं तेजः तेजसि महाभूतात्मकतेजसि अयूयुजत् लीनमनुसंहितवान् ॥ १५ ॥ खानीति । खानि इन्द्रियाधिष्ठानानि देहविवराणि आकाशे महाभूतात्मकाकाशे द्रवं देहस्थं जलं तोये महाभूतात्मकजले यथास्थानं स्वस्वकारणमनतिक्रम्य विभागशः असंकरेण अयूयुजत् । एवं देहस्थभूतांशानां महाभूतसमष्टितयानुसंधानमुक्त्वा पृथिव्यादितत्त्वानामुत्पत्तिक्रमेणानुसंधानमाह । क्षितिं महाभूतम् अम्भसि महाभूते ततः अम्भो महाभूतं तेजसि महाभूते अदस्तेजो महाभूतं वायौ महाभूते अमुं वायुं महाभूतं नभस्याकाशे महाभूते अयूयुजत् इत्यनुषङ्गः ॥ १६ ॥

तदेवं तामसाहंकारकार्याणामाकाशपर्यन्तं लयमुक्त्वा सात्त्विकाहंकारकार्याणां लयानुसंधानमाह । इन्द्रियेषु मनः अयूयुजत् मन इति देवानामप्युपलक्षणम् । सविकल्पज्ञाने मनस इन्द्रियैराकर्षणाच्चेषु लयानुसंधानमुक्तं न तु तत्कार्यत्वात् मनसः वैकारिकत्वात् । तथाचोक्तं भगवद्गीतायां 'इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते' इति । अत्र च 'इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः' इति । तानीन्द्रियाणि तन्मात्रेषु यथोद्भवम् उद्भवोऽत्र प्रवृत्तिलाभस्तमनतिक्रम्य संदधे । अत्रापीन्द्रियाणां तैजसकार्यत्वेऽपि तेषां शब्दादितन्मात्रैराकर्षणात्तन्मात्रेषु तल्लयानुसंधानमुक्तम् भूतादिनाहंकारेण अमूनि नभःसहितानि तन्मात्राणि उत्क्षिप्योत्कृष्य महति आत्मनि महत्तत्त्वे इत्यर्थः । संदधे । अत्रेन्द्रियेषु मनोलयादौ भट्टादिमतोद्भावनपूर्वं व्याख्यातिशये बालबोधाभावान्न सोऽत्र प्रपञ्चितः ॥ १७ ॥ तमिति । तं महान्तं सर्वेषां गुणानां कार्याणां विन्यासः स्थितिर्यस्मिंस्तस्मिन् प्रधाने तत्प्रधानं मायामये अखिलसमष्टिसंसृष्टे जीवे न्यधात् । अनुशयो भुक्तशिष्टं कर्म सोऽस्यास्तीत्यनुशयी सांप्रतं क्षीणप्रायदोष इत्यर्थः । असौ जीवसंज्ञाभाक् पुमान् पृथुः आत्मस्थं स्वस्वरूपस्थं तम् अनुशयं भुक्तशिष्टं कर्म चापि ज्ञानवैराग्यवीर्येण युक्तः प्रभुरकर्मवश्यः स्वरूपस्थः सन् अजहात् । आविर्भूतगुणाष्टकः शुद्धस्वरूपेणावस्थितो मुक्तोऽभूदित्यर्थः ॥ १८ ॥ एवं राजवृत्तान्तमुक्त्वा वनप्रवेशमारभ्य राज्ञ्याः कथामाह । अर्चिरिति चतुर्भिः । वरारोहा महाराज्ञी इत्यपि पाठः । सुकुमारी मृद्वङ्गी अर्चिर्नाम अर्चिनाम्नाख्याता तदङ्गना पद्भ्यां भुवः स्पर्शनम् इति यत् अतदर्हा तन्नार्हति तथापि यतः तत्पत्नी ततः वनम् अनुगता पतिव्रतानां पत्यनुगमनस्य मुख्यधर्मत्वादिति भावः ॥१९॥ अतीवेति । अतीवातिकठिनं यद्व्रतं व्रतं स्थण्डिलशयनादिरूपं तदेव धर्मस्तस्मिन् या निष्ठा तया शुश्रूषया स्वपत्युः परिचर्यया ऋषीणामियमार्षी सा चासौ या देहयात्रा कन्दमूलाद्याहाररूपा तया च परिकर्शिता कृशीभूताङ्गा सत्यपि यतः प्रेयसः प्रियतमस्य पृथोः करस्पर्शनेन यो मानः संमानं तेन निर्वृता सुखिता सती आर्त्तिं वनवासदुःखं न अविन्दत ॥ २० ॥ देहमिति । आत्मनः स्वस्याः पृथिव्याश्च पत्युः दयितस्य स्वप्राणप्रियस्य पृथोः देहं विपन्नानि विगतानि अखिलानि चेतनादीनि बुद्धीन्द्रियमनःप्राणादीनि यस्मिंस्तथाभूतम् आलक्ष्य दृष्ट्वा सती सार्चिः किंचिद्विलप्य च अथ अद्रिसानुनि तद्देहमिति शेषः । चितां चितीं प्रति आरोपयत् ॥ २१ ॥

विधायेति । ततः, कृत्यं विधाय तत्कालोचितं कर्म कृत्वेत्यर्थः । ह्रदिनीजलाप्लुता सरसीजलविहितस्नाना सती, उदारकर्मणः भर्तुः, उदकं दत्त्वा दिविस्थान् त्रिदशान् नत्वा भर्तृपादं स्वस्वाम्यङ्घ्रियुग्मं ध्यायती सती चितां त्रिः वारत्रयं परीत्य प्रदक्षिणीकृत्य वह्निं विवेश चितां वह्निना प्रज्वाल्य तदनुप्रवेशं चकारेत्यर्थः ॥ २२ ॥ विलोक्येति । वीरवरं वीरश्रेष्ठं पतिं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथुम् अनुगतामनुप्रयातां साध्वीं पतिव्रतार्चिषं विलोक्य वरदाः देवैः सह वर्त्तमानाः सहस्रशः देववध्वः तुष्टुवुः ॥ २३ ॥ कुर्वन्त्य इति । तथा तस्मिन् मन्दरसानुनि कुसुमासारं पुष्पवर्षं कुर्वन्त्यः सत्यः अमरतूर्येषु देवदुन्दुभ्यादिषु नदत्सु सत्सु परस्परं गृणन्ति स्म अभाषन्त ॥ २४ ॥ भाषणमेवाह । अहो इति । इयं वधूरर्चिः धन्या कृतार्था अहो इत्याश्चर्ये हर्षे वा । या वधूः भूभुजां राज्ञां पतिं स्वभर्त्तारं यज्ञेशं भगवन्तं श्रीवधूः श्रीरूपिणी वधूः इव सर्वात्मना सर्वप्रकारेण, भेजे प्राप्ता ॥ २५ ॥ सैषेति । तस्मात् सा एषा सती अर्चिः, अस्मान्नभःस्थानस्मान् अतीत्य दुर्विभाव्येन चिन्तयितुमप्यशक्येन कर्मणा पतिपारायण्यादिना, पतिं स्वभर्त्तारं वैन्यं पृथुम् अन्वनुसृत्य, ऊर्ध्वं व्रजति नूनं पश्यत । पाठान्तरेऽस्मानित्यस्यैतद्विशेषणम् ॥ २६ ॥ तेषामिति । भगवान् पद्यते गम्यतेऽनेनेति भगवत्पदं भगवत्प्राप्तिसाधनं नैष्कर्म्यं निवृत्तिधर्मं भुवि ये लोलायुषः विद्युल्लतावच्चञ्चलायुषः सन्तोऽपि, साधयन्ति वै तेषां मर्त्यानां भगवद्भक्तजनानां तु अन्यद्देवादिपदं दुरापं दुर्लभं किमुत न किंचिदित्यर्थः ॥ २७ ॥ अभक्तं शोचन्ति । स इति । आपवर्ग्यमपवर्गसाधनं मानुष्यं मनुष्येषु जन्म कृच्छ्रेण दुःसाध्येन महता कर्मविपाकेनेति शेषः । भुवि भारतवर्षभूमौ लब्ध्वापि विषयेषु विषज्जते । बतेति खेदे । आत्मध्रुक् सः दैवेन वञ्चितः ॥ २८ ॥ स्तुवन्तीष्विति । एवं सुरस्त्रीषु अमरस्त्रीषु, स्तुवन्तीषु सतीषु वधूः पृथुनृपपत्न्यर्चिः आत्मविन्दां ज्ञानिनां धुर्यः श्रेष्ठः वैन्यः पृथुः अच्युताश्रयं भगवतो निवासभूतं यं वैकुण्ठाख्यमिति शेषः । लोकं प्राप तं पतिलोकं गता प्राप्ता वै ॥ २९ ॥

उपसंहरति । इत्थमिति । भगमैश्वर्यषट्कं विद्यतेऽस्येति भगवान् अतिशयेन भगवान् भगवत्तमः, 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवान्' इत्युक्तविधभगवतां मध्ये श्रेष्ठ इत्यर्थः । सः असौ, पृथुः इत्थंभूतानुभावः उक्तविधप्रभावसंपन्नः, अभूत् । उद्दामचरितस्यातिमहच्चरित्रस्य तस्य पृथोः चरितं ते तुभ्यं मया कीर्त्तितम् ॥ ३० ॥ एतच्चरितकीर्त्तनश्रवणश्रावणफलमाह । य इति । यः पुमान् सुमहत् पुण्यं पुण्यसाधनम् इदं पृथोः चरितम् अवहितः समाहितचित्तः सन् श्रद्धया पठेत् शृणुयात् श्रावयेद्वा सः अपि पृथोः पदवीं गतिम् इयात् प्राप्नुयात् ॥ ३१ ॥ आनुषङ्गिकं फलमाह । ब्राह्मण इति । एतच्छृण्वन्निति शेषः । ब्राह्मणः ब्रह्मवर्चस्वी ब्रह्मतेजोयुक्तः, भवेत् । राजन्यः क्षत्रियः जगतीपतिः पृथिव्याः पतिः भवेत् । वैश्यः तु विट्पतिः सर्ववैश्यानां पतिः भवेत् शूद्रः उत्तमतां सजातीयेषु मुख्यतामित्यर्थः । लभेत प्राप्नुयात् ॥ ३२ ॥ त्रिःकृत्व इति । नरः अथवा नारी आदृता, नारी सादरा नरः सादर इत्यर्थः । त्रिःकृत्वः त्रिवारम् इदं पृथुचरितम् आकर्ण्य, अप्रजः सुप्रजतमः विद्याद्रविणबलादियुक्तपुत्रवान् भवेत् । निर्द्धनः धनवत्तमः धनवतां मध्ये श्रेष्ठः, अस्पष्टकीर्त्तिः अनभिव्यक्तयशाः, सुयशाः विपुलकीर्त्तिः, मूर्खो ज्ञानविधुरः पण्डितः भवति जायेतेत्यर्थः ॥ ३३ ॥ इदमिति । इदं पृथ्वाख्यानं श्रुतं सदिति शेषः । पुंसां स्वस्ति मङ्गलमीयतेऽनेनेति स्वस्त्ययनम् असङ्गल्यमसङ्गलतां निवारयतीति अमाङ्गल्यनिवारणं धन्यं धनसंपादकं यशस्यं यशस्करम् आयुष्यमायुष्करं स्वर्ग्यं स्वर्गसाधनं कलिमलापहं कलिदोषहरं भवति ॥ ३४ ॥ धर्मेति । धर्मश्च अर्थश्च कामश्च मोक्षश्च तेषां सम्यक् सिद्धिम् अभीप्सुभिः पुंभिः चतुर्णां धर्मादीनां परं कारणम् एतत् पृथुचरित्रं श्रद्धया अनुश्राव्यम् ॥ ३५ ॥ विजयेति । एतच्चरितं श्रुत्वाकर्ण्य राजा विजयाभिमुखः सन् यान् अभियाति ते अन्ये राजानः पृथवे यथा तस्मै बलिं हरन्ति ॥ ३६ ॥

मुक्तेति । यद्यपि पृथुचरित्रश्रवणादौ बहूनि फलानि विद्यन्ते तथापि मुक्तान्यसङ्गः संत्यक्तभगवत्प्रसन्नतेतरफलाशः निष्काम इत्यर्थः । पुण्यं वैन्यस्य, चरितं शृणुयात्, श्रावयेत्, पठेद्वा भगवति अचलां, भक्तिं, उद्वहम् भवेत्, भगवत एकान्तिको भक्तः स्यादित्यर्थः ॥ ३७ ॥ वैचित्रवीर्येति । हे वैचित्रवीर्य विदुर, महतो भगवतः यन्माहात्म्यं तस्य सूचकम्, एतत्पृथुचरितमिति शेषः । अभिहितं तुभ्यं कथितम्, अस्मिन्पृथुचरित्रश्रवणे, कृतमतिः, मर्त्यः मनुष्यः, पार्थवीं पृथुना लब्धाम्, गतिं सिद्धिम्, आप्नुयादधिगच्छेत ॥ ३८ ॥ अनुदिनमिति । यः पुमान्, इदं पृथुचरितम्, आदरेण, अनुदिनम्, शृण्वन्, प्रथयन्कीर्त्तयन् सन्नपि, विमुक्तसङ्गः परित्यक्तान्यफलाशः, स्यात्, सः मनुष्यो मर्त्यः, भवसिन्धुपोतपादे संसारसमुद्रतरणहेतुनौकारूपचरणकमले, भगवति निपुणां प्रीतिं च लभते ॥ ३९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ चतुर्विंशोऽध्यायः

मैत्रेय उवाच

विजिताश्वोऽधिराजाऽऽसीत् पृथुपुत्रः पृथुश्रवाः। यवीयेभ्योऽददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः ॥ १ ॥

वैन्यस्यैकादशाध्यायैश्चरितं च प्रचेतसाम् । तन्मध्येऽथोक्तमष्टाभिस्तत्पितुः पञ्चभिस्तथा ॥ १ ॥
प्रपौत्रात्तु चतुर्विंशे प्राचीनबर्हिषः पृथोः। जनिः प्रचेतसां तेभ्यः प्रोक्ता रौद्रं च गीतकम् ॥ २ ॥

एवं कार्त्स्न्येन पृथुचरितमभिधाय तस्य संततिं तस्याश्चरित्रं च कथयितुमुपक्रमते मुनिः। विजिताश्व इति। पृथुश्रवा विपुलकीर्त्तिः, पृथुपुत्रः पृथोः सुतः, विजिताश्वः इन्द्रतोऽश्वजयनादन्वर्थनामा, अधिराजः पृथिव्याः पतिः, आसीत् संधिरार्षः। भ्रातृवत्सलः स्वभ्रातृषु प्रीतिमान् विजिताश्वः, यवीयेभ्यः कनिष्ठेभ्यः भ्रातृभ्यः काष्ठा दिशः अददात ॥ १ ॥ कां काष्ठां कस्मै अदादित्यत्राह। हर्यक्षायेति। विभुर्विजिताश्वः, हर्यक्षाय हर्यक्षनाम्ने भ्रात्रे, प्राचीं पूर्वदिशम् आदिशत्। अदात् , धूम्रकेशाय धूम्रकेशनाम्ने भ्रात्रे, दक्षिणां दक्षिणदिशम् आदिशत्। वृकसंज्ञाय वृकनाम्ने भ्रात्रे, प्रतीचीं पश्चिमां दिशम् आदिशत्। द्रविणसे द्रविणसंज्ञाय भ्रात्रे, तुर्यां चतुर्थामुत्तरां दिशम् आदिशत् ॥ २ ॥ अन्तर्धानेति। यो विजिताश्व इति शेषः। शक्रादिन्द्रात् पृथोरश्वमेधमखेऽश्वविजयावसरे इति शेषः। अन्तर्धानगतिं तिरोधानगतिं लब्ध्वा अन्तर्धानसंज्ञितः अन्तर्धानाख्यः, अभूत। विजिताश्वस्यैवान्तर्धान इति नामान्तरमभूदित्यर्थः। सोऽन्तर्धानः शिखण्डिन्यां शिखण्डिनी-संज्ञायां स्वपत्न्यां, सुसंमतं मानितुं योग्यम् अपत्यत्रयं त्रीण्यपत्यानि आधत्तोत्पादयामास ॥ ३ ॥ अपत्यत्रयमेवाह। पावक इति। पुरा पूर्वजन्मनि, वसिष्ठशापात् पूर्वजन्मनि जातो यो वसिष्ठशापस्तस्मादित्यर्थः। अग्नयः गार्हपत्याहवनीयदक्षिणा-ख्यास्त्रयोऽपि वह्नयः, पावकः, पवमानः, शुचिः इत्येवंविधत्रिनामानः सन्तः, उत्पन्नाः ते गार्हपत्यादयः पावकादिरूपेण मनुष्येषूत्पन्ना इत्यर्थः। पुनः ते, योगगतिमग्नित्वं प्राप्ताः। आहवनियादेः संस्काररूपत्वात्संस्कारवतां वह्नीनां मनुष्य-रूपेणोत्पत्त्यनर्हत्वात्तदभिमानिदेवतानामुत्पत्तिरत्र विवक्षिता ॥ ४ ॥ अन्तर्धान इति। अन्तर्द्धानः अन्तर्द्धानापरसंज्ञो विजिताश्वः नभस्वत्यां नभस्वतीसंज्ञायामन्यस्यां भार्यायां, हविर्द्धानं पुत्रम् अविन्दत लेभे। अन्तर्द्धानं विशिनष्टि। योऽन्तर्द्धानः अश्वहर्त्तारं स्वपितुरश्वमेधार्हाश्वापहरम् इन्द्रं विद्वानयमेव मत्पितुर्यज्ञीयाश्वापहारीति जानन्नपि न जघ्निवान्। एतेन शक्रादन्तर्द्धानगतिलाभे कारणमुक्तम् ॥ ५ ॥ राज्ञामिति। राज्ञां, वृत्तिं करादानं च दण्डश्च शुल्कं च तानि आदयो येषां तैर्दारुणा तां, मन्यमानः सन् तां दीर्घसत्रव्याजेन, ह स्फुटं यथा तथा विससर्ज ॥ ६ ॥ तत्रापीति। तत्रापि दीर्घसत्रेऽपि, हंसं स्वानां क्लेशं हन्तीति हंसस्तं शुद्धं वा परमात्मानं पुरुषं परमपुरुषम् आत्मदृक् प्रकृतिविलक्षणब्रह्मात्मकस्वात्मयाथात्म्य-ज्ञानी सन् यजन् वैष्णवयागान्कुर्वन् अवर्त्ततेतिशेषः। कुशलेन तदुद्भूतसुकृतेन, जातेनेतिशेषः। समाधिना भगवति चित्तैकाग्र्येण तल्लोकतां भगवल्लोकम् आप ॥ ७ ॥ हविर्धानादिति। हे विदुर हविर्धानादन्तर्द्धानपुत्रात् हविर्धानी एतन्नाम्नी तद्भार्या बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम् एतान् षट् सुतान् असूत ॥ ८ ॥ बर्हिषदिति। हे कुरूद्वह सुमहाभागः शोभनमहाभाग्यः हाविर्धानिर्हविर्धान्याः पुत्रः बर्हिषत् प्रजापतिः, सकलप्रजापालको राजा सन्नपि क्रियाकाण्डेषु योगेषु च, निष्णातः निष्ठितश्रद्धावानित्यर्थः। अभूत् ॥ ९ ॥ तस्य क्रियाकाण्डेषु निष्णातत्त्वमेवाह। यस्येति। देवयजनं यज्ञवाटम् अनु लक्ष्यीकृत्य यज्ञं वितन्वतः यत्र देशे एको यज्ञः कृतस्तत्समीप एव देशे पुनर्यज्ञान्तरं कुर्वत इत्यर्थः। यस्य प्राचीनाग्रैः, कुशैः इदं वसुधातलं सकलभूमण्डलम् आस्तृतम् आसीत्। अत एवायं प्राचीनबर्हिरित्युच्यते ॥ १० ॥

सामुद्रीमिति। प्राचीनबर्हिरिति शेषः। सामुद्रीं समुद्रस्य पुत्रीं देवानां देवो ब्रह्मा तेनोक्तां परिणयनार्थमादिष्टां शतद्रुतिं शतद्रुतिसंज्ञां वीक्ष्य शतशो देवमानवादीनां तदन्तिकद्रवणदर्शनादन्वर्थसंज्ञामित्यर्थः। उपयेमे। तां विशिनष्टि कैशोरीं बालां चारूणि सर्वाण्यङ्गानि यस्यास्तां सुष्ठ्वलंकृतां शोभनालंकारालंकृताम् उद्वाहे परिक्रमन्तीम् अग्निं परिक्रामन्ती-मग्निप्रदक्षिणां कुर्वन्तीमित्यर्थः। यां शतद्रुतिं वीक्ष्य अग्निः, शुकीम् इव चकमे। शुकीमिवेत्यस्यायमर्थः। सप्तर्षीणां सत्रे तद्भार्यादर्शनेनाग्निः कामसंतप्तोऽभूत्। तं च तद्भार्या स्वाहासंज्ञा सप्तर्षिभार्यारूपधारिणी सती रमयामास। रमयित्वा च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्रेतः शुकीरूपेणादाय शरस्तम्बे निधायागच्छत्। तां यथा सप्तर्षिभार्याभ्रान्त्याग्निः कामितवान् तद्वदिति। स्तुकीमिवेति पाठे स्तोकघृतधारामिवेति। केचित्तु विवाहावसरेऽग्निं परिक्रममाणां शुकीसंज्ञां राजपुत्रीं पुरा यथा चकमे तथैनामपि कामितवानित्याहुः ॥११॥ विबुधेति। सूर्यया नवोढया एव नूपुरैः, दिक्षु कणयन्त्या पादयोर्नूपुरधारणं विधाय यतस्ततोऽभियान्त्या यथेत्यर्थः। विबुधासुरगन्धर्वाः मुनिसिद्धनरोरगाः विजिताः वशीकृताः संमोहिता इति यावत् ॥१२॥ प्राचीनबर्हिष इति। प्राचीनबर्हिषः सकाशात् शतद्रुत्यां दश पुत्राः अभवन्। तान्विशिनष्टि। नामानि च व्रतानि च तुल्यानि नामव्रतानि येषां ते। धर्मस्नाता धर्मपरायणाः सर्वे, सर्वेऽपि ते इत्यर्थः। प्रचेतसः प्रचेतोनामानः आसन्निति शेषः ॥ १३ ॥ पित्रेति। प्रजासर्गे प्रजासर्गनिमित्तं तपसे तपश्चर्तुं पित्रा प्राचीनबर्हिषा आदिष्टा आज्ञप्ताः सन्तः वनम् आविशन्। दशवर्षसहस्राणि दशवर्षसहस्रपर्यन्तमित्यर्थः। तपसा तपस्पतिं भगवन्तम् आर्चन्नर्चयामासुः ॥ १४ ॥ यदुक्तमिति। पथि मार्गे दृष्टेन गिरिशेन शिवेन प्रसीदता सता यत् उक्तं तत् ध्यायन्तः तदर्थं चिन्तयन्तः संयताः समाहितचित्ताः जपन्तः मूलमन्त्रजपं कुर्वन्तश्च पूजयन्तः सन्तश्च तपस्तेपुरिति शेषः ॥ १५ ॥ गिरिशेनोक्तमिति यत्त्वयोक्तं तत्किं वा तेनोक्तमिति विदुरः मैत्रेयं पृच्छति। प्रचेतसामिति। हे ब्रह्मन् प्रचेतसां गिरित्रेण शिवेन सह पथि यथा संगमः आसीत्। पाठान्तरे। यस्मिन्काले संगमः आसीत् इति योजना। उत किं च, हरः प्रीतः सन् यत् प्राह तत् अपि नः अर्थवद्यथार्थं यथा स्यात्तथा वद ॥ १६ ॥

संगम इति। हे विप्रर्षे इह संसारे शरीरिणां शिवेन सह संगमः दुर्लभः खलु। मुनयः अभीप्सितं प्राप्तुमिष्टमित्यर्थः। यं शिवम् असङ्गात् विषयान्तरसङ्गत्यागात केवलं दध्युः एव न तु साक्षात प्रापुः ॥ १७ ॥ ननु मुनीनां किं तद्ध्यानेन घोरत्वादित्याशङ्क्याह। आत्माराम इति। योऽयं भगवानुत्पत्त्यादिज्ञानवान् भवो हरः आत्मारामः आत्मनि स्वात्मानन्दे एवारामो रमणं यस्य तथाभूतोऽपि आत्मारामत्वेन लोकसंचारप्रयोजनरहितोऽपीत्यर्थः। अस्य दीनलोकस्य राधसे दीनानुग्रहीतु मिति यावत्। लोककल्पस्येति पाठे अस्य लोककल्पस्य लोकरचनायाः राधसे पालनाय इत्यर्थः। शक्त्या युक्तः स्त्रिया सह वर्त्तमानः सन् घोरया मूर्त्येति शेषः। विचरति न तु स्वतो घोरः ॥ १८ ॥ एवमापृष्टो मुनिस्तत्प्रश्नोत्तरं यथावद्वक्तुमुपक्रमते। प्रचेतस इति। साधवः साधुतोपेताः प्रचेतसः पितुः प्राचीनबर्हिषः वाक्यं शिरसि आधाय प्रजाः सृजतेति वाक्यं पितुर्गौरवेण शिरसाऽनुमोद्येत्यर्थः। तपसि सृष्ट्यर्थकतपश्चरणे आदृतचेतसः सादरमानसाः सन्तः प्रतीचीं दिशं प्रययुः ॥ १९ ॥ समुद्रमिति। समुद्रम् उपसमुद्रात्किंचिन्न्यूनम् उपोऽधिके च इति हीनेऽर्थे उपस्य कर्मप्रवचनीयसंज्ञा तद्योगे द्वितीया। समुद्रसमीपे वा विस्तीर्णं सुमहत् शोभनं सच्छ्रेष्ठं सरः अपश्यन्। महत्त्वमेव स्पष्टयति सार्द्धद्वाभ्याम्। महन्मन इव ज्ञानिनामन्तःकरणमिव स्वच्छं निर्मलं प्रसन्नाः सलिलाशया मत्स्यादयो यस्मिन् ॥ २० ॥ नीलेति। नीलानि च रक्तानि च यान्युत्पलानि नीलोत्पलानि च रक्तोत्पलानि चेत्यर्थः। अम्भोजानि च कह्लाराणि चेन्दीवराणि च तेषामाकरं जन्मस्थानं यद्वा नामैकदेशेन नाममात्रस्य ग्रहणं भीमसत्यादिवदिति न्यायात् नीलानि च रक्तानि चोत्पलादीनि च तदाकरं तत्र नीलोत्पलानि रक्तोत्पलानि च प्रसिद्धानि। उत्पलानि रात्रिविकाशीनि। अम्भोजानि दिनविकाशीनि कह्लाराणि संध्याविकाशीनि। इन्दीवराणि नीलोत्पलानि एतत्पुनरुक्तिः प्राचुर्यज्ञापनार्था। हंसाश्च सारसाश्च चक्राह्वाश्च कारण्डवाश्च तैर्निकूजितं तत्र हंसाः श्वेतगरुतः सारसा गोनर्दाः चक्राह्वाश्चक्रवाकाः कारण्डवा जलनील्यङ्कुराशनाः ॥ २१ ॥ मत्तेति। मत्ताः पुष्पपरागाशनजातमत्ततोपेताः ये भ्रमरास्तेषां यत्सौस्वर्यं तेन हृष्टरोमाणो लताङ्घ्रिपा यस्मिन् उपश्लिष्टलताग्रैर्हृष्टरोमाण इवाङ्घ्रिपा यस्मिंस्तदित्यर्थः। पद्मकोशेषु यद्रजस्तत् दिक्षु विक्षिपंश्चासौ पवनश्च तेनोत्सवो यस्मिंस्तत् ॥ २२ ॥

तत्रेति। तत्र सरोवरे मृदङ्गपणवाभ्यामन्वितं सहितं मृदङ्गपणवाद्यनु इति पाठे मृदङ्गपणवादिवाद्यमनु पश्चात् दिव्यैर्मार्गैः प्रकारभेदैर्मनोहरं गान्धर्वं गानम् आकर्ण्य ते राजपुत्राः विसिस्म्युः विस्मयं प्राप्ताः ॥ २३ ॥ तर्हीति। तर्हि एव तदैव तस्मात्सरसः, निष्क्रामन्तं निर्गच्छन्तं सहानुगं प्रमथादिगणसहितं विबुधानामनुगा गन्धर्वकिन्नरादयस्तैः उपगीयमानं संप्रगीतगुणगणम् अमरेषु देवेषु प्रवरः श्रेष्ठस्तम् ॥ २४ ॥ तप्तेति। तप्तश्चासौ हेमनिकायः सुवर्णराशिस्तद्वदाभातीति तं तप्तहेमराशिसदृशकान्तिमित्यर्थः। शितिर्नीलः कण्ठो यस्य तं प्रसादसुमुखं प्रसन्नताभिमुखं त्रीणि लोचनानि यस्य तं रुद्रं वीक्ष्य जातकौतुकाः संजातहर्षाः प्रचेतसः प्रणेमुः। सम्यक् नमस्कृतवन्तः। उभयोरेकसंबन्धः ॥ २५ ॥ स इति। प्रपन्नार्त्तिहरः स्वशरणागतदुःखनिवर्त्तकः भक्तवत्सलः भगवान् स रुद्रः धर्मज्ञान् शीलसंपन्नान् विनयादिशुभशीलयुक्तान् प्रीतान्स्वदर्शनप्रीतियुतान् तान् प्रचेतसः प्रति प्रीतः तेषु प्रीतिमान् सन् ह स्फुटं यथा तथा उवाच ॥ २६ ॥ उक्तमेवाह यूयमिति यावदध्यायसमाप्ति। यूयमिति। हे प्रचेतसः यूयं वेदिषदः प्राचीनबर्हिषः पुत्राः वो युष्माकं चिकीर्षितं भगवदाराधनरूपं यत्कर्तुमभीष्टं तत्, विदितम्। वो युष्माकम् अनुग्रहाय युष्माननुग्रहीतुमित्यर्थः। मे मम, दर्शनम् एवं कृतं मया कारितमित्यर्थः। भद्रं भवतां भद्रं स्यात्। भद्रमिति दर्शनविशेषणं वा ॥ २७ ॥ अनुग्रहकारणमाह। य इति। त्रिगुणात्त्रिगुणात्मकात् तमसः प्रधानात जीवसंज्ञितात् क्षेत्रज्ञाच्च साक्षात् परं विलक्षणं रंहसः साक्षादिति पाठे रंहसः सूक्ष्मात्कारणावस्थावतः त्रिगुणात्कार्यावस्थावतः प्रधानात् भगवन्तं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासुदेवं यः प्रपन्नः सः मे मम प्रियः. हि भगवद्भक्तस्य सर्वोत्तमत्वादिति भावः ॥ २८ ॥ तस्य सर्वोत्तमत्वमेवाह । स्वधर्मनिष्ठ इति । पुमान् स्वधर्मनिष्ठः सन् शतजन्मभिः विरिञ्चिताम् एति । ततः परं माम् एति । हि अस्य तु एतावत्येव गतिः । भागवतः तु अथ देहान्ते अव्याकृतं चक्षुरादीन्द्रियानभिगम्यं वक्तुमयोग्यं वा । वैष्णवं पदं तथा एति । कथमिव यथा विबुधाः देवाः अहं च कालात्यये स्वस्वाधिकारान्ते अव्याकृतं वैष्णवं पदं यामस्तद्वत् । भगवद्भक्तिरहितं यथा भवति तथा बहुजन्मपर्यन्तं स्वधर्मस्थित्यादिना सुकृतातिशयेन ब्रह्मपदं प्राप्य ततोऽपि पुण्यातिशयेन मत्पदं प्राप्य स्थितिः नातोऽधिकं फलम् । तत्राप्यस्मत्सङ्गेन भगवन्निष्ठावत्त्वेऽस्माकं यथा अधिकारभोगान्ते लिङ्गभङ्गे सति भगवत्पदप्राप्तिः तथा कालान्तरे स्यात् । भागवतानां तु देहान्ते एव भगवत्पदप्राप्तिरिति महानेव भागवतानां महिमेति भावः ॥ २९ ॥

अथेति । हे प्रचेतसः यूयं भागवता भगवद्भक्ताः स्थ भवथ । अथातो हेतोः मम भगवान् यथा प्रियः एवं यूयमपि, प्रियाः स्थ । मत् मम, भागवतानां भागवतेभ्यः अन्यः कश्चन कश्चित् प्रेयानतिप्रियः न अस्ति ॥ ३० ॥ इदमिति । हे प्रचेतसः विविक्तं विवेचकं प्रकृतिपुरुषविलक्षणत्वेन परमात्मस्वरूपविवेककरमित्यर्थः । अत एव पवित्रम् अत एव मङ्गलं मङ्गलकरं निःश्रेयसकरं परमपुरुषार्थसाधनं च अत एव परम् अपि इदं वक्ष्यमाणं जप्तव्यं जपनार्हं यत् वो युष्मभ्यं वदामि तत् श्रूयताम् ॥३१॥ इतीति । इत्येवम् अनुक्रोशहृदयः कृपायुक्तमानसः भगवान् नारायणः एव परः प्राप्यः प्रापकश्च यस्य सः शिवः बद्धाञ्जलीन् कृतकरसंपुटान् तान् राजपुत्रान् प्रति वचो वाक्यम् आह ॥ ३२ ॥ तत्रादौ भगवतः सर्वान्तरात्मत्वं वदन्नमस्करोति । जितमिति । आत्मविदो ज्ञानिनस्तेषां धुर्यो रक्षकस्तत्संबुद्धौ हे आत्मविद्धुर्य ते तव जितमुत्कर्षः स्वरूपतो गुणतश्च तव निरतिशय एवोत्कर्ष इत्यर्थः । जितमिति भावे क्तः । स्वस्तये सुखाय आत्मविदामिति शेषः अस्ति । अतः मे आत्मविदन्तर्गताय मह्यं यद्वा मे त्वदुपासननिष्ठस्य मम स्वस्ति अस्तु । ननु ममोत्कर्षो मदर्थं एव किं न स्यात्तत्राह । भवता परमेश्वरेण त्वया, राधसा निरवधि तिशयैश्वर्येण । राद्धं सिद्धम् । त्वं परमानन्दरूपेणैव नित्यं स्थित इत्यर्थः । अतः आत्मने चिदचिदन्तरात्मतया स्थिताय अत एव सर्वस्मै सर्वरूपाय सर्वप्रपञ्चात्मकतया तद्रूपायेत्यर्थः । अत्र सर्वत्र चतुर्थ्यन्तेभ्यः परमेश्वराय तुभ्यमिति नमःशब्दात्पूर्वमनुषञ्जनीयम् । नमः नमस्कुर्मः । अनेन सर्वोत्कृष्टतया परमेश्वरस्य प्रणमनमभिहितम् ॥ ३३ ॥ अन्यदप्युत्कर्षापादकं गुणजातं वदंस्तद्विशिष्टत्वेन नमस्करोति । नम इति । पङ्कजं लोकात्मकपद्मं नाभौ यस्य तस्मै अनेन कार्यावस्थप्रपञ्चात्मतोक्ता । भूतसूक्ष्माणि चेन्द्रियाणि च तेषामात्मा आश्रयस्तस्मै अनेन कारणावस्थप्रपञ्चात्मतोक्ता । इदानीमुभयनिर्वाहकमन्तरात्मत्वं तत्प्रयुक्तदोषास्पृष्टत्वं चाह । वासुदेवाय सर्वान्तरात्मकत्वगुणविशिष्टाय शान्ताय अशनायापियासाशोकमोहजरामृत्युसंज्ञोर्मिषट्कविरहिताय अत एव कूटस्थाय निर्विकाराय अत एव स्वरोचिषे नित्यासंकुचितापरिच्छिन्नप्रकाशाय नमः ॥ ३३ ॥

कारणावस्थप्रपञ्चात्मकत्वस्य प्रपञ्चसंहारपूर्वकत्वाज्जगत्संहर्तृत्वगुणविशिष्टतामाह । संकर्षणायेति । कर्षत्याकर्षयति स्वस्मिन् जगदुपसंहरति इति कर्षणः समित्येकीकारे अविभक्तनामरूपतयैकीकारत्वेन कर्षणः संकर्षणस्तस्मै संकर्षणाय केन प्रकारेणोपसंहर्तृत्वं तत्राह । अन्तकाय मुखाग्निना दाहनपूर्वं लोकविनाशकाय च अत एव सूक्ष्माय नामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टाय दुरन्तायान्तरहिताय अनुपसंहार्यायेत्यर्थः । संहारो हि कार्यस्य कारणेन सह संश्लेषः । तस्य कारणान्तराभावेनानुपसंहार्यत्वात्कारणानां काष्ठाभूतोऽर्थः फलितः । एवं कार्यावस्थाकारणावस्थावत्प्रपञ्चरूपत्वेन नमस्कृत्य जगद्रक्षकत्वेन तदुपयुक्तगुणविशिष्टत्वेन च नमस्करोति । नम इति । विश्वं प्रबोधयति धर्मादिपुरुषार्थतत्प्राप्तिप्रकाशकवेदाख्यशास्त्रोपदेशेनावेदयतीति विश्वप्रबोधस्तस्मै विश्वोज्जीवयित्रे इत्यर्थः । न केवलमुपदेशमात्रेण विश्वोज्जीवयितापि तु रामकृष्णाद्यवतारात्मकव्यूहरूपाविर्भावेनापि साध्वनुग्रहासाधुनिग्रहादिभिश्चोक्तविधयेत्याह । प्रद्युम्नाय दुष्टनिग्रहसाध्वनुग्रहैकप्रयोजनरामकृष्णादिचतुर्व्यूहात्मना प्रादुर्भावभाजे इत्यर्थः । अन्तरात्मने च सर्वदेशकालावस्थासु युगपत्सर्वजगदन्तःप्रवेशपूर्वकं प्रशासनं भजतेऽपीत्यर्थः । नमो नमस्कुर्मः ॥ ३५ ॥ नम इति । हृषीकेशमिन्द्रियेशं यन्मनस्चेन्द्रियाणि च तेषामात्मा तस्मै अनिरुद्धायानिरुद्धव्यूहरूपाय एवं श्लोकत्रयोक्तवासुदेवसंकर्षणप्रद्युम्नानिरुद्धात्मचतुर्व्यूहभावभाज इत्यर्थः । नमः । हन्ति कर्माख्यं पुण्यपापरूपं मलमाश्रितेष्विति हंसः परमश्चासौ हंसः परमहंसस्तस्मै अपहतपाप्मने इत्यर्थः । केचित्तु परमहंसाय सूर्यायेति वदन्ति । अत एव निर्वृतात्मने शोकरहिताय पाठान्तरे क्षयवृद्धिशून्याय नमः । पूर्णायोक्तरीत्या सर्वगुणसंपन्नत्वात् स्वतेजसा विश्वव्यापिने इत्यर्थः । नमः नमसो मुहुरुक्तिस्तत्तद्गुणविशेषविशिष्टत्वाभिप्रायैवात्रावगन्तव्या ॥ ३६ ॥ अन्यदपि गुणजातमस्य जगद्रक्षणत्वोपयुक्तत्वादाह । स्वर्गेति । स्वर्गश्चापवर्गश्च तयोर्द्वारं साधनभूतस्तस्मै नित्यं सदा शुचिषु योगिचित्तेषु सीदति रमते इति शुचिषत्तस्मै योगिभिर्नित्यमुपास्यत्वेन तत्समीहितापवर्गप्रदात्रे इत्यर्थः । नमः । हिरण्यं वीर्यं यस्य सोऽग्निस्तस्मै अग्निरूपाय अत्र वीर्यशब्दोऽपत्यपरः 'अग्नेरपत्यं प्रथमं हिरण्यम्' इति श्रुतेः । चतुर्णां होतॄणामयं चातुर्होत्रस्तस्मै तन्तवे यज्ञाय चतुर्होतृसाध्ययज्ञरूपायेत्यर्थः । नमः । यज्ञरूपत्वयज्ञाराध्यत्वतत्फलप्रदत्वादिभिः स्वर्गद्वारायेति भावः ॥ ३७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम इति। ऊर्क् पितृणामन्नं तस्मै इट् देवानामन्नं तस्मै पित्रादीनां तृप्तिमापादयंस्तदन्तर्यामिरूपेण यः फलप्रदस्तस्मै इत्यर्थः। त्रय्याः वेदस्य पतये रक्षकाय प्रतिपाद्याय च यज्ञस्य रेतः फलं तस्मै यज्ञरेतसे सोमायेति वा। तस्य पितृदेवान्न-रूपत्वादिति जीवानां वृत्तिदाय च शब्दस्पर्शादिविषयानुभवसुखप्रदायेत्यर्थः। अत्र तृप्तिदायेत्यपि पाठः। सर्वे ये रसाः कटवम्ललवणमाधुर्यादयस्तदात्मने तद्रूपाय 'रसोऽहमप्सु कौन्तेय' इति स्मृतेः। नमः॥ ३८॥ सर्वेति। स्थवीयसे स्थूलाय विशेषाय पृथिव्यात्मने गन्धरूपायेत्यर्थः। 'पुण्यो गन्धः पृथिव्यां च' इति भगवद्गीतोक्तेः। एवं गन्धरसादिरूपेण वृत्तिदत्व-मुक्तमथ भोग्यभोगोपकरणभोगस्थानादिरूपेण वृत्तिदत्वमाह। सर्वं सत्त्वं सकलमचेतनजातं भोग्यं भोगोपकरणभोगस्थानरूपं च आत्मानः सर्वे भोक्तारो जीवाश्च देहः शरीरं यस्य तस्मै सहओजोबलाय तद्वृद्धिहेतवे यद्वा। सह आदिरूपेणापि वृत्तिप्रदाय केचित्तु सहस्तितिक्षाशक्तिः ओजोऽवष्टम्भशक्तिः बलं बाह्याद्यवयवशक्तिरिति वदन्ति। त्रैलोक्यपालाय त्रैलोक्यान्तर्गतकृत्स्न-जगत्पालाय च, नमः॥ ३९॥ एवं तदेकासाधारणैर्धर्मैः सर्वोत्कृष्टतया नमस्कृत्य चिदचिदात्मकं कृत्स्नमपि वस्तु तच्छरीरमेवा-तस्त्वत्तो नोत्कृष्टमस्तीत्यभिप्रायेण सर्वात्मकत्वेन नमस्करोति अर्थेति। अर्थानां लिङ्गं ज्ञापकं तस्मै शब्दगुणत्वात् नभसे आकाश-रूपाय अन्तर्बहिरात्मने अन्तर्बहिश्च व्याप्य स्थिताय 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेः। नमः पुण्याय यज्ञादिपुण्यशरीराय अमुष्मै तत्साध्यस्वर्गादिरूपाय एवं लोकाय एतल्लोकरूपाय भूरिवर्चसे ज्ञानप्रचुरजीवरूपाय नमः॥ ४०॥ प्रवृत्तायेति। प्रवृत्ताय निवृत्ताय च, कर्मणे प्रवृत्तिनिवृत्त्यात्मककर्मरूपायेत्यर्थः। पितृदेवाय पितृशरीराय चेत्यर्थः। धर्मविपाकाय धर्मोऽत्रानभिसंहितफलभगवदाराधनरूपः तस्य विपाकः फलं तस्मै निवृत्तिधर्मफलरूपायेत्यर्थः। दुःखदाय मृत्यवे दुःखप्रद-मृत्युरूपाय चेत्यर्थः। नमः॥ ४१॥ नम इति। हे ईश आशिषां धर्मादीनां कारणात्मने फलप्रकाशकाय मनवे सर्वज्ञाय स्वायंभुवादिमनुरूपाय वा। मन्वन्तराधिदैवताय वा मन्त्ररूपाय वा नमः। एवं सर्वात्मकत्वेन नमस्कृत्य साक्षात्त्वेन नमस्करोति। बृहते स्वरूपेण गुणैश्च निरतिशयबृहत्त्वाय धर्माय धर्मरूपाय कृष्णाय स्वत एव कृष्णशब्दवाच्याय अकुण्ठमेधसे अप्रतिहतज्ञानाय ते तुभ्यं नमः॥ ४२॥

पुरुषायेति। पुराणपुरुषायेत्यर्थः। कपिलाद्यंशावताररूपेण परमेश्वरं नमस्करोति। सांख्यं च योगश्च तयोरीश्वरस्तस्मै द्वन्द्वान्तत्त्वादीश्वरशब्दः प्रत्येकं संबध्यते। ततः सांख्येश्वरः कपिलो योगेश्वरो हिरण्यगर्भस्तद्रूपायेत्यर्थः। शक्तित्रयसमेताय ज्ञानशक्तिक्रियाशक्तीच्छाशक्तियुक्ताय एतच्छक्तित्रयप्रपञ्चः सौधासैन्धवीयपञ्चपष्टितमे तरङ्गेऽस्ति स यथा 'स्वयंप्रकाशानन्दस्तं ततोऽपृच्छत्पुनः प्रभुम्। ज्ञानशक्तिः क्रियाशक्तिरिच्छाशक्तिस्तथा त्वयि। वर्त्तन्ते ताः कथं ज्ञेया इति पृष्टो जगाद सः। जीवा एते तु यत्सत्त्वप्रधानं कर्म चक्रिरे। स्थानं तत्फलभोगस्य तेऽवस्थां यान्ति जाग्रतम्। रजःप्रधानं यत्कर्म प्राग्जीवाश्चक्रुरस्य तु। फलोपभोगस्थानं ते स्वप्नावस्थानं ते स्वप्नावस्थां प्रयान्ति हि। तमःप्रधानमेते तु प्राग्यत्कर्म स्म कुर्वते। ते सुषुप्तिं तत्फलोप-भोगस्थानं व्रजन्ति वै। स्वापं यान्ति यदा ते हि भवन्त्यश्मोपमास्तदा। स्वं न जानन्ति सर्वेऽपि मूर्खा वा पण्डिता अपि। स्ववर्णं स्वाश्रमं स्वार्थं स्वरूपं स्वाभिधां तथा। स्ववयःस्वक्रियादीनि नैव जानन्ति ते खलु। तदा तान्बोधयित्वैव ज्ञानशक्त्या तदीयकम्। सर्वं बोधयति द्रष्टृरूपो हि भगवान् स्वयम्। एवं प्रभौ ज्ञानशक्तिः स्थितास्तीत्यवगम्यताम्। क्रियाः कारयते सर्वान् क्रियाशक्तिश्च तत्स्थिता। इच्छाशक्तिः प्रभुस्था या वेच्छां कारयतेखिलान्। ब्रह्माण्डानां च सर्गादि मुहुर्भवति वै तया। एकस्यां वर्त्तमानानामवस्थायां तथात्मनाम्। अवस्थान्तरयानं यत्तदप्यस्ति तयैव हि। न हि कर्मवशा जीवा भोग्यावस्थां स्वसंश्रिताम् हित्वा निजेच्छया यातुमन्यावस्थां क्षमाः क्वचित्। फलप्रदाता सर्वेषां कर्मणामस्ति हीश्वरः। अतस्तदिच्छयैवैते भुञ्जते कर्मजं फलम्। एतास्तु शक्तयो नृणां गुणकर्मानुसारतः। ज्ञानादीन्प्रेरयन्तीति वैषम्यं न जगत्पतेः' इति। केचित्त्वत्र ब्रह्मेन्द्रकालरुद्ररूपं शक्तित्रयमिति वदन्ति। कर्तृकरणकर्मरूपं शक्तित्रयमित्यन्ये। मीढुषे वर्षप्रदसूर्यात्मकपर्जन्यरूपाय 'तपाम्यहमहं वर्षं निगृह्णाम्यु-त्सृजामि च' इति पर्जन्यस्यापि भगवद्विभूतित्वावगमात्। अहंकृतमहंतत्त्वं तदात्मने। चेतस आकृतिः स्वरूपं तदेव रूपं यस्य तस्मै 'यस्याहंकारः शरीरं यस्य मनः शरीरम्' इति श्रुतेः चेतआकूतिरूपायेति पाठे चेतो ज्ञानमाकूतिः क्रिया तद्रूपाय चेतस आकूतिरभिप्रायस्तं रूपयति समर्थयति इति चेतआकूतिरूपस्तस्मै इति वा। वाचः सरस्वत्याः विविधा भूतिः सृष्टिर्येनासावेन वा स तस्मै चापि नमः॥ ४३॥ एवं परमेश्वरतापादकगुणगणविशिष्टं भगवन्तं नमस्कृत्य तदीयदिव्यमङ्गलविग्रहदर्शनं प्रार्थयमानो विग्रहं चापि भगवतो वर्णयति। दर्शनमिति नवभिः। भागवतैर्भगवदेकान्तिकभक्तैरर्चितं तवेति शेषः। रूपं दिदृक्षूणां द्रष्टुमिच्छूनां नोऽस्माकं दर्शनं देहि। रूपं विशिनष्टि सार्द्धसप्तभिः। स्वानां स्वैकान्तिकभजनानां प्रियतममतिशयितप्रेमास्पदं सर्वेषामिन्द्रियाणां ये गुणा असाधारणधर्माः श्रवणस्पर्शनदर्शनरसनघ्राणनादयस्तैरञ्ज्यते ऽभिव्यज्यते इति सर्वेन्द्रियगुणाञ्जनं यद्वा। सर्वेषां सकलानामिन्द्रियाणामप्राकृताक्षाणां तद्गुणानां शब्दादीनां चाञ्जनमभिव्यक्तिर्यस्मिंस्तत्। 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस' इति श्रुतेः॥ ४४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्निग्धो मेचकवर्णश्चासौ प्रावृड्घनो वर्षायां वर्षन्नम्बुदस्तद्वत् श्यामं तमालवर्णमित्यर्थः। सर्वेषां सौन्दर्याणां संग्रहो संग्रहो यस्मिंस्तत् चारवः सुन्दरा आयता आजानुलम्बिनश्चत्वारो बाहवो यस्मिंस्तत् सुजातं सुकुमारं रुचिरं चाननं यस्मिंस्तत् ॥ ४५ ॥ पद्मेति। पद्मकोशे कमलस्य कोशमध्ये यानि पलाशानि पत्राणि तद्वदक्षिणी यस्मिंस्तत् सुन्दरे भ्रुवौ यस्मिंस्तत् सुतरां शोभमाना नासिका यस्मिंस्तत् सुशोभना द्विजा दन्त यस्मिंस्तत सुतरां शोभनौ कपोलौ यस्मिंस्तदास्यं मुखं यस्मिंस्तत बहुव्रीहिगर्भोऽयं बहुव्रीहिः। समौ समानताभाजौ यौ कर्णौ तावेव विभूषणं यस्मिंस्तत। कुण्डलयोरग्रे वक्ष्यमाणत्वात् ॥ ४६ ॥ प्रीतीति। प्रीत्या प्रहसिताविवापाङ्गौ यस्मिंस्तत् अलकैः कुन्तलैरुपशोभितं लसद्दीप्यमानं यत्पङ्कजं तस्य ये किञ्जल्कास्तद्वत् दुकूलं यस्मिंस्तत् पीतपीताम्बरपरिधानमनोहरमित्यर्थः। मृष्टे उज्ज्वले कुण्डले यस्मिंस्तत् ॥४७॥ स्फुरदिति। किरीटं च वलये च हाराश्च नूपुरौ च मेखला च तत्समाहारः स्फुरत् किरीटादिकं यस्मिंस्तत् शङ्खश्च चक्रं च गदा च मालाश्च मणयोऽलंकारगतहीरकाश्च तैरुत्तम श्रद्धिर्लक्ष्मीरस्त्यस्मिन्निति तथाभूतम् ॥ ४८ ॥ सिंह इति। सिंहस्येव स्कन्धौ तयोस्त्विषः कुण्डलहारादिदीप्तयस्ताः त्विष इति द्वितीयाबहुवचनम्। बिभ्रत् सौभगा या ग्रीवा तस्यां कौस्तुभो यस्मिंस्तत् अनपायिन्या श्रिया हेतुभूतया आक्षिप्तस्तिरस्कृतो-निकषाश्मासुवर्णरेखाङ्कितो निकषणपाषाणो येन तादृशेनोरसा उल्लसच्छोभमानम् ॥ ४९ ॥ पूरेति। पूरशब्दे 'विनापि प्रत्ययं पूर्वोत्तरयोर्वा लोपः'। इति कलोपः। पूरकश्च रेचकश्च ताभ्यां श्वासाभ्यां संविग्नाश्चपलाः या वलयस्ताभिर्वल्गु सुन्दरं दलवदश्वत्थपत्रसदृशमुदरं यस्मिंस्तत् आवर्त्तो जलभ्रमस्तद्वद्गभीरा गम्भीरा तया नाभ्या विश्वं प्रतिसंक्रामयत् इव यत् इव यतः आदौ विश्वं नाभिद्वारेण निर्गतमस्तितत् आवर्त्तगभीरनाभ्यां पुनः प्रवेशयदिव स्थितमित्यर्थः ॥ ५० ॥ श्यामेति। श्यामयोः श्रोण्योर्नितम्बयोरधिकं रोचिष्णु यद्दुकूलं पीतमम्बरं यत्र स्वर्णा स्वर्णमयी मेखला यस्मिंस्तत् अङ्घ्री च जङ्घे ऊरू च निम्ने अनुन्नते जानुनी च समैश्चारुभिश्चाङ्घ्र्यादिभिः सुशोभमानं दर्शनं यस्य तत् यद्वा। समं सुन्दरम् अङ्घ्रिजङ्घोरु यस्मिंस्तत् निम्ने जानुनी यस्मिंस्तत् सुशोभनं दर्शनं यस्य तत इति पदत्रयम् ॥ ५१ ॥

एवं रूपशब्दोपात्तं भगवद्विग्रहमनुवर्ण्य तद्दर्शनं प्रार्थयते। पदेति। शरदि यत्पद्मं तस्य यानि पलाशानि तद्वद्रोचिर्यस्य तेन तत्रापि नखद्युतिमिश्ररणनखकान्तिभिः नोऽस्माकम् अन्तरघमन्तः स्थितं पापहेतुकमज्ञानं विधुन्वता अपनयता पदा चरणेन अपास्तं निरस्तं साध्वसं भक्तानां भयं येन तत् स्वीयं भवदीयं पदं रूपं प्रदर्शय। यद्वा उक्तविधेन पदा उपलक्षितस्त्वम् अपास्त-साध्वसं स्वीयं पद्यतेऽवगम्यते इति पदं रूपं प्रदर्शय। हे गुरो यतः त्वमेव तमोजुषामज्ञानिनां मार्गगुरुः मार्गप्रदर्शको गुरुः भवसि ॥ ५२ ॥ 'न मांसचक्षुरभिवीक्षते तं न चक्षुषा पश्यति कश्चनैनम्। हृदामनीषामनसाभिक्लृप्तः' इत्यादिश्रुतेः प्राकृत-चक्षुरादिभिरग्राह्यं योगपरिशुद्धमनोग्राह्यमप्राकृतं मदीयं रूपमपरिशुद्धमनास्त्वं कथं प्रदर्शयेति प्रार्थयसे इत्याशङ्कायामाह। एतदिति। एतदुक्तविधं रूपं भवदीयस्वरूपम् आत्मशुद्धिमन्तःकरणनैर्मल्यम् अभीप्सतामस्माकम् अनुध्येयं केवलं ध्यानार्हमेव न तु प्रत्यक्षतः प्राप्यमित्यर्थः। तर्हि प्रत्यक्षतयास्य प्राप्तिः कदा स्यादिति चेत्स्वधर्मे स्थित्वा विहितभक्तियोगजातान्तःशुद्ध्युद्भूतपरम-भक्तियोगेनेति मनसि निधायाह। स्वधर्म स्ववर्णाश्रमोचितवृषम् अनुतिष्ठतां पुंसाम् अभयदः साक्षान्मोक्षसाधनभूतः भक्तियोगः यद्यदा भवेत्तदेति शेषः। अयं भावः। उक्तरीतिविहितध्यानजातस्वधर्मस्थितिसंजातान्तःशुद्ध्युद्भूतभक्तियोगोत्थपरमभक्तियोगो यदा स्यात्तदा साक्षात्कार इति ॥ ५३ ॥ एवं ध्यानयोगोऽपि प्रोक्तप्रणाल्या परमभक्तियोगरूपेण परिणमति तद्वता तु भवान् लभ्य इत्याह। भवानिति। सर्वदेहिनां दुर्लभः अपि भवान् भक्तिमता प्रशंसायां मतुप्। परमभक्तिमतेत्यर्थः। लभ्यः एव। दुर्लभत्व-मेवाह। एकान्तेनाव्यभिचारितया य आत्मवित्तस्य गतिर्गम्यः अलुक्समासः। उक्तविधभक्तियोगनिष्ठानां प्राप्यस्त्वं स्वेन राजते इति स्वराट् तस्य भावः स्वाराज्यं तस्य संबन्धमात्रविवक्षयापादानानुक्त्या षष्ठी। स्वाराज्यादित्यर्थः। अभिमतः स्वाराज्यं ह्यात्मभावस्ततोऽपि स्पृहणीय इत्यर्थः ॥ ५४ ॥ एवं भवतोऽत्यन्तस्पृहणीयत्वात्त्वत्तो नान्यत्किंचिद्वाञ्छामीत्याह। तमिति। दुराराध्यमुपायान्तरैराराधयितुमशक्यं तं भवन्तं सतां साधूनामपि दुरापया दुःसाध्यया एकान्तभक्त्याऽव्यभिचारिण्या भक्त्या, आराध्य पादमूलं त्वत्पादमूलं विना बहिः अन्यत् स्वर्गादिसुखमित्यर्थः। कः वाञ्छेन्न कोऽपीत्यर्थः ॥ ५५ ॥ तत्र हेतुमाह। यत्रेति। यत्र पादमूले अरणं शरणं निर्विष्टं पादमूलशरणं संप्राप्तं जनमित्यर्थः। वीर्यं प्रभावश्च शौर्यमुत्साहश्च ताभ्यां विस्फूर्जिता क्षुभिता या भ्रूस्तया विश्वं कृत्स्नं जगत् विध्वंसयन्नाशयन् कृतान्तः कालः न अभिमन्यते। मयाऽयं वशीकृत इति नाभिमानं करोतीत्यर्थः ॥ ५६ ॥

त्वत्पादमूलं प्रविष्टस्य कृतान्तभयाभावः महान् लाभ इति न मन्तव्यं यतः त्वद्भक्तस्य एव सकलपुरुषार्थश्रेणिशिरसि नरीनर्त्ति ततः कियानयं लाभ इत्याह। क्षणार्द्धेनेति। भगवत्सङ्गिनां भगवतस्तव भक्तानां यः सङ्गस्तस्य क्षणार्द्धेनापि स्वर्गं न तुलये समानं न गणयामि अपुनर्भवं कैवल्यमोक्षमपि न तुलये। यदा भागवतसङ्गस्य सदृशौ स्वर्गमोक्षौ न भवतस्तदा मर्त्यानां मरण-शीलानाम् आशिषः आशीर्विषयपुत्रपश्वादीनि किमुत किं पुनः समानानि न भवन्ति तत्र किं वक्तव्यमित्यर्थः ॥ ५७ ॥ अथेति। अथातो हेतोरेवं भागवतसङ्गस्य निरतिशयगुणवत्तरत्वाद्धेतोरित्यर्थः। अनघावघहरावङ्घ्री यस्य तस्य तव कीर्त्तिश्च तीर्थं च तयोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यशसि गङ्गायां चेत्यर्थः। क्रमेण अन्तः बहिश्च स्नानाभ्यां विधूतः पाप्मा येषाम् अत एव भूतेषु अनुक्रोशः कृपा सुसत्त्वं रागादिरहितं चित्तं शीलमार्जवादिकं च विद्यन्ते येषां तेषां भागवतानां संगमः नः अस्माकं स्यात् एष एव तत्र अनुग्रहः ॥ ५८ ॥ किं बहुना त्वज्ज्ञानमपि त्वद्भक्तसङ्गादेव भवतीत्याह। नेति। येषां भागवतानां यो भक्तियोगस्तेनानुगृहीतम् अत एव विशुद्धं सत्त्वप्रवणं सत् यस्य पुंसः चित्तं बहिरर्थाः शब्दादिबाह्यविषयास्तेषु विभ्रमं न भजति। तान्प्राप्य भ्रान्तिमन्न भवतीत्यर्थः। तमोगुहायां तमोरूपायां गुहायां च न आविशेत्। यद्वा लीनं न स्यादित्यर्थः। तत्र तदा स मुनिः ते तव गतिं स्वरूपम् अञ्जसा सुखेन विचष्टे जानाति ननु ॥ ५९ ॥ गतिं विशिंषन् प्रपद्यते यत्रेति द्वाभ्याम्। यत्रेदमिति। इदं दृश्यमानं कृत्स्नं विश्वं चिदचिदात्मकं जगत् यत्र यस्मिन् आधारभूते त्वत्स्वरूपे व्यज्यते सुव्यक्तं यथा तथा भाति यत् त्वत्स्वरूपं विश्वस्मिन्कृत्स्ने प्रपञ्चे अवभाति सम्यक् प्रकाशते व्याप्नोतीति यावत्। तदेव ब्रह्म ब्रह्माख्यं तत्त्वं परं ज्योतिः स्वप्रकाशं भवतीत्यर्थः। विस्तृतमन्तर्यामितया सर्वत्र विस्तृतं विद्यमानमपि आकाशः इव निर्लेपं पाठान्तरेऽप्ययमेवार्थः। यद्वा। यत्रेदमित्यनेनाधारत्वमुक्तं तत्र औपश्लेषिकादिभेदभिन्नेष्वाधारेष्वयमभिव्यापकः। तथात्वेऽपि व्याप्यवस्तुगतदोषास्पर्शित्वे दृष्टान्तद्वयं सूर्यादिरूपं परं ज्योतिरिव आकाश इव विस्तृतम् एतदुभयं दृष्टान्तीकृत्याभियुक्तैरुक्तम्। 'आकाशमेकं हि यथा घटादिषु पृथग्भवेत्। तथात्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमान्' इति। अस्यायमभिप्रायः। घटकरकादिषु वृद्धिह्रासः यः स तद्गत आकाशेनेक्ष्यते। तद्वदेवायं परमात्मापि। यथा जलाधारगतदोषैस्तत्र परिदृश्यमानोऽप्यंशुमान्न दोषभाक् तथा परमात्मापि। एवं दृष्टान्तद्वयेन परमात्मनो व्याप्यगतदोषास्पर्शित्वमेवाभिहितम् ॥ ६० ॥

एवं भगवतो विश्वाधारत्वं तद्गतदोषास्पर्शित्वं चोक्तमथ भगवतो निमित्तोपादानकारणत्वमाह। य इति। यः भगवान्, स्वात्मकमिति शेषः। इदं विश्वं पुरुरूपया बहुरूपया बहुधा परिणामशीलयेति यावत्। आत्मसु जीवेषु दुःस्था दुष्टं यथाभवति तथा स्थिता तया, संसाररूपानर्थकारित्वेन स्थितयेत्यर्थः। यया मायया भेदबुद्धिः जीवानां प्राकृतभावे स्वताबुद्धिः, सदिव परिणामिन्यपि सत्यताप्रतीतिः जायते तथाभूतया मायया स्वशक्त्यात्मिकया प्रकृत्या सृजन्नुत्पादयन् बिभर्त्ति। भूयः पुनः क्षपयति संहरति तथापि अविक्रियः निर्विकारः। आत्मतन्त्रं तं त्वां परमेश्वरम्, हे भगवन् प्रतीमहि प्रपद्यामीत्यर्थः ॥ ६१ ॥ एवमीदृशं भगवत्स्वरूपविषयकं ज्ञानं भक्त्यात्मकं तच्च भगवत्सङ्गादेव लभ्यते इत्युक्तं सांप्रतं भागवतसङ्गवत्स्वस्ववर्णाश्रमोचितमनभिसंहितधर्मानुष्ठानमात्मयाथात्म्यज्ञानयोगश्च भक्त्यङ्गमित्याह। क्रियाकलापैरिति। ये योगिनः, कर्मयोगिनो जनाः, श्रद्धान्विताः सन्तः क्रियाकलापैरनभिसहितफलैः क्रियासमूहैः, इदमेवोक्तप्रकारमेव, भूतानि च इन्द्रियाणि च अन्तःकरणं च तैरुपलक्ष्यते इति भूतेन्द्रियान्तःकरणोपलक्षणं, अप्राकृतोक्तविधदिव्यमङ्गलविग्रहविशिष्टमित्यर्थः। भवत्स्वरूपमिति शेषः। सिद्धये मुक्तये साधु सम्यग्यथातथा यजन्ति आराधयन्ति। ते एव योगिनः वेदे कर्मयोगप्रकाशके निगमे च तन्त्रे पञ्चरात्रागमे च कोविदाः कुशलाः भवन्ति ॥ ६२ ॥ पूर्वश्लोकेऽविक्रिय इत्यनेनोपादानकारणत्वमुपक्षिप्तं बिभर्त्तीति भर्तृत्वं क्षपयतीति संहर्तृत्वं च तदेवोपपादयति चतुर्भिः। त्वनेक इति। तत्र त्वमित्युपादानत्वमुपपादयति। त्वमुक्तविधस्वरूपगुणविभूतिर्भवान् आद्यः सृष्टेः पूर्वभवः, पुरुषः प्रलयदशायामप्यासीदित्यर्थः। कथंभूतोऽहं तत्रासमित्यत्राह। सुप्ताः स्वस्मिन् लीनाः शक्तयश्चिदचिदादयो यस्य सः अत एव एकोऽसहायः ततः तया स्वापृथक्सिद्धविशेषणभूतया शक्त्या रजःसत्त्वतमः द्वन्द्वैक्यम्। विभिद्यते अत्रापि द्वन्द्वैकत्वापेक्षमेकवचनम्। रजःसत्त्वतमांसि विभक्तान्यभूवन्नित्यर्थः। यतो रजआदेः महान्, महतः अहं त्रिविधोऽहंकारः, तत्र तामसाद्भूतादेः खमाकाशः ततः मरुद्वायुः ततोऽग्निः ततो वाः आपः ततः धरा पृथिवी, अग्न्यादीनां द्वन्द्वे बहुत्वम्। पञ्चीकृतेभ्यस्तेभ्योऽण्डोत्पत्तिद्वारा सुरर्षयः ब्रह्मादयः सुरा मरीच्यादयः ऋषयश्च ततो भूतगणा मनुष्यतिर्यगादयः एवं इदं जगत्, अभूत्। सृष्टेः पूर्वं स्वस्मिन्नुपहृतचिदचिदेवैकः कारणतया वर्त्तमानः सर्वशक्तिः लीलैकप्रयोजनः स्वात्मिकां मायां जीवद्वारानुप्रविश्य तच्छरीरकं स्वात्मानं संकल्पमात्रेण महदादिपृथिव्यन्तसमष्टिरूपेण देवादिव्यष्टिभूतरूपेण परिणम्य तन्नामरूपभागासीदित्यर्थः ॥ ६३ ॥

त्वं पुरुष इत्युक्तं तच्छब्दप्रवृत्तिनिमित्तं दर्शयन्नाह। सृष्टमिति। यो भगवान् स्वशक्त्या, सृष्टं इदं चतुर्विधं देवमनुष्यतिर्यक्स्थावरभेदभिन्नं पुरं शरीरम् आत्मांशकेन स्वांशभूतजीवद्वारेण। अनुप्रविष्टः स्वशरीरभूतजीवान्तरात्मतया पुरं प्रविष्ट इत्यर्थः। अथो अतः तं भगवन्तम्, अन्तः पुरस्यान्तः, सन्तं जीवान्तरात्मतया विद्यमानम्, पुरुषं विदुः। पुरुषशब्दवाच्यं कथयन्तीत्यर्थः। तथा चोक्तम् 'पुंसंज्ञे वै शरीरेऽस्मिन् शयनात्पुरुषो हरिः' इति शकारस्य षकारो व्यत्ययेन। कोऽसावात्मांशः यदन्तरात्मतया पुरमनुप्रविष्टस्तत्राह। यो जीवः, हृषीकैरिन्द्रियैः सारघं मक्षिकाभिः सृष्टं मधु भुङ्क्ते। मधुवत्स्वल्पकं विषयसुखं भुङ्क्ते स जीवः। तथा च श्रुतिः। 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' इति ॥ ६४ ॥ अथ संहर्तृत्वमुपपादयति। स इति। यः, एषः कालशरीरकः सः त्वं अतिचण्डवेगः अत्युग्ररंहाः, अनुमेयतत्त्वः अलक्ष्यस्वरूपः, अविषह्यः सोढुमशक्यः संश्च, वायुः घनावलीर्मेघपङ्क्तीः इव भूतैः एव भूतानि भूतजातानि कालयानः विचालयन् पीडयन्नित्यर्थः। लोकान् विकर्षसि संहरसि ॥ ६५ ॥ विकर्षणप्रकारमेवाह। प्रमत्तमिति। इतिकृत्यमेवमेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्त्तव्यमिति इतिकृत्यं तस्य या चिन्ता तया उच्चैः भृशं प्रमत्तं विषयेषु शब्दादिषु लालसमतिकामुकं प्राप्तेष्वपि विषयेषु इति शेषः। प्रकृष्टलोभं प्रवृद्धलोभमिति पाठेऽप्येक एवार्थः। एवंभूतं जनम् अप्रमत्तः अन्तकः कालरूपः त्वं सहसा बलात् क्षुल्लेलिहानः क्षुधोष्ठप्रान्तौ लिहन् अहिः सर्पः आखुं मूषकमिव अभिपद्यसे प्राप्नोषि ॥ ६६ ॥ क इति। यः ते तव अवमानोऽनादरो न नमनमित्यर्थः। तेन व्यथमानं केतनं शरीरं यस्य सः त्वत्परिचर्यां विना वृथैव शरीरं मन्वान इति भावः। सः पण्डितः बुद्धिमान्स्यात्तर्हि कः त्वत्पदाब्जं विजहाति न कोऽपीत्यर्थः। अत एव अस्मद्गुरुर्देशिकः, विशङ्कया निःशङ्कतया अर्चति स्म त्वत्पदाब्जमेवार्चयदित्यर्थः। कोऽसौ त्वद्गुरुर्यो मत्पदाब्जमर्चयति तत्राह। यदिति। यस्य दिनोपपत्तिर्दिवसनिष्पत्तिः चतुर्दश मनवः, चतुर्दश मनवो यद्दिननिष्पत्तिरूपाः सन्ति स ब्रह्मैवास्मद्गुरुः पितेत्यर्थः। विनोपपत्तिमिति पाठे यदस्माकं गुरुर्ब्रह्माऽर्चति स्मेति सर्वेषां स्तोतॄणां वाक्यम्। विशङ्कया नाशशङ्कया, विनोपपत्तिं दृढविश्वासेन मनवश्चतुर्दशार्चन्ति स्म ॥ ६७ ॥ अतस्त्वमेव प्राप्य इति वदन्नुपसंहरति। अथेति। हे ब्रह्मन् परमात्मन् विश्वं कृत्स्नं जगत् रुद्रभयध्वस्तं त्वदात्मकरुद्रस्य भयतो नाशप्राप्तप्रायमेवास्ति अथातो हेतोः विपश्चितां नोऽस्माकं नास्ति कुतश्चित्कुतोऽपि भयं यस्याः सा अकुतश्चिद्भया गतिः शरणं त्वमेव असि। रुद्रभयेति परोक्षवन्निर्देशो रुद्रान्तरसामान्याभिप्रायकः ॥ ६८ ॥

एवं स्वस्मै ब्रह्मोपदिष्टस्तोत्रेण भगवन्तं प्रस्तूय तच्च तेभ्यः प्रचेतोभ्य उपदिश्य तस्मिंस्तोत्रे तदर्थे च तान् रोचयन्नाह रुद्रः। इदमिति। हे नृपनन्दनाः, विस्रब्धाः विश्वासयुक्ताः कर्त्तरि क्तः। विशुद्धा इति पाठे शुद्धान्तःकरणाः, स्वधर्मम् अनुतिष्ठन्तः भगवति अर्पिताशयाः भगवत्यर्पितान्तःकरणाः सन्तश्च इदं भगवत्स्तवनं जपत अर्थतः शब्दतश्चानुसंदध्वम्। एतज्जपेनेति शेषः। वो युस्माकं भद्रं मङ्गलं भवितेति शेषः ॥ ६९ ॥ तमेवेति। असकृत्पौनःपुन्येन, हरिं ध्यायन्तः गृणन्तः स्तुवन्तश्च सन्तः सर्वभूतेषु अवस्थितम् आत्मस्थं पूजकान्तरात्मतया व्यवस्थितम् आत्मानं तमेव हरिं भगवन्तं चापि पूजयध्वं सर्वभूतेष्ववस्थितमित्यनेन 'ऐतदात्म्यमिदं सर्वम्' इति श्रुत्यर्थोऽनुसंधितः। आत्मानमित्यनेन 'तदात्मा' इति श्रुत्यर्थः। आत्मस्थमित्यनेन 'तत्त्वमसि' इति श्रुत्यर्थोऽनुसंहितः ॥ ७० ॥ योगेति। सर्वे यूयं योगादेशं योगादेशसंज्ञम् एतत्स्तोत्रम् उपासाद्य पाठतः प्राप्य धारयन्तः मनसान्तर्धारयन्तः समाहितधियः समाहितचित्ताः, मुनिव्रताः मौनव्रतनिष्ठाः, आदृता आदरयुक्ताः सन्तश्च अभ्यसत अभ्यासेन जपतेत्यर्थः ॥ ७१ ॥ स्तोत्रस्य सांप्रदायिकत्वमाह। इदमिति। पुरा सिसृक्षुः स्रष्टुमिच्छुः भगवान् विश्वसृजां मरीच्यादीनां पतिः ब्रह्मा सिसृक्षतां सृष्टिं कर्त्तुमिच्छतां भृग्वादीनाम् आत्मजानाम् अस्माकम् इदम् आह अस्मभ्यमुपदिष्टवानित्यर्थः ॥ ७२ ॥ त इति। ते उपदिष्टस्तोत्राः वयं सर्वे प्रजेश्वराः, प्रजासर्गे निमित्ते, चोदिताः प्रेरिताः सन्तः, अनेन स्तोत्रेण ध्वस्ततमसो निरस्ताज्ञानाः सन्तश्च, विविधाः, प्रजाः सिसृक्ष्मः सृष्टवन्तः ॥ ७३ ॥ अथेति। अथातो हेतोः, पुमान्, अवहितः समाहितचित्तः वासुदेवपरायणः नित्यदा युक्तः, एकाग्रचित्तः इदं जपन्सन् अचिरादाशु श्रेयः स्वसमीहितम् आप्नोति ॥ ७४ ॥ श्रेयसामपि मध्ये ज्ञानस्यैव निरतिशयपुरुषार्थरूपमोक्षसाधनत्वेन निरतिशयत्वं वदंस्तत्साधनतामस्य स्तोत्रस्याह। श्रेयसामिति द्वाभ्याम्। सर्वेषां श्रेयसां मध्ये अपि ज्ञानं भगवद्भक्त्यात्मकं ज्ञानमेव परं निःश्रेयसं नितरां श्रेयोरूपं स्मृतमिति शेषः। कुतः, यतः ज्ञानिनो भक्त्यात्मकज्ञानवन्तः दुष्पारमुपायान्तरैर्दुस्तरम् अपि व्यसनार्णवं दुःखसागरात्मकं संसारं सुखं यथा तथा तरन्ति ॥ ७५ ॥

य इति। यः पुमान् मद्गीतं मया गीतम् इदमिमं भगवत्स्तवं हरेः स्तोत्रं श्रद्धया युक्तः अधीयानोऽध्ययनं कुर्वाणः भवेत्। असौ दुराराध्यमुपायान्तरैर्दुःखेनाराध्यमपि हरिम् आराधयति हरिविषयां भक्तिं लभते इत्यर्थः ॥ ७६ ॥ विन्दत इति। पुरुषो यः पुमान् मया यद्गीतं तस्य यद्गीतं तस्मात भावेक्तः। मदुक्तगीतगानादित्यर्थः। सुप्रीतात् श्रेयसां सर्वपुरुषार्थानाम् एकवल्लभादेकस्वामिनः अमुष्मात भक्त्याराधितादस्मात्परमपुरुषात्, यत्, यत् श्रेयः, इच्छति स पुरुषः असत्वरंस्त्वरामकुर्वन् स्थिरः सन्नित्यर्थः। तत्सर्वं विन्दते लभते ॥ ७७ ॥ य इति। यः पुमान् कल्पे उषसि उत्थाय प्राञ्जलिः श्रद्धया, अन्वितः संश्च इदं शृणुयात् अन्यान्वा श्रावयेत् स मर्त्यः, कर्मबन्धनैः सकलैः कर्मरूपैर्बन्धनैः मुच्यते विमुक्तो भवति ॥ ७८ ॥ गीतमिति। हे नरदेवनन्दनाः, मया, गीतं परस्य सर्वोत्तमस्य आत्मनः सर्वान्तरात्मनः पुंसः श्रीहरेः परं सर्वोत्तमम् इदमिमं स्तवम् एकाग्रधियः एकाग्रया बुद्ध्येत्यर्थः। जपन्तः सन्तः, महत् तपः, चरध्वं कुरुध्वम्। अन्ते तपसोऽन्ते ततस्तस्मात् ईप्सितम् आप्स्यथ संप्राप्स्यथ ॥ ७९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

—:❀:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ पञ्चविंशोऽध्यायः

मैत्रेय उवाच

इति संदिश्य भगवान् बार्हिषदैरभिपूजितः । पश्यतां राजपुत्राणां तत्रैवान्तर्दधे हरः ॥ १ ॥

तपश्चरत्सु तत्पित्रे प्राचीनबर्हिषे घृणी । पञ्चभिर्नारदः प्राहाध्यात्मं प्राचेतसेषु सः ॥ १ ॥
पुरञ्जनकथाकूटरूपं तद्विदुषामपि । संमोहजनकं सर्वमोहनाशाय बुध्यताम् ॥ २ ॥
नारदः पञ्चविंशे तु पुरञ्जनकथाभिषात् । संसृतिं विविधामाह बुद्धिसङ्गेन चात्मनः ॥ ३ ॥

एवं रुद्रोपदिष्टभगवत्स्तोत्रोक्तभगवदाराधनप्रकारेण प्रचेतस्सु तपश्चरत्सु प्राचीनबर्हिर्नारदोपदिष्टाध्यात्मपारोक्ष्यः स्वामात्यादिद्वारा पुत्रारोपितराज्यमहाभारो वनं गत्वा भगवन्तमुपास्य तल्लोकमगादित्याह मुनिः । इतीति । इत्युक्तप्रकारं स्तोत्रं संदिश्योपदिश्य भगवान् हरो रुद्रः बार्हिषदैर्बर्हिषत्पुत्रैः प्रचेतोभिः अभिपूजितः सम्यगर्चितः सन राजपुत्राणां प्रचेतसां पश्यतां सतां तत्रैव अन्तर्दधे अन्तर्हितवान् ॥ १ ॥ रुद्रगीतमिति । ततः सर्वे ते प्रचेतसः वर्षाणाम् अयुतं दशसहस्रवर्षपर्यन्तमित्यर्थः । रुद्रगीतं रुद्रगीतसंज्ञं भगवतः स्तोत्रं जपन्तः सन्तः जले तपः तेपुः । पाकं पचतीतिवन्निर्देशः । तपश्चक्रुरित्यर्थः ॥ २ ॥

प्रचेतःसु तपश्चरत्सु सत्स्वेव नारदः प्राचीनबर्हिषं बोधितवानतः प्रचेतसां कथामसमाप्यैव तत्पितुर्वृत्तमाह । प्राचीनबर्हिषमिति । हे क्षत्तः विदुर, ततः अध्यात्मतत्त्वज्ञ आत्मविदित्यर्थः । कृपालुः नारदः आगत्येति शेषः । कर्मसु आसक्तमानसं संसक्तचित्तं प्राचीनबर्हिषं प्रत्यबोधयत् ॥ ३ ॥ बोधनप्रकारमेवाह । श्रेय इति । हे राजन्, त्वं, कर्मणा अनुष्ठीयमानया यज्ञादिक्रियया आत्मने स्वस्मै कतमत् श्रेयः किं वा साध्यं श्रेय इत्यर्थः । ईहसे इच्छसि दुःखहानिः दुःखनिवृत्तिः सुखावाप्तिश्च श्रेयः इष्यते चेत् । एतदुभयात्मकं श्रेय इच्छसि यदीत्यर्थः । तर्हि इह कर्मणि तदुभयं न इष्यते केवलकर्मणा तदुभयं न साध्यते इत्यर्थः ॥ ४ ॥ केवलकर्मणामपुरुषार्थसाधनतां प्रति बोधित उद्विग्नमना राजाऽऽह । नेति । हे महाभाग कर्मभिरपविद्धाऽऽक्षिप्ता धीर्यस्य सोऽहं परं श्रेयः, न जानामि ततः त्वं मे मह्यं विमलमन्तःकरण-नैर्मल्यतापादकं ज्ञानं ब्रूहि समुपदिश । येन ज्ञानेन कर्मभिः, मुच्येय । कर्मरूपात्पाशाद्विमुक्तो भवेयमित्यर्थः ॥ ५ ॥ गृहेष्विति । कूटधर्मेषु अविचाल्यधर्मेषु अवर्जनीयप्रवृत्तिधर्मेष्विति यावत् । अत एव संसारवर्त्मसु संसारद्वारभूतेषु गृहेषु, भ्राम्यन् ममतां कुर्वन् पुत्रांश्च दाराश्च धनं च तेष्वर्थधीः पुरुषार्थबुद्धिर्यस्य सः अत एव मूढः मूर्खतोपेतः मादृशः, परं श्रेयः न विन्दते ॥ ६ ॥ कर्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं योगानुभावेन यज्ञपशून् प्रत्यक्षं प्रदर्श्याह । भो भो इति । भो प्रजापते, भो राजन्, निर्घृणेन निष्करुणेन, त्वया अध्वरे संज्ञापितान् मारितान् सहस्रशः पशून्पश्वात्मकान् जीवसंघान् पश्य ॥ ७ ॥ एवं नारदेनाभिहिते ऊर्ध्वं पश्यन्नृपतिः खे सायुधान् सत्त्वगणान्विलोक्य मुने क एते इति भूपवचः श्रुत्वा नारदवाक्यम् । एत इति । हे नृप एते त्वया यज्ञे संज्ञापिता इमे पशवः तव वैशसं त्वत्कृतां पीडामित्यर्थः । स्मरन्तः अनेनैवं वयं कृत्ता इत्यनुसंदधानाः सन्तः, त्वां संपरेतं मृतं संप्रतीक्षन्ते कदायं मरिष्यति इति प्रतीक्षां कृत्वावस्थिताः सन्तीत्यर्थः । यदा त्वं मरिष्यसि तदैते पशवः उत्थितमन्यवः संजातक्रोधाः सन्तः अयःकूटैर्लोहवदविशीर्णैः शृङ्गैः, त्वां छिन्दन्ति छेत्स्यन्ति ॥ ८ ॥ एवमादौ भयमुत्पाद्येहामुत्रार्थविरक्त्युत्पादनायान्यापदेशमुखेनाध्यात्मोपदेशात्मकेतिहास प्रस्तोतुं प्रतिजानीते । अत्रेति । अत्र निरतिशयपुरुषार्थतत्साधनाद्यज्ञानरूपे संकटे पुरातनं पुरञ्जनस्य चरितम्, पुरञ्जनाख्यराजचरित्रात्मकमित्यर्थः । इतिहासम् अहं ते तुभ्यं कथयिष्ये तं गदतः कथयतः, मम मत्तः सकाशात् निबोध अवहितमनाः शृणु ॥ ९ ॥

तत्र जीवस्य विषयासक्त्या संसारसंबन्धोऽनादिकालतः संलग्नोऽस्ति स च समाराधितेश्वरानुग्रहेण निवर्त्तते इति विवक्षयन्विपर्ययगृहीतस्य साक्षाद्बोधयितुमशक्यत्वात्कस्यचन राज्ञो वृत्तान्तवदाह । आसीदिति । तत्र जीवो राजत्वेन शरीरं पुरत्वेन परमात्मा सखित्वेन बुद्धिर्भार्यात्वेन च निरूप्यते । तत्र पुरञ्जनप्रभृतीन्स्वयमेवेतः पञ्चमाध्याये व्याख्यास्यति तथापि सुखेन तद्बोधाय किंचित्किंचिद्व्याख्यास्यामः । हे राजन्, पुरञ्जनः नामाः पुरञ्जन इति नाम्ना विख्यातः । बृहच्छ्रवाः सर्वतः प्रसृतकीर्त्तिः राजा भूपतिः आसीत् । तस्य पुरञ्जनस्य अविज्ञातं नाम नामधेयं यस्य सः, नाम्न उपलक्षण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वादविज्ञातनामरूपादिरित्यर्थः। अविज्ञातं चेष्टितं जीवानां कर्मफलप्रदानादिव्यापारः कथापक्षे नीतिशास्त्रव्यापारो यस्य सः यद्वा। विज्ञातं चेष्टितं जगत्सृष्ट्यादिलक्षणं यस्य सः कश्चित् सखा आसीत्। तत्र स्वकर्मभिः पुरं जनयति निर्माययतीति पुरञ्जनः जीवः। अनेन जीवस्यानादित्वं विवक्षितम्। 'निर्वाणमय एवायमात्मा' इति। 'अपहतपाप्मा विजर इत्यादि 'अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च। नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' इत्यादि श्रुतिस्मृतिप्रसिद्धो जीवोऽत्र राजत्वेनोपदिष्टः। अविज्ञातनामत्वाविज्ञातचेष्टितत्वाभ्यां परमात्माख्यं तन्मित्रं विवक्षितम्। कथापक्षे तूभयत्र प्रसिद्ध एवार्थः॥ १०॥ स इति। प्रभुः करणाधिपत्वाद्विभुः स पुरञ्जनः शरणं भोगायतनं शरीरम् अन्वेषमाणः गवेषयन् पृथिवीं कर्मफलोदयतद्भोगायतनप्रकृतिपरिणामरूपं ब्रह्माण्डं बभ्राम। कथापक्षे भूमण्डलस्थपुराण्यनुप्रविश्य तत्र तत्र कंचित्कालं निवसन्कृत्स्नां पृथिवीं चचारेत्यर्थः। यदा अनुरूपं दुःखभोगं विना सुखभोगयोग्यं कथापक्षे दुर्गादिलक्षणोपेतम्। शरणं शरीरं न अविन्दत देवमनुष्यादिशरीरं नालभत प्रत्युत तिर्यक्पादपादिशरीरमविन्दत। तदा स पुरञ्जनः विमनाः उदासीन इव अभूत्। पादपादिशरीरेषु चैतन्यानभिव्यक्तेर्विमना इवेत्युक्तम्। निश्चैतन्य इवाभूदित्यर्थः। कथापक्षे तु दुःखितमना इवेति तदर्थः॥ ११॥ कामानिति। कामान् भोग्यान्सर्वानपि शब्दादीन्विषयान् कामयमानः भोक्तुकामः असौ पुरञ्जनः तस्य तस्य शब्दादेर्विषयस्य उपपत्तये लब्धये भूतले यावत्यः पुरः सन्तीति शेषः। ताः सर्वाः पुरः साधु यथा तथा, न मेने। केषुचिच्छरीरेषु केषांचिदिन्द्रियाणामनभिव्यक्तत्वात्तादृक्शरीराण्यनुप्रविशं तत्र सर्वविषयानलभमानस्तानि न साधु मेने इत्यर्थः। तथा च श्रुतिः 'ताभ्यो गामानयत्ता अब्रुवन् न वै नोऽयमलमिति। ताभ्योऽश्वमानयत्ता अब्रुवन् न वै नोऽयमलमिति' इति, कथापक्षे तु तेषु तेषु पुरेषु केषांचिद्भोग्यवस्तूनां सत्त्वेऽपि सर्वेषां वस्तूनामभावाच्छत्रुप्राचुर्यात्तानि न साधु मेने इत्यर्थः॥ १२॥

स इति। अथ एकदा कदाचित्। अभीप्सितशुभकर्मफलोदयेन सर्वेन्द्रियविषयभोगलब्ध्यवसरे इत्यर्थः। हिमवतः दक्षिणेषु सानुषु कर्मतत्फलोत्पत्तियोग्येषु क्षेत्रेष्वित्यर्थः। वस्तुतस्तु कर्मक्षेत्रे भारते वर्षे एवेति भावः। बहुवचनं तदन्तर्गतसत्क्षेत्रादि-बोधाय, लक्षितानि दृष्टानि लक्षणानि यस्यां ताम् अन्धत्वपङ्गुत्वकेकरत्वकुणित्वादिदोषरहितामित्यर्थः। नवभिः नवसंख्याकाभिः द्वाभिः चक्षुर्द्वयश्रोत्रद्वयनासिकाद्वयमुखपायूपस्थरूपै रन्ध्रैः, उपलक्षितामिति शेषः। पुरं पुरीम् अभिव्यक्त-सर्वेन्द्रियं सर्वविषयोपभोगोपयुक्तं मनुष्यशरीरमित्यर्थः। ददर्श उपलब्धवान् 'ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बत' इति श्रुतिः कथापक्षे वक्ष्यमाणप्राकारादिसर्वचिह्नोपयुक्तां नवगोपुरां नगरीं ददर्शेत्यर्थः॥ १३॥ लक्षितलक्षणामिति यदुक्तं तत्र तानि कानि लक्षणानीति विवित्सायां तानि वदंस्तां पुरमनुवर्णयति त्रिभिः। प्राकारेति। यद्यप्यत्र प्राकारादिसाधर्म्येण निरूपणीयाः पदार्थाः शरीरे न सन्ति तथापि किंचित्सादृश्यमवलम्ब्य कथासौन्दर्याय प्राकारादीन्यनुवर्ण्यन्ते प्राकाराश्च उपवनानि च अट्टालाश्च परिखाश्च तैः, पुंस्त्वमार्षम्। अक्षाश्च तोरणानि च तैः स्वर्णं च रूप्यं च आयसं च तैः, स्वर्णरूप्यायोमयैरित्यर्थः। शृङ्गैः, गृहैश्च सर्वतः, संकुलां युक्तां तत्रात्र त्वगादयः सप्त प्राकाराः रोमपङ्क्तिरुपवनम्। स्कन्धोपरिभागोऽट्टालः रुधिरौघाः परिखाः नवरन्ध्राण्यक्षाः अक्षिपक्ष्म तोरणम्। मूलाधारादिषट्चक्राणि गृहाणि राजसादिस्वभावाः शृङ्गाणि बोध्यानि। कथापक्षे। प्राकारा दुर्गभित्तयः औदकपार्वतवार्क्षादीनि दुर्गाणि वा। उपवनानि फलप्रधानारामाः, अट्टाला गोपुरोपरितन-प्रदेशाः परिखा दुर्गबहिर्वर्तिनी परितः खातनदी, अक्षा गवाक्षाः तोरणानि प्रसिद्धानि, शृङ्गाणि स्वर्णादिभिः रचितानि शिखराणि, सौधाऊर्ध्वधृतकलशाः इत्यर्थः। गृहाणि श्रीवत्सादिलक्षणवन्ति सौधानि, तैः संकुलाम्॥ १४॥ नीलेति। नीला हरिन्मणयश्च स्फटिकाः श्वेतमणयश्च वैडूर्याः पीतमणयश्च मुक्ता मुक्तामणयश्च मरकताः श्याममणयश्च अरुणा रक्तमणयश्च तैः क्लृप्ता हर्म्यस्थली यस्यां ताम् अत एव श्रिया शोभया दीप्तां भोगवतीं नागनगरीम् इव शोभमानाम्। अत्र हृदयं हर्म्यस्थलीत्वेन विवक्षितम्। हृदयंगताः शतैकनाड्यः नीलादिभावेन निरूप्यन्ते। अतो नानाकारनाडीभिर्व्याप्तत्वाद्भोगवतीमिवेत्युपमानम्। कथापक्षस्तु स्पष्टः॥ १५॥

सभेति। सभाश्च चत्वराणि च रथ्याश्च ताभिः तत्र सभा उपवेशस्थानानि चत्वराण्यङ्गणभूमयः चतुष्पथा वा। रथ्याः प्रतोल्यः राजमार्गा वा। आक्रीडाश्च आयतनानि च आपणाश्च तैः तत्राक्रीडाः क्रीडाभूमयः। आयतनानि यज्ञ-स्थानानि। आपणाः क्रयस्थानानि आक्रीडायतनमित्येकत्वे द्यूतादिस्थानम्। चैत्यं च ध्वजाश्च पताकाश्च ताभिः, तत्र चैत्यं जनानां विश्रामस्थानम्। वन्दनशाला इत्यन्ये। ध्वजाः केतवः पताकाः स्वल्पध्वजाः विद्रुमवेदिभिः प्रवालपरिष्कृतभूमिभिः, युक्ताम् अत्र हर्म्यस्थलीत्वेन निरूपितं हृदयमेव सभादिभावेन निरूपितम्। हृदि ह्ययमात्मा प्रतिष्ठित इति हृदयस्य जीवाश्रितत्वात्प्राणेन्द्रिय-कन्दररूपत्वाच्च सभारूपत्वमस्य, तत एव चत्वररूपत्वं परमात्मनः क्रीडास्थानत्वादेव क्रीडायतनं च चक्षुरादीन्द्रियस्थाना-न्यापणाः पुरञ्जनस्तेभ्यः शब्दादीनाकृष्यानुभवति, सुषुम्णा रथ्या राजवद्गच्छतो जीवस्य मुक्तिमार्गत्वात्। पुरी तच्चैत्यं जीवस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुषुप्तौ विश्रामस्थानत्वात्। आधारादिचक्रस्थाः कर्णिकाः विद्रुमवेदिकाः ध्वजपताकाः करपादतलानि। कथा तु प्रसिद्धैव ॥१६॥ एवं देहं पुरभावेन निरूपयित्वा विषयवर्गं देहानुबन्धेन कलत्रापत्यादिवर्गं च बाह्योपवनत्वेन निरूपयति। पुर्यास्त्विति। पुर्याः बाह्योपवने तुरवधारणार्थः। प्रमदामङ्गनां ददर्शेति चतुर्थेनान्वयः। उपवनं विशिनष्टि। दिव्या ये द्रुमा तैराश्लिष्टा या लतास्ताभिराकुलं तस्मिन्। नदन्ति यानि विहंगानां पक्षिणाम् अलीनां भ्रमराणां च कुलानि तेषां कोलाहलो येषु तथाभूता जलाशया यस्मिंस्तस्मिन्॥ १७॥ हिमेति। हिमनिर्झराणां शीतलतुङ्गस्थलपतज्जलधाराणां विप्रुषो बिन्दवस्तद्वता कुसुमाकर-संबन्धिना वायुना चलन्तः प्रवाला विटपा शाखाश्च येषां तैर्द्रुमैर्नलिनीनां सरसीनां तटेषु संपत् समृद्धिर्यस्मिंस्तस्मिन्॥ १८॥ नानेति। मुनिव्रतैरहिंस्रैः नाना नानाविधा येऽरण्यमृगास्तेषां व्राताः समूहास्तैः अनाबाधे तत्कृतबाधरहिते यत्रोपवने कोकिल-कूजितैः पान्थः स्वात्मानम् आहूतम् इवेति शेषः। मन्यते। एवं विषयवर्गो बाह्योपवनत्वेन निरूपितः। तस्य शरीराद्बहिष्ठत्वात्। अत्र विषयाः शब्दादयः तत्र कोलाहलशब्देन शब्दः। कुसुमाकरवायुशब्दाभ्यां गन्धस्पर्शौ चलत्प्रवालेति सौन्दर्यकथनेन रूपं जलाशयहिमनिर्झरनलिनीशब्दैः रसश्चेति पञ्चानामपि तेषां प्रत्यभिज्ञानादिति। सांप्रतं देहानुबन्धवत्कलत्रादिवर्गरूपे उपवने तु संसारवान् पुमान् द्रुमः, द्रुमवत्षड्भावविकारवद्देहसंसृष्टत्वात्। तत्समाश्रितलतारूपाः स्त्रियः तदाश्रितापत्यानि विहंगकुलम्। अपत्यालापाः कोलाहलः। जलाशयहिमनिर्झरनलिन्यादिरूपाः वापीकुल्यातडागादीन्याजीविकाः। आरण्यमृगव्रातैरित्यनेन श्यालश्वशुरादयो विवक्षिताः। श्यालादीनामारण्यकपशुवत्प्राणसमधनापहारित्वेऽपि सान्त्वपूर्वं धनहरत्वान्मुनिव्रतैरिति विशेषणम्। कोकिलकूजितान्यपत्यादिमधुरोक्तयस्ताभिः पान्थो निवृत्तिनिष्ठः स्वमाहूतवन्मन्यमान इव तत्रासक्तिं करोतीति संकलितार्थः। कथापक्षगोऽर्थस्तु प्रसिद्ध एव॥ १९॥

यदृच्छयेति। तत्रोपवने यदृच्छया दैवयोगतः आगतामुपयातां प्रमदोत्तमां विषयविवेकवद्बुद्धिरूपां स्त्रियं ददर्श। यद्यप्यत्र जीवस्य बुद्ध्या सह संबन्धदशायां बाह्योपवनसंबन्धस्तदासक्तिश्च नास्ति तथापि भविष्यदासक्त्यभिप्रायेण कथासौन्दर्यायैवं वर्णितमित्यवगन्तव्यम्। प्रमदोत्तमां विशिनष्टि सार्द्धैश्चतुर्भिः। एकैकं प्रत्येकं शतमनन्ता वृत्तयस्तासां नायकैः पतिभिः ज्ञानकर्मेन्द्रियरूपैः भृत्यैः सह आयान्तीमभिमुखमागच्छन्तीं पाठान्तरे नायिकाः स्त्रियो येषां तैः। कथापक्षे तु प्रसिद्ध एवार्थः॥ २०॥ पञ्चेति। पञ्च शीर्षाणि वृत्तयो यस्य स चासौ अहिश्च प्राण तेन तद्रूपेण प्रतिहारेण पालकेन सर्वतः गुप्तां अहेर्वायुभक्षकत्वेन तत्प्राचुर्यादहिनेत्युक्तम्। सर्वेषामिन्द्रियाणां प्राणाधीनवृत्तित्वादहिना गुप्तामित्यभिहितम्। ऋषभं पतिम् अन्वेषमाणां गवेषयन्तीम् अनेन सर्वस्य चेतनैकधार्यत्वं तत्प्रवर्त्त्यत्वं च विवक्षितम्। अप्रौढामनूढाम् अनेन बुद्धेश्चेतनेन सह संबन्ध-दशायामप्रौढप्रमदायाम् इव कार्याक्षमत्वेऽपि तद्योग्यतास्तीति सूचितम्। कामरूपिणीं विषयवैचित्र्यात्तदाकारानुमिताकाराम्। कथापक्षस्तु सुगमः॥ २१॥ बुद्धिवृत्तयो हि गन्धरसादिज्ञानभेदेन तदवान्तरभेदेन च बहुविधास्ताभिर्बुद्धिवृत्तिभिस्तस्याः सुनसत्वादिकं निरूप्यते। सुनासामिति। सुशोभना नासा गन्धात्मिका घ्राणेन्द्रियवृत्तिर्यस्यास्तां सुनासाम् एवमग्रेऽपि दन्त-कपोलाननश्रोणिपादस्तनादिव्यापारजन्यहर्षादीनामपि बुद्धिवृत्तित्वात्ताभिः सुदन्तत्वादिनिरूपणं क्रियते ततो वृत्तिद्वारा बुद्धि-विशेषणता द्रष्टव्या। सुशोभना दन्ता यस्यास्तां सुशोभनौ कपोलौ यस्यास्तां वरमुत्तममाननं यस्यास्तां बालां षोडशवार्षिकीं 'बाला स्यात् षोडशाब्दा' इति रसग्रन्थोक्तेः। समं यथा तथा विन्यस्तौ रचितौ यौ कर्णौ ताभ्यां कुण्डलयोः श्रीः शोभा तां बिभ्रतीं दधतीम्॥ २२॥ पिशङ्गेति। पिशङ्गा नीवी यस्यास्तां पीतवसनामित्यर्थः। सुशोभने श्रोणी यस्यास्तां श्यामां कनकस्य मेखला यस्यास्तां नूपुरैः क्वणद्भ्यां पद्भ्यां चलन्तीम् अतः देवतामिव वर्त्तमानामिति शेषः॥ २३॥ स्तनाविति। व्यञ्जितं कैशोरं यौवनोपक्रमो याभ्यां तौ समौ च तौ वृत्तौ च तौ निर्गतमन्तरमन्तः अवकाशो ययोस्तौ व्रीडया लज्जया वस्त्रान्तेन वस्त्रप्रान्तभागेन निगूहन्तीमाच्छादयन्तीं गज इव गच्छतीति गजगामिनी ताम्। अत्र श्रोत्रस्तनाभिनितम्बव्यापारजन्यहर्षादि-वृत्तिद्वारा सर्वं संगतमेव॥ २४॥

तामिति। प्रेम्णा उदुच्चैर्भ्रमन्त्यौ भ्रुवौ यस्मिंस्तेन स्निग्धेन प्रीतिचिक्कणतावता अपाङ्ग एव पुङ्खः मूलप्रान्तस्तेन कटाक्षरूप-बाणेनेत्यर्थः। स्पृष्टो विद्धः सन् वीरः सः पुरञ्जनः ललितं यथा तथा व्रीडया सहितं यत्स्मितं तेन शोभनां सुन्दरां तां प्रमदाम् आह। तयोः संवादोक्तिः संबन्धदार्ढ्याय॥ २५॥ केति। कंजं पद्मं तस्य पलाशे पत्रे इवाक्षिणी यस्यास्तत्संबोधने हे कञ्जपलाशाक्षि त्वं का किमात्मकज्ञातीया हे सति त्वं कस्य असि। भवती कस्य पुत्री भवतीत्यर्थः। कुतः कस्मात्स्थानात् इह आगता असि हे भीरु भयशीले इमाम् उपपुरीमस्याः पुर्याः समीपे किं चिकीर्षसि कर्त्तुमिच्छसि। मे मह्यं शंस कथय॥ २६॥ के इति। ते तव अनुपथा अनुवर्त्तिनः ये एकादशैकादशसंख्याकाः महाभटाः सन्ति। एते के बुद्धिमनसोर्वृत्तिजन्यं भेदमाश्रित्य मनसा सहेन्द्रियाणामेकादशसंख्यावत्त्वादेकादशो महाभटो मनोरूप एव बोध्यः। इममेवाग्रे बृहद्बलत्वेन वक्ष्यते। एवं बुद्धेः सकाशान्मनसः पृथगुपादानं त्वस्य बुद्धेः परिचारकभावेन सहायतयावस्थानभावेन च हे सुभ्रु एताः ललनाः का वा एता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति वृत्त्यभिप्रायेण स्त्रीत्वेन निर्देशः। वृत्तीनामानन्त्यादेता इति निःसंख्याको निर्देशः। ते तव पुरःसरस्त्वामग्रगामी अयम् अहिः भुजंगमः कः। व्यापारोपेते प्राणे सति सर्वेन्द्रियव्यापारसत्त्वात् सव्यापारस्यास्य पुरःसरत्वम्। कथापक्षः स्पष्टार्थः ॥२७॥ त्वमिति। हे अङ्गने तव यावङ्घ्री तयोः कामः कामना तेनैव आप्ताः समस्ताः कामाः येन तं पतिं वने रहः एकान्ते मुनिवत् विचिन्वती वने तत्राप्येकान्ते मुनिर्योगी यथा स्वपतिं भगवन्तं ध्यानेन विचिनोति तद्वदित्यर्थः। त्वं पतिधर्मं विचिन्वती ह्रीः असि किम्। केचित्तु वराहं पतिं विचिन्वती ह्रीर्भूमिरसीति वदन्ति। अथ पतिं शंकरम् विचिन्वती भवानी रुद्राणी असि किम्। अथवा पतिं ब्रह्माणं विचिन्वती वाक् सरस्वती असि किम्। 'वव्रे विरञ्चिं वाग्देवी सूर्यस्य दुहिता सती' इति पुराणोक्तेः। 'कलत्रं वैधात्रं कति कति भजन्ते न कवयः गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदः' इति अभियुक्तोक्तेश्च। अथवा पतिं विष्णुं विचिन्वती रमा लक्ष्मीः असि किम्। यदि रमासि तर्हि तस्याः पद्मकरत्वात् तवकराग्रात् पद्मकोशः क्व पतितः कराग्रे पद्मकोशाभावान्न त्वं रमापीति भावः। एवमत्र रमादिरूपेणोत्प्रेक्षणोक्तिस्तु रमादीनां विष्णुप्रभृतिभिरत्वाना-दिदृढतरसंबन्धख्यापनपूर्वं कथासौन्दर्यायैव। एवमग्रेऽपि यत्र यदनुपयुक्तं तत्कथासौन्दर्यायैवेत्यवगन्तव्यम् ॥ २८ ॥

एवं ह्रीप्रभृत्यन्यतमत्वेन संभावनां कृत्वाऽऽसां मध्ये कापि त्वं न भवसीत्याह। नासामिति। हे वरोरु आसां ह्रीप्रभृतीनां मध्ये त्वम् अन्यतमा कतमापि न नैव संभवसि यतस्त्वं भुवः पृथिव्याः स्पृक् स्पर्शनकारिणी असि। न हि देवा भुवं स्पृशन्तीति अभियुक्तोक्तेः सत्त्वाद्रमादिषु तददर्शनाच्च न तदन्यतमेति भावः। अतो मत्प्रार्थितं कुर्वित्याह। अदभ्रकर्मणा अनल्पकर्मवता वीरेषु वरस्तेन वीरश्रेष्ठेन मया साकम् इमां नवमुखीं पुरीं नगरीं परं लोकं वैकुण्ठाख्यनगरीमित्यर्थः। यज्ञपुंसा विष्णुना सह श्रीः लक्ष्मीरिव प्रविश्येति शेषः। अलंकर्त्तुं शोभयितुम् अर्हसि। अस्यां प्रविश्य मया सह सुखमनुभवेत्यर्थः ॥ २९ ॥ यदिति। यद्यस्मात् अपाङ्गेन तव कटाक्षेण विखण्डितमिन्द्रियं मनो यस्य तं मा मां यदेष तेऽपाङ्गेति पाठे ते तव अपाङ्ग-विखण्डितेन्द्रियमित्यतः परं मामिति शेषो बोध्यः। सव्रीडं यथा तथा भावः प्रेम तेन यत्स्मितं तेन विभ्रमती या भ्रू तया त्वया उपसृष्टः प्रेरितः भगवानतिसमर्थः एषः मनोभवः कामः प्रबाधते प्रकृष्टतया मां पीडयति अथातो हेतोः। हे शोभने परदुःखभञ्जनादिशोभनगुणोपेते - नुगृहाण अनुग्रहविधानपूर्वं मां कृतार्थीकुर्वित्यर्थः ॥ ३० ॥ स्वमिति। हे अङ्गने यत् आननं व्रीडया हेतुना अभिमुखमस्मत्संमुखं न भवति तत् स्वमात्मीयम्। त्वदीयमित्यर्थः। आननम् उन्नीयावगुण्ठन-पटापकर्षणपूर्वमूर्ध्वं कृत्वा मे मह्यं दर्शय। आननं विशिनष्टि। शोभने भ्रुवौ यस्मिंस्तत् सुतारे शोभनकनीनिके लोचने यस्मिंस्तत्। व्यालम्बिनो दीर्घा ये नीलालकास्तेषां वृन्देन संवृतं वल्गूनि मनोहराणि वाचकानि वाक्यानि यस्मिंस्तत् शुचि स्मितं यस्मिंस्तत् पाठान्तरे संबोधनम्। अध्यात्मताहीनमेतच्छ्लोकचतुष्कं कथासौन्दर्यकरमेव ॥ ३१ ॥ इत्थमिति। इत्थममुना प्रकारेण हे वीर अधीरवदविजितेन्द्रियवत्। याचमानं वीरं त पुरञ्जनं दृष्ट्वेति शेषः। मोहिता स्वयमपि मोहसंयुता अत एवं हसन्ती नारी अभ्यनन्दत आह चेति शेषः। एवमन्योन्यस्य पारतन्त्र्यं सूचितम् ॥ ३२ ॥ यत्पृष्टं कस्यासीत्यादि तत्रोत्तरमाह। नेति। हे पुरुषर्षभ वयम् आत्मनः मम परस्य तवापि कर्त्तारं पितरं सम्यग्यथावत् न विदाम न विद्मः गोत्रं नाम च यत्कृतं भवति तं च न विदाम ॥ ३३ ॥ इहेति। हे वीर इहास्यां पूर्य्याम् अद्याधुना सन्तं विद्यमानं वसन्तमिति यावत् आत्मानं त्वाम् अन्तः प्रविश्यास्या नियन्तारं भवन्तमित्यर्थः। न विदाम आत्मनस्तव मम चेति शेषः। शरणम् इयं पुरी येन निर्मिता तं ततः परं त्वत्तो मत्तश्च विलक्षणं पुरुषं न विदाम। पूर्वश्लोके संसारिणो जीवस्य बुद्धिस्तत्स्वरूपमविशदाभासं गृह्णाति न तु याथार्थ्येनेत्युक्तम्। अनेन जीवस्य करणकलेवरादिसंपादनचतुरं कृत्स्नजगदुदय-विभवलयलीलं प्रकृतिपुरुषविलक्षणं परमपुरुषमापाततस्तत्त्वतश्च न विषयीकरोतीत्युक्तम् ॥ ३४ ॥ यत्पृष्टं क एतेऽनुपथा इति तत्राह। एते इति। हे मानद एते नराः एकादश महाभटाः मे मम सखायः एताः नार्यश्च वृत्तिरूपाः मे सख्यः मच्छन्दानुवृत्तितया वर्त्तमाना भृत्या इत्यर्थः। अनेनेन्द्रियाणां तद्वृत्तीनां च बुद्ध्येकायतनत्वमुक्तम्। यत्पृष्टं 'कोऽयं तेऽहि-पुरःसरः' इति तत्राह। मयि सुप्तायां सत्याम् अयं नागः पुरीं पालयन्सन् जागर्त्ति अनेन बुद्धीन्द्रियमनःप्रभृतिषु सुषुप्तौ व्यापारवर्जितेषु सत्स्वपि प्राणव्यापारस्तिष्ठतीति सर्वापेक्षया प्राणस्य प्राधान्यं द्योतितम् ॥ ३५ ॥ आस्तां तावन्नामगोत्रादिवार्त्ता त्वमस्यां पुरि समागतोऽसि यत्तदेव दिष्ट्येत्याह। दिष्ट्येति। हे अरिंदम आगतोऽत्र समायातः असि त्वमिति शेषः। तत् दिष्ट्या समीचीनं जातमित्यर्थः। ते तव भद्रं मङ्गलं भूयादिति शेषः। ग्राम्यानिन्द्रियभोगार्हान् कामान् शब्दादिविषयान् अवाप्स्यसि। अहं स्वबन्धुभिः सखीभिर्वृत्तिभिः सखिभिरिन्द्रियैश्च सहेत्यर्थः। तान् ग्राम्यभोगान् ते तुभ्यम् उद्वहिष्यामि संपादयिष्यामि ॥ ३६ ॥

इमामिति। हे विभो नवमुखीं नवद्वाराम् इमां पुरीं शतं समाः संवत्सरान् शतवर्षपर्यन्तमित्यर्थः। मया उपनीतान् प्रापितान् कामान् वाञ्छितान् भोगान्विषयान् गृह्णानः त्वम् अधितिष्ठस्व मनुष्यदेहप्रवेशाभिप्रायेण शतं समा इत्युक्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'शतं जीव शरदः शतम्' इत्यनुशासनात् ॥ ३७ ॥ संसारिणो जीवस्य प्रवृत्तिस्वभावत्वान्निवृत्तिनिन्दापूर्वकं तत्सङ्गमभिनन्दति पञ्चभिः । कं न्विति । त्वत् त्वत्तः अन्यं कं नु रमये क्रीडयामि हि । त्वमेव मम रमणार्हो नान्य इत्यर्थः । अनेन निवृत्तिमार्गनिष्ठो न बुद्ध्यधीन इत्युक्तम् । अन्यस्य रमणानर्हत्वे हेतुगर्भाणि विशेषणानि । अरतिज्ञं नैष्ठिकं विषयविरक्तमित्यर्थः । अत एव अकोविदमनिपुणम् अनिषिद्धस्यापि सुखस्य त्यागिनमित्यर्थः । संपरायो मृत्युस्तस्याभिमुखो न भवतीत्यसंपरायाभिमुखस्तं मरणाभीरुमिति वा परलोकचिन्ताशून्यमित्यर्थः । 'कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्' इत्युक्तेः । अश्वस्तनविदं श्वोभवं श्वस्तनं कालान्तरानुभाव्यं स्वर्गादिभोग्यत्वेन न वेत्तीति अश्वस्तनवित्तं 'एते वै निरयास्तात स्थानस्य परमात्मन' इति 'वासुदेवे मनो यस्य जपहोमार्चनादिपु । तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम्' इति स्वर्गादिसुखस्य मुमुक्षोर्हेयत्वादित्यर्थः । पशुं पशुतुल्यम् ॥ ३८ ॥

एवं निवृत्तिधर्मस्थं निन्दित्वा प्रवृत्तिस्वभावस्थं स्तौति । धर्म इति । अत्रास्माकीनप्रवृत्तिमार्गे धर्मः स्वर्गादिसाधनो यागादिरूपो धर्मः तथा अर्थकामौ चापि प्रजानन्दः पुत्रसुखम् अमृतं मोक्षः यशः कीर्त्तिः विशोका निर्दुःखाः विरजा निर्मलाश्च लोकाः सिद्ध्यन्तीति शेषः । कथंभूता लोका इत्याकांक्षायां तान्विशिनष्टि । यान् लोकान् केवलिनोनिवृत्तिधर्मस्था यतयः । न विदुः हि ॥ ३९ ॥ पित्रिति । किं च अस्मिन् भवे अस्मिन्संसारे इत्यर्थः । यत् गृहाश्रमम् एतत् पितरोऽग्निष्वात्तादयश्च देवा महेन्द्रादयश्च ऋषयः सप्तर्षिप्रभृतयश्च मर्त्त्याः सनकादयश्च तेषां भूतानि भूतबलियोग्या देवास्तेषाम् आत्मनः अन्येषां च क्षेमं सर्वथार्हं शरणमाश्रयं वदन्ति मुनय इति शेषः । ह स्फुटम । पित्रादीनां गृहाश्रमिणमाराधकमाश्रित्यावस्थानात् ॥ ४० ॥ का नामेति । हे वीर विख्यातं कामित्वेन प्रसिद्धं वदान्यं त्यागिनं कामभोगार्थं विहितनियमादीन् त्यजन्तमित्यर्थः अत एव । प्रियेषु शब्दादिविषयेष्वेव दर्शनं दृष्टिर्यस्य तं कथापक्षे विख्यातं विख्यातकीर्तिं वदान्यं दानशीलं प्रियदर्शनं सुन्दरमित्यर्थः । स्वयं प्राप्तं च त्वादृशं पतिं मादृशी भार्या का नाम न वृणीत वृणीतैवेत्यर्थः ॥ ४१ ॥ कस्य इति । हे महाभुज भुजगेन्द्रभोगयोः सर्पदेहाकारयोः ते तव भुजयोः कस्याः स्त्रियाः मनः न सज्जेत् आसक्तं न भवेत् । यो भवान् अनाथवर्गाः दीनानां स्तोमास्तेषामाधिर्मनोव्यथा तं घृणया उद्धतोऽतिशयितो यः स्मितपूर्वकोऽवलोकस्तेन अलमत्यर्थम् अपोहितुं निवर्त्तयितुं चरति सर्वत्र विचरणं करोति ॥ ४२ ॥ एवं संबन्धदार्ढ्यस्थापनाय तयोः संनादमभिधायोपसंहरंस्तयोर्व्यापारमाह नारदः । इतीति । हे राजन इत्यमुना प्रकारेण तौ दंपती पुरञ्जनपुरञ्जन्यौ तत्र पुर्युपवने मिथोऽन्योन्यं समयं संकेतं समुद्य समुदीर्य तां पुरीं प्रविश्य शतं समाः संवत्सरान् मुमुदाते ॥ ४३ ॥

एवं जीवबुद्ध्योः जीवकर्मानुरूपदैवाख्यपरमपुरुषसंकल्पायत्तदृढतरसंबन्ध तत्प्रयुक्तं देहसंबन्धं च पारोक्ष्यरूपेणाभिधाय शुश्रूषोः प्राचीनबर्हिषः प्राप्यपरब्रह्मव्यतिरिक्तेषु प्राकृतेषु भावेषु वैतृष्ण्यजननार्थं संसारमनुभवतो जीवस्य हि जाग्रत्स्वप्नसुषुप्तिमरणावस्थासु दोषानुद्घाटयितुं जाग्रदाद्यवस्थाः प्रतिपिपादयिषुः कथाव्याजेन तावत्समासतः अवस्थात्रयं ब्रुवन् जाग्रदवस्थामाह । उपगीयमान इति । जाग्रदवस्थायां तत्र तत्र प्रतीन्द्रियमित्यर्थः । गायकैः गायकसमानैः शब्दादिभिर्विषयैः ललितं यथा तथा उपगीयमानः जाग्रदवस्थायां सोत्सवं सर्वविषयभोगप्राप्त्या प्रीतैः सर्वेन्द्रियैः सम्यक् संस्तुत इत्यर्थः । स्वप्नावस्थामाह । स्वप्नावस्थायां स्त्रीभिः केवलं मनआदीन्द्रियवृत्तिलक्षणाभिः परिवृत्तः संश्च क्रीडन् वर्त्तते 'स्त्रीभिर्वा यानैर्वा' इति श्रुतेः । स्वप्ने इन्द्रियवृत्तिद्वारान्तः क्रीडनमाचरन्वर्त्तेत इत्यर्थः । अथ सुषुप्त्यवस्थामाह । शुचौ ब्रह्मसुखसांनिध्यवत्त्वाच्छुद्धे हृदये ह्रदिनीम् आविशत् । अत्र ह्रदिनीशब्देन पुरी तदाख्या नाडी विवक्षिता । कथापक्षे तु ललितं यथा तथा गायकैरुपगीयमानः पुरञ्जनः स्त्रीभिः परिवृतस्तत्र क्रीडन् शुच्यपरपर्यायग्रीष्मर्त्तौ क्रीडनोद्भूतश्रमापनोदनाय शीतलोदकायां सरस्यां प्राविशदित्यर्थः ॥ ४४ ॥ इदानीं नवद्वारप्रदर्शनपूर्वं जाग्रदवस्थां प्रपञ्चयति यावदध्यायसमाप्ति । तत्र च नवभिर्द्वार्भिः पुरीं लक्षितलक्षणामित्यनेन द्वारत्वेन निरूपितानां चक्षुरादीन्द्रियस्थानामिन्द्रियाणां च गौणनामानि तत्कार्याणि तद्विषयांश्च कथयन्नाह । सप्तेति । तस्याः पुरः पुर्य्याः सप्त द्वारः उपरि कृताः कल्पिताः चक्षुर्द्वयं श्रोत्रद्वयं नासिकाद्वयं मुखं चेति द्वे द्वारे तु अधः कृते कल्पिते गुदं लिङ्गं चेति । किमर्थमेवं कल्पिता इत्यत्राह । तस्याः पुर्याः सप्तम्यन्तपाठे तस्यां पुरि यः कश्चन ईश्वरः तस्य पृथगसंकरेण विषयगत्यर्थं शब्दादिविषयान्प्रति गमनार्थं विषयानवगन्तुमित्यर्थः । संसारिणो जीवस्य स्वपरयाथात्म्यज्ञानाभावान्मनुष्यशरीरस्यानित्यत्वाच्च यः कश्चनेत्युक्तम् । कथापक्षे विषयगत्यर्थमित्यत्र विषयशब्दो देशपरः तदा पृथक् पृथक् देशान्प्रति गत्यर्थमित्यर्थः ॥ ४५ ॥ पञ्चेति । हे नृप तास्विति शेषः । तासु सप्तसु द्वार्षु मध्ये इत्यर्थः । पञ्च द्वारः तु पौरस्त्याः पूर्वदिग्भवाः नेत्रे नासिके मुखं चेति । एका दक्षिणा तथा एका उत्तरा दक्षिणः कर्णो वामकर्णश्चेति द्वे द्वे पश्चिमदिग्भवे अधस्तने गुदलिङ्गे इत्यर्थः । अमूषां द्वारां नामानि गुणकृताभिधेयानि ते तुभ्यं वर्णये ॥ ४६ ॥ खद्योतेति । खद्योता खद्योतवदल्पप्रकाशा वामनेत्ररूपेत्यर्थः । आविः प्रकटं मुखं यस्याः साऽऽविर्मुखी बहुप्रकाशा दक्षिणनेत्ररूपा अत्र स्वानुभवान्न्यूनाधिकप्रकाशवत्त्वमवगन्तव्यम् । एतन्नामके प्राग्द्वारौ एकत्र निर्मिते संलग्ने निर्मिते भवत इत्यर्थः । ताभ्यां खद्योताविर्मुखीभ्यां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वाभ्यां द्युमान् सूर्यः तदधिष्ठेयं चक्षुरिन्द्रियमपि द्युमत्तदेव सखा यस्य सः यद्वा द्युमतः सखा द्युमत्सखः 'राजाहः सखिभ्यष्टच्' चक्षुषा द्वारपेन सहित इत्यर्थः। पुरञ्जनः विभ्राजितं आलोकनादिना प्रकाशभावं प्राप्तं रूपात्मकं जनपदं रूपविषयमित्यर्थः। यात्यवगन्तव्यम्। कथापक्षे तु खद्योतादयः शब्दा अश्वकर्णादिशब्दवत्केवलं संज्ञाशब्दा इत्यवगन्तव्यम्। जनपदं देशं यातीत्यर्थः॥ ४७॥

नलिनीति। नलिनी, नालिनी च प्राग्द्वारावपि एकत्र निर्मिते भवतः, नलनालशब्दौ छिद्रवचनौ नलमस्या अस्तीति नलिनी एवं नालिनी च उभे वामदक्षिणनासिके अत्रापि संज्ञाभेदादेव कार्ये न्यूनाधिक्यं पूर्ववत् ज्ञेयम्। वामनासिकयावघ्राणमल्पं दक्षिणनासिकयाधिकम्। अवधूनयति कम्पयति वृक्षादीनित्यवधूतो वायुस्तस्य सखा वाय्वधिष्ठितः घ्राणस्तदात्मकद्वारपसहितः इत्यर्थः। पुरञ्जनः ताभ्यां नलिनीनालिनीभ्यां द्वाभ्यां सौरभं गन्धं विषयं याति। कथापक्षे सौरभनामानं देशं यातीत्यवगन्तव्यम्॥ ४८॥ मुख्येति। मुख्या प्रधानभूतमुखरूपा नाम प्रसिद्धा द्वाः पुरस्तात्पूर्वदिग्भवा तया मुख्यया द्वारा आपणो भाषणं स च बहूदनोऽन्नमन्नं स च आपणबहूदनौ बह्वोदन इत्यनुक्तिः परोक्षवादत्वाय विषयौ प्रति। पुरराट् पुरञ्जनः रसज्ञो रसनेन्द्रियं च विपणो वागिन्द्रियं च ताभ्यां द्वारपाभ्यामन्वितः सन् याति॥ ४९॥ पितृहूरिति। पुर्याः दक्षिणेन दक्षिणस्यां दिशि पितृहूः नाम द्वाः तया पुरञ्जनः श्रुतिः श्रवणं तस्य धरः श्रोत्रं तेन द्वारपेन अन्वितः सन् दक्षिणपाञ्चालं राष्ट्रं याति। दक्षिणेनेति न तृतीया किंतु दक्षिणस्यां दिशि इत्यस्मिन्नर्थे तद्धितोऽयमेनप् प्रत्ययोऽव्ययसंज्ञः। एवमुत्तरेणेति। पितॄन् जहाति गच्छत्यनयेति पितृहूः 'ओहाङ् गतौ' इत्यस्मा ऋतिशृघ्योः क्रूः' इति क्रूः प्रत्ययो बाहुलकात्। एवं सति पितृलोकप्रतिसाधनभूता यागादिक्रिया तदवबोधिनी त्रयी पूर्वभागः पितृहूशब्दार्थः सिद्धः। अन्यतोऽनवगतानां पञ्चानां विषयाणां प्रकाशनायालमिति पञ्चालं शास्त्रं तच्छ्रवणकाले बलाधिक्याद्दक्षिणः कर्णः प्रथमं प्रवर्त्तते। शास्त्रे च प्रथमं श्रोतव्यं कर्मकाण्डमेव प्रवृत्तसंज्ञस्य तस्यादौ सादरं दक्षिणकर्णेन श्रवणं श्रुत्वा तदर्थमनुष्ठाय वर्त्तमानः पितृभिराहूयते एवं तैराहूतः पितृलोकप्रापकं पितृयानं प्रपद्यते यता एवं पितृकृतमाह्वानमनेन भवतीति पितृहूर्दक्षिणः कर्णः तद्वैपरीत्येन वर्त्तमानो ह्युत्तरो वामकर्णो देवहूः व्याख्यास्यति च तथैवाग्रे 'पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः। प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चालसंज्ञितम्। पितृयानं देवयानं श्रोत्रात् श्रुतधराद्व्रजेत्' इति॥ ५०॥ देवहूरिति। पुर्याः उत्तरेण देवहूर्नाम द्वाः तया पुरञ्जनः श्रुतिधरान्वितः श्रुतिधरसंज्ञिककद्वारपसहितः सन् उत्तरपाञ्चालं राष्ट्रं याति उत्तरपाञ्चालं निवृत्तसंज्ञं शास्त्रं तस्यानन्तरं श्रोतव्यत्वात्तत्रोत्तरकर्णप्रवृत्तिरुक्ता पितॄन् जहाति गच्छत्यनयेति पितृहूः एवं च सति निवृत्तशास्त्रं श्रुत्या तदर्थमनुष्ठाय वर्त्तमानो जनो देवैराहूयते वैराहूतो देवलोकप्रापकं देवयानं प्रपद्यते एवं देवकृतमाह्वानमनेन भवतीति देवहूरुत्तरः कर्णः। अत्र पञ्चते व्यक्तीकरोतीति पञ्च्यते व्यक्तीक्रियत इति वा पञ्चालं 'पचि व्यक्तीकरणे' इत्यस्मात् 'तमिविशिबिडिमृणिकुलिकपिपलिपञ्चिभ्यः कालच्' इति औणादिककालच्प्रत्ययान्तः पञ्चालशब्दः। ततः प्रज्ञादित्वात्स्वार्थेऽपि पाञ्चालशब्दः स च दक्षिणशब्देन समस्यमानः प्रवृत्तिधर्मप्रकाशकं शास्त्रं बोधयति स एवोत्तरशब्देन समस्यमानो निवृत्तिधर्मप्रकाशकं शास्त्रं गमयति पुरञ्जनस्ते द्वे श्रुतिधरद्वारपालेन यात तिभावः॥ ५१॥ आसुरीति। अस्यन्ते क्षिप्यन्ते मोक्षमार्गादेभिरित्यसुराणीन्द्रियाणि एवं सत्यऽसुरं मेढ्रं तस्येयमित्यासुरी नाम पश्चात् द्वाः तया पुरञ्जनः दुर्दुरुद्धरः मदो यस्येति दुर्मद उपस्थेन्द्रियं तेन द्वारपेन समन्वितः सन् ग्राम्यकं नाम विषयं ग्राम्यसुखाख्यं प्रसिद्धं मैथुनकर्मात्मकदेशमित्यर्थः याति॥ ५२॥ निर्ऋतिरिति। निर्ऋतिर्मृत्युस्तद्द्वारत्वाद्गुदं निर्ऋतिः। एवं सति निर्ऋतिः नाम निर्ऋतिसंज्ञया प्रसिद्धा पश्चात पुर्याः पश्चिमदिग्वर्त्तिनी द्वाः तया पुरञ्जनः लुब्धकेन पायिवन्द्रियेण द्वारपेन समन्वितः सन् वैशसं नाम विषयं याति पायुनोत्क्रान्तस्य दुःखप्राप्तेरस्य लुब्धकसाम्यं वैशसविषयो मलविसर्गः॥ ५३॥ अन्धाविति। अमीषां पौराणां द्वाराणां मध्ये निर्वाक्पेशस्कृतौ निर्वाक्पेशस्कृतनामानौ उभौ पादपाणी द्वौ अन्धावज्ञौ छिद्राभावात्स्वतो ज्ञानक्रियाशक्त्यभावाच्च वाक्शब्देनात्र वागिन्द्रियाधिष्ठानं मुखरूपं छिद्रं लक्ष्यते पेशस्कृन्नामा कीटविशेषः स्वाननान्निःसृतैस्तन्तुभिः स्वनिवासभूतं करण्डं निर्माय स्वनिर्गमनद्वारंतन्मुखमप्यज्ञानेन पिधाय तत्रैव विनश्यति एवं निश्छिद्रपेशस्कृत् साम्यान्निर्वाक्पेशस्कृताविस्युच्येते ताभ्यां द्वाभ्यां पादाभ्यां हस्ताभ्यां चेत्यर्थः। अक्षण्वतामिन्द्रियवतां देहानाम् अधिपतिः पुरञ्जनः याति करोति च। पादाभ्यां गमनागमने हस्ताभ्यां दानादाने च करोतीत्यर्थः। त्वगिन्द्रियस्यात्रानुक्तिः सर्वेष्वन्तर्भावात्॥ ५४॥ स इति। स पुरञ्जनः अन्तःपुरगतः हृदयाख्यमन्तःपुरं प्रविष्टः यहि जायते तदा विष्वगञ्चति सर्वतो व्याप्रियते इति विषूचीनं मनस्तेन समन्वितः सन् जाया बुद्धिश्चात्मजा इन्द्रियवृत्तयश्च तदुद्भवं मोहं प्रसादं हर्षं वा याति तत्र मोहस्तमोगुणकार्यं प्रसादः सत्त्वगुणकार्यं हर्षो रजोगुणकार्यम्॥ ५५॥ एवं सर्वेन्द्रियस्थानविषयाणां गौणनामानि कार्याणि चाभिधाय मनःपर्यन्तसकलेन्द्रियसहितस्य जीवस्य बुद्धिपारतन्त्र्यमाह। एवमिति। एवं पुरञ्जनः यतः कामेष्वात्मा मनो यस्य स कामात्मा अत एव कर्मसु कामसाधनभूतक्रियासु संसक्तः आसक्तः अत एव अबुधोऽज्ञः वञ्चितः दैवेनेति शेषः। अतः महिषी बुद्धिः यत्, यत् ईहेत चेष्टते यं यं विषयं प्रतीन्द्रियाणि प्रवर्त्तयतीत्यर्थः। तत्तदेव अन्ववर्त्तत असद्बुद्ध्यधीनः संस्तदनुरोधेनैव कर्माचरतीत्यर्थः॥ ५६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदुक्तं तदनुवर्त्तनमेवोपपादयति चतुर्भिः। कचिदिति। कचित्कदाचित् स्त्रियां पिबन्त्यां मदिरापाने व्याप्रियमाणायां सत्यां मदविह्वलः सन् पुरञ्जनः मदिरां पिबति। मदिरासमानामहंममतां स्वीकरोतीत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्। कचित् अश्नन्त्यां भुजन्त्यां सत्याम् अश्नाति। जक्षन्त्यां चर्वन्त्यां सत्यां सह तया साकम्। जक्षति चर्वति। एवमशनचर्वणादौ प्रवृत्तां तामनुप्रवर्त्तते इत्यर्थः॥ ५७॥ कचिदिति। कचित् तस्यां गायन्त्यां गायति कचित् तस्यां रुदन्त्यां रुदति। कयाचिच्चिन्तया तस्यां रुदन्त्यां स्वयमपि चिन्ताकुलः सन् रुदति इत्यर्थः। कचित् तस्यां हसन्त्यां हसति। कचित् तस्यां जल्पन्त्याम् अनु जल्पति। व्यवहारे परमार्थे च बुद्धेः प्रधानत्वादिति भावः॥ ५८॥ कचिदिति। कचित् तस्यां धावन्त्यां धावति। कचित् तस्यां तिष्ठन्त्याम् अनुतिष्ठति। कचित् तस्यां शयानायां सत्याम् अनु शेते। कचित् ताम् आसतीमासीनाम् अन्वनुसृत्य आस्ते॥ ५९॥ कचिदिति। कचित् तस्यां शृण्वत्यां सत्यां शृणोति। कचित् तस्यां पश्यन्त्याम् अनु पश्यति। कचित् जिघ्रन्त्यां जिघ्रति। कचित् स्पृशन्त्यां जायायां कस्यचन वस्तुनः स्पर्शमाचरन्त्यां सत्यां स्पृशति तत्स्पृष्टवस्तुस्पर्शं करोति॥ ६०॥ कचिदिति। कचित् शोचतीं जायाम् अनु दीनवत् शोचति। कचिच्च जायायां हृष्यन्त्यां संतुष्यन्त्यां सत्याम् अनु हृष्यति। कचित् मुदितां जायाम् अनु मोदते॥ ६१॥ विप्रलब्ध इति। एवं महिष्या बुद्धया विप्रलब्धः विमोहं गमितः विरुद्धधर्मं प्रापित इत्यर्थः। अत एव सर्वा प्रकृतिरसङ्गत्वाक्रोधनत्वादिस्वभावा वञ्चिता यस्य सः। परित्यक्तस्वस्वभाव इत्यर्थः। अत एव, नेच्छन् अनिच्छन्नपि क्लैब्यात् पारवश्यात् क्रीडामृगः यथा तादृशः सन् अज्ञः पुरञ्जनः अनुकरोति॥ ६२॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे पञ्चविंशोऽध्यायः॥ २५॥

अथ षड्विंशोऽध्यायः

नारद उवाच

स एकदा महेष्वासो रथं पञ्चाश्वमाशुगम्। द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम्॥ १॥

मृगयामिषतः स्वप्नजागरत्वोक्तिरत्विह। षड्विंशे संसृतिः प्रोक्ता सद्बुद्धित्यागयोगतः॥ १॥

एवं पूर्वाध्याये आत्मन उपाधिकृते समासतः स्वप्नसुषुप्त्यवस्थे उक्त्वा विशेषतो जाग्रदवस्थां चाभिधायेदानीमस्मिन्नध्याये भूयः स्वप्नावस्थामाह दशभिः। स इति। सः पुरञ्जनः, एकदा महान् इष्वासो धनुः कर्तृत्वभोक्तृत्वाद्यभिनिवेशरूपो यस्य तथाभूतः सन् रथम् आरुह्य पञ्चप्रस्थं वनम् अगात् इति तृतीयश्लोकगतेनान्वयः। रथशब्देनात्र शरीरं विवक्षितम्। तच्चात्र स्वप्नशरीरमेव तत्तु स्वप्नदृष्टपुण्यपापानुरोधेनेश्वरसंसृष्टमेव। जाग्रद्देहस्य तु शतसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात्। रथं विशिनष्टि। पञ्च चक्षुरादीनि ज्ञानेन्द्रियाणि अश्वा यस्य तम् आशुगं शीघ्रगतिम् अनेन पदेनापि स्वाप्नशरीरमेवात्र विवक्षितं जाग्रद्देहस्याशुगत्वासंभवात्। द्वावहंकारममकारावीषे दण्डिके यस्य तम्। द्वे पुण्यपापे चक्रे यस्य तं तथा एकं प्रधानमक्षो यस्य तं त्रयो गुणाः सत्त्वादयः वेणवो ध्वजा यस्य तं पञ्च प्राणाः बन्धुराणि बन्धनानि यस्य तम्॥ १॥ एकेति। एकं मनः रश्मिः प्रग्रहरज्जुर्यस्य स एका बुद्धिर्दमनः सारथिर्यस्य सः तं च तं च। जायात्वेनोक्ताया अपि बुद्धेर्वृत्तिभेदेन सारथित्वोक्तिः। एकं हृदयं नीडं रथिनम् उपवेशस्थानं यस्मिंस्तं द्वौ शोकमोहौ कूबरं युगबन्धनस्थानं यस्य तं प्रक्षिप्यन्ते प्रक्षिप्यन्ते उत्क्षिप्यन्ते इति प्रहरणानि पञ्च शब्दादयो विषयाः प्रहरणानि सूनासाधनानि यस्मिंस्तं सप्त धातवो वरूथा रथरक्षार्थकचर्माद्यावरणानि यस्य तं पञ्च कर्मेन्द्रियाणि विक्रमा गतिप्रकारा यस्य तम्॥ २॥ हैमेति। हैमोपस्करं सुवर्णाभरणं रथम् आरुह्य अत्र यद्यदनुपयुक्तं तत्तत्कथासौन्दर्याय द्रष्टव्यम्। स्वर्णं स्वर्णमयं वर्म यस्येति स्वर्णवर्मा रजोगुणात्मककवचेनावृतः, इषवो बाणा धीयन्तेऽस्मिन्निति इषुधिर्निषङ्गः अक्षय इषुधिर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नन्तवासनाश्रयोऽहंकाररूपो यस्य सः, एकादशो मनोरूपश्चमूनाथः सेनापतिर्यस्य सः, पुरञ्जनः। पञ्च शब्दादयो विषयाः प्रस्थाः सानवो यस्मिंस्तत् वनं भोगस्थानम् अगात्। स्वप्नं प्राप्य तत्र भाग्यभोगानपश्यदित्यर्थः। वासनामयस्य मनसः प्रग्रहत्वं संकल्पविकल्पात्मकस्य तस्य बृहद्बलत्वेन वक्ष्यमाणस्य चमूनाथत्वमित्यविरोधः ॥ ३ ॥ चचारेति। तत्र वने दृप्तो गर्वितः स्वाप्नदेहपरवश इत्यर्थः। आत्ताः स्वीकृताः इषवो वासनारूपा रागद्वेषादिरूपा वा बाणाः कार्मुकं कर्तृत्वाद्यभिनिवेशरूपं भोगाद्यभिनिवेशरूपं वा धनुर्येन तथाभूतः सन् पुरञ्जनः अतदर्हां त्यागानर्हामपि, जायां विवेकवतीं बुद्धिं विहाय त्यक्त्वा मृग्यन्ते इति मृगाः शब्दादयो विषयास्तेषु व्यसनं भोगासक्तिस्तस्य लालसा अतिस्पृहा यस्य तथाभूतः सन् मृगयां चचार ॥ ४ ॥

आसुरीमिति। घोर आत्मा चित्तं यस्य सः, रजोगुणकार्यक्रोधाविष्टः, कामविरोधकेषु संक्रुद्धचित्त इत्यर्थः। अत एव निरनुग्रहः विरोधिष्वनुग्रहरहितः सन् पुरञ्जनः आसुरीं तामसीं वृत्तिं बुद्धिम् आश्रित्य निशितैः कार्यसाधनक्षमैः विषयसांनिध्यापादकैरिति यावत्। बाणैः कर्मवासनारूपैः शरैः, वनेषु भोगस्थानेषु भजनीयदेशेषु वा वनगोचरान् वनविषयकमृगतुल्यान्, भजनीयविषयान् न्यहनदात्मसात्कृतवान्। कथापक्षे तु सुस्पष्टमेव ॥ ५ ॥ नन्वासुरीं वृत्तिमाश्रित्येति मृगयानिन्दा तु न युक्तैव कथापक्षे राज्ञस्तस्याः विहितत्वात्। अध्यात्मपक्षेऽपि दैवोपसादितभोगस्य जीवानां विहितत्वात् इत्याशङ्क्याह। तीर्थेष्विति त्रिभिः। मृगयायाः रागप्राप्तत्वात्सा न विधीयते किं तु रागवशतः प्रचुरतया वीक्षिता मृगया-प्रवृत्तिर्नियम्यते। षड्विधं तं नियममेव संदर्शयति। यदि अलं लुब्धः रागो सन् हन्यात् तर्हि तीर्थेषु श्राद्धादिषु निमित्तेषु सत्स्वेव, तत्रापि प्रतिदृष्टेषु प्रख्यातेष्वेव न नित्यश्राद्धादिषु, तत्रापि राजा एव न ब्राह्मणा अमूर्द्धाभिषिक्ताः क्षत्रियादयश्च राजापि मेध्यपशून् मेध्यतागुणोपेतानेव नातथाभूतान् तान्मेध्यानपि वने एव महारण्ये गतौ क्रियमाणायां सत्यां तत्रैव तत्रापि यावदर्थं यावदुपयोगमेव नाधिकम् इति नियम्यते संकोच्यते एवं जीवस्य विषयसेवाऽपि यावदुपयोगमेव न यथेष्टमिति। साऽपि नियम्यते तत्प्रकारो यथा। तीर्थेषु ऋतुकालेषु सत्स्वेव तत्रापि प्रतिदृष्टेषु निषिद्धतिथियोगकालादि-वर्ज्यमुक्तदिनेष्वेव, तत्रापि गृहस्थ एव तत्रापि मेध्यायां स्वसद्धर्मनिष्ठभार्यायामेव न पराङ्गनासु। तत्रापि प्रजायै एव न रत्यर्थम्। इति ॥ ६ ॥ अतो नावश्यकत्वं मृगयाया इत्याह। य इति। यः एवं विद्वान् हिंसाया विषयभोगस्य च रागप्राप्ततां तन्नियमं च जानन् नियतं कर्म कुर्वीत वाथवा न वा नैव कुर्वीत। उक्तरीत्या हिंसां विषयभोगं चावश्यकत्वे कुर्यात् अन्यथा न वा कुर्यादित्यर्थः। आवश्यकत्वानावश्यकत्वाभ्यां तत् द्वयं विदध्यान्न विदध्यादितिभावः। हे राजेन्द्र, अनेन कर्मणा अनेन प्रकारेण कृतेन कर्मणेत्यर्थः। जातेनेति शेषः। ज्ञानेन स कर्मकर्त्ता न लिप्यते ॥ ७ ॥ अन्यथेति। अन्यथोक्तनियमानुल्लङ्घ्येत्यर्थः। कर्म स्वस्य शास्त्रेण कर्त्तव्यत्वेन विहितां क्रियामित्यर्थः। कुर्वाणः मानारूढः अन्तःकरण-शुद्ध्यभावात्तत्कर्त्तृत्वमानभागित्यर्थः। अनुबद्ध्यते कृतैरपि कर्मभिः प्रत्युत बन्धनमेव प्राप्नोतीत्यर्थः। ततः गुणप्रवाहे पतितः, कर्मपारवश्याद्गुणरूपे संसारप्रवाहे पतित इत्यर्थः। नष्टा प्रज्ञा यस्य सः, विनष्टदेहात्मविवेकः सन्नित्यर्थः। अधः व्रजति। नरकान् प्राप्नोतीत्यर्थः ॥ ८ ॥

एवं प्रासङ्गिकं समाप्य प्रकृतां मृगयामनुवर्णयति। तत्रेति। चित्रवाजैर्वासनारूपपक्षवद्भिः शिलीमुखैः पुण्यापुण्य-कर्मभिः हेतुभिः निर्भिन्नगात्राणां जीर्णतावदवयववतां दुःखितानां संप्राप्तदुःखानां विषयाणां विप्लवः शैथिल्यं करुणात्मनां कृपालूनां दुःसहः अभूत। यैः साधनैः कामिभिर्विषयाः सेव्यन्ते तच्छैथिल्यं विषयेष्वारोप्य विषयशैथिल्यं तद्भोक्तृष्वारोप्य शैथिल्यात्सतोऽपि तद्भोगभोक्तॄन्वीक्ष्य करुणात्मानो ज्ञानिनः दुःखितमनसो भवन्तीति करुणात्मनां तद्दुःसहत्वोक्तिरित्यर्थः। कथापक्षे चित्रा विचित्रा वाजाः पक्षा येषां तैः नानाविधपिच्छवद्भिः शिलीमुखैर्बाणैः निर्भिन्नानि गात्राणि येषां तेषां दुःखितानां संप्राप्तदुःखानां मृगाणामित्यर्थः। करुणात्मनां दयालूनां दुःसहः विप्लवो विनाशः अभूत् ॥ ९ ॥ शशानिति। शशान् वनाखून् वराहान् क्रोडान् महिषान् रक्ताक्षान् गवयान् गवाल्कान् रुरवश्च शल्लकाश्च तान् तत्र रुरवः मृगभेदाः, शल्लकाः श्वाविधः मेध्यान् विविधान् अन्यान् पशूंश्च विनिघ्नन् श्रमम् अध्यगात्। कथापक्षे स्पष्टमेव। अध्यात्मपक्षे तत्समाना विषया बोध्याः। श्रमाप्तिस्तूभयत्र समैव ॥ १० ॥ एवं राजस्या बुद्धेः कार्यभूतां स्वप्नावस्थां प्रदर्श्येदानीं पुनरपि विवेकयुक्तया बुद्ध्या क्रीडिष्यमाणस्य पुत्रादिसंततिं प्रपञ्चयिष्यन् कथासौन्दर्याय प्रणयकुपितायास्तस्यां अनुनयं प्रस्तावसहितमाह। तत इत्यारभ्य यावदध्यायसमाप्ति। तत इति। क्षुत् तृट् च ताभ्यामशनायापिपासाभ्यां परिश्रान्तः ततः स्वाप्नविषयानु-भवरूपमृगयायाः निवृत्तः, गृहं जाग्रत्स्थानम् एयिवान् आगतः। कृतं स्नानमुचित आहारश्च येन सः अत एव गतक्लमः सन्, संविवेश शय्यामाश्रितः सन्नुपविष्टवान् ॥ ११ ॥ आत्मानमिति। ततः धूपश्चालेपश्चन्दनादेरालेपनं च स्रजः पुष्पमालाश्चादयो येषां तैः, उचितोपचारैः आत्मानम् अर्हयांचक्रे। एवं साधुसम्यगलंकृतानि सर्वाण्यङ्गानि येन तथाभूतः सन् महिष्यां मनः आदधे निहितवान् ॥ १२ ॥ तृप्त इति। तृप्तः उचिताहारेण तृप्तिं प्राप्तः हृष्टः धूपालेपस्रगादिभिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संहृष्टः सुहृष्टः तृप्तिहृष्टिभ्यां सुतरां दर्पोपितः अत एव कन्दर्पेणाकृष्टं मानसं यस्य स तथाभूतः सन् गृहमेधिनीं गृहमेधिनः स्वस्य संबन्धिनीं गृहिणीं गृहाश्रमार्हां वरारोहां स्वाङ्गनां न व्यचष्ट न ददर्श। राजस्यां बुद्धौ वर्त्तमानः सन् सात्त्विकीं बुद्धिं नाचष्ट। हे वेदिषत् प्राचीनबर्हिः। पुरञ्जनः विमनाः दुःखितचित्त इव, अन्तःपुरस्त्रियः अन्तः पुरस्थास्तत्सखीः, अपृच्छत् ॥ १३ ॥ प्रश्नमेवाह। अपीति। हे रामाः स्त्रियः सेश्वरीणां स्वामिनीसहितानां वो युष्माकं कुशलम् अपि। अपिशब्दः प्रश्ने। कुशलप्रश्ने हेतुः। एतर्हि अधुना पुरा यथा तथा गृहेषु गृहसंपदः न शोभन्ते ॥ १४ ॥

यदीति। गृहे माता स्वप्रसूः पतिर्देवता यस्याः सा यदि न स्यात् तर्हि व्यङ्गे चक्राश्वाद्यङ्गरहिते रथे इव प्राज्ञः बुद्धिमान् को नाम को वा पुरुषः दीनवत् आसीत्। दीन एवासीत् प्राज्ञस्तु न कोऽपीत्यर्थः ॥ १५ ॥ केति। या ललना व्यसनार्णवे दुःखसमुद्रे मज्जन्तं मां पदे पदे क्षणे क्षणे प्रज्ञां दीपयन्ती सती उद्धरते। व्यसनार्णवादितिशेषः। सा ललना क वर्त्तते। इत्यपृच्छदितिशेषः ॥ १६ ॥ नरनाथेति। हे नरनाथ त्वत्प्रिया भवदङ्गना यत् व्यवस्यति निश्चिनोति तन्न जानीमः। त्वदङ्गना यदर्थं वैमनस्यमापन्ना तद्धेतुं न विदामः तां तु विद्म इत्यर्थः। हे शत्रुहन् निरवस्तारे आस्तरणरहिते भूतले अवधूतशयन इत्यर्थः। शयानां पश्य ॥ १७ ॥ पुरञ्जन इति। पुरञ्जनः स्वमहिषीं भुवि पतितामितिशेषः। अवधूतां त्यक्तदेहादरां निरीक्ष्य तत्सङ्गेन तस्यामासक्त्या उन्मथितं व्याकुलं ज्ञानं यस्य तथाभूतः सन् परमं वैक्लव्यं ययौ ॥ १८ ॥ सान्त्वन्निति। ततः श्लक्ष्णया मृद्व्या वाचा विदूयता परितप्तेन हृदयेन मनसा सान्त्वयन्ननुनयन् प्रेयस्याः प्रियायाः यः प्रेमसंरम्भः प्रणयकोपस्तस्य लिङ्गं कारणम् आत्मनि मनसि न अध्यगात्। न निश्चितवान्। एतस्या एतत्कुटिलदृष्ट्यादिकं किंहेतुकमिति नैवाविददित्यर्थः ॥ १९ ॥ अनुनिन्य इति। अथ ततः अनुनयकोविदः सान्त्वनकुशलः वीरः स पुरञ्जनः शनकैः अनुनिन्ये सान्त्वयामास। अनुनयप्रकारमेवाह। पादयुगलं पस्पर्श। ततः उत्सङ्गे लालितासुत्सङ्गारोपणादिना विहितलालनां ताम् आह च ॥ २० ॥ नूनमिति। हे शुभे ईश्वराः स्वामिनः कृतमागोऽपराधो यैस्तेषु येषु भृत्येषु आत्मसात् कृत्वा आत्माधीनोऽयमिति मत्वेत्यर्थः। शिक्षादण्डं शिक्षाकरणरूपं दण्डविधानं न युञ्जते न कुर्वन्ति। ते भृत्याः तु अकृतपुण्याः मन्दभाग्या नूनम् ॥ २१ ॥ परम इति। कुतः यतः प्रभुणा स्वामिना भृत्येषु अर्पितः दण्डः परमः अनुग्रहः स भृत्यानां हितायैव भवतीत्यर्थः। यस्तु स्वामिना दण्डितो भृत्यः विषीदति सोऽज्ञ इत्याह। बाल इति। हे तन्वि बन्धुकृत्यम् अमर्षणः स्वामिकृतं दण्डममृष्यमाणः सन् तत् न वेद तत्कृतं दण्डमनुग्रह इति न जानातीत्यर्थः। सः बालः अज्ञः मूर्खः इति यावत्। अतो मम शिक्षार्थी स्वामिनि त्वं कथं विमुखी भवसीत्यर्थः ॥ २२ ॥

सेति। हे सुदति शोभनदन्तोपेते हे सुभ्रु हे मनस्विनि सा मत्स्वामिनी भाववती त्वम् अनुरागभारेण व्रीडया च यो बिलम्बो मन्थरभावस्तेन विलसच्छोभमानः हसितावलोकः सहासं विलोकनं यस्मिंस्तत्। नीला मेचकाश्च ते अलकाः केशास्त एवालयस्तैः उपस्कृतं भूषितं उन्नसमुच्चनासिकं वल्गु सुन्दरं वाक्यं यस्मिंस्तत् एवंविधं मुखं स्वदाननं स्वानां त्वद्भृत्यसमानानां नः प्रदर्शय। भृत्येभ्यः सहर्षस्वमुखदर्शनविधापनमेव स्वामिकृतपरमानुग्रह इति भावः ॥ २३ ॥ अन्यकृतापराधेन कुपितासि चेत्तत्र वच्मीत्याह। तस्मिन्निति। हे वीरपत्नि वीरस्य मम भार्ये यः ते तुभ्यं कृतकिल्बिषः विहितत्वदपराध इत्यर्थः। तस्मिंस्त्वदपराधयुक्तपुरुषे अहं भूसुरकुलाद्ब्राह्मणकुलात् अन्यत्र कुले मुररिपोः दासात् इतरत्र अच्युतगोत्रिभगवद्दासकुलादितरस्मिन्कुले च दमं दण्डं दधे करोमि। त्वत्सहायस्य मम क्रुद्धस्य सत इति शेषः। त्रिलोक्यां अन्यत्र त्रैलोक्याद्बहिश्च त्रिलोक्या अन्तर्बहिश्चेत्यर्थः। त्वदपराधं कृत्वेति शेषः। उन्मुदितमुत्कैर्मोदसहितं वीतभयं विगतमद्भयं च न पश्ये वै नैव पश्यामीत्यर्थः ॥ २४ ॥ वक्त्रमिति। इतः पूर्वं कदाचिदपीति शेषः। ते तव वक्त्रं मुखं वितिलकं तिलकात्मककुंकुमचन्द्रकरहितमित्यर्थः। न पश्ये नापश्यमिति भावः। इदानीं त्विति शेषः। मलिनं मलयुतं विहर्षं विगतहर्षं संरम्भः क्रोधावेशस्तेन भीमं भयंकरम् अविमृष्टमनुज्ज्वलम् अपेतरागं स्नेहशून्यं पश्ये। तथा ते सुजातौ शोभनौ स्तनौ वक्षोजावपि शुचोपहतौ शोकाश्रुबिन्दूपहतौ पश्ये। तथा बिम्बाधरं बिम्बफलाकारमधरोष्ठं च विगतः कुंकुमपङ्कः कुंकुमपङ्कसमानः रागस्ताम्बूलरागो यस्मात्तथाविधं पश्ये। कुत एवं जातमितिशेषः ॥ २५ ॥ तदिति। तत्तस्मात् कृतं किल्बिषमपराधो येन तस्य किल्बिषमेवाह। स्वैरं स्वातन्त्र्येण त्वामपृष्ट्वेत्यर्थः। मृगयां गतस्य व्यसनातुरस्य सुहृदः मे मम प्रसीद प्रसन्ना भव वशगतं वशंवदं प्राप्तं कुसुमास्त्रस्य वेगेन विध्वस्तं गतं पौंस्त्वं पौरुषं धैर्यमिति यावद्यस्य तं दैवो देवनं क्रीडा तं राति ददातीति देवरः स्वामी तम् उशती कामयमाना स्त्री कृत्ये कर्तुं योग्येऽर्थे का न भजेत। भजेतैवेत्यर्थः ॥ २६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे षड्विंशोध्यायः ॥ २६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सप्तविंशोऽध्यायः

नारद उवाच

इत्थं पुरञ्जनं सध्र्यग्वशमानीय विभ्रमैः । पुरञ्जनी महाराज रेमे रमयती पतिम् ॥ १ ॥

प्रियापुत्रादिकासक्त्या सप्तविंशेऽस्मृतात्मनः । आख्यानैः कालकन्याद्यैर्जरारोगादि कथ्यते । ॥ १ ॥
अध्यात्मपक्षबाहुल्यात्स प्राक् पूर्वत्र बोधितः । कथापक्षस्तूत्तरेषु पूर्वं बोधाय वक्ष्यते ॥ २ ॥

कथासौन्दर्यार्थं पुरञ्जनकृतस्त्र्यनुनयादिकोद्देशेन जीवस्योपाधिवश्यत्वमुक्त्वा तन्निमित्तां संसारपरंपरां निरूपयितुमाह । इत्थमिति । हे महाराज पुरञ्जनी पुरञ्जनपत्नी इत्थमुक्तप्रकारेण विभ्रमैर्विलासैः पुरञ्जनं सध्र्यक् सम्यक् वशम् आनीय स्वाधीनं कृत्वा पतिं रमयती सती रेमे । पत्या चिक्रीडेत्यर्थः । अत्राध्यात्मपक्षे प्रतिपदं कथंचिद्योजयितुं शक्यते तथापि श्रीनारदमुनिसमभिहितकथातात्पर्यं तु जीवस्य स्त्रीपुरुषवासनादार्ढ्येन विचित्रा संसृतिर्भवतीत्येतावदेव प्रतीयतेऽत इतोऽधिकतया कथनं स्वप्रौढिख्यापनमेवातोऽत्र यथायथं व्याख्यानमेव सुखबोधाय क्रियते नाधिकं न न्यूनं च ॥ १ ॥ स इति । हे राजन् स राजा पुरञ्जनः महिषीं सुस्नातां रुचिराननां कृतस्वस्त्ययनां कुंकुमसिन्दूरादिभिर्विहितमङ्गलां तृप्तां स्वाद्वन्नाशनजलपानादिस्तृप्तिं संप्राप्ताम् उपागताम् स्वसमीपमागताम् अभ्यनन्दत आनन्दं प्राप्य स्वीचकारेत्यर्थः । अध्यात्मपक्षे उक्तविशेषणविशिष्टां स्त्रियमिव राजसीं बुद्धिमनुकूलाममन्यतेत्यर्थः ॥ २ ॥ तयेति । तया महिष्या उपगूढ आश्लिष्टः परिरब्धा आश्लिष्टा कंधरा महिष्याः ग्रीवा येन सः रह एकान्ते अनुमन्त्रैरनुकूलगुह्यभाषणैः अपकृष्टा चेतना विवेको यस्य सः प्रमदैव परिग्रहो ज्ञानसाधनं यस्य सः पुरञ्जनः दिवायं दिवसः निशेयं रात्रिरिति च दुरत्ययं कालरंह कालवेगं न बुबुधे । अध्यात्मपक्षे जीवबुद्धयोः परस्परोपगूहनपूर्वं परिरब्धकंधरतयैकत्वेनानुसंधानं रहोऽनुमन्त्रत्वं शब्दादिविषयैः अपकृष्टचेतनत्वं विवेकापहृतिश्च प्रमदापरिग्रह आलस्यादिकर्तृबुद्धेरेव स्वीकारो न ज्ञानादेरिति यथासंभवं योजना ॥ ३ ॥ शयान इति । उन्नद्धो वृद्धिं प्राप्तो मदो यस्य सः महामना उदारचित्तः महार्हतल्पे महामूल्यवच्छय्यायां शयानः कृतस्वापः महिष्या भुज एव उपधिरुच्छीर्षकं यस्य सः वीरः पुरञ्जनः तां महिषीम् एव परं केवलं मनुते अमन्यत यतः । तमोऽभिभूतः अतः यत् निजं परं च न मनुते । अत्र बहुविधा मूले पाठाः सन्ति ते तूपेक्षिताः प्रयोजनाभावात् । अध्यात्मपक्षे महार्हतल्पं हृदयं शयनं बुद्धिपारवश्यं बुद्धिसङ्गकृतवैषयिकसुखमेव परमपुरुषार्थं मनुते न निजस्वरूपं परमात्मस्वरूपं चेति ॥ ४ ॥

तयेति । हे राजेन्द्र तया महिष्या सह एवमुक्तप्रकारेण तत्पारवश्येनेत्यर्थः । रममाणस्य अत एव कामैः शब्दादिभिः अनुभूयमानैः कश्मलं मलिनं चेतो यस्य तस्य पुरञ्जनस्य नवं नूतनं वयः क्षणार्द्धम् इव व्यतिक्रान्तम् उभयपक्षयोरेक एवार्थः ॥ ५ ॥ तस्यामिति । हे विराट् पुरञ्जनः तस्यां पुरञ्जन्याम् एकादश शतानि पुत्रान् अजनयत् । अथ आयुषः अर्द्धम् अत्यगादतिक्रान्तवान् । अध्यात्मपक्षे इन्द्रियपरिणामात्मकाः पुत्राः शतसंवत्सरजीवमात्मकम् आयुः कालस्तदर्द्धं पञ्चाशद्वर्षाणि एतद्देहाभिप्रायेणोक्तम् ॥ ६ ॥ दुहितृरिति । हे प्रजापते ततः पितृभ्रातृयशस्करीः शीलौदार्यगुणोपेताः पुरञ्जनकन्यात्वात्पौरञ्जन्यः दशोत्तरशतं दशाधिकशतं च दुहितृः अजनयदिति पूर्वश्लोकगतमनुसंधेयम् । अध्यात्मपक्षे पित्रोर्जीवबुद्ध्योः भ्रातृणामिन्द्रियपरिणामानां चानुकूलाः । अत्र पुत्रसंख्या बाहुल्यमात्राभिप्राया पुत्रेभ्यो न्यूनत्वेन दुहितृसंख्या च गार्हस्थ्यसौन्दर्यार्था संज्ञेया ॥ ७ ॥ स इति । पञ्चालानां देशानां पतिरधिपः स पुरञ्जनः पित्रोः वंशं विशेषेण वर्द्धयन्तीति तान् पुत्रान् दारैर्भार्याभिः संयोजयामास विवाहयामास । तथा दुहितृः पुत्रीः सदृशैरनुरूपैः वरैः पतिभिः संयोजयामास । अध्यात्मपक्षे पञ्चेवि विषयान्व्यक्तीकुर्वन्तीति पञ्चाला इन्द्रियाणि त एव पाञ्चालाः प्रज्ञादित्वात्स्वार्थेऽण् । इन्द्रियपरिणामरूपपुत्रान् हितचिन्तारूपाभिर्भार्याभिः दुहितृस्तु इन्द्रियपरिणामान्तरभाविनीः बुद्धिवृत्तिरूपाः पुत्रीः उचितविषयभोगरूपैः पतिभिः संयोजयामासेति ॥ ८ ॥ पुत्राणामिति । पुत्राणां पुत्राश्च अभवन् तेऽपि एकैकस्य पुरञ्जनपुत्रस्य शतं शतम् अभवन् यैः पुरञ्जनपौत्रैः पौरञ्जनः वंशः पुरञ्जनस्यान्वयः पञ्चालेषु समेधितो वृद्धिं प्राप्तः वै । अध्यात्मपक्षे पुण्यापुण्यकर्मरूपाः पुरञ्जनपुत्रपुत्राः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र शतशब्दो बाहुल्याभिप्रायकः। पौरञ्जनो वंशः संसारः पाञ्चालेषु शब्दादिविषयेषु निमित्तेषु निमित्तमिह फलं शब्दादिविषयभोगार्थमित्यर्थः ॥ ९ ॥ तेष्विति। तेषु पुत्रेषु तद्रिक्थहारेषु पौत्रेषु गृहं च कोशश्च अनुजीविनश्च तेषु च निरूढेन बद्धमूलेन ममत्वेन व्यासक्तः सन् न अन्वबुध्यत। कियदायुः कालो व्यतीत इति नानुसंधत्त इत्यर्थः। अध्यात्मपक्षे पुत्रपौत्रा व्याख्याताः। गृहं शरीरम्। कोशोऽहंताममताश्रयोऽहंकारः। अनुजीविन इन्द्रियप्राणाः। तैः स्वीकृतया आसक्त्या नान्वबुध्यत स्वस्वरूपपरमात्मस्वरूपे न विदितवानिति ॥ १० ॥

ईजे इति। नानाकामः नानाविधकामान् कामयमानः भवान् यथा तथाविधः सोऽपि, पशुमारकैः हिंसागर्भैः अत एव, घोरैः, क्रतुभिर्यज्ञैः दीक्षितः कृतसंकल्पः सन् देवान् पितृन भूतपतीन् ईजे इष्टवान्। अध्यात्मपक्षे नानाकामः नानाविधशब्दादिविषयान् कामयमानः हिंस्रत्वात् घोरैः क्रतुभिः कर्मेन्द्रियव्यापाररूपैः देवशब्दो देवाधिष्ठितेन्द्रियपरः ॥ ११ ॥ युक्तेष्विति। एवं युक्तेष्वात्महितेषु सकलकर्मसु प्रसक्तस्य संसक्तस्य पाठान्तरे अनवहितस्य कुटुम्बेष्वासक्तं चेतो यस्य तस्य पुरञ्जनस्य सः, कालः आससाद संप्राप्तः वै। यः कालः प्रिया योषितः स्त्रियो येषां तेषाम् अप्रियः। अध्यात्मपक्षे युक्तेषु दृढतराभिसंधियुक्तेषु कर्मसु कुटुम्बं बुद्धितद्वृत्त्यादिकं स कालो जरासमयः ॥ १२ ॥ चण्डवेग इति। तदा हे नृप चण्डवेगः इति ख्यातः गन्धर्वाश्च गन्धर्व्यश्च गन्धर्वास्तेषामधिपतिः 'पुमान् स्त्रिया' इत्येकशेषः। बलिनः तस्य षष्ट्युत्तरशतत्रयं गन्धर्वाः ॥ १३ ॥ गन्धर्व्य इति। तादृशीस्तादृश्यः षष्ट्युत्तरशतत्रयपरिमिता एव मैथुन्यः गन्धर्वैर्मिथुनीभूय स्थिताः, सितासिताः उज्ज्वला अनुज्ज्वलाश्च अस्य चण्डवेगस्य गन्धर्व्यः चण्डवेगादयः सर्वेऽपि परिवृत्त्या परिभ्रमणेन सर्वकामविनिर्मितां पुरञ्जनपुरीमितिशेषः। विलुम्पन्ति अपहर्तुमारेभिरे इत्यर्थः। अध्यात्मपक्षे चण्डवेगस्तु संवत्सररूपः कालः प्रसिद्धः षष्ट्युत्तरशतत्रयपरिमिता गन्धर्वशब्दोक्ता दिवसाः। गन्धर्व्यो रात्रयस्ता अपि षष्ट्युत्तरशतत्रयपरिमिता एव। मायया गन्धर्वा यथा लोकधनादिकमपहरन्ति तद्वदायुर्धनहरत्वेनोभयेषां गन्धर्वता सिता गन्धर्व्यः शुक्लपक्षरात्रयः असिता गन्धर्व्यः कृष्णपक्षरात्रयः। ते च ताश्च परस्परं मैथुन्यः मिथुनीभूता एव सर्वे मिलित्वा शब्दादिभिस्तत्करणैश्च सर्वैः कामैर्युक्ततया निर्मितां शरीररूपां पुरीं नित्यपरिवृत्त्या अपहरन्त्येव। जरावस्थायां तद्दर्शनादुत्तरे वयसीदमुक्तम्। इति द्वयोरेकाऽन्वयः ॥ १४ ॥ ते इति। चण्डवेगानुचराः ते गन्धर्वाः यदा पुरञ्जनपुरीं हर्तुम् आरेभिरे तदा तत्र पुर्यां प्रजागरः प्रत्यषेधन्न्यवारयत। अध्यात्मपक्षे प्रजागरः प्राणः सुषुप्त्यवस्थायामपि प्राणव्यापारसत्त्वात्प्रजागर इत्युक्तम्। यावत्प्राणव्यापारस्तावच्छरीरस्यावैकल्येनावस्थानात्प्रत्यषेधदित्युक्तम् ॥ १५ ॥ स इति बली बलवान् एकोऽसहायः स प्रजागरः, सप्तभिः, शतैः, विंशत्या च विंशत्यधिकसप्तशतसंख्याकैरित्यर्थः। गन्धर्वैः, शतं समाः शतवर्षपर्यन्तमित्यर्थः। पुरञ्जनपुराध्यक्षः पुरञ्जनपुरपालकः सन् युयुधे युयोध। अध्यात्मपक्षे विंशत्यधिकसप्तशतभृत्या रात्रिदिवसरूपास्ते एव गन्धर्वाः। शतैरित्यत्र शरैरिति पाठे बली एकः सः, पुरञ्जनपुराध्यक्षः सप्तभिः त्रिंशत्या च शरैः शतं समाः युयुधे इत्यन्वेतव्यम। तत्राध्यात्मपक्षे सप्तविंशतिशरास्तु भूतपञ्चकतन्मात्रपञ्चकज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकापानादिचतुष्कमनोबुद्ध्यहंकारात्मकाः ॥ १६ ॥

क्षीयमाण इति। एकस्मिन् प्रधानभूते स्वसंबन्धिनि स्वकीये प्रजागरे बहुभिः सह युधा युद्धेन क्षीयमाणे सति अथ कार्त्स्न्येन, सराष्ट्रपुरबान्धवः राष्ट्रेण पुरेण बान्धवैश्च सहितः पुरञ्जनः परां चिन्तां जगाम। अध्यात्मपक्षे बहुभिः रात्रिदिवसैः साकं युधा एकस्मिन्प्रधानभूते स्वसंबन्धिनि प्राणे क्षीयमाणे सराष्ट्रपुरबान्धवः शब्दादिभिः सहितः सः जीवः परां चिन्तामवापेति योजना ॥ १७ ॥ स इति। स पुरञ्जनः, एव पूर्वमितिशेषः। पुर्यां स्वपार्षदैः उपनीतं संप्रापितं बलिं गृह्णन् पञ्चालेषु मधुभुक् तुच्छसुखभोक्ता स्त्रीजितश्च सन् भयं सांप्रतमधिगतां भीतिं न अविदन्नालोचितवान्। अध्यात्मपक्षे मधुभुक् तुच्छविषयभोगी स जीवः पञ्चालेषु शब्दादिविषयेषु मध्ये अन्यतममिति शेषः। स्वपार्षदरूपैरिन्द्रियैरुपानीतं बलिं विषयं गृह्णन्ननुभवन् स्त्रीजितः सन् भयं नालोचितवानिति ॥ १८ ॥ कालस्येति। अथ हे बर्हिष्मन् कालस्य कालनाम्नः कस्यचन, काचित् दुहिता पुत्री अस्ति। सा त्रिलोक्यां वरम् इच्छती सती पर्यटन्ती भ्रमणं कुर्वती आसीदित्यर्थः। तां कश्चन कोऽपि पुमान् न प्रत्यनन्दत नैवावृणोत् तत्परिणयनं न चकारेत्यर्थः। अध्यात्मपक्षे कालोऽनेहास्तदतिक्रमे जरा जायतेऽतः कालकन्या जरा षडूर्मिमध्ये चतुरूर्मिभोगानन्तरमपक्षयविनाशकर्त्र्यास्तस्याः समीक्षणं प्रसिद्धमेव ॥ १९ ॥ दौर्भगेनेति। दुर्दुष्टं भगं सौन्दर्यं भवत्यस्मादिति दुर्भगः स एव दौर्भगस्तेन आत्मना स्वरूपेण सा लोके दुर्भगा इति विश्रुता प्रख्याता अभूदितिशेषः। वै। तां विशिनष्टि। या कालकन्या ययातिपुत्रेणेतिशेषः। वृता सती तुष्टा च सती तु चार्थे। राजर्षये पूरवे वरं राज्यासनरूपम् अदात्। ययातिर्देवयान्यागः संक्रुद्धशुक्रशापात् जरां प्राप्य पुत्रानुवाच हे सुता भवन्मातामहकृतामिमां जरां गृह्णीतेति तां च ज्येष्ठाश्चत्वारोऽपि सुता न जगृहुः कनीयान्पुरुर्जगृहे तेन तुष्टो ययातिस्तस्मै सार्वभौमराज्यं ददौ तत उपचाराज्जरैवादादित्युक्तम् ॥ २० ॥ कदाचिदिति कदाचित् सा कालकन्या अटमाना भूर्लोके पर्यटन्ती सती ब्रह्मलोकात्सत्यलोकात् महीं भूमिं गतं प्राप्तं मां बृहद्व्रतं नैष्ठिकं जानती सत्यपि त्वय्यर्थे काममोहिता। अत एव वव्रे। त्वं मां वृणीहीत्युवाचेत्यर्थः ॥ २१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मयीति । ततः मया प्रत्याख्याते सतीति शेषः । मयि संरभ्य क्रोधं कृत्वा विपुलं महान्तं सुदुःसहं दुरतिक्रमणीयं शापम् अदात् मह्यमिति शेषः । शापमेवाह । हे मुने त्वं यतः मद्याच्ञाविमुखः असि ततः एकत्र स्थातुं न अर्हसि । अत्रायं भावः । अनिरीक्षितजराकालाद्दक्षपुत्रा एकादशसहस्राणि नारदोपदेशेन सिद्धाः सन्तोऽजरस एवापुनरावृत्तिं गतिं प्राप्ताः दक्षः तन्नारदकृतं ज्ञात्वा त्वं नैकत्र स्थातुमर्हसीति शप्तवान् । एवं सति दक्षसुतानङ्गीकृता जरा दक्षे उपचरिता ततो दक्षकृतं शापं जराकृतं शापं संभाव्य दक्षसुतकृतं जरानङ्गीकरणं नारदे उपचर्य कथालंकाराय जरया नारदः शप्त इति संभाव्यात्रैवमुक्तमिति ॥ २२ ॥ तत इति । ततः विहतसंकल्पा भ्रष्टमनोरथा कन्यका कालकन्या यवनेश्वरं मया उपदिष्टं नाम्ना भयं भयनामानमित्यर्थः । आसाद्य पतिं वव्रे । अध्यात्मपक्षे आधयो व्याधयश्च यवनाः । यवनवत्पीडाकारित्वात् जरावस्थायामाध्यादिपीडाधिक्याद्भयं ततो जराया भयवरणं संभावितम् ॥ २३ ॥ जराकृतभयवरणप्रकारमाह । ऋषभमिति । हे वीर यवनानां ऋषभं स्वामिनं त्वाम् ईप्सितं पतिं वृणे । त्वयि कृतः भूतानां संकल्पः न रिष्यति किल । यत्पराभवाय त्वं संकल्पं करिष्यसि स ते सफल एव मद्वराद्भविष्यतीति भावः ॥ २४ ॥ त्वयाहं न प्रत्याख्येयेति नीतिं दर्शयन्त्याह । द्वाविति । यत् लोकशास्त्रोपनतं लोकतो वेदतश्च यद्देयत्वेन ग्राह्यत्वेन च प्राप्तमित्यर्थः । तत् यः न राति याच्यमानाय न ददाति यः न इच्छति येन केनाऽपि दीयमानम् इमौ द्वौ असद्व्यर्थः अवग्रहोऽभिमान आग्रहो वा ययोस्तौ अत एव बालौ अज्ञौ भवतः अतः ताविति शेषः । अनुशोचन्ति सन्त इति शेषः । एतौ द्वौ सतामनुशोच्यावित्यर्थः ॥ २५ ॥ अत इति । अतः हे भद्र भजन्तीं मां भजस्व मे मयीत्यर्थः । अधिकरणानुपादाने संबन्धसामान्ये षष्ठी । दयां कुरु । यतः आर्त्तान् अनुकम्पते यत् एतावान् एव पौरुषः पुरुषेण कर्त्तव्य इत्यर्थः । धर्मः अस्तीतिशेषः ॥ २६ ॥ कालकन्येति । सः यवनेश्वरो भयनामा कालकन्योदितं कालसुतया जरया कथितं वचो वचनं निशम्य श्रुत्वा देवगुह्यं मरणं प्राणिनां वैराग्यानुदयाय जानद्भिरपि देवैर्जननमरणं गुह्यतेऽतो मरणस्य देवगुह्यमिति संज्ञा कृतास्ति । चिकीर्षुः कर्त्तुमिच्छुः सन् सस्मितं यथा तथा तां कालकन्याम् अभाषत ॥२७॥ मयेति । हे कालकन्ये तुभ्यं त्वदर्थमित्यर्थः । मया आत्मसमाधिना चित्तस्यैकाग्र्येण बहुधा विचार्येत्यर्थः । अयं लोकः लोकरूपः पतिः निरूपितः निश्चितः । कोऽसौ लोकस्तत्राह । त्वया स्वतो याच्यमानोऽपीति शेषः । अभद्रामामङ्गलरूपाम् असंमतां कैश्चिदपि न संमतां त्वां न अभिनन्दति नेच्छति स सर्वोऽपि तवैव पतिरित्यर्थः ॥ २८ ॥ त्वमिति । अभिनन्दनात्साक्षात्त्वं प्रति गमनं तवायुक्तमिति शेषः । अतः अव्यक्तगतिः कुत इयं दुर्भगा प्राप्तेति तैरलक्षितगतिः सती त्वं कर्मविनिर्मितं कर्मपरवशं लोकम् आक्रम्य भुङ्क्ष्व एवं सति स सर्वोऽप्ययं लोकस्तव पतिर्भविष्यतीत्यर्थः । न चैवं त्वया शंकनीयं प्रतिकूलां मामयं लोको हनिष्यतीति यस्मात्त्वमेव लोकानां नाशं करिष्यसीत्याह । याहीति । या मे मम मदीयेति यावत् पृतना यावनानां सेना अस्ति तया युक्ता याहि एवं च प्रजानाशं प्रणेष्यसि करिष्यसि ॥ २९ ॥ प्रज्वर इति । किं च अयं प्रज्वारः मम भ्राता भवति त्वं च मे मम भगिनी स्वसा भव । अध्यात्मपक्षे प्रज्वारो मारको वैष्णवो ज्वरः । अस्य ज्वरसामान्यत्वेऽपि मारकत्वा-द्वैष्णवो ज्वर एवाभिहितः । माहेश्वरस्य तस्य व्याध्यन्तःपातित्वेन मारकत्वाभावात् । उभाभ्यां प्रज्वारकालकन्याभ्यां युवाभ्यां सह भीमसैनिकः यवनसेनानायकोऽहम् अव्यक्तोऽव्यक्तगतिः सन् अस्मिन् लोके चरामि गतिं करिष्यामि ॥ ३० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायाम-न्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे सप्तविंशोऽध्यायः ॥ २७ ॥

—:❀:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथाष्टाविंशोऽध्यायः

नारद उवाच

सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः । प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ॥ १ ॥

वैदर्भ्याख्यानतः स्त्रीत्वं प्राप्तस्य स्त्रीविचिन्तया । अष्टाविंशे तु जीवस्य मुक्तिर्देवाद्युदीरिता ॥ १ ॥

इदानीं पुरञ्जनः यथा पुरुषदेहं त्यक्तवांस्तत्प्रकारकथनपूर्वकं यथा स्त्रीदेहं प्राप्तवांस्तत्प्रकारमाह सैनिका इत्यारभ्य राजसिंहस्य वेश्मनीत्यन्तग्रन्थेन । सैनिका इति । हे बर्हिष्मन् भयनाम्नः ये सैनिकाः सेनासमवेताः दिष्टकारिणः मृत्योः आदेशकारिणः ते प्रज्वारकालकन्याभ्यां सह इमाम् अवनीं भूमिं विचेरुः । अध्यात्मपक्षे ईश्वरस्य एव आज्ञाकारिणः ॥ १ ॥ त इति । हे नृप एकदा कदाचित्तु देहारम्भकप्रारब्धावसाने इत्यर्थः । ते भयसैनिकाः जरत्पालितां जीर्णनागसंरक्षितां भौमभोगाढ्यां भूम्युद्भूतभोगैरापूर्णां पुरञ्जनपुरीं पुरञ्जननगरीं रभसा वेगेन रुरुधुः । अध्यात्मपक्षे जरत्पन्नगो जीर्णः प्राणः भौमभोगाः शब्दादयो विषयाः ॥२॥ कालकन्येति । कालकन्या अपि पुरञ्जनपुरीं बलात् बुभुजे । यया कालकन्यया अभिभूतः पुरुषः सद्यः निःसारताम् इयात् । अध्यात्मपक्षे कालकन्या जरा बलात् पुरञ्जनेऽनिच्छति सत्यपि निःसारत्वं बलरहितत्वम् ॥ ३ ॥

तयेति । तया कालकन्यया उपभुज्यमानां सकलां पुरीं यवनाः सर्वतोदिशं सर्वास्वपि दिशास्वित्यर्थः । द्वार्भिः पुरद्वारैः प्रविश्य सुभृशं प्रार्दयन पीडितवन्तः वै । अध्यात्मपक्षे कालकन्यया जरया उपभुज्यमानां पुरीं देहं यवना आधिव्याधयः द्वार्भिश्चक्षुरादिभिः प्रविश्य रोगरूपेण प्रवेशं कृत्वा भृशम् आर्दयन् ॥ ४ ॥ तस्यामिति । तस्यां पुरञ्जनपुर्यां प्रपीड्यमानायां यवनैरर्द्यमानायां सत्याम् अभिमानी ममेयं पुरीत्यभिमानवान् पुरञ्जनः यतः कुटुम्बी अतः ममताकुलस्तन्ममताक्षिप्तचित्तः सन् उरुविधान् अनेकप्रकारान् तापान् अवाप । अध्यात्मपक्षे कुटुम्बं बुद्धीन्द्रियमनआदिरूपम् ॥ ५ ॥ कन्येति । कन्योपगूढः कालकन्यया दृढतरमाश्लिष्टः विषयेष्वेवात्मा चित्तं यस्य सः अत एव कृपणः नष्टा श्रीः शोभा यस्य सः गन्धर्वयवनैः बलात् हृतमैश्वर्यं यस्य सः नष्टा प्रज्ञा बुद्धिर्यस्य सः पुरञ्जनः अध्यात्मपक्षे कन्योपगूढो जरयात्याश्लिष्टः तथापि विषयात्मको विषयोपभोगचित्तः ततः नष्टा श्रीर्ज्ञानशक्तिर्यस्य सः गन्धर्वयवनैः बलात् हृतैश्वर्यः रात्रिदिनातिक्रमाधिव्याधिभिर्बलात्परिहृतौत्थानादिशक्तिरित्यर्थः ॥ ६ ॥ विशीर्णमिति । स्वपुरं विशीर्णं शिथिलं वीक्ष्य प्रतीकूलाननपेक्षितप्रदत्वेन पूर्वतो विपरीततया वर्त्तमानान् अनादृतानादरमकुर्वाणान पुत्रपौत्रानुगामात्यान् गतसौहृदां सुहृद्भाववर्जितां जायां च वीक्ष्य अध्यात्मपक्षे प्रतिकूलान् अनपेक्षितविषयप्रापकान् । अनादृतानस्वाधीनान् पुत्रान् । इन्द्रियपरिणामरूपान् पौत्रान् पुण्यापुण्यकर्मरूपान् तदनुगानिन्द्रियाणि । अमात्यांस्तद्देवताः एतान्सर्वान् अस्वाधीनत्वाद्गतसौहृदां जायां बुद्धिम् ॥ ७ ॥ आत्मानमिति । आत्मानं देहं कन्यया कालकन्यया ग्रस्तं स्वाधीनवां नीतं पाञ्चालान्देशविशेषांश्च अरिदूषितान् विघ्नविधानैः पराभूतान् वीक्ष्येति शेषः । दुरन्तचिन्ताम् आपन्नः सन् तत्प्रतिक्रियां तत्परिहारोपायं न लेभे इति त्रयाणामेकसंबन्धः । अध्यात्मपक्षे कन्यया जरया ग्रस्तं निःसारतामापादितं पञ्चालान्विषयान् अरिदूषितान् करणशैथिल्यापादनेन भोगाक्षमतां नीतान् ॥ ८ ॥ कामानिति । कन्यया कालकन्यया हेतुभूतया यातयामान् निःसारतां प्राप्तान् चापि । कामान् अभिलषन् दीनस्तदनाप्त्या तु कृपणतोपेतः विगता आत्मगतिरात्मानुसंधानं स्नेहश्च यस्य सः पुत्राणां दारास्तान् लालयन्ननुपच्छन्दयंश्च । अध्यात्मपक्षे विगतौ आत्मगतिः पारलौकिकी स्नेहः ऐहिकः पुत्रादिस्नेहश्चेति यस्य सः । पुत्रदारानिन्द्रियपरिणामबुद्धीः ॥ ९ ॥

गन्धर्वेति । राजा पुरञ्जनः गन्धर्वाश्च यवनाश्च तैराक्रान्ता तां कालकन्यया अवमर्दिता पीडिता तां तां पुरीम् अनिकामतोऽनिच्छन्नपि हातुं त्यक्तुं प्रचक्रमे उपचक्रमे उपाक्रान्तवान् । अध्यात्मपक्षे गन्धर्वैरहोरात्ररूपैः यवनैराध्यादिभिश्च आक्रान्ताम् । कालकन्यया जरयावमर्दिताम् उभयोरेकसंबन्धः ॥ १० ॥ भयनाम्न इति । तदा भयनाम्नः अग्रजः भ्राता प्रज्वारः प्रत्युपस्थितः भ्रातृसहायार्थं समायातः भ्रातुर्भयनाम्नः प्रियचिकीर्षया प्रियं कर्तुं वाञ्छया कृत्स्नां तां पुरीं ददाह । अध्यात्मपक्षे प्रज्वारो मारको वैष्णवो ज्वरः उपस्थितः संप्राप्तः । भ्रातृप्रियं मरणम् । कालज्वरः पुरञ्जनशरीरे प्रविश्य तच्छरीरं भृशं ततापेत्यर्थः ॥११॥ तस्यामिति । तस्यां पुरञ्जनपुर्यां संदह्यमानायां प्रज्वारेणातितप्यमानायां सत्यां सपौरः पुरजनैः सहवर्त्तमानः सपरिच्छदो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भृत्यवर्गसहितः कुटुम्बेन सह दीव्यतीति कौटुम्बिकः सान्वयः पुत्रादिसहितः पुरञ्जनः कुटुम्बिन्या स्वमहिष्या सह उपातप्यत परितापं संप्राप्तवान् । अत्रोभयत्र समानमेव ॥ १२ ॥ यवनेति । कालकन्यया पुर्यां ग्रस्तायां सत्यां यवनैरुपरुद्धान्यायतनानि यस्य सः पुरपालः प्रज्वारेण संसृष्टः सन् अन्वतप्यत । अध्यात्मपक्षे जरया शरीरे जीर्णतां नीते सति श्लेष्मपित्तावृतनासादिस्वप्रचारस्थानः प्राणः कालज्वराक्रान्तः सन् तापमवाप ॥ १३ ॥ न शशाकेति । पूर्वतिशयितं यत्कृच्छ्रं दुःखं तेनोरुरतिशयितः वेपथुः कम्पो यस्य सः पुरपालसहितः पुरञ्जनः तत्र पुर्याम् ऊषितुमवस्थातुं न शशाक । किंतु ततस्तस्याः पुर्याः सकाशात् सानलादग्निसहितात् वृक्षकोटरात् सर्प इति शेषः । इव गन्तुम् ऐच्छत् । अध्यात्मपक्षे प्राणसहितो जीवः प्राणोत्क्रान्तेरेव जीवोत्क्रमणत्वदर्शनात् । 'प्राणोऽनुजीवमनुधावति यत्र तत्र' इत्यस्मिन् ग्रन्थ एवोक्तेः ॥ १४ ॥ शिथिलेति । हे राजन् यर्हि यदा गन्धर्वैः शिथिलावयवः शिथिलीकृतावयवः हृतं पौरुषं यस्य सः तथाभूतः जातः तदा अरिभिः यवनैः उपरुद्धः अत एव ह स्फुटं यथा तथा रुरोद । अध्यात्मपक्षे गन्धर्वैर्दिवसैः । यवनैराधिव्याधिभिः रुरोद व्याध्यादिभिर्निरुद्धमार्गत्वाद्घुर्घुरध्वनिं चकारेत्यर्थः ॥ १५ ॥

दुहितॄरिति । दुहितॄः, पुत्रपौत्रान् जामयः स्नुषाश्च जामातरः दुहितृपतयश्च पार्षदाः भृत्याश्च तान् स्वत्वावशिष्टं भोगस्य प्रथमत एव क्षीणत्वात्केवलं स्वत्वमात्रेणावशेषतां प्राप्तं यत् किंचित् गृहकोशपरिच्छदं गृहप्रभृतिकं वस्तु तदध्याविस्युत्तरेण संबन्धः । अध्यात्मपक्षे दुहित्रादिकं तु प्राग्व्याख्यातम् ॥ १६ ॥ अहमिति । अहं मम, इति स्वीकृत्य पूर्वश्लोकोक्तं सर्वमहं ममाभिमानविषयं कृत्वा, गृहेषु दारेषु पत्न्यामित्यर्थः । कुत्सिता मतिर्यस्येति कुमतिरासक्तबुद्धिः । गृही पुरञ्जनः, प्रमदया सह विप्रयोगे विश्लेषे उपस्थिते प्राप्ते सति, प्रतीते सतीत्यर्थः । दीनः सन् दध्यौ । कथाध्यात्मपक्षयोः समानम् । बुद्ध्यात्मिकां प्रमदां विहाय गमिष्यामि उत सहैव गमिष्यामि इति चिन्तामकरोदित्यध्यात्मपक्षे विशेषः ॥ १७ ॥ ध्यानमेवाह । लोकान्तरमिति । मयि, लोकान्तरं गतवति सति, तु अनाथा कुटुम्बिनी बालकान् अनुशोचती एका असहायेयं कथं केन प्रकारेण वर्त्तिष्यते ॥१८॥ तद्गुणान्स्मरन्नाह । न मयीति । मयि अनाशिते अभोजिते न भुङ्क्ते । मयि अस्नाते न स्नाति यतः मत्परा अतः मयि रुष्टे तु संत्रस्ता भर्त्सिते भर्त्सने मया कृते सति, भयात् यतवाक् मौनं बिभ्रतीत्यर्थः ॥ १९ ॥ प्रबोधयतीति । अविज्ञमविवेकिनं मा मां प्रबोधयति । व्युषिते मयि देशान्तरं गते शोकेन कर्शिता जायते किंच गृहमेधीयं वर्त्म नेष्यति अपि अनुवर्त्तिष्यति किं वा, एतदनुवर्त्तनं युक्तं यतो वीरसूः पुत्रवती एवं सत्यपि मूढत्वात् मद्विरहमसहमाना मरिष्यत्येवेति भावः ॥ २० ॥ कथं न्विति । दीनाः, दारकाः पुत्राः दारिका दुहितरः वा चार्थे न विद्यते परमयनमाश्रयो येषां तेऽपरायणाः, सर्वे मयि गते सति भिन्ना नौर्येषां ते पूरुषाः उदधौ समुद्रे इव कथं नु वर्त्तिष्यन्ते । अत्र लोकान्तरं गतवतीत्यनेन सर्वेन्द्रियपरिणामहेतुभूता जीवैकाधीना बुद्धिर्लोकान्तरं गच्छता जीवेन सह गच्छति उत नेति शङ्कोत्थापनम् । वर्त्मैतद्गृहमेधीयमित्यर्द्धेन सहैव गच्छतीति कथं नु दारका इत्यनेन परिणामवद्बुद्धिकरणानीन्द्रियाण्यपि किं जीवेन सहैव गच्छन्ति उत नेति संशय्य सहैव गच्छन्तीत्युक्तमिति प्रतिभाति । अत्रार्थे प्रमाणभूता भगवद्गीता तत्तु 'मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति । शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्' इति बुद्धेर्मनस एव वृत्तिविशेषत्वान्मनोगमनोक्त्या बुद्धेरपि सहगमनं व्यज्यते तया सह प्राणस्य तेन सहेन्द्रियाण्यपि । तथाच श्रुतिः 'तमनुक्रामन्तं प्राणोऽनुक्रामति प्राणमुत्क्रामन्तं सर्वे प्राणा अनुक्रामन्ति' इति । प्राणा इन्द्रियाणि ॥ २१ ॥

एवमिति । एवं कृपणया बुद्ध्या शोचन्तम् अतदर्हणं शोकविधानानर्हं वस्तुतः सच्चित्त्वेन युक्तत्वात् एनं पुरञ्जनं ग्रहीतुं पुराद्विश्लेषयितुं कृतधीर्निश्चितबुद्धिः, भयनामा मृत्युः अभ्यपद्यत संप्राप्तवान् ॥ २२ ॥ पशुवदिति । एष पुरञ्जनः पशुवत् पशुं यथा तथा स्वकं स्वकीयं क्षयं कर्मानुगुणं स्थानं प्रति यवनैः नीयमानः अभवत् तदा अनुपथाः सेवकाः भृशं शोचन्तः आतुराः यत्नैः पीडिता अत आतुरताभाजः सन्तः, अन्वद्रवन् अनुसृत्य गतवन्तः । अत्रार्थे श्रुतिः प्रसङ्गात्प्रागुक्तास्ति । अध्यात्मपक्षे अनुपथाः प्राणा इन्द्रियाणि च ॥ २३ ॥ पुरीमिति । भुजंगमः पुरपालत्वेनाभिहितः सर्पः उपरुद्धः यवनैर्यदोपरोधतां नीतः तदा पुरीं विहाय अपगतः भुजंगग्रहणाद्दह्यमानं वृक्षकोटरं विहाय यथा भुजंगमो गच्छति तद्वद्गत इति भावः । यदा गतः सर्पो यदा पुरीं त्यक्त्वा गतः तदा तम् अनु एव तद्गमनानन्तरमेवेत्यर्थः । पुरी विशीर्णा शिथिला सती प्रकृतिं लयं गता प्राप्ता दारापत्यादयः सर्वे पुरञ्जनविश्लेषमसहमानास्तेनैव सह विनष्टाः अभवन् पुरी च विनष्टाभूदित्यर्थः । अध्यात्मपक्षे भुजंगमः प्राणाः पुरं स्थूलशरीरं प्रकृतिं महाभूततताम् ॥ २४ ॥ विकृष्यमाण इति । बलीयसा बलवत्तरेण यवनेन पुर्याः सकाशात् प्रसभं यथा तथा विकृष्यमाणः तदा तमसाऽज्ञानेन आविष्टः सन् पुरञ्जनः पुरः स्वाग्रे सन्तमपि सखायं सुहृदं न अविदत् स्वेन सह वृत्तिर्हि सख्युर्धर्मः । विपुलापराधसत्त्वेऽपि तदानुकूल्येन रिरक्षाबुद्धिः सुहृद्धर्मः तथात्वभाजमपि सखायं सुहृदं च न सस्मारेत्यर्थः । अध्यात्मपक्षे सुहृत्सखिरूपः परमात्मा तम् ॥ २५ ॥ तमिति । अदयालुना दयारहितेन अनेन पुरञ्जनेन यज्ञे ये पशवः संज्ञप्ताः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिंसिताः ते पशवः अस्य पुरञ्जनस्य तत् अमीवं तत्कृतं पापं स्मरन्तः अत एव संक्रुद्धाः सन्तः तं पुरञ्जनं कुठारैः परशुभिः चिच्छिदुः ॥ २६ ॥ अनन्तेति । अनन्तपारे अपारे तमसि नरके मग्नः अत एव नष्टस्मृतिर्गतविवेकः पुरञ्जनः शाश्वतीः समाः, बहुसंवत्सरपर्यन्तमित्यर्थः । आर्त्तिं दुःखम् अनुभूय प्रमदासङ्गदूषितः प्रमदासङ्गेन दूषितचित्तः ॥ २७ ॥

तामेवेति । तां भार्यामेव मनसा गृह्णन्नन्तकाले संस्मरन् अत एव अनन्तरमुक्तविधार्त्तिसमनुभवनानन्तरम्, राजसिंहस्य नृपमण्डले सिंहवद्वर्त्तमानस्य विदर्भस्य नृपस्य वेश्मनि प्रमदोत्तमा बभूव । प्रमदात्र देहानुबन्धिनी भार्या विवक्षिता न तु बुद्धिरूपा बुद्धिसङ्गस्याऽऽसंसारमनुवर्त्तमानत्वेन सर्वेषां सर्वदा स्त्रीजन्मापत्तेः । अथाऽग्रेऽत्र प्रकरणे त्वेतावदेव प्रकृतार्थोपयोगि विवक्षितुं योग्यमस्ति । तद्यथा । योषितो ध्यानेन योषिद्भावाप्तौ जातायां सत्यामपि पतिव्रतानुचिन्तनेन पूर्वकालीनादृष्टेन च धर्मव्रतो विदर्भादस्य जन्माभूत् । धर्मव्रतः तस्य सङ्गेन च शुद्धभावं प्राप्तस्यास्य भगवद्भक्तेन मलयध्वजेन संगमोऽभवदथ विष्णोर्भक्तिस्ततो विरक्तिरथ तमेव स्वस्वामिरूपं गुरुं मत्वा पतिव्रतार्हधर्मेण भजमानाया भगवत्प्रसादावाप्तज्ञानेन मोक्षो जात इति, इत इतरत्तु कथालंकारप्रचुरमस्त्यथापि किंचित्किंचित्तद्वृत्तिसाम्यतामात्रेणैवेह योग्यतया योजयिष्यामः । अध्यात्मपक्षे विदर्भस्य विशिष्टदर्भोपलक्षितस्य कस्यचन कर्मठस्य यज्ञविधानादिना धर्मेण हि कर्मठा राजन्ते तेषु श्रेष्ठत्वाद्राजसिंह इत्युक्तस्तस्य वेश्मनि भवने विशेषतया कर्ममार्गाचरणवत्त्वेन विशिष्टतावति कुले पुरञ्जनः प्रमदाभावं प्राप्य विदर्भपुत्रीत्वाद्वैदर्भीनाम्ना प्रसिद्धा आसीदित्यर्थः । इति द्वयोरेकाऽन्वयः ॥ २८ ॥ उपयेम इति । वीर्यपणां सामर्थ्यरूपपणप्राप्यां वैदर्भीं विदर्भदुहितरं परेषां पुराणि जयतीति परपुरञ्जयः, पाण्डूनां जनपदानां राजा पाण्ड्यः, मलये मलयाचलोपलक्षितदक्षिणदेशे ध्वज इव दर्शनीयत्वान्मलयध्वजः एतत्संज्ञाप्रसिद्धो नृपः युधि संग्रामे राजन्यान् राजकुमारान् निर्जित्य तद्देशे स्वयंवरातिशयप्रसिद्धेः स्वयंवरे पराभाव्येत्यर्थः । उपयेमे परिणीतवान् । अध्यात्मपक्षे वीर्यं भगवद्भक्तियोगानुष्ठानसामर्थ्यमेव पणो बन्धनं यस्यास्तां भागवतमेव वृणवानीति संकल्पवतीमित्यर्थः । मलयोपलक्षितो देशो हि विष्णुभक्तिप्रधानस्तत्र मुख्यत्वान्मलयध्वजो भागवत इत्यर्थः । पण्डा निश्चयात्मिका बुद्धिस्तामर्हतीति पांड्यः । परस्य परमात्मनः पुरं पुरवज्जीवद्वारा वासस्थानं शरीरं तज्जयतीति परपुरञ्जयः देहगुणादिभिरपराभूत इत्यर्थः । युधि इन्द्रियपराजयविधानरूपे युद्धे, राजन्यान् जितेन्द्रियान् निर्जित्य वर्त्तमान इति शेषः । जितेन्द्रियेषु मुख्य इत्यर्थः । उपयेमे । एतावता पुरञ्जनो भागवतसङ्गं संप्राप्तवानित्येव विवक्षितम् । यद्यप्यत्र 'राज्ञो जातावेवेति वाच्यम्' इति जातौ नियमितोऽयं यत्प्रत्ययस्तदन्तो राजन्यशब्दः क्षत्रियजातीयवचनस्तथाप्यत्र गौणवृत्त्या जितेन्द्रियपरतया व्याख्यातः । क्षत्रियजातीयो हि जयेन राजते इति जयगुणयोगाज्जितेन्द्रिये तद्वृत्तेः संभवात् ॥ २९ ॥

तस्यामिति । स मलयध्वजः, तस्यां वैदर्भ्याम्, असिते अञ्जनश्यामे ईक्षणे नयने यस्यास्ताम् आत्मजां सुताम्, जनयांचक्रे उत्पादयामास । तथा यवीयस आत्मजाया अनुजातान् सप्तसंख्याकान् सप्तद्रविडभूभृतः सप्तसंख्यद्रविडभूमिखण्डपालकान् सुतान् जनयांचक्रे च । अध्यात्मपक्षे स मलयध्वजो भागवतः तस्याम् असिते श्रीकृष्णे ईक्षणं दृष्टिर्यया ताम् आत्मजां श्रीकृष्णसेवारुचिरूपां तनयां जनयांचक्रे । वैदर्भ्या भागवतसङ्गेन श्रीकृष्णसेवारुचिरभूदित्यर्थः । तथा यवीयसः श्रीकृष्णसेवारुचेः पश्चाज्जातत्वात्कनीयसः सप्त सप्तसंख्याकान् सप्तद्राविडभूभृतः सप्त त्वगादिसप्तधातून् द्रवति प्राप्नोतीति सप्तद्रविलो जीवस्तस्य भूः स्थानं मुक्तिलक्षणं तां बिभ्रत्युत्पाद्य ददन्तीति सप्तद्रविलभूभृतो जीवानां मुक्तिदातॄन् । 'द्रुगतौ' इत्यस्मादिलच्प्रत्यये गुणे च कृते रूपसिद्धिः । डलयोरैक्यम् । सुतान् 'श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यम्' इत्येवंरूपान् जनयांचक्रे । वैदर्भ्या आदौ भागवतसङ्गो जातस्ततस्तत्सङ्गेन श्रीकृष्णे रुचिर्जाता तया श्रवणादिसप्तविधा भक्तिर्जाता इत्यर्थः । भगवदनपायिसुहृत्त्वभगवदेकान्तिकत्वरूपयोः । सख्यात्मनिवेदनयोर्भगवतैव उत्तरत्र वक्ष्यमाणत्वादिदानीमनुत्पत्तेः सप्तेत्युक्तम् ॥ ३० ॥ एकैकस्येति । हे राजन् तेषां पुत्राणां मध्ये एकैकस्य अर्बुदमर्बुदं पुत्राः अभवन् । यद्वंशधरैः येषां वंशधारकैः पुत्रैः, मही कृत्स्ना भूमिः मन्वन्तरं ततः परं च भोक्ष्यते । अध्यात्मपक्षे तेषां श्रवणादिसप्तानाम् एकैकस्य अर्बुदमर्बुदं पुत्रा अभवन्नामश्रवणकीर्त्तनादीनां प्रत्येकमनेके प्रकारा अभवन् इत्यर्थः । तदुक्तं 'भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते' इति । येषां वंशधरैर्यैतः प्रवृत्तैः संप्रदायभेदैः मन्वन्तरमतः परं च मही भोक्ष्यतेऽनुभूयते । श्रवणकीर्त्तनादिसंप्रदायभेदैर्व्याप्ता मही अविद्याकामकर्मभ्योऽपि रक्षिष्यत इत्यर्थः ॥ ३१ ॥ अगस्त्य इति । धृतानि व्रतानि यया तां प्राग्दुहितरं प्रथमजातां पुत्रीम् अगस्त्यः एतन्नामा मुनिः उपयेमे परिणीतवान् । यस्यामेतस्यां दुहितरि इध्मवाहात्मजः इध्मवाह आत्मजो यस्य सः दृढव्रतः मुनिः जातः । अध्यात्मपक्षे अगानि निष्क्रियाणि गात्राणि स्त्यायति संघातयतीत्यगस्त्यो मनः सः प्राग्दुहितरं प्रथमजातां श्रीकृष्णसेवारुचिरूपां तद्दुहितरम् उपयेमे । तस्या मनः कृष्णे दृढां रतिं बबन्धेत्यर्थः । दुहितृशब्दोपात्तां रतिं विशिनष्टि । धृतानि शमदमादीनि व्रतानि यया तां यस्यां रत्यां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुहितरि इध्मवाहस्यात्मजः अनेन समिदुपादानपूर्विका गुरूपसत्तिरुक्ता 'स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति श्रुतिप्रसिद्धसमिद्वहनपूर्वकगुरूपसादनजः दृढं व्रतं श्रवणोपयोगिशमदमात्मकं व्रतं यस्य सः मुनिः ब्रह्मोपदेशात्मको मुनिः, उपदिष्टस्यार्थस्य मननप्रचुरत्वान्मुनिः जातः उपासनोपयोगिनां शमादीनां श्रवणकालेऽभावा-दिदानीमेव जातो बभूवेत्युक्तम् आदौ तस्या मनसि श्रीकृष्णे दृढा रुचिर्जाता तया इहामुत्र भोगविरागो जात इति अनुक्तमपि ज्ञातव्यम् ॥ ३२ ॥

विभज्येति । तनयेभ्यः पुत्रेभ्यः क्ष्मां भूमिं विभज्य त्रिभागं कृत्वा यथायथं तेभ्यो दत्त्वेत्यर्थः । राजर्षिः सः मलयध्वजः । कृष्णं आराराधयिषुः सन् कुलाचलं मलयगिरिं जगाम । अध्यात्मपक्षे तनयेभ्यः श्रवणकीर्त्तनादिभ्यः क्ष्मां स्वोपजीव्यां भगवद्भक्त्यात्मिकां पृथ्वीं विभज्य श्रवणकीर्त्तनादिसाध्यामनुसंधाय श्रवणादिभक्तिभेदांस्तत्र व्यवस्थाप्येत्यर्थः । सः मलयध्वजः कृष्णमाराधयितुमिच्छुः सन् मलयपर्वतं गत इति ॥ ३३ ॥ मलयध्वजः गुरूपसत्तिपूर्वकशमादियुक्तश्रवणमननादि-प्रमुखां श्रवणकीर्त्तनभवत्सेवारुचिं वैदर्भ्यामुत्पाद्य तया सह भगवन्तमाराधयितुं शुद्धम् एकान्तदेशं ययावित्युक्तमथ मलयध्वजस्य महाभागवतस्याष्टाङ्गयुक्तभवद्भक्तियोगानुष्ठानप्रकारं वैदर्भ्याः पत्युः परिचर्याप्रकारं चाह हित्वेत्यादिना मनो दधे इत्यन्तेन ग्रन्थेन । हित्वेति । मदिरे मादके ईक्षणे यस्याः सा वैदर्भी सुखान् सुखप्रदान् भोगान् गृहांश्च सुखशब्दस्तत्साधनेषु ह्यत्रोप-चारात्प्रयुक्तस्ततः पुंस्त्वमत्रास्य दर्शितम् । हित्वा त्यक्त्वा रजनीकरं चन्द्रं ज्योत्स्ना चन्द्रिका इव पाण्ड्येशं मलयध्वजम् अन्वधावत अनुसृत्य गतवती ॥ ३४ ॥ तत्रेति । तत्र कुलाचले चन्द्रमसा नाम ताम्रपर्णी नाम वटोदका नाम चन्द्रमसादिनामभिः प्रसिद्धास्तिस्रो नद्यः सन्तीतिशेषः । तासां पुण्यानि यानि सलिलानि जलानि तैः आत्मनः स्वस्य उभयत्र अन्तर्बहिश्च नित्यं मृजन् स्नानपानादिभिर्मलं क्षालयन् तप आस्थित इत्युत्तरेणान्वयः ॥ ३५ ॥ कन्देति । कन्दाः शार्ककरकन्दादयश्च अष्टयो बीजानि दाडिमादेश्च तैः मूलानि मूलकादेश्च फलानि कपित्थादेश्च तैः पुष्पाणि वर्षाजीवन्त्यादेश्च पर्णानि जीवन्त्यादेश्च तैः तृणानि दूर्वाङ्कुरादयश्च उदकानि जलानि च तैः वर्त्तमानो वृत्तिं कुर्वन् पूर्वपूर्वालाभे उत्तरोत्तरैर्देहधारणं कुर्वाण इत्यर्थः । एवं शनैः गात्रकर्षणं शरीरशोषणं तपः आस्थितः । अनशनात्मकं तप आस्थितोऽभूदित्यर्थः ॥ ३६ ॥ शीतेति । ततः शीतं च उष्णं च वाताश्च वर्षाणि च तानि क्षुच्च पिपासा च ते प्रियं चाप्रियं च ते सुखं च दुःखं च ते इत्येवंविधानि द्वन्द्वानि समदर्शनः शितोष्णादिनिमित्तचित्तविकाररहितः सन् अजयत् ॥ ३७ ॥

तपसेति । तपसा कर्मयोगेन विद्यया ज्ञानयोगेन च पक्वः निरस्तः कषायः रागवदनिवर्त्त्यपुण्यापुण्यात्मको यस्य सः यमैः नियमैश्च विजितानि अक्षाणीन्द्रियाणि अनिलः प्राणः आशयोऽन्तःकरणं येन सः एवंविधः सन् ब्रह्मणा परमात्मना आत्मानं प्रत्यगात्मानं मनो वा युयुजे । पाठान्तरेऽपि परमात्मनि आत्मानं मनो युयोजेत्यर्थः । ब्रह्मात्मकं स्वात्मानमनु-संहितवान् इत्यर्थः ॥ ३८ ॥ आस्त इति । स्थाणुः स्तम्भ इव एकत्रैकस्मिन् देशे दिव्यं वर्षशतं देवानां शतवर्षपर्यन्तमित्यर्थः । स्थिरो निश्चलः आस्ते । स्मेत्यध्याहारः । कथंभूतः सन्नित्याकाङ्क्षायां तं विशिनष्टि । वासुदेवे भगवति रतिं प्रभूतानुरागात्मिकां भक्तिम् उद्वहन् संपादयन्कुर्वन्निति यावत् । स एवंभूतः सन् अन्यत्स्वशरीरादिकं न वेद न सस्मारेत्यर्थः ॥ ३९ ॥ स इति । स मलयध्वजः व्यतिरिक्तया सर्वेष्वन्तर्यामितयावस्थितत्वेऽपि वस्तुतः स्वधाम्नि व्यतिरेकभावेन स्थितमित्यर्थः । साक्षिणं साक्षाद्द्रष्टारम् आत्मानं परमात्मानम् आत्मनि स्वक्षेत्रज्ञे व्यापकतया स्थितमिति शेषः । विद्वान् 'य आत्मनि तिष्ठन्नात्मनोऽन्तर' इति श्रुत्युक्तप्रकारेण जानन् देहमिति शेषः । स्वप्नम् इव आमृश्य स्वप्नवदनित्यं देहादिवृत्तान्तं विचार्येत्यर्थः । ह स्फुटं यथा तथा विरराम । देहादिविस्मरणं कृत्वा केवलपरमात्मध्यानानुसंधानपरोऽभूदित्यर्थः ॥ ४० ॥ साक्षादिति । हे नृप साक्षात्प्रत्यक्षतया वर्त्तमानेन भगवता षाड्गुण्यपूर्णेन हरिणा गुरुणा उक्तेन विश्वतोमुखं यथा तथा स्फुरता अकुण्ठितेनेत्यर्थः । विशुद्धज्ञानदीपेन स्वपरयाथात्म्यबोधकभगवद्गीताहरिगीतादिरूपप्रदीपेनेत्यर्थः ॥ ४१ ॥ पर इति । आत्मानं प्रत्यगात्मानं परे ब्रह्मणि तथा परं ब्रह्म आत्मनि प्रत्यगात्मनि ईक्षमाणः उपासनातिशयेन साक्षात्कुर्वन्नित्यर्थः । परे ब्रह्मणीति धारकत्वमुक्तम् । परं ब्रह्मेति व्यापकत्वमुक्तम् । ईक्षां संप्रज्ञातसमाधिभावेन भेदसमीक्षणं विहाय अस्मात् विचारात् उपरराम । ह । वासुदेवः सर्वमिति विचारातिशयेन स्वात्माऽननुसंधानपूर्वं यावदुपरमं वासुदेवमसंप्रज्ञातसमाधिनोपासितवानित्यर्थः । इति द्वयोरेकसंबन्धः ॥४२॥ पतिमिति । पतिरेव देवता देववदुपास्यो यस्याः सा पतिदेवता सा वैदर्भी भोगान् हित्वा परमधर्मज्ञं भगवदाराधनरूपसर्वोत्कृष्ट-धर्मनिष्ठं मलयध्वजं पतिं प्रेम्णा पर्यचरत् सिषेवे ॥ ४३ ॥ चीरेति । चीरं वासो वस्त्रं यस्याः सा । व्रतेन अनशनादिना क्षामा कृशा । वेणीभूता जटीभूताः शिरोरुहाः केशा यस्याः सा उपपतिं पत्युः समीपे शान्तमङ्गारावस्थम् अनलम् उप इति शेषः । शान्ता निर्धूमत्वाच्छुद्धा शिखा ज्वाला इव बभौ ॥ ४४ ॥

अजानतीति यदा पतिः उपरराम तदानीमपीतिशेषः । सुस्थिरासनम् आसाद्य उपरतं भूतं प्रियतमं पतिम् अजानती अङ्गना वैदर्भी यथापूर्वं पूर्ववदेव, उपाचरत् पत्युरङ्घ्री पर्यचरत् ॥ ४५ ॥ यदेति । यदा च अर्चती पत्यङ्घ्रिसंवाहनं कुर्वती

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सती पत्युः अङ्घ्रौ ऊष्माणं न उपलभेत नोपलब्धवती तदा यूथभ्रष्टा मृगो यथा तथा संविग्नहृदया दुःखितचित्ता आसीत् ॥ ४६ ॥ आत्मानमिति । अबन्धुं पतिरहितम् अत एव दीनम् आत्मानं शोचती वैदर्भी विक्लवाश्रुभिः शोकोद्गतनेत्रजलैः स्तनौ आसिच्य विपिने सुस्वरं यथा तथा ह स्फुटं खेदे वा प्ररुरोद ॥ ४७ ॥ तदेवाह । उत्तिष्ठेति । हे राजर्षे उत्तिष्ठ उत्तिष्ठ, क्षत्रबन्धुभ्योऽधार्मिकक्षत्रियेभ्यः अत एव दस्युभ्यः चौररूपेभ्यः बिभ्यन्तीं भयं प्राप्तवतीं इमाम् उदधिमेखलां भूमिं पातुं रक्षितुम् अर्हसि । अध्यात्मपक्षे हे राजर्षे जितेन्द्रियश्रेष्ठ क्षत्रबन्धुभ्यः दस्युभ्यः केवलत्रिवर्गनिष्ठत्वेन चतुर्वर्गान्तिमगमकनिवृत्तिमार्गतस्करेभ्य इत्यर्थः । बिभ्यतीं निवृत्तिमार्गलोपजचिन्तया भयातिशयोपेताम् इमाम उदधिमेखलामासमुद्रं भक्त्यतिशयवतीं भूमिं पातुं निवृत्तिधर्मस्य सम्यक्प्रवर्त्तनेन रक्षितुम् अर्हसि ॥ ४८ ॥ एवमिति । विपिने अरण्ये पतिम् अनुगता अनुसृत्य वर्त्तमाना बाला वैदर्भी एवं विलपती सती भर्त्तुः स्वस्वामिनः पादयोः पतिता रुदन्ती सती च अश्रूणि अवर्त्तयन्मेघधारावत्प्रवर्त्तयामास ॥ ४९ ॥ चितिमिति । ततः दारुमयीं प्रचुरकाष्ठसंभृतां चितिं चितां कृत्वा विरचय्य तस्यां पत्युः कलेवरं शरीरं निधायेति शेषः । आदीप्य ततस्तां प्रज्वाल्य च विलपन्ती अनुमरणे सहगमने मनः दधे धृतवती ॥ ५० ॥ तत्रेति । तत्र तस्मिन्नवसरे पूर्वतरः पुरातनः कश्चित् सखा आत्मवान् ब्राह्मणः भूत्वा समागत्येति शेषः । वल्गुना मधुरेण साम्ना सामवाक्येन सान्त्वयन्नुपलालयन् रुदतीं तां वैदर्भीं प्रभो इति संबोध्य आह । अध्यात्मपक्षे कश्चित् सखा ईश्वरः हे प्रभो निरुपाधिकसुख इति सबोध्य आह । यादृच्छिकसुकृतमात्रतुष्टो भगवान्ब्राह्मणरूपेणागत्य वैदर्भीं सान्त्वयन्नाहेत्यर्थः । भागवतसंबन्धमात्रतुष्टो भगवान्वैदर्भीमनुजग्राहेति वा ॥ ५१ ॥

उक्तमेवाह का त्वमित्यादि तथैवान्तरमावयोरित्यन्तेन । का त्वमिति । का त्वं त्वं किंजातिविशिष्टेत्यर्थः । कस्य असि । कस्य संबन्धिनी भवसि कं पुरुषमाश्रित्य तिष्ठसीत्यर्थः । यस्य शोचसि यदीयाहमिति प्रकाश्य शोकं कुर्वाणा वर्त्तसे इत्यर्थः । शयानश्चित्यां कृतशयनः अयं को वा शयानस्यास्य स्वस्य च स्वरूपं देहप्रयुक्तमुभयोः संबन्धं चाविदित्वा किं वृथा शोचसीत्यभिप्रायः । येन मया अग्रे पूर्वं विचचर्थ तं मां सखायं जानासि किम् । अध्यात्मपक्षे येन परमात्मना मया अग्रे सृष्ट्यादौ विचचर्थ । मयि स्थितत्वेन सख्यसुखमनुभूतवानसि इत्यर्थः । तं ह द्वासुपर्णेति श्रुत्या स्फुटतयोक्तं मां सखायं जानासि किम् । आवां सखायौ भवावः । तथापि अनादित्वत्कर्मानुगुणमत्संकल्पेन तव मम च स्वरूपं विस्मृत्य देवमनुष्यादिविकारं प्राप्तोसीति भावः ॥ ५२ ॥ अपीति । अपि च यद्यपि मां न जानासीति शेषः । तथापि हे सखे आत्मानं त्वाम् अविज्ञातसखम् अविज्ञातनामा सखा यस्य तं स्मरसि । अविज्ञातसंज्ञः कश्चिन्मे सखा आसीदिति स्वात्मानं स्मृतिपथं नयसीत्यर्थः । हे सखे इति पुंस्त्वनिर्देशः प्रकृतिविलक्षणपुरुषस्वरूपस्मरणाय सख्यं स्मारयन् स्ववियोगकृतमनर्थजातं संकलय्याह हित्वेति सार्द्धैः षड्भिः । मामन्तरात्मभूतं हित्वा भौमभोगरतः शब्दादिविषयानुभवासक्तः सन् पदं भोगस्थानं देवमनुष्यादिशरीरमिति यावत् । अन्विच्छन् गतः मद्वियोगं प्राप्य स्वपरयाथात्म्यज्ञानविधुरो जात इत्यर्थः ॥ ५३ ॥ हंसाविति । हे आर्य त्वं च अहं च मानसायनौ मानससरोवरनिवासिनौ सखायौ मित्रतोपेतौ हंसौ अभूतां मानसं नः कियत्कालमोक आसीदित्याकाङ्क्षायामाह सहस्रपरिवत्सरान् अनन्तकालमित्यर्थः । अन्तरा मानसरोवरमध्ये ओको गृहं प्राप्तौ च आवामिति शेषः अभूताम् । अध्यात्मपक्षे मानसायनौ मानसं हृदयमयनं ययोस्तौ हंसौ शुद्धौ अन्तरेति मध्यार्थेऽव्ययम् । वाशब्द एवार्थः ॥ ५४ ॥ स त्वमिति । हे बन्धो, स हंसः, त्वं मां त्वत्सखायं मां विहाय त्यक्त्वा विस्मृत्येति यावत् । ग्राम्येषु शब्दादिषु मतिर्यस्य स एवंभूतः सन् महीं पृथ्वीं गतः । तत्रापि पदं निवासस्थानं विचरन्विचिन्वन् यद्वा विचरन्मह्यां परिगच्छन् कयाचित् स्त्रिया निर्मितं पदम् अद्राक्षीः ॥ ५५ ॥ पदं विशनष्टि । पञ्चाराममिति । पञ्च आरामा उपवनानि यस्मिंस्तत् । नव द्वाराणि छिद्राणि यस्मिंस्तत् । एकः पालः पालको यस्मिंस्तत् । त्रीणि कोष्ठानि प्राकारा यस्मिंस्तत् । षट् कुलानि अभीष्टसमर्पका वणिजो यस्मिंस्तत् । पञ्च विपणा हट्टा यस्मिंस्तत् पञ्च प्रकृतय उपादानकारणं यस्य तत्, स्त्री एव धवा स्वामिनी यस्मिंस्तत् ॥ ५६ ॥

स्वयमेवेमं श्लोकं द्वाभ्यां व्याचष्टे । पञ्चेति । पञ्च पञ्चसंख्याका इन्द्रियार्थाः शब्दादयः आरामाः प्राणायना इन्द्रियस्थानानि नेत्रद्वयश्रोत्रद्वयादिरूपगोलकसंज्ञानि नव च्छिद्राणीत्यर्थः । नवद्वारः चक्षुरादीनामिन्द्रियाणां प्राणायत्तप्रवृत्तित्वात्तदाश्रयत्वाच्च प्राणायनत्वम् । एकः प्राणः पालो यस्मिन्नित्यर्थस्य स्पष्टत्वान्न व्याख्यातम् । तेजश्च आपश्च अन्नं पृथिवी च तानि कोष्ठानि एतानि त्रीणि कोष्ठानीत्यर्थः । इन्द्रियसंग्रहः कुलं कुलवदभीष्टप्रापकत्वान्मनःसहितज्ञानेन्द्रियषट्कं प्रत्येकं कुलसंज्ञमित्यर्थः ॥ ५७ ॥ विपणा इति । क्रियाशक्तिस्तु कर्मेन्द्रियाणि पञ्च विपणाः भूतानि पृथिव्यादिपञ्चभूतानि प्रकृतिर्यस्य उपादानकारणं सा कथंभूता अव्यया नित्या अनेन पञ्चप्रकृतिरित्येतद्व्याख्यातम । अत्र भूतान्तर्गततेजोऽबन्नानां त्रयाणां देहारम्भकत्वात्प्रकृतित्वम् अस्थिरुधिरमांसरूपेण परिणामादेषां कोष्ठत्वमपि बोध्यम् । तथा च छान्दोग्ये श्रूयते । ‘अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो भागस्तत्पुरीषं यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः । आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो भागस्तन्मूत्रं यो मध्यमस्तल्लोहितं योऽणिष्ठः सः प्राणः । तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् इति । यद्यपि कोष्ठस्थानीयत्वेन परिणामं प्राप्तेषु तेजोबन्नेषु पञ्चीकरणप्रक्रियया वाय्वाकाशावपि प्रविष्टौ तथापि भूतत्रयांशानां बाहुल्यात्त्रिकोष्ठमित्युक्तम् । भूतात्मकोपादानस्य प्रतिक्षण-परिणामशीलत्वेऽपि अवस्थावद्द्रव्यस्य प्रधानाख्यस्य नित्यत्वादव्ययेत्युक्तम् । तथा च श्रुतिः, 'गौरनाद्यन्तवती' 'अजामेकाम्' इति । स्मृतिश्च । 'प्रकृतिं पुरुषं चैव विध्यनादी उभावपि' इति । शक्तिर्बुद्धिरधीशा यस्य सः तस्या वशः सन्नित्यर्थः । पुमान् भवान् अत्र मोहजनकेऽस्मिन् स्थाने प्रविष्टः सन् न अवबुध्यते स्वात्मानं मां च न जानातीत्यर्थः ॥ ५८ ॥ तस्मिन्निति । तस्मिन् पदे रामया स्त्रिया स्पृष्टोऽभिभूतः रममाणो विषयाननुभवन् अत एव गता स्मृतिः स्वपरयाथात्म्यज्ञानरूपा यस्य सः त्वं तत्सङ्गात् देहानुबन्धिस्त्रीसङ्गात् ईदृशीं पापीयसीं दशां स्त्रीभावावस्थां हे विभो । प्राप्तः ॥ ५९ ॥ एवं निजवियोगहेतुकमाया, परिणामरूपधीपारवश्यहेतुकेयं संसृतिप्राप्तिरूपा तेऽनर्थपरंपरा जातास्तीत्युक्त्वा सकलं मायापरिणामरूपं वैचित्र्यं नात्मनो धर्मः किं तु बुद्धिसङ्गनिमित्तकोऽयमुपाधिरात्मनि प्रतीयते । इत्थं कथयन् प्रकृतिविलक्षणं ब्रह्मात्मकं प्रत्यगात्मयाथात्म्यमुप-दिशति । न त्वमिति । त्वं विदर्भस्य दुहिता न भवसि । अयं वीरो मलयध्वजः तव सुहृत्पतिः न । नवमुखे नवद्वारे पुरे यया बुद्धिरूपया पुरञ्जन्या रुद्धः तस्याः पुरञ्जन्याः त्वं पतिः अपि न भवसि । विदर्भदुहित्रादीनां देहाकारत्वेनात्माकारत्वा-भावादिति भावः ॥ ६० ॥

मायेति । पूर्वजन्मनि पुमांसं यत् अमन्यथाः इदानीं सतीं श्रेष्ठां स्त्रियं यत् मन्यसे एषा मया सृष्टा माया हि यत् उभयं न यत् उभयमपि आत्मनि वस्तुतो नास्ति । हि यस्मात् आवां हंसौ शुद्धौ भवावः । अतः नावावयोः वक्ष्यमाणां गतिं स्वरूपं पश्य विमर्शय वै ॥ ६१ ॥ अहमिति । अहं भवान् भवच्छरीरक इत्यर्थः । त्वमेवाहं त्वं कदाचिदपि न मच्छरीरत्वरहितः अहं सदा तवात्मा त्वं सदा मम शरीरभूत इत्यर्थः । न च त्वम् अन्यः । त्वं न कदाचिदपि मत्संबन्धविधुर इत्यर्थः । भो हंस विचक्ष्व इत्थं विचारय कवयो विद्वांसः नौ आवयोः मनागीषदपि छिद्रं स संबन्धविधुरत्वं जातु कदाचिदपि न पश्यन्ति । अनेन जीवेश्वरात्मकं वस्तु सर्वकालं प्रभाप्रभावद्विशिष्टरूपेणैकमेवेत्युक्तं भवति ॥ ६२ ॥ एवं प्रभाप्रभावद्भावं दृष्टान्तीकृत्य जीवेश्वरयो-र्विशिष्टरूपेणैकत्वमुक्त्वा सांप्रतं महदल्पभावेन तयोः स्वरूपभेदमाह । यथेति । पुरुष आत्मपरमात्मस्वरूपनिर्णेता जनः आवयोः मध्ये आत्मानं परमात्मानं माम् एकमन्यं त्वां च तव मम चेत्यर्थः । षष्ठ्यर्थे द्वितीया । 'एकोऽन्यार्थे' इति विश्वः । द्विधाभूतं द्विधाभावात्मकम् अन्तरं स्वरूपभेदम् । आदर्शचक्षुषोः यथा आदर्शस्येव चक्षुषश्चेवेत्यर्थः । तथैव अवेक्षेत पश्यतीत्यर्थः । आदर्शो यथा निर्मलो महांश्च तथा परमात्मा संततनिर्मलोऽतिमहांश्चेत्यर्थः । चक्षुर्यथात्यल्पमनिर्मलं च तथा जीवोऽल्पोऽ-निर्मलश्चेत्यर्थः । परमात्मानादिकालतः शुद्धः जीवः स्वस्वरूपतः शुद्धः सन्नप्यऽनादिकालतः प्रकृतिसंबन्धवशादावृतज्ञानधर्मतया मलिन एष भेद इति भावः ॥ ६३ ॥ एवमिति । हंसेन परमात्मना एवं प्रतिबोधितः समावेदितस्वपरयाथात्म्यः स मानसः मनसा सह वर्त्तमानः हंसो जीवः तद्व्यभिचारेण स्वपरयाथात्म्यज्ञानाभावेन नष्टां स्मृतिं स्वस्थः सन् पुनः आप स्वात्मनो भगवच्छेषत्वैकरसतामनुसंदधानो मुक्तो बभूवेति भावः ॥६४॥ उपाख्यानमुपसंहरति । बर्हिष्मन्निति । हे बर्हिष्मन् एतद्वृत्तान्तम् अध्यात्ममात्मानमधिकृत्य प्रवृत्तं पारोक्ष्येणान्यापदेशमुखेन प्रदर्शितं ततो भवताऽत्र केवलकथामात्रमेतदिति बुद्धिर्न कार्येति भावः । नन्वेतत्पारोक्ष्येण कथं प्रदर्शितमित्यत्राह । यद्यस्मात् विश्वभावनो विश्वस्य कारणभूतः भगवान् परमेश्वरः देवः स च परोक्षं प्रियं यस्य तथाभूतश्च भवतीति शेषः 'परोक्षप्रिया हि देवाः इति श्रुतेः ॥ ६५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिता-यामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे अष्टाविंशोऽध्यायः ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथैकोनत्रिंशोऽध्यायः

प्राचीनबर्हिरुवाच

भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते। कवयस्तद्विजानन्ति न वयं कर्ममोहिताः ॥ १ ॥

भवः स्त्रीसङ्गतो मुक्तिस्त्वीशसङ्गादिति स्फुटम्। ऊनत्रिंशे परोक्षार्थव्याख्ययैवोपसंहृतम् ॥ १ ॥

एतदध्यात्मं पारोक्ष्येण प्रदर्शितमित्युक्तं तत्राध्यात्मत्वे कथं पुरञ्जनपदव्युत्पत्तिरिति वेदितुमिच्छया राजा पृच्छति। भगवन्निति। हे भगवन् अध्यात्मविदुत्तम नारद ते तव वचः अध्यात्मत्वेनोक्तं त्वद्वचनमित्यर्थः। अस्माभिः केवलदेहात्मधीभिः सम्यक् न अवगम्यते नावबुध्यते। तदुक्तविधं भवद्वचनं कवयः अध्यात्मविदः विजानन्ति कर्मविमोहिताः यज्ञादिकर्मस्वेव मोहिताः कर्मणा पुण्यापुण्यादिकर्मणा मोहिताः तिरोहितस्वपरयाथात्म्या वा वयं न जानीमः ॥ १ ॥ इत्थं संपृष्टो नारदः पुरञ्जनप्रभृतीनि पदानि अध्यात्मपक्षानुकूलतया व्युत्पादयति। पुरुषमित्यादिना। पुरुषं क्षेत्रज्ञं पुरञ्जनं पुरञ्जनशब्दबोध्यं विद्यात् पुरुषे पुरञ्जनपदप्रवृत्तिनिमित्तमाह। यद्यस्मात् आत्मना मनसा सह एकश्च द्वौ च त्रयश्च चत्वारश्च पादा यस्य तत् बहवः पादा यस्य तत् न विद्यन्ते पादा यस्य तत् पुरं पुरुषादिशरीरं व्यनक्ति अतिदृढतया संबध्नाति पुरमनक्तीति पुरञ्जनः, पुरशब्दे उपपदे अञ्जेर्ल्युट्। पुरशब्दस्तु गौण्या वृत्त्या शरीरे प्रयुज्यते। न ह्यत्र सर्वाणि पदानि मुख्यार्थान्येवेत्याग्रहो युक्तः। तत्र एकपादं पिशाचशरीरं द्विपादं मनुष्यशरीरं त्रिपादं ज्वरादिशरीरं चतुष्पादं गवादेः शरीरं बहुपादं कर्णशृगालिकादिशरीरम् अपादकं भुजंगादिशरीरम् ॥ २ ॥ य इति। यः अविज्ञाताहृतः अविज्ञातशब्देनोक्तः सः ईश्वरः तस्य पुरञ्जनाख्यस्य पुरुषस्य क्षेत्रज्ञस्य सखा तस्मिन्नीश्वरे अविज्ञातशब्दप्रवृत्तिनिमित्तमाह। यद्यस्मात् पुम्भिः नामभिरभिधाभिः, क्रियाश्च गुणाश्च तैर्वा न विज्ञायते। यद्यपि हरिकृष्णरामादिभिनामभिर्जगद्व्यापारगोवर्द्धनोद्धरणादिक्रियाभिः सत्यज्ञानकृपाल्वादिभिर्गुणैश्च शास्त्रतो विज्ञायते एव तथापि ईयत्तया न ज्ञायते। नामक्रियागुणानामानन्त्यादिति भावः ॥ ३ ॥ यदेति। यदा अयं पुरुषः क्षेत्रज्ञः प्रकृतेः गुणान् ज्ञानकर्मोभयेन्द्रियविषयान् कार्त्स्न्येन आजिघृक्षत् ग्रहीतुमैच्छत अनुभवितुं समैच्छदित्यर्थः। तदा नवद्वाराणि छिद्राणि यस्य तत् द्वौ हस्तौ च अङ्घ्री च यस्य तत् एवंभूतं मनुष्यशरीरमित्यर्थः। तत्रेश्वरप्रदर्शितसकलपुरेषु मध्ये साधु समीचीनम् इति अमनुत। तिर्यगादिशरीरेषु सर्वेन्द्रियाणामनभिव्यक्तेर्मनुष्यशरीरं वीक्ष्येदं साध्विति अमन्यतेति भावः। अनेन सोऽन्वेषमाण इत्यारभ्य कोकिलकूजितैरित्यन्तं व्याख्यातम् ॥ ४ ॥

बुद्धिमिति। बुद्धि प्रमदां विद्यात्। यद्यया बुद्धया मम अहम् इति कृतम् एतदेव प्रमदाशब्दनिमित्तं प्रकृष्टो मदश्चित्तविकारो यया सा प्रमदा, अहंममाभिमानरूपमदहेतुत्वाद्बुद्धिः प्रमदेत्युच्यते इति भावः। किं च यां बुद्धिम् अधिष्ठाय पुमान् जीवः अक्षभिरिन्द्रियैः गुणान् शब्दादीन अस्मिन् देहे भुङ्क्ते। गुणानुभवजन्यमदहेतुत्वाच्च प्रमदा बुद्धिरित्यर्थः ॥ ५ ॥ भृत्यैर्दशभिरायान्तीमित्यस्यार्थमाह। सखाय इति। इन्द्रियगणः ज्ञानकर्माख्योभयेन्द्रियसमूहः सखायो भृत्याः सखिशब्दप्रवृत्तिनिमित्तमाह। ज्ञानं शब्दादिविषयकोऽवबोधः कर्म व्याहृत्यादानगमनादिरूपा क्रिया च यत्कृतं येनेन्द्रियगणेन कृतं स्वसमानप्रकृत्युभयेन्द्रियकृतमित्यर्थः। अन्योन्यापेक्षत्वरूपमत्र सखित्वं विवक्षितम्। एकैकशतनायकैरित्यस्यार्थमाह। तद्वृत्तय इन्द्रियवृत्तयः सख्यः पञ्चशीर्षाहिनेत्यस्यार्थमाह। प्राणः पञ्चवृत्तयो यस्य सः, अतः उरगः। यथा सर्प इवेत्यर्थः। उक्त इति शेषः। पञ्चवृत्तित्वात्प्राणः पञ्चशिराः सर्प इव कथ्यते इत्यर्थः ॥ ६ ॥ बृहद्बलमिति। बृहदतिशयितं बलं यस्य तत् मनः, उभयेन्द्रियनायकमुभयविधानामिन्द्रियाणां नायकं महाभटं विद्यात्। उभयविधेन्द्रियाणां स्वस्वविषयेषु प्रसह्य प्रवर्तकत्वान्मनसो बृहद्बलत्वं तेषां नायकत्वात्तदेकादशो महाभटश्चेत्यर्थः। अत्र प्रकरणे पञ्चालशब्दो बहुष्वर्थेषु प्रयुक्तः। दक्षिणपाञ्चालोत्तरपाञ्चालावित्यत्र शास्त्रे स पाञ्चालपतिरित्यत्रेन्द्रियेषु पौरञ्जनो वंशः, पाञ्चालेष्वित्यत्र विषयेषु तत्र मुख्यार्थमाह। पञ्चविषयाः पाञ्चालाः विषयार्थे मुख्योऽन्यत्र लाक्षणिकः पाञ्चालशब्दो बोध्यः। सप्तोपरि कृता द्वार इत्यादेरर्थमाह। यन्मध्ये येषां विषयाणां मध्ये नवखं नवद्वारं पुरं शरीरम् अस्तीति शेषः ॥ ७ ॥ तानि नवाह। अक्षिणी इति। अक्षिणी, नासिके, कर्णौ इति द्वे द्वे द्वारे मुखं शिश्नश्च गुदश्च तौ, इति नवेति शेषः। द्युमत्सख इत्यादेरर्थं संक्षेपेणाह। य आत्मा, स तदिन्द्रियसंयुतः तेषां द्वाराणामिन्द्रियैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संयुतः सहितः सन् बहिः याति । बहिष्ठान् शब्दादिविषयाननुभवतीत्यर्थः ॥ ८ ॥ पञ्चद्वारस्तु पौरस्त्या इत्यस्यार्थमाह । अक्षिणी इति । अक्षिणी नासिके आस्यम् इति पञ्च द्वारः पुरस्कृताः पूर्वभागे कृताः अत्र व्याख्यायां क्रमो न विवक्षितः । दक्षिणोत्तरद्वारावाह । दक्षिणा दक्षिणाद्वाः, दक्षिणः कर्णः उत्तरा उत्तराद्वाश्च उत्तरः कर्णः स्मृतः चैव ॥ ९ ॥

पश्चिमे इति । इह गुदश्च शिश्नश्च तौ, अधोद्वारौ, पश्चिमे इति, उदितौ भवतः । एकत्र निमिते संलग्ने, नेत्रे खद्योताविर्मुखी च, अत्र प्रकरणे उदिते ॥ १० ॥ रूपमिति । ईश्वरः पुरञ्जनः ताभ्यां खद्योताविर्मुखीद्वाभ्यां चक्षुषा चक्षुःशब्दानिदिष्टनेत्रेन्द्रियेण, विभ्राजितशब्दाभिहितं रूपं विचष्टे । नलिनी नालिनी च नासे उच्येते । सौरभः देशः, गन्धः उच्यते ॥ ११ ॥ घ्राण इति । अवधूतः घ्राणः ज्ञेयः मुख्या एतन्नामद्वाः आस्यं ज्ञेयम् । विपणः वाग् वागिन्द्रियं ज्ञेया । रसवित् रसः, रसेन्द्रियं ज्ञेयः । आपणः व्यवहारः, वाग्व्यवहार इत्यर्थः ज्ञेयः । बहूदनो देशोऽत्र चित्रं नानाविधं अन्धोऽन्नं ज्ञेयम् ॥ १२ ॥ पितृहूरिति । पितृहूः दक्षिणः कर्णः स्मृतः देवहूः उत्तरः कर्णः स्मृतः 'दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः' इत्यनेन दक्षिणैका तथोत्तरेति तु व्याख्यातमस्ति । अनेन तु पितृहूर्नाम पुर्या द्वार्देवहूर्नाम पुर्याद्वारिति गुणनाम विषयौ दक्षिणोत्तरकर्णविवोक्ताविति भेदः । सांप्रतं क्रममनादृत्य तृतीयाध्यायोक्तचण्डवेगादिपदार्थानाह सार्द्धैस्त्रिभिः चण्डवेगः संवत्सरः ज्ञेयः । तत्र तत्प्रवृत्तौ निमित्तमाह । कालः पुरुषायुषरूपोऽनेहाः, येन संवत्सरेण उपलक्षितः परिच्छिन्नः, भवतीति शेषः । चक्रवत्तूर्णवेगेन पुरुषायुषस्वपरिच्छेदकत्वाच्चण्डवेग इत्युच्यते इत्यर्थः ॥ १३ ॥ तस्येति । इहाध्यात्मपक्षे । तस्य चण्डवेगस्य संबन्धिनः गन्धर्वाः अहानि गन्धर्व्यः रात्रयः स्मृताः । गन्धर्वपदप्रवृत्तौ निमित्तमाह । यतः षष्ट्युत्तरशतत्रयपरिमितान्यहानि तावत्यो रात्रयश्चेत्यर्थः । परिक्रान्त्या आयुः हरन्ति । गन्धर्वा यथा पारोक्ष्येण स्वारीन्निघ्नन्त्येवमेतेऽपि जनाविदिततया पुरुषायुषं हरन्तीति अहोरात्रयोर्गौणी गन्धर्वसंज्ञा बोध्या ॥ १४ ॥ कालकन्येति । कालकन्या साक्षात् जरा उच्यते । पुरुषायुर्हरतः कालस्य दुहितृवज्जरायाः प्रीत्यावहत्वाज्जरा कालदुहितेत्यर्थः । तां लोकः न अभिनन्दति । ततः । यवनेश्वरः मृत्युः क्षयाय लोकनाशाय स्वसारम्, जगृहे । भगिनीत्वेन स्वीचकार ॥ १५ ॥ आधय इति । आधयो मनःपीडा व्याधयो देहपीडाः तस्य भयनाम्नः सैनिकाः, खला दुष्टाः यवनाः यवनवद्धिंस्रत्वाद्यवनसंज्ञकाः उच्यन्ते । भूतानामुपसर्गे यस्य संबन्धे सत्याशु शीघ्रो रयो मृत्योर्वेगः भवति तथाभूतः । द्विविधः शीतोष्णरूपेण द्विप्रकारः ज्वरः, प्रज्वारः उच्यते । प्रज्वारशब्देन कथ्यते । भूतोपसर्गा अरय इति पाठे अरयः अरिवदतीवदुःखावहत्वाद्रिपवः भूतोपसर्गाः एते भूतपीडनेन भूतोपसर्गसंज्ञाश्च ते च यथा सुखदुःखरागद्वेषक्लेशाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्यावमानक्षुत्पिपासाऽऽधिव्याधिजन्मजरामरणादय इत्याधिव्याधीनामुपसर्गेषु निर्देशात् । द्विविधः, ज्वरः प्रज्वारः उच्यते ॥ १६ ॥

एवं क्रममनादृत्य तृतीयाध्यायस्थपदानि व्याख्याय सिंहावलोकनन्यायेन पुनः प्रथमाध्यायस्थपदान्येवावशिष्टानि व्याचष्टे । प्रवृत्तेति । प्रवृत्तं त्रिवर्गतत्साधकस्वरूपावबोधनेन प्रवृत्तसंज्ञं निवृत्तं परमात्मस्वरूपावबोधनेन त्रिवर्गतत्साधकेभ्यो निवृत्तिबोधकतया निवृत्तसंज्ञं च शास्त्रं पाञ्चालसंज्ञितं पितरो हि दक्षिणमार्गप्राप्याः तान्पितॄन् यान्ति प्राप्नुवन्त्यनेनेति प्रवृत्तं शास्त्रं पितृयानं प्रवृत्तिशास्त्रोदितकर्मणा दाक्षिणात्यपितॄनाराध्य तान्प्राप्नुवन्तीत्यर्थप्रकाशनात्प्रवृत्तशास्त्रं दक्षिणपाञ्चालमित्युच्यत इत्यर्थः । देवा हि उत्तरमार्गप्राप्यास्तान्देवान् यान्ति प्राप्नुवन्त्यनेनेति निवृत्तं शास्त्रं देवयानं निवृत्तशास्त्रोक्तकर्मणोत्तरात्यदेवानाराध्य तान्प्राप्नुवन्तीत्यर्थप्रकाशनान्निवृत्तशास्त्रमुत्तरपाञ्चालमित्युच्यत इत्यर्थः । श्रुतधरात् श्रुतधरसंज्ञितात् । श्रोत्रात् श्रोत्रेन्द्रियात् तत् व्रजेत् । पितृयानदेवयानापरपर्याये दक्षिणोत्तरपाञ्चाले शास्त्रे चैत्रज्ञः श्रोत्रेन्द्रियेण गच्छतीत्यर्थः ॥ १७ ॥ आसुरीति । आसुरी आसुरीसंज्ञिका अर्वागधस्तना द्वाः मेढ्रं ज्ञेयम् । ग्रामिणां रतिः ग्रामकशब्दोक्तं सुखं व्यवायः प्रोक्तः । दुर्मदः उपस्थः प्रोक्तः निर्ऋतिः गुदः निर्ऋतिशब्दोऽत्र गुदनाम्ना उच्यते ॥ १८ ॥ वैशसमिति । नारकं नरकभवं दुःखं वैशसं, लुब्धकः पायुः, मे मत्तः अन्धौ तु शृणु । अन्धौ पाणिपादौ, ताभ्यां युक्तः पुमान् याति, करोति च, अन्धपदप्रवृत्तिनिमित्तं निर्वाक्पेशस्करत्वं पूर्वमेवोक्तम् ॥ १९ ॥ स यर्हीत्यस्यार्थमाह । अन्तरिति । अन्तःपुरं तु हृदयं विषूचिः मनः उच्यते तत्तद्गुणैः संकल्पविकल्पादिभिर्मनोगुणैः तत्र हृदये मोहं प्रसादं हर्षं वा जीवः प्राप्नोति ॥ २० ॥ एवं तत्कर्मस्थित्यादेः संग्रहेणार्थमाह । यदेति । स्वप्ने इति शेषः । यदा विक्रियते विकारः प्राप्यते कर्मणि लट् बुद्ध्येति शेषः । यदा जाग्रतीति शेषः । विकरोति विकारं गच्छति बुद्धिरिति शेषः । तदा तदा गुणाक्तः तस्याः गुणैः लिप्तः उपद्रष्टा तत्समीक्षकः आत्मा तद्वृत्तीः अनुकार्यते आत्मोपद्रष्टा सन्नपि स्वप्नजाग्रतयोर्बुद्धिगुणानुरञ्जितः सन् श्रवणदर्शनाद्यास्तद्वृत्तीः प्रति बलादनुवर्त्यते ॥ २१ ॥

एवं प्रथमाध्यायस्थपदानि व्याख्यातान्यथ द्वितीयाध्यायस्थपदानि व्याचष्टे । देह इति त्रिभिः । देहः तु रथः यो रथ उक्तः स तु देह इत्यर्थः । स कथंभूतः इन्द्रियाणि अश्वा यस्मिन् सः येऽश्वा उक्तास्ते इन्द्रियरूपा इत्यर्थः । संवत्सररयः गतिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आशुगमित्यत्र विवक्षिता गतिः संवत्सरवेगसमेत्यर्थः । द्वे पुण्यापुण्यरूपे कर्मणी चक्रं यस्य सः पुण्यापुण्ये कर्मणी एव चक्रशब्देन विवक्षिते इत्यर्थः । त्रयः गुणा एव ध्वजा यस्य सः त्रिवेणुमित्यनेनोक्ता ध्वजाः सत्त्वादयो गुणाः प्रोच्यन्ते इत्यर्थः । पञ्च असवः प्राणा बन्धुरा बन्धनानि यस्य सः बन्धुरत्वेन विवक्षिताः पञ्च प्राणा इत्यर्थः ॥ २२ ॥ मन इति । रश्मिः प्रग्रहत्वेन विवक्षितो यो रश्मिः स मनः बुद्धिसूतः यः सूत उक्तः स बुद्धिरित्यर्थः । हृन्नीडं सारथेरुपवेशनस्थानं यस्मिन् सः यस्य नीडं हृदित्यर्थः । द्वन्द्वं शोकमोहौ कूबरं युगबन्धनस्थानं यस्य स द्वन्द्वं यस्य कूबरमित्यर्थः । पञ्च पञ्चसंख्याकाः ये इन्द्रियार्थास्ते प्रक्षेपाः प्रहरणानि यस्य सः सप्त धातवो वरूथाश्चर्माद्यावरणानि यस्य सः सप्त धातवो यस्य वरूथस्थानीया इत्यर्थः ॥ २३ ॥ आकूतिरिति । आकूतिः कर्मेन्द्रियपञ्चकगतिप्रकारः यस्य बाह्यः विक्रमः । एवंभूतं रथमारुह्य एकादश इन्द्रियाणि चमूः सेना यस्य सः तेषां मध्ये मनस्तस्या नाथ इति ज्ञेयम् । पञ्चभिः पञ्चेन्द्रियैः सूनाविनोदमिव विषयसेवां करोतीति पञ्चसूनाविनोदकृत् पुरञ्जनः मृगतृष्णां प्रधावति । मृगतृष्णां प्रति प्रकर्षेण । मरीचिकाजलानुभववत् सुखाभासानुभवं करोतीत्यर्थः । अनेन स एकदेत्यादि दशश्लोकानां स्वप्नावस्थापरत्वेन व्याख्या कृता ॥ २४ ॥ एवं पारोक्ष्येणोक्तमर्थं व्याख्याय कृष्णकथातात्पर्यमाह । एवमिति । देवभूतात्मसंभवैः आधिदैवाधिभूताध्यात्मिकाभिधैः बहुविधैः दुःखैः एवं शतं वर्षं शतवर्षपर्यन्तं यावच्छरीरमित्यर्थः । क्लिश्यमानः देही तमोवृतोऽज्ञानेनाभिभूतः सन् ॥ २५ ॥ प्राणेति । प्राणेन्द्रियमनोधर्मान् निर्गुणः सन्नपि आत्मनि अध्यस्य पिपासुरहं बुभुक्षुरहं काणोऽहं बधिरोऽहं दुःख्यहं सुख्यहमित्येवं प्राणादेर्धर्मानात्मन्यध्यारोप्य कामलवान् सुखलेशान् ध्यायन् चिन्तयन् मम अहम् इति कर्मकृत् अहंममाभिमानाभ्यां पुनर्देहान्तरप्राप्तिहेतुककर्माणि कुर्वन् देहे शेते । शरीरे वसतीत्यर्थः । इति द्वयोरेकान्वयः ॥ २६ ॥

कुतोऽयं संसार इति चेत्स्वात्मज्ञानपरमात्मोपासनाभावादित्याह—यदेति । आत्मानं प्रकृतिधर्मविलक्षणं निजात्मानं गुरुं गुरुवद्धितोपदेष्टारं भगवन्तं षाड्गुण्यपूर्णं परं परमात्मानं च अविज्ञाय पुरुषः क्षेत्रज्ञः तु स्वभावतः स्वानुभवधरः सन्नपि यदा प्रकृतेः गुणेषु शब्दादिषु विषज्जेत नितरां सक्तो भवेत ॥ २७ ॥ गुणेति । तदा गुणेषु अभिमानोऽस्यास्तीति गुणाभिमानी विषयेष्वेव भोग्यताबुद्धिमान् अत एव अवशः विषयपरवशः स जीवः शुक्लं सात्त्विकं कृष्णं तामसं लोहितं राजसं वा इत्येवं त्रिविधानि कर्माणि कुरुते । तथा सति यथाकर्म स्वस्वकर्मानुसारेण अभिजायते । पुनर्जन्मान्तरं प्रतिपद्यते इत्यर्थः । इति द्वयोरेकसबन्धः ॥ २८ ॥ एतदेवाह । शुक्लादिति कर्हिचित् शुक्लात्सात्त्विकात्कर्मणो हेतोः प्रकाशभूयिष्ठान् येषु भूयिष्ठः प्रकाशस्तथाविधान् लोकान्देहान् प्राप्नोति । कर्हिचिदित्यनेन सात्त्विकं कर्म तत्प्रयुक्तः सात्त्विको देहश्च दुर्लभ इत्युक्तम् । क्वचिच्च क्रियाया आयासा येषु तान् दुःखमुदर्कं उत्तरकालीनफलं येषां ते दुःखोदर्कास्तान् लोकान् राजसात्कर्मण इति शेषः । क्वचित् तमः शोकावज्ञानशौ उत्कटौ येषु तान् लोकान् तामसात्कर्मण इति शेषः । आप्नोति ॥ २९ ॥ न च पुरुषादेः पुरुषादिरूपेणैव नियत जन्म, किन्तु गुणकर्मानुसारेणैवेत्याह । क्वचिदिति । अन्धधीः अनाद्यज्ञानवशो जीवः क्वचित् कदाचित् पुमान् क्वचित् स्त्री च क्वचित् उभयं न स्त्रीपुंभाववर्जितो नपुंसको भवतीत्यर्थः । क्वचित् देवः क्वचित् मनुष्यः क्वचित् तिर्यक् पशुजातीयाऽपि वा एवं भवो जन्म यथाकर्मगुणं कर्मगुणावनतिक्रम्य भवतीत्यर्थः ॥ ३० ॥ एवंविधेषु जन्मसु सुखलाभो दुर्लभ इति सदृष्टान्तमाह द्वाभ्याम् । यथेति यथा क्षुत्परीतः क्षुधा व्याप्तः अत एव दीनः सारमेयः श्वा गृहं गृहं प्रतिगृहं चरन्नटमानः सन् यद्दिष्टं स्वदैवमनतिक्रम्य दण्डं लकुटादिना प्रहारम् ओदनं वा विन्दति एव ॥ ३१ ॥ तथेति तथा तेन प्रकारेणैव कामः कामव्याप्त आशयो यस्य तथाभूतः जीवः उच्चावचपथा उत्कृष्टापकृष्टमार्गेण उपर्यूर्ध्वलोकेषु अधोऽधस्तनलोकेषु नरकेषु वा मध्ये मध्यवर्त्तिन्यस्मिन् लोके वा भ्रमन् 'ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः' इत्युक्तरीत्या भ्रमणं कुर्वन्सन् । दिष्टं दैवायत्तं प्रियम् अप्रियं वा याति प्राप्नोति । इत्युभयोरेकसंबन्धः ॥ ३२ ॥

ननु तर्हि कदाचित्सुखसंभवस्य दर्शनात् दुःखस्य प्रतीकाररूपकर्मान्तरसंभवान्नैकान्ततो हेयत्वं कर्मण इत्यत्राह । दुःखेष्विति । दैवमधिदैवं भूतमधिभूतम् आत्मा अध्यात्मं च दैवभूतात्मानः हेतवो येषां तेषु दुःखेषु एकतरेण एकतमेनापि दुःखेन जीवस्य व्यवच्छेदः न भवति जीवस्य दुःखराहित्यं न भवतीत्यर्थः । स्यात् चेत् । तर्हि तत्प्रतिक्रिया तस्य दुःखस्य परिहारः अपि तत् दुःखमेव प्रतिक्रियाया अपि दुःखरूपत्वाद्भगवदुपासनमन्तरेण न तापत्रयविनाशनसमर्था प्रतिक्रियास्तीति भावः ॥ ३३ ॥ प्रतिक्रियाया अपि दुःखरूपत्वं सदृष्टान्तमाह । यथा हीति । यथा स भारवहनकर्मप्रसिद्धः पुरुषः पुमान् गुरुं भारं शिरसा उद्वहन् परितप्तशिरसस्तापनिवृत्तिरूपविश्रान्तय इति शेषः । तं भारं स्कन्धेन आधत्ते उद्वहति तथा सर्वाः प्रतिक्रियाः दुःखप्रतीकाराः हि तादात्मिकाऽल्पविश्रान्तिकरास्तत्तत्तेऽपि दुःखरूपा एवेति भावः ॥ ३४ ॥ किं च जीवस्य दुःखहेतुः कर्मैव तत्प्रतीकारोऽपि कर्मात्मक एव तयोरुभयोरपि अज्ञानमूलत्वेन दुःखहेतुभूतकर्मणि कर्मान्तरेण प्रतिकृतेऽपि न मूलतस्तन्निवर्त्तयति ततश्च पुनरपि दुःखनिमित्तकर्मोदयान्नैकान्ततः कर्मणां प्रतीकारः संभवतीत्याह । नैकान्तत इति । हे अनघ केवलं ज्ञानविधुरं कर्म कर्मणां दुःखहेतूनामित्यर्थः । एकान्ततः निःशेषतः प्रतीकारः न भवति । यतः द्वयं निवर्त्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निवर्त्तकं चेत्युभयविधं कर्म अविद्योपसृतं देहात्मभ्रान्तिरूपाहंकारममकारात्मकाज्ञानोपसृष्टं तन्मूलमित्यर्थः। हि अत्र दृष्टान्तः। स्वप्ने स्वशिरश्छेदादीक्षणविषयके स्वप्ने जाग्रद्भावाप्त्या निवृत्ते सत्यपीति शेषः। पुनरपि स्वप्नः इव येन पूर्वं तथाविधः स्वप्नः संजातस्तन्मूलस्याज्ञानस्यानिवृत्तेर्भूयोपि तथाविधः स्वप्नो जायत एवेत्यर्थः। केनचित्कर्मणा कस्मिंश्चित्कर्मणि प्रतिकृतेऽपि मूलतस्तदनिवृत्तेर्ज्ञानहीनस्य नाविद्यानिवृत्तिरिति भावः ॥ ३५ ॥ नन्वहंममाभिमानरूपाज्ञानमेव कर्मजननद्वारा दुःखहेतुरित्युक्तं तर्ह्यज्ञानमेव प्रतिक्रियतां तत्राह। अर्थे इति। अर्थे अविद्यमाने अपि देवत्वमनुष्यत्वाद्याकाराणामात्मन्यसद्भावेऽपीत्यर्थः। संसृतिः देहात्मभ्रान्तिमूलकं संसरणं न निवर्तते हि कुत इत्यत आह। मनसेति। लिङ्गरूपेण मनसा अनादिकालतः साहित्यात् इति शेषः। देहात्माभिमानहेतुभूतमनसोऽस्यानादिकालतः सङ्गोऽस्ति तदनिवृत्तेः संसृतेरनिवृत्तिरिति भावः। मनसो भ्रान्तिजननद्वारेण दुःखादिहेतुत्वे दृष्टान्तमाह। यथा स्वप्ने विचरतः स्वप्ने विचरतो जीवस्याऽपि संकल्पविकल्पादिधर्मवतो मनसः साहित्याद्धेतोर्देशान्तरगमनराज्याभिषेकस्वशिरश्छेदादिकं यथा दृश्यते तथा जाग्रत्यपि दोषसद्भावात् भवति इति भावः। अतो न ज्ञानं विनाऽज्ञानप्रतीकार इति सिद्धान्तः ॥ ३६ ॥

एवं जीवस्य संसृतिभ्रमणप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह। अथेति। अथातो हेतोः अर्थभूतस्य स्वतः पुरुषार्थस्वरूपस्य आत्मनः यतो मनसः सकाशात् अनर्थपरंपरा दुःखपरंपरारूपा संसृतिः भवति तद्व्यवच्छेदस्तस्या विनाशस्तु गुरौ गुरुवद्धितोपदेष्टरि श्रीवासुदेवे परमया भक्त्या भवति ॥ ३७ ॥ ननु संसृतिनिवृत्तिर्वैराग्यपूर्वकात् ज्ञानाद्भवति न तु भक्त्या 'तरति शोकमात्मविदिति' इत्यादिश्रुतेस्तत्राह। वासुदेव इति। सध्रीचीनेन सम्यक्प्रकारेण, वासुदेवे भगवति समाहितो निहितः कृत इति यावत्। भक्तियोगः परमभक्तियोगः वैराग्यं विषयेष्वनासक्तिं ज्ञानं परज्ञानं च, जनयिष्यति श्रवणादिभक्तिप्रणाल्या सांसारिकसुखदुःखादिनिवर्त्तकः परमभक्तियोग उदेतीति भावः ॥ ३८ ॥ नन्वसौ महाफलः परमभक्तियोगः कथं स्यात्तत्राह। स इति। हे राजर्षे अच्युतस्य कथाया आश्रयो यस्य सः स परमभक्तियोगः नित्यदा शृण्वतः अच्युतकथा इति शेषः। श्रद्दधानस्य कथाश्रवणविषयनिष्ठायुक्तस्य अधीयतः नित्यं कथा एवाधीयानस्य अचिरात्स्वल्पैरहोभिरेव स्यात् ॥ ३९ ॥ कुत्र शृण्वतस्तत्राह। यत्रेति। हे राजन् विशदाशयाः विमलान्तःकरणाः भगवतो गुणानां यदनुकथनं श्रवणं च तत्र व्यग्रं सत्वरं चेतो येषां ते एवंभूताः भागवता एकान्तिकोपासकाः साधवः यत्र वसन्ति तत्रेति शेषः ॥ ४० ॥ ननु तत्र कथं भगवद्गुणश्रवणोपलब्धिः शृण्वतां च कानि दुःखानि नश्यन्ति तत्राह। तस्मिन्निति। तस्मिन् सतां निवासस्थाने महद्भिर्मुखरिताः साधुभिः कीर्त्तिताः मधुभिदो भगवतश्चरित्रमेव पीयूषं तदेव शेषः असारांशरहितसारांशो यासु ताश्च ता सरितो नद्यः अच्युतकथारूपातिशुद्धामृतवाहिन्यो नद्यः परितः सर्वतः स्रवन्ति प्रवर्त्तन्ते भागवतप्रचुरे देशे गत्वा तत्र समवस्थाने विहिते सुलभमेव भगवत्कथाश्रवणमिति भावः। हे नृप ताः सरिद्रूपा भगवत्कथाः ये जनाः अवितृषोऽलंबुद्धिशून्याः सन्तः गाढकर्णैः सावधानैः कर्णैः पिबन्ति तान् अशनं क्षुच्च तृट् तृषा भयं च शोकश्च मोहश्च, ते न स्पृशन्ति। न बाधन्ते इत्यर्थः ॥ ४१ ॥ सत्सङ्गं विना स्वत एव कथाचिन्तनादौ क्रियमाणे त्वालस्यादिना रसावेशाभावादशनादीनां भगवत्कथाश्रवणविरोधित्वाच्च क्षुत्पिपासाद्यभिभूतस्य भक्तिर्न संभवतीत्याह। एतैरिति। स्वभावजैः देहस्वभावप्रयुक्तैः एतैरशनादिभिः नित्यम् उपद्रुतः जीवलोकः हरेः कथामृतनिधौ कथामृतसमुद्रे रतिं न करोति नूनं भगवत्कथाश्रवणाभिमुखताविरोधिनोऽशनादीन् शनैः सात्त्विकदेशस्थभागवतसंमतिलब्धभगवद्गुणश्रवणेन निरस्येदिति भावः ॥ ४२ ॥

एवमुक्तार्थे विचारिते प्रथमं भागवतसङ्गः ततो भगवद्गुणानुश्रवणं ततो भगवदुपासनं ततो विरागस्ततो भगवत्साक्षात्काररूपं परज्ञानं ततो भगवदनुग्रहजन्यप्रीत्युत्कर्षरूपापरभक्तिस्ततो मुक्तिरिति प्रणाली कथिता। इदानीं प्राप्यस्य परमात्मनः प्राप्त्युपायभक्तियोगानुष्ठानं तदनुग्रहं विना नान्योपायेनास्तीत्याह। प्रजापतिपतिरिति। प्रजापतिपतिर्ब्रह्मा भगवानैश्वर्ययुक्तः साक्षात् गिरिशः शिवः मनुः स्वायंभुवः प्रजापतयः दक्षादयः आदिशब्देन कश्यपादयो माह्याः। तथा। नैष्ठिका नैष्ठिकब्रह्मचारिणः सनकादयः ॥ ४३ ॥ मरीचिरिति। मरीचिः अत्रिश्चाङ्गिराश्च तौ पुलस्त्यः पुलहः क्रतुः भृगुः वसिष्ठः अहं नारदोऽन्ते येषां ते इत्येते सर्वे ब्रह्मवादिनः ॥ ४३ ॥ अद्यापीति। वाचस्पतयः बृहस्पतिव्यासादयश्चापि अद्यापि तपश्च विद्या च समाधिश्च तैरुपायैः पश्यन्तः उपासीनाः सन्तोऽपीत्यर्थः। पश्यन्तं सर्वसाक्षिणं सर्वज्ञमिति यावत्। परमेश्वरं न पश्यन्ति इयत्तया नेक्षन्ते। वाङ्मनसाऽपरिच्छेद्यस्वरूपस्वभावत्वादिति भावः। इति त्रयाणामेकसंबन्धः ॥ ४५ ॥ एते यदा न जानन्त्येव तदा कर्मजडास्त्वादृशा न जानीयुरित्यत्र किं वक्तव्यमित्याह शब्दब्रह्मणीति। उरुरतिशयितो विस्तरो यस्य तस्मिन् दुष्पारे दुरधिगम्यतात्पर्ये शब्दब्रह्मणि शब्दब्रह्मात्मके वेदे चरन्तः वेदश्रुतपशुपुत्रवृष्ट्यन्नस्वर्गाद्यैहिकामुष्मिकफलप्राप्तीच्छावन्त इत्यर्थः। मन्त्वलिङ्गैर्मन्त्रश्रुतवज्रहस्तत्वादिगुणलिङ्गैः व्यवच्छिन्नमिन्द्रादिदेवतावर्गं भजन्त समीहितसाधनतया यजन्त कर्मजडाः परं परमात्मानं न विदुः। अपरिच्छेद्यस्वरूपस्वभावस्येयत्तया वेद्यत्वमेव न घटते। एवमपरिच्छिन्नत्वेन तत् ज्ञानेऽपि केवलं तदुपासनमेव कारणं न कर्मेति भाव ॥ ४६ ॥ यद्येवं तर्ह्याबाल्यं संसेवितकर्ममार्गः को नाम कर्माद्याग्रहं हित्वा परमेश्वरमेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भजेदित्यत्राह। यदेति। यदा आत्मना भावितः आत्मभावितः मम स्वामी तु केवलः श्रीहरिरेव नान्यः कश्चनापीति भावेन कायवाङ्मनोभिरुपासित इत्यर्थः। भगवान् यस्योपासकस्य अनुगृह्णाति आत्मानं प्रकाश्य स्वानुभवमुत्पादयति स तथाविधो भगवद्भक्तः लोके लौकिकव्यवहारे वेदे वेदपूर्वभागोदितकर्ममार्गे च परिनिष्ठितां सर्वथा निष्ठां प्राप्तां मतिं जहाति। भगवतानुगृहीत एव मत्त्युपायोपसंपादनाय प्रभवतीत्यर्थः॥ ४७॥

तस्मादिति। हे बर्हिष्मन् तस्माद्भगवदनुग्रहस्यैव मुक्त्युपायत्वात् अर्थकाशिषु मृगतृष्णाजलवदपरमार्थत्वेन प्रकाशमानेषु श्रोत्रस्पर्शिषु प्ररोचकतया केवलं श्रोत्रप्रियेषु अस्पृष्टं वस्तु यैस्तेषु अस्पृष्टनिरतिशयपुरुषार्थेषु अनित्याल्पफलेष्वित्यर्थः। कर्मसु अज्ञानात् अर्थदृष्टिं पुरुषार्थबुद्धिं मा कृथाः मा कुरु॥ ४८॥ ननु 'अपाम सोमममृता अभूम' 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्' इत्यादिभिः कर्मसाध्यफलस्यापि नित्यत्वावगमात्कथमस्पृष्टवस्तुत्वं कर्मणामुच्यते तत्राह। स्वं लोकमिति। ये धूम्रधियः धूमवदावरकरजस्तमःप्रचुरमतयः वेदं सकर्मकं कर्मपरं केवलकर्मतात्पर्यकमिति यावत्। आहुः ते अतद्विदः वेदतात्पर्यानभिज्ञाः यतः ते यत्र जनार्दनः देवः अस्ति तं स्वं लोकं वेदतात्पर्यगोचरमात्मतत्त्वं न विदुः। वै। अतोऽवेदज्ञा इत्यर्थः॥ ४९॥ तत्रापि त्वं तु महामूर्खं इत्याह। आस्तीर्येति। प्रागग्रैः दर्भैः क्षितिमण्डलम् कार्त्स्न्येन समग्रं यथा भवति तथा आस्तीर्य विहितात् बृहद्वधात् विहिताद्बहुपशुवधात मानी महायज्वाहमित्यहंकारी अतः स्तब्धोऽविनीतः सन् यत् परं भगवदाराधनरूपत्वादत्युत्तमं कर्म तत नावैषि सर्वथा न जानास्येव। अत एव महामूर्खः॥ ५०॥ एवमुक्त्वा म्लानवदनं राजानं निरीक्ष्य संजातकरुणः स्वयं नारदः अमुक्तिसाधनकर्म तथाभूता विद्या चेति द्वयं निन्दन् परमार्थफलमाह सार्द्धेन–तदिति। हरितोषं भगवत्तोषकारणं यत् तदेव कर्म। येन कर्मणा भगवांस्तुष्यति तत्प्रशस्तं कर्मेतरदप्रशस्तं कर्मेत्यर्थः। यया विद्यया येन ज्ञानेन तन्मतिः हरिभक्तिर्भवति इत्यर्थः। सा विद्या तदेव ज्ञानं तदितरदसदित्यर्थः। तथा चोक्तम्। 'तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये। आयासायापरं कर्म विद्यान्या शिल्पनैपुणम्' इति। प्रकृतिः स्वातन्त्र्येण सर्वकारणरूपः स्वयं हरिः देहभृतान् आत्मा ईश्वरश्च भवति तत्पादमूलं शरणं संसृतिबन्धविमोक्षाय समाश्रयितुं योग्यमस्तीत्यर्थः। इह लोके यतो यया भगवत्पादमूलसमाश्रयणक्रियया नृणां क्षेमं आत्यन्तिकं सुखं भवेदित्यर्थः॥ ५१॥ न च भगवद्भजनेऽन्यभजने इव दुःखं भयं चेत्याह। स वै इति। यतः स हरिः प्रेष्ठतमोऽतिप्रेमास्पदम् आत्मान्तर्यामी च भवति अतः भगवत्समाश्रयणे कृते सतीति शेषः। अण्वणुमात्रमपि भयं तस्य न कालादेर्भयमस्तीत्यर्थः। इतीत्थं यः वेद स वै स एव विद्वान्। यश्चैवं विद्वान्। स वै स एव गुरुः य एवंभूतो गुरुः स हरिरेव हरिसमाश्रयविधापनाद्धरिसादृश्य इत्यर्थः॥ ५२॥

'ब्रूहि मे विपुलं ज्ञानं येन मुच्येय बन्धनात्' इति त्वत्कृतप्रश्नस्य 'हरिर्देहभृतामात्मा' इत्येतदेव प्रधानमुत्तरमन्यत्सर्वमेतदर्थोपपादकमित्यभिप्रायेणोपसंहरति–प्रश्न इति। हे पुरुषर्षभ, भवतः प्रश्नः एवं संछिन्नः हेयोपादेयज्ञानविषयस्त्वत्प्रश्नस्तज्ज्ञानविवेचनाद्दत्तोत्तरो जात इत्यर्थः। तदेवमात्मनो बन्धमोक्षकारणे कथितेऽपि नातिनिर्विण्णचित्तं पुत्रागमनं प्रतीक्षमाणं तं तत्क्षणमेव महाभयप्रदर्शनकम्पितसकलगात्रं विधाय गृहान्निर्वासयितुं हरिणरूपकमाहात्रेति। अत्रार्थे गुह्यं वदतः मे मम सुनिश्चितं वचः निशामय शृणु। हि॥ ५३॥ किं तदित्यत्राह। क्षुद्रमिति। क्षुद्रमल्पं चरतीति तम् अलुगार्षः। सुमनसां पुष्पाणां शरणे आश्रये, वाटिकायामिति यावत्। मिलित्वा परस्परं स्त्रिया सह मिलित्वा रक्तं तत्रैवासक्तं षडङ्घ्रयो भ्रमरास्तेषां गणास्तेषां सामानि गीतानि तेषु लुब्धौ कर्णौ यस्य तम् असून् तर्पयन्तीत्यसुतृपः परेषां प्राणैः स्वकीयप्राणतर्पकास्तान् अग्रे स्थितान् वृकान् अविगणय्य अनालोच्य यान्तं चरन्तं पृष्ठे लुब्धकस्य बाणेन भिन्नं मृगं मृगय अन्वेषय विचारयेति यावत्। प्रकृतपक्षे अस्य व्याख्याने पुरत एव सविस्तरं कृते सत्यपि बोधाय समासेन यथापदं व्याख्यायते। क्षुद्रं चरं क्षुद्रफलभोक्तारं सुमनसां सुतरां मनःसंकल्पाधीनानां स्त्रीणां शरणे गृहे, मिथित्वा मिथुनीभूय षडङ्घ्रिगणसामसु भृङ्गसदृशवनितादिगायकगीतेषु, लुब्धकर्णं प्रसक्तश्रोत्रेन्द्रियम् अग्रे स्वपुरतः, असुतृपो निर्दयान् वृकान् वृकसदृशाहोरात्रादीन् अविगणय्य तत्कृतायुर्हरणमविचार्य पृष्ठे परोक्षे लुब्धकबाणभिन्नं मृत्युपाशग्रस्तं मृगं मृगसदृशमात्मानं मृगय पर्यालोचय॥ ५४॥ प्रस्तुतेऽर्थे श्लोकं योजयन् स्वयमेव व्याचष्टे। सुमन इति। सुमनोभिः पुष्पैः समानो धर्मः परिणामविरसत्वं यासां तासां स्त्रीणां शरणे आश्रमे गृहस्थाश्रमे इत्यर्थः। पुष्पमधुगन्धवत् पुष्पगतमकरन्दलेशवत् क्षुद्रतममत्यल्पं काम्यकर्मविपाकजं काम्यकर्मणां परिणामजं जैह्वयोपस्थादि रसनेन्द्रियोपभोग्योपस्थेन्द्रियोपभोग्यप्रभृतिकं कामसुखलवं विषयसुखलेशं विचिन्वन्तं गवेषयन्तं मिथुनीभूय स्त्रीभिः सह मिलित्वा तदभिनिवेशितमनसं तासु समावेशितमानसं षडङ्घ्रिगणसामगीतवदतिमनोहरवनिताजनालापेषु भ्रमरगणसंबन्धिसामगीतसदृशमधुरध्वनियुतमानसमोषकेच्छाविषयकस्त्रीजनोदितसंभाषणेषु अतितरामत्यन्तं प्रलोभितकर्णमतिलोभयुक्तश्रवणेन्द्रियम् अग्रे पुरतः, वृकयूथवदीहामृगसमूहवत् आत्मनः स्वस्य आयुर्जीवितकालं हरतो मोषकान् अहोरात्रादयो ये कालविशेषास्तानन्नेहसो भेदान् अविगणय्य अगणयित्वा, गृहेषु विहरन्तं गृहिणीभिर्वैषयिकसुखं समनुभवन्तं पृष्ठतः पृष्ठप्रदेशे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एव परोक्षमसमक्षम् अनुप्रवृत्तः मारयितुं पश्चात्प्रवृत्तः लुब्धको लुब्धकसमानधर्मा, कृतान्तोऽन्तकः अन्तःशरेण नलिकानिहित-गूढशरेण इह लोके यं पराविध्यति दूरादेव ताडयति, अत एव भिन्नहृदयमपि तं देहिनम् इमम् आत्मानं त्वदात्मानम् अहो राजन् द्रष्टुमालोचयितुम् अर्हसि । इत्येतत्स्वोक्तश्लोकव्याख्यानम् ॥ ५५ ॥

रूपककृतोपदेशसारमाह । स इति । स उक्तविधः त्वम् आत्मनः, मृगचेष्टितं विचक्ष्य । मृगसमानचेष्टावन्तं स्वात्मानमेव विचार्येत्यर्थः । अन्तः हृदि चित्तं नियच्छ । कर्णयोः धुनीं च नदीमिव वर्त्तमानां बहिर्वृत्तिं चित्ते नियच्छ । एतत्सर्वेन्द्रियार्थोपलक्षणम् । असत्तमानामतिकामुकानां यानि यूथानि तेषां गाथा वार्त्ता यस्मिंस्तम् । अङ्गनाश्रमं गृहाश्रमं जहि । हंसानां शुद्धजीवानां शरणं रक्षकं प्रीणीहि । शरणागतपालभगवच्छरणं गच्छेत्यर्थः । क्रमेण विरम । मदुक्तप्रकारेण सांसारिकप्रवृत्तेर्विरामं याहीत्यर्थः ॥ ५६ ॥ एवमुपदिष्टचिदचिदीश्वरतत्त्वः कर्मसु समुत्पादितवैराग्यः राजा उक्तार्थमभिनन्दन् भूयोऽप्यन्यानि संशयपदान्याविष्कुर्वन् पृच्छति त्रिभिः । श्रुतमिति । हे ब्रह्मन्नारद, भगवान् महैश्वर्यः पूज्यो वा भवान् यत् अभाषत तत् अन्वीक्षकमात्मान्वीक्षणोपयोगि श्रोतव्यमर्थजातं मया श्रुतम् । अन्वीक्षितमिति पाठे विचारितमित्यर्थः । एतद्भवदुपदिष्टम् उपाध्यायाः मह्यं कर्ममार्गोपदेष्टार एते आचार्यब्राह्मणाः, न जानन्ति । यदि विदुः तर्हि, मह्यं किं किमर्थं न ब्रूयुः । अतोऽकथनान्न जानन्त्येव, ततोऽतिगुह्यं भवतोपदिष्टमिति भावः ॥ ५७ ॥ संशय इति । हे विप्र नारद, अत्र तु तत्त्वविषये तु, महान् यः तत्कृत उपाध्यायकृतः संशयः, सः मे संशयः, त्वया संछिन्नः । तद्वाक्यविरोधेनात्मतत्त्वेऽसंभावनारूपो यो महान् संशय आसीत्स त्वया सम्यक् छिन्न इत्यर्थः । तथापि यत्र संशयपदे इन्द्रियवृत्तयः, न प्रवर्त्तन्ते तत्र तु संशयः कश्चित्संदेहः, वर्त्तते । यत इन्द्रियागोचरार्थं इति शेषः । ऋषय उपदेष्टारो मुनयोऽपि मुह्यन्ति हि ॥५८॥ यत्र तव संशयो जातस्तत् संशयपदं किमित्यत्राह । कर्माणीति द्वाभ्याम् । पुमान् येन देहेन कर्माणि पुण्यापुण्यरूपाणि । इहात्र लोके आरभते करोति तं येन देहेन कर्माणि कृतानि तं देहमित्यर्थः । इहास्मिन् लोके एव विहाय अमुत्र परलोके अन्येन देहेन कर्मोपस्थापितेनेतरेण शरीरेणेत्यर्थः । जुष्टानि सेवितानि त्यक्तदेहोपार्जितानीत्यर्थः । असकृत् पुनः पुनः अश्नुते भुङ्क्ते प्राप्नोतीत्यर्थः ॥ ५९ ॥

इतीति । इत्येवंविधाः वेदविदां निगमहार्दविद्वद्वादशानां वाचः वादा इत्यर्थः । तत्र तत्र स्मृतिपुराणादिषु ह स्फुटं यथा तथा श्रूयते । तथा च सूत्रं 'वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टकुलजातिरूपमश्रुतसुखमेधसो जन्म प्रतिपद्यन्ते' इति । 'प्राप्य पुण्यकृतां लोकान्' इति । 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः' इति । त्वया चोक्तं 'शाश्वतीरनुभूयार्तिम्' इति । एतच्च कर्तृभोक्तृभेदेन कृतनाशाकृताभ्यागमप्रसङ्गान्न संगच्छते इति भावः । संशयान्तरमाह । जनैः प्रोक्तं वेदोक्तं यत् कर्म क्रियते तच्च परोक्षमनन्तरक्षणे एवादृश्यं सत् न प्रकाशते । अतः कर्मणो नष्टत्वात्तद्भोगोऽपि दुर्घट इति भावः ॥ ६० ॥ एवमापृष्टो नारदः प्रथमप्रश्नस्योत्तरमाह । येनैवेति । पुमान् पुरुषः येन निमित्तभूतेन मनसा एव कर्म आरभते अव्यवधानेन विश्लेषरहितेन तेन एव मनसा मनःप्रधानेन लिङ्गेन पुण्यापुण्यकर्महेतुभूतेन लिङ्गशरीरेण स्वकं स्वकर्मानुगुणं सुखदुःखादिफलं स्वयमिति पाठे पुमानित्यस्य विशेषणम् । अमुत्र परलोके भुङ्क्ते हि । उत्तरोत्तरजन्मसुखदुःखादिहेतुभूतकर्माश्रयपूर्वपूर्वदेहानां विनष्टत्वात्तन्निमित्तं सुखदुःखादिकमनुपपन्नं न ह्याशु विनाशस्वभावं निराश्रयं कर्मान्यकालिकसुखादिहेतुः विनष्टानां कुलालशरीरदण्डचक्रादिव्यापाराणां कालान्तरभाविघटादिहेतुत्वं नैवास्ति । इति राजप्रश्नाशयस्तस्य स्थूलशरीरं तूपनेत्रवत् द्वारमात्रं ततः स्थूलशरीरस्य तत्कृतकर्मणश्च विनाशेऽपि लिङ्गभूतस्य मनसो तदभिमानिनः क्षेत्रज्ञस्य चानाशात् देहान्तरेऽपि तदनुवृत्तेर्नोक्तदोषप्रसङ्ग इत्युत्तरम् । एतत्प्रपञ्चः श्रीभाष्यादौ तदधिगमाधिकरणे स्पष्टः ॥ ६१ ॥ लिङ्गात्मनोरनुवृत्त्या भोगोपपत्तिं दृष्टान्तेन स्पष्टयति । शयानमिति । यथा पुरुषः शयानम् इमं जाग्रद्देहं श्वसन्तं जीवन्तं सन्तमेव उत्सृज्य तदभिमानं त्यक्त्वा । आत्मनि मनसि आहितं संस्काररूपेण दैवोपसादितं कर्म स्वप्नद्रष्ट्रेकानुभाव्यं यत्कालमात्रावस्थायि सुखदुःखादिकर्मफलमित्यर्थः । तादृशेन शयानदेहसदृशेन इतरेणान्येन वा देवादिदेहेन स्वप्ने इति शेषः । भुङ्क्ते लिङ्गात्मनोरनुवृत्तेर्लोकान्तरेऽपि तथैवेति भावः ॥ ६२ ॥ ननु अनेन दृष्टान्तेन लिङ्गविशिष्टस्य भोक्तृत्वं भवतु नाम कर्त्तृत्वं तु दानप्रतिग्रहादिषु स्थूलविशिष्टस्यैव दृश्यते तत्राह । ममैत इति । एते पुत्रादयः मम असौ अहं ब्राह्मणः इति ब्रुवन् मनसा यत् यत् यं यं देहमित्यर्थः । गृह्णीयात् तत्तो देहात् राद्धं सिद्धं कर्म पुमान् गृह्णीयात् । येन अहंकारगृहीतेन कर्मणा पुनर्भूयः भवो जन्म भवति । अन्यथा जन्मानुपपत्तेरतोऽभिमन्तुः पुंसः मनोविशिष्टत्वात्तस्यैव कर्तृत्वममिमानविषयस्य देहस्य तु पुत्रादिदेहे समानतया द्वारमात्रत्वमेवेति भावः ॥ ६३ ॥

यदुक्तं कर्मणो विनष्टत्वान्नामुत्र भोग इति तत्खण्डनाय मनसः कर्मणः पूर्वजन्मनश्च सद्भावे प्रमाणमाह । यथेति । उभयैर्ज्ञानकर्मरूपैः इन्द्रियैर्हितैरिन्द्रियाणां कादाचित्कप्रवृत्तिभिः चित्तं मनः यथा अनुमीयते सर्वेन्द्रियविषयसंबन्धायुगपत्सर्वेन्द्रियविषयस्फूर्तिसंभवे युक्ते सत्यपि तेषां युगपत् ज्ञानानुत्पत्तिर्या इदमेव मनःसद्भावकारणं मनो न चेदात्मनः सर्वेन्द्रिय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फूर्तिः प्रतिक्षणं नवनवा न योग्या स्यात्तथा जायते यदा तदैवमनुमीयते किंचिन्मनोऽस्ति तच्च नवनवानिन्द्रियार्थानुपादाय तांस्तान्संकल्पयत्सदात्मानंताननुभावयतीति भावः। तदुक्तमक्षपादेन 'युगपत् ज्ञानानुपपत्तिर्मनसो लिङ्गम्' इति। एवं चित्तवृत्तिभिः प्राग्देहजं पूर्वदेहकृतमपि कर्म लक्ष्यते। तासामपि युगपदनुपपत्तेः ततश्चित्तवृत्तय एव पूर्वदेहकृतकर्मणामनुमापका इति भावः ॥ ६४ ॥ पुनरपि तदेव विवृणोति नानुभूतमिति द्वाभ्याम्। नानुभूतमिति। अनेन वर्त्तमानकालीनेन देहेन क्वच कुत्रचिदपि न अनुभूतमनुभवविषयता न प्राप्तम् अनुपभुक्तमिति यावत्। अदृष्टं दृष्टिगोचरतां न प्राप्तम् अश्रुतं श्रवणविषयतां चापि न प्राप्तं यद्रूपं यदात्मकं यादृक् यत्प्रकारं च कदाचित्स्वप्नमनोरथप्रभृतिषु स्वप्नमनोरथादिसद्भावे सतीत्यर्थः। आत्मनि मनसि उपलभ्येत उपलभ्यते इह जन्मन्यननुभूतमपि किंचित्कदाचिद्बुद्धिस्थं जायते तच्चेच्छाविषयतया मनसि वर्त्तते एवेत्यर्थः ॥ ६५ ॥ ततः किमित्यत्राह। तेनेति। हे राजन् तेन हेतुना अस्य लिङ्गिनः वासनाश्रयस्य जीवस्येत्यर्थः। तादृशं तदनुभवादियुक्तं देहसंभवं पूर्वदेहसंबन्धं श्रद्धस्व निश्चयेन मन्यस्व। यतः अननुभूतः अर्थः मनः स्प्रष्टुं मनसि स्फूर्तिं प्राप्तुं न अर्हति। पूर्वकालाननुभूतोऽर्थः कदाचिदपि मनोरथविषयो न भवतीत्यर्थः। तथा चोक्तं शतानन्दमुनिभिरपि सुधासिन्धोर्द्विशताधिकैकचत्वारिंशत्तमे तरङ्गे 'अदृष्टाश्चाश्रुता येऽर्था इह जन्मनि तेऽपि चेत् स्वप्ने स्फुरेयुस्तर्ह्येतेऽनुभूताः पूर्वजन्मसु। तेषां वासनया नूनमन्तःकरणसंस्थया। स्फुरणं जायते स्वप्ने नान्यथेत्यवधार्यताम् ॥ ६६ ॥ किं च शुभाशुभमनोवृत्त्यैव शुभाशुभनिमित्तकानि भूतभविष्यत्शरीराणि ज्ञायन्ते इत्याह। मन एवेति। हे राजन् ते तव भद्रं मङ्गलमस्तु। अनेन सम्यगवधानार्थं शुभाशिषाभिनन्दनं कृतम्। भविष्यत उच्चत्वं प्राप्स्यतः तथैव न भविष्यतः नीचत्वं प्राप्स्यतः मनुष्यस्य पूर्वरूपाणि पूर्वानुभूतशरीराणि भाव्यशरीराणि चेति शेषः। मनः एव मनः शंसति मनः एव उदारत्वकृपणत्वादिवृत्तिभिः पूर्वमप्येवमेवासीत् पश्चादप्येवमेव भविष्यतीति बोधयतीत्यर्थः ॥ ६७ ॥

ननु कस्मिंश्चित्काले किंचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रः दिवा नक्षत्राणि स्वशिरश्छेदश्च तत्कथमित्यत आह। अदृष्टमिति। अत्रास्मिन् जन्मनि क्वचिदपि अदृष्टम् अश्रुतं च मनसि यथा येन प्रकारेण दृश्यते मनोरथगोचरीभवतीत्यर्थः। तथा तेन प्रकारेण देशकालक्रियाश्रयं देशाश्रयं कालाश्रयं क्रियाश्रयं च अनुमन्तव्यम्। पर्वतसमुद्रादीनां संबन्धस्याननुभूतत्वेऽपि विस्खलितानां तेषां दृष्टत्वाच्छ्रुतत्वाच्चान्यदेशमाश्रित्य वर्त्तमानं समुद्रप्रभृतिकं पर्वताग्रे निशाकालाश्रयं नक्षत्रादिकं दिवा अभ्यङ्गादिक्रियाश्रयं स्वशिरश्छेदनादि निद्रादिकेन दोषेण हि तथा प्रतीयते इत्यनुमन्तव्यम् ॥ ६८ ॥ ननु कदाचिद्दरिद्रः स्वं महाराजं पश्यति असंभावितं तत् कथं संभावितत्तां यायात्तत्राह। सर्व इति। सर्वे इन्द्रियगोचरा इन्द्रियविषयभूतार्थाः अद्रष्टुरश्रोतुश्चापीति शेषः। मनसि क्रियानुरोधेन सामान्यभावेन वर्गशः आयान्ति भोग्यत्वेन प्रविशन्ति यान्ति भोगानन्तरं गच्छन्ति च मनस इत्थंभूतस्वभावत्वाददृष्टाश्रुतमपि पदार्थं मनस्तर्कगोचरतां नयतीत्यर्थः। यदि कश्चिदमना भवेत्तर्ह्येवं न स्यान्न त्वेतदस्तीत्याह। सर्वे जनाः समनसः भवन्तीत्यर्थः। सर्वेषां समनस्कत्वात् मनसि च सर्वार्थानां क्रमेण प्रवेशात नात्यन्तादृष्टचरः कस्यापि कश्चिदर्थो भवतीति भावः ॥ ६९ ॥ तदेवं समग्रैरपि समग्रार्थाः पर्यायेण दृश्यन्ते इत्युक्तमधुना युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह। सत्त्वे एव एका मुख्या निष्ठावस्थितिर्यस्य तस्मिन् भगवत्पार्श्ववर्त्तिनि केवलभगवत्ध्यानपरे मनसि सति तत्र इदं वासनात्मनावस्थितं विषयजातम् उपरज्य संयोगं प्राप्य अवभासते। ननु प्रतीत्यनर्हस्य कथं तदावभास इति चेत्तत्प्रतीतिं दृष्टान्तेन दर्शयति। चन्द्रमसि उपरज्य तमो राहुरिव अवभासते। एवं शुद्धे मनसि सकलविषयसंस्फुरणं न सर्वप्रत्यक्षं किं तु योगिप्रत्यक्षम ॥ ७० ॥ तथाचानेन संदर्भेण स्थूलदेहनाशेऽपि लिङ्गदेहस्यानाशात् अन्यः कर्त्ता भोक्ता चान्य इत्युक्तं सोऽपि दोषोऽपहृतः तत्रेत्थं पुनः शङ्कते। लिङ्गदेहस्य स्थूलदेहद्वारा एव कर्तृत्वभोक्तृत्वे न तु केवलस्य तत्र कदाचित् स्थूलदेहाभाववता जीवस्य कर्तृत्वभोक्तृत्वाभावान्मुक्तिप्रसङ्गः प्राप्तः स्यादेव तत्राह नाहमिति। हे राजन् यावत् बुद्धिश्च मनश्च अक्षाणीन्द्रियाणि च अर्था विषयाश्च गुणाः सत्त्वादयश्च तेषां व्यूहः संघः अनादिमाननादित्वविशिष्टः सन् वर्त्तते तावत् यः अहं मम इति भावः अहं ममात्मकस्थूलदेहसंबन्ध इत्यर्थः। पुरुषे जीवे न व्यवधीयते विच्छिन्नो न भवति। हि। किं तु स्थूलदेहविनाशेऽपि स सूक्ष्मरूपेण तिष्ठत्येव एकतरविनाशेऽप्येकस्य सत्त्वात् यावल्लिङ्गदेहं सर्वथाहंभावस्य सुस्थत्वाच्च अविनष्ट एवेति भावः ॥ ७१ ॥

स्वापादावहंकाराद्यभावदर्शनात्तत्र तद्विच्छेदमाशङ्क्याह द्वाभ्याम्। सुप्तीति। सुप्तिः सुषुप्तिश्च मूर्च्छा च उपताप इष्टवियोगादिभवं महादुःखं च तेषु प्राणायनविघाततः प्राणशब्दवाच्येन्द्रियाणामयनस्य प्रवृत्तिलक्षणस्य निरोधात्। अहम् इति ज्ञानं नेहते न प्रकाशते। तथा मृत्युश्च प्रज्वारश्च तयोः अपि नेहते तत्र मृत्युरपमृत्युः प्रज्वारोऽतिशयिता रोगावस्था इन्द्रियैरहंकारास्पदवस्तुग्रहणे ह्यहंकारः स्फुरति नान्यथेत्यर्थः ॥ ७२ ॥ गर्भे इति। यूनस्तरुणस्य तदा तरुणत्वे एकादशविधम् एकादशेन्द्रियवृत्तिप्रसरणसत्तया स्फुटतोपेतं यत् लिङ्गमहंकरणात्मकं दृश्यते तत् गर्भे गर्भदशायां बाल्ये बालावस्थायाम अपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दात्सुषुप्त्यादौ च अपौष्कल्यात् प्राणायतनानामसंपूर्णत्वात् कुह्वाममावास्यायां चन्द्रमसः लिङ्गं रूपं यथा न दृश्यते तथा न दृश्यते ॥ ७३ ॥ अथाहंकारास्पदस्य स्थूलदेहस्योक्तरीत्याऽविच्छेदाद्वस्तुभूतार्थाभावेऽपि संसृतिनिवृत्तिर्नास्तीत्याह । अर्थे इति । एवं अर्थे अविद्यमाने अपि वस्तुत इति शेषः संसृतिः न निवर्त्तते अर्थाभावेऽप्यनर्थानिवृत्तौ दृष्टान्तः । विषयान् ध्यायतः अस्य विषयध्यानं कुर्वतोऽस्य जनस्येत्यर्थः । स्वप्ने यथा अनर्थागमः यथा स्वाप्नपदार्थानां प्रबोधदशायामविद्यमानत्वेऽपि यावत्स्वप्नार्थज्ञानं तावत् सुखदुःखाद्यनर्थानपगमस्तद्वदित्यर्थः ॥ ७४ ॥ एवं यावल्लिङ्गदेहं स्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्येतत्प्रपञ्चयति । एवमित्यादि सार्द्धैस्त्रिभिः । एवं पञ्चविधं पञ्चतन्मात्रात्मकं त्रिवृत् त्रिगुणात्मकं षोडशविस्तृतम् एकादशेन्द्रियतदाश्रयप्राणादिपञ्चकोपेततया षोडशभावविस्तृतं लिङ्गं लिङ्गदेहः विद्यते एष लिङ्गदेहः चेतनया युक्तः जानामि इति ज्ञानाश्रयतया स्फुटतरमवभासमानः सन् जीवः इति अभिधीयते लिङ्गशरीरविशिष्टतया तदहमर्थभाक् जीव इत्यभिधीयते इत्यर्थः ॥ ७५ ॥ अनेनेति । अनेन लिङ्गदेहेन पुरुषो जीवः देहान् स्थूलशरीराणि उपादत्ते गृह्णाति विमुञ्चति च हर्षमागामिसुखविषयं ज्ञानं शोकं तदनाप्तिवार्त्ताश्रवणजं ज्ञानं भयमागामिदुःखविषयं ज्ञानं दुःखं सुखं च अनेन विन्दति ॥ ७६ ॥ नन्वेकं देहं विसृज्य देहान्तरप्रवेशात्पूर्वं विदेहता स्यादेव तत्राह । यथेति । यथा इयं तृणजलूका जन्तुविशेषः न अपयाति पूर्वतृणस्यात्यागात् अपयाति च तृणान्तरधारणात् इयं हि तृणान्तरं धृत्वैव पूर्वधृतं तृणं त्यजति इत्यर्थः । तथा म्रियमाणः सन्नपि जनः प्राग्देहाभिमतिं पूर्वदेहाभिमानं न त्यजेत् ॥ ७७ ॥

यावदिति । यावत् कर्मणां देहारम्भकाणां व्यवधानेन परिपाकदशाभावेन, अन्यदेहं न विन्देत, तावत् प्राग्देहाभिमतिं पूर्वदेहस्याभिमानं न त्यजेत् । संवत्सरपर्यन्तं न त्यजति । प्रकरणार्थमुपसंहरति । हे मनुष्येन्द्र प्राचीनबर्हिः, भूतानां प्राणिनां मनः एव भवभावनं संसारहेतुः भवति ॥ ७८ ॥ कथं सति तदाह । यदेति । यदा अक्षैरिन्द्रियैः, चरितान् पूर्वमुपभुक्तान् विषयान् ध्यायन् पाठान्तरे यद्येन मनसा ध्यायन् कर्माणि असकृद्वारंवारम् आचिनुते करोति । तदा मनः संसारहेतुरिति शेषः । नन्वसङ्गस्य कुतः कर्म तत्राह । कर्मणि सति अविद्यायां च सत्याम् अनात्मनः देहादेः कर्मणि बन्धः, भवति अविद्यया इति । बन्धः स्यात्कर्मणात्मन इति च पाठे, कर्मणि सति, अविद्यया कर्मकृतदेहेनाहंकारममकाररूपाविद्यया आत्मनः कर्मणा बन्धः स्यात् । अविद्यया कर्मकृतः बन्धः कर्म च विषयानुभवहेतुः, एवमविद्यया कर्म, कर्मणा चाविद्येत्यनादिः प्रवाह इति भावः ॥ ७९ ॥ तन्मोचनोपायमाह । अत इति । अतः तदपवादार्थं संसारापवादार्थम् अनर्थनिवृत्तये इत्यर्थः । सर्वात्मना सर्वप्रकारेण, हरिं भज । एवं सति संसारापवाद आत्माऽपारोक्ष्यं चापि भगवत्प्रसादादेव भवतीति भावः । कथंभूतः संस्तत्राह । विश्वं चिदचिदात्मकं जगत् तदात्मकं भगवदात्मकं पश्यन् विश्वस्य भगवदात्मकत्वे हेतुं वदन् हरिं विशिनष्टि । यतो हरेर्हेतोः, स्थित्युत्पत्त्यप्ययाः विश्वोत्पत्तिस्थितिप्रलयाः भवन्ति ॥ ८० ॥ संवादमुपसंहरति मुनिः । भागवतेति । भागवतमुख्यः भगवदेकान्तिकभक्तानां मध्ये अग्रगण्यः, भगवान् नारदः, हंसयोर्जीवपरयोः, गतिं स्वरूपं प्रदर्श्य उपदिश्य नृपं प्राचीनबर्हिषं आमन्त्र्यानुज्ञाप्य, ततः सिद्धलोकं ब्रह्मलोकम् अगमत् ॥ ८१ ॥ प्राचीनेति । ततः प्राचीनबर्हिः राजर्षिः, प्रजानां सर्गः सृष्टिश्च अभिरक्षणं तत्पालनं च तस्मिन् पुत्रान् आदिश्य, पुत्राणामादेशं मन्त्रिगामध्ये कथयित्वेत्यर्थः । कपिलाश्रयं तपसे तपश्चर्तुम् अगमत् ॥ ८२ ॥ तत्रेति । तत्र कपिलाश्रमे धीरः वशीकृतेन्द्रियः, एकाग्रमना एकाग्रचित्तः सन् गोविन्दचरणाम्बुजम् अनुभजन् विमुक्तः सर्वतः सङ्गो येन सः, एवंभूतः संश्च भक्त्या तत्साम्यतां निर्दोषतालक्षणं तस्य समानभावं मुक्तिमित्यर्थः । इयात्प्राप्तवान् ॥ ८३ ॥

अथैतच्छ्रवणश्रावणादिफलमाह । एतदिति । हे अनघ । देवर्षिणा नारदेन गीतम् एतत् अध्यात्मपारोक्ष्यं यः पुरुषः, श्रावयेत् यः शृणुयाच्च, सः लिङ्गेन लिङ्गदेहेन विमुच्यते मुक्तो भवेदित्यर्थः ॥ ८४ ॥ पुनरप्येतत्स्फुटमाह । एतदिति । एतदध्यात्मपारोक्ष्यं मुकुन्दयशसा युक्तमिति शेषः । अत एव भुवनं पुनानं पवित्रतापादकं देवर्षिषु वर्यो नारदस्तस्य मुखं तस्मात् निःसृतम् आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलप्रदं भवति । अतः कीर्त्यमानं तत् यः पुमान्, अधिगच्छति । स पुमान् मुक्तसमस्तबन्धः निरस्तसमस्तबन्धः सन् अस्मिन् भवे संसारे न भ्रमति ॥ ८५ ॥ उक्तार्थमुपसंहरति । अध्यात्मेति । अध्यात्मस्यात्मतत्त्वस्य पारोक्ष्यं परोक्षवादो यस्मिन् अत एव अद्भुतमाश्चर्यकरम् इदं पुरञ्जनाख्यानं मया तुभ्यम् अभिहितम् । एवं त्रिया बुद्ध्या संगतस्य पुंसः क्षेत्रज्ञस्य आश्रमः संसारः अहंकारो वा छिन्नः भवति । अमुत्र च परलोके । संशयः कर्मफलभोगरूपो भवदीयसंदेहश्च छिन्नः निरस्तः ॥ ८६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रिंशोऽध्यायः

विदुर उवाच

ये त्वयाभिहिता ब्रह्मन् सुताः प्राचीनबर्हिषः । ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ॥ १ ॥

वृत्तं वार्हिषदं प्रोक्तं प्रखङ्गादिह पञ्चभिः । प्रस्तुतं तत्सुतानां तत्पुनर्द्वाभ्यां प्रवर्ण्यते ॥ १ ॥
तपस्तुष्टेश्वरप्राप्तवरास्तत्र प्रचेतसः । आगत्योद्वाह्य वार्क्षीं स्वं राज्यं त्रिंशे व्यधुश्च ते ॥ २ ॥

प्रचेतसां वृत्तमसमाप्य तदन्तरे एव प्राचीनबर्हिषो वृत्तान्तं समीरितमिदानीं तद्वृत्तान्तशेषशुश्रूषया पुनर्विदुरः पृच्छति । य इति । हे ब्रह्मन्मैत्रेय प्राचीनबर्हिषः सुताः, त्वया अभिहिताः, ते प्रचेतसः रुद्रगीतेन स्तोत्रेण, हरिं प्रतोष्य प्रसन्नं कृत्वा, कां सिद्धिं फलम् आपुः ॥ १ ॥ किमिति । हे बार्हस्पत्य बृहस्पतेः शिष्य मैत्रेय, कस्यांचिद्विद्यायां मैत्रेयो बृहस्पतेः शिष्य इति ज्ञातव्यम् । प्रचेतसः पूर्वोक्तास्ते बार्हिषदाः, यदृच्छया आकस्मिकयोगेन, गिरिशं देवम् आसाद्य वा प्राप्यैव, अथानन्तरं कैवल्यनाथस्य मोक्षाधिपतेः भगवतः प्रियो यो रुद्रस्तस्य पार्श्ववर्त्तिनः, तेनानुगृहीताः सन्त इत्यर्थः । अथ कार्त्स्न्येन, परत्र परलोके, परं मोक्षं प्रापुः नूनम् । ततः पूर्वं त्विति शेषः । इहात्र लोके किं प्रापुः ॥ २ ॥

एवमापृष्टो मुनिः प्रचेतसां कथाया यदवशेषं तदाह । प्रचेतस इति । पितुः प्राचीनबर्हिषः आदेशकारिण आज्ञाकारिणः सन्तः प्रचेतसः उदधौ अन्तः समुद्रजलमध्ये जपयज्ञेन रुद्रगीतजपात्मयज्ञेन तपसा तदर्थालोचननिदिध्यासेन च निरञ्जनमपाप्मानं परमपुरुषं क्वचित्पुरञ्जनमित्यपि पाठस्तत्पक्षेऽपि पुराणां शरीराणां जननाज्जन्मना व्यञ्जयितृत्वात् पुरञ्जनं हरिमेव अतोषयन तोषितवन्तः ॥ ३ ॥ दशवर्षेति । सनातनोऽनादिसिद्धः पुरुषः परमपुरुषः श्रीहरिः तु दशवर्षसहस्रान्ते दशसहस्रसंख्यातवत्सरपर्यन्तविहिततपश्चर्यान्ते तेषां प्रचेतसां कृच्छ्रं तपःक्लेशं रुचा स्वकान्त्या शमयन् शान्तेन शुद्धसत्त्वमयेन वपुषा आविरभूत् ॥ ४ ॥ पुरुषं विशिनष्टि सुपर्णेति सार्द्धद्वयेन । सुपर्णेति । अम्बुदो नीलमेघः मेरोः शृङ्गम् इव सुपर्णस्य गरुडस्य स्कन्धम् आरूढः पीतं पिशङ्गं वासो वस्त्रं यस्य सः । मणिः कौस्तुभः ग्रीवायां यस्य सः दिश आशाः वितिमिराः प्रकाशबाहुल्याः कुर्वन् ॥ ५ ॥ काशिष्णुनेति । काशिष्णुना शोभमानेन कनकवद्वर्णो यस्य तच्च तद्विभूषणं च तेन अर्थाद्रत्ननिचितकुण्डलाभ्यामित्यर्थः । कपोलौ च वदनं च भ्राजद्विभ्राजमानं कपोलवदनं यस्य सः विलसत्किरीटः प्रकाशमानकिरीटयुक्तः अष्टायुधैः शङ्खचक्रगदापद्मशार्ङ्गशरखड्गखेटैरष्टभिर्हेतिभिः पद्मस्यायुधानन्तर्भूतत्वेऽपि छत्रिन्यायेनायुधपरत्वमत्र बोध्यम्, परशुपाशाङ्कुशाद्यन्यतमं वात्राष्टममायुधं बोध्यम् । अनुचरैः पार्षदैः मुनिभिः नारदादिभिः सुरेन्द्रैर्ब्रह्मादिभिश्च आसेवितः गरुड एव किंनरः तेन गीता पक्षस्वनेन कीर्त्तिर्यस्य सः गरुडस्य वेदात्मकपक्षध्वनिरत्र गरुडकिंनरशब्दविवक्षितो बोध्यः । यद्वा गरुडा गरुडजातीया ये किंनरास्तैर्गीता कीर्त्तिर्यस्य सः ॥ ६ ॥ पीनेति । पीनाश्च ते आयताश्चाष्टौ च ये भुजास्तेषां मण्डलं समूहस्तस्य मध्ये स्थिता या लक्ष्मीस्तयाऽऽस्पर्द्धन्ती संस्पर्द्धमाना श्रीः शोभा यस्यास्तया वनमालया परिवृतः आद्य आदौ भवः जगत्कारणभूत इति यावत् । इत्थंभूतः पुरुषः परमपुरुषो भगवान् प्रपन्नान्स्वैकशरणं प्राप्तान् बर्हिष्मतः सुतान् प्रति पर्जन्यनाद इव रुतं नादो यस्यास्तया वाचा सघृणः कृपायुक्तोऽवलोको यस्य तथाभूतः सन् आह ॥ ७ ॥ वरमिति । हे नृपनन्दनाः यूयं मे मत्तः वरं वृणीध्वं वो युष्माकं भद्रं मङ्गलम् अस्तु । यूयं सौहार्देन सुहृद्भावेन अपृथग्धर्माः तुल्यधर्माणः स्थ । अतः वो युष्माकं सौहृदेन सुहृद्भावेन अहं तुष्टः अस्मि ॥ ८ ॥

य इति । यः नरः अनुदितं संध्यायां सायंसंध्यासमये प्रातःसंध्यासमये चेत्यर्थः । युष्मान् अनुस्मरति । तस्य नरस्य भ्रातृषु आत्मसाम्यं स्वात्मनीव प्रीतिः तथा भूतेषु सौहृदं च भविष्यति ॥ ९ ॥ ये त्विति । ये नराः तु सायंप्रातः समाहिता एकाग्रचित्ताः सन्तः रुद्रगीतेन मां स्तुवन्ति तेभ्योऽपि अहं कामवरान्स्ववाञ्छितवरान् शोभनां प्रज्ञां च दास्ये किं पुनर्युष्मभ्यमिति शेषः ॥ १० ॥ यदिति । यद्यस्मात् यूयं पितुः आदेशमाज्ञां मुदा अन्विताः सन्तः अगृहीषुर्गृहीतवन्तः अतः वो युष्माकम् उशती कमनीया कीर्त्तिः लोकान् अनुभविष्यति लोके विस्तारं प्राप्स्यतीत्यर्थः ॥ ११ ॥ कण्डोर्मुनेर्दुहितरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यूयमुद्वहतेति कथयिष्यन्नादौ कण्डुं तत्कन्यां च पुत्रोत्पत्तये प्रस्तौति । भवितेति । यः पूर्वं ब्रह्मणः पुत्रः गुणैः अनवमः पितुरन्यूनो दक्षप्रजापतिः सः विश्रुतो दक्षानाम्नैव विख्यातः सन् युष्माकं पुत्र इति शेषः भविता । एतां त्रिलोकीमपि आत्मवीर्येण पूरयिष्यति अतो भवत्पुत्रत्वेऽपि पुनः प्रजापतिरेव भवितेति भावः ॥ १५ ॥ कण्डोरिति । हे नृपनन्दनाः कण्डोः सकाशान् प्रम्लोचया तपोनाशार्थमिन्द्रप्रेषितप्रम्लोचाख्याप्सरोरूपस्त्रिया कमललोचना कन्या लब्ध्वा अपविद्धाशुभाभ्यां परित्यक्तां चाऽपि तां कन्यां भूरुहाः जगृहुः । दुहितृत्वेनान्वमन्यन्तेत्यर्थः । कण्डुनामा मुनिरतितपोयुक्त आसीत्तत्तपोभीत इन्द्रस्तत्तपसो भङ्गार्थं प्रम्लोचाप्सरसं प्रेषयामास । सा च तदन्तिकमुपेत्य स्वहावभावादिभिर्मुनिं तपसः पातयित्वा तेन बहुकालं रेमे । ततः सगर्भासन्नप्रसूतिकाला सा स्वर्गं गच्छन्ती सती कण्डोर्जातं गर्भं वृक्षेषु त्यक्त्वा जगाम । तदेतदत्रापविद्धपदेन सूचितम् ॥ १३ ॥ क्षुदिति । क्षुधा क्षामा पीडिता तस्याः अत एव रोदमानायाः मुखे आस्ये राजा वनस्पतीनां भूपतिः सः सोमश्चन्द्रः पीयूषवर्षिणीममृतस्राविणीं देशिनीं स्वतर्जन्यङ्गुलि दयान्वितः सन् निदधे निहितवान् । अनेनाप्सरोगर्भसंभवेनामृताहारेण च तस्या लावण्यं ऋगस्वेददौर्गन्ध्यादिराहित्यं चोक्तम् ॥ १४ ॥

प्रजेति । माम् अनुवर्त्तमानेन पित्रा बर्हिष्मता यूयं प्रजाविसर्गे आदिष्टा आज्ञापिताः अतः तत्र प्रजासर्गे निमित्ते वरारोहां तां कन्याम् उद्वहत । चिरं विलम्बं मा कुरुतेति शेषः ॥ १५ ॥ ननु बहूनां कथमेका भार्या स्यात्तत्राह । अपृथग्गीति । अपृथग्धर्मः शीलं च येषां तेषां सर्वेषां वो युष्माकम् अर्पितो भवत्स्वारोपित आशयोऽन्तःकरणं यया अपृथग्धर्मः शीलं च यस्याः सा इयं सुमध्यमा पत्नी भूयात् । भवतामङ्गना स्यात् । धर्मशीलयोरैक्यान्मद्वचनाच्च न दृष्टविरोध इति भावः ॥ १६ ॥ दिव्येति । दिव्यानि देवमानपरिच्छिन्नानि यानि वर्षसहस्राणि तेषां सहस्रम् अनन्तवर्षसहस्रमितकालपर्यन्तमित्यर्थः । अमितमोज इन्द्रियशक्तिर्येषां ते अहतौजस इति पाठे अप्रतिहतबला इत्यर्थः । तथाभूता यूयं मम अनुग्रहात् दिव्यान् भौमांश्च भोगान् भोक्ष्यथ वै दिव्यवर्षसहस्राणामित्यत्र सहस्रशब्दो बहुलवाची बोध्यः ॥१७॥ अथेति, अथानन्तरं अनपायिन्या अव्यभिचारिण्या मयि भक्त्या पक्वगुणदग्धकामादिमल आशयो येषां तथाभूताः सन्तः निरयान्नरकप्रायात् अतोऽस्मत्संसारात् निर्विद्य निर्वेदं प्राप्य मद्धाम मतस्थानम् उपयास्यथ प्राप्स्यथ ॥१८॥ ननु भौमभोगाभृतगृहसुखासक्तानामस्माकं तदासक्त्या बन्धः स्यात्कुतस्त्वद्भक्तिर्वैराग्यं वा तत्राह । गृहेष्विति । गृहेषु आविशतां प्रविष्टानां चापि कुशलमनभिसंहितफलं कर्म येषां तेषां मद्वार्त्तायातयामानां मत्कथाक्षपितकालानां पुंसां गृहाः बन्धाय न मताः । बन्धका न भवन्तीत्यर्थः ॥ १९ ॥ त्वद्वार्त्ताश्रोतॄणां गृहा न बन्धकाः कुतस्तत्राह । नव्यवदिति । किं च यद्यस्मान्मत्कथाश्रवणात् ज्ञः सर्वज्ञोऽहमीश्वरः ब्रह्मवादिभिः प्रवक्तृभिर्निमित्तभूतैः सद्भिः श्रोतॄणां हृत् हृदयं नव्यवत् प्रतिपदं नूतनवत् अये प्राप्नोमि शास्त्रे यद्ब्रह्मेत्यभिहितमस्ति तस्य साक्षात्कारो भवतीत्यर्थः । ननु त्वत्कथायाः श्रवणे कृते कथं ब्रह्मसाक्षात्कारस्तत्राह । ब्रह्मशास्त्रे यद्ब्रह्माभिहितम् अस्ति एतत् तदेतद्ब्रह्म अहमेव न मत्तः पृथगस्तीत्यर्थः । तत्र हेतुः यतो गताः यं मां प्राप्ताः सन्तः न मुह्यन्ति न शोचन्ति न हृष्यन्ति च मोहशोकहर्षान् न प्राप्नुवन्त्यतो मत्कथाश्रवणेन नव्यवन्मम हृद्याविर्भावादस्य मदाविर्भावस्यैव ब्रह्मसाक्षात्कारत्वात् गृहेषु वसतामपि न बन्ध इत्यर्थः ॥ २० ॥

एवं भगवतोक्ताः प्रचेतसस्तमेव जनार्दनं ब्रह्मस्वरूपं ज्ञात्वा तथात्वे गतसन्देहाः सन्तस्तमेवागृणन्नित्याह मैत्रेयः । एवमिति । एवमुक्तप्रकारेण ब्रुवाणं पुरुषार्थभाजनं पुरुषार्थानामाश्रयं पुरुषार्थान् भाजयति स्वाश्रितान् प्रापयतीति वा तं सुहृत्तमं जनार्दनं तस्य जनार्दनस्य दर्शनेन ध्वस्तानि तमोरजोमलानि क्रोधकामादीनि येषां ते प्रचेतसः प्राञ्जलयो बद्धाञ्जलयः सन्तः गद्गदया गिरा अगृणन् तुष्टुवुः ॥ २१ ॥ नमो नम इति । क्लेशानामाध्यात्मिकादिदुःखानां विनाशनो विनाशकस्तस्मै नमो नमः । आदरे वीप्सा । निरूपितान्युदारगुणा आह्वयानि नामानि च यस्य तस्मै मनसो वचसश्च यो वेगस्तस्मादपि पुरोऽग्रगः जवो वेगो यस्य तस्मै मनोवचसोरगोचरायेत्यर्थः । सर्वाणि यानि अक्षाणीन्द्रियाणि तेषां मार्गा वृत्तयस्तैरगतोऽविषयीकृतः अध्वा प्राप्त्युपायो यस्य तस्मै नमः ॥ २२ ॥ शुद्धायेति । शुद्धाय कर्मोपाधिरहिताय शान्तायोर्मिषट्करहिताय अपगता निवृत्ता इति यावत् । अर्था विषया यस्मात्तत्तस्मिन् स्वस्मिन्स्वकीयेष्टदेवस्वरूपे निष्ठा यस्य तत्तस्मिन् मनसि विषयगन्धवर्जिते स्वेष्टदेवस्वरूपध्याननिष्ठावति भगवद्भक्तमनसि सतीत्यर्थः । विलसद्विगलत् द्वयं दिव्यमानवभावद्वैतं येन तस्मै विलसदित्यस्य विगलदित्यर्थो धातूनामनेकार्थत्वात् । नमः । जगतां ये स्थानलयोदयास्तेषु जगत्स्थितिलयोत्पत्त्यर्थमित्यर्थः । गृहीताः मायया संकल्पात्मकज्ञानेन गुणविग्रहा ब्रह्मादिगुणात्मकशरीराणि येन तस्मै नमः ॥ २३ ॥ नम इति । विशुद्धं सत्त्वं सत्त्वात्मकस्वरूपं यस्य तस्मै हरये स्वाश्रितबन्धहारिणे हरिमेधसे संसारहरमनीषाय वासुदेवाय सर्वभूतान्तरात्मने कृष्णाय सदानन्दरूपाय सर्वसात्त्वतां सकलस्वभक्तजनानां प्रभवे भक्तजनानुग्रहविधानसमर्थाय नमः ॥ २४ ॥ नम इति । कमलं जगदुत्पत्तिस्थानात्मकं पद्मं नाभौ यस्य तस्मै नमः । कमलानां मालास्यास्तीति तस्मै । आर्षो मत्वर्थीयः 'अत इनिठनौ' इति तपरकरणात् । नमः । कमलवत्पादौ सुगन्धी सुन्दरौ च चरणौ यस्य तस्मै नमः । कमले इवेक्षणे यस्य तत्संबुद्धौ हे भगवन् ते तुभ्यं नमः ॥ २५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम इति। कमलकिञ्जल्कवत्पिशङ्गममलं वासो वस्त्रं यस्य तस्मै नमः। सर्वभूतनिवासाय सकलभूतैकाधाराय साक्षिणे सर्वसाक्षात्द्रष्ट्रे तुभ्यं नमः युष्मद्महि करवाम ॥ २६ ॥ यदुक्तं वरं वृणीध्वमिति तन्मनसि विधायादौ भगवद्दर्शनेनैवात्मनामवाप्तसमस्तपुरुषार्थतामाह। रूपमिति। अशेषाणां क्लेशानां संक्षयो यस्मात्तत् एतत् रूपं तु भगवता त्वया क्लिष्टानां तापत्रयातुराणां नोऽस्माकम् आविष्कृतं पुरः प्रकटीकृतम् अन्यदस्मादितरत् किम् अनुकम्पितम् अस्ति। कर्त्तव्या यानुकम्पा सा तु त्वया दर्शनप्रदानेन कृतैवातो नास्माभिर्वरणीयोऽस्तीति भावः ॥ २७ ॥ एतावदेवेति। हे अभद्ररन्धन अमङ्गलनिरासक, दीनेषु वत्सलैः विभुभिः प्रभुभिः एतावत् एव भाव्यं कर्त्तव्यं किं तदित्यत्राह। स्वबुद्ध्या अस्मदीया भवन्त्येते इति निजमनीषया काले स्मरणपथनयनोचितावसरे अनुस्मर्यते। यत् एतावदिति संबन्धः ॥ २८ ॥ येनेति। येन भवत्कृतानुस्मरणेन क्षुल्लकानां क्षुद्राणाम् अपि उपशान्तिः स्यात्। दुरितोपशान्तिपूर्वकं सुखं भवेदित्यर्थः। किं च भूतानाम् अन्तर्हृदये अन्तर्हितोऽन्तर्यामित्वेन स्थितः भवान्। समीहितां कामयमानानां नोऽस्माकम् आशिषः कस्माद्धेतोः न वेद अस्मदन्तःस्थितकामान् भवान् जानात्येवेत्यर्थः ॥ २९ ॥ असाविति। येषाम् अस्माकं भगवान् प्रसन्नः हे जगतः पते असौ एव ईप्सितः वरः यतः त्वम् अपवर्गगुरुः मोक्षसाधनभूतभक्तिमार्गोपदेष्टा गतिरपवर्गसाधनभूतश्च भवसि अः स्ववाञ्छितं भवद्भिर्वक्तव्यमिति सम्यगाग्रहो न कार्य इति भावः ॥ ३० ॥ वरमिति। अथापि यद्यप्येवमस्ति तथापि हे नाथ परतो देहविलक्षणादात्मनोऽपि पराद्विलक्षणात् त्वत्त्वत्तः वरं वृणीमहे। परं तु त्वद्विभूतीनाम् अन्तः न हि अस्ति अतः यः त्वम् अनन्तः इति गीयसे वेदैरिति शेषः। अतो वरवरणनिर्धारो न प्राप्यते इति भावः ॥ ३१ ॥ भागवतसङ्गलभ्यत्वद्गुणानुभवमन्तरेणान्यं न वृणीमहे इत्याहुः। पारिजातकल्पतरौ अञ्जसानायासेन लब्धे सति सारङ्गो भृङ्गः अन्यद्वृक्षान्तरं न सेवते। एवं साक्षात् त्वदङ्घ्रिमूलं निरतिशयसुखावहं त्वदङ्घ्रिमित्यर्थः। आसाद्य किं किं वृणीमहे न किमपीत्यर्थः ॥ ३२ ॥

अत एतावदेव प्रार्थयाम इत्याहुः। ययावदिति। हे हरे ते तव मायया स्पृष्टा मोहिताः सन्तः वयं कर्मभिः इह संसारे यावत् भ्रमामः तावत् भवतः प्रसङ्गो येषां तेषां साक्षाद्भगवत्सङ्गवतां भागवतानां साधूनां सङ्गः भवे भवे, प्रतिजन्मेत्यर्थः। नोऽस्माकं स्यात्। एष एव वरोऽस्माकं वरणीयो भवतीति भावः ॥ ३३ ॥ ननु राज्यभोगस्वर्गापवर्गादीन् हित्वा किमिदं प्राय॑र्थ्यते तत्राहुः। तुलयामेति। भगवत्सङ्गिनः साक्षाद्भगवत्संबन्धवन्तः साधुजनास्तेषां यः सङ्गस्तस्य लवेन लेशेनापि स्वर्गं स्वर्गसुखं न तुलयाम न तुल्यं मन्यामहे। अपुनर्भवं कैवल्यापवर्गमपि न तुलयाम। तर्हि मर्त्यानां मरणधर्मवताम् आशिषो राज्यभोगादिरूपाः किमुत न किंचिदित्यर्थः ॥ ३४ ॥ सत्सङ्गस्य श्रैष्ठ्यं प्रपञ्चयति। यत्रेति त्रिभिः। यत्र येषु भागवतेषु मृष्टाः पापशोधिकाः मधुरा वा कथा भगवतो गुणचरित्रसंबन्धवत्यः कथाः ईड्यन्ते प्रस्तूयन्ते यतः याभ्यः श्रूयमाणाभ्यः कथाभ्य इत्यर्थः। तृष्णाया विषयबुभुत्सायाः प्रशमः प्रशान्तिः जायते। यत्र यस्मिन् सत्सङ्गे सति भूतेषु निर्वैरं वैराभावः जायते। यत्र सति कश्चन उद्वेग औदासीन्यं भयं वा न अस्ति ॥ ३५ ॥ यत्रेति। यत्र यासु सत्कथासु मुक्तसङ्गैस्त्यक्तग्राम्यविषयादिप्रसङ्गैः साधुभिः पुनः पुनः साक्षात् न्यासिनां परमा गतिः नारायणः प्रस्तूयते ॥ ३६ ॥ तेषामिति। तीर्थानां गङ्गादीनां पावनेच्छया गङ्गादीन्यपि तानि तीर्थानि पवित्रीकर्तुं वाञ्छया पद्भ्यां विचरतां तावकानां त्वदेकान्तिकभक्तानां तेषां सतां समागमः सङ्गः भीतस्य संसारात् भयं प्राप्तस्य किं न रोचेत अपि तु रोचेतैवेत्यर्थः ॥ ३७ ॥ सत्सङ्गस्य फलं त्वस्माभिरेवानुभूतमित्याहुः। वयं त्विति। हे भगवन् वयं तु प्रियस्य त्वत्प्रीतिपात्रस्य सख्युः सख्यभावेन त्वां सेवमानस्य सुदुश्चिकित्स्यस्यात्यन्तमचिकित्स्यस्य भवस्य संसाररूपस्य मृत्योः भवस्य वैद्यवद्वर्त्तमानस्य शिवस्य साक्षात् क्षणसंगमेन क्षणमात्रप्रसङ्गविधानेन भिषक्तमं संसृतिरूपरोगनिवारकं त्वा त्वाम् अद्य गतिं शरणं गताः प्राप्ताः स्मः ॥ ३८ ॥

एवं सत्सङ्गं वृत्वा वरान्तरं वृण्वते। यन्न इति। यत् नोऽस्माकं स्वधीतं सुष्ठु अधीतं यत् गुरवः प्रसादिताः, यत् विप्राश्च वृद्धाश्च आर्या गुर्वादयश्च, सदा अनुवृत्त्या नताः नमस्कृताः। यत् सुहृदः, भ्रातरश्च अनसूययैव, नताः, यत् सर्वाणि भूतानि च अनसूययैव नतानि ॥ ३९ ॥ यदिति। हे ईश यच्च निरन्धसां निरन्नानां नोऽस्माकम् अदभ्रं बहुकालम् अप्सु समुद्रमध्ये सुतप्तं तपः भवेत् तदेतत्सर्वं भूम्नः सर्वेश्वरस्य पुरुषस्य ते तव परितोषणाय भवतु। एतत् वृणीमहे इति द्वयोरेकसंबन्धः ॥ ४० ॥ अज्ञानामस्माकं भवतः स्तुतिर्न युक्तेत्याहुः। मनुरिति। मनुः स्वायंभुवः, स्वयंभूर्ब्रह्मा, भगवान् भवः शिवः, ये च, अन्ये, तपश्च ज्ञानं च ताभ्यां कर्मयोगज्ञानयोगाभ्यां विशुद्धं सत्त्वमन्तःकरणं येषां तेऽपि, यस्य तव महिम्नः, न दृष्टः पारो यैस्ते तथाभूताः सन्तोऽपि, त्वा त्वाम् आत्मसमं स्वमत्यनुरूपं यथा तथा स्तुवन्ति। अथो अतो हेतोः वयम् अपि आत्मसमं गृणीमः ॥ ४१ ॥ एवमात्मनां स्तुत्यनर्हतामाविष्कृत्य स्तुवन्तो नमस्कुर्वन्ति। नम इति। समाय सर्वभूतसमाय, वैषम्यरहितायेत्यर्थः। तत्र हेतुः। शुद्धाय पापरहितत्वाद्विशुद्धाय, पराय पुरुषाय, परमपुरुषायेत्यर्थः। वासुदेवाय सर्वान्तरात्मने सत्त्वाय शुद्धसत्त्वमूर्त्तये, भगवते तुभ्यं नमो नमः। चोऽवधारणे ॥ ४२ ॥ इतीति। इत्येवं प्रचेतोभिः अभिष्टुतः हरिः, भगवान् यतः शरण्यवत्सलः, अतः प्रीतः सन् तथेति आह। युष्मद्वरणानुसारेण युष्मदिष्टसिद्धिरस्त्वित्याहेत्यर्थः। अतृप्तानि स्खलावण्या-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नुभवेन तृप्तिरहितानि चक्षूंषि येषां तेषाम् अत एव यानं स्वप्रस्थानम् अनिच्छतां प्रचेतसां सताम् अनपवर्गवीर्यः अपारपराक्रमो भगवान् स्वधाम ययौ ॥ ४३ ॥ अथेति । अथानन्तरं प्रचेतसः उदन्वतः समुद्रस्य सलिलाज्जलात् निर्याय निर्गत्य, गां स्वर्गं रोद्धुम् इव, उच्छ्रितैरुन्नततां प्राप्तैः, द्रुमैस्तरुभिः, गां महीं छन्नां वीक्ष्य द्रुमेभ्य इति शेषः । अकुप्यन् । प्राचीनबर्हिषः प्रव्रजितत्वादराजके कृष्याद्यभावात्प्रवृद्धद्रुमच्छन्नत्वं भुवो बोध्यम् ॥ ४४ ॥ तत इति । हे राजन् राजपुत्र विदुर ततः महीं निर्वीरुधं वीरुद्रहितां कर्त्तुम् अत्यये प्रलयकाले संवर्त्तकः कालाग्निरुद्र इव ते प्रचेतसः रुषा, मुखतः अग्निमारुतौ असृजन्निति युक्तवन्तः ॥४५॥

भस्मसादिति । पितामहो ब्रह्मा, भस्मसात् क्रियमाणान् मुखाग्निवायुभ्यां भस्मशेषीकृतानित्यर्थः । तान् द्रुमान् वीक्ष्य आगतस्तत्र समायातः सन् नयैर्नीतिवाक्यैः, बर्हिष्मतः पुत्रान् शमयामास शान्तान् अकरोत् ॥ ४६ ॥ तत्रेति । तत्र तेषु प्रचेतस्सु शान्तेषु सत्स्वित्यर्थः । अवशिष्टाः ये वृक्षाः, वृक्षाभिमानिदेवताः, भीताः सन्तः, स्वयंभुवा उपदिष्टाः सन्तश्च, तद् दुहितरं प्रचेतोभ्यः उपाजह्रुः, समर्पयामासुः ॥ ४७ ॥ ते चेति । ते प्रचेतसः चापि, ब्रह्मणः आदेशात् निदेशतः, मारिषां मारिषाख्यां स्त्रियम् उपयेमिरे । यस्यां मारिषायाम् अजनो ब्रह्मा स एव योनिस्तज्जोऽजनयोनिजः, दक्षः दक्षाख्यब्रह्मसूनुः, महद्दवज्ञानात् महतः शिवस्यावहेलनात् अजनि ब्रह्मपुत्रः सन्नपि महदपराधात्क्षत्रियजातौ प्रचेतोभ्यः पुत्रोऽभूत्तथाविधां ते तामुपयेमिरे इत्यर्थः ॥ ४८ ॥ चाक्षुष इति । चाक्षुषे अन्तरे मन्वन्तरे, प्राप्ते सति, प्राक्सर्गे पूर्वमन्वन्तरसर्गे कालविद्रुते कालेन नाशं प्राप्ते सति तुश्चार्थे । दैवचोदितो भगवता प्रेरितः सन् यः, इष्टाः प्रजाः ससर्ज । स दक्षः मारिषायां जात इति संबन्धः । अत्रापि तस्य दक्षनामैवासीदिति भावः ॥ ४९ ॥ तस्य द्वितीयजन्मन्यपि दक्षशब्दप्रवृत्तिनिमित्तमाह । य इति । यो दक्षः जायमानः सन् स्वयात्मीयया रुचा प्रभया, सर्वेषां तेजस्विनां तेजः उपादत्ताच्छादितवान् एवंभूतात् दाक्ष्याद्दक्षतोपेतत्वात् कर्मणा च कर्मणि दक्षत्वाच्चेत्यर्थः । यं दक्षम् अब्रुवन् लोका इति शेषः ॥ ५० ॥ तमिति । हे भरतर्षभ अनादिर्ब्रह्मा तं दक्षं प्रजासर्गरक्षायां प्रजानां सर्गे रक्षायां चेत्यर्थः । युयोज । अनादिरभिषिच्य चेति पाठे अभिषिच्याभिषेकं कृत्वा युयोज स दक्षश्चापि वै निश्चयेन अन्यान् सर्वप्रजापतीन् युयुजे । ब्रह्मणा प्रजासर्गनियुक्तः स्वयं दक्षोऽप्यन्यान्मरीच्यादीनपि तद्व्यापारे नियुक्तवान् ॥ ५१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे त्रिंशोऽध्यायः ॥ ३० ॥

——:※:——

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथैकत्रिंशोऽध्यायः

मैत्रेय उवाच

तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम् । स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन् गृहात् ॥ १ ॥

दक्षे सुते धुरं न्यस्य वनयातप्रचेतसाम् । एकत्रिंशे नारदोक्ताध्वना मुक्तिरुदीरिता ॥ १ ॥

इत्थं तपःसंतोषितप्रत्यक्षितपरमात्मानो बर्हिषत्पुत्रा मारिषामुपगम्य तस्यां पुत्रमुत्पादयांचक्रुरित्युक्तमथेश्वरादिष्टदिव्यवर्षसहस्राणां सहस्रवर्षपर्यन्तानुभूतराज्यभोगास्ते प्रचेतस आत्मजारोपितराज्यभाराः संसादितजाजलिमुन्याश्रमा नारदोपदिष्टात्मपरमात्मयाथात्म्या उपासितपरमात्मानस्तत्पदमवापुरिति कथयन्नुपसंहरत्येकत्रिंशे मुनिः । तत इति । ततः दिव्यवर्षसहस्राणां सहस्रान्ते इत्यर्थः । उत्पन्नविज्ञानाः समुत्पन्नविवेकज्ञानाः ते प्रचेतसः अधोक्षजभाषितं स्मरन्तः सन्तः आत्मजे भार्यां विसृज्य भार्यापोषणमात्मजाधीनं कृत्वा आशु सद्य एव गृहात् प्राव्रजन् ॥ १ ॥ दीक्षिता इति । सर्वभूतेष्वात्मा परमात्मान्तर्यामितयावस्थितोऽस्तीत्येवंभूता मेधा ज्ञानं यस्मिंस्तेन सर्वात्मकब्रह्मोपासनात्मकज्ञानतेत्यर्थः । ब्रह्मसत्रेण ज्ञानयज्ञेन दीक्षिताः संकल्पितात्मपरमात्मविचारा इत्यर्थः । बभूवुरिति शेषः । क तथाभूतास्ते आसंस्तत्राह । प्रतीच्यां पश्चिमायां दिशि वेळायां समुद्रतटे तत्रापि यत्र जाजलिर्नाम ऋषिः सिद्धः अभूत् तत्र ॥ २ ॥ तानिति । निर्जिताः प्राणा मनः वचः गृहाश्च यैस्तान् जितं वशीकृतमासनं यैस्तान् शान्ता व्यापारवर्जिताः समानाः मूलाधारादारभ्य ऋजवो विग्रहा देहा येषां तान् परे सर्वविलक्षणे अमले दोषगन्धविवर्जिते ब्रह्मणि योजितः समर्पित आत्मा प्रत्यगात्मा यैस्तान् । तान् प्रचेतसः सुरासुरेड्यः सुरैरसुरैश्चात्मीयभावेन ईड्यः संस्तुत्यः नारदः ददृशे दृष्टवान् । स्मेति प्रसिद्धौ ॥ ३ ॥ तमिति । ते प्रचेतसः आगतं स्वान्तिके समायातं तं नारदं प्रति उत्थायाभ्युत्थानं कृत्वा प्रणिपत्य दण्डवत्प्रणम्य अभिनन्द्य गोत्रनामादिकं संकीर्त्य च यथादेशं यथाविधि पूजयित्वा सुखासीनं सुखं यथा स्यात्तथा मृदुलासनोपविष्टं मुनिं प्रति अथैवंविधः विधिविधानानन्तरम् अब्रुवन् ॥ ४ ॥ उक्तमेवाह । स्वागतमिति । हे सुरर्षे ते तव अद्य स्वागतं दिष्टया दैववशेन नोऽस्माकं दर्शनं गतः । अस्मदीयचक्षुर्विषयो जात इत्यर्थः । हे ब्रह्मन् तव चङ्क्रमणं लोकेषु संचरणं रवेः चङ्क्रमणं यथा तथा अभयाय लोकानामिति शेषः । सूर्यचङ्क्रमणं हि यथा समीहितसाधनानुष्ठानेन लोकभयनिवृत्तये तथा भवच्चङ्क्रमणं मुक्तिसाधनोपदेशेन लोकभयनिवृत्तये भवतीत्यर्थः ॥ ५ ॥ यदिति । हे प्रभो भगवता शिवेन तथाभूतेन अथोक्षजेन च यदात्मतत्त्वम् आदिष्टमुपदिष्टं तत्तु गृहेषु प्रसक्तानां न प्रायशः क्षपितं विस्मृतम् ॥ ६ ॥

तदिति । तत्त्वानां प्रकृतिपुरुषेश्वरादितत्त्वानाम् अर्थानां च दर्शनं यस्मिंस्तत् अध्यात्ममात्मपरमात्मस्वरूपसंबन्धि तदस्माभिर्यद्विस्मृतं तत् ज्ञानं नोऽस्मभ्यं प्रद्योतय प्रकाशय । येन त्वया प्रद्योतितेनाध्यात्मज्ञानेन दुस्तरं भवसागरं संसारार्णवम् अञ्जसा सुखेन तरिष्यामः ॥ ७ ॥ इतीति । इतीत्थं प्रचेतसा पृष्टः प्राधान्यादेकस्य निर्देशः । प्रचेतोभिः पृष्ट इत्यर्थः । प्रचेतसामिति पाठेऽपि अर्थस्त्वयमेव तथापि तदविधानं यत् तत् केषांचिन्मतेऽत्र कृद्योगलक्षणषष्ठीविचारादिति लक्ष्यते । छान्दसत्वे तु न तद्बाधः उत्तमश्लोके भगवति हरौ आविष्ट आसक्त आत्मा मनो यस्य तथाभूतः भगवान् नारदः मुनिः मुनीन्मननशीलान् प्रचेतसः प्रति अब्रवीत् । कचित्तु नृपानित्यपि पाठः । परं तु तद्भावस्यैतस्मिन्कालेऽविद्यमानत्वान्मुनित्वमेव युक्तम् ॥ ८ ॥ अहो गृहप्रसक्त्या श्रीहरेः सेवां विना सकलं सत्कुलजन्म सत्कर्माचरणादिकं व्यर्थतामापादितमिति तान् शोचन्नाह । तज्जन्मेति चतुर्भिः येन जन्मादिना विश्वात्मा ईश्वरः हरिः इह सेव्यते नृणां तत् जन्म कर्माणि तानि आयुः तत् मनः तत् वचः तत् भगवत्सेवाविधुरं जन्मादि व्यर्थमित्यर्थः ॥ ९ ॥ किमिति । इह लोके शौक्रं शुद्धमातृपितृभ्यामुत्पत्तिरूपं च सावित्रमुपनयननिमित्तकं च याज्ञिकं यज्ञदीक्षया प्राप्तं च तैः त्रिभिः जन्मभिः भगवत्सेवाविधुरैरिति शेषः । किं वा किं साध्यमस्ति । तथा त्रयीप्रोक्तैः ऋगादिवेदत्रयीविहितैः कर्मभिरपि किं साध्यं पुंसः विबुधायुषा वापि किं साध्यम् ॥ १० ॥ कुलेनेति । कुलेन सत्कुलजन्मप्राप्त्या किम् । तपसा बहुकालं तपश्चरणेन वा किम् । वचोभिः परमनोरञ्जकवाग्विलासैः किम् । चित्तवृत्तिभिः नानाकार्यविधानसामर्थ्यार्पितमानसपटुताभिः किम् । निपुणया प्राकृतनश्वरार्थसंपादनकुशलतावत्या बुद्ध्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वा किम्। बलेन सर्वातिशायिदेहसामर्थ्येन किम् इन्द्रियाणां यावज्जीवं पाटवेनापि किम् ॥ ११ ॥ किं चेति। योगेन प्राणायामाभ्यासतो सुसंयमनेनापि किं वा। सांख्येन देहादिव्यतिरिक्तात्मज्ञानसंसाधनमात्रेणापि किं वा। न्यासस्वाध्याययोरपि संन्यासस्वीकृतिवेदाध्ययनसंपादनाभ्यामपि किं वा। अन्यैः श्रेयोभिश्च श्रेयःसाधनभूतव्रतवैराग्यादिभिरपि किं वा यत्र येषु जन्मादिषु आत्मप्रदः हरिः न यैर्जन्मादिभिः स्वस्वरूपप्रदर्शनप्रदो हरिर्नाराधितस्तर्हि तैः साधितैरपि किं प्रयोजनमिति भावः ॥ १२ ॥

ननु प्रतिनियतफलानां जन्मादीनां भगवत्सेवावैधुर्यमात्रेण कुतो निन्द्यता तत्राह। श्रेयसामिति। अर्थतो वस्तुतः सर्वेषां सकलानामपि श्रेयसाम् आत्मा परमात्मा श्रीहरिः अवधिः परा काष्ठा। हि हरेरन्यच्छ्रेयो नास्त्येवेत्यर्थः। कुतः यतः हरिः सर्वेषां भूतानाम् अपि आत्मान्तर्यामी प्रियः निरतिशयप्रीतिविषयः आत्मदः स्वात्मपर्यन्तपुरुषार्थप्रदः भवति। अयं भावः। जीवसंबन्धाद्देहकलत्रापत्यगृहपश्वादिकं संबन्धपारंपर्येण व्यवस्थया प्रीतिविषयं भवतीत्थं विचारिते देहादेः सकाशादपि प्रत्यगात्मा प्रीतिविषयोऽयं तु तस्याप्यात्मा न केवलमेतावदेव किं तु बलिप्रभृतिभ्यः स्वात्मप्रदश्च ततः का वातोऽन्यः प्रीतिविषय इति ॥ १३ ॥ किं च नानाविधकर्मभिरुक्तदेवताप्रीतिनिमित्तान्यपि फलानि हरिप्रीत्या भवन्ति। हरेः सर्वदेवतान्तरात्मत्वात्। तत्तद्देवताराधने तु न किंचिदतः साक्षात्तदाराधनमेव सर्वदेवताप्रीतद्वारा समीहितपुरुषार्थहेतुरिति सदृष्टान्तमाह। यथेति। यथा तरोर्वृक्षस्य मूलनिषेचनेन तरुमूल एव जलसेकेनेत्यर्थः। तरस्कन्धभुजोपशाखाः तृप्यन्ति। तत्र मूलात्पृथग्विभागाः स्कन्धाः स्कन्धानां विभागाः भुजाः तेषामपि विभागाः उपशाखाः एतेषामुपलक्षणत्वान्मूलसेकात्पुष्पफलादयोऽपि तृप्यन्ति। यथा च प्राणोपहारात् प्राणाहुतिप्रदानतः अन्नभोजनादित्यर्थः। इन्द्रियाणां तृप्तिः न तु तत्तदिन्द्रियेषु पृथक् पृथगन्नलेपनेन तथा अच्युतेज्या अच्युताराधनमेव सर्वार्पणम्। सर्वदेवताराधनं न ततः पृथगित्यर्थः। अच्युतार्हणमेव सर्वदेवतार्हणसाध्यं फलं साधयतीति भावः ॥ १४ ॥ कुतोऽच्युतस्य सर्वकारणत्वादिति सदृष्टान्तमाह द्वाभ्याम्। यथैवेति। यथा वार आपः काले वर्षासमये सूर्यात् प्रभवन्ति काले पुनश्च, तस्मिन्सूर्ये एव प्रविशन्ति। एतस्याप्रसिद्धत्वात् दृष्टान्तान्तरमाह। यथा स्थिरजङ्गमानि स्थावरजङ्गमात्मकानि भूतानि भूतजातानि भूमावेव भूम्याः सकाशात्प्रभवन्ति पुनस्तस्यामेव प्रविशन्तीत्यर्थः। तथा गुणप्रवाहः गुणपरिणामरूपः प्रपञ्चः हरौ एव कारणभूताद्धरेरेवोद्भवति पुनस्तस्मिन्नेव लीनो भवतीत्यर्थः ॥ १५ ॥ एवं भगवतः सर्वकारणत्वमुक्तमथास्य सर्वात्मतामाह। एतदिति। तत् एतत् जगत आत्मनः परमात्मनः परं पदं निवासस्थानं गृहादिसाम्यताव्यावृत्त्यर्थमाह। सवितुः प्रभा यथा सवितुरपृथग्भूता सती शरीरमस्योच्यते तथा कृत्स्नं जगदपि परमात्मनोऽपृथक्सिद्धविशेषणतया शरीरमित्यर्थः। जगतोऽनित्यत्वात्तन्निरूपितमात्मत्वमपि परमात्मन्यनियतमित्याशङ्कां निराकर्तुं तद्विशिनष्टि। सकृद्विभातं सृष्टिदशायां स्थूलभावेन क्वचिद्विभातं भवति अनेन क्वचित्संहारदशायां सूक्ष्मतया नाभातमित्यपि विवक्षितम्। स्थूलसूक्ष्मधर्मयोर्निवृत्तौ जातायां सत्यामपि द्रव्यस्य नित्यत्वान्नात्मत्वस्य परमात्मन्यनियतत्वमिति भावः। एतदेव स्पष्टयितुं जगतः सकृद्भानाभानयोर्दृष्टान्तमाह। यथेति। यथा असव इन्द्रियाणि जाग्रति स्वस्वकर्मणि व्याप्रीयन्ते इति शेषः। कदाचित् द्रव्यं भूतपञ्चकं च क्रियाः कर्मेन्द्रियाणि च ज्ञानं ज्ञानेन्द्रियाणि च तैर्यौ भिदाभ्रमौ तयोरत्ययो यस्मिंस्तथाभूते सुषुप्तभावे इति शेषः। सुप्तशक्तयः निवृत्तव्यापाराः भवन्ति। एवं जगत आविर्भावतिरोभावनिमित्ते भानाभाने न त्वेतावता द्रव्यानित्यताशङ्केति भावः ॥ १६ ॥ एतदेव दृष्टान्तान्तरेण साधयति। यथेति। यथा नभसि आकाशे अभ्रम् अतः मेघस्य प्रकाशाः कदाचित् भवन्ति। कदाचित् न भवन्ति। न तद्भानाभावमात्रेण मेघस्यासत्यता शङ्कितुं युक्ता। हे भूपाः एवं प्रवाहाः प्रवहमानाः अमूः रजः तमः सत्त्वम् इत्येवंरूपाः शक्तयः तु अनुक्रमात् परे ब्रह्मणि कदाचित् भवन्ति। प्रकाशमाना इति शेषः। कदाचित न भवन्ति ॥ १७ ॥

तेनेति। तेन स्थूलत्वसूक्ष्मत्वादीनामवस्थानामनित्यत्वेऽपि तदाश्रयस्य प्रकृतिपुरुषात्मकद्रव्यस्य नित्यत्वात्तस्य परमात्मानं प्रति नियतशरीरत्वेनेत्यर्थः। अशेषदेहिनाम् एकम् आत्मानं कालं कालशरीरकं प्रधानं प्रकृतिशरीरकं पुरुषं जीवशरीरकं स्वतेजसा स्वप्रकाशेन ध्वस्तः निरस्तः गुणप्रवाहः संसारोदयो यस्य तम् अनेन प्रकृतिसंबन्धप्रयुक्तसंसारित्वशङ्का निरस्ता। नियन्तृतया प्रकृतिसंबन्धो न तु जीवस्येव वश्यतयेति भावः। एवंभूतं परेशं सर्वपरेषां ब्रह्मादीनामपीश्वरमित्यर्थः। आत्मैकभावेन सर्वेषामात्मनामेकान्तरात्मताबुद्ध्या अद्धा साक्षात् भजध्वम् ॥ १८ ॥ परेशस्वरूपं शोधयन्नाह। निरस्तेति। निरस्ता संकल्पविकल्पा यस्य तं भक्तानां निरस्तौ संकल्पविकल्पौ येनेति वा। अनेन बद्धजीवव्यावृत्तिरुक्ता। अद्वयं सजातीयद्वितीयवस्त्वभावादद्वितीयम् अनेन मुक्तजीवव्यावृत्तिरुक्ता। तेषां सजातीयसद्भावात्। द्वयं द्वैतमेवापवादो ब्रह्मज्ञानबाधकं तस्य उपरमे उपलम्भनं यस्य तं देहात्मभ्रमनिवृत्तौ प्राप्यमित्यर्थः। अनादिमध्यान्तमादिमध्यावसानवर्जितं संज्ञप्तिमात्रमजडस्वरूपम् अजस्रनिर्वृतं निरन्तरं निरवधिकातिशयसुखात्मकम् एवंभूतं परेशम् अमुया वक्ष्यमाणया दृशा भजत हि ॥ १९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमुयेत्युक्ताया दृशः साधनान्याह। दययेति। सर्वाणि च तानि भूतानि च तेपूच्चावचसकलभूतेष्वित्यर्थः। दयया यथोचितसत्कारविधानधीरूपकरुणया येन केन वा दैवाल्लब्धेनान्नादिना संतुष्ट्या संतोषेण सर्वेन्द्रियोपशान्त्या अन्तर्बाह्येन्द्रियनिग्रहेण च जनार्दनः आशु तुष्यति ॥ २० ॥

ततस्तुष्टो भगवांस्तं न कदाचित्त्यजतीत्याह। अपहृतेति। अपहृता निरस्ताः सकला एषणाः कामा यस्मात्स चासावमलात्मा निर्मलं मनस्तस्मिन् अविरतं निरन्तरम् एधिता चासौ भावना भक्तिस्तया उपहूतः संनिधापितः सन् अक्षरो हरिः, निजजनवशगत्वं यन् गच्छन्सन् छिद्रवदाकाशवत् सतां साधूनाम् आत्मनः सकाशात् न सरति, नापयाति हि ॥ २१ ॥ सतां वश्योऽसावसतां पूजामपि न गृह्णाति इत्याह। न भजतीति। अधनाः निर्द्धनाः सन्तोऽपि ये आत्मधना भगवद्धनास्ते प्रिया यस्य सः, 'स च मम प्रियः' इति भगवदुक्तेः। रसज्ञः भक्तसङ्गजन्यानन्दरसज्ञः, सः हरिः, कुमनीषिणां कुत्सितमतीनां कुसङ्गिजनानाम् ईज्यां महोपचारैः कृतां पूजां न भजति न गृह्णाति। के कुमनीषिणस्तत्राह। श्रुतं बहुशास्त्राध्ययनं च धनं स्वापतेयातिशयश्च कुलं सत्कुलजन्म च कर्म क्रियानैपुण्यं च तेषां मदैः, ये अकिंचनेषु विरक्तिमत्सु सत्सु साधुषु, पापं तिरस्कारं विदधति कुर्वन्ति ॥ २२ ॥ भगवतो भक्तपराधीनत्वं प्रपञ्चयंस्तं को न भजेदित्याह। श्रियमिति। स्वपूर्णः स्वत एवाप्तसमस्तकामः, निजभृत्यवर्गतन्त्रः स्वभृत्यवर्गानुरक्तः यो भगवान् अनुचरतीं सर्वदानुवर्त्तमानां चापि श्रियं तां तस्या वाश्रियोऽर्थिनः श्रीकटाक्षलेशकाङ्क्षिणः, द्विपदपतीन्नरेन्द्रान् विबुधान्देवांश्च, न भजति नानुवर्त्तते। एवंभूतम् अमुं भगवन्तं रसज्ञः भगवतो भक्तवत्सलतारसाभिज्ञः, पुमान् कथम् उद्विसृजेत् परित्यजेत ॥ २३ ॥ संवादमुपसंहरति मुनिः। इतीति त्रिभिः। हे राजन्विदुर प्राक्तनयमाभिप्रायेण राजन्निति संबोधनम् इत्युक्तप्रकाराः भगवत्कथाः, अन्याश्च नूनं सुनीतेरित्यादिध्रुवचरिताद्याश्च भगवत्कथाः, 'सत्त्रेऽगायत्प्रचेतसाम्' इत्युक्तत्वात। प्रचेतसः प्रति, श्रावयित्वा स्वायंभुवो ब्रह्मपुत्रः मुनिर्नारदः, ब्रह्मलोकं ययौ ॥ २४ ॥ तेऽपीति। ततः ते प्रचेतसोऽपि, तन्मुखनिर्यातं नारदमुखनिःसृतं लोकमलापहं सकललोकानामघहरं हरेः भगवतः, यशः निशम्य, तत्पादं भगवच्चरणारविन्दं ध्यायन्तः सन्तः, तद्गतिं भगवल्लोकं ययुरापुः ॥ २५ ॥

एतदिति। हे क्षत्तः विदुर, त्वं मां प्रति, यत् परिपृष्टवान् प्रचेतसां नारदस्य च संवादं संवादरूपं हरेः कीर्त्तनं यस्मिंस्तत् एतदाख्यानं ते तुभ्यम् अभिहितं मया कथितम् ॥ २६ ॥ स्कन्धार्थमुपसंहरन्नुत्तरस्कन्धप्रवृत्तिनिमित्तभूतशङ्कामुत्थापयन्नाह श्रीशुकः। एष इति द्वाभ्याम्। मानवस्य मनुपुत्रस्य, उत्तानपद उत्तानपादनृपतेः, यः वंशः, एषः अनुवर्णितः। अथ प्रियव्रतस्य, अपि नृपसंमतं राज्ञां संमतं वंशमिति शेषः। निबोध मत्तः शृणु। नृपसत्तमेति पाठे संबोधनम् ॥ २७ ॥ तद्वंशबुभुत्सायै समासतस्तच्चरितमाह। य इति। यः प्रियव्रतः, प्रथमं विरक्तया वनं प्रविष्ट इति शेषः। तत्र नारदात् आत्मविद्याम् अधिगम्य संप्राप्य, पुनः महीं भुक्त्वा परिपाल्य, पुत्रेभ्यः, ऐश्वर्यं राज्यं विसृज्य विभज्येति पाठे विभागेन दत्त्वा, पदं भगवत्पदं समगात्। भगवद्धाम प्राप्तवानित्यर्थः ॥ २८ ॥ विदुरमैत्रेयसंवादमुपसंहरति त्रिभिः। इदमिति। कौषारविणा मैत्रेयेण उपवर्णितम् अजितस्य भगवतो वादो गुणानुवादः सतां कथाश्च तत्समाहाररूपम् इदं तृतीयतुरीयस्कन्धोक्तमाख्यानं निशम्य तु, विवृद्धश्चासौ भावः स्नेहस्तेन या अश्रूणां कला मात्रास्ताभिराकुलोऽत्याकुलचित्तः, क्षत्ता विदुरः, मुनेर्मैत्रेयस्य, चरणं मूर्द्ध्ना हरेः चरणं च हृदा दधार। इमां त्विति पाठे कथां विशेषयित्वा व्याख्येयम् ॥ २९ ॥ स इति। हे तात पाठान्तरे सांप्रतं हे महायोगिन् करुणात्मना दयालुना, भवता यत्र तमसः पारे, अकिंचनैस्त्यागिभिर्गम्यते इत्यकिंचनगः, तमःपारवर्त्तमानत्यागिजनप्राप्य इत्यर्थः। हरिः लभ्यते तथाभूतः सः अयं तमसः पारः, संसारस्य पारप्राप्तिहेतुरुपाय इत्यर्थः। दर्शितः ॥ ३० ॥

इतीति। विदुरः इति वदन्सन् आनम्य प्रणम्य तं मैत्रेयम् अनुज्ञाप्यामन्त्र्य च निर्वृत आनन्दित आशयोऽन्तःकरणं यस्य सः पाठान्तरे निर्भृत आनन्दपूर्ण आशयो यस्य सः स्वानां ज्ञातीनां दिदृक्षुर्द्रष्टुमिच्छुः संश्च गजसाह्वयं हास्तिनपुरं प्रययौ ॥ ३१ ॥ विदुरमैत्रेयसंवादश्रवणादिफलमाह। एतदिति। हे राजन् हरावर्पित आत्मा मनो येषां तेषां राज्ञां स्वायंभुवमन्वादीनाम् एतच्चरित्रं यः शृणुयात् सः आयुः धनं यशः स्वस्ति मङ्गलं गतिं मुक्तिम् ऐश्वर्यम् आप्नुयात ॥ ३२ ॥

वृषकुलतिलकः सदेकनाथः श्रुतिगगीतगुणोदयाम्बुराशिः। निजजननिजधामसौख्यदाता मम हृदये वसतात्पितुः पिता मे ॥ १ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां चतुर्थस्कन्धे एकत्रिंशोऽध्यायः ॥ १३ ॥

॥ इति चतुर्थस्कन्धः समाप्तः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi